साहित्यदर्पणः ।

श्रीविश्वनाथकविराजकृतः ।

श्रीरामचरणतर्कवागीशकृतव्याख्यामवलम्ब्य
पण्डितकुलपतिना, वि, ए, उपाधिधारिणा
श्रीमज्जीवानन्द-विद्यासागर-भट्टाचार्य्येण
विरचितया
तथा
तदात्मजाभ्यां
पण्डित श्रीमदाशुबोध विद्याभूषण-
पण्डित-श्रीमन्नित्यबोध-विद्यारत्नाभ्यां
परिवर्द्धितया प्रतिसंस्कृतया च टीकया परिशोध्य प्रकाशितः ।

अष्टमं संस्करणम् ।

कलिकातामहानगर्य्याम्
वाचस्पत्ययन्त्रे
मुद्रितः ।

ASIATIC SOCIETY
CALCUTTA.
16 OCT 1969

ई १८३४ ।

सर्वं स्वत्वं संरक्षितम् । मूल्यं राजसमुद्रावलम् ।

प्रकाशक— पण्डित-श्रीआशुबोध-विद्याभूषण
तथा
पण्डित-श्रीनित्यबोध-विद्यारत्न।

प्राप्तिस्थान— २न०, रमानाथ मजुमदार ष्ट्रीट, आन्हार्ष्ट
ष्ट्रीट् पोष्ट-अफिस। कलिकाता।

प्रिण्टर—वि, वि, मुखर्जी।
२ न०, रमानाथ मजुमदार ष्ट्रीट्, कलिकाता।

मातृकाक्रमेण साहित्यदर्पणस्य सूचीपत्रम् ।

प्रकरणम् ।		परिच्छेदसङ्ख्या ।	कारिकासङ्ख्या ।
अ			
अक्षमा (नाट्यालं)	...	६	४८६
अक्षरसङ्घातः (नाट्यलक्षणम्)	...	६	४४७
अङ्कः (रूपकभेदः)	...	६	५३६
अङ्कमुखम् (मतान्तरञ्च)	...	६	३१६।३१७
अङ्कलक्षणम्	...	६	२८१
अङ्कावतारः	...	६	३१५
अतद्गुणः (अलं)	...	१०	७६८
अतिशयोक्तिलक्षणतद्भेदाः (अलं)	...	१०	७१४।७१५
अद्भुतरसः	...	३	२४१
अधिकपदताया गुणत्वम्	...	७	६१५
अधिकम् (अलं)	...	१०	७४४
अधिबलम् (गर्भसन्ध्यङ्गम्)	...	६	३७९
अधिबलम् (वीथ्यङ्गम्)	...	६	५४४
अध्यवसायः (नाट्यालं)	...	६	४९६
अनन्वयः (अलं)	...	१०	६८७
अनुकरणे दोषाणाम् अदोषत्वाख्यानम्	...	७	६२२
अनुकार्य्यरत्याद्युद्बोधस्य रसत्वप्रतिवादः	...	३	४८
अनुकूलनायकः	...	३	७५
अनुकूलम् (अलं)	...	१०	७३४
अनुक्तसिद्धिः (नाट्यलक्षणम्)	...	६	४८०
अनुनयः ,,	...	६	४६९
अनुप्रासः (अलं)	...	१०	६५३
अनुप्रासभेदाः	...	१०	६५९
अनुभावाः	...	३	१६६
अनुमानता (गर्भसन्ध्यङ्गम्)	...	६	३७५

प्रकरणम् ।	परिच्छेदसङ्ख्या ।	कारिकासङ्ख्या
अनुमानम् (अलं) ...	१०	७३२
अनुवृत्तिः (नाट्यालं) ...	६	५०६
अन्तःपुरसहायाः ...	३	८१
अन्त्यानुप्रासः (अलं) ...	१०	६५७
अन्वीक्षिकी ...	१०	७४५
अपजारः ...	३	१८४
अपह्नुतिः (अलं) (२) ...	१०	७०४।७०५
अप्रसीतदोषस्य गुणत्वम् ...	७	६०२।६०३
अप्रस्तुतप्रशंसाभेदाः ...	१०	७२७
अभिधाः व्यञ्जनायाः भेदकारणानि ...	५	२७१
अभिधामूला व्यञ्जना ...	२	२६
अभिधालक्षणयोः रसादिप्रतिपादने अक्षमत्वनिरूपणम् ...	५	२७१
अभिधावृत्तिकथनम् ...	२	१२
अभिधावृत्तिप्राधान्यम् ...	२	१२
अभिनयलक्षणविभागौ ...	६	२७७
अभिप्रायः (नाट्यलक्षणम्) ...	६	४५६
अभिमानः (नाट्यालं) ...	६	५०५
अभिसारस्त्रीलक्षणम् ...	३	१२०
अभिसारिकालक्षणम् ...	३	११८
अमर्षः ...	३	१८८
अर्थगतदोषाः ...	७	५९६
अर्थः [illegible]नसहायः ...	३	८१
अर्थवैविध्यकथनम् ...	२	
अर्थप्रकृतयः ...	६	३२०
अर्थभेदलक्षणम् ...	२	११
अर्थविशेषणम् (नाट्यालं) ...	६	५०२
अर्थशक्त्युद्भवध्वनेः प्रबन्धे अतिदेशः ...	४	२६५
अर्थशक्त्युद्भवव्यङ्ग्यध्वनेर्भेदाः (१२) ...	४	२६१

प्रकरणम् ।		परिच्छेदसङ्ख्या ।	कारिकासङ्ख्या ।
अर्थान्तरन्यासतद्दोषाः (अलं)	...	१०	७३०
अर्थापत्तिः	...	१०	७५८
„ (नाट्यालङ्कारः)	...	६	४७१
अर्थोपक्षेपकभेदप्रकाराः (५)	...	६	३११
अलङ्कारस्वरूपकथनम्	...	१०	६५१
अवपातनम् (आर० ह०)	...	६	४२५
अवलगितलक्षणम्	...	६	२९६
अवस्यन्दितम् (वीथ्यङ्गम्)	...	६	५४६
अवहित्था	...	३	१९०
अविचलितवाच्यध्वनेर्भेदौ	...	४	२१६
अश्लीलदोषस्य गुणत्वम्	...	७	६००
असङ्गतिः (अलं)	...	१०	७४०
असत्प्रलापः (वीथ्यङ्गम्)	...	६	५४८
असूया	...	३	२००

आ

आक्रन्दः (नाट्यालं)	...	६	४८४
आक्षेपलक्षणौ (अलं)	...	१०	७३५
आख्यानम् (नाट्यालं)	...	६	५१२
आख्यायिकालक्षणम्	...	६	५८८
आदानम् (विमर्शसन्धिः)	...	६	३९३
आधिकारिकप्रासङ्गिकौ (नाट्यवस्तुभेदौ)	...	६	२९९।३००
आनन्दः (निर्वहणसन्धिः)	...	६	४०३
आमुखभेदाः	...	६	२९१
आमुखलक्षणम्	...	६	२९०
आरभटीलक्षणं तद्दोषाश्च	...	६	४२९।४३०
आरभ्यः (नाट्यविद्या)	...	६	३२९
आर्यी व्यञ्जना तद्दोषगुणाश्च	...	२	२८।२९
आलम्बनविभावाः	...	३	६५
आवलनम्	...	३	१८७

प्रकरणम् ।		परिच्छेदसङ्ख्या ।	कारिकासङ्ख्या ।
आवेग:	...	३	१७५
आशंसा (नाट्यालं)	...	६	४९५
आशी: „	...	६	४८३
आशय: „	...	६	४८९
आसीनम् (लास्याङ्गम्)	...	६	५१९
	इ		
इर्ष्यामान:	...	३	२२३
इलामृगलक्षणम्	...	६	५३५
	उ		
उक्तप्रत्युक्तम् (लास्याङ्गम्)	...	६	५२६
उग्रता	...	३	१८०
उत्कीर्तनम् (नाट्यालं)	...	६	५०७
उत्तमोत्तमकम् (लास्याङ्गम्)	...	६	५२५
उत्तरम् (अलं)	...	१०	७५७
उत्तेजनम् (नाट्यालं)	...	६	४९९
उत्थापक: (मात्वतीवृत्तिभेद:)	...	६	४२५
उत्थापनम् (नाट्यालं)	...	६	४९०
उत्प्रेक्षास्वरूपनिर्देश: (अलं)	...	१०	७०७—७१३
उदात्तम् „	...	१०	७७३
उदाहरणम् (गर्भसन्ध्यङ्गम्)	...	६	३७२
„ (नाट्यालंकार:)	...	६	४४९
उद्घात्यकलक्षणम्	...	६	२९२
उद्दीपनविभाव:	...	३	१६४।१६५
उद्भेद: (मुखसन्ध्यङ्गम्)	...	६	३५२
उद्यम: (नाट्यालं)	...	६	४८८
उद्वेग: (गर्भसन्ध्यङ्गम्)	...	६	३८०
उन्माद:	...	३	१९२
उपक्षेप: (मुखसन्धि:)	...	६	३४३
उपगूहनम् (निर्वहणसन्ध्यङ्गम्)	...	६	४०५

प्रकरणम् ।		परिच्छेदसङ्ख्या ।	कारिकासङ्ख्या ।
उपदिष्टम् (नाट्यलक्षणम्)	...	६	४६०
उपदेशनम् (नाट्यालं)	...	६	५१५
उपन्यासः (प्रतिमुखसन्ध्यङ्गम्)	...	६	३६७
उपपत्तिः (नाट्यालं)	...	६	४९४
उपमा तद्भेदाः (अलं)	...	१०	६६७—६८६
उपमेयोपमा ,,	...	१०	६८८
उपरूपकभेदाः (दृश्यकाव्यम्)	...	६	२७९
उपादानलक्षणा (अजहत्स्वार्था)	...	२	१५
उल्लाप्यलक्षणम् (उपरूपकम्)	...	६	५६३
उल्लेखः (अलं)	...	१०	७०३
,, (नाट्यालं)	...	६	४९८
ए			
एकदेशविवर्त्तिन्युपमा (अलं)	...	१०	६८४
एकावली ,,	...	१०	७५१
ओ			
ओजः आदीनां दोषाभावत्वेनाङ्गीकारः	...	८	६३९
ओजोगुणः	...	८	६२९
ओजोव्यञ्जकाः	...	८	६३०
औ			
औत्सुक्यम्	...	३	१९१
औदार्य्यम् (नायिकाऽलङ्कारः)	...	३	१३८
क			
कथालक्षणम्	...	६	५८७
कथितपदत्वस्य गुणत्वम्	...	७	६०४
कथोद्घातलक्षणम्	...	६	२९३
कन्यकालक्षणम्	...	३	११९
कपटम् (नाट्यालं)	...	६	४८५
करणम् (मुखसन्ध्यङ्गम्)	...	६	३५२
करणलक्षणम्	...	६	५९१

प्रकरणम्।		परिच्छेदसङ्ख्या।	कारिकासङ्ख्या।
करुणरसः	...	३	२३४
करुणविप्रलम्भः	...	३	२२८
करुणविप्रलम्भ-करुणरसयोः भेदः	...	३	२३५
करुणादीनां रसत्वसंस्थापनम्	...	३	३५
कलहान्तरितालक्षणम्	...	३	१२१
कविवेद्यम्	...	६	३०७—३१०, ३१८—३२१, ३३४, ४१०—४१३, ४३७—४४२, ५८०—५८२
कविसमयख्यातानि	...	७	६१०
कष्टत्व दुःश्रवत्वयोः गुणत्वम्	...	७	६०६
कान्तिः (नायिकाऽलङ्कारः)	...	३	१३४
कान्तिः (शब्दगुणः)	...	८	६३७
कारणमाला (अलं)	...	१०	७४९
कार्य्यावस्थाः (५)	...	६	३२८
काव्यदोषेभ्यः पृथगलङ्कारदोषाणाम् असम्भवत्वप्रतिपादनम्	...		५९८
काव्यनिष्ठगुणादिस्वरूपम्	...	१	५
काव्यनिष्ठदोषस्वरूपम्	...	१	४
काव्यफलानि	...	१	२
काव्यम् (उपरूपकम्)	...	६	५६४
काव्यलक्षणम्	...	६	५८३
काव्यलिङ्गम् (अलं)	...	१०	७३१
काव्यसंहारः (निर्वहणसन्धिः)	...	६	४०८
काव्यस्य द्विविधभेदौ	...	४	२५३
काव्यस्वरूपम्	...	१	३
किलकिञ्चितम् (नायिकाऽलङ्कारः)	...	३	१४४
कुट्टमितम्	...	३	१४६
कुतूहलम्	...	३	१५४
कुलजावेश्याप्रेष्याणामभिसारावस्थाकथनम्	...	३	११९

प्रकरणम् ।		परिच्छेदसङ्ख्या ।	कारिकासङ्ख्या ।
कुलटालक्षणम्	...	३	११२
कृतिः (निर्वहणसन्ध्यङ्गम्)	...	६	४०१
केलिः (नायिकाऽलङ्कारः)	...	३	१५७
कोषलक्षणम्	...	६	५८५
कौशिकी वृत्तिस्तदङ्गानि च	...	६	४१६।४१७
क्रमः (गर्भसन्ध्यङ्गम्)	...	६	३७३
क्षिप्तिः „	...	६	३७७
क्षोभः (नाट्यालं)	...	६	४९२
ख			
खण्डकाव्यलक्षणम्	...	६	५८४
खण्डनोपलक्षणम्	...	८	६४३
खण्डितालक्षणम्	...	३	११७
खेदः (विमर्शसन्ध्यङ्गम्)	...	६	३८९
ख्यातविरुद्धतादोषस्य गुणत्वम्	...	७	६०९
ग			
गण्डम् (वीथ्यङ्गम्)	...	६	५४५
गद्यस्वरूपतद्भेदतल्लक्षणानि	...	६	५८६
गर्भसन्धिः	...	६	३३९
गर्भसन्ध्यङ्गनामानि अभूताहरणञ्च	...	६	३६९
गर्भाङ्कः	...	६	२८२
गर्भितत्वादोषस्य गुणत्वम्	...	७	६१७
गर्वः	...	३	१८५
(नाट्यालं)	...	६	४८७
गर्हणम् (नाट्यलक्षणम्)	...	६	४७२
गाम्भीर्यलक्षणम्	...	३	८५
गुणकीर्तनम् (नाट्यलक्षणम्)	...	६	४७७
गुणभेदाः	...	८	६२५
गुणलक्षणम्	...	८	६२४
गुणातिपातः (नाट्यलक्षणम्)	...	६	४६१

प्रकरणम् ।		परिच्छेदसङ्ख्या ।	कारिकासङ्ख्या ।
गुणातिशयः (लाट्यलक्षणम्)	...	६	४६२
गुणीभूतव्यङ्ग्यकाव्यलक्षणं तद्भेदाश्च	...	४	२६८।२६९
गैरपदम् (लाट्याङ्गम्)	...	६	५१७
गोष्ठीलक्षणम् (उपरूपकम्)	...	६	५५९
गौडी (रीतिः)	...	९	६४७
ग्रथनम् (निर्वहणसन्ध्यङ्गम्)	...	६	३८८
ग्राम्यत्वदोषस्य गुणत्वम्	...	७	६०७
ग्लानिः	...	३	२०४

च

चकितम् (नाटिकाऽलङ्कारः)	...	३	१५६
चतुःषष्यङ्गोपसंहारः (सन्धीनाम्)	...	६	४१०
चपलता	...	३	२०३
चम्पूलक्षणम्	...	६	५८९
चर्वणानिष्पत्त्या रसनिष्पत्तिः	...	३	६०
चर्वणायां-रसस्य भानाभानले	...	३	५४
चर्वणाया रसप्रमाणत्वम्	...	३	५९
चित्रम् (अर्थ)	...	१०	६६५
चिन्ता	...	३	२०५
चूलिका	...	६	३१४

छ

छलम् (वीथ्यङ्गम्)	...	६	५४१।५४२
छादनम् (विमर्शसन्ध्यङ्गम्)	...	६	३८४
छेकानुप्रासः	...	१०	६५४

ज

जडता (व्य० भा०)	...	३	१७९
जवनिः (नाट्यलक्षणम्)	...	६	४५७

ञ

ञिमलक्षणम् (रूपकम्)	...	६	५३४

प्रकरणम्।	परिच्छेदसङ्ख्या।	कारिकासङ्ख्या।
तद्गुणः (अलं) ...	१०	७६७
तद्धनम (नायिकाऽलङ्कारः) ...	३	१५१
तापनम (प्रतिमुखसन्ध्यङ्गम्) ...	६	३५८
तुल्यतर्कः (नाट्यालङ्कारम्) ...	६	४५३
तुल्ययोगिता (अलं) ...	१०	७१६
तेजोलक्षितौदार्य्यलक्षणानि ...	३	८७
त्रासः (व्य० मा०) ...	३	१८७
त्रिगतम (बीज्यङ्गम्) ...	६	५४०
त्रिगूढकम् (खाल्याङ्गम्) ...	६	५२२
त्रोटकम् (गर्भसन्ध्यङ्गम्) ...	६	३७८
त्रोटकलक्षणम् (उपरूपकम्) ...	६	५५८
द		
दक्षिणनायकः ...	३	७२
दक्षसहायाः ...	३	८४
दयावीरात् शान्तस्य भेदकथनम् ...	३	२४३
दाक्षिण्यम् (नाट्यालङ्कारम्) ...	६	४६८
दिष्टम् ,, ...	६	४५९
दीपकम् (अलं) ...	१०	७१७
दीप्तिः (नायिकाऽलङ्कारः) ...	३	१३५
दुःश्रवत्वदोषस्य गुणत्वकथनम् ...	७	५९९
दुर्मन्त्रिकालक्षणम् (उपरूपकम्) ...	६	५७२
दूतदूतीविभागौ ...	३	८८
दूतीगुणाः ...	३	१६२
दूतीनिरूपणम् ...	३	१६१
दृश्यकाव्यस्य रूपकत्वनिरुक्तिः ...	६	२७६
दृश्यश्रव्यभेदेन काव्यद्वैविध्यं दृश्यस्वरूपञ्च ...	६	२७५
दृष्टान्तः (अलं) ...	१०	७१८
,, (नाट्यलक्षणम्) ...	६	४५२

प्रकरणम् ।		पारच्छदसङ्ख्या ।	कारिकासङ्ख्या ।
दैन्यम्	...	३	१७६
दोषस्वरूपम्	...	७	५८२
दोषाणां स्थानानि नामानि च	...	७	५८३।५८४
द्युतिः (विमर्षसन्ध्यङ्गम्)	...	६	३८६
द्रवः "	...	६	३८५
द्विगूढम् (लास्याङ्गम्)	...	६	५२४
ध			
धर्मसङ्घायाः	...	३	८५
धीरप्रशान्तलक्षणम्	...	३	७१
धीरललितलक्षणम्	...	३	७०
धीराऽधीरालक्षणम्	...	३	१०७
धीरोदात्तलक्षणम्	...	३	६८
धीरोद्धतलक्षणम्	...	३	६९
धृतिः	...	३	२०२
धृष्टनायकः	...	३	७४
धैर्यम् (नायिकाऽलङ्कारः)	...	३	१३९
धैर्यलक्षणम्	...	३	९६
ध्वनिलक्षणम्	...	४	२५४
ध्वनेरष्टादश भेदाः	...	४	२६३
ध्वनेरेकपञ्चाशद्भेदाः बहुभेदाश्च	...	४	२६७
ध्वनेर्भेदौ	...	४	२५५
न			
नटस्य रसानास्वादकत्वम्	...	३	४९
नटस्य सभ्यत्वस्वीकारः	...	३	५०
नर्म (कौशिकीवृत्त्यङ्गम्) तद्भेदाश्च(३)...		६	४१८।४१९
" (प्रतिमुखसन्ध्यङ्गम्)	...	६	३६०
नर्मगर्भः (कौशिकीवृत्त्यङ्गम्)	...	६	४२२
नर्मद्युतिः (प्रतिमुखसन्ध्यङ्गम्)	...	६	३६१
नर्मस्फूर्जः (कौशिकीवृत्त्यङ्गम्)	...	६	४२०

प्रकरणम् ।		परिच्छेदसङ्ख्या ।	कारिकासङ्ख्या ।
नर्मस्फोटः (कौशिकीवृत्त्यङ्गम्)	...	६	४२१
नाटकक्काय्यंपूर्वरङ्गनान्दीपाठलक्षणादिः	...	६	२८४
नाटकरचनापरिपाटी	...	६	२८३
नाटकलक्षणम् (रूपकम्)	...	६	२८०
नाटकस्य नामकरणम्	...	६	४३८
नाटकीयपात्राणां सम्बोधनम्	...	६	४४२
नाटिकालक्षणम् (उपरूपकम्)	...	६	५५७
नाट्यपरिभाषा	...	६	४३९
नाट्यभाषाविभागाः	...	६	४४३
नाट्यरासकलक्षणम् (उपरूपकम्)	...	६	५६१
नाट्यलक्षणनामानि (३६)	...	६	४४५
नाट्यालङ्कारभेदास्तन्नामानि	...	६	४८२
नाट्ये प्रयोज्यानि	...	६	४४४
नाट्ये वेश्यादीनां नामकरणम्	...	६	४३७
नाट्योक्तीनां निरूपणम्	...	६	४३६
नान्दीपाठात् कर्त्तव्यनिर्णयः	...	६	२८६।२८७
नान्दीलक्षणम्	...	६	२८५
नान्द्या आवश्यकता	...	६	२८४
नायकगुणाः (८)	...	३	९१
नायकादितीयभेदाः (१६)	...	३	७२
नायकप्रथमानुसारेण षड्विधानां नायिकानां पुनर्द्वैविध्यकथनम्	...	३	१०९
नायकप्रथमभेदाः (४)	...	३	६७
नायकभेदाः (४८)	...	३	७७
नायकलक्षणम्	...	३	६६
नायिकाद्वैविध्यकथनम्	...	३	९८
नायिकानां भावाभिव्यक्तिः	...	३	१६०
नायिकानामलङ्काराः (२८)	...	३	१२९
नायिकानामसङ्ख्येयत्वनिर्देशः	...	३	१२८

प्रकरणम् ।		परिच्छेदसङ्ख्या ।	कारिकासङ्ख्या ।
नायिकाभेदाः (३८४)	...	३	१२६
नायिकासाङ्कर्य्यम्	...	३	१२७
नालिका (वीथ्यङ्गम्)	...	६	५४७
निदर्शनम् (नाट्यलक्षणम्)	...	६	४५५
निदर्शना (अलं)	...	१०	७२०
निद्रा (व्य० भा०)	...	३	१८९
नियताप्तिः (कार्य्यावस्थाभेदः)	...	६	३३२
निरुक्तिः (नाट्यलक्षणम्)	...	६	४६४
निर्णयः (निर्वहणसन्ध्यङ्गम्)	...	६	३९९
निर्वहणसन्धिः	...	६	३४१
निर्वहणसन्धेरङ्गभेदास्तन्नामानि	...	६	३९५
निर्वेदलक्षणम्	...	३	१७४
निर्वेदादिव्यभिचारिभावाः	...	३	१७३
निर्हेतुतादोषस्य गुणत्वम्	...	७	६०८
निवेदनम् (नाट्यालं)	...	६	५१०
निश्चयालङ्कारः	...	१०	७०६
निसृष्टार्थदूतलक्षणम्	...	३	८९
निहतार्थाप्रयुक्ततादोषयोः गुणत्वम्	...	७	६०१
नीतिः (नाट्यालं)	...	६	५०१
न्यूनपदतायाः स्थानविशेषे दोषगुणत्वाभावकथनम्		३	६१४
न्यूनपदताया गुणत्वम्	...	७	६१३

प

पतत्प्रकर्षतादोषस्य गुणत्वम्	...	७	६१८
पताकानिर्वाहस्थानकथनम्	...	६	३२५
पताकाभेदाः सलक्षणाः (४)	...	६	३०३—३०६
पताकालक्षणम्	...	६	३२४
पताकास्थानकथनम्	...	६	३०२
पदलक्षणम्	...	२	९
पदांशादिषु असंलक्ष्यक्रमव्यङ्ग्यस्य कथनम्	...	४	२६६

प्रकरणम् ।		परिच्छेदसङ्ख्या ।	कारिकासङ्ख्या ।
पदोच्चयः (नाट्यलक्षणम्)	...	६	४५४
पद्मस्य तथा मुक्तकादीनां लक्षणम्	...	६	५७८
परकीयाभेदौ	...	३	१११
परिकरः (अलं)	...	१०	७२५
„ (मुखसन्ध्यङ्गम्)	...	६	३४४
परिणामलक्षणं तद्भेदौ च (अलं)	...	१०	७००
परिन्यासः (मुखसन्ध्यङ्गम्)	...	६	३४५
परिभावना „	...	६	३५१
परिभाषणम् (निर्वहणसन्ध्यङ्गम्)	...	६	४००
परिवर्त्तकः (सात्त्वतीवृत्त्यङ्गम्)	...	६	४२८
परिवृत्तिः (अलं)	...	१०	७५५
परिसङ्ख्या „	...	१०	७५६
परिसर्पः (प्रतिमुखसन्ध्यङ्गम्)	...	६	३५७
परि(री)हारः (नाट्यालं)	...	६	५०९
परीवादः „	...	६	५००
परोढालक्षणम्	...	३	११२
पर्य्यायः (अलं)	...	१०	७५४
पर्य्यायोक्तम् „	...	१०	७२९
पर्य्युपासनम् (प्रतिमुखसन्ध्यङ्गम्)	...	६	३६४
पश्चात्तापः (नाट्यालं)	...	६	४९३
पाञ्चाली (रीतिः)	...	९	६४८
पीठमर्दनामा नायकसहायः	...	३	७८
पीठमर्दादीनामुत्तमत्वकथनम्	...	३	८६
पुनरुक्तताद्दोषस्य गुणत्वम्	...	७	६११ ६१२
पुनरुक्तवदाभासलक्षणम् (अलं)	...	१०	६५२
पुष्पगण्डिका (लास्याङ्गम्)	...	६	५२०
पुष्पम् (प्रतिमुखसन्ध्यङ्गम्)	...	६	३६५
पूर्वरङ्गः	...	६	२८४
पूर्वरागः तत्र सलक्षणाः कामदशाश्च	...	३	२१८

प्रकरणम्।		परिच्छेदसङ्ख्या।	कारिकासङ्ख्या।
पूर्वरागकथनावसरः	..	३	२२०
पूर्वरागभेदाः सलक्षणाः (३)	...	३	२२१
पूर्ववाक्यम् (निर्वहणसन्ध्यङ्गम्)	...	६	४०७
पृच्छा (नाट्यलक्षणम्)	...	६	४७३
प्रकरणनामकदृश्यलक्षणं तद्भेदाश्च (रूपकम्)		६	५२८।५२९
प्रकरणिकालक्षणम् (उपरूपकम्)	...	६	५७३
प्रकरी तत्सम्बन्धश्च (अर्थप्रकृतिः)	...	६	३२६
प्रगमनम् (प्रतिमुखसन्ध्यङ्गम्)	...	६	३६२
प्रगल्भतालक्षणम् (नायिकाऽलङ्कारः)	...	३	१३७
प्रगल्भाऽधीरालक्षणम्	...	३	१०८
प्रगल्भाधीराऽधीरालक्षणम्	...	३	१०७
प्रगल्भाधीरालक्षणम्	...	३	१०६
प्रगल्भालक्षणम्	...	३	१०३
प्रच्छेदकः (लास्याङ्गम्)	...	६	५२१
प्रतिनायकः	...	३	१६३
प्रतिमुखसन्धिः	...	६	३३८
प्रतिमुखाङ्गानि (१३)	...	६	३५५
प्रतिवस्तूपमा (अलं)	...	१०	७१८
प्रतिषेधः (विमर्षसन्ध्यङ्गम्)	...	६	३९०
प्रतीपम् (अलं)	...	१०	७६३।७६४
प्रत्यनीकम् „	...	१०	७६२
प्रपञ्चः (वीथ्यङ्गम्)	...	६	५३९
प्रबन्धगतार्थशक्त्युद्भवध्वनिः	...	४	२६५
प्रयत्नः (कार्य्यावस्थाभेदः)	...	६	३३०
प्रयोगातिशयलक्षणम् (प्रस्तावनाभेदः)	...	६	२९४
प्ररोचना (विमर्षसन्ध्यङ्गम्)	...	६	३९२
प्रवर्त्तकलक्षणम् (प्रस्तावनाभेदः)	...	६	२९५
प्रवर्त्तनम् (नाट्यालं)	...	६	५११
प्रवासः तदवस्थाश्च	...	३	२२५

प्रकरणम् ।		परिच्छेदसङ्ख्या ।	कारिकासङ्ख्या ।
प्रवासस्य कार्यजस्य वैविध्यम्	...	३	२२७
प्रवासे स्मरदशा तल्लक्षणानि च	...	३	२२६
प्रवेशकलक्षणम् (अर्थोपक्षेपकभेदः)	...	६	३१७
प्रशक्तिः (निर्वहणसन्ध्यङ्गम्)	...	६	४०९
प्रसङ्गः (विमर्षसन्ध्यङ्गम्)	...	६	३८८
प्रसादः (निर्वहणसन्ध्यङ्गम्)	...	६	४०२
प्रसादगुणः तद्व्यञ्जकाश्च	...	८	६३१।६३२
प्रसिद्धिः (नाट्यालङ्कारः)	...	६	४७४
प्रस्तावनायाः परनिर्वर्तनीयता (नखकुट्टमते)		६	२९८
प्रस्थानम् (उपरूपकम्)	...	६	५६२
प्रहर्षः (नाट्यालं)	...	६	५१४
प्रहसनं तन्नियमाश्च (रूपकम्)	...	६	५५१—५५६
प्रहेलिकाया अलङ्कारत्वनिराकरणम्	...	१०	६६६
प्राप्तिः (मुखसन्ध्यङ्गम्)	...	६	३४८
प्राप्त्याशा (कार्यावस्थाभेदः)	...	६	३३१
प्रार्थना (गर्भसन्ध्यङ्गम्)	...	६	३७६
प्रियोक्तिः (नाट्यालङ्कारः)	...	६	४८१
प्रेङ्खणम् (उपरूपकभेदः)	...	६	५६५
प्रोत्साहनम् (नाट्यालं)	...	६	५०३
प्रोषितभर्तृकालक्षणम्	...	३	१२३
फ			
फलनिरूपणम् (अङ्गानाम्)	...	६	४११
फलयोगः (कार्यावस्थाभेदः)	...	६	३३२
फललक्षणाः सप्रकाराः	...	२	२०
फललक्षणायाः पुनर्भेदद्वयम्	...	२	९१
ब			
बिन्दुलक्षणम् (अर्थप्रकृतिभेदः)	...	६	३२३
बीजलक्षणम्	...	६	३२२
बीभत्सरसः	...	३	२४०

प्रकरणम् ।	परिच्छेदसङ्ख्या ।	कारिकासङ्ख्या ।
भ		
भग्नप्रक्रमः	... ३	२३९
भाक्तलक्षणकथनम् (दशमभेदः)	... ६	५३०
भाषिकाङ्गानां लक्षणम्	... ६	५०६
भाषिकालक्षणम् (उपरूपकम्)	... ६	५०५
भारतीवृत्तिः	... ६	२८८
भारतीवृत्तेरङ्गानि (४)	... ६	२८९
भावः (नायिकालङ्कारः)	... ३	१३०
भावशान्त्यादिलक्षणम्	... ३	२५४
भावानां निरुक्तिः	... ३	२१२
भाविकम् (अलं)	... १०	७७२
भावोदय-भावसन्ध्यादयः „	... १०	७७५
भाषणम् (निर्वहणसन्ध्यङ्गम्)	... ६	४०६
भाषासमः (अलं)	... १०	६६२
मुखम् (नाट्यलक्षणम्)	... ६	४४६
भेदः (मुखसन्ध्यङ्गम्)	... ६	३५४
भ्रंशः (नाट्यलक्षणम्)	... ६	४६६
भ्रान्तिमान् (अलं)	... १०	७०२
म		
मङ्गलाचरणम्	... १	१
मतिः (व्यभि० भाव०)	... ३	१८५
मदः (नायिकालङ्कारः, व्यभि०भाव०)	... ३	१४९।१७८
मध्याधीरादीनां लक्षणम्	... ३	१०५
मध्याप्रगल्भाभेदान्तराणि	... ३	१०४
मध्यालक्षणम्	... ३	१०२
मनोरथः (नाट्यलक्षणम्)	... ६	४७९
मरणम् (व्यभि० भाव०)	... ३	१८६
मरणस्य अवर्ण्यता (पूर्वरा०)	... ३	२१९
महाकाव्यलक्षणम्	... ६	५७९

प्रकरणम्।		परिच्छेदसङ्ख्या।	कारिकासङ्ख्या।
महानाटकलक्षणम्	...	६	५२७
महावाक्यम्	...	२	७
माधुर्य्यम् (गुणभेदः) तत्स्थानम्	...	८	६२६।६२७
माधुर्य्यलक्षणम् (नायिकाऽलङ्कारः)	...	३	९४।१३६
माधुर्य्यव्यञ्जकाः	...	८	६२८
मानः तद्भेदौ च	...	३	२२२
मानभङ्गोपायाः सलक्षणाः	...	३	२२४
मार्गः (गर्भसन्ध्यङ्गम्)	...	६	३७०
माला (नाट्यलक्षणम्)	...	६	४७०
मालादीपकम् (अलं)	...	१०	७५०
मितार्थकसन्देशहारकौ दूतौ	...	३	९०
मीलितम् (अलं)	...	१०	७६५
मुखसन्धिः	...	६	३३७
मुखसन्धेरङ्गनामानि (१२)	...	६	३४२
मुग्धाकन्दकयोरनुरागेङ्गितानि	...	३	१५८
मुग्धालक्षणम्	...	३	१०१
मृदवम् (वीथ्यङ्गम्)	...	६	५५०
मोट्टायितम् (नायिकाऽलङ्कारः)	...	३	१४५
मोहः (व्यभि० भाव०)	...	३	१८१
मौग्ध्यम् (नायिकाऽलङ्कारः)	...	३	१५२
य			
यथासङ्ख्यम् (अलं)	...	१०	७५३
यमकलक्षणम् „	...	१०	६६०
याञ्चा (नाट्यालं)	...	६	५०८
युक्तिः „	...	६	५१३
„ (मुखसन्ध्यङ्गम्)	...	६	३४७
र			
रत्यादीनां रसविशेषे व्यभिचारित्वकथनम्	...	३	२०७
रत्याद्युद्बोधकैः तदुद्बोधकथनम्	...	३	४०

प्रकरणम् ।	परिच्छेदसङ्ख्या ।	कारिकासङ्ख्या ।
रसगतदोषाः ...	७	५९७
रसतादात्म्यादुत्साद्यादीषः ...	२	४१
रसनिर्वचनम् ...	२	२२
रस-भावाभासौ ...	२	२५१।२५२
रसभेदकथनम् ...	२	२१३
रसरूपतया रत्यादिप्रतीतिः ...	२	४२
रसवत्-प्रेय ऊर्जस्वि-समाहितानि (अलं) ...	१०	७७४
रसविशेषे स्थायिभावानां सञ्चारित्वम् ...	२	२०८
रसस्य कार्थत्वखण्डनम् ...	२	५२
रसस्य निर्विकल्पकज्ञानस्वरूपलाभावप्रकटनम्	२	५६
रसस्य परोक्षापरोक्षत्वनिरासः ...	२	५७
रसस्य प्रागभाव-ध्वंसाभावत्वकथनम् ...	२	५३
रसस्य वर्त्तमान-भविष्यत्तानिरासः ...	२	५५
रसस्य सुखकारणता ...	२	३७
रसस्य सुखस्वयत्वप्रकटनम् अनुपपत्त्यन्तरञ्च ...	२	३६
रसस्य स्वप्रकाशत्वाखण्डत्वसिद्धिः ...	२	६२
रसस्याज्ञाप्यत्वकथनम् ...	२	५१
रसस्यानुकार्य्यगतत्वनिरासः ...	२	४८
रसस्यालौकिकचमत्कृतिहृदयसंवेद्यत्वकथनम् ...	२	५८
रसस्वरूपतदास्वादप्रकारौ ...	२	३४
रसादिप्रतिपादने प्रति अभिधाशक्तयोः अक्षमत्वम्	५	२७२
रसादिव्यङ्ग्यकथने अनुमानस्य अक्षमत्वम् ...	५	२७३
रसानां परस्परविरोधः ...	२	२४६
रसाव्याप्यत्वप्रकटने प्रतिज्ञा ...	२	६१
रसास्वादेऽश्रुपातादिनिर्वचनम् ...	२	३८
रसास्वादे बाधनायाः हेतुत्वनिरासः ...	२	३९
रसास्वादे विभावादीनामनेकाकारता ...	२	४६
रसोद्बोधे विभावादीनां कारणत्वकथनम् ...	२	४५
राघवकृतयमम् (उपरूपकम्) ...	६	५६६

प्रकरणम् ।		परिच्छेदसङ्ख्या ।	कारिकासङ्ख्या ।
रीतिलक्षणं रीतिनामानि च	...	९	६४४।६४५
रूपकनामदृश्यकाव्यभेदाः	...	६	२७८
रूपकनिरुक्तिः	...	६	२७६
रूपकालङ्कारस्वरूपभेदलक्षणानि (अलं)	...	१०	६९०—६९९
रूपम् (गर्भसन्ध्यङ्गम्)	...	६	३७१
रौद्ररसः	...	३	२३६
रौद्ररसस्य युद्धवीराद्भेदः	...	३	२३७
ल			
लक्षणलक्षणा (जहत्स्वार्था)	...	२	१६
लक्षणाः शुद्धाः गौण्यश्च	...	२	१९
लक्षणायाः अशीतिभेदाः	...	२	२३
चत्वारिंशद्भेदाः	...	२	२२
लक्षणावृत्तिकथनम्	...	२	१४
लक्षणाश्रया व्यञ्जना	...	२	२७
लक्षणा सारोपा साध्यवसाना च	...	२	१८
लक्ष्यक्रमव्यङ्ग्यध्वनेस्त्रैविध्यम्	...	४	२५९
ललितम् (नायिकाऽलङ्कारः)	...	३	१४८
लाटानुप्रासः (अलं)	...	१०	६५८
लाटी (रीतिः)	...	९	६४९
लास्याङ्गभेदास्तन्नामानि च (१०)	...	६	५१६
लीला (नायिकाऽलङ्कारः)	...	३	१४०
लेशः (नाट्यलक्षणम्)	...	६	४७८
व			
वक्त्राद्यौचित्येन रचनावैपरीत्यकथनम्	...	९	६५०
वक्रोक्तिः (अलं)	...	१०	६६१
वज्रम् (प्रतिमुखसन्ध्यङ्गम्)	...	६	३६६
वत्सलरसः	...	३	२४५
वर्णसंहारः (प्रतिमुखसन्ध्यङ्गम्)	...	६	३६८
वस्तूत्थापनम् (आर० वृत्तिः)	...	६	४३१

प्रकरणम् ।		परिच्छेदसङ्ख्या ।	कारिकासङ्ख्या ।
वाक्केलिः (वीथ्यङ्गम्)	...	६	५४३
वाक्यगतदोषाः	...	७	५९५
वाक्यद्वैविध्यम्	...	२	८
वाक्यस्वरूपम्	...	२	६
वासकसज्जालक्षणम्	...	३	१२४
विकल्पालङ्कारः	...	१०	७५९
विकृतम् (नायिकाऽलङ्कारः)	...	३	१५०
विक्षेपः	...	३	१५३
विचारः (नाट्यलक्षणम्)	...	६	४५८
विचित्रम् (अलं)	...	१०	७४३
विच्छित्तिः (नायिकाऽलङ्कारः)	...	३	१४२
विटलक्षणम्	...	३	८०
विटविदूषकयोर्मध्यता	...	३	८७
वितर्कः (व्यभि० भाव०)	...	३	२०६
विदूषकलक्षणम्	...	३	८१
विद्रवः (गर्भसन्ध्यङ्गम्)	...	६	३८१
विधानम् (मुखसन्ध्यङ्गम्)	...	६	३५०
विधृतम् (प्रतिमुखसन्ध्यङ्गम्)	...	६	३५८
विध्याभासः (अलं)	...	१०	७३६
विनोक्तिः	...	१०	७२३
विपर्य्ययः (नाट्यलक्षणम्)	...	६	४६७
विप्रलम्भालक्षणम्	...	३	१२२
विप्रलम्भशृङ्गारः	...	३	२१६
विप्रलम्भशृङ्गारभेदाः (४)	...	३	२१७
विबोधः (व्यभि० भाव०)	...	३	१८२
(निर्वहणसन्ध्यङ्गम्)	...	६	३९७
विभावकथनं तद्भेदौ च	...	३	६३।६४
विभावना तद्भेदौ च (अलं)	...	१०	७३७
विभावादीनामलौकिकत्वख्यापनम्	...	३	४४

प्रकरणम् ।		परिच्छेदसङ्ख्या ।	कारिकासङ्ख्या ।
विभावादेः द्वयोरेकस्य वा सद्भावे रसोद्बोधस्य अदोषत्वप्रकटनम्	...	३	४७
विभावादेः साधारण्येन प्रथमं प्रतीतिः	...	३	४३
विभ्रमः (नायिकाऽलङ्कारः)	...	३	१४७
विमर्षसन्धिः	...	६	३४०
विमर्षसन्धेरङ्गानि अपवादलक्षणञ्च	...	६	३८२
विरहोत्कण्ठितालक्षणम्	...	३	१२५
विरुदलक्षणम्	...	६	[illegible]२०
विरुद्धरसयोः सन्निवेशविचारः	...	७	६२१
विरुद्धरसस्य विभावादिसङ्ग्रहस्य गुणत्वम्	...	७	६२०
विरोधः (प्रतिमुखसन्ध्यङ्गम्)	...	६	३६३
विरोधनम् (विमर्षसन्ध्यङ्गम्)	...	६	३९१
विरोधालङ्कारः सभेदः	...	१०	७३९
विलासलक्षणम् (नायकगुणः नायिकाऽलङ्कारश्च)		३	९३।१४१
„ (प्रतिमुखसन्ध्यङ्गम्)	...	६	३५६
विलासिकालक्षणम् (उपरूपकम्)	...	६	५७१
विलोभनम् (मुखसन्ध्यङ्गम्)	...	६	३४६
विवक्षितान्यपरवाच्यध्वनेर्भेदौ	...	४	२५७
विव्वोकः (नायिकाऽलङ्कारः)	...	३	१४३
विशेषणम् (नाट्यलक्षणम्)	...	६	४६३
विशेषस्तद्भेदाश्च (अलं)	...	१०	७४६
विशेषोक्तिः „	...	१०	७३८
विषमम् „	...	१०	७४१
विषादः (व्यभि० भाव०)	...	३	२०१
विष्कम्भकलक्षणम् (अर्थोपक्षेपकभेदः)	...	६	३१२
विसर्पः (नाट्यालं)	...	६	४९७
वीथीलक्षणम् (रूपकभेदः)	...	६	५३७
वीथ्यङ्गभेदास्तन्नामानि च (१३)	...	६	५३८
वीररसः	...	३	२३८

प्रकरणम् ।		परिच्छेदसङ्ख्या ।	कारिकासङ्ख्या ।
वृत्तयस्तद्विनियोगाश्च	...	६	४१४
वृत्तीनां स्वरूपम्	...	६	४१५
वृत्त्यनुप्रासः (अलं)	...	१०	६५५
वैदर्भी (रीतिः)	...	९	६४६
व्यञ्जनाद्वैविध्यकथनम्	...	२	२५
व्यञ्जनाया उपसंहारः	...	५	२७४
व्यञ्जना वृत्तिः	...	२	२४
व्यञ्जनाश्रयीया तात्पर्याख्या वृत्तिः	...	२	३२
व्यञ्जनास्वीकारः	...	५	२७०
व्यतिरेकसङ्कीर्णे (अलं)	...	१०	७२१
व्यभिचारिदोषस्य दोषाभावत्वकथनम्	...	७	६१९
व्यभिचारिभावलक्षणभेदनामानि	...	३	१७२।१७३
व्यवसायः (विमर्षसन्ध्यङ्गम्)	...	६	३८४
व्याघातः (अलं)	...	१०	७४७।७४८
व्याजस्तुतिलक्षणभेदौ „	...	१०	७२८
व्याजोक्तिः „	...	१०	७७०
व्याप्तिः (व्यभि० भाव०)	...	३	१९६
व्याधिलक्षणम् (रूपकभेदः)	...	६	५३१
व्याहारः (वीथ्यङ्गम्)	...	६	५४९
व्रीडा [लज्जा] (व्यभि० भा०)	...	३	१९८
श			
शकारलक्षणम् अलं:पुरसङ्घाताय	...	३	८३
शक्तिः (विमर्षसन्ध्यङ्गम्)	...	६	३८७
शङ्का	...	३	१९२
शठनायकः	...	३	७६
शब्दशक्त्युद्भवव्यङ्ग्यभेदैर्वैविध्यम्	...	४	२६०
शब्दानां वैविध्यकथनम्	...	२	३१
शब्दार्थव्यञ्जनयोः परस्परं सङ्कार्य-सङ्कारकभावकथनम्	...	२	३०

प्रकरणम् ।		परिच्छेदसङ्ख्या ।	कारिकासङ्ख्या ।
शब्दार्थोभयशक्त्युद्भवध्वनिः	...	४	२६२
शान्तरसः	...	३	२४२
शान्तरसस्य दयावीराद्भेदः	...	३	२४३
शान्तरसस्य रसत्वप्रतिपादनम्	...	३	२४४
शिल्पकलक्षणम् (उपरूपकभेदः)	...	६	५७०
शृङ्गाररसः	...	३	२१४
शृङ्गाररसभेदौ	...	३	२१५
शृङ्गारसहायाः	...	३	०७९
शोभा (नाट्यलक्षणम्)	...	६	४४८
शोभालक्षणम् (नायक-नायिकाऽलङ्कारः)	...	३	९२।१३३
श्रमः (व्यभि० भा०)	...	३	१७७
श्रव्यकाव्यतद्भेदौ	...	६	५७७
श्रीगदितम् (उपरूपकभेदः)	...	६	५६८।५६९
श्रुत्यनुप्रासः (अलं)	...	१०	६५६
श्लेषत्रैविध्यम्	...	१०	६६४
श्लेषस्तद्भेदाश्च (अलं)	...	१०	६६३
श्लेषसमतायाः समाधानम्	...	८	६४१
श्लेषादिगुणानाम् ओजसि अन्तर्भावत्वकथनम्		८	६३४
श्लेषालङ्कारः	...	१०	७२६
ष			
षोडशभेदितानां नायिकानाम् अवस्थाविशेषेण भेदाः (८)	...	३	११५
स			
संलापः (सात्त्वतीवृत्तिविशेषः)	...	६	४२७
संलापकम् (उपरूपकभेदः)	...	६	५६७
संशयः (नाट्यलक्षणम्)	...	६	४५१
संसृष्टिः (अलं)	...	१०	७७७
संसृष्टिसङ्करलक्षणे	...	१०	७७६
सकलनायिकानामनुरागेङ्गितानि	...	३	१५९

प्रकरणम् ।		परिच्छेदसङ्ख्या ।	कारिकासङ्ख्या ।
सङ्करः (अलं)	...	१०	७७८
सङ्क्षिप्तिः (आर० वृ०)	...	६	४३३
सङ्केतग्रहस्थलकथनम्	...	२	१३
सङ्क्षेपः (नाट्यलक्षणम्)	...	६	४७६
सङ्ग्रहः (गर्भसन्ध्यङ्गम्)	...	६	३७४
सङ्घात्यः (सात्त्वतीवृत्तिविशेषः)	...	६	४२६
सट्टकस्वरूपम् (उपरूपकभेदः)	...	६	५६०
सन्दिग्धत्वदोषस्य गुणत्वम्	...	७	६०५
सन्देहः (अलं) (३)	...	१०	७०१
सन्धिः (निर्वहणसन्ध्यङ्गम्)	...	६	३९६
सन्धितद्भेदाश्च	...	६	३३५।३३६
समम् (अलं)	...	१०	७४२
समयः (निर्वहणसन्ध्यङ्गम्)	...	६	४०४
समवकारलक्षणम् (रूपकभेदः)	...	६	५३२।५३३
समाधानम् (मुखसन्ध्यङ्गम्)	...	६	३४९
समाधिः (अलं)	...	१०	७६१
समाप्तपुनरात्तताया गुणत्वम्	...	७	६१६
समासोक्तिः (अलं)	...	१०	७२४
समुच्चयः „	...	१०	७६०
सम्फेटः (विमर्षसन्ध्यङ्गम्)	...	६	३८३
„ (आरभटीवृत्तिविशेषः)	...	६	४३२
सम्भोगः	...	३	२२९
सम्भोगस्य चातुर्विध्यम्	...	३	२३१
सहोक्तिः (अलं)	...	१०	७२२
सात्त्वतीवृत्तिस्तद्विशेषाश्च	...	६	४२३।४२४
सात्त्विकभावास्तल्लक्षणानि च	...	३	१६८—१७१
सामान्यालङ्कारः	...	१०	७६६
सामान्या वा साधारणी स्त्रीलं०	...	३	११४
सारः (अलं)	...	१०	७५२

प्रकरणम् ।		परिच्छेदसङ्ख्या ।	कारिकासङ्ख्या ।
सारूप्यम् (नाट्यलक्षणम्)	...	६	४७५
साहाय्यम् (नाट्यालं)	...	६	५०४
सिद्धिः (नाट्यलक्षणम्)	...	६	४६५
सूक्ष्मालङ्कारः	...	१०	७६९
सैन्धवम् (लास्याङ्गम्)	...	६	५२३
स्थायिभावभेदतत्तल्लक्षणानि	...	३	२१०।२११
स्थायिभावलक्षणम्	...	३	२०९
स्थायिभावानां भावत्वप्राप्तिकथनम्	...	३	२४९
स्थितपाठ्यम् (लास्याङ्गम्)	...	६	५१८
स्पृहा (नाट्यालं)	...	६	४९१
स्मरणालङ्कारः	...	१०	६८९
स्मृतिः (व्यभि० भाव०)	...	३	१९४
स्वप्नः „	...	३	१८३
स्वभावोक्तिः (अलं)	...	१०	७७१
स्वस्त्रियास्त्रैविध्यकथनम्	...	३	१००
स्वस्त्रीभेदाः (१३)	...	३	११०
स्वस्त्रीलक्षणम् (स्वीया)	...	३	९९
स्वाधीनभर्तृकालक्षणम्	...	३	११६
ह			
हर्षः (व्यभि० भाव०)	...	३	१९९
हल्लीशलक्षणम् (उपरूपकम्)	...	६	५७४
हसितम् (नायिकाऽलङ्कारः)	...	३	१५५
हावः „	...	३	१३१
हास्यरसः तद्भेदाश्च (६)	...	३	२३२
हास्यरसानुभवनम्	...	३	२३३
हेतुः (अलं)	...	१०	७३३
„ (नाट्यलक्षणम्)	...	६	४५०
हेला (नायिकाऽलङ्कारः)	...	३	१३२

अकारादिक्रमेण साहित्यदर्पणधृतग्रन्थनामानि ।

अनर्घराघवः	चण्डकौशिकः	भाट्टकाव्यम्	रामाभिनन्दः
अमरुशतकम्	चन्द्रकला	भरतशास्त्रम्	रामाभ्युदयः
आग्नेयपुराणम्	छलितरामः	भाषार्णवः	रामायणम्
आर्य्याविलासः	जानकीराघवम्	भिक्षाऽटनम्	रेवतमदनिका
उदयनचरितम्	त्रिपुरदाहः	महाभारतम्	लीलामधुकरः
उदात्तराघवः	देवीमहादेवम्	मायाकापालिकम्	बालिवधः
कनकावतीमाधवः	देशराजचरितम्	मालतीमाधवम्	विक्रमोर्वशी
कन्दर्पकेलिः	धूर्त्तचरितम्	मालविकाऽग्निमित्रम्	विलासवती
कर्णपराक्रमः	नटकमेलकम्	मुक्तावली	विष्णुपुराणम्
कर्पूरमञ्जरी	नर्मवती	मुद्राराक्षसम्	वीरचरितम्
कादम्बरी	नागानन्दः	मेघदूतम्	वेणीसंहारः
कामदत्ता	नैषधचरितम्	मेनकाहितम्	शर्मिष्ठाययातिः
कुन्दमाला	पञ्चतन्त्रम्	ययातिविजयः	शाकुन्तलम्
कुमारसम्भवः	पुष्पभूषितम्	यादवोदयः	शारीरकमीमांसाभाष्य-व्याख्यानम्
कुम्भः	पुष्पमाला	रघुवंशः	शिशुपालवधः
कुवलयाश्वचरितम्	प्रभावतीपरिणयः	रङ्गदत्तम्	शृङ्गारतिलकम्
कुसुमशेखरविजयः	प्रशस्तिरत्नावली	रत्नावली	समुद्रमथनम्
कृत्यरावणः	बालचरितम्	राघवविलासः	सेतुबन्धः
केलिरैवतकम्	बालरामायणम्	राघवानन्दः	हयग्रीववधः
क्रीडारसातलम्	बिन्दुमती	राघवाभ्युदयः	हर्षचरितम्
गृहवृक्षवाटिका	विरुदमणिमाला	रामचरितम्	

अकारादिक्रमेण साहित्यदर्पणधृतग्रन्थकृन्नामानि ।

अभिनवगुप्तपादाः	धनिकः	भवभूतिः	रुद्रटः (काव्यालङ्कारकारः)
अभिहितान्वयवादी	धर्मदत्तः	भोजः	वक्रोक्तिजीवितकारः
उदयनाचार्य्यः	ध्वनिकारः	मम्मटः	वाचस्पतिमिश्रः
कालिदासः	नखकुट्टः	महिमभट्टः (व्यक्तिविवेककारः)	वामनः
चण्डीदासः	नारायणः	मुनिः	श्रीमल्लोचनकारः
चन्द्रशेखरः	पुरुषोत्तमः	मुनीन्द्रः	श्रीहर्षः
चाणक्यः	भरतः	राघवानन्दः	श्रीत्रियजरन्मीमांसकः
दण्डी	भर्तृहरिः		

साहित्यदर्पणधृतश्लोकानां मातृकाक्रमिका सूची

श्लोकः		पत्राङ्कः
अ		
अकलङ्कं मुखं तस्याः	..	७८७
अकस्मादेव तन्वङ्गी	..	१६९
अङ्गच्छेदे कार्य्यम्	..	३९७
अङ्गं बाध्योऽथ	..	६३०
अङ्गानि खेदयसि	..	४८२
अचला अबला वा स्युः	..	५८६
अजस्य गृह्णतो जन्म	..	८३५
अजायत रतिस्तस्याः	..	५९४
अतिगाढगुणायाश्च	..	७८८
अत्ता एत्थ णिमज्जइ	..	१७
अत्युन्नतस्तनमुरो	..	१२३
अत्युन्नतस्तनयुगा	..	३२४
अत्रातार्ष्मसुपाध्याय	..	६१४
अत्रान्तरे किमपि वाक्—"	...	१५९
अत्रासीत् फणिपाशबन्धन—"	...	४९५
अथ तत्र पाण्डुतनयेन	..	२०५
अदोषं गुणवत्	..	१६
अद्य प्रचण्डभुजदण्ड—"	..	५१५
अद्यापि देहि वैदेहीम्	..	४९६
" स्तनशैल—"	..	५७९
अधःकृताम्भोधर—"	.	८८९
अधरः किसलयरागः	.	४७०
अधरे करजक्षतम्	.	५८७
अनङ्गमङ्गलभुवः	.	६३९
अनणुरणन्मणिमेखलम्	...	६०४
अनन्यसाधारणधीः	...	३०७
अनलङ्कृतोऽपि सुन्दर !	...	१३०
अनातपत्रोऽप्ययमत्र	...	८८७
अनायासकृशं मध्यम्	...	८३१
अनुयान्त्या जनातीतम्		४६८।७९३
अनुरागवती सन्ध्या	...	९००
अनुरागवन्तमपि	...	६०४
अनुलेपनानि कुसुमानि	...	७७३
अनेन छिन्दता मातुः	...	५७२
" पर्य्यासयता	...	८१६
" लोकगुरुणा	...	३३४
अन्तःपुरीयसि रणेषु	...	७०९
अन्तश्छिद्राणि भूयांसि	...	८१२
अन्तिकगतमपि	...	१७४
अन्यदेवाङ्गलावण्यम्	...	७६९
अन्यासु तावदुपमर्द—"	...	२०८
अन्यास्ता गुणरत्नरोहण—"		५६८।६२२
अप्राधान्यं विधेर्यत्र	...	५५०
अप्रियाणि करोत्वेष	...	४४०
अभ्युन्नता पुरस्तात्	...	४१८
अमितः समितः	...	२९१
अमुक्ता भवता नाथ	...	५४९
अयं मार्त्तण्डः किम्	...	७४०
" रत्नाकरोऽम्भोधिः	...	८४१

श्लोकः		पत्राङ्कः
अयं स रशनोत्कर्षी	...	३२७
„ सर्वाणि शास्त्राणि	...	६७९
अयमुदयति	...	६५७
अयि मयि मानिनि !	...	५६७
अरविन्दमिदं वीक्ष्य	...	७२२
अरातिविक्रमालोक	...	७१३
अरुणे च तरुणि !	...	८७०
अलं स्थित्वा श्मशाने	...	३१३
अलङ्कारान्तरस्यापि	...	३३६
अलमलमतिमात्रम्	...	३९२
अलिअपसुत्तअ	...	२२६
अलिकुलमञ्जुलकेशी	...	५१७
अर्घ्यमर्घ्यमिति	...	१५८
अर्थः सहृदय—"	...	१९
अविदितगुणाऽपि	...	७७९
अविरलकरवाल—"	...	८९३
अव्यूढाङ्गमरूढ—"	...	६४७
अशक्नुवन् सोढुम्	...	२७४
अश्रुच्छलेन सुदृशो	...	७६२
अश्वत्थामा हत इति	...	४२४
असंशयं क्षत्र—"	...	२०२
असमाप्तजिगीषस्य	...	७९६
असम्भृतं मण्डनम्	...	१५४
असावन्तश्चञ्चद्विकच—"	...	४७४
अस्माकं सखि !	...	१०२
अस्य राज्ञो गृहे	...	७१९
अस्य वक्षः क्षणेनैव		४९०।५१४
अस्याः सर्गविधौ	...	७७०
अहमेव गुरुः	...	८७५
अहमेव मतो	...	११३
अहिणअपओअ	...	९०४
आ		
आकृष्टिवेगविगलद्—"	...	८९९
आक्षिपन्त्यरविन्दानि	...	४६७
आ-गर्भादा विमर्षाद्वा	...	४०३
आचरति दुर्जनो यत्	...	६२१
आज्ञा शक्रशिखामणि"	...	५८८
आत्मा जानाति	...	५५७
आदाय वकुलगन्धान्	...	६६४
आदित्योऽयं स्थितो	...	३१४
आनन्दममन्दमिमम्	...	८४०
आनन्दयति ते नेत्रे योऽधुना	...	५५७
आनन्दयति ते नेत्रे योऽसौ	...	५५६
आनन्दाय च विस्मयाय	...	४५४
आनन्दितस्वपक्षोऽसौ	...	५९१
आपतन्तममुं दूरात्	...	२९५
आपातसुरसं	...	५९०
आमीलितालस—"	...	८९१
आवर्त्त एव नाभिस्ते	...	५८९
आशीःपरम्पराम्	...	५४५
आश्लिष्टभूमिम	...	१९३
आ-समुद्रक्षितीशानाम्	...	५४९
आसादितप्रकट—"	...	३८२
आसीदञ्जनमत्रेति	...	८८६
आहवे जगदुद्दण्ड—"	...	७२५
आहारे विरतिः	...	३१८
आहूतस्याभिषेकाय	...	११५
आहूतेषु विहङ्गमेषु	...	६०५

श्लोकः		पत्राङ्कः
इ		
इति गदितवती	...	१४९
इति यावत् कुरङ्गाक्षीम्	...	५३२
इत्थमाराध्यमानोऽपि	...	८२१
इदं किलाव्याज—"		४७१।७८३
इदं वक्त्रं साक्षात्	...	७३४
इदमाभाति गगने	...	९००
इन्दुर्लिप्त इवाञ्जनेन	...	८०८
इन्दुर्विभाति कर्पूरगौरैः	...	५७०
इन्दुर्विभाति यस्तेन	...	५५९
इन्द्रजिच्चण्डवीर्योऽसि	...	४९१
इयं स्वर्गाधिनाथस्य	...	४६९
इह पुरोऽनिल—"	...	७४९
इहैव त्वं तिष्ठ	...	८४८
ई		
ईक्षसे यत् कटाक्षेण	...	५७१
उ		
उग्र निष्फल ! निष्पंदा	...	६०
उत्कृत्योत्कृत्य कृत्तिम		२५४।६०८
उत्क्षिप्तं करकङ्कणद्वय—"	...	१३९
उत्तिष्ठ दूति ! यामो	...	१४२
उत्फुल्लकमलकेसर—"	...	५०१
उत्साहातिशयम्	...	४१५
उदन्वच्छिन्ना भूः	...	५७६
उदेति पूर्वम्	...	४८४
उदेति सविता	...	५७५
उद्दामोत्कलिकाम्	...	३९४
उद्यत्कमललौहित्यैः	...	५५४
उन्नमितैकभ्रूलतम्	...	४२७
उन्मज्जज्जलकुञ्जरेन्द्र—"	...	६४३
उन्मीलन्ति नखैः	...	८५४
उन्मीलन्मधुगन्ध—"	...	६६५
उपकृतं बहु	...	४२
उपदिशति कामिनीनाम्	...	४८
उर्व्यसावत्र तर्वाली	...	५९०
उवाच मधुरं धीमान्	...	५६५
उवाच मधुरां वाचम्	...	५६५
ऊ		
ऊरुः कुरङ्गकदृशः	...	७५४
ए		
एकं ध्याननिमीलनात्	...	६२०
एकः कपोतपोतः	...	८११
एकत्रासनसंस्थितिः	...	१२९
एकस्मिन् शयने	...	२२९
एकस्यैव विपाकोऽयं	...	४२९
एकावयवसंस्थेन	...	३०६
एतद्विभाति चरमा—"	...	७४७
एवंवादिनि देवर्षौ	...	१९८
एवमुक्तो मन्त्रिमुख्यैः	...	५७४
एष दुश्च्यवनं नौमि	...	६३३
एष मूर्त्तो यथा धर्मः	...	६००
एसा कुडिलघणेण	...	२०६
एसो ससहरबिंबो	...	६१५
ऐ		
ऐन्द्रं धनुः पाण्डु—"	...	८०१
ऐशस्य धनुषो भङ्गम्	...	५८७
ओ		
ओवट्टइ उल्लट्टइ	...	५६४

श्लोक:		पत्राङ्क:
श्री		
श्रीमत्क्रमेण ज्ञततत्वरा	...	६२४
क्ष		
क्षटाक्षेपाधीषत	...	६०२
क्षटिले दृशते मन:	...	५४५
क्षणमीचे करङ्काभौ	...	२२०
क्षणमुपरि कलापिन:	...	७६८
क्षटनी क्षटनी	...	२८२
क्षटा वाराणस्याम	...	२६१
क्षपोलफलकावस्था:	...	७५६
क्षपोले क्षालका:	...	६३१
क्षमस्वालिङ्गनस्यार—"	...	६०१
क्षमस्व चण्डाघातम	...	५४६
क्षमस्वेष विरमिष्यण	...	२१०
क्षमस्वेह मति:	...	७२१
क्षरमुदयमौक्षीधर—"		१७८।७३२
क्षरिडलेन मम्बाधे	...	६०८
क्षर्णा ज्ञानच्छलाणाम	...	५१३
क्षर्परखण्ड इव	...	५२६
क्षलयति कृवलय—"	...	७८२
क्षलषच्च तवादिनेष्	...	८७१
क्षस्य व ष ढोढ	...	३५४
क्षानने मरिदृष्टेयी	...	८५७
क्षान्तात एव	...	२७२
क्षाले तवा	...	१२१
क्षारःक्षभिक्षा	...	६०२
क्षा विमसा ? टैव गर्हु	...	८६३
क्षामं प्रिया	...	४१८
क्षार्त्यं यातु	...	५४३

श्लोक:		पत्राङ्क:
क्षालयन्निकरा—"	...	४८४
क्षालालकरा—"	...	४३०
क्षाले कोकिल—"	...	६७४
क्षाले वारिधराणाम्	...	७४८
क्षालो मधु:	...	५८
काव्यालापाय यै	...	८
किं करोषि ?	...	५३१
किं नाकण्यतरो:	...	७६८
किं तावत	...	७४०
किं देव्या न	...	४८८
किं मुखस्य ?	...	८५८
किं वद: प्रियया ?		१४५।२१०
किं श्रीकरे:	...	४७८
किमधिकमस्य	...	८४४
किमाराध्यं सदा ?	...	८६०
किरणा हरिणाक्षस्य	...	६७७
किशलयमिव	...	२०८
कीटानुविद्धरत्नादि—"	...	१६
कुञ्ज इलि	...	५६१
कुपितासि यदा	...	८२७
कुमारस्ते	...	५८५
कुर्या इरस्यापि	...	५६५
कुर्वन्त्वाशा	...	४३४
कूजन्ति कोकिला:	...	६८८
कृतप्रहार:	...	५५२
कृतसङ्गमतस्य	...	२४६
कृत्वा दोर्निपीड़नाम	...	२०७
कृष्टा केशेषु	...	४३१
के द्रुमाखे	...	१६७

श्लोकः		पत्राङ्कः
के यूयम ?	...	६७१
केशः काशस्तबक—"	...	६६७
कोऽत्र भूमिवलये	...	७८१
कोकिलोऽहं	...	८१२
क्रूरग्रहः सकेतुः	...	३८६
क्वचित् ताम्बूलाक्तः	...	१२४
क्वचित् बाध्यतया	...	२८५
क्व वनं तरु—"	...	८४१
क्व सूर्य्यप्रभवो	...	७८४
क्वाकार्य्यं शशलक्ष्मणः		२७७।६२५
क्षात्रधर्मोचितैः	...	४७१
क्षिपसि शुकम	...	७८५
क्षिप्तो हस्तावलग्नः	...	६२७
क्षीणः क्षीणोऽपि	...	७८८
क्षीरोदजावसति—"	...	५४८
क्षेमं ते ननु	...	२३९
ग		
गङ्गाऽम्भसि सुर—"	...	७५५
गच्छ गच्छसि	...	८३१
गच्छामीति	...	८०९
गता निशा इमा	...	५६५
गमनमलसम	...	४५२
गर्दभति श्रुति—"	...	७१२
गाङ्गमम्बु सित—"	...	८८०
गाढ़कान्तदशन—"	...	२९५
गाढ़ालिङ्गन—"	...	६१९
गाण्डीवी कनक—"	...	५६१
गाम्भीर्य्येण समुद्रो—"	...	७४६
गीतेषु कर्णमादत्ते	...	५७४
गुरुतरकलनूपुरा—"	...	१६४
गुरुपरतन्त्रतया	...	६१
गुरोर्गिरः पञ्च—"	...	२४२
गृहिणी सचिवः	...	८४७
गृहीतं येनासीः	...	५८५
गृह्यतामर्जित—"	...	४२५
ग्रथ्नामि काव्य—"	...	५९९
घ		
घटितमिवाञ्जन—"	...	७६१
घोरो वारिमुचाम	...	५७७
च		
चकोर्य्य एव	...	७७९
चक्राधिष्ठितताम्	...	६०६
चञ्चद्भुजभूमि—"	...	४१२
चण्डाल इव	...	५९९
चण्डीशचूडा—"	...	५९१
चन्द्रमण्डलमालोक्य	...	५९४
चन्द्रायते शुक्ल—"	...	७१८
चरणपतनप्रत्याख्यानात्	...	२०६
चरणानतकान्तायाः	...	५७४
चलण्डामरचेष्टितः	...	५६९
चलापाङ्गां दृष्टिम	...	३१५
चारुणा स्फुरिते—"	...	४८८
चित्रं चित्रमनाकाशम्	...	६१२
चिन्तयन्ती जगत्सूतिम्	...	३०९
चिन्ताभिः स्तिमितम्	...	२३२
चिरं जीवतु ते	...	६०२
चिररतिपरिखेदात्	...	१९१

श्लोक:		पत्राङ्क:
अ		
अद्य कंदरिताद	...	४७४
अनाद्य बहन—"	...	८७८
अघनञ्जयनङ्ग—"	...	२७२
अनध्याने भान्तम	...	३२८
अन्यान्यरोधरभस—"	...	८९४
अन्धेटुं बध्यताम	...	७८४
अन्धेन्दोर्विमले	...	४४३
अन्धकेलितरङ्ग—"	...	३९३
अन्धु रथंतेऽरए	...	७९७
आता खज्जावती	...	५९४
आनीमहेऽम्बा:	...	८२५
आयन्ते अग्निनो	...	४५६
आगीपाख्यान—"	...	५५१
आतिप्रीतिर्मनसि	...	४८३
आने मौनं क्षमी	...	७५४
आरेखा दूव सिता	...	६०२
आरेखाश्च: पद्य:	...	५७१
आवसतु गगने	...	१५८
आ		
आवरिच तं जुध	...	१८८
त		
ततश्चार समरे	...	५८६
तत पश्येयमनङ्ग—"	...	४९०
तटप्राप्तिमङ्गा—"	...	३०९
तटवितथमवादी:	...	१२६
तदनच्छ निर्द्वे	...	५६०
तदस्त्रं यदि	...	८७४
तदिच्छेदङ्गमख	...	६०७

श्लोक:		पत्राङ्क:
तदेकोऽमङ्गो	...	६०३
तनयप्रांटमा:	...	१८०
तन्वङ्गा: स्तन—"	...	७५६
तप क्रितव	...	१४८
तप विरहे मनय—"	...	८३४
तप विरहे परिवाधो	...	८२९
तवास्मि गीत—"	...	३८३
तस्य च प्रवयसो	...	८५८
तस्या मुखेन	...	७१२
तस्यालङ्घ—"	...	५१९
तह सि क्षति	...	१५३
तां जानीथा:	...	१४३
तात्पर्यान्यतिरेकाच्च	...	३४७
तानिन्दुसुन्दर—"	...	५५८
तामुद्दीक्ष्य	...	५९४
तारुण्यच्च विलास:		१५५।८२७
तिष्ठेन कोपजात	...	६२०
तीर्थे भीष्मसरोदधौ	...	४३७
तीर्थे तटीये	...	५७८
तीव्राभिषङ्ग—"	...	१८०
तृष्णापङ्कारी	...	४९५
ते हिमालय—"	...	५७६
त्रयस्त्री जलशफरी—"	...	१६९
त्रिभागशेषासु	...	२२१
त्रिवर्गसाधनम	...	८
त्वदङ्गसार्दम	...	७७५
त्वन्नाभिराजि—"		२६७।८२३
त्वया तपस्वि—"	...	४८८
त्वया धा शोभते	...	८४६

श्लोकः		पत्राङ्कः
त्वयि दृष्टे	...	७८०
त्वयि सङ्गर—"	...	८५०
त्वामाद्यं वयमि	...	३०३
त्वामामनन्ति	...	६१०
द		
दत्ते सालसमन्यरम	...	११८
दत्त्वाऽभयं सोऽतिरथो	...	४७१
दत्त्वा कटाक्षमेषाऽपि	...	८५८
दधद्विद्युल्लेखा—"	...	४४४
दन्तप्रभा पुष्प—"	...	७११
दलति हृदयम्	...	४३६
दलिते उत्पले	...	५६१
दशाननकिरीटेभ्यः	...	२८७
दानं वित्ताहृतम्	...	७७५
दासे कृतागसि	...	७२१
दिङ्मातङ्गघटा—"	...	६२७
दिनं मे त्वयि	...	५४७
दिवमप्युत्पतातानाम	...	८४६
दिवाकरान रक्षति	...	५११
दिवि वा भुवि	...	२६६
दृष्टिं मन्दायते	...	२८४
दीधीवेवीट्वनः	...	६१४
दीपयन रोदसी	...	३३१
दीयतामर्जितम्	...	८६६
दीर्घाक्षं शरदिन्दुकान्ति	...	८६
दुर्गालङ्घितविग्रहो	...	५६
दुर्लङ्घ्यशासनाऽराभो	...	४१८
दूरं समागतवति	...	७७६
दूरायतेन	...	१६६

श्लोकः		पत्राङ्कः
दृप्तारिविजये	...	५४४
दृश्या दग्धम्	...	६६६
दृश्यत तन्वि !	...	४८२
दृष्टा दृष्टिमयी	...	११८
दृष्या कंशव ! गोप—"	...	२३६
दृष्टिं दे प्रतिवेशिनि !	...	२६३
दृष्टिस्तूणीकृत—"	...	११३
दृष्टेकासन—"		१३०।६५०
दैवः पायादपा—"	...	८६८
दैवः सोऽयं—"	...	४६७
दोर्भ्यां मे बाजिनम्	...	५८१
दोर्दण्डाञ्चित—"	...	२५६
द्वयं गतं सम्प्रति	...	५७३
द्वीपादन्यस्मादपि	...	३८२
ध		
धनलोऽपि	...	८३३
धन्यः स एव	...	२०३
धन्याः खलु वने	...	८११
धन्याऽसि या कथ—"	...	१२३
धन्याऽसि वैदर्भि !	...	७८७
धम्मिल्लमर्जुनस्य	...	१६७
धम्मिल्लस्य न कस्य	...	५५५
धम्मिल्ले नव—"	...	२६७
धर्मार्थकाम—"	...	५
धवलयति शिशिर—"	...	५६५
धातुमत्तां गिरिः	...	५६०
धिक्त्वन्मूर्ति	...	३२५
धीरो वरो नरो	...	५६५

श्लोकः		पत्राङ्कः
धुनोति चासिम	...	८७१
धृतायुधो यावदहम	...	१९४
न		
न खलु वयममुष्य	...	१४७
न च मेऽवगच्छति	...	१३८
न चातिरसतो	...	४०१
न तज्जलं यन्न	...	८५१
न तथा भूषयत्यङ्गम्	...	१९६
न धत्ते शिरसा	...	८२५
न ब्रूते परुषाम	...	१५७
न भावहीनोऽस्ति	...	२६५
न मे शमयिता	...	५५९
न यत्र दुःखम	...	२५९
नयनज्योतिषा	...	६०१
नयनप्रीतिः	...	२२४
नयनयुगासेचनकम्	...	२७७
नरत्वं दुर्लभम्	...	७
नवजलधरः	...	५५०
नवनखपदमङ्गम्	...	२२८
नवपलाशपलाश—"	...	६७१
न विना विप्रलम्भेन	...	२३९
नष्टं वर्षवरैः		१०९।२५३
नाभिप्रभिन्नाम्बु—"	...	८९०
नाशयन्तो घन—"	...	५७०
नाहं रक्षो न	...	४३९
निःशेषच्युतचन्दनम्	...	५९
निजनयनप्रति—"	...	६५१
निरर्थकं जन्म	...	७९४
निर्माणकौशलम	...	७२९
निर्वाणवैर—"	...	३८७
निर्वीर्य्यं गुरुशाप—"	...	४८०
निश्वासान्ध इवा—"	...	२८३
निसर्गसौरभोद्भ्रान्त—"	...	९९८
निहताशेषकौरव्यः		४३२।४७६
नीतानामाकुलीभावम्	...	६८०
नेत्रे खञ्जनगञ्जने	...	१२१
नेत्रैरिवोत्पलैः	...	७१७
नेदं नभोमण्डल—"	...	७४७
नो चाटुश्रवणम्	...	१४१
न्यक्कारो ह्यय—"	...	९।५५६
प		
पंथिअ ! ण एत्थ	...	२९०
पणअकुविआणं	...	२२७
पद्मादयदिनाधीशः	...	७२५
पंथिअ ! पिआसिओ	...	१७६
परापकारनिरतैः	...	८२४
परिषदियमृषीणाम्	...	४२३
परिस्फुरन्मीन—"	...	२०३
परिहरति रतिम्	...	५९५
पर्य्यङ्को राजलक्ष्म्याः	...	७३०
पर्वतभेदि पवित्रम्	...	६०९
पल्लवाकृतिरक्तोष्ठी	...	५६५
पल्लवोपमिति—"	...	१६३
पश्यन्त्यसङ्ख्या—"	...	३१२
पश्यामि शोक—"	...	४८७
पश्येत् कश्चिच्चल	...	८९४
पाणिः पल्लव—"	...	५६०
पाणिरोधमवि—"	...	१६२

श्लोक:		पत्राङ्क:
पाण्डवानां सभामध्ये	...	६८८
पाण्डु श्यामं वदनम्	...	२२२
पादाघाताद्अशोकस्तं	...	५८७
पादाहतं यदुत्थाय	...	८०७
पान्तु वो जलदः—"	...	७२६
पारजातं नार—"	...	७६३
पुंस्कोकिल प्रावृषलेट्	...	८१०
पुरते वीदसो	...	६१८
पूर्णिमां सन्निलेन	...	४३८
पृथुकार्त्तस्वर—"		६११।६७६
पृथ्वि ! स्थिरा भव	...	८१६
प्रकारोऽयं	...	२२८
प्रज्वलज्जलधारा—"	...	५६६
प्रणमत्युन्नति—"	...	८४३
प्रणयिसखो—"	...	१८६
प्रतिकूलतामुपगते	...	६७७
प्रधानगृहभावाभ्याम्	...	३४०
प्रयाणे तव	...	७८२
प्रवर्त्तयन् क्रिया:	...	८०५
प्रहर्तुं यत् वैरम्	...	४११
प्रसस्मार मनै:	...	५४४
प्रसाधय पुरीम्	...	४७८
प्रसादिकाऽऽलम्बित—"	...	१६८
प्रस्थानं वलये:	...	२३४
प्रागेव दर्शना—"	...	७७२
प्राणप्रयाणदु:खार्त्त:	...	४८६
प्राणेशेन प्रहित—"	...	२००
प्रातिभं विसरकेण	...	१८७
भावविकरणा—"	...	४३०

श्लोक:		पत्राङ्क:
प्रार्थयिष्ये त्वां	...	१९६
प्रार्थयैव हि	...	४७०
प्रिय इति गोत्र—"	...	७४३
प्रिय ! मोक्षतता	...	५१८
प्रेमाद्रा: प्रथम—"	...	२१८
प्रोञ्छ्यकुञ्चकुञ्चन—"	...	५६६

ब

बलमार्त्तमयोघ—"	...	८६१
बलावलेपादधुनाऽऽप	...	७७६
बाष्पोरुकुङ्गुड्डाप—"	...	२२८
बालक ! बाढ दूनो	...	८२८
बाले ! नाथ ! विमुञ्च	...	१२७
ब्राह्मणातिक्रम—"	...	३२२

भ

भक्तिर्भवे न	...	८६१
भग्नं भीमेन	...	३८४
भम धाम्नय !	...	२८४
भल्लापवर्जितै:	...	७१६
भाति पद्म:	...	५४५
भानु: सङ्कुचितुक्त—"	...	५८६
भिक्षो ! भास—"	...	५१६
भिक्षिणीदक्षसख—"	...	२२८
भुक्तिमुक्तिकृटेकान्त—"	...	२०६
भुजङ्गकुण्डली	...	६६१
भूतयेऽस्तु भवानीश:	...	५४८
भूमौ क्षिप्तं	...	४४२
भूय: परिभव—"	...	४१६
भो अर्केश्वर !	...	२५१

श्लोकः		पत्राङ्कः
भ्रातर्द्विरेफ !	...	१९९
भ्रूभङ्गे रचिते	...	२२९
म		
मखशतपरिपूतम्	...	४३५
मञ्जीरादिषु	...	५७७
मञ्जुलमणि—"	...	६७५
मत्वा लोकमदातारम्	...	४७७
मथ्नामि कौरव—"	...	३३०
मधु द्विरेफः	...	२२
मधुपानप्रवृत्ता—"	...	८९४
मधुरः सुधावदधरः	...	७०७
मधुरया मधु—"	...	६५६
मधुरवचनैः सभ्रूभङ्गैः	...	१२५
मध्यं तव सरोजाक्षि !	...	७४१
मध्यस्य प्रथिमानमेति	...	११८
मध्येन तनुमध्या	...	८७३
मनः प्रकृत्यैव	...	४२५
मनोजराजस्य	...	७२६
मन्थायस्तार्णवाम्भः	...	६५८
मन्दं हसन्तः	...	६६७
मयि सकपटं	...	२०१
मल्लिकाचित—"	...	८७७
मल्लिकामुकुले	...	२९९
मल्लीमतल्लीषु	...	२७३
महदे सुरसन्धम्	...	६८१
महिलासहस्र		३००।७५७
मा गर्वमुद्वह	...	१६५
मातः ! किमप्यसदृशम्	...	४९४
मानं मा कुरु	...	५९५
मानमस्या निराकर्तुम्	...	८७२
मानोन्नतां प्रणयिनीम्	...	३२७
मामाकाशप्रणिहित—"	...	१९२
मारमासुषमा	...	६९५
मुक्तोत्करः सङ्कट—"	...	७६२
मुखं चन्द्र इवाभाति	...	६०३
मुखं तव कुरङ्गाक्षि !	...	७३३
मुखमिन्दुर्यथा	...	७०८
मुखसेणीदृशो	...	७५५
मुग्धा दुग्धधिया	...	७४२
मुञ्च चन्द्रं कुरङ्गाक्षि !	...	५७९
मुञ्च मानं हि	...	५६१
मुनिर्जयति योगीन्द्रो	...	८८६
मुहुरङ्गुलिसंवृता—"	...	३१६
मुहुरुपहसिता—"	...	१४८
मूर्द्ध्न्याधूयमान—"	...	६०७
मृगरूपं परित्यज्य	...	४८६
मृणालव्याल—"	...	१५९
मृत्कुम्भवालुका—"	...	१८३
म्रियते म्रियमाणे	...	४८९
य		
यं सर्वशैलाः	...	५५७
यः कौमारहरः		१५।१९८
यः स ते नयनानन्द—"	...	५५७
यच्च कामसुखम्	...	२६०
यत् त्वन्नेत्रसमान—"	...	८२२
यत्र ते पतति सुभ्रु !	...	५४९
यत्र पतत्यबलानाम्	...	८२६
यत्रोन्मदानाम्	...	३३६

श्लोक:		पत्राङ्क:
यत् सत्यव्रतभङ्ग—"	...	४१४
यदाऽहं पाण्डवा	...	२६२
यदि सत्यर्पिता	...	५६६
यदि समरमपास्य	...	४९८
यदि स्नात्वाम्बुकुल्यां	...	७७१
यदेतच्चन्द्रात:	...	७६६
यत्र यत्र विरहदुःखम्	...	५५९
यस्मिन्नर्थे कूर्मराजश्च	...	४७६
यत् वैद्युतमिव	...	४७३
यमुनाम्भश्चरमम्भरम्	...	५४७
ययातेरिव	...	६८५
ययोरारोपित—"	...	८५७
यशसि प्रसरति	...	७१४
यशोऽधिगन्तुम्	...	५७६
यशोऽभिनन्दो	...	३७९
यस्य न सविधे	...	६६९
यस्यालोचत	...	२१
यां विनाऽमी	...	५७१
याऽर्थान्तरामिश्रा	...	१६२
या लयधी—"	...	५७१
यान्ति नीलानिलोल्लिखो	...	५९०
याम: ? सुन्दरि !	...	२३३
यावदर्थपदा	...	८१९
यासां सख्यपि	...	१६१
युक्त: कलाभि:	...	६१०
युगान्तकाल—"	...	८४४
युधान् क्षेपयति	...	४१४
येन भ्रक्षमनोभवेन	...	६८२
येरिकेरुपमाखलाखपि	...	८०३

श्लोक:		पत्राङ्क:
योऽनुभूत:	...	७८४
योगीव दलितावय:	...	५४५
यो य: प्रस्तम्		४२६।६४५

र

रक्तप्रसाधितभुव:	...	३९३
रक्तोत्फुल्ल—"	...	२७३
रक्तांश्चापि	...	५४९
रजनीषु विमल—"	...	२२७
रक्षिता तु	...	७६५
रतिकेलिकल:	...	४८३
रतिलीलामुसल्	...	५६६
रथ्याऽम्बुचरत:	...	२५८
रमणे चरणप्रान्ते	...	५८०
रमावक्त्र: परम्	...	२१९
राजते सुनखोचना	...	७१४
राजन् ! राजसुता	...	८१७
राजनारायणम्	...	९०२
राजान: सुतनिर्विशेष—"	...	४४५
राजीवमिव राजीवम्	...	७२०
राज्यञ्च वसु	...	२५१
राज्ये सारं वसुधा	...	८५३
रामलक्ष्मणवत्तरेव		१९५।५७३
रामो मूर्ति	...	३८१
रावणश्चापि	...	७५८
रावणावग्रहक्लान्तम्	...	७२७
रोलम्बा: परिपूरयन्तु	...	२२३

ल

लक्ष्मणेन समम्	...	७९९

श्लोकः		पत्राङ्कः
लक्ष्मीवक्षोज—"	...	८७६
लग्नं रागावृताङ्ग्या	...	५९२
लङ्केश्वरस्य	...	३८८
लज्जापज्जत—"	...	११७
लताकुञ्जं गुञ्जन्	...	६३९
लतेव राजसे	...	६०२
लाक्षागृहानल—"	...	४११
लाङ्गूलेनाभिहत्य	...	८८४
लावण्यं तदसौ	...	३०५
लावण्यमधुभिः	...	७२८
लिम्पतीव तमोऽङ्गानि	...	७६१
लीलागतैरपि	...	४२७
लोलांशुकस्य	...	५१५
व		
वक्रस्यन्दिस्वेद—"	...	८८१
वदनं मृगशावाक्ष्याः	...	६१२
वदनमिदं न	...	७५०
वदनाम्बुजमेणाक्ष्याः	...	९०२
वनेऽखिलकला	...	८९२
वनेचराणाम्	...	७३८
वर्ण्यते किं महासेनो	...	५६०
वर्षत्येतदहःपतिः	...	५८३
वल्लभोत्सङ्ग—"	...	८३६
वसन्तलेखैक—"	...	७८०
वाग्वैदग्ध्य—" (ल०)	...	१८
वाचमुवाच कौत्सः	...	५६५
वाप्यो भवन्ति	...	८५२
वारिजेनेव	...	७१९
वासुवाशामुखे	...	५६९
विकसन्नेत्रनीलाब्जे	...	६७८
विकसितमुखीम	...	७९६
विचरन्ति विलासिन्यो	...	८५६
विदधे मधुपश्रेणीम्	...	७३३
विदूरं केयूरे	...	१४४
विधवति मुखाब्जमस्याः	...	७१३
विनयति सुदृशो	...	२२७
विना जलदकालेन	...	७९३
विपिने क्व	...	२४४
विपुलेन सागरशयस्य	...	८४२
विभाति मृगशावाक्षी	...	५५९
विभावा अनुभावाश्च (ल०)	...	९५
विमल एव रविः	...	७७८
विरहे तव तन्वङ्गी	...	८२९
विराजति व्योमवपुः	...	७४८
विललाप स बाष्प—"	...	८६४
विलोकनेनैव	...	२६७
विलोक्य वितते	...	५८१
विवृण्वती शैलसुता	...	१५३
विसृज सुन्दरि !	...	४५१
विसृष्टरागादधरा—"	...	८५७
वीक्षितुं न क्षमा	...	८६२
वृद्धोऽन्धः पतिः	...	१८५
वृहत्सहायः कार्य्यान्तम्	...	८१८
वेदान्तेषु यमाहुः	...	३७९
व्यतिक्रमलवम्	...	५७४
व्यपोहितुं लोचनतो	...	१६०
व्याजस्तुतिस्तव	...	८१४
व्याधूय यत् वसन—"	...	७८५

श्लोकः		पत्राङ्कः
श		
शठान्यस्याः	...	१०४
शब्दचित्रम् (ल०)	...	३४०
शशिनमुपगतेयम्	...	८४३
शशी दिवसधूसरो	...	८६८
शिखरिणि क्व नु	...	२९८
शिरसि धृतसुरापगे	...	३७८
शिरामुखैः स्यन्दत एव	...	२५२
शिरीषमृद्वी	...	७२३
शीतांशुर्मुख—"	...	४२८
शुश्रूषस्व गुरून्	...	४९३
शून्यं वासगृहम्	...	२०
शूरा अमरताम्	...	५४४
शेफालिकां विदलिताम्	...	२२३
शैलेन्द्रप्रतिपाद्यमान—"	...	८८३
शोणं वीक्ष्य मुखम्	...	१०२
श्रवणैः पेयमनेकैः	...	३७६
श्रीरेषा पाणि—"	...	४२२
श्रीहर्षो निपुणः	...	३८४
श्रुतं कृतधियाम्	...	८४९
श्रुतान्वयादनाकाङ्क्षम् (ल०)	...	३५६
श्रुताप्सरोगीति—"	...	११५
श्रुतिदुष्टादयो (ल०)	...	१२
श्रुत्वाऽऽयान्तम्	...	१६४
श्वासान् मुञ्चति		१६६ ६४५
स		
संयोगो विप्रयोगश्च (ल०)	...	५३
स एकस्त्रीणि	...	८३३
स एव सुरभिः	...	१५२
सकलकलम्	...	६८९
सङ्केतकालमनसम्		६१।८८२
सङ्गमविरहविकल्पे	...	७४३
सङ्ग्रामे निहताः	...	५६०
सज्जनो दुर्गतौ	...	५८८
सज्जेइ सुरहि—"	...	२९६
सतीमपि ज्ञाति—"	...	४९३
सत्पक्षा मधुरगिरः	...	६९३
सदा चरति खे	...	५८४
सदाशिवं नौमि	...	५६५
सदैव शोणोपल—"	...	८७६
सद्यः करस्पर्श—"	...	८४०
सद्यः पुरीपरिसरे	...	१८६
सद्योमुण्डित—"	...	६५१
सद्वंशसम्भवः	...	४६८
सन्ततमुषलासङ्गात्	...	८३५
सन्धौ सर्वस्वहरणम्	...	३३३
सममेव नराधिपेन	...	७९२
सममेव समाक्रान्तम्	...	७७२
समय एव	...	५७२
समाश्लिष्टाः	...	१५६
समीक्ष्य पुत्रस्य	...	२०३
सम्प्रति सन्ध्या—"	...	६१५
सरसं कइण	...	६७५
सरसिजमनुविद्धम्	...	१५५
सरागया स्रुत—"	...	६२६
सरो विकसिताम्भोजम्	...	८५१
सर्वक्षितिभृताम्	...	५१२
सर्वस्वं हर	...	६८०

श्लोकः		पत्राङ्कः
सर्वाकारमह—"	...	२६१
स वः शशिकला—"	...	५५८
सवासनानाम्	...	८२
सस्नुः पयः पपुः	...	५६६
सहकारः सदामोदो	...	८०९
सह कुमुदकदम्बैः	...	७९१
स हत्वा वालिनम्	...	५५८
सहभृत्यगणम्	...	४७७
सहसाऽऽलिजनैः	...	६००
सहसा विदधीत		५८६।८२०
सहाधरदलेनास्याः		७६९।७९०
सान्द्रानन्दमनन्तम्	...	५३१
सा पत्युः प्रथमापराध—"	...	१२०
सा बाला वयम्	...	८३८
सायं स्नानमुपासितम्	...	३०८
सार्थकानर्थकपदम्	...	१९७
सार्द्धं मनोरथशतैः	...	१२८
सुखदुःखादिभिः (ल०)	...	२१४
सुतनु ! जहिहि	...	२७६
सुनयने नयने	...	६१२
सुभग ! त्वत्कथा—"	...	१६३
सुभगे ! कोटिसङ्ख्यात्वम्	...	२९९
सूचीमुखेन	...	६४१
सूर्य्याचन्द्रमसौ	...	४८१
सैषा स्थली यत्र	...	७५८
सौजन्याम्बुमरुस्थली	...	७३३
सौरभमम्भोरुह—"	...	७०६
स्तनावद्रिसमानौ ते	...	५९९
स्तोकेनोन्नति—"	...	६८५
स्थिताः क्षणं पक्ष्मसु	...	८५६
स्नाता तिष्ठति	...	१००
स्निग्धश्यामल—"	...	४९
स्पृष्टास्ता नन्दने	...	८१६
स्मरशरशत—"	...	८२८
स्मरार्त्त्यन्धः कदा	...	५५३
स्मितेनोपायनम्	...	७३६
स्मेरं विधाय	...	७१६
स्मेरराजीवनयने !	...	६६८
स्रक्सूत्रवृत्त्या (ल०)	...	२१२
स्रगियं यदि	...	८०७
स्वचरणविनिविष्टैः	...	६४४
स्वच्छाम्भःस्नपन—"	...	१६०
स्वज्ञानेनान्यधी—" (ल०)	...	७५
स्वपिहि त्वं समीपे	...	५८१
स्वामिन् ! भङ्गुरया—"	...	१२५
स्वामी निश्वसिते	...	१३२
स्वामी मुग्धतरो	...	२७१
स्वार्थबोधसमाप्तानाम् (ल०)	...	२७
स्वेच्छोपजात—"	...	६८८

ह

श्लोकः		पत्राङ्कः
हंसश्चन्द्र इवाभाति	...	७१९
हंहो धीरसमीर !	...	८६७
हते जरति	...	४८२
हनुमदाद्यैर्यशसा	...	७८९
हन्त ! सततमेतस्याः	...	५६७
हन्त ! सान्द्रेण	...	८७९
हन्त ! हन्त ! गतः	...	६१२

श्लोकः		पत्राङ्कः	श्लोकः		पत्राङ्कः
हन्तुमेव प्रवृत्तस्य	...	५८२	हा पूर्णचन्द्रमुखि !	...	४३७
हरन्ति हृदयम	...	५८२	हारोऽयं हरिणा—"	...	८६४
हरवन्नीलकण्ठोऽयम	...	५९९	हिममुक्तचन्द्र—"	...	३०१
हरस्तु किञ्चित्—"	...	२६८	हीरकाणां निधेः	...	५८९
हसति परितोष—"	...	४७२	हृदि विसलताहारो	...	७५१

साहित्यदर्पण-सारसङ्क्षेपः ।

मुखबन्धः ।

इह खलु साहित्यशास्त्रे व्युत्पित्सूनां परिशीलित-काव्य-व्याकरण-तर्कादिशास्त्राणां छात्राणाम् अवश्यद्रष्टव्योऽयं दर्पणवत् साहित्यदर्पणः । एष चाष्टादशभाषारसिकेन महापात्रसान्धिविग्रहिकेण कविराजोपाधिकेन श्रीविश्वनाथकविना विरचितः, ध्वन्यालोक-काव्यप्रकाश-रसगङ्गाधरप्रभृतिनिरूपित-पदार्थप्रतिपादको भूत्वाऽपि दृश्यकाव्यविषये केवलतन्निरूपकदशरूपकादिनिबन्धमधरीकरोति । प्रकाशवदेषोऽपि कारिकाविवृत्त्युदाहृतिभिस्तद्विधोपकरणैः प्रतिपादितः । प्रायेण प्राञ्जलमेव प्रमेयाणामुपादानमत्र लक्ष्यते, अतः सुकुमारमतीनां नरपतिनन्दनानामपि सर्वथा सुखबोध्योऽयमिति मन्यन्ते मनीषिणः ।

शास्त्रेऽस्मिन् काव्यस्य स्वरूपभेदानामुत्कर्षापकर्षयोरुपदेशः, रसभावतदाभासविरोधविकाशक्रमाणामुपपादनं, शब्दार्थशक्तिनियमः, दोषगुणरीत्यलङ्कारनिरूपणं, भाषाविभाषप्रभृतयश्च वर्त्तन्ते । ग्रन्थमेनमनधीत्य साहित्यसमालोचनं चित्रसौन्दर्यदर्शनमिवान्धानां विफलम् । अतः स्वयमेव ग्रन्थकृता ग्रन्थावसाने अवादि—"साहित्यदर्पणममुं सुधियो विलोक्य साहित्यतत्त्वमखिलं सुखमेव वित्त" इति ।

अस्य ग्रन्थस्य कर्त्ता विश्वनाथस्तु महापात्रचन्द्रशेखरात्मजः । महापात्रः ब्राह्मणविशेष इति केचित्, उपनामान्तरमित्यपरे । सन्धिविग्रही इति राज्याधिकारगुणविशेषौ, तयोः नियुक्तः सान्धिविग्रहिकः ["तत्र नियुक्तः" (४।४।६९ पा०) इति सूत्रेण ठक्प्रत्ययः] कविराज इति कविश्रेष्ठत्वप्रतिपादकः । एष हि शालिवाहनशकस्य त्रयोदशशताब्द्या अन्तिमभागे आसीदिति केचिन्मन्यन्ते ।

प्रथमपरिच्छेदे—

प्रथमं तावत्—"ज्ञाताथै ज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्त्तते। तस्मात् तेन वक्तव्यः सम्बन्धः सप्रयोजनः॥" इत्यादि-शास्त्रात् अवश्यवक्तव्यस्य प्रयोजनस्य निरूपणं, तेनैव च सम्बन्धाभिधेययोरपि समर्थनम्; तथा च यस्यास्य काव्य-स्वरूपनिर्मितिरभिधेयं, काव्यसाधनं अप्रधानकारणतया काव्य-फललाभाभिन्ना सुखेन चतुर्वर्गफलप्राप्तिरेव प्रयोजनं, सम्बन्धश्च तयोः कार्य्यकारणत्वरूपः। ततश्च काव्यं रसभावतदाभासान्य-तमव्यङ्गकं वाक्यं महावाक्यञ्च। प्रसङ्गतश्च तस्य शब्दार्थौ शरीरं, गाढ़ानन्दसञ्जनन-श्रेष्ठस्वभावतया जीवनाधायकत्वाद्रसादि-रात्मा, काणत्वखञ्जत्वादयः शरीराणामिव दुःश्रवत्वादयः दोषाः काव्यानामपकर्षकाः, गुणालङ्काररीतयश्च उत्कर्षकारणभूताः। तत्र च गुणाः शरीराणां शौर्य्यादिवत्, अलङ्काराः कटककुण्ड-लादिवत्, रीतयः अवयवानां यथास्थानविन्यासविशेषवत्। शरीरोत्कर्षापकर्षाभ्यां यथा आत्मनः उत्कर्षापकर्षौ भवेतां, तथा काव्यात्मभूतस्य रसस्यापि दोषगुणादयोऽपकर्षोत्कर्ष-सम्पादकाः इत्यादीनि च विवृतानि।

द्वितीयपरिच्छेदे—

काव्यलक्षणघटकीभूतवाक्यलक्षणम्। तत्र योग्यताऽऽकाङ्क्षा-ऽऽसत्तियुक्तपदसमूहः वाक्यम्। तात्पर्य्यविषयीभूतसम्बन्धेन तन्निरूपकाणां पदार्थानामेकतरस्मिन्नपरपदार्थसङ्गावो योग्यता। आकाङ्क्षा—प्रतीतिपर्य्यवसानविरहः, पदार्थानामन्वयज्ञान-जनकत्वेन श्रोतुरिच्छाऽभावविरहस्वरूपः इति फलितार्थः। आसत्तिः,—पदार्थोपस्थितेः प्रकृतानुपयोगिपदार्थोपस्थितिकाल-बाहुल्यान्यतमत्वेनाव्यवहितपदार्थोपस्थितिः। महावाक्यम्—उक्तलक्षणानां वाक्यानां समूहः।

तत्र पदम्—अर्थसमासाङ्गसुप्-तिङन्ता तल्लोपयुक्ता वा प्रकृतिः। अर्थः,—वाच्यलक्ष्यव्यङ्ग्यभेदेन त्रिविधः। "अस्मात् शब्दादयमर्थो बोद्धव्यः" इति ईश्वरेच्छाविषयकसङ्केतबोध्यया शब्दस्य प्रथमोद्भाविता स्वाभाविक्या शक्त्या व्याकरणादिना वा नियमिता अभिधा, तया बोध्यः अर्थः वाच्यः अभिधेयार्थो वा। एवमेव मुख्यार्थस्वान्वयानुपपत्तिग्रहे तदर्थसम्बन्धी स्वाभाविकेतरः ईश्वरानुद्भावितः अपरः अर्थः रूढिप्रयोजनयोरन्यतरस्मिन् हेतौ सम्भवति यया प्रतीयते, सा लक्षणा नाम वृत्तिः, तया शक्त्या बोध्योऽर्थः लक्ष्यः।

लक्षणाभेदाः,—लक्षणा हि रूढिप्रयोजनभेदेन प्रथमं द्विविधा; लक्षणाघटकवाक्यानां प्रसिद्धत्वे रूढिमूला, केनचित् निमित्तेन तदङ्गीकारे प्रयोजनमूला चेति। पुनश्च उपादान-लक्षणा-लक्षणलक्षणाभेदात् सैव चतुर्विधा। तत्रोपादान-लक्षणा—वाच्यार्थस्वान्वयसिद्ध्यर्थं लक्ष्यार्थस्य बोधने वाच्यार्थ-स्याप्युपादानमूला अजहत्स्वार्थाऽपरनामधेया। लक्षणलक्षणा तु—सर्वथा स्वार्थपरित्यागेनापरार्थमात्रबोधिका जहत्स्वार्था-ऽऽख्या इति। ततश्च चतुर्विधायास्तस्याः सारोपा-साध्यवसाना-भेदेन पुनरष्टविधत्वम्। तत्र प्रयुक्तशब्दप्रतिपादितनिरूढारोप-विशेष्यत्वे सति सारोपा, शब्दं विनैवाक्षेपादिना निरूढारोप-विषयस्य प्रतीयमानत्वे सति साध्यवसाना इति। ता अपि सादृश्येतरसम्बन्धहेतुकाः शुद्धाः, सादृश्यसम्बन्धहेतुकाश्चेत् गौण्यः; तेन च षोडश भेदाः जायन्ते लक्षणानाम्। एतेषु भेदेषु प्रयोजने दर्शितायाः अष्टविधभेदत्वा लक्षणायाः प्रयोजनरूप-व्यङ्ग्यं गूढागूढत्वेन प्रत्येकं द्विविधा इति पुनः षोडश भेदाः; तेषाञ्च धर्मिधर्मगतत्वेन द्वौ भेदौ इति मिलित्वा द्वात्रिंशत्प्रकाराः फललक्षणाः। रूढिलक्षणा च पूर्वोक्ताष्टविधा एव; एतेषां

मेलनेन च चत्वारिंशत्प्रकाराः लक्षणाः। पुनश्च ता अपि पदवाक्यगतत्वेन द्विविधाः इति अशीतिर्लक्षणाभेदाः।

व्यञ्जना——— अभिधालक्षणातात्पर्याऽऽख्याभिस्तिसृभिः शक्तिभिः सङ्केतितारोपितान्वयबोधमात्ररूपान् अर्थान् बोधयित्वा वाच्यलक्ष्यतात्पर्यार्थेषु विश्रान्तेषु तदपरार्थप्रत्यायनहेतुभूता शक्तिरेव। "शब्दबुद्धिकर्मणां विरम्य व्यापाराभावः" इति न्यायादुपरताया: पुनरुत्थानाभावात् वस्त्वलङ्काररसादिव्यङ्ग्यबोधने न तासां क्षमत्वमिति व्यञ्जनाशक्तेरङ्गीकारः।

व्यञ्जना अपि द्विधा भवति, शाब्दी आर्थी चेति। तत्राभिधालक्षणाभेदात् द्विविधा शाब्दी व्यञ्जना। अभिधामूला तु—अनेकार्थशब्दानां संयोगप्रकरणादिभिरेकस्मिन्नर्थे नियमिते अप्राकरणिकापरार्थप्रतीतेरुपायरूपा।

संयोगादयः यथा—

"संयोगो विप्रयोगश्च साहचर्यं विरोधिता।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः।
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः॥" इति।

(एषु च स्वरस्य काव्ये विशेषबोधकता नास्ति, वेदे एव तस्याङ्गीकार इति बोध्यम्)।

प्रकरणादिनियमाभावे तु यावदर्थं वक्तृतात्पर्यं, तावन्त एवार्था वाच्याः। लक्षणामूला व्यञ्जना च—यत्प्रयोजनसिद्ध्यर्थं लक्षणाशक्तिस्वीकारः, तत्प्रयोजनप्रत्यायनरूपा।

आर्थी व्यञ्जना—वक्तृबोद्धव्ययोः वाक्यवाच्यान्यसन्निधीनाञ्च तथा प्रस्तावदेशकालकाकुचेष्टादीनां वैलक्षण्यज्ञानेन जायमानस्यार्थान्तरस्य बोधिका। अर्थानां वाच्यलक्ष्यव्यङ्ग्यत्वेन त्रैविध्यात् अस्याः अपि आर्थीव्यञ्जनायाः वाच्यलक्ष्यव्यङ्ग्यार्थभेदेन त्रैविध्यम्। ननु शब्दबोध्यस्यार्थस्य यथा अर्थान्तरव्यञ्जकत्वं, तथा

अर्थान्तरोपस्थापकस्य शब्दस्यापि अर्थान्तरव्यञ्जकत्वं, तत्कथं व्यञ्जनायाः शब्दार्थगतत्वेन भेदावसरः ? इति न वाच्यम् ; अव्यवहितोपकारकत्वेन प्राधान्यादेकस्य व्यञ्जकत्वे तदितरस्याप्राधान्यात् महत्कारित्वमित्यनयोर्भेदः।

अर्थानां त्रैविध्यात् तद्बोधकशब्दानामपि त्रैविध्यं दर्शितम्। अभिधोपाधिकः शब्दः वाचकः, लक्षणोपाधिकः शब्दः लक्षकः, व्यञ्जनोपाधिकः शब्दो व्यञ्जकः इति।

तात्पर्यं नाम तुरीया वृत्तिः,—पदार्थानामन्वयबोधनहेतुः। अभिधालक्षणयोः एकैकपदार्थबोधनसामर्थ्यात् पदार्थान्वयबोधनार्थमस्याङ्गीकारः।

तृतीयपरिच्छेदे—

रसः,—काव्योपस्थापितविभावानुभावसञ्चारिभावयोगेन रत्यादिस्थायिभावः रूपान्तरपरिणतः परमानन्दचमत्काररूपतामापन्नः नायकनिष्ठोऽपि ज्ञानसम्बन्धेन सामाजिकनिष्ठः सन् अन्नसम्बन्धेन दुग्धस्य दधिभाव इव रस इति कथ्यते। यद्वा —पाकसम्बन्धेन यथा ओदनरूपं प्राप्तस्य तण्डुलस्य ओदनत्वेन व्यवहारः, तथा प्रतीतिसम्बन्धेन रसरूपं प्राप्तायाः रत्यादितादात्म्यानाध्यवसितायाः सामाजिकवासनायाः रस इति व्यवहारः। अलौकिकचमत्कारसाररूपस्य विलक्षणव्यपदेशभाजः ब्रह्मानन्दसदृशपरमानन्दज्ञानस्वरूपस्य तस्यास्वादस्तु तथाविधालौकिककाव्यार्थपरिशीलनेन रजस्तमसी अभिभूय सत्त्वस्याविर्भावात् ज्ञानान्तरं यथा स्वगोचरघटादिं प्रकाशयति, तथा रसः आत्मानं प्रकाशयतीत्यतश्च, यथा वा देहस्य स्वस्माद्भिन्नत्वेऽपि अहं स्थूल इत्यादि भेदोल्लेखाभावेन प्रतीतिः, तथा ज्ञातृज्ञानभेदाभावेन अलौकिकप्रत्यक्षेण

समूहालम्बनज्ञानतादात्म्येन च प्रधानकरसन्यायादेकरूपत्वेनावगन्तव्यम् ।

प्रथमं नाट्यकाव्यदर्शनश्रवणाभ्यां विभावानुभावयोरुपस्थितिः, एवमाक्षेपेण झटित्येव स्थायिसञ्चारिभावयोरपि, ततः साधारणीकरणाख्यव्यापारेण सीतादयः मम रामस्य वेति विभावादिचतुष्टये प्रत्येकं साधारण्यप्रत्ययः, ततश्च व्यञ्जनया रसस्मरणाकारप्रत्ययः, तदनु तत्सहकृतेन स्वादनाख्यव्यापारेण "रामोऽहं सीताविषयकरतिमान्" इत्याकारकः रत्याद्यभेदः स्वस्मिन् नायकाभेदमवगाहमानः साक्षात्कारः सम्पद्यते इति।

व्यस्तानामपि रत्यादिभावानामेकत्वन्तु प्रथममेकैकशः प्रतीयमानाः रत्यादयः भावाः व्यञ्जनाजन्यैकज्ञानविषयत्वेन पुनरेकरूपत्वं प्राप्ताः चिद्रूपत्वं प्राप्नुवन्तः एव रसरूपतामापद्यन्ते ; वस्तुतस्तु ब्रह्ममीमांसायां यथा "चिदानन्दरूपोऽयं पुरुषः" इत्यनेन चिदानन्दयोरेकत्रब्रह्मत्वमुपपादितं, तथाऽत्र चिदानन्दचमत्काराणामेकरसरूपत्वम् इत्यभिप्रायः। करुणरसादिषु शोकादेः स्थायिनः दुःखहेतुतया प्रसिद्धस्य, नायके इव सहृदयेऽपि दुःखजननस्यैवौचित्यात् कथं सहृदयाह्लादहेतुत्वम् ? इत्यपि न शङ्क्या ; सचेतनः कश्चिदपि न खलु कदाऽपि स्वदुःखाय प्रवर्त्तते ; करुणादिषु च रसेषु सर्वेषामेव साभिनिवेशप्रवृत्तिदर्शनात् शृङ्गाररसप्रधानकाव्येभ्यः इव करुणप्रधानकाव्येभ्योऽपि यदि केवलाह्लाद एव सहृदय-हृदय-प्रमाणकः, तदा काव्यानुरोधेन कारणस्य कल्पनीयत्वाल्लोकोत्तरकाव्यव्यापारस्यैवाह्लादप्रयोजकत्वमिव दुःखप्रतिबन्धकत्वमपि कल्पनीयम्। तथात्वे करुणरसप्रधानरामायणादीनामपि दुःखहेतुनाप्रसङ्गप्रसरः अपसृतः, ततश्च लौकिकशोकहर्षादिभ्यः लौकिकशोकहर्षादयः यथा जायन्ते, काव्ये न पुनस्तथा, इह

सर्वेभ्यो विभावादिभ्यः सुखमेव समुत्पद्यन्ते इति समाधानम्। तेन च चेतसः द्रवीभावात् निश्वासाश्रुपातादयोऽपि परमानन्दसमुत्थिता एव। रत्यादिवासनामन्तरेण न खलु रसास्वादः इति सहृदयातिरिक्तानां सर्वेषां सामाजिकानां न पुनस्तादृशो रसाभिव्यक्तिः भवति; रसबोधे साधारणीकृतेरङ्गीकारबीजन्तु रामादिरत्याद्युद्बोधहेतुभिः सीतादिभिः सामाजिकानां सजातीयरत्यादिसाजात्येन नायकाद्यभेदावगाहिरसबोधोपपत्तिकरणमेव। साधारण्याभिमानेन मनुष्यमात्रस्य विशालजलधिलङ्घनादावपि महानुत्साहोद्बोधः, तथा नायकमात्रसम्बन्धित्वेन प्रतीतस्यापि रत्यादेः स्वात्मगतत्वेनैव प्रतीतिः। तथा प्रथमतः विभावानुभावसञ्चारिभावा अपि साधारण्येनैव प्रतीयन्ते, तेषामलौकिकत्वमपि भूषणायैव। कारणकार्यसहकारिरूपाणामपि विभावादीनां रसोद्बोधे कारणत्वेऽपि एक एव प्रतिभासः; स च प्रपाणकरसे यथा खण्डमरिचादीनां सम्मेलनादपूर्वः कश्चिदास्वाद उपजायते, तथा विभावादीनां सम्मेलनात् इहापि इत्यवधेयम्। यत्र च तेषां द्वयोरेकस्य वा सद्भावः, तत्र प्रकरणादिवशादन्यसमाक्षेपः विधेयः। नायकमात्रगतत्वे तु नानासामाजिकगतस्य रसस्याल्पतया, अलौकिकविभावादिजन्यत्वप्रतिकूलतया च, तथा नाट्यकाव्यदर्शनश्रवणादिप्रतिबन्धकतया च रसोऽयं न अनुकार्यगतः।

शिक्षितार्थस्य मुहुरनुष्ठानेन संस्कारातिशयात् काव्यार्थभावनेन सभ्यपदवाच्यनटस्य रसास्वादो भवत्येव, तदितरस्य तु नटस्य नैव रसास्वादः। रसस्य ज्ञानाभावकालिकावस्थायामवस्थानाभावात् नायं ज्ञाप्यः; यो वा ज्ञाप्यो घटादिः, स प्रतीतिं विना कदाचिदवतिष्ठते, अयन्तु न तथेति भावः। तथा अयं यथासम्भवविशेषणविशेष्यभावापन्नविभावादिसमूहः

विषयकः न ज्ञाप्यः, रसप्रादुर्भावप्राक्क्षणे विभावादिज्ञानस्य पूर्ववर्त्तित्वमात्रेणौपचारिककारणत्वात्। न वाऽयं कार्य्यः, रसप्रतीतिकाले तत्कारणानां विभावादीनां प्रतीतेरभावात्; कारणज्ञानतत्कार्य्यज्ञानयोर्युगपददर्शनात् न हि चन्दनस्पर्शज्ञानं तज्जन्यसुखज्ञानश्च एकदा सम्भवति; ततश्च रसः कार्य्यत्वाभाववान्, सुखमयत्वे सति विभावादिसमूहविषयकत्वात् इत्यनुमानम्। विभावादिज्ञानात् प्रागस्य ज्ञानाभावान्नाप्ययं नित्यः, लौकिकप्रत्यक्षे विषयस्य हेतुत्वस्वीकारेण भविष्यतस्तदसम्भवात् साक्षात्कारविषयानन्दबहुलप्रकाशरूपस्यास्य न वा भविष्यत्वम्; वर्त्तमानस्य वस्तुनः कार्य्यज्ञाप्यान्यतरत्वनियमान्नायं रसः वर्त्तमानोऽपि; परमानन्दत्वप्रकारकसंवेदनविषयत्वात् स्वमात्रग्राह्यस्य रसस्य संसर्गावगाहिज्ञानविषयाभावत्वञ्च दर्शितम्। अयन्तु वेदान्तप्रसिद्धब्रह्मवत् स्वप्रकाशः अखण्डस्वरूप एव वेदितव्यः।

विभावाः,—ये पुनरिह लोके रामादिनायकगतरतिहासादिकानामुद्बोधहेतुभूताः सीतादयः रूपककाव्यनिवेशिता अलौकिकत्वमापन्नाः, ते विभावा इत्युच्यन्ते।

आलम्बनोद्दीपनाख्यो विभावस्य द्वौ भेदौ। यानेव नायिकानायकप्रतिनायकादीनवलम्ब्य रसोद्गमः स्यात्, ते आलम्बनविभावाः। तत्र नायकः,—त्यागवान्, नानागुणसम्पन्नः, सत्कुलजातः, सुवेषः, रूपयौवनाध्यवसायवान्, चित्रप्रकारी, गूढाभिप्रायज्ञः, तेजस्वी, सङ्कीर्णश्च नायको भवति। तस्य च धीरोदात्त-धीरोद्धत-धीरललित-धीरप्रशान्तभेदेन चत्वारो भेदाः सम्भवन्ति। तेषाञ्च धीरोदात्तादीनां प्रत्येकं दक्षिणधृष्टानुकूल शठधृष्टत्वेन भेदात् षोड़शप्रकारो नायकः। तेषां पुनरुत्तमाधममध्यमत्वेनाष्टचत्वारिंशत् भेदाः।

अथ शृङ्गारसहायाः,—प्रधानसहायः पीठमर्दाख्यः, उत्तमाधममध्यमभेदेन बहवोऽन्येऽपि विटादयः सहायाः सन्ति। अर्थचिन्तने सहायः मन्त्री। अन्तःपुरसहायाः वामनादयः। दण्डसहायाः सुहृटादयः।

दूता दूत्यश्च निसृष्टार्थ-मितार्थक-सन्देशहारकभेदात् त्रिधा। तत्र नायिकानायकमनोषितमर्थमुपलभ्य स्वबुद्धया कार्य्यसम्पादनकारी निसृष्टार्थः, अल्पार्थकथकः कार्य्यसम्पादनकारी मितार्थकः, स्वामिना यावदुक्तं सन्देशं तावदेव व्याहरति यः, स सन्देशहारकः।

सात्त्विकनायकस्य गुणाः,—शोभा-विलास-माधुर्य्य-गाम्भीर्य्य-धैर्य्य-तेजो-ललितौदार्य्यनामानः अष्टौ।

तत्र नायिका—नायकसामान्यगुणवती भवति, सा च प्रथमं स्वीया, अन्या, साधारणीभेदात्त्रिविधा। तासु च • विनय-सरलता-गृहकर्मपरता-पातिव्रत्यादिगुणयुक्तायाः स्वीयायाः नायिकायाः मुग्धा, मध्या, प्रगल्भा चेति त्रयः भेदाः। तासु च तरुणयौवनोद्रेकात् मदनविकारमधिगता, रतावनिच्छुः, नात्यभिमानिनी, लज्जावनतमुखी मुग्धा; सुरतकलाकौशलवती, प्रतिपन्नयौवनमदनोन्मादिनी, नातिलज्जावनता मध्या; तथा सततप्ररूढकामविमोहिता, परिपूर्णयौवनवती, रतिमती, लज्जाहीना प्रगल्भेत्युच्यते। तास्वपि अन्त्ये द्वे धीरा, अधीरा, धीराधीरा चेति प्रत्येकं त्रैविध्येन षड्विधे कथिते; तत्रापि मध्या-धीरा सरोषोपहासवक्रवचनैः, अधीरा नियतरोदनैः, तथा धीराधीरा परुषवचनैः पतिसन्तापिनी भवति। प्रगल्भा-धीरा तु अन्तर्निगूढकोपाकारा, रतावुदासीना, बहिरनुरागप्रदर्शिनी; धीराधीरा मोक्तुण्ठनवचनैः पत्युः क्लेशकारिणी; अधीरा तु स्वामिनः तर्जनसन्ताड़नपरा कथ्यते।

अनन्तरोक्ता मध्या-प्रगल्भयोः षड्भेदा अपि प्रत्येकं नायक-प्रणयापेक्षया कनिष्ठज्येष्ठरूपत्वेन द्विधा भवन्ति इति मध्या-प्रगल्भयोर्दादश भेदाः। मुग्धा तु एकैवेति स्वीया त्रयोदशभेद-भिन्ना वेदितव्या।

परकीया तु परोढ़ाकन्यकाभेदेन प्रथमतो द्विधा, तत्रापि परभर्तृगामिनी, उत्सवादिनिरता, विगतत्रपा परोढ़ा, एवं नवयौवनसम्पन्ना, लज्जाशीला, अनूढ़ाऽबला कन्यकेत्युच्यते। सुरतपण्डिता, नृत्यगीतादिकलाऽऽलापकुशला, सगुणनिर्गुणयो-स्तुल्यानुरागिणी, लिङ्ग-तस्करादिवल्लभा, धनिकानुरागिणी, मदनोन्मादिनी रमणी साधारणीत्युच्यते, सा चैकविधैव।

तथा च त्रयोदश स्वीयाः, द्वे परकीये, एका साधारणीति मिलित्वा षोड़शभेदिता एता नायिकाः प्रत्येकं स्वाधीनभर्तृका-खण्डिता-अभिसारिका-कलहान्तरिता-विप्रलब्धा-प्रोषितभर्तृका-वासकसज्जा-विरहोत्कण्ठितारूपाभिरष्टाभिरवस्थाभिः सार्द्धा-विंशतिशतभेदाः पुनः प्रत्येकम् उत्तममध्यमाधमस्वरूपेण चतुरधिकाशीतियुतशतत्रयभेदभिन्नाः भवन्ति। एवमन्या-सङ्ख्यभेदानां सम्भवेऽपि विस्तरशङ्क्या ते नात्र प्रदर्शिताः। आसाञ्च परस्परसाङ्कर्यमपि कुत्रचिद्दृश्यते।

तारुण्ये चासाम् अष्टाविंशतिप्रकाराः सत्त्वजालङ्काराः समु-त्पद्यन्ते; तत्र भाव-हाव-हेलाभेदेन त्रयोऽङ्गजाः, शोभा-कान्ति-दीप्ति-माधुर्य्य-प्रगल्भता-औदार्य्य-धैर्य्यभेदेन सप्त अयत्नजाः, (एते भावादयो दश नायकानामपि सम्भवन्ति) लीला-विलास-विच्छित्ति-विब्बोक-किलकिञ्चित-मोट्टायित-कुट्टमित-बिब्बो-ललित-मद-विहृत-तपन-मौग्ध्य-विक्षेप-कुतूहल-हसित-चकित-केलिभेदेन अष्टादश स्वभावजाश्च भवन्ति। (विशेषलक्षणानि तु आकरे द्रष्टव्यानि, एवं सर्वत्र) तत्र मुग्धाकन्यकयोः

प्रियदर्शनमात्रेणैव व्रीडाप्रदर्शनादीनि पञ्चविधान्यनुरागेङ्गितानि ; तथा सर्वासामपि नायिकानां प्रियसंविधे दीर्घकालावस्थानादिरूपाणि त्रयस्त्रिंशद्विधानि अनुरागेङ्गितानि भवन्ति। एवं लेख्यप्रेरण-सस्नेहदर्शन-मृदुभाषण-दूतीप्रेरणैरासां भावाभिव्यक्तिर्भवति।

दूती-सखी-नटी-दासी-धात्रेयी-प्रतिवेशिनी-बाला-प्रव्रजिता-कारु-शिल्पिप्रभृतयः स्वयञ्चेति दशविधा दूत्यः भवन्ति। कलाकौशलादयश्चाष्टौ तासां गुणा भवन्ति। एता अपि प्रत्येकम् उत्तमाधममध्यमभेदेन त्रिधा भवन्ति।

कामज-क्रोधज-व्यसनासक्तः, पापकर्मानुष्ठानरतः, धीरोद्धतः प्रतिनायक इत्युच्यते।

यथायथं शृङ्गारादिलक्षणप्रसङ्गनिरूपिता नायिकाद्यालम्बनस्य भ्रूविक्षेपकटाक्षपातादिचेष्टा, चन्द्र-चन्दन-रोलम्बझङ्कार-कोकिलकलरुतादयश्च शृङ्गाररसस्योद्दीपनादुद्दीपनविभावाः कथ्यन्ते। स्वकीयैरेवालम्बनोद्दीपनहेतुभिः सीताशशधरादिभिः नायकस्यालम्बनस्य प्ररूढं रत्यादिकं बहिरुद्भासयन् कार्यमित्युच्यते, स एवानुभावः काव्यनाट्ययोः प्रयुज्यते।

पूर्वोक्ताङ्गज-स्वभावजालङ्कारवत् स्तम्भ-स्वेद-रोमाञ्च-स्वरभङ्ग-वेपथु-वैवर्ण्य-अश्रुपात-प्रलयात्मानः स्त्रीणामष्टौ सात्त्विकाः भावाः अनुभावरूपा एव भवन्ति। स्थिरतया वर्त्तमाने रत्यादौ विभावानुभावापेक्षया रसानुगुण्येन रसरूपतया सङ्क्रच्छमाना बुद्बुदवत् झटिति प्रतीयमानत्वेन प्रादुर्भूताः विलम्बप्रतीतिकत्वेन तिरोभूताश्च निर्वेदादयस्त्रयस्त्रिंशद्भेदाः व्यभिचारिणः उच्यन्ते। एकस्मिन् रसे स्थायिनोऽपि भावस्य रसान्तरे व्यभिचारित्वम् ; तद्यथा—वीरशृङ्गारयोर्हासः, वीरे क्रोधः, शान्ते जुगुप्सा रसविशेषे स्थायिन्यपि व्यभिचारित्वमापद्यते।

तथा च हासादीनां स्थायित्वं व्यभिचारित्वञ्च तत्तद्रसेषु नियतावश्यकत्वानावश्यकत्वाभ्यां बोध्यम्। विरुद्धाविरुद्धभावैः कथमपि तिरोधातुमशक्यः, आत्मनि संस्कारात्मना वर्त्तमानः, अन्तःकरणवृत्तिरूपः रत्यादिः भावः स्थायीति कथ्यते। स च रति-हास-शोक-क्रोध-उत्साह-भय-जुगुप्सा-विस्मय-शमभेदेन नवविधः यथाक्रमं शृङ्गारादिषु बोध्यः। एवञ्च शृङ्गार-हास्य-करुण-रौद्र-वीर-भयानक-बीभत्स-अद्भुत-शान्तभेदान्नवविधो रसः, मुनीन्द्रमते तु वत्सलोऽप्यधिको रस इति दशविधः। तत्र दशविधेषु रसेषु प्रधानभूतः, सम्भोगेच्छायाः समुद्बोधेन जनितः, परोढा-अननुरागिणी-वेश्याऽन्यनायिकाऽऽलम्बनकः, दक्षिणादिनायकः, चन्द्रादयुद्दीपनकः, भ्रूक्षेपाद्यनुभावकः, रति-स्थायिको रसः शृङ्गारः।

स च प्रथमतो विप्रलम्भसम्भोगभेदात् द्विविधः; तत्र विप्रलम्भः पुनः,—पूर्वराग-मान-प्रवास-करुणात्मकत्वेन चतुर्विधः। पूर्वरागेऽपि—अभिलाष-चिन्ता-स्मृति-गुणकथन-उद्वेग-सम्प्रलाप-उन्माद व्याधि-जड़ता-मृतिरूपा दश कामदशा भवन्ति। रसविच्छेदकारितया मरणरूपेयं दशमदशा प्रायेण न वर्णनीया, यत्र तु मरणानन्तरमेव पुनः प्रत्युज्जीवनं वर्णनीयं, तत्र मरणवर्णने न दोषः। तत्र प्रथमतो नायिकाया रागमुक्ता नायकस्य रागः पश्चात् वाच्यः। असौ च नीली-कुसुम्भ-मञ्जिष्ठा-भेदेन त्रिधा भवति। मानोऽपि—प्रणयेर्ष्याजन्यत्वेन द्विधा भवति। प्रवासस्तु—कार्य्यशापादिजन्यः स्त्रीपुंसयोः भिन्नदेशवृत्तित्वरूपः। तत्र च अङ्गमालिन्य-एकवेणीधरशिरस्त्वाद्यवस्था जायन्ते। करुणः खलु—नायिकानायकयोरेकतरस्मिन् लोकान्तरिते पुनर्लाभसम्भावनायां यदा तयोरेकः शोकाकुलो भवति, तदा जायते; इत्थञ्च पूर्वरागादिरूपतया विप्रलम्भाख्यः शृङ्गारः चतुर्विधः

परस्परमनुरक्तौ विलासिनौ यत्रालिङ्गनचुम्बनादिकं कुरुतः, स एव सम्भोगशृङ्गारः। स च चुम्बनपरिरम्भणाद्यसङ्ख्यभेदेन सङ्ख्यातुमशक्यतया एकविधोऽपि पूर्वरागानन्तरजातत्वेन चतुर्विधो भवतीति समुदायेनाष्टविधः शृङ्गारः।

विकृताकारवेशाद्यालम्बनकः, वैकृताद्युद्दीपितः, वदनभ्रूरत्याद्यनुभावितः, निद्रादिव्यभिचारिभावकः, हासस्थायिभावको रसः हास्यः। स च स्मित-हसित-विहसित-अवहसित-अपहसित-अतिहसितभेदात् षड्विधः।

शोकस्थायिभावकः, मृताद्यालम्बनकः, तद्गुणाद्युद्दीपितः, देवनिन्दारोदनाद्यनुभावकः, दैन्यादिसञ्चारिभावकः, जड़तोन्मादादिव्यभिचारिभावको रसः करुणः। अयञ्च शोकस्थायिभावकतया रतिस्थायिभावकात् विप्रलम्भाख्यशृङ्गारात् भिद्यते।

द्विषदालम्बनकः, तदपकारमुष्टिप्रहाराद्युद्दीपनकः, भ्रूविभङ्गाद्यनुभावकः, गर्वादिसञ्चारिभावकः, रोमहर्षादिव्यभिचारिभावकः, क्रोधस्थायिभावको रौद्रः। अस्य च युद्धवीरात् भेदेन रक्ताक्षनेत्रता कारणतामापद्यते।

विजेतव्याद्यालम्बनकः, तदीयचेष्टाद्युद्दीपनविभावकः, सहायान्वेषणाद्यनुभावकः, धृत्यादिसञ्चारिभावकः, उत्साहस्थायिभावको रसः वीरः। स च दानवीर-धर्मवीर-युद्धवीर-दयावीरभेदात् चतुर्विधः।

भीषणाकृतिपुरुषाद्यालम्बनकः, तदीय-विकटकर्माद्युद्दीपनकः, वैवर्ण्यपलायनाद्यनुभावितः, जड़तादिसञ्चारिभावकः, भयस्थायिभावको रसः भयानकः।

दुर्गन्धमांसरुधिराद्यालम्बनकः, कृमिपाताद्युद्दीपनकः, निष्ठीवननेत्रसङ्कोचनाद्यनुभावकः, मोहापस्मारादिव्यभिचारिभावकश्च, जुगुप्सास्थायिभावकः बीभत्सः।

विस्मयजनकवस्तु-जनाद्यालम्बनकः, तदीयगुणमहिमलोकातिवर्त्तिकर्माद्युद्दीपितः, स्वश्लाघेदाद्यनुभावितः, हर्षादिसञ्चारिभावकः, विस्मयस्थायिभावकः अद्भुतो रसः।

त्वयित्वज्ज्ञानजन्याशेषवस्तुनिःसारताऽवबोध-परमात्मस्वरूपाद्यालम्बनकः, पुण्याश्रम-तीर्थाद्युद्दीपनकः, रोमाञ्चाद्यनुभावकः, निर्वेदादिव्यभिचारिभावकः, शमस्थायिभावको रसः शान्तो नाम।

दयावीर-धर्मवीरादौ हि सर्वथा अहङ्कारोपशमो न दृश्यते, शान्तस्य तु सर्वाकारेणैवाहङ्काररहित्येकरूपत्वादित्यनयोः परस्परं भेदः। न चेदृशशान्तस्य मोक्षदशायामेव सम्भवात् तदानीं सञ्चार्यादेरसम्भवात् कथं रसत्वम् ? इति शङ्कनीयम्; युक्तवियुक्तदशायामवस्थितः यो हि शमः, तादृशस्यैव शमस्य रसरूपेण उत्पत्तेः, तत्र सञ्चार्यादेरवस्थाने विरोधाभावात्।

स्फुटचमत्कारातिशयव्यञ्जकत्वादस्य वात्सल्यस्य रसान्तरात् पृथक्त्वमङ्गीक्रियते, तथा हि, स्निग्धजनपुत्राद्यालम्बनकः, तदीयचेष्टाद्युद्दीपनविभावकः, आलिङ्गनाङ्गस्पर्शाद्यनुभावकः, हर्षगर्वादिव्यभिचारिभावकः, वत्सलतास्नेहस्थायिभावकः, मुनीन्द्रसम्मतः रसो वत्सलता नाम।

एतेष्वपि रसेषु कैश्चित् सार्द्धं कस्यचित् विरोधो दृश्यते; तथा हि, करुण-बीभत्स-रौद्र-वीर-भयानकैः शृङ्गारस्य, भयानक-करुणाभ्यां हास्यस्य, हास्य-शृङ्गाराभ्यां करुणस्य, हास्य-शृङ्गार-भयानकैः रौद्रस्य, शान्त-भयानकाभ्यां वीरस्य, शृङ्गार-वीर-रौद्र-हास्य-शान्तैः भयानकस्य, वीर-शृङ्गार-रौद्र-हास्य-भयानकैः शान्तस्य, तथा शृङ्गारेण बीभत्सस्य च विरोधो दृश्यते।

एषु केनचित् कस्यचित् विरोधे त्रिधा व्यवस्था भवति, कयोश्चिदालम्बनैक्येन कयोश्चित् वा अव्यवधानेनेति। तथा हि,

शृङ्गारः वीरेण, सम्भोगो हास्य-रौद्र-बीभत्सैः, विप्रलम्भः वीर-करुण-रौद्र बीभत्स-भयानकैरालम्बनानामैक्येन विरुध्यते, अन्यत्र तु अविरोधः। वीर-भयानकौ च परस्परमालम्बनैक्येनाश्रयैक्येन च विरुध्येते। शान्तशृङ्गारावव्यवधानेनालम्बनैक्येन च विरुध्येते, तदन्येन चाविरोध एव। अद्भुतरौद्राभ्यां वीरः, अद्भुतेन शृङ्गारः, बीभत्सेन च भयानकः त्रिधाऽपि न विरुध्यते। एवं रस-भाव रसाभास-भावाभास--भावप्रशम-भावोदय--भावसन्धि-भाव-शबलताः, एताः सर्वा अपि रजस्तमोलेशविनिर्मुक्तमनसः समुद्रेककरत्वात् रसपदप्रतिपाद्या एव, भावादिषु तु रसनधर्म-योगित्वेन रसत्वमुपचरितम्।

तस्मिंश्च आपाततः प्राधान्येन अभिव्यक्ता निर्वेदादयः सञ्चारिणः, देवमुन्यादिविषयोऽनुरागः, किञ्चिदाभासमाना विभावादिभिरपरिपुष्टतया रसरूपतामनापद्यमानाश्च स्थायिनो रत्यादयः भावाः इत्युच्यन्ते।

रसभावदाभासते इति व्युत्पत्त्या रसगत-भावगतदोष एव रसभावयोरनौचित्यप्रवृत्तत्वे तदाभासः कथ्यते। विरुद्ध-कारणोन्मेषात् भावस्य नाशः भावप्रशमः, स च उत्पत्ति-कालावच्छिन्न एव। कारणयोगाच्च भावस्य स्फुटतयाऽऽविर्भावः भावोदयः। भावसन्धिः,—सन्धिः, अन्योऽन्यानभिभूतयोरन्यो-ऽन्याभिभावनयोग्ययोः सामानाधिकरण्यं, तच्च एकदेशवृत्तित्व-विशिष्टैककालवृत्तित्वरूपम्।

बाध्यबाधकभावापन्नानां उदासीनानां वा भावानामेकत्र व्यामिश्रणं भावशबलता। बाध्यत्वं हि विरोधिकारणसामग्री-व्याहतफलकत्वं, बाधकत्वञ्च विरोधि, तथा च, अन्योऽन्य-विरोधिकारणकूटानां समवहितौ सत्यां परस्परफलानुत्पादा-नुत्पादकत्वरूपं तदुभयं वेदितव्यम्।

तत्र रसाभासप्रयोजकानौचित्यन्तु शृङ्गारे रतेरुपनायक-गुर्वादिपत्नी-बहुनायकगतत्वे,तथा शृङ्गारस्याधमपात्रतिर्यग्गादि-निष्ठत्वे, रौद्रे गुर्वादिगतकोपे, शान्ते हीननिष्ठे, हास्ये गुर्वाद्या-लम्बने, वीरे ब्रह्मवधाद्युत्साहे अधमपात्रगते च, भयानके च उत्तमपात्रगतत्वे बोध्यम्। एवं जातिदेशकालवर्णाश्रमवयो-ऽवस्थाप्रकृतिव्यवहारादेरप्यनौचित्यं स्वयमूहनीयमिति तृतीय-परिच्छेदसङ्क्षेपः।

चतुर्थपरिच्छेदे—

तच्च काव्यं ध्वनिगुणीभूतव्यङ्ग्यभेदेन प्रथमतो द्विविधं भवति। तत्रापि व्यञ्जनाप्रतिपाद्यार्थस्य वाच्यार्थादधिकचमत्कारजनक-त्वेन उत्तमकाव्यत्वम्। व्यङ्ग्यार्थस्य वाच्यार्थापेक्षया अचमत्-कारित्वेन, वाच्यार्थसमानचमत्कारजनकत्वेन तन्न्यूनचमत्कार-जनकत्वेन वा गुणीभूतव्यङ्ग्यकाव्यत्वम्।

लक्षणा-ऽभिधामूलकत्वेन ध्वनेर्द्वौ भेदौ। तत्र लक्षणा-मूलस्तु अविवक्षितवाच्यनामा, वाच्यार्थस्य अर्थान्तरसङ्क्रमणे-नात्यन्ततिरस्कारेण च बाधितस्वरूपत्वाल्लक्षणामूलत्वं, तेन च वाच्यार्थस्याविवक्षितत्वञ्च भवतीति नामबीजम्।

द्वितीयस्त्वभिधामूलो ध्वनिः विवक्षितान्यपरवाच्यनामा, विवक्षितम् अन्यपरं—व्यङ्ग्यनिष्ठं, वाच्यं—वाच्यार्थो यत्र इति व्युत्पत्त्यर्थः।

तत्राविवक्षितवाच्यध्वनेरपि वाच्यस्यार्थान्तरसङ्क्रमितत्वेना-त्यन्ततिरस्कृतत्वेन च भेदद्वयं सम्भवति। यत्र प्रकृतान्वये स्वयमनुपयुज्यमानः मुख्योऽर्थः अपरस्मिन्नर्थे परिणमति, तत्र उपादानलक्षणया मुख्यार्थस्यार्थान्तरसङ्क्रमितत्वादर्थान्तर-सङ्क्रमितवाच्यत्वं, यत्र तु स्वार्थं सर्वथा परित्यजन् लक्षणालक्ष-

यया अर्थान्तरे परिणमति, तत्र मुख्यार्थस्यात्यन्ततिरस्कृतत्वाद-त्यन्ततिरस्कृतवाच्यत्वम।

विवक्षितान्यपरवाच्यध्वनेरपि असंलक्ष्यक्रमव्यङ्ग्य-संलक्ष्यक्रम-व्यङ्ग्यनामानौ द्वौ भेदौ। स्फटे प्रकरणे झटिति प्रतीतेषु विभावादिषु सहृदयेन प्रमात्रा यत्र सूक्ष्मेणैवैककालेन एते प्रतीयन्ते इति तेषां हेतुहेतुमतोः पौर्वापर्यक्रमं लक्षयितुं सम्यक् न शक्यतयाऽसौ असंलक्ष्यक्रमत्वेन व्यपदिश्यते।

यत्र तु प्रकरणं विचारवेद्यं, विभावादयश्च क्रमेण उन्नेयाः, तत्र सामग्रीविलम्बाधीनं चमत्कृतेर्मान्द्यमिति संलक्ष्यक्रम-व्यङ्ग्यो नाम। तस्य च संलक्ष्यक्रमस्य शब्दार्थ-तदुभयशक्त्युद्भवत्वेन त्रिधात्वम। शब्दशक्त्या यत्रार्थान्तरं प्रकाशते, स शब्द-शक्त्युद्भवो ध्वनिः, स च वस्त्वलङ्काररूपत्वेन द्विधा, वस्तु-मात्रप्रतीतावेकः, अलङ्कारप्रतीतावपरः। अर्थशक्त्युद्भवश्च अर्थस्य वस्त्वलङ्काररूपत्वेन द्वैविध्यात्, पुनस्तयोरपि स्वतःसम्भवि-कवि-प्रौढोक्तिसिद्ध-कविनिबद्धप्रौढोक्तिसिद्धत्वेन त्रैविध्यात् षट्प्रकारः अर्थः, तथाविधैः षड्भिरर्थैः वस्तुमात्रव्यङ्ग्यत्वे षड्विधः, अल-ङ्कारव्यङ्ग्यत्वे च षट् इति मिलित्वा द्वादशप्रकारः।

तत्र न केवलं भणितिवशेन समुत्पन्नः, औचित्यात् बहिरपि सम्भाव्यमानसद्भावः अर्थः स्वतःसम्भवी, लोकप्रसिद्ध इत्यर्थः। "अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हि" इति न्यायबलेन बहिरसन्नपि वक्तृप्रतिभामात्रेण तथा परिकल्पितः प्रौढोक्तिसिद्धः। कविनिबद्धप्रौढोक्तिसिद्धश्च— कविनिबद्धनायकादिवक्तृप्रभृतिभिः तथात्वेन कल्पितः। षण्णामेषां पुनः वस्त्वलङ्कारयोर्व्यङ्ग्यत्वेन द्वैविध्येन द्वादशत्वमिति निष्कर्षः।

यत्र शब्दानामर्थानाञ्च नैकजातीयप्राधान्यम्, अपि तु साम्यमेव, तत्र शब्दार्थोभयशक्त्युद्भवो ध्वनिः।

ततश्च ध्वनेरष्टादश भेदाः,—अर्थान्तरसङ्क्रमितवाच्य-अत्यन्ततिरस्कृतवाच्यौ द्वौ, असंलक्ष्यक्रमव्यङ्ग्यश्चैकः, शब्द-शक्त्युद्भवौ वस्त्वलङ्काररूपतया द्वौ, अर्थशक्त्युद्भवाः,—स्वतः-सम्भवि--कविप्रौढोक्तिसिद्ध--कविनिबद्धवक्तृप्रौढोक्तिसिद्धेस्त्रिविध--वस्तुरूपार्थैः वस्तुव्यज्यमानत्वे त्रयः, अलङ्कारव्यज्यमानत्व च त्रयः, एवमुक्तरूपैस्त्रिविधैरलङ्काररूपैरर्थैः वस्तुव्यङ्ग्यत्वे त्रयः, अलङ्कारव्यङ्ग्यत्वे च त्रय इति द्वादश, शब्दार्थोभयशक्त्युद्भवश्च एक इत्यष्टादश। तदेवं ध्वनेरष्टादशसु भेदेषु मध्ये शब्दार्थोभय-शक्त्युत्थो ध्वनिर्वाक्यमात्रे भवन्नेकः, अन्ये पुनः सप्तदश ध्वनयः पदे वाक्ये च इति चतुस्त्रिंशत्, मेलनेन पञ्चत्रिंशत् भेदाः।

अर्थशक्त्युद्भवस्य द्वादशभेदात्मकस्य ध्वनेः प्रबन्धगतत्वेन च पुनर्द्वादशविधत्वम्। असंलक्ष्यक्रमध्वनेरपि पदांश-वर्ण-रचना-प्रबन्धप्रकाश्यत्वेन चतुर्विधत्वम् इति मिलित्वा षोडश, मेलनेन च एकपञ्चाशद्विधो ध्वनिरिति शुद्धो भेदः। शुद्धभेदै-रेकपञ्चाशता च योजनेन बहवो भवन्ति भेदाः; प्रथमस्य सजातीयेनैकेन, विजातीयैः पञ्चाशता च संसृष्टौ एकपञ्चाश-त्त्वम्। एवं द्वितीयस्य सजातीयेनैकेन विजातीयैरेकोनपञ्चा-शता च संसृष्टौ पञ्चाशत्त्वम्। तथा तृतीयस्य सजातीयेनैकेन विजातीयैरष्टचत्वारिंशता च संसृष्टौ एकोनपञ्चाशत्त्वम्। चतु-र्थस्य सजातीयेनैकेन विजातीयैः सप्तचत्वारिंशता च संसृष्टौ अष्टचत्वारिंशत्त्वम्। एवमपरेषामपि स्वयमूहनीयो भेदः। (अर्थात् अर्थान्तरसङ्क्रमितवाच्यध्वनेः तत्सजातीयेनार्थान्तर-सङ्क्रमितवाच्यध्वनिना संसृष्टौ एकः भेदः, अपरैः अत्यन्त-तिरस्कृतवाच्यादिभिः पञ्चाशता विजातीयैः ध्वनिभिः संसृष्टौ पञ्चाशत् भेदाः, अत एकपञ्चाशत्त्वम्) एवं-क्रमेण भेदवतां ध्वनीनां सङ्ख्यासमष्टिसंयोजने षड्विंशत्यधिकत्रयोदशशतसङ्ख्या

(१३२६) जायन्ते, संसृष्टिसङ्कराणां चतुर्विधतया तस्य चतुर्भिर्गुणने त्रिशतचतुरधिकपञ्चसहस्रसङ्ख्या (५३०४) भवन्ति, अतः संसृष्टि-त्रिविधसङ्करयोरेतावन्तो भेदाः; तैः सह शुद्धानाम् एकपञ्चाशतः मेलने च पञ्चपञ्चाशदधिकत्रिशतोत्तरपञ्चसहस्रसङ्ख्या (५३५५) भवन्ति। एते एव ध्वनिभेदाः।

शुद्धाः,——— ५१ *

मिश्राः,——५३०४

समष्टिः,—५३५५

इतराङ्ग-काक्वाक्षिप्त-वाच्यसिद्ध-सन्दिग्धप्राधान्य-तुल्यप्राधान्य-अस्फुट-अगूढ़-असुन्दरभेदादष्टविधं गुणीभूतव्यङ्ग्यम्। तत्र—

१। कुत्रचित् स्वेतरस्य रसादेरङ्गं रसान्तरमन्यविषयिकायाः रत्यादेर्वाऽङ्गं रसान्तरमिति, कुत्रचिद्वा वाच्यं सादृश्यं वाक्यार्थान्वयोपपादकतया अङ्गभूतं वाक्यार्थस्येति रीत्या इतराङ्गम्।

२। स्वरविशेषेण झटिति वाच्यवत् प्रतीयमानं काक्वाक्षिप्तम्।

३। आपाततः प्रतीतस्य वाच्यस्य प्रतिसन्धानानुपपत्तिबाधकं वाच्यसिद्धत्वम्।

४। वाच्यव्यङ्ग्ययोः संशयितत्वे संशयप्राधान्ये वा सन्दिग्धप्राधान्यम्।

५। वाच्यव्यङ्ग्ययोः समानबलत्वे तुल्यप्राधान्यम्।

६। सहृदयैरपि झटित्यबोध्यम् अस्फुटम्।

७। स्फुटतया वाच्यवत् सर्वजनवेद्यम् अगूढ़म्।

८। चमत्कारिताशून्यम् असुन्दरम्।

* एतेषां व्यङ्ग्यस्य शुद्धभेदानां नामनिर्देशस्तु एकविंशत्यधिकत्रिशतपृष्ठतः प्रभृति तदपरवर्तिपृष्ठं यावत् द्रष्टव्यः।

इत्यष्टौ (८) गुणीभूतव्यङ्ग्यस्य भेदाः, एतेषान्तु पूर्वोक्त-पञ्चपञ्चाशदधिकत्रिशतोत्तरपञ्चसहस्र-भेद--भिन्नैर्ध्वनिभिर्योजने त्रिषष्ट्यधिकत्रिशतोत्तरपञ्चसहस्रभेदाः (५३६३) जायन्त व्यङ्ग्यस्य ; तद्व्यङ्ग्यत्वेन च काव्यस्यापि तावन्त एव भेदाः।

पञ्चमपरिच्छेदे—

किं नाम व्यङ्ग्यार्थबोधनसाधनीभूतायाः नवीनैरेवाङ्गी-कृतायाः अभिनवायाः व्यञ्जनाख्यवृत्तेरङ्गीकरणेन ? इति आशङ्कामपनेतुं प्रमाणादिना तस्याः अङ्गीकरणप्रयोजनं प्रति-पादयति। अभिधायां स्वप्रतिपाद्यार्थबोधनानन्तरं विरतायां, स्वार्थबोधनेन लक्षणायाञ्च विश्रान्तायां, तात्पर्य्याख्यायाञ्च वृत्तौ अन्वयबोधमात्रेण विरतायां न तासां व्यङ्ग्यवस्त्वलङ्काररसादि-बोधने योग्यत्वम् ; न पुनः रसादिः सङ्केतलभ्यः, काव्यात्म-भूतस्य स्वप्रकाशानन्दरूपस्य रसस्य "रसः" इति स्वशब्देनाप्यभि-धानं न सम्भवति, तथात्वे दोषापातात् ; विभावाद्यभि-धानेनैव तत्सिद्धिरिति च न, तस्य विभावाद्यनन्तरभावित्वात् विभावादिरूपत्वानङ्गीकाराद्वा। बुद्धिर्यथा एकमर्थं विषयी-कृत्य नापरं विषयीकर्त्तुं शक्नोति, ज्ञानद्वयस्य यौगपद्यानङ्गी-कारात् ; यथा वा पचनादिरूपा क्रिया गमनादिरूपं नान्यत् कर्म निष्पादयितुं शक्नोति, तथा एकः शब्दः एकमर्थं बोधयितु-मेव क्षमः, "सकृदुच्चरितः शब्दः सकृदर्थं गमयति" इत्यनुशासनात् इति पुनरर्थप्रत्यायनशक्त्यभावाच्च न रसादिव्यङ्ग्यबोधने तासां योग्यता।

किञ्च, पदार्थमात्रबोधरसिकैर्वैयाकरणैरन्यैरपि वाच्यार्थः ज्ञेयः, व्यङ्ग्यार्थस्तु सहृदयैकसंवेद्यः इति बोद्धृभेदाच्च व्यङ्ग्यो नाभिधेयः। एकस्मिन् वाच्ये ज्ञातृप्रभृतिभेदात् बहुव्यङ्ग्यार्थ-

प्रतीतिसम्भवेन सङ्ख्याभेदात्, तथा क्वचिन्निषेधरूपे वाच्ये विधिव्यङ्ग्यसम्भवः, क्वचिच्च विधिरूपे निषेधरूप इति स्वरूपभेददर्शनाच्च; तथा वाच्यार्थबोधे शब्दोच्चारणमात्रेणैवार्थप्रतीतेः शब्दानामेव निमित्तत्वं, व्यङ्ग्यार्थबोधस्तु तथाविधप्रतिभानैर्मल्यादेरिति निमित्तभेदात् वाच्यार्थे बोधमात्रं, व्यङ्ग्यार्थे चित्तोल्लासादिकमिति कार्यभेदाच्च; सुखचमत्कारहीनतया वाच्यार्थप्रतीतिः, तदुभयवत्त्वया च व्यङ्ग्यार्थप्रतीतिरिति प्रतीतिभेदात्, वाच्यस्य प्रथमं प्रतीतिः, व्यङ्ग्यस्य वाच्यार्थबोधानन्तरमिति पौर्वापर्यभावभेदेन कालभेदाच्च, वाच्यस्य शब्दमात्राश्रयत्वं, व्यङ्ग्यस्य तु शब्दप्रकृतिप्रत्ययोपसर्गतदर्थवर्णसङ्घटनाश्रयत्वेनाश्रयभेदात्, एकस्मिन्नेव वाच्यार्थबोधे उद्देश्य एकः, व्यङ्ग्यार्थबोधे चान्य इति विषयभेदाच्च भिन्नोऽयं व्यङ्ग्यार्थः वाच्यार्थात्।

अपि च, अभिधा लक्षणा च प्रमाणान्तरमिदमेव वस्तु बोधयत इति नियमात्, रसादेस्तु बोधात् पूर्वं प्रमाणान्तरस्यासिद्धतया प्रागविद्यमानत्वात् न ताभ्यां रसादिबोधसम्भवः, "गङ्गायां घोषः" इत्यादौ लक्षणास्थलेऽप्युपात्तशब्दार्थानामन्वयबोधः भवितुमिच्छत्वानुपपत्त्या बाध्यते, ततो लक्षणायाः प्रवेशः, इह तु प्रतीतिकाले एव जायमानस्य अनुरणनात्मकव्यापारस्य पूर्वं प्रमाणासिद्धत्वात् व्यञ्जनैवैका गतिरिति समाधानम्। लक्षणाप्रयोजनस्यापि व्यङ्ग्यत्वमेवेति न लक्षणाबोध्यत्वं, तथात्वे प्रयोजनान्तरकल्पनेन अनवस्थापातप्रसङ्गः स्यात्। न च प्रयोजनविशिष्टे एव तीरादौ लक्षणेति वाच्यं, विषयप्रयोजनयोर्युगपत् प्रतीत्यसम्भवात्, न हि कारणज्ञानं कार्यज्ञानञ्च समकाले सम्भवतः, ज्ञानहेतुत्वस्य यौगपद्यानङ्गीकारात्।

नाट्ये रामत्वेन बोधकालिकेच्छाप्रयोज्यज्ञानरूपाहार्य-ज्ञानविषये नटे, काव्ये तु रामे एव विभावादिभिः रत्याद्यनुमानं, ततस्तदनुमानोद्बोधितया सामाजिकानां वासनारूपप्रत्यासत्त्या साक्षात्कृतो रामादिरत्यादिः रसः इति रसादेरनुमानप्रमाणमूलकसाक्षात्कारलभ्यत्वादेव अङ्गीक्रियतां, तदपि न ; यथा "पर्वतो वह्निमान् धूमात्" इत्यत्र वह्निव्याप्यधूमवान् पर्वत इति प्रतीतिः, तथा "शून्यं वासगृहम्" इत्यादि यत् काव्यं, तत् शृङ्गाररसवत्, तत्तद्विभावादिमत्त्वात् इत्यनुमितौ शृङ्गाररसव्याप्यविभावादिमत् काव्यमिति परामर्शस्तु यद्यपि सुग्रह एव, तथाऽपि एवंविधा परामर्शरूपा प्रतीतिरस्माकमास्वाद्यत्वेन नाभिमता, प्रोक्तपरामर्शस्य प्रत्यक्षस्मरणाद्यात्मकत्वरूपत्वमनुमितित्वादिभिरङ्गीकृतमित्येषा नास्मन्मतमिहा. विभावादिप्रत्ययमत्त्वेऽपि अस्मदभीप्सितस्वप्रकाशानन्दानुत्पत्तिदर्शनादयं हेतुर्व्यभिचारीति स्वाभीप्सितबोधोपायिकहेतोः पक्षधर्मताऽनुपपत्तेः। ननु व्याप्तिः,—अन्वयिनिरितत्वं,पक्षधर्मता—पक्षे विद्यमानता ; यथा "पर्वतो वह्निमान् धूमात्" इत्यत्र यत्र यत्र धूमः तत्र तत्र वह्निरिति अन्वयसहचारज्ञानजन्या पक्षे पर्वते वह्नेः व्याप्तिधीः भवति, पर्वतपक्षकवह्निसाध्यकव्याप्तिज्ञानं जायते, तथा अत्रापि "अहं तादृग्विभावाद्युपस्थानकरतिव्याप्यरामाद्याविर्भाववान्" इति सामाजिकानां व्याप्तिविशिष्टपक्षधर्मताग्रहे "अहं रामः सीताविषयकरतिमान्" इत्येवं प्रतीतौ जायमानायाम् "अहं रसवान्" इति तुल्याकारिकैका प्रतीतिः जायते, ततश्च पक्षे रसिकजने रसस्य विद्यमानतास्त्येव, तत् कथं पक्षधर्मताऽनुपपत्तिः ? इत्यपि पक्षः न साधीयान्, अनुमितौ तु येन हेतुना यत् साध्यं साध्यते, तदेव साध्यमवश्यमेव यदि तेन हेतुना स्वाभिप्रेतसाध्यरूपतया न साध्यते, तदा

तस्य हेतोराभासत्वं स्वीक्रियते, नियतस्वाभीप्सितसाध्यसाधक-अव्यभिचरित-असिद्ध-अविरुद्ध-असत्प्रतिपक्षित-अबाधितहेतुका ह्यनुमितिः, इह तु साधयितुमिष्टात् स्वप्रकाशरूपात् मान्द्यानन्द-मयादर्थात् भिन्नस्य रसादिप्रतीतिरूपार्थान्तरस्यास्वादनभीप्सित-स्यानुमापनात् हेतोर्दुष्टतैव। न वा विशिष्टतादृशाभीप्सितार्थ-बोधोपयिकानुकूलहेतुरत्र वाच्यः, प्रतिपाद्यावस्थामहत्कततादृश-निर्भरानन्दबोधजननानुकूलसाधनस्य शब्देनोपस्थापनासम्भवात्, प्रमाणान्तरस्यासम्भवाच्च। ततः प्रोक्तहेतोराभासत्वेन व्याप्तिग्रह-निरपेक्षायाः अर्थापत्तेर्विषय एव रसः भवतु इत्यपि न, तस्याः पूर्वसिद्धज्ञानमूलकज्ञानमवलम्ब्या प्रवृत्तेः, नापि संस्कारजन्य-त्वाद्रसादिबुद्धेः स्मृतित्वं, स्मृतौ तु प्रत्यभिज्ञानरूपायां सोऽय-मित्याकारकप्रतीतौ साध्यं विना विद्यमानतया संस्कारजन्य-ज्ञानत्वरूपस्य हेतोर्दुष्टत्वमेव। तटेवमनुभवसिद्धस्य तत्तद्रसादि-लक्षणार्थस्याशक्यापलापतया, तत्तच्छब्दाद्यन्वयव्यतिरेकतया, अनुमानादिप्रमाणावेद्यतया, अभिधादिवृत्तित्रयाबोध्यतया च तुरीयवृत्तिरूपाया अस्याः सिद्धिः। भेदाश्च पूर्वमेव दर्शिता इति दिक्।

षष्ठपरिच्छेदे—

काव्यं तावत् ध्वनिगुणीभूतव्यङ्ग्यभेदेन द्विविधमिति चतुर्था-ध्याये प्रथमं प्रदर्शितं, तच्च पुनर्दृश्यश्रव्यत्वभेदेन द्विविधम्; तत्र नटैरङ्गादिभिरभिनीयमानं रामयुधिष्ठिरादिचरितात्मकं दर्शनश्रवणयोग्यं काव्यं दृश्यं, तदपि मुख्यादौ चन्द्राद्यारोपकृत् नटे रामादिस्वरूपारोपाद्रूपकनामकमुपरूपकसंज्ञकञ्च भवेत्। नटैरङ्ग-वचन-वेशरचना-स्तम्भादिभिः रामयुधिष्ठिरादीनामव-स्थाया अनुकरणमभिनयः इत्युच्यते, स च चतुर्विधः; अङ्गेन

निष्पन्नः,—आङ्गिकः, वचननिष्पन्नश्च—वाचिकः, वेशरचनाद्याहरणीयश्च—आहार्यः, सत्त्वोद्रेकाज्जनितः स्तम्भस्वेदादिरूपश्च—सात्त्विक इति।

तत्र रूपकाणि नाटकादीनि दश—नाटकं, प्रकरणं, भाणः, व्यायोगः, समवकारः, डिमः, ईहामृगः, अङ्कः, वीथी, प्रहसनमिति च तेषां नामानि।

उपरूपकाणि च नाटिकाद्यष्टादशभेदवन्ति भवन्ति; तेषां नामानि यथा—नाटिका, त्रोटकं, गोष्ठी, सट्टकं, नाट्यरासकं, प्रस्थानकम्, उल्लाप्यं, काव्यं, प्रेङ्खणं, रासकं, संलापकं, श्रीगदितं, शिल्पकं, विलासिका, दुर्मल्लिका, प्रकरणिका, हल्लीशः, भाणिका च इति।

तत्र नाटकलक्षणं यथा—यस्मिन् दृश्यकाव्ये वृत्तान्तः पुराणेतिहासादिप्रसिद्धः, वक्ष्यमाणमुखादिपञ्चसन्धिभिर्युक्तः, विलासादिगुणवान्, सुखदुःखादिसमङ्गतनानारसपूर्णश्च भवति, कङ्काः पञ्चान्यूनाः दशानधिकाश्च भवेयुः, यत्र च नायकः प्रसिद्धवंशोद्भवः, राजर्षिः, धीरोदात्तादिलक्षणवान्, प्रतापी, दिव्यः, दिव्यादिव्यो वा, बहुगुणवान् भवेत्, तथा शृङ्गारवीररसयोरन्यतररसोऽङ्गी, अन्ये च रसाः अङ्गभूताः, निर्वहणाख्ये सन्धौ विस्मयकरं किमपि वर्णनीयं भवेत्, कार्य्यव्याप्ताः पञ्च चत्वारो वा पुरुषाः प्रधानभूताः, रचनं क्रमेण अङ्कानां सूक्ष्मभूततया कैषाञ्चित् दैर्घ्येण ह्रस्वत्वेन वा गोपुच्छाग्रसमं, तत् नाटकमित्युच्यते।

अङ्कलक्षणं—यत्र नायकस्याङ्कितं चरितं प्रत्यक्षवत् भासमानं भवेत्, यश्च रसभावसमुज्ज्वलः, स्फुटशब्दार्थः, विन्द्वादियुक्तः, तथा हास्योद्वेगादिजनकैः बहुभिः कार्य्यैर्युक्तः, तत्र बीजस्य संहारो न कार्य्यः, तथा नानाविधानसंयुक्तम्, अल्पपद्यञ्च तं

विदधीत, मन्त्र्यादिकार्य्याणामविरोधेन अल्पदिननिर्वर्त्त्यकथया च युक्तः, त्रिभिः चतुर्भिः वा पात्रैः युतः आमन्त्रनायकः यत्र निवेश्यः, सः अङ्क इति उच्यते। तत्राङ्के दूराह्वान-वध-युद्ध-राज्यविप्लव-विवाह-भोजन-शापोत्सर्ग-मृत्यु-सुरतानां वर्णना न विधेया, यच्चान्यत् व्रीडाकरं दशनच्छेद्यादिकं तत्, तथा नगराद्यवरोधनं, स्नानानुलेपनञ्च न वर्णनीयमेव। देवी-परिजनादीनाम् अमात्यवणिजाञ्च भावरसोद्भवैः प्रत्यक्षचरितैः युक्तः, अवमाननिष्क्रान्तनिखिलपात्रश्च अङ्कः कर्त्तव्यः।

गर्भाङ्कलक्षणं—तत्रैव रङ्गद्वारप्रस्तावनादिसंयुक्तः, अङ्कमध्य-प्रविष्टः, बीजफलयुक्तः, अपरः अङ्क इव गर्भाङ्कः इत्युच्यते।

तत्र च नाटके—आदौ नटेषु सूत्रधारः पूर्वरङ्गं विदध्यात्, ततश्चापरः स्थापकाख्यः नटः सभापूजां, कविनामगोत्राभिधानं, नाटकनामकीर्त्तनञ्च विधाय प्रस्तावनया नाटकीयपात्र-पदार्थाद्यात्तेषपुरःसरं रङ्गालयान्निष्क्राम्येत्। तत्रापि पूर्वरङ्ग-पदेन वर्णनीयपदार्थतः पूर्वं रङ्गविघ्नप्रशमनार्थं कुशीलवादिभिः क्रियमाणं कर्म उच्यते। तेषु प्रत्याहारादिकाङ्गभूयस्त्वेऽपि विघ्नोपशान्त्यर्थं नान्दी एव विधेया, सा च अष्टाभिर्दादशभिश्च पदैर्देवद्विजनृपादीनामाशीर्वचनसमन्वितस्तुतिरूपत्वेन नान्दी इति संज्ञिता।

यत्र नान्द्यस्ति रङ्गद्वारं नास्ति, तत्र तु तन्त्रतया सैव रङ्ग-द्वारम्। यत्र रङ्गद्वारमेवास्ति, न नान्दी, तत्र सा फलबलानु-मेया। यत्र त्वारम्भे बहवः श्लोकाः, तत्र श्लोकद्वयं नान्दी, अपरञ्च रङ्गद्वारमित्यवधेयम्। इदानीन्तु पूर्वरङ्गस्य सम्यक् प्रयोगाभावात् एक एव सूत्रधारः सर्वं प्रयोजयतीति व्यवहारः। एवं स च स्थापकाख्यो नटः दिव्यं वस्तु दिव्यो भूत्वा, मर्त्यं मर्त्यो भूत्वा, मिश्रञ्च दिव्यमर्त्ययोरन्यतरो भूत्वा सूचयेत्,

तथा बीजं मुखं पात्रं वा सूचयेत्। इत्थं रङ्गप्रीतिजननानन्तरं भारतीवृत्त्याश्रयेण कञ्चिदृतुञ्च कीर्त्तयेत्।

संस्कृतबहुलः, पुरुषप्रयोज्यः, वाक्यप्रधानो व्यापारः भारती वृत्तिः इत्युच्यते। प्ररोचना-वीथी-प्रहसन-आमुखभेदभिन्नानि तस्याश्च चत्वार्यङ्गानि। तत्रापि प्रस्तुताभिनयेषु प्रश्रयया श्रोतृणां प्रवृत्त्यन्मुखीकरणं प्ररोचना। वीथीप्रहसने वक्ष्येते। ततश्च सूत्रधारसदृशः कश्चित् भारत्या वृत्त्या ऋतुं वर्णयित्वा रूपकादीनां कवेश्च नामादिकं सङ्कीर्त्तयेत्, ततः प्ररोचनया, वीथ्या, प्रहसनेन वा रङ्गं प्रसाद्य प्रस्तावनया वस्तु पात्रं वा समाक्षिप्य स निर्गच्छेत् इति दिक्।

स्वकार्य्योत्थैः प्रस्तुतवृत्तोत्थापकैः वाक्यैः सूत्रधारेण सह नटोविदूषकादयः यत्र मिथः संलापं कुर्वन्ति, प्रस्तावनाऽपराभिधेयं तदेव आमुखमित्युच्यते। तच्च उद्घात्यक-कथोद्घात-प्रयोगातिशय-प्रवर्त्तक-अवलगितभेदेन पञ्चधा। अबोधितामिप्रेतार्थकपदानां स्वाभीप्सितार्थबोधनार्थं यदपरैः स्वाभिप्रेतार्थमात्रप्रतिपादकपदैः अर्थान्तरे सङ्क्रमणं, स उद्घात्यकः। अत्रायमाशयः,—यत्र हि पात्रं नटप्रयुक्तानि पदानि अप्रसिद्धतया तदभिप्रेतार्थं सम्यगनवबुध्यैव प्रयुक्तपदानामर्थं सम्यगवबोधयितुं स्वहृदयसंस्थितमर्थमाक्षिपत् स्वाभीप्सितार्थान्तरे सङ्क्रमय्य प्रविशति, स उद्घात्यक उच्यते इति। सूत्रधारवाक्य-तदभिधेयान्यतरनिमित्तकपात्रप्रवेशः कथोद्घातः। यदि एकत्र प्रयोगे अन्यः प्रयोगः प्रयुक्तः स्यात्, तेन च पात्रप्रवेशः भवेत्, तदा प्रयोगातिशयः। यत्र प्रवृत्तकालाश्रयसूत्रधारकृतवर्णनामाश्रित्य पात्रप्रवेशः स्यात्, तत् प्रवर्त्तकम्। यत्र एकस्मिन् विषये सादृश्योद्भावनया पात्रप्रवेशरूपान्यकार्य्यप्रसाधनं भवेत्, तत् अवलगितम्, अत्र यथासम्भवं वक्ष्यमाणानि वीथ्यङ्गान्यपि योजनीयानि।

प्रस्तावनाऽन्ते इतिवृत्तरूपं वस्तु प्रयोजयेत्, तच्च वस्तु आधिकारिकं प्रासङ्गिकभेदात् द्विविधम्। कार्यस्य प्रधानफले प्रभुत्वम् अधिकारः, तस्य प्रभुः अधिकारी, अधिकारिणः इतिवृत्तम् आधिकारिकम् उच्यते। आधिकारिकेतिवृत्तस्य उपकरणनिमित्तभूतं प्रसङ्गेन निर्वृत्तं वस्तु प्रासङ्गिकम् उच्यते। एतस्मिंश्च चत्वारि पताकास्थानकानि यथायथं योज्यानि। यत्र अन्यस्मिन् प्रयोजने चिन्तिते तस्यार्थस्य सधर्मा अन्यार्थः अनभिसंहितपदार्थेन प्रयुज्यते, तत् पताकास्थानकं बोध्यम्। यत्र अतर्कितकारणेन अर्थसम्पत्तिः प्रयोजनान्तरापत्तिरूपा प्रोत्यनुकूलव्यापारवत्तया परमोपकारिणी भवेत्, तत् प्रथमं पताकास्थानम्। नानाविधरचनासमाश्रयवचनानां यत्र सातिशयश्लिष्टत्वं, तत् द्वितीयं पताकास्थानम्। यत्र फलरूपकार्यस्योपस्थापकम् अव्यक्तार्थं सम्बन्धयोग्येनाभिप्रायान्तरप्रयुक्तेन प्रत्युत्तरेणोपेतं विशेषनिश्चयप्राप्त्या सहितं वचनं, तत् तृतीयं पताकास्थानम्। यत्र काव्यप्रयोगार्हैः सुसम्बन्धः अर्थद्वयवान् मुख्यफलार्थान्तरसूचकः वचनविन्यासः भवेत्, तत् चतुर्थं पताकास्थानम्।

अत्र नायकरसयोः प्रतिकूलं स्वरूपच्युतिकारकमितिवृत्तं परित्याज्यं, पुराणविरुद्धमपि तयोरनुकूलमादरभूतमितिवृत्तं स्वेच्छया कविना कल्पनीयम्। इह या कथा युद्धादिका अङ्के न दर्शनीया, सा यदि कवेरभिमता, तदा वाक्येन निर्वाह्या, न तदुपन्यासेन। संवत्सरसाध्या कथा तु दिनद्वयेन निर्वाह्या। अतिबहुला च कथा वक्ष्यमाणविष्कम्भकादिभिः सूचनीया। वत्सराधिककालसम्पाद्यं यत्, तत् वर्षाद्यूनकालेन निर्वाह्यम्। एकदिननिर्वर्त्यस्य कथांशस्य वर्णनं दिनावसाने अङ्कविरामे विष्कम्भकादिभिः सम्पाद्यम्। विष्कम्भक-

प्रवेशक-चूलिका-अङ्कावतार-अङ्कमुखाख्याः पञ्च अर्थोपक्षेपकाः अपि कार्याः ।

अङ्कादौ सङ्क्षेपेण अतीतानां भविष्यतां च कथांशानां सूचकः विष्कम्भकः । एकेन मध्यमेन पात्रेण द्वाभ्यां वा प्रयोजितश्चेत् स शुद्धः, नीच-मध्यमपात्रकल्पितश्चेत् सङ्कीर्णः । अस्य च प्रथमाङ्कादावपि सम्भवः, प्रवेशकस्य तु न तथेति भेदः । द्वयोरङ्कयोर्मध्ये प्राकृतया भाषया नीच-मध्यमपात्रप्रयोजितः पूर्वोक्तः कथांशश्चेत् स प्रवेशकः । नेपथ्योक्त्या अर्थानां सूचनं चूलिका । अङ्कावसाने तदङ्कस्याङ्कभूतार्थसूचकरूपः पात्रैः सङ्क्षिप्य दर्शितः क्षुद्राङ्कः अङ्कावतारः । एकस्मिन्नङ्के निखिलाङ्कानां कार्यसूचनपुरःसरं बीजभूतविषयस्य यत्र सूचनं, तदङ्कमुखम् । एतेषां परस्परभेदाय लक्षणार्थमस्माभिरालोचनया स्वयमेव बोध्याः । प्रथमाङ्के विष्कम्भकमन्निवेशस्य तु अयं विशेषः यत्, आमुखानन्तरं तदाकृष्टपात्रेण अपेक्षितं नीरसं विस्तरं वस्तु परित्यज्य सङ्क्षिप्य च तदभिधाय, तत्संसृष्टं सरसं वस्तु दर्शयितुं प्रयुज्यते कथांशः इति । पञ्चभिः अर्थोपक्षेपकैरपि नाटकीयप्रधाननायकस्य नायिकाया वा वधः न वाच्यः ; तत्तु रसे इतिवृत्तयोगः, इतिवृत्ते च रसयोगः यथा स्यात्, तथा रचयितव्यं, नैतयोः परस्परं विच्छेदः कार्यः ।

इह बीज-बिन्दु-पताका-प्रकरी-कार्यभेदेन पञ्चविधाः अर्थप्रकृतयः यथाविधि प्रयोज्याः । अर्थप्रकृतयस्तु प्रयोजनसिद्धिफलहेतवः । आदौ स्तोकमुत्पन्नं सत् क्रमेण बहुविधविस्तारवदवान्तरकार्यजनकं फलप्रधानहेतुभूतञ्च बीजम् । अवान्तरकथाविच्छेदे अवान्तरार्थाच्छेदहेतुभूतः वाग्व्यापारः बिन्दुः । निर्वहणपर्यन्तस्थायी, प्रधानस्योपकारकः, प्रसङ्गादागतः, परार्थं प्रयुज्यमानः कथांशः पताका । परप्रयोजनभूतस्य तत्फलस्य

गर्भे, मन्थौ, विमर्षे वा समाप्तिर्भवेत्। एकदेशव्याप्यपि प्रासङ्गिकं वृत्तं प्रकरी। अत्रापि नायकस्यैव फलं, न स्वस्येति बोध्यम्। यत्सिद्ध्यर्थम् उपाये प्रथमप्रवृत्तिः समाप्तिश्च, तथा यच्च आकाङ्क्षितं साधनीयञ्च, तत् कार्य्यम्।

तस्य च कार्य्यस्याङ्गभूताः अवस्थाः आरम्भ-यत्न-प्राप्त्याशा-नियताप्ति-फलागमभेदेन पञ्चविधाः। आभिः पञ्चविधाभिरवस्थाभिर्योगात् इतिवृत्तस्य पञ्च भागाः यथासङ्ख्यं मुख-प्रतिमुख-गर्भ-विमर्ष-निर्वहणाख्याः पञ्च सन्ध्यः स्युः। तत्र मुख्यप्रयोजनवत्त्वात् अङ्गभूतानां कथांशानाम् अवान्तरार्थसम्बन्धत्वात् सन्धिरित्याख्यायते। यत्र आरम्भे बद्धानामर्थानां रसानाञ्च सम्भवः सन्दर्भमूलकारणं बीजमेव अधिकृत्याभवत्, स मुख-सन्धिः। यत्र मुखसन्धिस्थितस्य बीजस्य ईषल्लक्ष्यः प्रकाशः, स प्रतिमुखसन्धिः।

प्रधानप्रयोजनस्य प्रधानोपाये किञ्चिल्लक्ष्यतया प्रकाशिते यत्र पुनः पुनः क्वचित् तिरोभाववान्, क्वचिद्वा अनुसन्धानवान् सम्यक् प्रकाशः, स गर्भसन्धिः। यत्र गर्भसन्धिमपेक्ष्य प्रधान-फलोपायः प्रकाशितः, अभिसम्पातादिभिः सविघ्नश्च, स विमर्ष-सन्धिः। यत्र निजनिजस्थानोपाक्षिप्ततया विकीर्णा मुखसन्ध्या-दयः बीजसंयुताः इतिवृत्तभागाः एकप्रयोजनकत्वेन युज्यन्ते, तन्निर्वहणसन्धिः (उपसंहारः)।

तत्र मुखस्य सन्धेः द्वादशाङ्गानि—उपक्षेप-परिकर-परिन्यास-विलोभन-युक्ति-प्राप्ति-समाधान-विधान-परिभावना-उद्भेद-करण-भेदनामानि।

प्रतिमुखस्य सन्धेः त्रयोदशाङ्गानि—विलास-परिसर्प-विधूत-तापन--नर्म--नर्मद्युति--प्रगमन--विरोध--पर्य्युपासन--पुष्प-वज्र-उपन्यास-वर्णसंहारभेदात्।

गर्भसन्धेरङ्गानि—अभूताहरण—मार्ग—रूप—उदाहरण—क्रम—सङ्ग्रह—अनुमान—प्रार्थना—चिन्ति—वीटक—अधिबल—उद्वेग—विद्रवनामकानि।

विमर्षसन्धेरङ्गानि त्रयोदश—अपवाद—सम्फेट—व्यवसाय—द्रव—द्युति—शक्ति—प्रसङ्ग—खेद—प्रतिषेध—विरोधन—प्ररोचना—आदान—छादननामानि नाटके योज्यानि।

तथा निर्वहणसन्धेरङ्गानि—सन्धि—विबोध—ग्रथन—निर्णय—परिभाषण—कृति—प्रसाद—आनन्द—समय—उपगूहन—भाषण—पूर्ववाक्य—काव्यसंहार—प्रशस्तिनामकानि चतुर्दश ज्ञेयानि।

यद्यपि मुखस्य द्वादश, प्रतिमुखस्य त्रयोदश, गर्भविमर्षयोः प्रत्येकं त्रयोदश, निर्वहणस्य च चतुर्दश इति मिलित्वा पञ्चषष्टिः, तथाऽपि निर्वहणावयवप्रशस्तिमन्यमानानां मते चतुःषष्टित्वमेव; तथा प्रशस्तिं श्लोकुर्वतां गर्भावयवस्वरूपायाः प्रार्थनाया अनङ्गीकारादपि चतुःषष्टिविधत्वमव्याहतमेव।

एतेषां सन्ध्यङ्गानां निवेशनप्रयोजनं वाञ्छितार्थविधानम्, अलौकिकार्थाभिधानम्, इतिवृत्तस्पष्टीकरणम्, अनुरागलाभः, प्रयोगस्य रङ्गस्याधगोपनं, प्रकाश्यानां प्रकाशनमिति षड्विधम्। करचरणाद्यङ्गविहीनानां नराणां यथा काण्यांचमत्वं, तथा मुखगर्भादिसन्धिरूपाङ्गशून्यानामपि रूपककाव्यानां प्रयोगायोग्यत्वम्, अतः अवश्यमेव एतेषां निवेशनमुचितम्; रसाभिव्यक्तिमपेक्ष्यैव एषामङ्गानां सन्निवेशनं कार्यं, न तु शास्त्रस्थितिसम्पादनेच्छया अयोग्यावसरे एषां सन्निवेशः करणीयः इति।

सर्वनाट्यस्य मातृवदुपजीव्यभूताः कौशिकी-सात्वती-आरभटी-भारतीनाम्नः चतस्रः वृत्तयो नाटके निवेशनीयाः। तत्र मनोहरनेपथ्यवती, रमणीबहुला, प्रचुरनृत्यगीतोपशोभिता, शृङ्गाररसानुकूला, हावविलासविशिष्टा, शृङ्गाराङ्गलक्षणाभि-

अम्बिका वा कौशिकी वृत्तिः शृङ्गारे रसे समाश्रयणीया; अस्याश्च नर्म-नर्मस्फूर्ज-नर्मस्फोट-नर्मगर्भाणि चत्वार्यङ्गानि।

सत्त्व-शौर्य-दान-दया-आर्जवबहुला, विस्मयानन्दवती, अल्प-शृङ्गारा, शोकरहिता च सात्वतीनाम्नी वृत्तिः वीरे रसे स्त्रीकार्या; अस्याश्च उत्थापक-सङ्घात्य-संलाप-परिवर्त्तकाख्या-श्चत्वारो भेदाः।

तथा मायेन्द्रजाल-युद्ध-क्रोधोद्भ्रान्तादिव्यापारानुकूला, बध-बन्धनोद्वत्यविधायिनी आरभटीनाम्नी वृत्तिः रौद्रबीभत्सयोः समुपेतव्या; अस्याश्च वस्तूत्थापन-सम्फेट-सङ्क्षिप्ति-अवपातनाख्याः चत्वारः भेदाः।

संस्कृतबहुला वाक्प्रधानव्यापारवती भारतीनाम्नी वृत्तिः; तस्याश्च प्ररोचना-वीथी-प्रहसन-आमुखानि चत्वार्यङ्गानि, तानि च पूर्वमुक्तानि। तत्र वीथ्यङ्गान्यपि उद्घात्यक-अवलगित-प्रपञ्च-त्रिगत-छल-वाक्केलि-अधिबल--गण्ड--अवस्यन्दित-नालिकाऽसत्-प्रलाप-व्याहार-मृदवरूपाणि त्रयोदश।

अथ नाट्योक्तयः.—पात्रान्तरैः श्रोतुमनर्हं वस्तु स्वगतम्। पात्रान्तरादिसर्वजनश्रवणयोग्यं वचनं प्रकाशनामकं स्यात्। पराङ्मुखीभूय किञ्चिदपसृत्य अन्यगुप्तवस्तुप्रकाशनम् अपवारितम्। उत्क्षिप्ताङ्गुलित्रयेण करेण जनानन्यानाच्छाद्य कथामध्ये यत् परस्परं गुह्यभाषणं तत् जनान्तिकम्। नाट्ये श्रोत्रनटं विना श्रवणाभिनयं प्रदर्श्य अनुक्तमपि विषयं श्रुत्वेव किं ब्रवीषीति यत् प्रयुज्यते, तत् आकाशभाषितं कथ्यते। नाटके वेश्यानां दत्ता-सिद्धा-सेनान्तं नाम कार्य्यम्। वणिजां दत्तान्तबहुलानि नामानि दर्शयेत्। तथा चेटचेट्योश्च वसन्तादिषु वर्णनीयस्य कलहंसादिवस्तुनः नाम्ना नाम कार्य्यम्।

नाटकस्य रामाभ्युदयादिनामवत् सन्दर्भगर्भितार्थसूचकं

नाम कार्य्यम्। प्रकरणादौ तु मालतीमाधवादिवत् नायिका-नायकनाम्ना नाम कार्य्यम्। नाटिका-सट्टकादीनाञ्च रत्नावली-कर्पूरमञ्जर्य्यादिवत् नायिकानाम्ना नाम करणीयम्।

"गच्छामि" इत्यर्थे "साधयामि" इति प्रायशः दृश्यकाव्ये प्रयुज्यते। भृत्यैः राजा स्वामीति देवेति वा, नीचजनैः भट्टेति, राजर्षिभिः तथा विदूषकेण च वयस्येति, ऋषिभिः राज ऋषि, अपत्यप्रत्ययान्तपदेन पौरवपाण्डवेत्यादिना वा, विप्रैः विप्रः यथेच्छं नामभिः अपत्यप्रत्ययान्तपदेन विश्वामित्रकौशिकेत्यादिना वा वाच्यः। इतरैः क्षत्रियादिभिः विप्रः आर्य्येति वाच्यः। राज्ञा विदूषकः वयस्येति नाम्ना वा वाच्यः। नटी-सूत्रधारौ परस्परमार्य्येणाम्ना, पारिपार्श्विकेन सूत्रधारः भाव इति, सूत्रधारेण तु स मारिषेति, अधमजनैः तत्सदृशः जनः हरुडे इति, उत्तमजनैः स्वसमानजनः वयस्येति, मध्यमजनैः तत्समः हंहो इति, अग्रजः आर्य्येति, देवलिङ्गी मुनिलिङ्गी सर्वः एव सर्वैः भगवन् इति वाच्यः। विदूषकेण राज्ञी तत्सहचरी (चेटी) च भवतीति, सूतेन रथारोही आयुष्मन् इति, अन्यैः वयोज्येष्ठः तातेति, पुत्रः शिष्यः कनिष्ठभ्राता च वत्सेति, पुत्रकेति, तातेति, तत्तुल्याम्ना, तथा अपत्यप्रत्ययान्तपदेन वा वाच्यः। अधमजनैः सचिवः आर्य्येति, विप्रैः अमात्येति सचिवेति वा, विद्वद्भिः वीतरागः तपस्वी च माधो! इति वाच्यः। तथा शिष्यप्रभृतिभिः पूज्यो जनः नामग्रहणमकृत्वा "भगवन्!" "महाभाग!" इत्यादि सम्मानसूचकेन सम्बोधनेन आमन्त्रयितव्यः। आचार्य्यः उपाध्यायेति, प्रजाभिः राजा महाराजेति स्वामीति वा, युवराजस्तु कुमार इति भर्त्तृदारक इति वा वाच्यः। अधमेस्तु राजकुमारः सौम्येति भद्रमुखेति च वाच्यः। अमात्यादिभिः राजकुमारो भर्त्तृदारिकेति कथनीया।

उत्तममध्यमाधमपात्रैः स्त्रियः तासां पत्युः पदमर्य्यादाऽनुसारतः तासामुत्तमत्वादिकं निश्चित्य सम्बोधनेनामन्त्रयितव्याः। (यथा —उत्तमेन उत्तमः वयस्येति, मध्यमेन मध्यमः हंहो इति, अधमेन अधमः हण्डे इति, तथा उत्तमया उत्तमा स्त्री वयस्येति, मध्यमया मध्यमा स्त्री हंहो इति, अधमया अधमा स्त्री हण्डे इति वाच्या) एवं स्वसमाना स्त्री हलेति, किङ्करी हञ्जे इति, वेश्या अज्जुकेति कुट्टिनीति च, सेवकैः पूज्या वृद्धा च अम्बेति वाच्या। पाषण्डाः स्वसङ्केतानुरूपसम्बोधनपदैः क्षपाणिकेत्यादिभिः वाच्याः। शकादयश्च भद्रदत्तादिनामभिः वाच्याः। यस्य च यत् मालाकरणादिरूपं कर्म, यच्च शिल्पं विद्यते, या च जातिः, या वा विद्या, तदनुरूपनाम्ना स सम्भाष्यः। एतद्व्यतिरिक्ताः यथोपयुक्तं शिष्टाचारविरुद्धं यथा न भवति तथा सम्भाषणीयाः।

अथ नाटकीयभाषाविभागः,—विदुषाम् उत्तममध्यमपात्राणां संस्कृता भाषा, उत्तममध्यमयोषितां शौरसेनी भाषा, किन्तु श्लोकेषु सङ्गीतेषु वा आसां महाराष्ट्री भाषा, राजान्तःपुरचारिणां मागधी भाषा, चेटानां, राजपुत्राणां, तथा धनवतां वैश्यानाञ्च अर्द्धमागधी भाषा, अन्तराऽन्तरा च स्वदेशभाषाऽपि प्रयोक्तव्या। विदूषकादीनां गौडीया भाषा, अवन्तिदेविनाम् अवन्तिका भाषा, क्रीडतां योधनागरिकादीनाञ्च वैदर्भी भाषा, शकाराणां शकादीनाञ्च शकारदेशसम्बन्धिनी भाषा, दैवप्रभाववतां बाह्लीकदेशीया भाषा, द्रविड़ादिषु द्राविड़ी भाषा, आभीरेषु आभीरी भाषा, पुक्कसादिषु चाण्डाली भाषा, काष्ठ-पत्रोपजीविषु तथा लौहपात्रादिनिर्माणोपजीविषु च आभीरी शाबरी वा भाषा प्रयोक्तव्या। पिशाचानां पैशाची भाषा। उत्तममध्यमानां चेटीनां शौरसेनी।

बालानां, वर्षवराणां, नीचानां, दैवज्ञानाम्, उन्मत्तानामातुराणाञ्च शौरसेनी, क्वचित् संस्कृता च। ऐश्वर्य्यदृप्तानां दारिद्र्याभिभूतानां, भिक्षूणां, जैनबौद्धादीनाञ्च प्राकृती भाषा। सन्यासादिचिह्नधारिणीना श्रेष्ठनारीणाञ्च संस्कृता भाषा। केषाञ्चिन्मते देवी-मन्त्रिसुता-वेश्यानां भाषाऽपि संस्कृता। नीचपात्राणां स्वदेशीया भाषा। प्रयोजनवशात् उत्तमादिपात्राणां भाषाविपर्य्ययोऽपि विधेयः।

योषित्-सखी-बाल-वेश्या-कितव-अप्सरसां क्वचित् वैदग्ध्यज्ञापनार्थं मध्ये मध्ये संस्कृता भाषा प्रयोक्तव्या।

नाटके—भूषण--अक्षरसङ्घात-शोभा-उदाहरण--हेतु-संशय-दृष्टान्त--तुल्यतर्क--पदोच्चय--निदर्शना--अभिप्राय--ऋषि-विचार-दिष्ट--उपदिष्ट-गुणातिपात-गुणातिशय-विशेषण--निरुक्ति-सिद्धि-भ्रंश-विपर्य्यय--दाक्षिण्य-अनुनय-माला-अर्थापत्ति-गर्हण--पृच्छा-प्रसिद्धि--सारूप्य-सङ्क्षेप-गुणकीर्त्तन-लेश--मनोरथ--अनुक्तसिद्धि--प्रियोक्तिभेदेन षट्त्रिंशल्लक्षणानि यथालाभं प्रयोज्यानि।

आशीः-आक्रन्द-कपट-अक्षमा--गर्व-उद्यम-आश्रय-उत्त्रासन-स्पृहा-क्षोभ-पश्चात्ताप-उपपत्ति-आशंसा-अध्यवसाय-विसर्प-उल्लेख-उत्तेजन-परीवाद--नीति-अर्थविशेषण-प्रोत्साहन--साहाय्य--अभिमान--अनुवर्त्तन--उत्कीर्त्तन--याञ्चा--परीहार--निवेदन--प्रवर्त्तन-आख्यान-युक्ति-प्रहर्ष-उपदेशनभेदात् त्रयस्त्रिंशत् नाट्यालङ्काराः।

गेयपद-स्थितपाठ्य-आसीन-पुष्पगण्डिका-प्रच्छेदक-त्रिगूढक-सैन्धव-द्विगूढक-उत्तमोत्तमक-उक्तप्रत्युक्तभेदेन दश लास्याङ्गानि यथालाभं प्रयोज्यानि।

एतत् पूर्वोक्तरूपं नाटकमेव सर्वपताकास्थानकैः दशभिरङ्कैश्च युतं चेत् महानाटकसंज्ञकं स्यात्।

प्रकरणं —कविस्वकपोलकल्पित-लोकप्रसिद्धचरितमात्रप्रकाशकं, शृङ्गाररसप्रधानं, विनायिधर्मकामार्थतत्परधीरप्रशान्तविप्रामात्यवणिगन्यतमनायकयुक्तं, नाटकसामान्यलक्षणान्वितं भवेत्। तच्च सत्कुलसम्भूता-वेश्या-तदुभयात्मकनायिकाभेदेन त्रिविधम्। तत्र कुलजा-वेश्योभयनायिकाकृततृतीयभेदो धूर्त्तद्यूतकारविटचेटादिसङ्कुलः स्यात्।

भाण-व्यायोग-समवकार-डिम-ईहामृग-अङ्क-वीथी-प्रहसनानां लक्षणानि आकरे द्रष्टव्यानि। तत्र वीथ्याः उद्घात्यक-अवलगित-प्रपञ्च-त्रिगत-कुल-वाक्केलि-अधिबल-गण्ड-अवस्यन्दित-नालिक-असत्प्रलाप-व्याहार-मृदवाख्यानि त्रयोदशाङ्गानि निर्दिष्टानि। भाणादिवदुपरूपकभेदनाटिकादीनामपि लक्षणानि आकरे एव अनुसन्धेयानि।

श्रव्यकाव्यं—श्रवणेन्द्रियमात्रग्राह्यं, गद्यपद्यमयत्वेन द्विविधं श्रव्यकाव्यम्। तत्र पद्यं छन्दोबद्धवाक्यं, तच्च मुक्तक-युग्मक-सन्दानितक-कलापक-कुलकभेदात् पञ्चविधम्। एकेन पद्येन प्रकृतार्थसमाप्तौ तदात्मकं पद्यं मुक्तकं, द्वाभ्यां पद्याभ्यां तथात्वे युग्मकं, त्रिभिश्च तादृग्भिः पद्यैः सन्दानितकं, चतुर्भिः कलापकं, पञ्चभिः तदधिकैर्वा श्लोकैः कुलकं स्मृतम्। महाकाव्य-काव्य-खण्डकाव्य-कोषकाव्यभेदेन च पद्यमयं काव्यं चतुर्विधम्।

तत्र महाकाव्यम्—इतिहासोद्भववृत्तैः सज्जनाश्रयैर्वा एकवृत्तैः नातिह्रस्व-नातिदीर्घाष्टाधिकसर्गबद्धं महाकाव्यम्। तत्रादौ आशीः नमस्क्रिया वस्तुनिर्देशः वा एकेनैव छन्दसा निबद्धः, सर्गसमाप्तौ छन्दोऽन्तरमवश्यं निवेश्यम्। क्वापि कश्चन सर्गः नानावृत्तमयः, सर्गान्ते च भाविसर्गस्य कथायाः सूचनम्। धीरोदात्तगुणान्वितः सदंशजातः क्षत्रियः सुरो वा एको

नायकः, एकवंशोत्पन्नाः कुलीनाः बहवः राजानो वा नायकाः। शृङ्गारवीरशान्तान्यतमः रसः प्रधानम्, अन्ये रसा अङ्गभूताः। तथा नाटकोक्तमुख-प्रतिमुख-गर्भ-विमर्ष-निर्वहणाख्याः पञ्च सन्धयः प्रयोज्याः। तत्र धर्मार्थकाममोक्षात्मकाः चत्वारः वर्गाः, तेष्वपि एक एव वर्गः वर्णनीयः। क्वचित् दुर्जनानां निन्दा, क्वचित् वा साधूनां गुणप्रख्यापनं कर्त्तव्यम्। सन्ध्या-सूर्य-इन्दु-रात्रि-प्रदोष-अन्धकार-वासर-प्रातः--मध्याह्न--मृगया-शैल-ऋतु-वन--सागर--मधुपान--विप्रलम्भ--मुनि--स्वर्ग-पुर-यज्ञ--रणप्रयाण-विवाह-मन्त्र-पुत्रोदयादीनाम् अङ्गप्रत्यङ्गसहिता वर्णना च तत्र कार्य्या। कवि-वृत्त-नायकानामन्यतमस्यान्यस्य वा नाम्ना अस्य नाम कार्य्यम्। सर्गोपादेयकथया सर्गस्य नाम तु विधेयम्। ऋषिप्रणीतेऽस्मिन् महाकाव्ये सर्गस्य आख्यानसंज्ञा भवेत्। प्राकृतभाषया निर्मिते तु तस्य आश्वास-संज्ञा कल्पनीया; एतत् पुनः स्कन्धक-गलितान्यतरच्छन्दसा निबद्धव्यम्। अप-भाषाविरचिते तु अस्मिन् तदुचितानि छन्दांसि, कड़वकाख्याः सर्गाश्च करणीयाः।

सर्गबन्ध्यादिविरहितं, संस्कृताद्यन्यतमभाषामयम्, एकार्थ-प्रतिपादक-पद्यरचितं अल्पकाव्यं काव्यम्।

एकार्थानुस्यूतसंस्कृतपद्यनिर्मितं काव्यं खण्डकाव्यमुच्यते।

परस्परनिरपेक्षसजातीयैकार्थप्रतिपादकपदोपनिबद्धपद्य-समूहविरचितं कोषकाव्यम्। सजातीय-सन्निवेशविशेषवशेन रचितश्चेदतिसुन्दरं तत्।

गद्यकाव्यं—पद्यबन्धसमुज्झितं अल्पकाव्यं गद्यम्। तच्च मुक्तक-वृत्तगन्धि-उत्कलिकाप्राय-चूर्णकभेदाच्चतुर्विधम्। तत्र समासाघटितं मुक्तकं, वृत्तभागयुतं वृत्तगन्धि, दीर्घसमस्तपद-घटितम् उत्कलिकाप्रायम्, अल्पसमस्तपदोपनिबद्धं चूर्णकम्।

एवं रचनाविशेषवशेन चतुर्विधं तत्पुनः कथाऽऽख्यायिकाभेदेन द्विविधम्। एतयोर्लक्षणमाकरेऽनुसन्धेयम्।

गद्यपद्यमयं काव्यं चम्पूनाम्ना प्रसिद्धम्। गद्यपद्यमयो राजस्तुतिस्तु विरुदमिति कथ्यते। विविधभाषाविरचितं काव्यं करम्भकं स्यात्।

सप्तमपरिच्छेदे—

इह पुनः काव्यं पुरुषसंस्थानस्थानीयं, तथा हि—वाक्यं तदीयं शरीरं, रीतयः अवयवसन्निवेशविशेषाः, रसश्च तदन्तर्भूतः आत्मा। यथा शौर्यादयो गुणाः, काणत्वखञ्जत्वादयः मूर्खत्वादयश्च दोषाः यथाक्रमं पुरुषस्य उत्कर्षापकर्षहेतवः, तथा काव्यस्यापि गुणा तदुत्कर्षाधायकाः भवन्ति। दोषास्तु शब्दार्थौ द्वारीकृत्य रसादीनां प्रतीतिप्रतिबन्धकत्वेन प्रकर्षप्रतीतिप्रतिबन्धकत्वेन प्रतीतिविलम्बकत्वेन च काव्यस्यात्मभूतं रसमपकर्षयन्तः रसापकर्षकतया दोषशब्दवाच्याः भवन्ति।

ते पुनः पद-पदांश-वाक्य-अर्थ-रसगतत्वेन पञ्चधा। तत्र पददोषाः,—दुःश्रव-त्रिविधाश्लील-अनुचितार्थ-अप्रयुक्तत्व-ग्राम्य-अप्रतीत-सन्दिग्ध-नेयार्थ-निहतार्थत्व-अवाचकत्व-क्लिष्टत्व-विरुद्धमतिकारित्व-अविमृष्टविधेयांशभाव-निरर्थकत्व-असमर्थत्व-च्युतसंस्कारताभेदेन षोडश। एतेषु निरर्थकत्व-असमर्थत्व-च्युतसंस्कारत्वव्यतिरिक्ताः त्रयोदश दोषा वाक्येऽपि सम्भवन्ति।

तत्र च दुःश्रव-अश्लील-नेयार्थ-निहतार्थता-अवाचकतारूपाः पञ्च दोषाः पदांशेऽपि भवन्ति। निरर्थकत्व असमर्थत्व-च्युतसंस्कारत्वरूपाः त्रयो दोषास्तु पदे एव, न तु वाक्ये पदांशे वा सम्भवन्ति। दोषाणां पदादिगतत्वम् अन्वयव्यतिरेकाभ्यां पदादीनां परिवृत्तिसहत्वासहत्वाभ्यां वेदितव्यम्।

तथा हि—यत्र दोषजनकीभूतपदानां परिवर्त्तने दोषस्य न सत्ता, किन्तु तत्पदस्थितौ एव तस्य सत्ता, तत्र पदान्वयव्यतिरेकेण दोषाणां पदगतत्वं बोध्यम्।

यत्र च दोषजनकीभूतप्रकृतिप्रत्ययरूपपदांशपरिवर्त्तने न दोषः, किन्तु तादृशपदांशस्थितावेव, तत्र दोषाणां पदांशगतत्वम्।

पदपरिवृत्तावपि तदर्थस्यैव सत्तायां यत्र दोषस्य सत्ता, सोऽर्थदोषः, यस्यार्थप्रतीत्यनन्तरबोध्यः सोऽप्यर्थदोष एव।

यत्र च द्वयोः बहूनां वा शब्दानामर्थानां वा अन्यतरस्य एकस्य द्वयोर्वा स्थितिपरिवर्त्तनाभ्यां दोषस्य न स्थितिहानो, किन्तु सर्वेषामेव पदानामर्थानाञ्च, तत्र तस्य शब्दार्थसमष्टिगततया वाक्यगतत्वं बोध्यम्। तत्र च एते श्रुतिदुष्टत्वादयो ये त्रयोदश दोषाः, ते पददोषसजातीयाः वाक्यदोषाः, तद्विजातीयवाक्यदोषास्तु वर्णप्रातिकूल्यादयः त्रयोविंशतिसङ्ख्यकाः।

तत्र दुःश्रवत्वं—काव्यस्य कर्कशवर्णवत्पदरचिततया श्रोतॄणां श्रोत्रावच्छेदेन दुःखाधायकत्वम्। एकस्मिन्नेव वर्णे श्रुतिदुःखावहत्वस्याननुभावात् द्वित्रिवर्णानामेव दूषकत्वमवगन्तव्यं, माधुर्यबुभुत्सायाः सत्त्वे एव श्रुतेः दुःखावहत्वात्; तद्विपरीतेषु वीररौद्रबीभत्सरसेषु, तथा क्रुद्धे वक्तरि, समुद्यते वाच्ये वक्तरि बोद्धव्ये वा, वैयाकरण-शुष्कतार्किकादौ च नास्य दोषत्वं, प्रत्युत गौणगुणत्वमेव। स्वाश्रयपदसम्बन्धित्वेन प्रत्यासन्नस्य शृङ्गारादिरसस्य माधुर्यप्रतीतिप्रतिबन्धकता एवात्र दूषकताबीजम्। वाक्ये तथाविधानां बहूनः प्रयोगे सति स्वाश्रयवर्णभूयिष्ठवाक्यसम्बन्धित्वेन श्रोत्रवैरस्यापादकतया प्रत्यासन्नरसप्रकर्षप्रतीति-प्रतिबन्धकत्वेन चास्य वाक्यगतत्वमवगन्तव्यं, पदैकदेशगामित्वे चास्य पदांशगतत्वम्।

अश्लीलत्वं — व्रीड़ादिजनकार्थान्तरप्रतीतिजन्यश्रोत्रव्रीड़ाजुगुप्सोत्पादकत्वं, श्रोतुः तज्जन्यामङ्गलज्ञापकत्वञ्च, व्रीड़ादिजनकासत्यार्थप्रतीतिजन्यतद्विषयकस्मृतिहेतुत्वं वा अश्लीलत्वम्। व्रीड़ादिजनकपदज्ञानदशायां प्रकृतार्थबोधप्रकर्षविघातकत्वमत्र दूषकतावीजम्। व्रीड़ाजुगुप्साऽमङ्गलव्यञ्जकत्वेन चास्य त्रैविध्यम्। अस्य तु सुरतारम्भगोष्ठीसमवेतस्त्रीकथावक्रोक्तिच्छलोक्तिषु गुणत्वमेव।

अनुचितार्थत्वं—प्रकृतार्थापकर्षकत्वेन अयुक्तार्थप्रतिपादकपदघटितत्वम्; तच्च वाच्यानौचित्य-अर्थासम्भव-असत्यमर्थकत्वरूपतया त्रिधा। प्रकृतार्थप्रकर्षविघातादेव तद्विषयभावप्रकर्षविघात एवात्र दूषकतावीजम्।

अप्रयुक्तत्वं—कोषादिषु तथाप्रसिद्धत्वेऽपि कविभिरनादृतत्वम्। कवेरनादृतत्वज्ञानाच्च तद्वाच्यरसास्वादप्रकर्षविघातोऽत्र दूषकतावीजम्। श्लेषादावस्यादोषत्वम्।

ग्राम्यत्वं—हालिकादिसाधारणप्रयोज्यत्वेन लौकिकप्रसिद्धार्थकशब्दत्वम्। अस्य च नीचजनोक्तिष्वनुप्रासविशेषेषु विदूषकादिभाषणेषु चादोषत्वमेव। ग्राम्यवक्तृप्रयोज्यत्वज्ञानात् रसप्रकर्षविघातोऽत्र दूषकतावीजम्।

अप्रतीतत्वं—शास्त्रविशेषरूपैकदेशमात्रप्रसिद्धत्वम्। वक्तृबोद्धव्ययोः तथाविधसाङ्केतिकपदज्ञानवत्त्वे शास्त्रमात्रबोधोद्देश्यतया व्यवहृतत्वे चास्य गुणत्वमेव।

सन्दिग्धत्वं—श्लिष्टपदघटितत्वेन पदद्वयैकरूप्यादन्वयप्रतियोगिसन्देहजनकमन्देहविषयपदत्वम्। अत्र वाच्यार्थविषयकसंशयोदयात् शाब्दबोधजननविलम्बनेन रसप्रकर्षबोधविघातो दूषकतावीजम्। व्याजस्तुतिपर्य्यवसायित्वे चास्य गुणत्वमेव।

नेयार्थत्वं—रूढ़िप्रयोजनान्यतरहेतुविरहेण कवेरसामर्थ्य-

प्रयुक्तलक्ष्यार्थप्रकाशनम्। अत्र रूढिप्रयोजनव्यतिरेकनिश्चयेन कवेरशक्तिनिश्चयः, ततो लक्ष्यार्थप्रतीतिः, ततः शाब्दबोध इति तद्विलम्बनेन रसबोधविलम्बनं दूषकतावीजम्।

निहतार्थत्वम्—उभयार्थकशब्दस्याप्रसिद्धार्थे प्रयोगः। पदार्थोपस्थितिदशायामविवक्षितस्य प्रसिद्धार्थस्योपस्थित्या विवक्षिताप्रसिद्धार्थोपस्थितिविलम्बनेन रसप्रतीतिविलम्बनमत्र दूषकतावीजम्। श्लेषादौ तु अस्यादोषता ज्ञेया।

अवाचकत्वं—वाच्यार्थबोधौपयिकपदं परित्यज्य रूढ्याद्यसत्त्वे अयथा लाक्षणिकपदप्रयोगः।

क्लिष्टत्वं—पदार्थानुसन्धानात् जायमानतात्पर्यार्थबोधविलम्बनेन पदार्थोपस्थितेः व्यवधानेन जनकत्वम्। अस्य समासगतत्वे पददोषता। वैयाकरणमुख्ये नीरसतार्किकादौ च वक्तरि बोद्धव्ये वा गुणत्वमेव। शाब्दबोधविलम्बनेन झटिति रसादिप्रतीतेः प्रतिबन्धकत्वं दूषकतावीजम्।

विरुद्धमतिकारित्वम् — अभिप्रेतार्थविपरीतार्थप्रतीतिकरत्वम्। विरुद्धार्थविषयकबुद्धेरुदयात् रसप्रतीतिप्रतिबन्ध एवात्र दूषकतावीजम्।

अविमृष्टविधेयांशभावः,—प्रयुक्तानां पदानां विधेयस्यैव प्राधान्येन निर्देश उचितः,"अनुवाद्यमनुक्त्वैव न विधेयमुदीरयेत्" इति नियमात्, एतन्नियमस्यान्यथाकरणेन उद्देश्यविधेययोः विपरीतनिर्देशरूपः।

तच्च क्वचित् समासेन विधेयस्योद्देश्यप्रतीतिकारित्वं, क्वचिच्च न्यायविपर्यासेन रचनं, क्वचित् तच्छब्दस्य यच्छब्दाव्यवधानेन स्थितिः। प्रथमस्य पदगतत्वं, तदन्ययोर्वाक्यगतत्वम्; तथा "अप्राधान्यं विधेयत्र प्रतिषेधे प्रधानता। प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ्॥" इत्युक्तलक्षणप्रसज्यप्रतिषेधस्य नञः

विधेयत्वानवगमे "प्रधानत्वं विधेयत्व प्रतिषेधेऽप्रधानता। पर्य्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्॥" इत्युक्तलक्षणपर्य्युदासवद्द्वेय्यत्वप्रतीतिकारित्वे चायं दोषः, कुत्रचिद्वा तस्य समासे गुणीभावतया पर्य्युदासवदुपस्थापनात् निषेधस्य विधेयतया अनवगतिः इति प्रसज्यप्रतिषेधस्थले पर्य्युदासविधया नञः प्रयोगात् निषेधस्य विधेयताऽनवगमरूपः दोषः। किञ्च, "यत्तदोर्नित्यसम्बन्धः" इति न्यायात् यत्र यच्छब्दः, तत्र तच्छब्दः, तत्समानार्थकेदमेतदः-शब्दान्यतमो वा यावन्न प्रयुज्यते, तावत् वाक्यस्य यच्छब्दोत्थापिता आकाङ्क्षा न पूर्य्यते। यत्र तु यच्छब्दानन्तरं प्रयुज्यमाना अपि तच्छब्दादयः न पृथक् पृथक् व्यवधानतः प्रयुक्ताः, न वा विलक्षणविभक्त्यन्ततया निर्दिष्टाः, किन्तु समानविभक्त्यन्ततया यच्छब्दसमीपप्रयुक्ततया च यच्छब्दोत्थाप्याया आकाङ्क्षाया अपूरणादनुवाद्यत्वप्रत्यायकाः, तत्र तेषामनुवाद्यत्वप्रतीतिकारित्वादेवाप्राधान्येन निर्देश इति विधेयाविमर्षदोषत्वम्। यच्छब्दव्यवधानस्थिता निकटस्था अपि भिन्नलिङ्गविभक्तियुक्ता वा तदादिशब्दास्तु निराकाङ्क्षत्वमवगमयन्ति, यत्र च पूर्ववाक्यगतयच्छब्दद्वयस्योत्तरवाक्यगतैकतदादिशब्देन सम्बन्धः, तत्रैकेनैव तदादिना निराकाङ्क्षत्वम्। एवं क्वचित्तच्छब्दयोरपि वक्तृतात्पर्य्यप्रत्यायकत्वादेकेनैव यच्छब्देन निराकाङ्क्षत्वं, कुत्रचिच्च यत्तदोरन्यतरस्यार्थत्वेऽपि निराकाङ्क्षत्वमेव। एवञ्च यच्छब्दस्योत्तरवाक्यगतत्वेनोपादाने पूर्ववाक्ये सामर्थ्यात् तच्छब्दस्यार्थत्वं, तच्छब्दस्य च प्रक्रान्तप्रसिद्धानुभूतार्थकत्वे यच्छब्दस्यार्थत्वं बोध्यम्।

निरर्थकत्वं—छन्दोभङ्गनिवृत्तये पादपूरणमात्रप्रयोजनकाव्यादिद्योतकपदप्रयोगकृतवैयर्थ्यम्। अत्र वक्तरि निरर्थकपदवद्वाक्यप्रयोक्तृत्वज्ञानेन तदीयवाक्यात् प्रस्तुतविषयकार्थप्रकर्षबोधविघातो दूषकतावीजम्।

असमर्थत्वं—सङ्केतविशेषं विना अगृहीतशक्तिकत्वं, ज्ञापकाभावकृतम् अभीप्सितार्थबोधनाच्चमत्वं वा। शाब्द-बोधानुत्पत्त्या तादृशतात्पर्य्यबोधानुदयात् तदुपजीवक-रसानुत्पत्तिर्दूषकतावीजम्।

च्युतसंस्कारत्वं—व्याकरणलक्षणहीनत्वम्। तादृशपदस्या-साधुत्वज्ञानेन शाब्दबोधविघटनाद्रसानुत्पत्तिरेवात्र दूषकता-वीजम्। निरर्थकत्वासमर्थत्वच्युतसंस्कारत्वाख्यदोषाणां पद-मात्रगतत्वेनैव लक्ष्ये सम्भवः।

पददोषविजातीयवाक्यदोषाः,—प्रतिकूलवर्णता, लुप्त-विसर्गता, आहृतविसर्गता, अधिकपदता, न्यूनपदता, कथित-पदता, हतवृत्तता, पतत्प्रकर्षता, सन्धिविश्लेषः, सन्ध्यश्लीलता, सन्धिकष्टता, अर्द्धान्तरैकपदता, समाप्तपुनरात्तता, अभवन्मत-सम्बन्धता, अक्रमता, अमतपरार्थता, वाच्यानभिधानं, भग्न-प्रक्रमता, प्रसिद्धित्यागः, अस्थानस्थपदता, अस्थानस्थसमासता, सङ्कीर्णता, गर्भितता एते त्रयोविंशतिसङ्ख्यकाः वाक्यमात्रगता दोषाः। तत्र—

प्रतिकूलवर्णत्वं —प्रकृतरसविरोधिरसगतगुणवद्वर्णवत्त्वं, प्रकृतरसपरिपन्थिवर्णसमुदयघटितत्वं वा। तत्तद्रसप्रतिकूलवर्ण-विघटितत्वे तु तद्गुणवद्रसानुदयात् रसप्रतीतिविघातकत्वमत्र दूषकतावीजम्।

लुप्तविसर्गत्वं—लोपप्राप्तनिखिलविसर्गत्वम्। अस्य पुन-रेकत्र बहुशः प्रयोगे एव श्रोतृबोध्यरसस्यापातनः प्रतीतिरना-धायकत्वात् दोषत्वमिति बोध्यम्। अधिकाविसर्गस्थितावपि दुःश्रवत्वमेव।

आहृतविसर्गत्वम—ओकारत्वप्राप्तविसर्गत्वम्। पूर्ववत् अस्यापि एकत्र बहुशः प्रयोगे दोषत्वम्।

अधिकपदत्वं—गौनरुक्त्याभावेऽपि कथितपदार्थानतिरिक्तार्थपर्य्यवसायकपदवदाक्यत्वम्। तादृशाधिकपदतात्पर्य्यानुधावने रसास्वादविलम्बनमत्र दूषकतावीजम्। अस्य तु क्वचित् वैचित्र्यविशेषलाभे गुणत्वं, क्वचिच्च विशेषणदानेन वैचित्र्याधिक्यद्योतनार्थं विशेष्यपदप्रयोगेऽपि न दोषत्वम्। केचित्तु—यत्र विशेषणस्यापि क्रियाविशेषणत्वं सम्भवति, तत्रापि विशेष्यपदप्रयोगः दोषावह इत्याहुः।

न्यूनपदत्वं—न्यूनस्य पदस्यार्थेन महान्वये वक्तुरभीप्सिते सति तदुपादानेन सुतुरां प्रकृतार्थान्वयनिर्वाहे च सति तत्प्रयोगक्लृप्तानुपपत्त्यत्पादकवाक्यत्वम्। अध्याहार्य्यपदार्थचिन्तनेन रसप्रतीतिप्रतिबन्धकत्वमत्र दूषकतावीजम्। अत्यानन्दनिमग्नानां दुःखविप्लवानाञ्च उक्तौ अस्य गुणत्वमेव। एवं पदानां न्यूनत्वेऽपि उपात्तवाक्यजन्यया प्रतिपत्त्या यत्र "उत्तरा प्रतिपत्तिः पूर्वां प्रतिपत्तिं न बाधते" इति न्यायात् पूर्ववाक्यप्रतिपत्तिः स्फुटमेवावभासते, न तत्रापि दोषत्वं, तथा च—"तिष्ठेत् कोपवशात् प्रभावविहिता दीर्घं न मा कुप्यति" इत्यत्र "प्रभावविहिता" इत्यनन्तरं "नैतत् यतः" इति पदानां न्यूनत्वेऽपि तत्पूर्ववाक्यबोधने समर्थतया न दोषः इति, तत्र तत्तद्वाक्यव्यङ्ग्यभावादीनामुत्कर्षानाधायकत्वाच्च नापि गुणत्वमस्येति बोध्यम्।

कथितपदत्वं—भङ्ग्यन्तरेण कथितार्थस्य पुनः कथनात्मकपदवदाक्यत्वम्। पुनरुक्तपदतात्पर्य्यचिन्तनेन श्रोतुः रसप्रतीतिप्रतिबन्धकत्वं दूषकतावीजम्। अत्र उद्देश्यप्रतिनिर्देश्यस्थले उक्तपदप्रयोगात् अर्थान्तरप्रतीत्यभावेन झटिति प्रकृतार्थबोधोदयः, ततः रसादिघोरविलम्बेनैवेत्यत्र कथितपदत्वस्य गुणत्वमेवेति बोध्यम्।

उद्देश्यप्रतिनिर्देश्यभावस्य त्रिधा — एकावधेयार्थमुद्दिश्य विधेयान्तरे अनुकथनम्, एकोद्देशेन कथितस्योद्देश्यान्तरे अनुकथनम्, एकोद्देशेन विहितस्य विधेयान्तरे उद्देश्यतया अनुकथनञ्चेति । किञ्च—विषाद-विस्मय-क्रोध-दैन्य-लाटानुप्रास-अनुकम्पा-प्रमादन-हर्षावधारणादिव्यञ्जके अर्थान्तरसङ्क्रमितवाच्यध्वनावप्यस्य गुणत्वम् ।

अयोगान्ययोगव्यवच्छेदभेदेन अवधारणमपि द्विधा भवति। तथा वीप्सितपदानां लक्षणया अपरार्थव्यञ्जकत्वेऽपि गुणत्वमेव कथितपदत्वस्य ; तथा हि—"उत्सवस्य गृहे गृहे" इत्यादौ गृहपदं सकलगृहे लाक्षणिकं, तथा "पीत्वा पीत्वा" अत्र द्विरुक्तं पीत्वेतिपदं पौनःपुन्यलक्षकं, तथा "रच्च रच्च" "यांहि यांहि" इत्यादौ रजरक्षेत्यादिपदं द्रुतं लाक्षणिकमिति गुणत्वमेव ।

द्रुतवृत्तत्वं—वृत्तलक्षणान्वितत्वेऽपि तल्लक्षणानन्वितत्वेन प्रतीयमानत्वम् । तत्र लक्षणानुसारेण रचितानामपि पदविशेषसन्निध्यादश्रव्यत्वेन, एवं पादान्तलघोरपि गुरुभावस्य सर्वत्र द्वितीयचतुर्थपादविषयत्वेन प्रथमद्वितीयपादान्तलघोर्गुरुत्वनियमस्य च केवलं वसन्ततिलकादिविशेषविषयकतया प्रथमद्वितीयपादान्तलघोरप्राप्तगुरुभावत्वेन, विरोधिप्रकृतरसवृत्तोपादानत्वेन च त्रिधा भवति ।

पतत्प्रकर्षत्वं—महसा सुदूरम् आरूढस्य रचनाप्रकर्षस्य पश्चात् क्रमशः शैथिल्यात् वृत्ताद्यात् पतनमिव तद्वानिरूपोऽपकर्षविशेषः । तच्च द्विधा—वृत्तस्य पूर्वापेक्षया उत्तरत्र शैथिल्यात्, क्रमेण अनुप्रासपाताच्च । प्रकर्षपतनेन वैरस्यावगमात् रसप्रकर्षविघातोऽत्र दूषकतावीजम् । यत्र एकस्यापि वीरादिरसवत्यवस्य पूर्वांशे शब्दात्तरप्रकर्षसत्त्वेऽपि शैथिल्यांशस्य सुकुमारार्थकत्वं, तत्र प्रयोजनमूलकपूर्वप्रकर्षपातस्य

वैरस्यानापादकतया दूषकतावीजस्य असत्त्वेन गुणत्वमेवेति बोध्यम्।

सन्धिविश्लेषः,—स्थितेऽप्यनुशासने असकृत्कृतसन्धिराहित्यम्। अस्य च एकत्र बहुलप्रयोगे एव दोषः, किन्तु अनुशासनमुल्लङ्घ्य हृत्तभङ्गभयेन सन्धिविश्लेषस्य तु सकृत् प्रयोगेऽपि।

सन्ध्यश्लीलत्वं—सन्धिमसुत्यजानां येषां शब्दानां जुगुप्साव्रीडाऽमङ्गलव्यञ्जकत्वं, तादृशपदबद्धाक्यत्वं, पूर्वोक्तलक्षणस्याश्लीलत्वस्य सन्धिगतत्वं वा।

सन्धिकष्टत्वं—सन्धिजन्यश्रुतिकटुवर्णविशिष्टपदबद्धाक्यत्वम्। झटिति सन्धिविश्लेषकरणाशक्यतया तत्तत्पदजन्यपदार्थबोधानुदयात् प्रतीयमानरसास्वादविघातकत्वमेवात्र दूषकतावीजम्।

अर्द्धान्तरैकपदत्वं—तत्पद्यार्द्धघटकवाक्यान्वितत्वेन प्रयुक्तस्यैकस्य पदस्य भिन्नवाक्यघटकापरपद्यार्द्धगतत्वम्। अर्द्धान्तरोक्तपदस्य यथायथमुत्तरत्र पूर्वत्र वा वाक्ये साकाङ्क्षत्वनिराकाङ्क्षत्वप्रतिसन्धानेन शाब्दबोधविलम्बनमत्र दूषकतावीजम्। तच्च चतुष्पदार्द्धादौ प्रथमार्द्धान्ते च सम्भवति।

समाप्तपुनरात्तत्वम्— आकाङ्क्षितान्वयबोधजननाद्विद्यान्ततया निराकाङ्क्षस्यापि वाक्यस्य पुनर्विशेषणान्तरसम्बन्धलाभाय समुपात्तत्वम्; यद्वा—क्रियाकारकभावावनिष्पत्तिविषया समाप्तेऽपि वाक्यान्वये विशेष्यस्यापरगुणाधायकविशेषणान्वयार्थं पुनः विशेषणान्तरोपादानं समाप्तपुनरात्तत्वम्। अस्य च वाक्यसमापनानन्तरं वाक्यान्तरस्य उपादानं न दोषत्वं, किन्तु विशेषणमात्रस्य पुनरुपादाने एव। अवाकाङ्क्षान्तरकल्पनाया आवश्यकत्वेन शाब्दबोधोदयविलम्बनात् झटिति रसबोधविघातो दूषकतावीजम्।

अभवन्मतसम्बन्धत्वं—वाक्यार्थबोधसमाप्त्या वाक्यानां पर-

स्यं निराकाङ्क्षत्वेन काविविवक्षितसम्बन्धासम्भवत्वम्। असम्भवश्च उपात्तपदस्य विभक्तिव्यत्ययं विना अन्वयस्य निराकाङ्क्षत्वे, समासासमासयोरेकान्तःपातितयाऽन्वयस्य निराकाङ्क्षत्वे, वाच्यव्यङ्ग्योर्विवक्षितान्वयस्याप्रतीयमानत्वे च बोध्यः। शाब्दबोधविघटकत्वेन रसानुकूलत्वमेवात्र दूषकतावीजम्।

अक्रमत्वं — स्वपूर्ववर्त्ति--पदार्थनिष्ठ--स्वार्थान्वयबोधकतानियमवतां चैवादिशब्दानां तत्पदाध्याहितोत्तरपातितारूपक्रमाभावत्वम्। अस्य प्रत्यासत्तिकल्पनेन शाब्दबोधोदयविलम्बनात रसास्वादविघात एवात्र दूषकतावीजम्।

अमतपरार्थत्वं—प्रक्रान्तरसविरोधिरसव्यञ्जकतया प्रक्रान्तरसाननुकूलार्थान्तरत्वम्। प्रक्रान्तरसोद्बोधविघातकत्वमत्र दूषकतावीजम्।

वाच्यानभिधानम्—अवश्यवाच्यानामप्यादिशब्दानां विवक्षितार्थदाक्ष्योद्योतनाय वक्त्रभिप्रेतत्वेऽपि तथाविधपदस्याकथनम्। अध्याहारादिना शाब्दबोधविलम्बनात् रसास्वादविलम्बनमत्र दूषकतावीजम।

भग्नप्रक्रमत्वं—बहुषु वक्तव्येषु यया रीत्या प्रथममेकम् उपक्रम्यते, तदुत्तरवक्तव्यस्यापि प्रत्युत्थिताकाङ्क्षाविषयीभूतप्रक्रान्तप्रकारेण पश्चादनुल्लिङ्गत्वम्। प्रक्रान्तिः प्रत्यय-वचन-कारक-उपसर्ग-पर्य्याय-भवनादिभेदात् तदनेकविधम्। उपात्तप्रक्रमस्य सहसा भङ्गात् तात्पर्य्यार्थानुसन्धानेन शाब्दबोधविलम्बोदयात् सम्यक् रसानास्वादनमत्र दूषकतावीजम्।

प्रसिद्धित्यागः.—तत्तत्पदमर्मभिज्ञाहारसहकृततत्तदर्थपरतया शास्त्रव्यवहारात्प्रसिद्धस्य शब्दस्य तत्तदर्थे प्रयोगः। रसादिप्रकर्षबोधप्रतिरोधोऽत्र दूषकतावीजम्।

अस्थानस्थपदत्वं—स्वार्थानन्वितया स्ववाक्यीयक्रियया अभिन्न-

वाक्यीयपदेन वा स्वार्थान्वयव्यवधानाभावे सति अयुक्तस्थान-पतित-पदान्तरोत्तरपातितानियमरहितपदत्वम्, अनाकाङ्क्षित-तया अन्वयायोग्यस्थाननिविष्टपदत्वं वा।

अस्थानस्थसमासत्वं—स्वगुणव्यञ्जकसमासस्य तद्रसाव्यञ्जक-स्थानपातः। तत्तद्रसापकर्षकत्वमेवात्र दूषकतावीजम्।

सङ्कीर्णत्वम्—एकस्मिन् वाक्ये वाक्यान्तरीयपदप्रवेशः। अस्य तु वैचित्र्यादिजनकत्वे गुणत्वम्। अत्र वाक्यान्तरीयपद-प्रवेशात् विवक्षितार्थस्य विलम्बेन प्रतीतिर्दूषकतावीजम्।

गर्भितत्वम्—एकस्मिन् वाक्ये वाक्यान्तरस्यानुप्रवेशः। वाक्यान्तरानुप्रवेशात् विवक्षितार्थस्य विलम्बेन प्रतीतिरत्र दूषकतावीजम्। क्वचित् वाक्यान्तरानुप्रवेशस्य चमत्कारातिशय-जनकत्वे तु गुणत्वं ज्ञेयम्।

अथ अर्थदोषाः,—अपुष्टता, दुष्क्रमता, ग्राम्यता, व्याहतता, अश्लीलता, कष्टता, अनवीकृतता, निर्हेतुता, प्रकाशितविरुद्धता, सन्दिग्धता, पुनरुक्तता, ख्यातिविरुद्धता, विद्याविरुद्धता, साकाङ्क्षता, सहचरभिन्नता, अस्थानयुक्तता, अविशेषे विशेषार्थता, अनियमे नियमार्थता, विशेषे अविशेषार्थता, नियमे अनियमार्थता, विध्ययुक्तता, अनुवादायुक्तता, निर्मुक्त-पुनरुक्तता च इत्येते चतुर्विंशतिसङ्ख्यकाः।

तत्र सन्दिग्धार्थत्वं, कष्टार्थत्वम्, अश्लीलार्थत्वं, ग्राम्यार्थत्वं, निर्हेत्वर्थत्वं, ख्यातिविरुद्धार्थत्वं, पुनरुक्तार्थत्वञ्च इत्येते सप्त अनित्या दोषाः, अन्ये षोडश नित्याः दोषाः। दोषगतं नित्य-त्वम् अनुकरणादन्येन प्रकारेण समाधातुमशक्यत्वरूपं, तदन्या-दृशत्वमनित्यत्वम्। एवञ्च पूर्वोक्तानामपि पदवाक्यादिगत-दोषाणां समाधानाशक्यत्वशक्यत्वाभ्यां नित्यत्वानित्यत्वव्यवस्था स्वयमूहनीया।

अपुष्टत्वं—विशेष्यस्य उत्कर्षानाधायकविशेषणवत्त्वम् ।

दुष्क्रमत्वम्—आकाङ्क्षितक्रमविलङ्घनेनोक्तपदार्थत्वं, "प्राग्वाच्य उच्यते पश्चात् पश्चाद्वाच्योऽथवाऽग्रतः । कविना शक्तिवैकल्यात् योऽर्थस्तं दुष्क्रमं विदुः ॥" इत्येतल्लक्षणकमिति निष्कर्षः ।

ग्राम्यत्वम्—उक्तिभङ्गीराहित्ये सत्यविदग्धकथितार्थत्वं, "स ग्राम्यः स्वरिरंसायां पामरैर्यत्र कथ्यते । वैदग्ध्यविक्रमलयं हित्वैव वनितादिषु ॥" इत्युक्तलक्षणकमिति निष्कर्षः । तादृशोक्त्या सहृदयानां रसप्रकर्षविघातोऽत्र दूषकतावीजम् । अस्य च अधमोक्तिषु गुणत्वम् ।

व्याहतत्वं—प्राक् प्रतिपादितोत्कर्षस्यापकर्षसम्पादनं, तथा प्राक् प्रतिपादितापकर्षस्योत्कर्षसम्पादनञ्च ; निन्दायामेव तात्पर्य्यसत्त्वे निन्दितस्यैव पुरस्कारव्यञ्जकार्थत्वं, तथा स्तुतावेव तात्पर्य्यसत्त्वे स्तुतेरेव निन्दाव्यञ्जकार्थत्वं वा ।

अश्लीलत्वं — लज्जाजुगुप्साऽमङ्गलान्यतमरूपार्थव्यञ्जकवाक्यार्थत्वम् । शब्दाश्लीलवदस्यापि व्रीड़ाजुगुप्साऽमङ्गलव्यञ्जकतया त्रैविध्यमवधेयम् ।

कष्टार्थत्वम् — आकाङ्क्षाऽऽसत्त्यादिशाब्दबोधकारणकलापसत्त्वेऽपि कष्टबोध्यार्थवत्त्वम् । अर्थस्य दुर्बोध्यत्वेन अत्र शाब्दबोधस्य विलम्बनं विघातनं वा दूषकतावीजम् ।

अनवीकृतत्वम्—उद्देश्यप्रतिनिर्देश्यत्वाभावे सति बहुशः प्रतिपादितस्यैकस्यैवार्थस्य भङ्गीभेदेन नवीकरणरहितार्थत्वम्, अनेकशः प्रतिपादयितव्यस्यार्थस्य प्रतिपादकपदविन्यासस्य अनन्यथाभावेन एकाकारविन्यस्तपदैः प्रतिपादितत्वमिति निष्कर्षः । चर्वितचर्वणात् वैरस्यापादनमेवात्र दूषकतावीजम् ।

निर्हेतुत्वं—हेत्वभिधाने आकाङ्क्षोत्थापकसत्त्वेऽपि अनभि-

हितहेतुकार्थवत्त्वम्। अस्य च प्रसिद्धार्थविषयकत्वे हेत्वपेक्षाविरहात् न दूषकत्वम्। हेत्वाकाङ्क्षोत्थापकत्वेन शाब्दबोधबोधकत्वमेवात्र दूषकतावीजम्।

प्रकाशितविरुद्धत्वं—वाक्यार्थपर्य्यालोचनाप्रकटीकृतप्रक्रान्तोपयोगविरुद्धार्थकत्वम्। पर्य्यालोचितेन येन वाक्यार्थेन प्रक्रान्तोपयोगविपरीतोऽर्थः व्यक्तीकृतः, तादृशार्थवत्त्वमिति निष्कर्षः।

सन्दिग्धत्वं—वक्त्राभिप्रेतव्यङ्ग्यार्थस्य शब्दान्निश्चितत्वेऽपि बोद्धुर्वक्तृतात्पर्यविषयत्वसन्देहात् संशयविषयत्वम्। अर्थद्वयस्य एकतरस्मिन् बोद्धुः तात्पर्यनिश्चयाभावादर्थनिश्चयप्रतिबन्धकत्वमत्र दूषकतावीजम्।

पुनरुक्तत्वं—कथितस्यापि अर्थस्य पुनः कथनम्। धनुर्ज्यादिशब्दस्थले आरूढत्वादिविशेषार्थबोधाय धनुरादिशब्दप्रयोगे अस्य गुणत्वमेव। अमी धनुर्ज्या जघनकाञ्ची करकङ्कणादयः महाकविप्रयोगे एव गुणत्वापादकाः, न त्वस्मदादिप्रयोगे। उक्तार्थस्यैव पुनः कथनेन वैरस्यापादनमेवात्र दूषकतावीजम्।

ख्यातिविरुद्धत्वं—लोक-कविसम्प्रदायप्रसिद्धिविपरीतत्वम्।

विद्याविरुद्धत्वम्—अलङ्कारादिशास्त्रविपरीतार्थत्वम्।

साकाङ्क्षत्वम् — उपात्तपदार्थान्वयित्वभ्रमप्रयुक्तस्यार्थस्यानुपात्तपदार्थान्वयाकाङ्क्षत्वम्, अनन्वयित्वभ्रमेण प्रयुक्तस्य पदार्थस्यानुपपन्नपदार्थसाकाङ्क्षत्वं वा।

सहचरभिन्नत्वम्—उत्कृष्टैः सह निकृष्टस्य, निकृष्टैः सह उत्कृष्टस्य च एकान्वयित्वेन निर्देशः। भावादिप्रकर्षविघातोऽत्र दूषकतावीजम्।

अस्थानयुक्तत्वम्—अयुक्तस्थाने समापितवाक्यार्थत्वं (समापितपदार्थत्वं वा)। तच्च वाक्यार्थस्याधिक्योपयोगे समापनं, समापनोपयोगे चाधिक्यमिति द्विविधम्।

अविशेषे विशेषः,—सामान्याकारेण वक्तव्ये विशेषरूपस्य अभिधानम् ।

अनियमे नियमः,—अन्यव्यवच्छेदेन अवक्तव्ये तद्रूपेण कथितार्थत्वम् ।

विशेषे अविशेषः,—विशेषाकारेण वक्तव्ये सामान्येन कथितार्थत्वम् ।

नियमे अनियमः,—नियमेन वक्तव्ये अतथाकथितार्थत्वम् । ननु नियमद्योतकपदानभिधानं नियमपरिहृत्तिः, तदितरद्योतकपदानभिधानन्तु वाच्यानभिधानमिति भेदकल्पनेऽपि अनयोः शब्दार्थदोषतायां को नियामकः ? इति चेन्न, शब्दपरिहृत्तिसहत्वासहत्वाभ्यां पूर्वेराहृतस्यापि शब्दार्थदोषविभागस्य एवं पर्य्यवसानात् ; तथा हि—यो दोषः शब्दपरिहृत्यसहः स शब्ददोष एव, यश्च पदार्थान्वयप्रतीतिपूर्वबोध्यः सोऽपि शब्ददोषः, यस्य अर्थप्रतीत्यनन्तरं बोध्यः सोऽर्थाश्रय इति ।

विध्ययुक्तत्वं—विधेयत्वपर्य्याययोग्ये विधेयतात्पर्य्यारोपणम् ।

अनुवादायुक्तत्वं—प्रकृतविधेयस्य यद्धर्मविशिष्टानुवादः प्रतिकूलः, तादृशधर्मस्यानुवाद्यविशेषणत्वम्, अनुवाद्यविशेषणस्य प्रकृतविधिविरोधित्वं वा ।

निर्मुक्तपुनरुक्तत्वं—क्रियाकर्मादिना उपसंहृतेऽपि वाक्यार्थे उक्तजातीयकारकस्य पुनरुपादानम् ; आकाङ्क्षितस्य कारकस्य क्रियाऽन्वयेन आकाङ्क्षासमाप्तावपि पुनस्तत्कारकोपादानं वा ।

अथ रसदोषाः,—रसस्य स्वशब्दवाच्यत्वं, स्थायिनः स्वशब्दवाच्यत्वं, सञ्चारिणः स्वशब्दवाच्यत्वं, विरोधिरसाङ्गीभूतविभावाद्युपादानम्, अनुभावस्य कष्टाक्षिप्तत्वं, विभावस्य कष्टाक्षिप्तत्वं, रसस्य अकाण्डे प्रथितत्वं, रसस्य अकाण्डे छेदः, रसस्य पुनः पुनरुद्दीप्तिः, अङ्गिनः अननुसन्धानम्, अनङ्गस्य कीर्त्तनम्,

अङ्गस्यातिविस्मृतिः, प्रकृतिविपर्ययः, अर्थानौचित्यञ्चेति चतुर्दशसङ्ख्यकाः।

रसस्य स्वशब्दवाच्यत्वं—रसविशेषवाचकशृङ्गारादिशब्देन रसवाचकशब्देन च रसानामुक्तिः। रसप्रकर्षबोधप्रतिबन्धकता एवात्र दूषकताबीजम्। स्थायिसञ्चारिभावयोरपि स्वशब्दवाच्यतायां पूर्ववदेव लक्षणम्। यद्यपि एतेषां पृथक् नाम्ना निर्देशः, तथाऽपि "स्वशब्दवाच्यता" इत्येव दोषस्य सामान्यतो नाम। तस्य च रस-स्थायिभाव-सञ्चारिभावगतत्वेन त्रयो भेदाः इति बोद्धव्यम्। स्ववाचकशब्देनोपादानञ्च स्वशब्दवाच्यत्वम्।

क्वचिच्च यत्र अनुभावविभावमुखेन प्रतिपादने विशदप्रतीतिर्नास्ति, यत्र वा विभावानुभावादिकृतपुष्टिराङ्मित्यमेवानुकूलं सञ्चारिभावस्य, तत्र व्यभिचारिणः स्वशब्दवाच्यत्वं न दोषः; एवञ्च दोषाणां दूषकत्वादूषकत्वयोः रसापकर्षकत्वरूपदूषकताबीजसत्त्वासत्त्वकृतत्वात् यत्र रसप्रकर्षव्यञ्जनार्थमेव व्यभिचार्य्यादयः स्वशब्देन उपादीयन्ते तत्र अदूषकत्वमेवेति निष्कर्षः।

विरोधिरसाङ्गीभूतविभावाद्युपादानाख्यदोषस्यापि पूर्ववत् विभाव-स्थायिभाव-व्यभिचारिभावगतत्वेन भेदात् त्रैविध्यमेकपटेनैव दर्शितम्। यत्र तु प्रतिकूलरसाङ्गभूतानां विभावादीनां पर्य्यवसाने प्रकृतरसादिभिर्बाध्यत्वं, तत्र गुणत्वमेव। किन्तु प्रतिकूलरसीयासाधारणाङ्गपरिग्रह एव दोषः, न तु तत्साधारणाङ्गपरिग्रहः, उक्तरूपदूषकताबीजस्य तत्रासत्त्वात्।

अनुभावस्य कष्टाक्षिप्तत्वम्—आलम्बनोद्दीपनविभावयोरनुभावपर्य्यवसायकत्वेन रसस्य कष्टबोध्यत्वम्।

विभावस्य कष्टाक्षिप्तत्वं—विभावस्य यत्नप्रतिपाद्यत्वम्।

रसस्य प्रकाण्डे प्रथितत्वं—रसप्रकर्षप्रतिपादनायोग्यकाले विस्तरेण रसस्थापनम्।

रसस्य अकाण्डे क्षेदः,—रसस्य विस्तृतियोग्ये काले सहसा तद्विरतिः।

रसस्य पुनः पुनरुद्दीप्तिः,—प्रयोजनमन्तरेण एकस्यैव रसस्य भृशं समुद्बोधनम्।

अङ्गिनोऽननुसन्धानं—प्रधानभूतस्यैव वस्तुनः अकीर्त्तनम्।

अनङ्गस्य कीर्त्तनं—प्रकृततरमोपकारकवस्तुवर्णनपरिहारेण रसानुपकारकस्य वर्णनम्।

अङ्गस्यातिविस्तृतिः,—सङ्क्षेपतो वर्णनीयस्यापि अप्रधानस्यातिविस्तरेण वर्णनम्।

प्रकृतिविपर्य्ययः,— दिव्यत्व--अदिव्यत्व--दिव्यादिव्यत्वभेद--भिन्नानां नायकानां धीरोदात्त-धीरोद्धतत्वादिरूपा उत्तममध्यमत्वादिरूपा च या प्रकृतिः, तस्या अनुचितवर्णनम्। नायकलक्षणं तद्भेदाश्च प्रागेव उक्ताः; एवं तेषां प्रकृत्यनुरूपतया वर्णनीयमवर्णनीयञ्च उक्तमलङ्कारशास्त्रे यथा—"रतिर्हासश्च शोकश्च तथैवार्य्यमेव च। दिव्यानामुचितं वर्ण्यमदिव्योत्तमनेतृवत्॥ किन्तु मध्यागशृङ्गारो वर्ण्यो नोत्तमदेवयोः। सद्यः फलप्रदः क्रोधभ्रुकुट्यादिविवर्जितः॥ उत्साहः स्वर्गपातालगत्यब्धिलङ्घनादिषु। दिव्यानामेव नेतॄणां वर्ण्यते उचितो बुधैः॥ ख्यातं लोकपुराणादौ यच्चान्यत् स्यादबाधितम्। वर्णनीयमदिव्यानामन्येषान्तूभयं बुधैः॥ पूज्यादौ तु तत्रभवन् भगवन्निति चोच्यते। भट्टारकेति राजादौ परमेष्ठीति चोच्यते॥ इत्याद्युचितमेतेषां विरुद्धं दूषणं भवेत्॥" इति।

अन्यदर्थानौचित्यं—देश-काल-लोक जाति-वयःप्रभृतीनामन्याय्यवर्णनम्। तत्र "देशोऽद्रिवनराष्ट्रादिः कालो रात्रिन्दिवर्त्तवः। चराचराणां भूतानां प्रवृत्तिर्लोकसंज्ञिता॥" इति। तत्र देशानौचित्यं यथा—कर्पूरपादपामर्शी सुरभिर्मलयाः

निलः। कलिङ्गवनसम्भूता मृगप्राया मतङ्गजाः॥ चोलाः कालागुरुश्यामाः कावेरीतीरभूमयः॥" इति। अत्र मलये कर्पूरवृक्षस्य, कलिङ्गवने हस्त्युत्पत्तेः, चोलेषु कालागुरूणामसम्भवादनौचित्यम्। कालानौचित्यं यथा—"पद्मिनी नक्तमुन्निद्रा स्फुटत्यङ्क कुमुदती। मधुरुत्फुल्लनिचुलो निदाघो मेघदुर्दिनः॥ श्रव्यहंसगिरो वर्षाः शरदो मत्तबर्हिणः। हेमन्तो निर्मलादित्यः शिशिरः श्लाघ्यचन्दनः॥" इति। लोकानौचित्यं यथा—"आधूतकेशरो हस्तो तिग्मशृङ्गस्तुरङ्गमः। गुरुसारोऽयमेरण्डो निःसारः खदिरद्रुमः॥" इति। उक्तरूपानौचित्यस्य न केवलं रसापकर्षकत्वं दूषकतावीजम्, अपि तु काव्यस्य प्रवृत्तिनिवृत्त्युपदेशपरत्वव्याघातकत्वमपि। अस्यापि अलौकिकविभूत्यादिवर्णने क्वचिददोषत्वं, यथा—"नित्यपद्मा नलिन्यः" इत्यादि।

"प्रत्यनीकौ रसौ द्वौ द्वौ तत्सम्पर्कं विवर्जयेत्" इति नियमात् विरुद्धरसयोः समावेशे दोषः इत्युक्तं, विषयविशेषे तत्समावेशे अदोषत्वात्र दर्शितः। तथा हि—प्रकृतरसेन तद्विरोधिरसस्य अतीतस्यापि व्यञ्जनया ज्ञाने, अनुभावादिसाम्यात् सादृश्यतया कथने, तथा प्रधानस्याङ्गतया परिपोषणे च नायं दोषः। सर्वेषामेव दोषाणामनुकरणरूपेण वर्णने अदोषत्वमेव। येषां दोषाणां क्वचिददोषताऽपि, ते अनित्याः, तदितरे च नित्याः।

अलङ्कारदोषाः,—उक्तकाव्यदोषेभ्यः पृथक्त्वेन अलङ्कारेषु दोषा न सम्भवन्ति, अतः पूर्ववर्णिता एव अलङ्कारगतास्ते अलङ्कारदोषतया कथ्यन्ते। तत्र उपमायां साधारणधर्मस्याप्रसिद्धिः, उपमानाप्रसिद्धिर्वा, तथा उपमायाः उपमानस्य उपमेयजात्यपेक्षया अतिनिकृष्टत्वमत्युत्तमत्वं वा,

उपमेयपरिमाणापेक्षया उपमानपरिमाणस्यात्यल्पत्वमत्यधिकत्वं वा, अर्थान्तरन्यासे उक्तोचितार्थसमर्थनस्य अलङ्कारगतानुचितार्थत्वम्।

यमकस्य पादत्रयगतत्वेन कथनमप्रयुक्तत्वं दोषः। उत्प्रेक्षायां यथाशब्दस्योत्प्रेक्षाद्योतकत्वेनोपादानमवाचकत्वम्। अनुप्रासे तद्घटकवर्णानां प्रकृतरसविरोधिरसानुगुणवर्णघटितत्वस्य प्रतिकूलवर्णत्वम्। उपमायां साधारणधर्मस्याधिक्यमधिकपदत्वं, तस्य न्यूनत्वं न्यूनपदत्वम्। उपमानोपमेययोर्लिङ्गवचनभेदे कालपुरुषविध्यादिभेदे च यदि साधारणधर्ममन्यरूपमेकतरस्यैवान्वययोग्यं कुर्यात्, तदा स धर्मः यदन्वययोग्यस्तत्रैव तद्धर्मान्वयावगमात् तद्धर्मविशिष्टस्यैव उपमेयत्वमुपमानत्वं वा प्रतीयमानेन व्यङ्ग्येन धर्मान्तरेणैव प्रतीयते इत्यतः उपक्रान्तधर्मेण उपमारूपार्थस्य अनिर्वाहात् यत्र तथाविधप्रक्रान्तरहितवर्णनं, तत्र भग्नप्रक्रमत्वम्; यत्र लिङ्गवचनभेदेऽपि साधारणधर्मस्यान्वयाभावः, तत्र न दोषः, यथा "मुखं चन्द्र इवाभाति" इत्यादि।

अनुप्रासस्य रसाद्युत्कर्षानाधायकत्वेन मुख्यार्थानुपकारित्वमस्फुटार्थत्वम्। समासोक्तौ प्रकृतसाधारणविशेषणवशात् परार्थस्य प्रतीतावपि पुनस्तस्य शब्देन उपादानस्य, तथा अप्रस्तुतप्रशंसायामपि व्यञ्जनयैव प्रस्तुतार्थावगतेः पुनः शब्देन तदभिधानस्य च पुनरुक्तत्वम्।

अनुप्रासे अनुप्रासित-पदार्थयोः विवक्षितेऽन्वये लोकतः शास्त्रतः वा प्रसिद्धिविरहः ख्यातविरुद्धत्वम्।

कविसम्प्रदायख्यातायाः ख्यातविरुद्धतायाः गुणत्वम्। तत्र सम्प्रदायस्त्रिविधः, तथा चोक्तम्—"असतोऽपि निबन्धेन सतामप्यनिबन्धनात्। नियमस्य पुरस्कारात् सम्प्रदायस्त्रिधा

कपेः॥" इति। असतो निबन्धनं यथा—"रत्नानि यत्र तत्राद्रौ हंसाद्यल्पजलाशये। जलेभाद्यं नभोनद्यामम्भोजाद्यं नदीष्वपि॥ तिमिरस्य तथा मुष्टि-ग्राह्यत्वं सूचिभेद्यता। शुक्लत्वं कीर्त्ति-पुण्यादौ कार्ष्ण्यं चाकीर्त्त्यघादिषु॥ आकाशकर्त्तृकं नक्तं तमसो वर्षणं तथा। प्रतापे रक्ततोष्णत्वे रक्तत्वं क्रोधरागयोः॥ ज्योत्स्नापानं चकोराणां शैवालं सर्ववारिषु। केशराशोकयोः स्त्रीणां गण्डूषात् पादघाततः॥ मासान्तरेऽपि पुष्पाणि रोमालिस्त्रिवलिः स्त्रियाम्॥" सतामनिबन्धनं यथा—"वसन्ते मालतीपुष्पं फलपुष्पं च चन्दने। कामिदन्तेषु कुन्दानां कुड्मलेषु च रक्तता॥ नारीणां श्यामतापातः स्तनयोः यच्च वा ह्रिये॥" नियमाख्यानं यथा—"हिमवत्येव भूर्ज-त्वक् चन्दनं मलये परम्। हेमन्तशिशिरौ त्यक्त्वा सर्वदा कमलस्थितिः॥ सामान्यग्रहणे शौक्ल्यं पुष्पाम्भश्छत्रवाससाम्। ध्वजचामरहंसानां हाराणां वकभस्मनोः॥ कृष्णत्वं शैलवृक्षादि-मेघवारिधिवीरुधाम्। भिल्लानामसुराणाञ्च धूपपङ्कशिरोरुहाम्॥ लौहित्यं धातुमाणिक्य-जपारत्नविवस्वताम्। पद्मपल्लव-बन्धूक-दाड़िमीकरजादिषु॥ पीतत्वं शालिमण्डूक-वल्कलेषु परागके। वर्षास्वेव शिखिप्रौढ़िर्मधावेव पिकध्वनिः॥" अन्यच्च —"कमलासम्पदाः कृष्णहरितोर्नागसर्पयोः। पीतलोहितयोः स्वर्ण-परागाग्निशिखादिषु॥ चन्द्रे शशैणयोः काम-ध्वजे मकरमत्स्ययोः। दानवासुरदैत्यानामैक्यमेवाभिसंहितम्॥" अपि च—"चिरन्तनस्यापि तथा शिवचन्द्रस्य बालता। मानवा मौलितो वर्ण्या देवाश्चरणतः पुनः॥ भुवनानि निबध्नीयात्त्रीणि सप्त चतुर्दश। चतस्रोऽष्टौ दश दिशः चतुरः सप्त चाम्बुधीन्॥ अष्टादश स्मृता विद्याश्चतस्रश्च चतुर्दश। ये स्थले ते जले जीवा भिन्दन्त्यर्कं रणे मृताः॥ महत्त्वमादौ सर्गान्ते सूक्ष्मता जगता-

मपि । शैलादिर्भिद्यते शब्दान्नभः शतधनूपरि * ॥ नाम तत्तदुपाधौ स्याच्छङ्करो वृषवाहनः । चिह्नत्वे च वृषाङ्कोऽयं ध्वजे सत्त्वात् वृषध्वजः ॥ शूली न सर्पी गिरिशः शशी न हरिणी विधुः । इन्दुमौलिर्महादेवो गङ्गामौलिर्न तु क्वचित् ॥" इत्यादयः । आकरे तु "मालिन्यं व्योम्नि पापे" इत्यादिकं द्रष्टव्यम् ।

अथ दोषाणां परस्परभेदाः,—दुःश्रवत्वे—श्रुतिपरुषवर्णानामेव प्रयोगः ; प्रतिकूलवर्णत्वे तु—रसापकर्षकत्वरूपदूषकतावीजसत्त्वेन वीरादिरसे सुललितवर्णप्रयोगोऽपीत्यनयोर्भेदः ।

निहतार्थत्वे—कोषादिप्रसिद्धानेकार्थस्यापि शब्दस्य कविभिरनादृतत्वात् अप्रसिद्धेऽर्थे प्रयोगः ; अप्रतीतत्वे तु—एकार्थस्यापि शब्दस्य सार्वत्रिकप्रयोगाभाव इत्यनयोर्भेदः ।

निहतार्थत्वे—कोषादिप्रसिद्धानेकार्थस्यापि शब्दस्य तदर्थे विरलप्रयोगः ; असमर्थत्वे तु—अनेकार्थस्यापि शब्दस्य यदर्थे सर्वथा प्रयोगासत्त्वेन शक्तिग्रहाभावः, तदर्थे प्रयोग इत्यनयोर्भेदः ।

अप्रयुक्तत्वे—तेन रूपेण कोषादिप्रसिद्धिसत्त्वेऽपि कविभिरप्रयुक्तस्य तदर्थबोधानुकूलशक्तिमतः शब्दस्य तदर्थे प्रयोगः ; असमर्थत्वे तु—यदर्थे सर्वथा प्रयोगाभावः, (तत्तदर्थे व्याकरणादिप्रसिद्धिसत्त्वेऽपि) तदर्थबोधाननुकूलशक्तिमतां शब्दानां तदर्थे अशक्तिकृतः प्रयोग इत्यनयोर्भेदः ।

असमर्थत्वे—हन्त्यादीनां गमनार्थकत्वेन व्याकरणादौ पठितत्वेऽपि न तदर्थबोधने सामर्थ्यम् ; अवाचकत्वे तु—शक्त्या तदर्थबोधकत्वाभावेऽपि प्रकरणादिपर्य्यालोचनया तदर्थावगतिरित्यनयोर्भेदः ।

क्लिष्टत्वे—एकस्मिन्नेव वाक्ये दुर्बोध्यशब्दप्रयोगात् अर्थबोध-

* धनुःशब्दवत् चतुर्हस्तपरिमाणवाचक-उकारान्तधनुशब्दोऽपि दृश्यते ।

व्याघातः ; सङ्कीर्णत्वे तु—वाक्यान्तरीयपदानां वाक्यान्तरे अनुप्रवेशात् विवक्षितार्थबोधव्याघात इत्यनयोर्भेदः।

विधेयाविमर्षे—यदेव पदमविमृष्टं, तदेव दृष्टम् ; अभवन्मतसम्बन्धत्वे तु—प्रधानस्य प्राधान्येनाप्रतीतेः सर्वेषां तदङ्गतया अप्रतीतिरिति सर्ववाक्यार्थविरोधावभासः इत्यनयोर्भेदः।

विधेयाविमर्षे—उद्देश्यविधेययोः पौर्वापर्य्यविपर्य्ययमात्रमेव ; विध्ययुक्ततायान्तु—तयोः पौर्वापर्य्यविपर्य्ययाभावसत्त्वेऽपि विवक्षितस्य आनन्तर्य्यस्यानभिधानमित्यनयोर्भेदः।

अधिकपदत्वे—एकेन शब्देन प्रतिपादितस्यैव अर्थस्य भङ्ग्या शब्दान्तरेणापि पुनः प्रतिपादनम् ; पुनरुक्तत्वे तु—कथितस्यैवार्थस्य पुनः कथनमित्यनयोर्भेदः।

अधिकपदत्वे—पदार्थयोरन्वयबोधदशायामेव अन्वयबाधावभासः ; अपुष्टत्वे तु—पदार्थान्वयप्रतीतेः पश्चात् विशेषणस्य प्रकृतार्थप्रकर्षसाधकत्वाभावपर्य्यालोचनया बाधप्रतिभास इत्यनयोर्भेदः।

अधिकपदत्वे—शब्दज्ञानानन्तरमेव दोषप्रतिभासः, नियमव्यतिरिक्तार्थद्योतकपदप्रयोगश्च ; अनियमपरिवृत्तौ तु—अर्थप्रतीत्यनन्तरं दोषस्फूर्त्तिः, नियमार्थद्योतकपदाभिधानञ्च इत्यनयोर्भेदः।

न्यूनपदत्वे—"यदि मय्यर्पिता दृष्टिः" इत्यादौ "त्वया" इत्यादिवाचकपदस्यैवानभिधानम् ; वाच्यानभिधाने तु—"व्यतिक्रमत्वम्" इत्यादौ द्योतकपदस्यापीत्यनयोर्भेदः।

न्यूनपदत्वे—वाचकपदस्यानभिधानम् ; नियमपरिवृत्तौ तु—"आपातसुभगे" इत्यादौ नियमद्योतकपदस्येत्यनयोर्भेदः।

न्यूनपदत्वे—"यदि मय्यर्पिता" इत्यादौ "त्वया" इत्यादिशब्दस्यैवाध्याहारः ; साकाङ्क्षत्वे तु—प्रकृतवाक्यार्थान्वयबोधे

आकाङ्क्षाया अनिरासादन्वयबोधार्थम् अर्थस्यैव इत्यनयोर्भेदः।

कथितपदत्वे—पूर्वं यत्पदं कथितं तत्समानाकारकशब्दस्यैव पुनः प्रयोगे दोषः; अनवोक्तत्वे तु—वैचित्र्यविशेषासत्त्वे कथितपदस्य पर्य्यायान्तरेणापि पुनरुपादानेऽपि दोष इत्यनयोर्भेदः।

कथितपदत्वे—उद्देश्यप्रतिनिर्देश्यव्यतिरिक्त एव विषयः; भग्नप्रक्रमतायान्तु—दोषपरिहारार्थं "रावणः प्रत्यभाषत" इत्यत्र "रावणः प्रत्यवोचत" इति पाठकल्पनेऽपि न कथितपदतायाः आशङ्का, तस्या उद्देश्यप्रतिनिर्देश्यव्यतिरिक्तविषयकत्वात्, भग्नप्रक्रमतायास्तु उद्देश्यप्रतिनिर्देश्यभावविषयेऽपि सम्भवादित्यनयोर्भेदः।

पतत्प्रकर्षतायां—शब्दकृतानुप्रासादेः प्रकर्षस्य क्रमशः पातः; व्याहतत्वे तु—प्रागुक्तयोः कस्यचिदुत्कर्षापकर्षयोः पश्चादर्थपर्य्यालोचनसापेक्षः तदन्यथाप्रतिपत्तिबोध इत्यनयोर्भेदः।

समाप्तपुनरात्तत्वे—अन्वयबोधजननात् निराकाङ्क्षस्यापि विशेष्यस्य विशेषणान्तराकाङ्क्षया एकस्मिन् एव वाक्ये पुनर्विशेषणान्तरस्योक्तिः; अर्द्धान्तरैकपदत्वे तु—पूर्वार्द्धगतवाक्यघटकैकपदस्य परार्द्धगतवाक्यान्तरेऽनुप्रवेश इत्यनयोर्भेदः।

समाप्तपुनरात्तत्वे—अन्वयबोधजननात् निराकाङ्क्षस्यापि विशेष्यस्य विशेषणान्तरेण अन्वयार्थं पुनरनुषङ्गः; निर्मुक्तपुनरुक्तत्वे तु—आकाङ्क्षितस्य कारकस्य क्रियाऽन्वयेन समाप्तावपि पुनस्तत्कारकोपादानमित्यनयोर्भेदः।

अस्थानस्थपदत्वे—वाचकपदस्य यथोक्तक्रमाभावः; अक्रमतायान्तु—स्वार्थान्वितार्थकद्योतकपदस्य प्रत्यासत्तिरूप-क्रमस्याभाव इत्यनयोर्भेदः।

अस्थानस्थपदत्वे—अयथास्थानस्थितस्य पदस्य यथास्थान-निवेशेन अन्वयबोधानन्तरं सम्बन्धप्रतीतिः; अभवन्मतसम्बन्धत्वे तु—कवेरभिमतस्यापि सम्बन्धस्य निराकाङ्क्षतया अयोग्यतया वा अनुपपत्तिरिति अन्वयज्ञानात् परमपि सम्बन्धप्रतीत्यभाव इत्यनयोर्भेदः।

अनुचितार्थत्वे—शब्दश्रवणानन्तरमेव विरुद्धार्थप्रतीतिः; प्रकाशितविरुद्धतायान्तु—वाक्यार्थपर्य्यालोचनसापेक्षं विरुद्धार्थ-व्यञ्जनमित्यनयोर्भेदः।

अमतपरार्थत्वे—"राममन्मथशरेण ताडिता—" इत्यादौ नियमेन वाक्यान्वयव्यतिरेकानुविधायित्वम्; अश्लीलत्वादौ तु—"हन्तुमेव—" इत्यादावर्थाश्लीलतायां हन-धात्वादेः पारिभाषिक-निर्घातादिबोधकत्वं नियमतो नोपपद्यते, परन्तु समभिव्याहृत-पदार्थतात्पर्य्यपर्य्यालोचनया तदर्थकत्वकल्पनेनेत्यनयोर्भेदः।

अक्रमत्वे—शब्दस्य स्वार्थान्वितार्थकपदप्रत्यासत्तिरूप-क्रम-विपर्य्ययः; दुष्क्रमत्वे तु—पदार्थतात्पर्य्यपर्य्यालोचनावगम्यः अर्थस्य क्रमविपर्य्यय इत्यनयोर्भेदः।

नियमपरिवृत्तौ—पदार्थान्वयप्रतीत्यनन्तरं दोषावभासः, नियमद्योतकपदानभिधानञ्च; वाच्यस्यानभिधाने तु—शब्दोच्चारणानन्तरमेव दोषप्रतीतिः, नियमव्यतिरिक्तार्थद्योतक-पदानभिधानञ्चेत्यनयोर्भेदः।

एवमन्येषामपि दोषाणां परस्परभेदाः लक्षणपर्य्यालोचनया सुधीभिः स्वयमूहनीया इत्यलमतिपल्लवितेन।

अष्टमपरिच्छेदे—

अथ गुणाः उच्यन्ते—लोके यथा आत्मनः उत्कर्षहेतुत्वात् शौर्य्यादयः गुणशब्दवाच्याः, तथा काव्ये विभावाद्यङ्गसमुदय-

सम्बन्धादङ्गित्वमात्रस्य रसस्य उत्कर्षाधायकाः धर्माः माधुर्य्यादयः गुणा इत्युच्यन्ते । एषाञ्च क्वचित् रसाभाववति काव्ये गुणाभिव्यञ्जक-शब्दार्थयोः सत्त्वेऽपि नीरसतया माधुर्य्यादेरननुभवात्, क्वचिच्च तदसत्त्वेऽपि रसवत्त्वेनैव तदभ्युपगमात् रसान्वयव्यतिरेकानुविधायितया रसधर्मत्वमवगन्तव्यम् । रसाभिव्यञ्जकावेव शब्दार्थौ गुणस्याप्यभिव्यञ्जकौ वेदितव्यौ । एवञ्च एषां वामनादुक्तं शब्दार्थधर्मत्वं परम्परया बोध्यं. सा च स्वाश्रयाभिव्यञ्जकत्वरूपा ज्ञेया, ते च गुणाः माधुर्य्यमोजः प्रसाद इति त्रिविधाः ।

तत्र माधुर्य्यं—शृङ्गार-करुण-शान्तरसोद्बोधनानन्तरं जायमानः रत्याद्यविषयकः सङ्घटयचित्तद्रवीभावरूपकेवलानन्दसन्दोहानुभवः । जनकत्वसम्बन्धेन रससम्बन्धितया चास्य रसधर्मत्वम् अक्षतमेव ।

ननु काव्यप्रकाशकृता पुनर्माधुर्य्यलक्षणम् "आह्लादकत्वं माधुर्य्यं शृङ्गारे द्रुतिकारणम्" इत्युक्तम् ; इह तु आह्लादः, कथमेतत् ? इति चेन्न ; आह्लादातिरिक्तस्य द्रवीभावस्य निर्वक्तुमशक्यतया आह्लादे एव तत्पर्य्यवसानमिति आह्लादाभिन्नत्वेन माधुर्य्यस्य तत्कार्य्यत्वाभावात्, आह्लादजनकत्वापेक्षया लघुनः आह्लादत्वस्यैव माधुर्य्यपदशक्यतावच्छेदकत्वसम्भवे गुरुधर्मे तल्लक्षणस्यानुचितत्वाच्च ; एवञ्चाह्लाद एव माधुर्य्यपदार्थः इति निष्कर्षः । ननु द्रवीभावस्तावदाह्लाद एव, तस्य च रसाभिन्नतया कथं रसधर्मत्वम् ? इति चेन्न ; द्रवीभावस्य रत्यादिविषयसंवलिततरमास्वादेन जायमानसङ्घटयचित्तादृप्रायत्वरूपत्वस्वीकारादिति निपुणैर्विभाव्यम् ।

तच्च माधुर्य्यं सम्भोगापेक्षया करुणे, तदपेक्षया विप्रलम्भे, तदपेक्षया च शान्ते उत्कर्षातिशयजनकम् । एवञ्च तत्तद्रसा-

भासेष्वपि च क्रमादुत्तरोत्तरमुत्कर्षातिशयजनकत्वमस्य बोध्यम्। तत्र माधुर्य्याभिव्यक्तौ—अग्रभागे स्वस्ववर्गान्त-ङादिपञ्चमवर्णैः संयुक्ताः ट-ठ-ड-ढभिन्नाः कादयो मान्ता वर्णाः, तथा विसर्गवर्णान्तरायुक्तौ अयुक्तान्तौ च रेफ-णकारौ. एवं निरुक्तवर्णबहुला असमासा अल्पसमासा वा बहुतरकर्कशवर्णरहिता सुकुमारार्थप्रतिपादिका मधुरा रचना च कारणम्।

ओजः,—उत्साहाद्याकारानुविद्धचमत्कारोद्बोधेन समुत्पद्यमानः उत्साहाद्यविषयकचमत्कारोद्बोधः, चित्तविस्फाररूपं दीप्तत्वं वा। एतच्च वीर-बीभत्स-रौद्ररसेषु क्रमेणोत्तरोत्तरम् उत्कर्षजनकम्। एवं तत्तद्रसाभासादिष्वपि उक्तक्रमेण उत्तरोत्तरमस्य उत्कर्षजनकत्वं बोध्यम्। ओजसोऽभिव्यक्तौ—वर्गस्याद्यतृतीयाभ्यां वर्णाभ्यां संयुक्तौ द्वितीयचतुर्थौ वर्णौ, उपरि अधः तदुभयत्र वा रेफयुक्ता विसर्गयुक्ताश्च वर्णाः, तथा ट-ठ-ड-ढ-श-षादिकाः माधुर्य्यव्यञ्जकातिरिक्ताश्च वर्णाः, एवं बहुलसमासा ओजोव्यञ्जकवर्णघटिता उद्भटाक्षरबहुला उद्भटार्थप्रतिपादिका रचना च कारणम्।

प्रसादः,—शुष्ककाष्ठसंलग्नानलवत् झटिति सहृदयानां मनसः अन्यव्यासङ्गनिराकरणेन निर्मलताऽऽपादकः गुणः। सर्वेषु च रसेषु अस्य सद्भावः। ओजोमाधुर्य्यवदस्य रचनाविशेषरूपो व्यञ्जको नास्ति, किन्तु श्रवणमात्रतोऽर्थबोधकाः सुललिताः शब्दा एव अस्य व्यञ्जकाः।

ननु गुणानामेषां रसधर्मत्वस्वीकारे प्राचीनसम्मतशब्दार्थधर्मत्वं कथमुपपद्यते? इति चेन्न; स्वाश्रयरसाभिव्यञ्जकत्वरूपपरम्परासम्बन्धेन तदुपपत्तेः; तथा हि—यथा शौर्य्यादेरात्मधर्मस्य शरीरवृत्तित्वं, यथा वा स्थूलत्वादेः शरीरधर्मस्य आत्मवृत्तित्वं परम्परासम्बन्धेन, तथा अत्रापि।

अत्र चिरन्तनोक्तानामपि श्लेषादिदशगुणानां माधुर्यादावेवान्तर्भावसम्भवात् न ते पृथगभिहिताः; तथा हि—तत्र श्लेषः, समाधिः, औदार्यं, प्रसाद इत्येतेषां चतुर्णां गुणानाम् ओजसि अन्तर्भावः। पृथक्पदत्वरूपमाधुर्यस्य यथोक्तमाधुर्यान्तर्भावः। पदानां झटित्यर्थावबोधरूपायाः अर्थापत्तेः प्रसादे अन्तर्भावः। ग्राम्यदूरवतात्यागेन च सौकुमार्यं कान्तिश्चेति शब्दगतगुणद्वयस्य स्वीकारः कृतः। समतायाः मार्गभेदस्वरूपित्वे दोष एवान्तर्भावः, अन्यथा तु उक्तगुणेष्वेव इति न पृथगुक्तिः।

ओजः,—स्वाभिप्रायत्वरूपं, प्रसादः,—अर्थवैमल्यं, माधुर्यम्—उक्तिवैचित्र्यं, सौकुमार्यम्—अपारुष्यम्, उदारता—ग्राम्यत्वम् इत्युक्तलक्षणकाः प्राचीनोक्ताः पञ्चविधाः अर्थगुणाः यथाक्रममपुष्टार्थत्वाधिकपदत्वानवीकृतत्वामङ्गलरूपाश्लीलत्वग्राम्यत्वदोषाणां निराकरणेनैव गुणत्वेनाङ्गीकृताः, तथा वस्तुस्वभावस्फुटीकरणरूपा अर्थगता अर्थव्यक्तिः स्वभावोक्तिनामकालङ्कारस्वीकारेणैवाङ्गीकृता। दीप्तिरमलरूपाया अर्थगतायाः कान्तेः रसध्वनिगुणीभूतव्यङ्ग्याभ्यां परिग्रहः कृतः। वैचित्र्यमात्ररूपार्थश्लेषगुणस्य, दोषराहित्यरूपायाः समतायाश्च न पृथग्गुणत्वं, समाधेरपि असाधारणशोभानाधायकत्वात् न गुणत्वम; तेन प्राचीनोक्ता अर्थगुणाः उक्तगुणेभ्यः न पृथगिति सुधीभिर्द्रष्टव्यम्।

नवमपरिच्छेदे—

अथ रीतिः,—यथा लोके विलक्षणमुखाद्यवयवसन्निवेशविशेषवशात् परस्परमङ्गानां शोभनसम्बन्धः शरीरस्य शोभातिशयं जनयन् शरीरिणः उपकारकः, तथा गुणाभिव्यञ्जकवर्णादीनां यथास्थानं विनियोगः शब्दार्थशरीरस्य रसात्मकस्य

काव्यस्य आत्मभूतरसानां स्वाश्रयव्यञ्जकरसादिवृत्तिगुणाभिव्यञ्जकतया उत्कर्षाधायकः रीतिरित्युच्यते।

सा पुनः वैदर्भी, गौडी, पाञ्चाली, लाटी चेति चतुर्विधा। विदर्भ-गौड़-पाञ्चाल-लाटदेशोद्भवैः कविभिः सम्मतत्वाच्च अस्या यथायथं वैदर्भ्यादिसंज्ञा वेदितव्या।

तत्र वैदर्भी—माधुर्यव्यञ्जकवर्णघटिता सुकुमाराक्षरप्राया सुकुमारार्था अल्पसमासा समासरहिता वा रचना।

गौड़ी—ओजःप्रकाशकवर्णघटिता उद्भटार्थप्रतिपादिका बहुतरसमासयुक्ता रचना।

पाञ्चाली—पूर्वोक्तवैदर्भीगौड्योः व्यञ्जकवर्णव्यतिरिक्तवर्णघटिता पञ्चषसमस्तपदसमन्विता रचना।

लाटी—ओजोव्यञ्जकैतरैः वर्णैः घटिता अंशतः वैदर्भीलक्षणान्विता अंशतश्च पाञ्चालीलक्षणान्विता मिश्रा रचना। आसु च रीतिषु क्वचित् वक्तृवाच्ययोः औद्धत्यसौकुमार्याभ्यां, प्रबन्धस्य स्वभावेन वा उपक्रान्तायाः प्रकृतेः रसाभिव्यञ्जिकायाः वा रीतेर्विपरीता रचनादयः कार्याः।

केचित्तु—"गौड़ी डम्बरबन्धा स्यात् वैदर्भी ललितक्रमा। पाञ्चाली मिश्रभावेन लाटी तु मृदुभिः पदैः॥" इत्येवं रीतीनां लक्षणान्याहुः।

अन्ये तु रीतेः षड्विधत्वमाहुः, यथा—"वैदर्भी चाथ पाञ्चाली गौड़ीयाऽऽवन्तिका तथा। लाटीया मागधी चेति षोढ़ा रीतिर्निगद्यते॥" इति।

दशमपरिच्छेदे—

अथ अलङ्काराः।—अलङ्कारत्वं—काव्यत्वाव्यापकत्वे सति शब्दार्थगतसौन्दर्य्यातिरेकजनकरसाद्युपकारकशब्दार्थधर्मत्वम्, अलङ्काराणाञ्च शोभाऽतिशयजनकत्वमङ्गदादिवत्

वेदितव्यम् ; तथा हि—यथा लोके देहिनां शरीरावयवेषु परिहिता अङ्गदादयः शरीरशोभाजननेन शरीरिणमुत्कर्षयन्तः अलङ्कारपदवाच्याः, तथा शब्दार्थशरीरस्य रसात्मकस्य काव्यशरीरिणः शब्दार्थयोः शोभाऽऽतिशय्याऽऽधायकतया आत्मभूतस्य रसस्य उत्कर्षातिशयजनकाः धर्मा अलङ्काराः इत्युच्यन्ते। काव्ये गुणानां रसधर्मतया नियतावश्यकत्वम्, अलङ्काराणान्त्वनियतावश्यकत्वमिति बोध्यम् ।

ते च शब्द-अर्थ-तदुभयगतत्वेन त्रिधा। शब्दपरिवृत्तिसहत्वासहत्वाभ्यामेषां यथायथं शब्द अर्थ-तदुभयालङ्काररूपत्वम् ; तथा हि—यत्र शब्दपरिवर्त्तनेन तत्पर्य्यायकशब्दान्तरोपादानेन च न तदलङ्कारसम्भावना, तत्र शब्दालङ्कारत्वम् ; यत्र च शब्दपरिवर्त्तनेन तत्पर्य्यायकशब्दान्तरोपादानेन च न तदलङ्कारव्याघातः, तत्रार्थालङ्कारत्वम् ; यत्र च अंशतः शब्दपरिवर्त्तनम्, अंशतश्च न शब्दपरिवर्त्तनं, तत्रोभयालङ्कारत्वम् ।

शब्दार्थयोः प्रथमं शब्दस्य बुद्धिविषयत्वात् शब्दालङ्कारस्यैव प्राक् कथनौचित्ये शब्दार्थोभयालङ्कारस्यापि प्राचीनैः शब्दालङ्कारमध्ये एव परिगणितत्वात् ग्रन्थकृता स एव प्रथममभिहितः। स च एक एव पुनरुक्तवदाभासनामा ; तल्लक्षणन्तु—विभिन्नाकारसार्थकानर्थकशब्दगामित्वे सति एकार्थत्वेन आपाततः प्रतीयमानत्वमिति ।

शब्दालङ्काराश्च षट्—अनुप्रासः, यमकं, वक्रोक्तिः, भाषासमः, श्लेषः, चित्रमिति ।* तत्र च अनुप्रासः,—वर्णपदैकदेश-

* "अत्र शिष्याणामभ्यसनसौकर्य्यार्थं शब्दालङ्कृतयः काव्यबन्धेनोपन्यस्यन्ते, तथा हि—

अनुप्रासोऽथ यमकं वक्रोक्तिस्तदनन्तरम् ।
भाषासमेन संयुक्ते श्लेषचित्रे तथा स्मृते ॥

पदानामन्यतमस्य कृत्वादिरूपेण एकस्यानेकार्थत्वरूपेण वा सादृश्येन पुनःपुनरावर्त्तनम् ; स च छेकवृत्ति-श्रुति-अन्त्य-लाटानुप्रासभेदात् पञ्चविधः।

तत्रापि छेकानुप्रासः,—अनेकव्यञ्जनस्य स्वरूपतः क्रमतश्च सकृत् साम्यम्।

वृत्त्यनुप्रासः,—अनेकव्यञ्जनस्य स्वरूपतः सकृत् साम्ये एकः, असकृत् साम्ये अपरः, स्वरूपतः क्रमतश्च असकृत् साम्ये चान्यः, एकव्यञ्जनस्य सकृत् साम्ये एकः, असकृत् साम्ये चापर इति पञ्चविधः।

श्रुत्यनुप्रासः,—तालुरदाद्येकस्थानोच्चार्यत्वेन व्यञ्जन-सादृश्यम्।

अन्त्यानुप्रासः, — यथासम्भवमनुस्वार-विसर्ग-स्वरयुक्तपद-पादान्तगतव्यञ्जनस्य तदाद्येन स्वरेण सह पुनरावर्त्तनम्।

लाटानुप्रासः,—तात्पर्य्यमात्रतो भिन्नत्वे सति शब्दार्थयोर्न-रूपम्। एवञ्च नव अनुप्रासभेदा वेदितव्याः।

यमकम्—अर्थे सति विभिन्नार्थकस्य स्वरव्यञ्जनसमूहस्य पूर्व-क्रमेण पुनः आवृत्तिः ; तच्च पदपादार्द्धश्लोकावृत्तित्वेन पादाद्या-वृत्तेश्चानेकविधतया प्रभूततममेदम्। तत्र प्रथमं पादपादैकदेश-पद्य-पद्यार्द्धावृत्तित्वेन चतुर्विधम्। तत्रापि पादयमकस्य—प्रथम-पादस्य द्वितीयाद्यन्यतमस्मिन्, द्वितीयादिमसुदये, द्वितीयतृतीय-समुदये, द्वितीयचतुर्थसमुदये च आवृत्तौ ; एवं द्वितीयपादस्य तृतीयाद्यन्यतमस्मिन्, तृतीयादिमसुदये च ; तथा तृतीयपादस्य चतुर्थे वा आवृत्तौ दशविधत्वम्। श्लोकार्द्धयमकस्य तु—प्रथमार्द्धस्य द्वितीयार्द्धे आवृत्तौ एकः ; प्रथमपादस्य द्वितीये, तृतीयस्य च चतुर्थे आवृत्तौ अपरः ; द्वितीयस्य तृतीये, तृतीयस्य च चतुर्थे पादे आवृत्तौ अन्य इति त्रैविध्यम्। श्लोकयमकस्य विजातीय-

चतुष्पादाहृत्या एकरूपचतुष्पादाहृत्या च द्वैविध्यं सम्भवति। एवमन्यथाऽपि यमकभेदाः स्वयमूह्यनीयाः।

वक्रोक्तिः,— प्रथमवक्तृवाक्यश्लेषस्य स्ववाक्यस्थकाकोर्वा साहाय्यात् प्रथमवक्तुर्वाक्यस्यान्याभिप्रायकत्वप्रत्यायकत्वेनाभिधानम्; सा च श्लेषमूलकत्व-काकुमूलकत्वनिबन्धनभेदात् द्वैविध्यं भजते।

भाषासमः,—विविधास्वपि भाषासु एकाकारशब्दघटित-वाक्यरचनम्।

श्लेषः,—एकप्रयत्नोच्चार्यत्वेन लुप्तभेदानां वर्णादीनाम् अनेकार्थपदकरणकानेकार्थाभिधानम्; स च प्रथमं वर्ण-प्रत्यय-लिङ्ग-प्रकृति-पद-विभक्ति-वचन-भाषागतत्वेनाष्टधा; ततश्च तेषामपि यथासम्भवं सभङ्ग-अभङ्ग-तदुभयात्मकतया भेदाः स्वयम् ऊह्यनीयाः।

अत्र केचिदाहुः,—सभङ्गः श्लेषः एव शब्दश्लेषविषयः, अभङ्ग-श्लेषस्तु अर्थश्लेषविषय इति। तदन्ये न मन्यन्ते, तथा हि— ध्वनिगुणीभूतव्यङ्ग्यदोषगुणालङ्काराणां शब्दार्थगतत्वेन व्यवस्था "तत्सत्त्वे तत्सत्ता अन्वयः, तदसत्त्वे तदसत्ता व्यतिरेकः" इति न्यायप्राप्तान्वयव्यतिरेकाभ्यां स्थिरीकृतेति इहापि यत्र शब्द-परिवर्त्तनेऽपि न श्लेषत्वखण्डना, तत्रार्थश्लेषः; यत्र तु शब्दपरि-वर्त्तनं न सहते, तत्र शब्दान्वयव्यतिरेकानुविधायित्वात् शब्दालङ्कारत्वमेव इति समाधानम्। यमकश्लेषादौ डलयोर्बवयो-र्लरयोरभिन्नत्वमङ्गीकृतमिति; तथा च—"यमकादौ भवेदैक्यं डलयो रलयोर्बवोः। षयोर्णनयोश्चान्ते सविसर्गाविसर्गयोः॥ सविन्दुकाविन्दुकयोः स्यादभेदप्रकल्पनम्॥" इति।

चित्रत्वं—पद्माद्याकारजनकवर्णत्वम्; तस्य च खड्गाद्य-नेकचित्रभेदात् बहुभेदाः।

काव्यरोगस्वरूपायाः प्रहेलिकायाः रसपरिपन्थितया नालङ्कारत्वम्; प्रहेलिका तु उक्तिवैचित्र्यमात्रस्वरूपा, च्युताक्षरा, दत्ताक्षरा, च्युतदत्ताक्षरा, बिन्दुमती, गूढचतुर्थपादादिका चेति बहुविधा।

अर्थालङ्काराश्च उपमादयः। *

* अत्र अन्तेवासिनामभ्याससौकर्य्यार्थं तेषां नामानि पद्याकारेण निबध्यन्ते, यथा—

अर्थालङ्कारतामाप्ता ये तावदुपमादयः।
सर्वेषां नामतस्तेषामुल्लेखः क्रियते क्रमात्॥
तत्रादावुपमा तद्वदेकदेशविवर्त्तिनी।
उपमा चापरा नाम्ना कथिता रशनोपमा॥
मालोपमा पुनश्चैका कथितोऽनन्वयः परः।
उपमेयोपमा तद्वत् स्मरणं रूपकं तथा॥
अधिकारूढवैशिष्ट्यं रूपकं परिणामकः।
सन्देहः भ्रान्तिमांश्चैव तथोल्लेखो ह्यपह्नुतिः॥
निश्चयश्च तथोत्प्रेक्षा वैचित्र्यात् विविधा स्मृता।
तथैवातिशयोक्तिश्च तुल्ययोगित्वदीपके॥
प्रतिवस्तूपमा चैका दृष्टान्तः सनिदर्शनः।
व्यतिरेकः सहोक्तिश्च विनोक्तिरपरा मता॥
समासोक्तिः परिकरस्तथा श्लेषोऽपि च स्मृतः।
अप्रस्तुतप्रशंसा च तथा व्याजस्तुतिः पुनः॥
पर्य्यायोक्तं तथैवार्थान्तरन्यासो मतस्तथा।
काव्यलिङ्गं तथैवानुमानं हेतुः स्मृतोऽपरः॥
अनुकूलं तथाऽऽक्षेपो विध्याभासो विभावना।
विशेषोक्तिर्विरोधश्च तथाऽसङ्गतिरेव च॥
विषमश्च समश्चैव विचित्रमधिकं तथा।
अन्योऽन्यञ्च विशेषश्च व्याघातश्चापरो मतः॥
अन्यः कारणमालाऽऽख्यो मालादीपकमेव च।
एकावली तथा सारो यथासङ्ख्यमथापरम्॥

निरूपणीयेषु अर्थालङ्कारेषु मध्ये सादृश्यप्रतिभोत्थापितेषु स्मरणादिषु लक्षितव्येषु, तेषामुपजीव्यत्वेन उपमायाः प्राधान्यात् प्रथममुपमालङ्कार एव निरूपणीय इति स एव लक्षितः ।

उपमा—वैधर्म्याविषयैकवाक्यविषयकत्वे सति इवादिवाच्यमुभयसम्बन्धिसाधर्म्यम् । अत्रेदमनुसन्धेयम्—उपमायाम्—उपमानम्, उपमेयम्, औपम्यवाचिपदं, साधारणो धर्मश्च इति चत्वारः पदार्थाः सन्ति । साधारणधर्मवत्त्वेन प्रसिद्धः पदार्थः उपमानम् । उपमानधर्मवत्तया कविसंरम्भगोचरः पदार्थः उपमेयम् । "सादृश्यप्रतियोगि उपमानं, सादृश्यानुयोगि उपमेयम्" इति केचित् । येन उपमानोपमेयगतमौपम्यं ज्ञायते तत् औपम्यवाचिपदम् । उपमानोपमेययोः सङ्गतो धर्मः साधारणो धर्मः इति तेषां लक्षणानि । यस्य धर्मस्य सम्बन्धात्, यत्पदस्य सामर्थ्यात्, येन सह यदुपमीयते, स साधारणो धर्मः, तत् औपम्यवाचि पदं, तदुपमानं, तच्चोपमेयम् इति तत्त्वम् । इयमेव चोपमा तत्तदुक्तिवैचित्र्येण नानाऽलङ्कारभावमवगाहते इत्यवधेयम् ।

प्रथमं तावत् उपमायाः,—पूर्णा लुप्ता चेति द्वौ भेदौ । उपमानोपमेयसाधारणधर्मेवादीनां वाच्यत्वे पूर्णा । साऽपि

पर्य्यायः परिवृत्तिश्च परिसङ्ख्या तथोत्तरम् ।
अर्थापत्तिः पुनश्चैका विकल्पोऽप्यपरो मतः ॥
समुच्चयः समाधिश्च प्रत्यनीकमथापरम् ।
प्रतीपं मीलितञ्चैव सामान्यं तद्गुणस्तथा ॥
अतद्गुणस्तथा सूक्ष्मं व्याजोक्तिश्चापरा मता ।
स्वभावोक्तिः पुनश्चैका भाविकोदात्तके तथा ॥
रसवत्-प्रेय-ऊर्जस्वि-समाहितमथापरम् ।
भावोदयो भावसन्धिः भावमिश्रस्तथाऽपरः ॥
संसृष्टिः सङ्करस्तद्वदालङ्कारिकसम्मतः ॥

श्रौत्यार्थभेदेन पुनः द्विविधा। तत्रापि श्रौती यथेववादीनाम् औपम्यवाचिनां शब्दानाम् इवार्थकवतेश्चोपादाने भवति; अत्र श्रवणमात्रेणैव उपमानोपमेयवृत्तिसाधर्म्यप्रतीतेः अस्याः श्रौतीति संज्ञा। तथा आर्थी तुल्यसमानसदृशादिपदानां तुल्यार्थवतेश्चोपादाने भवति; पदार्थानुसन्धानापेक्षया सादृश्यप्रतीतेः अस्याः आर्थीति संज्ञेति तत्त्वम्। एवं द्विविधाऽप्यनौ पुनः तद्धित-समासवाक्यगतत्वेन प्रत्येकं त्रिधा भूत्वा समुदायेन षट्प्रकारा पूर्णोपमेति वेदितव्यम्।

लुप्ता अपि प्रथमतः उपमान-उपमेय-साधारणधर्म-इवादि-लोपाच्चतुर्धा। तत्रापि धर्मलोपे—तद्धिते श्रौत्या असम्भवात् पूर्णावत् पञ्च, तथा कर्माधिकरणविहिते द्विविधे क्यचि द्वौ, कर्तृविहिते क्यङि एकः, कर्मकर्तृणमुलि च द्वौ इति मिलित्वा समुदायेन दश भेदाः धर्मलुप्तायाः बोध्याः। एवम् उपमानलोपे—वाक्यसमासगतत्वेन द्वौ भेदौ; औपम्यवाचि-लोपे—क्विप्-समासगतत्वेन द्वौ भेदौ; धर्मोपमानयोर्लोपे—वाक्यसमासगतत्वेन च द्वौ भेदौ; धर्मोपम्यवाचिनोर्लोपे—क्विप्-समासगतत्वेन द्वौ भेदौ; उपमेयलोपे—क्यङ्गतः एको भेदः; धर्मोपमेययोर्लोपे—क्यचि एको भेदः; धर्मोपमानसादृश्यप्रति-पादकानां लोपे—समासगतत्वेन एको भेदः इति मिलित्वा एक-विंशतिः लुप्तोपमाभेदाः, पूर्णा च षड्विधेति समुदायेन सप्तविंशति-भेदाः उपमायाः। एषु च उपमाभेदेषु मध्ये अलुप्तसाधारण-धर्मेषु द्वे पञ्च भेदाः उक्ताः, ते साधारणधर्मस्य एकरूपत्वेन बिम्बानुबिम्बभिन्नत्व शब्दमात्रभिन्नत्वाभ्याञ्च प्रत्येकं त्रैविध्यात् पञ्चदशधा इति मिलित्वा समुदायेन सप्तत्रिंशदुपमाभेदाः।

एकदेशविवर्त्तिन्युपमा—अंशतः वाच्यगम्यात्मकोभयसाम्य-प्रतीतौ उपमा।

रशनोपमा—यथोत्तरमुपमेयस्य उपमानत्वख्यापनरूपा उपमा।

मालोपमा—एकोपमेयपदविशिष्टा सती अनेकोपमानवती उपमा। एवञ्च आक्षेपोपमा-प्रतिनिर्देश्योपमाप्रभृतीन् प्राचीनसम्मतानुपमाभेदान् वैचित्र्यातिशयानाधायकत्वेन न पृथक् लक्षयामास।

अनन्वयः,—एकवाक्यगते एकस्मिन्नेव धर्मिणि उपमानोपमेयत्वरूपोभयधर्मवत्त्वाभिधानम्। अत्र एकस्यैव चोभयरूपतया उपमेयस्य अनन्यसदृशत्वप्रतीतिरूपः वैचित्र्यविशेषः समुपपद्यते।

उपमेयोपमा—पूर्ववाक्यप्रतिपादितसाधारणधर्ममेव साधारणधर्मीकृत्य पूर्ववाक्यप्रतिपादितेनोपमेयेन पूर्ववाक्यप्रतिपादितस्योपमानस्य उपमा।

स्मरणं—सदृशवस्तुज्ञानसमुद्बोधितसंस्कारसमुत्था पदार्थस्मृतिः। वैचित्र्यस्यैव अलङ्काररूपतया सामान्यतः चिन्तादिजन्यस्मृतेर्नालङ्काररूपतेति बोध्यम्। राघवानन्दमहाप्रबन्धास्तु विसदृशपदार्थानुभवात् पदार्थान्तरस्मरणेऽपि स्मरणालङ्कारमिच्छन्तः तदलङ्कारविषयतया "शिरीषमृदौ—" इत्यादिश्लोकम् उदाहरन्ति।

रूपकं—प्रकृतगोपनशून्य-विषयरूपे उपमेये उपमानस्य तादात्म्याध्यवसायः। तच्च परम्परित-साङ्ग-निरङ्गभेदात् प्रथमतस्त्रिधा। तेष्वपि यत्र कुत्रचित् कस्यचित् तादात्म्याध्यवसायः अन्यत्र कुत्रचित् कस्यचित् आरोपे निमित्तं भवति, तत् परम्परितरूपम्; तदपि श्लिष्टशब्दनिबन्धनं केवलं, श्लिष्टशब्दनिबन्धनं मालारूपम्, अश्लिष्टशब्दनिबन्धनं केवलम्, अश्लिष्टशब्दनिबन्धनं मालारूपञ्चेति चतुर्विधम्।

यत्र च अङ्गोपेतस्य अङ्गिभूतोपमेयस्य उपमान-तादात्म्याध्यवसायः, तदेव समस्तवस्तुविषयैकदेशविवर्त्तिभेदेन द्विविधं साङ्गमित्युच्यते। तत्रापि सर्वेषामेव आरोपणीयवस्तूनां शब्दजन्यप्रतिपत्तिविषयत्वे समस्तवस्तुविषयमित्युच्यते। यत्र तु कस्यचिदपि आरोपणीयस्य वस्तुनः अर्थवशलभ्यत्वं भवेत्, तदेव एकदेशविवर्त्तीत्युच्यते। तौ च साङ्गरूपकभेदौ आरोप्यवस्तुनः श्लिष्टाश्लिष्टपदनिबन्धनत्वेन पुनर्द्विधा भिन्नौ साङ्गरूपकस्यापि चतुर्विधत्वं प्रतिपादयतः।

यत्र अङ्गविरहितस्य वस्तुनः तादात्म्यानाध्यवसानं, तदेव माला-केवलरूपेण द्विधा भिन्नं निरङ्गं रूपकमुच्यते। एवञ्च चतुर्विधं परम्परितं, चतुर्विधं साङ्गं, द्विविधं निरङ्गञ्चेति मिलित्वा दश; तथा क्वचिच्च उपमाने अधिकस्य कस्यचित् वैशिष्ट्यस्य आरोहणात् अधिकारूढवैशिष्ट्यरूपमप्येकं रूपक-मिति एकादशविधं रूपकं बोध्यम्।

क्वचिच्च "मुखं तव कुरङ्गाक्षि—" इत्यादौ समासाभावेऽपि रूपकं दृश्यते; तथा क्वचित् "सौजन्याम्भसि खलो—" इत्यादौ वैयधिकरण्येऽपि तत् सम्भवतीति बोध्यम्।

परिणामः,—प्रस्तुतप्रयोजनसाधनत्वेन प्रसिद्धिमति पदार्थे उपमाने उपमेयप्रतियोगिकाभेदः। रूपके सदृशवस्तुन-स्तादात्म्यं विषये भासते, इह तु सजातीयफलसाधनतया विषयस्य तादात्म्यमारोप्यमाणे भासते इति विशेषः। आरोप्य-माणस्य आरोपविषयात्मतया परिणतबुद्धिविषयीकरणमेव अस्य परिणामसंज्ञाबीजम्। अयमपि रूपकवत् अधिकारूढ-वैशिष्ट्यरूपः सम्भवति, "अतैलपूराः सुरतप्रदीपाः" इत्यादौ अधिकस्य वैशिष्ट्यस्य आरोहणदर्शनात्।

सन्देहः,—उपमेये उपमानस्य कविप्रौढ़ोक्तिसिद्धः (न तु

वस्तुस्वभावसिद्धः) संशयः। स च शुद्ध-निश्चयगर्भ-निश्चयान्तभेदात् त्रिविधः। तत्रापि यत्र संशये एव पर्य्यवसानं, स शुद्धः। यत्र आदावन्ते च संशय एव, मध्ये निश्चयः, स निश्चयमध्यः। यत्र तु आदौ संशयोऽन्ते च निश्चयः, स निश्चयान्तः। "स्थाणुर्वा पुरुषो वा" इत्यादौ वस्तुस्वभावसिद्धसंशये तु नायमलङ्कारः, प्रतिभोत्थितसंशयस्यैव एतदलङ्कारविषयत्वात्।

भ्रान्तिमान्—सादृश्यमूला अतत्यदार्थे कविप्रौढोक्तिसिद्धा तत्पदार्थबुद्धिः। "शुक्तिकायां रजतम्" इति असारसोत्थापिता, "सङ्गमविरहविकल्पे—" इति असादृश्यमूला च भ्रान्तिर्नाय-मलङ्कारः।

उल्लेखः,—एकस्यैव वस्तुनः विविधप्रकारेण अवधारणं, स च ग्रहीतृविषयभेदेन द्विविधः। न चास्य मालारूपकादि-भिरेव चरितार्थतेति वाच्यम्; "प्रिय इति गोपवधूभिः—" इत्यादौ भगवति प्रियत्वादेर्वास्तवत्वं, रूपकादौ तु आरोप्यस्य अवास्तवत्वमिति परस्परपार्थक्यदर्शनात्। केचित्तु "ग्रहीत्रादि-भेदेन नानात्वप्रत्ययरूपविच्छित्तिविशेषाधायकत्वेन पृथगप्यय-मलङ्कारः नियमेनालङ्कारान्तरविच्छित्तिमूलः" इत्याहुः।

अपह्नुतिः,—उपमेयं स्वभिन्नत्वेनारोप्य उपमानस्य स्थाप-नम्। सा चेयं—क्वचिदारोपस्य अपह्नवपूर्वकत्वेन, क्वचित् अपह्नवस्य आरोपपूर्वकत्वेन च द्विधा।

प्रकारान्तरेणापि सम्भाव्यमाना इयमपह्नुतिः,—शब्देन सादृश्यादिना वा द्योतितस्य कस्यापि गोपनीयस्यार्थस्य श्लेषेण कालम्बभावादिना वा भिन्नत्वेन ख्यापनरूपा बोध्या। तथा च—समुदयेन मिलित्वेयमपह्नुतिः त्रिविधा भवति।

निश्चयः,—अप्रस्तुतमुपमानं भिन्नत्वेनाख्याय प्रस्तुतस्य उप-मेयस्य तत्त्वेनावधारणम्। न चायं निश्चयान्तसन्देहविषयः, तत्र

संशयनिश्चययोरेकाश्रयत्वेनावस्थानात्, इह तु तयोर्व्यधिकरणत्वेनावश्यकत्वात्। नापि रूपकध्वनिः, "वदनमिदं न सरोजम्" इत्यादौ मुखस्य कमलत्वेनानिर्द्धारणात्। प्रस्तुतस्य अनिषेधाच्चापह्नुतिरपि नेति पृथगेवायमलङ्कारः सहृदयसंवेद्यः। रज्जौ सर्पधिया बिभ्यति पुरुषे "रज्जुरियं न सर्पः" इति विशेषोक्तिर्नायमलङ्कारः, वैचित्र्याभावात्।

उत्प्रेक्षा — तादात्म्यसंसर्गकोपमानप्रकारकोपमेयविशेष्यकोत्कटैककोटिकः संशयः। सा च प्रथमतो वाच्यप्रतीयमानभेदेन द्विप्रकारा। तत्रापि उत्प्रेक्षावाचकेवादिशब्दप्रयोगे वाच्येत्यभिधीयते। प्रतीयमाना तु तादृशवाचकशब्दाप्रयोगे मतिर्बोध्या।

उक्ता च द्विविधा उत्प्रेक्षा प्रत्येकं जाति-गुण-क्रिया-द्रव्याणामुत्प्रेक्ष्यत्वेन अष्टप्रकारा अपि पुनः जात्यादिरूपभावमभावनाजात्यादिप्रतियोगिकाभावमभावनाभेदेन प्रत्येकं द्विधा भूत्वा षोडशप्रकाराः, पुनः उत्प्रेक्षाकारणस्य क्वचित् गुणस्वरूपतया, क्वचिच्च क्रियास्वरूपतया प्रत्येकं द्विधा भूत्वा द्वात्रिंशद्भेदा भवति। तत्रापि उक्तेषु षोडशवाच्योत्प्रेक्षाभेदेषु स्वरूपतश्चतुर्भेदं द्रव्यं विहाय अपरे जात्यादीनां त्रयाणां ये द्वादश भेदाः, तेषां स्वरूप-फल-हेतुगतत्वेन प्रत्येकं त्रिविधत्वेन षट्त्रिंशद्भेदाः। द्रव्यस्य स्वरूपतः उक्तैः चतुर्भिर्भेदैर्मिलित्वा समुत्पन्नेषु चत्वारिंशद्भेदेषु मध्ये स्वरूपगायाः ये षोडश भेदाः, ते उत्प्रेक्षाकारणस्य उपादानानुपादानाभ्यां द्वात्रिंशत्प्रकाराः, चतुर्विंशतिप्रकारफलहेतूत्प्रेक्षाभिः मिलित्वा वाच्योत्प्रेक्षायाः षट्पञ्चाशद्भेदा भवन्ति। प्रतीयमानायाः षोडश भेदा अपि प्रत्येकं फलहेतुगततया द्विधा भूत्वा द्वात्रिंशद्भेदाः, तेन च वाच्यप्रतीयमानयोः समुदयेन अष्टाशीतिप्रकाराः भवन्ति।

एवञ्च ताः अष्टाशीतिप्रकाराः उत्प्रेक्षाः विषयस्य उक्त्यनुक्तिभ्यां प्रत्येकं द्विधा भूत्वा समुदायेन षट्सप्तत्यधिकशत-सङ्ख्याकाः भवन्तीति सुधीभिर्विभाव्यम्।

सा चेयमुत्प्रेक्षा अन्येन केनचिदलङ्कारेणोत्थापिता चेत् अधिकं वैचित्र्यमावहति। इवादिवत् मन्ये, शङ्के, ध्रुवं, प्रायः, नूनम् इत्येवमादयः शब्दा अपि उत्प्रेक्षावाचका ज्ञेयाः।

अतिशयोक्तिः,—सिद्धवन्निर्दिष्टोऽध्यवसायः; अध्यवसायश्च प्रकृतस्याधःकरणेन आरोप्यमाणस्य अभेदप्रतिपत्तिरूपः। सा चेयमतिशयोक्तिः भेदे अभेदः, अभेदे भेदः, सम्बन्धे असम्बन्धः, असम्बन्धे सम्बन्धः, कार्यकारणपौर्वापर्यविपर्ययश्चेत्येवंरूपेण पञ्चधा भवति। कार्यकारणयोः पौर्वापर्यविपर्ययश्च कारणात् प्रथमं कार्यस्य भावे, द्वयोः समकालत्वेन च द्विधा भवति।

तुल्ययोगिता—प्रकृतानाम् अप्रकृतानां वा पदार्थानां गुणक्रियाद्येकधर्माभिसम्बन्धः।

दीपकं—साम्यवाचकपद-वैधर्म्योक्त्योरभावे सति प्रकृता-प्रकृतयोरुभयोर्गुणक्रियादिरूपैकधर्माभिसम्बन्धः; यद्वा—एक-स्यैव कारकस्य अनेकक्रियाऽभिसम्बन्धो दीपकम् इति लक्षण-भेदात् द्विधा।

प्रतिवस्तूपमा——प्रतीयमानोपमानोपमेयभावयोर्वाक्यार्थ-योरेकस्यापि सामान्यधर्मस्य पौनरुक्त्यनिरासाय विभिन्ना-कारेण निर्देशः। इयञ्च क्वचित् "चक्रीव्यं एव चतुराः—" इत्यादौ वैधर्म्येणापि सम्भवतीति बोध्यम्।

दृष्टान्तः,—वाक्यद्वयनिष्ठयोरुपमानोपमेययोः सामान्य-धर्मस्य प्रणिधानगम्यसाम्यत्वम्। अयमपि क्वचित् वैधर्म्येण भवन् साधर्म्यवैधर्म्याभ्यां द्विधा भवति।

निदर्शना—व्यङ्ग्यतया वृत्त्या उपमानोपमेयभावबोधकः असाधितो बाधितो वा पदार्थसम्बन्धः। असम्भवद्वस्तुसम्बन्धनिदर्शना तु एकवाक्यानेकवाक्यगतत्वेन द्विविधा। इयञ्च क्वचित् "योऽनुभूतः कुरङ्गाक्ष्याः—" इत्यादावुपमेयवृत्तस्य उपमानेऽसम्भवेऽपि भवति, कुत्रचिच्च "क्षिपसि शुकं वृषदंशकवदने—" इत्यादौ मालारूपाऽपि दृश्यते।

व्यतिरेकः,—उपमानादुपमेयस्य आधिक्यस्य न्यूनतायाः वा अभिधानम्। स च उपमेयस्य उपमानादाधिक्ये चतुर्विंशतिप्रकारः, तथा उपमेयस्य उपमानान्न्यूनतायां चतुर्विंशतिप्रकारः इति मिलित्वा अष्टचत्वारिंशत्प्रकारः व्यतिरेकः। तथा हि—उपमेयस्य उपमानादाधिक्ये—उपमेयगतः उत्कर्षः उपमानगतोऽपकर्षश्च हेतुः, तादृशयोर्द्वयोरप्युक्तौ एकः, तथा प्रत्येकं समुदयेन वा अनुक्तौ त्रिविधः इति मिलित्वा चतुर्विधोऽपि उपमानोपमेययोः साम्यस्य शाब्दत्वेन आर्थत्वेन आक्षेपलभ्यत्वेन च प्रत्येकं त्रिधा भवन् द्वादशप्रकारोऽपि पुनः श्लेषाश्लेषमूलकतया प्रत्येकं द्विधा भवन् चतुर्विंशतिप्रकारः। एवमुपमानादुपमेयस्य न्यूनतारूपः द्वितीयोऽपि—उपमेयगतापकर्षरूपस्य उपमानगतोत्कर्षरूपस्य च हेतोरुक्ताविकः, तथा प्रत्येकं समुदयेन चानुक्तौ त्रिविधः इति मिलित्वा चतुर्विधोऽपि उपमानोपमेययोः साम्यस्य शाब्दत्वेन आर्थत्वेन आक्षेपलभ्यत्वेन च प्रत्येकं त्रिधा भवन् द्वादशविधोऽपि पुनः श्लेषाश्लेषमूलकतया प्रत्येकं द्विधा भवन् चतुर्विंशतिप्रकारः इति समुदयेन मिलित्वा अष्टचत्वारिंशत्प्रकारः अयं व्यतिरेक इति। केचित्तु "उपमानादुपमेयस्याधिक्ये विपर्य्यये वा व्यतिरेकः" इत्याहुः, तन्न विचारसहमिति सुधीभिर्विभाव्यम्।

सहोक्तिः,—एकस्यापि वस्तुनः अभेदाध्यवसायमूल-कार्य्य-

कारणपौर्वापर्य्यविपर्य्ययान्यतरातिशयोक्तिमूलकतया सहार्थबलादुभयोरर्थयोरन्वयः। श्लेषाश्लेषघटिततया चेयं द्विधा भवती पुनः प्रत्येकं माला-केवलरूपतया द्विधेति समुदयेन चतुर्विधेयं सहोक्तिरिति। "लक्ष्मणेन समं रामः" इत्यादौ तु अतिशयोक्तिमूलकत्वाभावेन वैचित्र्याभावात् नायमलङ्कार इति ध्येयम्।

विनोक्तिः,——एकपदार्थाशोभनत्वाभावादिप्रयोजकापरपदार्थव्यतिरेककथनम्। क्वचिच्च विनाशब्दप्रयोगाभावेऽपि आक्षेपतः तदर्थावगमे विनोक्तिर्भवति। एवं सहोक्तिरपि सहार्थशब्दप्रयोगाभावे तदर्थाक्षेपे सम्भवतीति बोध्यम्।

समासोक्तिः,——प्रस्तुताप्रस्तुत-वस्तुसाधारण-कार्य्यलिङ्गविशेषणकृतः प्रकृते अप्रकृतस्य वस्तुनः अवस्थाविशेषसमारोपः। विशेषणसाधारण्यन्तु विशेषणस्य श्लिष्टत्वेन साधारण्येन च द्विधा भवति इति तत्कृता समासोक्तिरपि द्विधा, पुनः कार्य्यलिङ्गयोस्तुल्यत्वे च द्विविधेति चतुर्विधा समासोक्तिः। सर्वत्रैव इह व्यवहारसमारोपो हेतुः। स च क्वचिल्लौकिके लौकिकस्य, शास्त्रीये शास्त्रीयस्य, लौकिके शास्त्रीयस्य, शास्त्रीये वा लौकिकस्य वस्तुनः व्यवहारसमारोप इति चतुर्धा; लौकिकमपि वस्तु रसादिभेदादनेकविधं, शास्त्रीयमपि तर्कायुर्वेदादिप्रसिद्धतयाऽनेकविधमिति बहुप्रकारेयं समासोक्तिरित्याकरे द्रष्टव्यम्।

परिकरः,—प्रकृतार्थपरिपोषणाभिप्रायवद्विशेषणैः विशेष्योत्कर्षोक्तिः। न चापुष्टार्थस्य दोषत्वाभिधानात् तन्निराकरणेनैव पुष्टार्थस्य स्वीकारो जातः इति वाच्यं, वैचित्र्यस्यैव अलङ्काररूपतया एकानिष्ठत्वेन बहूनां साभिप्रायविशेषणानामुपन्यासे वैचित्र्योत्पत्तेरस्यालङ्कारमध्ये एव गणनायाः सर्ववादिसम्मतत्वादिति विवेच्यम्।

अर्थश्लेषः,—विशेष्यभेदेन वाच्यैकार्थमात्रप्रतिपादकत्वे सति अश्लिष्टलक्षणाभ्यामनेकार्थप्रतिपादनम्। शब्दैरेकस्मिन विशेष्ये अभिधया अपरस्मिंश्च (विशेष्ये) लक्षणया अर्थद्वयप्रतिपादने अर्थश्लेष इति तात्पर्य्यम्।

अप्रस्तुतप्रशंसा——प्राकरणिकपदार्थाक्षेपकमप्राकरणिकपदार्थाभिधानम्। सा च—क्वचित् सामान्यादप्रस्तुतात् विशेषः प्रस्तुतः, क्वचित् विशेषात् अप्रस्तुतात् सामान्यं प्रस्तुतं, क्वचित् अप्रस्तुतात् कार्य्यात् प्रस्तुतं निमित्तं, क्वचित् अप्रस्तुतात् निमित्तात् प्रस्तुतं कार्य्यं, क्वचित् समात् अप्रस्तुतात् समं प्रस्तुतमित्युक्तप्रकारेण प्रथमतः पञ्चप्रकारा। समादप्रस्तुतात् समस्य प्रस्तुतस्य गम्यत्वरूपा पुनः श्लेषमूलतया सादृश्यमात्रमूलतया च द्विधा। तत्र श्लेषमूलाऽपि समासोक्तिवत् केवलविशेषणश्लेषे, श्लेषवत् विशेष्यविशेषणोभयश्लेषे च भवतीति द्विधा इति स्थूलतया सप्त अप्रस्तुतप्रशंसाभेदाः। ते च पुनः प्रत्येकं साधर्म्यवैधर्म्योक्तभेदद्वयेन द्विधेति चतुर्दश भेदाः। तेऽपि पुनः प्रत्येकं वाच्यस्य सम्भवासम्भव-तदुभयरूपतया त्रिधा इति समुदयेन द्विचत्वारिंशत्प्रकारेयमप्रस्तुतप्रशंसा।

व्याजस्तुतिः,—प्रकृता आपाततः प्रतीयमानाभ्यां निन्दास्तुतिभ्यां यथाक्रमं स्तुतिनिन्दाप्रतिपत्तिः। ननु निन्दाव्याजेन स्तुतिर्भवत्येव व्याजस्तुतिः, स्तुतिव्याजेन निन्दा तु व्याजनिन्दैव भवति, कथं व्याजस्तुतिरिति चेन्न, निन्दया स्तुतेर्गम्यत्वे व्याजेन स्तुतिर्व्याजस्तुतिरिति, तथा स्तुत्या निन्दाया गम्यत्वे व्याजरूपा स्तुतिर्व्याजस्तुतिरिति द्विविधसंज्ञाव्युत्पत्तिसम्भवात्। सा च निन्दया स्तुतेर्गम्यत्वेन, स्तुत्या निन्दाया गम्यत्वेन च द्विधा भवतीति बोध्यम्।

पर्य्यायोक्तम्—उक्तिवैचित्र्यविशेषेण व्यञ्जनावृत्तिप्रतिपाद्यार्थस्याभिधेयवत् स्फुटतया प्रतिपादनम्।

अर्थान्तरन्यासः,—व्यापकधर्मावच्छिन्नादेः व्याप्यधर्मावच्छिन्नादिगोचरेण साधर्म्यवैधर्म्यान्यतरप्रकारकज्ञानेन संशयायोग्यत्वादिरूप-अनुपपत्तिनिराकरणपुरःसरं दृढ़प्रतिपत्तिविषयीकरणम्। अस्य च—सामान्यं विशेषस्य, विशेषो वा सामान्यस्य समर्थक इति, तथा कार्य्यं कारणस्य, कारणं वा कार्य्यस्य समर्थकमिति चत्वारो भेदाः, ते च पुनः प्रत्येकं साधर्म्यवैधर्म्याभ्यां द्विधेति समुदयेन अष्टौ भेदाः।

काव्यलिङ्गं—वाक्य-पदान्यतरप्रतिपाद्यार्थस्य व्यञ्जनावृत्तिलभ्यहेतुत्वम्। तच्च हेतोर्वाक्यार्थत्व-पदार्थत्वभेदेन द्विधा भवति। केचित्तु वाक्यार्थगतेन काव्यलिङ्गेनैव गतार्थतया कार्य्यकारणभावे अर्थान्तरन्यासं नाद्रियन्ते, तदयुक्तम्; तथा हि—इह हेतुस्त्रिधा भवति—ज्ञापकः, निष्पादकः, समर्थकश्चेति। तत्र ज्ञापकोऽनुमानस्य विषयः, निष्पादकः काव्यलिङ्गस्य, समर्थकोऽर्थान्तरन्यासस्य इति तत्र उभयत्र हेतुगतवैषम्यात् पृथगेव कार्य्यकारणभावे अर्थान्तरन्यासः काव्यलिङ्गादिति ध्येयम्। हि-शब्दाद्युपादानेन हेतोः स्फुटत्वे नायमलङ्कारः, वैचित्र्यस्यैवालङ्कारत्वात्।

अनुमानम्—अलङ्कारादिकृतवैचित्र्यवशेन साधनगोचरव्याप्यत्वज्ञानात् साध्यस्य ज्ञानम्। धूमगत-वह्निव्याप्यत्वज्ञानात् वह्नेर्ज्ञानन्तु नास्यालङ्कारस्य विषयः, तत्र अलङ्कारस्य साधकवैचित्र्याभावात्। एतच्च स्वार्थपरार्थभेदेन द्विधा भवतीति बोध्यम्।

हेतुः,—कार्य्येण कारणस्य अभेदेनाभिधानं, कार्य्ये कार्य्यस्य तादात्म्यारोपो वा।

अनुकूलं—प्रतिकूलार्थबोधकतयाऽभिहितस्यापि फलतः अनुकूलताबोधकतया परिणामः। अस्य तु प्राचीनैरलङ्कारमध्ये अपरिगणितस्यापि विच्छित्तिविशेषस्यैवालङ्कारत्वापादकतयः वैचित्र्याधायकत्वात् पृथगलङ्कारत्वमेवेति बोध्यम्।

आक्षेपः,—विवक्षितस्य विषयस्य अशक्यवक्तव्यत्वादिरूपवैलक्षण्यसूचनाय निषेधवत् प्रकाशः, तथा अनभिमतस्य विषयस्य अत्यन्तपरिहार्यत्वादिरूपवैलक्षण्यसूचनाय विधिरूपेण प्रकाशनेति द्विधा। तत्र निषेधाभासरूपः,—वक्ष्यमाणविषयगतः उक्तविषयगतश्चेति द्विविधः। तयोरपि वक्ष्यमाणविषये निषेधः साकल्येनांशतश्च सम्भवतीति द्वौ भेदौ, तथा उक्तविषयेऽपि क्वचित् वस्तुस्वरूपस्य, क्वाचिच्च वस्तुकथनस्य निषेध इति द्वौ भेदौ इति समुदयेन मिलित्वा पञ्चविधोऽयमाक्षेपालङ्कारः।

विभावना—सामान्यतः किञ्चित्कारणसापेक्षत्वेऽपि प्रसिद्धकारणव्यतिरेकेण कार्योत्पत्तिः। सामान्यतोऽपेक्षितकारणस्य उक्तत्वे अनुक्तत्वे चासौ द्विधा भवति।

विशेषोक्तिः,—कारणसमवायसत्त्वेऽपि कार्यस्यानुत्पत्तिः। साऽपि विभावनावत् निमित्तस्य उक्तत्वानुक्तत्वाभ्यां द्विधा भवति। केचित्तु अस्या अचिन्त्यनिमित्तकृतमपरमपि एकं भेदं कल्पयन्ति; दर्पणकृत्प्रभृतयस्तु अनुक्तनिमित्ते एव अचिन्त्यनिमित्तस्यान्तर्भावं प्रकल्प्य तस्य पृथगभिधानं न कृतमिति सुधीभिर्विभाव्यम्।

विरोधः,—वस्तुगत्या विरोधाभावेऽपि आपाततः विरुद्धतया प्रतीतिः। स च—जातेर्जाति-गुण-क्रिया-द्रव्यैः विरोधे चतुर्धा, गुणस्य गुण-क्रिया-द्रव्यैर्विरोधे त्रिधा, तथा क्रिया-द्रव्याभ्यां क्रियाया विरोधे द्विधा, द्रव्यस्य च द्रव्येण विरोधे एकधेति मिलित्वा दशविधः।

असङ्गतिः,—विच्छित्तिविशेषजनकत्वे सति कार्य्यकारणयोर्वैयधिकरण्यम्। न च कार्य्यकारणयोः सहानवस्थानलक्षणेन विरोधेनैवास्य गतार्थतेति किमधिककल्पनयेति वाच्यं, ततो विलक्षणवैचित्र्याधायकत्वेनास्या विशेषत्वात्।

विषमं—जन्यजनकयोरुभयोर्गुणविरोधः, तथा तयोः क्रियाविरोधः, प्रक्रान्तस्य कर्मणः अभिमतफलानवाप्तिपूर्वकः अनिष्टस्य समुत्पादः, एकत्र वस्तुन्यत्यन्तससम्भवतोः सम्मेलनञ्च। तच्च गुणयोः क्रिययोश्च कार्य्यकारणविरुद्धत्वे चतुर्विधं, पुनश्च इष्टार्थानाप्तिपुरःसरानिष्टार्थसम्प्राप्ति-विरुद्धसम्मेलनरूपतया द्विधेति षट्प्रकारम्।

समम्—"इदमनयोः श्लाघ्यम्" इति योग्यतावद्विषयस्य योग्यताप्रशंसनम्।

विचित्रम्—अभिमतविषयविपरीतानुष्ठानादपि अभिमतफलसाधनम्।

अधिकम्—आधाराधेययोरेकतरस्य महत्त्वातिशयप्रतिपादनम्। तच्च आश्रयाधिक्य-आश्रिताधिक्यभेदेन द्विधा।

अन्योऽन्यं—पदार्थयोरेकजातीयक्रियायां परस्परं कारणतयोपन्यासः। अत्र कारणयोः क्रिययोश्च शब्दैक्यं वैचित्र्यपरिपोषकमेव, न तु नियामकं, शब्दभेदेऽपि अस्यानुभवसिद्धत्वात्।

विशेषः,—प्रसिद्धाधिकरणपरिहारेण आधेयस्य विशेषेणावस्थानम्; एकस्य परिमितस्यापि वस्तुनः एकेनैव युगपदनेकत्रावस्थानं, तथा कार्य्यान्तरारम्भकेण प्रयत्नेन दैवात्प्रक्रान्तस्य सुकरस्य दुष्करस्य वा कर्मणोऽनुष्ठानमिति त्रिविधः।

व्याघातः,—कस्मिंश्चिदुपायविशेषमवलम्ब्य केनचिन्निष्पादितस्य वस्तुनः केनचिदपरेण प्रतियोगिना तेनैवोपायविशेषेण

अन्यथाकरणम्। स्वसाधितवस्तुन्याहतिहेतुत्वाच्च अस्य व्याघातसंज्ञा। यद्वा, व्याघातः,—एकेन केनचिदुपायेन कथितं यत् कर्म, तदन्येन केनचित् तद्विरुद्धस्य कार्यस्य तेनैवोपायेन ततः सुकरतया अभिधानम्। अत्र वैचित्र्यविशेषस्य भत्त्वात् पूर्वोक्तात् पृथग्रूपेणास्योपन्यासः।

कारणमाला—उत्तरोत्तरं प्रति पूर्वपूर्वस्य कार्यीभूतपदार्थस्य कारणत्वेनाभिधानम्। यद्यपि कार्याणामपि उक्तक्रमेण मालारूपता सम्भवति, तथाऽपि कारणगुणवर्णनस्यैव कविसम्मततया "विवक्षापूर्विका हि शब्दार्थप्रतिपत्तिः" इति न्यायेन केवलं कारणमालाया एवाभिधानं बोध्यम्।

मालादीपकं—पूर्वपूर्वोक्तानां बह्वनां धर्मिणाम् उत्तरोत्तरं प्रति हेतुत्वे सति सर्वेषामेकक्रियाऽभिसम्बन्धः। लोके यथा मालायां यथापूर्वं विन्यस्तकुसुमानाम् उत्तरोत्तरकुसुमाश्रयतया उपकारकत्वं, तथा इहापि पूर्वपूर्वस्य उत्तरोत्तरोपकारकतया मालाकारता वेदितव्या।

एकावली—पूर्वं पूर्वं प्रति यथोत्तरस्य वस्तुनः वीप्सया विशेषणभावेन स्थापनं निषेधो वा। सा च स्थापनापोहनभेदेन द्विधा भवति। क्वचित् विशेष्यमपि यथोत्तरं विशेषणतया स्थापितमपोहितञ्च दृश्यते।

सारः,—विशेषस्य उत्तरोत्तरमुत्कर्षाभिधानम्। केचित्तु "श्लोकसमाप्तिं यावत् उत्तरोत्तरमुत्कर्षप्रतिपादने सत्येव अस्य अलङ्कारस्य विषयः, न तु अंशतः, तथात्वे वैचित्र्यविशेषाप्रतिपत्तेः" इत्याहुः, तन्न मनोरमं, "लोकस्रजि द्यौर्दिवि चादितेया अप्यादितेयेषु महान् महेन्द्रः" इत्यादौ श्लोकाद्वैसमापनं यावत् उत्कर्षवर्णनसत्त्वेऽपि एतदलङ्कारविषयत्वस्य सर्वैरालङ्कारिकैरविवादं स्वीकृतत्वात्।

यथासङ्ख्या—प्रथमतो विनिर्दिष्टानामर्थानां पश्चात् विनिर्दिष्टैरर्थैः क्रमेण सम्बन्धः। केचित्तु इममेव अलङ्कारं क्रमेति नाम्ना अभिदधति। लक्षणे अर्थानामिति बहुत्वमविवक्षितं, तेन "ददर्श कृष्णं रामश्च व्रजे गोदोहनं गतौ। पीतनीलाम्बरधरौ शरदम्बुरुहेक्षणौ॥" इत्यादिरपि अस्यालङ्कारस्य विषयः।

पर्य्यायः,—एकस्य वस्तुनः अनेकस्मिन् वस्तुनि, अनेकेषां वा वस्तूनाम् एकस्मिन् वस्तुनि क्रमशः स्वकर्त्तृकं परकर्त्तृकं वा भवनं करणं वा। स च—एकस्यानेकत्र भवनम्, अनेकस्य एकत्र भवनम्, एकस्य अनेकत्र करणम्, अनेकस्य एकत्र करणमिति चतुर्धा भिद्यते।

परिवृत्तिः,—सदृशेन, हीनेन, अधिकेन वा पदार्थेन किञ्चित् त्यक्त्वा कस्यचिदादानम्। सा च—समेन समस्य, न्यूनेन उत्तमस्य, उत्तमेन न्यूनस्य च विनिमयसम्भवात् त्रिधा भवति।

परिसङ्ख्या—पृष्टात् अपृष्टात् वा उपादेयत्वेन निर्णीय उक्तात् पदार्थात् तत्सदृशापरवस्तुनः प्रतिषेधः। सा च—कथनस्य प्रश्नपूर्वकत्वाप्रश्नपूर्वकत्वाभ्यां द्विधा, तथा व्यवच्छेद्यस्य शाब्दत्वार्थत्वाभ्याञ्च द्विधा भवतीति मिलित्वा चतुर्विधा भवति।

उत्तरम्—असति प्रश्ने प्रतिवचनार्थपर्य्यालोचनकृततत्कल्पनमेकं, तथा असकृत् प्रश्ने सति असकृदसम्भवनीयप्रतिवचनमित्यपरम्। एवं द्विविधमपि इदमुत्तरं प्रश्नप्रतिवचनयोरेकतरस्य द्वयोर्वा साभिप्रायकत्व-निरभिप्रायकत्वाभ्यां चतुर्विधं सत् समुदायेनाष्टविधम्।

अर्थापत्तिः,—प्रकरणप्रतिपादितादर्थात् प्रकरणाप्रति-

पादितस्य अर्थस्य दण्डापूपन्यायेन प्रतीतिः। सा च प्राकरणिकात् अप्राकरणिकस्य, अप्राकरणिकाच्च प्राकरणिकस्य प्रतीतेर्द्विविधा। दण्डापूपन्यायश्च—"मूषिकेण दण्डो भक्षितः" इत्युक्ते तत्सहचरितस्य ततोऽपि सुखभक्ष्यस्य अपूपस्य मूषिककर्त्तृकभक्षणमर्थादायातमिति नियतसमानन्यायादर्थान्तरापतनम्।

विकल्पः,—समानशक्तिकयोर्वस्तुनोरलङ्कारकृतवैचित्र्याऽऽपादकः एकपक्षाश्रयणपर्य्यवसानो विरोधः। "दीयतामर्जितं वित्तम्" इत्यादौ तु तादृशचातुर्य्याभावान्नायमलङ्कारः।

समुच्चयः,—प्रस्तुतस्य कार्य्यस्य एकस्मिन् साधके विद्यमानेऽपि खले कपोतिकान्यायात् तदेककार्य्यानुष्ठानार्थं युगपदन्यस्यानेकस्य साधनस्य उपस्थापनमित्येकः प्रकारः, तथा उक्तन्यायात् गुणयोः क्रिययोर्गुणक्रिययोर्वा युगपत्समुपस्थितिरित्यपरः। एवं द्विविधोऽप्ययं समुच्चयः सद्योगे, असद्योगे, सदसद्योगे च भवतीति त्रिधा भिद्यते। खले कपोतन्यायश्च—"वृद्धा युवानः शिशवः कपोताः खले यथाऽमी युगपत् पतन्ति। तथैव सर्वे युगपत्पदार्थाः परस्परेणान्वयिनो भवन्ति॥" एतत्कारिकोक्तलक्षणकः।

समाधिः,—प्रक्रान्तकारणेन दुष्करस्य चिकीर्षितस्य कार्य्यस्य सिद्ध्यर्थं दैववशसम्पन्नेन अभिमतादन्येन साधनेन तत्कार्य्यस्य सौकर्य्यम्।

प्रत्यनीकं—न्यक्कृतिपरमपि प्रतिपक्षं साक्षान्निरसितुमशक्तेन केनापि तस्यैव प्रतिपक्षस्य उत्कर्षप्रतिपादनफलकं तदाश्रितस्य तिरस्करणम्। अनीकेन सदृशं प्रत्यनीकमिति अन्वर्थमभिधानम्; तथा च—यथा अनीकेऽभियोज्ये तत्प्रतिनिधी-

भूतोऽपरः केनचिदभियुज्यते, तथा दृष्ट प्रतियोगिनि विजेये तदीयोऽन्यो विजीयते इत्यर्थः।

प्रतीपम्—उपमेयगतान्युत्कर्षप्रतिपादनार्थम् उपमानत्वेन कविलोकप्रसिद्धस्यापि वस्तुनः उपमेयताप्रकल्पनं, वैफल्याभिधानं वा। तच्च उपमानस्य उपमेयत्वप्रकल्पन-वैफल्याभिधानाभ्यां द्विधा भवति।

प्रकारान्तरेण प्रतीपम्—उत्कर्षवत्त्वेन अभिमतस्य वस्तुनः अत्युत्कर्षाभिधानपुरःसरं साधिक्षेपमुपमानत्वकल्पनम्।

मीलितं—स्वाभाविकेन आगन्तुकेन वा साधारणेन चिह्नेन कस्यचित् वस्तुनः केनचित् वस्तुना वस्तुस्थित्यैव बलीयस्त्वेन तिरोधानम्। तच्च सामान्यलक्षणस्य वस्तुनः साहजिकत्वाऽऽगन्तुकत्वाभ्यां द्विविधम्।

सामान्यम्—अतादृशस्यापि तादृशत्वप्रतिपादनार्थम् अपरित्यक्तस्वगुणस्यैव प्रस्तुतस्य कस्यचित् वस्तुनः स्ववृत्तिगुणसजातीयगुणवता केनचित् वस्तुना तादात्म्याभिधानम्।

तद्गुणः,—समीपगतविजातीयोत्कृष्टगुणवद्वस्तुकृत-स्वकीयगुणतिरोधाने सति परकीयोत्कृष्टगुणसमासादनम्।

अतद्गुणः, — उत्कृष्टगुण-पदार्थसन्निधिरूपकारणसत्त्वेऽपि अपकृष्टगुणेन वस्तुना उत्कृष्टगुणवस्तुनो गुणस्यानुपादानम्।

सूक्ष्मम्—आकारेण इङ्गितेन वा संलक्षितस्य स्थूलमतिभिरसंलक्ष्यस्य कस्यचिदर्थस्य विदग्धचेष्टया सूचनम्।

व्याजोक्तिः,—कार्यादिना व्यक्तीभूतस्यापि पदार्थस्वरूपस्य कारणान्तरोद्भावनच्छलात् निगूहनम्।

स्वभावोक्तिः,—कविमात्रसंवेद्यावस्थाविशेषक्रियारूपवत्-शिशुपश्वादिपदार्थस्य तदेकाश्रययोः चेष्टास्वरूपयोः यथावद्वर्णनम्।

भाविकं—भूतस्य भाविनो वा अद्भुतपदार्थस्य वर्णनाविशेष-

वर्णेन प्रत्यक्षवद्भासमानत्वम्। "अनातपत्रोऽप्ययमत्र लक्ष्यते—" इत्यादौ प्रत्यक्षायमाणस्यैव वर्णनात्रायमलङ्कारः, वर्णनाविशेषवर्णेन प्रत्यक्षायमाणत्वस्यैव एतद्विषयत्वादिति बोध्यम्।

उदात्तम्—कस्यचिदलौकिकमृद्धेर्व्यञ्जनया ज्ञापनम्; तथा महत्त्वव्यञ्जकं प्रकृतमहत्त्वसम्बन्धिचरितं वेति लक्षणभेदात् द्विविधम्।

रसवदादयः,—शृङ्गाराद्यन्यतमो रसः, निर्वेदादित्रयस्त्रिंशद्भेदात्मकः भावः, शृङ्गाराद्यन्यतमाभासः, निर्वेदाद्यन्यतमाभासश्च, एवमुक्तरूपस्य भावस्य प्रशमश्च, एते यदा गुणीभूतरसान्तरादीनामुत्कर्षाधायकत्वेन अङ्गत्वं प्राप्नुवन्ति, तदा यथाक्रमं रसवत्-प्रेयः-ऊर्जस्वि-समाहितनामालङ्कारतामापद्यन्ते। तथा हि—रसस्य इतराङ्गत्वे रसवत्, भावस्य इतराङ्गत्वे प्रेयः, तदाभासयोरितराङ्गत्वे ऊर्जस्वि, भावप्रशमस्य इतराङ्गत्वे समाहितमिति।

भावोदयादयः,—भावस्य उद्भवावस्थारूपे उदये, उभयोः सन्दिग्धेनोपनिबन्धरूपे सन्धौ, तथा बहूनां पूर्वोपमर्देन निबन्धरूपे मिश्रत्वे च गुणीभूतत्वमायाति सति यथाक्रमं भावोदयभावसन्धि भावशबलनामानोऽलङ्काराः भवन्ति।

एवञ्च रसवदादीनामलङ्काररूपतामनङ्गीकुर्वन्तः केचित्—"वाच्यवाचकरूपालङ्करणमुखेन रसाद्युपकारका एव अलङ्काराः, रसादयस्तु वाच्यवाचकाभ्याम् उपकार्या एवेति न तेषामलङ्कारता भवितुं युक्ता" इत्याहुः। अपरे तु—रसाद्युपकारमात्रेण इह अलङ्कृतिव्यपदेशः भाक्तः चिरन्तनप्रसिद्धया अङ्गीकार्य एव" इति वदन्ति। एवमत्र बहुधा मतभेदः आकरे द्रष्टव्यः।

कथितावशेषे यमकोपमादयः अलङ्काराः यदि एकस्मिन्

वाक्ये पद्ये गद्ये वा परस्परसम्मिलनेन अवस्थिताः स्युः, तदा संसृष्टिसङ्कीर्त्यन्यतररूपालङ्कारान्तरतामुपलभमानाः तदन्यतरनाम्ना व्यपदिश्यन्ते। तथा हि—

संसृष्टिः,—तिलतण्डुलन्यायेन स्फुटावगम्यभेदानां समनन्तरमुक्तानां शब्दार्थालङ्काराणां यथासम्भवमन्योऽन्यनिरपेक्षतया एकत्र समवस्थानम्। सा च शब्दालङ्कारगतत्वेन, अर्थालङ्कारगतत्वेन उभयालङ्कारगतत्वेन च त्रिधा भवति। उभयालङ्कारगता संसृष्टिरपि शुद्धा संसृष्टिमिश्रा चेति द्विधा भवति।

सङ्करः,—नीरक्षीरन्यायेन अनासादितस्वतन्त्रभावानाम् अलङ्काराणाम् एकस्मिन् आश्रये परस्परमनुग्राह्यानुग्राहकभावेन सम्मिश्रणम्। सङ्कीर्यमाणस्वरूपत्वाच्च अस्य सङ्करनाम्ना व्यपदेशः।

अयञ्च अङ्गाङ्गिभावेन, एकाश्रयस्थित्या, सन्देहमूलकतया च त्रिधा भवति। "अनुरागवती सन्ध्या—" इत्यादौ समासोक्तिर्विशेषोक्तेरङ्गमिति अङ्गाङ्गिभावविषयत्वम्।

"मुखचन्द्रं पश्यामि" इत्यादौ "मुखचन्द्रम्" इत्यत्र "मुखं चन्द्र इव" इति "मुखमिव चन्द्रः" इति च द्विधा समासस्य सम्भवेन उपमा-रूपकयोरुभयोरेव सामग्रीसत्त्वात् सन्देहसङ्करविषयत्वम्।

यत्र हि सन्देहे साधक-बाधकयोरन्यतरस्यावतारः, तत्र एकतरनिश्चयान्न सन्देहः, तथा हि—"मुखचन्द्रं चुम्बति" इत्यत्र न सन्देहसङ्करस्य विषयः, चुम्बनस्य मुखान्वयानुकूलतया उपमायाः साधकत्वात् चन्द्रान्वयप्रतिकूल्येन रूपकस्य बाधकत्वाच्च एकतरपक्षनिश्चयसम्भवात्। एवं "सुन्दरं वदनाम्बुजम्" इत्यत्र सौन्दर्यरूपसाधारणधर्मस्य प्रयोगात् "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" (२।१।५६ पा०) इत्यनुशासनात्

उपमितसमासासम्भवः उपमाबाधकः, तथा च मयूरव्यंसकादित्वात् क्षतः रूपकसमासः एव तत्साधक इति संशयासत्त्वात् नास्य सन्देहसङ्करविषयत्वम्।

एवं "कुरवका रवकारणतां ययुः" इत्यत्र एकस्मिन् पादरूपे आश्रये "रवका रवका" इत्येकं "वकार वकार" इति चैकमिति यमकयोः सत्त्वात् एकाश्रयानुप्रवेशरूपतः सङ्करो बोध्यः। एवञ्चैकत्र अनेकधा अलङ्कारसमावेशवैचित्र्यमाकरे द्रष्टव्यम्।

अथालङ्काराणां परस्परभेदाः।

पुनरुक्तवदाभासे—भुजङ्गकुण्डल्यादिरूपविभिन्नाकार एव शब्दः घटकतया समुपादीयते; यमके तु—"नवपलाश-पलाशवनम्" इत्यादौ समानाकार एवेत्युभयोर्विशेषः।

पुनरुक्तवदाभासे—आपाततः प्रतिभातार्थवशात् पुनरुक्तताप्रतीतिः, न तु पर्य्यवसानेऽपि तत्त्वम्; शब्दश्लेषे तु—अभिधावृत्तिलभ्ययोरुभयोरेवार्थयोः पर्य्यवसानेऽपि समकक्षतया स्फुरणमित्यनयोर्भेदः।

लाटानुप्रासे—"नयने तस्यैव जयने च" इत्यादौ निसर्गतः एकार्थयोः शब्दयोस्तात्पर्य्यमात्रेण अर्थभेदो भवति; यमके तु—सति सम्भवे प्रकृत्यैव भिन्नार्थयोरेकाकारयोः शब्दयोः प्रयोगः इति अनयोर्भेदः।

वक्रोक्तौ—गोपनीयस्य वस्तुनः प्रथमं स्वयमभिधानाभावात् अपरोक्तवाक्यस्यैव अन्यथाकरणम्; द्वितीयापह्नुतौ तु—"इह पुरोऽनिलकम्पितविग्रहा—" इत्यादौ प्रकटिताभिप्रायस्य निजवचनस्यैव स्वयमन्यथाकरणमित्यनयोर्विशेषः।

भाषासमे—कविप्रयुक्तानां भाषाणां केवलमेकरूपत्वं, न

त्वर्थभेदः ; भाषाश्लेषे तु—न केवलं भाषाणामेकरूप्यम्, अपि तु अर्थभेदोऽपि इत्यभयोर्विशेषः।

श्लेषे—अभिधाप्रतिपादितस्य अर्थद्वयस्यैव समकक्षत्वम् ; श्लेषगर्भरूपके तु—"विद्वन्मानसहंस—" इत्यादौ उद्देश्यविधेयभावेन गुणप्रधानभावापेक्षितया तस्य असमकक्षत्वमित्यनयोर्भेदः।

श्लेषे—उभयोरेव अभिधाप्रतिपाद्यार्थयोरन्योऽन्यनिरपेक्षतया प्रधानत्वम् ; विरोधाभासे तु—"सन्निहितबालाम्बकारा भास्वन्मूर्त्तिश्च" इत्यादौ आपाततः प्रतिभातस्य विरुद्धार्थस्य पर्य्यवसानेऽसत्त्वात् न उभयोरेव समकक्षत्वमित्यनयोर्भेदः।

शब्दश्लेषे—अनेकेषां धर्मिणां पृथक्पृथग्धर्मसम्बन्धतया अवगमः ; तुल्ययोगितायान्तु—एकस्यैव धर्मस्य अनेकधर्मिसम्बन्धतया प्रतीतिरित्यभयोरन्तरम्।

शब्दश्लेषे—द्विविधस्यैव अर्थस्य अभिधावृत्तिप्रतिपाद्यत्वम् ; समासोक्त्यप्रस्तुतप्रशंसादौ तु—अर्थान्तरस्य व्यञ्जनावृत्तिलभ्यत्वमिति शब्दश्लेषात्समासोक्त्यादेः विशेषः।

पदभङ्गसङ्गतश्लेषे—प्रकृति-विभक्ति-समासादीनां सर्वेषामेव वैलक्षण्यम् ; प्रकृतिश्लेषे तु—प्रकृतिमात्रस्य वैलक्षण्यं, विभक्ति-समासादीनान्तु अविलक्षणत्वमेवेत्यनयोर्भेदः।

प्रत्ययश्लेषे—कृत्तद्धितादिप्रत्ययकृत एव उभयार्थप्रत्ययः ; विभक्तिश्लेषे तु—प्रत्ययान्तरासाध्यविच्छित्तिविशेषाऽऽपादकतया सुप्तिङन्तकप्रत्ययमात्रकृत एव इत्यनयोर्विशेषः।

उपमायाम्—उपमानोपमेयगतसाधर्म्यस्य अभिधावृत्तिप्रतिपाद्यत्वम् ; रूपक-परिणाम-प्रतिवस्तूपमा-दृष्टान्तप्रभृतिष्वपरेषु सादृश्यमूलकालङ्कारेषु तस्य व्यञ्जनावृत्तिलभ्यत्वमित्येतेषाम् उपमालङ्कारात् विशेषः।

उपमायां——विरुद्धधर्म-कथनाभावकृतसमानधर्मकथनम्; एकवाक्यगतव्यतिरेके तु—"अकलङ्कं मुखं तस्या न कलङ्की विधुर्यथा" इत्यादौ विरुद्धधर्मस्यापि उक्तिरित्यनयोर्भेदः।

उपमायाम्—एकस्मिन् एव वाक्ये उपमानोपमेययोः साधर्म्यावगमः; उपमेयोपमायान्तु—"कमलेव मतिर्मतिरिव कमला—" इत्यादौ विभिन्नवाक्ये तयोः साधर्म्यप्रतौ तदिरित्यनयोर्भेदः।

उपमायां—द्वयोरेव धर्मिणोरुपमानोपमेयत्वाभिधानम्; अनन्वये तु—"राजीवमिव राजीवम्—" इत्यादौ एकस्मिन्नेव धर्मिणि उपमानोपमेयत्वकल्पनमित्यनयोर्भेदः।

उपमायां—तद्धिते वतेरुपादाने यत्र—"सौरभमम्भोरुहवन्मुखस्य—" इत्यादौ "तत्र तस्येव" (५।१।११६ पा०) इति पाणिनिसूत्रेण "तत्रेव" "तस्येव" इत्यर्थे वतिः, तत्र इवार्थे वतेरुपादानात् श्रौत्या विषयः; यत्र तु—"मधुरः सुधावदधरः—" इत्यादौ "तेन तुल्यम्—" (५।१।११५ पा०) इति पाणिनिसूत्रेण तुल्यार्थे वतिः, तत्र तुल्यार्थे वतेरुपादानात् आर्थ्या विषय इत्युभयोर्विशेषः।

रशनोपमायां—पूर्वोपमायां यस्य उपमेयत्वम्, उत्तरोपमायां तस्यैव यथाक्रममुपमानत्वकल्पनम्; उपमेयोपमायान्तु—एकस्यामेवोपमायां द्वयोरेवोपमानोपमेययोः यथाक्रमम् उपमेयोपमानताप्रकल्पनमित्यनयोर्भेदः।

अनन्वये—"राजीवमिव पाथोदम्" इत्यादौ शब्दस्य समानाकारकत्वाभावेऽपि उपमानोपमेययोः सामानाधिकरण्यमात्रेणैव एतदलङ्कारत्वनिर्वाहात् समानाकारकशब्दस्य न नियमतः प्रयोजकत्वम्; लाटानुप्रासे तु—समानाकारकशब्दस्यैव साक्षात् प्रयोजकत्वमित्युभयोर्विशेषः।

उपमेयोपमायां—विभिन्नवाक्ये द्वयोरुपमानोपमेययोर्यथाक्रममुपमेयोपमानताकल्पनम् ; अनन्वये तु—एकस्मिन्नेव वाक्ये एकस्यैव धर्मिणः उपमानोपमेयत्वकल्पनमित्यनयोर्भेदः।

रूपके—समानधर्मविशिष्टस्योपमानस्याभेदः उपमेये भासते ; परिणामे तु—प्रस्तुतप्रयोजनसाधनत्वेनोपमेयस्य तादात्म्यमुपमानरूपे आरोप्यमाणे भासते इत्यनयोर्विशेषः। तथा—

रूपके—आहार्य्या एव सङ्कटभेदबुद्धेः, अनन्तरं साधर्म्यप्रतीतिरेव, न तु अभेदबुद्ध्यन्तरम् ; परिणामे तु—वस्तुनोरेककार्य्यकारित्वरूपसाधर्म्येण अत्यन्ततिरस्कृतभेदयोरभेदप्रतीतिधारा इति वाऽनयोर्विशेषः।

रूपके—प्रकृतस्य उपमेयस्य अप्रतिषेधेन तत्र उपमानतादात्म्याध्यासः ; अपह्नुतौ तु—उपमेयप्रतिषेधपुरःसरम् उपमानतादात्म्यारोपणमित्यनयोर्भेदः।

रूपके—चन्द्राद्यारोपविषयस्य मुखादेर्वाच्यत्वम् ; अतिशयोक्तौ तु—"लतामूले लोनो हरिणपरिहीनो हिमकरः" इत्यादौ निगीर्णविषये मुखादौ निष्कलङ्कचन्द्रादिरूपोपमानतादात्म्यरोप इत्यनयोर्भेदः।

एकदेशविवर्त्तिनि रूपके—साधर्म्यस्य उपमाने मुख्यतया स्थितिः ; एकदेशविवर्त्तिन्यामुपमायान्तु—साधर्म्यस्य उपमेये मुख्यरूपेण अवस्थानमित्यनयोर्भेदः।

परिणामे—आरोप्यस्य तादात्म्येन अन्वयात् "स्मितेनोपायनं दूरात्—" इत्यादौ उपायनादेः प्रस्तुतनायकसम्भावनोपयोगितया स्मितरूपेण विषयेण तादात्म्यं भासते ; रूपके तु—आरोप्यस्य अवच्छेदकत्वमात्रेणान्वयात् "मुखचन्द्रं पश्यामि" इत्यादौ आरोप्यमाणचन्द्रादेरुपमेयशोभाऽऽविष्कारकत्वमात्रं, न तु प्रस्तुतदर्शनादावुपयोगः इत्यनयोर्भेदः।

सन्देहे—उपमेये उपमानस्य संशयः अलङ्कारत्वव्यवस्थापकः; अतिशयोक्तौ तु—"मध्यं तव सरोजाक्षि—" इत्यादौ न तथा नियमः, अपि तु केवलं संशयमात्रमित्यनयोर्भेदः।

सन्देहे—कोटिद्वयस्यैव समकक्षतया संशयप्रयोजकोभयकोट्योरेव तुल्यबलत्वम्; उत्प्रेक्षायान्तु—अतुल्यबलतया तयोरेकस्यां कोटावौत्कट्यमित्यनयोर्भेदः।

भ्रान्तिमति—प्रकृतविषयज्ञानाभावात् जायमानज्ञानस्यानाहार्यरूपत्वम्; रूपके, उपमानोपमेयनिगरणरूपायामतिशयोक्तौ च—विषयज्ञानसत्त्वात् तयोराहार्यरूपत्वमित्येतयोः भ्रान्तिमत्तो विशेषः।

उल्लेखे—आरोपणीयवस्तूनां तात्त्विकत्वं ग्रहीतृभेदभिन्नत्वञ्च; मालारूपक-भ्रान्तिमदादौ तु—न तथेति विशेषः।

उल्लेखे—तात्त्विकानामेव पदार्थानाम् एकस्मिन्नेव विषये सामान्यतोऽभिधानमात्रम्; अभेदे भेदरूपायामतिशयोक्तौ तु—"अन्यदेवाङ्गलावण्यम्—" इत्यादौ लावण्यादेर्विषयस्य पृथक्त्वेनाध्यवसानमित्यनयोर्भेदः।

द्वितीयापह्नुतौ—गोपनीयस्यापि कथञ्चन प्रथममभिधानमावश्यकम्; व्याजोक्तौ तु—गोपनीयस्य प्रथमं स्वयंकृतमभिज्ञानं नास्तीति एतयोर्विशेषः।

निश्चये—सन्देहनिश्चययोः पृथगाश्रयवृत्तितया वैयधिकरण्यम्; निश्चयान्तसन्देहे तु—प्रथमतो यस्यैव संशयः, अन्ते तस्यैव निश्चयदर्शनात् सन्देहनिश्चययोः सामानाधिकरण्यमिति एतयोर्विशेषः।

निश्चये—आरोप्यमाणस्य निषेधपुरःसरं प्रकृतस्य स्थापनम्; रूपकध्वनौ तु—प्रकृते विषये आरोप्यमाणस्य तादात्म्येन निर्धारणं, न तु निषेध इत्यनयोर्भेदः।

निश्चये—उपमानं प्रतिषिध्य उपमेयस्य स्थापनम् ; प्रथमापक्षतौ तु—उपमेयं प्रतिषिध्य उपमानस्य स्थापनमित्यनयोर्भेदः।

उत्प्रेक्षायां — तादात्म्यसंसर्गकोपमानप्रकारक-उपमेयविशेषक-उत्कटैककोटिकः संशयः ; रूपकभ्रान्तिमदतिशयोक्त्यादौ तु—तादात्म्यसंसर्गकोपमानप्रकारकोपमेयविशेषको निश्चय इति उत्प्रेक्षातः रूपकादीनां सामान्यतो भेदः।

उत्प्रेक्षायां—सम्भावयितुः पुरुषस्य सम्भावनाविषयस्य प्रकृतस्यापि ज्ञानमस्ति ; भ्रान्तिमदलङ्कारे तु—"मुग्धा दुग्धधिया—" इत्यादौ भ्रान्तानां वल्लवादीनां प्रकृतविषयस्य चन्द्रिकादेर्ज्ञानं नास्तीत्यनयोर्विशेषः।

उत्प्रेक्षायां—वाक्यार्थप्रतीतिसमकाल एव आरोप्यमाणस्य वस्तुनः असत्यता प्रतीयते ; अतिशयोक्तौ तु—प्रतीतस्यैव आरोप्यमाणस्य वाक्यार्थपर्य्यालोचनानन्तरमेव असत्यताप्रतीतिरित्यनयोर्विशेषः।

प्रतीयमानोत्प्रेक्षायां—"तन्वङ्ग्याः स्तनयुग्मेन—" इत्यादौ स्तनयोर्लज्जाया असम्भवात् "लज्जयेव" इत्युत्प्रेक्षयैव वाक्यविश्रान्तिः ; उत्प्रेक्षाध्वनौ तु—"महिलासहस्र—" इत्यादौ उत्प्रेक्षणं विनाऽपि वाक्यविश्रान्तिरित्यनयोर्विशेषः।

फलोत्प्रेक्षायाम्—उत्प्रेक्ष्यमाणस्य हेतुरेव निमित्तम् ; हेतूत्प्रेक्षायान्तु—फलमेवेत्यनयोर्भेदः।

अतिशयोक्तौ—आरोप्यमाणस्य निश्चितत्वेन निर्देशात् अध्यवसायस्य सिद्धत्वम् ; उत्प्रेक्षायान्तु—आरोप्यमाणस्य अनिश्चितत्वेन निर्देशात् साध्यत्वमित्येतयोर्विशेषः।

तुल्ययोगितायां—द्वयोः प्रकृतयोः द्वयोर्वा अप्रकृतयोः (न तु प्रकृताप्रकृतयोः) पदार्थयोः गुणक्रियाऽन्यतररूपैकधर्मस्य

सम्बन्धः; दीपके तु—प्रकृताप्रकृतयोः पदार्थयोः तादृग्धर्मेण सम्बन्धः इति अनयोर्विशेषः।

दीपके—साम्यबोधकपदस्य इव-वदादेर्नियमतः अप्रयोगः; उपमायान्तु—"कमलमिव मुखं मनोज्ञम्" इत्यादौ तादृग्-शब्दस्य नियमेन प्रयोग इत्यनयोर्भेदः।

प्रतिवस्तूपमायां—प्रकृताप्रकृतान्वयिनः एकस्यैव धर्मस्य विभिन्नाकारेण निर्देशः; दीपके तु—तादृशस्य एकस्यैव धर्मस्य एकाकारेणैव इत्युभयोर्भेदः।

दृष्टान्ते—प्रतिधानगम्यसाम्यस्य उपमानोपमेयगतसामान्य-धर्मस्य तद्भेदसमानाधिकरणतद्गतभूयोधर्मवत्त्वरूपं तुल्यत्वम्; प्रतिवस्तूपमायान्तु—तादृशस्य सामान्यधर्मस्य एकत्वमित्यनयो-र्भेदः।

दृष्टान्तप्रतिवस्तूपमयोः,—न सामान्यविशेषभावः, न वा समर्थ्यसमर्थकभावः; अर्थान्तरन्यासे तु—सामान्यविशेषभावेन समर्थ्यसमर्थकत्वावगम इति दृष्टान्तप्रतिवस्तूपमाभ्याम् अर्थान्तरन्यासस्य विशेषः।

निदर्शनायां—बिम्बप्रतिबिम्बभावाद्येपं विना वाक्यार्थस्य अपर्यवसानम्; दृष्टान्ते तु—स्वतः पर्यवसितेन वाक्यार्थेन सामर्थ्यात् बिम्बप्रतिबिम्बताप्रत्यायनमित्यनयोर्विशेषः।

निदर्शनायां—वाक्यार्थस्य सादृश्ये पर्यवसानम्; अर्थाप-त्तौ तु—दण्डापूपन्यायादर्थान्तरप्रतीतिमात्रमित्यनयोर्भेदः।

समासोक्तौ—(विशेषणसाम्यनिबन्धनायां) क्वचिदेकदेशस्य रूपणेऽपि रूप्यरूपकभावस्य प्रकटसादृश्यतया अन्यानुकूल्या-नपेक्षः स्वभावविश्रामः; एकदेशविवर्त्तिरूपके तु—स्फुट-सादृश्यानां बहूनां रूपणस्य शाब्दत्वेऽपि एकदेशस्य आर्थत्वेन अस्फुटसादृश्यत्वात् परानुकूल्यापेक्षेति अनयोर्विशेषः।

समासोक्तौ—अप्रस्तुतः पदार्थः स्वावस्थामसारोपेण आच्छादितस्वरूपमेव प्रस्तुतं पूर्वावस्थातो विशेषयति; रूपके तु आरोपणीयमप्रकृतमेव वस्तु आत्मस्वरूपसविवेशेन केवलं प्रकृतस्य स्वरूपमेव आच्छादयतीत्येतयोर्विशेषः।

समासोक्तौ—केवलस्य विशेषणस्य सादृश्यं प्रतीयते; उपमाध्वनौ श्लेषे च—विशेष्यविशेषणयोरुभयोरिवेति विशेषः।

अर्थश्लेषे—अभिधया एकार्थबोधकैरपि शब्दैः अभिधालक्षणाभ्यामनेकार्थप्रतिपादनम्; शब्दश्लेषे तु—अभिधामात्रप्रतिपाद्यानेकार्थकशब्दैरनेकार्थाभिधानमित्यनयोर्भेदः।

अप्रस्तुतप्रशंसायां—क्वचिदप्रसिद्धस्यापि वस्तुनः प्रतिबिम्बत्वेन उपादानम्; दृष्टान्ते तु—सर्वत्र प्रख्यातस्यैव पदार्थस्य इति अनयोर्विशेषः।

अप्रस्तुतप्रशंसायां—व्यवहारप्रतीतिर्न श्लिष्टशब्दप्रयोगमात्रेण, अपि तु विशेषणसाम्यानुसन्धानापेक्षया; शब्दशक्तिमूलवस्तुध्वनौ तु—विशेषणसाम्यानुसन्धानापेक्षा नास्ति इत्यनयोर्भेदः।

अप्रस्तुतप्रशंसायां—प्रस्तुतस्यार्थस्य व्यञ्जनावृत्तिलभ्यत्वम्; समासोक्तिश्लेषयोस्तु—प्रकरणादिनियमाभावात् प्रस्तुताप्रस्तुतयोः द्वयोरेव वाच्यत्वमित्यप्रस्तुतप्रशंसातः अनयोर्विशेषः।

पर्यायोक्तौ—कारणवत् कार्यस्यापि प्रस्तुतत्वम्; कार्यात् कारणप्रतीतिरूपाप्रस्तुतप्रशंसायान्तु—कार्यस्य अप्रस्तुतत्वमित्यनयोर्भेदः।

काव्यलिङ्गे—निश्चयको हेतुर्विषयः, कार्यकारणभावेऽर्थान्तरन्यासे—समर्थको हेतुर्विषयः; अनुमाने तु—ज्ञापको हेतुर्विषय इति एतेषां हेतुगतविशेषात् परस्परं भेदः।

अनुमाने—विषयिणः निश्चिततया प्रतीतिः; उत्प्रेक्षायान्तु—अनिश्चिततयेत्युभयोर्भेदः।

विभावनायां—कारणाभावेनोपनिबध्यमानत्वात् कार्य्यमेव बाध्यत्वेन प्रतीयते; विशेषोक्तौ तु—कार्य्याभावेनोपनिबध्यमानत्वात् कारणमेव बाध्यत्वेन प्रतीयते इत्यनयोर्विशेषः।

विशेषोक्तौ—सामान्यतः कारणस्य विद्यमानतायामपि सामान्यतः कार्य्यस्यानुत्पत्तिः; अतद्गुणे तु—उत्कृष्टगुणवद्वस्तुसन्निधिरूपविशेषकारणसत्त्वेऽपि तादृग्गुणग्रहणरूपविशेषकार्य्याभाव इति उभयोः स्वलविशेषकृतवैचित्र्यविशेषोपादानहेतुको भेदः।

विरोधे—हेतु-हेतुमतोरुभयोरपि परस्परं बाध्यत्वेन प्रतीतिः; विशेषोक्ति-विभावनयोस्तु—कार्य्यकारणयोरसत्त्वेन उपनिबध्यमानतया यथाक्रमं हेतु-हेतुमतोर्बाध्यत्वेनावगम इति परस्परं भेदः।

असङ्गतौ—कार्य्यकारणवैयधिकरण्यप्रदर्शनरूपविलक्षणवैचित्र्याधायकत्वेन कार्य्यकारणयोर्वैयधिकरण्यकल्पनम्; विरोधे तु—स्वतः समानाधिकरण्ययोरपि विरोधकल्पनमित्यनयोर्भेदः।

विषमे—कारणे यादृशो गुणो वर्त्तते, कार्य्ये तद्विरुद्धस्यैव गुणस्य उत्पत्तिः; अतद्गुणे तु—कार्य्यस्य स्वगुण-विरोधि-कारणगुणोत्पत्तिसम्भावनायां सत्यामपि तदनुत्पत्तिरित्यनयोर्भेदः।

विशेषे—एकस्य वस्तुनः अनेकत्र युगपदवस्थानम्; पर्य्याये तु—एकस्यैव अनेकत्र क्रमेणैव वृत्तिरित्यनयोर्भेदः।

कारणमालायां—पूर्वपूर्वस्य वस्तुनः परं परं प्रति हेतुत्वमात्रम्; मालादीपके तु—पूर्वपूर्वस्यार्थस्य उत्तरोत्तरत्र हेतुत्वं, सर्वेषामेकक्रियाऽन्वयनियमश्च इत्यनयोर्भेदः।

परिवृत्तौ—एकवस्तुत्यागोपाधिकापरवस्तूपादानरूपो विनिमयः; पर्य्याये तु—अपरवस्तूपादानं प्रति अन्यवस्तुत्यागस्य नियमाभावः इत्यनयोर्भेदः।

प्रतीयमानव्यपोह्यायां प्रश्नपरिसङ्ख्यायाम्—अन्यव्यपोहस्यैव विलक्षणवैचित्र्याधायकत्वेन तत्रैव कवेस्तात्पर्यम्; द्वितीयोत्तरे तु—असकृत्प्रश्नपूर्वकमसकृदुत्तरमात्रं, न तु अन्यस्य कस्यचित् व्यपोहोऽपीत्यनयोर्भेदः।

प्रथमोत्तरे—उक्तेन साधनेन अनुक्तस्य साध्यस्य ज्ञानम्; अनुमाने तु—उक्तेनैव साधनेन उक्तस्यैव साध्यस्य ज्ञानमित्यनयोर्भेदः।

प्रथमोत्तरे—उत्तरस्य प्रश्नं प्रति कल्पकत्वरूपहेतुत्वं, न तु निष्पादकत्वमपि; काव्यलिङ्गे तु—वाक्यपदार्थयोर्निष्पादकत्वरूपहेतुत्वमित्यनयोर्विशेषः।

अर्थापत्तौ—ज्ञाप्यज्ञापकयोरव्यभिचरितसामानाधिकरण्यरूपव्याप्तेरन्यरूपेण नियतसामान्यन्यायेन अर्थान्तरप्रतीतिः; अनुमाने तु—साध्यसाधनयोः तादृग्व्याप्तिरूपसम्बन्धग्रहजन्यतादृगर्थज्ञानमित्यनयोर्भेदः।

समुच्चये—कस्यचित् कार्यस्य निष्पत्त्यर्थं सर्वेषामेव कारणानां खले कपोतिकान्यायात् साहित्येनावतारः; समाधौ तु एककार्यं प्रति समग्रे साधके विद्यमानेऽपि तत्कार्यसौकर्यार्थं काकतालीयन्यायेन दैवात् कारणान्तरस्य आपतनमित्युभयोर्विशेषः।

द्वितीयसमुच्चये—नियमेन कार्यकारणकालनियमविपर्ययरूपातिशययोन्निर्मूलकत्वम्; दीपके तु—तन्मूलकत्वाभावः इति अनयोर्भेदः।

सामान्ये—उभयोरेव पदार्थयोः समानगुणशालितया अन्योऽन्यभेदग्रहाभावः; मीलिते तु—उत्कृष्टगुणशालिना वस्तुना निकृष्टगुणशालिनः तिरोधानमित्यनयोर्भेदः।

तद्गुणे—सविकृष्टेन विजातीयोत्कृष्टगुणेन स्वापकृष्ट-

गुणस्यैव तिरोधानं, न तु वस्तुनोऽपि ; मीलिते तु—वस्तुनोऽपीत्यनयोर्विशेषः।

व्याजोक्तौ—गोपनकारिभिन्नेन काव्यादिना अप्रकृतारोपविषयो व्यज्यते, न तु अभिधया प्रतिपाद्यते ; प्रथमापह्नुतौ तु—अपह्नवकारिणा प्रकृतगोपनेन अप्रकृतविषयोऽभिधीयते इत्यनयोर्विशेषः।

स्वभावोक्तौ—लौकिकवस्तुगत-कविमात्रसंवेद्य-सूक्ष्मधर्मस्वभावस्यैव यथावद्वर्णनम् ; भाविके तु—वस्तुविशेषस्य वर्णनाविशेषवशेन प्रत्यक्षवद्भासमानत्वमित्यनयोर्भेदः।

भाविके—भूतभाविपदार्थानां वर्णनाविशेषवशेन प्रत्यक्षवदाभासमानत्वम् ; अतिशयोक्तौ तु—उपमेये उपमानाभेदारोपस्य सिद्धवद्निर्देश इत्यनयोर्भेदः।

भाविके—भूतभाविनोर्वस्तुनोर्भूतभावितयैव अवगमः ; भ्रान्तिमति तु—अतत्पदार्थस्यापि तत्पदार्थतया बोध इति अनयोर्विशेषः।

एवमन्येऽपि भेदाः निपुणमतिभिरालङ्कारिकैः स्वयमूहनीया इत्यलमतिपल्लवितेन।

श्रीमज्जीवानन्दविद्यासागरभट्टाचार्यस्य पौत्रः
एम, ए, उपाधिधारी
श्रीपञ्चाननभट्टाचार्यः।

अशुद्धिशोधनम् ।

पृष्ठाया:	पङ्क्तौ	अशुद्धि:	शुद्धि:
३२६	९	वाक्यार्थस्य	रसभाववाक्यार्थानाम् ।
४६२ } ४६३ }	२९ पङ्क्तिमारभ्य १५ पङ्क्तेः टीकां यावत्	पतिर्यथा..... अधमया स्त्रिया	पतिर्यथेति ।—उत्तमेन उत्तमा स्त्री वयस्या इति मध्यमेन मध्यमा हंहो इति, अधमेन ।
५९३	२०	परिगृहीतविरुद्धरसाङ्ग-विभावादित्वम,	विरोधिरसाङ्गविभावाद्युपादानम् ।
५९३	२३	रसगतास्त्रयोदशदोषा:	रसगतास्चतुर्दश दोषा: ।
५९३	२३—२४	परिगृहीतविरुद्धरसाङ्ग विभावादित्व	विरोधिरसाङ्गविभावाद्युपादान ।
७०१	४	समानधर्मश्च	समानधर्मो वा ।
७१५	२०	धर्मेवादिलोपे च द्वे	धर्मोपमानयोर्लोपे द्वे, धर्मेवादिलोपे च द्वे ।
७३७	१६	शोभाविस्कार	शोभाऽऽविष्कार ।
७४४	९	त्तराविच्छित्ति	त्तरविच्छित्ति ।
७५३	२६	अत्रैवं बोध्यं, यथा हि—	केचित्तु द्वात्रिंशत्त्वमेव उपपादयन्ति, तथा हि—
७५४	९	इति	इति, तदसत्, मूलकार-विरोधात् ।

पृष्ठाया:	पङ्क्तौ	अशुद्धि:	शुद्धि:
८०४	२—३	स्वावस्थासमारोपेणा-	स्वावस्थासमारोपेणावच्छा-
		नवच्छादितं स्वरूपमेव	दितस्वरूपमेव ।
८५८	२२	समधिककविसम्मता-	बहुभिरालङ्कारकैरनादृत-
		भावात्	त्वात् ।
८८४	७	अप्रकृतनिषेधपूर्वकप्रकृत	प्रकृतनिषेधपूर्वकाप्रकृत ।
८९०	१६	शृङ्गारहासाद्यन्यतम:	शृङ्गारहास्याद्यन्यतम: ।
८९०	१८	त्रयस्त्रिंशद्वेदा:	त्रयस्त्रिंशद्वेदभिन्न: ।

साहित्यदर्पणः ।

प्रथमः परिच्छेदः ।

अवतरणिका ।—

ग्रन्थारम्भे निर्विघ्नेन प्रारिप्सितपरिसमाप्तिकामो वाङ्मयाधिक्ततया वाग्देवतायाः सामुख्यमाधत्ते । (क)—

(क) प्रणम्य परमात्मानं श्रीजीवानन्दशर्मणा ।
साहित्यदर्पणव्याख्या विमलाऽऽख्या विरच्यते ॥

अथ प्रथमकारिकायां सरस्वत्याराधनेन स्वार्थनिर्वाहप्रयुक्तिपरतां प्रकटयितुं ग्रन्थकृदवतरणिकामाचष्टे, ग्रन्थारम्भ इति ।—ग्रन्थस्य "विषयो विषयश्चैव पूर्वपक्षस्तथोत्तरम् । निर्णयश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतम् ॥" इत्युक्तपञ्चाङ्गशालिनः "सम्बन्धप्रयोजनाद्यितगुणूषाजनश्रवणविषयशब्दसन्दर्भो ग्रन्थः" इत्युक्तलक्षणस्य वा महावाक्यविशेषस्य । आरम्भे—आरभ्यप्राक्काले । आद्यकृतिरूपस्य आरम्भस्य मङ्गलाचरणाधिकरणत्वबाधादियं लक्षणा, तत्प्रयोजनस्य मङ्गलाऽऽरम्भधीरव्यवहितत्वबोधः । केचित् तु "आरम्भे भाविनि सतीत्यर्थः" इत्याहुः, तन्न ; तथा सति 'आरम्भप्राक्काले' इति पदादिव 'आरम्भे भाविनि सति' इत्यस्मादारम्भप्रागभावसमानकालीनत्वभानस्यैव बोधः, न तु सदाचारपरम्पराप्रारिप्सस्य आरम्भस्याव्यवहितप्राक्कालीनत्वस्य । न च कालान्तरीयस्य मङ्गलाचरणस्यापि अदृष्टद्वारा प्रकृतोपयोगित्वात् तथीः (मङ्गलाचरणग्रन्थारम्भयोः) अव्यवहितत्वस्य बोधोऽकिञ्चित्कर इति वाच्यम् ; तस्य प्राशस्त्येनात्यन्तोपयोगित्वकल्पनात् । निर्विघ्नेन—प्रतिबन्धकीभूतदुरदृष्टविनाशद्वारा । प्रारिप्सितस्य—चिकीर्षाविषयस्य । परिसमाप्तिः,—चरमवर्णपर्य्येन्तानुष्ठानम् ; तत्कामो ग्रन्थकृदिति शेषः । अत्र "ग्रन्थकृत्" इत्यभिधानाभावस्तु तस्य निरभिमानत्वं सूचयितुमिति बोध्यम् ।

वाङ्मयानि अष्टादश विद्याः काव्यकलाः कामशास्त्रादीनि च, तदधिकृततया तदध्यक्ष-तया। वाग्देवतायाः,—सरस्वत्याः। साम्मुख्यम्—आराधनेन स्वार्थसाधनाऽनुकूलत्वम्। आधत्ते—सम्पादयति, करोति इति यावत्। अत्र प्रथमपुरुषाभिधानं "रामः स्वयं याचते" "जीवत्यहो! रावणः" इत्यादिवत् काल्पनिकं भेदमुररीकृत्य; अन्यथा अस्मत्-कर्त्तृत्वेन उत्तमपुरुषः एव स्यात्। न च वृत्तिकार-कारिकाकारयोर्वास्तवो भेद इति वाच्यम्; "रसस्वरूपं निरूपयिष्यामः" इति प्रतिज्ञातुर्वृत्तिकारस्य कारिकया रस-निरूपणं तथात्वेऽसङ्गतं स्यात्। अत्रेदं बोध्यम्,—अत्र वाग्देव्या अभ्यर्थनं नितान्तमुपयुक्तं, तस्याः साम्मुख्यं विना वाङ्मात्रस्याप्युल्लासासम्भवः, ग्रन्थनिर्माण-तत्परिसमाप्ती तु पुनर्दूरे वर्त्तेताम्। तदाराधनं चानुषङ्गतोऽध्येतॄणां वक्तॄणां श्रोतॄणां व्याख्यातॄणाञ्च मङ्गलार्थम्। यथोक्तं महाभाष्यकारैः,—"मङ्गलादीनि हि शास्त्राणि प्रथन्ते, वीरपुरुषाणि च भवन्ति, आयुष्मत्पुरुषाणि च अध्येतारश्च सिद्धार्था यथा स्युः" इति। ननु किमर्थमिह मङ्गलाधानं, तस्य विघ्नध्वंसं प्रति समाप्तिं प्रति वा कारणत्वानुपपत्तेः? न हि नास्तिका-दयो मङ्गलमाचरन्ति, समाप्तिः पुनस्तदीयानामपि ग्रन्थानाम्? इति चेत्, विशिष्टशिष्टा-चारपरम्पराप्राप्ततया तस्य सफलतायां सिद्धायां, तत्र च फलजिज्ञासायां सति प्रत्यक्षफलकत्वे परोक्षफलकल्पनायाः "उपस्थितं परित्यज्य अनुपस्थितकल्पने माना-भावः" इति न्यायादनुचितत्वेन उपस्थिततया परिसमाप्तिरेव फलं कल्पनीयम्। तथा च,—यत्र न मङ्गलाचरणं, तत्र जन्मान्तरीयं मङ्गलाचरणमेव हेतुः; यत्र पुनः मङ्गले आचरितेऽपि न परिसमाप्तिः, तत्र विघ्नबाहुल्यं विघ्नप्राबल्यं वाऽन्तरायो वक्तव्यः। 'पक्षानुरूपो बलिः' इति न्यायेन बहुलतया प्रबलस्यैव मङ्गलस्याचरितस्य विघ्नध्वंसं प्रति कारणत्वात् इति। वस्तुतस्तु मङ्गलं हि उत्तेजकं, तच्च प्रतिबन्धकस्थलीये एव कार्य्ये कारणम्; 'निर्विघ्नं समाप्यताम्' इति कामनया, स्वेष्टसाधनानाम अंशे भ्रम-रहितानां विशिष्टानां शिष्टानामाचारेण अनुमितया श्रुत्या विघ्नाभावप्रयोज्यां समाप्ति-मेव विधत्ते। समाप्तिश्च स्वाभिलषितरीत्या प्रारिप्सितस्य चरमवर्णान्तं पूर्त्तिः; अत एव मङ्गले विहितेऽपि असमाप्तिर्युज्यते, विघ्नबाहुल्यसम्भवात्, फलबलेन मङ्गला-पूर्वस्य एकविघ्नध्वंसकर्त्तृतायाः कल्पनात्। काम्यकर्मणि अङ्गवैकल्यम् अपूर्वानुत्पत्तिर्वा कल्प्यताम्, इति मङ्गलाचरणस्य अपूर्वद्वारा विशिष्टसमाप्तिफलकत्वमुपपन्नम्। तथा च प्रारिप्सितस्य अस्य ग्रन्थस्य आरम्भाव्यवहितपूर्ववर्त्तिनि क्षणे, "अस्य भवतु निर्विघ्ना परिसमाप्तिः" इत्यभिलषन् ग्रन्थकारः श्रीविश्वनाथकविराजः स्वयं स्वस्यान्येषामपि मङ्गलमनुषङ्गतो वर्द्धयितुं वाङ्मयस्य ग्रन्थस्य वागधिकृतत्वात् वाग्देव्या आशीःप्रार्थन-माधत्ते इति समुदितार्थः।

शरदिन्दुसुन्दररुचिश्चेतसि सा मे गिरां देवी।
अपहृत्य तमः सन्ततमर्थानखिलान् प्रकाशयतु॥१॥(ख)

(ख) शरदिन्दिति।—सा वेदागमादिप्रसिद्धा, स्वाभिलषितार्थसम्पादनहेतुतया स्वाराध्यत्वेन वा; गिरां देवी सरस्वती मम चेतसि वर्त्तमाना सती तमोऽज्ञानमपहृत्य विनाश्य अखिलान् सर्वान् अर्थान् वाच्यलक्ष्यतात्पर्य्यस्वरूपान् प्रतिपाद्यविषयान् सन्ततं यदा यदा अर्थज्ञानमुपयुक्तं तस्मिन् सर्वस्मिन् अपि समये इति भावः; यद्वा,—सा स्वतः प्रसिद्धा। यद्वा,—"अकारो विष्णुरुद्दिष्टः" इत्येकाक्षरकोषोक्तेः अः विष्णुः, तेन एव सह वर्त्तमाना इति सा, विष्णुसहिता इत्यर्थः, गिरां वाग्-व्यापाराणां देवी अधिष्ठात्री मे मम उपलक्षणेन मिथ्यादीनाञ्च चेतसि सन्ततं व्याप्तं तमोऽन्धकाररूपम् अज्ञानम् अपहृत्य अखिलान् निर्दुष्टत्वे सति गुणव्यञ्जकत्वालङ्कारीद्भावकत्वादिनाऽङ्गत्वैकल्यहीनान् अर्थान् वाच्यादीन् प्रकाश-यतु प्रकटीकरोतु; यद्वा,—सन्ततमिति "तमः" इत्यस्य विशेषणं, निबिड़मिति तदर्थः। सा कीदृशी? शरदिन्दोरिव सुन्दरी अतिविशदा रुचिर्दीप्तिर्यस्याः सा तथा, शरदः इन्दुश्चन्द्र इति शरदिन्दुः, शरत्कालीनचन्द्र इत्यर्थः। अस्य मेघाद्यावरणशून्यतया नितान्तं रमणीयस्य रुच्यैव (न तु कान्त्यादिना) सादृश्ये भगवत्या रमणीयताऽतिशयः सूचितः। अथ च, इयं तथा तमोऽपहृत्य अर्थान् विषयान् प्रकाशयतु, यथा शरदिन्दुः तमः ध्वान्तं विनाश्य अर्थान् वस्तूनि प्रकाशयति तथेत्युपमा। वाङ्मयाधिकृतत्वव्याख्यापनाय 'गिरां देवी' इत्यनेन सरस्वत्या उपन्यासः। अत्र "सा" इत्यनेन सरस्वत्याः श्रवणं, 'चेतसि वर्त्तमाना' इत्यनेन मननं ध्यानञ्च लभ्यते इति त्रिविधं सरस्वत्याराधनमुक्तं, तस्य विघ्नध्वंसद्वारा प्रारिप्सितपरिसमाप्तिरेव फलं, न तु विशिष्टं, यथा निष्पापस्य ब्रह्मलोकप्राप्तिरेव सन्ध्योपासनस्य फलं, न तु पापक्षय-पूर्वकब्रह्मलोकप्राप्तिः। तदुक्तं,—"सन्ध्यामुपासते ये तु सततं संशितव्रताः। विधूत-पापास्ते यान्ति ब्रह्मलोकमलालयम्॥" इति। अथवा,—देवी दुर्गा मे मम गिरामर्थान् चेतसि व्युत्पित्सूनां हृदि प्रकाशयतु। यद्वा—सा देवी दुर्गा गिरां वचसां प्राचाम-र्वाचामाचार्य्याणां वा सम्बन्धिनीनां सिद्धान्तोक्तीनां तमः तात्पर्य्याविज्ञानरूपं तात्पर्य्या-विष्करणाक्षमतारूपं वा अन्धकारमपहृत्य मे मम चेतसि अर्थान् पारमार्थिकदर्शनार्हां सिद्धान्तरूपान् अभिधेयान् प्रकाशयतु। सा कीदृशी? शरदिन्दुसुन्दरः शरत्सुन्दरवत् शुभ्रकान्तिः, शरदिन्दुना निर्मलचन्द्रेण भासुरितेन इति यावत्, सुन्दरः मनोहरः,

अस्य ग्रन्थस्य काव्याङ्गतया काव्यफलैरेव फलवत्त्वम् इति (ग) काव्यफलान्याह,—

चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि ।
काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते ॥ २ ॥ (घ)

उभयत्र शिवः इत्यर्थो बोध्यः ; तत्र रुचिरभिलाषो यस्याः सा तथा, अन्यत् समानम् । एतत्पक्षे 'वाङ्मयाऽधिकृततया' इति कर्त्तृविशेषणम् । वाङ्मयाधिकृतो ग्रन्थकृदिति तदर्थः ; अथवा,—"अवाग्देवतायाः" इति गोपनीयदेवताया इत्यर्थः, इष्टदेवताया गोपनीयत्वमागमे सुप्रसिद्धम् । यद्वा,—निर्विघ्नेन इति विघ्नाभावद्वारेत्यर्थः । अभावश्च यथायथमत्यन्ताभावो ध्वंसश्च ग्राह्यः ; अत्यन्ताभावपक्षे अन्वयव्यतिरेकानुविधायित्वरूपं जन्यत्वमादाय व्यापारत्वनिर्वाहः । एतन्मते सर्वत्रैव विशिष्टफलवत्त्वमित्यर्थसम्भव इति सर्वं समञ्जसम् ।

(ग) 'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्त्तते' इति न्यायेन प्रवृत्त्यङ्गं प्रयोजनवत्त्वं दर्शयति, अस्येति ।—अस्य प्रक्रम्यमाणस्येत्यर्थः । काव्याङ्गतया काव्यमङ्गं यस्य तस्य भावस्तत्ता तया तथोक्तया । काव्यफलैरिति—धान्येन धनवान् इतिवत् अभेदे तृतीया, काव्यफलाभिन्नफलवत्त्वमित्यर्थः । एतेन अस्य अङ्गित्वं, काव्यस्य पुनरङ्गत्वं सूचितम् । अतः अङ्गसाफल्येनैव अङ्गिनः साफल्यमिति । यथा दर्शपौर्णमासाङ्गानां प्रयाजादीनां दर्शपौर्णमासफलेनैव फलवत्त्वं, तथाऽस्यापीति भावः । ननु प्रयाजादीनामङ्गापूर्वजननद्वारा परमापूर्वं प्रत्युपकारः सम्भवतीति तत्र तथाऽस्तु, प्रकृते तु शास्त्रस्य काव्यगुणदोषादिज्ञापनोपक्षीणत्वेन चतुर्वर्गं प्रत्युपकारासम्भवात् कथं तत्साधनत्वम् ? इति चेन्न, काव्यं हि स्वरूपं सत् न कारणं, किन्तु, कृतिज्ञप्त्यन्यतरविषयतया, इति अत्रास्योपकारः सम्भवतीति न काऽपि विप्रतिपत्तिः । ननु अस्य चतुर्वर्गातिरिक्तकाव्यगुणादिज्ञानरूपफलसत्त्वात् कथमेवकारार्थान्वयः ? इति चेन्न, 'फलवत्त्वम्' इत्यत्र मतुपः प्रशस्तार्थत्वेनोत्कृष्टफलपरत्वात् । एवञ्च चतुर्वर्गफलसाधनत्वज्ञापनेन अत्र लोकानां साभिनिवेशप्रवृत्तिर्भविष्यतीति भावः । इति—अस्मात् कारणात् इत्यर्थः ।

(घ) काव्यफलप्रदर्शनपुरःसरं काव्यस्वरूपनिरूपणं प्रतिजानीते, चतुर्वर्गेति ।—चतुर्वर्गो धर्मार्थकाममोक्षा एव फलं तस्य प्राप्तिः ; सुखात्—अनायासात् ; अल्पधियां—सुकुमारमतीनाम्, अपिना परिणतबुद्धीनाञ्च, यतो यस्मात् हेतोः काव्यात् । एवकारेण वेदादिशास्त्रव्यवच्छेदः । यद्वा,—'यतः' इति 'काव्यात्' इत्यस्य विशेषणम् ।

चतुर्वर्गफलप्राप्तिर्हि काव्यतः "रामादिवत् प्रवर्त्तितव्यं, न रावणादिवत्" इत्यादिकृत्याकृत्यप्रवृत्तिनिवृत्त्युपदेशद्वारेण सुप्रतीतैव। (ङ)

उक्तञ्च,—"धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।
करोति कीर्त्तिं प्रीतिञ्च साधुकाव्यनिषेवणम्॥" इति(च)

किञ्च,—काव्यात् धर्मप्राप्तिर्भगवन्नारायणचरणारविन्द-स्तवादिना, "एकः शब्दः सुप्रयुक्तः सम्यग्ज्ञातः स्वर्गे लोके च कामधुग् भवति" इत्यादिवेदवाक्येभ्यश्च सुप्रसिद्धैव। अर्थप्राप्तिश्च प्रत्यक्षसिद्धा; कामप्राप्तिश्चार्थद्वारैव। मोक्षप्राप्तिश्चैतज्जन्य-धर्मफलाननुसन्धानात्, मोक्षोपयोगिवाक्ये व्युत्पत्त्याधायक-

---

एवञ्च प्राचीनसम्मतं नीरसकाव्यं चतुर्वर्गासाधनत्वात् न निरूपणीयमिति फलितम्; तेन—यायावरं विना चतुर्वर्गसाधनत्वेन, तस्य काव्यस्य स्वरूपमिति स्वम् असाधारणं रूपम् इतरव्यावर्त्तको धर्मः, लक्षणमित्यर्थः, निरूप्यते ज्ञाप्यते।

(ङ) काव्यस्य चतुर्वर्गसाधनत्वमुपपादयति, चतुर्वर्गफलप्राप्तिर्हीति।—रामादिवत् रामादिनैव, चतुर्वर्गकामेन पित्राज्ञापरिपालनादौ प्रवर्त्तितव्यम्; न रावणादिवत्—रावणादिनैव, परदारहरणादौ न प्रवर्त्तितव्यम् इत्यर्थः। कृत्यं विहितं कर्म, अकृत्यं निषिद्धं कर्म, तयोः प्रवृत्तिनिवृत्ती यत्रविशेषो तयोरुपदेशस्तज्जनकज्ञानं, स एव द्वारं व्यापारः तेन। तथा हि काव्यात् विहितकर्मणि कर्त्तव्यताज्ञानं, ततश्च प्रवृत्तिः, ततः तदनुष्ठानं, ततो धर्मः, तस्मादर्थकामौ, 'धर्मादर्थश्च कामश्च' इति स्मरणात्; विहितकर्मफलत्यागात् निषिद्धाननुष्ठानाच्चापवर्गः, "युक्तः कर्मफलत्यागात् आप्नोति नैष्ठिकीम्" इति स्मरणात्; 'व्यापारेण व्यापारिणो नाम्नाभिधिः' इति न्यायेन काव्यस्य धर्मादिजनकत्वमिति भावः।

(च) अत्र प्राचीनसंवादमाह, उक्तञ्चेति।—धर्मार्थकाममोक्षेषु लक्षणया तदुपायेषु विषयेषु, वैचक्षण्यं—विशिष्टज्ञानं, कलासु—नृत्यगीतादिचतुःषष्टिप्रकारासु च वैचक्षण्यं, कीर्त्तिं—ख्यातिं, प्रीतिं श्रोत्रापनोदपुरःसरं प्रसन्नतां च (कर्म)-साधुकाव्यस्य निषेवणं—स्मरणं ज्ञानञ्च, (कर्त्तृ) करोति—जनयति, यद्वा—'साधु' इति क्रिया-विशेषणम्; तथा च काव्यनिषेवणं (कर्त्तृ) साधु यथा भवेत्तथा करोति इत्यर्थः। अन्यत् पूर्ववत्।

त्वाच्च। चतुर्वर्गप्राप्तिर्हि वेदशास्त्रेभ्यो नीरसतया दुःखादेव परिणतबुद्धीनामेव जायते, परमानन्दसन्दोहजनकतया सुखादेव सुकुमारबुद्धीनामपि पुनः काव्यादेव। (छ)

(छ) ननु काव्यं कर्त्तव्यत्वाकर्त्तव्यत्वज्ञानद्वारा कृत्याकृत्यप्रवृत्तिनिवृत्ती प्रति कारणमास्तां, धर्मादिं प्रति तु अन्यथासिद्धमेवेत्यत आह, किञ्चेति।—काव्यादिति प्राप्त्यन्तपदचतुष्टयेनान्वेति। स्तवः,—गुणज्ञापनम्; आदिना विष्णुजन्मादिज्ञापनं तद्द्वारेत्यर्थः; एवञ्च एतस्य निषेवणमात्रेण सर्वार्थसिद्धौ एकैकार्थसिद्धिहेतुहेतुभूतं शास्त्रान्तरनिषेवणं मन्दप्रयोजनमिति सूचितम्। ननु शास्त्रान्तरापेक्षयाऽस्य अल्पत्वेऽपि एतत् कथं सङ्घटते? इत्याशङ्क्योत्तरयति, एक इति।—एकोऽपीत्यर्थः। सुप्रयुक्तः,—रसवत्तया रचितः, सम्यक्—ताद्रूप्येण ज्ञातः; अत्र वा-कारो बोद्धव्यः। स्वर्गे—परलोके। लोके—अस्मिन् मर्त्ये च, कामधुक्—सर्वार्थसाधकं भवति। इत्यादिवेदवाक्येभ्यः इत्यादिभ्यो वेदसदृशेभ्यो वाक्येभ्यः इत्यर्थः। 'इत्यादिवाक्येभ्यः' इति पाठान्तरे तु—आप्तानामित्यादिभ्यो वाक्येभ्य इत्यर्थः। सत्काव्यकृतिज्ञप्त्यन्यतरस्य धर्मसाधनत्वं वेदप्रसिद्धमिति भावः। तदेव युक्त्या दर्शयन्नाह, प्रत्यक्षसिद्धेति।—धनिस्तवादिना कवीनां धनप्राप्तिर्लोकप्रसिद्धैव इत्यर्थः। कामप्राप्तिश्चेति—काम्यते इति कामो विषयभोगः तस्य प्राप्तिः, "धर्मादर्थस्ततः कामः कामात् सुखसमुन्नतिः" इति स्मरणात्। एतज्जन्येति—काव्यजन्येत्यर्थः। धर्मस्याननुसन्धानादेव तदधीनोत्पत्तिकयोरर्थकामयोरुत्पत्तिसम्भावनैव नास्तीति तयोरनुपादानम्; यद्वा,—धर्मप्रधानं फलं धर्मफलं, तेन अर्थकामयोरपि सङ्ग्रहः; तस्य अननुसन्धानात्—अपारमार्थिकत्वेन साध्यत्वानिर्द्धारणात्। मोक्षोपयोगिवाक्यम्—उपनिषदादि, तत्र व्युत्पत्त्याधायकत्वात्—दृढ़तरज्ञानजनकत्वात्। ननु काव्यादुपनिषदादिव्युत्पत्तिः, ततस्तदर्थानुष्ठानं, ततो मोक्षप्राप्तिरित्यन्यथासिद्धितादवस्थ्यमेवेति चेत्? सत्यम्; उपनिषदादिज्ञानादपि मोक्षप्राप्तिरित्यभिप्रायेणास्योत्थापनात्। काव्यादेवेत्येवकारव्यवच्छेद्यं दर्शयितुमाह, चतुर्वर्गेति।—वेदाः ऋग्यजुःसामाथर्वाख्याः, शास्त्राणि मीमांसादीनि। दुःखादेवेति सुखव्यवच्छेदः। परिणतबुद्धीनां वेदादिभ्यो धर्मादिप्राप्तिः सुखान्न भवति, सुकुमारमतीनान्तु दुःखादपि न भवतीति भावः। परमानन्दसन्दोहः,—रसास्वादसुखपरम्परा, तज्जनकतया—तत्साधकत्वेन। अपिना परिणतबुद्धिसमुच्चयः। काव्यादेवेति एवकारः शास्त्रान्तरं व्यवच्छिनत्ति; तथा च रसास्वादनार्थमपि प्रवर्त्तमानस्य कृत्याकृत्योपदेशपर्य्यवसन्नं सत्काव्यं चतुर्वर्गमपि जनयतीति भावः।

ननु तर्हि परिणतबुद्धिभिः सत्सु वेदशास्त्रेषु काव्येषु किमिति यत्नः करणीयः ? इत्यपि न वक्तव्यम् ;—कटुकौषधोपशमनीयस्य रोगस्य सितशर्करोपशमनीयत्वे कस्य वा रोगिणः सितशर्करा-प्रवृत्तिः साधीयसी न स्यात् ? किञ्च, काव्यस्योपादेयत्वमाग्नेय-पुराणेऽप्युक्तम्, (ज)—

"नरत्वं दुर्लभं तत्र विद्या तत्र सुदुर्लभा।
कवित्वं दुर्लभं तत्र शक्तिस्तत्र सुदुर्लभा॥" इति। (झ)

(ज) ननु चतुर्वर्गार्थे प्रेक्षावतः वेदादीननादृत्य किमित्यनाप्तवाक्ये काव्ये प्रवर्त्तन्ताम् ? इत्यभिप्रायेण शङ्कते, नन्विति।—तर्हि—काव्यस्य चतुर्वर्गसाधनत्व-स्वीकारेऽपि। यत्नः,—चतुर्वर्गार्थमुद्यमः। काव्यात् तावत् रसास्वादो दुःखं विना धर्मादिप्राप्तिश्च भवति; वेदादिभ्यस्तु दुःखेनैव धर्मादिप्राप्तिरेवेति वेदाद्यपेक्षया काव्यस्यादर इति सर्वं समीचीनम्। एतदेव लौकिकदृष्टान्तेन दृढयति, कटुकेति।—कटुकेति तिक्तायुपलक्षणम्। सितशर्करेति।—सितशर्करा—अतिशुभगुडविकार-विशेषः, तया उपशमनीयत्वे प्रतिकार्यत्वे। ततश्च काव्यस्य अनाप्तवाक्यत्वेऽपि स्मृति-सदाचारवत् वेदानुमापकत्वेन प्रामाण्यमवगन्तव्यमिति भावः। काव्यस्य सयौक्तिक-मुपादेयत्वमुपपाद्य वाचनिकं तदुपपादयति,—किञ्चेति। आग्नेयपुराणे षट्त्रिंश-दधिकत्रिशततमे (३३६) अध्याये। अग्निना किं पुनरन्यत्रेति लभ्यते।

(झ) तदेव वाक्यमवतारयति, नरत्वमिति।—लोके जगति प्रथमतयः तावत् मानवजन्म दुर्लभम् अशीतिलक्षयोनिभ्रमणान्ते तस्याधिगमादिति भावः। तत्रापि नरत्वं तद्भवः दयादाक्षिण्यादिसहितसदसत्कार्यविवेकित्वं नितान्तं दुर्लभमिति; तत्र नरत्वे विद्या शास्त्रज्ञानं सुदुर्लभा अतिदुष्प्रापा। तत्र विद्यायामपि इत्यर्थः, कवित्वं काव्यरचयितृत्वं दुर्लभं दुष्प्रापम्। यदि कोऽपि विद्वान् कथञ्चित् एकं द्वौ वा श्लोकौ रचयितुं शक्नोति, किन्तु काव्यतत्त्वं प्रणेतुं नेत्याह, शक्तिरिति।—शक्तिः सामर्थ्यं, काव्यकरणज्ञानान्यतरजनकः संस्कारविशेषः, सुदुर्लभा अतिदुरापेत्यर्थः। 'व्युत्पत्ति-र्दुर्लभा तत्र विवेकस्तत्र दुर्लभः' इत्यादौति शेषः। ततश्च बहुतरपुण्यसापेक्षता काव्य-कृतिज्ञशिक्षकैरिति फलितम्। शक्त्यादीनां स्वरूपं यथोक्तं रुद्रटभट्टैः,—"मनसि सदा सुलभाधिनि विस्फुरणमनेकधाऽभिधेयस्य। अक्लिष्टानि पदानि च विभान्ति यस्यामसौ शक्तिः॥ प्रतिभेत्यपरैरुदिता सहजोत्पाद्या च सा द्विधा भवति। पुंसा सहजा जातत्वा-

"त्रिवर्गसाधनं नाट्यम्" इति च। (ञ)

विष्णुपुराणेऽपि,—

"काव्यालापाश्च ये केचित् गीतकान्यखिलानि च।
शब्दमूर्त्तिधरस्यैते विष्णोरंशा महात्मनः॥" इति। (ट)

तेन हेतुना तस्य काव्यस्य स्वरूपं निरूप्यते। एतेनाभिधेयञ्च प्रदर्शितम्। (ठ)

दनयोस्तु ज्यायसी सहजा॥ स्वस्यासौ संस्कारे परमपरं मृगयते यतो हेतुम्। उत्पाद्या तु कथञ्चिद् व्युत्पत्त्या जन्यते परया॥ छन्दोव्याकरणकलालोकस्थितिपदपदार्थविज्ञानात्। युक्तायुक्तविवेको व्युत्पत्तिरियं समासेन॥ विस्तरतस्तु किमन्यत् तत इह वाच्यं न वाचकं लोके। न भवति यत्काव्याङ्गं सर्वज्ञत्वं ततोऽन्यैषा॥ अधिगतसकलज्ञेयः सुकवेः सुजनस्य सन्निधौ नियतम्। नक्तंदिनमभ्यस्येदभियुक्तः शक्तिमान् काव्यम्॥" इति। अत्रेदं बोध्यम्;—"प्रतिभैव श्रुताभ्यास-सहिता कवितां प्रति। हेतुर्मृदम्बुसम्बद्ध-बीजव्यक्तिर्लतामिव॥" इत्युक्तदिशा प्रतिभाऽपरपर्य्याया शक्तिरभ्यासापरपर्य्यायाऽभ्याससहिता काव्योद्भावनं प्रति, लतोद्भवं प्रति बीजव्यक्तिरिव हेतुः, तत्र बीजव्यक्तिसमा प्रतिभा, मृदम्बुवच्च श्रुतादीनामभ्यासः इति दिक्।

(ञ) त्रिवर्गसाधनमिति।—त्रयाणां वर्गः धर्मार्थकामा इत्यर्थः, तस्य साधनं लाभोपाय इत्यर्थः। नाट्यम्—अभिनेयनाटकादि। इति चेति उक्तमिति पूर्वेणान्वेति।

(ट) पुनश्च काव्यस्योपादेयत्वं विष्णुपुराणप्रामाण्यात् द्रढ़यति, काव्यालापाश्चेति।—ये केचित् काव्यालापाः सरसशब्दार्थव्याहाराः, यानि च अखिलानि समग्राणि, गीतकानि सङ्गीतयः, विद्यन्ते इति शेषः, एते शब्दमूर्त्तिधरस्य वेदमयस्य, महात्मनः विष्णोः नारायणस्य, अंशाः स्वरूपविशेषा इत्यर्थः। अतः तत्सेवनफलस्य नारायणसेवासमफलत्वं, तेन महापुण्यसम्भव इति भावः।

(ठ) तेन हेतुना—चतुर्वर्गफलसाधनत्वेनेति भावः। अभिधेयञ्च—अस्य ग्रन्थस्य वाच्यञ्च। एतेन—चतुर्वर्गफलप्राप्तिरित्यनेन अभिहितम्; चकारात् प्रयोजनसम्बन्धावपि समुच्चीयेते। सम्बन्धश्चात्र प्रयोजनाभिधेययोः कार्य्यकारणभावरूप इति। अयं भावः,—"सिद्धार्थं सिद्धसम्बद्धं श्रोतुं श्रोता प्रवर्त्तते। शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः॥" इति न्यायात् शास्त्रादौ सम्बन्धादीनामभिधानमुचितमितीदमभिधानम् इति।

तत् किंस्वरूपं तावत् काव्यम्? इत्यपेक्षायां कश्चिदाह,—"तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि" इति। एतच्चिन्त्यम्; (ड) तथाहि, यदि दोषरहितस्यैव काव्यत्वाङ्गीकारस्तदा,—

"न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः
सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो! रावणः।
धिक् धिक् शक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा!!
स्वर्गग्रामटिका-विलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः?॥" (ढ)

(ड) तदिति।—तत्—निरुक्तप्रयोजनं काव्यम्। तावदिति वाक्यालङ्कारे। किंस्वरूपमिति—किं स्वरूपं लक्षणं यस्य तथोक्तम्। इत्यपेक्षायाम्—इति शङ्कायाम्। आह—ब्रूते। कश्चित्—मम्मटभट्टः इत्यर्थः। अदोषौ—वक्ष्यमाणदोषवर्जितौ, सगुणौ—वक्ष्यमाणगुणसमन्वितौ। क्वापि पुनः अनलङ्कृती—अलङ्कारशून्यौ अस्फुटालङ्कारौ वा। शब्दार्थौ—शब्दश्च अर्थश्च तौ अर्थविशिष्टः शब्द इति भावः। तत्—काव्यमित्यर्थः। [केचित्तु "शब्दार्थोभयपर्य्याप्तत्वं काव्यत्वम्" इत्याहुः, तन्न; तथा सति, शब्दमात्रप्रत्यक्षत्वे काव्यं शृणोमीति न प्रयुज्येत, व्यासज्यवृत्तिधर्मस्य लौकिकप्रत्यक्षे स्वाश्रयप्रत्यक्षस्य कारणात्]। एतत्—लक्षणमिति यावत्। चिन्त्यं—विचार्य्यं, दूष्यमिति यावत्।

(ढ) न्यक्कार इति।—राक्षसकुलं विनाशयति श्रीरामभद्रे रावणस्य हनुमन्नाटके स्वभर्त्सनोक्तिरियम्। मे मम, यत् अरयः शत्रवः, वर्त्तन्ते इति शेषः, अयमेव अरिसद्भाव एव, न्यक्कारः धिक्कारः, त्रिलोकाधिपतेर्विजितसर्वारेः शत्रुसद्भावस्य अनादरातिशयप्रतिपादनाय न्यक्कारत्वेन आरोपः। तत्रापि तेषु अरिषु सत्स्वपि, असौ रामः तापसः तपस्विभक्षकस्य मम अरिरयमिति द्वितीयो न्यक्कार इति शेषः। द्वेषातिशयख्यापनाय रामस्य अदःशब्देन निर्देशः, न तु नाम्नेति बोध्यम्। सोऽपि तथाविधोऽपि, अत्रैव लङ्कायामेव, न तु दूरे इति भावः, राक्षसकुलं निहन्ति, न तु निभृतं कुत्रापि अवतिष्ठते; नापि द्वित्रान् राक्षसान् नाशयति, अपि तु तत्कुलम्, इति तृतीयो न्यक्कारः इति शेषः। रावणः जीवति; अहो आश्चर्य्यम्!! एतादृशपरिभवेऽपि रावणस्य जीवनम्? किमतः परमसम्भवं सम्भवनीयं स्यादिति भावः। शक्रजितं यः शक्रम् इन्द्रं जितवान् तं मेघनादमित्यर्थः; धिक् धिक्, इन्द्रजेताऽपि नरवानराणां

अस्य श्लोकस्य विधेयाविमर्शदोषदुष्टतया काव्यत्वं न स्यात्, प्रत्युत ध्वनित्वेनोत्तमकाव्यताऽस्याङ्गीकृता; तस्मादव्याप्तिर्लक्षणदोषः। ननु कश्चिदेवांशोऽत्र दुष्टः, न पुनः सर्व एवेति चेत्; तर्हि यत्रांशे दोषः सोऽकाव्यत्वप्रयोजकः, यत्र ध्वनिः स उत्तमकाव्यत्वप्रयोजकः, इत्यंशाभ्यामुभयत आकृष्यमाणमिदं काव्यमकाव्यं वा किमपि न स्यात्। न च कश्चिदेवांशं काव्यस्य दूषयन्तः श्रुतिदुष्टादयो दोषाः, किं तर्हि सर्वमेव काव्यम्? तथाहि,—काव्यात्मभूतस्य रसस्यानपकर्षकत्वे तेषां दोषत्वमपि नाङ्गीक्रियते; अन्यथा नित्यदोषानित्यदोषत्वव्यवस्थाऽपि न स्यात्। यदुक्तं ध्वनिकृता, (ण)—

न किञ्चित् अनिष्टं साधितवान् इति पुनः पुनर्निन्दामि इत्यर्थः। प्रबोधितवता—प्रबुद्धेन ['बुधिर् बोधने' इत्यस्य भौवादिकस्य रूपमिदम्; न तु 'बुध अवगमने' इत्यस्य दैवादिकस्य, तस्यानिट्त्वात्। यद्वा,—प्रबोधितं प्रबोधनमस्यास्तीति तथोक्तेन जागरितेनेत्यर्थः, यद्वा,—दैवादिकस्य णिजन्तबुधधातो रूपमिदं, तेन अस्माभिः अकाले निद्रात्यागं कारितवता इत्यर्थः] कुम्भकर्णेन किम्? तेनापि न किमपि कार्य्यं साधितमिति भावः। स्वर्ग एव ग्रामटिका क्षुद्रग्रामः तस्या विलुण्ठनेन वृथा उच्छूनैः अयथा बलदर्पितैः इत्यर्थः, एभिः भुजैः बाहुभिः, विंशत्या इति शेषः, न तु द्वाभ्यां, किम्? निष्प्रयोजना इमे बाहव इत्यर्थः। शार्दूलविक्रीडितं वृत्तम्,—"सूर्य्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितम्" इति लक्षणात्।

(ण) विधेयाविमर्शेति।—विधेयस्य साध्यस्य, अविमर्शः अप्राधान्येन निर्द्देशः, स एव दोषः तेन दुष्टतया दोषयुक्ततया। अत्र श्लोके विधेयस्य न्यक्कारस्य "अनुवाद्यमनुक्त्वैव न विधेयमुदीरयेत्। न ह्यलब्धास्पदं किञ्चित् कुत्रचित् प्रतितिष्ठति॥" इत्युक्तन्यायेन रचनावैपरीत्यात् अप्राधान्येन निर्देशः, तथा स्वर्गग्रामटिकेत्यत्र वृथात्वं विधेयं समासे गुणीभावात् अनुवाद्यताप्रतीतिकरमिति द्विविधो विधेयाविमर्शो द्रष्टव्यः। अत्र इष्टापत्तौ दोषमाह, प्रत्युतेति।—प्रत्युत—वैपरीत्ये। ध्वनित्वेन—वाच्यार्थादधिकचमत्कारिव्यङ्ग्यार्थवत्तया;—"इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः" इति लक्षणात्। अस्य—श्लोकस्य। उत्तमकाव्यता अङ्गीकृता—स्वीकृता। अत्र ईर्ष्याजन्यस्यावमानेन निर्वेदाख्यस्य सञ्चारिभावस्य व्यङ्ग्यतया ध्वनिसत्त्वमवगन्तव्यम्।

तस्मात्—उक्तदोषसद्भावेऽपि काव्यत्वाङ्गीकारात्। अव्याप्तिः,—लक्ष्ये लक्षणागमनरूपो दोषः। अयं भावः,—"सुप्तिङ्वचनसम्बन्धैस्तथा कारकशक्तिभिः। कृत्तद्धितसमासैश्च द्योत्यो लक्ष्यक्रमः क्वचित्॥" इति ध्वनिकारोक्तदिशाऽत्र भूयसा अंशेन सुबादीनां स्फुटं व्यञ्जकत्वमुपलक्ष्यते। तथाहि—"मे यदरयः" इति अस्मत्सम्बन्धकथनात् मदीय-शत्रुसद्भावः कथमपि न युज्यते इति व्यज्यते, "अरयः" इत्यत्र बहुवचनं मम शत्रुसद्भाव एव नितान्तमनुचितः, किं पुनस्तत्रापि बाहुल्यमिति व्यनक्ति। "तत्राप्यसौ तापसः" इति तपःशब्दात् प्रयुक्तेन मत्वर्थीयाण्प्रत्ययेन पौरुषराहित्यमभिव्यज्यते। तत्रापीत्यनेन शत्रुसद्भावे अत्यन्तासम्भाव्यत्वं सूचितम्। "अत्रैव" इति यत्र मया अधिष्ठीयते, तदेव स्थानमस्य हननक्रियाया आधारभूतमिति व्यनक्ति। "निहन्ति" इत्यत्र निपातेन निर्मूलं हननं सूचितम्। "जीवति" इति वर्त्तमानप्रयोगेण तादृशहननक्रियासमानकालीना मदीया इयं जीवनक्रिया नितान्तमयुक्ता इति ध्वनितम्। तस्मादेवं कारकप्रकृति-निपातादिभिः यथोक्तम् असम्भवनीयमिदमुपस्थितमिति स्वस्य प्रतीकारासामर्थ्येन पौरुषाभावो व्यज्यते। तथा "रावणः" इति पदं लोकान् रावयति दुःखाकृत्य रोदयति इति यौगिकार्थं परित्यजत् इदानीं स्वस्य अत्यन्तविपरीतार्थे सङ्क्रमितत्वं सूचयति। "शक्रजितम्" इति "अयं शक्रं जितवान्" इति लोकप्रचारिताख्यानं तापसनिर्जितस्य न कथमपि बहुमानास्पदमिति व्यनक्ति। "स्वर्गग्रामटिका" इत्यनेन स्वर्गविजयजन्य-स्वपौरुषानुस्मरणस्य नितान्तमयुक्तत्वं व्यनक्ति। "वृथा" इत्यनेन च स्व-गतपौरुषस्य निन्दा अभिव्यज्यते इति सुधीभिर्विभाव्यम्। एवं व्यञ्जकभूयस्त्वे प्रतीयमाने वाच्यातिशायी चमत्कारः समुल्लसति, तेनास्योत्तमकाव्यत्वमेव युक्तं, न तु काव्यत्ववैकल्यम् इति। ननु विधेयाविमर्शदोषस्तादांशिकः, तेन सर्वं काव्यं न दुष्टं, निर्दोषस्यैव गुणालङ्कारसद्भावे काव्यत्वमित्यभिप्रायेणाशङ्कते,नन्वित्यादिना।—अत्र—न्यक्कारो ह्ययमेवेति पद्ये इत्यर्थः। पूर्ववादिनस्तात्पर्य्यमुन्नीय दूषयति,—तर्हीति। अशाभ्यां—दुष्टादुष्टभागाभ्याम्। उभयतः,—काव्यत्वाकाव्यत्वाभ्याम्। आकृष्यमाणं—व्यावर्त्तमानम्। इदं—न्यक्कार इति पद्यम्। श्रुतिदुष्टादयः इत्यादिशब्दात् अपुष्टत्वादिग्रहणम्। तथाहि—तमेवार्थमवगच्छ इत्यर्थः। काव्यात्मभूतस्य—काव्यस्य रसात्मकवाक्यस्य, आत्मभूतस्य आत्मतां प्राप्तस्य। रसस्य—वक्ष्यमाणस्य शृङ्गारादिरूपस्य। अनपकर्षकत्वे—अपकर्षानाधायकत्वे। तेषां—श्रुतिदुष्टत्वादीनाम्। दोषत्वमपि—दोषावहत्वमपि। न अङ्गीक्रियते—न स्वीक्रि-यते। ननु दोषाः सर्वदैव दोषावहाः, ते कदाचित् न दोषावहा इति कथम्? इत्याशङ्क्याह, अन्यथेति।—अन्यथा—वैपरीत्ये इत्यर्थः। नित्यदोषाः च्युतसंस्कारता-दयः, अनित्यदोषाः श्रुतिदुष्टत्वादयः तेषां भावः, तस्य व्यवस्था निर्द्धारणम्। न

"श्रुतिदुष्टादयो दोषा अनित्या ये च दर्शिताः।
ध्वन्यात्मन्येव शृङ्गारे ते हेया इत्युदाहृताः" ॥ इति (त)

किञ्चैवं काव्यं प्रविरलविषयं निर्विषयं वा स्यात्, सर्वथा निर्दोषस्यैकान्तमसम्भवात्। ननु ईषदर्थे नञः प्रयोग इति चेत्; तर्हि ईषद्दोषौ शब्दार्थौ काव्यमित्युक्तेर्निर्दोषयोः काव्यत्वं न स्यात्। सति सम्भवे ईषद्दोषाविति चेत्; एतदपि काव्यलक्षणेऽवाच्यं, रत्नादिलक्षणे कीटानुवेधादिपरिहारवत्; न हि कीटानुवेधादयो रत्नस्य रत्नत्वं व्याहन्तुमीशाः, किन्तु उपादेयतारतम्यमेव कर्त्तुम्; तद्वदत्र श्रुतिदुष्टादयोऽपि काव्यस्य। (थ)

स्यात्—न भवेत्। रसापकर्षकत्वसामान्येन श्रुतिदुष्टत्वादयो दोषतामावहन्ति, यदा तु रसं नापकर्षयन्ति न वा उत्कर्षयन्ति तदा ते न दोषाः। तस्मात् ते अनित्यदोषाः। व्युत्पत्तिसंस्कारतादृश्यस्तु सर्वदैव रसमपकर्षयन्तीति ते नित्यदोषा इति भावः। अत्र तु विधेयाविमर्शदोषः रसापकर्षकतया सर्वमेव पद्यं दूषयतीति नास्यांशिकतेति फलितम्। उक्तमर्थं प्रमाणेन दृढयति,—यदुक्तमिति।

(त) श्रुतिदुष्टादय इति।—ये च श्रुतिदुष्टादयः अनित्याः असार्वकालिकाः, दोषा दर्शिताः, ते ध्वन्यात्मनि व्यङ्ग्यप्रधाने शृङ्गारे एव, हेयाः त्याज्या इति उदाहृताः उक्ताः; एवकारो अन्यत्र व्यवच्छेदकः, तेन रौद्रवीरादिरसे उद्धतस्य वक्तुः श्रुतिकटुत्वादिकं गुण एव, एतच्च उत्तरत्र स्फुटीकरिष्यते ग्रन्थकृता।

(थ) ननु 'रसापकर्षका दोषाः' इति त्वदुक्त्यापि दोषाणां त्याज्यत्वे 'अदोषौ शब्दार्थौ काव्यम्' इति युक्तमेव, इत्याशङ्क्यापत्त्यन्तरमाह, किञ्चेत्यादिना।—एवं—निर्दोषस्य एव काव्यत्वाङ्गीकारे। काव्यम्—उपचारात्तल्लक्षणं, त्वदुक्तकाव्यलक्षणमिति यावत्। प्रविरलविषयं—स्वल्पलक्ष्यम्। निर्विषयं—निर्लक्ष्यमेव वा स्यादिति भावः। एकान्तम्—अत्यन्तम्। ननु यदि सर्वमेव दोषः सम्भवति, तदा "ईषद्दोषौ शब्दार्थौ काव्यम्" इति विवक्षणीयमित्यभिप्रायेणाह,—नन्विति। यदि निपुणतरकविना निर्दोषं काव्यं रचयितुं शक्यते, तदा तवाव्याप्तिं दर्शयति, तर्हीति।—नञ ईषदर्थस्वीकारे इत्यर्थः। सति सम्भवे इति—ततश्च सदोषाणां मध्ये ईषद्दोषावेव शब्दार्थौ काव्यमित्यंशकरणे बलवद्दोषरहितावित्यर्थः सम्पद्यते इति। एतत् दूषयति, एतदपीति।—

उक्तञ्च,—"कोटानुविद्धरत्नादि-साधारण्येन काव्यता।
दुष्टेष्वपि मता यत्र रसाद्यनुगमः स्फुटः॥" इति। (८)
किञ्च,—शब्दार्थयोः सगुणत्व-विशेषणमनुपपन्नम्; गुणानां रसैकधर्मत्वस्य "ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः" इत्यादिना तेनैव प्रतिपादितत्वात्। रसाभिव्यञ्जकत्वेन उप-

बलवद्दोषरहितत्वमपीत्यर्थः। रत्नादीत्यादिपदेन सुवर्णादिग्रहणम्; कोटानुविद्धादीत्यादिपदेन मलिनत्वादिपरिग्रहः। परिहारो राहित्यम्। दृष्टान्तं विहरन् प्रकृतमुपपादयति, न हीति।—रत्नस्य—रत्नादेः। रत्नत्वं—रत्नादित्वम्। व्याहन्तुं—व्यावर्त्तयितुम्। ईशाः,—समर्थाः। उपादेयतारतम्यम—उपादेयस्य रत्नादेस्तारतम्यमुत्कृष्टत्वापकृष्टत्वरूपं, तत्कृतं भेदमिति यावत्; तद्वत्, अत्र—काव्ये। वर्त्तमाना अपि श्रुतिदुष्टादयः,—श्रुतिदुष्टत्वादयो दोषा इत्यर्थः, काव्यस्य काव्यत्वं व्याहन्तुं नेशाः, किन्तु उपादेयतारतम्यमेव कर्त्तुमित्यनेनान्वयः।

(८) अस्यार्थं प्रमाणमुपदर्शयति, उक्तञ्चेति।—कोटानुविद्धं कोटिगतं यत् रत्नादि तस्य साधारण्येन साम्येन, यत्र स्फुटः सुव्यक्ताः, रसादीनाम् [आदिपदेन रसाभासादयो गृह्यन्ते] अनुगमः अनुवर्त्तनं, सत एवोपलब्धिः इति यावत्; तत्र दृष्टेष्वपि काव्यता मता अङ्गीकृता [यत्रास्य अन्यत्रेति पाठे—अदृष्टेषु इत्यर्थः] तथा चाव्याप्तिरतिव्याप्तिरेवात्र दोष इति बोध्यम्। केचित्तु 'अदोषौ' इति च्युतसंस्कृतिभवन्मतयोगक्लिष्टत्वादयो ये शाब्दबोधविघटकाः दोषास्तत्सामान्याभाववन्तौ इत्यर्थः, एते रसबोधप्रतिबन्धकाः, दोषान्तरन्तु काव्यापकर्षकमित्याहुः, तन्न; व्यतिरेकव्यभिचारुदाहरणे "धन्याऽसि या कथयसि प्रियसङ्गमेऽपि विश्रम्भचाटुकशतानि रतान्तरेषु। नीवीं प्रति प्रणिहिते तु करे प्रियेण सख्यः शपामि यदि किञ्चिदपि स्मरामि॥" इत्यत्र "शपामि" इति च्युतसंस्कृतिदोषसत्त्वात् "निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः।" इत्यादावञ्जनस्य अत्यन्तासक्तबोधाभप्रायेण प्रयुक्तस्य "दूरम्" इत्यस्य, समासे गुणीभूतेन नञर्थेन सहान्वयेनाभवन्मतयोगत्वदोषसत्त्वाच्चाव्याप्तेः। अध्याहार्यक्रियान्वयेन तदुपपत्तावप्यभिहितान्वयाभावेन तद्दोषतादवस्थ्यात्। काव्यप्रकाशकारैरेवानयोरुक्तमकाव्यत्वस्वीकारात्। "अदृष्टे दर्शनोत्कण्ठा दृष्टे विच्छेदभीरुता। नादृष्टेन न दृष्टेन भवता लभ्यते सुखम्॥" इत्यस्फुटाख्यगुणीभूतव्यङ्ग्योदाहरणे पूर्वार्द्धे भवच्छब्दार्थान्वयासम्भवरूपाभवन्मतयोगसत्त्वाच्चाव्याप्तेः। "नादृष्टे च न दृष्टे च भवति प्राप्यते सुखम्" इति पाठो युक्तः।

चारतः उपपद्यते इति चेत्? तथाऽप्ययुक्तम्। तथा हि,—तयोः काव्यस्वरूपत्वेन अभिमतयोः शब्दार्थयोः रसोऽस्ति न वा? नास्ति चेत्, गुणवत्त्वमपि नास्ति; गुणानां तदन्वयव्यतिरेकानुविधायित्वात्। अस्ति चेत् कथं नोक्तं रसवन्ताविति विशेषणम्? गुणवत्त्वान्यथाऽनुपपत्त्या एतल्लभ्यत इति चेत्? तर्हि सरसाविति वक्तुं युक्तं, न सगुणाविति। न हि "प्राणिमन्तो देशाः" इति वक्तव्ये "शौर्यादिमन्तो देशाः" इति केनापि उच्यते। ननु "शब्दार्थौ सगुणौ" इत्यनेन गुणाभिव्यञ्जकौ शब्दार्थौ काव्ये प्रयोज्यावित्यभिप्राय इति चेत्, न—गुणाभिव्यञ्जकशब्दार्थवत्त्वस्य काव्ये उत्कर्षमात्राधायकत्वं, न तु स्वरूपाधायकत्वम् (ध)।

उक्तं हि,—"काव्यस्य शब्दार्थौ शरीरं, रसादिरात्मा, गुणाः शौर्यादिवत्, दोषाः काणत्वादिवत्, रीतयोऽवयवसंस्थानविशेषवत्, अलङ्काराः कटककुण्डलादिवत्" इति। एतेन "अनलङ्कृती पुनः क्वापि" इति यदुक्तं तदपि परास्तम्। अस्य हि अर्थः,—"सर्वत्र सालङ्कारौ क्वचित् तु अस्फुटालङ्कारावपि शब्दार्थौ काव्यम्" इति। तत्र सालङ्कारशब्दार्थयोरपि

(ध) इत्यम् अदोषाविति शब्दार्थविशेषणं दूषयित्वा सगुणाविति विशेषणं दूषयति, किञ्चेति।—न हि शब्दार्थेषु गुणानामवस्थानं, रसेष्वेव तदवस्थानस्य 'ये रसस्याङ्गिनः' इत्यनेन स्वयं प्रतिपादितत्वादिति भावः। रसाभिव्यञ्जकत्वेन—रसादिप्रकाशकत्वेन। उपचारतः,—परम्परया। उपपद्यते—युज्यते, सगुणत्वविशेषणमिति शेषः। तदन्वयेति।—तस्य रसस्य अन्वयः तत्सत्त्वे तत्सत्त्वं, व्यतिरेकः तदसत्त्वे तदसत्त्वं, तयोरनुविधायित्वात्—सदसद्भावशालित्वात्। अयं भावः,—यत्र यत्र गुणोऽस्ति, तत्र तत्र रसोऽस्तीति अन्वयः। यत्र यत्र रसो नास्ति तत्र तत्र गुणो नास्तीति व्यतिरेक इति। गुणवत्त्वेति।—गुणवत्त्वस्य—सगुणत्वस्य। अन्यथाऽनुपपत्तेः,—विना रससंस्पृतेः इत्यर्थः। एतत्—रसवन्ताविति विशेषणम्। उत्कर्षमात्राधायकत्वम्—उत्कर्षमात्रजनकत्वम्। स्वरूपाधायकत्वं—तस्य रूपं लक्षणं तस्य आधायकत्वं साधकत्वम्।

काव्ये उत्कर्षमात्राधायकत्वात्। एतेन "वक्रोक्तिः काव्यजीवितम्" इति वक्रोक्तिजीवितकारोक्तमपि परास्तम्; वक्रोक्तेरलङ्काररूपत्वात् (न)। यच्च क्वचिदस्फुटालङ्कारत्वे उदाहृतम्।—

"यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपाः
ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः।
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ
रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते॥" (प)

(न) उक्तमिति।—रसादिरित्यादिपदेन रसाभासभावतदाभासभावशान्तिभावोदयभावसन्धिभावशबलत्वादीनां ग्रहणम्। गुणाः,—माधुर्यौजःप्रसादाख्याः वक्ष्यमाणाः। दोषाः,—श्रुतिदुष्टत्वादयः। रीतयः,—वैदर्भीगौडीपाञ्चालीलाटीप्रभृतयः। अलङ्काराः,—अनुप्रासोपमादयः। एतेन—वक्ष्यमाणहेतुना। परास्तं—निराकृतम्। उत्कर्षमात्राधायकत्वात्—उत्कर्षमात्रजनकत्वात्, न तु स्वरूपाधायकत्वमिति शेषः। एतेन—उक्तहेतुना। वक्रोक्तिः,—वक्रा विचित्रा उक्तिः; वैचित्र्यमित्यर्थः।

(प) य इति।—कौमारे रेवातीरे वेतसीतले कृतक्रीडायाः पुनः तत् स्थानं प्रति उत्सुकाया नायिकाया उक्तिरियम्। यः कौमारं हरति विवाहेन अपनयतीति कौमारहरः पतिः ['हरतेरनुदृयमनेऽच्' (३।२।६ पा०) इत्यच्] स एव वरः अभिमतः, [एतेन इदानीमपि अभिमतस्य पत्युः सत्तायाः प्रतिपादितत्वात् उपपत्यसन्निधानस्य स्वोत्कण्ठाकारत्वं वारितम्। अत्र "एव, हि" इति शब्दद्वयोपादानमुपपतेरत्यन्तासम्भवित्वसूचनाय] अत्रापि तत्तद्रतिकारणमस्तीत्यत आह, ता एवेति।—ता एव यासु तत्र क्रीडितं तत्सनाथा इत्यर्थः, चैत्रक्षपाः,—मधुयामिन्यः, वासन्तीनिशाः इति यावत्। उन्मीलितामिर्विकसिताभिः, मालतीभिः पुष्पतरुविशेषैः, सुरभयः सौरभवाहिनः, प्रशस्तम ऊर्द्धं गतिर्येषां तादृशाः प्रौढाः मन्दवहाः, 'अनुकूलो वहन् वायुः' इत्यादौ वहधातोर्गमनार्थता प्रसिद्धा। वायुगमनस्य प्राशस्त्यं हि मान्द्यम्; 'मन्दं मन्दं वहति पवनो रक्षयन् इव चेतः' इत्यादि दर्शनात्। कदम्बानिलाः,—कदम्बानां धूलिकदम्बानां वायवः चैत्रे तेषामेव सद्भावादिति भावः। केचित् तु—कदम्बानिलाः कदम्बवनवाताः, वनानिलानां प्रौढत्वे वनवह्निभूतानां मान्द्योपलम्भात् उद्दीपकत्वेन आहुः,—प्रौढा इति व्याचक्षुः; तन्न, तथात्वे कदम्बपर्य्यन्तानुधावनस्य

एतच्चिन्त्यम्। अत्र हि विभावना-विशेषोक्तिमूलस्य सन्देह-सङ्करालङ्कारस्य स्फुटत्वम्। एतेन,—

"अदोषं गुणवत् काव्यमलङ्कारैरलङ्कृतम्।
रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिञ्च विन्दति॥" (फ)

निष्प्रयोजनकत्वात् अरण्यानिला इत्यनेनैव तदर्थलाभात्। न च मालतीसम्बन्धेनैवानिलानां सौगन्ध्यलाभात् कदम्बसम्बन्धदर्शनं व्यर्थमिति वाच्यं, विलक्षणसौगन्ध्यलाभाय तस्य सार्थकत्वात्; यथा 'रमणीकमनीयकपोलतले परिपीतपटीररसैरलसः। अयमस्ति पयोधरानुचरो नवनीपवनीधुवनः पवनः॥" नवेति—नवपुष्पितेत्यर्थः। अत्र चन्दनसम्बन्धेन सौगन्ध्यलाभेऽपि विलक्षणसौगन्ध्यलाभाय कदम्बसम्बन्धवर्णनम्। सा चैव—तदवस्थैव। अस्मि—भवामि, वर्ते इत्यर्थः। तथाऽपि—तादृशसामग्रीसत्त्वेऽपि। सुरतव्यापारलीलाविधौ—निधुवनव्यापारविधानार्थम्। रेवेति।—रेवायाः, नर्मदायाः, रोधसि तटे। वेतसीतरुतले चेतः,—चित्तम्। समुत्कण्ठते—तत्रैव विहर्तुमभिलषतीत्यर्थः। मार्दङ्गिकीडितं वृत्तम्।

(फ) एतत्—अस्फुटालङ्कारत्वे उदाहरणं, चिन्त्यं—विचार्यं, दूषयन्तीत्यर्थः। विभावनेति।—विभावना—विना हेतुं कार्योत्पत्तिरूपा, विशेषोक्तिः,—सति हेतौ फलाभावरूपा, ते मूलं यस्य तादृशस्य, ताभ्यां निरूपितस्य इत्यर्थः। सन्देहसङ्करालङ्कारस्य—किमत्र विभावना भवति, विशेषोक्तिर्वा? इत्येवंरूपस्य अलङ्कारस्य। स्फुटत्वं—सुव्यक्तत्वम्। तथा हि उत्कण्ठायाः पत्याद्यभावरूपकारणं विनाऽपि उत्कण्ठारूपकार्योक्तथनात् किमियं विभावना? किं वा उत्कण्ठाभावस्य कारणस्य पत्यादेः सत्त्वेऽपि फलरूपस्य उत्कण्ठाभावस्य अकथनात् विशेषोक्तिः? इति सन्देहः स्फुटतया प्रतिभाति। [कैश्चित् तु—"रेवातीरे कृतसङ्केतायाः नायिकायाः स्वगृहे सखीं प्रत्युक्तिरियम; यः कौमारे अनूढावस्थायां हरतीति कौमारहरः जार इत्यर्थः, स एव हि वरः विलक्षणरतिसमर्थतया अभिमतः इत्यर्थः; (अन्यत् सर्वं पूर्ववत्)। एवञ्चात्र रसस्य प्रधानत्वान्नालङ्कारतेति काव्यप्रकाशकारोक्तौ रसस्य रसाभासस्य इत्यर्थः, रतेरुपपतिगोचरत्वेन रसाभासस्यैव सम्भवात् इत्याहुः; तन्न, व्यङ्ग्याभावादुपपतेरलाभात्। वक्तृवैशिष्ट्यमेव व्यङ्ग्यमिति चेन्न, वक्तृतादृशवैशिष्ट्ये प्रमाणाभावात्; प्रत्युत स एव हि वर इत्यनेन उपपतिरतेरत्यन्तासम्भावितत्वमुक्तम्]। एतेन—उक्तदोषसमूहेन। अदोषमिति।—अदोषं दोषशून्यं, गुणवत् सगुणम्, अलङ्कारैरलङ्कृतं सालङ्कारमित्यर्थः, रसान्वितं काव्यं कुर्वन् कविः कीर्तिं यशः, प्रीतिम् आनन्दञ्च, विन्दति लभते।

PRESENTATION

इत्यादीनामपि काव्यलक्षणत्वमपास्तम्। यत्तु ध्वनिकारेणोक्तं "काव्यस्यात्मा ध्वनिः" इति, तत् किं वस्त्वलङ्काररसादिलक्षणस्त्रिरूपो ध्वनिः काव्यस्यात्मा? उत रसादिरूपमात्रो वा? नाद्यः, प्रहेलिकादावतिव्याप्तेः। द्वितीयश्चेत्, ओमिति ब्रूमः (ब)। ननु यदि रसादिरूपमात्रो ध्वनिः काव्यस्यात्मा, तदा,—

"अत्ता एत्थ णिमज्जइ एत्थ अहं दिअसअं पलोएहि।
मा पहिअ! रत्तिअंधअ! सेज्जाइं मह णिमज्जहिसि॥"

इत्यादौ वस्तुमात्रस्य व्यङ्ग्यत्वे कथं काव्यव्यवहारः? इति चेन्न; अत्रापि रसाभासवत्तयैवेति ब्रूमः। अन्यथा "देवदत्तो ग्रामं याति" इति वाक्ये तद्भृत्यस्य तदनुसरणरूपव्यङ्ग्यावगतेरपि काव्यत्वं स्यात्। अस्त्विति चेत्; न, रसवत एव काव्यत्वाङ्गीकारात्। काव्यस्य प्रयोजनं हि रसास्वादसुखपिण्डदानद्वारेण वेदशास्त्रविमुखानां सुकुमारमतीनां राजपुत्रप्रभृतीनां विनेयानां रामादिवत् प्रवर्त्तितव्यं न रावणादिवत्, इत्यादिकृत्याकृत्यप्रवृत्तिनिवृत्त्युपदेश इति चिरन्तनैरप्युक्तत्वात् (भ)।

(ब) इत्यादीनाम्—एतत्प्रभृतीनां वचनानामित्यर्थः। एतेन निर्दोषस्य सगुणालङ्कारस्य काव्यस्य प्रशस्तता, न तु सदोषादेः काव्यत्वाभाव इति सूचितम्। ध्वनिकारोक्तं दूषयति, यत्त्विति।—काव्यस्य आत्मा—स्वरूपाधायको धर्मविशेषः। ध्वनिः,—व्यङ्ग्यरूपोऽर्थः इत्यर्थः। प्रहेलिकादौ,—"तरुण्यालिङ्गितः कण्ठे नितम्बस्थलमाश्रितः। गुरूणां सन्निधानेऽपि कः कूजति मुहुर्मुहुः?"॥ इत्यादौ इत्यर्थः। अत्र किञ्चिदूनजलकलसरूपं व्यङ्ग्यम्। ओमिति ब्रूमः,—स्वीकुर्म इत्यर्थः;—('ओमुपक्रमे। प्रणवे चाभ्युपगमे चापाकृतौ च मङ्गले' इति मेदिनी)।

(भ) अत्ता इति।—"अत्ता अत्र निमज्जति अत्राहं दिवसे एव प्रलोकय। मा पथिक! रात्र्यन्धक! शय्यायां मम निमङ्क्ष्यसि॥" इति संस्कृतम्। रात्र्यन्धकत्वेन कथितात्मानं कञ्चित् पथिकं प्रति कस्याश्चित् नायिकाया उक्तिरियम्। मच्छय्याप्रविष्टं त्वां मच्छ्वश्रूः यदि कथञ्चित् जानीयात् तदा "अहं रात्र्यन्धतया निजशय्यां न दृष्टवान्"

ASIATIC SOCIETY
CALCUTTA.
7076

तथा च आग्नेयपुराणेऽप्युक्तम् ;—

"वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम्" इति। (म)

व्यक्तिविवेककारेणाप्युक्तं,—"काव्यस्यात्मनि सङ्गिनि रसादिरूपे न कस्यचिद्विमतिः" इति। ध्वनिकारेणाप्युक्तं,—"न हि कवेरितिवृत्तमात्रनिर्वाहेणात्मपदलाभः इतिहासादेरेव तत्सिद्धेः" इत्यादि। ननु तर्हि प्रबन्धान्तर्वर्त्तिनां केषामपि नीरसानां पद्यानां काव्यत्वं न स्यादिति चेत्? न; रसवत्पद्यान्तर्गतनीरसपदानामिव पद्यरसेन, प्रबन्धरसेनैव तेषां रसवत्ताऽङ्गी-

---

गोपनोपायं बोधयितुं "रात्र्यन्ध" इति पदं प्रयुक्तवती इति केचित्। हे रात्र्यन्धक! पथिक! अत्र अस्मिन् स्थाने, अत्ता श्वश्रूः, निमज्जति निमग्ना मृतप्राया स्वपिति इति यावत्, न शङ्काकारणमिति भावः; अत्र अस्मिन् स्थाने, अहं, शये इति शेषः; दिवसे एव दिवालोके एव, प्रलोकय प्रकर्षेण पश्य, मम शय्यायां मा निमङ्क्ष्यसि। अत्र वस्तुमात्रस्य व्यङ्ग्यत्वे—स्वशय्यामात्रप्रवेशरूपस्य वस्तुनः एव व्यङ्ग्यत्वे इत्यर्थः। रसाभासेति।—रतेरुपपतिविषयत्वात् अत्र शृङ्गारो रसः। तद्वत्तयैव—तद्विशिष्टत्वेनैवेत्यर्थः। अन्यथा—अत्र शृङ्गाराभासरूपव्यङ्ग्यस्य काव्यत्वाधायकत्वास्वीकारे इत्यर्थः। देवदत्त इति।—तथा च यथाकथञ्चित् व्यङ्ग्यसद्भावे न काव्यव्यवहारः इति भावः। नीरसस्य काव्यत्वास्वीकारे हेतुमाह, रसास्वादेति।—रसास्वादसुखानां पिण्डं—समूहः, तस्य दानद्वारेण—रसानुभवरूपसुखपरम्पराप्रदानेन इत्यर्थः। तथोक्तं,—"स्वादुकाव्यरसोन्मिश्रं शास्त्रमप्युपभुञ्जते। प्रथमालीढमधुराः पिबन्ति कटुभेषजम्॥" इति। वेदशास्त्रविमुखानां—काठिन्यात् तदर्थग्रहणासमर्थानामिति यावत्। सुकुमारमतीनां—कोमलबुद्धीनाम्। विनेयानां—शिक्षणीयानां राजपुत्रप्रभृतीनाम्। तथा च शब्दप्रधानेषु वेदेषु अर्थप्रधानेषु पुराणेतिहासप्रभृतिषु च आयासबहुलेषु विमुखानां सुकुमारमतीनां हि गुणीभूतशब्दार्थेषु रसास्वादप्रधानेषु प्रथमं तावत् रसास्वादसुखोद्देशेन प्रवृत्तिः, ततः काव्यार्थानां कृत्याकृत्यप्रवृत्तिनिवृत्त्युपदेशपरताऽवधारणमिति भावः। चिरन्तनैः,—प्राचीनैः पण्डितैः इत्यर्थः।

(म) अत्रार्थे अग्निपुराणं प्रमाणत्वेनोपन्यस्यति,—तथेत्यादि। वागिति।—वाचां वैदग्ध्यं वैचित्र्यं, प्रधानं यत्र तस्मिन्। एवकारेण अलङ्कारादिव्यवच्छेदः। अत्र—काव्ये। रस एव जीवितं—प्राणभूतः।

कारात्। यत्तु नीरसेष्वपि गुणाभिव्यञ्जकशब्दार्थसद्भावात् दोषाभावादलङ्कारसद्भावाच्च काव्यव्यवहारः, स रसादिमत्काव्यबन्धसाम्यात् गौण एव (य)। यत्तु वामनेनोक्तं,—"रीतिरात्मा काव्यस्य" इति, तन्न, रीतेः सङ्घटनाविशेषत्वात्, सङ्घटनायाश्च अवयवसंस्थानरूपत्वात्, आत्मनश्च तद्भिन्नत्वात्। (र)

यच्च ध्वनिकारेणोक्तम्,—

"अर्थः सहृदयश्लाघ्यः काव्यात्मा यो व्यवस्थितः।
वाच्यप्रतीयमानाख्यो तस्य भेदावुभौ स्मृतौ॥" इति।

(य) व्यक्तीति।—व्यक्तेः व्यञ्जनावृत्तेः विवेको विवेचनमनुमानेन गतार्थतां प्रतिपाद्य निर्णयनं, तमधिकृत्य कृतो ग्रन्थो व्यक्तिविवेकः, तं करोतीति तेन तथाभूतेन। ['कर्मण्यण्' (३।२।१ पा०) इत्यण्] महिमभट्टेनेति यावत्। एतेन प्रतिवादिमान्यत्वमस्य सूचितम्। काव्यस्य सङ्ज्ञिनि नियतोपस्थितिके। आत्मनि रसादिरूपे तद्विषय इति यावत्। कस्यचित्—कस्यापि जनस्य। विमतिः,—विरुद्धा मतिर्भवनं, अखरसः इति यावत्। न—नैवास्ति इति। ध्वनिकारेण—ध्वन्यालोककर्त्रा आनन्दवर्द्धनाचार्येण। उक्तं—कथितं, लक्षणया निर्दिष्टमित्यर्थः। इतिवृत्तेति।—इतिवृत्तं नीरसप्रबन्धः, तन्मात्रस्य निर्वाहेण रचनेन। आत्मपदलाभः,—आत्मनः पदस्य कवित्वपदस्य लाभः सार्थकतासिद्धिः, चरितार्थतेति यावत्। इतिहासादेः,—भारतादेः। तत्सिद्धेः,—आत्मपदलाभसिद्धेः इति। तथा च ध्वन्यालोकः,—"कविना प्रबन्धमुपनिबध्नता सर्वात्मना रसपरतन्त्रेण भवितव्यम्; तत्रेतिवृत्ते यदि रसानुगुणां स्थितिं पश्येत्, तां भङ्क्त्वाऽपि स्वतन्त्रतया रसानुगुणं कथाऽन्तरमुत्पादयेत्। न हि कवेरितिवृत्तमात्रनिर्वहणेन किञ्चित् प्रयोजनम्, इतिहासादेव तत्सिद्धेः" इति। पद्यानामित्युपलक्षणं,—"पद्यं गद्यञ्च मिश्रञ्च तत्त्रिधैव व्यवस्थितम्" इत्यनेन गद्यानामपि काव्यत्वस्वीकारात्। तेषां—नीरसपद्यानां, स्वव्यञ्जकप्रतिपादकत्वसम्बन्धेन रसवत्त्वाऽङ्गीकारादिति भावः।

(र) वामनोक्तं दूषयति, यत्तिति।—यत् पुनरित्यर्थः। वामनेन—काव्यालङ्कारसूत्रनिर्माता। उक्तम्,—'काव्यस्य आत्मा रीतिः वैदर्भ्यादिः' इति कथितम्। सङ्घटनाविशेषत्वात्—रचनाभेदत्वात्। सङ्घटनायाः,—रचनाविशेषस्य। अवयवसंस्थानरूपत्वात्—अवयवानां काव्यशरीराणां शब्दार्थानां, संस्थानं समुचितस्थानेषु न्यासः, तस्मात्

तत्र वाच्यात्मत्वं "काव्यस्यात्मा ध्वनिः" इति स्ववचनविरोधादेवापास्तम्। (ल)

तत् किं पुनः काव्यम्? इत्युच्यते,—

वाक्यं रसात्मकं काव्यम् ॥ ३ ॥

रसस्वरूपं निरूपयिष्यामः। रस एवात्मा साररूपतया जीवनाधायको यस्य, तेन विना तस्य काव्यत्वानङ्गीकारात्। "रस्यते इति रसः" इति व्युत्पत्तियोगात् भाव-तदाभासादयोऽपि गृह्यन्ते। तत्र रसो यथा,—

"शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनै-
र्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम्।
विश्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता॥" (व)

अत्र हि सम्भोगशृङ्गाराख्यो रसः।

(ल) पुनश्च ध्वनिकारोक्तमुल्लिख्य दूषयति,—यच्चेति। अर्थ इति।—सहृदयानां सामाजिकानां, श्लाघ्यः प्रशंसनीयः, यः अर्थः काव्यस्य आत्मा व्यवस्थितः आत्मत्वेन निर्णीतः, तस्य अर्थस्य वाच्यप्रतीयमानाख्यौ अभिधेयव्यङ्ग्यनामानौ उभौ भेदौ स्मृतौ कथितौ इति। तत्र—तयोर्वाच्यप्रतीयमानयोर्मध्ये। वाच्यात्मत्वम्—अभिधेयस्वरूपत्वम्। [वाच्यात्मत्वमिति पाठे—वाच्यस्य—अभिधेयस्य अर्थस्य, आत्मत्वं—स्वरूपाधायकत्वम्]। स्ववचनेति।—"काव्यस्यात्मा ध्वनिः" इति स्वस्य यत् वचनं पूर्वोक्तं तेन, विरोधात् विवादात् एव। अपास्तं—निराकृतम्। य एकत्र एकं व्यवस्थाप्य अन्यत्र तदन्यथा व्यवस्थापयति, का तस्य वचने आस्था? इति भावः।

(व) तत्—तस्मात्, उक्तमतानां सदोषत्वादित्यर्थः। काव्यं पुनः किंस्वरूपं—किं-लक्षणकम्? इति उच्यते—निरूप्यते। वाक्यमिति।—रसात्मकं वाक्यं काव्यमिति योजना। सर्वेषाम् आलङ्कारिकाणां काव्यलक्षणानि दोषप्रदर्शनपुरःसरं निरस्य ग्रन्थकृता स्वयं यदेतत्काव्यलक्षणमभिहितं, तत्रैवं विचार्य्यते कैश्चित्; तथा हि,—ननु एवं सति रसात्मकं वाक्यं काव्यमित्यनेन हि यत्र सर्वतः प्राधान्येन रसस्य सद्भावः, तदेव काव्यमित्युक्तं भवति, तथा च ध्वनिगुणालङ्कारप्रधानानां वाक्यानां प्राधान्येन रसवत्ताया अभावात् काव्यत्वं न स्यादिति। न

भावो यथा महापात्रराघवानन्दसान्धिविग्रहिकाणाम् ;—

"यस्यालीयत शल्कमोन्नि जलधिः, पृष्ठे जगन्मण्डलं,
दंष्ट्रायां धरणी, नखे दितिसुताधीशः, पदे रोदसी।
क्रोधे चत्तगणः, शरे दशमुखः, पाणौ प्रलम्बासुरः,
ध्याने विश्वममावधार्मिककुलं, कस्मैचिदस्मै नमः॥"

अत्र भगवद्विषया रतिर्भावः। (श)

चेष्टमेव तादृशानामकाव्यत्वमिति वाच्यं, तथा सति ध्वन्यलङ्कारादिमत्कविता-विरचननिपुणानां कवीनामाकुलीभावप्रसङ्गात्। सर्वत्रैव प्रथमतस्तावत् लक्ष्यं निर्दिश्यते, ततश्च लक्षणमिति हि ममाचारः; लक्ष्यस्य लक्षणानुयायित्वे स्वरूपमेव व्याहन्येत। एवञ्च काव्यस्वरूपविद्विर्मन्दाकविसम्प्रदायैर्भगनदभ्रधराद्दीनां नीरसं स्वभावं काव्यरूपेण वर्णयद्भिः तादृशानामपि काव्यत्वमङ्गीकृतमेव। न च तेष्वपि परम्परया रससङ्गावः सम्भवत्येवेति न कश्चित् दोषः इति वाच्यं, तादृशरससङ्गावस्य "चैवी गच्छति" "अश्वो धावति" इत्यादिष्वपि सम्भवेन तत्र तथाप्रयोजकत्वादिति चेत्, सत्यं, तेषु "दुर्गालङ्घितविग्रहः" इत्यादिष्वपि तत्तत्प्राधान्येऽपि "अत्ता एत्थ" इत्यादिष्विव रसवत्तायाः अचलत्वात्। न चात्र 'गौश्चलति' इत्यादाविव यथाकथञ्चिदेव रसः कल्पयितुं शक्यते इति वाच्यं, तत्र तत्र "टेवदत्तो यामं गच्छति" इत्यादाविव रसवत्तायाः स्वयमप्यपाकृतत्वात्। "अत्ता एत्थ" इत्यादिष्वेव वस्तुव्यङ्ग्येऽपि रसवत्त्वं, नान्यत्र; इत्यत्र तु सहृदयहृदयमेव प्रमाणम् इत्यलं बाहुल्येन। रस्यते—आस्वाद्यते इति व्युत्पत्त्या रसशब्देन रसतदाभास-भावतदाभासादयो गृह्यन्ते। रसमुदाहरति,—तत्रेति। शून्यमिति।—बाष्पगद्गदं शून्यं सख्यादिरहितं, विलोक्य दृष्ट्वा, बाला नवोढा वधूः, शयनात् शय्यायाः, किञ्चित् ईषत् पूर्वाङ्गेनेति भावः, अनैः मन्दं निःशब्दं यथा तथा, उत्थाय निद्राव्याजं छलनिद्राम्, उपागतस्य सच्छलं निद्रितस्येत्यर्थः, पत्युः स्वामिनः मुखं मुचिरं बहुक्षणं, निर्वर्ण्य दृष्ट्वा, विगतं निःशङ्कं यथा तथा, परिचुम्ब्य ज्ञातपुलकां सरोमाञ्चां, गण्डस्थलीं पत्युरिति शेषः, आलोक्य दृष्ट्वा, लज्जया नम्रं मुखं यस्याः तादृशी, लज्जावनतवदना सतीत्यर्थः, इमता प्रियेण पत्या, चिरं चुम्बिता। अत्र शय्यायाः किञ्चिदुत्थानं प्रियजागरणे झटिति तत्संवरणार्थम्, उत्थाने अनैस्त्वं जागरण-हेतुशब्दानुत्पत्त्यर्थं, विगतत्वं निद्रानिशयार्थं वेदितव्यम्। शार्दूलविक्रीडितं वृत्तम्।

(श) भावमुदाहरति,—भावो यथेति। यस्येति।—यस्य, शल्कः मत्स्यत्वक् तस्य सौम्नि पर्यन्तभागे, एकदेशे इति यावत्, जलधिः समुद्रः अलीयत लीनोऽभूत्। [एतेन

रसाभासो यथा,—

"मधु द्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्त्तमानः।
शृङ्गेण च स्पर्शनिमीलिताक्षीं मृगीमकण्डूयत कृष्णसारः॥"

अत्र हि सम्भोगशृङ्गारस्य तिर्य्यग्विषयत्वाद्रसाभासः। एवमन्यत्। (घ)

नीलावतारो दर्शितः; अस्य च महाकायत्वेन न समुद्रे निवासक्षमता ज्ञाता, प्रत्युत स एव एकत्र विलीनः। एवमाधारापेक्षयाऽऽधेयस्याधिक्यवर्णनादधिकम्। यस्येति सप्तम्यन्तनामेण सम्बध्यते]। पृष्ठे जगन्मण्डलं समस्तं भूमण्डलम्, अलीयतेति सर्वत्रान्वेति। [एतेन कूर्मावतारः प्रोक्तः; यद्यपि कूर्मावतारो मन्दराचलं धर्तुमेवेति प्रसिद्धं, तथाऽपि येन पृष्ठे जगद्धृयते स कूर्मो न तस्मादिह इतौदमुक्तम्]। दंष्ट्रायां दशने धरणी पृथ्वी। [एतेन वराहावतारः सूचितः] नखे दितिसुताधीशः दितेः सुता दैत्यास्तेषामधीशः सम्राट् इति तथोक्तः, हिरण्यकशिपुरित्यर्थः। [एतेन नृसिंहावतारः कथितः; नृसिंहेन हि नखद्वारा हिरण्यकशिपुर्विदारित इति प्रसिद्धम्]। पदे रोदसी द्यावापृथिव्यौ; अत्राक्रीयेतामिति वचनविपरिणामो बोद्धव्यः। [एतेन वामनावतार उक्तः; पदद्वयमितां भूमिं प्रतिगृह्णता भगवता वामनेन पदविन्यासमानद्वारा सर्वमाधिक्रान्तमिति प्रसिद्धम्]। क्रोधे चलाक्षां राजन्यानां गणः। [एतेन भार्गवावतारः प्रकटितः; पितुर्हत्या हैहयवंश्यैः कृत्तैः क्रतेति क्रुद्धेन रामेण तेषां समूलमुन्मूलितो वंश इति प्रसिद्धम्]। अरे दशमुखः रावणः। [एतेन रामावतारः सूचितः; रामेण हि अरेण रावणो विनाशित इति प्रसिद्धम्]। पाणौ भुजे प्रलम्बः नाम असुरः। [एतेन बलावतारः कथितः; मल्लयुद्धे बलदेवेन करतलप्रहारेण प्रलम्बो निहत इति प्रसिद्धम्]। ध्याने विश्वं जगत्। [एतेन बौद्धावतारः प्रोक्तः; हिंसा मा भूदिति निर्व्यापारो बुद्धो हि समाहितो ध्यानमात्रनिष्ठोऽभूदिति प्रसिद्धम्]। असौ अधार्मिकाणां म्लेच्छानां कुलम्। [एतेन कल्क्यवतारः कथितः; कलावन्ते म्लेच्छानसिना निघ्नन् कल्की पर्य्येटिष्यतीति प्रसिद्धम्]। कस्मैचित् अनिर्वचनीयस्वरूपाय अस्मै—तस्मै, देवाय इति शेषः, नमः। प्रादुर्भावक्रीडितं हृतम्।

अत्र भगवान् परमात्मा विषयो यस्यालम्बनस्य। रतिः अनुरागः। भावः भावशब्दवाच्यः;—"सञ्चारिणः प्रधानानि देवादिविषया रतिः। उद्बुद्धमात्रः स्थायी च भाव इत्यभिधीयते॥" इति वक्ष्यमाणवचनात्।

(घ) रसाभासमुदाहरति,—रसाभासो यथेत्यादि। मधु इति।—द्वौ रेफौ यस्य

दोषाः पुनः काव्ये किंस्वरूपाः ? इत्युच्यन्ते,—

दोषास्तस्यापकर्षकाः ॥ ४ ॥

श्रुतिदुष्टापुष्टार्थत्वादयः काणत्वखञ्जत्वादय इव शब्दार्थद्वारेण देहद्वारेणेव व्यभिचारिभावादेः स्वशब्दवाच्यत्वादयो मूर्खत्वादय इव साक्षात् काव्यस्यात्मभूतं रसमपकर्षयन्तः काव्यस्यापकर्षका इत्युच्यन्ते। एषां विशेषोदाहरणानि वक्ष्यामः। (स)

गुणाः किंस्वरूपाः ? इत्युच्यन्ते,—

उत्कर्षहेतवः प्रोक्ता गुणालङ्काररीतयः ॥ ५ ॥

गुणाः शौर्य्यादिवत्। अलङ्काराः कटककुण्डलादिवत्। रीतयोऽवयवसंस्थानविशेषवत्। देहद्वारेणेव शब्दार्थद्वारेण तमेव काव्यस्यात्मभूतं रसमुत्कर्षयन्तः काव्यस्योत्कर्षकाः

वाचकशब्दे इति व्युत्पत्त्या द्विरेफो भ्रमरः, स्वां प्रियां भ्रमरीमित्यर्थः, अनुवर्त्तमानः अनुसरन्, सेवमान इति यावत्, कुसुममेव एकमद्वितीयं पात्रं तस्मिन्, मधु पपौ। अत्राप्रस्तुतस्य प्रियासहितस्य कस्यचित् पुरुषस्य मद्यपानं प्रतीयते इति समासोक्तिः; ("मधु मद्ये पुष्परसे" इति कोषः)। कृष्णसारः मृगविशेषश्च स्पर्शेन प्रियस्पर्शसुखेन निमीलिताक्षीं मुद्रितनयनां मृगीं हरिणीं, स्वप्रियामिति यावत्, अकण्डूयत गात्रकण्डूयनेन सिषेवे इत्यर्थः। स्वभावोक्तिरियम्। इन्द्रवज्रोपेन्द्रवज्रयोरुपजातिश्छन्दः। अत्र—अस्मिन्नुदाहृते पद्ये। रसाभासः,—अनौचित्यप्रवृत्तौ रस इत्यर्थः, शृङ्गारस्य उत्तमप्रकृतिकत्वात्, प्रकृते तिर्य्यग्जातिगतत्वेन अनुत्तमप्रकृतिकतया अनौचित्यमिति बोध्यम्;—अनौचित्यप्रवृत्तत्वे आभासो रसभावयोः" इति वक्ष्यमाणवचनात्। अन्यत्—भावाभासादिकमित्यर्थः, उदाहार्य्यमिति शेषः।

(स) ननु दोषाणां काव्यलक्षणाघटकत्वेऽपि परिहार्य्यत्वेन तत्स्वरूपज्ञानस्य आवश्यकत्वात् तदाकाङ्क्षामुत्थापयति, दोषा इति।—तस्य—काव्यस्य, उपचारात् काव्यत्वस्य रसस्येति यावत्। अपकर्षकाः,—लघयितारः। व्यभिचारिभावादेः,—वक्ष्यमाणानां व्यभिचारिभावानां निर्वेदादीनाम्; आदिपदेन शृङ्गारादिरसपरिग्रहः। स्वशब्दवाच्यत्वादयः,—स्वशब्देन स्वप्रतिपादकशब्देन निर्वेदादिशब्देन वाच्यत्वम्—अभिधेयत्वं, कथनम् इत्यर्थः, तत्प्रभृतयः।

इत्युच्यन्ते । इह यद्यपि गुणानां रसधर्मत्वं, तथाऽपि गुणशब्दोऽत्र गुणाभिव्यञ्जकशब्दार्थयोरुपचर्यते । अतश्च "गुणाभिव्यञ्जकाः शब्दाः रसस्योत्कर्षकाः" इत्युक्तं भवतीति प्रागेवोक्तम् । एषामपि विशेषोदाहरणानि वक्ष्यामः । (८)

इति श्रीमन्नारायणचरणारविन्दमधुव्रतसाहित्याचार्यवक्रेश्वरसिंहप्रख्यापनपरमाचार्य-कविसूक्तिरत्नाकराष्टादशभाषावारविलासिनीभुजङ्गसान्त्विविग्रहिकमहापात्र-श्रीविश्वनाथकविराजकृतौ साहित्यदर्पणे काव्यस्वरूपनिरूपणं नाम प्रथमः परिच्छेदः ॥ १ ॥

द्वितीयः परिच्छेदः ।

वाक्यस्वरूपमाह ।—

वाक्यं स्याद्योग्यताऽऽकाङ्क्षाऽऽसत्तियुक्तः पदोच्चयः ॥ ६ ॥

योग्यता—पदार्थानां परस्परसम्बन्धे बाधाऽभावः । पदोच्चयस्य एतदभावेऽपि वाक्यत्वे "वह्निना सिञ्चति" इत्यादापि वाक्यं

(८) गुणादीनाह, उत्कर्षेति ।—गुणाः अलङ्काराः रीतयश्च उत्कर्षस्य हेतवः कारणानि तत्स्वरूपभूताः ; "तस्य" इति पूर्वतोऽनुवर्तते । तथा च काव्यत्वं ये उत्कर्षयन्ति ते गुणादयः । एषाञ्च गुणानां शब्दार्थोत्कर्षकत्वेन रसोत्कर्षकत्वमित्यर्थः ।

इत्यशेषशास्त्राटवीसञ्चारपञ्चानन-पण्डितकुलपतिना वि, ए, उपाधिधारिणा श्रीमज्जीवानन्दविद्यासागरभट्टाचार्येण विरचितायां, तदात्मजाभ्यां पण्डितश्रीआशुबोधविद्याभूषण-पण्डितश्रीनित्यबोधविद्यारत्नाभ्यां प्रतिसंस्कृतायां विमलाख्यायां साहित्यदर्पणव्याख्यायां प्रथमः परिच्छेदः ॥ १ ॥

स्यात्। आकाङ्क्षा—प्रतीतिपर्य्यवसानविरहः। स च श्रोतुर्जिज्ञासारूपः। निराकाङ्क्षस्य वाक्यत्वे "गौरश्वः पुरुषो हस्ती" इत्यादीनामपि वाक्यत्वं स्यात्। आसत्तिः,—बुद्ध्यविच्छेदः। बुद्धिविच्छेदेऽपि वाक्यत्वे इदानीमुच्चरितस्य देवदत्तशब्दस्य दिनान्तरोच्चारितेन गच्छतीति पदेन सङ्गतिः स्यात्। अत्राऽऽकाङ्क्षायोग्यतयोरात्मार्थधर्मत्वेऽपि पदोच्चयधर्मत्वमुपचारात्। (क)

(क) उपोद्घातसङ्गत्या वाक्यं निरूपयति, वाक्यमित्यादि।—प्रकृतसिद्ध्यनुकूलचिन्ताविषयत्वमुपोद्घातः। प्रकृतञ्चात्र वाक्यलक्षणम्। पदोच्चयश्चात्र पदसमुदायार्थः। योग्यतया आकाङ्क्षया आसत्त्या च युक्तं वाक्यं वाक्यसंज्ञं स्यात्। तद्बोधस्त्वेवं स्यात्, तथा हि,—प्रथमतस्तावच्छब्दश्रवणात् परं श्रोतुरात्मनि तत्तच्छब्दप्रतिपाद्या अर्थाः प्रतिभासन्ते। ततश्चाकाङ्क्षायोग्यतादिमहिम्ना ते परस्परं विशिष्टान्वयबोधे च समुद्यन्ति। आत्मनि शब्दश्रवणजन्या उपस्थितिश्चैषां स्मृतिरूपैव। असौ स्मृतिर्हि पूर्वमनुभूतानां पदजन्योपस्थितिविषयपदार्थानां संस्कारेण योग्योद्बोधकसहभावात् सम्पद्यते। तादृशसंस्कारस्य च उद्बोधं कस्यचिदन्यस्य उद्बोधकस्य अदर्शनात् तत्तच्छब्दश्रवणस्यैव हेतुत्वमङ्गीकरणीयम्। एकसम्बन्धिज्ञानस्य अपरसम्बन्धिस्मारकताया व्युत्पत्तिसिद्धत्वात्, निश्चितान्योऽन्यसम्बन्धयोः शब्दार्थयोरपि एकतरस्य शब्दस्य ज्ञानमन्यस्य संस्कारोद्बोधने हेतुर्युक्तिसिद्ध एव। एवञ्च यदि शब्दानां पदार्थैः साकं सम्बन्धो न स्यात्, तर्हि अर्थस्मृतिरपि मा भूत्। स्मर्य्यन्ते च शब्दैस्तैस्तैस्ते तेऽर्थाः। तथा च वाक्यपदीये,—"सति प्रत्ययहेतुत्वे सम्बन्ध उपपद्यते। शब्दस्यार्थैर्यतोऽतस्तत्सम्बन्धोऽस्तीति गम्यते॥" न च परस्परसम्बन्धं विना शब्दार्थयोः प्रत्यायकत्वमुपपद्यते इति तयोः परस्परसम्बन्धे तदनुपपत्तिलिङ्गिका अनुमितिरेव प्रमाणम्। स च सम्बन्धो वृत्तिरूपः इति सुधीभिर्विभाव्यम्। योग्यतामाह, पदार्थानामिति।—पदार्थानां—सुप्तिङन्तानि पदानि (पदे च पदानि च इति पदानि) तेषां येऽर्थाः प्रतिपाद्यास्तेषाम्। परस्परसम्बन्धे—परस्परान्वयबोधे। बाधाऽभावः,—अबाधकत्वं, सद्भाव इत्यर्थः, योग्यता। एवञ्च तात्पर्य्यविषयीभूतसम्बन्धेन तन्निरूपकाणां पदार्थानाम् एकतरस्मिन् अपरपदार्थान्वयः योग्यता इति फलितम्। पाकादौ विद्यमानस्य वह्निकरणकत्वस्य सेकादौ येन केनचित् सम्बन्धेन सद्भावसम्भवात् "वह्निना सिञ्चति" इत्यादेर्वाक्यत्वप्रसक्तौ तद्वारणाय तात्पर्य्यविषयीभूतेति सम्बन्धविशेषणमवगन्तव्यम्। योग्यताया व्यावृत्तिं दर्शयति,

पदोद्देश्यत्वेत्यादि।—एतदभावे—एतस्या निरूपणत्वरूपायाः योग्यतायाः अभावो विरहस्मिन् सत्यपि। वाक्यत्वे—पदोद्देश्यत्वं वाक्यरूपतास्वीकारे, "वह्निना सिञ्चति" इत्यादावपि वाक्यं स्यात्। आकाङ्क्षामाह,—आकाङ्क्षेति। प्रतीतीत्यादि।—प्रतीतेः पदार्थोपस्थितेः पर्य्यवसानम् अन्वयबोधजनकत्वेनेच्छाविरहः तद्विरहः तदभावः। नन्वेवमाकाङ्क्षापदस्य अभावबोधकत्वे लक्षणापत्तिरित्यत आह, स चेति।—श्रोतुः जिज्ञासास्वरूपः,—ज्ञानेच्छारूपः; यतोऽभावाभावः प्रतियोगिस्वरूप एव, न तु अतिरिक्तं कल्प्यते इति भावः। अस्ति च "पयसा सिञ्चति" इत्यादौ पयसेति पदार्थस्य सिञ्चतीति पदार्थेन अन्वयबोधजनने श्रोतुरिच्छा। प्रतीतिपर्य्यवसानञ्च क्वचित् स्वाभाविकत्वेन क्वचिज्जनितान्वयबोधजनकत्वेन भवति; तदाद्यमाह, निराकाङ्क्षेत्यादि।—यत्र "गौरश्वः" इत्यादिप्रथमान्तपदोपस्थितानां पदार्थानामभेदादितिरिक्तसम्बन्धेनान्वयबोधोऽव्युत्पन्न इति पदार्थोपस्थितेरन्वयबोधजनने श्रोतुरिच्छाविरहो जायते। अत्र अभेदातिरिक्तसम्बन्धेन बाधसत्त्वेऽपि सत्तादिसम्बन्धेन बाधविरहरूपयोग्यत्वास्त्येति बोध्यम्। द्वितीयं यथा,—"विमलं जलं नद्याः कच्छे महिषयूरति" इति; अत्र नद्या इति पदार्थोपस्थितेर्जलमिति पदार्थेनान्वयबोधे सति "सिद्धे इच्छाविरहात्" इति न्यायेन "कच्छे" इत्यनेन श्रोतुरन्वयबोधे इच्छाविरहः। यदि पुनरुभयान्वयेच्छया प्रयुज्यते, तदा "नद्याः" इति ङाकाङ्क्षिगोलक्षणयादनपङ्क्षादा "कच्छे" इत्यनेन सम्बन्धात् गृहीतवक्तृतात्पर्य्यस्य श्रोतुरुभयान्वयबोधेच्छा सम्भवतीति ध्येयम्। आसत्तिमाह,—आसत्तिरिति। बुद्धेति।—बुद्धेः पदार्थोपस्थितेः, अविच्छेदः अव्यवधानम्, अव्यवहितपदार्थोपस्थितिरिति तात्पर्य्यार्थः। व्यवधानञ्च कालवाहुल्येन प्रकृतानुपयोगिपदार्थोपस्थित्या च सम्भवति। तदाद्यमाह,—बुद्धीति। वाक्यत्वे—वाक्यत्वस्वीकारे। दिगन्तरेति अत्यन्तव्यवधानदर्शनार्थम्। सङ्गतिः,—सम्बोधनं, वाक्यव्यवहारोपयोगिसम्बन्धः इति यावत्। द्वितीयं यथा,—"गिरिर्भुक्तमग्निमान् देवदत्तेन" इत्यत्र "गिरिरग्निमान्" "भुक्तं देवदत्तेन" इति वाक्यार्थबोधद्वयं प्रकृतम्। तत्र प्रथमानुयोगिन्याः "भुक्तम्" इति पदार्थोपस्थित्या, द्वितीयानुयोगिन्याः "अग्निमान्" इति पदार्थोपस्थित्या व्यवधानम्। ननु आकाङ्क्षायोग्यते आत्मार्थधर्मौ, कथं पदोद्देश्यधर्मत्वं लभेते? इत्याशङ्क्याह,—अवेति। आकाङ्क्षायोग्यतयोः आत्मार्थधर्मत्वेऽपि—यथायथम् आत्मधर्मत्वेऽर्थधर्मत्वेऽपि। पदोद्देश्यधर्मत्वम्, उपचारात्—परम्परया इत्यर्थः। परम्परा चात्र यथायथं स्वजन्यजनकत्व-स्वाश्रयोपस्थापकत्वसम्बन्धरूपा बोध्या। आसत्तेरपि उक्तरूपायाः आत्मधर्मत्वात् एवमेव रीतिरनुसरणीया इति। अयं भावः,—आकाङ्क्षाया आसत्तेश्च आत्मधर्मत्वे योग्यतायाः पुनरर्थधर्मत्वे यत् पदोद्देश्यधर्मत्वमुक्तं, तदुपचारादिति ध्येयम्।

वाक्योच्चयो महावाक्यम् ॥ ७ ॥

योग्यताऽऽकाङ्क्षाऽऽसत्तियुक्त इत्येव।

इत्थं वाक्यं द्विधा मतम् ॥ ८ ॥

इत्थमिति वाक्यत्वेन महावाक्यत्वेन च। (ख)

उक्तञ्च,—"स्वार्थबोधसमाप्तानामङ्गाङ्गित्वव्यपेक्षया।
वाक्यानामेकवाक्यत्वं पुनः संहत्य जायते ॥" इति।

तत्र वाक्यं यथा,—"शून्यं वासगृहम्" इत्यादि। महावाक्यं यथा,—रामायणमहाभारतरघुवंश्यादि। (ग)

पदोच्चयो वाक्यमित्युक्तं, तत् किं पदलक्षणम्? इत्यत आह,—

वर्णाः पदं प्रयोगार्हाननन्वितैकार्थबोधकाः ॥ ९ ॥

यथा—घटः। प्रयोगार्हा इति प्रातिपदिकस्य व्यवच्छेदः। अनन्वितेति—वाक्यमहावाक्ययोः। एकेति साकाङ्क्षानेकपद-

---

(ख) महावाक्यमाह, वाक्योच्चय इति।—वाक्यानाम् (वाक्यार्थावाक्यानाञ्च) उच्चयः सङ्घातः, महावाक्यम्। योग्यताद्यभावे महावाक्यत्वस्वीकारे "चक्षुषा गच्छतां, गगनं वर्त्तते" इत्येतयोः "भिक्षुरुपवसति, गृही भुङ्क्ते" इत्येतयोः तथा भिन्नदिगीश्वरितयोः "चक्षुषा गच्छतां, घटो वर्त्तते" इत्येतयोरपि महावाक्यत्वं स्यात्, इत्यत आह,—योग्यतेत्यादि।

(ग) उक्तार्थं प्रमाणेन दृढयति, स्वार्थेति।—स्वार्थबोधेन समाप्तानां निराकाङ्क्षाणां वाक्यानाम् [वाक्ये च वाक्यानि चेति वाक्यानि तेषाम्। "सरूपाणामेकशेष एकविभक्तौ" (१।२।६४ पा०) इत्येकशेषः] अङ्गाङ्गित्वव्यपेक्षया गुणप्रधानभावेनाऽऽकाङ्क्षया। पुनः संहत्य—एकार्थप्रतिपादकत्वेन मिलित्वा, स्थितानाम् इति शेषः। एकवाक्यत्वं—महावाक्यत्वं, जायते। स्वार्थबोधसमाप्तत्वं पदोच्चयस्यापि बोद्धव्यम्; तेन—"स्वार्थबोधसमाप्तानामङ्गाङ्गित्वव्यपेक्षया। पदानामेकपदता पुनः संहत्य जायते ॥" इत्येवमेव पदोच्चयस्य वाक्यत्वं सम्पद्यते इति सिद्धम्। अन्यथा "शून्यं वासगृहं विलोक्य" इत्यादिभागस्यापि वाक्यत्वापत्तिरिति ध्येयम्। वाक्यांशानां गुणप्रधानभावेन वैशिष्ट्यादेकत्वं तत्प्रतिपादकत्वेन वाक्यानामप्येकत्वमिति भावः।

वाक्यानाम्। अर्थबोधका इति क-च-ट-त-पेत्यादीनाम्। वर्णा इति बहुवचनमविवक्षितम् (घ)। तत्र,—

(घ) पदनिरूपणे प्रसङ्गसङ्गतिमुपपादयति, पदोच्चय इत्यादि।—तत्—तत्रेत्यर्थः। पदलक्षणमाह, वर्णा इति।—वर्णाः,—स्वरव्यञ्जनरूपाः। प्रयोगार्हाश्च ते अनन्वितैकार्थबोधकाश्चेति विग्रहः। तथाभूताः वर्णाः पदं—पदसंज्ञकाः स्युः। "नापदं शास्त्रे प्रयुञ्जीत" इति निषेधात् विभक्तिरहितस्य न प्रयोगार्हतेत्यत आह, प्रयोगार्हाः इति।—प्रातिपदिकस्य—नाम्नः, एतदुपलक्षणं, धातोरपि, तस्यापि केवलस्याप्रयोगित्वादिति बोध्यम्। वाक्यमहावाक्ययोरिति व्यवच्छेद इत्यनेनान्वयः, एवमग्रेऽपि। तयोरन्वितार्थबोधकत्वात्। विशिष्टवाक्यार्थस्य विशेषणविशेष्यार्थातिरिक्तत्वेनैकत्वमित्यभिप्रायेणेदं लक्षणम्; अन्यथा एकार्थबोधका इत्यनेनैव वारणे सिद्धे अनन्वितेत्युपादानं व्यर्थं स्यात्। साकाङ्क्षेति।—साकाङ्क्षाणाम् अन्वयबोधाजनकानाम् अनेकेषां पदानां वाक्यानाञ्च व्यवच्छेद इत्यर्थः। तथा च अयोग्यानामनासन्नानां समुदायस्य अनन्वितार्थबोधकत्वेऽपि न पदत्वमित्यभिप्रायः। ननु एकवर्णद्विवर्णपदयोर्वर्णबहुत्वाभावात् तत्र अव्याप्तिः, अत आह,—वर्णा इति। अत्र प्रसङ्गेन वर्णोत्पत्तिप्रकारः निरूप्यते;—ज्ञानवता आत्मना स्वज्ञातपदार्थं शब्देन वक्तुमिच्छया तज्ज्ञापकशब्दसङ्घं समुत्पादयितुं नियोजिता बुद्धिः मानसं तत्र प्रवर्त्तयति, तच्च मूलाधारगतमग्निम् आलोडयति। तादृशश्चासौ पावकः तदाहतः तत्रस्थं मारुतं प्रेरयति। तत्प्रेरितो वायुश्च मन्दमुरसि चरन् परा-वागभिधं सूक्ष्मरूपं शब्दमुत्पादयति। अथ आ नाभिमूलं प्रसरन्नसौ तद्देशसम्पर्केणाहतः पश्यन्त्यभिधं शब्दं जनयति। एतदुभययोः सूक्ष्मातिसूक्ष्मयोः सिद्धयोगिमात्रश्रुतिगम्यता, न त्वस्मदादीनां स्थूलश्रवणविषयता। ततोऽसौ वायुः हृदयदेशं परिचरन् तद्योगात् मध्यमाभिधं शब्दं सम्पादयति। स च मध्यमाख्यः अङ्गुल्यादिना श्रवणविवरपिधानेन अस्माभिरपि अव्यक्तसूक्ष्मध्वनिरूपेण अनुभवितुं शक्यते कदाचित्। ततोऽपि ऊर्द्ध्वं कण्ठदेशं समुपगतोऽसौ मूर्द्धानमाहत्य तत्प्रतिघातेन ततः परावृत्तः वक्त्रम् अधिगम्य कण्ठताल्वाद्यष्टस्थानेषु समभिहतः वैखरीनामकं नानाजातीयं सुस्पष्टं शब्दं समुत्पादयति। स एव मानवव्यवहारार्हः;—"तुरीयं वाचो मनुष्या वदन्ति" इति महाभाष्यकाराः। अन्यत् सर्वमवदातम्। ननु "प्रकृत्यर्थान्वितस्वार्थबोधकत्वं प्रत्ययानाम्" इति नियमात् "घटीयं कर्मत्वम्" इत्याद्यन्वितार्थबोधकस्य "घटम्" इत्यादेः कथं पदत्वम्? न च "शक्तिमत्पदम्" इति मतानुसारेण "घट" इत्येकं पदम्, "अम्" इत्यपरं पदम्; अनयोः

अर्थो वाच्यश्च लक्ष्यश्च व्यङ्ग्यश्चेति त्रिधा मतः ॥१०॥

एषां स्वरूपमाह।—

वाच्योऽर्थोऽभिधया बोध्यो लक्ष्यो लक्षणया मतः।
व्यङ्ग्यो व्यञ्जनया ताः स्युस्तिस्रः शब्दस्य शक्तयः॥११॥

ताः,—अभिधाद्याः।

तत्र सङ्केतितार्थस्य बोधनादग्रिमाऽभिधा ॥ १२ ॥

उत्तमवृद्धेन मध्यमवृद्धमुद्दिश्य "गामानय" इत्युक्ते तं

प्रत्येकपदार्थोपस्थापकत्वेनानन्वितार्थबोधकत्वमक्षतमिति वाच्यं, तथा सति घट-मित्यादेः पदसमुदायत्वापत्त्या वाक्यत्वं स्यात्। न चेष्टापत्तिः; एवं सति "शून्यं वासगृहं विलोक्य" इत्यादि यत् वाक्योदाहरणं दत्तं, तदसङ्गतं स्यात्, तस्य तथा-विधवाक्यसमुदायत्वेन महावाक्यतयैवोदाहर्त्तुमुचितत्वात्। न च प्रत्ययार्थातिरिक्ता-नन्वितैकार्थबोधकत्वं विवक्षणीयमिति वाच्यं,तथाऽङ्गीकारेऽपि अभेदसम्बन्धेन नीलाद्य-न्वितोत्पलादिबोधकेषु "नीलोत्पलम्" इत्यादिपदेषु मुख्यार्थान्वितबोधकेषु लाक्षणिक-श्वेतादिपदेषु च अव्याप्तेरनुद्धारात्, समस्तस्य पदत्वाङ्गीकारे "क्षीरोदजावसतिजन्म-भुवः प्रसन्नाः" इत्यादौ पदगतं क्लिष्टत्वदोषोदाहरणमसङ्गतं स्यात्। न चेतरपदार्थ-निरपेक्षं यदन्वितं तद्भिन्नमन्वितमिह विवक्षणीयमिति वाच्यं, तथात्वे "ग्रामं गच्छति" इत्यादिसमुदायस्य कर्त्तृपदसापेक्षान्वितबोधकस्य पदत्वापत्तेः। एवमेकेति न सङ्गच्छते, "घटौ" "घटाः" इत्यादिद्विवचनान्तादिपदेषु अनेकार्थबोधकत्वेनाव्याप्तेः। न चैकेति एकजातीयेत्यर्थः इति वाच्यं, "धवखदिरपलाशाः" इत्यादौ, युगपच्चन्द्रसूर्य्योपस्थापके "पुष्पवन्तौ" इति पदे च अव्याप्तितादवस्थ्यात्। अपि च पदघटकानां यावतां वर्णाना-मनन्वितैकार्थबोधकत्वम्,उत केषाञ्चित्? तत्र नाद्यः,—"सुन्दरस्य देवदत्तस्य धनम्" इत्यादौ विशेषणविभक्तेरनर्थकत्वात् "सुन्दरस्य" इत्यादिपदे अव्याप्तेः। नापि द्वितीयः, —"वह्निना सिञ्चति" इत्यादौ सर्वेषामनन्वितैकार्थबोधकत्वाभावेऽपि प्रत्येकं तथात्व-सम्भवादतिव्याप्तेः। एवञ्च पदलक्षणमेवं वाच्यम्—असमासाङ्गसुप्तिङ्तल्लोपयुक् प्रकृतिः पदम्। युगन्तेन केवलप्रकृतेः, असमासाङ्गेत्यनेन पितुः स्वसेत्यादौ पूर्वावयवस्य, राजदन्तेत्यादौ उभयोरपि, प्रकृतिरित्यनेन वाक्यमहावाक्ययोर्व्यवच्छेदः। समासाव-यवस्य पदत्वाङ्गीकारे "नीलोत्पलम्" इत्यादिपदस्य वाक्यत्वं स्यादिति।

गवानयनप्रवृत्तमुपलभ्य बालोऽस्य वाक्यस्य "सास्नादिमत्पिण्डानयनमर्थः" इति प्रथमं प्रतिपद्यते। अनन्तरञ्च "गां बधान" "अश्वमानय" इत्यादावावापोद्वापाभ्यां गोशब्दस्य "सास्नादिमानर्थः" आनयनपदस्य च "आहरणमर्थः" इति सङ्केतमवधारयति। (ङ) क्वचिच्च प्रसिद्धार्थपदसमभि-

(ङ) योग्यताघटकपदार्थानाह, अर्थ इति।—पदप्रतिपाद्य इत्यर्थः। एषां—वाच्यलक्ष्यव्यङ्ग्यानामित्यर्थः। स्वरूपम्—असाधारणं लक्षणम्। आह—कथयति, प्रतिपाद्यं दर्शयतीति यावत्। अभिधया बोध्यः,—अभिधाजन्यबोधविषयो वाच्यः इत्यर्थः, एवं लक्षणया बोध्यो लक्ष्यो लक्षणाजन्यबोधविषयो लक्ष्य इत्यर्थः, व्यञ्जनया बोध्यो व्यङ्ग्यो व्यञ्जनाजन्यबोधविषयो व्यङ्ग्य इत्यर्थश्च। अर्थबोधे शब्दस्य वृत्तीनाञ्च कारणत्वमिह विषयविषयिणोरभेदोपचारात् बोध्यम्। कारणन्तु तद्वृत्तिज्ञानमेव शब्दस्य प्रकृतेः प्रत्ययस्य च शक्तयः अर्थबोधे सहकारिण्यः वृत्तयः।

तत्र—अभिधादिषु मध्ये। सङ्केतितार्थस्य—कोषव्याकरणादिनियन्त्रितस्य इत्यर्थः। न तु सङ्केतग्रहविषयस्य अर्थस्य, सङ्केतस्य अभिधया अभिन्नत्वेन आत्माश्रयत्वापत्तेः। सङ्केतग्रहोपायान् व्यवहारादीनाह, उत्तमेति।—उत्तमेन वृद्धेन सङ्केतग्रहवता इति यावत्, (उत्तमवृद्धेन प्रयोजकप्रयोज्यभावप्रकटनाय वृद्धयोरुत्तममध्यमत्वकल्पनं बोध्यम्)। उपलभ्य—बुद्ध्वा। बालः,—अगृहीतसङ्केत इत्यर्थः। अस्य वाक्यस्य—"गामानय" इत्यस्येत्यर्थः। प्रथमं—शक्तिग्रहात् प्राक्। सास्नादिमदिति।—सास्नाऽऽदिमत् यत्पिण्डं शरीरं तस्य आनयनमुपस्थापनम् इत्येवंविधोऽर्थः। तत्र सास्ना गलकम्बलः, आदिना लाङ्गूलककुत्खुरादीनां ग्रहणं, प्रतिपद्यते—बुध्यते। आवापोद्वापाभ्याम्—अन्वयव्यतिरेकाभ्यामित्यर्थः। तथा हि "गां बधान" इत्यत्र गोपदसत्त्वे सास्नादिमत्पदार्थबोधः, आनयपदव्यतिरेकेणाहरणपदार्थबोधाभावश्च। तथा "अश्वमानय" इत्यत्र गोपदव्यतिरेकेण सास्नादिमत्पदार्थबोधाभावः, आनयपदसत्त्वेन आहरणपदार्थबोधश्चेति अन्वयव्यतिरेकौ बोध्यौ। सङ्केतम्—अभिधां नाम शक्तिमित्यर्थः। सा च अतिरिक्तैव, न तु "अस्माच्छब्दादयमर्थो बोद्धव्यः" इतीश्वरेच्छारूपा; ईश्वरमनपेक्षतां पामरादीनामपि शाब्दबोधदर्शनात् अतिप्रसङ्गाच्च। अत एव आधुनिकैः सङ्केतितानां मैत्रचैत्रादिपदानामपि सङ्केतः सङ्गच्छते। न चात्र "अशौचव्यपगमे पिता नामधेयं कुर्य्यात्" इति शास्त्रात् सामान्यतश्चैत्रादीनामपीश्वरसङ्केतितत्वमिति वाच्यं, तत्र तथागतिसम्भवेऽपि यादृच्छिक-

व्याहारात्। (च) यथा,—"इह प्रभिन्नकमलोदरे मधूनि मधुकरः पिबति" इत्यत्र (छ)।

क्वचिदाप्तोपदेशात्। यथा,—"अयमश्वशब्दवाच्यः" इत्यत्र। तच्च सङ्केतितमर्थं बोधयन्ती शब्दस्य शक्त्यन्तरानन्तरिता शक्तिरभिधा नाम। (ज)

सङ्केतितडित्थडवित्थादिपदानां सङ्केतासङ्गतिप्रसङ्गात्, तस्याश्च पदार्थेषु वैशिष्ट्यं नाम सम्बन्धः कल्प्यते, घटपदाभिधेयोऽयमित्यादिप्रतीतिबलादिति साम्प्रदायिकाः।

(च) क्वचिदिति।—प्रसिद्धेति।—प्रसिद्धस्य गृहीतसङ्केतस्य पदस्य समभिव्याहारात् साहचर्य्यात्, समीपोच्चारितत्वादिति यावत्। प्रेक्षावद्भिः प्रायेण योग्यपदार्थोपस्थापकं पदं समीपे युज्यते इत्यादिसन्दधतः प्रसिद्धपदार्थान्वययोग्यपदार्थे शक्तिग्रहो भवतीति भावः। एवञ्च अशक्यार्थे योग्यतासत्त्वेऽपि वक्तृतात्पर्य्यविशेषस्यात्र हेतुत्वकल्पनान्न तत्र शक्तिग्रहः, सङ्केतमवधारयतीति योज्यम्। एवमग्रेऽपि।

(छ) इहेति।—इह अस्मिन् ["अत्र" इति पाठान्तरेऽप्ययमेवार्थः]। प्रभिन्नकमलोदरे—प्रभिन्नं प्रफुल्लं यत् कमलं पद्मं तस्य उदरं मध्यभागः परागोद्गमस्थानमिति यावत् तत्र, विकशितपद्ममध्ये इत्यर्थः, मधुकरः भ्रमरः मधूनि पिबति। अत्र "कमले मधु पिबति" इत्येषां पदानामन्वययोग्यार्थकत्वज्ञानेन मधुकरपदस्य भ्रमर एव शक्तिग्रहः। मक्षिकादौ तादृशयोग्यतासत्त्वेऽपि वक्तृतात्पर्य्यविशेषज्ञानाभावात् न शक्तिग्रहः। कमलाभ्यन्तरे भ्रमर एव पिबतीति जानता जनेन कमलपदसमभिव्याहारात् मधुकरपदस्य सङ्केतो गृह्यते।

(ज) क्वचिदाप्तोपदेशादिति।—आप्तस्य विश्वस्तस्य, प्रामाणिकस्य इत्यर्थः। उपदेशात्—वचनात्। एतदुपलक्षणं, व्याकरणादयोऽपि शक्तिग्रहोपाया द्रष्टव्याः। तदुक्तं,—"शक्तिग्रहं व्याकरणोपमानकोषाप्तवाक्याद्व्यवहारतश्च। सान्निध्यतः सिद्धपदस्य वृद्धा वाक्यस्य शेषाद्विवृतेर्वदन्ति॥" इति। दाक्ष्यादिशब्दानां दक्षाद्यपत्येषु शक्तिग्रहः व्याकरणात्। गोसदृशपिण्डदर्शनात् गोसदृशो गवयपदवाच्य इत्यतिदेशवाक्यार्थस्मरणे "अयं गवयः" इत्युपमानात्। "विनायके विघ्नराजद्वैमातुरगणाधिपाः" इति कोषात्। आप्तवाक्यादिषु उदाहृतं स्वयमेव ग्रन्थकृता। वाक्यस्य शेषात् यथा,—"यवमयश्चरुर्भवति", "वाराही चोपानत्", "वेतसकटे प्राजापत्यं धिनोति" इत्यादौ यव-वराह-वेतसशब्दाः किं म्लेच्छप्रयोगात् कङ्गु-वायस-जम्बूनां वाचकाः, उत आर्य्यप्रयोगात् दीर्घशूक-शूकर-वञ्जुलानाम्? इति विप्रतिपत्तौ "वसन्ते सर्वसस्यानां जायते

सङ्केतो गृह्यते जातौ गुणद्रव्यक्रियासु च ॥ १३ ॥

जातिः,—गोपिण्डादिषु गोत्वादिका। गुणः,—विशेषाधानहेतुः सिद्धो वस्तुधर्मः। शुक्लादयो हि गवादिकं सजातीयेभ्यः कृष्णगवादिभ्यो व्यावर्त्तयन्ति। द्रव्यशब्दा एकव्यक्तिवाचिनो हरिहरडित्थडवित्थादयः। क्रियाः,—साध्यरूपा वस्तुधर्माः पाकादयः। एषु हि अधिश्रयणावश्रयणान्तादिपूर्वापरीभूतो व्यापारकलापः पाकादिशब्दवाच्यः। एष्वेव हि व्यक्ते-

---

पत्रशातनम्। मोदमानाश्च तिष्ठन्ति यवाः कणिशशालिनः॥" "वराहं गावोऽनुधावन्ति" "अप्सुजो वेतसः" इति वाक्यशेषरूपवेदविरोधिनी म्लेच्छप्रतीतिः स्मृतिरिव वेदविरुद्धा हेया, इत्यार्य्यप्रयोगादेव दीर्घशूकादौ शक्तिग्रह इति। शक्तिः कवित्वबीजरूपः संस्कारविशेष इत्यादौ विवृतम्।

उक्ता च अभिधा तावत् त्रिप्रकारा;—समुदायमात्रशक्तिः, अवयवमात्रशक्तिः, समुदायावयवोभयशक्तिश्च। तत्र प्रथमाया उदाहरणं डित्थादिकम्; इह कस्याश्चित् अवयवशक्तेरभावात् समुदायमात्रशक्त्या काष्ठमयहस्तिनो बोधः। पाठकादिः द्वितीयायाः; तत्र प्रकृतिप्रत्ययमात्रवृत्तिलभ्यार्थयोः पाठतत्कर्तृत्वरूपयोः परस्परसम्बन्धेन योऽर्थो बोध्यते, तद्भिन्नस्य कस्यचिदपि अर्थस्यानुपलम्भेन सामुदायिकशक्तेरसत्त्वात्। पङ्कजादयः तृतीयायाः; तत्रापि प्रकृतिप्रत्ययरूपपदावयवशक्तिलभ्यानां पङ्कजननकर्तॄणां परस्परम् अन्वये पङ्कजनिकर्तृरूपादर्थादतिरिक्तस्य अरविन्दत्वविशिष्टस्य बोधेन अतिरिक्तायाः समुदायशक्तेश्च आवश्यकतया तयोरुभयोरेव एकत्रावस्थितिः। पुनरेताः एव रूढ़ि-योग-योगरूढ़िशब्दैः अपि कथ्यन्ते। अथाश्वगन्धादिषु का शक्तिः? इति शक्तिविदां प्रश्नः समाधीयते; तथा हि,—"अश्वगन्धारसं पिबेत्" इत्यादौ स्थलविशेषे केवलसमुदायशक्तिसम्बन्धः। "अश्वगन्धा वाजिशाला" इत्यादौ केवलयोगशक्तिसम्बन्धः। केचित्तु—"अश्वगन्धादीनां न प्रथमोक्तभेदयोरन्तर्भावः कैवल्याभावात्, अपि तु योगरूढ़ि-यौगिकरूढ़िभेदात् भिन्नस्य सङ्करस्य प्रथमे भेदे पङ्कजादिशब्दानाम् अन्तर्भावः, अश्वगन्धादेश्च द्वितीये" इति वदन्ति। "यौगिकरूढ़िरूपः अयं चतुर्थोऽभिधाप्रकारः" इत्यन्ये। "शब्दस्तु सर्वत्राखण्ड एव, तत्र प्रकृतिप्रत्ययगतस्य विभागस्य सर्वत्र काल्पनिकत्वेन योगशक्तेः सर्वत्रैव उपहततया रूढ़िरेवैकः शक्तिभेदः" इत्यपि केचित् वदन्तीति अभिधाविवेकसङ्क्षेपः।

उपाधिषु सङ्केतो गृह्यते, न व्यक्तौ; आनन्त्यव्यभिचारदोषापातात्। (भ)

(भ) आनन्त्यव्यभिचारदोषप्रसङ्गभयेन व्यक्तिशक्तिवादमपहाय उपाधिशक्तिवादमाह, सङ्केत इति।—द्रव्यं संज्ञाविषयः। संज्ञा च द्विविधा, चिरन्तनी आधुनिकी च। तत्राद्या रूढिरादिः, द्वितीया डित्थडवित्थादिः। आद्यादिपदार्थेनाह,—जातिरिति। गोपिण्डादिषु—गोव्यक्त्यादिषु। सिद्धः,—नित्यः; एतन्मते गुणानामपि नित्यत्वम्; आविर्भावतिरोभावावेव उत्पत्तिविनाशप्रतीतिविषयौ। वस्तुधर्मः,—द्रव्यमात्रवृत्तिः। विशेषाधानहेतुत्वमुपपादयति, शुक्लादयो हीति। साध्यरूपाः,—अन्यस्वभावाः। एषु—साध्यरूपवस्तुधर्मेषु। अधिश्रयणेति।—अधिश्रयणादीत्यर्थः, अधिश्रयणं चुल्ल्यां स्थाल्या आरोपणम्, आदिरादानवयवी यस्य; अवश्रयणं चुल्लीतः स्थाल्याः अवरोपणम् अन्तोऽन्तावयवी यस्य तयोः कर्मधारयः। अत्र ("अधिश्रयणान्तादि" इत्यत्र) आदिशब्देन गृहनिर्गमन-नगरान्तरप्रवेशान्तप्रभृतीनां ग्रहणम्। व्यापारेति।—व्यापाराणां कार्याणां कलापः समुदायः, ("कलापी भूषणे बर्हे तूणीरे संहतेऽपि च" इत्यमरः)। पाकादीत्यादिना मथनादीनां ग्रहणम्। एषु एव—स्थाल्यादिषु चतुर्षु मध्ये, [निर्द्धारणार्थे सप्तमी] ये व्यक्तेः उपाधयो धर्माः जातिगुणक्रियारूपास्तेष्वेव इत्यर्थः। संज्ञाशब्दानान्तु व्यक्तावेव सङ्केतग्रहः। द्रव्यस्य प्रतियोगिरिक्तत्वाभावेन उपाधित्वाभावान्नानात्वाभावेन उक्तदोषप्रसङ्गाभावाच्च। अत एवोक्तं,—"द्रव्यशब्दा एकव्यक्तिवाचिनः" इति। केचित्तु "संज्ञाशब्दानां संज्ञायामेव सङ्केतग्रहः, उपस्थाप्योपस्थापकभावेनाविनाभावात् व्यक्तेराक्षेपः" इत्याहुः, तन्न, संज्ञायाः शब्दानतिरिक्तत्वेन तस्य च उच्चारणभेदेन भिन्नतया भिन्नदोषप्रसङ्गात्; एवञ्च डित्थडवित्थादिकं व्यक्तिस्वरूपमेव, न तु पदार्थान्तरनित्यत्वधर्मम्। आनन्त्येति।—नानाव्यक्तिषु नानाशक्तिकल्पनागौरवमित्यभिप्रायः। ईश्वरेच्छापक्षे तदिच्छायत्तस्य नानात्वकल्पनमेव गौरवमित्यवगन्तव्यम्। ननु दृष्टव्यक्तिषु एव शक्तिग्रहः, न तु अदृष्टव्यक्तिषु, अतः कुतो गौरवम्? इत्याह,—व्यभिचारेति। सङ्केतग्रहकाले अदृष्टव्यक्तावपि बोधस्य कार्यस्य सत्त्वात् दृष्टव्यक्तिसङ्केतग्रहस्य अप्रयोजकत्वात् व्यभिचारदोष इति बोध्यं, कार्यस्य कारणाभाववदृत्तित्वं व्यभिचार इति व्यभिचारलक्षणात्। ननु गुणद्रव्यक्रियाणां प्रतिव्यक्तिभिन्नत्वेन आनन्त्यव्यभिचाराभ्यां कथं शक्तिग्रहः? इति चेन्न; तन्मते गुणादीनामपि जातिवदेकत्वमेव। भेदप्रतीतिस्तु आश्रयभेदादौपचारिकी। एतदसङ्गतमाह अन्ये जातावेव शक्तिरिति वदन्ति। यथा

काव्यप्रकाशे "सङ्केतितश्चतुर्भेदो जात्यादिर्जातिरेव वा" इति। एतन्मते गवादौ गोत्वादिरिव शुक्लादौ शुक्लत्वादिः, पाकादौ पाकत्वादिः, डित्थादौ डित्थत्वादिर्जातिरस्ति; डित्थादीनां प्रकृत्यवस्थाकालभिन्नत्वेन भिन्नत्वाङ्गीकारात् तद्वृत्तिडित्थत्वादिजातिस्वीकारः। एवञ्च शुक्लत्वादिजात्याश्रयस्य शुक्लादिगुणस्य एवाक्षेपः; पटादिपरत्वे तु लक्षणैवेति मन्तव्यम्। ननूपाधौ सङ्केतग्रहाङ्गीकारे "विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे" इति न्यायात् "गामानय" इत्यादौ गोपदादिना कथं गवादेर्ग्रहः? इति चेन्न; गवादेराक्षेपेण लाभात्। तदुक्तं,—"व्यक्त्यविनाभावात् तु जात्या व्यक्तिराक्षिप्यते" इति। यथा—"क्रियते" इत्यादौ कर्त्ता। "कुरु" इत्यादौ कर्मेत्यादि। आक्षेपो न अनुमानं, व्याप्त्यादिज्ञानव्यतिरेकेणापि व्यक्तेरनुभवात्; किन्तु स्मरणमेव, गोत्वादिप्रकारकगवादिस्मरणाभावेन गोत्वादिविशिष्टशब्दबोधानुपपत्तेः। अत एवोक्तं,—"जातिशक्तं पदं व्यक्तिमेवानुभावयति स्मारयति च" इति। जातिशक्तम्—उपाधिशक्तमित्यर्थः।

अत्रेदं विचार्य्यते,—जात्यादिषु सङ्केतग्रहे बहुदोषसम्भावनया व्यक्तौ शक्तेरङ्गीकारे तत्तद्दोषाणां वारणसम्भवेऽपि शक्त्यानन्त्यव्यभिचारयोः अवश्यम्भावात् तत्र सङ्केतः कथमपि न भवितुमर्हति। तत् कथमिति चेत्, शृणु,—प्रथमतस्तावत् व्यक्तिशक्तिवादिनं प्रति इयं पृच्छा,—उच्चारितात् शब्दात् सङ्केतग्रहः किं व्यक्तिनिचयेषु, कस्याश्चिदेकस्यां व्यक्तौ वा? तत्र न तावत् प्रथमः कल्पः, कदाचित् केनचिदुच्चारितात् एकस्मात् शब्दात् सकलव्यक्तीनां युगपदुपस्थितेरत्यन्तासम्भवात्। नापि द्वितीयः; उच्चारितात् गोशब्दात् कस्याश्चिदेव गोव्यक्तेरुपस्थितावपि तदितरासां गोव्यक्तीनां ततः कथमपि भानासम्भवात्; दृश्यते च तद्भानम्। अपरञ्च व्यक्तौ सङ्केतस्वीकारे "मृगः श्वेतरूपवान् गतिक्रियावान् डवित्थाभिधः" इत्यर्थपरतया "मृगः श्वेतः चलः डवित्थः" इत्यभिधाने सर्वैरेव पदैरेकस्यैव मृगव्यक्तेरभिधानात् आवश्यकः पदार्थगतः कश्चिदपि भेदो न भवेत्, सर्वत्र व्यक्तेरेव पदशक्यत्वेन प्रकृते सर्वैरेव पदैरेकस्यैव मृगव्यक्तेरभिधानात्। एवञ्च पदार्थगतभेदाभावेन "घटः कुम्भः" इत्यादीनामिव प्रकृतस्थलीयपदानां तुल्यव्यक्तिवाचकतया सहप्रयोगः कथमपि न सम्भवेत्। उपाधौ सङ्केतस्वीकारे तु जातिगुणक्रियासंज्ञाशब्देषु प्रवृत्तिनिमित्तस्य भिन्नत्वात् तादृशप्रयोगे पर्य्यायत्ववारणसम्भवात् सहप्रयोगस्य न काऽप्यनुपपत्तिः। तेषु जातिः विविच्यते,—ब्राह्मणादिपदवाच्या लक्षणविशेषोद्भाविता प्रत्यक्षा ब्राह्मणत्वादिः जातिः ब्राह्मणादिपदानां वाच्या। नित्यत्वे सत्यनेकसमवेतत्वमिति तस्य निकृष्टलक्षणं, सा च अनुमितिगम्या घ्राणत्वादिः घ्राणादीनाम्। अत्र वाक्यपदीयकाराः,—"गौः स्वरूपेण न

गौः नाप्यगौः गोत्वाभिसम्बन्धात् गौः"। अस्याशयः ;—सास्नाद्यन्वितः धर्मी, स्वरूपेण जात्यनुपेतव्यक्तित्वेन, गोपदवाच्यः गौः। अज्ञातगोत्वजातिकधर्मिस्वरूपमात्रेण इति एके। न गौः,—न गोव्यवहारसाधकः। नाप्यगौः,—न गोभिन्नत्वेन व्यवहार-निष्पादकः। एवं सति स्वरूपविशेषज्ञानाभावदशायां गोव्यक्तावेव गौरिति गोभेद-वानिति वा व्यवहारः सम्भवेत्। [अगौः इत्यत्र "गोरतद्धितलुकि" (५।४।९२ पा०) इत्यनेन न टच्-प्रत्ययप्रसङ्गः, "नञः तत्पुरुषात्" (५।४।७१ पा०) इति निषेधात्]। गुणः शुक्लादिः, शुक्लादिपदेनाभिधया बोध्यते, उत्पन्नं हि गवादिकं वस्तु शुक्लादिना गुणेनैव व्यावर्त्यते। अत्रैवं निर्णयः। सञ्जातस्य द्रव्यस्य क्षणात् पश्चाद्धि गुणयोगः। उत्पन्नस्य हि उत्पत्तिक्षणे निर्गुणता स्यात्, द्रव्योत्पत्तिस्तु जातिसमन्वितैव, द्रष्टा इति द्रव्योत्पत्तिक्षणेऽपि जातिमत्त्वं द्रव्यस्य, इति जातिगुणयोः वैषम्यम्। गुणलक्षणन्तु—"सत्त्वे निविशतेऽपैति पृथग्जातिषु दृश्यते। आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृति-र्गुणः॥" इति। अस्यायमर्थः,—प्रथमं द्रव्यमाश्रित्य कदाचित् ततो निवर्त्तते, कदाचिच्च तद्भिन्नेष्वपि दृश्यते यः, सः गुणः, एतेन जातेर्गुणता प्रतिषिद्धा। अथ क्रियायाम् उक्तलक्षणसत्त्वात् तस्याः अपि गुणत्वापत्तिः, साऽपि द्रव्यं कदाचित् आश्रयति, कदाचिज्जहाति, द्रव्यमपि निष्क्रियं कदाचिद्वर्त्तते, कदाचित् क्रियाऽन्वितं, द्रव्यान्तरञ्च सा कदाचित् आश्रयति इत्यतः आह ;—आधेयः,—उत्पाद्य इत्यर्थः। यद्वत् घटादीनां रूपादिकं पाकजतया उत्पाद्यम्, अक्रियाजमनुत्पाद्यं, यथा आकाशादेर्महत्त्वादिकं, क्रिया तु न नित्या, उत्पत्तिमत्त्वात्, अतस्तस्या द्विप्रकारप्रकृतिकत्वाभावात् गुणत्वा-भावः। ननु एवं द्रव्यस्यापि गुणत्वं प्राप्तम् ; अवयवि द्रव्यम् अवयवद्रव्याश्रितं भवति, असमवायिकारणसंयोगनिवृत्तौ च विनाशात् ततो निवर्त्तते। भिन्नजातीयेषु च हस्त-पादादिषु तथा दृश्यते। तदपि द्विविधं नित्यानित्यभेदेन, निरवयवस्य द्रव्यस्यात्मपर-माण्वादेर्नित्यत्वात्, अवयविद्रव्यस्य च घटपटादेरनित्यत्वादित्याह, असत्त्वप्रकृतिरिति। —द्रव्यस्वभावभिन्नः इत्यर्थः। [अत्र 'पृथग्जातिषु' इति व्यस्तवाक्यम् ; समासवाक्यत्वे "जात्यन्ताच्छः बन्धुनि" (५।४।९ पा०) इति छः प्रत्ययः स्यात्। तत्र जात्याश्रय-व्यक्तिषु दृष्टः जातिषु परिलक्ष्यते इति "वोतो गुणवचनात्" (४।१।४४ पा०) इति सूत्रे भाष्ये कैयटे च विशदीकृतम्]। क्रिया च भावनात्मिका सम्पादयितुर्व्यापार-रूपा साध्या। तथा च कथितं,—"व्यापारो भावना सैवोत्पादना सैव च क्रिया" इति "यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते। आश्रितक्रमरूपत्वात् सा क्रियेत्यभि-धीयते॥" अस्यार्थः ;—यावत् सर्वमित्यर्थः, सिद्धम् उपस्थितध्वंसप्रतियोगिरूपम्, असिद्धं तद्विपरीतम्। वर्त्तमानभविष्यद्भेदेन तत् द्विविधं, तेन 'अपचत्' 'पक्ष्यति'

अथ लक्षणा।—

मुख्यार्थबाधे तद्युक्तो ययाऽन्योऽर्थः प्रतीयते।
रूढेः प्रयोजनाद्वाऽसौ लक्षणा शक्तिरर्पिता॥१४॥(ञ)

'पचति' इत्यादिषु पचत्त्वरूपेण अर्थिता क्रिया इति तस्याः रूढिः प्रदर्शिता। यौगिकत्वमुच्यते, आश्रितेति।—आश्रितक्रमं रूपं यस्याः तस्मात्, अधिश्रयणादीनां तदीयावयवानां क्रमिकोत्पत्तिदर्शनात्। तत् समुदायः क्रियापदवाच्यः। क्रिया क्रमोऽवयवयवानां युगपदसत्त्वेऽपि यत्क्षिप्तिदवयवयवर्त्तमानतादशायां वर्त्तमानताप्रयोगः अन्ययावयविनोरभेदस्यारोपितत्वात्। भूतभविष्यत्त्वप्रयोगस्तु सर्वेषामवयवानामतीतभाविवदशायामेव। तथोच्यते,—"गुणभूतैरवयवैः समूहः क्रमजन्मनाम्। बुद्ध्या प्रकल्पितभेदः क्रियेति व्यपदिश्यते॥" तथा च भाष्यकारः,—"क्रिया हि नाम दृश्यमानापरिदृष्टा पूर्वापरीभूतावयवा न शक्यते पिण्डीभूता निदर्शयितुम्" इति। व्यापारसङ्घात्मिकायाः क्रियायाः प्रेक्षणयोग्यत्वकथनेन तदवयवानां तद्विषयत्वं व्यतिरेकमुखेनादायातम्। एकबुद्ध्याश्रयतया च एकत्वव्यवहारः तस्याः सिद्धः। अथ गुणादिसत्तरत्वादीनां प्रतिव्यक्तिभिन्नत्वात् व्यक्तिशक्तिवादे दर्शितयोः आनन्त्यव्यभिचाररूपयोः दोषयोरत्रापि सत्त्व इति चेत् न, लाघवात् प्रत्यभिज्ञया च तेषामेकत्वाभ्युपगमात्। तथा चोक्तं—"गुणक्रियायदृच्छानां वस्तुतः एकरूपाणाम् आश्रयभेदाद्इव लक्ष्यते" इति। तथा च भेदज्ञानं भ्रम एव इति तात्पर्यम्। तथैव उत्पत्तिनाशज्ञानमपि तत्र ज्ञेयम्। वर्णनित्यत्वप्रसङ्गे अकारादिषु उत्पत्तिविनाशज्ञानस्य भ्रमत्वस्वीकारात्। तत् एवं चतुष्टयी शब्दानां प्रवृत्तिः निर्णीता। सर्वेषां जातिरेवार्थः। गुणक्रियाशब्दानां गुणक्रियायोगतायाः यदृच्छाशब्दानाञ्च वाक्यादयारितात्पर्यग्राहकत्वे तत्तत्पदार्थभेदभिन्नार्थविषयतासम्बन्धात्, इति जातिशक्तिनिरूपणमन्दभंगसङ्क्षेपः।

(ञ) अथेति।—अभिधानिरूपणानन्तरमित्यर्थः, लक्षणा निरूप्यते इति शेषः। मुख्येति।—मुख्योऽभिधया प्रतिपाद्यः स चासावर्थश्च इति मुख्यार्थः, तस्य बाधोऽभिमतताल्पर्यानुपपत्तिनिबन्धनतया तिरस्कारस्तस्मिन्। मुख्यार्थश्च अभिप्रेततात्पर्यानुकूलनिबन्धनविरहतया तिरस्कारी सतीत्यर्थः [सति सप्तमीयम] तद्युक्तः,—तेन प्रसिद्धेन, यश्च वा मुख्यार्थश्च बाधे अप्रवृत्तिस्वभावेन युक्तः सम्बद्ध इति तद्युक्तः। अन्यः,—मुख्यार्थतो भिन्न इत्यर्थः, गौण इति यावत्। अर्थः यया प्रतीयते साऽसौ रूढेः रूढिमुद्दिश्य प्रयोजनात् प्रयोजनमुद्दिश्य वा, अर्पिता शक्तिर्लक्षणा नाम। अयं भावः,—"कलिङ्गः साहसिकः" "गङ्गायां

घोषः" "काकेभ्यो दधि रक्ष्यताम्" "छत्रिणो यान्ति" इत्यादौ "कलिङ्गदेशः साहसशाली" इत्यर्थः, प्रथममुपतिष्ठमानः सङ्केतितात्मा, अत एव अस्य मुख्येति व्यपदेशः, मुखे आदौ भव इति व्युत्पत्तिलभ्यत्वात्। अस्य च बाधे लक्षणायाः प्रवृत्तिः, बाधस्तात्पर्य्यानुपपत्तिः। अत एवाहुः,—"लक्षणाशक्यसम्बन्धस्तात्पर्य्यानुपपत्तितः" इति। "कलिङ्गः साहसिकः" "गङ्गायां घोषः" इत्यादिषु कलिङ्गगङ्गादिपदानां मुख्यार्थेषु देशविशेषप्रवाहादिरूपेषु साहसिकघोषादिपदार्थानामन्वयानुपपत्तिरूपस्तात्पर्य्यव्याघातापरपर्य्यायो बाधो यत्र प्रतिसन्धीयते, तत्र यया कलिङ्गदेश-गङ्गातीरादीनां बोधः, सा मुख्यार्थसम्बन्धरूपा लक्षणा। तथा हि देशविशेषप्रवाहादिरूपमुख्यार्थसम्बन्धस्य जन-तीरादिषु गृहीतत्वाज्जनतीरादीनां तत्रत्याद्यात्मना स्मरणं, तदनन्तरञ्च शाब्दबोधः। यदि तु मुख्यार्थस्य अन्वयानुपपत्तिरेव बाधरूपं लक्षणाबीजं स्यात्, तदा कदाचित् अन्वयानुपपत्तेरसत्त्वे तात्पर्य्यानुपपत्तेः सत्त्वेऽपि लक्षणा न स्यात्, तत्र तादृशबाधस्यासत्त्वात्, अतस्तात्पर्य्यव्याघातरूपे एव बाधे लक्षणाऽङ्गीकार्य्या। तदाहुः,—"यदि चान्वयानुपपत्तिर्लक्षणाबीजं स्यात्, तदा 'गङ्गायां घोषः' इत्यादौ क्वचिद्गङ्गाऽऽदिपदानां तीरादौ, क्वचित् घोषादिपदानां मत्स्यादौ लक्षणेति नियमो न स्यात् इति"। इदमभिहितम्;—'गङ्गायां घोषः' इत्यादौ 'गङ्गातीराधिकरणको ग्रामविशेषः' इत्यादितात्पर्य्येण अभिहितेऽपि घोषादिपदानां मकरादिषु लक्षणा, 'गङ्गाप्रवाहाधिकरणको मकरः' इत्यादितात्पर्य्येण अभिहिते च गङ्गादिपदानां तीरादिषु लक्षणाऽऽपद्येत, तावताऽपि अन्वयानुपपत्तिपरिहारात्। इदं तु बोध्यम्;—क्वचित् तात्पर्य्यव्याघातोऽन्वयानुपपत्त्या, क्वचिच्चासम्भवेन, क्वचित् पुनः साक्षात्। यदि वाच्यार्थसम्बन्धः भवत्वतीरत्वादिना रूपेण गृहीतस्तदा भवत्वादिनैव भवादिबोधः; यदि तु कलिङ्गभवत्वगङ्गातीरत्वादिना, तदा कलिङ्गभवत्वादिना। एवञ्च लक्ष्यताऽवच्छेदके न लक्षणेति सिद्धम्। तत्र तत्प्रकारकबोधस्य अन्यथाऽपि सम्भवात् इति। अत्र "मुख्यार्थबाधे तद्युक्तः" इति हेतुपूर्वकार्थविशेषणक्रोडीकरणेन लक्षणाप्रतिपाद्यार्थस्वरूपनिरूपणम्; "ययाऽन्योऽर्थः प्रतीयते" इति लक्षणाया लक्षणम्; 'रूढेः प्रयोजनाद्वा' इति लक्षणाया द्वैविध्यार्थम्; तथा च रूढिमूला लक्षणा, प्रयोजनमूला लक्षणा चेति सिद्धम्; तत्प्रतिपाद्योऽर्थश्च मुख्यार्थबाधोपस्कृतमुख्यार्थसम्बन्धो मुख्यत्वानवच्छिन्नतया गौणत्वावच्छिन्न एव। यद्वा—मुख्यार्थबाधो मुख्यार्थसम्बन्धो रूढिप्रयोजनयोरन्यतरश्चेति त्रयं लक्षणायाः प्रवृत्तौ हेतुः। न चैवं लक्षणाविभागाभिधानं, तस्याः प्रवृत्तिप्रयोजकमात्रेण तत्तदभिधानात्। 'शक्तिः' इति पूर्वमभिहितस्य लक्षणायाः शक्तिस्वरूपत्वस्य स्मारकम्। 'वर्षिता' इति विशेषणं

"कलिङ्गः साहसिकः" इत्यादौ कलिङ्गादिशब्दो देशविशेषादिरूपे स्वार्थेऽसम्भवन् यया शब्दस्य शक्त्या स्वसंयुक्तान् पुरुषादीन् प्रत्याययति, यया च "गङ्गायां घोषः" इत्यादौ गङ्गादिशब्दो जलमयादिरूपार्थवाचकत्वात् प्रकृतेऽसम्भवन् स्वस्य सामीप्यादिसम्बन्धसम्बन्धिनं तटादिं बोधयति, सा शब्दस्यार्पिता स्वाभाविकेतरा ईश्वरानुद्भाविता वा शक्तिर्लक्षणा नाम। पूर्वत्र हेतू रूढिः प्रसिद्धिरेव। उत्तरत्र "गङ्गातटे घोषः" इति प्रतिपादनादलभ्यस्य शीतत्वपावनत्वातिशयस्य बोधनरूपं प्रयोजनम्। हेतुं विनाऽपि यस्य कस्यचित् सम्बन्धिनो लक्षणेऽतिप्रसङ्गः स्यादित्यत उक्तम्,—"रूढेः प्रयोजनाद्वाऽपि" इति। (ट)

पुनर्लक्षितलक्षणायास्तस्याः स्वरूपाभिधानपुरःसरमभिधावत् शक्तिस्वरूपत्वनिराकरणार्थम्। 'राजत्युमावल्लभः' इत्यादौ शाब्द्यां व्यञ्जनायामतिप्रसङ्गवारणाय 'मुख्यार्थबाधे' इति। एवं सति असम्बद्धे लक्षणायां 'गङ्गायां घोषः' इत्यादौ गङ्गादिपदात् [illegible]दितटस्याप्युपस्थितेरतिप्रसङ्गवारणाय 'तद्युक्तः' इति। मुख्यार्थेन सम्बद्धमर्थान्तरमेवानया निरूप्यते इति निदर्शयितुम् 'अन्योऽर्थः' इति।

(ट) रूढिहेतुकायाः प्रयोजनहेतुकायाश्च लक्षणायाः प्रसिद्धलक्षणयोर्लक्षणां सङ्गमयन् कारिकां विवृणोति,—कलिङ्ग इत्यादिना। साहसिकत्वं चेतनधर्मः, तस्य अचेतने देशे अन्वयानुपपत्तिरिति दर्शयति, कलिङ्गादिशब्द इति।—देशविशेषे स्वार्थे वर्त्तमानः कलिङ्गादिशब्दः। असम्भवन्—साहसिकाद्यन्वययोग्यमर्थमभिधातुमशक्नुवन् इत्यर्थः। स्वसंयुक्तान्—स्वार्थसम्बद्धान्। प्रकृते—घोषनिवासादौ। असम्भवन्—अभिधया वर्त्तितुमशक्नुवन्। केचिदभिधां स्वाभाविकं शब्दव्यापारं वदन्ति, तन्मते लक्षणाया वैलक्षण्यमाह,—स्वाभाविकेतरेति। अन्ये तु ईश्वरेच्छाविषयत्वरूपामाहुस्तन्मते तु आह,ईश्वरानुद्भावितेति।—ईश्वरेण अनुत्थापितेत्यर्थः, इदानीन्तनवक्तृभिरुत्थापितेति यावत्। पूर्वत्र—"कलिङ्गः साहसिकः" इत्यादौ। उत्तरत्र—"गङ्गायां घोषः" इत्यादौ। प्रतिपादनादिति।—प्रतिपादयतीति प्रतिपादनं वाक्यं,तदलभ्यस्य मुख्यशब्दघटितवाक्येन अप्रतिपाद्यस्य इत्यर्थः,तीरस्य विप्रकृष्टांशगतशीतत्वाद्यपेक्षया सन्निकृष्टांशगतशीतत्वादेराधिक्यमत्रातिशयः। एवञ्च "अतिशीतेऽतिपावने च तीरे घोषः" इति

केचित् तु "कर्मणि कुशलः" इति रूढावुदाहरन्ति। तेषामयमभिप्रायः,—"कुशं लाति" इति व्युत्पत्तिलभ्यः कुशग्राहिरूपो मुख्योऽर्थः प्रकृतेऽसम्भवन् विवेचकत्वादिसाधर्म्यसम्बन्धसम्बन्धिनं दक्षरूपमर्थं बोधयति। तदन्ये न मन्यन्ते; कुशग्राहिरूपार्थस्य व्युत्पत्तिलभ्यत्वेऽपि दक्षरूपस्यैव मुख्यार्थत्वात्। अन्यद्धि शब्दानां व्युत्पत्तिनिमित्तमन्यच्च प्रवृत्तिनिमित्तम्। व्युत्पत्तिलभ्यस्य मुख्यार्थत्वे "गौः शेते" इत्यत्रापि लक्षणा स्यात्। "गमेर्डोः" (उणादि—२।६७) इति गमधातोर्डोप्रत्ययेन व्युत्पादितस्य गोशब्दस्य शयनकालेऽपि प्रयोगात्। (ठ)

व्यञ्जनाजन्यबोधो लाक्षणिकशब्दप्रयोगस्य प्रयोजनमिति भावः। 'काश्चिन्नैव त्वशक्तितः' इति लक्षणाया निषेध उक्तः। अशक्तितः रूढिप्रयोजनविरहात्। यथा "कमले चरणाघातं मुखं सुमुखि! तेऽकरोत्" इत्यत्र निर्जितत्वं लक्ष्यते, एषा नेयार्थलक्षणा दोषतया वक्ष्यते। सा च कविप्रयोगानर्हत्वात् प्रकृतलक्षणस्य लक्ष्या न भवतीति तत्रातिव्याप्तिवारणाय चरमहेतुद्वयमुपन्यस्तम्। तदेव दर्शयति, हेतुमिति।—रूढिप्रयोजनयोरन्यतरमित्यर्थः। सम्बन्धिनः,—मुख्यार्थसम्बन्धिनः। लक्षणे—लक्षणायाम्।

(ठ) "कुशं ('कुशान्' इति पाठान्तरं) लाति गृह्णाति" इति कुशलः ['आतोऽनुपसर्गे कः' (३।२।३ पा०) इति कः] इति व्युत्पत्त्या—प्रकृतिप्रत्ययविभागकल्पनया। लभ्यः,—प्रतिपाद्यः। कुशग्राहिरूपः,—कुशग्रहणकर्तृरूपः। मुख्यः,—योगशक्त्या लभ्यत्वात् प्रधानभूतः। अर्थः,—अभिधेयः। प्रकृते—प्रसङ्गानुप्रसक्ते कर्मणि विषये। असम्भवन्—तात्पर्य्यप्रतिकूलतया योग्यतामनुपपद्यमानः। विवेचकेति।—विवेचकत्वादेः साधर्म्यं समानधर्मत्वं तस्य सम्बन्धस्तस्य सम्बन्धी तदभिन्नसम्बन्धवान् तं तथोक्तम्। दक्षेति।—दक्षश्चतुरस्तद्रूपमर्थं बोधयति—प्रत्याययति। तदन्ये—अस्मदादय इत्यर्थः। न मन्यन्ते—नैव स्वीकुर्वन्ति। कुतः? इत्याह,—कुशग्राहिरूपार्थस्येति। व्युत्पत्तिलभ्यत्वेऽपि—"कुशं लाति" इति व्युत्पत्त्या लभ्यस्य भावस्तत्त्वं तस्मिन् सत्यपि। दक्षरूपस्य एव—अत्र एव-शब्देन कुशग्रहणरूपार्थस्य व्यवच्छेदः, मुख्यार्थत्वात्। इदमत्र बोध्यम्;—यद्यपि "कुश्यति श्लेषयति आरब्धफलानि" इति व्युत्पत्त्या कुशलशब्दस्य दक्षरूपो मुख्योऽर्थस्तथाऽपि प्रौढ़वादेनेदमुक्तमिति। अत्र हेतुमाह, अन्यदिति।—

तद्भेदानाह,—

मुख्यार्थस्येतराक्षेपो वाक्यार्थेऽन्वयसिद्धये।
स्यादात्मनोऽप्युपादानादेषोपादानलक्षणा ॥ १५ ॥

रूढावुपादानलक्षणा यथा,—"श्वेतो धावति"। प्रयोजने यथा,—"कुन्ताः प्रविशन्ति"। अनयोर्हि श्वेतादिभिः कुन्ता-

---

व्युत्पत्तिलभ्यार्थप्रतीतौ प्रकारीभूतो धर्मः व्युत्पत्तिनिमित्तं यथा गोशब्दस्य मननकर्तृत्वं, सङ्केतग्रहे प्रकारीभूतो धर्मः प्रवृत्तिनिमित्तं अवयवाऽवच्छेदकं यथा गोत्वजातिः। शब्दानां व्युत्पत्तिनिमित्तमेव प्रवृत्तिनिमित्तमिति तु न नियमः, पाचकादिशब्दस्य क्रियैकक्षणत्वेऽपि गवादिशब्दस्य व्यभिचारात्। प्रकृते तु कुमुमादित्वरूपव्युत्पत्तिनिमित्तस्यानेकपदार्थघटितत्वेन गुरुत्वात् तदपेक्ष्य लघुना दशत्वरूपावच्छेदकोपाधिनैव कुमुमशब्दस्य सङ्केतग्रहः। ननु रूढिवत् व्युत्पत्तिरपि पदार्थोपस्थापिकेति रूढिविषयस्यैव व्युत्पत्तिविषयस्यापि मुख्यत्वमायातमिति चेन्न, रूढ्या प्रतिरुद्धायाः व्युत्पत्तेः पदार्थोपस्थापकत्वानभ्युपगमात्। तदुक्तं भट्टैः,—"लक्ष्ये सिद्धा सती रूढिर्नवेत् योगापहारिणी। कल्पनीया तु लभते नात्मानं योगबाधतः॥" इति। लक्ष्यसिद्धा—जनितपदार्थोपस्थापिका कोषपरम्परयाप्रसिद्धा सती अनादिसिद्धा; योगापहारिणी—व्युत्पत्तिलभ्यार्थस्य प्रतिबन्धिका; कल्पनीया—लाक्षणप्रतिसन्धात्रभिरिदानीन्तनैरङ्गीकारणीया। आत्मानं—पदार्थोपस्थितिम्; न लभते—न जनयति। योगबाधतः,—योगे बाधनात्। रूढेस्तया; पदार्थोपस्थापकत्वस्य च कल्पनामपेक्ष्य कुमुमादिवत्वेनैव पदार्थोपस्थापकत्वमावश्यं कल्प्यते इति भावः। व्युत्पत्तिलभ्यस्य मुख्यत्वस्वीकारे दोषमाह,—व्युत्पत्तिलभ्येति। मुख्यार्थत्वे—मुख्यार्थत्वस्वीकारे, अयमर्थः—मननकर्तृत्वरूपमुख्यार्थबाधः इति भावः। यदि पुनः लक्षणादिप्रन्थयानां व्युत्पत्तेः प्राधिक्यं कल्प्यते तदा "निषङ्गे सायकाः सन्ति" इत्यादौ लक्षणाऽऽपत्तेर्दोषो द्रष्टव्यः। "गोऽस्मर्गन्धि" इति गोधातोरुणादि-प्रत्ययनिष्पन्नस्य सायकशब्दस्य विनाशाभावबोधेऽपि प्रयोगादिति। ये तु "अर्गन्धि कुमुमः, सायकं, कुसुमः, कुसुमम् इत्यादौ दशत्वादेः प्रवृत्तिनिमित्तत्वात् व्युत्पत्तिनिमित्तस्य झटिति अप्रतीतेः बाधप्रतिसन्धानं विनापि तत्प्रतीतेश्च 'कुमुमः कलश' इति प्रत्यये कुमुमपदस्य वैयाकरणैः लाक्षणिकत्वं रूढिप्रसिद्धिरेवास्तु" इति वदन्ति, तन्मते तैलपदमुदाहरणमिति बोध्यम्। तैलपदस्य तिलविकारद्रवे प्रकृत्यर्थे निरूढलक्षणा इत्युद्योतकाराद्याः।

दिभिश्च अचेतनतया केवलैर्धावनप्रवेशनक्रिययोः कर्त्तृतया-ऽन्वयमलभमानैरेतत्सिद्धये आत्मसम्बन्धिनोऽश्वादयः पुरुषादयश्चाक्षिप्यन्ते। पूर्वत्र प्रयोजनाभावाद्रूढिः। उत्तरत्र तु कुन्तादीनामतिगहनत्वं प्रयोजनम्। अत्र च मुख्यार्थस्य आत्मनोऽप्युपादानम्; लक्षणलक्षणायान्तु परस्यैव उपलक्षणमित्यनयोर्भेदः। इयमेव "अजहत्स्वार्था" इत्युच्यते। (ड)

(ड) लक्षणाया विशेषलक्षणमाह, मुख्यार्थस्येति।—'यया' इत्यध्याहार्य्यम्। मुख्यार्थस्येति तृतीयार्थे षष्ठी। "वाक्यार्थे" इत्यत्र सप्तम्यर्थो घटकत्वं, ततश्च मुख्यार्थस्य—मुख्यार्थेन; वाक्यार्थे अन्वयसिद्धये—वाक्यार्थघटकान्वयबोधाय; यया वृत्त्या इतरस्य—शक्यतावच्छेदकातिरिक्तधर्मावच्छिन्नस्य, आक्षेपः,—प्रत्यायनम्, एषा उपादानलक्षणा स्यात्। संज्ञाबीजमाह, आत्मनोऽपीति।—मुख्यार्थस्यापीत्यर्थः। उपादानात्—प्रत्यायनात्; मुख्यार्थविषयिणी प्रतीतिरुपादानम्। यद्वा,—उपादीयते गृह्यते मुख्यार्थोऽनेनेत्युपादानं तन्नाम्नी लक्षणा उपादानलक्षणेत्यर्थः। अत एव "उपादानं लक्षणञ्चेत्युक्ता शुद्धैव सा द्विधा" इति काव्यप्रकाशेऽप्युक्तम्। अत्र "वाक्यार्थे" इत्यनेन तात्पर्य्यविषयीभूतो वाक्यार्थो ग्राह्यः, अन्यथा इदमनर्थकम्। "छत्रिणो यान्ति" इत्यत्र छत्रिगमनकर्त्तृत्वरूपवाक्यार्थस्य घटकोभयान्वयबोधाय मुख्यार्थस्याक्षेपो युज्यते। "कदली कदली" इत्यादावुपादानलक्षणासंग्रहाय शक्यतावच्छेदकातिरिक्तेति। अत्र क्वचित् मुख्यार्थ एव धर्मान्तरेण प्रतीयते, यथा "कदली कदली" इत्यादौ द्वितीयकदलीपदं शैत्यरूपधर्मान्तरेण कदलीमेव बोधयति। क्वचित् मुख्यार्थस्तद्भिन्नश्च धर्मान्तरेण प्रतीयते; यथा,—"काकेभ्यो दधि रक्ष्यताम्" इत्यत्र काकपदेनान्नोपघातकत्वेन काककुक्कुरमार्जारा लक्ष्यन्ते। अत्र प्रयोजनाभावात् रूढिः। "छत्रिणो यान्ति" इत्यादौ छत्रिसार्थवाहित्वेन छत्रिणस्तद्भिन्नाश्च प्रतीयन्ते। छत्रिणां बाहुल्यमत्र प्रयोजनम्। क्वचिच्च मुख्यार्थविशिष्टः प्रतीयते, यथा,—"श्वेतो धावति" "कुन्ताः प्रविशन्ति" इति। उक्तोदाहरणयोर्लक्षणं सङ्गमयति,—अनयोर्हीति।—"श्वेतो धावति" इत्यत्र "कुन्ताः प्रविशन्ति" इत्यत्र चेत्यर्थः। एतदुपलक्षणम्; तथा च, एवमन्यत्रापीत्यर्थः। अत एवाह,—'श्वेतादिभिः' 'कुन्तादिभिश्च' इति। अत्रादिपदोपादानं बहुवचनञ्च सङ्गच्छते। धावनादिप्रवेशनादिकर्त्तृतयाऽभिमतैः श्वेतादिपदैः कुन्तादिपदैश्चेत्यर्थः। अचेतनतया—जडतया। केवलैः,—परानन्वितैः; अत एव धावनप्रवेशनक्रिययोरुपलक्षणेन धावनादिक्रियायां प्रवेशनादिक्रियायाञ्च कर्त्तृतयाऽन्वयम् अलभ-

अर्पणं स्वस्य वाक्यार्थे परस्यान्वयसिद्धये।
उपलक्षणहेतुत्वादेषा लक्षणलक्षणा॥ १६॥ (ढ)

रूढ़िप्रयोजनयोर्लक्षणलक्षणा यथा,—"कलिङ्गः साहसिकः" इति "गङ्गायां घोषः" इति च। अनयोर्हि पुरुषतटयोर्वाक्यार्थेऽन्वयसिद्धये कलिङ्गगङ्गाशब्दावात्मानमर्पयतः। यथा वा,—

"उपकृतं बहु तत्र किमुच्यते
सुजनता प्रथिता भवता परम्।
विदधदीदृशमेव सदा सखे!
सुखितमास्स्व ततः शरदां शतम्॥" (ण)

मानैः। एतत्सिद्धये—धावनादिप्रवेशनादिकर्तृत्वान्वयबोधाय। आत्मसम्बन्धिनः इति—यथायथं समवायिनः स्वसंयोगिनश्चेत्यर्थः। अश्वादयः पुरुषादयश्च आक्षिप्यन्ते—प्रत्यायन्ते। पूर्वत्र—पूर्वस्मिन्, पूर्वमुदाहृते 'श्वेतो धावति' इत्यादाविति यावत्। प्रयोजनेति।—प्रयोजनस्य प्रयोजनीभूतज्ञानविषयस्य अभावो विरहोऽसम्भवो वा तस्मात् तथोक्तात्। रूढ़िः,—रूढ़िमूला लक्षणेत्यर्थः। उत्तरत्र—'कुन्ताः प्रविशन्ति' इत्यादावित्यर्थः, कुन्तादीनामतिगहनत्वं प्रयोजनं—प्रयोजनीभूतज्ञानविषयः, अस्तीति शेषः। अत्र—'श्वेतो धावति' 'कुन्ताः प्रविशन्ति' इत्यादावित्यर्थः। मुख्यार्थस्य—श्वेतादिरूपस्य कुन्तादिरूपस्य चेत्यर्थः। आत्मनः,—आत्मभूतस्यापि; उपादानं—ग्रहणम्। लक्षणलक्षणायाश्च परस्य—स्वसंसर्गिणः एव, न तु स्वात्मन इत्येवम्, अनयोः,—उपादानलक्षणाया लक्षणलक्षणायाश्च भेदः। अस्याः संज्ञान्तरमाह,—इयमेवेति। अजहदजन् स्वार्थो मुख्यार्थो यामिति अजहत्स्वार्था।

(ढ) लक्षणलक्षणामाह, अर्पणमिति।—वाक्यार्थे परस्यैव—मुख्यार्थभिन्नस्यैव, अन्वयसिद्धये स्वस्य अर्पणं—स्वार्थपरित्याग इत्यर्थः, यया भवतीति शेषः, उपलक्षणहेतुत्वात्—मुख्यार्थाविषयिण्याः प्रतीतेः, एषा लक्षणलक्षणा।

(ण) उपकृतमिति।—हे सखे! भवता बहु बहुलं यथा स्यात् तथेत्यर्थः, [उपकृतमिति क्रियाया विशेषणमिदम्] उपकृतं मम अनिष्टजातनिवृत्तये इष्टार्थसम्पत्तये च यतितमित्यर्थः, तत्र तस्मिन् उपकारविषये इत्यर्थः, किमुच्यते? तत्र किमपि कथनीयं नावशिष्यते इति भावः, भवता परम् अत्यर्थं सुजनता सौजन्यं प्रथिता प्रकटिता; अनुपकारिणोऽपि मम यत् बहु उपकृतं तत् तव सज्जनत्वमिति

अत्र अपकारादीनां वाक्यार्थेऽन्वयसिद्धये उपकृतादयः शब्दा आत्मानमर्पयन्ति। अत्र अपकारिणं प्रत्युपकारादिप्रतिपादनान्मुख्यार्थबाधः; वैपरीत्यलक्षणः सम्बन्धः; फलमप्यपकारातिशयः। इयमेव "जहत्स्वार्था" इत्युच्यते। (त)

आरोपाध्यवसानाभ्यां प्रत्येकं ता अपि द्विधा॥१७॥(थ)

ताः,—पूर्वोक्ताश्चतुर्भेदलक्षणाः।

विषयस्यानिगीर्णस्यान्यतादात्म्यप्रतीतिकृत्।
सारोपा स्यान्निगीर्णस्य मता साध्यवसानिका॥१८॥(द)

वाक्यार्थः; अतः हे सखे! सदा ईदृशमेव, सौजन्यमिति शेषः, विदधत् कुर्वन् ततः तस्मात्, तथोपकारविधानेन सौजन्यप्रकटनाद्धेतोरित्यर्थः, शरदां वत्सराणां ("शरत् स्त्री वत्सरेऽप्यृतौ" इति मेदिनी) शतं शतवत्सरपर्य्यन्तमिति यावत्, आस्स्व तिष्ठ, जीवेति यावत्। अत्यन्तापकारिणं प्रत्युक्तिरियम्। द्रुतविलम्बितं वृत्तम्।

(त) अत्र अपकारादीनां—प्रकृतानामिति भावः, वाक्यार्थे—वक्तृतात्पर्य्यविषये इति भावः। उपकृतादयः आत्मानमर्पयन्ति—स्वार्थं परित्यज्य विपरीतमर्थमपकृतादिकं लक्षयन्तीत्यर्थः। फलं—प्रयोजनम्। अपकारातिशयः,—अपकारबाहुल्यम्। जहत्स्वार्थेति—जहत् स्वार्थो यां सा।

(थ) इत्थं लक्षणाया द्वौ भेदावुक्त्वा पुनस्तयोरपि प्रत्येकं द्वैविध्यमाह, आरोपेति।—ताः,—पूर्वोक्ताश्चतुर्भेदाः, चातुर्विध्यञ्च रूढ़प्रयोजनाभ्याम् उपादानोपलक्षणाभ्याञ्चेति बोध्यम्। आरोपः,—आहार्य्याभेदप्रतीतिः, अध्यवसानं—सिद्धाभेदप्रतीतिः, ताभ्यां प्रत्येकं द्विधा, ततश्च सारोपा रूढ़िहेतुका उपादानलक्षणा, सारोपा रूढ़िहेतुका लक्षणलक्षणा, सारोपा फलहेतुका उपादानलक्षणा, सारोपा फलहेतुका लक्षणलक्षणा, साध्यवसाना रूढ़िहेतुका उपादानलक्षणा, साध्यवसाना रूढ़िहेतुका लक्षणलक्षणा, साध्यवसाना फलहेतुका उपादानलक्षणा, साध्यवसाना फलहेतुका लक्षणलक्षणा इत्यष्टभेदा लक्षणा इत्यर्थः।

(द) सारोपां साध्यवसानाञ्चाह, विषयस्येति।—अनिगीर्णस्य शाब्दस्य, विषयस्य लक्ष्यस्य या अन्येन मुख्यार्थेन तादात्म्यप्रतीतिम् अभेदप्रतिपत्तिं करोति सा तथोक्ता सारोपा। या च निगीर्णस्य आर्थस्य, अन्यतादात्म्यप्रतीतिकृत् सा साध्यवसाना। मता—कथिता।

विषयिणा अनिगीर्णस्य विषयस्य तेनैव सह तादात्म्यप्रतीतिरूपत् सारोपा। इयमेव रूपकालङ्कारस्य बीजम्। रूढौ उपादानलक्षणा सारोपा यथा,—"अश्वः श्वेतो धावति"। अत्र हि श्वेतगुणवान् अश्वोऽनिगीर्णस्वरूपः स्वसमवेतश्वेतगुणतादात्म्येन प्रतीयते। प्रयोजने यथा,—"एते कुन्ताः प्रविशन्ति", अत्र सर्वनाम्ना कुन्तधारिपुरुषनिर्देशात् सारोपत्वम्। रूढौ लक्षणलक्षणा सारोपा यथा,—"कलिङ्गः पुरुषो युध्यते", अत्र पुरुषकलिङ्गशब्दयोराधाराधेयभावः सम्बन्धः। प्रयोजने यथा,—"आयुर्घृतम्", अत्र आयुष्कारणमपि घृतं कार्यकारणभावसम्बन्धसम्बन्ध्यायुस्तादात्म्येन प्रतीयते। अन्यवैलक्षण्येनापि अव्यभिचारेण आयुष्करत्वं प्रयोजनम्।

यथा वा,—राजकीये पुरुषे गच्छति "राजाऽसौ गच्छति" इति। अत्र स्वस्वामिभावलक्षणः सम्बन्धः। यथा वा,—अयमात्रेऽवयवभागे "हस्तोऽयम्", अत्र अवयवावयविभावलक्षणः सम्बन्धः। "ब्राह्मणेऽपि तच्चाऽसौ", अत्र तात्कर्म्यलक्षणः सम्बन्धः। "इन्द्रार्थासु स्थूणासु अमी इन्द्राः", अत्र तादर्थ्यलक्षणः सम्बन्धः। एवमन्यत्रापि। निगीर्णस्य पुनर्विषयस्य अन्यतादात्म्यप्रतीतिरूपत् साध्यवसाना। अस्याश्चतुर्षु भेदेषु पूर्वोदाहरणान्येव। (घ)

(घ) उदाहरति, रूढावित्यादि।—रूढौ सत्यां सारोपा उपादानलक्षणा यथा—"अश्वः श्वेतो धावति" इत्यनेनेत्यर्थः। हि—यतः, ("हि हेताववधारणे"इत्यमरः)। अत्र—"अश्वः श्वेतो धावति" इत्यनेनेत्यर्थः। "श्वेतो धावति" इत्यत्र यथा "श्वेतः" इति पदेन निगीर्णः,तथा अश्वः न निगीर्णः स्ववाचकशब्देनोपलक्ष्यशरीरत्वात्, किन्तु स्वस्मिन् (अश्वे) समवेतः समवायसम्बन्धेन वर्त्तमानो यः श्वेतगुणः तेन तादात्म्यभेदरूपेण प्रतीयते इति भावः। प्रयोजने यथा इति।—प्रयोजने सति सारोपोपादानलक्षणा यथेत्यर्थः। एते कुन्ताः,—अन्यापरनामानः अस्त्रविशेषाः। प्रविशन्ति, दुर्गे इति शेषः।

सादृश्येतरसम्बन्धाः शुद्धास्ताः सकला अपि।
सादृश्यात्तु मता गौण्यस्तेन षोढ़ामभेदिताः ॥१६॥(ग)

ताः,—पूर्वोक्ता अष्टभेदा लक्षणाः। सादृश्येतरसम्बन्धाः,—कार्य्यकारणभावादयः। अत्र शुद्धानां पूर्वोदाहरणान्येव। रूढ़ावुपादानलक्षणा सारोपा गौणी यथा,—"एतानि तैलानि हैमन्ते सुखानि"। अत्र तैलशब्दस्तिलभवत्वेहरूपं मुख्यार्थमुपादायैव सार्षपादित्वेषु वर्त्तते। प्रयोजने यथा,—राजकुमारेषु तत्सदृशेषु च गच्छत्सु "एते राजकुमाराः गच्छन्ति"। रूढ़ावुपादानलक्षणा साध्यवसाना गौणी यथा,—"तैलानि हैमन्ते सुखानि"। प्रयोजने यथा,—"राजकुमाराः गच्छन्ति"। रूढ़ौ लक्षणलक्षणा सारोपा गौणी यथा,—

अत्र सर्वनाम्ना—"एते" इत्यनेनेत्यर्थः। कुन्तेति।—कुन्तधारिणो ये पुरुषास्तेषां निर्देशस्तस्मात्, तं निमित्तीकृत्येत्यर्थः; सारोपत्वम्। अत्र कार्य्यकारणः सम्बन्धः। "राजाऽयं गच्छति" इत्यत्र राजवत् परिच्छदातिशयबोधनं प्रयोजनम्। अवयवभागे—तरुरूपभृते। अयमात्मे अयदृश्ये, इति वक्तव्ये इति शेषः। 'अयं दृश्यः' इति दृश्यशब्दो लाक्षणिकः। दृश्यावयवेन दृश्यव्यापारं सम्बन्धयतीति परानुमानातिशयः प्रयोजनं व्यञ्जयते। अत्र तथा—प्रयोजनापेक्षयेति रूढ़िरित्यवगन्तव्यम्। "तथाऽमी" इत्यत्र तत्कर्मण्यपुरुषातिशयः प्रयोजनम्। इन्द्रार्थासु—इन्द्रारावनार्थं निर्मितासु। स्थूणासु—खन्यविशेषेषु। अत्र इन्द्रवत् पूज्यत्वरूपं प्रयोजनम्। पूर्वोदाहरणानि—'श्येनो धावति' 'आयुर्घृतम्' इत्यादीनि।

(ग) एवं लक्षणया अष्टविधत्वमुक्त्वा पुनर्द्वैविध्यमाह, सादृश्येति।—ताः,—लक्षणाः। सकलाः,—अष्टभेदा अपि लक्षणाः। सादृश्येति।—सादृश्यादितरे भिन्नाः सम्बन्धाः हेतवो यासां ताः सादृश्येतरसम्बन्धाः सादृश्यभिन्नसम्बन्धबन्धनेत्यर्थः। शुद्धाः,—शुद्धाभिधेयाः। सादृश्यात्, सम्बन्धादिति शेषः, तु गौण्याः लताः कथिताः। या: सादृश्यसम्बन्धहेतुका न भवन्ति ताः शुद्धाः, अन्याः पुनर्गौण्याः इति निर्गलितोऽर्थः। तेन—हेतुना। लक्षणाः षोढ़ामभेदिताः,—षोढ़ा भेदा आसां यासां ताः षोढ़ाः।

"राजा गौड़ेन्द्रः कण्टकं शोधयति"। (प) प्रयोजने यथा,—"गौर्वाहीकः"। रूढ़ौ लक्षणलक्षणा साध्यवसाना गौणी यथा,—"राजा कण्टकं शोधयति"। प्रयोजने यथा,—"गौर्जल्पति"। (फ)

अत्र केचिदाहुः,—"गोसहचारिणो गुणा जाड्यमान्द्यादयो लक्ष्यन्ते। ते च गोशब्दस्य वाहीकार्थाभिधाने निमित्तीभवन्ति" इति। तदयुक्तम्; गोशब्दस्यागृहीतसङ्केतं वाहीकार्थमभिधातुमसामर्थ्यात् गोशब्दार्थमात्रबोधनाच्च, अभिधायाः विरतत्वात्, विरतायाश्च पुनरुत्थानाभावात्।

अन्ये च पुनः "गोशब्देन वाहीकार्थो नाभिधीयते, किन्तु स्वार्थसहचारिगुणसाजात्येन वाहीकार्थगता गुणा एव लक्ष्यन्ते"। तदपि अन्ये न मन्यन्ते; तथा हि,—अत्र गोशब्दाद्वाहीकार्थः प्रतीयते न वा? आद्येऽपि गोशब्दादेव वा, तल्लक्षिताद्वा गुणात् अविनाभावद्वारा? तत्र न प्रथमः, वाहीकार्थेऽस्यासङ्केतितत्वात्। न द्वितीयः, अविनाभावलभ्यस्यार्थस्य शाब्देऽन्वये प्रवेशासम्भवात्, शाब्दी ह्याकाङ्क्षा शब्देनैव प्रपूर्य्यते। न द्वितीयः; यदि हि गोशब्दाद्वाहीकार्थो न प्रतीयते, तदाऽस्य वाहीकशब्दस्य च सामानाधिकरण्यमसम-

(प) पूर्वोदाहरणानीति।—"अश्वः श्वेतो धावति" इत्यादीन्युदाहरणान्येवेत्यर्थः। राजेति।—राजा गौड़ेन्द्रः,—गौड़स्य तन्नाम्ना प्रसिद्धस्य देशस्येन्द्रो राजेति तथोक्तः। कण्टकं—क्षुद्रशत्रुम्। शोधयति—उद्धरति, निर्वैरं करोतीत्यर्थः। अत्र तीक्ष्णाग्रवृक्षाङ्गविशेषः कण्टकपदस्य मुख्यार्थः, तस्य शोधनासम्भवात् दुःखदत्वेन तत्सदृशे क्षुद्रशत्रौ लक्षणा वर्त्तते। यत्तु—"क्षुद्रशत्रौ च कण्टकम्" इत्यभिधानं, तत् निरूढ़लक्षणायां ग्राहकं, न त्वभिधाया इति विभाव्यम्।

(फ) "गौर्वाहीकः" इति।—वाहीकः,—हलवाहकः। अत्र अज्ञत्वादिसाधर्म्यं सम्बन्धः। अज्ञत्वाद्यतिशयबोधनं प्रयोजनम्। गौर्जल्पति व्यक्तमुच्चरति, गोर्व्यक्तोच्चारणं न सम्भवति, तस्मात् तत्साधर्म्यसम्बन्धी वाहीको लक्ष्यते।

ञ्जसं स्यात्। तस्मादत्र गोशब्दो मुख्यया वृत्त्या वाहीकशब्देन सह अन्वयमलभमानोऽज्ञत्वादिसाधर्म्यसम्बन्धाद्वाहीकार्थं लक्षयति। वाहीकस्याज्ञत्वाद्यतिशयबोधनं प्रयोजनम्। (ब)

इयञ्च गुणयोगात् "गौणी" इत्युच्यते। पूर्वा तु उपचारा-

(ब) अत्रेति।—"गौर्जल्पति" इत्यत्रेत्यर्थः। केचित्—अयथार्थज्ञाः इत्यर्थः। किमित्यपेक्षायामाह, गोसहचारिणः इति।—गोस्थायिनः इत्यर्थः। जाड्येति।—जाड्यं जडत्वं, मान्द्यम् अपाटवं तदादयः तत्प्रभृतयः। गुणाः,—धर्माः। लक्ष्यन्ते—लक्षणया प्रतिपाद्यन्ते। ते—गुणाः। गोशब्दस्य—गोपदस्य। वाहीकार्थेति।—वाहीकार्थस्य अभिधाने अभिधया प्रतिपादने। निमित्तीभवन्ति—हेतुतामापद्यन्ते इति। तत् अयुक्तं—न युक्तं,युक्त्या असङ्गतमिति यावत्। तत्र हेतुमाह,अगृहीतेति।—न गृहीतः सङ्केतो येन तमगृहीतसङ्केतं वाहीकार्थम्; अभिधातुम्—अभिधया बोधयितुम्। गोशब्दस्यासामर्थ्यात्—सामर्थ्याभावात्। गोशब्देति।—गोशब्दार्थ एवेति गोशब्दार्थमात्रं, तस्य बोधनं बोधकत्वं तस्माच्चेत्यर्थः। अभिधायाः, गोशब्देन तत्सङ्केतितमर्थं बोधयित्वेति शेषः। विरतत्वात्—गतशक्तित्वादित्यर्थः, "सकृदुच्चरितः शब्दः सकृदेवार्थं गमयति" इति न्यायादिति भावः। विरतायाश्च—स्वव्यापारं प्रदर्श्य निवृत्ताया अभिधायाश्चेत्यर्थः, "शब्दबुद्धिकर्मणां विरम्य व्यापाराभावः" इति न्यायादिति भावः। ननु श्लेषादावस्य नियमस्य व्यभिचारो दृश्यते, तत्र अनेकार्थस्य अभिधया प्रतिपादनादिति चेन्न, तत्र युगपदेव अनेकार्थानाम् अभिधया प्रतिपादनम्; इह तु प्रथमं गोशब्देन पशुमात्रबोधः, ततश्चान्वयानुपपत्तौ वाहीकार्थप्रतीतिरिति ध्येयम्। स्वार्थेति।—स्वार्थस्य गोपदार्थस्य, गोत्वस्येत्यर्थः, सहचारिणो ये गुणाः जाड्यमान्द्यादयः,तत्साजात्येन तत्समानजातित्वेन; वाहीकार्थगता गुणाः,—जाड्यमान्द्यादय इत्यर्थः। लक्ष्यन्ते—लक्षणाजन्यबोधविषयीक्रियन्ते। लक्षितात्—लक्षणाजन्यबोधविषयात्। गुणात्—जाड्यमान्द्यादेरित्यर्थः। अविनाभावेति।—अविनाभावः आक्षेपः, तद्द्वारा तेनेत्यर्थः। अविनाभावलभ्यस्य—आक्षेपलभ्यस्य अर्थस्य। शाब्देऽन्वये—शाब्दबोधे इत्यर्थः। प्रवेशासम्भवात्—अन्तर्भावासम्भवात्; शब्दप्रतिपाद्यानामेव शाब्दबोधो भवतीति भावः। शाब्दी—शब्दबोधविषयिणी। आकाङ्क्षा—इच्छा। शब्देनैव, न तु आक्षेपेणेति भावः। प्रपूर्य्यते—पूर्यते क्रियते। सामानाधिकरण्यम्—अभेदान्वय इत्यर्थः। स्वमतमाविष्करोति, तस्मादिति।—उक्तमतानां दोषकवलितत्वादित्यर्थः। वृत्त्या—शक्त्या, अभिधया इत्यर्थः।

मिश्रणात् शुद्धा। उपचारो हि नामात्यन्तं विशकलितयोः शब्दयोः सादृश्यातिशयमहिम्ना भेदप्रतीतिस्थगनमात्रम्। यथा,—"अग्निमाणवकयोः"। शुक्लपटयोस्तु नात्यन्तभेदप्रतीतिः। तस्मादेवमादिषु शुद्धैव लक्षणा।

व्यङ्ग्यस्य गूढागूढत्वात् द्विधा स्युः फललक्षणाः ॥२०॥

प्रयोजने अष्टभेदा लक्षणा दर्शिताः, ताः प्रयोजनरूपव्यङ्ग्यस्य गूढागूढतया प्रत्येकं द्विधा भूत्वा षोडशभेदाः। तत्र गूढः,—काव्यार्थभावनापरिपक्वबुद्धिविभवमात्रवेद्यः; यथा,—"उपकृतं बहु तत्र" इति। अगूढः,—अतिस्पष्टतया सर्वजनसंवेद्यः; यथा,—

"उपदिशति कामिनीनां यौवनमद एव ललितानि"।

अत्र "उपदिशति" इत्यनेन "आविष्करोति" इति लक्ष्यते। आविष्कारातिशयश्चाभिधेयवत् स्फुटं प्रतीयते। (भ)

(भ) या गौणी लक्षणा उक्ता तदर्थमाह, इयञ्चेति।—गौणीलक्षणेत्यर्थः। गुणयोगात्—वाच्यलक्ष्ययोः सादृश्यात्मकः सम्बन्धः गुणः, तद्योगात् तत्सद्भावात् गौणीत्यर्थः। [व्युत्पत्तिश्चेयं गुणेभ्य आगतेति गौणी "तत आगतः" (४।३।७४ पा०) इत्यण्। "टिड्ढाणञ्—" (४।१।१५ पा०) इति ङीप्। पूर्वा—असादृश्यमूला लक्षणा इत्यर्थः। उपचारामिश्रणात्—सादृश्याधीनारोपायोगात्, शुद्धा। विशकलितयोः,—विभिन्नयोः। भेदप्रतीतिस्थगनमात्रं—भेदज्ञानतिरोधानमेव। यथा, "अग्निमाणवकयोः" इति।—माणवकः,—नवोपनीतः ब्रह्मचारीत्यर्थः, अग्निः तयोः। साम्प्रतं फललक्षणायाः पुनर्भेदं दर्शयति,—व्यङ्ग्यस्येति। उपदिशतीत्यादि।—"श्रीपरिचयाज्जडा अपि भवन्त्यभिज्ञा विदग्धचरितानाम्" इत्यस्य पूर्वार्द्धम्। तदयमर्थः,—जडाः अनभिज्ञा अपि श्रीपरिचयात् सम्पत्संयोगात् विदग्धचरितानां विदग्धाश्चतुरास्तेषां चरितानि व्यवहारास्तेषाम् अभिज्ञा भवन्ति। ("विदग्धश्चतुरे दग्धे" इति गोपालः)। कामिनीनां यौवनमद एव ललितानि लीलाविलासादीनि उपदिशति कर्त्तव्यतया आविष्करोतीत्यर्थः। अत्र "उपदिशति" इत्यनेन, क्रियापदेनेति शेषः। आविष्करोति प्रकटयतीति लक्ष्यते। अयं भावः,—उपदेशस्य अचेतने यौवनमदे अस्तु

धर्मिधर्मगतत्वेन फलस्यैता अपि द्विधा ॥ २१ ॥

एताः,—अनन्तरोक्ताः षोड़शभेदा लक्षणाः। फलस्य धर्मिगतत्वेन धर्मगतत्वेन च प्रत्येकं द्विधा भूत्वा द्वात्रिंशद्भेदाः। (म)

दिङ्मात्रं यथा,—

"स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घनाः,
वाताः शीकरिणः, पयोदसुहृदामानन्दकेकाः कलाः।
कामं सन्तु, दृढ़ं कठोरहृदयो रामोऽस्मि, सर्वं सहे,
वैदेही तु कथं भविष्यति हहा! हा देवि! धीरा भव॥"

अत्रात्यन्तदुःखसहिष्णुरूपे रामे धर्मिणि लक्ष्ये तस्यैवातिशयः फलम्। "गङ्गायां घोषः" इत्यत्र तटे शीतत्वपावनत्वादिरूपधर्मस्यातिशयः फलम्। (य)

भवात् मुख्यार्थबाधः, तस्मात् उपदेशशब्देन आविष्काररूपार्थो लक्ष्यते इति। तदेवम् अष्टभेदाः फललक्षणाः षोड़शभेदा भवन्ति, रूढ़िलक्षणास्तु अष्टभेदा इति मिलित्वा चतुर्विंशतिभेदा लक्षणा बोध्याः।

(म) पुनश्च फललक्षणाभेदमाह, धर्मीति।—एताः,—पूर्वोक्ताः फललक्षणाः षोड़शभेदाः फलस्य धर्मिधर्मगतत्वेन द्विधा भवन्तीति द्वात्रिंशद्भेदाः। तदेवं फललक्षणाः द्वात्रिंशद्भेदाः रूढ़िलक्षणाश्चाष्टौ मिलित्वा चत्वारिंशत्प्रकाराः लक्षणा बोद्धव्याः।

(य) स्निग्धेति।—सीताविरहे वर्षासु तात्कालिकं दृश्यं पश्यतो रामस्येयमुक्तिः। स्निग्धा सलिलवत्त्वात् सरसाऽसौ श्यामला मनोरमश्यामेत्यर्थः, तादृशी या कान्तिर्वर्णविभाविभवस्तया लिप्तं कृतलेपमुपचारात्तद्वत् अत्यन्तमाच्छुरितं वियत् आकाशं यैस्ते तथोक्ताः। ("वियद्विष्णुपदं वा तु पुंस्याकाशविहायसी" इत्यमरः) वेल्लन्त्यः (परभागवशात्) व्याजृम्भमाणाः (प्रहर्षवशात्) अथ च चलन्त्यो बलाकाः बकपङ्क्तयो येषु ते तथाभूताः, सञ्चरद्बकविशेषा इत्यर्थः, ("बलाका बकपङ्क्तिः स्यात्" इति कोषः) घनाः मेघाः, [एतेनाकाशस्य दुष्प्रेक्ष्यत्वं दिशामपि दुर्दर्शत्वं दुःसहत्वञ्च सूचितम्] तथा शीकराः अम्बुकणाः सन्त्येष्विति शीकरिणः, ("शीकरोऽम्बुकणाः स्मृताः" इत्यमरः) वाताः, सञ्चरन्तीति शेषः। [अत्र च बहुवचनेन वायूनाम् अनियतदिग्गमनमभिव्यज्यते]। एवं सति तर्हि गिरिकन्दरेषु क्वापि निलीयास्यतामित्याह—पयोदः जलवर्षणपरः जलधरः, सुहृत् प्रावृट्काले आह्लादवर्द्धकतया

तदेवं लक्षणाभेदात्सत्वारिंशन्मता बुधैः ॥२२॥ (र)

रूढ्यावष्टौ, फले द्वात्रिंशदिति चत्वारिंशल्लक्षणाभेदाः। किञ्च,—

निजं येषां तेषां तथोक्तानां मयूराणामिति भावः. जराः जर्जुटमधुराः, आनन्दञ्च केका आनन्दवत्प्रादृष्यैनाथा केका: इत्यर्थः; ("केका वाणी मयूराणाम्" इत्यमरः)। एतावद् दुःखं जलदव्यापारं श्रुतिपथमानयन्ति, खयञ्च दुःश्रवा इति भावः। एवञ्च रतेरन्योऽन्याधिक्षिप्तत्वादुद्दीपनविभावसूचितो विप्रलम्भ इति ध्येयम्। विभावानां साधारण्यमभिधाय प्राचुर्यमासुरत्वाय निजहृत्तात्पर्यमाह,—कामं यथेष्टं सन्तु वर्त्तन्ताम्। दृढं सातिशयं कठोरमनवरतमनर्घपरम्पराणां सङ्घनकर्तृतयाऽभेद्यं हृदयं यस्य स तथोक्तः, रामः अस्मि अहमित्यर्थः। अस्मीति अहमित्यर्थेऽव्ययम्। अत्र रामशब्दार्थस्यनिर्विशेषोद्दीपनाय 'कठोरहृदयः' इति विशेष्याभिधानम्। अन्यथा रामपदं रघुकुलोत्पन्नत्वौचित्यात्सेव्याधारत्वबाहुलीकाचरितनैपिलीप्रातृत्वादिप्रथीयसा-न्तरपरिचयनमर्थं सर्वं न ध्वनयेत्। तथा च स एवाहं रामः सकलानर्घपात्र-तया प्रसिद्ध इति भावः। सर्वं खलितमुद्दीपनातिशयजनितं क्षेत्रमिति भावः, सखे, वैदेह्या जानकी पुनः सर्वं भविष्यति ? सामान्याभिप्रायेणैतत्, तेन सकलं करिष्य-तीति सकलम्। अत्र च भवनमेव एतस्या असत्याम्यनिलयुक्तप्रकारेण हृदि स्थापितां सीतां रूंजरादिना प्रत्यक्षीकारितान् करीविदारणोन्मुखीं सीतेनमाह, दृष्टा वा इति।—निपातसमुच्चयोऽयं खेदातिशयार्थः। हे देवि! दिव्यस्वभावतया मनोर-त्नादिमालिनीत्यर्थः। सीते! धीरा धैर्यशालिनी भव महत्करेणात्मिन् मनसि लोलचित्ता भव इति भावः। अत्र प्रार्दूलविक्रीडितं वृत्तम्।

अत्र—उद्धाटते पदे। अत्यन्तदुःखसहिष्णुरूपे रामे धनिनि, लक्ष्ये—लक्षणया बोधे, तत्र—अत्यन्तदुःखसहिष्णुलक्षणे, अतिशयोत्कर्षद्योतनं फलम्। अयं भावः,— अत्र रामस्य वज्रकठोरत्वेन 'सखे' इति क्रियापदसन्निधाने 'रामः' इति पदार्थनिर्देशे 'कठोरहृदयः' इति विशेषणविशेषितो रामपदार्थः 'अत्यन्तदुःखसहिष्णुरामः' इति लक्ष्यते इति। एतच्च उपलक्षणम्; तथा च तरक्षुपदार्थयोगविशेषस्य जैवनस्वामुनि स्वामिनि निर्वाणस्य बाधदर्शनात् अचेतने जलदे हृदयाचारविशेषस्य शैत्यादेश्च बाधाबोधयत्वायैवेत्र इति बोध्यम्।

(र) उपसंहरति, तदेवमिति।—तत्—तस्मात्, एवं-प्रकारेणेत्यर्थः; बुधैः,—सह्रि-दयैः; चत्वारिंशत् लक्षणाभेदाः। मताः,—कथिताः।

पदवाक्यगतत्वेन प्रत्येकं ता अपि द्विधा ॥२३॥(ल)

ताः,—अनन्तरोक्ताश्चत्वारिंशद्भेदाः। तत्र पदगतत्वेन यथा,—"गङ्गायां घोषः" इति। वाक्यगतत्वेन यथा,—"उपकृतं बहु तत्र" इति। एवमशीतिप्रकारा लक्षणा।

(ल) पुनश्च सर्वासामेव भेदं दर्शयति, पदेति।—ताः,—चत्वारिंशद्भेदा अपि लक्षणाः। पदवाक्यगतत्वेन—पदगतत्वेन वाक्यगतत्वेन च इत्यर्थः; प्रत्येकं द्विधा, भवन्तीति शेषः। तदेवं मिलित्वा अशीतिप्रकारा लक्षणाः। कोमलमतीनां त्वरितावबोधनार्थं लक्षणायाः अशीतिभेदाः विन्यस्यन्ते। यथा;—(१) सारोपा उपादानलक्षणा रूढ़िविषया,—'अश्वः श्वेतो धावति'। (२) सारोपा उपादानलक्षणा प्रयोजनविषया,—'एते कुन्ताः प्रविशन्ति'। (३) सारोपा लक्षणलक्षणा रूढ़िविषया,—'कलिङ्गः पुरुषो युध्यते'। (४) सारोपा लक्षणलक्षणा प्रयोजनविषया,—'आयुर्घृतम्'। (५) साध्यवसाना उपादानलक्षणा रूढ़िविषया,—'श्वेतो धावति'। (६) साध्यवसाना उपादानलक्षणा प्रयोजनविषया,—'कुन्ताः प्रविशन्ति'। (७) साध्यवसाना लक्षणलक्षणा रूढ़िविषया,—'कलिङ्गः साहसिकः'। (८) साध्यवसाना लक्षणलक्षणा प्रयोजनविषया,—'गङ्गायां घोषः'। (९) गौणी सारोपा उपादानलक्षणा रूढ़िविषया,—'एतानि तैलानि हेमन्ते सुखानि'। (१०) गौणी सारोपा उपादानलक्षणा प्रयोजनविषया,—'एते राजकुमारा गच्छन्ति'। (११) गौणी सारोपा लक्षणलक्षणा रूढ़िविषया,—'राजा गौड़ेन्द्रः कण्टकं शोधयति'। (१२) गौणी सारोपा लक्षणलक्षणा प्रयोजनविषया,—'गौर्वाहीकः'। (१३) गौणी साध्यवसाना उपादानलक्षणा रूढ़िविषया,—'तैलानि हेमन्ते सुखानि'। (१४) गौणी साध्यवसाना उपादानलक्षणा प्रयोजनविषया,—'राजकुमाराः गच्छन्ति'। (१५) गौणी साध्यवसाना लक्षणलक्षणा रूढ़िविषया,—'राजा कण्टकं शोधयति'। (१६) गौणी साध्यवसाना लक्षणलक्षणा प्रयोजनविषया,—'गौर्जल्पति'। अत्राष्टप्रकारा प्रयोजनलक्षणा व्यङ्ग्यस्य गूढ़ागूढ़त्वात् हेतोः षोड़शधा भवति। षोड़शप्रकारा च सा धर्मिधर्मगतभेदेन द्वात्रिंशप्रकारा भवति; तथाविधा चेयं रूढ़िलक्षणाभिरष्टाभिः सार्धं चत्वारिंशद्विधा सम्पद्यते; अथ प्रत्येकं पदवाक्यगतत्वेन द्विधा भूत्वा अशीतिप्रकारा जायते इति सङ्क्षेपः।

अथ व्यञ्जना,—

विरतास्वभिधाद्यासु ययाऽर्थो बोध्यतेऽपरः।
सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च॥२४॥(व)

"शब्दबुद्धिकर्मणां विरम्य व्यापाराभावः" इति न्यायेनाभिधालक्षणातात्पर्याख्यासु तिसृषु वृत्तिषु स्वं स्वमर्थं बोधयित्वा उपरतासु ययाऽपरः अन्योऽर्थो बोध्यते सा शब्दस्यार्थस्य प्रकृतिप्रत्ययाटेश्च वृत्तिर्व्यञ्जनध्वननगमनप्रत्यायनादिव्यपदेशविषया व्यञ्जना नाम। (श) तत्र,—

अभिधालक्षणामूला शब्दस्य व्यञ्जना द्विधा॥२५॥(ष)

अभिधामूलामाह,—

अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियन्त्रिते।
एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साऽभिधाश्रया॥२६॥(स)

(व) व्यञ्जनां निरूपयति, अथेति।—अथ लक्षणानिरूपणात् परनिरूपणं। अभिधाद्यासु—अभिधालक्षणातात्पर्याख्यासु तिसृषु वृत्तिषु। विरतासु—निवृत्तव्यापारासु सतीषु। यया—वृत्त्या। अपरः,—वाच्यलक्ष्यतात्पर्यार्थेभ्यः भिन्नः अर्थः। बोध्यते—प्रत्याय्यते। सा शब्दस्य अर्थादिकस्य च—वाच्यादेः प्रकृतिप्रत्ययाटेश्च। वृत्तिः,—व्यापारविशेषः, व्यञ्जना।

(श) व्यञ्जनेति।—व्यञ्जनं ध्वननं गमनं प्रत्यायनञ्च आदिः यस्य तादृशः यद् व्यपदेशः संज्ञा स विषयो यस्याः तथोक्ता। शब्दस्य व्यञ्जना द्विधा, अभिधामूला एका लक्षणामूला अपरेति।

(ष) अभिधेति।—अभिधा लक्षणा च मूलं यस्याः; तथोक्ता शब्दस्य व्यञ्जना द्विधा, अभिधामूला एका लक्षणामूला अपरेति।

(स) अनेकार्थस्येति।—संयोगाद्यैः,—अनन्तरोक्तैः। अनेकार्थस्य अनेकैः एकभिन्नाः द्वौ बहवो वेत्यर्थः, अर्थाः यस्य तादृशस्य शब्दस्य। एकत्र—एकस्मिन् अर्थे। नियन्त्रिते—नियम्य प्रतिपादिते सति। अन्यधीहेतुः,—अन्यस्य अर्थान्तरस्य धीहेतुः बोधोपायः, यः व्यापार इति शेषः, सा अभिधाश्रया—अभिधामूला व्यञ्जना। यत्र तु संयोगादिकं नास्ति, तत्र यावन्त एवार्था वाच्या इति बोध्यम्। प्रकरणमभिधायां

आद्यशब्दात् विप्रयोगादयः। उक्तं हि,—

"संयोगो विप्रयोगश्च साहचर्य्यं विरोधिता।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः"॥ इति। (ह)

"सशङ्खचक्रो हरिः" इत्यत्र शङ्खचक्रयोगेन हरिशब्दो विष्णुमेवाभिधत्ते। "अशङ्खचक्रो हरिः" इति तद्वियोगेन तमेव। "भीमार्जुनौ" इति अर्जुनः पार्थः। "कर्णार्जुनौ" इति कर्णः सूतपुत्रः। "स्थाणुं वन्दे" इति स्थाणुः शिवः। "सर्वं जानाति देवः" इति देवो भवान्। "कुपितो मकरध्वजः" इति मकरध्वजः कामः। "देवः पुरारिः" इति पुरारिः शिवः। "मधुना मत्तः पिकः" इति मधुर्वसन्तः। "यातु वो दयिता मुखम्" इति मुखं साम्मुख्यम्। "विभाति गगने चन्द्रः" इति चन्द्रः शशी। "निशि चित्रभानुः" इति चित्रभानुर्वह्निः। "भाति रथाङ्गम्" इति नपुंसकव्यक्त्या रथाङ्गं

संयोगादिनियन्त्रितमर्थं बोधयित्वा उपक्षीणायामभिधायां पर्य्यालोचनेन अपरार्थप्रतीतेरभिधामूलत्वमिति भावः।

(ह) संयोग इति।—संयोगः,—भिन्नानेकार्थशब्दबोध्यान्यार्थविशिष्टतया अवर्त्तमानत्वे सति तद्बोध्यविशिष्टतया अनुमतः सम्बन्धः। विप्रयोगः,—वियोगः। साहचर्य्यम्—अभिन्ने प्रतिपाद्येऽन्योऽन्यापेक्षत्वम्। विरोधिता—वैरं, सह असंस्थानञ्च। अर्थः,—चतुर्थाद्यभिधेयं प्रयोजनम्,("अर्थोऽभिधेयरैवस्तु-प्रयोजननिवृत्तिषु" इत्यमरः)। प्रकरणं—कथयितृ-अवधारयितृ-बुद्धिस्थत्वम्। लिङ्गं—बह्वर्थपदबोध्यान्यानवस्थितिः एकार्थनिष्ठः प्रत्यक्षशब्दबोध्यो धर्मः। अन्यस्य—तुल्यविभक्तिकस्य, शब्दस्य सन्निधिः,—अनेकार्थपदैकार्थमात्रवृत्तिसम्बन्ध्यर्थान्तरबोधकपदसङ्घव्यवहारः। सामर्थ्यं—नियतशक्तिः। औचिती—औचित्यम्। देशः,—नियमितं स्थानम्। कालः,—निर्दिष्टसमयः। व्यक्तिः,—पुंस्त्वादिकम्। तथा स्वरादयः,—उदात्तानुदात्तस्वरितप्रभृतयः। शब्दार्थस्य अनवच्छेदे—अनिर्द्धारणे। विशेषस्मृतिहेतवः,—विशेषबोधकारणानि।

चक्रम्। स्वरस्तु वेद एव विशेषप्रतीतिकृत् न काव्ये इति तस्य विषयो नोदाहृतः। (क)

(क) क्रमेण संयोगादीनां नियन्त्रणान्युदाहरति,—सशङ्खचक्रः हरिरित्यादि। अभिधत्ते—अभिधया बोधयति। तद्वियोगेन—शङ्खचक्रविरहेणेत्यर्थः। तं—विष्णुमेव, न तु इन्द्रादिकमित्येवकारस्यार्थः; अभिधत्ते इति पूर्वेणान्वयः, शङ्खचक्रवति विष्णावेव कालविशेषे तद्विरहः सम्भवति,—("हरिश्चन्द्रार्कवाताश्व-शुकभेकयमाहिषु। कपौ सिंहे हरेऽजेंऽशौ शक्रे लोकान्तरे पुमान्॥" इति मेदिनी)। साहचर्य्यमुदाहरति, भीमार्जुनाविति।—अत्र हि भीमसाहचर्य्येण अर्जुनः,—अर्जुनशब्दः। पार्थः,—पृथापुत्रधनञ्जयबोधकः, न तु ककुभादेरित्यर्थः,—("अर्जुनः ककुभे पार्थे कार्त्तवीर्य्यमयूरयोः। मातुरेकसुतेऽपि स्यात् पुंलिङ्गो धवलेऽन्यवत्॥" इति मेदिनी)। विरोधितामुदाहरति, कर्णार्जुनाविति।—कर्णः,—कर्णशब्दः। सूतपुत्रः,—सूतपुत्राभिधायी, तेनैव सहार्जुनस्य सततवैरित्वादिति भावः, न तु श्रवणेन्द्रियादेर्वाचकः,—("कर्णः पृथाज्येष्ठपुत्रे सुवर्णालौ श्रुतावपि" इति मेदिनी)। अर्थमुदाहरति, स्थाणुमिति।—"अत्र भवच्छिदे" इति चरमांशो बोध्यः, स्थाणुं—शिवम्; शिववन्दनस्यैव भवच्छेदनफलकत्वादिति भावः, न तु शाखापल्लवादिहीनं शुष्कतरुकाण्डम्, अन्यथा भवच्छेदरूपस्य प्रयोजनस्य अनुपस्थितौ तस्य नियामकत्वं न स्यात्,—("स्थाणुः शर्वोऽप्यथ द्रोणः" इत्यमरः)। प्रकरणमुदाहरति, सर्वमिति।—अत्र राज्ञ एव प्रकृतत्वं, न तु कस्यचित् देवताविशेषस्य इति, देवशब्देन पुरोवर्त्ती नृपतिरेव बोध्यते,—("देवो मेघे सुरे राज्ञि" इति मेदिनी)। लिङ्गमुदाहरति, कुपित इति।—मकरध्वजपदं कर्मधारयबहुव्रीहिभ्यामनेकार्थकं चेतनधर्मस्य कोपस्य मकराकारध्वजे असम्भवात् कामस्यैव बोधकं, न तु समुद्रस्य इति भावः;—("सिन्धौ च मदने मकरध्वजः" इति कोषः)। अन्यशब्दसन्निधिमुदाहरति, देव इति।—अत्र देवशब्दसान्निध्यात् पुरारिशब्दः शिवमेवाभिधत्ते, न तु अन्यं कञ्चनेति बोध्यं,—("पुरारिः शङ्करे खले" इति कोषः)। सामर्थ्यमुदाहरति, मधुनेति।—मधुशब्दस्य वसन्तदैत्यविशेषाद्यनेकार्थाभिधायकत्वेऽपि वसन्तस्यैव कोकिलमादने सामर्थ्यात् मधुशब्दः वसन्तमेवाभिधत्ते; न तु मद्यविशेषमिति भावः,—("मधु पुष्परसे क्षौद्रे मद्ये ना तु मधुद्रुमे। वसन्तदैत्यभिच्चैत्रे" इति मेदिनी)। औचितीमुदाहरति, यात्विति।—प्रियासुरतप्रातिकूल्यजनितखेदं नायकं प्रति सख्याः उक्तिरियम्। दयिता—प्रिया। मुखं—सुरतानुकूलत्वरूपमानुकूल्यम्। यातु—प्राप्नोतु। अत्र मुखशब्दः औचित्यात्

इदञ्च केऽप्यसहमाना आहुः,—

"स्वरोऽपि काक्वादिरूपः काव्ये विशेषप्रतीतिकृदेव। उदात्तादिरूपोऽपि मुनेः पाठोक्तदिशा शृङ्गारादिरसविशेषप्रतीतिकृदेव, इत्येतद्विषये उदाहरणमुचितमेव" इति। तन्न, स्वराः काक्वादयः उदात्तादयो वा व्यङ्ग्यरूपमेव विशेषं प्रत्याययन्ति, न खलु प्रकृतोक्तमनेकार्थशब्दस्यैकार्थनियन्त्रणरूपं विशेषम्। किञ्च,—यदि यत्र क्वचिदनेकार्थशब्दानां प्रकरणादिनियमाभावादनियन्त्रितयोरप्यर्थयोः अनुरूपस्वरवशेनैकत्र नियमनं वाच्यं, तदा तथाविधस्थले श्लेषानङ्गीकारप्रसङ्गः; न च तथा। अत एवाहुः श्लेषनिरूपणप्रस्तावे—"काव्यमार्गे स्वरो न गण्यते" इति च नयः। इत्यलमुपजीव्यानां मान्यानां व्याख्यानेषु कटाक्षनिक्षेपेण। (ख) आदिशब्दात् "एतावन्मात्रस्तनी"

साम्मुख्यमेव, न तु वदनादिकमभिधत्ते, तस्यैव प्रकृतोपयोगित्वादिति बोध्यम्। देशमुदाहरति, विभातीति।—चन्द्रः,—चन्द्रमाः, न तु कर्पूरादिरिति भावः;—("चन्द्रः कर्पूरकाम्पिल्ल-सुधांशुस्वर्णवारिषु" इति मेदिनी)। कालमुदाहरति, निशीति।—चित्रभानुशब्दस्य वह्निसूर्य्याद्यनेकार्थाभिधायकत्वेऽपि प्रकृते पावकस्यैव वाचकत्वं, न तु सूर्य्यस्य, तस्य निशि दर्शनासम्भवादिति भावः;—("चित्रभानुः पुमान् वैश्वानरे चाहस्करेऽपि च" इति मेदिनी)। व्यक्तिमुदाहरति, भातीति।—अत्र रथाङ्गशब्दः नपुंसकलिङ्गत्वेन चक्रमेवाभिधत्ते, न तु चक्रवाकादिमिति भावः,—("रथाङ्गं न द्वयोश्चक्रे ना चक्राङ्गविहङ्गमे" इति मेदिनी)। स्वरस्त्विति।—उदात्तादिरूपः इत्यर्थः। विशेषप्रतीतिकृत्—विशेषस्य अन्यतरस्य अर्थस्य। प्रतीतिकृत्—बोधकः, यथा—"इन्द्रशत्रुर्विवर्द्धस्व" इत्यादौ स्वरभेदेन इन्द्रः शत्रुर्यस्येति बहुव्रीहिसमासे इन्द्रशत्रुशब्दः इन्द्र एव शासनकर्त्ता वृत्रस्येत्येवमर्थमभिहितवान्, न तु इन्द्रस्य शत्रुरिति तत्पुरुषसमासीयस्वराप्रयोगात् वृत्रस्य इन्द्रहन्तृत्वरूपमिति।

(ख) उदात्तादिरूपः,—उच्चैरुदात्तः, नीचैरनुदात्तः, मध्यमः स्वरितः। मुनेः,—भरतस्य। पाठोक्तदिशा—पाठोक्तरीत्या, भरतमुनिना शृङ्गारादौ यत्र यादृशः स्वरविशेषः उक्तः, तदनुसारेणेत्यर्थः; यथा—"हास्यशृङ्गारयोः स्वरितोदात्तं, वीररौद्राद्भुतेषु उदात्तस्वरितं, करुणबीभत्सभयानकेषु अनुदात्तस्वरितमुपपादयेत्" इति।

इत्यादौ हस्तादिचेष्टादिभिः स्तनादीनां कमलकोरकाद्याकारत्वम्।

एवमेकस्मिन्नर्थे अभिधया नियन्त्रिते या शब्दस्यान्यार्थबुद्धिहेतुः शक्तिः, सा अभिधामूला व्यञ्जना। यथा मम तातपादानां महापात्रचतुर्दशभाषाविलासिनीभुजङ्गमहाकवीश्वरश्रीचन्द्रशेखरसान्धिविग्रहिकाणाम्,—

"दुर्गालङ्घितविग्रहो मनसिजं सम्मीलयंस्तेजसा
प्रोद्यद्राजकलो गृहीतगरिमा विष्वग्वृतो भोगिभिः।
नक्षत्रेशकृतेक्षणो गिरिगुरौ गाढ़ां रुचिं धारयन्
गामाक्रम्य विभूतिभूषिततनू राजत्युमावल्लभः॥" (ग)

न च तथेति।—स्वरभेदसत्त्वेऽपि महाकविभिः श्लेषाङ्गीकारात् श्लेषानङ्गीकारो न कर्त्तव्य इत्यर्थः। काव्यमार्गे—काव्यपद्धतौ। उपजीव्यानां—यानुपाश्रित्य जीवति ते उपजीव्यास्तेषाम्। कटाक्षनिक्षेपेण—कुटिलदृष्टिपातेन।

(ग) अभिधामूलामुदाहरति, दुर्गेति।—दुर्गैः प्राकारपरिखादिभिः अलङ्घितः प्रतिरोद्धुमपारितः विग्रहः संग्रामः यस्य तादृशः, यः शत्रूणां दुर्गाणि भित्त्वाऽपि संग्राममातनोतीति भावः; अथवा,—दुर्गैः परिखादिभिरलङ्घितोऽव्यवहितो विग्रहः शरीरं यस्य तथोक्तः; शत्रुभिः समं दुर्गाद्यनपेक्ष्य यः स्वयं शरीरेण युद्धायोपक्रमते इति भावः;—("विग्रहः कायविस्तार-विभागे ना रणेऽस्त्रियाम्" इति मेदिनी)। तेजसा कान्त्या सौन्दर्य्येणेति यावत्,—("तेजो दीप्तौ प्रभावे च स्यात् पराक्रमरेतसोः" इति मेदिनी)। मनसिजं कामं सम्मीलयन् सङ्कोचयन्, खर्वीकुर्वन्नित्यर्थः। प्रोद्यत् प्रकर्षेण उद्यत्, राजकं राजसमूहं, लाति गृह्णाति, वशीकरोतीति प्रोद्यद्राजकलः, गृहीतः गरिमा गौरवं येन स गृहीतगरिमा प्राप्तगौरव इत्यर्थः, भोगिभिः अनुजीविभिः—("भोगी सर्पानुजीविनोः" इति कोषः)। विष्वक् समन्तात् वृतः परिवृतः। क्षत्रेशे क्षत्रियश्रेष्ठे कृतेक्षणो दत्तदृष्टिर्न भवति इति, तत्रापि तुच्छबुद्धिरिति भावः; गिरिः हिमालयः गुरुः श्वशुरो यस्य तस्मिन् हरे इत्यर्थः, गाढ़ां महतीं, रुचिम् अनुरागं, भक्तिमिति यावत्, धारयन् शिवोपासक इत्यर्थः; तथा गां पृथ्वीं,—("गौः स्वर्गे च बलीवर्दे रश्मौ च कुलिशे पुमान्। स्त्री सौरभेयी दृग्बाण-दिग्वाग्भूष्वप्सु भूम्नि च॥" इति मेदिनी)। आक्रम्य पराक्रमेण स्वीकृत्य विभूतिभिः धनसम्पद्भिः भूषिता अलङ्कृता

अत्र प्रकरणेनाभिधया उमावल्लभशब्दस्य उमानाम्नी महादेवी तद्वल्लभभानुदेवनृपतिरूपेऽर्थे नियन्त्रिते व्यञ्जनयैव गौरीवल्लभरूपोऽर्थो बोध्यते। (घ) एवमन्यत्।

लक्षणामूलामाह,—

लक्षणोपास्यते यस्य कृते तत्तु प्रयोजनम्।
यया प्रत्याय्यते सा स्याद्व्यञ्जना लक्षणाश्रया ॥२७॥(ङ)

"गङ्गायां घोषः" इत्यादौ जलमयाद्यर्थबोधनादभिधायां

तनुर्यस्य तथाविधः,—("विभूतिर्भूतिरैश्वर्य्यम्" इति कोषः)। उमावल्लभः उमा तन्नाम्नी महादेवी,तस्याः वल्लभः पतिः, भानुदेवो राजेन्द्रः इति शेषः, राजति शोभते।

(घ) प्रथममभिधयैव उक्तरूपे अर्थे प्रतिपादिते, पश्चादस्य वाक्यस्य अनेकार्थपदघटितत्वज्ञानाज्जायमानं वक्तृतात्पर्य्यज्ञानमभिधान्तरग्रहसहकृतमेव अर्थं व्यञ्जनया बोधयतीत्याह, व्यञ्जनयेति।—गौरीवल्लभरूपः शिवरूपः, अर्थः व्यङ्ग्यार्थः, तथा हि,—दुर्गया पार्वत्या लङ्घितः अर्द्धाङ्गत्वेन आक्रान्तः, विग्रहः शरीरं यस्य तथोक्तः, तेजसा तृतीयनयनोत्थेन वह्निमेत्यर्थः; मनसिजं मदनं सम्मीलयन् दहन्; प्रोद्यन्ती भाले विराजमाना राज्ञश्चन्द्रस्य कला षोड़शभागैकभागरूपः चन्द्रस्यांशः यस्य तादृशः;—("राजा प्रभौ च नृपतौ क्षत्रिये रजनीपतौ" इति, "कला स्यान्मूलविवृद्धौ शिल्पादावंशमात्रके। षोड़शांशे च चन्द्रस्य कलनाकालमानयोः॥" इति च मेदिनी), गृहीतगरिमा प्राप्तशरीरगौरवः, विश्वम्भरत्वादिति भावः, भोगिभिः भुजङ्गैः, विष्वक् सर्वतः वृतः पन्नगालङ्कृतः इत्यर्थः, नक्षत्राणाम् ईशश्चन्द्रस्तद्वत् कृतं (भक्तेषु) ईक्षणं दृष्टिपातो येन स तथोक्तः, सौम्यदृष्ट्या भक्तान् पश्यन्नित्यर्थः। गिरिगुरौ गिरीणां गुरुः राजा तस्मिन् हिमाद्रौ इत्यर्थः, गाढ़ां महतीं रुचिं प्रीतिं,—("रुचिः स्त्री दीप्तौ शोभायामभिष्वङ्गाभिलाषयोः" इति मेदिनी) धारयन्, श्वशुरत्वादिति भावः; गां वृषमाक्रम्य विभूतिभिः भस्मभिर्भूषिता तनुर्यस्य तथोक्तः,—("भूतिविभूती भस्मसम्पदोः" इति कोषः) उमायाः पार्वत्याः वल्लभः पतिः शम्भुः राजति इत्येवंरूपो द्वितीयोऽर्थः व्यञ्जनया प्रतिपाद्यते।

(ङ) लक्षणामूलामुदाहरति,लक्षणामूलामिति।—यस्य प्रयोजनस्य कृते बोधाय इत्यर्थः, लक्षणा, प्रयोजनवतीति शेषः, उपास्यते आश्रीयते, स्वीक्रियते इति यावत्, तत् तु प्रयोजनं यया प्रत्याय्यते बोध्यते, सा लक्षणाश्रया व्यञ्जना स्यात्।

विरतायां तटाद्यर्थबोधनाच्च लक्षणायां विरतायां यया शीतत्व-पावनत्वाद्यतिशयादिर्बोध्यते, सा लक्षणामूला व्यञ्जना ।

एवं शाब्दीं व्यञ्जनामुक्त्वा आर्थीं व्यञ्जनामाह,—

वक्तृबोद्धव्यवाक्यानामन्यसन्निधिवाच्ययोः ।
प्रस्तावदेशकालानां काकाश्चेष्टादिकस्य च ॥
वैशिष्ट्यादन्यमर्थं या बोधयेत् साऽर्थसम्भवा ॥२८॥(च)

व्यञ्जनेति सम्बध्यते ।

तत्र वक्तृवाक्यप्रस्तावदेशकालवैशिष्ट्ये यथा मम,—

"कालो मधुः कुपित एष च पुष्पधन्वा,
धीरा वहन्ति रतिखेदहराः समीराः ।
केलीवनीयमपि वञ्जुलकुञ्जमञ्जु-
र्दूरे पतिः कथय किं करणीयमद्य ? ॥" (छ)

(च) आर्थीं व्यञ्जनामाह, वक्त्रिति ।—वक्ता नाम येन कमपि उद्दिश्य किमपि उच्यते, बोद्धव्यः वक्त्रा यमुद्दिश्य उच्यते, वाक्यं पदसमुदायविशेषः तेषाम् । अन्य-सन्निधिः,—अन्यस्य वक्तृबोद्धव्याभ्यां भिन्नस्य, (यत्सन्निधौ बोद्धव्यो बोद्धव्यं वैशिष्ट्येन प्रतिपद्यते तस्य) सन्निधिः सन्निधानम् ; वाच्यं—पदार्थः, तयोः । प्रस्तावः प्रकरणं, देशो निर्जनवनादिः, कालो वसन्तादिः तेषाम् । काकुः वक्ष्यमाणस्वरूपो ध्वनि-विशेषः तस्याः । चेष्टा पद्मनिमीलनादिरादिर्यस्य तस्य चेष्टादिकस्य, आदिना लिङ्गादे-र्ग्रहणम् । च (इदं समुच्चयार्थम्) । वैशिष्ट्यात्—वैलक्षण्यज्ञानात् जायमाना, या शक्तिः, अन्यं भिन्नम् अर्थं बोधयेत्, सा अर्थः सम्भवो यस्याः तथोक्ता आर्थी, व्यञ्जनेति शेषः ।

(छ) काल इति ।—कालः समयः, मधुः वसन्तः, एष च पुष्पधन्वा कामः, कुपितः, धीराः मन्दाः, रतिखेदहराः सुरतपरिश्रमापहारकाः, समीराः वायवः, वहन्ति, वञ्जुलानाम् अशोकानां, कुञ्जेन लतादिपिहितस्थानेन, मञ्जुः मनोज्ञा, इयं केलीवनी क्रीडाकाननम्, अपि वर्त्तते, किन्तु पतिः दूरे वर्त्तते इति शेषः, तत् अद्य किं करणीयमिति यत्करणीयं तन्मे कथय । अत्र वक्त्र्याः कामुकत्वेन, वाक्यस्य उद्दीपन-विभावादिकामोद्रेकजनकतत्कालावधिपत्यलाभकर्त्तव्यानिश्चयविषयत्वेन, प्रस्तावस्य सुरत-

अत्रेतं देशं प्रति शीघ्रं "प्रच्छन्नकामुकत्वया प्रेष्यताम्" इति सखीं प्रति कयाचित् द्योत्यते।

बोद्धव्यवैशिष्ट्ये यथा,—

"निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरः
नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः।
मिथ्यावादिनि! दूति! बान्धवजनस्याज्ञातपीड़ागमे!
यातां यातुमितो गताऽसि न पुनस्तत्साधमस्यान्तिकम्॥" (ज)

विषयत्वेन, देशस्य कालस्य च बोधोद्देशजनकत्वेन च उपलक्षणेन बाध्यस्य पत्यसन्निधिबोधोद्देशकत्वोपलक्षणस्य स्वरूपसंवेदियत्वात्मकबोधत्वेन वैशिष्ट्यमिति बोध्यम्।

(ज) बोद्धव्यवैशिष्ट्ये उदाहरणमाह, निःशेषेति।—उपपतिमानेतुं प्रेषितां तत्र सम्भुज्य पुनः प्रत्यागतां खिन्नचन्दनाधररागखोपादीनि तत्तिह्नानि ज्ञानजनकत्वेन गोपायन्तीं दूतीं प्रति कयाचित् विदग्धनायिकायाः सोल्लुण्ठोक्तिरियम्। हे मिथ्यावादिनि! "मया तत्र गत्वा प्रयत्नेन बहुधाऽऽराधितोऽपि स नायातः" इति मयाभाषिथि! बान्धवजनस्य माहात्म्यं यथा तः अविदितः, ज्ञातोऽपि साधनाभिमुखतया इति भावः, पीड़ागमः विरहानलसन्तापजनितकृशत्वानुभवः इति यावत्, यया तत्सम्बुद्धौ। हे दूति! न तु प्रियसखीति भावः, [अत्र दूतीति ज्ञानलक्षणेन तस्याः प्रतारकापरत्वं मिथ्यावचनश्रौतत्वेन व्यज्यते] ललितो मत्तः सकाशात् यातुं वापौं सरसीं गता असि, तस्य अवैकल्यः ज्ञातापराधस्य, अत एव अधमस्य अत्यदीयजनोदुःखज्ञानभिज्ञतया परक्लेशदायकत्वाद्यपराधस्य अन्तिकं समीपं न पुनः गता। अत्र पुनरिति एवार्थे, तेन नैव गताऽसि इत्यर्थो बोध्यते। तत्रैव हेतुमाह, निःशेषेति।—यत् तव (तवेति सम्बन्धिपदं स्तनतटादिभिः सर्वैरन्वेति) स्तनतटं न तु उरःस्थलमिति भावः। निःशेषं यथा तथा च्युतं चन्दनं यस्मात् तादृशं विशिष्टावगाहनेन जायमानादिति भावः। व्यङ्ग्यपक्षे तु—तदंशातिक्रमेण तादृशकरावमर्शात् तथाभूतमिति ध्वन्यते एवमग्रेऽपि। अधरः अधरोष्ठः, न तु उत्तरोष्ठ इति भावः। निर्मृष्टः निःशेषेण स्रष्टः क्षालितः रागः ताम्बूलजन्यं लौहित्यं यस्मात् तथोक्तः, अधरोष्ठस्यैव उत्तानत्वे तत्र सखिसम्बन्धाधिक्यात्, व्यङ्ग्यपक्षे तु—चुम्बनस्य [illegible] कालव्याप्तचुम्बनतया दृष्टपीड़े तत्र निदर्शनात् तथात्वं बोध्यम्। नेत्रे

अत्र तदन्तिकमेव रन्तुं गताऽसीति विपरीतलक्षणया लक्ष्यम्। तस्य च रन्तुमिति व्यङ्ग्यं प्रतिपाद्यं दूतीवैशिष्ट्यात् बोध्यते।

अन्यसन्निधिवैशिष्ट्ये यथा,—

"उअ णिच्चल! णिप्पंदा भिसिणीपत्तंमि रेहइ बलाआ।
णिम्मलमरगअभाअणपरिट्ठिआ संखसुत्ति व्व॥" (झ)

अत्र बलाकाया निस्पन्दत्वेन विश्वस्तत्वं, तेनास्य देशस्य विजनत्वम्, अतः सङ्केतस्थानमेतत्, इति कयाऽपि सन्निहितं

नयने दूरम् अत्यर्थम् अनञ्जने कज्जलरहिते। इयम् इदानीन्तनीत्यर्थः, तन्वी क्षीणा, तनुः शरीरं, पुलकिता लोमाञ्चिता, व्यङ्ग्यपक्षे तु—सुरतक्रीड़ाश्रमवशात् क्षीणत्वं, तदानीमनुभूताभिनवसुखस्मृतेरिदानीं पुलकश्च सञ्जातः। सर्वमेतत् स्नानफलमापाततः अभिधया प्रतिपाद्यते। किन्तु बोद्धव्यायाः दूत्या वैशिष्ट्येन तदन्तिकमेव गताऽसीति लक्षणया प्रतिपाद्यते, तथा च उक्तरूपसुरतज्ञापकचिह्नत्रयस्य नायकसमीपगमनं विना असम्भवात् तत्र तत्र लक्षणामन्तरेण अन्वयबोधासम्भवेन नञ्पदस्य एवार्थे लक्षणा, अन्ययोगव्यवच्छेदश्च तस्यार्थः; तत्र च नञर्थस्य अभावस्य प्रतियोगित्वं सम्बन्धः। तथा वापीं स्नातुमित्यत्रापि विपरीतलक्षणया गमनाभाव एव प्रतीयते, तथा च त्वमितो वापीं स्नातुं न गता, अपि तु तस्याधमस्यान्तिकमेव गतेति अन्वयबोधः। रन्तुमिति प्रयोजनं व्यञ्जनया प्रतीयते। इदन्तु तत्त्वम्,—यद्यपि निःशेषच्युतचन्दनमित्यादि उपभोगस्य स्नानस्य च कार्य्यं समानमापाततः प्रतीयते, तथाऽपि स्नाने स्तनतटस्यैव निःशेषच्युतचन्दनत्वं न, किन्तु सर्वस्यैवाङ्गस्य; अधरोष्ठस्यैव निर्मृष्टरागत्वं न, किन्तु ओष्ठस्यापि, नेत्रयोः दूरं प्रान्तभागे एव अनञ्जनत्वं न, अपि तु तयोरञ्जनार्हसर्वावयवेषु अनञ्जनत्वमेव; ततश्चैतानि उपभोगस्यैव चिह्नानीति दूत्या वैशिष्ट्याद्व्यज्यते।

(झ) अन्यसन्निधिवैशिष्ट्ये व्यङ्ग्यार्थव्यञ्जनामाह, उअ इति।—"ऊह निश्चल! निस्पन्दा बिसिनीपत्रे राजते बलाका। निर्मलमरकतभाजनपरिस्थिता शङ्खशुक्तिरिव॥" इति संस्कृतम्। अस्यायमर्थः,—हे निश्चल! चलनाक्षम! सङ्केतस्थानगमने निरुत्साहेत्यर्थः, निर्मलमरकतभाजने स्वच्छमरकतमणिपात्रे परिस्थिता शङ्खशुक्तिरिव शङ्खकपालमिव बिसिनीपत्रे पद्मिनीदले इयं बलाका बकी, निस्पन्दा राजते, ऊह पश्य।

प्रच्छन्नकामुकं प्रत्युच्यते। अत्रैव स्थाननिर्जनत्वरूपं व्यङ्ग्यार्थ-वैशिष्ट्यं प्रयोजनम्। (अ)

"भिन्नकण्ठध्वनिर्धीरैः काकुरित्यभिधीयते" इत्युक्तप्रकारायाः काकोर्भेदा आकरेभ्यो ज्ञातव्याः। (ट)

एतद्वैशिष्ट्ये यथा,—

"गुरुपरतन्त्रतया वत! दूरतरं देशमुद्यतो गन्तुम्।
अलिकुलकोकिललालिते नैष्यति सखि! सुरभिसमयेऽसौ?॥"

अत्र नैष्यति? अपि तर्हि एष्यत्येवेति काक्वा व्यज्यते। (ठ)

चेष्टावैशिष्ट्ये यथा,—

"सङ्केतकालमनसं विटं ज्ञात्वा विदग्धया।
हसन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम्॥" (ड)

(अ) अत्रैव—व्यञ्जनोदाहरणे एव। प्रयोजनं—तृतीयव्यञ्जनायाः चारुत्व-मित्यर्थः। ["प्रयोजनम्" इति पाठान्तरम्]।

(ट) भिन्नेति।—भिन्नः श्रोकृदर्शादिभिर्विकृतीकृतः यः कण्ठध्वनिः सः। धीरैः,—विद्वद्भिः। काकुरिति—काकुशब्देनेत्यर्थः। अभिधीयते—कथ्यते। आक-रेभ्यः,—तत्तत्काव्यप्रबन्धानामाद्यैर्भरतादिप्रबन्धेभ्यः।

(ठ) काकुवैशिष्ट्ये उदाहरति, गुरुति।—हे सखि! असौ नाथतिरित्यर्थः; गुरूणां पित्रादीनां परतन्त्रतया अधीनतया, वत खेदे, दूरतरम् अतिदूरं देशं, गन्तुम् उद्यतः प्रवृत्तः, अतः अवश्यं गमिष्यत्येव, किन्तु अलिकुलैः भ्रमरसङ्घैः कोकिलैश्च ललिते सुन्दरे, मनोहरे इत्यर्थः, सुरभिसमये सुरभेर्वसन्तस्य समयः काल: तस्मिन्, वसन्तस्य ऋतौः प्रादुर्भावे इत्यर्थः,—("सुरभिः गन्धकोशातः-भिन्नुरागीषु योषितिः। वाच्यवे च वसन्ते च" इति मेदिनी) न एष्यति? न आगमिष्यति? अपि तु एष्यत्येव। अपि तर्हि—अपि तु इत्यर्थः।

(ड) चेष्टावैशिष्ट्ये उदाहरणमाह, सङ्केतेति।—सङ्केतकाले सङ्केतकालस्थाने मनो यस्य तादृशं "कः सङ्केतसमयः?" इति जिज्ञासुमित्यर्थः, विटमुपपतिमित्यर्थः, —("विटोऽस्त्री वाच्यवे चिह्ने मूषिके खदिरेऽपि च" इति मेदिनी) विदग्धया चतुरया नायिकयेत्यर्थः, ज्ञात्वा विदित्वा, हसन्त्या विलसन्त्या, नेत्रार्पितं: नेत्रोपान्तं अर्पितं: न्यासितः,

अत्र सन्ध्या सङ्केतकालः इति पद्मनिमीलनादिचेष्टया कयाचित् द्योत्यते। एवं वक्त्रादीनां व्यस्तसमस्तानां वैशिष्ट्ये बोद्धव्यम्। (ढ)

त्रैविध्यादियमर्थानां प्रत्येकं त्रिविधा मता ॥२९॥(ण)

अर्थानां वाच्यलक्ष्यव्यङ्ग्यत्वेन त्रिरूपतया सर्वा अपि अनन्तरोक्ता व्यञ्जनास्त्रिविधाः। तत्र वाच्यार्थस्य व्यञ्जना यथा,—"कालो मधुः" इत्यादि। लक्ष्यार्थस्य यथा,—"निःशेषच्युतचन्दनम्" इत्यादि। व्यङ्ग्यार्थस्य यथा,—"उअ णिच्चल" इत्यादि। प्रकृतिप्रत्ययादिव्यञ्जकत्वन्तु प्रपञ्चयिष्यते। (त)

आकूतः अभिप्रायः यस्मिन् तत् यथा तथा; यद्वा,—हसदिति पृथक्पदं पद्मविशेषणं, क्रियाविशेषणं वा; हसत् विकसत्, विकसितमिति यावत्, लीलापद्मं लीलायाः क्रीडायाः, क्रीडार्थं हस्तेन धृतमित्यर्थः, पद्मं कमलं, हस्तस्थं क्रीडाकमलमिति यावत्, निमीलितं सङ्कोचितम्। अत्र नयनव्यापारसूचितः नायिकायाः गुप्ताशयः क्षणदाज्ञापकक्रीडापद्माच्छादनेन विशदीकृतः इति दिक्।

(ढ) अत्र—उदाहृते पद्ये। कयाचित्—कामिन्या (कर्तृपदमिदम्)। पद्मनिमीलनादिचेष्टया, अत्र आदिना नेत्राकूतहासयोर्ग्रहणम् (अत्र साधने तृतीया)। सन्ध्या—सायम्। सङ्केतकालः,—सङ्केतस्य प्रियेण सह सङ्गमार्हस्य गुप्तस्थानस्य, उपचारात् तत्र गमनस्येत्यर्थः, कालः,—समयः। इति—इति वस्तु। द्योत्यते—बोध्यते। वक्त्रादीनां—वक्तृबोद्धव्यवाक्यादीनामित्यर्थः। व्यस्तसमस्तानां—व्यस्ताः पृथक् पृथग्भूताश्च समस्ताः सम्मिलिताश्चेति तेषां तथोक्तानाम्। वैशिष्ट्ये—विशिष्टत्वे, भेदे इति यावत्। बोद्धव्यं—ज्ञेयं, व्यङ्ग्यत्वमिति शेषः।

(ण) त्रैविध्यादिति।—इयं—व्यञ्जना, आर्थीति शेषः। अर्थानां—वाच्यलक्ष्यव्यङ्ग्यानाम्। त्रैविध्यात्—त्रिप्रकारत्वात्। प्रत्येकं—प्रतिव्यक्ति। त्रिविधा—वाच्यव्यञ्जना, लक्ष्यव्यञ्जना, व्यङ्ग्यव्यञ्जना चेति त्रिप्रकारा। मता—कथिता।

(त) प्रकृतिप्रत्ययादीति।—प्रकृतिप्रत्ययादीनां व्यञ्जकत्वम्; आदिपदेन वचनादीनां ग्रहणम्। प्रपञ्चयिष्यते—प्रकाशयिष्यते, चतुर्थपरिच्छेदे असंलक्ष्यक्रमव्यङ्ग्यस्य दाहरणे इति शेषः।

शब्दबोध्यो व्यनक्त्यर्थः शब्दोऽप्यर्थान्तराश्रयः।
एकस्य व्यञ्जकत्वे तदन्यस्य सहकारिता ॥२०॥ (थ)

यतः शब्दो व्यञ्जकत्वे अर्थान्तरमपेक्षते, अर्थोऽपि शब्दम्; तदेकस्य व्यञ्जकत्वे अन्यस्य सहकारिताऽवश्यमङ्गीकार्या। (द)

(थ) ननु शाब्दां व्यञ्जनायाम् अर्थस्य, आर्थीमपि शब्दस्य उपयोगित्वमस्त्येव, ततः कोऽनयोर्भेदकारणम्? इत्याशङ्क्याह, शब्देति।—अर्थः शब्देन बोध्यः प्रतिपाद्यः सन् व्यनक्ति अर्थान्तरं व्यञ्जनया बोधयति, शब्दोऽपि अर्थान्तरम् अभिधेयम्, आश्रयतीति तथाभूतः अभिधीयमानः सन्नित्यर्थः, व्यनक्ति व्यञ्जको भवतीति यावत्। एवमनुपपत्तिप्रदर्शनानन्तरं तन्निरूपपत्तिमभ्याह. एकस्येति।—तत्—तस्मात्, एकस्य—अनयोरन्यतरस्येत्यर्थः, व्यञ्जकत्वे—व्यञ्जनया बोधकत्वे, अन्यस्य—अपरस्य, सहकारिता—सहायत्वलक्षणप्रधानकारकत्वमित्यर्थः। अप्रधानत्वञ्च व्यवहितोपकारित्वेन। एवञ्च यत्र यस्य अव्यवहितोपकारकत्वेन प्रधानत्वं, तत्र तस्यान्यस्मिन्नेव तत्त्वं व्यवहार इति भावः। ननु नाटकादौ वेष्टाऽभिनयादेरपि व्यञ्जकत्वसत्त्वेन व्यञ्जकत्वेनैव व्यञ्जकविध्यनाप्रसङ्गः इति चेन्न, तत्रापि शब्दोपस्थितार्थस्यैव व्यञ्जकत्वाङ्गीकारात्। वेष्टाऽभिनयादिस्तु चेष्टादिवैशिष्ट्यबोधकशब्दसहकारित्वोपगमात् तत्र शब्दव्यञ्जेऽपि वेष्टाऽभिनयदर्शनस्य प्राधान्येनैव इत्थत्वव्यवहारः। अत एव वक्ष्यति,—"यत्नवतः पेयमनेकैर्दृश्यं दीर्घेण चोपनेर्बहुभिः। अवदर्थनेव निपतं नाट्यं सीतास्वयंवरस्य॥" इति।

(द) तदेव विशदयति, यत इत्यादिना।—अष्टम्। तत्रार्थस्य त्रैविध्येन व्यञ्जकत्वं त्रिविधम्; तत् क्रमेण यथा,—

"णाए! घरोवयरणं अम्ह दु ण त्थित्ति साहिअं तुमए।
ता अम्ह किं घरविअं एमेव ण वासरो ठाइ" ॥ १॥

["नातर्गृहोपकरणमस्य हि नास्तीति साधितं त्वया।
तदस्य किं गृहोपस्करेणैव न वासरः स्थायी॥"] इति संस्कृतम्।

अत्र वाच्योऽर्थः "यद्यपि भोजनायुपयोगितां निर्वोढुं न शक्तोऽसि" इति व्यङ्ग्यमभिप्रायं प्रकाशयति।

"ढाएँती वहि! सुहअं खणे खणे दूविआहि मज्झ जए।
सब्भावणिव्वहणरविअणरिसअं दाव विरइअं तुमए" ॥ २॥

अभिधादित्रयोपाधिवैशिष्ट्यात् त्रिविधो मतः।
शब्दोऽपि वाचकस्तद्वल्लक्षको व्यञ्जकस्तथा ॥३१॥(ध)

अभिधोपाधिको वाचकः। लक्षणोपाधिको लक्षकः। व्यञ्जनोपाधिको व्यञ्जकः। किञ्च,—

तात्पर्य्याख्यां वृत्तिमाहुः पदार्थान्वयबोधने।
तात्पर्य्यार्थं तदर्थञ्च वाक्यं तद्बोधकं परे ॥ ३२ ॥(न)

["साधयन्ती सखि! सुभगं क्षणे क्षणे दुनोषि मम कृते।
सद्भावस्नेहकरणीयसदृशं तावद्विरचितं त्वया ॥"] इति संस्कृतम्।

अत्र "मम प्रियं रमयन्त्या त्वया शत्रुत्वमाचरितम्" इति लक्ष्योऽर्थः "त्वया सह रमणं येन कृतं स एव दुर्जनः खलु" इति व्यञ्जयति।

"उअ णिच्चल! णिप्पंदा भिसिणीपत्तम्मि रेहइ बलाआ।
णिम्मलमरगअभाअणपरिट्ठिआ संखसुत्ति व्व" ॥ ३ ॥

["पश्य निश्चल! निस्पन्दा बिसिनीपत्रे राजते बलाका।
निर्मलमरकतभाजनपरिस्थिता शङ्खशुक्तिरिव ॥"] इति संस्कृतम्।

इत्यत्र व्यङ्ग्योऽर्थो व्यञ्जक इति मूलकृतैव दर्शितम्। एवं शब्दस्यापि त्रैविध्येन व्यञ्जकत्वं त्रिविधम्। तत्र वाचकस्य व्यञ्जकत्वं यथा,—"दुर्गालङ्घितविग्रहः" इत्यादौ, लाक्षणिकस्य यथा,—"उपकृतं बहु…" इत्यादौ, व्यञ्जकस्य व्यञ्जकत्वं चतुर्थपरिच्छेदे दर्शयिष्यते।

(ध) अभिधादिव्यापारत्रयं निरूप्य तत्प्रयुक्तं शब्दस्यापि त्रैविध्यमाह, अभिधेति।—शब्दोऽपि अभिधादित्रयम् अभिधालक्षणाव्यञ्जनारूपत्रयमित्यर्थः, तदेव उपाधिः व्यापारविशेषः, तद्वैशिष्ट्यात् तद्वैचित्र्यात्, वाचकः, तद्वत् तद्रूपः, लक्षकः, तथा तादृशः व्यञ्जकश्च इति त्रिविधो मतः कथितः।

(न) सम्प्रति "अभिधया लक्षणया वा शब्दैः प्रत्येकमुपस्थापितानां पदार्थानां संसर्गो वाक्याद्भासमानः तात्पर्य्याख्यां वृत्तिमपेक्षते" इति प्राचीननैयायिकमतोक्तां तात्पर्य्याख्यां वृत्तिमाह, तात्पर्य्याख्यामिति।—पदार्थानाम् अन्वयबोधने संसर्गप्रत्यायने तदर्थमिति यावत् [निमित्तार्थे सप्तमी] तात्पर्य्याख्यां तात्पर्य्यनाम्नीं वृत्तिं व्यापारं तथा तात्पर्य्यार्थं, तदर्थं, तस्य तात्पर्य्यार्थस्य बोधकं वाक्यञ्च परे प्राचीनाः नैयायिकाः

अभिधाया एकैकपदार्थबोधनविरामात् वाक्यार्थरूपस्य पदार्थान्वयस्य बोधिका तात्पर्यं नाम वृत्तिः, तदर्थश्च तात्पर्यार्थः, तद्बोधकत्वं वाक्यमिति अभिहितान्वयवादिनां मतम् (प)।

इति श्रीमन्नारायणचरणारविन्दमधुव्रतसाहित्याचार्यवेदान्तधुरन्धरश्रीमद्रामानुजाचार्य-
कविसूक्तिरत्नाकराद्यग्रभाषावारविलासिनीभुजङ्गसाहित्यविद्यविनोदापाप-
श्रीविश्वनाथकविराजकृतौ साहित्यदर्पणे वाक्यस्वरूपनिरूपणं
नाम द्वितीयः परिच्छेदः ॥ २ ॥

आहुः वदन्ति, [आहुरिति मतान्तरसूचनार्थम्]; तन्मास्तु इमामेव संसर्गमर्यादा-माहुः।

(प) अभिधाया इति स्वरूपाया उपलक्षणम्। अभिहितान्वयवादिनाम्—अभिहितानाम् अभिधया लक्षणया वा पदोपस्थापितानाम् अर्थानाम् अन्वयः सम्बन्धः तं वदन्तीति तच्छीलानां प्राचीननैयायिकानामित्यर्थः। मतं—सिद्धान्तः। "क्रियाकारकयोः प्रथमतः एवान्वयबोधो जायते, ततः अक्रियस्य, पदविशेषस्मभिव्याहारात् पुनर्विशेषस्मृतिर्भवतीति किं तात्पर्य्याख्यया अन्वया वृत्तेः स्वीकारेण" इति तु अन्विताभिधानवादिनो मीमांसका वदन्ति इति बोध्यम्।

अत्रोच्यते।—"पदानां हि केवले पदार्थे एव लाघवबहुत्वा शक्तिः कल्प्यते। गौरवादिदोषभिया सम्बन्धांशेऽपि तु नैव सा स्वीक्रियते, अन्वयभागस्य हि तात्पर्यस्वभावार्थतया वाच्यार्थभिन्नतया आकाङ्क्षायोग्यताऽऽसत्तियोगेन पदार्थस्यापि प्रतीतिविषयत्वं स्यात्। शाब्दबोधस्य पदार्थविषयकत्वे येन केनापि प्रकारेण बुद्धया विषयीकृतस्य तत्तत्पदेनानुपस्थापितस्य आकाङ्क्षादेरपि तद्बोधरूपत्वमापद्यते इति तु न मन्तव्यं, शाब्दबोधविषये पदार्थस्यान्वयांशेऽप्ययोग्यकत्वात्" इत्येवमभिहितान्वयवादिप्राचीन-नैयायिक-भाट्टमीमांसकानां सिद्धान्तः। तेषामेवंविधा तात्पर्यनिरूपणशैली; तथा हि,—"घटं निर्मिमीते" इत्याद्युदाहरणादि घटनिष्ठकर्मत्वानुकूला निर्मितिरित्यर्थः प्रतीयते। तत्र घटपदस्य घटोऽर्थः, कर्मत्वस्य अम्-प्रत्ययस्य, द्वितीयं न कस्यचिदप्यर्थः। एवमपदार्थरूपं हि द्वितीयं, तात्पर्यानुरोधात् एतयोः सम्बन्धरूपेण बोधे विषयीभवति। अत्र अन्विताभिधानवादिनां प्राभाकराचार्यानामयस्तु अन्वयरूपः, तथा हि,—पदाधारा हि शक्तिः अन्वयस्वरूपवाक्यार्थेऽपि वर्तते, आधाराधेयादिरूपव्यवहारेण

जातान्वयत्वेन विशेषणत्वात् तत्र एव शक्तिपर्यवसानात्। तथा हि,—"देवदत्त! गाः पाशय" इति उक्तसहकृतिर्देशात् लक्षणसहकृतेन तात्पर्यज्ञानाभ्यां वाक्यादिसन्निधानं वृत्ति कृत्वा तत्तेष्टादिव्यापारैः तदाक्षेपक अनुमित्या तदर्थबोधकता निर्णीय, अनन्तरं "गाः पाशय, अश्वं निःसारय" इति वाक्यप्रयोगे गौरवसमर्पितः सारत्वशालीत्व अन्वयव्यतिरेकाभ्यां क्रियापदार्थसन्वितसारत्वे सारत्वपदस्य सारत्वपदार्थविशिष्टायां क्रियायाश्च क्रियापदस्य शक्तिं विशिष्टधी वाक्यः आक्षिपति। अथ पुनः प्रयोगावसरे आगते तत्र सन्वितार्थबुद्धिरुपजायते। न च प्रथमतः वाक्यस्य कृत्यव्यवहारात् प्राग्-दशायां तत्पदीयघटत्वेऽपि पश्चात् गौरवमित्या अन्वयाः परित्यज्य एव इति वाच्यं, प्राक् गृहीतायां अन्वयप्रत्यक्षेऽपि जीव्यतया तत्परित्यागासम्भवात्। इतित्यादिविशिष्टरूपेण आकाङ्क्षादिभिः प्रकाश्यते, एवं वाक्यार्थो नापदार्थः इति। एतन्न मनोरमं, तथा हि,—प्रथमान्वयव्यवहारदशायां अन्वितत्वेन शक्तिपक्षे सत्यपि विशिष्टान्वयबोधे आकाङ्क्षादेः कारणतायाः अवश्याङ्गीकरणीयत्वात्, तथा च अत्रकल्प आमं विशेषाकारेण तैरपि अवश्यं स्वीकार्यमिति दिक्।

इत्यशेषमाम्नाटधीसञ्चारपञ्चानन पण्डितकुलपतिना वि, ए, उपाधिधारिणा श्रीनरसोवानन्दविद्यासागरभट्टाचार्येण विरचितायां, तदात्मजाभ्यां पण्डितश्रीआशुतोषविद्याभूषण-पण्डितश्रीनित्यबोधविद्यारत्नाभ्यां प्रतिसंस्कृतायां विमलाख्यायां साहित्यदर्पणव्याख्यायां द्वितीयः परिच्छेदः॥ २॥

तृतीयः परिच्छेदः ।

अथ कोऽयं रसः ? इत्युच्यते,—

विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा ।
रसतामेति रत्यादिः स्थायिभावः सचेतसाम् ॥३२॥

विभावादयो वक्ष्यन्ते । सात्त्विकास्त्वनुभावरूपत्वात् न पृथगुक्ताः । व्यक्तो दध्यादिन्यायेन रूपान्तरपरिणतो व्यक्तीभूत एव रसः, न तु दीपेन घट इव पूर्वसिद्धो व्यज्यते । तदुक्तं लोचनकारैः,—"रसाः प्रतीयन्ते इति तु ओदनं पचतीतिवत् व्यवहारः" इति । अत्र च रत्यादिपदोपादानादेव स्थायित्वे प्राप्ते पुनः स्थायिपदोपादानं रत्यादीनामपि रसान्तरेषु अस्थायित्वप्रतिपादनार्थं, ततश्च हासक्रोधादयः शृङ्गारवीरादौ व्यभिचारिण एव । तदुक्तं,—"रसावस्थः परं भावः स्थायितां प्रतिपद्यते" इति । (क)

(क) काव्यलक्षणरूपैकवाक्यानुकूलत्वसङ्गत्या वाक्यनिरूपणानन्तरं रसं निरूपयितुमाह, अथेति ।—काव्यनिरूपणानन्तरम् । अयं—काव्यलक्षणघटकः इत्यर्थः । विभावेनेति ।—विभावेन अनुभावेन तथा सञ्चारिणा, व्यक्तः,—प्रकटितः । रत्यादिः,—रतिहासादिरूपः स्थायिभावः । सचेतसां—सामाजिकानाम् । रसतां—रसरूपत्वम् । एति—प्राप्नोति, रसरूपेण परिणमते गच्छतीत्यर्थः । रत्यादीनांयकादिनिष्ठत्वेऽपि तादृशकाव्यार्थभावनया सामाजिकनिष्ठत्वं लाघते इत्याशयः । यद्यपि "विभावा अनुभावाश्च सात्त्विका व्यभिचारिणः" इत्यादिना सात्त्विकानामपि रसघटकत्वं निरूपितं, तदपि तेषाम् अनुभावरूपत्वात् न पृथक् निर्देशः इत्याह,—सात्त्विका इति ।—तत्रखेदादय इत्यर्थः । दध्यादीति ।—अत्रादिपदेन प्रधानरसादीनां परिग्रहः । रूपान्तरेति ।—रूपान्तरं विभिन्नस्वरूपं परिणतः प्राप्त इत्यर्थः; अथवा,—रूपान्तरं परिणतं निष्पन्नं यस्य स तथा; अन्यादृशादिवत् कालस्य पर-

निपातः। यथा दुग्धमम्लयोगेन रूपान्तरपरिणतं सत् दधीत्युच्यते, यथा वा आमिक्षा कर्पूरखण्डमरिचादियोगेन रूपान्तरपरिणता प्रपाणकमुच्यते, तद्वत् रत्यादिः स्थायिभावः विभावादियोगेन रूपान्तरपरिणतचिदानन्दचमत्कारस्वरूपं प्राप्तः इति परिणामवादिनां मतम्। वासनामनङ्गीकुर्वतां मतमाह, व्यक्तीकृत इति।—ज्ञानविषयतामापन्न इत्यर्थः। एवकारेण वस्तुसत्त्वव्यवच्छेदः, चिरविनष्टस्यापि ज्ञानविषयत्वसम्भवादिति भावः। रसस्य पूर्वसिद्धता नास्तीत्याह, न त्विति।—दीपो यथा पूर्वसिद्धान् घटादिपदार्थान् प्रकाशयति, न तथा विभावादयः रसमित्यर्थः। उक्तमर्थं सदृष्टान्तप्राचीनसंवादेन प्रमाणयति, तदुक्तमिति।—ओदनम्—अन्नं, न खलु ओदनं पच्यते, अपि तु तण्डुल एव, पक्वान्नस्यैव ओदनत्वात्; किन्तु तथाऽपि "ओदनं पचति" इति यथा व्यवह्रियते, तद्वत् "रसाः प्रतीयन्ते" इति व्यवहारः। रत्यादिप्रतीतिविशेषस्यैव रसत्वादिति भावः। यद्यपि रत्यादीनां नायकादिनिष्ठतया पूर्वसिद्धत्वमस्त्येव, तथाऽपि सामाजिकनिष्ठतया ज्ञानात् पूर्वम् इह असत्त्वं विवक्षितम्। सामाजिकनिष्ठः एव रसः; स च काव्यार्थभावनासमुद्भवस्तत्क्षणमनुभूयमान एव, तस्मान्नास्य पूर्वसिद्धत्वमिति विभाव्यम्। ननु "रतिर्हासश्च" इत्यादि वक्ष्यमाणकारिकया रत्यादीनां स्थायित्वस्य प्रतिपादिततया अत्र स्थायिपदं निरर्थकमित्याशङ्क्य समाधत्ते, अत्र चेति।—रसलक्षणे चेत्यर्थः। रसान्तरेष्विति, व्यभिचारितया इति शेषः। रसावस्थ इति।—रसोऽवस्था अवस्थानं स्वरूपं यस्य तादृशः, रसपदवीमापन्न इत्यर्थः, न तु कदाचिदनुभूयमानः; रसस्य व्यापकत्वादिति भावः; रत्यादिरिति शेषः। अत्र परमिति मान्तमव्ययम् एवकारार्थकं, रसेषु अवश्यमवस्थानात्। स्थायितां—स्थायी रत्यादिः रसः, न तु व्यभिचारी, तत्तां व्यापकत्वमित्यर्थः। प्रतिपद्यते—लभते।

एवम्भूते चास्मिन् काव्यस्यात्मभूते रसे स्वरूपनिरूपणपरस्य मूलीभूतस्य "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः" इति भरतसूत्रस्य व्याख्यानाख्याने विवदमानानां रसविदां बहुधा मतभेदाः परिलक्ष्यन्ते, ते चात्र प्रकृतोपयोगितया सुकुमारमतीनामन्तेवासिनां बोधसौकर्य्यार्थमुल्लिख्य विचार्य्यन्ते,—तेषु प्रथमतस्तावत् भट्टलोल्लटप्रभृतयः सूत्रमिदमेवं व्याचक्षते; तथा हि,—"रत्यादिस्थायिभावानां हि जन्यजनक-बोध्यबोधक-पोष्यपोषकभावरूपसंसर्गैर्यथाक्रमं विभावानुभावसञ्चारिभावैः सह, संयोगात् सम्बन्धात्, रसस्य शृङ्गारादेः, निष्पत्तिः उद्भवो विकाशः पोषणञ्च जायते इत्यर्थः, तथा हि, नाट्येनाभिनयेऽनुकरणीयस्य दुष्मन्तादेः ललनाकुलललामभूतेन अलोकसामान्यरूपलावण्यवरेण्येन शकुन्तलादिना आलम्बनविभावेन रत्यादिः

स्थायिभावः समुत्पाद्यते, स एव तदीयाननुरूपरूपलावण्यसन्दर्शनोद्यानविहरण-वासन्तानिलाहतिप्रभृतिभिरुद्दीपनविभावैरुद्दीपनां गमितः, भ्रूविक्षेपकटाक्षपातादि-भिरनुभावैश्च लोकानुभवगोचरतां नीतः, तथा व्यग्रतादिभिर्व्यभिचारिभावैः पोषितः रसपदवाच्यतां लभते। स एव च अभिनेतरि सौसादृश्यवशेनाध्यास्यमानः दर्शकानां चेतश्चमत्कुरुते" इति। तथा च अयं भावः,—अरजतीभूतायामपि शुक्तौ उभयगतचाकचक्यसन्दर्शनेनाज्ञानात् रजतत्वारोपे तस्या अपि अर्थक्रियाकारितया यथा तत्र प्रवृत्तिर्जायते, तथा शकुन्तलादिगोचरानुरागात्मिका दुष्मन्तादेः रतिरभि-नेतरि अवर्त्तमानाऽपि तस्य अभिनयपाटववशेन तत्स्थत्वेनावगम्यमाना रसिकसामा-जिक-चेतश्चमत्कुर्वती रसरूपतामाधत्ते। न च तद्भिन्नत्वसमानाधिकरणतद्गतभूयो-धर्मवत्त्वरूपसादृश्यस्य भेदगर्भत्वेन सादृश्यज्ञानकाले भेदबुद्धेरवश्यम्भावात् बाधसत्त्वे कथमभिनेतरि सादृश्यज्ञानप्रयुक्तः दुष्मन्तत्वाद्यारोपः सामाजिकानामिति वाच्यं, स्वरूपतो भेदस्य सत्त्वेऽपि अभिनेतुरभिनयापाटवरूपदोषवशेन तदानीं तस्य अप्रतीतेरित्येतदतिविशदमपि मतं नास्मभ्यं रोचते; एतन्मते अभिनेतर्य्येव रसोत्पत्तिकथनेन दर्शकेषु तदभावेन तेषां ततश्चित्तचमत्कारस्य कथमप्यसम्भवात्। न च कथमपि तत्प्रतीतिरेव चित्तचमत्कारानुविधायिनी, यत्र कुत्रचित् प्राकृतिक-शृङ्गारादिदर्शनादपि तदुत्पत्त्यापत्तेः। न च तदसत्त्वेऽपि कादाचित्कस्वकीयानुभव-बलादारोपात् तथा भविष्यति इति वाच्यं, चन्दनानुलेपसमुत्थसुखसम्पत्तेरारोपित-चन्दनादावसम्भवदर्शनात्, यथाकथञ्चित् तथाकल्पनेऽनुभवविरोधाच्च।

श्रीशङ्कुकस्तु तत्सूत्रम् अन्यथा व्याचक्षाणः स्वमतमन्यथा प्रकटयति; तथा हि,—"रत्यादिस्थायिभावानां लावण्यवल्ललनारूपालम्बनविभावेन काननविहरणाद्युद्दीपन-विभावेन कटाक्षविक्षेपादिनाऽनुभावेन व्यग्रतादिव्यभिचारिभावेन च अनुमाप्यानुमापक-त्वात्मकसंसर्गेण रसस्य शृङ्गारादेः निष्पत्तिः अनुमित्यात्मिका उत्पत्तिरित्यर्थः। तथा चायं भावः,—लोके हि मिथ्याज्ञानसंशयादिभेदेन बहुधा प्रतीतिभेदः परिदृश्यते; यत्रोत्तरकाले बाधः समुत्पद्यते तदेव मिथ्याज्ञानमित्युच्यते; यत्र तु असौ धीर्विरुद्धो-भयकोटिका स्यात्, सैव संशयात्मिकेत्यभिधीयते। प्रकृते हि एतदुभयधीविलक्षणा गवये "गौरयम्" इतिवत् अभिनेतरि "दुष्मन्तोऽयम्" इति बुद्धिः प्रथमतस्तमेवाभि-नेतारं पक्षत्वेन विषयीकरोति। न च गवये गोबुद्धेरुत्तरकालिकबाधज्ञानबाध्यतया कथं तत्सादृश्येनाभिनेतरि दुष्मन्तादित्वेन अबाधिता प्रतीतिरिति वाच्यं, तत्र तत्र ज्ञाने क्वचित् पश्चात् बाधदर्शनेऽपि प्रकृते अभिनेतृनैपुण्यदोषवशात् भेदग्रहाभावेन उत्तर-कालेऽपि बाधानवतारस्य स्फुटत्वात्। ततश्च पक्षीभूतेऽभिनेतरि शिक्षाभ्यासकृताभिनय-

नैपुण्येन वाक्यरूपेणैव प्रदर्शितस्य "नायेषु चन्दनरसो दयिते मारदीन्दुरानन्द एव हृदये मम यस्य सोऽयं । तस्यां निःसहजमनोभवसङ्गाच्च एव साधीन जीवितनिधौ इरता कृतोऽसि ॥" "सा पुनर्मम प्रथमदर्शनसमयात् प्रभृति अमृतवर्त्तिरिव चक्षुषो रतिप्रसादमुत्पादयन्ती अपरस्यात्मनश्चित्रस्थायेव शीकयातुरस्य सरभसालिङ्गनसुखं" इत्यादिरसवत्स्वाभिनयस्य तात्त्विकत्वेनानुसन्धानात् तस्मिन्नेव अनुकृतिमद्विभावानुभावादिरसस्य भूविक्षेप-रोमाञ्चादिरनुभावस्य उत्कण्ठादिव्यभिचारिभावादेश्चाविर्भावदर्शनाच्च तत्सौन्दरत्वादिसाधकं विभावादिद्वैतुक्यं प्रतीयते । ततश्च तत्रतीऽतरङ्गत्वेनातत्साधकैरपि तरङ्गत्वेन दर्शितैस्तत्सङ्गिभिस्तत्सङ्गिभिरभिनेतरि एव पर्यवस्यन्ति स्थायिभावः सामाजिकैरनुभूयते, तथा हि,—"दुष्मन्तोऽयं प्रकृतसाधीश्वरतिमान् तदाश्रयत्वनविभाव-वसन्तायुद्दीपनविभाव-खेदरोमाञ्चानुभाव-व्यभिचारिभावादिमत्त्वात्" इत्यनुमानप्रकारः । तथ शाब्दव्यञ्जनाप्रिस्तु,—"यो यदाऽऽस्वादनविभावत्वे सति यदिषयकानुभावसञ्चारिभावान् स तद्विश्वररतिमान्" इति । एतच्च व्याख्यातमाभ्यत्वे । ताद्रूप्यानुसितिस्तु शाब्दिकानां भवतीति तेषेव रस इति व्यवस्थिते इति रतेरनुसितिरेव रसनिष्पत्तिरिति श्रीशङ्कुकस्याशयः । तदपि युक्तिसहत्वेन मनो नाम्नाकं रमयति, सर्वेषेव विभवस्तुनः प्रत्यक्षवीरेव चित्तचमत्कारविधायिनो, नानुसितिरिति सर्वथादिद्धिसिद्धान्तस्य विरोधिभावनां कल्पनायामनुभवविरोधात्, सूत्रकारस्य प्रतीत्यनुगतव्याख्यानस्यैव युक्तोसिद्धान्तिनश्चक्षुषत्वनायां मानाभावाच्च ।

तत्रेव भट्टनायकेनापि मतान्तरे दोषप्रदर्शनपुरःसरमस्य खण्डनानुसारि व्याख्यानमाख्यायते, तथा हि,—"अभिनेयगतत्वेन रतिरनुभीयते इति तु न युक्तीयते, तदानीं दुष्मन्तादेरसत्त्वात् तदनुसितेरयादेरपि सुतरामसम्भवेन स्वरूपतोऽविद्यमानस्य अनुमितिगोचरत्वासम्भवात् । भवतु वा रत्या; अथापि अभिनेयगतत्वेनानुमितायां अपि तस्या; सामाजिकेऽसत्त्वेन तस्यित्तचमत्कारानुपपत्तेश्च । अतो विभावादिभिः संयोगात्—भोज्यभोजकत्वसंसर्गात्, रसस्य—भट्टारादेः, निष्पत्तिः,—भुक्तिरिति तदर्थः । अयमाशयः,—शब्दस्य प्रत्यायकव्यापारवत् काव्यादेरपि भावकत्वभोजकत्वाभिधेयं व्यापारद्वयं स्वीक्रियते । तत्रादौ काव्यार्थबोधे सति तथोरार्थो भावकत्वाख्यो व्यापारः प्रकृतसाऽऽस्वादनविभावां दुष्मन्तादिरतिं तत्तद्विशेषधर्मपरिहारेण सामान्यतो रतित्वादिनैवोपस्थापयति, द्वितीयेन तु भोजकत्वाभिधेयेन तेनैव साधारणीकरणनामधेयेन विभावादिना सङ्घटना रतिः सामाजिकैः उपभुज्यते इति भाट्टमते रतेर्भुक्तिरेव रसनिष्पत्तिः" इति । नैतदपि विचारसहम् ; विद्वान्तानुसारिः

अथ स्वरूपकथनगर्भं आस्वादप्रकारः कथ्यते। (ख)—

सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः।
वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः॥
लोकोत्तरचमत्कारप्राणः कैश्चित् प्रमातृभिः।
स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः॥
रजस्तमोभ्यामस्पृष्टं मनः सत्त्वमिहोच्यते॥३४॥(ग)

रौलेव सर्वसमञ्जसत्वसंवित्तिरूपत्व यद्यपिदृश्य यद्योक्तव्यापारवश्यत्व अत्यन्तार्थ गौरवात् नानाधीवाच्च। एतेष्वभिनवेष्वपि रसविदां मतविशेषेषु अथवापि परिदृश्यिमानमानता बधीना: प्रतिभाप्रभवायाऽभिनवगुप्ताऽभिनवगुप्त एव प्रत्यानमाविष्कुर्वन्त्वेवलाकु:, तथा हि,—काव्यप्रबंधेन अभिनेता वा सञ्जातिनेपुण्येन विभावानुभावादिषु प्रकटीक्रियमाणेषु प्रथमत: दुष्यन्तादौ प्रकुलत्वादिगोचरायां रतौ व्यज्यमानश्चित्ता एटीभावां, स्त्रियापाटवञ्जतस्य तत्तद्विषयकसामाजिकभावनाविशेषरूपदोषस्य अनौचित्यप्रसिद्धाऽऽलम्बन तच्चित्रभिनेतर्येव, साहश्यज्ञानरूपदोषवशेन रज्जौ सर्प इव संमुह्यमानोऽनिर्वाच्य: सात्त्विभावैकवेद्य: रत्यादिरेव रसरूपेण उत्पद्यते। सर्वत्र यत्रिकादिदृष्टान्तेन दोषविशेषवशेन प्रत्यनीकत्व अन्योत्पत्ति: सुलभाधिया इति सर्वमवदातम्।

(ख) रत्यादिर्यत्स्वरूपं प्राप्य रसो भवति, तद्दर्शयन् तत्र आस्वाद एव प्रमाणमिति तद्विरूपयं प्रक्रमते, अखेति।—रसस्येत्यर्थ:। स्वरूपेति।—स्वरूपं सत्यं, तस्य सत्यत्वं वर्त्मनं, गर्भे मध्ये यस्य तादृश:। आस्वादप्रकार:,—अनुभवप्रणाली। उच्यते—निरूप्यते

(ग) सत्त्वोद्रेकादिति।—सत्त्वस्य वक्ष्यमाणरूपस्य, उद्रेकात् उद्भवात्। कैश्चित् न तु सर्वैरिति भाव:। प्रमातृभि:,—विदग्धै:। अखण्डेति।—अखण्ड: पूर्ण:, स्वप्रकाश: स्वेन आत्मना प्रकाशते इति स्वप्रकाश:, न तु कोऽप्यन्य प्रकाशक:, यथा ज्ञानानन्तरं स्वगोचरं घटादिकं प्रकाशयति, तथा रस: एव आत्मानं प्रकाशयतीति भाव:, आनन्दचिन्मय: आनन्दसंवलितविभावादिसंविदात्मक:। वेद्यान्तरेति।—वेद्यान्तरस्य अन्यस्य ज्ञेयस्य, सर्वेण सत्यस्य च, शून्य: अनवच्छिन्नप्रकाश:, ब्रह्मास्वादस्य यो अखण्डानन्दास्वादस्तादृशि भाव:। अत एव ब्रह्मास्वादसहोदर:,

इत्युक्तप्रकारो वाह्यमेयविमुखतापादकः कश्चनाऽऽन्तरो धर्मः सत्त्वं, तस्योद्रेकः,—रजस्तमसी अभिभूय आविर्भावः। अत्र च हेतुस्तथाविधालौकिककाव्यार्थपरिशीलनम्। अखण्ड इत्येक एवायं विभावादिरत्यादिप्रकाशसुखचमत्कारात्मकः। अत्र हेतुं वक्ष्यामः। स्वप्रकाशत्वाद्यपि वक्ष्यमाणरीत्या। चिन्मय इति स्वरूपार्थे मयट्। चमत्कारश्चित्तविस्ताररूपो विस्मयापरपर्य्यायः। तत्प्राणत्वञ्च (घ) अस्मद्वृद्धप्रपितामहसहृदयः

ब्रह्मणः परमात्मनः, आस्वादस्य साक्षात्कारस्य, सहोदरः सदृशः, [परमात्मज्ञानकाले ब्रह्ममात्रं प्रकाशते, रसे तु विभावादिकमपीति भेदात्सहोदरत्वमुक्तमिति बोध्यम्]। लोकोत्तरेति।—लोकोत्तरः अलौकिकः, यश्चमत्कारः चित्तविकासः, स एव प्राणः जीवनभूतो यस्य तादृशः, नायकादीनां नायकादिरत्यादिषु लौकिकचमत्कारस्यैव सम्भवात्, अस्य तु सामाजिकनिष्ठस्य अलौकिकत्वमिति भावः। अयम्—उक्तस्वरूपो रसः। स्वाकारवत्—स्वदेहवत्, अभिन्नत्वेन—तादात्म्येन, आस्वाद्यते—अनुभूयते; यथा आत्मनो भिन्नोऽपि देहः "अहं स्थूलः अहं कृशः" इत्यादिभेदोल्लेखाभावेन प्रतीयते, तथा रसोऽपि नायकादिनिष्ठतया भिन्नोऽपि "रामोऽहं सीताविषयकरतिमान्" इत्येवमात्मनिष्ठतया ज्ञातृज्ञानभेदोल्लेखाभावेन आस्वाद्यते; घटादिज्ञाने जाते "अहं वेद्मि" इति यथा ज्ञातृज्ञानभेदः प्रतीयते, तथाऽत्र नेति भावः। सत्त्वं निरूपयति, रज इति।—अनुत्कृष्टमनोधर्मविशेषः रजः, निकृष्टमनोधर्मविशेषः तमः, ताभ्याम्। अस्पृष्ट—सम्पर्करहितम्। मनः,—मानसो धर्मविशेष इत्यर्थः। इह—रसनिरूपणप्रसङ्गे इत्यर्थः। सत्त्वं—सत्त्वोद्रेकादिति पूर्वोक्तसत्त्वपदार्थः। उच्यते—कथ्यते।

(घ) कारिकाऽर्थमेव विवृणोति, इत्युक्तेति।—उक्तप्रकारः,—कथितरूपः। वाह्येति।—वाह्येभ्यः लौकिकेभ्यः, मेयेभ्यः वेद्येभ्यः, या विमुखता वैमुख्यं, ज्ञानानुकूलव्यापाराभाव इति यावत्, तस्य आपादकः प्रयोजकः, ज्ञानानुकूलव्यापारश्चात्र दृङ्मनोयोगः, यस्मिन् सति वाह्यज्ञानं न तिष्ठति तथोक्त इति भावः। कश्चन—अनिर्दिष्टरूपः। आन्तरः,—मानसः। धर्मः,—गुणविशेषः। सत्त्वं नाम गुण इत्यर्थः। तस्य—तथोक्तस्वरूपस्य। रजस्तमसी—रजस्तमोनामानौ कामलोभादिबीजभूतौ मानसधर्मौ। अभिभूय—तिरस्कृत्य स्वकार्य्याक्षमे विधाय, नितान्तं निःसार्य्येति

गोष्ठीगरिष्ठकविपण्डितमुख्यश्रीमन्नारायणपादैरुक्तम्। तदाह धर्मदत्तः स्वग्रन्थे,—

"रसे सारश्चमत्कारः सर्वत्राप्यनुभूयते।
तच्चमत्कारसारत्वे सर्वत्राप्यद्भुतो रसः॥
तस्मादद्भुतमेवाह कृती नारायणो रसम्॥" इति (ङ)

यावत्। आविर्भावः,—प्रतिबन्धकाभावेन स्वकार्य्यक्षमत्वेनावस्थानम्। अत्र—सत्त्वोद्रेके इत्यर्थः। तथाविधेति।—तथाविधः सत्त्वोद्रेकापादको योऽलौकिककाव्यार्थो लोकोत्तरविभावादिस्तस्य परिशीलनमत्यन्ताभिनिवेशः। अखण्डपदं विवृणोति, अखण्ड इति।—विभावादिना पृथक् पृथगननुभूयमानः इति भावः। अयं—रस इत्यर्थः। विभावादीति।—विभावादयश्च रत्यादयश्चेति तेषां प्रकाशः संवित्, तेन यत् सुखं, तस्य चमत्कारोऽलौकिकतया अनुभवः, स एवात्मा यस्य तादृशः। ननु मिलिता विभावादयो रसः, तत्कथमस्य अखण्डत्वम्? इत्यत आह, अत्रेति।—अखण्डत्वे इत्यर्थः। हेतुं—कारणम्। वक्ष्यामः,—कथयिष्यामः, समूहालम्बनज्ञानतादात्म्यमेव हेतुर्वक्ष्यते। यद्यपि विभावादीनां प्रत्येकस्य खण्डरूपतैव, तथाऽपि प्रपाणकरस इव समूहालम्बनविषया विभावादीनामभेदेन तदा प्रत्ययादेतस्य रसस्याखण्डत्वं वक्ष्यते। चिन्मय इति।—[अत्र स्वरूपार्थे मयट्, न तु "तत्प्रकृतवचने मयट्" (५।४।२१ पा०) इति "अन्नमयो यज्ञः" इतिवत् प्राचुर्य्यार्थे]। चित्तविस्तार इति।—लोकातीतार्थाकलनेन किमेतदिति ज्ञानधाराजनने चित्तस्य दीर्घप्रायत्वं चित्तविस्तारः। दृष्टहेतुभ्योऽसम्भवित्वज्ञानेन हेत्वनुसन्धाने मनोव्यापारणमेव चित्तविस्तारः इति केचित्। विस्मयेति।—विस्मयः विस्मयशब्दः अपरपर्य्यायः वाचकान्तरं यस्य सः तथोक्तः; अथवा,—अपरपर्य्यायः अभिन्नः इत्याशयः। तत्प्राणत्वं—चमत्कारसारत्वम्। (सारता च स्थिरांशत्वेन ज्ञेया)।

(ङ) तामेव धर्मदत्तधृतां वृद्धप्रपितामहोक्तिमाह, रसे इति।—सर्वत्रापि—सर्वस्मिन्नपि, रसे, चमत्कारः,—चित्तविस्तार एव, सारः,—स्थिरांशः, प्राण इति यावत्, ("सारो बले स्थिरांशे च" इत्यमरः)। अनुभूयते—प्रतीयते। तत्—तस्मात् कारणादित्यर्थः; चमत्कारेति।—चमत्कार एव सारः यत्र तस्य भावस्तत्त्वं तस्मिन् सति इत्यर्थः। सर्वत्र—सर्वोऽपि, रसः। अद्भुतः,—लोकोत्तरस्वरूपः; यद्वा,—तस्य रसस्य चमत्कारसारत्वं तस्मिन् सति सर्वत्र सर्वस्मिन् अपि काव्ये रसः अद्भुतो विलक्षणो वाच्यत्वाद्यविषयः, स्थित इति शेषः। तस्मात्—एवं

कैश्चिदिति प्राक्तनपुण्यशालिभिः। यदुक्तं,—"पुण्यवन्तः प्रमिण्वन्ति योगिवद्रससन्ततिम्" इति। (च) यद्यपि "स्वादः काव्यार्थसम्भेदादात्मानन्दसमुद्भवः" इत्युक्तदिशा रसस्यास्वादानतिरिक्तत्वमुक्तं, तथाऽपि "रसः स्वाद्यते" इति काल्पनिकं भेदमुररीकृत्य कर्मकर्त्तरि वा (छ) प्रयोगः। तदुक्तं,—"रस्यमानतामात्रसारत्वात् प्रकाशशरीरादनन्यः (ज) एव हि रसः" इति। एवमन्यत्रापि एवंविधस्थलेषु उपचारेण (झ) प्रयोगा

स्थितौ सर्वत्राद्भुतरससम्भवात्, नारायणः,—नारायणनाम्ना ख्यातः कश्चिदित्यर्थः, कृती—विद्वान्, ("कृती कुशल इत्यपि" इत्यमरः)। रसं—रसमात्रमेवेत्यर्थः, अद्भुतम् एव—अद्भुताख्यमेव, आह—ब्रवीति। अत्र अद्भुतशब्दो न रसविशेषवाचकः, तत्त्वतस्तु सुखमनुभूयमाने रत्याद्यंशनिचये यथायथं शृङ्गारादिव्यपदेशः, तस्य अननुभवे अद्भुतव्यपदेशः इति बोध्यम्।

(च) प्राक्तनपुण्यशालिभिः,—ऐहिकपुण्यस्य एतच्छरीरसुखजननासम्भवादिति भावः। पुण्यवन्त इति।—पुण्यवन्तः,—प्राक्तनपुण्यशालिनः, योगिवत्—योगिन इव, रससन्ततिं—रसस्य सन्ततिः अव्यवच्छिन्नतयाऽनुभवस्तामित्यर्थः; पक्षे—रससन्ततिं परमात्मतत्त्वविस्तारमित्यर्थः,"रसो वै सः"इत्यादिश्रुतौ परमात्मनो रससंज्ञया उल्लिखितत्वादिति भावः; प्रमिण्वन्ति—अनुभवन्ति।

(छ) काव्यार्थेति।—काव्यार्थस्य सम्भेदात् परिशीलनात्; अथवा—काव्यार्थसम्भेदात् विभावादिमेलकात्। आत्मानन्देति।—आत्मनः स्वस्य आनन्दसमुद्भवः सुखसमुत्पत्तिः, काव्यार्थपरिशीलनजनितानन्दानुभवः स्वाद इति फलितार्थः; अथवा—आत्मा बुद्धिः, आनन्दः सुखं, तयोः समुद्भवो विषयान्तरतिरोधानेनाविर्भावः। काल्पनिकम्—आरोपितम्। उररीकृत्य—अङ्गीकृत्य; रसास्वादयोः कर्मक्रियाभावेनोल्लेखो भेदग्रहणमन्तरेण न सम्भवतीति भावः। कर्मकर्त्तरि वेति।—रसः स्वयमेव स्वाद्यते, स्वाभिन्नत्वादविषय इति भावः।

(ज) रस्यमानतेति।—रस्यमानता आस्वादः, तन्मात्रस्य न त्वतिरिक्तस्य, सारत्वात्-सामाजिकानामुपादेयत्वात्, प्रकाशशरीरात्—संवित्स्वरूपात्, अनन्यः,—अभिन्नः, ज्ञानस्वरूपतापन्नः एव रत्यादिः सहृदयसभ्यानां शुद्धानन्दचमत्कारसंवलनोपादेयत्वात् रस इति निष्कर्षः।

(झ) उपचारेण—आरोपेण, प्रकाशशरीरादनन्य एवेति कथनेन इति भावः।

ज्ञेयाः। ननु एतावता रसस्याज्ञेयत्वमुक्तं भवति; व्यञ्जनायाश्च ज्ञानविशेषत्वात् द्वयोरैक्यमापतितम्। ततश्च, (ञ)—

"स्वज्ञानेनान्यधीहेतुः सिद्धेऽर्थे व्यञ्जको मतः।
यथा दीपोऽन्यथाभावे को विशेषोऽस्य कारकात्॥"

इत्युक्तदिशा घटप्रदीपवत् व्यङ्ग्यव्यञ्जकयोः पार्थक्यमेवेति कथं रसस्य व्यङ्ग्यतेति चेत्, सत्यमुक्तम्; अत एवाहुः,—"विलक्षण एवायं कृतिज्ञप्तिभेदेभ्यः स्वादनाख्यः कश्चित् व्यापारः" इति। अत एव हि रसनास्वादनचमत्करणादयो विलक्षणा एव व्यपदेशा इति अभिधादिविलक्षणव्यापारमात्रप्रसाधनग्रहिलैः अस्माभिः रसादीनां व्यङ्ग्यत्वमुक्तं भवतीति। (ट)

(ञ) एवञ्च तादृशज्ञानानन्तरं रसास्वादः कथं जायतामुपायाभावादित्यभिप्रायेण शङ्कते, नन्विति।—एतावता—रसस्य विभावादिसमुदायप्रकारस्य रसत्वाङ्गीकारेण। अज्ञेयत्वं—ज्ञानाविषयत्वम्। ननु व्यञ्जनयैव रसास्वादो जायतामित्यत आह, व्यञ्जनायाश्चेति।—विभावादिसमुदायसामर्थ्यस्य चेत्यर्थः। ज्ञानविशेषत्वात्—विशिष्टवैशिष्ट्यज्ञानरूपत्वात्, द्वयोः,—व्यङ्ग्यव्यञ्जनयोरित्यर्थः। यदि रसः ज्ञानविशेषरूपो व्यञ्जना च ज्ञानविशेषरूपा, तदा उभयोस्तुल्यतेति कथं साध्यसाधकत्वम्? इति भावः। ततश्च—द्वयोरैक्यापाताच्च, "कथं रसस्य व्यङ्ग्यता" इति वक्ष्यमाणग्रन्थेनास्यान्वयः।

(ट) द्वयोः पार्थक्ये एव व्यङ्ग्यव्यञ्जकभावः सम्भवतीत्याह, स्वज्ञानेनेति।—सिद्धे अर्थे वस्तुनि सति व्यञ्जकः ज्ञापकः, स्वं व्यञ्जकत्वेनाभिमतं, तस्य ज्ञानेन, अन्यस्य सिद्धस्य अपरस्य अर्थस्य धीहेतुः ज्ञानकारणं व्यङ्ग्यप्रतीतिकरः इत्यर्थः। यथा दीपः स्वज्ञानेन अन्येषां घटपटादीनां ज्ञानहेतुर्भवति। अन्यथाभावे—सिद्धार्थज्ञापकत्वे, अस्य—व्यञ्जकस्य, कारकात्—जनकात् हेतोः को विशेषः? जनको हि कार्य्यमुत्पाद्य प्रकाशयतीति भावः। अयं भावः;—जनको हेतुः असिद्धं वस्तु उत्पादयति, ज्ञापकस्तु सिद्धमेव वस्तु ज्ञापयतीति। इत्युक्तदिशा—एवमुक्तरीत्या, घटप्रदीपवत्—यथा घटं प्रदीपो व्यनक्ति, तद्वत् व्यञ्जको व्यङ्ग्यं व्यनक्ति; अतस्तयोः पार्थक्यं—भिन्नत्वमेव, न तु एकरूपत्वमिति भावः। अत एव—उक्तात् विसंवादादेवेत्यर्थः, आहुः,—कथयन्ति, अभिनवगुप्ताचार्य्यमतानुसारिण इति शेषः। भट्टलोल्लटादयस्तु

रसस्य व्यङ्ग्यत्वमेव स्वीकुर्वन्ति। तथा हि—रामादौ व्यञ्जनया प्रतीयमानो रत्यादि-ज्ञानसम्बन्धेन सामाजिकवृत्तिः रसः, तच्च ज्ञानं "रामः सीताविषयकरतिमान्" इत्याद्याकारकमेव। यथा चिरविनष्टस्यापि यागादेः स्वजन्यापूर्वसत्त्वेनैव स्वर्गा-व्यवहितपूर्ववर्त्तित्वं कल्प्यते, तथा रत्यादेरतीतस्यापि स्वगोचरज्ञानसत्त्वेनैव सामा-जिकवृत्तित्वं कल्प्यते इत्यवधेयम्। लाघवाद्ग्रन्थकृत् एतस्मिन्नेव सिद्धान्ते "अभिधादि-विलक्षणम्—" इत्यादिग्रन्थेन स्वरसं प्रकाशयिष्यति। अयं—रससाक्षात्कारानुकूलः, कृतिज्ञप्तिभेदेभ्यः,—कृतिः करणं, ज्ञप्तिः ज्ञानानुकूलव्यापारः, तद्भेदेभ्यः तद्विशेषेभ्यः, विलक्षणः,—विभिन्नः, स्वादनाख्यः,—स्वादनाभिधेयः, कश्चित्—अनिर्दिष्टः, सहृदयानुभवसिद्धः इति यावत्, व्यापारः,—शक्तिविशेषः, येन रसः स्वाद्यते इति भावः। अत एव—विलक्षणव्यापारस्वीकारादेव, विलक्षणाः,—कृतिज्ञप्तिभिन्ना इत्यर्थः, व्यपदेशाः,—व्यवहाराः, उक्तव्यापारस्येति भावः। एवञ्च यथा संयुक्तसमवायेन सुखादिसाक्षात्कारः, तथा आस्वादनाख्यव्यापारेण वक्ष्यमाण-स्ववासनासाक्षात्कारः इति भावः। यथा "भूतलं रजतवत्" इति ज्ञानं शुक्त्यंशे लौकिकं, रजतांशे त्वलौकिकं, तथा रससाक्षात्कारोऽपि वासनांशे लौकिको रत्याद्यंशे उपनीतभानात्मकालौकिक इत्यवधेयम्। ननु वासना तावत् इच्छादिवत् गुणविशेषः एवास्तु, तथा सति संयुक्तसमवायेनैव तद्ग्रहो भविष्यति, किं स्वाद-नाख्यव्यापारेणेति चेत्, न, तस्या गुणविशेषत्वे प्रमाणाभावात्। न च लाघवमेव तत्र मानमिति वाच्यं, तत्र सत्तागुणत्वसम्बन्धकल्पने गौरवात्। न च तस्या अदृष्ट-रूपत्वमस्त्विति वाच्यं, तथात्वे साक्षात्कारानुपपत्तेः। नापि ज्ञानेच्छारूपत्वं, प्राक्त-नीत्यनेन स्थिरत्वलाभात् ज्ञानेच्छायास्तृतीयक्षणे नाशात्। नापि संस्काररूपत्वं, तस्यातीन्द्रियत्वेन प्रत्यक्षासम्भवात् रसस्य स्मृतित्वापत्तेश्च। ननु तथाऽपि "वासना-वानहम्" इति ज्ञानाकारः स्यादिति चेत्, न, प्रथमं नाट्यकाव्यदर्शनश्रवणाभ्यां विभावानुभावयोरुपस्थितिः। एवमाक्षेपेण झटित्येव व्यभिचारि-स्थायिभावयोरुप-स्थितिः। क्वचिच्छब्देनापि तयोरुपस्थितिः। सा च दोषतया वक्ष्यते। ततो वक्ष्यमाणसाधारणीकरणाख्यव्यापारेण सीतादयो मम रामस्य वेति विभावादिचतु-ष्टये प्रत्येकं साधारण्यप्रत्ययः, तदनन्तरं व्यञ्जनया रससमानाकारप्रत्ययः, तदनु तत्सहकृतेन स्वादनाख्यव्यापारेण "रामोऽहं सीताविषयकरतिमान्" इत्याकारकः स्ववासनायां रत्याद्यभेदं स्वस्मिन् नायकाभेदमवगाहमानः साक्षात्कारः सम्पद्यते। "भूतलं रजतवत्" इति भ्रमे शुक्तित्वादिकमिव वासनात्वादिकमत्र न भासते इति भावः। "प्रमाता तदभेदेन स्वात्मानं प्रतिपद्यते" इति "उत्साहादिसमुद्बोधः

ननु तर्हि (ठ) करुणादीनां रसानां दुःखमयत्वाद्रसत्वं न स्यादित्युच्यते,—

करुणादावपि रसे जायते यत् परं सुखम्।
सचेतसामनुभवः प्रमाणं तत्र केवलम् ॥३५॥ (ड)

साधारण्याभिमानतः" इति च वक्ष्यमाणबलादवसीयते। अस्मिन् मते पदार्थान्तरस्य वासनायाः स्वादनादिव्यापारस्य च कल्पने गौरवमसहिष्णुराह, अभिधादीति।—अभिधादिभ्यः अभिधालक्षणातात्पर्य्याख्येभ्यः, विलक्षणः विभिन्नः, यः व्यापारः व्यञ्जनेत्यर्थः, तन्मात्रस्य प्रसाधने स्थापने, यद्विलैः प्रयासिभिः। मात्रपदेन स्वादनादिव्यवच्छेदः। अस्माभिः,—नवीनालङ्कारिकैरित्यर्थः। व्यङ्ग्यत्वं—व्यञ्जनाजन्यबोधविषयत्वम्। यदि ज्ञानसामान्यबुद्धौ व्यञ्जनाया रसस्य च ऐक्यमापतेत्, तथाऽपि ज्ञानविशेषेण ज्ञानविशेषस्यापि व्यञ्जनं दृश्यते; यथा प्रदीपसामान्यज्ञानेन घटादिज्ञानं व्यज्यते, तद्वत् व्यञ्जनया रसो व्यज्यते इति व्यञ्जनाया वक्तृतात्पर्य्यरूपज्ञानविशेषरूपाया रसस्य आनन्दचिन्मयस्य पार्थक्यमेव सिद्धेऽर्थे इति तु प्रायिकम्; क्वचित् असिद्धार्थानामपि व्यञ्जनात्। यथा—"सङ्केतकालमनसं विटं ज्ञात्वा विदग्धया। हसन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम्॥" इति; सन्ध्या सङ्केतकाल इति प्रच्छन्नकामुकं प्रति पद्मनिमीलनेनैव कयाचित् व्यज्यते; अत्र सन्ध्यायाः सङ्केतकालत्वेन असिद्धत्वेऽपि व्यञ्जनागम्यत्वमिति सुधीभिर्विभाव्यम्।

(ठ) ननु तर्हि—रसस्य आनन्दचिन्मयत्वाङ्गीकारे इत्यर्थः।

(ड) नन्वित्यादिना कृतायाः शङ्कायाः समाधानमाह, करुणेति।—करुणादौ अपि शोकभयादिस्थायिभावके इति भावः, आदिपदेन रौद्रभयानकादीनां परिग्रहः। रसे यत्परमत्यन्तं केवलं वा सुखं जायते, तत्र तस्मिन् सुखे सुखानुभवविषये इति यावत्, सचेतसां सहृदयानां विचारशीलानामनुभवः केवलं प्रमाणम्। नन्वित्यादिना समुत्थापितायामाशङ्कायां ग्रन्थकृदुक्तसमाधानं सुकुमारमतीनामवबोधे पर्य्याप्तममन्यमानैरस्माभिः तत् सविस्तरमालोच्य ग्रन्थकृदाशयः स्फुटीक्रियते; तथा हि,—अथ सर्वत्रैव रसस्य आनन्दमयत्वाङ्गीकारे शृङ्गारादौ रसे स्थायिभावस्य रत्यादेः यथा नायके दुष्मन्तादौ निर्मलालौकिकानन्दसम्पादकता, तथा सचेतसि सामाजिकेऽप्यस्तु. युक्तिपरतन्त्रा वयं तत्र न किमपि पृच्छामः, परन्तु शोकादेर्दुःख-

सम्पादकत्वस्य सर्वानुभवपाक्षिकतया तत्स्थायिभावके करुणादौ कथं तस्य सहृदय-चित्तचमत्कारापरपर्य्यायाऽऽनन्दोत्पादकत्वं युज्यते ? न च वस्तुभूतस्यैव शोकादे-र्लोके दुःखोत्पादकत्वदर्शनात् नायके दुष्मन्तादौ तस्य वास्तविकतया तथात्वेऽपि सामाजिके तस्य कल्पितत्वेन नार्थक्रियाकारित्वमिति वाच्यं, वस्तुतोऽसर्पीभूतेऽपि रज्ज्वादौ अज्ञानकल्पितादवस्तुभूतादपि सर्पादेः त्रासकम्पाद्युत्पत्तिदर्शनात् कल्पित-स्यापि अर्थक्रियाकारित्वस्य अपलपितुमशक्यत्वात्, करुणादौ सामाजिके शोकादेः कल्पितत्वेन दुःखाद्यजनकत्वे शृङ्गारादावपि तत्र रत्यादेः कल्पिततया सर्वानुभव-सिद्धस्य आनन्दस्य अनुत्पत्त्यापत्तेर्दुरुद्धरत्वाच्चेति चेत्, सत्यम् ; सहृदयानाम् अनु-भवैर्यदि शृङ्गारादिप्रधानकाव्यवत् करुणाप्रधानकाव्यादावपि तुल्यरूपेण आनन्द-मात्रं विषयीक्रियते, तदा फलबलेन काव्यादेरेवमभिनवा काचित् शक्तिः कल्प्यते, यस्याः सममेव सहृदयानाम् आह्लादोत्पादकत्वं दुःखोत्पत्तिप्रतिबन्धकत्वञ्च स्यादिति सर्वत्र कार्य्यानुरोधित्वात् कारणं कल्पनीयम् । अथ तेषामनुभवैस्तत्रापि आनन्दवत् दुःखमपि विषयीक्रियते, तदा तादृशं प्रतिबन्धकमकल्पनीयमेव, यथायथकारण-वशेन उभयोरेवोत्पत्तौ बाधकाभावात्, अनुभवानुसारित्वात् कल्पनीयाः । ननु करुणादिरसस्य सुखवत् दुःखस्याप्युत्पादकत्वे तत्प्रधानकाव्यस्य अनिष्टसाधकतया कृतौ कवीनां श्रुतौ च सामाजिकानां कथं प्रवृत्तिः ? प्रवृत्ताविष्टसाधनताज्ञानस्य कारणतया, तदभावात् ; प्रत्युत निवृत्तिकारणस्य अनिष्टसाधनताज्ञानस्यैव सत्त्वादिति चेत्, न, तत्रापि अनिष्टापेक्षया इष्टस्याधिक्यसम्भवेन सांसारिक-दृष्टान्तेन प्रवृत्तिसम्भवात् ; तथा हि,—सततविषयविषविषमीकृतचेतसः पश्चात्तापिनः संसारिणो यथा बहिःप्रपञ्चं दुःखसाधनं जानन्तोऽपि आपाततः समधिक-सुखसाधनतया तदेव कामयन्ते, तथा सामाजिका अपि तादृशं काव्यमिति । आनन्दमात्रकारणत्वपक्षे तु सामाजिकादिप्रवृत्तिर्निर्बाधैव । न चैतल्लोकानुभव-विरुद्धकल्पनमिति मन्तव्यं, भक्तिमतां भगवद्गुणानुकीर्त्तनाकर्णनेन अविरलधारेणाश्रु-मोचनदर्शनात्, न चास्ति तत्र लेशतोऽपि दुःखस्यानुभूतिरिति सर्वानुभवसिद्धात् युक्तिरेव प्रमाणम् । अथ करुणादौ सामाजिकस्य स्वस्मिन् शोकादिमद्रामाद्य-भेदाध्यासेऽपि यदि सुखाद्यनुभूतिरप्रत्यूहा स्यात्, तदा स्वप्नावस्थायामपि तथाऽध्यासे सुखमेव समुत्पद्यते, न चैतत् ; तत्र दुःखस्यैव सर्वानुभवसिद्धत्वादिति चेन्न, इदमेव हि काव्यस्यालौकिकं माहात्म्यं, यत् दुःखोत्पत्तिनिदानमपि शोकादिकं न केवल-मेकान्ततः दुःखमेवोत्पादयति, अपि तु सर्वसहृदयहृदयानुभूतिसाक्षिकं परमानन्द-सन्दोहमपीत्यलमतिप्रपञ्चितेन ।

आदिशब्दाद्बीभत्सभयानकादयः। तथाऽपि असहृदयानां मुखमुद्रणाय पक्षान्तरमुच्यते,—

किञ्च तेषु यदा दुःखं न कोऽपि स्यात्तदुन्मुखः।(ढ)

न हि कश्चित् सचेतनः (ण) आत्मनो दुःखाय प्रवर्त्तते। करुणादिषु च सकलस्यापि साभिनिवेशप्रवृत्तिदर्शनात् सुखमयत्वमेव।

अनुपपत्त्यन्तरमाह, (त)—

तथा रामायणादीनां भविता दुःखहेतुता ॥३६॥

करुणरसस्य दुःखहेतुत्वे करुणरसप्रधानरामायणादिप्रबन्धानामपि दुःखहेतुत्वप्रसङ्गः स्यात्।

ननु कथं दुःखकारणेभ्यः सुखोत्पत्तिः? इत्याह,—

हेतुत्वं शोकहर्षादेर्गतेभ्यो लोकसंश्रयात्।
शोकहर्षादयो लोके जायन्तां नाम लौकिकाः॥
अलौकिकविभावत्वं प्राप्तेभ्यः काव्यसंश्रयात्।
सुखं सञ्जायते तेभ्यः सर्वेभ्योऽपीति का क्षतिः॥३७॥(थ)

(ढ) किञ्चेति।—किञ्च—अपरञ्च। तेषु—करुणबीभत्सभयानकादिषु। यदा—यदीत्यर्थः। दुःखं—शोकादिकार्य्यमेव स्यात्। तदित्यादि; तदुन्मुखः,—करुणादिरसव्यञ्जककाव्यादिश्रवणादौ प्रवृत्तः, कोऽपि न स्यादित्यन्वयः। करुणादीनां सुखसम्पर्कत्वादेव सर्वेषां तदभिलाषिणी प्रवृत्तिरिति भावः।

(ण) सचेतनः,—सामाजिकः सत्पुण्यसम्बन्धाद्रसास्वादक इत्यर्थः।

(त) अनुपपत्त्यन्तरम्—अनिष्टापत्त्यन्तरमित्याशयः।

(थ) हेतुत्वमिति।—लोकसंश्रयात्—लोकः चराचरवस्तुजातं, तस्य संश्रयात् संसर्गात् स्वभावाद्वा। शोकहर्षादेः,—शुगानन्दप्रभृतेः। हेतुत्वं—कारणत्वम्। गतेभ्यः,—प्राप्तेभ्यः वनवासादिभ्यः इति यावत्। लोके—जगति, लौकिकाः,—तत्तल्लोकनिष्ठाः; शोकहर्षादयः जायन्तामित्यन्वयः; नाम—सम्भावनायाम्। यथा रामवनवासे रामस्य दुःखं लौकिकमिति भावः। काव्यसंश्रयात्—काव्यसम्बन्धात्।

ये खलु रामवनवासादयो लोके "दुःखकारणानि" इत्युच्यन्ते, ते एव हि काव्यनाट्यसमर्पिता अलौकिकविभावनव्यापारवत्तया कारणशब्दवाच्यत्वं विहाय अलौकिकविभावशब्दवाच्यत्वं भजन्ते; तेभ्यश्च सुरते दन्ताघातादिभ्य इव सुखमेव जायते। अतश्च "लौकिकशोकहर्षादिकारणेभ्यो लौकिकशोकहर्षादयो जायन्ते" इति लोके एव प्रतिनियमः। काव्ये पुनः "सर्वेभ्योऽपि विभावादिभ्यः सुखमेव जायते" इति नियमान्न कश्चिद्दोषः।

कथं तर्हि हरिश्चन्द्रादिचरितस्य काव्यनाट्ययोरपि दर्शनश्रवणाभ्यामश्रुपातादयो जायन्ते? (द) इत्युच्यते,—

अश्रुपातादयस्तद्वत् द्रुतत्वाच्चेतसो मताः॥ ३८॥

तर्हि कथं काव्यतः सर्वेषामीदृशी रसाभिव्यक्तिर्न जायते? इत्यत आह, (ध)—

अलौकिकविभावत्वं—विलक्षणकारणत्वम्। प्राप्तेभ्यः,—अधिगतेभ्यः। तेभ्यः सर्वेभ्यः,—लौकिकशोकहर्षनिमित्तेभ्यः वनवासादिभ्योऽपि। सुखं—सुखमेवेत्यर्थः। सञ्जायते—समुद्भवति। इति—इत्येवं कल्पनायामित्यर्थः। का क्षतिः?—का हानिः? न काऽपीत्यर्थः।

(द) ते एव हीत्यादि।—ते एव—वनवासादयो दुःखकारणानि इत्यर्थः। काव्येति—काव्यनाट्ययोः समर्पिताः अभिनिवेशिताः सन्तः। अलौकिकेति।—अलौकिकं विलक्षणं यत् विभावनं रत्यादेरास्वादाङ्कुरयोग्यतानयनं, तदेव व्यापारः, तद्वत्तयेत्यर्थः। कारणशब्दवाच्यत्वं—कारणशब्दप्रतिपाद्यत्वम्। विहाय—त्यक्त्वा। अलौकिकेति।—अलौकिकः विलक्षणो यः विभावादिशब्दः, तद्वाच्यत्वं—तत्प्रतिपाद्यत्वम्। भजन्ते—प्राप्नुवन्ति। प्रतिनियमः,—स्थितिः। कथं तर्हीति।—तर्हि—करुणादीनां सुखमयत्वस्वीकारे। अश्रुपातादयः,—अश्रुपातदीर्घनिःश्वासप्रभृतयः, आदिपदेन निःश्वासादीनां परिग्रहात्। जायन्ते—प्रवर्त्तन्ते इत्यर्थः।

(ध) अश्रुपातेति।—चेतसः चित्तस्य, द्रुतत्वात् हर्षोद्रेकेण गलितप्रायत्वात्, अश्रुपातादयः, आविर्भवन्तीति शेषः। तदश्रुपातादिकम् आनन्दसंवलितमेवेति भावः।

न जायते तदास्वादो विना रत्यादिवासनाम्॥३९॥(न)

वासना च इदानीन्तनी प्राक्तनी च रसास्वादहेतुः। तत्र यदि आद्या न स्यात्, तदा श्रोत्रियजरन्मीमांसकादीनामपि सा स्यात्। यदि द्वितीया न स्यात्, तदा यद्रागिणामपि केषाञ्चिद्रसोद्बोधो न दृश्यते, तन्न स्यात्। (प) उक्तञ्च धर्मदत्तेन,—

तर्हि—यद्येवं सर्वमपि काव्यमाह्लादहेतुः तदा। कथं—केन रूपेण। काव्यतः,—काव्यात्। सर्वेषां—साधारणानामित्यर्थः। ईदृशी—एवंविधाऽऽह्लादहेतुभूतेति यावत्। रसाभिव्यक्तिः,—रसास्वादः। न—नैव। जायते—उद्भवति। इत्यतः,—इत्येवमाशङ्कावशात्। आह—उत्तरयति।

(न) परमते रसबोधहेतुत्वे अन्वयव्यतिरेकौ प्रमाणमाह, नेति।—रत्यादिवासनां—रत्यादितादात्म्येन प्रतीयमानां वासनाम्। विना—ऋते। तदास्वादः,—तस्य रसस्य आस्वादः। न जायते न भवति, रत्यादिवासनावन्त एव रसमास्वादयन्ति, नान्ये इति भावः। वासनापदेनात्र संस्कारविशेषः बोध्यते।

(प) यया वासनया वासितान्तःकरणा रसास्वादं लभन्ते, सा वासना पुनर्द्विविधेत्याह, इदानीन्तनीति।—एतज्जन्मसञ्चिता। प्राक्तनी च—पूर्वजन्मार्जिता च। मिलितैव रसास्वादं प्रति हेतुरिति भावः। तत्र—तयोर्द्विविधयोर्वासनयोर्मध्ये। आद्या—इदानीन्तनी वासनेत्यर्थः। न स्यात्—रसास्वादहेतुत्वेनाभिमता न भवेत्। तदा—तर्हि। श्रोत्रियेति।—श्रोत्रियाः वैदिका ये जरन्तो वृद्धा मीमांसकाः कर्मजड़ास्ते आदौ येषां तेषामपि। सा—रसाभिव्यक्तिरित्यर्थः। [स इति पाठान्तरे तु—रसास्वाद इत्यर्थः] स्यात्—भवेत्। यदि वा द्वितीया—प्राक्तनीत्यर्थः। न स्यात्, रसास्वादहेतुत्वेनाभिमतेति शेषः। तदा—तर्हि। रागिणाम्—अनुरागवतामपि। केषाञ्चित्—जनानाम्। रसोद्बोधो न दृश्यते इति यत्, तत् न स्यात् इत्यन्वयः। तदिति।—सामान्याभिप्रायेण नपुंसकम्। ननु श्रोत्रियादीनां प्राक्तनवासनासत्त्वे किं प्रमाणमिति चेन्न, तदभावे प्रमाणासत्त्वेनैव तत्सिद्धेः। न च फलाभाव एव तत्र मानमिति वाच्यम्, इदानीन्तनवासनाव्यतिरेकस्यैव फलाभावप्रयोजकत्वोपगमेनोपपत्तौ तदभावस्य तत्प्रयोजकत्वकल्पनाया अन्याय्यत्वात्। वस्तुतस्तु इदानीन्तनवासनायां प्रमाणं नास्ति। न च रागाद्यन्यथाऽनुपपत्तिरेव मानमिति वाच्यं, तस्या रागादिं प्रत्यजनकत्वात् इष्टसाधनताज्ञानादिनैव तत्सिद्धेः।

"सवासनानां सभ्यानां रसस्यास्वादनं भवेत्।
निर्वासनास्तु रङ्गान्तः काष्ठकुड्याश्मसन्निभाः॥" इति (फ)।

ननु कथं रामादिरत्यादयुद्बोधकारणैः सीतादिभिः सामाजिकरत्यादयुद्बोधः? (ब) इत्युच्यते,—

व्यापारोऽस्ति विभावादेर्नाम्ना साधारणीकृतिः।
तत्प्रभावेण यस्यासन् पाथोधिप्लवनादयः॥
प्रमाता तद्भेदेन स्वात्मानं प्रतिपद्यते॥४०॥ (भ)

(फ) सवासनानामिति।—सवासनानां वासनया रहदीनत्वया प्राप्तया चेतुभयविधया निर्वृत्तया सह वर्त्तन्ते ये तेषां तथाभूतानाम्। सभ्यानां—सहृदयानाम्। रसस्य आस्वादनम्—अनुभवः भवेत्। निर्वासनाः,—निरस्तवासनास्तु सामाजिकाः। रङ्गान्तः,—रङ्गभूमिमध्ये। काष्ठं—गोरसदारु, कुड्यं—भित्तिः, अश्म—प्रस्तरं, तत्सन्निभाः,—काष्ठादिवत् रसबोधरहितास्तिष्ठन्तीत्यर्थः।

(ब) नन्विति।—रामादीति।—रामादीनां रत्यादेः उद्बोधः तस्य कारणैः हेतुभिः सीतादिभिः। सामाजिकरत्यादयुद्बोधः,—सामाजिकरत्यादिवासनोद्बोधः, तेषां तं प्रति यत्साधनत्वादिति भावः।

(भ) सामाजिकानां सजातीयरत्यादिसाक्षात्येनापि नायकाद्यभेदाध्यासादिरूपोपपत्तौ वस्त्वलङ्कारसाधारणनिबन्धनरूपं दूरतः मनुष्यसामान्यानां सुदुर्लभप्रतिवीरालम्बनोत्साहोद्बोधोऽत्यन्तासम्भवीति तमुपपादयितुं वीररसं दर्शयन् समाप्नुते, व्यापार इति।—विभावादेः व्यापारः,—सामर्थ्यविशेषः इत्यर्थः; अस्ति यः नाम्ना साधारणीकृतिः,—साम्यं साधारणं नायकसामाजिकसम्बन्धिनं करोति उभयसम्बन्धितेन प्रतिपादयतीति साधारणीकृतिः साधारणीकरणं, सामाजिकस्य नायकादेश्चाभेदेऽप्यभिन्नत्वप्रत्ययजनकमिति यावत्, उच्यते इति शेषः। तत्प्रभावेण—तेषां विभावादीनां प्रभावेण सामर्थ्येन, तत्सम्बन्धसाधारण्याभिमानेनेत्यर्थः। यस्य—रामस्य दुष्यन्तस्य वा। पाथोधिप्लवनादयः,—समुद्रतरणादयः समुद्रबन्धनादयो वा, आसन्। यत्प्रभावेण रामगतिपदादेर्यद्वत्। प्रमाता—विद्वान् सामाजिकः। तद्भेदेन—तेन रामेण दुष्यन्तेन वा यः अभेदः भेदाभावः, तादात्म्यमिति यावत्, तेन तदभिन्नतया इत्यर्थः। स्वात्मानं—स्वस्वरूपं, प्रतिपद्यते—प्राप्नोति।

ननु कथं मनुष्यमात्रस्य समुद्रलङ्घनादावुत्साहोद्बोधः? इत्युच्यते,—

उत्साहादिसमुद्बोधः साधारण्याभिमानतः।
नृणामपि समुद्रादिलङ्घनादौ न दुष्यति ॥४१॥(म)

रत्यादयोऽपि साधारण्येनैव प्रतीयन्ते इत्याह,—

साधारण्येन रत्यादिरपि तद्वत् प्रतीयते ॥ ४२ ॥(य)

रत्यादेरपि ह्यात्मगतत्वेन प्रतीतौ सभ्यानां व्रीड़ाऽऽतङ्कादिर्भवेत्, परगतत्वेन तु अरस्यताऽऽपातः। (र)

विभावादयोऽपि प्रथमतः साधारण्येन प्रतीयन्ते इत्याह,—

परस्य न परस्येति ममेति न ममेति च।
तदास्वादे विभावादेः परिच्छेदो न विद्यते ॥४३॥ (ल)

(म) उत्साहादीति।—विभावादेः साधारणीकरणव्यापारवशात् नृणामपि साधारण्याभिमानतः हनुमत्प्रभृतिभिः समं तदानीं भेदज्ञाननिवृत्तिपुरःसरं साधारणताज्ञानतः, समुद्रादिलङ्घनादौ उत्साहादिसमुद्बोधः उत्साहादीनां सम्यक् उदयः, न दुष्यति उपपद्यते।

(य) साधारण्येनेति।—रत्यादिः सीताविषयकरामादेरनुरागादिरपि तद्वत् समुद्रलङ्घनादिवत् साधारण्येन रामाद्यभेदाध्यवसायेन प्रतीयते ज्ञायते, सामाजिकैरिति शेषः।

(र) तत्र हेतुमाह, हि—यत इत्यर्थः। रत्यादेः अपि—किं पुनः रसस्य? आत्मगतत्वेन—आत्ममात्रनिष्ठत्वेन, प्रतीतौ—अनुभवे, सभ्यानां—सहृदयानां, व्रीड़ाऽऽतङ्कादिः,—व्रीड़ा लज्जा, आतङ्कः भयं तदादिः भवेत्। परगतत्वेन—परनिष्ठत्वेन, रामादिनिष्ठत्वेनेति यावत्। तु—किन्तु। अरस्यताऽऽपातः,—रसास्वादोच्छेदः स्यात्। तस्मात् नायकादिभिः सह साधारणताप्रत्ययानन्तरमेव नृणां रसास्वादो जायते इति भावः।

(ल) परस्येति।—तदास्वादे—तस्य रसस्य आस्वादे आस्वादनक्षणे इत्यर्थः, विभावादेः,—आलम्बनोद्दीपनादेः, परस्य न परस्य इति, मम इति न ममेति च परिच्छेदः,—अवबोधः। न विद्यते—न भवति।

ननु तथाऽपि कथमेवमलौकिकत्वमेतेषां विभावादीनाम्? इत्युच्यते,—

विभावनादिव्यापारमलौकिकमुपेयुषाम्।
अलौकिकत्वमेतेषां भूषणं न तु दूषणम् ॥४४॥ (व)

आदिशब्दादनुभावनसञ्चारणे। तत्र विभावनं रत्यादेर्विशेषेण आस्वादाङ्कुरणयोग्यतानयनम्। अनुभावनमेवम्भूतस्य रत्यादेः समनन्तरमेव रसादिरूपतया भावनम्। सञ्चारणं तथाभूतस्यैतस्य सम्यक् चारणम्। (श)

विभावादीनां यथासङ्ख्यं कारणकार्य्यसहकारित्वे कथं त्रयाणामेव रसोद्बोधे कारणत्वम्? इत्युच्यते,—

कार्य्यकारणसञ्चारिरूपा अपि हि लोकतः।
रसोद्बोधे विभावाद्याः कारणान्येव ते मताः ॥४५॥ (ष)

(व) नन्वेतदृष्टचरमित्याह, विभावनेति।—अलौकिकं—लोकविलक्षणं, विभावनादिव्यापारम् उपेयुषां—प्राप्तवताम्, एतेषां—विभावादीनां काव्यनिवेशितानां सीतादीनाम्, अलौकिकत्वं—लोकोत्तरचमत्कारकारिताशालित्वं, भूषणम्—अलङ्कृतिः, सहृदयानाम् आस्वादार्हत्वादिति भावः, न तु दूषणं, परानुरागजननादिति भावः।

(श) विभावनपदार्थं विवृणोति, विभावनमिति।—रत्यादेः,—रत्यादिस्थायिभावस्य, विशेषेण—अतिशयेन। आस्वादेति।—आस्वादस्य अङ्कुरणयोग्यता—अङ्कुरवत् सूक्ष्मरूपेण आविर्भवनानुरूपत्वं, तस्या आनयनं प्रापणमित्यर्थः। अनुभावनपदार्थं विवृणोति, अनुभावनमिति।—एवम्भूतस्य—आस्वादाङ्कुरभूतस्य, सूक्ष्मरूपेण आस्वादयोग्यतां प्रति नीतस्येत्यर्थः, रत्यादेः,—स्थायिभावस्य, समनन्तरं—तदानीमेव, रसादिरूपतया—रसाद्यात्मना, भावनं—प्रकाशनम्। तथाभूतस्य—रसादिरूपेण भावितस्य इत्यर्थः। एतस्य—रत्यादेः, चारणं—प्रसारणं, विस्तृतिकरणमिति यावत्।

(ष) कार्य्येति।—लोकतः,—लोकव्यवहारदृष्ट्या, विभावाद्याः,—विभावानुभावव्यभिचारिणः, कार्य्यकारणसञ्चारि(सहकारि)रूपाः। [अत्र कारणशब्दस्य परनिपातः "अल्पाच्तरम्" (२।२।३४ पा०) इत्यनेन बोध्यम्]। तथा च कारणकार्य्यसञ्चारि(सहकारि)रूपा इत्यर्थः। अपि, व्यपदिश्यन्ते इति शेषः। ते—विभा-

ननु तर्हि कथं रसास्वादे तेषामेकः प्रतिभासः ? इत्युच्यते, (स)—

प्रतीयमानः प्रथमं प्रत्येकं हेतुरुच्यते।
ततः सम्मिलितः सर्वो विभावादिः सचेतसाम्॥
प्रपाणकरसन्यायाच्चर्व्यमाणो रसो भवेत्॥४६॥(ङ)

यथा खण्डमरिचादीनां सम्मेलनादपूर्व इव कश्चिदास्वादः प्रपाणकरसे सञ्जायते, विभावादिसम्मेलनादिष्वपि तथेत्यर्थः।

ननु यदि विभावानुभावव्यभिचारिभिर्मिलितैरेव रसः, तत् कथं तेषामेकस्य द्वयोर्वा सद्भावेऽपि स स्यात् ? इत्युच्यत,—

सद्भावस्त्वेषु भावादेर्द्वयोरेकस्य वा भवेत्।
झटित्यन्यसमाक्षेपे तदा दोषो न विद्यते॥४७॥(क)

स्वादय इत्यर्थः। रसोद्बोधे—रसास्वादे, कारणान्येव—हेतव एव, न तु कारणकार्य-सञ्चारिरूपाः, अतः,—आलम्बनादिभिः क्षोभिता इति भावः।

(ख) पूर्वं कारणसद्भावः पश्चात् कार्योत्पत्तिरिति स्थितिः; तत् कथं रसास्वादे विभावादीनां पौर्वापर्यम् ? इत्याह, नन्विति।—तेषां—कारणीभूतविभावादीनाम्, एकः,—चरमः इत्यर्थः, प्रतिभासः,—स्फुरणं, विभावाद्यन्तिमत्वादेरनुभवश्च पौर्वापर्यव्यपगमादिति भावः।

(ग) प्रतीयमान इति।—विभावादिः,—विभावानुभावसञ्चारिणः, प्रथमं—रसोद्बोधात् प्राक्त्यर्थः, प्रतीयमानः, प्रत्येकं, हेतुः,—रसास्वादकारणम् उच्यते। ततः, —पश्चात्, रसोद्बोधकाले; सम्मिलितः,—मिश्रितः, सर्वः,—विभावादिः, विभावानुभाव-व्यभिचारिभावसंवलितत्वादिरित्यर्थः, प्रपाणकरसन्यायात् प्रपाणकरस इव चर्व्यमाणः आस्वाद्यमानः सन्, सचेतसां—सामाजिकानां, रसः भवेत् रसरूपेण परिणमेदित्यर्थः।

(घ) सद्भाव इति।—विभावादेः,—विभावादिगणे, द्वयोः एकस्य वा सद्भावः, —सत्ताभेदः, चेत्—यदि, भवेत्, तदा, झटिति—शीघ्रम्, अन्यसमाक्षेपे—अन्यस्य अन्ययोः अन्येषां वा समाक्षेपे अध्याहारे, दोषो न विद्यते—नास्ति, न भवेदित्यर्थः; यत्र विभावोऽस्ति अनुभावसञ्चारित्वादयो न सन्ति, तत्र तेषामध्याहारः, यत्र विभा-वानुभावौ स्तः, सञ्चारित्वादयः न सन्ति, तत्रापि तेषामध्याहारः, यत्र तु अनुभाव-सञ्चारिणौ स्तः, तत्र पुनः अन्येषां पूर्ववत् समाक्षेपः। एवं सर्वत्र।

अन्यसमासेपस्य प्रकरणादिबलात्; यथा,—

"दीर्घाक्षं मुखमिन्दुकान्ति वदनं, बाहू नतावंसयोः
सङ्गिनं निविडोन्नतस्तनभरः, पार्श्वे प्रसृष्टे इव।
मध्यः पाणिमितो, नितम्बि जघनं, पादावरालाङ्गुली
छन्दो नर्त्तयितुर्यथैव मनसः श्लिष्टं तथा स्वं वपुः" ॥ (ख)

अत्र मालविकामभिलषतोऽग्निमित्रस्य मालविकारूपविभाव-मात्रवर्णनेऽपि सञ्चारिणामौत्सुक्यादीनामनुभावानाञ्च नयन-विस्फारादीनामौचित्यादेवाक्षेपः। एवमन्याक्षेपेऽपि क्षुण्णम्। (ग)

"अनुकार्य्यगतो रसः" (घ) इति वदतः प्रत्याह,—

(ख) उदाहरति, दीर्घाक्षमिति।—मालविकाया वर्णनमिदम्। नर्त्तयितुः,—इत्याचार्यस्य रभसाख्यस्येत्यर्थः, मनसि, यथैव—यद्वदुरूपमेव, छन्दः,—अभिप्रायः, ("छन्दोऽभिप्राय आशयः" इत्यमरः) श्लिष्टं—संगतं, तथैव, स्वं—स्वकीयं, वपुः,—शरीरं, श्लिष्टम्; (दृश्यौदीपकव्याघेनाक्ष अन्वयः); बाहुआकृतौ सति वर्णनं सरलं भवति, तथा कृतमित्यर्थः। पुत्तलिकावृत्तप्रदर्शनः पुत्तलिकाया अङ्गानि यथा लेप्यादवस्थात् दृष्ट्वा सरीरादि करोति, तथैव करणीयमिति भावः। तथा हि वदनं—मुखं, दीर्घे—आयते, अक्षिणी—लोचने यस्य तादृशं, तथा अरविन्दोरिव कान्तिर्यस्य तथाभूतं, बाहू भुजौ, अंसयोः स्कन्धयोः, नतौ विनतौ, उरः,—वक्षः स्थलं, निविडौ घनौ, उन्नतौ उच्चौ प्रायौ स्तनौ यत्र तादृशम्, अत एव सङ्गिनम्—अध्यायतं, पार्श्वे प्रसृष्टे—खिन्ने, इव, तत्स्थानमनुसरत्त्वादिति भावः; मध्यः कटिदेशः, पाणिमितः वितस्ति-वेष्टनेन परिमित इत्यर्थः; जघनं नितम्बि नितम्बविशिष्टं, ["नितम्बि" इत्यत्र "अमितम्ब" इति पाठे—विपुलनितम्बेत्यर्थः] तथा पादौ चरणौ, अरालाः सुप्ताः, [उदयाङ्गुली इति पाठान्तरे तु—उदया उन्नताया] अङ्गुलयः यत्रीदृशमाभूतं। आर्द्धविलोकितं इत्यम्।

(ग) अन्याक्षेपे—विभावाक्षेपे इत्यर्थः। यथा,—परिवर्द्धितसभाजीवानामङ्गं प्रहर्षः सजनमपि परिवारप्रार्थनाभिः क्रियासु। जलयति च दिनान्तोन्निद्रलज्जं लज्जा-नमितवदनपरिदृश्यच्छेदकान्तः कपोलः॥" अत्र नायिकायाः सखीजनकारक आलम्बन-विभावो बोधकः, सम्भोगादिकमुद्दीपनविभावश्च, इत्येतयोः समाक्षेपो द्रष्टव्य इति।

(घ) रसस्य नायकादिनिष्ठतां परिहरति, अनुकार्य्येति।—अनुकार्य्यः,—नायकादिः, तद्गतः,—तन्निष्ठः, न तु सामाजिकनिष्ठ इति भावः।

पारिमित्याल्लौकिकत्वात् सान्तरायतया तथा।
अनुकार्य्यस्य रत्यादेरुद्बोधो न रसो भवेत् ॥४८॥(ङ)

सीतादिदर्शनादिजो रामादिरत्याद्युद्बोधो हि परिमितो लौकिको नाट्यकाव्यदर्शनादेः सान्तरायश्च। तस्मात् कथं रसरूपतामियात्? रसस्य एतद्धर्मत्रितयविलक्षणधर्मकत्वात्। अनुकर्त्तृगतत्वञ्च अस्य (च) निरस्यति।

(ङ) पारिमित्यादिति।—पारिमित्यात्—परिमितत्वात्, अनुकार्य्यमात्रगतत्वेन अल्पत्वादिति यावत्, अस्य तु बहुसामाजिकनिष्ठत्वेन व्यापकत्वमिति भावः; लौकिकत्वात्—तत्तल्लोकनिष्ठत्वात्, अस्य तु अलौकिकत्वमिति भावः; सान्तरायतया—प्रतिकूलतया। अनुकार्य्यस्य—नायकादेः, रत्यादेरुद्बोधः, नायिकादिविषयक इति शेषः, रसः न भवेत्। यदि अनुकार्य्यगत एव रसः, तदा सामाजिकाः कथं काव्यदर्शनश्रवणेषु व्यग्रा भवेयुः? तेषामभीष्टरसास्वादप्रत्याशाविरहादिति भावः।

(च) नाट्यकाव्यदर्शनादेः (अत्रादि-पदेन श्रवणपरिग्रहः) एतद्धर्मत्रितयविलक्षणधर्मकत्वात्—एते—पारिमित्य-लौकिकत्व-सान्तरायत्वाख्या ये धर्मास्तेषां त्रीण्यवयवान्यस्य तत् त्रितयं ["सङ्ख्याया अवयवे तयप्" (४।२।४२ पा० इति तयप्] तस्मात् विलक्षणः विपरीतः धर्मः यस्य तस्य भावः तत्त्वं तत्तथोक्तात्, पारिमित्यलौकिकत्वसान्तरायत्वरूपधर्मत्रयभिन्नापारिमित्यालौकिकत्वनिरन्तरायत्वरूपधर्मशालित्वादिति भावः। अत्र विलक्षणत्वं तदभावव्याप्यत्वमेव। एवञ्च यद्धर्माभावव्याप्यो यद्वृत्तिधर्मस्तद्धर्मस्तद्भेदव्याप्य इति नियमः सम्पद्यते। यथा,—पटवृत्तिधर्मः पटत्वं घटत्वरूपधर्माभावव्याप्यो भवति, एवं घटवृत्तिधर्मो घटत्वमपि पटत्वरूपधर्माभावव्याप्यो भवति; तथा—अनुकार्य्यवृत्तिधर्मः पारिमित्याद्यपरपर्य्यायोऽनुकार्य्यत्वरूपः, असावपि अननुकार्य्य(रस)त्वरूपापारिमित्याद्यपरपर्य्यायधर्माभावव्याप्यो बोध्य इति स्थितम्। यथाश्रुतं तु न सम्यक्। तथा हि,—यद्धर्मो यद्वृत्तिधर्मभिन्नस्तद्धर्मस्तद्भेदव्याप्य इति नियमो नोपपद्यते। घटत्वं घटवृत्तिधर्मान्तरविलक्षणं, न तु घटभेदव्याप्यमिति व्यभिचारात्। यदि तु यद्वृत्तित्वावच्छिन्नप्रतियोगिताको भेदो विवक्ष्यते तदा नायं दोष इत्यवधेयम्। ननु यद्येवमनुकार्य्यनिष्ठो रसो न स्वीक्रियते, तर्हि अनुकर्त्तृनिष्ठ एवायं स्वीक्रियताम्? इत्याशङ्क्यानुकर्त्तृगतत्वञ्चास्य निराकरोति, अनुकर्त्तेति।—अनुकर्त्ता—नटः, तद्गतः तस्य भावः तत्। अस्य—रसस्येत्यर्थः।

शिक्षाऽभ्यासादिमात्रेण राघवादेः सरूपताम्।
दर्शयन् नर्त्तको नैव रसस्यास्वादको भवेत्॥४९॥(छ)

किञ्च,—

काव्यार्थभावनेनायमपि सभ्यपदास्पदम्॥५०॥(ज)

यदि पुनर्नटोऽपि काव्यार्थभावनया रामादिस्वरूपतामात्मनो दर्शयेत्, तदा सोऽपि सभ्यमध्ये एव गण्यते।

नायं ज्ञाप्यः स्वसत्तायां प्रतीत्यव्यभिचारतः॥५१॥(झ)

यो हि ज्ञाप्यो घटादिः, स सन्नपि कदाचिदज्ञातो भवति। न ह्ययं तथा; प्रतीतिमन्तरेण अभावात्। (ञ)

(छ) शिक्षेति।—नर्त्तकः,—नटः, शिक्षा—गुरुसकाशादुपदेशग्रहणम्, अभ्यासः,—शिक्षितार्थस्य मुहुरनुष्ठानेन संस्कारातिशयः, इत्येतावादौ यस्य (नैपुण्यादेः) तन्मात्रेण। अत्र मात्रपदेन काव्यार्थभावनस्य व्यवच्छेदो बोध्यः। राघवादेः,—रामादेः, सरूपतां—तुल्यतां, दर्शयन्—नाट्येन प्रकटयन्, रसस्य आस्वादकः नैव भवेत्।

(ज) ननु यदि नटोऽसौ सहृदयो भवति, तदाऽपि किं तस्य रसास्वादो न स्यात्? इत्याशङ्क्याह,—किञ्चेति। काव्येति।—अयं—अनुकर्त्ता, नट इत्यर्थः, अपि काव्यार्थभावनेन—काव्यार्थस्य परिशीलनेन, सभ्यपदास्पदं—सभ्यानां सहृदयानां, पदं स्थानं, प्रतिष्ठेति यावत्, तस्यास्पदमाश्रयभूत इति तथोक्तम् [अजहल्लिङ्गत्वात् क्लीवत्वेन निर्देशः] भवतीति शेषः; सभ्यवत् रसास्वादभाक् जायते इति भावः।

(झ) रसस्य स्वप्रकाशत्वं पूर्वमुक्तं, तदेवान्यधर्मत्वखण्डनेन द्रढयति, नायमित्यादि।—अयं—रसः, न ज्ञाप्यः,—ज्ञापयितुं शक्यः, जन्यज्ञानविषयो वा। रसस्य जन्यताऽभावोऽग्रिमकारिकया निरूपयिष्यते, नातो जन्यज्ञानविषयः। ईश्वरज्ञानविषयत्वस्य केवलान्वयितया साध्याप्रसिद्धिरतो जन्येति। स्वसत्तायां—स्वस्य रसस्य सत्तायां विद्यमानतायां, स्वावस्थाने इत्यर्थः; [अत्र षष्ठ्यर्थे सप्तमी] प्रतीतेः,—ज्ञानस्य, अव्यभिचारतः,—निश्चयादित्यर्थः, प्रतीतिं विना स्वावस्थानस्याभावात् इति हृदयम्। अन्येषान्तु ज्ञाप्यानां प्रतीतेः पूर्वमपि सत्ताऽस्ति, अस्य तु प्रतीतिकाले एवेति ज्ञाप्यलक्षणायोग इति भावः।

(ञ) यो हि—अत्र वीप्सा वेदितव्या, तथा च, यो यो हीत्यर्थः। ज्ञाप्यो

यस्मादेष विभावादिसमूहालम्बनात्मकः।
तस्मान्न कार्य्यः ॥ ५२ ॥ (ट)

यदि रसः कार्य्यः स्यात्, तदा विभावादिज्ञानकारणक एव स्यात्। ततश्च रसप्रतीतिकाले विभावादयो न प्रतीयेरन्। कारणज्ञानतत्कार्य्यज्ञानयोर्युगपददर्शनात्। न हि चन्दनस्पर्शज्ञानं तज्जन्यसुखज्ञानञ्च एकदा सम्भवति। रसस्य च विभावादिसमूहालम्बनात्मकतयैव प्रतीतेर्न विभावादिज्ञानकारणकत्वमित्यभिप्रायः। (ठ)

घटादिलौकिकं पदार्थजातमस्ति, सः,—अत्रापि वीप्सा वेदितव्या; तथा च स स ज्ञाप्यः पदार्थ इति निष्कृष्टं, सन्नपि—अवस्थितोऽपि, कदाचित्—ज्ञानसामग्र्यभावदशायाम्, अज्ञातः स्यात्; तथा च यो यो ज्ञाप्यः, स प्रतीतिं विना कदाचिदवतिष्ठते, यथा घटादिरित्यभिप्रायः। अत्र ज्ञानाभावकालिकावस्थानाभाव एव हेतुः प्रतीतिपथमुपपन्नः। ज्ञानञ्चात्र स्वविषयकमीश्वरज्ञानातिरिक्तमवगन्तव्यम्। नातो हेत्वप्रसिद्धिः। ज्ञाप्यत्वाभावस्य साध्यस्य व्यतिरेको ज्ञाप्यत्वमेव, निरुक्तहेतुव्यतिरेकश्च ज्ञानाभावकालिकावस्थानं, तयोः सहचारग्रहेण साधने साध्यव्याप्तिं ग्राहयित्वा पक्षधर्मत्वं ग्राहयति। न ह्ययमिति।—अयं—रसः, तथा—सन्नपि कदाचिदज्ञातः न स्यात्। तत्रापि हेतुमाह, प्रतीतिमिति।—प्रतीतिमन्तरेण—प्रतीतिं विना तदभावप्रसङ्गात्।

(ट) यस्मादिति।—यस्मात् एषः,—रसः, विभावादिसमूह एव आलम्बनम् आत्मा यस्य तादृशः, तस्मात्, न, कार्य्यः,—जन्यः।

(ठ) विभावादीति।—विभावादिज्ञानं कारणं यस्य तथाभूतः। न प्रतीयेरन्—न बुध्येरन्, न हि कारणं कार्य्यञ्च युगपत् ज्ञायेते इति भावः। आपत्तेरनुगुणं बाधं दर्शयति, रसस्य चेति।—आनन्दरूपस्य विभावादिसमूहालम्बनात्मकप्रतीतिरूपस्येत्यर्थः। एवञ्च विभावादिज्ञानकारणकत्वरूपस्यापाद्यस्याभावे सिद्धे तेनैव कार्य्यत्वरूपविशेष्याभावकृतो निरुक्तापादकस्य विशिष्टाभावः सिध्यति इति भावः। तदुक्तं काव्यप्रकाशटीकाकृता चण्डीदासेन,—"कार्य्यं सुखं स्वकरणैः सह नैकस्यां संविद्यवभासमानं दृष्टम्। एतच्च सुखं विभावादिसंवलितं भासते, तस्मान्न कार्य्यम्॥" इति। एवञ्च विभावादिज्ञानस्य रसं प्रति यत्कारणत्वमुक्तं तत्पूर्ववर्त्तित्वमात्रेणौपचारिकमिति ध्येयम्।

नो नित्यः पूर्वसंवेदनोज्झितः ।
असंवेदनकाले हि न भावोऽप्यस्य विद्यते ॥५३॥ (ड)

न खलु नित्यस्य वस्तुनोऽसंवेदनकालेऽसम्भवः ।

न चानादिरनन्तोऽयमनित्यः सम्भवेद्रसः ।
अस्य भानमभानञ्च चर्वणावशतः परम् ॥५४॥ (ढ)

चर्वणायां सत्यां निवृत्तायाञ्च रसस्य तदा भानमभानञ्चाविरुद्धम् ।

(ड) ननु यदि रसो न कार्य्यः, तर्हि किं नित्यः ? इति चेत् नेत्याह, नो इति ।—नित्यः, रसः इति शेषः, नो—न भवति । कुतः ? इति तं विशिष्य दर्शयति, पूर्वसंवेदनोज्झित इति ।—पूर्वं विभावादिज्ञानात् प्राक् (प्राक्तनं) यत् संवेदनं तस्मात् उज्झितः,—त्यक्तः । यद्ययं नित्योऽभविष्यत्, तर्हि विभावादिज्ञानात्पूर्वमप्यभविष्यदिति भावः । ननु विभावादिज्ञानं तद्ग्राहकमिति तत्प्रागयं सम्भवेदिति चेत् ? सत्यम् ; किन्तु तस्य नित्यत्वस्वीकारे दोषान्तरतादवस्थ्यमित्याह, असंवेदनकाले इति ।—अप्रतीतिक्षणे, विभावादिज्ञानाभावावसरे इति यावत्, अस्य—रसस्य, भावः,—सत्ता, अपि, न विद्यते ; नित्यवस्तु हि सार्वकालिकं स्यात्, अतोऽस्य विभावादिप्रतीतिमात्रकालिकप्रतीतिशरीरत्वमित्यपि नास्य नित्यत्वमिति भावः ।

(ढ) ननु तत्स्यादयमनित्यः ? इति चेन्न, अनिर्वचनीयत्वापगमादित्याह, न चेति ।—अयं रसः, अनादिः,—कार्य्यशून्यत्वात् न आदिः उत्पत्तिकालो यस्य तथाभूतः, अनन्तः,—आवरणभङ्गानन्तरं पुनरपि तथैव प्रकाशमानत्वादन्तत्वाभाववान् । एतेनास्य मायाया इवानादित्वमात्रेण सान्तत्वं निवारितम् ; अत एव अनित्यः न सम्भवेत्—स्यात् । ननु कथं तर्हि विभावादिसंवेदनस्य आदौ अन्ते च अयं न प्रकाशते ? इति चेत् चर्वणैवात्र हेतुरित्याह, अस्येति ।—अस्य—रसस्य, भानं—विभावादिसंवेदनसमये प्रतीतिः, अभानं—विभावादिसंवेदनासमये प्रतीत्यभाव इत्यर्थः, च, परं—केवल, चर्वणावशतः,—चर्वणाया वशत इच्छातः, चर्वणायां सत्यां रसस्य भानम्, असत्यां पुनरभानमिति भावः । चर्वणा चास्वादनावस्थेति बोध्यम् । न हि समाधिसद्भावे परमात्मा प्रतीयते, समाध्यसद्भावे च न परमात्मा प्रतीयते इत्यनेन परमात्मनोऽनित्यत्वं साधितुं शक्यते इति भावः ।

नापि भविष्यन् साक्षादानन्दमयप्रकाशरूपत्वात्।
कार्य्यज्ञाप्यविलक्षणभावान्नो वर्त्तमानोऽपि ॥५५॥(ण)

विभावादिपरामर्शविषयत्वात् सचेतसाम्।
परानन्दमयत्वेन संवेद्यत्वादपि स्फुटम् ॥
न निर्विकल्पकं ज्ञानं तस्य ग्राहकमिष्यते।
तथाऽभिलापसंसर्गयोग्यत्वविरहान्न च।
सविकल्पकसंवेद्यः ॥ ५६ ॥ (त)

सविकल्पकज्ञानसंवेद्यानां हि वचनप्रयोगयोग्यता, न तु रसस्य। तथा,—

(ण) अस्य रसस्य भविष्यत्त्वं निराकरोति, नापीति।—साक्षादानन्दमयप्रकाशरूपत्वात्—आनन्दप्रधानप्रकाशरूपताया अनुभूयमानत्वात्, भविष्यन्, अपि, न। न च तर्हि वर्त्तमानः स्यादित्याह, कार्य्येति।—कार्य्यज्ञाप्ययोर्विलक्षणभावात्—वैलक्षण्यात्, अयं रसः, वर्त्तमानः अपि न, किन्तु ततो विलक्षण इति भावः।

(त) रसग्रहस्य निर्विकल्पकज्ञानस्वरूपत्वाभावं साधयति, विभावादीति।—निर्गतो विकल्पः विभिन्नकल्पः विशिष्टप्रकारः इत्यर्थः यस्मिन् तादृशं, निरवच्छिन्नमित्यर्थः, सम्बन्धानवगाहीति यावत्। विभावादीनां परामर्शो ज्ञानं, विशिष्टवैशिष्ट्यावगाही ग्रह इति यावत्, विषयः यस्य तस्य भावः तत्त्वं तस्मात्, तथा सचेतसां सहृदयानां, स्फुटं परानन्दमयत्वेन—परमानन्दत्वप्रकारकसंवेदनविषयत्वादित्यर्थः, संवेद्यत्वात्—ज्ञेयत्वात्, अपि तस्य—रसस्य, ग्राहकं—प्रतिपादकं, विषयतानिरूपकमित्यर्थः; ज्ञानं, न, इष्यते अत्र रसग्रहो निर्विकल्पस्वरूपः। न हि विभावादिनिष्ठप्रकारतायाः परमानन्दत्वनिष्ठप्रकारतायाश्च साधारण्येन निरूपकं रसग्रहत्वं, न च तस्य निष्प्रकारात्मकनिर्विकल्पस्वरूपत्वं सम्भवतीति बोध्यम्। एतेन स्वमात्रग्राह्यस्य रसस्य निर्विकल्पकज्ञानरूपत्वमपि न सिध्यतीति सूचितम्। रसग्रहस्य सविकल्पकज्ञानस्वरूपत्वाभावमपि साधयति, तथेति।—तथा अभिलापः,—वचनं, तस्य संसर्गः,—सम्बन्धः, तद्योग्यत्वविरहात्—वक्तुमशक्यत्वादित्यर्थः, सविकल्पकस्य—सम्बन्धावगाहिन इत्यर्थः, ज्ञानस्येति शेषः, संवेद्यः,—विषयीभूत इत्यर्थः, न, सम्भवतीति शेषः। सविकल्पकज्ञानगम्यानां हि

साक्षात्कारतया न च।

परोक्षस्तत्प्रकाशो नापरोक्षः शब्दसम्भवात् ॥५७॥ (थ)

तत् कथय कीदृगस्य तत्त्वमेवमश्रुतादृष्टपूर्वनिरूपणप्रकारस्य ? इत्याह, (द)—

तस्मादलौकिकः सत्यं वेद्यः सहृदयैरयम् ॥५८॥(ध)

तत् किं पुनः प्रमाणं तस्य सद्भावे ? इत्याह,—

प्रमाणं चर्वणैवात्र स्वाभिन्ने विदुषां मतम् ॥५९॥ (न)

वचनगम्यत्वमस्ति, रसस्य तु न तथेति भावः; किन्तु प्रागुक्तहेतुद्वयासङ्गतेरस्य सविकल्पकज्ञानविषयत्वमस्त्येव, अथापि सविकल्पकवेद्यान्तरादस्य वैलक्षण्यसाधने तात्पर्यं वेदितव्यम्। स्वप्रकाशत्वेनापि ज्ञानान्तरयाह्यात्सविकल्पकादस्य वैलक्षण्यं बोध्यम्। गुरुनये तु,—सविकल्पकज्ञानानां स्वेनैव यद् इति नेतद्वैलक्षण्यम्।

(थ) साक्षादिति।—साक्षात्कारतया—साक्षादनुभवयोग्यतया, आस्वादनाख्यव्यापारस्य मनःसन्निकर्षत्वाङ्गीकारेण तज्जन्यत्वादिति भावः,तस्य—रसस्य, प्रकाशः,न, परोक्षः,—प्रत्यक्षविलक्षणः; न हि परोक्षवस्तुनः साक्षात्कारो भवतीति भावः। ननु तत्प्रकाशं प्रत्यक्षः इति चेत्, प्रत्यक्षोऽपि नेत्याह, नापरोक्ष इति।—अपरोक्षः,—प्रत्यक्षस्य तस्य रसस्य, प्रकाश इति शेषः, न, शब्दसम्भवात्—शब्दैः काव्यार्थसूचकैः सम्भवात् उत्पत्तेः; अस्य काव्यजन्यविभावादिज्ञानजन्यत्वनियमात् इति निष्कर्षः। अनेन प्रत्यक्षान्तरवैलक्षण्यमेव साधितं, न तु प्रत्यक्षभिन्नत्वं, प्रागुक्तविरोधात्; न हि शब्दप्रमाणगम्यानां प्रत्यक्षत्वमिति भावः।

(द) तत्—तस्मात् कारणात्। एवं—निरूपितप्रकारेण, पूर्वम् अश्रुतः अदृष्टश्च इति अश्रुतादृष्टपूर्वः, निरूपणप्रकारः,—इतरभेदानुमापको धर्मो यस्य तादृशस्य, अस्य—रसस्य, कीदृक्—कथम्भूतं, तत्त्वं—याथार्थ्यं, स्वरूपमित्यर्थः, कथय। इति—इत्यपेक्षायाम्, आह—उत्तरयति।

(ध) तस्मादिति।—उक्तविरोधात्, उपदर्शितलौकिकज्ञानानन्दवैलक्षण्यात् इत्यर्थः। अयं—रसः, सहृदयैः,—सामाजिकैः, अलौकिकः,—अलौकिकसिद्धः, जगद्विलक्षण इत्यर्थः, सत्यम्; अत्र सत्यम् एवकारार्थे, अलौकिक एवेत्यर्थः। अन्यथा-श्रवदर्शनलौकिकवस्तुसिद्धौ गुरव एव, न तु दोष इति भावः।

(न) प्रमाणमिति।—स्वाभिन्ने—स्वः स्वीयचर्वणव्यापारस्तदाद्यभिन्नस्तस्मिंश्चर्वणे

चर्वणा—आस्वादनम्। तच्च "स्वादः काव्यार्थसम्भेदादात्मानन्दसमुद्भवः" इत्युक्तप्रकारम्। ननु यदि रसो न कार्य्यः तत् कथं महर्षिणा "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः" इति लक्षणं कृतम्? इत्युच्यते, (प)—

निष्पत्त्या चर्वणस्यास्य निष्पत्तिरुपचारतः ॥६०॥ (फ)

यद्यपि रसाभिन्नतया चर्वणस्यापि न कार्य्यत्वं, तथाऽपि तस्य कादाचित्कतया उपचरितेन कार्य्यत्वेन कार्य्यत्वमुपचर्य्यते। (ब)

अवाच्यत्वादिकं तस्य वक्ष्ये व्यञ्जनरूपणे ॥६१॥ (भ)

तस्य—रसस्य। आदिशब्दादलक्ष्यत्वादि। ननु यदि

चर्वणास्वरूपे; अत्र—अस्मिन् रसे, विदुषां, चर्वणा—आस्वादनम्, एव, प्रमाणं मतम्। अत्र प्रमाणम्;—"चर्वणैव भगवती स्वसंवित् स्वस्वरूपादभिन्ने तस्मिन् प्रमाणम्" इति।

(प) ननु यदीति।—अस्याः विप्रतिपत्तेः "तस्मान्न कार्य्यः" इत्यनन्तरमेवोत्थापयितुमौचित्येऽपि, सिद्धान्तस्य चर्वणग्रहसाध्यत्वाच्चर्वणनिरूपणानन्तरमेवोत्थापनमुचितमिति बोध्यम्। महर्षिणा—भरताचार्य्येणेत्यर्थः। कृतं—सूत्रितम्। इत्याशङ्कायाम्, उच्यते—कथ्यते।

(फ) निष्पत्त्येति।—चर्वणस्य—आस्वादनस्य, निष्पत्त्या, अस्य—रसस्य, उपचारतः,—परम्परया, स्वाश्रयग्राह्यत्वसम्बन्धेनेत्यर्थः, निष्पत्तिः,—सिद्धिः, प्रतीयते इति शेषः।

(ब) कादाचित्कतया—चर्वणस्याविर्भावतिरोभावाभ्यां कदाचिद्भवतया, उपचरितेन—आरोपितेन, कार्य्यत्वेन—कार्य्यरूपेण, कल्पितकार्य्यत्वेनेत्यर्थः, न तु वास्तवेनेति भावः। ["इत्थम्भूतलक्षणे" (२।३।२१ पा०) इति तृतीया] कार्य्यत्वं—कार्य्यरूपताम्, उपचर्य्यते—आरोप्यते। वस्तुतस्तु चर्वणा रसाभिन्ना एव, यदा हि रस आस्वाद्यते तदैव चर्वणानिष्पत्तिः, यदा नास्वाद्यते तदा न निष्पद्यते इति आविर्भावतिरोभावाभ्यां चर्वणारूपस्य रसस्य निष्पत्तिरिति ध्येयम्।

(भ) अवाच्यत्वादिकमिति।—तस्य—रसस्य, अवाच्यत्वादिकम्—अभिधादिव्यापारावेद्यत्वादिकं, व्यञ्जनरूपणे—व्यञ्जनायाः प्रामाण्यनिरूपणप्रस्तावे, पञ्चमपरिच्छेदे इति भावः, वक्ष्ये—कथयिष्यामि।

मिलिता रत्यादयो रसाः, तत् कथमस्य स्वप्रकाशत्वं, कथं वा अखण्डत्वम् ? इत्याह, (म)—

रत्यादिर्ज्ञानतादात्म्यादेव यस्माद्रसो भवेत्।
अतोऽस्य स्वप्रकाशत्वमखण्डत्वञ्च सिध्यति ॥६२॥(य)

यदि रत्यादिकं प्रकाशशरीरादतिरिक्तं स्यात्, तदैवास्य स्वप्रकाशत्वं न सिध्येत्; न च तथा; तादात्म्याङ्गीकारात्। यदुक्तम्;—"यद्यपि रसानन्यतया चर्वणाऽपि न कार्या, तथाऽपि क्वादाचित्कतया कार्यत्वमुपकल्प्य तदेकात्मन्यनादिवासनापरिपक्वरूपे रत्यादिभावेऽपि व्यवहारः" इति; "सुखादितादात्म्याङ्गीकारे च आत्माकीं सिद्धान्तशय्यामधिशय्य दिव्यवर्षसहस्रं प्रमोदनिद्रामुपेयाः" इति; "अभिन्नोऽपि स प्रमात्रा वासनोपनीतरत्यादितादात्म्येन गोचरीकृतः" इति च। ज्ञानस्य स्वप्रकाशत्वमनङ्गीकुर्वतामुपरि वेदान्तिभिरेव निपातनीयो दण्डः। तादात्म्यादेव अस्य अखण्डत्वम्।

रत्यादयो हि प्रथममेकैकशः प्रतीयमानाः सर्वेऽप्येकीभूताः स्फुरन्त एव रसतामापद्यन्ते। तदुक्तम्;—

(म) रसस्य स्वप्रकाशत्वमखण्डत्वं चोपपादयति, नन्वित्यादिना।—मिलिताः,—विभावादिभिः सह वर्त्तमानाः, रत्यादयः,—स्थायिभावाः, रसाः; तत्—तर्हि, स्वप्रकाशत्वं—स्वस्वरूपज्ञानविषयत्वं, रत्यादीनां तद्रूपत्वात् इति भावः। अखण्डत्वम्—एकरूपत्वम्।

(य) अस्य स्वप्रकाशत्वमखण्डत्वञ्च यत् पूर्वमुक्तं तदेवोपपादयति, रत्यादिरिति।—यस्मात् रत्यादिः ज्ञानतादात्म्यादेव—ज्ञानाभिन्नत्वादेव रसो भवेत्, ज्ञानसंवलितज्ञानरूपतां प्राप्नुयेव रत्यादि रसतामिति भावः। अतः,—यस्मादेव हेतोः, अस्य—रसस्य, स्वप्रकाशत्वं—स्वयमवभासमानस्वरूपत्वम्, अखण्डत्वं—पूर्वमुक्तञ्च सिध्यति। यत् यत् भासमानं वस्तु तत्तत् स्वप्रकाशमानस्वरूपञ्च भवतीति यस्मादपि स्वप्रकाशत्वम् अखण्डत्वञ्चेति भावः।

"विभावा अनुभावाश्च सात्त्विका व्यभिचारिणः।
प्रतीयमानाः प्रथमं खण्डशो यान्त्यखण्डताम्॥" इति। (२)

(२) तदेवोपपादयति, यदीति।—यदि रत्यादिकं—स्थायिभावः, प्रकाशशरीरात्—प्रकाशः विभावादिसंवित् स एव शरीरं स्वरूपं यस्य तस्मात् तथोक्तात्, अतिरिक्तं—भिन्नं स्यात्, तदा एव, अस्य—रसात्मनो रत्यादिकस्येत्यर्थः, स्वप्रकाशत्वम्, उपलक्षणेन अखण्डत्वञ्च, न—नैव, सिध्येत्। न च तथा—रसात्मनो रत्यादिकस्य प्रकाशशरीरादतिरिक्तत्वम् इति भावः। कुतः? इत्याह,—तादात्म्याङ्गीकारात्—विभावादिसंविदोऽभिन्नत्वाङ्गीकारादित्यर्थः। उक्तमर्थं द्रढयति, यदुक्तमिति।—यद्यपि, सिद्धान्तपक्षे इति शेषः, रसानन्यतया—रसाभिन्नतया, चर्वणा अपि—आस्वादनमपि, किं पुनः रस इति भावः, कार्य्या—कार्य्यरूपा, न—नैवास्ति, तथाऽपि कादाचित्कतया—कदाचिदनुभवनीयतया, कार्य्यत्वं—जन्यत्वम्, उपकल्प्य—लक्षणया स्वीकृत्य, तदेकात्मनि—चर्वणामात्रस्वरूपे, अत एव अनादिवासनापरिणतिरूपे—आविर्भूतज्ञानरूपे, रत्यादिभावेऽपि व्यवहारः, कार्य्यत्वस्य इति शेषः इति। ननु परिणामवादिमते रत्यादेर्ज्ञानतादात्म्यं स्वप्रकाशत्वञ्चोपपद्यतां, "स्वप्रकाशानन्दचिन्मयः" इत्यनेन रसस्यानन्दमयत्वं "चमत्कारप्राणः" इत्यनेन चमत्कारमयत्वञ्च यदुक्तं, तदसङ्गतम्; विजातीयानां चिदानन्दचमत्काराणाम् एकरूपत्वासम्भवात्। अत आह, सुखादीति।—सुखादितादात्म्याङ्गीकारे—आनन्दप्रकाशरूपत्वाङ्गीकारे सति, च आस्माकीम्—अस्मत्सम्बन्धिनीम्, आलङ्कारिकसम्प्रदायसम्बन्धिनीमित्यर्थः, सिद्धान्तरूपां—तत्त्वतो निश्चितार्थरूपां, शय्यामधिशय्य—अधिश्रित्य, आरुह्यावलम्ब्य वेत्यर्थः; दिव्यवर्षसहस्रं—[मानवानाम् एकेन वत्सरेण देवानामेकं दिनं, तथा षष्ट्युधिकत्रिशतसङ्ख्याकाब्दे एकः संवत्सरः, एवं क्रमेण दिव्यवर्षाः ज्ञातव्याः, तेषां सहस्रं] चिरकालावधीत्यर्थः, प्रमोदनिद्रां—प्रमोदेन हर्षेण, सुखेनेत्यर्थः, निद्रामुपेयाः,—प्राप्नुहि इति। अस्मत्सिद्धान्ताश्रयेण न कोऽपि वादी त्वां जेतुं शक्नोतीति स्वपक्षीयं प्रत्युक्तिरियमिति भावः। अभिन्नोऽपि, स्वस्मादिति शेषः, तथा च ज्ञानाभिन्नोऽपीत्यर्थः, सः,—रसः, प्रमात्रा—[इति भावप्रधानो निर्देशः, तेन] चर्वणारूपप्रमया इत्यर्थः, वासनया—संस्कारेण, उपनीतः,—उपस्थापितो यो रत्यादिस्तस्य तादात्म्यम्—अभेदः तेन गोचरीकृतः,—विषयीकृतः इति च। ननु ज्ञानस्य अनुव्यवसायेनैव ग्रहो भवति, तत् कथं स्वप्रकाशत्वम्? इति वदतः नैयायिकान् आक्षिपति, ज्ञानस्येत्यादिना।—वेदान्तिभिः,—वेदानामन्तः सिद्धान्तः सोऽस्ति प्रतिपाद्यत्वेन मान्यत्वेन वा

"परमार्थतस्त्वखण्ड एवायं वेदान्तप्रसिद्धब्रह्मतत्त्ववद्वेदितव्यः" इति च।

अथ के ते विभावानुभावव्यभिचारिणः? इत्यपेक्षायां विभावमाह,—

रत्याद्युद्बोधका लोके विभावाः काव्यनाट्ययोः॥६३॥(ख)

ये हि लोके रामादिगतरतिहासादीनामुद्बोधकारणानि सीतादयस्ते एव काव्ये नाट्ये च निवेशिताः सन्तः, "विभाव्यन्ते—आस्वादाङ्कुरप्रादुर्भावयोग्याः क्रियन्ते, सामाजिकरत्यादिभावा एभिः" इति विभावा उच्यन्ते। तदुक्तं भर्त्तृहरिणा,—

एषामिति तैस्तथोक्तैरित्यर्थः। ज्ञानस्य स्वप्रकाशत्वम् अनङ्गीकुर्वताम्—अस्वीकुर्वताम्, उपरि—मते, दण्डः,—दोषः, निपातनीयः,—उपन्यसनीयः; ज्ञानस्य अनुव्यवसायेन, तस्यापि ज्ञानान्तरेण ग्रहः, इत्यनवस्थारूपोऽत्र दोषः वेदितव्यः। वेदान्तमते "ज्ञानमय आत्मा स्वप्रकाशः" इति भावः। तादात्म्यादेव—ज्ञानाभिन्नत्वादेव इत्यर्थः। ननु चर्वणतोऽभिन्ने रसे लक्षणया साक्षादेव कार्य्यत्वं प्रतीयते, तत् कथं निरुक्तपरम्परया व्यवहर्त्तव्यम्? इति चेत्, उच्यते, रत्यादय इति।—रत्यादिविषयावच्छेदे इत्यर्थः। "विभावादिसंयोगाद्रत्यादिः रसः जायते" इत्यत्र रसे साक्षाद्रत्यादौ रसद्वारैव निष्पत्तिः प्रतीयते इति भावः। रत्यादय इति।—अत्रादिपदेन विभावानुभावसञ्चारिणः गृह्यन्ते। प्रथमं—रसतापत्तेः प्रागित्यर्थः, एकैकशः,—पृथक्त्वेन, प्रतीयमानाः,—बोधविषयीक्रियमाणाः, पश्चात् सर्वेऽपि—विभावादयः, एकीभूताः,—व्यञ्जनाजन्यैकज्ञानविषयत्वेन एकरूपत्वं प्राप्ताः सन्तः, स्फुरन्तः,—चिद्रूपत्वं प्राप्नुवन्तः एव, रसताम्, आपद्यन्ते—प्राप्नुवन्ति, रसरूपेण परिणमन्तीत्यर्थः। उक्तमर्थं प्रमाणेन द्रढयति, तदुक्तमिति।—विभावाः, अनुभावाः, सात्त्विकाः, व्यभिचारिणश्च, प्रथमं—रसोत्पत्तेः प्राक्, खण्डशः,—विभिन्नत्वेनेत्यर्थः, प्रतीयमानाः—बोधविषयीक्रियमाणाः सन्तः, अखण्डतां—पूर्णताम्, एकरूपत्वमित्यर्थः, यान्ति—प्राप्नुवन्ति।

(ख) अतोऽयं—रसः, अखण्डः,—पूर्णः, एकरूप इति यावत्। रत्यादीति।—लोके—तत्तल्लोकवृत्तित्वदशायां, ये रत्यादीनामुद्बोधकाः—उद्बोधकारणानि सीतादयः, काव्यनाट्ययोः, निवेशिता इति शेषः, ते विभावाः, उच्यन्ते इति शेषः।

"शब्दोपहितरूपांस्तान् बुद्धेर्विषयतां गतान्।
प्रत्यक्षानिव कंसादीन् साधनत्वेन मन्यते॥" (व) इति।

तद्भेदावाह,—

आलम्बनोद्दीपनाख्यौ तस्य भेदावुभौ स्मृतौ॥६४॥(श)

स्पष्टम्। तत्र,—

आलम्बनो नायकादिस्तमालम्ब्य रसोद्गमात्॥६५॥(ष)

(व) उक्तमर्थं द्रढयति, ये हीति।—हि—यतः, लोके—जगति, ("लोकस्तु भुवने जने" इत्यमरः)। रामादीति।—रामादिगताः,—रामादिनिष्ठा ये रतिहासादयस्तेषाम्; अत्रादिपदेन सीतादीनां ग्रहणम्; तथा च रामसीताऽऽदिनिष्ठानां रत्यादीनामिति भावः; उद्बोधकारणानि—कार्य्योन्मुखताकारणभूता इत्यर्थः। सीताऽऽदयः, अत्रादिपदेन रामादीनां ग्रहणम्। [अत एवात्र पुंलिङ्गत्वेन निर्देशो युज्यते]; तथा च रामादिनिष्ठरत्याद्युद्बोधकारणभूताः सीताऽऽदयः, सीताऽऽदिनिष्ठरत्याद्युद्बोधकारणभूता रामादयश्चेति पर्य्यवसितोऽर्थः। ते एव—रामादय एव, काव्ये नाट्ये नाटके च, निवेशिताः सन्तः; विभाव्यन्ते—विशेषेण भाविताः क्रियन्ते। आस्वादाङ्कुरप्रादुर्भावयोग्याः,—आस्वादः रसात्मनाऽवस्थानं, तस्याङ्कुरः अङ्कुरवत् स्फुरणं, तस्य प्रादुर्भावयोग्याः प्रकाशयोग्याः। सामाजिकरत्यादिभावाः,—सामाजिकाः सहृदयास्तेषां तन्निष्ठा ये रत्यादिभावाः, एभिः,—विभावादिभिरिति भावः, क्रियन्ते। इति—एवंविधया व्युत्पत्त्या व्युत्पन्नाः, विभावाः तत्पदवाच्या उच्यन्ते। उक्तमर्थं प्राचां संवादेन द्रढयति, तदिति।—तत्—तथा, उक्तं, भर्तृहरिणा—तदाख्येन आचार्य्येण। भावनाबलेनाप्रत्यक्षानपि प्रत्यक्षभूतानिवार्थान् कुरुते इत्याह, शब्दोपहितेति।—शब्दोपहितरूपान्—काव्यनाट्यप्रकाशितस्वरूपान्, बुद्धेः,—व्यञ्जनाजन्यबोधस्य, विषयतां—गोचरतां, गतान्—प्राप्तान्, तान्—प्रसिद्धानित्यर्थः; कंसादीन्, वीररसस्यालम्बनाभिप्रायेणोक्तमिदम्। प्रत्यक्षानिव—परिदृश्यमानानिव, साधनत्वेन—वीररसनिष्पादकत्वेन, मन्यते—विवेचयति, सहृदय इति शेषः।

(श) आलम्बनेति।—तस्य—विभावस्य, आलम्बनोद्दीपनाख्यौ उभौ भेदौ स्मृतौ।

(ष) आलम्बनः इति।—आलम्बनः,—तत्पदवाच्य इत्यर्थः। नायकादिः, अत्र

आदिशब्दान्नायिकाप्रतिनायिकादयः। अत्र यस्य रसस्य यो विभावः, स तत्स्वरूपवर्णने वक्ष्यते।

तत्र नायकः,—

त्यागी कृती कुलीनः सुश्रीको रूपयौवनोत्साही।
दक्षोऽनुरक्तलोकस्तेजोवैदग्ध्यशीलवान्नेता ॥६६॥(स)

दक्षः,—क्षिप्रकारी। शीलं—सद्वृत्तम्। एवमादिगुणसम्पन्नो नेता नायको भवति। तद्भेदानाह,—

धीरोदात्तो धीरोद्धतस्तथा धीरललितश्च।
धीरप्रशान्त इत्ययमुक्तः प्रथमश्चतुर्भेदः ॥६७॥ (ह)

आदिपदेन नायिकादीनां ग्रहणम्। ननु नायकादेरालम्बनपदवाच्यत्वं कथम्? इत्याह, तस्येति।—तं—नायकादिम्, आलम्ब्य—आश्रित्य, रसोद्गमात्—रसस्योद्गमः स्फुरणं भवतीति हेतोरिति भावः। उदयुक्तं भवति,—नायकादिमालम्ब्य रसोद्गमो भवति, अतः नायकादिरालम्बनपदवाच्यः, आलम्ब्यते रसोद्गमायेति तस्य व्युत्पत्तिसिद्धार्थत्वात् इति।

(स) त्यागीति।—त्यागी—दानशीलः, कृती—धीरः, कृतकार्यः इत्यर्थः; यद्वा,—कृती—विद्वान्, पुण्यात्मा वा, कुलीनः,—सत्कुलोत्पन्नः, सुश्रीकः,—सद्वस्त्रिमान्, सुश्रीभासम्पन्नो वा। रूपयौवनोत्साही—रूपं सौन्दर्यं, यौवनं तारुण्यम्, तयोरुत्साहः, कर्मण्यव्यवसायः, तद्वान् रूपादिवित्तयवान् इत्यर्थः, दक्षः,—क्षिप्रकारी, अनुरक्तलोकः,—लोकरञ्जकः। तेजोवैदग्ध्यशीलवान्—तेजः,—"अधिक्षेपापमानादेः प्रयुक्तस्य परेण यत्। प्राणात्ययेऽप्यसहनं तत्तेजः—"इत्युक्तः प्रतापः, वैदग्ध्यं निगूढाभिप्रायज्ञत्वं, शीलं सद्वृत्तं तद्वान् तद्विशिष्टः, तेजस्वी, विदग्धः, सुशीलश्चेत्यर्थः, नेता—नायकः, भवतीति शेषः।

(ह) धीरेति।—धीरोऽसावुदात्तः उदार इति धीरोदात्तः; धीरश्चासावुद्धतः प्रगल्भः, अविनीतो वा इति धीरोद्धतः; धीरश्चासौ ललितः मनोरमः, विलासपरो वेति धीरललितः; धीरश्चासौ प्रशान्तः विमुक्तरागादिस्वभाव इति धीरप्रशान्तश्चेत्यर्थं प्रथमः आलम्बनभेदात्मा विभावः, चतुर्भेदः, उक्तः,—ज्ञेयः।

तत्र धीरोदात्तः,—

अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः।
स्थेयान्निगूढमानो धीरोदात्तो दृढव्रतः कथितः॥९८॥(क)

अविकत्थनः,—अनात्मश्लाघाकरः। महासत्त्वः,—हर्षशोकाऽनभिभूतस्वभावः। निगूढमानः,—विनयच्छन्नगर्वः। दृढव्रतः,—अङ्गीकृतनिर्वाहकः; यथा रामयुधिष्ठिरादिः।

अथ धीरोद्धतः,—

मायापरः प्रचण्डश्चपलोऽहङ्कारदर्पभूयिष्ठः।
आत्मश्लाघानिरतो धीरैर्धीरोद्धतः कथितः॥९९॥(ख)

यथा भीमसेनादिः।

अथ धीरललितः,—

निश्चिन्तो मृदुरनिशं कलापरो धीरललितः स्यात्॥१००॥(ग)

कला—नृत्यादिका; यथा रत्नावल्यादौ वत्सराजादिः।

(क) अविकत्थन इति।—अविकत्थनः,—आत्मश्लाघावर्जितः, क्षमावान्—क्षमी सहनशीलः, अतिगम्भीरः,—अतिदुरवगाहस्वभावः, महत् सत्त्वं बलं यस्य सः महासत्त्वः,—महाबलः, ("सत्त्वं गुणे विशाखादौ बले द्रव्यस्वभावयोः" इति मेदिनी)। स्थेयान्—क्षमेऽपि स्थिरतरः, महासङ्कटेऽपि आर्यादविचलः इत्यर्थः, निगूढमानः,—निरभिमानः, दृढव्रतः,—आ-मृत्योदयं प्रारब्धेष्वार्योचितगौरवार्थः, धीरोदात्तो नाम नायकः, कथितः।

(ख) मायापर इति।—मायापरः,—कपटनिरतः, प्रचण्डः,—उग्रः, चपलः,—चञ्चलः, अहङ्कारः,—मनस्यभिमानः, दर्पः,—आत्मगौरवं, तद्भूयिष्ठः,—प्रायेण तद्विशिष्ट इत्यर्थः, आत्मश्लाघानिरतः,—निजगुणकीर्तनपरायणः। अन्यत् स्पष्टम्।

(ग) निश्चिन्त इति।—निश्चिन्तः,—चिन्तारहितः, मृदुः,—कोमलस्वभावः, अनिशं—निरन्तरं, पुनः पुनर्वा, कलापरः,—कलागीतादिनिरतः, धीरललितः स्यात्।

अथ धीरप्रशान्तः,—

सामान्यगुणैर्भूयान्द्विजादिको धीरशान्तः स्यात्॥७१॥(घ)

यथा मालतीमाधवादौ माधवादिः। एषाञ्च शृङ्गारिरूपत्वे भेदानाह,—

एभिर्दक्षिणधृष्टानुकूलशठरूपिभिस्तु षोड़शधा॥७२॥(ङ)

तत्र तेषां धीरोदात्तादीनां प्रत्येकं दक्षिणधृष्टानुकूलशठत्वेन षोड़शप्रकारो नायकः।

एषु त्वनेकमहिलासु समरागो दक्षिणः कथितः॥७३॥(च)

द्वयोस्त्रिचतुःप्रभृतिषु नायिकासु तुल्यानुरागो दक्षिण-नायकः। यथा,—

"स्नाता तिष्ठति कुन्तलेश्वरसुता, वारोऽङ्गराजस्वसुः
द्यूतै रात्रिरियं जिता कमलया देवी प्रसाद्याऽद्य च।
इत्यन्तःपुरसुन्दरीः प्रति मया विज्ञाय विज्ञापिते
देवेनाप्रतिपत्तिमूढ़मनसा द्वित्राः स्थितं नाड़िकाः"॥ (छ)

(घ) सामान्येति।—सामान्यगुणैः,—त्यागी कृतीत्यादिना निरुक्तैः त्यागित्व-कृतित्वादिरूपैः नायकसामान्यगुणैरित्यर्थः, भूयान्—अतिशयितः, द्विजादिकः, न तु शूद्रो म्लेच्छो वेति भावः, धीरशान्त,—धीरोदात्तादित्रितयभिन्नः नायकः धीरप्रशान्त इत्यभिप्रायः। धीरप्रशान्तस्थाने "धीरशान्तः" इति पाठस्तु छन्दोऽनुरोधात् वेदितव्यः।

(ङ) एभिरिति।—निरुक्तस्वरूपैरित्यर्थः। दक्षिणेति।—दक्षिणादिरूपिभिः धीरोदात्तादिभिः, तु पुनः, षोड़शधा षोड़शप्रकाराः स्युरित्यर्थः; तथा च,—दक्षिण-धीरोदात्तः, दक्षिणधीरोद्धतः, दक्षिणधीरललितः, दक्षिणधीरप्रशान्तः; एवं धृष्टादि-पदयोजनेन षोड़शप्रकारका नायका भवन्तीति भावः। शृङ्गारे षोड़शप्रकारको नायकः, रसान्तरे तु चतुष्प्रकारक इति ज्ञेयम्।

(च) एष्विति।—एषु—दक्षिणादिषु मध्ये, तु—पुनः, अनेकमहिलासु—अनेकासु नायिकासु विषये, समरागः,—समोऽविषमो रागोऽनुरागो यस्य तादृशः, दक्षिणः,—तत्संज्ञकः नायकः, कथितः।

(छ) स्नातेति।—अन्तःपुरचारिणः कस्याप्याप्तस्येयमुक्तिः। कुन्तलेश्वरसुता—

कृतागा अपि निःशङ्कस्तर्जितोऽपि न लज्जितः।
दृष्टदोषोऽपि मिथ्यावाक् कथितो धृष्टनायकः॥७४॥(ज)

कुलजाः जनपदविशेषाः, तेषामीश्वरः राजा, ("स्वामी लोकेश्वरः पतिरीशिता" इत्यमरः) तस्य सुता तनया, ऋतुस्नातेत्यर्थः, तिष्ठति—वर्त्तते, अतः अवश्यमस्या सेति भावः। अङ्गराजसुतः,—अङ्गस्य देशविशेषस्य राजा अङ्गराजः, ["राजाहःसखिभ्यष्टच्" (५।४।९१ पा०) इति टच्] तस्य सखा मन्त्री तस्याः, वारः,—सुरतार्थं नियमितो दिवसः। कमलया—तन्नाम्न्या जयाधिप्त राजपत्न्या, द्यूतैः,—राज्ञा सह द्यूतक्रीडनैरित्यर्थः, रमयन्—उपक्षिपता, रात्रिः निशा—पञ्चत्वेन गृहीतेति भावः। अथ देवी च—महाराज्ञी अपि,("देवी ज्ञताधिपेत्वाद्याम्" इत्यमरः) प्रसाद्या—अनुनेया, दैवेनेति शेषः, स्वयं ज्ञतापराधत्वादिति भावः। इति—इत्थम्, [अत्र एवं सम्बध्यते,—"ऋतौ भार्यामुपेयात्" इत्यादिनिगमनिर्देशैः, ऋतुस्नाता या नाऽपि धर्मंवनिता सम्मानार्हा, किं पुनः महासत्त्वनरनाथवर्य्यकुलजाधिपतेः तनया? साधारणानामपि निरूपितसमयः (नियमयन्तित इति भावः) तावत् जनवल्लभाः,किं पुनः अङ्गराजमनिनीसखादराकृतसभाव्यविचारास्पदः प्रियसङ्गसमयः; तया साधारणैः साकं सामान्यपरागयैऽपि परागितस्य विजयिवशवर्त्तित्वं, किं पुनः कमलासुतनया कमलया सार्द्धं द्यूतपर्वन विशेषपरागय इत्याशयः। इत्थं क्रमशः आर्य्यगौरवाया साद्धोर्ष्णं सम्पन्नेऽपि महानाननानलोबायाः देव्याः सुसाधनमेव तावदुपपन्नवरणीयवर्णेषु बलवत् इति सूक्ष्मपरामर्शः] मया—अन्तःपुराधिपेन, अन्तुषिणा इति भावः, अन्तःपुरसुन्दरीः ["अन्तिःपरिःसमयानिकषाहाप्रतियोगेऽपि" (वा०) इति द्वितीया] प्रति, विज्ञाय—अस्या यत् यत् वक्तव्यं तत् विदित्वा, विज्ञापिते—निवेदिते सति, दैवेन—महाराजेन, ("देवो मेघे सुरे राज्ञि आत्मपुंसज्ञनिन्द्रिये" इति मेदिनी); अप्रतिपत्तिमूढमनसा—इतिकर्त्तव्यव्याकुलचित्तेन सता, दिवाः,—ते वा तिस्रो वेति तथोक्ताः, [बहुव्रीहिसमासे "सर्वनामसङ्ख्ययोरुपसङ्ख्यानम्" (वा०) इति "सङ्ख्यायाः अल्पीयस्याः" एतद्वृत्तियोजनया द्विशब्दस्य पूर्वनिपाते सिद्धम्] नाडिकाः,—घटिकाः, व्याप्य, ["कालाध्वनोरत्यन्तसंयोगे" (२।३।५ पा०) इति द्वितीया] क्षितं, तूष्णीमिति शेषः। आर्द्धर्चविक्रीडितं वृत्तम्।

(ज) ज्ञतागा इति।—ज्ञतापराधः अपि, किं पुनरज्ञतापराध इत्यर्थः; ("आगोऽपराधे पापे स्यात्" इति मेदिनी); निःशङ्कः,—निर्भयः, तर्जितः,—निर्भर्त्सितः अपि, न लज्जितः,—न सङ्कुचितः इत्यर्थः; दृष्टदोषः,—दृष्टः दोषो यस्य

यथा मम,—

"शोणं वीक्ष्य मुखं विचुम्बितुमहं यातः समीपं, ततः
पादेन प्रहृतं तया, सपदि तं धृत्वा सहासे मयि ।
किञ्चित् तत्र विधातुमक्षमतया वाष्पं त्यजन्त्याः सखे !
ध्यातश्चेतसि कौतुकं वितनुते कोपोऽपि वामभ्रुवः ॥" (झ)

अनुकूल एकनिरतः ॥ ७५ ॥ (ञ)

एकस्यामेव नायिकायामासक्तोऽनुकूलनायकः । यथा,—

"अस्माकं सखि ! वाससी न रुचिरे, ग्रैवेयकं नोज्ज्वलं,
नो वक्रा गतिरुद्धतं न हसितं, नैवास्ति कश्चिन्मदः ।

तादृशः अपि, मिथ्यावाक्—मृषावादी, "नाहमेवं-रूपः" इति भाषणशील इत्यर्थः । अन्यत् स्पष्टम् ।

(झ) शोणमिति ।—प्रवासे सखायं प्रति कस्यचिदुक्तिरियम् । हे सखे ! अहं, कृतापराधोऽपीति शेषः, मुखं, तस्या इति शेषः, शोणं—रक्तं, मदपराधादिति भावः, वीक्ष्य, अपीति शेषः, विचुम्बितुं—तदधरामृतमास्वादितुं, समीपं, तस्या इति शेषः, यातः,—गतः, ततः,—अनन्तरं, तया—कुपितया मत्कान्तया, पादेन—चरणेन, प्रहृतं—मयि पादप्रहारो दत्त इत्यर्थः ; सपदि—तत्क्षणात्, यदैव पादप्रहारः कृतः तदैवेत्यर्थः, तं—पादं, धृत्वा—गृहीत्वा, मयि, सहासे—हसति सतीत्यर्थः, तत्र—तस्मिन् पादमोचनविषये, किञ्चित् विधातुं—कर्त्तुमक्षमतया, वाष्पम्—अश्रु, त्यजन्त्याः,—मुञ्चन्त्याः, वामभ्रुवः,—सुन्दर्य्याः, मत्प्रियाया इत्यर्थः, कोपोऽपि किं पुनरनुराग इत्यर्थः, चेतसि—मनसि, ध्यातः,—चिन्तितः सन्, कौतुकम्—आनन्दं, वितनुते—विस्तारयति, वर्द्धयतीति यावत् । अत्र प्रथमपादेन कारिकायाः प्रथमपादोक्तं, द्वितीयपादेन द्वितीयपादोक्तं लक्षणं वेदितव्यम् । शार्दूलविक्रीडितं वृत्तम् । "तस्याः सान्द्रविलेपनस्तनयुगप्रश्लेषमुद्राङ्कितं किं वक्षश्चरणानतिव्यतिकरव्याजेन गोपाय्यते । इत्युक्ते क्व तदित्युदीर्य्य सहसा तत् सम्प्रमार्ष्टुं मया साऽऽश्लिष्टा रभसेन तत्सुखवशात्तन्व्या च तद्विस्मृतम् ॥" इत्युदाहरणं पुस्तकान्तरे दृश्यते इति बोध्यम् ।

(ञ) अनुकूल इति ।—एकस्यां नायिकायां, न तु द्वयोः ततोऽधिकासु वा नायिकासु, निरतः अनुरक्तोऽनुकूलो नायकः स्यादित्यर्थः ।

किन्त्वन्येऽपि जना वदन्ति सुभगोऽप्यस्याः प्रियो नान्यतः
दृष्टिं निक्षिपतीति विश्वमियता मन्यामहे दुःस्थितम् ॥" (ट)

शठोऽयमेकत्र बद्धभावो यः।
दर्शितबहिरनुरागो विप्रियमन्यत्र गूढ़माचरति ॥७६॥(ठ)

यः पुनरेकस्यामेव नायिकायां बद्धभावो द्वयोरपि नायिकयोर्बहिर्दर्शितानुरागोऽन्यस्यां नायिकायां गूढ़ं विप्रियमाचरति स शठनायकः। यथा,—

(ट) अस्माकमिति।—सौभाग्यं व्यञ्जयन्त्याः कस्याश्चित् सखीं प्रत्युक्तिरियम्। हे सखि! अस्माकम्, [अत्र बहुवचनं स्वात्मनि प्रियप्रेमाधिक्यात्सौभाग्यातिशयव्यञ्जनार्थम्] वाससी—वसने, परिधेयमुत्तरीयञ्चेत्यर्थः; न रुचिरे—न मनोहरे, ग्रैवेयकं—ग्रीवाभूषणं, न उज्ज्वलं—रत्नजटिततया शोभाशालि नास्तीत्यर्थः, गतिः,—चलनं, नो वक्रा—वक्रभावयुक्ता, सविलासा गतिः नास्ति इति भावः, हसितं—हासः, न उद्धतम्—उत्कटं नास्ति, कश्चित् मदोऽपि—सौभाग्ययौवनादिगर्वजनितो मनोविकारोऽपि, नैव अस्ति, किन्तु—तथाऽपि, अन्ये जना अपि, किं पुनः स्वकीया इति भावः; अस्याः प्रियः, सुभगोऽपि—सुन्दरोऽपि, दृष्टश्रुतमात्रोऽन्यासामपि सुन्दरीणां मनसि रिरंसोत्पादनहेतुरिति यावत्; यद्वा,—मनोज्ञोऽपीत्यर्थः; अन्यतः,—एतस्याः दूरतः, अन्यस्यां महिलायां वा, दृष्टिं न निक्षिपति, इति एवं, मामुद्दिश्येति शेषः, वदन्ति; इयता—अनेन कथनेन, विश्वं—जगत्, दुःस्थितं—दुःखेनावस्थितम्, इति, मन्यामहे—तर्कयामः; केवलमहं प्रियवाल्लभ्येन सुखमनुभवामि, नापरा इति भावः। यद्वा,—इयता—मिथ्यावादेन, विश्वं—सर्वमपि आत्मीयपरकीयाभिजननिचयं, दुःस्थितं—दुष्टचित्तम्, इति मन्यामहे—समाकलयामि, प्रायोऽन्यसौख्यर्द्धिकातरा एव, न परस्यानन्देनानन्दानुभवितारः मानववर्गाः इति निष्कर्षः। शार्दूलविक्रीडितं वृत्तम्।

(ठ) शठेति।—यः,—नायकः, एकत्र—एकस्यां नायिकायां, बद्धभावः,—बद्धः,—गाढ़मर्पितः, भावः,—अनुरागो येन तादृशः, निभृतानुराग इत्यर्थः, अत एव अन्यत्र—अन्यस्यां नायिकायाम्; दर्शित इति।—दर्शितः,—भूषणदानादिसाम्येन प्रकटितः, बहिरनुरागः,—बाह्योऽनुरागः, सौरतातिरिक्तविषयकं प्रेम येन तादृशः सन्, गूढ़—गुप्तं, विप्रियम्,—अनिष्टम्, आचरति, सोऽयं शठस्तन्नामा नायक इति भावः।

"अठान्यस्याः काञ्चीमणिरणितमाकर्ण्य सहसा
यदाश्लिष्यत्येव प्रशिथिलभुजग्रन्थिरभवः।
तदेतत् किं चक्रे ? घृतमधुमयत्वद्वचनतो-
विषेणाघूर्णन्तौ किमपि न सखौ मे गणयति॥" (ड)

एषाञ्च त्रैविध्यादुत्तममध्याधमत्वेन।
उक्ता नायकभेदास्त्वारिंशत् तथाऽष्टौ च॥७७॥(ढ)

(ड) अठेति।—नायकं प्रत्युपालम्भं प्रेषितायाः कस्याश्चित् नायिकायाः सखीयम्। हे अठ!—धूर्त! अन्यस्याः,—नायिकायाः, काञ्चीमणिरणितं—रशनाध्वनिम्, आकर्ण्य—श्रुत्वा, आश्लिष्यन्—आलिङ्गन् एव, मत्सखीमिति शेषः, सहसा—झटिति, आलिङ्गनारम्भावसरे एवेत्यर्थः, प्रशिथिल:,—अत्यन्तं विस्रस्तः, भुजग्रन्थिः,—बाहुबन्धनं यस्य तादृशः, यत् भवान्, मत्सख्या आलिङ्गनसमये अन्यनायिकाया रशनारणितश्रवणेन तां प्रति मनसः प्रवृत्तेरालिङ्गनभङ्गं यत् त्वं ज्ञातवानसि इत्यर्थः, तदेतत्—तव अनियतरचनित्यर्थः, किं—कुत्र, कस्य पुरस्तादिति यावत्, आचक्षे ?—कथयामि ? न कुत्रापि तत्कथनयोग्य किञ्चित् स्थानं क्षमे इति भावः। घृतेति।—घृतमधुमयं—घृतमधुरूपं, (घृतमधुवदादावतो मधुरं भावनाचमपि भवतः अनिष्टकरमिति भावः; घृतमधु यथा प्रथमतः स्वादुतं, पश्चादहमदनिष्टोत्पादकं, तथा तवापि प्रथमतस्तु तावद्रमणीयं, पश्चात् मनःपीड़ाजनिष्टाचरणेन अमङ्गलोत्पादकत्वात् विषतुल्यमित्याशयः।) यत् त्वद्वचसः,—तव यद्यदाऽनुनयनार्थं वचनं, तदेव विषं तेन [घृतञ्च मधु चैत्यनयोः समाहारो घृतमधु तत्स्वरूपं यस्य तद्घृतमधुमयम्। विस्मयनित्यादिना स्वरूपार्थे मयट्] आघूर्णन्तौ—परिभ्राम्यच्छरीरा, मे सखी किमपि—हितमहितं वा, न गणयति—न अवधारयति, किं कार्यं कर्त्तव्यं किं वा न कर्त्तव्यमिति न विवेचयतीति भावः। सुरतावसरं स्वारब्धातिदम्भेन यत् त्वया घृतमधुपानदानादितं तत्प्रतिकारो झटिति विधेयः इति तात्पर्यम्। मिश्रकारिणी इत्तं,—"रसे सद्रेम्णा यमनसमता: ग: मिश्रकरिणी" इति तल्लक्षणात्।

(ढ) एषामिति।—नायकानामित्यर्थः, पीठमर्दादीनाम्, उत्तममध्याधमत्वेन—उत्तममध्यमाधमत्वेन [अत्र भावप्रत्ययस्य प्रत्येकं सम्बन्धः] हेतुना, त्रैविध्यात्—त्रित्वत्वात्, चत्वारिंशत् तथा अष्टौ च—अष्टचत्वारिंशदित्यर्थः, नायकभेदा उक्ताः,—

एषाम्—उक्तषोड़शभेदानाम्। अथ प्रसङ्गादेतेषां सहायानाह,—

दूरानुवर्त्तिनि स्यात् तस्य प्रासङ्गिकेतिवृत्ते तु।
किञ्चित्तद्गुणहीनः सहाय एवास्य पीठमर्दाख्यः॥७८॥(ण)

तस्य नायकस्य बहुव्यापिनि प्रसङ्गसङ्गते इतिवृत्तेऽनन्तरोक्तै-र्नायकसामान्यगुणैः किञ्चिदूनः पीठमर्दनामा सहायो भवति। यथा रामचन्द्रादीनां सुग्रीवादयः।

अथ शृङ्गारसहायाः,—

शृङ्गारेऽस्य सहाया विटचेटविदूषकाद्याः स्युः।
भक्तानर्मसुनिपुणाःकुपितवधूमानभञ्जनाःशुद्धाः।७९।(त)

आदिशब्दात् मालाकार-रजक-ताम्बूलिक-गान्धिकादयः।

तत्र विटः,—

सम्भोगहीनसम्पत्
विटस्तु धर्त्तः कलैकदेशज्ञः।

कथिताः। अत्र यद्यपि प्रायः द्वितीयपादस्य सर्वेषामुत्तममध्यमाधमत्वेनेति सर्वेषा-मुत्तमाधममध्यमत्वेनेति वा पाठो लभ्यते, तथाऽपि स च्छन्दोलक्षणाननुगततयोपेक्ष्यते इति बोध्यम्।

(ण) दूरेति।—दूरानुवर्त्तिनि—बहुव्यापिनि, अतिविस्तारिणि इत्यर्थः, प्रासङ्गिके—प्रसङ्गक्रमेण उत्थापिते, इतिवृत्ते—कर्त्तव्यकर्मणि, किञ्चित्तद्गुणहीनः,—प्रायेण नायकवत् गुणवान् इत्यर्थः, तस्य, अस्य—नायकस्य, पीठमर्दाख्यः,—पीठमर्दो नाम, सहायः स्यात्।

(त) शृङ्गारे इति।—अस्य—नायकस्य, भक्ताः,—अनुरक्ताः, तथा नर्मसु—परिहासोक्तिषु विषये, ("द्रवकेलिपरीहासाः क्रीड़ा लीला च नर्म च" इत्यमरः) निपुणाः,—चतुराः, अत एव कुपितानां वधूनां मानं भञ्जते इति तथोक्ताः, [नन्द्यादि-त्वात् ल्युः] अथापि शुद्धाः,—व्यभिचारादिदोषविहीनाः, विटचेटविदूषकाद्याः, अत्राद्यपदेन मालाकारादीनां ग्रहणं, शृङ्गारे सहायाः,—सहचारिणः, स्युः।

वेशोपचारकुशलो
वाग्मी मधुरोऽथ बहुमतो गोष्ठ्याम् ॥८०॥ (थ)

चेटः,—प्रसिद्ध एव।

अथ विदूषकः,—

कुसुमवसन्ताद्यभिधः कर्मवपुर्वेशभाषाद्यैः।
हास्यकरः कलहरतिर्विदूषकः स्यात्स्वकर्मज्ञः॥८१॥(द)

स्वकर्म—भोजनादि।

(थ) सम्भोगेति।—सम्भोगेन—सम्यक् भोगेन, सुखानुभवभोगेनेत्यर्थः, क्षीणाः,—नष्टाः, सम्पदः यस्य तादृशः; यद्वा,—सम्भोगे क्षीणा—उपभोगानर्हा, सम्पत्—सम्भोगोपायसाधनजातं यस्य तथोक्तः, सम्भोगसाधनाभावात् अकिञ्चित्कर इत्यर्थः, क्षीण इति केचित्। धूर्तः,—प्रतारकवटुः, अशेषदेशज्ञः,—यत्किञ्चित्स्थानिपुणः, मृत्यादिस्थानाम् एकदेशं जानाति, न तु समुदायम् इत्यर्थः। वेशोपचारकुशलः,—[वेशेषु—वेश्माजनाश्रयेषु, यः उपचारः,—व्यवहारः, तत्र कुशलः,—दक्षः; अथवा, —वेशस्य—परिच्छदस्य, उपचारे—करणे, कुशलः,—निपुण इति विग्रहान्तरम्] वेश्माजनव्यवहाराभिज्ञः, नेपथ्यरचनाचतुरो वेत्यर्थः। ("वेशो वेश्माङ्गटे गटे। नेपथ्ये च"इति मेदिनी)। वाग्मी—सुवक्ता, मधुरः—मनोरञ्जनकृत्, अथ गोष्ठ्यां—सभायां, ("गोष्ठी सभासंलापयोः स्त्रियाम्" इति मेदिनी। अङ्गारे पुनर्गोष्ठीशब्दमेवं परिष्कृतं भाव्यायनमुनिना; तथा हि,—"वेश्माश्रमे सभायां अथतमक्षोदवसिते वा समानविद्याबुद्धिशीलवित्तवयसां सह वेश्माभिः बहुकैरालापैरासनबन्धो गोष्ठी"इति। अथतमक्षोदवसितमब्दाभ्यां नागरगट्टे यथाक्रमं वेदितव्ये, कालिदासस्वदत्तकथाप्रानादिसिद्धिलाभार्थं वाराङ्गनागोमपि गोष्ठ्यामल्लमर्थः इति)। बहुमतः,—बहुजनप्रियः, विटः,—[वारवनितावरणनागरिकादीनाम् अभीऽभ्यङ्गेभ्यान् विटति सुखं लभयति इति विटः। विटप्रत्यये इत्यस्मात् के रूपसिद्धम्] अङ्गारे सदाय: अवेदिति श्रीः।

(द) अनयोरङ्गारान् विदूषकनाह, कुसुमेति।—कुसुमवसन्तादिनामा, कर्मणा, वपुषा—शरीरेण, आरीरकचेष्टाविशेषेण इत्यर्थः, वेशेन—परिच्छदेन, तथा भाषादैः,—वचनादैः, हास्यकरः,—लोकानां हासजनकः, कलहे रतिः,—चतुरोक्तिः यस्य तादृशः, स्वकर्मज्ञः,—स्वस्य निजस्य, कर्म सर्वं भोजनादिनिखिलघटनाकारिणेङ्गितोद्दीपनरूपं जानातीति तथाभूतः, विदूषकः स्यात्।

अर्थचिन्तने सहायमाह,—

मन्त्री स्यादर्थानां चिन्तायाम् ॥ ८२ ॥ (ध)

अर्थाः,—तत्प्रयोजनादयः। यत्तु अत्र सहायकथनप्रस्तावे,—"मन्त्री स्वं वोभयं वाऽपि सखा तस्यार्थचिन्तने" इति केनचित् लक्षणं कृतं, तदपि राज्ञोऽर्थचिन्तनोपायलक्षणप्रकरणे लक्षयितव्यं, न तु सहायकथनप्रकरणे नायकस्य। "अर्थचिन्तने मन्त्री सहायः" इत्युक्तेऽपि नायकस्यार्थत एव सिद्धत्वात्। (न)

यदपि उक्तं,—"मन्त्रिणा लक्षितः, शेषा मन्त्रिसहायसिद्धयः" इति, तदपि स्वलक्षणकथनेनैव लक्षितस्य धीरलक्षितस्य मन्त्रिमात्राऽऽयत्तार्थचिन्तनोपपत्तेर्गतार्थम्। न च

(ध) मन्त्रीति।—अर्थानां—कार्याणां, चिन्तायां—विचारे, कार्यचिन्तनव्यापारे इति भावः, मन्त्री सहायः स्यात्।

(न) अर्थशब्दार्थं द्योतयति, अर्था इति।—अर्थाः,—प्रयोजनानि, (ते च राज्ञां) तत्प्राप्त्यादयः। आदिपदेन दुष्टनिग्रह-साधुरक्षण-द्योतनेन-करसङ्ग्रहादीनां ग्रहणम्। तत्र तल्लक्षं तत्रं, स्वाधीनतया स्वदेयं क्रियमाणं क्रियमाणं कर्म यत्तत्प्रयोजनं तत्प्राप्त्यादयः। चिन्तापदं,—चा धातोर्भावे कर्तव्यतावोधनेत्यायः ["ट वप् बीजसन्तानेषु" "इतश्च" (३।३।१२१ पा०) इति घञ्]। ग्रन्थकृत्प्रकारमतं निराकरोति, यत्तिति।—मन्त्री—अमात्यः, स्वं वा—स्वयं वा, नायको वेत्यर्थः, उभयं—तदुभयं वा, मन्त्री आत्मा वा सहाय इत्यर्थः; तस्य—नायकस्य, अर्थचिन्तने—कार्याणां विचारणे, सखा—सहायः, स्यात्—भवेत्, इति—एवं, केनचित्—ग्रन्थकृता, यत् लक्षणं कृतं, तत्—सहायलक्षणमपि, राज्ञो नृपतेः, अर्थचिन्तनोपायलक्षणप्रकरणे—कार्यविचारोपायानुपायेषु लक्षयितव्येषु इति भावः। लक्षितव्यं, न तु—न पुनः, सहायकथनप्रकरणे, नायकसामान्यस्य इति शेषः, लक्षितव्यमिति पूर्वतोऽन्वेति। नन्वत्र को दोषः? इत्याशङ्क्याह,—नायकस्येत्यादि। एवं चेत् तदा खमित्यादिग्रन्थं निःप्रयोजनं भवेत्, तदनुपादानेऽपि तल्लाभात्। स्वयं चिन्तापदे स्वस्य सहकारित्वरूपसहायत्वानुपपत्तेः स्वमयचिन्तायां करणान्तरसहकारेति भावः। ग्रालक्षणनिरूपितलक्षिमन्द्रोऽमीषायार्थयोतकः, न तु सहायकार्थकः इत्यनवद्यम्।

अर्थचिन्तने तस्य मन्त्री सहायः, किन्तु स्वयमेव निष्पादकः; तस्यार्थचिन्तनाद्यभावात्। (प)

अथान्तःपुरसहायाः,—

तद्वदवरोधे।

वामनशण्ढकिरातम्लेच्छाऽऽभीराः शकारकुब्जाद्याः।
मदमूर्खताऽभिमानी दुष्कुलतैश्वर्य्यसंयुक्तः।
सोऽयमनूढ़ाभ्राता राज्ञः श्यालः शकार इत्युक्तः॥८३॥ (फ)

आद्यशब्दात् मूकादयः। तत्र शण्ढ-वामन-किरात-कुब्जादयः, यथा रत्नावल्याम्,—

(प) मन्त्रिणेति।—ललितः,—धीरललितः, मन्त्रिणा, आयत्तसिद्धिरिति शेषः, शेषाः,—धीरोदात्तादयः, मन्त्रिस्वायत्तसिद्धयः,—मन्त्रिषु स्वेषु च आयत्ता सिद्धिर्येषां तथाभूताः, मन्त्रिसहिताः कार्य्यं पश्यन्तीति भावः। स्वेति।—"निश्चिन्तो धीरललितः कलाऽऽसक्तः सुखी मृदुः" इति धीरललितलक्षणनिविष्टेन तस्यार्थचिन्तनाद्यभावतया मन्त्रिमात्राऽऽयत्तार्थसिद्धिः स्फुटा एव प्रतिभासते इति भावः। गतार्थं—कृतार्थं, पुनस्तस्य कथनं व्यर्थमिति भावः।

(फ) अन्तःपुरसहायानाह, तद्वदिति।—अवरोधे—अन्तःपुरे, ("शुद्धान्तश्चावरोधः" इत्यमरः) वामनादयः तद्वत् नायकस्य सहायाः बोद्धव्याः इत्याशयः। तत्र वामनाः,—खर्वाकृतिकाः, शण्ढाः,—छिन्नोपस्थाः, क्लीबा वा, किराताः,—पर्य्यन्तसञ्चारिणो वनचरविशेषाः, म्लेच्छाः,—सदाचाररहिता अस्पृश्यजातीयाः, आभीराः,—पशुपोषकाः, शकाराः,—वक्ष्यमाणलक्षणाः, कुब्जाः,—कुण्डलितत्रिकाः इति बोद्धव्यम्। अथ शकारमाह, मदेति।—मदश्च मूर्खता चाभिमानश्चेति सन्त्यस्येति तथोक्तः। तत्र मद औद्धत्यं, मूर्खताऽविवेकः, अभिमानः स्वस्मिन् वृथा सर्वक्षमत्वबुद्धिः; यद्वा,—मदमूर्खताभ्यां कृतोऽभिमानः सोऽस्यास्तीति तथोक्तः। दुष्कुलेति।—दुष्टं कुलं यस्य तस्य भावस्तत्ता दुष्कुलता, सा च ऐश्वर्य्यञ्च ताभ्यां संयुक्तः; यद्वा,—दुष्कुलतायाः ऐश्वर्य्यं तेन संयुक्तः। अनूढ़ेति।—अनूढ़ायाः,—अविवाहितायाः, रक्षितायाः उपपत्न्या इत्यर्थः, भ्राता—सोदरः। अत एव श्यालः, ("श्यालाः स्युर्भ्रातरः पत्न्याः" इत्यमरः) शकारः, इति—एवम्, उक्तः,—तन्नामाऽन्तःपुरसहायः कथितः इत्यर्थः।

"नष्टं वर्षवरैर्मनुष्यगणनाऽभावादपास्य त्रपाम्
अन्तः कञ्चुकिकञ्चुकस्य विशति त्रासादयं वामनः।
पर्य्यन्ताश्रयिभिर्निजस्य सदृशं नाम्नः किरातैः कृतं
कुब्जा नीचतयैव यान्ति शनकैरात्मेक्षणाशङ्किनः" ॥

शकारो मृच्छकटिकादिषु प्रसिद्धः। अन्येऽपि यथादर्शनं ज्ञातव्याः। (ब)

अथ दण्डसहायाः,—

दण्डेषु सुहृत्कुमाराटविकाः सामन्तसैनिकाद्याश्च ॥८४॥(भ)

दुष्टनिग्रहो दण्डः। स्पष्टम्।

(ब) कांश्चिदुदाहरति, नष्टमिति।—मन्दुराया वसन्तकस्य वानरवेशेन निर्गमे वर्णनमिदम्। मनुष्यगणनाऽभावात्—मनुष्येषु अगण्यत्वादित्यर्थः, त्रपां—लज्जाम्, अपास्य—त्यक्त्वा, वर्षवरैः,—क्लीवैः, त्रासात्—भयात्, [इदं परतोऽप्यन्वेति] नष्टं—पलायितम्, अदृश्यत्वं प्राप्तमित्यर्थः। अयं वामनः,—खर्वाकृतिः पुरुषः, कञ्चुकिनः,—वृद्धस्य अन्तःपुरद्वारपालविशेषस्य, ("सौविदल्लाः कञ्चुकिनः" इत्यमरः) यत् कञ्चुकं वारणं, वर्म इति यावत्, तस्य, अन्तः,—अभ्यन्तरे, विशति—प्रविशति; पर्य्यन्ताश्रयिभिः,—पर्य्यन्ते (दूरे) सञ्चारिभिः, किरातैः,—व्याधैः, निजस्य स्वस्य नाम्नः,—"किरं पर्य्यन्तम् अतन्ति सञ्चरन्ति इति व्युत्पत्त्यनुकूलायाः संज्ञाया इत्यर्थः, सदृशम्—उचितं कर्म, कृतं, पर्य्यन्ताश्रयणं कृतमित्यर्थः; कुब्जाः,—वातरोगेण अत्यन्तं वृद्धतया वा उन्नतपृष्ठाः, आत्मेक्षणाशङ्किनः,—आत्मनः ईक्षणं दर्शनम्, आशङ्कन्ते इति तथोक्ताः सन्तः, नीचतयैव—नतभावेनैव, शनकैः,—मन्दं मन्दं, यान्ति—गच्छन्ति। अत्र स्वभावोक्तिरलङ्कारः। शार्दूलविक्रीडितं वृत्तम्। एवम् अन्येऽपि—म्लेच्छाऽऽभीरादयः नायककार्य्यविशेषसहायाः अन्तःपुरे ज्ञेयाः इति।

(भ) दण्डेष्विति।—दण्डेषु—दुष्टनिग्रहव्यापारेषु, सुहृदः,—मित्राणि, स्वसमवयस्का राजान इति यावत्, कुमाराः,—स्ववशवर्त्तिनां राज्ञां पुत्राः, यद्वा,—सुहृदां—मित्राणां, कुमारा इत्यर्थः। सुहृत्सम्बन्धित्वेन हितप्रदर्शकत्वं, कुमारत्वेन च सोत्साहत्वं बोधितव्यम्। आटविकाः,—अटव्यां वने चरन्तीति तथोक्ताः, वनचारिण इत्यर्थः, सामन्ताः,—स्ववशवर्त्तिनो राजानः, ("सामन्तो मण्डलेश्वरः" इति विश्वः) सैनिकाद्याश्च, सहायाः भवन्तीति शेषः।

अथ धर्मसहायाः,—

ऋत्विक्पुरोधसः स्नुर्ब्रह्मविदस्तापसास्तथा धर्मे॥८५॥(घ)

ब्रह्मविदः,—वेदविदः, आत्मविदो वा। तत्र च,—

उत्तमाः पीठमर्दाद्याः ॥ ८६ ॥ (ङ)

आद्यशब्दात् मन्त्रिपुरोहितादयः।

मध्यौ विटविदूषकौ।

तथा शकारचेटाद्या अधमाः परिकीर्त्तिताः ॥८७॥(च)

आद्यशब्दात् ताम्बूलिक-गान्धिकादयः। अथ प्रसङ्गात् दूतानां विभागगर्भलक्षणमाह,—

निसृष्टार्थो मितार्थश्च तथा सन्देशहारकः।

कार्य्यप्रेष्यस्त्रिधा दूतो दूत्यश्चापि तथाविधाः॥८८॥(छ)

(घ) ऋत्विगिति।—धर्मे—धर्मकार्य्ये, ऋत्विजः,—पुरोहितविशेषाः, पुरोधसः,—पुरोहिताः, ब्रह्मविदः,—वेदार्थज्ञानिनः, ब्रह्मात्मैक्यज्ञातारो वेत्यर्थः, तथा तापसाः,—दान्तास्तपुपासनाऽऽराधितपरमेश्वराः, एते सर्वे सहायाः, स्युः,—भवेयुः। एतेन राज्ञा सदा धर्मतत्त्वज्ञैः साकं कार्य्यमकार्य्यं वा निर्णीय दक्षेषु दक्षविधाने, धर्मयु दयाप्रदर्शने मतिरत्यमिति सूचितं भवति। अत एव मनुनोक्तम्,—"शुचिना सत्यसन्धेन यथाशास्त्रानुसारिणा। प्रणेतुं शक्यते दण्डः सुसहायेन धीमता॥.....तस्मिन्नेव विदुर्लक्षणेषाद्य शासने। ब्रह्मांश्च नित्यं सेवेत विप्रान् वेदविदः शुचीन्॥" इत्यादि [७म अध्या० ३१—३८ सङ्ख्यकश्लोकादर्वाक्पर्यन्तम्]।

(ङ) उत्तमा इति।—पीठमर्दाद्याः पूर्वोक्ताः, उत्तमाः,—श्रेष्ठाः, सहाया इति शेषः।

(च) मध्याविति।—विटविदूषकौ—विटो विदूषकश्च, मध्यौ, सहायाविति शेषः; तथा—एवं, शकारचेटाद्याः—शकार-चेट-ताम्बूलिक गान्धिक-किरातादयः, अधमाः,—निकृष्टाः, सहायाः, परिकीर्त्तिताः,—कथिताः।

(छ) दूतानाह, निसृष्टार्थ इति।—कार्य्यप्रेष्यः,—कार्य्येषु प्रेष्यः नियोज्यः, दूतः, —तत्संज्ञः सहायः इत्यर्थः, त्रिधा त्रिप्रकारः, भवतीति शेषः; निसृष्टार्थः, मितार्थः,

तथा सन्देशहारकः इति। उदाहृतम्;—निसृष्टः,—अस्तः, अर्थः,—प्रयोजनं, कार्यभारो वा यस्य स निसृष्टार्थः। मितः,—परिमितः, प्रमाणविषयीभूतो वा, अर्थो यस्य तथोक्तः। सन्देशं—येन केनापि यं कंचन्यूहिश्य कार्यभारवाचिकार्थोक्तं वाक्यविशेषं, हरति—निर्दिष्टस्थलं प्रापयितुं स्वीकरोतीति तथोक्तः; इत्यन्वर्थसंज्ञका एते। अत एवैषां साधारण्या गुणाः,—नैपुण्यं, प्रागल्भ्यं, देशकालोचितावधारणत्वं, प्रथमवाक्यस्मरणत्वं, सङ्क्षेपशीलता, त्वरितप्रवृत्तिः, सदध्यवसायप्रयत्ननियोगाश्च इति वेदितव्याः। अनादृष्टुर्लिङ्गलक्षणकथाराः,—"परेङ्गितज्ञः परवाक्यार्थज्ञापि तत्त्ववित्। सदोत्पन्नमतिर्धीरो दूतः स्यात्पृथिवीपतेः॥ दूतस्तेन प्रकर्षेण स्वमाहात्म्यविचारदम्। इङ्गितज्ञं तथा दक्षं दक्षं सत्कुलसम्भवम्॥ अनुरक्तः शुचिर्दक्षः स्मृतिमान् देशकालवित्। वपुष्मान् वीतभीः वाग्मी दूतो राज्ञः प्रशस्यते॥ दूत एव समर्थो हि भिनत्त्येव हि सङ्गतान्॥" इति। अग्नेऽपि —"वाग्मी निपुणः युक्तो भाषज्ञो देशकालवित्। असाध्यमप्यथं साध्यं संसाधयेन्नरः॥" इति, "वाग्मित्वनिपुणसङ्कल्पगुणयोगात् वाग्मी, सङ्घायसंयोगेन मिश्रवान्, राजकार्यसदाचारानुवर्त्तनेन युक्तः स्वधर्मकर्मनिरतः" इति च। एवं दूतं सप्रभेदं लक्षयित्वा दूतीं लक्षयति,—दूत्य इति।—दूत्यापि तथाविधाः, निसृष्टार्थाः, मितार्थाः तथा सन्देशहारिकाः चेत्यर्थः। अत्र चकारस्त्रीऽपि अपिशब्दग्रहणात् प्रकारान्तरवत्योऽपि दूत्यः। तथा च, एताः,—निसृष्टार्था, परिमितार्था, सन्देशहारिका, स्वयंदूती, मूढदूती, भार्यादूती, मूकदूती, वातदूती इति अनेकधा भवन्ति; तत्र नायिकानायकयोः यथावन्मनोऽभिलषितनवधार्थं स्वविचारेण प्रयोजनसिद्धिमुद्भावयित्री निसृष्टार्था। प्रयोजनाभियोजनयोः एकतरयत्नमपि विधाय अवश्यिष्टं स्वयमेवोद्भावयित्री परिमितार्था। सन्देशनाथं येन केनापि यं कं प्रति आत्मनिर्देशप्रकाशनाय प्रस्तावविशेषं तल्लिखितपत्रमपि सङ्गमयित्री सन्देशहारिका। दौत्यकार्यत्वताऽपि स्वयमेव नायकाभिगमनरता स्वयंदूती। मुग्धभावात् स्त्रीत्वं नायकाङ्गसङ्गजीवां सद्य श्रवणादौ प्रकाशयित्री मूढदूती। केनापि व्याजेन स्वकार्यं विदधाना स्वभावं दूतीवारेव वा प्रकाशयति सा भार्यादूती। नायकाङ्गनां वाचां कपटभावेन सन्दोह्य निःसंशयं तद्धृदयप्रविष्टा नायकव्यापारान् सम्यक् निश्चायितुमक्षमं मूकेव प्रवर्त्तितव्यापारा वाचिका कुलाङ्गनाम् अभुक्तदोषां तथाविधां क्रियारीत्यादि प्रेषयित्री तेषां मूकचक्षाङ्गादिषु मूढसन्देशं लक्षायन्तं वा अक्षयित्री मूकदूती। प्राक्-क्रियतेतुनियन्त्रितान्यानवधार्थं श्लिष्टं पदविन्यासम् चोदासीन्येन निश्चायित्री वातदूती इति विस्तरभयादुपरम्यते।

तत्र कार्य्यप्रेष्यो दूत इति लक्षणम्। तत्र,—

उभयोर्भावमुन्नीय स्वयं वदति चोत्तरम्।
सुश्लिष्टं कुरुते कार्य्यं निसृष्टार्थस्तु स स्मृतः॥८९॥(व)

उभयोरिति—येन प्रेषितो यदन्तिके प्रेषितश्च।

मितार्थभाषी कार्य्यस्य सिद्धिकारी मितार्थकः।
यावद्भाषितसन्देशहारः सन्देशहारकः॥९०॥ (श)

अथ सात्त्विकनायकगुणाः,—

शोभा विलासो माधुर्य्यं गाम्भीर्य्यं धैर्य्यतेजसी।
ललितौदार्य्यमित्यष्टौ सत्त्वजाःपौरुषा गुणाः॥९१॥(ष)

तत्र,—

शूरता दक्षता सत्यं महोत्साहोऽनुरागिता।
नीचे घृणाऽधिके स्पर्द्धा यतः शोभेति तां विदुः॥९२॥(स)

(व) निसृष्टार्थमाह, उभयोरिति।—उभयोः भावम्—आशयम्, उन्नीय—उद्भाव्य, स्वयम् उत्तरं—सिद्धान्तं, वदति, कार्य्यञ्च सुश्लिष्टं—सुसङ्गतं, कुरुते, सः तु—पुनः, निसृष्टार्थः स्मृतः,—कथितः।

(श) मितार्थमाह, मितार्थेति।—मितं परिमितम् अर्थं भाषते इत्येवंशीलः मितार्थभाषी, अथ च कार्य्यस्य—प्रयोजनस्य, सिद्धिकारी—सम्पन्नताकर्त्ता, मितार्थकः,—मितः परिमितोऽर्थः साध्यत्वेन प्रयोजनं यस्य तथोक्तः। सन्देशहारकमाह, यावदिति।—यावद्भाषितं—प्रभुणा यावत् कथितं, सन्देशं वार्त्तामित्यर्थः, हरतीति तथाभूतः सन्देशहारकः,—तन्नामा दूतः स्मृत इत्यर्थः।

(ष) सात्त्विकनायकगुणानाह, शोभेति।—सत्त्वजाः,—सत्त्वगुणाज्जाताः, ते च,—शोभा, विलासः, माधुर्य्यं, गाम्भीर्य्यं, धैर्य्यं, तेजः, ललितम्, औदार्य्यञ्च, इति अष्टौ पौरुषाः,—नायकावलम्बिनः, गुणाः, कथिताः इति शेषः। स्तम्भस्वेदादीनां सात्त्विकत्वेऽपि ते नायिकानायकयोः साधारणाः, एते तु तावत् नायकस्यैव, न तु नायिकायाः इति विशेषोऽवगन्तव्यः।

(स) तत्र शोभामाह, शूरतेति।—शूरता—शौर्य्यं, दक्षता—क्षिप्रकारिता,

तत्रानुरागिता यथा,—

"अहमेव मतो महीपतेरिति सर्वः प्रकृतिष्वचिन्तयत्।
उदधेरिव निम्नगाशतेष्वभवन्नास्य विमानना क्वचित्॥"

एवमन्यत्रापि। (ङ)

अथ विलासः,—

धीरा दृष्टिर्गतिश्चित्रा विलासे सस्मितं वचः॥९३॥ (क)

यथा,—"दृष्टिस्तृणीकृतजगत्त्रयसत्त्वसारा
धीरोद्धता नमयतीव गतिर्धरित्रीम्।
कौमारकेऽपि गिरिवद्गुरुतां दधानः
वीरो रसः किमयमेत्युत दर्प एषः?"॥

चातुर्य्यं वा, सत्यं—यथार्थभाषणं, महोत्साहः,—कार्य्येषु उद्यमातिशयः, अनुरागिता—साधारणेऽप्यनुकूलोऽभिनिवेशः, अनुजीविप्रियता वा; नीचे—क्षुद्रे, दुर्बले वेत्यर्थः, घृणा—दया, अधिके—बलीयसि, स्पर्द्धा—जिगीषा, एते गुणाः, यतः,—यस्याः भवन्ति तां शोभा इति [अत्र लिङ्गार्थे प्रथमा] विदुः।

(ङ) अनुरागितामुदाहरति, अहमिति।—अजराजगुणवर्णनमिदम्। प्रकृतिषु—प्रजासु, मन्त्रिप्रभृतिषु वा, सर्वो जनः, अहमेव महीपतेः,—अजस्य, मतः,—सम्मत इति अचिन्तयत्। तस्य समदर्शितामाह, उदधेरिति।—उदधेः,—समुद्रस्य, निम्नगाशतेषु—नदीसमूहेषु इव, अस्य—अजस्य, क्वचित्—क्वापि जने इत्यर्थः, विमानना—तेषाम् असामर्थ्येन आत्मगर्वेण वा तिरस्कृतिः, न अभवत्; यथा हि विभिन्नदेशीयासु उत्तम-मध्यमापकृष्टासु नदीषु नदीपतेः साधारण्येन न दाक्षिण्य-प्रसङ्गविभेदः परिदृश्यते, तद्वदेव वसुधाऽधिराजस्याजस्यापि सचिवादिषु प्रजासु वा क्वचिदपि लोके अवमाननासञ्चारः नैवादृश्यत इति निष्कर्षः। सुन्दरी वृत्तम्;—"अयुजोर्यदि सौ जगौ युजोः सभरा ल्गौ यदि सुन्दरी तदा" इति तल्लक्षणात्। रघुवंशस्येदं पद्यम्। एवमन्यत्रापीति।—अन्यत्र—शूरतादौ अपि, एवमुदाहरणान्या-कलनीयानि इत्याशयः।

(क) विलासलक्षणान्याह, धीरेति।—विलासे सति दृष्टिर्धीरा—अचञ्चला, गतिः चित्रा—मनोज्ञा, वचः,—वचनं, सस्मितम्—ईषद्धास्यसहितं, भवतीति शेषः।

(ख) विलासमुदाहरति, दृष्टिरिति।—कुशस्य संग्रामभूमौ उद्धतागमनं

सङ्क्षोभेष्वप्यनुद्वेगो माधुर्य्यं परिकीर्त्तितम् ॥९४॥ (ग)

ऊह्यमुदाहरणम्। (घ)

भीशोकक्रोधहर्षाद्यैर्गाम्भीर्य्यं निर्विकारता॥९५॥(ङ)

दृष्ट्वा रामस्य सविस्मयवचनमिदम्। दृष्टिः,कुशस्येति शेषः, तृणीकृतः,—तृणवत् तुच्छीकृतः, जगत्त्रयस्य—त्रयाणां जगतां, सत्त्वं—माहात्म्यम्, उत्साह इत्यर्थः, सारः,—बलञ्च यया तादृशी, ("सत्त्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोः। आत्मत्वे व्यवसायासुचित्तेष्वस्त्री तु जन्तुषु॥" इति "सारो बले स्थिरांशे च मज्जि पुंसि जले धने" इति च मेदिनी) तथा धीरोद्धता—धीरा मन्थरा, उद्धता उद्भटा, सगर्वा चेत्यर्थः, गतिः, धरित्रीं—पृथ्वीं, नमयतीव—अधो नयतीव; एतेन गतेश्चित्रत्वं नैकरूपत्वञ्च सिद्धम्। अयं—कुशः, कौमारकेऽपि—बाल्यावस्थायामपि, गिरिवत्—पर्वत इव, गुरुतां—महत्त्वं, दधानः,—बिभ्रत्, अत एव वीरो रसः किम्? उत—अथवा, एष दर्पः,—गर्वः, वपुराश्रित्येति भावः, एति?—आगच्छति? ["एषः" इत्यत्र "एव" इति पाठान्तरम्] अत्र नायकस्य उत्साहदर्पयोरतिशयसूचनाय वीररसत्वेन दर्पत्वेन चोल्लेखः समादृतः। वसन्ततिलकं वृत्तं,—"ज्ञेयं वसन्ततिलकं तभजाः जगौ गः" इति लक्षणात्। उत्तररामचरितस्येदं पद्यम्।

(ग) माधुर्य्यमाह, सङ्क्षोभेष्विति।—सङ्क्षोभेषु—सम्यक्-क्षोभानुकूलव्यापारेषु अपि, अनुद्वेगः,—उद्वेगराहित्यं, माधुर्य्यं परिकीर्त्तितं—कथितम्।

(घ) ऊह्यमिति।—उदाहरणम् ऊह्यम्—अतः अन्यतोऽन्वेषणीयम्। यथा रामविलासे,—

"तन्निपीय कटु कर्णपदव्या खेदमाप न मनागपि रामः।
शूलपाणिरिव घोरमुदग्रं कालकूटपटलं किल पूर्वम्॥" इति।

अस्यार्थः;—पूर्वं—पूर्वस्मिन् काले, किल—ऐतिह्ये, शूलपाणिः,—शिवः, उदग्रं—दुष्परिणामम्, अन्यत्र—तीक्ष्णं, घोरं—भयङ्करम्, अन्यत्र—दुःसहं, कटु—अपेयम्, अन्यत्र—कर्कशं, तत्—वचः, कालकूटपटलमिव, रामः,—रामचन्द्रः, कर्णपदव्या—कर्णद्वारा, निपीय—यथेष्टं पीत्वा, अन्यत्र—स्पष्टं श्रुत्वा, अपीति शेषः, मनागपि—अल्पमपि, खेदं न आप—न प्राप। अत्र हि कालकूटपानसदृशदुर्वाक्यश्रवणस्य क्षोभहेतुत्वेऽपि रामस्य गम्भीरत्वेनैवावस्थानोक्तेर्माधुर्य्यम्।

(ङ) गाम्भीर्य्यमाह, भीति।—भीः,—भयं, शोकः,—स्वजनधनवियोगजं

यथा,—

"आहूतस्याभिषेकाय विसृष्टस्य वनाय च।
न मया लक्षितस्तस्य खल्वोऽप्याकारविभ्रमः॥" (च)

व्यवसायाद्चलनं धैर्य्यं विघ्ने महत्यपि॥ ९६॥

यथा,—

"श्रुताप्सरोगीतिरपि क्षणेऽस्मिन् हरः प्रसङ्ख्यानपरो बभूव।
आत्मेश्वराणां न हि जातु विघ्नाः समाधिभेदप्रभवो भवन्ति॥"(ज)

अधिक्षेपापमानादेः प्रयुक्तस्य परेण यत्।
प्राणात्ययेऽप्यसहनं तत् तेजः समुदाहृतम्॥

दुःखं, क्रोधः,—कोपः, हर्षः,—आनन्दः, इत्यादिभिर्हेतुभिरपि निर्विकारता—अविकृतत्वं, गाम्भीर्य्यम्।

(च) गाम्भीर्य्यमुदाहरति, आहूतस्येति।—अभिषेकाय—अभिषेकं कारयितुमित्यर्थः, [अत्र तुमुनोऽप्रयोगे चतुर्थी] आहूतस्य—कृताह्वानस्य, वनाय—वनं गन्तुं, विसृष्टस्य—आज्ञप्तस्य च, तस्य—रामस्य, खल्वोऽपि आकारविभ्रमः,—आकृतिवैपरीत्यं, मुखनेत्रादिषु प्रमोदवैरस्यम् इति यावत्, मया न लक्षितः,—दृष्टः। अत्र राज्यप्राप्तौ हर्षविषयत्वं, राज्याप्राप्तौ पुनः शोकविषयत्वं न रामस्यासीदिति तस्य गाम्भीर्य्यम्।

(छ) धैर्य्यं निर्वक्ति, व्यवसायादिति।—महति विघ्ने सत्यपि, व्यवसायात्—उद्योगात्, आरब्धकर्मण इत्यर्थः, अचलनम्—अप्रच्यवनम्, अपरावृत्ततेत्यर्थः, धैर्य्यम्।

(ज) उदाहरति श्रुतेति।—अस्मिन् क्षणे—वक्ष्यमाणविघ्नावसरे, हरः,—ब्रह्मा, श्रुता अप्सरसां गीतिर्येन तादृशः, अप्सरसां गीतिनाकर्णयन्नपीत्यर्थः, प्रसङ्ख्यानं—ब्रह्मतत्त्वान्वेषणं, तत्र परः,—कृतावधानः, समाधिनिष्ठ इति यावत्, बभूव; हि—यतः, विघ्नाः,—अन्तरायाः, आत्मेश्वराणां—जितेन्द्रियाणां, मनःसन्निरोधसक्षमाणामिति यावत्, जातु—कदाचिदपि, समाधिभेदे—योगभङ्गे, प्रभवः,—क्षमाः, न भवन्ति। अत्रोपेन्द्रवज्रेन्द्रवज्रयोरुपजातिः इष्टम्; "उपेन्द्रवज्रा प्रथमे लघौ सा" इति, "अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः" इति च लक्षणात्। कुमारसम्भवस्थेदं पद्यम्।

वाग्वेशयोर्मधुरता तद्वच्छृङ्गारचेष्टितं ललितम्।
दानं सप्रियभाषणमौदार्य्यं शत्रुमित्रयोः समता॥९७॥(ञ)

एषामुदाहरणानि लक्ष्माणि। (ञ)

अथ नायिका त्रिविधा स्वाऽन्या साधारणस्त्रीति।
नायकसामान्यगुणैर्भवति यथासम्भवैर्युक्ता॥९८॥(ट)

(ञ) वैशो निर्वक्ति, अथेति।—प्राचार्य्यैरपि—जीवनव्यपनेशेऽपि, धरैव—अन्येन, प्रयुक्तस्य—कृतस्य, अधिक्षेपः,—तिरस्कारः, अपलापः,—अनादरः तौ आदौ यस्य तस्य, (आदिनाऽपकारादेः ग्रहणम्) यत् अवहसनम्—अवज्ञा, तत् तेजः समुदाहृतं—कथितम्। लक्षितमाह, वाग्मिति।—वाग्वेशयोः,—वाचि वेशे च, मधुरता—मनोहरता, तद्वत्—तथा, शृङ्गारस्य—विलासादेः, चेष्टितं—पयोधरमर्दनादिरूपा चेष्टेत्यर्थः, ललितं, स्यात् इति शेषः। औदार्य्यमाह, सप्रियभाषणं—प्रियवचनसहितं, दानं, शत्रुमित्रयोः,—शत्रौ मित्रे च, समता—समदर्शित्वम्, औदार्य्यं, आदिति शेषः।

(ञ) एषामिति।—तेजोलक्षितौदार्य्यादीनामित्यर्थः, उदाहरणानि—लक्ष्याणि, लक्ष्माणि—लक्षणीयानीत्यर्थः। तानि च यथा रामविलासे।—"विस्फारस्फुरदोष्ठपल्लवमतिस्निग्धातिताम्रं मुखं, स्विन्नक्लोहितकोमलानलघुतीनाकुञ्चितभ्रूलतम्। युक्तं तस्य दुरुत्तरोत्तरयितुं तेजोभरादुद्यतं, नेत्रान्तेन निवार्य्य लक्ष्मणमसुं श्रीचे स्वयं राघवः॥" "दीप्तं तस्य रविर्ग्रहेश्वरं सस्मित्य मधुरञ्च भाषितम्। आरभारमुपलभ्य विभ्रमं दाक्षिण्यञ्च जयश्रियं सुभुवः॥" "दत्ते सद्भावचनं सप्रियवचनञ्च भूपालः। रिपुरपि समरे मानं निरीतिभावं परो लभते॥" इत्येतानि। [अक्षरार्थः,—विस्फारम्—चलनं, स्फुरत्—सञ्चलत्, ओष्ठपल्लवं यस्य तथाविधं लक्ष्मणनिरीक्षणाशयः, तस्य—भार्गवस्य, दुरुत्तरोत्तरयितुं—दुर्वाक्योत्तरप्रदानाय उद्यतम् इति भावः; नेत्रान्तेन—नेत्रप्रान्तसङ्कोचरूपेङ्गितेन इत्यर्थः, निवार्य्य—निषिध्य, असुं—भार्गवं, राघवः स्वयमुवाचेत्यर्थसङ्गतिः। अन्यत् स्पष्टम्]।

(ट) इदानीं नायिकाः निरूपयति, अथेत्यादि।—स्वा—स्वकीया, अन्या—परकीया, साधारणस्त्री—वर्णोपभोग्या, गणिका इति यावत्, इति त्रिविधा—त्रिप्रकारा, नायिका नायकस्यानायकस्य वा सामान्यैः; यथासम्भवैः युक्ता भवति, न नायकीयैरसा-

नायिका पुनर्नायकसामान्यगुणैस्त्यागादिभिर्यथासम्भवैर्युक्ता भवति ; सा च स्वस्त्री, अन्यस्त्री, साधारणस्त्रीति त्रिविधा।

तत्र स्वस्त्री,—

विनयार्जवादियुक्ता गृहकर्मपरा पतिव्रता स्वीया॥९९॥(ठ)

यथा,—"लज्जापज्जत्तपसाहणाइं परभत्तिणिप्पिवासाइं
अविणअदुम्मेधाइं धण्णाणं घरे कलत्ताइं॥" (ड)

साऽपि कथिता त्रिविधा मुग्धा मध्या प्रगल्भेति॥१००॥

तत्र,—

प्रथमावतीर्णयौवनमदनविकारा रतौ वामा।
कथिता मृदुश्च माने समधिकलज्जावती मुग्धा॥१०१॥(ढ)

गुणैरिति भावः। एतेन दक्षतोत्साहतेजांसि न हि नायिकानां वर्णनीयानि, इत्याशयेनैव दक्षतादयः सात्त्विकाः गुणवर्गाः नायकस्यैव प्राक् व्याख्याता इति बोध्यम्।

(ठ) विनयेति।—विनयः,—शिष्टाचारः, आर्जवं—निष्कपटतयाऽवस्थानम्, इत्येवमादिभिर्युक्ता, आदिपदेन शौचादीनां ग्रहणम्। गृहकर्मपरा—गार्हस्थ्यविधानरता, पतिव्रता—पत्यनुरागिणी, स्वीया भवति।

(ड) उदाहरति, लज्जेति।—["लज्जापर्य्याप्तप्रसाधनानि परभर्तृनिष्पिपासानि। अविनयदुर्मेधानि धन्यानां गृहे कलत्राणि॥"] इति संस्कृतम्। अस्यार्थः ;—धन्यानां—पुण्यवतां जनानां, गृहे, कलत्राणि—स्त्रियः, एतादृशानि भवन्ति ; यथा—लज्जायै पर्य्याप्तानि—समर्थानि, प्रसाधनानि—अलङ्काराः येषां तादृशानि, परभर्तृषु—परपुरुषेषु इत्यर्थः, निष्पिपासानि—तृष्णारहितानि, निरभिलाषाणीत्यर्थः, तथा अविनये—अशिष्टव्यवहारे, दुर्मेधानि—मेधारहितानि, अविनयानभिज्ञानि इत्यर्थः, अप्रमत्तानीति यावत्।

(ढ) मुग्धां निर्वक्ति, प्रथमेति।—प्रथमम् अवतीर्णः,—उद्गतः, यौवनस्य मदनस्य च विकारो यस्याः ; यद्वा,—प्रथमावतीर्णौ—नवोत्पन्नौ, यौवनमदनविकारौ—तारुण्यमन्मथविलासौ यस्याः तथोक्ता, रतौ—सुरतव्यापारे, वामा—प्रतिकूला, [तत्ता च "सकम्पा चुम्बने वक्त्रं हरत्येषोपगूहिता। परावृत्य चिरं तल्पे आस्ते रन्तुञ्च वाञ्छति॥" इत्याप्तलक्षणा], माने—भर्त्तारं प्रति कोपे, मृदुः,—क्षणादेव प्रसाद-

तत्र प्रथमावतीर्णयौवना यथा मम तातपादानाम्,—

"मध्यस्य प्रथिमानमेति जघनं, वक्षोजयोर्मन्दता
दूरं यात्युदरच्छ, रोमलतिका नेत्राजवं धावति।
कन्दर्पः परिवीक्ष्य नूतनमनोराज्याभिषिक्तं क्षणात्
अङ्गानीव परस्परं विदधते निर्लुण्ठनं सुभ्रुवः॥" (घ)

तत्र प्रथमावतीर्णमदनविकारा यथा मम प्रभावतीपरिणये,—

"दत्ते सालसमन्थरं भुवि पदं, निर्याति मान्तःपुरात्
नोहामं हसति, क्षणात् कलयति क्रीयज्जघां कामपि।

प्रवटनश्रोणीत्यर्थः,—[तथाच "अन्धा निर्वेदमापेऽपि यदि कुप्यति सा प्रिये। रीढि-व्यक्षायतः खल्वमनुनीता च तुष्यति॥" इत्युक्तदिशा सिद्धम्] तथा खनविच-लज्जावती—अतिलज्जाशीला इत्यर्थः, मुग्धा कथिता।

(घ) प्रथमावतीर्णयौवनामुदाहरति, मध्यस्येति।—कन्दर्पः—कामदेवमित्यर्थः, ("कन्दर्पो दर्पकोऽनङ्गः काम:" इत्यमरः) नूतनं यन्मनोराज्य—मनसो मनोमात्रस्य प्रदेशस्य राज्यं, तत्राभिषिक्तं तथाभूतमित्यर्थः, मनोराज्यं प्राप्तुं यत्नोऽभिषिक्त-मिति भावः; अथवा,—नूतनं यथा स्यात् तथा मनोराज्ये मनःस्वरूपे प्राक्तनीयप्रदेशे, अभिषिक्तम् अभिषेकमापन्नं, परिवीक्ष्य—दृष्ट्वा, क्षणात्—अचिरादेव, सुभ्रुवः,—सुभ्रूभ्रूमाश्रित्याः स्त्रीत्याः, अङ्गानि (कर्तृपदमिदम्) परस्परम्—अन्योऽन्यं,निर्लुण्ठनं —बलादपहरणं, विदधते—कुर्वन्ति इव; तथा हि, जघनं (कर्तृ०) मध्यस्य—मध्य-देशस्य, कटिदेशस्येत्यर्थः, प्रथिमानं—पृथुत्वं,विस्तारत्वमित्यर्थः, एति—प्राप्नोति, अधि-करोतीति यावत्, मध्यदेशे या विस्तारता आसीत्, सा जघनेन लुण्ठिता, जघनस्य या क्षीणता आसीत्, सा मध्यदेशेनेति भावः। वक्षोजयोः,—स्तनयोः, ("वक्षोजः स्तनः कुचः पयोधरः" इति कोषः) मन्दता—क्षीणता, दूरम्—अत्यर्थं यथा स्यात् तथा, उदरं—कुक्षिं, याति—प्राप्नोति, उदरे या स्थूलताऽऽसीत् सा स्तनाभ्यां लुण्ठिता, अतः ताभ्यां त्यक्ता या क्षीणता सा उदरेण गृहीतेति निष्कृष्टम्; तथा रोमलतिका —रोमावली, नेत्रयोः आजवं—सारल्यं, (गृहीतुं) धावति—प्राप्तोतीत्यर्थः, अतः नेत्रयोः या सरलताऽऽसीत् सा रोमावल्या लुण्ठिता; रोमावल्या या कुटिलताऽऽसीत् सा इदानीं नेत्राभ्यामित्यर्थः, सरला रोमावली जाता, नेत्रे च कुटिले इति निष्कर्षः। राज्ञः प्रथमाभिषेकसमये सानन्दाः लोकादनिव प्रजाः परस्परं लुण्ठन्तीति प्रसिद्धिः। आर्दूभविलोकितं इत्यम्।

निक्षिप्तावगभीरवक्रिमभवस्तृष्टं मनाक् भाषते
सभ्रूभङ्गमुदीक्षते प्रियकथामुल्लापयन्तीं सखीम्॥" (त)

तथा वामा यथा,—

"दृष्टा दृष्टिमधो ददाति, कुरुते नाख्यापमाभाषिता,
शय्यायां परिवृत्य तिष्ठति, बलादाश्लिष्टा वेपते।
निर्यान्तीषु सखीषु वासभवनाद्विगन्तुमेवेच्छते,
ज्ञाता वामतयैव सम्प्रति मम प्रीत्यै नवोढ़ा प्रिया॥" (थ)

(त) प्रभावतीपर्णमदनविचारानुदाहरति, दत्ते इति।—स्वाक्षसमत्वरं—स्वाक्षं मन्थरं—मन्दम् इति यथा तथा, सुचि पदं दत्ते—निक्षिपति, अन्तःपुरात् न निर्याति—निर्गच्छति, उद्दामम्—उत्कटं यथा तथा, न उक्षति, यथात्—यथमाक्षेप ज्ञानपि—अनिवर्त्तनीयां, क्रीयमाणां—लज्जाजनितां वेदनां, लज्जापारवश्यनिमित्तामित्यर्थः, आक्षयते—व्यनक्ति, किञ्चित्—दूरम्, अन्यमित्यर्थः, भावेन—आशयेन, निगूढाभिप्रायेणेति यावत्, गभीरः,—दुरवगाहः, यः वक्रिमभवः,—कौटिल्यभावसेतः, तेन स्पृष्टं यथा तथा, मनाक्—अल्पं, भाषते—कथयति, तथा प्रियकथाम्—पत्युः, यथाम् उल्लापयन्तीम्—उद्घोषयन्तीं, सादरं कथयन्तीमित्यर्थः, सखीं सभ्रूभङ्गम् उदीक्षते—निरीक्षते। कर्तृपदं प्रभावतीत्यूहनीयम्। आर्द्धविक्रीडितं वृत्तम्।

(थ) रतिज्ञानमुदाहरति, दृष्टेति।—नवोढ़ा—अभिनवविवाहिता, प्रिया दृष्टा—निरीक्षिता सती, मयेति शेषः, अधः,—भौमैः, दृष्टिं—नेत्रवृत्तिं, ददाति—विधत्ते, अधोमुखी भवतीत्यर्थः; आभाषिता—आत्मपने कृतप्रयत्नेति भावः, मयेति शेषः, आलापं न कुरुते—उत्तरं न ददातीत्यर्थः; शय्यायां—शयनीयोपरि, परिवृत्य—विमुखीभूय, तिष्ठति—वर्त्तते; बलात्—बलमाश्रित्य, [ल्यबर्थे पञ्चमी] आश्लिष्टा—आश्लिष्टा सती, वेपते—कम्पते; सखीषु—स्वसदृशरीषु, वासभवनात्—शयनीयदेशात्, निर्यान्तीषु—निर्गच्छन्तीषु सतीषु, निर्गन्तुं—बहिर्गन्तुमेव, दूरमेव—ईहते; अतः सम्प्रति—नवसङ्गमे, वामतयैव—प्रतिकूलतयैव, मम प्रीत्यै—आनन्दाय, ज्ञाता। नवपरिचिता हि नायिका मुग्धा भवन्ति, तासाञ्च लज्जाऽधिक्यं प्रकाशमुखतयाऽतिसरां श्रीणते, अन्यथा प्रकृतिप्रतिकूलतया स्वरूपतश्चावगमेन ज्ञातं, किं पुनः क्रीणाचर्चेति भावः। आर्द्धविक्रीडितं वृत्तम्।

माने मृदुर्यथा,—

"सा पत्युः प्रथमापराधसमये सख्योपदेशं विना
नो जानाति सविभ्रमाङ्गवलनावक्रोक्तिसंसूचनम्।
स्वच्छैरच्छकपोलमूलगलितैः पर्य्यस्तनेत्रोत्पला
बाला केवलमेव रोदिति लुठल्लोलालकैरश्रुभिः॥" (द)

समधिकलज्जावती यथा,—"दत्ते सालसमन्थरम्" इत्यत्र श्लोके। अत्र समधिकलज्जावतीत्वेनापि लब्धाया रतिवामताया विच्छित्तिविशेषवत्तया (ध) पुनः कथनम्।

अथ मध्या,—

मध्या विचित्रसुरता प्ररूढ़स्मरयौवना।
ईषत्प्रगल्भवचना मध्यमव्रीड़िता मता॥ १०२॥

(द) माने मृदुमाह, सेति।—अमरुशतकस्येदं पद्यम्। सा बाला, पत्युः प्रथमापराधसमये (अपराधोऽन्यनायिकासङ्गमस्वरूपः) सखीषु साधुरिति सख्यं—["तत्र साधुः" (४।४।९८ पा०) इति यत्] सखीजनोचितं प्रेम तेन, (सख्येन) य उपदेशस्तं तथोक्तं विना, सविभ्रमेति।—सविभ्रमं—सस्मरविकारं यथा तथा, याऽङ्गवलना—अङ्गानां कम्पनं, नेत्रभ्रूगण्डादीनां स्वमतसंसूचनाय परिचालनं, विचित्रस्पन्दनादिभिः किञ्चित् तिर्य्यक्करणमित्याशयः, तया सविभ्रमाङ्गवलनया सह, वक्रोक्तिसंसूचनं—वक्रोक्तिभ्यः संसूचनं, संवलितेऽर्थरहस्यमिति यावत्, तत् तथोक्तं, नो—नैव, जानाति, केवलं स्वच्छैः,—अतिनिर्मलैः, अच्छेति।—अच्छयोः,—निर्मलयोः, कपोलयोः,—गण्डयोर्मूलात् गलितैः ("स्वच्छैरच्छकपोलमूलगलितैः" इत्यनेन पत्रावलीविन्यासाञ्जनाद्यभावात् नेत्राम्बुगण्डयोः निर्मलता पर्य्यवसिता स्यात्); लुठदिति।—लुठन्तः,—इतस्ततश्चलन्तः, लोलाः,—चञ्चलाः, अलकाः,—चूर्णकुन्तलाः येषु तादृशैः, अश्रुभिः,—बाष्पैः, पर्य्यस्ते—पूर्णे, नेत्रोत्पले यस्यास्तथाभूता सती, [एतेन अजस्रातिक्रन्दनं नायिकायाः सूचितम्] रोदित्येव। शार्दूलविक्रीड़ितं वृत्तम्।

(ध) विच्छित्तिविशेषवत्तया—वैचित्र्यविशेषसम्पादकत्वेनेत्यर्थः।

तत्र विचित्रसुरता यथा,—

"कान्ते तथा कथमपि प्रथितं मृगाक्ष्या
चातुर्य्यमुद्धतमनोभवया रतेषु।
तत्कूजितान्यनुवदद्भिरनेकवारं
शिष्यायितं गृहकपोतशतैर्यथाऽस्याः" ॥ (प)

प्ररूढ़स्मरा यथाऽत्रैव उदाहरणे। प्ररूढयौवना यथा मम,—

"नेत्रे खञ्जनगञ्जने, सरसिजप्रत्यर्थि पाणिद्वयं,
वक्षोजौ करिकुम्भविभ्रमकरीमत्युन्नतिं गच्छतः।
कान्तिः काञ्चनचम्पकप्रतिनिधिर्वाणी सुधास्पर्द्धिनी,
स्मेरेन्दीवरदामसोदरवपुस्तस्याः कटाक्षच्छटा" ॥ (फ)

(न) प्रसङ्गप्राप्तां मध्यां नायिकां वर्णयति, मध्येति।—विचित्रं—नैपुण्यरम्यं, सुरतं यस्याः सा, प्ररूढ़े—अत्यर्थमुत्पन्ने, स्मरयौवने—कन्दर्पतारुण्ये यस्याः तथाविधा, ईषत्—किञ्चित्, प्रगल्भं—धार्ष्ट्ययुक्तं, वचनं यस्याः सा, मध्यमं व्रीडितं—लज्जा यस्याः तथाविधा, अल्पलज्जाऽन्विता इत्याशयः, मध्या—मध्यमावस्था, नायिका मता, अत एव पुस्तकान्तरे,—"मध्याप्तयौवनानङ्गा मोहान्तः सुरतक्षमा" इति पाठः परिदृश्यते।

(प) विचित्रसुरतामुदाहरति, कान्ते इति।—उद्धतेति।—उद्धतः,—उत्कटः, मनोभवः,—कामः यस्याः तथाभूतया, मृगाक्ष्या—हरिणलोचनया, रतेषु—सुरतक्रीड़ासु, कान्ते—पत्यौ विषये; अथवा,—कान्ते! इति सम्बोधनपदम्। [एतेन कस्याश्चित् कां प्रति प्रमदाजनोचितं वयस्यासौरतवर्णनमिति सूचितम्] तथा—तेन प्रकारेण, कथमपि—समुन्नतेन व्यवसायेन, चातुर्य्यं—सुरतरणपाण्डित्यं, प्रथितं—प्रकटीकृतम्, अनन्तानङ्गभङ्गिभाववैचित्र्येण प्रदर्शितमिति यावत्, यथा अनेकवारम्—असकृत्, तत्कूजितानि—तस्याः कूजितानि—अव्यक्तशब्दविशेषास्तानि, अनुवदद्भिः,—सुरतकूजनाव्यवहितानन्तरं तथैवानुकुर्वद्भिः इत्याशयः, गृहकपोतशतैः,—गृहस्थितैः अनेकैः कपोतैः, अस्याः,—विचित्रसुरतप्रवीणायाः नायिकाया इत्यर्थः, शिष्यायितं—शिष्यवत् आचरितम्। गृहकपोताः पुनः पुनः सुरतकूजनानि श्रुत्वा तथैव पुनः पुनः शिष्यवत् आवर्त्तयन्ति स्मेति भावः। वसन्ततिलकं वृत्तम्।

(फ) प्ररूढ़यौवनामुदाहरति, नेत्रे इति।—तस्याः,—कामिन्याः, नेत्रे—नयने,

एवमन्यत्रापि। (व)

अथ प्रथमा,—

स्मरान्धा गाढतारुण्या समस्तरतकोविदा।
भावोन्नता दरव्रीड़ा प्रगल्भाऽऽक्रान्तनायका॥१२१॥ (श)

खञ्जनगञ्जने—खञ्जनयोः खञ्जनेत्रयोरित्यर्थः, गञ्जने तिरस्कारकारिणी; पाविदर्थं—मृगयुगलं, तरक्षिणयोः,—हरिणयोः, प्रत्यर्धि—सौन्दर्येण तिरस्कारितया प्रभूतमिति यावत्, ("अभिघाति-पराराति-प्रत्यर्धि-परिपन्थिनः" इत्यमरः) अनयोरपेक्षयाऽपि अतिसुन्दरमिति भावः; वधूनौ—स्त्रीः, हरिणयोः विभ्रमधरीं—विभ्रिष्टभ्रम-कारिणीम्, अत्यद्भुतं गच्छतः,—अतीव प्राप्नुतः, क्रान्तिः,—सौन्दर्यं, उपमिति यावत्, आक्रान्तसम्भ्रमा—कृतसम्भ्रमनामपुष्पविशेषा, प्रतिनिधिः,—प्रतिरूपभूता, वाणी—वचनं, सुधास्यन्दिनी—अमृतस्रविणी, ["सुधास्यन्दिनी" इति पाठान्तरे तु—सुधाधारा-वतीत्यर्थः] छटाच्छटा—बहुदृष्टिपातपरम्परा, क्षेपाणि—विक्षिप्तानि, यानि इन्दीवराणि—नीलकमलानि, तेषां (तत्कृतं) दाम—रज्जुः माला वा, तस्य सोदरं—सदृशतया सहोदरभ्रातृवत् प्रतीयमानं, वपुः,—स्वरूपं यस्याः साहशी ("इन्दीवरन्तु नीलेऽब्जिन्" इत्यमरः)। आर्द्रचर्विकीर्तितं हृतम्।

(व) एवमिति।—एवं—स्वरूपानुसारेण, अन्यत्र—अन्यस्मिन् स्थाने, किञ्चित्-प्रगल्भवचनामध्यमत्रीड़ितयोदाहरणं स्वयमूह्यम्। किञ्चित्प्रगल्भवचना यथा,—"सुभग! कुरवकस्तं किं मयाऽऽलिङ्गितोऽत्र? किमु मुखमदिरेक्षः केसरो नोदितस्ते। त्वयि नियतमशोके युज्यते पादघातः, प्रियमिति परिहासात् पेशलं व्याहरन्त्यै॥" मध्यम-त्रीड़िता यथा,—"किञ्चिदाकुञ्चितास्यं मन्दहासातिसुन्दरम्। दरमुद्रितनेत्रान्ता पुष्पतीव स्थितस्त्रिणी॥" इति। [पुस्तकान्तरे तु—"अत्र यौवनवती मध्या यथा,—"आलापान् भूविलासैर्विरचयति रसद्दाडुचिक्षेपपातं, नीवीबन्धं प्रविश्य प्रतनयति मनाक्सम्भ्रमिन्यो स्तिलक्ष्यः। सत्पुष्पोत्पात्रमूर्च्छत्कुचगिरिखरसूरी नूतनन्तः करेण, सृष्टा कीदृक्करोष्मा हरिणदृशमहो दह्यते यौवनश्रीः॥ एवं मध्याभावादिकमूह्यम्" इति पाठः]।

(श) प्रगल्भां लक्षयति, अरान्धेति।—अरान्धा—मदनोद्रेकेण विगतदृष्टिः, प्रहृष्टतामेव हिताहितज्ञानशून्येत्यर्थः, गाढतारुण्या—अत्यद्भुतयौवना, समस्तरतकोविदा—सर्वविधसुरतव्यापारपण्डिता, भावोन्नता—भावैः,—सात्त्विकभावैः, उन्नता—सौन्दर्योत्कर्षवतीत्याशयः, दरव्रीड़ा—अल्पलज्जाशीला। यथा सप्तसु।

'अरान्धा यथा,—

"धन्याऽसि, या कथयसि प्रियसङ्गमेऽपि
विस्रब्धचाटुकशतानि रतान्तरेषु।
नीवीं प्रति प्रणिहिते तु करे प्रियेण
सख्यः! अपामि, यदि किञ्चिदपि स्मरामि" ॥ (म)

गाढतारुण्या यथा,—

"अत्युन्नतस्तनभरो नयने सुदीर्घे,
वक्त्रे भ्रुवावतितरां वचनं ततोऽपि।

(म) अरान्धामुदाहरति, धन्येति।—सखीनां मध्ये सुरतव्यतिरिक्तव्यवहिर्वार्ताव्यापारिणीं काञ्चिदुपहसन्त्याः कस्याश्चिदुक्तिरियम्। या त्वं, प्रियसङ्गमे—प्रियेण सङ्गमेन सह मिलनकालेऽपि, रतान्तरेषु—सुरतव्यापारमध्येषु अपि, विस्रब्धचाटुकशतानि—विस्रब्धप्रियवाक्यसमूहान्, कथयसि, सा त्वं, धन्या—प्रशस्या, असि। अत्र आपाततः प्राथनावचनमात्रमेव तदानीमानन्दपरोधितरङ्गपूरामृतह्रदतया न तथा इन्द्रियान्तरस्फुरणं सम्पद्यते, येन तथाविधं वक्तुं शक्नुयात्, तथापि न चाधन्यासि, अपि तु लभ्यसुरते, तदा तस्य अरक्षणस्यार्थः, किं पुनः कथनम्? इत्यसाधारणमेव तव वाग्रचनाऽवहित्तलमिति त्वमेका सुकृतिनी इत्याशयः प्रतिभासते। हे सख्यः! प्रियेण नीवीं—नाभितलवसनग्रन्थिम्, प्रति करे प्रणिहिते—प्रेरणारम्भीकृते, नीवीग्रन्थिमोचनार्थं करप्रेरणाभिलाषे कृते सति इत्यर्थः। [अत्र आदिकर्मणि निष्ठाप्रत्ययः, अन्यथा अनभिप्रेताधापत्त्या अभिप्रायगौरवव्याघातस्य स्यात्] तु किन्तु, यदि किञ्चिदपि स्मरामि, तदा अपामि—अपथं करोमि ["अत्र परस्मैपदमिष्टम्" इति तर्कवागीशाः] न किमपि स्मराभीत्यर्थः। नीवीतोमानयोः सम्भ्रमे कथ्यते, यदि तत्समये किञ्चिदपि स्मरामि, अतः तथाविधे समये क्व मम तथाविधेन्द्रियप्रपटुत्वम्? इति भावः। [अत्र यद्यपि "अप उपाकर्मणि" (पा०) इति आत्मनेपदप्राप्तिरस्ति, तथा सत्यपि अपथप्रकाशनादात्मोत्प्रेक्षाविषयता न तत्प्राप्तिः इति नागेशः]। अमात्युपनीतं पद्यं यथा,—"धन्यासि सखि! योषितः प्रियतमे सर्वाङ्गसर्वेऽपि या, प्राणेभ्यं प्रथयन्ति भोजनविधावाख्यन्न धैर्यं सहत्। अस्माकन्तु तदीयपाणिकमले-ष्वन्नोपचर्यांसुखं, क्रीडार्थं वा वचनम् किं तु सुरतं नैव व्यतिर्षिते॥" इति। वक्तव्यविषयं वचनम्।

मध्योऽधिकं तनुरनूनगुरुर्नितम्बो
मन्दा गतिः किमपि चाद्भुतयौवनायाः" ॥ (य)

समस्तरतकोविदा यथा,—

"क्वचित्ताम्बूलाक्तः क्वचिदगुरुपङ्काङ्कमलिनः
क्वचिच्चूर्णोद्गारी क्वचिदपि च सालक्तकपदः ।
वलीभङ्गाभोगैरलकपतितैः शीर्णकुसुमैः
स्त्रियाः सर्वावस्थं कथयति रतं प्रच्छदपटः" ॥ (र)

(य) गाढ़तारुण्यामुदाहरति, अत्युन्नतस्तनमिति ।—अद्भुतयौवनायाः,—उद्दामयौवनायाः कामिन्याः, उरः,—वक्षःस्थलम, अत्युन्नतौ स्तनौ यत्र तादृशं, नयने—नेत्रे, सुदीर्घे—अतिविशाले, भ्रुवौ वक्रे—कुटिले, वचनं ततोऽपि—भ्रूभ्यामपि, अतितराम—अत्यर्थं, वक्रमित्यर्थः, मध्यः,—कटिदेशः, अधिकं तनुः,—क्षीणः, नितम्बः अनूनगुरुः,—अतिविशालः, किमपि—किमप्यनिर्वचनीयं यथा स्यात् तथा, मन्दा—मत्तगजेन्द्रगतिसदृशीति यावत्, गतिः,—गमनम् [एतेनास्याः अतिमन्थरगमनस्य निरूपणमनुकरणं चाप्यशक्यमिति सूच्यते]। वसन्ततिलकं वृत्तम् ।

(र) शय्यास्तरणवर्णनेन नायिकाया विविधरतिज्ञानं सूचयन्नुदाहरति, क्वचिदिति ।—प्रच्छदपटः,—शय्याऽऽस्तरणवसनमित्यर्थः, क्वचित्—कस्मिंश्चिद्भागे, ताम्बूलाक्तः,—अधरताम्बूलरागरञ्जितः इत्यर्थः, [एतेन अधोमुखायाः ऊर्द्ध्वोत्तोलितनितम्बायाः मार्जाररतिः दर्शिता] क्वचित्—तदपरस्मिन् कस्मिंश्चिद्देशे, अगुरुणः,—स्तनद्वयोपरि लिप्तस्य चन्दनविशेषस्य, कालागुरुणः इत्यर्थः, पङ्कः तस्याङ्काः,—चिह्नानि, तैर्मलिनः,—कलुषितः, [एतेन अधोमुखायाः समभावेन स्थितायाः नायिकायाः धेनुकरतिः सूचिता] क्वचित्—ततो भिन्ने कस्मिंश्चित् तदीये स्थले, चूर्णानि—स्वभावरतेषु नायकमुखावलोकनादिजनितलज्जापनोदनार्थं दीपनिर्वापणार्थोत्क्षिप्तानि सुगन्धद्रव्याण्युद्गिरति उद्वमतीति यावत् चूर्णोद्गारी [एतेन स्वाभाविकरतिः सूचिता] क्वचित्—ततोऽपि भिन्नेऽंशे, सालक्तकानि—अलक्तकरागरञ्जितानि, पदानि—चरणानि, उपचारात् तन्न्यासजन्यानि चिह्नानि यत्र स सालक्तकपदः, [एतेन सङ्कुचितचरणयुगलायाः उत्तानस्थितायाः रतिविशेषः सूचितः] वलीभिः,—त्रिवलीभिः, कृता ये भङ्गाः,—निम्नोन्नतानि, तेषामाभोगाः,—परिपूर्णताः तैः वलीभङ्गाभोगैः अनेनापि अधोमुखसमभावस्थितायाः शय्यास्तरणे उदरस्थत्रिवलीचिह्नसम्भवात्

भावोन्नता यथा,—

"मधुरवचनैः सभ्रूभङ्गैः कृताकुलितर्जनैः
अलसवलितैरङ्गन्यासैर्मदोल्लसबन्धुभिः।
असकृदसकृत्स्कारस्कारैरपाङ्गविलोकितैः
त्रिभुवनजये सा पञ्चेषोः करोति सहायताम्" ॥

लज्जान्वीड़ा यथा,—"धन्याऽसि या कथयसि" इत्यत्रैव।

आक्रान्तनायका यथा,—

"स्वामिन्! भङ्गुरयालकं, सतिलकं भालं विलासिन्! कुरु,
प्राणेश! च्युतितं पयोधरतटे हारं पुनर्योजय।

रतिविशेषः सूच्यते] तथा अलकेभ्यः,—चूर्णकुन्तलेभ्यः, पतितैः,—स्खलितैः, श्रोणिकुसुमैः,—रतिविमर्दनात् इतस्ततः विक्षिप्तपुष्पैः इत्यर्थः, [अनेन पुरुषोपरिस्थितायाः अधोमुखायाः अलकेभ्यः पुष्पपातसम्भवात् पुरुषायितरतिः सूच्यते। अत्र सर्वत्र "इत्थंभूतलक्षणे" (२।३।२१ पा०) इति तृतीया, तेनेतेरुपपदवतिः इत्यर्थः] स्त्रियाः,—एवंविधस्वरूपटतया विविधसुरतनिपुणायाः नायिकायाः इत्यर्थः, सर्वस्वं—सर्वप्रकारं, रतं—रतिं, कथयति—प्रकटयति, सूचयतीति यावत्। विस्तरिणी इतम्।

(ख) मधुरवचनैरिति।—सा—बाला, पञ्चेषोः,—पञ्च इषवो बाणा यस्य तादृशस्य कामस्येत्यर्थः, त्रिभुवनजये—त्रिलोकीविजयं साधयितुं, मधुरवचनैः,—मिष्टभाषितैः, भ्रुवोः भङ्गाः,—तरङ्गाः, उपचारात् तद्वाचकत्वात् ते; सह वर्तन्ते इत्येवम्भूतैः, कृताः अकुत्या तर्जनाः येषु तैः, सरसविलाकुलिपरिचालनसङ्केतादिभिः इत्यर्थः, अलसवलितैः,—मदुमन्दव्यापारितैः, [अलसवलितैरित्यत्र "रभसरचितैः" इति पाठे—रभसेन—प्रमदेन, रचितैः,—सञ्चालितैः इत्यर्थो ज्ञेयः] मदोल्लसबन्धुभिः,—मदोल्लसन्तः बन्धवः मदोल्लसबन्धवस्तैरित्यर्थः, परमप्रीतिकरैरिति यावत्, अङ्गन्यासैः,—शरीरसञ्चालनैः, तथा असकृदसकृत्—वारंवारं, स्कारस्कारैः,—अव्यक्तैः, अपाङ्गविलोकितैः ["सप्तम्यर्थे तृतीया" (२।३।१८ पा०) इति सप्तम्यर्थे तृतीया] तथा च, मधुरवचनादिद्वारेत्यर्थो निष्कृष्टः, सहायतां—साहाय्यम्, आनुकूल्यमिति यावत्, करोति। दृश्यतेऽत्र,—"नवरसरुचिरां यः पदवेदैर्दधेऽर्थविरीं तदा" इति तल्लक्षणात्।

इत्युक्त्वा सुरतावसानसमये सम्पूर्णचन्द्रानना
स्पृष्टा तेन तथैव जातपुलका प्राप्ता पुनर्मोहनम्" ॥ (व)

मध्याप्रगल्भयोर्भेदान्तराण्याह,—

ते धीरा चाप्यधीरा च धीराऽधीरेति षड्विधे॥१०४॥

ते—मध्या-प्रगल्भे।

तत्र,—

प्रियं सोत्प्रासवक्रोक्त्या मध्या धीरा दहेद्रुषा।
धीराऽधीरा तु रुदितैरधीरा परुषोक्तिभिः॥१०५॥(श)

तत्र मध्या-धीरा यथा,—

"तदवितथमवादीर्यन्मम त्वं प्रियेति
प्रियजनपरिभुक्तं यद्दुकूलं दधानः।

(व) स्वामिन्निति।—सम्पूर्णचन्द्रानना—पूर्णचन्द्रसदृशसुन्दरमुखी रमणी, सुरतावसानसमये—सुरतान्ते, हे स्वामिन्!—प्राणप्रिय! अलकं—चूर्णकुन्तलं, भङ्गुरय—भङ्गीयुक्तं कुरु, हे विलासिन्! भालं—ललाटं, सतिलकं—तिलकालङ्कृतं, कुरु, हे प्राणेश! प्राणनाथ! पयोधरतटे—पयोधरयोः स्तनयोः तटः उपरिदेशः, तटवदुन्नतत्वात् पयोधरतट इति निर्देशः, तत्र, त्रुटितं—छिन्नं, हारं पुनर्योजय—पुनः सन्धेहि, इति उक्त्वा तेन—स्वामिना, तथैव—उक्तप्रकारेणेत्यर्थः, तत्तत्कार्य्यकरणेनेति भावः, स्पृष्टा, अत एव जातपुलका—सञ्जातरोमाञ्चा सती, पुनः मोहनं प्राप्ता—पुनः सुरतामोदज्ञानं लब्धवतीव स्थिताऽऽसीदिति भावः। शार्दूलविक्रीडितं वृत्तम्।

(श) प्रियमिति।—मध्या—मध्यमा शैशवयौवनयोरन्तरालावस्थां प्राप्ता, धीरा सोत्प्रास-वक्रोक्त्या—सपरिहासश्लिष्टवचनेन, प्रियं—कान्तं, रुषा—क्रोधेन, [अत्रेत्थम्भूतलक्षणे तृतीया] दहेत्—सन्तापयेत्, दग्धमिव कुर्य्यादिति भावः। धीराऽधीरा—किञ्चिद्धैर्य्यशालिनी नायिकेत्यर्थः, तु—पुनः, रुदितैः,—रोदनैः, अश्रुपातपूर्वकं विलापैरिति यावत्, "प्रियं रुषा दहेत्" इति पूर्वेणान्वेति। अधीरा—सर्वथा त्यक्तधैर्य्या नायिका पुनः, परुषोक्तिभिः,—परुषैर्वचनैः, "प्रियं रुषा दहेत्" इति पूर्वतोऽन्वेति। अत्रोक्तसंज्ञात्रयेऽपि मध्याऽन्वेति इति ज्ञातव्यम्।

मदधिवसतिमागाः कामिनां मण्डनश्रीः
व्रजति हि सफलत्वं वल्लभालोकनेन" ॥ (घ)

मध्ये धीराऽधीरा यथा,—

बाले ! नाथ ! विमुञ्च मानिनि ! रुषं, रोषाश्रया किं कृतम् ?
खेदोऽस्मासु, न मेऽपराध्यति भवान् सर्वेऽपराधा मयि ।
तत् किं रोदिषि गद्गदेन वचसा ? कस्याग्रतो रुद्यते ?
नन्वेतन्मम, का तवास्मि ? दयिता, नास्मीत्यतो रुद्यते" ॥(ङ)

(घ) तदिति ।—एवां सम्भूय तत्परिहितवसनं परिधाय मण्डनं खामिनं प्रति कस्याश्चित् सौभाग्यवत्याः स्त्रीत्वमाह । "त्वं मम प्रिया" इति यत्, अवादीः,—उक्तवानसि, तत् अवितथं—सत्यं, यत्—यस्मात्, प्रियजनेन—अन्यस्त्रीजनेन, परिभुक्तं—परिहितं, दुकूलं—वसनं, तदीयमिति भावः, दधानः,—धारयन् सन्, त्वमिति शेषः, मम अधिवसतिम्—आलयम्, आगाः,—प्राप्तवानसि ; एतद्दुकूलपरिधानेन विलक्षणा शोभा जाता, तद्दर्शनेन मदीयो मे प्रीतिरिति स्फुटम् अवितथवादित्वं तवेति भावः । हि—यतः, कामिनां मण्डनेन—भूषणेन, कृता श्रीः,—अलङ्कारशोभा इत्यर्थः, वल्लभालोकनेन—वल्लभा प्रिया, तत्कर्तृकालोकनेन प्रियजनकर्तृकदर्शनेनेत्यर्थः, सफलत्वं—कृतार्थत्वं, व्रजति—प्राप्नोति । अम च, अ—सम्बोधने, अविनीते वा, वितथमिति निध्या, यत् यस्मात् मम तापाय प्रतिनायिकापरिहितवस्त्रं परिधाय मम गेहम् आगाः, यद्यदं ते प्रिया स्यां, तदा मत्तापजनकं कर्म न कुर्याः ; एतत् तावत् सतां मण्डनं न भवति, यदि तवैतन्मण्डनं, तदा तज्जन्यशोभा या प्रिया भवति, तामेवावलोकय, ममाऽऽलोकनया किं प्रयोजनम् ? इति शेष एवात्र वक्रोक्तिः । प्रियपरिधानवस्त्रेदं पद्यम् । मालिनी वृत्तम्,—"ननमयययुतेयं मालिनी भोगिलोकैः" इति तल्लक्षणात् ।

(ङ) बाले इति ।—नायकस्य नायिकायाश्चोक्तिप्रत्युक्तिरूपमेतदुदाहरणम् । हे बाले ! (इति नायकोक्तिः) नाथ !—स्वामिन् ! इति नायिकायाः प्रत्युक्तिः) हे मानिनि !—मानवति ! रुषं—क्रोधं, विमुञ्च—परित्यज, (इति नायकोक्तिः) रोषात्—क्रोधात्, क्रोधमाश्रित्य इत्यर्थः, ["अव्ययीभावे चाकालाप्रतिकारे च" इति वार्त्तिकेन अव्ययीभावे अव्ययं पञ्चमी] मया किं कृतम् ?—किमनुष्ठेयम् अनुष्ठितम् ? न किमपि मे अहितं कृतमिति भावः, (इति नायिकायाः प्रत्युक्तिः) अस्मासु खेदः,—क्लेश इत्यर्थः,

इयमेवाधीरा यथा,—

"सार्द्धं मनोरथशतैस्तव धूर्त्त! कान्ता
सैव स्थिता मनसि कृत्रिमहावरम्या।
अस्माकमस्ति न हि कश्चिदिहावकाशः
तस्मात् कृतं चरणपातविडम्बनाभिः" ॥ (ङ)

प्रगल्भा यदि धीरा स्याच्छन्नकोपाकृतिस्तदा।
उद्गते सुरते तव दर्शयन्त्यादरान् वह्निः॥१०६॥(क)

कृतः इति शेषः, (इति नायकोक्तिः) भवान् मे—मह्यं, न अपराध्यति, ["राधीयोर्यश्च विप्रश्नः"(१।४।३९ पा०) इति सम्प्रदानम्] सर्वं अपराधा मयि, वर्त्तन्ते इति शेषः, (इति नायिकायाः प्रत्युक्तिः) तत्—तदा, गद्गदेन—अर्द्धस्फुटेन, वचसा किं—अयं, रोदिषि? (इति नायकोक्तिः) अस्र अयतः,—समयं, क्षयते? (इति नायिकायाः प्रत्युक्तिः) ननु—भोः! एतत्—रोदनं, मम, अयत इति शेषः, (इति नायकोक्तिः) भवतः तावदहं जाऽपि न भवामि, मम कथा अयं खेदः? इत्यभिप्रायेणाह, का तवेति।—अस्मि—अहं, तव का? (इति नायिकायाः प्रत्युक्तिः) दयिता—प्रिया, प्रियभार्या इति यावत्, मम त्वमिति शेषः, (इति नायकोक्तिः) नास्मि—अहं तव न दयिता प्रेमपात्रमिति यावत्, भवामि, इत्यतः क्षयते, मयेति शेषः, (इति नायिकायाः प्रत्युक्तिः)। सार्द्धविक्रीडितं वृत्तम्।

(ङ) इयमेव—मध्येव अधीरा, तामुदाहरति, सार्द्धमिति।—परनायिकारतं पतिं ज्ञातापराधतयाऽऽगत्य स्वचरणपतितमालोक्य कस्याश्चिदुक्तिः। हे धूर्त्त!—कितव! सैव—यस्यां त्वमनुरक्तः सा किल, कृत्रिमेण—कल्पितेन, स्वाभाविकैतरपेक्षयेति शेषः, न तु अनुरागनिबन्धनेनेति भावः, हावेन—भावविशेषेण, रम्या—मनोहारिणी, कान्ता—प्रिया, मनोरथानाम्—"एवं तया सह विहरिष्यामि, एवं तया सहाऽऽस्थिष्यामि, एवं तया समं रहो भविष्यामि" इत्यादिरूपाणां, शतैः,—सार्द्धं—सह, तव मनसि स्थिता; हि—यतः, इह—तव मनसीत्यर्थः, अस्माकं कश्चित् अवकाशः,—स्थानं, नास्ति, तस्मात् चरणपातविडम्बनाभिः,—पादपतनरूपेणच्छद्मनाऽर्थेनार्थापारैः, कृतम्—अलं, न त्वया सहैव पादयोः पतितोऽसाहु खेदः कार्य इत्यर्थः। वसन्ततिलकं वृत्तम्।

(क) प्रगल्भेति।—प्रगल्भा—प्रौढ़ा नायिका, धीरा यदि, तदा कथा—तिरो-

तत्र—प्रिये । यथा,—

"एकत्रासनसंस्थितिः परिहृता प्रत्युद्गमात् दूरतः,
ताम्बूलाऽऽनयनच्छलेन रभसाऽऽश्लेषोऽपि संविघ्नितः ।
आलापोऽपि न मिश्रितः परिजनं व्यापारयन्त्याऽन्तिके,
कान्तं प्रत्युपचारतश्चतुरया कोपः कृतार्थीकृतः" ॥ (ख)

धीराऽधीरा तु सोल्लुण्ठभाषितैः खेदयत्यमुम् ॥१०७॥(ग)

अमुं—नायकम् ।

हिता, कोपाकृतिः,—कोपस्य आकृतिः,—कोपसूचको मुखरागादिः यस्याः तादृशी स्यात्, निगूढरोषा भवेदित्यर्थः, [अत्र तथाविधा सा इति कर्त्तृपदमध्याहार्य्यम्] तत्र—प्रिये, बहिः आदरान् दर्शयन्ती, सुरते—प्रियेण समं विलासादौ, उदास्ते—उदासीना, अनुरागहीना इति यावत्, भवति ।

(ख) उदाहरति, एकत्रेति ।—चतुरया—विदग्धया कयाचित् कामिन्या, कान्तं—प्रियं, विदेशादागतमिति शेषः, प्रति, उपचारतः,—बाह्यपरिचर्य्यया, प्रीतिहेतुव्यापारान् विधाय इत्यर्थः, कोपः,—क्रोधः, कृतार्थीकृतः,—सफलीकृतः, सम्भोगप्रतिरोधः क्रोधस्य फलं, तेनैव कान्तो वशीकृत इति भावः ; तथा हि, दूरतः,—दूरात्, दूरे एव पतिं दृष्ट्वेत्यर्थः, प्रत्युद्गमात्—समुपस्थितकान्तस्य सम्मानार्थमासनादुत्थानव्याजेन इत्यर्थः, एकत्र—एकस्मिन् स्थाने, आसनसंस्थितिः,—आसने उपवेशनीये, पीठादौ इति यावत्, संस्थितिः,—सहावस्थानम्, उपवेशनसम्बन्ध इति यावत्, परिहृता—परित्यक्ता ; ताम्बूलस्य आनयनमेव छलं—व्याजः तेन, रभसाश्लेषः,—वेगादालिङ्गनं, सहर्षमालिङ्गनमपि वा, ("रभसो वेगहर्षयोः" इत्यमरः) संविघ्नितः,—सम्यक् प्रतिरुद्धः इत्यर्थः, तथा अन्तिके—समीपे, विजनत्वाभावोपपत्तये इत्याशयः, परिजनम्—अनुचरवर्गं, व्यापारयन्त्या—प्रेरयन्त्या, नायकपरिचर्य्यार्थं व्यापारीकुर्वत्या सत्या इत्यर्थः, आलापोऽपि—सम्भाषणमपि, न मिश्रितः,—नोत्तरेण युक्तः कृत इत्यर्थः । शार्दूलविक्रीडितं वृत्तम् । अमरुशतकस्येदं पद्यम् ।

(ग) धीरेति ।—धीराऽधीरा—किञ्चिद्धीरा किञ्चिदधीरा नायिका, तु—पुनः, सोल्लुण्ठभाषितैः,—उल्लुण्ठा आक्षेपास्तैः सहितानि भाषितानि तैस्तथोक्तैः, (साधनैः) प्रियवद्भासमानैरप्रियैरित्याशयः, अमुं—नायकं, खेदयति—तिरस्करोतीत्यर्थः ।

यथा मम,—

"अनलङ्कृतोऽपि सुन्दर ! हरसि मनो मे यतः प्रसभम् ।
किं पुनरलङ्कृतस्त्वं सम्प्रति नखरक्षतैस्तन्वाः ? ॥" (घ)

तर्जयेत्ताड़येदन्या ॥ १०८ ॥

अन्या—अधीरा । यथा,—"शोणं वीक्ष्य मुखम्" इत्यत्रैव । अत्र च सर्वत्र "दृषा" इत्यनुवर्त्तते । (ङ)

प्रत्येकं ता अपि द्विधा ।

कनिष्ठज्येष्ठरूपत्वान्नायकप्रणयं प्रति ॥ १०९ ॥ (च)

ताः,—अनन्तरोक्ताः षड्भेदा नायिकाः । यथा,—

"दृष्ट्वैकासनसंस्थिते प्रियतमे पश्चादुपेत्यादरात्
एकस्या नयने पिधाय विहितक्रीड़ानुबन्धस्फुलः ।

(घ) अनलङ्कृत इति ।—हे सुन्दर ! यतः,—यदा, अनलङ्कृतः,—न भूषणाद्याभूषणादिनाऽऽभूषितोऽपि इति यावत्, त्वं मे—मम, मनः प्रसभं—बलेन, हरसि, तदेति शेषः, सम्प्रति तन्वाः,—प्रतिनायिकायाः, नखरक्षतैः,—नखाघातैः, अलङ्कृतः,—शोभितः, त्वं किं पुनः ? मनो हरसीत्यत्र किं वक्तव्यम् ? इति भावः ।

(ङ) अधीरां लक्षयति, तर्जयेदिति ।—अन्या—धीरातो भिन्ना, अधीरा नायिकेत्यर्थः, दृषेति शेषः, तर्जयेत्—भर्त्सयेत्, तथा ताड़येत्—आहन्यात्, लातेति पूर्वतोऽन्वेति, तथा च,—या दृषा लातं तर्जितुं ताड़ितुमपि वा प्रभवति, सा अधीरा नायिकेति निष्कर्षः । अन्यपदार्थमाह, अन्येति ।—उदाहरति, यथा शोणमिति ।—उदसत शोभनम् ;—"शोणं वीक्ष्य मुखम्" इत्यादि पूर्वनायकोदाहरणे प्रागुक्तम्, अतोऽत्रेदं न व्याख्यायते, किन्तु "पादेन प्रहृतम्" इत्यादिना नायिकायाः स्फुटमधीरात्वमिति । अत्र सर्वत्र—लक्षणपद्ये इत्यर्थः । अन्यत् स्पष्टम् ।

(च) प्रत्येकमिति ।—कनिष्ठेति ।—नायकप्रणयं प्रति—आत्मप्रेमापेक्षया, कनिष्ठज्येष्ठरूपत्वात्—अल्पमहत्स्वरूपत्वात् इत्यर्थः, ताः,—पूर्वोक्ताः, धीरमध्याऽधीरमध्या-धीराऽधीरमध्या-धीरप्रगल्भाऽधीरप्रगल्भा-धीराधीरप्रगल्भाः षड्विधाः नायिका इति भावः, द्विधा—द्विविधाः, स्युरिति शेषः । नायके अल्पप्रेमवत्यः कनिष्ठा नायिकाः, अनल्पप्रेमवत्यः पुनर्ज्येष्ठा इति एता द्विविधा इति भावः ।

ईषद्वक्रितकन्धरः सपुलकः प्रेम्णोल्लसन्मानसाम्,
अन्तर्हासलसत्कपोलफलकां धूर्त्तोऽपरां चुम्बति ॥" (छ)

मध्याप्रगल्भयोर्भेदास्तस्मात् द्वादश कीर्त्तिताः।
मुग्धा त्वेकैव तेन स्युः स्वीयाभेदास्त्रयोदश ॥११०॥
परकीया द्विधा प्रोक्ता परोढ़ा कन्यका तथा॥१११॥(ज)

तत्र,—

यात्रादिनिरताऽन्योढ़ा कुलटा गलितत्रपा॥११२॥(झ)

(छ) एकत्रैव ज्येष्ठा-कनिष्ठे उदाह्रियेते, दृष्ट्वेति।—धूर्त्तः,—चतुरः पतिः, एकस्मिन् आसने—शय्यायां, संस्थिते एकासनोपविष्टे ["एकासनमास्थिते" इति पाठान्तरे स एवार्थः] प्रियतमे—भार्य्ये, दृष्ट्वा पश्चात्—पृष्ठतः, उपेत्य—शनैरागत्य, आदरात्—सम्मानात्, प्रणयप्रदर्शनव्याजेनेत्यर्थः, एकस्याः,—स्वल्पप्रणयायाः प्रियायाः इत्यर्थः, नयने पिधाय—करतलाभ्यामाच्छाद्य, विहितं—कृतं, क्रीड़ाऽनुबन्धः,—क्रीड़ारम्भः एव, छलं—व्याजः येन तादृशः, ईषत्—अल्पं, वक्रिता—वक्रीकृता, ["तारकादिभ्य इतच्" (वा०) इति इतच्] कन्धरा—ग्रीवा येन तथोक्तः, तथा सपुलकः,—सञ्जातरोमाञ्चः सन्, प्रेम्णा—प्रणयेन, उल्लसत्—प्रसीदत्, मानसं—चित्तं यस्यास्ताम्; ["प्रेमोल्लसन्मानसाम्" इति पाठेऽपि स एवार्थः] अन्तर्हासेन—आन्तरिकेण विकासेन, निगूढ़प्रेमजनितचित्तोल्लासेनेति यावत्, लसन्तौ कपोलफलकौ—गण्डस्थले यस्यास्तादृशीम्, अपराम्—अतिप्रणयिनीं कामिनीं, चुम्बति। अत्र च यस्याः नयने पिहिते साऽपि प्रिया, किन्तु प्रणये किञ्चित् न्यूना, यस्याः पुनः मुखं चुम्बितं, सा ततो नायकस्य प्रणये ज्येष्ठेति बोध्यम्। अमरुशतकस्येदं पद्यम्। शार्दूलविक्रीड़ितं वृत्तम्।

(ज) एवं स्वीयाभेदानभिधाय परकीयां प्रस्तौति, परकीयेति।—परकीया, नायिका इति शेषः, परोढ़ा—परेण ऊढ़ा परिणीता, तथा कन्यका—अजातोद्वाहा, ("कन्या त्वजातोपयमा" इत्यमरः) इत्येवं द्विधा—द्विविधा, भवतीति शेषः। वक्ष्यमाणलक्षणायाः कन्यकायाः पित्राद्यधीनपरिणयतया परकीयात्वं, परोढ़ायास्तु स्पष्टमिति बोध्यम्।

(झ) परोढ़ामाह, तत्रेति।—तत्र—तयोर्मध्ये, यात्रादिनिरता—यात्रा—[illegible]

यथा,—

"स्वामी निश्वसितेऽप्यसूयति, मनोजिघ्रः सपत्नीजनः,
श्वश्रूरिङ्गितदैवतं, नयनयोरीहालिहो यातरः।
तद्दूरादयमञ्जलिः, किमधुना दृग्भङ्गिभावेन ते?
वैदग्धीमधुर! प्रबन्धरसिक! व्यर्थोऽयमत्र श्रमः॥" इति (ञ)

इत्यादिषु निरता—आसक्ता; अत्रादिशब्देन बहिरवस्थानाट्टालिकादिशिखरमारुह्य सविलासं राजमार्गावलोकन-लम्पटयौवनस्थप्रतिवेशीभवनगमन-स्वाङ्गसौष्ठवादिप्रकाशनादीनां ग्रहणम्; अत एव कुलटा—व्यभिचाराय कुलानि परगृहाणि अटतीति तथोक्ता, परप्रसङ्गकामनया भ्रमणशीलेत्यर्थः, [शकन्ध्वादित्वात् साधु] गलिता—नष्टा, त्रपा—लज्जा यस्यास्तथाभूता, अन्योढ़ा—परोढ़ा, कथ्यते इति शेषः।

(ञ) उदाहरति, स्वामीति।—निश्वसिते—निश्वासपरित्यागे सति, स्वामी अपि असूयति—असूयां करोति, इयं परपुरुषाप्राप्त्या निश्वसितीति बुद्ध्या मह्यमीर्ष्यति इति भावः; सपत्नीजनः मनोजिघ्रः (मनसः घ्राणजप्रत्यक्षासम्भवेन अभिप्रायवेदने लक्षणा, तस्य याथार्थ्यं प्रयोजनम्। एवमग्रयोरपि विशिष्टवाक्ययोः ज्ञेयम्) मनसि कं परं नायकमियं चिन्तयति? इति पर्य्यवेक्षते इति भावः; श्वश्रूः,—पत्युर्माता, इङ्गितस्य—हृद्गतस्य भावस्य, अभिप्रायसूचकचेष्टाविशेषस्य इत्यर्थः, ("इङ्गितं हृद्गतो भावः" इत्यमरः) दैवतम्—अधिष्ठात्री देवी, तदभिज्ञा इत्यर्थः; यातरः,—पत्युर्ज्येष्ठानां कनिष्ठानाञ्च भ्रातॄणां पत्न्य इत्यर्थः, ("भार्य्यास्तु भ्रातृवर्गस्य यातरः स्युः परस्परम्" इत्यमरः) नयनयोः,—नेत्रयोः, ईहा—चेष्टा, कटाक्षविक्षेपादिकं चेष्टितमित्यर्थः, तां लिहन्तीति तथोक्ताः, नेत्रेङ्गितानां चेष्टाविशेषसूचनीयार्थानाञ्च बोद्ध्र्य इत्यर्थः, नेत्रलक्ष्यैकलक्ष्या भूत्वा स्थिता इति भावः; वैदग्धीमधुरेति।—वैदग्ध्या चातुर्य्येण, मधुरः मनोहरः, तत्सम्बुद्धौ। हे प्रबन्धरसिक!—प्रबन्धः सुरतव्यापारः, तत्र रसिकः निपुणः, तत्सम्बुद्धौ; यद्वा,—वैदग्ध्या मधुरः प्रबन्धो यस्य तत्सम्बोधने तथा, अत्र पक्षे रसिक इति पृथक् सम्बोधनम्। ["वैदग्धीमधुरप्रबन्धरसिक" इति समस्तपाठे तु—वैदग्ध्या—सुरतनैपुण्येन, मधुरः,—मनोहरः, प्रबन्धः,—सुरतप्रयोगः, तत्र रसिकः,—रसयुक्तः] तत्—तस्मात्, उक्तात् अन्तरायादित्यर्थः, दूरात् अयम् अञ्जलिः, रचित इति शेषः; अधुना ते—तव, दृग्भङ्गिभावेन—कटाक्षपातेनेत्यर्थः, किम्? अत्र—मत्प्राप्तिविषये, स्वाम्याद्याकीर्णे देशे वा इत्यर्थः, अयं श्रमः,—मत्प्राप्तिसाधनव्यापारः, व्यर्थः,—विफलः। [न

अत्र हि मम परिणेताऽन्नाच्छादनादिदातृतया स्वाम्येव, न तु वल्लभः। त्वन्तु वैदग्धीमधुरत्वेन प्रबन्धरसिकतया च मम वल्लभोऽसीत्यादिव्यङ्ग्यार्थवशादस्याः परनायकविषया रतिः प्रतीयते। (ट)

कन्या त्वजातोपयमा सलज्जा नवयौवना ॥११३॥(ठ)

अस्याश्च पित्राद्यायत्तत्वात् परकीयात्वम्। यथा मालती-माधवादौ मालत्यादिः।

धीरा कलाप्रगल्भा स्याद्वेश्या सामान्यनायिका।
निर्गुणानपि न द्वेष्टि न रज्यति गुणिष्वपि।
वित्तमात्रं समालोक्य सा रागं दर्शयेत् वहिः॥
काममङ्गीकृतमपि परिक्षीणधनं नरम्।
मात्रा निष्क्रामयेदेषा पुनः सन्धानकाङ्क्षया॥

अहमिदानीं तव मनोरथं पूरयितुं शक्नोमि, किन्तु यदा कदा वा कथमपि मनोरथं पूरयिष्यामि, कञ्चित् कालं क्षमस्वेति अधुनाऽऽदिपदसाचिव्येन व्यज्यते इति बोध्यम्]। शार्दूलविक्रीडितं वृत्तम्।

(ट) ननु स्वप्राप्तिसाधनव्यापारव्यर्थत्वकथनेनास्याः परनायकरत्यभावः प्रतीयते, तेन च कुलटात्वाभाव उपपन्न इति कथमस्याः परनायिकात्वम्? अत आह, अत्र हीति।—परिणेता—विवाहकर्त्ता। स्वामी—शरीरमात्रस्य प्रभुरित्यर्थः। वल्लभः,—प्राणप्रियः। अस्याः,—निरुक्तचेष्टितायाः। स्पष्टमन्यत्।

(ठ) कन्येति।—कन्या तु—पुनरित्यर्थः। न जात उपयमः,—विवाहो यस्याः सा, अनूढेत्यर्थः, ("विवाहोपयमौ समौ" इत्यमरः) अत एव सा सलज्जा—लज्जां विहातुमशक्तेति भावः, नवयौवना—नवं यौवनं यस्याः तादृशी, परकीया भवतीति शेषः। उदाहरणन्तु नैषधीये चरिते यथा,—"अनैषधायैव जुहोति तातः किं मां कृशानौ न शरीरशेषाम्। ईष्टे तनूजन्मतनोः स नूनं मत्प्रणनाथस्तु नलस्तथाऽपि॥" अत्र विवाहात्पूर्वं दमयन्त्याः नलेऽनुरागः।

तस्कराः पण्डका मूर्खाः सुखप्राप्तधनास्तथा ।
लिङ्गिनश्छन्नकामाद्या आसां प्रायेण वल्लभाः ॥
एषाऽपि मदनायत्ता क्वापि सत्यानुरागिणी ।
रक्तायां वा विरक्तायां रतमस्यां सुदुर्लभम् ॥११४॥(ङ)

(ङ) साधारणीं प्रस्तौति, धीरेति ।—धीरा—धैर्य्यवती, कलासु—नृत्यगीतादिविद्यासु, प्रगल्भा—प्रवीणा । [कलाश्चात्र चतुःषष्टिसङ्ख्याकाः, ताः खिलशुक्रनीतिशास्त्रे २ अध्याये यथोक्ताः,—(१) नर्त्तनम्, (२) वादनम्, (३) वस्त्रालङ्कारसन्धानम्, (४) अनेकरूपाविर्भावकृतिज्ञानम्, (५) शय्याऽऽस्तरणसंयोगे पुष्पादिग्रथनम्, (६) द्यूताद्यनेकक्रीडाभिरञ्जनम्, (७) अनेकासनसन्धाने रतिज्ञानम्, (८) मकरन्दाऽऽसवादीनां कृतिः, (९) गुह्यशल्यहृतौ ज्ञाने शिराव्रणवेधनम्, (१०) हीनादिरससंयोगे अन्नादिसम्पाचनम्, (११) वृक्षादिप्रसवारोपपालनादिकृतिज्ञानम्, (१२) पाषाणधात्वादिद्रुतिस्तम्भनम्, (१३) यावदिक्षुविकाराणां कृतिज्ञानम्, (१४) धात्वोषधीनां संयोगक्रियाज्ञानम्, (१५) धातुसाङ्कर्य्यपार्थक्यकरणम्, (१६) धात्वादीनां संयोगपूर्वविज्ञानम्, (१७) हारनिष्कासनज्ञानम्, [एतत्कलादशकम् आयुर्वेदागमे विशदीकृतम्] (१८) पदादिविन्यासतः शस्त्रसन्धानविक्षेपः, (१९) सन्ध्याघाताकृष्टिभेदैर्मल्लयुद्धम्, (२०) अभिलक्षिते देशे यन्त्राद्यस्त्रनिपातनम्, (२१) वाद्यसङ्केततः व्यूहरचनादिकम्, (२२) गजाश्वरथगुप्त्या युद्धसंयोजनम्, [एतत्कलापञ्चकं धनुर्वेदे विशदीकृतम्] (२३) विविधासनमुद्राभिः देवतातोषणम्, (२४) गजाश्वादेः सारथ्यं गतिशिक्षा च, (२५) मृत्तिकासत्क्रिया, (२६) काष्ठसत्क्रिया, (२७) पाषाणसत्क्रिया, (२८) धातुभाण्डादिसत्क्रिया, (२९) उद्याने चित्रा खनिः, (३०) तडागवापीप्रासादसमभूमीकरणम्, (३१) घट्याद्यनेकयन्त्राणां बाणानां करणम्, (३२) हीनमध्यादिसंयोगवर्णादिरञ्जनम्, (३३) जलवाय्वग्निसंयोगनिरोधादिकरणम्, (३४) नौकारथादियानानां कृतिज्ञानम्, (३५) सूत्रादिरज्जुकरणे विज्ञानम्, (३६) अनेकतन्तुसंयोगैः परबन्धज्ञानम्,(३७) रत्नानां वेधादि सदसज्ज्ञानम्,(३८) स्वर्णादीनां याथात्म्यविज्ञानं, कृत्रिमस्वर्णरत्नादिक्रियाज्ञानञ्च, (३९) स्वर्णाद्यलङ्कारकरणम्, (४०) लेपादिसत्कारकरणम्, (४१) चर्मणां मार्दवादिक्रियाज्ञानम्, (४२) पशुचर्माङ्गनिर्हारक्रियाज्ञानम्, (४३) दुग्धदोहादि-घृतादिविज्ञानम्, (४४) कञ्चुकादिसीवनविज्ञानम्, (४५) बाह्वादिभिः जले सन्तरणम्, (४६) मार्जने

दृढभाण्डादिविज्ञानम्, (४७) वस्त्रसम्मार्जनम्, (४८) चीरकर्मकरणम्, (४९) तिलमांसादितैलनिष्कासनम्, (५०) सीराद्याकर्षणे ज्ञानम्, (५१) इक्षाद्यारोहणम्, (५२) मनोऽनुकूलसेवायाः कृतिज्ञानम्, (५३) वेणुदलादिपात्राणां कृतिज्ञानम्, (५४) काष्ठपात्रादिकरणविज्ञानम्, (५५) संवेशनम्, (५६) अङ्गानां संवरणम्, (५७) क्रीडाभिसारमञ्जाञ्चकृतिज्ञानम्, (५८) गजाश्वरथयोद्धॄणां पत्त्ययनादिकरणम्, (५९) स्त्रियः संरक्षणे ज्ञानम्, (६०) स्त्रियः धारणे ज्ञानम्, (६१) स्त्रियः क्रीडने ज्ञानम्, (६२) अपराधिजने सुयुक्ताडनविज्ञानम्, (६३) नानादेशीयवर्णानां सम्यक् प्रेक्षणम्, (६४) ताम्बूलरक्तादिकृतिविज्ञानम् इति। प्रेक्षत्कोक्काद्याः श्रीधरस्वामिभिः ९४५ सङ्ख्यकेऽब्दे श्रीभद्रागवतटीकायां सन्निवेशिताः, ता भिन्नविधाः अक्षरच्युतदात्रिंशत्पुत्तलिकासिंहासनग्रन्थटीकायां सम्यक् निरूपिताः]। वेश्या सामान्यनायिका स्यात्। ननु कथमस्याः सामान्यत्वम्? (सर्वोपभोग्यत्वम्) इत्याशङ्क्याह, निर्गुणानपेक्षेति।—किं पुनर्गुणिन इत्यर्थः। न हेष्टि—द्विष्टान् मनुते, गुणिषु—गुणवत्सु अपि, किं पुनर्निर्गुणेष्विति भावः। [विषये सप्तमीयम्] न रज्यति—अनुरक्ता न भवति। तत् किं करोति? इत्याशंक्याहाह, वित्तमात्रमिति।—केवलं धनं, तदपि स्वां प्रति दीयमानमेवेति बोध्यं, समालोक्य—सम्यगालोच्य, वणिक्—क्रयविक्रयार्थः, न तत्तः, रागम्—अनुरागं, सा—वेश्या, दर्शयेत्, कामं—यथेष्टम्, अकृत्रिमत्वेन कृत्रिमत्वेन अपि, किं पुनरकृत्रिमतमिति भावः; वरि—सर्वतोभावेन, क्षीणं धनं यस्य तादृशं नरं, पुनः,—धनोपलब्ध्यनन्तरं, सम्भोगस्य—सुरतार्थं सन्निधानस्य, समागमस्येति यावत्, काङ्क्षा—अभिलाषः तया। (प्रपञ्चितोऽभिप्रायः वात्स्यायनीये वैशिकाधिकरणे यथा,—"सन्तु पूर्वोपकारिचलव्यलफलं व्यलीकेनाप्युपालयेत्। अवारन्तु निर्धृतिपत्तिकमुपायतोऽपवाहयेत्॥ अन्यसक्तश्च" इति, वर्त्तमानं निर्धृतिताधंसुखमूलो पूर्वसंसृष्टेन सह सन्दध्यात्, स चेदवसितार्थो वित्तवान् ह्यनुरागश्च ततः सन्धेयः॥" इति च) मात्रा—वैशिकशिल्पादाकीहारा, एषा—वेश्या, निष्कासयेत्—दूरादपहिष्कारयेत्। आसाम्—दूढभीनां वेश्यानां, तस्कराः,—चौराः, पङ्कवः,—नपुंसकाः, ("दृतीया प्रकृतिः षण्ढः क्लीवं पण्ढी नपुंसकम्" इत्यमरः) दूत्यमसमर्था अपि ते आसां वाक्प्रत्यक्षाननया स्वस्य पौरुषत्वख्यापनार्थं वा प्रभूतं ददाति। यत्तु मन्यक्षाः,—"पङ्कवो वातरोगपाण्ड्वादिः" इति व्याख्यातं, तल्लिपिकरप्रमाद इति अनुमेयं, तेषां तद्वाक्यस्थे न काऽपि समीचीनोपपत्तिरवगम्यते, कोषादिष्वपि पङ्कशब्दस्य पाण्ड्वादिपर्य्यायत्वेनादर्शनात्। वस्तुतस्तु "पङ्कवो वातरुग्भाण्डादिः" इति पाठो युक्ततया प्रतिभाति; तथा चोक्तं चरकसंहितायां शारीरे अनुत्थगोत्रीयाध्याये

वितीयाध्याये,—"वायुपिदोषात् क्षयको तु यक्ष्मा नाम गतौ वातिकपक्षजः सः" इति। ["पक्षि गतौ" अच्; यद्वा,—"पक्ष व्यवहारे स्तुतौ च" अनन्तात् डु इति कपिलिः]। मूर्खाः, तथा सुखेन प्राप्तं धर्मं थे: ते, क्लिन्नाः,—अजितेन्द्रियत्वेऽपि वेश्यानामेव ब्रह्मचारिणः, क्षत्रजामाताः,—क्षुधं—गुप्तं, जामयन्ते—रतिमभिलषन्ति थे ते, ते हि लोकापवादक्षिप्ता रहसि गमनभीरवः, रहस्यरक्षार्थं भूरि प्रयच्छन्ति च इत्याशयः; यद्वा,—क्षत्रजामाताः,—इत्रा गुप्ताः, जामाः जाय्यमानाः, सुरतनिपुणतयाऽभिमता इति यावत्, थे ते गुप्तनायका इत्यर्थः; [जाय्यन्ते इति जामाः इति अर्तरि घञ्] ते तु रमणसामर्थ्यातिशयात् तासां वल्लभा भूत्वा धनदातृत्वेनैव विलम्भदत्त्वैव रमन्ते इति दिक्। प्रायेण वल्लभाः,—प्रियाः, भवन्तीति प्रेयः। (एतत्तु वात्स्यायनीये सूत्रपक्षे निरूपितं, यथा हि—"क्षतजः, पूर्वं वयसि वर्तमानः, वित्तवान्, अपरीक्षकत्तिः, अधिकरणवान्, अक्षुद्राधिगतवित्तः, सदृशवान्, सत्कुलायः, सुभगमानी, स्त्रीमनसः, पञ्चसु पुंस्त्वार्थी, समानस्त्रीं, स्वभावतः स्त्रीषु, राजनि सङ्गामात्रे वा स्थितः, देवप्रमाणः, वित्तावमानी, गृहीतां स्त्रीमनातिगः, सजातानां ज्येष्ठभूतः, सवित्तः, एकपुत्रः, स्त्रिया, प्रच्छन्नकामः, शूरः, वैद्यश्च" इति)। ननु कथं तर्हि वसन्तसेनादीनामनुरक्तत्वं श्रूयते? इत्याशङ्क्याह, एवेति।—क्वापि—कस्मिंश्चित्, चारुदत्तादौ नायके इत्यर्थः, एषा—वेश्या अपि, मदनायत्ता—कामानां सती, सत्यानुरागिणी—वास्तविकानुरागशालिनी, भवतीति प्रेयः। ननु प्रायेणैव धनमात्रेण वास्यानुरागप्रकटनशीला, तथापि कथमेका सेव्यते? कुतो वा नैती क्लीबो विरज्यते? इत्याशङ्क्याह, रक्तायामिति।—यस्यां—वेश्यायां, रक्तायाम्—अनुरक्तायां सत्यां, विरक्तायाम्—धनसुरक्तायां वा सत्यां, रतं—रमणानन्दः, सुदुर्लभम्—अत्यन्तं दुर्लभं भवति, कुलाभिमुख्याया यस्या रमणसातौख्य प्रमोदमर्यादतया वित्तमात्रलब्धत्वादिति भावः। यद्वा,—यस्याः रमणस्य प्रमोदमर्यादतेऽपि कपटनिपुणतया विलासानन्दस्यौग्यः सुदुर्लभः इति भावः। (एतच्च कथनं वस्तुस्थितिमनपेक्ष्यैव; वस्तुतस्तु तत्त्वतो विचारे,—"रतमस्यां सुदुर्लभम्" इत्युक्तिः कवीन्द्रवर्यैरनादरणीया एव, तथा हि कामसूत्रकाराः,—"धर्मार्थौ कामश्च प्रत्यर्थं लोकमेव च। पश्यन्वेतत्तत्त्वज्ञो न च रागात् प्रवर्तते॥ अधिकारवशादुक्ता ये विधा रागवर्धनाः। तदनन्तरमेव ते यत्नादिनिवारिताः॥ तद्दोषप्रत्यवेक्षैव परैश्च समाहितः। विहितं लोकयात्रार्थं न रागार्थोऽस्य संविधिः॥" इति, एवञ्च धर्मानुबन्धार्थे तु परलोकापवादोऽपि दूषित एव, अत एव कामसूत्रकारैरुक्तम्,—"उत्पन्नं कामतो दोषान् पारदारिकवर्धितान्। न याति च्छलनां कश्चित् सदाराम्

पण्डकः,—वातरागपाण्ड्वादिः। छन्नं प्रच्छन्नं ये कामयन्ते ते छन्नकामाः। तत्र रागहीना यथा,—नटकमेलकादौ मदनमञ्जर्य्यादिः। रक्ता यथा,—मृच्छकटिकादौ वसन्तसेनादिः। पुनश्च,—

अवस्थाभिर्भवन्त्यष्टावेताः षोड़शभेदिताः।
स्वाधीनभर्त्तृका तद्वत् खण्डिताऽथाभिसारिका॥
कलहान्तरिता विप्रलब्धा प्रोषितभर्त्तृका।
अन्या वासकसज्जा स्याद्विरहोत्कण्ठिता तथा॥११५॥(ढ)

तत्र,—

कान्तो रतिगुणाकृष्टो न जहाति यदन्तिकम्।
विचित्रविभ्रमासक्ता सा स्यात् स्वाधीनभर्त्तृका॥११६॥(ण)

यथा "अस्माकं सखि! वाससी" इत्यादि।

प्रति शास्त्रवित्॥ पाक्षिकत्वात् प्रयोगाणामपायानाञ्च दर्शनात्। धर्मार्थयोग्य वैलोम्यात् नाचरेत्पारदारिकम्॥ तदेतद्दारगुप्त्यर्थमारब्धं श्रेयसे नृणाम्। प्रजानां दूषणायैव न विज्ञेयोऽस्य संविधिः॥" इति)।

(ढ) आसामपि प्रकारान्तरतो भेदान्निर्दिशति, अवस्थाभिरिति।—एताः,—पूर्वोक्ता मुग्धादयः, षोड़शभेदिताः,—षोड़शविधभेदयुक्ताः नायिकाः, अवस्थाभिः,—स्वाधीनभर्त्तृकत्वादिरूपैः उपाधिभिरित्यर्थः, अष्टौ—अष्टविधाः, भवन्ति। तथा च तत्र त्रयोदश स्वकीयाः, द्वे परकीये, एका च सामान्या, इति मिलिताः षोड़श नायिकाः वक्ष्यमाणदिशा स्वाधीनभर्त्तृकाद्यष्टभेदभिन्ना भवन्तीति निष्कृष्टम्। अन्यत् स्पष्टम्।

(ण) स्वाधीनभर्त्तृकामाह, कान्त इति।—कान्तः,—भर्त्ता, रतिगुणाकृष्टः,—सुरतनैपुण्यवशीभूतः सन्, यदन्तिकं—यस्याः अन्तिकं सन्निधानं, सङ्गमिति यावत्, न जहाति—त्यजति, अत एव विचित्रः,—नानाविधः, विभ्रमः,—विलासशैली, तत्रासक्ता, सा स्वाधीनभर्त्तृका—स्वाधीनः,—स्ववशीभूतः, भर्त्ता—पतिर्यस्याः तथोक्ता स्यात्।

पार्श्वमेति प्रियो यस्या अन्यसम्भोगचिह्नितः।
सा खण्डितेति कथिता धीरैरीर्ष्याकषायिता॥११७॥(त)

यथा "तदवितथमवादीः" इत्यादि।

अभिसारयते कान्तं या मन्मथवशंवदा।
स्वयं वाऽभिसरत्येषा धीरैरुक्ताऽभिसारिका॥११८॥(थ)

क्रमात् यथा,—

"न च मेऽवगच्छति यथा लघुतां
करुणां यथा च कुरुते स मयि।
निपुणं तथैनमुपगम्य वदेः
अभिदूति काचिदिति सन्दिदिशे॥" (द)

(त) खण्डितां लक्षयति, पार्श्वमिति।—यस्याः प्रियः,—पतिः, अन्यस्याः,—परस्याः, सपत्न्याः सम्बन्धिन्याः नायिकायाः इति यावत्, सम्भोगेन चिह्नितः सन्, पार्श्वं—समीपदेशम्, एति—प्राप्नोति, अत एव ईर्ष्यया—अक्षान्त्या, सपत्नीसौभाग्यासहिष्णुतयेति यावत्, ("कषादिरोर्ष्यां" इत्यमरः) कषायिता—दूषितान्तःकरणा, सा धीरैः खण्डिता—छिन्ना, निजदूरीकरणेन मारितेति यावत्, इति कथिता।

(थ) अभिसारिकापदस्य व्युत्पत्तिलक्षणसंग्रहमेव लक्षयति, अभिसारयते इति।—अटन्।

(द) तस्य प्रयोगमुदाहरति, न चेति।—काचिन्नायिका दूतीमनुशास्ति। सः,—दयितः इत्यर्थः, यथा—येन प्रकारेण, मयि—दीनायां तदनुरक्तायां नायिकायामिति भावः [विषये सप्तमीयम्] करुणां—दयां, कुरुते, यथा च मे—मम, तदेकजीविताया इति भावः, लघुताम्—अधीरताजातं तुच्छत्वं, न अवगच्छति—जानाति, तथा—तेन प्रकारेण, एनं—दयितमिति भावः, उपगम्य निपुणं यथा भवेत्तथा, वदेः,—निवेदय इत्यर्थः; [विध्यर्थे प्रार्थने वा लिङ्] इति—इत्थं प्रकारेण, काचित्—काऽपि नायिकेत्यर्थः, दूतीम् अभि—अभिमुखीभूतां दूतीं प्रति इत्यर्थः, ["अधेनाभिमुखे" (२।१।१४ पा०) इत्यव्ययीभावे नपुंसकत्वमतन्त्रम्] सन्दिदिशे—सन्दिष्टवती [कर्मणि लिट्। खरितेत्वादात्मनेपदम्। अन्ये तु,—"अयाचित्" इति कर्मपदं, "काचित्" इति कर्मपदं "सन्दिदिशे" इति च कर्मणि

"उत्क्षिप्तं करकङ्कणद्वयमिदं, बद्धा दृढं मेखला,
यत्नेन प्रतिपादिता मुखरयोर्मञ्जीरयोर्मूकता।
आरब्धे रभसान्मया प्रियसखि! क्रीड़ाऽभिसारोत्सवे
चण्डालस्तिमिरावगुण्ठनपटक्षेपं विधत्ते विधुः॥" (ध)

संलीना स्वेषु गात्रेषु मूकीकृतविभूषणा।
अवगुण्ठनसंवीता कुलजाऽभिसरेत् यदि॥
विचित्रोज्ज्वलवेशा तु वलन्नूपुरनिस्वना।
प्रमोदस्मेरवदना स्यात् वेश्याऽभिसरेत् यदि॥
मदस्खलितसंलापा विभ्रमोत्फुल्ललोचना।
आविद्धगतिसञ्चारा स्यात् प्रेष्याऽभिसरेत् यदि॥११९॥(न)

लिट् इति मन्यन्ते। अत्र व्याख्यायाम् "अभिदूति" इति निरर्थकत्वमावहत् कवेरसामर्थ्यं द्योतयतीति विभाव्यम्] शिशुपालवधस्य नवमे सर्गे षट्पञ्चाशत्तमं पद्यमिदम्। प्रमिताक्षरा वृत्तं,—"प्रमिताक्षरा सजसैः उदिता" इति तल्लक्षणात्।

(ध) द्वितीयामुदाहरति, उत्क्षिप्तमित्यादि।—हे प्रियसखि! इदं करकङ्कणद्वयम्, उत्क्षिप्तम्—उत्क्षिप्य परिहितम्; (यथा रणनं मा भूदित्याशयेनेति सर्वत्रैवोद्देयम्) मेखला—रशना, दृढं—गाढं यथा भवेत् तथा, बद्धा—संयमिता, यत्नेन—उपायेन, मुखरयोः,—रणतोः, मञ्जीरयोः,—नूपुरयोः, मूकता—निःशब्दकारित्वं, प्रतिपादिता, इत्थं मया रभसात्—उल्लासात्, क्रीड़ाऽभिसारोत्सवे आरब्धे—प्रक्रान्ते सति, चण्डालः,—अन्यस्य दुष्टितकार्य्यविघातकतया चाण्डालसदृशक्रूरस्वभाव इति भावः, अत एव विधुः,—[विध्यति परमर्मेति तथोक्तः; "व्यधेः कुः" (उ०) इति कुः] चन्द्रः इत्यर्थः, तिमिरमेव अवगुण्ठनपटः तस्य क्षेपम्—अपसारणमित्यर्थः, विधत्ते—करोतीत्यर्थः। गूढमभिसर्त्तुकामाया मम सहसा चन्द्रोदयात् सर्वं वैफल्यं जातमिति भावः। शार्दूलविक्रीड़ितं वृत्तम्।

(न) प्रसङ्गादभिसरणक्रममाह, संलीनेति।—कुलजा—कुलीना, कन्या परोढ़ा वेति भावः,(स्वकीयायास्तु अभिसरणासम्भवात् नाभिसारिकात्वम् इति बोध्यम्) यदि अभिसरेत्, तदा स्वेषु गात्रेषु—स्वावयवेषु, संलीना—अतिसङ्कुचितशरीरेत्यर्थः,

तत्राद्ये "उत्तिष्ठतम्" इत्यादि। अन्ययोरुदाहरणम्। (प)
प्रसङ्गादभिसारस्थानानि कथ्यन्ते,—

तथा मूकीकृतम्—उपायेन निःशब्दीकृतं, विभूषणं यया तादृशी, एवम् अवगुण्ठनसंवीता—अवगुण्ठनाऽऽवृतदेहा, भवेदिति शेषः। अङ्गोपाङ्गचर्चेन मुखनाख्यालुलेपनादिभिरपि संवृतत्वं बोध्यम; तथाभूतानि नीलवस्त्रादिसंवीता, ज्योत्स्नायां मुखपूर्णिमादिनाख्यचितचन्द्रनाद्यनुलिप्तदेहा इत्याशयः। क्रमेणोदाहरणं यथा,—"क्षिप्तं वसनमर्पितं वपुषि नीलचेलमनाम्नया सगमदाम्नया सलयसद्मनः सैरिवः। करेण परिशोधितः स्खलनभङ्गया दुर्जनः परं परमपृच्छतः सखि! न लक्षिता दैवतो॥" इति। तथा,—"लक्षिताभिसारिकाः सर्वाङ्गीणार्द्रचन्दनाः। चौरवर्त्मो न लक्ष्यन्ते ज्योत्स्नायामभिसारिकाः॥" इति। अथ यदि प्रेयसी अभिसरेत् तदा विधिः,—नाट्यधर्मः, उच्यतः,—भासुरः, वेशः,—वसनभूषणादिकं वेषविधानं यस्याः सा तथाभूता, वसन्नूपुरनिस्वना—वसन् उद्भवन्, नूपुरयोः निस्वनो यस्याः सा, ध्वन्यायमाननूपुरा इत्यर्थः, ["वसन्नूपुरनिस्वना" इत्यत्र "रसन्नूपुरकक्षया" इति पाठे,—रसनो—ध्वन्यायन्नो, नूपुरकक्षे यस्याः सा इत्यर्थो बोध्यः] प्रमोदेन—आनन्देन, ओरं—विलसत्, वदनं यस्यास्तादृशी, उत्फुल्लमुखीति यावत्, स्यात्। अथ यदि प्रेष्या—दासी, अभिसरेत्, तदा मदेन—दर्पेण गर्वेण वा, स्खलितः,—व्यत्ययभूतः, संचारो यस्याः सा, विभ्रमेण—विलासेन, उत्फुल्ले—विकसिते, लोचने यस्याः तथोक्ता, आविद्धा—व्याप्ता, गतिः यत्र तादृशः, सञ्चारः,—सञ्चैतस्यानन्दनं यस्याः तथाभूता, मदोद्धतगतिरित्यर्थः, स्यात्। अत्र प्रेष्यायाः साधारणस्त्रीत्वेनानुल्लेखेऽपि "इतरा अप्यवस्थाताः" इत्यादिना नायिकात्वं सूचितमित्यवधेयम्।

(प) तत्रेति।—तासु, अभिसारिकासु मध्ये इत्यर्थः, आद्ये—परोढान्यस्वाकपकुलजाऽभिसरणविषये इत्यर्थः। "उत्तिष्ठं कुरङ्गकदृशमिदम्……" इत्यादि उदाहरणम्। अयं भावः,—अभिसरणे परोढायाः कन्यकायाश्च सदृशमेवोदाहरणम्, उभयोः कुलीनत्वात् इति। अन्ययोः,—प्रेष्याप्रेष्ययोः, उदाहरणमूह्यं—गवेषणीयम्। ते यथा क्रमेण—"लोलश्रोणमलक्तिं प्रविचलत्काञ्चीगुणाभङ्गुरं न्यञ्चत्पञ्चवधूजनं पथि पुरश्चक्रुश्चिरं चारणाः। क्रूरं हुंहीति विस्फुरन्प्रविचलद्भ्रूभीकराक्रन्दिनं क्रीडाकुक्कुटकं प्रयाति झटिति क्षुद्रापि वाराङ्गना॥" इति। "ताम्बूलार्द्रं दशनमलक्तद्रवमंशुकान्तं क्रेटो क्रीटीकृतविलसविषमं हेतुहीनं हसन्ती। आनन्दानन्दखचितपदविन्यासलीलालसाया दूनायत्ते वसति कुटिलं नर्त्तितोत्तेजितभ्रूः॥" इति च। एवं दूत्यादीनामपि अभिसारोदाहरणमूह्यम्।

क्षेत्रं वाटी भग्नदेवालयो दूती गृहं वनम्।
मालयञ्च श्मशानञ्च नद्यादीनां तटी तथा॥
एवं कृताभिसाराणां पुंश्चलीनां विनोदने।
स्थानान्यष्टौ तथा ध्वान्तच्छन्ने कुत्रचिदाश्रयः॥१२०॥(फ)
चाटुकारमपि प्राणनाथं रोषादपास्य या।
पश्चात्तापमवाप्नोति कलहान्तरिता तु सा॥१२१॥(ब)

यथा मम तातपादानाम्,—

"नो चाटुश्रवणं कृतं, न च दृशा हारोऽन्तिके वीक्षितः,
कान्तस्य प्रियहेतवे निजसखीवाचोऽपि दूरीकृताः।

(फ) अभिसरणस्थानान्याह, क्षेत्रमिति।—क्षेत्रं—शस्यस्थानं, वाटी—गृहोद्यानं, भग्नः,—खण्डितः, अत एव जनसञ्चारशून्यः, असौ देवालयः इति तथोक्तः, दूत्याः,—सन्धानकर्मदक्षायाः, कुट्टिन्या वा, गृहं, वनं प्रसिद्धं, मालयं—पुष्पोद्यानं, ("मालञ्च" इति वङ्गभाषा) ["मालयञ्च" इत्यत्र "मालिकौकः" इति पाठे—मालिकानां—मालाकाराणामोकः,—स्थानमित्यर्थः। "मालापं च" इति पाठान्तरे तु, मा—नास्ति, आलापः,—सङ्कथा यत्र तत् निर्जनस्थानमित्यर्थोऽवगन्तव्यः; "मालापञ्चः" इति पाठे तु मालानां पञ्चः,—ग्रन्थनादिना व्यक्तीकरणं यस्मात्तथोक्तः, आलय इति शेषः, तथा च मालाकारगृहमिति निष्कृष्टोऽर्थः]। श्मशानं प्रसिद्धं, तथा नद्यादीनां तटी—प्रान्तभूमिः, ("गाभा" इति वङ्गभाषा)। अत्रादिपदेन गुहानिर्झरणादीनां ग्रहणम्। एवं कृतोऽभिसारो याभिस्तासां, पुंश्चलीनां—कुलटानां, विनोदने अष्टौ स्थानानि—क्षेत्रादीनि, बोध्यानि, तथा ध्वान्तच्छन्ने—अन्धकारावृते, कुत्रचित्—कस्मिंश्चित् प्रदेशे, आश्रयः,—स्थानं, ज्ञेय इति शेषः। [आश्रय इत्यत्र "आश्रये" इति पाठान्तरो दृश्यते, तदा पुंश्चल्योऽभिसरन्तीति शेषः इति बोध्यम्]।

(ब) कलहान्तरितामाह, चाटुकारमिति।—चाटुकारं—प्रियवक्तारम् अपि, प्राणनाथं—जीवितेशम्, उपस्थितमपीति शेषः, या रोषात्—क्रोधात्, अपास्य—विसृज्य, त्यक्त्वा इति यावत्, पश्चात्तापम्—अनुतापम्, अवाप्नोति, सा कलहान्तरिता नाम नायिका मता।

पादान्ते विनिपत्य तत्क्षणमसौ गच्छन् मया मूढया
पाणिभ्यामवरुध्य हन्त! सहसा कण्ठे कथं नार्पितः?"॥(भ)

प्रियः कृत्वाऽपि सङ्केतं यस्या नाऽऽयाति सन्निधिम्।
विप्रलब्धा तु सा ज्ञेया नितान्तमवमानिता॥१२२॥(म)

यथा,—

"उत्तिष्ठ दूति! यामो यामो यातस्तथाऽपि नाऽऽयातः।
याऽतः परमपि जीवेत् जीवितनाथो भवेत् तस्याः॥" (य)

नानाकार्य्यवशात् यस्या दूरदेशं गतः पतिः।
सा मनोभवदुःखार्त्ता भवेत् प्रोषितभर्त्तृका॥१२३॥(र)

(भ) उदाहरति, पादान्ते इति।—रोषात् नायकं निराकृत्य पश्चात्तापयुतायाः खण्डितं प्रत्युक्तिरियम्। [मूढया—मन्दबुद्ध्या मया, चाटुवचनं नो श्रुतं—सानुनयवचनं नो श्रुतं, प्रियस्येति शेषः, अन्तिके—समीपे, हारः, प्रियेण मनोविनोदार्थं दत्त इति शेषः, हन्त—चन्तुवा, च—अपि, न वीक्षितः,—दृष्टः, सोऽप्यवज्ञात इति यावत्, कान्तस्य—प्रियस्य, प्रियहेतवे—प्रियाचरणार्थं, निजसखीनां वाचोऽपि—अनुनयवचनान्यपि, दूरीकृताः,—न श्रुता इत्यर्थः, तत्क्षणं—तस्मिन् क्षणे, पादान्ते—मम चरणतले, विनिपत्य हन्त! [खेदसूचकमव्ययमिदम्], गच्छन् असौ—नायिकः, सहसा पाणिभ्याम् अवरुध्य कण्ठे—अत्र व्यञ्जनया कण्ठसमीपत्वात् वक्षसि इत्यर्थो बोध्यः, कथं न अर्पितः?—न क्षिप्तः? अथवा,—कण्ठे—गलदेशे, कथं नार्पितः? हार इति शेषः। शार्दूलविक्रीडितं वृत्तम्।

(म) विप्रलब्धामाह, प्रिय इति।—सङ्केतम्—आगमनावेदनम्। विप्रलब्धा—प्रतारिता। अन्यत् सर्वं स्पष्टम्।

(य) उदाहरति, उत्तिष्ठेति।—हे दूति! उत्तिष्ठ, यामः,—गच्छामः, उत्थानमिति शेषः, यामः,—प्रहरः, ("द्वौ यामप्रहरौ समौ" इत्यमरः) उपचारात् तद्वतिकाल इत्यर्थः, यातः,—व्यतीतः, तथाऽपि न आयातः,—नागतः, कान्त इति शेषः, अतः परम्—अनन्तरम्, अपि—सम्भावनायां, या नारी जीवेत्, तस्याः,—आर्य्यायाः, जीवितनाथः,—प्राणेश्वरः, भवेत्, स इति शेषः। आर्य्या वृत्तम्।

(र) प्रोषितभर्तृकालक्षणमाह, नानेति।—"नानाकार्य्यवशात्" इति प्राह-

यथा,—

"तां जानीथाः परिमितकथां जीवितं मे द्वितीयं
दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम्।
गाढोत्कण्ठां गुरुषु दिवसेष्वेषु गच्छत्सु बालां
जातां मन्ये शिशिरमथितां पद्मिनीं वाऽन्यरूपाम्॥" (ल)

सम्भवीरम्युपलक्षणम्। तेनोद्दीपनादरथे न अन्यान्निप्रसङ्गः। मनोभवः,—मनसः। अन्यत् स्पष्टम्।

(ल) उदाहरति, तामिति।—कुबेरशापात् प्रोषितस्य यक्षस्य मेघं प्रत्युक्तिरियम्। सहचरे—सहचारिणि, प्रेमवशात् सर्वत्रैव तया सह विहरणपर्यटनादिकारिणीति यावत्; [अनेन वियोगासहिष्णुत्वं द्योतितम्] मयि दूरीभूते—परतन्त्रतया तया विश्लिष्य दूरं स्थिते सति इति भावः, चक्रवाकीं—चक्रवाकस्त्रियम्, ["जातेरस्त्रीविषयादयोपधात्" (४।१।६३ पा०) इति ङीष्] इव (यथा सहचरे चक्रवाके दूरीभूते चक्रवाकी भवति, तथा) एकाम्—असहायां, परिमिता—अल्पजीवितावशेषतयाऽल्पा, कथा—जीवितसङ्ख्यानो यस्याः ताम्; यद्वा,—सदियागदुःखादल्पभाषिणीं, तां—मत्प्रियां, मे—मम, सम्प्रति किञ्चिदपि तत्सहाय्यं कर्तुमक्षमस्येति यावत्, द्वितीयं जीवितं जानीथाः ["जानीथाः" इति पाठान्तरम्] नतु तव तां गन्तुमादिशामि, किन्तु कथं तां ज्ञास्यामि? दूतस्यां दशायामाकारस्य वैपरीत्यसम्भवादित्याशङ्क्य परिज्ञानोपायं विदधाति, गाढेति।—गाढा—प्रबलविरहवेदनया विप्लुता, उत्कण्ठा—मत्समागमविषयाभिलाषो यस्यास्तथाभूतां, बालां—मुग्धां मत्प्रियाम्, अत एव एषु—वर्त्तमानेषु, गुरुषु—विरहवेदनाधिक्यतया दीर्घत्वेन प्रतीयमानेषु, दिवसेषु गच्छत्सु सत्सु, शिशिरेण—शिशिरकालजनितोपद्रवेण, मथितां—म्लानामित्यर्थः, पद्मिनीं वा—कमलिनीमिव, (वा शब्दः इवार्थः, "वा स्यादिवकल्पनयोरिवार्थे च समुच्चये" इति विश्वप्रकाशः; उत्तरार्द्धे द्वितीयान्तपदेषु प्रथमान्तपाठः क्वचित् पुस्तकेषु दृश्यते, तदा पुनः इव शब्द एव, न 'वा' शब्दश्चिन्त्यमस्य क्लिष्टकल्पना; "अथवा वद्वा यथा तद्वदेवं स्यात्" इत्यमरः) अन्यरूपां जातां—रूपान्तरं प्राप्तां, मन्ये—उत्प्रेक्षे। एतावता नेयमन्येति प्रतीतव्यम्। मन्दाक्रान्ता वृत्तं, "मन्दाक्रान्ताऽम्बुधिरसनगैर्मो भनौ गौ यदि स्याम्" इति तल्लक्षणात्।

कुरुते मण्डनं यस्याः सज्जिते वासवेश्मनि।
सा तु वासकसज्जा स्याद्विदितप्रियसङ्गमा॥१२४॥(व)

यथा राघवानन्दानां नाटके,—

"विदूरे केयूरे कुरु, करयुगे रत्नवलयै-
रलं, गुर्वी ग्रीवाऽऽभरणलतिकेयं, किमनया?।
नवामेकामेकावलिमयि! मयि त्वं विरचयेः
न पथ्यं नेपथ्यं बहुतरमनङ्गोत्सवविधौ॥" (श)

आगन्तुं कृतचित्तोऽपि दैवान्नाऽऽयाति यत्प्रियः।
तदनागमदुःखार्त्ता विरहोत्कण्ठिता तु सा॥१२५॥(ष)

(व) वासकसज्जामाह, कुरुते इति।—यस्याः वासवेश्मनि—शय्यागृहे, सज्जिते—शय्यापुष्पप्रदीपादिभिः मण्डिते सति, मण्डनं कुरुते, सखीजन इति शेषः, वासगृहं सज्जयित्वा सखीजनः यस्याः मण्डनादिकं करोतीत्यर्थः, सा विदितः,—ज्ञातः, प्रियसङ्गमः यया तादृशी सती वासकसज्जा स्यात्।

(श) उदाहरणं प्रस्तौति, विदूरे इति।—मण्डयन्तीं सखीं प्रति कस्याश्चिदुक्तिरियम्। केयूरे—भुजयोर्मध्ये धार्य्ये अङ्गदापरनामधेये आभूषणे इत्यर्थः, विदूरे—दूरवर्त्तिनी, कुरु, करयुगे रत्नवलयैः अलं—न कार्य्यमित्यर्थः, इयं ग्रीवाभरणलतिका—कण्ठभूषाविशेषः, गुर्वी—अतिमहती, अनया किम्?—न किमपि प्रयोजनमिति भावः, एतामपि धर्त्तुं न प्रभवामीत्याशयः; अयि सखि! त्वं मयि—मदर्थं, नवां—नवगुम्फिताम्, (अन्यथा परिरम्भणेन झटिति त्रुटिता स्यात्) एकां—केवलाम्, एकावलीम्—एकयष्टिकहारं, विरचयेः,—विरचितां कुरु, (अन्यथा बहुयष्टिको हारः स्तनोपपीडपरिरम्भणेऽन्तरायः स्यात्) अनङ्गोत्सवविधौ—कामोत्सवव्यापारे, बहुतरं नेपथ्यम्—अलङ्करणं, न पथ्यं—न इष्टम्, उपयुक्तमिति यावत्। यथा वा,—"अङ्गेष्वाभरणं करोति बहुशः पत्रेऽपि सञ्चारिणि, प्राप्तं त्वां परिशङ्कते, वितनुते शय्यां चिरं ध्यायति। इत्याकल्पविकल्पतल्परचनासङ्कल्पलीलाशत-व्यासक्ताऽपि विना त्वया वरतनुर्नैषा निशां नेष्यति॥" इति। शिखरिणी वृत्तम्।

(ष) विरहोत्कण्ठितामाह, आगन्तुमिति।—यत्प्रियः,—यस्याः कान्तः, आगन्तुम्—आयातुं, कृतचित्तोऽपि—विज्ञापितसङ्कल्पोऽपि, दैवात्—कार्य्यवशात्, न

यथा,—

"किं रुद्धः प्रियया ? कयाचिदथवा सख्या ममोद्वेजितः ?
किंवा कारणगौरवं किमपि ? यन्नाद्यागतो वल्लभः।
इत्यालोच्य मृगीदृशा करतले विन्यस्य वक्त्राम्बुजं
दीर्घं निश्वसितं, चिरञ्च रुदितं, क्षिप्ताश्च पुष्पस्रजः॥"(स)

इति साष्टाविंशतिशत-
मुत्तममध्याधमस्वरूपेण।
चतुरधिकाऽशीतियुतं
शतत्रयं नायिकाभेदाः॥१२६॥ (ह)

आयाति—नागच्छति; तदिति।—तस्य—कान्तस्य, अनागमेन—असमागमेन, दुःखं तेन आर्त्ता—पीड़िता, अत एव विरहेण उत्कण्ठिता—शारीरमानसतापान्विता, सा विरहोत्कण्ठिता नाम नायिका, मतेति शेषः।

(स) उदाहरति, किमिति।—सङ्केतस्थायाः कस्याश्चित् प्रियानागमने वितर्कोऽयम्। प्रियया—मत्तोऽप्यधिकप्रेमवत्या, अन्यया तत्पत्न्या वा, किं रुद्धः? अथवा कयाचित् मम सख्या—वयस्यया, दूत्या इति भावः, उद्वेजितः,—क्लेशितः, मम दोषमुद्भाव्य "अस्यां त्वया एवं देयम् आचरितव्यञ्च" इत्यादिप्रकारेण वा उद्वेगं प्रापितः? किम् इति शेषः। ("उद्वेगः स्तिमिते क्लेशे भये मन्थरगामिनि" इति शब्दार्णवः) किं वा—अथवा, किमपि—अनिर्दिष्टं, कारणगौरवं—प्रयोजनगुरुता, जातम्? यत्—येन हेतुना, अद्य वल्लभः,—प्रियः, न आगतः, इति आलोच्य—इत्येवं विचार्य्य, आत्मापराधवृक्षस्य फलमेतत् इत्येवं ततः परं निश्चित्येति भावः, मृगीदृशा—व्याकुलतया हरिणीसदृशचञ्चलनेत्रयेति भावः, करतले वक्त्रं—वदनमेवाम्बुजं कमलं, विन्यस्य—संस्थाप्य, दीर्घं यथा तथा निश्वसितं, चिरं—बहुक्षणं, रुदितञ्च, पुष्पस्रजः,—कुसुमदामानि, क्षिप्ताः,—परित्यक्ताश्च। शार्दूलविक्रीड़ितं वृत्तम्।

(ह) इतीति।—इति—निरुक्तप्रकारेण, अष्टाविंशत्या सहितं शतं, तत्सङ्ख्यका इत्यर्थः, उत्तममध्याधमस्वरूपेण, प्रत्येकं त्रैविध्येन इति शेषः, चतुरधिकाऽशीतियुतं शतत्रयं नायिकानां भेदा ज्ञेया इति। तथा हि—स्वीया तावत् मुग्धा, मध्या, प्रगल्भा चेति त्रिविधा; तत्र मुग्धा एकधैव। मध्याप्रगल्भे तु धीरा, अधीरा, धीरा-

ऽधीरा चेति त्रैविध्येन षड्विधे ; एताश्च षड्विधाः पुनः ज्येष्ठाः कनिष्ठाश्चेति द्वैविध्येन द्वादशविधाः ; ततश्च एकया मुग्धया मिलितास्त्रयोदश (१३) भेदाः सम्पद्यन्ते, एता एव स्वीयाः। परकीया परोढा, कन्यका चेति द्विविधा, सामान्या चैकविधा इति त्रयो (३) भेदाः पुनर्मिलिताः षोडश (१६)। एताश्च प्रत्येकं स्वाधीनभर्तृकाः, खण्डिताः, अभिसारिकाः, कलहान्तरिताः, विप्रलब्धाः, प्रोषितभर्तृकाः, वासकसज्जाः, विरहोत्कण्ठिताश्च इति अष्टावस्थाविशेषैः प्रत्येकम् अष्टविधत्वेन, परस्परं सङ्गणने (१६ × ८ = १२८) अष्टाविंशत्युत्तरशतविधाः सम्पद्यन्ते। अथवा—चतुरधिकशतं भेदाः स्वीयायाः (१३ × ८ = १०४), परकीयायाः षोडश (२ × ८ = १६), गणिकाया (१ × ८ = ८) अष्टौ, एतासां संयोजने अष्टाविंशत्यधिकशतभेदाः (१०४ + १६ + ८ = १२८) नायिकानाम्। एताः पुनः उत्तममध्यमाधमभेदेन चतुरधिकाशीत्युत्तरशतत्रयभेदाः (१२८ × ३ = ३८४)। पुनः दिव्य-अदिव्य-दिव्यादिव्यभेदेन द्विपञ्चाशदधिकैकादशशतं भेदाः (३८४ × ३ = ११५२)। अत्रेदं ज्ञातव्यम् ;—लज्जाऽऽतिशय्यप्राधान्यात् मुग्धायाः, लज्जामन्मथाऽऽतिशय्यप्राधान्यात् मध्यायाः, प्रौढिभावप्राधान्यात् प्रगल्भायाः, धैर्य्यप्राचुर्य्याद्धीरायाः, अधैर्य्यप्राचुर्य्यादधीरायाः, उभयप्राचुर्य्यात् धीराऽधीरायाः, प्रेमज्यैष्ठ्यातिशय्येन ज्येष्ठायाः, प्रेमकानिष्ठ्यातिशय्येन कनिष्ठायाः, गुप्तोपचारप्राचुर्य्येण परोढायाः, मुग्धावत् लज्जाद्यातिशय्येन कन्यकायाः, गणिकायाश्च वित्ताऽऽहरणातिशय्येन अष्टविधा नायिका यद्यपि समुदिता भवन्ति, तथाऽपि—"प्रस्थानं वलयैः कृतं प्रियसखैरस्रैरजस्रं गतं, दृष्ट्या न क्षणमासितं व्यवसितं चित्तेन गन्तुं पुरः। यातुं निश्चितचेतसि प्रियतमे सर्वे समं प्रस्थिताः, गन्तव्ये सति जीवित ! प्रियसुहृत्सार्थः किमु त्यज्यते ? ॥" इत्यादि उदाहरणान्तरकालमेव देशान्तराध्यवसायशालिनि प्राणवल्लभेऽपि स्वतन्त्रा नवमी प्रवत्स्यद्भर्तृका भवितुमर्हा स्यात्, प्रोषितभर्तृका-विप्रलब्धा-विरहोत्कण्ठितादौ तस्याः नान्तर्गमः, प्रियसन्निधाने तदयोगत्वात्, नान्तर्गमश्च कलहान्तरितायां, विवादाभावात् अतिरस्कृतत्वाच्च ; न च खण्डितायामपि अन्तर्गमः तस्याः, तदा प्रियतमे अन्योपभोगलक्षणदर्शनाभावात्, प्रियतमायाः क्रोधाभावप्रकाशपरिलक्षितत्वात्, काकुकातरावलोकनख्यापितहृदयस्य यथार्थपक्षपातप्रकाशनत्वाच्च ; न वासकसज्जायामस्या अन्तःस्थितिः, प्रचलति प्राणेश्वरे भूषणाऽऽभूषितकरणाद्यभावात् अतिक्लेशोद्गमप्रसङ्गाच्च ; कियत्परमेव वियोगोत्पत्तेः स्वामिनि स्वाधीनत्वविश्लेषाच्च न स्वाधीनभर्तृकात्वम् ; नाभिसारिकायामस्याः अन्तर्गतिः, उन्नतोत्साहाभावात् अन्तःक्लेशावलोकनाच्च। एतल्लक्षणञ्चापि "पतिर्देशान्तरं यस्याः यास्यत्येवोत्तरक्षणे। प्रवत्स्यत्पतिका सा स्यात् प्रयाणच्छेदनोद्यमा ॥" इति। विवेचितमिदं रसपयोधिगभीरता-

इह च "परस्त्रियौ कन्यकोढ़े सङ्केतात् पूर्वं विरहोत्कण्ठिते, पश्चाद्विदूषकादिना सहाभिसरन्त्यावभिसारिके, कुतोऽपि सङ्केतितस्थानमप्राप्ते नायके विप्रलब्धे, इति त्र्यवस्थैवानयोः अस्वाधीनप्रिययोरवस्थान्तरायोगात्" इति कश्चित्। (क)

क्वचिदन्योऽन्यसाङ्कर्य्यमासां लक्ष्येषु दृश्यते॥१२७॥(ख)

यथा,—

"न खलु वयममुष्य दानयोग्याः
पिबति च पाति च याऽसकौ रहस्त्वाम्।
विट! विटपममुं ददस्व तस्यै
भवति यतः सदृशोश्चिराय योगः॥ (ग)

निरूपकैः इति। विप्रलम्भशृङ्गारनिरूपणावसरे भाविनः प्रवासस्य कथने व्यक्तीभविष्यति चैतत्।

(क) मतान्तरं निर्दिशति, इहेति।—परस्त्रियौ—परकीये नायिके, कन्यकोढ़े—कन्यका अन्योढ़ा चेति द्विप्रभेदे भवत इत्यर्थः। [परस्त्रिया इति पाठान्तरे तु अभेदे तृतीयेति स्वीकृत्य परस्त्रीत्वाभिन्ने इत्यर्थः] ते च सङ्केतात्—अभिप्रायाविष्करणात्, पूर्वं—प्राक्, विरहोत्कण्ठिते—विरहावस्थायामुत्कण्ठाशालिन्यौ भवतः, पश्चात्—सङ्केतानन्तरं, विदूषकादिना सह, सम्मिल्य इति शेषः, अभिसरन्त्यौ—अभिसारं कुर्वत्यौ सत्यौ, अभिसारिके—"अभिसारिका" इति संज्ञाभागिन्यौ भवतः। अथ कुतोऽपि—कस्मादपि प्रतिबन्धात्, उपस्थितादवश्यमनुष्ठेयान्तरादित्यर्थः, नायके—कान्ते, सङ्केतितस्थानम्—अभिप्रायाविष्करणेनानुज्ञातं क्रीड़ानिकेतनम्, अप्राप्ते—अनागते सति, विप्रलब्धे—वञ्चिते, विप्रलब्धेतिसंज्ञाभागिन्यौ इत्यर्थः। इति—अस्मात् कारणात्, त्र्यवस्था—त्रिविधामवस्थामापन्ने इत्यर्थः, एव भवतः। ननु अवस्थान्तरमनयोरपि कुतो नेत्याह, अनयोरिति।—स्पष्टम्।

(ख) आसां—निरुक्तप्रकाराणां, चतुरधिकाशीत्युत्तरशतत्रयभेदानां नायिकानाम् इत्यर्थः, अन्योऽन्यसाङ्कर्य्यं—परस्परं लक्षणमेलनं, लक्ष्येषु—उदाहरणेषु, क्वचित्—न तु सर्वत्र इति भावः, दृश्यते।

(ग) नेति।—सपुष्पपल्लवां वृक्षशाखां प्रियायै प्रयच्छन्तं नायकं प्रति नायिकायाः उक्तिरियम्। हे विट!—धूर्त्त! वयम् अमुष्य—विटपस्य, दानयोग्याः,—दान-

तव कितव ! किमाहितैर्वृथा नः
क्षितिरुहपल्लवपुष्पकर्णपूरैः ? ।
ननु जनविदितैर्भवद्वधूनां
श्रिरपरिपूरितमेव कर्णयुग्मम् ॥ (घ)
मुहुरुपहसितामिवालिनादैः
वितरसि नः कलिकां किमर्थमेनाम् ? ।

पावादि, न खलु—नैव, या चसकौ—चसौ, ["अव्ययसर्वनाम्नामकच् प्राक् टेः" (५।३।७१ पा०) इति स्वार्थे अकच्] बाला रङ्गः,—विजने,त्वां पिबति—चुम्बतीत्यर्थः, पाति—रक्षति, अन्यरमणीभोगतः वारयति इत्यर्थः, तस्मै अमुं विटपं—सपुष्पपल्लवां शाखां,यदा,—पल्लवम् ; ("विटपो न स्त्रियां स्तम्ब-शाखाविस्तारपल्लवे। विटादिषे ना" इति मेदिनी) ददस्व—प्रयच्छ ; यतः,—दानात्, सङ्गमोः,—समनुरूपयोः युवयोः, विधाय योगः,—सङ्गेखनं, भवति । अयं भावः,—अयं विटपः (विटं शाखां पातीति तथोक्तः) सा च विटपा [विटं त्वां पिबति पातीति वा तथोक्ता "पातोऽनुपसर्गे कः" (३।२।३६ पा०) इति कः] तस्मात् युवयोरिवानयोरपि योगः साम्यतम् इति । नायकस्य सप्तमसर्गे श्लोकचतुष्टयमिदं विद्यते। सर्वमेव पुष्पितायां इत्तम् ;—"अनुजि मनुजैरेकतो यस्यारौ वुजि तु मनौ जरनाम पुष्पितायाम्" इति तल्लक्षणात् ।

(घ) तवेति ।—हे कितव !—धूर्त ! ("कितवस्तु पुमान् नक्ते वञ्चके जनवाक्षये" इति मेदिनी) वृथा—निरर्थकम्, आहितैः,—न्यासितैः, तत्सार्थक्यं चान्यथा सिद्धत्वादिति भावः ; तव—तत्सम्बन्धिनि:, क्षितिरुहाणां—वृक्षाणां, पल्लवाः पुष्पाणि चेति ताभ्येव, कर्णपूराः,—अवतंसाभ्यां, [कर्णे पूरयन्तीति कर्णपूराः, "कर्णेलक्षण्" (३।२।१ पा०) इत्यण्] नः,—अस्माकं, किम् ?—न किमपि साध्यमिति भावः । [गम्यमानसाधनक्रियाऽपेक्षया कर्णपूराभां करणत्वात् तृतीया ; तथोक्तम् ;—न केवलं गुणनायैव क्रिया निमित्तं कारकभावस्य, अपि तु गम्यमानाऽपि" इति] परन्तु ननु—भोः ! जनेषु विदितानि तैः [अत्र सप्तमीसमासः, "क्षेत्रे च पूजायाम्" (२।२।१२ पा०) इत्यत्र "क्षेत्रे च वर्तमाने" (२।१।६७ पा०) इत्यनेन प्राप्तस्य षष्ठीसमासस्य बाधकत्वात्] भवद्भिः,—तव, व्यलीकानि—असत्यान्यप्रियाणि वचनानि तैः, कर्णयोर्युग्म—कर्णयुगलं, विरेव परिपूरितं—पूर्णमेव, अतः तत्र पूरितस्य पूरणानौचित्यादकर्णैरिति भावः ।

वसतिमुपगतेन धाम्नि तस्याः
धृष्ठ! कलिरेष महांस्वयाऽद्य दत्तः॥ (ङ)
इति गदितवती रुषा जघान
स्फुरितमनोरमपक्ष्मकेसरेण।
अवधनियमितेन कान्तमन्या
सममसिताम्बुरुहेण चक्षुषा च॥" (च)

इयं हि वक्रोक्त्या परुषवचनेन कर्णोत्पलताडनेन च धीरमध्यताऽधीरमध्यताऽधीरप्रगल्भताभिः सङ्कीर्णा। एवमन्यत्रापि ज्ञेयम्। (छ)

इतरा अप्यसङ्ख्यास्ता नोक्ता विस्तरशङ्कया॥१२८॥(ज)

(ङ) मुहुरिति।—अलीनां—भ्रमराणां, नादाः,—झङ्काराः, मुहुः,—पुनः पुनरित्यर्थः, उपहसिताम्—उपहसितामिव स्थिताम्, एनां कलिकां—कोरकम्, अल्पं कलिं कलहञ्च ("कलिका कोरकः पुमान्" इत्यमरः "कलहे च युगे कलिः" इति च वैजयन्ती) ["अल्प" (५।३।८५ पा०) इति कः। स्त्रीप्रत्ययस्तु श्लेषार्थे सर्वत्र अविवक्षित एव] हे धृष्ठ!—गूढविप्रियकारिन्! किमर्थं नः,—अस्मभ्यं, वितरसि? यतः तस्याः,—स्त्रियायाः, [अत्र साक्षादनभिधानं स्वप्रतिकूलत्व द्योतयति] धाम्नि—भवने, ("धाम दीप्ते गृहे रश्मौ स्थाने जन्मप्रभावयोः" इति मेदिनी) वसतिं—वासम्, उपगतेन—प्राप्तेन, स्थितिं कृतवतेति यावत्, त्वया अद्य एषः,—वर्त्तमानः, महान् कलिः,—कलहः, दत्तः, भवद्वृत्ते एव दृढपरिसरे कलौ स्थिते किं प्रयोजनं तस्य कलान्तरवैलाभ्यम्।

(च) इतीति।—इति—इत्थं, गदितवती—उक्तवती, अन्या—पूर्वतो भिन्ना मानिनीत्यर्थः, रुषा—कोपेन, स्फुरिता मनोरमाः पक्ष्माण एव केसराः, पक्षे,—पक्ष्माग्रेष्व केसराः,—किञ्जल्काः यस्य तादृशेन, अवधनियमितेन—कर्णस्थितेन, आकर्णायतेन च, असिताम्बुरुहेण—नीलोत्पलेन, चक्षुषा च, सम—युगपदेव, कान्तं जघान—आहतवती, इत्यस्थितनीलोत्पलेन घटाघेव च ताडयामासेत्यर्थः।

(छ) इयं हीति।—उदाहृतचेष्टिता नायिका किलेत्यर्थः, वक्रोक्त्या—विदग्धजनानामर्थकल्पनारूपया विचित्रोक्त्या इत्यन्वयः। अन्यत् स्पष्टम्।

(ज) ननु विभेदा एव नायिकाभेदाः, इतरा अपीति।—पश्चिमोदङ्मिलोत्प्रलतयः

ताः,—नायिकाः।

अथाऽऽसामलङ्काराः,—

यौवने सत्त्वजास्तासामष्टाविंशतिसङ्ख्यकाः।
अलङ्कारास्तु भावहावहेलास्त्वयोऽङ्गजाः॥
शोभा कान्तिश्च दीप्तिश्च माधुर्य्यञ्च प्रगल्भता।

अमी अपि नायिकाः, अलङ्काराः,—अमिताः, सन्ति, अत "क्रियन्" इति जसन्तोऽयं, ताः विस्तरभयेन, न उक्ताः,—अधिताः; तथा हि,—पुनश्च ताः त्रिधा ज्ञेया दिव्यादिव्योभयात्मना। चतुर्धा धीरतोदात्ता ललिता प्रगल्भिका तथा॥ अथवा च धता यातायाता यायावरेत्यपि। पुनश्चतुर्धा कथिताः पूर्वैर्भोजादिभिर्बुधैः॥ पद्मिनी चित्रिणी चैव शङ्खिनी हस्तिनीति च। पुनः चतुर्धा कथिताः कामशास्त्रेषु कोविदैः॥ अथिनी वातला पित्तला श्लेष्मला पुनः त्रिधा। अवोत्तमानाञ्च भेदानां सङ्ख्योद्दामतो ब्रुवे॥ दिव्याः अप्सरादयः प्रोक्ता अदिव्याः मानवीमुखाः। दिव्याऽदिव्या इति प्रोक्ता जानकीरुक्मिणीमुखाः॥ गर्वमानिन्युद्धता स्यात् उदात्ता गूढमानिनी। ललिता साध्यमानेष्टा प्रगल्भा निर्मानमानसा॥ उदात्तैव भवेद्धीराऽधीरा तूद्धता मता। ललिता तु भवेन्मुग्धा प्रगल्भा खेदोत्तमा मता॥ मुक्ताऽन्येन पुरा पश्चादूढाऽन्येनाचता मता। मुग्धा अभिनवतेनोढा राज्ञा सत्यवती यथा॥ मते भर्त्तरि यत्सङ्गं स्थिता सा तु धता मता। यथा तारा रविसुतं स्थिता वालिनि मारिते॥ यातायाता तु युगपदूढाऽनेकेषु भर्तृभिः। यथा पाञ्चालतनयेद्धा द्रुपदज कुमारिका॥ ऊढैकेन तु सत्यन्ता क्रमादन्यान्यगा मता। यथा बहुवरेद्धा माधवी चोपलात्मजा॥ पद्मिनी पद्मवदना श्रिरीषमृदुका तथा। अङ्गिनी लाक्षारुणाङ्घ्री कोपित्वल्पसती तथा॥ दीर्घपादा द्रुतगतिः कुटिलाक्षी च शङ्खिका। हस्तिनी बहुभुक् क्रूरा निष्ठुरा पिङ्गलप्रभा॥ श्लक्ष्णा स्थूलाधरा गौर-शरीरा मन्दगामिनी। अथिनी हृद्यरागा स्यात् श्यामा सुस्निग्धलोचना॥ वातला तु कठोराङ्गी चञ्चला क्लमपायिका। श्याम-मुखरवर्णा च बहुभोज्या प्रजापिनी॥ पित्तला शोभनयना गौराङ्गी कुमला रते। सा चतुर्धा पुनरपि नायिका प्रतिनायिका॥ यथा द्रुपदजा प्रोक्ता वेणीसंहारनाटके। हैतुरोर्व्यादृङ्नादीनां सपत्ना प्रतिनायिका॥ दुर्योधनस्य दयिता तत्र भानुमती यथा। तत्राः केचिद्गुणैर्हीना पूज्या चैवोपनायिका। सना न्यूनाऽपि वा किञ्चित् गुणैरुत्तमनायिका॥" इति दिक्।

औदार्य्यं धैर्य्यमित्येते सप्तैव स्युरयत्नजाः।
लीला विलासा विच्छित्तिर्विब्बोकः किलकिञ्चितम्॥
मोट्टायितं कुट्टमितं विभ्रमो ललितं मदः।
विक्रतं तपनं मौग्ध्यं विक्षेपश्च कुतूहलम्॥
हसितं चकितं केलिरित्यष्टादशसङ्ख्यकाः।
स्वभावजाश्च भावाद्या दश पुंसां भवन्त्यपि॥१२९(झ)

पूर्वे भावादयो धैर्य्यान्ता दश नायकानामपि सम्भवन्ति, किन्तु सर्वेऽप्यमी नायिकाश्रिता एव विच्छित्तिविशेषं पुष्णन्ति। (ञ)

(झ) यौवने इति।—तासां—निदर्शनप्रकाराणां नायिकानां, यौवने—यौवनावस्थायाम्, अष्टाविंशतिसङ्ख्याकाः अलङ्काराः। तत्र सत्त्वजाः,—सत्त्वगुणजाताः, रजसनसो अभिभूयोज्जृम्भमाणं मानसतत्त्वं निमित्तीकृत्य सम्भूताः इति यावत्, भवन्ति इति शेषः; तत्र—तेषु मध्ये, अङ्गजाः,—अङ्गेषु जायन्ते इति तथोक्ताः, ["सप्तम्यां जनेर्डः" (३।२।९७ पा०) इति डः] ते च भावहावहेला इति त्रयः। अथ अयत्नजाः,—अयत्नात् जायन्ते इति यत्नमन्तरेणैव जायमाना इत्यर्थः, अङ्गविना इति भावः, ते च शोभाकान्तिदीप्तिमाधुर्य्यप्रागल्भ्यौदार्य्यधैर्य्याख्याः सप्त, एवं स्वभावाज्जायन्ते इति तथोक्ताः, ("स्वरूपे स्वभावस्य" इत्यमरः) ते च लीलाविलासविच्छित्तिविब्बोककिलकिञ्चितमोट्टायितकुट्टमितविभ्रमललितमदविक्रततपनमौग्ध्यविक्षेपकुतूहलहसितचकितकेलिनामानोऽष्टादश भवन्ति इति भावः। ["विक्रतम्" इत्यत्र "विहृतम्" इति पाठान्तरम्]।

(ञ) "भवन्त्यपि" इति 'अपि' शब्दस्य योजनां दर्शयन् विवृणोति, पूर्वे इति।—अत्र 'एव' इति पदमध्याहार्य्यम्; परिगणितेषु यौवनालङ्कारेषु मध्ये इत्यर्थः, भावादयः,—भावमारभ्य, धैर्य्यान्ताः,—धैर्य्यमित्यन्तं पठिताः, दशालङ्काराः नायकानामपि, न केवलं नायिकानामित्यर्थः, सम्भवन्ति, किन्तु एते सर्वे अपि नायिकाऽऽश्रिताः एव विच्छित्तिविशेषं—विलक्षणचमत्कारम् इत्यर्थः, पुष्णन्ति—पुष्टिं नयन्तीति, अत एव "अथ यौवनसम्भवाः," इत्युपक्रम्य कविराजेनापि नायिकाप्रकरणेनैव वर्णिताः।

तत्र भावः,—

निर्विकारात्मके चित्ते भावः प्रथमविक्रिया॥१३०॥(ट)

जन्मतः प्रभृति निर्विकारे मनसि उद्बुद्धमात्रो विकारो भावः।

यथा,—

"स एव सुरभिः कालः स एव मलयानिलः।
सैवेयमबला किन्तु मनोऽन्यदिव दृश्यते॥" (ठ)

अथ हावः,—

भ्रूनेत्रादिविकारैस्तु सम्भोगेच्छाप्रकाशकः।
भाव एवाल्पसंलक्ष्यविकारो हाव उच्यते॥१३१॥ (ड)

(ट) भावमाह, निर्विकारेति।—निर्विकारात्मके—अविकृते, चित्ते—मनसि, प्रथमविक्रिया—प्रथमः विकारः, भावः। ["निर्विकारात्मकात् सत्त्वाद्भावस्तत्राद्य-विक्रिया" इति पाठान्तरे—सत्त्वात्—मानसधर्मविशेषात्, तत्र—तेषु अलङ्कारेषु, आद्या—प्रथमा, विक्रिया—विकारः, सम्भोगेच्छायाः प्राक् प्रकृतिविपर्य्यास इति यावत्]। स्पष्टमन्यत्।

(ठ) उदाहरति, स एवेति।—स एव—अनेकशोऽनुभूतः, सुरभिः कालः,—वसन्त ऋतुः, स एव—बहुशः सेवितः, मलयानिलः,—उपचारान्मलयाचलसम्भूत-चन्दनगन्धवह इति भावः, सैव—यया सुरभिर्मलयानिलश्चोभौ सेवितौ सा एव इयम्, अबला, किन्तु मनः अन्यदिव—कौमारकालिकावस्थातो भिन्नमिव, दृश्यते—प्रतीयते, यौवनाविर्भावात् मनसः अन्यथाभावः संवृत्त इति भावः। अत्र मुग्धात्वेन भाव्यमानाया अपि नायिकाया मनसः किञ्चिद्विपरीतत्वसम्भाव्यमानतोक्त्या स्फुटं लक्षणसमन्वयः।

(ड) हावमाह,भ्रूनेत्रादीति।—भ्रूनेत्रादीनां विकाराः,—विपर्य्यासास्तैः,कौमारे चाञ्चल्यादिरहितानां नेत्रादीनां चाञ्चल्यादिरूपप्रकृतिविपर्य्यासैरित्यर्थः,सम्भोगे—चुम्बनालिङ्गनादिरूपे, या इच्छा तां प्रकाशयतीति तथोक्तः, अल्पम्—अस्पष्टं, संलक्ष्यः,—प्रकटनीयः, विकारः,—परिवर्त्तनं यस्य तादृशः, ईषल्लक्ष्यस्वभाव इति यावत्, भावः एव,—निरुक्तलक्षण इत्यर्थः, (एतेन हेलालक्षणातिव्याप्तिः वारिता) हावः उच्यते।

यथा,—

"विहसन्ती शैलसुताऽपि भावमज्ञैः स्फुरद्गण्डकदम्बकल्पैः।
साचीकृता चारुतरेण तन्वी मुखेन पर्य्यस्तविलोचनेन॥" (ढ)

अथ ईहा,—

ईहाऽत्यन्तसमालब्धविकारः स्यात् स एव च ॥१२५॥(ण)

स एव—भाव एव। यथा,—

"तह से झत्ति पउत्ता बहुए सव्वंगविब्भमा सअला।
संसइअमुद्धभावा होइ चिरं जह सहीणं पि॥" (त)

["ईषाकस्तु समुत्कारो भावोऽचिभ्रूविलासवान्" इति पाठान्तरे तु नेत्रभ्रूकुञ्चादीनां विलासहेतुः समुत्कारः स्वभावविशेषो ईषाकः भाव इत्यर्थः]।

(ढ) भावमुदाहरति, विहसन्तीति।—शैलसुता—शैलस्य—पर्वतस्य, हिमालयक्षेत्रेति यावत्, सुता—पुत्री, पार्वतीत्यर्थः, (अत एव "जाओ हिमवतोत्तरी" इत्यमरोक्तं सङ्गच्छते) अपि, स्फुरद्गण्डकदम्बकल्पैः,—स्फुरतः विकसतः, गण्डकदम्बात् धूर्त्तधतूरानि लक्ष्यन्ते, विकसितामिनवगण्डकदम्बसदृशैरित्यर्थः, उद्भटपुलकैरिति भावः, अक्षैः,—नयनैः, भावं—रत्याख्यं मनोविकारविशेषं, विहसन्ती—प्रकटयन्ती, पर्य्यस्तविलोचनेन—शिवे परिचिन्तनेनेव, विभाव्यनेनेव इति यावत्, अत एव चारुतरेण—अतिमनोहरेण, मुखेन साचीकृता—ईषत् वक्रीकृता सती, तन्वी। अत्राङ्गानां गण्डकदम्बवर्णनेन पुलकत्वाक्षत्वं, तेन च भावत्वाक्षत्वं प्रतीयते। उपेन्द्रवज्रेन्द्रवज्रयोरुपजातिः इत्तम्। कुमारसम्भवस्थेदं पद्यम्।

(ण) ईहामाह, ईहेति।—अत्यन्तं समालब्धः विकारो यत्र तादृशः, स एव—निरूपितस्वरूपः भावरूपो भाव एव, ईहा स्यात्। [अत्र पुस्तकान्तरे—"स एव ईहा सुव्यक्तसमुत्काररसूचिका" इति, "भाव एव स्पष्टभूतो विकारभूतत्वात् सुव्यक्तसमुत्काररसूचको ईहा" इति द्वौ च पाठान्तरमुपलभ्यते]।

(त) ईहामुदाहरति तह इति।—["तथा तत्रा झटिति प्रहृष्टा वध्वः सर्वाङ्गविभ्रमाः सकलाः। संशयितमुग्धभावा भवन्ति चिरं यथा सखीनामपि॥" इति संस्कृतम्] अस्यार्थः;—तत्रा: वध्वः,—नवोढ़ायाः वालायाः, झटिति—सहसा, सकलाः,—समग्राः, सर्वाङ्गेषु विभ्रमाः,—विलासाः, तथा प्रहृष्टाः,—सञ्जाताः, यथा सखीनां—सहचरीणाम् अपि, किमयमेवमिति भावः, चिरं—चिरात्, संशयित-

अथ शोभा,—

रूपयौवनलालित्यभोगाद्यैरङ्गभूषणम्।
शोभा प्रोक्ता ॥ १३३ ॥ (थ)

तत्र यौवनशोभा,—

असम्भृतं मण्डनमङ्गयष्टेरनासवाख्यं करणं मदस्य।
कामस्य पुष्पव्यतिरिक्तमस्त्रं बाल्यात् परं साऽथ वयः प्रपेदे॥"(द)

एवमन्यत्रापि।

अथ कान्तिः,—

सैव कान्तिर्मन्मथाऽऽप्यायितद्युतिः ॥१३४॥

मुग्धभावाः—सन्दिग्धशैशवाः, "अहो सुकुमाराङ्गीयं कथं यौवनाक्रान्तेव परिलक्ष्यते" इति भावनायाः सहसा समुद्भावका इति यावत्, भवन्ति। अत्र मुग्धतायाः सखीनामपि संशयापादकत्वकथनेन स्फुटमत्यन्तलक्ष्यमनोविकारविशेषत्वं नायिकायाः इति बोध्यम्।

(थ) शोभामाह, रूपेति।—रूपञ्च यौवनञ्च लालित्यं—सौन्दर्य्यञ्च, अङ्गानां सुकुमारत्वम् इति यावत्; (ललितं त्रिषु सुन्दरम्" इत्यमरः) भोगाद्याश्चेति तैः [अत्र इत्थम्भूतलक्षणे तृतीया, यद्वा—करणे एव तृतीया] अङ्गभूषणम्—अङ्गानां करचरणादीनां भूषणं शोभमानत्वमित्यर्थः, शोभा—तन्नामा भावः, प्रोक्ता ["रूपोपभोगतारुण्यैः शोभाऽङ्गानां विभूषणम्" इति पाठान्तरेऽपि रूपं—सौष्ठवविशेषः, उपभोगः,—ताम्बूलादिसेवनं, तारुण्यं—यौवनञ्च तैस्तद्द्वारा अङ्गानां विभूषणं शोभेत्यर्थः]।

(द) रूपशोभायाः प्रसिद्धत्वात् यौवनशोभामुदाहरति, असम्भृतमिति।—अथ—शैशवादनन्तरं, सा—पार्वती, अङ्गयष्टेः,—अङ्गं यष्टिरिवेति तस्याः, असम्भृतम्—अनाहृतं, मण्डनं—भूषणम्, अनासवाख्यम्—आसवाख्यारहितम्, आसवव्यतिरिक्तमित्यर्थः, मदस्य—मत्ततायाः, करणं—साधनं, कामस्य—मदनस्य, पुष्पव्यतिरिक्तं—पुष्पभिन्नम्, अस्त्रं, बाल्यात् परं वयः,—यौवनमित्यर्थः, प्रपेदे—प्राप। यौवनेनैव युवतयः प्रसाध्यन्ते काम्यन्ते चेति भावः। उपेन्द्रवज्रेन्द्रवज्रयोरुपजातिः वृत्तम्। कुमारसम्भवस्येदं पद्यम्।

मन्मथोन्मेषेणातिविस्तीर्णा (ध) शोभैव कान्तिरुच्यते। यथा,—"नेत्रे खञ्जनगञ्जने" इत्यादि।

अथ दीप्तिः,—

कान्तिरेवातिविस्तीर्णा दीप्तिरित्यभिधीयते॥ १३५॥(न)

यथा मम चन्द्रकलानामनाटिकायां चन्द्रकलावर्णनम्,—

"तारुण्यस्य विलासः समधिकलावण्यसम्पदो हासः।
धरणितलस्याभरणं युवजनमनसो वशीकरणम्॥" (प)

अथ माधुर्य्यम्,—

सर्वावस्थाविशेषेषु माधुर्य्यं रमणीयता॥ १३६॥

यथा,—

"सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।

(ध) कान्तिमाह, सैवेति।—सैव—शोभैव, मन्मथेन—कामेन, आप्यायिता—वर्द्धिता, द्युतिः यस्याः तथाभूता, कान्तिः, उच्यते इति शेषः। [क्वचित् पुस्तकेषु "मन्मथोन्मेषेण" इति पङ्क्तिर्नास्ति, ततः परम् "उन्मीलद्वदनेन्दुदीप्तिविसरैर्दूरे समुत्सारितं भिन्नं पीनकुचस्थलस्य च रुचा हस्तप्रभाभिर्हतम्। एतस्याः कलविङ्ककण्ठकदलीकल्पं मिलत्कौतुकादप्राप्ताङ्गसुखं रुषेव सहसा केशेषु लग्नं तमः॥" इत्युदाहरणनिवेशो दृश्यते। कलविङ्कः,—पक्षिविशेषः, तत्कण्ठसदृशं कृष्णमिति भावः। स्पष्टमन्यत्]।

(न) दीप्तिमाह, कान्तिरिति।—अतिविस्तीर्णा—समधिकविसरणशीला। स्पष्टमन्यत्।

(प) दीप्तिमुदाहरति, तारुण्यस्येति।—तारुण्यस्य—यौवनस्य, विलासः,—स्फुरणं, लक्षणया तथाभूता इति भावः, एवमुत्तरत्रापि; समधिकं यत् लावण्यं,—"मुक्ताफलेषु छायायास्तरलत्वमिवान्तरा। प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते॥" इत्युक्तं किमपि सौन्दर्य्यं, तदेव सम्पत् तस्याः, हासः,—हास्यं, विकास इत्यर्थः, धरणितलस्य—पृथिव्याः, आभरणम्—अलङ्कारः, तथा युवान एव जनाः, तेषां मनसः,—चित्तस्य, वशीकरणम्। अत्र चन्द्रकलायां तारुण्यविलासादीनामतिशयद्योतनं लक्षणायाः प्रयोजनम्। आर्य्या वृत्तम्।

इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम् ? ॥" (फ)

अथ प्रगल्भता,—

निःसाध्वसत्वं प्रागल्भ्यम् ॥ १३७ ॥ (ब)

यथा,—

"समाश्लिष्टाः समाश्लेषैश्चुम्बिताश्चुम्बनैरपि।
दष्टाश्च दंशनैः कान्तं दासीकुर्वन्ति योषितः ॥" (भ)

(फ) माधुर्य्यमुदाहरति, सरसिजमिति।—शकुन्तलायाः वल्कलधारणेऽपि शोभातिशयमनुभवतः दुष्मन्तस्य स्वयं परामर्शोऽयम्। सरसिजं—कमलम् ("अब्जं सरसिजं पद्मम्" इति कोषः) शैवलेन—जलाच्छादिकया जलनील्या, ("जलनीली तु शैवालं शैवलः" इत्यमरः) अनुविद्धं—व्याप्तं, सम्बद्धम् इति यावत्, अपि, रम्यं—मनोहरं, हिमांशोः,—चन्द्रस्य, लक्ष्म—चिह्नं, कलङ्क इति यावत्, ("चिह्नं लक्ष्म च लक्षणम्" इत्यमरः) मलिनमपि—स्वभावतो घृणितमपीति भावः, लक्ष्मीं—शोभां, तनोति—विस्तारयति; इयं—पुरो दृश्यमाना, जगत्त्रयसुन्दरीणां मुख्येति भावः, तन्वी—कृशाङ्गी, शकुन्तलेत्यर्थः, वल्कलेन—वृक्षत्वचा, अतितुच्छवस्तुनेति यावत्, अपि—किं पुनरुत्कृष्टवस्तुनेति अपिशब्दार्थः, अधिकमनोज्ञा—अत्यन्तं मनोरमा, हि—तथा हि, मधुराणां—स्वभावतो रमणीयानाम्, आकृतीनाम्—आकाराणां, किमिव न मण्डनं—भूषणम्? अपि तु सर्वमेव तुच्छं महद्वा वस्तु मण्डनं भवतीत्यर्थः। अभिज्ञानशाकुन्तलस्येदं पद्यम्। मालिनी वृत्तम्।

(ब) प्रागल्भ्यमाह, निःसाध्वसत्वमिति।—निःसाध्वसत्वं—निर्भीकत्वम्, असङ्कुचितत्वमिति यावत्, ("भीतिर्भीः साध्वसं भयम्" इत्यमरः) प्रागल्भ्यं—प्रौढ़त्वमित्यर्थः। मनःक्षोभपूर्वकोऽङ्गसादः साध्वसं, तदभावः प्रागल्भ्यमिति भावः।

(भ) प्रागल्भ्यमुदाहरति, समाश्लिष्टा इति।—योषितः,—नार्य्यः, (कान्तेनेति सर्वत्र योज्यम्) समाश्लिष्टाः,—समालिङ्गिताः सत्यः, समाश्लेषैः,—गाढ़ालिङ्गनदानैः, चुम्बिताः सत्यः चुम्बनैः,—मुखस्य कपोलफलकस्य चोपरि सम्बन्धविधानैः, दष्टाश्च सत्यः दंशनैः,—दशनाघातव्यापारैः, कान्तं—प्रियं, दासीकुर्वन्ति—अधीनीकुर्वन्ति इत्यर्थः। पथ्यावक्त्रं वृत्तं,—"युजोश्चतुर्थतो जेन पथ्यावक्त्रं प्रकीर्त्तितम्" इति तल्लक्षणम्। ["तथा व्रीडाविधेयाऽपि तथा मुग्धाऽपि सुन्दरी। कलाप्रयोगचातुर्य्यसभाप्राचार्य्यतां गता॥" इत्युदाहरणान्तरं पुस्तकान्तरे दृश्यते]।

अथ औदार्य्यम्,—

औदार्य्यं विनयः सदा ॥ १३८ ॥ (म)

यथा,—

"न ब्रूते परुषां गिरं, वितनुते न भ्रूयुगं भङ्गुरं,
नोत्तंसं क्षिपति क्षितौ श्रवणतः, सा मे स्फुटेऽप्यागसि।
कान्ता गर्भगृहे गवाक्षविवरव्यापारिताक्ष्या वहिः,
सख्या वक्त्रमभि प्रयच्छति परं पर्य्यश्रुणी लोचने ॥" (य)

अथ धैर्य्यम्,—

मुक्तात्मश्लाघना धैर्य्यं मनोवृत्तिरचञ्चला ॥१३९॥(र)

(म) औदार्य्यमाह, औदार्य्यमिति।—सदा—सर्वस्मिन् काले, विनयः,—नम्रता, शिष्टाचार इति यावत्, औदार्य्यम्—उदारत्वं नाम अलङ्कार इत्यर्थः।

(य) उदाहरति, नेति।—सा—धीराऽधीरा कान्ता, मे—मम, आगसि—अपराधे, ("पापापराधयोरागः" इत्यमरः) स्फुटे—व्यक्तेऽपि, अन्यस्या उपभोगरूपेऽपराधे प्रकाशीभूतेऽपीत्यर्थः, परुषां—कर्कशां, गिरं—वाचं, न ब्रूते—न कथयति; भ्रूयुगं—भ्रूद्वयं, भङ्गुरं—कुटिलं, न वितनुते—न करोति; तथा श्रवणतः,—कर्णाभ्याम्, उत्तंसम्—अवतंसं, कर्णभूषणमित्यर्थः, क्षितौ—धरण्यां, न क्षिपति; (क्षेपणं हि क्रोधचिह्नम्) परं—केवलम्, [इदमव्ययम्] गर्भगृहे—वासगृहाभ्यन्तरे, स्थिता सतीति शेषः, वहिः गवाक्षविवरेण व्यापारिते—पर्य्यवेक्षणार्थं चालिते, क्षिप्ते इति यावत्, अक्षिणी यया तादृश्याः, सख्याः वक्त्रं—वदनम्, अभि—लक्ष्यीकृत्य इत्यर्थः, ["अभिरभागे" (१।४।९१ पा०) इति द्वितीया] पर्य्यश्रुणी—अश्रुपूर्णे, लोचने प्रयच्छति—पातयतीत्यर्थः। शार्दूलविक्रीडितं वृत्तम्।

(र) धैर्य्यमाह, मुक्तेति।—मुक्ता—त्यक्ता, आत्मश्लाघना—निजगुणाविष्करणं यस्यां तादृशी, अचञ्चला—अचपला, मनोवृत्तिः धैर्य्यम्। ["चापलाविहिता धैर्य्यं चिद्वृत्तिरविकत्थना" इति पाठान्तरे तु,—चापलेन—चपलतया, अविहिता—न कृता, तथा अविकत्थना—आत्मनः श्लाघारहिता, तादृशी या चिद्वृत्तिर्मनोवृत्तिः, तत् धैर्य्यमित्यर्थः; अत एव वृत्तौ "चापलानुपहता मनोवृत्तिरात्मगुणानाख्यायिका धैर्य्यम्"। तथा चोक्तम्;—"शीलानुल्लङ्घनं धैर्य्यं कीर्त्यतेऽत्र मनीषिभिः" इति तदग्रिमोऽंशः पुस्तकान्तरादप्युपलभ्यते]।

यथा,—

"ज्वलतु गगने रात्रौ रात्रावखण्डकलः शशी
दहतु मदनः किंवा मृत्योः परेण विधास्यति ?।
मम तु दयितः श्लाघ्यस्तातो जनन्यमलान्वया
कुलममलिनं, न त्वेवायं जनो न च जीवितम् ॥" (ल)

अथ लीला,—

✓अङ्गैर्वेशैरलङ्कारैः प्रेमिभिर्वचनैरपि ।
प्रीतिप्रयोजितैर्लीलां प्रियस्यानुकृतिं विदुः॥१४०॥(व)

(ल) उदाहरति, ज्वलतु इति ।—रात्रौ रात्रौ—प्रतिरात्रमित्यर्थः, [वीप्सायां द्विर्भावः] गगने—आकाशे, अखण्डाः,—समस्ता अविकलाः वा, (वियोगिजनानां संहारार्थमुद्यतवैभवाः) कला यस्येति अखण्डकलः—सम्पूर्णः, उद्धतप्रभावो वा इत्यर्थः, शशी—चन्द्रमाः, ज्वलतु—विरहिजने अग्नितुल्यकिरणान् विस्तारयतु इत्यर्थः ; मदनः, —कामः, दहतु—भस्मीकरोतु, मृत्योः परेण—मरणातिरिक्तमित्यर्थः, किंवा विधास्यति ? —करिष्यति ? मृत्युपर्य्यन्तविधानमेव तद्विक्रमस्य चरमसीमेति भावः ; मम तु दयितः, —पतिः, तातः,—पिता च, श्लाघ्यः,—प्रशंसनीयः, दयितपक्षे—अभिमतः, पितृपक्षे—माननीयः इत्यर्थः ; केचित्तु—मम तु तातः पिता, दयितः प्रियः, श्लाघ्यश्च इति पत्यर्थे विहाय व्याचख्युः ; जननी—माता, अमलान्वया—विशुद्धवंशीया, कुलं—स्वामिकुलं, पितृकुलं, मातृकुलञ्चेत्यर्थः, अमलिनं—कलङ्करहितम्, अयं जनः,—(आत्मानमुद्दिश्येदमुक्तमिति) अहमित्यर्थः, न तु एव—न स्थिरः, जीवितञ्च न, स्थिरमिति शेषः ; अतः अस्थिरस्य देहस्य जीवनस्य च कृते पितृमातृभर्तृकुलानि किमिति कलङ्कनीयानीति भावः । [इदमुक्तम् ;—"न जातु कामान्न भयान्न लोभात् धर्मं त्यजेज्जीवितस्यापि हेतोः । धर्मो नित्यो जीवितं चाप्यनित्यं देहोऽनित्यो हेतुरस्याप्यनित्यः ॥" "धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः" इत्याद्युक्त्या धर्मः कदाऽपि न परिहातव्यः इति] । हरिणी वृत्तं,—"नसमरसला गः षड्वेदैर्हयैर्हरिणी मता" इति तल्लक्षणात् ।

(व) लीलां लक्षयति, अङ्गैरिति ।—प्रीतिप्रयोजितैः,—प्रीत्या—हर्षेण, प्रेमणा इति यावत्, प्रयोजितैः,—अनुष्ठानादिभिः स्वीकृतैरित्यर्थः, अङ्गैः,—करचरणादिसञ्चालनैरित्यर्थः, वेशैः,—नेपथ्यैः, अलङ्कारैः,—आभूषणैः, प्रेमिभिः—प्रेमवद्भिः, प्रेम-

यथा,—

"मृणालस्यानवलया वेणोरन्ध्रकपर्दिनी।
हरानुकारिणी पातु लीलया पार्वती जगत्॥" (ग)

अथ विलासः,—

यानस्थानाऽऽसनाऽऽदीनां मुखनेत्रादिकर्मणाम्।
विशेषस्तु विलासः स्यादिष्टसन्दर्शनादिना॥१४१॥(घ)

यथा,—

"अत्रान्तरे किमपि वाग्विभवातिवृत्त-
वैचित्र्यमुक्तसितविभ्रममायताक्ष्याः।
तद्भूरिसात्त्विकविकारमपास्तधैर्य-
माचार्यकं विजयि मान्मथमाविरासीत्॥" (ङ)

सृणकैरिति यावत्, वचनैः,—उक्तिभिश्च, प्रियस्य—नायकस्य, अनुकृतिम्—अनुकरणं, लीला विदुः। ["लीला प्रियानुकरणं वाग्भिर्गत्याऽथ चेष्टितैः" इति पाठान्तरेऽप्ययमेवार्थः]।

(ग) लीलामुदाहरति, मृणालेति।—मृणालमेव व्यालः,—सर्पः, वलयं—कङ्कणं यस्याः तादृशी, वेणोरन्ध्रः,—छिद्रमेव, कपर्दः,—जटाजूटः तच्छालिनी, अत एव लीलया हरस्य—शम्भोः, अनुकारिणी पार्वती जगत् पातु—रक्षतु। ["इयं चेष्टाऽनुरागेण तथाऽनुकुरुते प्रियम्। मुक्ताऽऽलूयां सपत्नीऽपि लीलते वसुधं यथा॥" इत्युदाहरणान्तरं पुस्तकान्तरे]।

(घ) विलासमाह, यानेति।—इष्टस्य—प्रियस्य, सन्दर्शनादिना (आदिनाऽऽसनसम्भाषादीनां ग्रहणम्) यानं—गमनं, स्थानं—स्थितिः, आसनम्—उपवेशनं, तान्यादौ येषां तेषां यानप्रभृतीनामित्यर्थः, तथा मुखनेत्रादिकर्मणां विशेषः,—वैचित्र्यं, विलासः स्यात्। ["तात्त्विको विशेषस्तु विलासोऽङ्गक्रियाऽऽदिषु" इति पाठान्तरेऽप्ययमेवार्थः]।

(ङ) उदाहरति, अत्रेति।—मायताः मायवत्यः मायवत्यश्च ताः, षष्ठीसप्तम्योः तद्वचनमिदम्। अत्र—अस्मिन्, अन्तरे—अवसरे, आयताक्ष्याः,—दीर्घनेत्रायाः मायताः,; किमपि—अनिर्दिष्टमित्यर्थः, वाचां विभवं—वाग्वैभवम्, अति-

अथ विच्छित्तिः,—

स्तोकाऽप्याकल्परचना
विच्छित्तिः कान्तिपोषकृत् ॥ १४२ ॥ (ह)

यथा,—

"स्वच्छाम्भःस्नपनविधौतमङ्गमोष्ठ-
स्ताम्बूलद्युतिविशदो विलासिनीनाम्।
वासस्तु प्रतनु विविक्तमस्त्वितीयान्
आकल्पो यदि कुसुमेषुणा न शून्यः ॥ (क)

वृत्तम्—अतिक्रान्तं, वैचित्र्यं—गमनादिचातुरी यस्य तथोक्तम्, अवचनीयवैचित्र्य-मित्यर्थः, उल्लसितेति।—उल्लसिताः,—प्रकटिताः, विभ्रमाः,—विलासविशेषाः यत्र तादृशं, भूरीति।—भूरयः,—बहवः, सात्त्विकाः,—स्तम्भस्वेदादयः, विकाराः यस्मिन्; यद्वा,—ते—प्रसिद्धाः, भूरीणां—बहूनां, सात्त्विकानां—सात्त्विकभावानां, विकाराः,—अनुभावाः यस्मात् तथाभूतम्, अपास्तं—निरस्तं, धैर्य्यं—धीरता यस्मात् तत्, धैर्य्यविध्वंसकमित्यर्थः, विजयि—विजयशीलं, तत्—स्तम्भस्वेदादिकारणतया प्रसिद्धं, मान्मथं—मदनसम्बन्धि, आचार्य्यकम्—आचार्य्यकर्म, शिक्षकताकार्य्य-मित्यर्थः, आविरासीत्—प्रकटीबभूव। वसन्ततिलकं वृत्तम्। मालतीमाधवस्य पद्यमिदम्।

(ह) विच्छित्तिमाह, स्तोकेति।—स्तोकाऽपि—अल्पाऽपि, कान्तिपोषकृत्—सौन्दर्य्यवर्द्धिनी, आकल्परचना—अलङ्काररचना, वेशविन्यास इति यावत्, विच्छित्तिः,—तदाख्यो भाव इति यावत्, [विपूर्वकात् छिदेः क्तिः] मतेति शेषः। ["स्तोक-भूषणयोगेन विच्छित्तिरतिरम्यता" इति पाठान्तरम्]।

(क) उदाहरति, स्वच्छेति।—विलासिनीनां—कामिनीनाम्, अङ्गं स्वच्छेन—विमलेन, अम्भसा—जलेन, स्नपनेन—स्नानेन, विधौतं—विशेषतः क्षालितम्, ओष्ठः ताम्बूलानां द्युत्या—रागेण, विशदः,—रञ्जितः इति भावः, वासस्तु—वस्त्रं पुनः, प्रतनु—अतिसूक्ष्मं, तथा विविक्तं—पूतं, निर्मलमिति यावत्, ("विविक्तौ पूतविजनौ" इत्यमरः) इति—एवम्प्रकारः, इयान्—एतावान् एव इत्यर्थः, आकल्पः,—भूषणम्, अस्तु—पर्य्याप्तं भवतु इत्यर्थः, नान्यैः प्रयोजनमित्याशयः, यदि स आकल्पः कुसु-मेषुणा—कामेन, उपचारात् मदनोन्मेषजनितभावविशेषेण, शून्यः,—रहितः, न,

अथ विव्वोकः,—

विव्वोकस्त्वतिगर्वेण वस्तुनीष्टेऽप्यनादरः ॥१४३(ख)

यथा,—

"यासां सत्यपि सद्गुणानुसरणे दोषानुवृत्तिः परा
याः प्राणान् वरमर्पयन्ति न पुनः सम्पूर्णदृष्टिं प्रिये।
अत्यन्ताभिमतेऽपि वस्तुनि विधिर्यासां निषेधात्मकः
तास्त्रैलोक्यविलक्षणप्रकृतयो वामाः प्रसीदन्तु ते ॥"(ग)

अथ किलकिञ्चितम्,—

स्मितशुष्करुदितहसित-
त्रासक्रोधश्रमादीनाम्।

स्यादिति शेषः; यत्किञ्चिदाभरणमस्तु, किन्तु तत् मदनाविर्भावजनितभावव्यञ्जकं भवितुमर्हतीति निर्गलितार्थः। प्रहर्षिणी वृत्तं—"त्र्याशाभिर्मनजरगाः प्रहर्षिणीयम्" इति तल्लक्षणात्। शिशुपालवधस्येदं पद्यम्।

(ख) विव्वोक इति।—अतिगर्वेण—अहङ्कारातिशयेन, इष्टे—प्रियेऽपि, वस्तुनि—विषये, अनादरः,—अयत्नः, विव्वोकः।

(ग) उदाहरति, यासामिति।—कश्चित् कामिनं प्रति तदभिलषितकामिनी-सख्या आशीर्वचनमिदम्। सद्गुणानुसरणे—सद्गुणानाम् अनुसरणे—परैरुद्भावने सत्यपि, यासां—नारीणां, परा—केवला दोषानुवृत्तिः,—दोषाणाम् अनुवृत्तिः,—स्वयं पुनःपुनरुद्भावनमित्यर्थः, प्रतीपदर्शिनीत्वात् गुणेष्वपि केवलं दोषग्रहणमिति भावः; याः वरं प्राणान् अर्पयन्ति—परित्यजन्तीत्यर्थः, प्रिये—पत्यौ, सम्पूर्णदृष्टिं न पुनः, अर्पयन्तीति शेषः, मानग्रहिला हि प्राणपरित्यागेऽपि न खिद्यन्ति, परं मानं विहाय नायकचित्तसन्तोषमुत्पादयितुं नोत्सहन्ते इति भावः, अत्यन्ताभिमते—अतिप्रियेऽपि, वस्तुनि—विषये, सम्भोगव्यापारे इति यावत्, यासां निषेधात्मकः विधिः,—व्यापार इत्यर्थः, अत एव त्रैलोक्ये—त्रैलोक्यमध्ये, विलक्षणा—विचित्रा इत्यर्थः, प्रकृतिर्यासां तथाविधाः, ताः वामाः,—नार्य्यः, ("प्रतीपदर्शिनी वामा वनिता महिला तथा" इत्यमरः) ते—तव, प्रसीदन्तु—प्रसन्ना भवन्तु; अनुकूलेऽपि पदार्थे प्रतिकूलविचाराः विलक्षणप्रकृतित्वे बीजस्वरूपाः इति निष्कर्षः। शार्दूलविक्रीडितं वृत्तम्।

साङ्क्ष्यं किलकिञ्चित-
मभीष्टतमसङ्गमादिजाद्धर्षात् ॥१४४॥(घ)

यथा,—

"पाण्डिरोधमविरोधितवाञ्छं भर्त्सनाश्च मधुरस्खलितगर्भाः।
आनिनः स्म कुरुते करभोरूर्हारि शुष्करुदितञ्च सुखेऽपि ॥"(ङ)

अथ मोट्टायितम्,—

तद्भावभाविते चित्ते वल्लभस्य कथादिषु।
मोट्टायितमिति प्राहुः कर्णकण्डूयनादिकम् ॥१४५॥(च)

(घ) किलकिञ्चितमाह, किलेति।—अभीष्टतमञ्च—प्रियतमञ्च, सङ्गमादि-जात्—मिलनादिजनितात्, हर्षात्—आनन्दात्, स्मितञ्च—मृदुहासञ्च, शुष्करुदितञ्च—अनश्रुरोदनञ्च, हसितञ्च, वाष्पञ्च—अश्रुञ्च, क्रोधञ्च—क्रन्दितक्रोधञ्च इति भावः, अमञ्च—श्रमश्च, एवमन्यञ्च च साङ्क्ष्यं—सङ्कीर्णं, किलकिञ्चितम्। ["क्रोधाश्रु-हर्षभीत्यादेः सङ्करः किलकिञ्चितम्" इति पाठान्तरम्]।

(ङ) उदाहरति, पाण्डिरोधमिति।—करभः,—करिशावकः, ("करभः करि-शावकः" इत्यमरः) करभशब्देनात्र लक्षणया करिशुण्डो बोध्यः; यद्वा—प्रसारित-हस्ततलञ्च अनिष्ठाङ्गुल्यङ्गुष्ठदेशः करभः, ("अनिष्ठमध्यादाकनिष्ठं करभः करभो बहिः" इत्यमरः) तद्वत् ऊरू यस्या इति करभोरूः, ["ऊधसोरुपदादीपम्ये" (४।१।६९ पा०) इत्यूङ्] तस्या इत्यर्थः, सुखेऽपि—सुखसमयेऽपि, अधरपानादौ सुखातिशयसूचके भर्त्सनाभेऽपीति यावत्, अविरोधिता—अनिवारिता, वाञ्छा—प्रियमनोरञ्जो यत्र तत् यथा तथा, आनिनः,—आनम्र, पाण्डिरोधं—पाण्डेः रोधः अवरोधः, वल्लभेपयादि-प्रहृत्तनायकरतप्रतिबन्धः; अथवा,—नीविमोचने व्यापृतस्य प्रियपाणेर्निवारणम् इत्या-शयः तं, मधुरं स्खलितं—मृदुस्खलितं, गर्भे यस्यां तथा यथा:, भर्त्सनाच्च, तथा हारि—मनोहरं, शुष्करुदितञ्च—अनश्रुरोदनम्, चकारश्चक्रन्दितमिति यावत्, कुरुते स्म—चकारेत्यर्थः। ["कृञ् सो"(३।२।११८ पा०) इति अयोगे परोक्षे लट्] आनिनीषा प्रकृतिरेषा यदभीष्टलाभानिष्टवस्तुनिषेधपूर्वकम् एव सुरतसुखास्वादनम् इति निष्कर्षः। आयताक्षं,—"आयता रतभर्त्सनेक्षणा च"इति तल्लक्षणात्। त्रिगुणाक्षरवृत्तेयं पद्यम्।

(च) मोट्टायितमाह, तदिति।—चित्ते—मनसि, तस्य—वल्लभस्य, भावेन—

यथा,—

"सुभग! त्वत्प्रथाऽऽरम्भे कर्षंकण्डूतिलालसा।
उल्लूखवदनाम्भोजा भिनत्त्यङ्गानि साऽङ्गना॥" (छ)

अथ कुट्टमितम्,—

केशस्तनाधरादीनां ग्रहे हर्षेऽपि सम्भ्रमात्।
प्राहुः कुट्टमितं नाम शिरःकरविधूननम्॥१४६॥ (ज)

यथा,—

"पद्मवोपमितिसाम्यसपत्नं दष्टवत्यधरबिम्बमभीष्टे।
पर्य्यकूजि सहजेव तरुण्यास्तारलोलवलयेन करेण॥" (झ)

प्रेमचा, भाविते—समुल्लासितमिति तद्भावभाविते तस्मिन् सति, यद्मनस—प्रियस्य, कथादिषु कर्षणखननादिकं मोट्टायितमिति प्राहुः। तथोक्तम्;—सुला कर्षा प्रियजनस्य तु सन्निधौ वा कर्षोद्धरक्षितखनत्रतर्जनोक्तम्। यद्दाऽङ्गमङ्गमपि कृत्रिम-मङ्गनानां मोट्टायितं तदुदितं भरताख्यविद्भिः॥" इति।

(छ) उदाहरति, सुभगेति।—हे सुभग! सा अङ्गना—कामिनी, तव कथाया: आरम्भे सति, कर्षणकण्डूतिलालसा—कर्षणकण्डूयनतत्परा, तथा उल्लूखम्—उद्गता लूना यस्य तथाभूतं, यद्वनमेव अम्भोजं—पद्मं यस्या: तथाभूता सती, अङ्गानि भिनत्ति—आकुञ्चनं करोतीत्यर्थः।

(ज) कुट्टमितमाह, केशेति।—केशस्तनाधरादीनां ग्रहे—ग्रहणे कृते, प्रियेणेति भाव:, तथा हर्षे—आनन्देऽपि, प्रियस्यार्थादिति भाव:, सम्भ्रमात्—भयादिवेत्यर्थः, यत् शिरःकरविधूननं—शीर्षहस्तकम्पनं, तत् कुट्टमितं प्राहुः।

(झ) उदाहरति, पद्मवेति।—अभीष्टे—प्रिये, नायके इति यावत्, पद्मवेन या उपमिति:,—उपमानं, तया यत् साम्यं—सादृश्यं, तेन सपत्नम्—उभयोरपि पद्म-वैकोपमानत्वसाधर्म्यात् सपत्नसदृशमित्यर्थः, अधरबिम्बं दष्टवति सति, तरुण्या:,—कामिन्या:, तारम्—उच्चैः शोभनं, लोलम्—अतिचञ्चलं, सुखरमित्यर्थः, वलयं यत्र तादृशेन, करेण—हस्तेन, सहजेव—स्वभावेनैव, पर्य्यकूजि—परिकूजितम्। [भावे लुङ्] सुहृदुःखादुःखावसरे सुहृद इति भाव:। अधरदंशनकारके प्रिये वलयाकुलेन पाणिना अस्मां निषेधानन्तरमेव लज्जितमिव कृतम् इति भाव:। प्रियस्यापराधेऽयं पद्मम्।

अथ विभ्रमः,—

त्वरया हर्षरागादेर्दयिताऽऽगमनादिषु।
अस्थाने भूषणादीनां विन्यासो विभ्रमो मतः॥१४७॥ (ञ)

यथा,—

"श्रुत्वाऽऽयान्तं बहिः कान्तमसमाप्तविभूषया।
भालेऽञ्जनं दृशोर्लाक्षा कपोले तिलकः कृतः॥" (ट)

अथ ललितम्,—

सुकुमारतयाऽङ्गानां विन्यासो ललितं भवेत्॥१४८॥(ठ)

यथा,—

"गुरुतरकलनूपुरानुनादं सुललितनर्त्तितवामपादपद्मा।
इतरदनतिलोलमादधाना पदमथ मन्मथमन्थरं जगाम॥"(ड)

(ञ) विभ्रममाह, त्वरयेति।—दयितस्य—प्रियस्य, आगमनादिषु विषये, हर्षरागादेः,—आनन्दानुरागादेः हेतोः, त्वरया—हर्षादिजन्यवेगेनेत्यर्थः, अस्थाने—अयोग्यस्थाने, यत्र यद्भूषणमुचितं तदितरस्थाने इत्यर्थः, भूषणादीनां विन्यासः,—परिधानमित्यर्थः, विभ्रमः मतः। अत्र प्रथमेनादिपदेन उत्सवादेः, द्वितीयादिपदेन दयिताभिसरणादेः, तृतीयेनादिपदेन लाक्षादेर्ग्रहणम्।

(ट) उदाहरति, श्रुत्वेति।—बहिः,—बाह्यदेशे, कान्तम् आयान्तं श्रुत्वा, असमाप्तविभूषया—अशेषितालङ्करणया, कयाचित् इति शेषः, भाले—ललाटे, अञ्जनं, दृग्धार्य्यमिति भावः, दृशोः,—चक्षुषोः, लाक्षा—अलक्तकरागः, चरणरञ्जनीति भावः, कपोले—गण्डे, तिलकः ललाटभूषणमिति भावः, कृतः।

(ठ) ललितमाह, सुकुमारतयेति।—सुकुमारतया—सुकोमलतया, अङ्गानां विन्यासः,—विशेषेण न्यासः, मृदुसञ्चालनम् इति यावत्, ललितं भवेत्। ["सुकुमाराङ्गविन्यासो मसृणो ललितं भवेत्" इति पाठान्तरम्]।

(ड) उदाहरति, गुर्विति।—अथ—अनन्तरं, 'सा' इति पदमध्याहार्य्यम्; गुरुतरः,—गम्भीरः, कलः,—मधुरास्फुटः, नूपुरस्य अनुनादः,—अनुध्वनिः यस्मिन् कर्मणि तत् यथा भवेत् तथा, सुललितम्—अतिमनोहरं यथा तथा, नर्त्तितं—निक्षिप्तमित्यर्थः, वामं—सव्यं, पादपद्मं—चरणकमलं यथा तादृशी, तथा इतरत्—

अथ मदः,—

मदो विकारः सौभाग्ययौवनाद्यवलेपजः ॥१४९॥(ढ)

यथा,—

"मा गर्वमुद्वह कपोलतले चकास्ति
कान्तस्वहस्तलिखिता मम मञ्जरीति।
अन्याऽपि किं न खलु भाजनमीदृशीनां
वैरी न चेद्भवति वेपथुरन्तरायः ?॥" (ण)

अथ विकृतम्,—

वक्तव्यकालेऽप्यवचो व्रीड़या विकृतं मतम् ॥१५०॥(त)

अन्यत, दक्षिणमित्यर्थः, पदम् अनतिलोलं—नातिचपलं यथा तथा, आदधाना—अर्पयन्ती सती, मन्मथमन्थरं—मदनजड़ं, कामावेशजनितमृदुमन्दं यथा तथेत्यर्थः, जगाम। शिशुपालवधस्येदं पद्यम्।

(ढ) मदमाह, मद इति।—सौभाग्ययौवनादिना—भर्तृप्रियत्व-तारुण्यादिना, यः अवलेपः,—गर्वः, तज्जः विकारः मदः। ["मधुपानमदप्रायः तारुण्यातिशयोद्भवः। विकारो यौवने स्त्रीणां तं वदन्ति मदं बुधाः॥" इति पाठान्तरम्]।

(ण) उदाहरति, मा गर्वमिति।—कामपि सौभाग्यगर्ववतीं प्रति कस्याश्चिदुक्तिः। कान्तस्य—प्रियस्य, स्वहस्तेन लिखिता मञ्जरी—रचनाविशेष इत्यर्थः, मम कपोलतले—गण्डदेशे, चकास्ति—राजते, इति कृत्वा गर्वं मा उद्वह—अभिमानं न कुरु, अत्र गर्वो नोचित एव इत्याशयः; जगत्येका त्वमेव न सुभगा, अपराऽपि अस्तीत्याशयेनाह, अन्येति।—चेत्—यदि, वैरी—मञ्जरीविन्यासव्याघातकत्वेन विपक्ष इव, वेपथुः,—कम्पः, कान्तस्पर्शजनितसात्त्विकभावविशेष इत्यर्थः, अन्तरायः,—विघ्नस्वरूपः, न भवति, तदा अन्या—अपराऽपि नारी, ईदृशीनां—प्रियस्वहस्तलिखितमञ्जर्यादीनां श्रीमद्गण्डाङ्कितमञ्जर्यां सदृशीनामिति भावः, भाजनं—पात्रं, न खलु—नैव, भवति किम् ? भवत्येवेत्यर्थः। [ईदृशीनामिति बहुवचनेन सौभाग्यातिशयः सूचितः]। वसन्ततिलकं वृत्तम्।

(त) विकृतमाह, वक्तव्येति।—वक्तव्यकाले—वचनावसरेऽपि, व्रीड़या—लज्जया, अवचः,—अकथनं, विकृतं मतम्। [अत्र "विहृतम्" इति पाठान्तरं दृश्यते, तत् यथा,—"प्राप्तकालं न यत् ब्रूयात् व्रीड़या विहृतं हि तत्" इति]।

यथा,—

"दूरागतेन कुशलं पृष्टा नोवाच सा मया किञ्चित्।
पर्य्यश्रुणी तु नयने तस्याः कथयाम्बभूवतुः सर्वम्॥" (थ)

अथ तपनम्,—

तपनं प्रियविच्छेदे स्मरावेशोत्थचेष्टितम्॥ १५१॥(द)

यथा मम,—

"श्वासान् मुञ्चति, भूतले विलुठति, त्वन्मार्गमालोकते,
दीर्घं रोदिति, विक्षिपत्यत इतः क्षामां भुजावल्लरीम्।
किञ्च प्राणसमान! काङ्क्षितवती स्वप्नेऽपि ते सङ्गमं
निद्रां वाञ्छति, न प्रयच्छति पुनर्दग्धो विधिस्तामपि॥"(ध)

(थ) उदाहरति, दूरागतेनेति।—दूरागतेन—प्रवासात् प्रत्यागतेन, मया कुशलं पृष्टा सा किञ्चित् न उवाच, तु—किन्तु, तस्याः,—प्रियायाः, पर्य्यश्रुणी—अश्रुपूर्णे, नयने सर्वं—मम प्रवासे यथा तथा यावत् दुःखं सोढं तत् सकलं दुःखातिशयम्, आगमने हर्षातिशयञ्चेति भावः, कथयाम्बभूवतुः। आर्य्या वृत्तम्।

(द) तपनमाह, तपनमिति।—प्रियविच्छेदे—कान्तविरहसमये, स्मरावेशोत्थचेष्टितं—स्मरस्य—कामस्य, यः आवेशः,—उद्रेकः, तेन उत्थम्—उत्पन्नं, चेष्टितं—व्यापारः, तपनं, मतमिति शेषः।

(ध) उदाहरति, श्वासानिति।—प्रवासिनं प्रति नायिकासख्युक्तिरियम्। हे प्राणसमान! [एतेन प्राणान् विना यथा जीवनं, तथा त्वया वियोगे तस्या अपि जीवनमजीवनमिति निवेदनसार्थक्यं द्योत्यते] सा तव कान्ता इति अध्याहार्य्यं, श्वासान्—दीर्घनिश्वासान्, मुञ्चति—त्यजति, भूतले—धरण्यां, विलुठति—आत्मानं निक्षिपतीत्यर्थः, तव मार्गं—पन्थानम्, आलोकते—अवलोकयति, दीर्घं—बहुकालं व्याप्य, रोदिति, अत इतः,—इतस्तत इत्यर्थः, क्षामां—विरहक्षीणामित्यर्थः, भुजावल्लरीं—बाहुलतिकां, विक्षिपति, किञ्च स्वप्नेऽपि ते तव सङ्गमं काङ्क्षितवती—अभिलषितवती सती, निद्रां वाञ्छति, पुनः,—किन्तु, दग्धः,—निर्दयः, विधिः तां—निद्रामपि, न प्रयच्छति—न ददाति; त्वां चिन्तयन्तीं निद्राहतकाऽपि न तां सुखयति इति भावः। शोकचिन्तोद्रेके निद्रां नानुभवितुं शक्यते इति च प्रसिद्धम्। शार्दूलविक्रीडितं वृत्तम्।

अथ मौग्ध्यम्,—

अज्ञानादिव या पृच्छा प्रतीतस्यापि वस्तुनः।
वल्लभस्य पुरः प्रोक्तं मौग्ध्यं तत् तत्त्ववेदिभिः॥१५२॥(न)

यथा,—

"के द्रुमास्ते क्व वा ग्रामे सन्ति केन प्ररोपिताः।
नाथ! मत्कङ्कणन्यस्तं येषां मुक्ताफलं फलम्?॥" (प)

अथ विक्षेपः,—

भूषाणामर्द्धरचना वृथा विष्वगवेक्षणम्।
रहस्याख्यानमीषच्च विक्षेपो दयिताऽन्तिके॥१५३॥(फ)

यथा,—

"धम्मिल्लमर्द्धमुक्तं कलयति तिलकं तथा शकलम्।
किञ्चिद्वदति रहस्यं चकितं विष्वगवलोकते तन्वी॥"(ब)

(न) मौग्ध्यमाह, अज्ञानादिवेति।—प्रतीतस्य—प्रसिद्धस्य, ज्ञातस्य वा, अपि वस्तुनः, अज्ञानादिव वल्लभस्य—प्रियस्य, पुरः,—अग्रतः, या पृच्छा—जिज्ञासा, तत् तत्त्ववेदिभिः मौग्ध्यं प्रोक्तम्।

(प) उदाहरति, के इति।—हे नाथ! मम कङ्कणयोः न्यस्तम्—अलङ्कार्य्यरूपेण निवेशितं, मुक्ताफलं येषां, द्रुमाणामिति शेषः, फलं, ते द्रुमाः के?—किं नामानः इत्यर्थः, क्व—कस्मिन् वा, ग्रामे सन्ति? केन वा, मालिकेनेति शेषः, प्ररोपिताः,—प्ररोहं प्रापिताः, सन्ति? अत्र शुक्तिकाभवानामपि मुक्तानां वृक्षविशेषस्य फलत्वेनाभिमननात् स्फुटं तथाऽभिधायिन्या मुग्धात्वम्।

(फ) विक्षेपमाह, भूषाणामिति।—दयितस्य—प्रियस्य, अन्तिके—समीपे, भूषाणाम्—अलङ्कृतीनाम्, अर्द्धरचना—असमाप्तविन्यासः, वृथा—निरर्थकं, निष्कारणमिति यावत्, विष्वक्—समन्तात्, अवेक्षणम्—अवलोकनम्, ईषत्—मन्दं मन्दम्, अनुच्चैरिति यावत्, रहस्यस्य—गोपनीयस्य, आख्यानं—कथनञ्च, विक्षेपः, मत इति शेषः।

(ब) उदाहरति, धम्मिल्लमिति।—तन्वी—कृशाङ्गी, धम्मिल्लं—बद्धकेशसमूहं,

अथ कुतूहलम्,—

रम्यवस्तुसमालोके लोलता स्यात् कुतूहलम्॥१५४॥(भ)

यथा,—

"प्रसाधिकाऽऽलम्बितमग्रपादमाक्षिप्य काचित् द्रवरागमेव।
उत्सृष्टलीलागतिरा-गवाक्षादलक्तकाङ्कां पदवीं ततान॥"(म)

अथ हसितम्,—

हसितन्तु वृथा हासो यौवनोद्भेदसम्भवः॥१५५॥(य)

("धम्मिल्लाः संयताः कचाः" इत्यमरः) अर्द्धमुक्तं, तथा तिलकं शकलं—खण्डितं, ("भित्तं शकलखण्डे वा" इत्यमरः। अत्र केचित् "असकलं" पठन्ति, तेषां मते—अपूर्णमित्यर्थः) कलयति—करोति, किञ्चित् रहस्यं वदति, तथा विष्वक्—सर्वतः, चकितं—ससम्भ्रमं यथा तथा, अवलोकते—पर्य्यवेक्षते इत्यर्थः। अत्र केशपाशादेरर्द्धबन्धनाद्ययथावत्प्रसाधनादिना नायिकायाः यौवनेन विक्षिप्तत्वं स्फुटं प्रतिभासते। उद्गीतिश्छन्दः, लक्षणं चोक्तं यथा,—"आर्य्याशकलद्वितयं व्यत्ययरचितं भवेत् यस्याः। सोद्गीतिः किल वदिता तद्वत् यत्यंशभेदसंयुक्ता॥" इति।

(भ) कुतूहलमाह, रम्येति।—रम्यं—मनोज्ञं वस्तु, तस्य समालोके—सम्यक् दर्शने, [अत्र विषये सप्तमी] लोलता—सतृष्णता, औत्सुक्यमिति यावत्, कुतूहलं स्यात्।

(म) उदाहरति, प्रसाधिकेति।—काचित्—पुरसुन्दरीति भावः, प्रसाधिकया—अलङ्कारिण्या, आलम्बितं—गृहीतं, द्रवरागम्—अशुष्कलाक्षारसमेव इत्यर्थः, अग्रपादं—पादाग्रभागम्, आक्षिप्य—आकृष्य, उत्सृष्टा—त्यक्ता, लीलागतिः,—विलासमन्दगमनं यया तादृशी सती, त्वरितगतिरित्यर्थः, आ-गवाक्षात्—गवाक्षपर्य्यन्तं, ["पञ्चम्यपाङ्परिभिः" (२।३।१० पा०) इति पञ्चमी] पदवीं—मार्गम्, अलक्तकाङ्काम्—अलक्तको लाक्षारसः, तस्याङ्कश्चिह्नं यस्यां तां तथोक्तां, ततान—चकारेत्यर्थः। अत्र हरदर्शनाय अजदर्शनाय वा कस्याश्चिद्रागातिशयः कुतूहलम्। कुमारसम्भवस्य रघुवंशस्य च सप्तमे सर्गे पद्यमिदमुपलभ्यते। उपजातिः वृत्तम्।

(य) हसितमाह, हसितमिति।—यौवनोद्भेदसम्भवः,—यौवनप्रकाशनः, वृथा—निरर्थकः, हासः हसितं, मतमिति शेषः [अत्र भावे क्तः]।

यथा,—

"अकस्मादेव तन्वङ्गी जहास यदियं पुनः।
नूनं प्रसूनबाणोऽस्यां स्वाराज्यमधितिष्ठति॥" (र)

अथ चकितम्,—

कुतोऽपि दयितस्याग्रे चकितं भयसम्भ्रमः॥१५६॥(ल)

यथा,—

"त्रस्यन्ती चलशफरीविघट्टितोरू-
र्वामोरूरतिशयमाप विभ्रमस्य।
क्षुभ्यन्ति प्रसभमहो! विनाऽपि हेतो-
र्लीलाभिः किमु सति कारणे तरुण्यः?॥" (व)

(र) उदाहरति, अकस्मादिति।—इयं तन्वङ्गी—कृशाङ्गी, अकस्मात्—विना हेतुमेव इत्यर्थः, यत् पुनः जहास—हसितवती, (अत्र तदिति अध्याहार्य्यं) तत् तेन, तस्मात् वा, नूनं—मन्ये इत्यर्थः, प्रसूनबाणः,—पुष्पशरः, कामः इत्यर्थः, अस्यां—कृशाङ्ग्यां, स्वाराज्यं—स्वर्गराज्यवत्सुखम्, अधितिष्ठति—अनुभवति, कुरुते वा इत्यर्थः। [अत्र "अधिगच्छति" इति पाठान्तरम्] अत्र कान्तायाः सत्त्वोद्रेकेण हसितमवधार्य्य कविना कामस्वाराज्याधिष्ठितत्वेनोद्भाव्याशङ्कितमिति बोध्यम्।

(ल) चकितमाह, कुत इति।—दयितस्य—प्रियस्य, अग्रे कुतोऽपि—अनिर्दिष्टादपि कारणात्, अलक्षितकारणादिति यावत्, भयसम्भ्रमः,—भयेन सम्भ्रमः,—व्यग्रता, अतिचाञ्चल्यमित्यर्थः, चकितं, मतमिति शेषः।

(व) उदाहरति, त्रस्यन्तीति।—चलाभिः,—चपलाभिः, शफरीभिः,—प्रोष्ठीभिः, ("प्रोष्ठी तु शफरी द्वयोः" इत्यमरः) विघट्टितौ—परामृष्टौ, ताडितौ इति यावत्, ऊरू—जानूपरितनौ भागौ यस्याः सा, अत एव त्रस्यन्ती—त्रासं गच्छन्ती, वामोरूः,—वामौ अतिसुन्दरौ ऊरू यस्याः तथोक्ता, ("वामौ वल्गुप्रतीपौ द्वौ" इत्यमरः) ["संहितशफलक्षणवामादेश्च" (४।१।७० पा०) इत्यूङ्] विभ्रमस्य—विलासस्य, शोभाविशेषस्य इति यावत्, अतिशयम् आप—प्राप्तवती। अहो!—आश्चर्य्ये, तरुण्यः,—युवत्यः, हेतोः,—कारणात्, विनाऽपि, लीलाभिः,—शृङ्गारचेष्टाजनितभावविशेषैः, प्रसभं—सहसा, क्षुभ्यन्ति—क्षोभं गच्छन्ति, भयव्याकुला

अथ केलिः—

विहारे सह कान्तेन क्रीड़ितं केलिरुच्यते॥१५७॥(श)

यथा,—

"व्यपोहितुं लोचनतो मुखानिलैरपारयन्तं किल पुष्पजं रजः।
पयोधरेणोरसि काचिदुन्मनाः प्रियं जघानोन्नतपीवरस्तनी॥"(ष)

अथ मुग्धाकन्ययोरनुरागेङ्गितानि,—

दृष्ट्वा दर्शयति व्रीड़ां सम्मुखं नैव पश्यति।
प्रच्छन्नं वा भ्रमन्तं वा तिर्य्यक् तं पश्यति प्रियम्॥
बहुधाऽऽपृच्छ्यमानाऽपि मन्दमन्दमधोमुखी।
सगद्गदस्वरं किञ्चित् प्रियं प्रायेण भाषते॥

भवन्ति इति यावत्, कारणे सति—विद्यमाने, किमु? वक्तव्यमिति शेषः। (किमु सुतरामिति एके)। प्रहर्षिणी वृत्तम्। भारवेः पद्यमिदम्।

(श) केलिमाह, विहारे इति।—विहारे—विहारकाले, कान्तेन सह क्रीड़ितं—परिहासविशेषः, केलिः उच्यते; अथवा,—कान्तेन सह क्रियमाणे विहारे सति, यन्नायिकायाः क्रीड़ितं सा केलिः इत्यर्थः।

(ष) उदाहरति, व्यपोहितुमिति।—उन्नतौ—उच्चतां प्राप्तौ, पीवरौ—पुष्टौ च, स्तनौ यस्याः सा उन्नतपीवरस्तनी, ["स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्"(४।१।५४ पा०) इति ङीष्] काचित्—कान्ता, लोचनतः,—स्वचक्षुषः, पुष्पजं रजः,—परागम्, उन्नतशाखातः पुष्पपातनसमये उच्चक्षुषि संलग्नमिति भावः, मुखस्यानिलाः,—वायवः, फूत्कारास्तैस्तद्द्वारेत्यर्थः, व्यपोहितुम्—अपसारयितुम्, अपारयन्तम्—अशक्नुवन्तं, चक्षुषि मुखमारुतप्रदानार्थं प्रियाऽऽस्यपङ्कजसमीपे स्वकीयवदनयोगेन चुम्बनलोभासंवरणात्, किल—निश्चयार्थकमव्ययं, प्रियं—कान्तम्, उन्मनाः,—भावान्तरेण उत्कण्ठिता सती, पयोधरेण—स्तनेन, उरसि—वक्षसि, जघान—आहतवती। आदेशपथवर्त्तिनो हि नायकस्य अनादिष्टचुम्बनकरणात् कृतागस्तया तत्प्रहारः समुचित एव इति भावः। "दासे कृतागसि भवत्युचितः प्रभूणां.....प्रहारः" इत्यादिना तत्प्रकटनात् उन्नतपीवरस्तनरूपदृढ़प्रहरणेन वक्षोरूपमर्मस्थाने मारवा-

अन्यैः प्रवर्त्तितां शश्वत् सावधाना च तत्कथाम्।
शृणोत्यन्यत्रदत्ताक्षी प्रिये बालाऽनुरागिणी॥१५८॥ (स)

अथ सकलानामपि नायिकानामनुरागेङ्गितानि,—

चिराय सविधे स्थानं प्रियस्य बहु मन्यते।
विलोचनपथञ्चास्य न गच्छत्यनलङ्कृता॥
काऽपि कुन्तलसंव्यानसंयमव्यपदेशतः।
बाहुमूलं स्तनौ नाभिपङ्कजं दर्शयेत् स्फुटम्॥
आच्छादयति वागाद्यैः प्रियस्य परिचारकान्।
विश्वसित्यस्य मित्रेषु बहु मानं करोति च॥
सखीमध्ये गुणान् ब्रूते स्वधनं प्रददाति च।
सुप्ते स्वपिति दुःखेऽस्य दुःखं धत्ते सुखे सुखम्॥

मास इत्यर्थः। [हननस्थानतया अधिकरणत्वेन उरसीत्यत्र सप्तमी]। भारवेरष्टम-सर्गे पद्यमिदं लभ्यते।

(स) मुग्धाकन्ययोरनुरागसूचकचेष्टितानि वर्णयन्नाह, दृष्टेति।—प्रिये अनुरागिणी बाला—मुग्धा, कन्या वा, दृष्टा—प्रियेण अवलोकिता सती, व्रीडां—लज्जां दर्शयति। सम्मुखं, स्थितेति शेषः, न पश्यति—नावलोकते एव, प्रियमिति शेषः। प्रच्छन्नं—निभृतस्थितं वा, भ्रमन्तं—विचरन्तं वा, तं प्रियं, तिर्य्यक्—वक्रदृष्ट्या इत्यर्थः, पश्यति। ["वा तिर्य्यक् तम्" इत्यत्र "वाऽतिक्रान्तम्" इति पाठे,—अतिक्रान्तं—दूरे गच्छन्तमित्यर्थोऽवसेयः] बहुधा—पुनः पुनः, आपृच्छ्यमानाऽपि—जिज्ञास्यमानाऽपि, प्रियेणेति शेषः, अधोमुखी सती प्रायेण—बाहुल्येन, प्रियं—कान्तं, सगद्गदस्वरम्—अव्यक्तास्फुटशब्दं, तथा मन्दमन्दं—शनैः शनैः यथा स्यात्तथा, किञ्चित्, वाक्यमिति शेषः, भाषते—वदति। (अत्र कामसूत्रकाराः,—"पृष्टा च किञ्चित् सस्मितमव्यक्ताक्षरमनवसितार्थञ्च मन्दं मन्दमधोमुखी कथयति" इति) तथा सावधाना—अवहिता सती, अन्यैः प्रवर्त्तितां—प्रस्तुतां, तस्य—प्रियस्य, कथां—वार्त्ताम्, अन्यत्र-दत्ताक्षी—लक्ष्यान्तरार्पितनयना सती, शश्वत्—सततं, शृणोति।

स्थिता दृष्टिपथे शश्वत् प्रिये पश्यति दूरतः।
आभाषते परिजनं सम्मुखं स्मरविक्रियम्॥
यत्किञ्चिदपि संवीक्ष्य कुरुते हसितं मुधा।
कर्णकण्डूयनं तद्वत् कवरीमोक्षसंयमौ॥
जृम्भते स्फोटयत्यङ्गं बालमाश्लिष्य चुम्बति।
भाले तथा वयस्याया रचयेत् तिलकक्रियाम्॥
अङ्गुष्ठाग्रेण लिखति सकटाक्षं निरीक्षते।
दशति स्वाधरं चापि ब्रूते प्रियमधोमुखी॥
न मुञ्चति च तं देशं नायको यत्र दृश्यते।
आगच्छति गृहं तस्य कार्य्यव्याजेन केनचित्॥
दत्तं किमपि कान्तेन धृत्वाऽङ्गे मुहुरीक्षते।
नित्यं हृष्यति तद्योगे वियोगे मलिना कृशा॥
मन्यते बहु तच्छीलं तत्प्रियं मन्यते प्रियम्।
प्रार्थयत्यल्पमूल्यानि सुप्ता न परिवर्त्तते॥
विकारान् सात्त्विकानस्य सम्मुखीनाऽधिगच्छति।
भाषते सूनृतं स्निग्धमनुरक्ता नितम्बिनी।
एतेष्वधिकलज्जानि चेष्टितानि नवस्त्रियाः॥
मध्यव्रीड़ानि मध्यायाः स्रंसमानत्रपाणि तु।
अन्यस्त्रियाः प्रगल्भायास्तथा स्युर्वारयोषितः॥ १५९॥ (ख)

(ख) अथ सर्वासां नायिकानामनुरागसूचकचेष्टितानि वर्णयन्नाह, चिरायेति।
—प्रियस्य सविधे—समीपे, चिराय—दीर्घकालं, ("चिराय चिररात्राय चिरस्याद्य

विरावैश्वाः" इत्यमरः) आसनम्—अवस्थानं, बहु मन्यते। अनवस्थता—अभूषिता सती, अङ्ग—प्रियस्य, विलोकनमर्थं—दृष्टिपथं, (अकारात् औकाराद्यो अन्याश्च कुट्टनिनीनां समानमी वा इत्यायौ बोध्यः) न गच्छति। आडपि—आलिनी, (एवं परत्र क्रियापदेन सह आडयोति बुध्यते इति बोध्यम्) कुलस्त्रीणां—कुलाङ्गनानां, संस्थानस्य—उत्तरीयस्य परिधानवस्त्रस्य वा, ("चिकुरः कुलजो वासः" इति "संस्थानमुत्तरीयञ्च" इति शाश्वतः) संयमः,—यथोचिततया न्यासः, स एव तस्य वा व्यपदेशः,—कृतं तस्मात्, तमाश्रित्येत्यर्थः, [स्वपो योपे पञ्चमी] बाहुमूलं—कक्षभागं, तथा स्तनौ, एवं नाभिपङ्कजं—पङ्कजवन्नाभीरमनाभिदेशमित्यर्थः, स्फुटं—सुव्यक्तं यथा तथा, दर्शयेत्। बाणाद्यैः,—निष्टवचनप्रयोगादिभिः, (अत्राद्यपदादन्यवस्त्रादिदानानामपि ग्रहणम्) प्रियस्य परिचारकान्—भृत्यान्, आच्छादयति—वशीकरोति इत्यर्थः, उपर्य्युपरि प्रियस्य इत्यादिनिष्ठासादिरूपवाक्यवर्णकैः आडयोतीव इति तात्पर्य्यम्। अस्य—प्रियस्य, मित्रेषु—सुहृत्सु, विश्वसिति, बहुमानं—समादरं, करोति च। (उक्तञ्च कामसूत्रकारेण,—"परिजनानवष्टभ्य तावाद्य जीवा दर्शयति, तस्मिन्नेवं विश्वसिति, वचनं चैषां बहु मन्यते करोति च, तत्परिचारकैः सह प्रीतिं, सङ्गतां, घृततिमिति च करोति·····" इति) सखीजने सुखान्, प्रियस्येति शेषः, ब्रूते। स्वधनं—निजं धनं, प्रददाति च, प्रियायेति शेषः। सुप्ते—निद्रिते सति, प्रिये इति शेषः, स्वपिति—निद्राति। अस्य—स्वामिनः, दुःखे दुःखं, सुखे सुखं, धत्ते—अनुभवति। प्रिये दूरतः,—दूरात्, पश्यति सति, सश्रम—निरन्तरं, तस्य दृष्टिपथे स्थिता सती, सम्भ्रमं—सम्यग्भावनं, परिजनं अरविलिप्य—सकलावेशं यथा तथा, आभाषते—अवयति। (उक्तञ्च कामसूत्रकारैः,—"दूरे स्थिता पश्यतु मामिति मन्यमाना परिजनं सनदनविकारमाभाषते" इति) बल्गित्वा—अतिसामान्यमित्यर्थः, अपि—अट्टालकारचनमपीत्यर्थः, संवीक्ष्य—दृष्ट्वा, मुधा—निरर्थकं, हसितं कुरुते—हसतीत्यर्थः। (उक्तञ्च कामसूत्रकृता,—"बल्गित्वा हसितं विहसितं करोति" इति) अर्धकटीवलनं, तदत्—तथा, अवरीत्वा संयमौ—केशसंयमने, करोति इति शेषः। लुम्पति, अङ्गं स्फोटयति—अङ्गमर्दं करोति, बालं—बालकम्, आश्लिष्य—आलिङ्ग्य, चुम्बति। (उक्तञ्च कामसूत्रे,—"बालमालुलनमालिङ्गनं चुम्बनञ्च करोति" इति) तथा वयस्यायाः,—सख्याः, भाले—ललाटे, तिलकक्रियां रचयेत्। ("परिचारिकायाश्च तिलकं रचयति" इति तु कामसूत्रकाराः) अकुण्ठायेत्य—पादप्रहारकुण्ठायेवेति भावः, लिखति—भूमौ क्षितिमाकुट्टयति। सकटाक्षं निरीक्षते—अवलोकयति। स्वाधरं—निजमधरं, दशति। अधोमुखी सती प्रियं ब्रूते च।

दिङ्मात्रं (क) यथा मम,—

"अन्तिकगतमपि मामियमन लोकयतीव हन्त! दृष्ट्वाऽपि।
सरसनखक्षतमण्डितमाविष्कुरुते भुजामूलम्॥ (ख)

यत्र नायकः,—प्रियः, दृश्यते, तं देशं—स्थानं, न मुञ्चति—न त्यजति च। केनचित् कार्य्यव्याजेन—कर्मस्थलेन, तस्य—कान्तस्य, गृहम् आगच्छति। कान्तेन दत्तं किमपि—यत्किञ्चिदपि वस्तु, अङ्गे धृत्वा—परिधाय इत्यर्थः, मुहुरीक्षते। तस्य—प्रियस्य, योगे—सहवासे, नित्यं—सततं, हृष्यति—आनन्दमनुभवति, वियोगे, प्रियस्येति शेषः, मलिना—विवर्णा, कृशा च, भवतीति शेषः। तच्छीलं—तस्य कान्तस्य शीलं—चरित्रं, बहु मन्यते। तत्प्रियं—तस्य प्रियं, प्रियाभीष्टं वस्तुजातमित्यर्थः, प्रियं मन्यते। अल्पमूल्यानि, वस्तूनि इति तात्पर्य्यं, प्रार्थयति—याचते। सुप्ता सती न परिवर्त्तते—प्रियस्य विमुखीभूय पार्श्वपरिवर्त्तनं न करोतीत्यर्थः। अस्य सम्मुखीना—सम्मुखवर्त्तिनी सती, सात्त्विकान् विकारान्—स्तम्भस्वेदादीन्, अधिगच्छति—प्राप्नोति, अनुभवतीत्यर्थः। ["यथामुखसम्मुखस्य दर्शनः खः" (५। २। ६ पा०) इत्यनेन "सर्वं मुखम्" इत्यर्थे सर्वमुखशब्दयोः सम्मुखेति निपातिते दर्शनेऽर्थे खे, स्त्रियां पुनः टापि कृते रूपमिदं सिद्धम्] अनुरक्ता—अनुरागवती, नितम्बिनी स्निग्धं—सस्नेहं यथा तथा, सूनृतं—सत्यमधुरं, भाषते। एतेषु—चेष्टितेषु मध्ये, नवस्त्रियाः,—नवोढ़ायाः, चेष्टितानि—कार्य्याणि, अधिका लज्जा येषु तादृशानि, भवन्तीति शेषः। मध्यायाः, नायिकायाश्चेष्टितानीति शेषः, मध्या व्रीड़ा—लज्जा यासु तादृशानि अल्पलज्जानीत्यर्थः। अन्यस्त्रियाः,—परकीयाया इत्यर्थः, प्रगल्भायाः,—प्रौढ़ायाः, तथा वारयोषितः,—साधारण्या इत्यर्थः, चेष्टितानि स्रंसमाना—गलिता इत्यर्थः, त्रपा—लज्जा येषु तादृशानि, भवन्तीति शेषः।

(क) दिङ्मात्रं—किञ्चित्।

(ख) अन्तिकेति।—हन्त—हर्षे, इयं—कामिनी, अन्तिकगतं—समीपवर्त्तिनमपि, मां दृष्ट्वा अपि अन—नैव, [अत्र "अनोपमा ते बुद्धिः" इत्यादिप्रयोगदर्शनात् अनेत्यव्ययं निषेधार्थमिति बोध्यम्] लोकयति—पश्यति इव। ["अवलोकयतीव हन्त! दृष्ट्वाऽपि" इति पाठान्तरन्तु न साधु, अपिस्वारस्यानुल्लासात्] तथा सरसेन—आर्द्रेण, नखक्षतेन—नखाघातेनेत्यर्थः, मण्डितम्—अलङ्कृतम्, आभूषितमिति यावत्, भुजामूलं—बाहुमूलम्, आविष्कुरुते—प्रकटयति, प्रकाशयति, दर्शयति इति यावत्।

तथा,—

लेख्यप्रस्थापनैः स्निग्धैर्वीक्षितैर्मृदुभाषितैः।
दूतीसम्प्रेषणैर्नार्य्या भावाभिव्यक्तिरिष्यते ॥१६०॥(ग)

दूत्यश्च,—

दूत्यः सखी नटी दासी धात्रेयी प्रतिवेशिनी।
बाला प्रव्रजिता कारूः शिल्पिन्याद्याः स्वयं तथा ॥१६१॥(घ)

कारूः,—रजकीप्रभृतिः। शिल्पिनी—चित्रकारादिस्त्री, आदिशब्दात् ताम्बूलिक-गान्धिकस्त्रीप्रभृतयः। तत्र सखी यथा,—"श्वासान् मुञ्चति" इत्यादि।

(ग) लेख्येति।—लेख्यस्य—प्रणयव्यञ्जकपत्रस्य, प्रस्थापनैः,—प्रेषणैः, (लेख्यप्रस्थापने उदाहरणं यथा,—"विज्ञप्तिरेषा मम जीवबन्धो! तत्रैव नेयाः दिवसाः कियन्तः। सम्प्रत्ययोग्यस्थितिरेष देशः करा यदिन्दोरुपतापयन्ति॥" इति। एवमन्यान्युदाहरणानि शकुन्तलादौ ज्ञेयानि) स्निग्धैः,—सस्नेहैः, वीक्षितैः,—अवलोकितैः, तथा मृदुभाषितैः,—कोमलमधुरवचनैः, अथवा लज्जया भयात् वा मृदुमन्दस्वरेण स्वाभिप्रायप्रकटनैः, तथा दूतीसम्प्रेषणैः नार्य्याः,—कामिन्याः, भावस्य—प्रेम्णः, अभिलाषस्य वा, अभिव्यक्तिः,—प्रकटनम्, इष्यते।

(घ) दूतीराह, दूत्य इति।—सखी—सहचरी, नटी—नर्त्तकी, दासी—किङ्करी, धात्रेयी—धात्रीकन्या, प्रतिवेशिनी—प्रतिवेशवासिनी, समीपगृहवासिनीति यावत्, बाला—अनुद्भूतमदनविकारसम्पर्का कन्या, प्रव्रजिता—सन्न्यासिनी, उपलक्षणमिदं, तेन श्रमणा-क्षपणा-रक्तपट्टिकाऽऽदीनां तद्विशेषाणामपि ग्रहणम्; कारूः,—रजक-तक्षक-तन्तुवाय-नापित-चर्मकाराणां स्त्री; तथा च,—"तक्षा च तन्तुवायश्च नापितो रजकस्तथा। पञ्चमश्चर्मकारश्च कारवः शिल्पिनो मताः॥" इति, शिल्पिनी आद्या यासां ताः शिल्पिन्याद्याः, शिल्पिनी च,—चित्रिणी रङ्गिणीत्येवमनेकविधा, (आद्यपदेन ताम्बूलिकादिस्त्रीणां ग्रहणम्) तथा स्वयं—नायिका, दूती स्यात्। [अत्र वात्स्यायनः यथा,—"विधवेक्षणिका दासी भिक्षुकी शिल्पकारिका। प्रविशत्याशु विश्वासं दूतीकार्य्यञ्च विन्दति॥" गृहं प्रविश्येति योजना]।

स्वयंदूतौ यथा मम,—

"पन्थिय! पिपासिओ विअ लक्खिअसि जासि ता किं अण्णत्तो।
घरे मह्मा वि वारओ दुद्ध अत्थि घरे घणरसं पिअंताणं॥" (ङ)

एताश्च नायिकाविषये नायकानामपि दूत्यो भवन्ति।

दूतीगुणानाह,—

कलाकौशलमुत्साहो भक्तिश्चित्तज्ञता स्मृतिः।
माधुर्यं नर्मविज्ञानं वाग्मिता चेति तद्गुणाः॥
एता अपि यथौचित्यादुत्तमाधममध्यमाः॥ १६२॥(च)

एताः,—दूत्यः।

(ङ) स्वयंदूतीमुदाहरति, पन्थिय इति।—"पान्थ! पिपासित इव लक्ष्यसे यासि ततः किमन्यत्र?। न मनागपि वारक इहास्ति गृहे घनरसं पिबताम्॥" इति संस्कृतम्। हे पान्थ!—पथिक! पिपासितः,—तृषार्तः, पक्षे—सम्भोगाभिलाषी इव, लक्ष्यसे—दृश्यसे, ततः—तदा, किं—कथम्, अन्यत्र यासि?—गच्छसि? इह—अस्मिन्, गृहे—भवने, घनरसं—मेघजं, रसवन्तं जलमित्यर्थः, ("मेघपुष्पं घनरसः" इत्यमरः) अन्यत्र—निर्विकारं, सम्भोगसुखमित्यर्थः,(अनार्थे पिबताम् इत्यत्र अनुभवताम् इत्यर्थः) यतः,—घनो दृढीभूतोऽसौ रस आस्वादः, घनो रसो यत्र इति वा तं घनरसं—आस्वदतां, जनानां जनम्—अल्पम्, एकवारमपि इत्यर्थः, वारकः,—निषेधः, न अस्ति। गौतिः उक्तम्; तद्वाक्यं यथा,—"गावादितोयतुर्य्यांघट्टादयः सामको यदा भवतः। सामा षष्टिशरीरा प्रोक्ता सा गौतिरिह कविपतिना॥" इति।

(च) कलेति।—कलाः,—वृत्तगीतादिकाः, तत्र कौशलं—दक्षता, उत्साहः,—क्षेपात् यत्नः, भक्तिः,—प्रभौ अनुरागः, चित्तज्ञता—अभिप्रायज्ञानं, स्मृतिः,—कर्त्तव्यार्थस्मरणं, माधुर्य्यं—मनोहरत्वं, नर्मविज्ञानं—परिहासाभिज्ञता, तथा वाग्मिता—वाक्पाटवमित्यर्थः, एते तद्गुणाः,—दूत्याः, गुणाः, किन्तु एताः,—दूत्यः अपि, यथौचित्यात्—यथायोग्यम्, उत्तमाधममध्यमाः,भवन्तीति शेषः; एताः सप्तसैर्गुणैर्युक्ता दूती उत्तमा, पञ्चभिः चतुर्भिः वा गुणैः युक्ता मध्यमा, एकेन द्वाभ्यां वा युक्ता अधमा। एवं दूतादयः अपिशब्दज्ञानलभ्यांतु ज्ञातव्याः। [अत्र दूतीलक्षणाख्याने वात्स्यायनो यथा,—"विदेशं गाढयेत् पत्नी रत्नकोषाणि वर्धयेत्। चिनात् सुरतसम्भोगानन्यानपि

अथ प्रतिनायकः,—

धीरोद्धतः पापकारी व्यसनी प्रतिनायकः॥१६३॥(छ)

यथा,—रामस्य रावणः।

अथोद्दीपनविभावाः,—

उद्दीपनविभावास्ते रसमुद्दीपयन्ति ये ॥१६४॥ (ज)

ते च,—

आलम्बनस्य चेष्टाद्या देशकालादयस्तथा ॥१६५॥(झ)

चेष्टाद्या इति आद्यशब्दाद्रूपभूषणादयः। कालादीत्यादि-शब्दात् चन्द्र-चन्दन-कोकिलालाप-भ्रमरझङ्कारादयः।

दर्शयेत्॥ नायकस्यानुरागञ्च पुनश्च रतिकौशलम्। प्रार्थनाद्याधिकस्त्रीभिरवष्टम्भञ्च वर्णयेत्॥" इति।

(छ) प्रतिनायकमाह, धीरोद्धत इति।—धीरोद्धतः,—"मायापरः" इत्यादिना नायकलक्षणे प्रागुक्तः, पापकारी—पापाशयः, व्यसनं द्विविधं,—कामजं कोपजञ्च, तद्योगात् व्यसनी—मृगयाद्यष्टादशविधदोषाविष्टः, [अत एवोक्तं मनुना,—"कामजेषु प्रसक्तो हि व्यसनेषु महीपतिः। वियुज्यतेऽर्थधर्माभ्यां क्रोधजेष्वात्मनैव तु॥ मृगया-ऽक्षो दिवा स्वप्नः परीवादः स्त्रियो मदः। तौर्य्यत्रिकं वृथाऽट्या च कामजो दशको गणः॥ पैशुन्यं साहसं द्रोह ईर्ष्याऽसूयाऽर्थदूषणम्। वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः॥" अक्षः,—द्यूतक्रीड़ा, तौर्य्यत्रिकं—नृत्यगीतवाद्यानि। पैशुन्यम्—अवि-ज्ञातपरदोषाविष्करणम्। साहसं—साधोर्बन्धनादिना निग्रहः। द्रोहः,—जिघांसा ईर्ष्या—परगुणासहिष्णुता। असूया—परगुणेषु दोषाविष्करणम्। अर्थदूषणम्—अर्थहानिकरं व्यसनम्। अन्यत् दशविधं विद्याव्यसनम् इति मनूक्तिसङ्क्षिप्ताशयः] प्रतिनायकः,—प्रतियोगिनायकः।

(ज) उद्दीपनविभावमाह, उद्दीपनेति।—ये रसम् उद्दीपयन्ति—उद्रिक्तं कुर्वन्ति, परिपोषातिशयं नयन्ति इति यावत्, ते उद्दीपनविभावाः।

(झ) आलम्बनस्य—नायिकादेः। चेष्टा—नेत्रादिविक्षेपः, आद्यः येषां ते, तथा देशकालादयः, उद्दीपनविभावाः इति शेषः।

तत्र चन्द्रोदयो यथा मम,—

"करमुदयमहीधरस्तनाग्रे गलिततमःपटलांशुके निवेश्य।
विकसितकुमुदेक्षणं विचुम्बत्ययममरेशदिशो मुखं सुधांशुः॥"(ञ)

यो यस्य रसस्य उद्दीपनविभावः, स तत्स्वरूपवर्णने वक्ष्यते।

अथानुभावाः,—

उद्बुद्धं कारणैः स्वैः स्वैर्बहिर्भावं प्रकाशयन्।
लोके यः कार्य्यरूपः सोऽनुभावः काव्यनाट्ययोः॥१६६॥(ठ)

यः खलु लोके सीतादिचन्द्रादिभिः स्वैः स्वैः आलम्बनोद्दीपनकारणैः रामादेः अन्तः उद्बुद्धं रत्यादिकं बहिः प्रकाशयन् कार्य्यमित्युच्यते, स काव्यनाट्ययोः पुनः अनुभावः।

कः पुनः असौ? इत्याह,—

उक्ताः स्त्रीणामलङ्कारा अङ्गजाश्च स्वभावजाः।
तद्रूपाः सात्त्विका भावास्तथा चेष्टाः परा अपि॥१६७॥(ड)

(ञ) उदाहरति, करमिति।—अयं सुधांशुः,—चन्द्रः, (नायकश्च) गलितं—च्युतं, तमसां—तिमिराणां, पटलमेव (तद्वच्च) अंशुकं—वसनं यस्मात् तादृशे, उदयमहीधरः,—उदयाद्रिः एव, (तद्वच्च) स्तनः,—पयोधरः, तस्य अग्रे—उपरीत्यर्थः, करं—किरणं, (हस्तञ्च) निवेश्य—अर्पयित्वा, (करेण पयोधराग्रं समालम्ब्येति हृदयम्) अमरेशदिशः,—पूर्वदिशः, (अङ्गनायाश्च) विकसितं—प्रफुल्लं कुमुदं—कैरवमेव, (तद्वच्च) ईक्षणं—नयनं यत्र तादृशं, मुखम्—अग्रं, प्राग्भवसमारम्भलक्ष्म इत्यर्थः, (वदनञ्च) विचुम्बति। अत्र चन्द्रकृतदिग्वधूमुखचुम्बनदर्शनमुद्दीपनम्। पुष्पिताग्रा वृत्तम्,—"अयुजि न युगरेफतो यकारो युजि तु नजौ जरगाश्च पुष्पिताग्रा" इति तल्लक्षणात्।

(ट) अनुभावमाह, उद्बुद्धमिति।—स्वैः स्वैः,—निजैः निजैः, कारणैः, उद्बुद्धम्—उत्थितप्रायं, भावं बहिः प्रकाशयन्—अनुमापयन्, लोके—लोकवृत्त्यवस्थायां, यः कार्य्यरूपः, स काव्यनाट्ययोः अनुभावः।

(ठ) अनुभावस्वरूपमाह, उक्ता इति।—स्त्रीणाम् अङ्गजाः,—भावादयः तथा,

तद्रूपाः,—अनुभावस्वरूपाः । तत्र च यो यस्य रसस्य अनुभावः, स तत्स्वरूपवर्णने वक्ष्यते ।

तत्र सात्त्विकाः,—

विकाराः सत्त्वसम्भूताः सात्त्विकाः परिकीर्त्तिताः ॥१६८॥(ङ)

सत्त्वं नाम स्वात्मविश्रामप्रकाशकारी कश्चन आन्तरो धर्मः । (ढ)

सत्त्वमात्रोद्भवत्वात् ते भिन्ना अप्यनुभावतः ॥१६९॥(ण)

"गोवलीवर्दन्यायेन" इति शेषः । (त) के ते ? इत्याह,—

स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः ।
वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विकाः स्मृताः ॥ ॥१७०॥

स्वभावजाः,—लीलादयोऽष्टादश, अलङ्काराः उक्ताः । शोभाकान्त्यादीनां रत्यादिप्रकाशकत्वाभावात् नानुभावरूपता । चेष्टाः,—नायकस्य नेत्रविक्षेपादयः । पराः,—सात्त्विकविकारभिन्नाः इति सङ्क्षेपः ।

(ङ) सात्त्विकभावमाह, विकारा इति ।—सत्त्वं—रजस्तमोगुणवर्जितमनोधर्मविशेषः, तस्मात् सम्भूताः,—समुत्पन्नाः, विकाराः,—चित्तस्य अन्यथात्वरूपा धर्मा इत्यर्थः, सात्त्विकाः परिकीर्त्तिताः,—उक्ताः ।

(ढ) सत्त्वं विवृणोति, सत्त्वं नामेति ।—स्वस्य आत्मनि—स्वरूपे एव विश्रामो यस्य सः स्वात्मविश्रामः,—रसादिः इत्यर्थः, तस्य प्रकाशकारी—अभिव्यञ्जक इत्यर्थः, कश्चन आन्तरः,—मानसः, धर्मः,—गुणः । प्रागुक्तमपि सत्त्वलक्षणं शिष्याणां विविधव्युत्पत्त्यै प्रकारान्तरेण पुनरुक्तम् ।

(ण) सत्त्वेति ।—सत्त्वमात्रात्—केवलात् सत्त्वात्, उद्भवः येषां ते तत्त्वात् । अनुभावतः,—अनुभावात्, भिन्नाः,—पृथगपीत्यर्थः ।

(त) गोवलीवर्दन्यायेन—धेनुवलीवर्दयोर्गोत्वाविशेषेऽपि यथा कश्चिद्धर्मांशमादाय भेदः, तथा सत्त्वादीनां निर्वेदादीनाञ्च भावरूपतयाऽविशेषेऽपि सात्त्विकासात्त्विकत्वाभ्यां भेद इति भावः । एवञ्च,—"विभावा अनुभावाश्च सात्त्विकाः व्यभिचारिणः" इत्यादौ सात्त्विकभावस्य पृथगुपन्यासेन अनुभावातिरिक्तत्वशङ्कानिरासार्थं पृथगभिहितमेतदिति वेद्यम् ।

तत्र,—

स्तम्भश्चेष्टाप्रतीघातो भयहर्षाऽऽमयादिभिः ।
वपुर्जलोद्गमः स्वेदो रतिघर्मश्रमादिभिः ॥
हर्षाद्भुतभयादिभ्यो रोमाञ्चो रोमविक्रिया ।
मदसम्मदपीड़ाद्यैर्वैस्वर्य्यं गद्गदं विदुः ॥
रागद्वेषश्रमादिभ्यः कम्पो गात्रस्य वेपथुः ।
विषादमदरोषाद्यैर्वर्णान्यत्वं विवर्णता ॥
अश्रु नेत्रोद्भवं वारि क्रोधदुःखप्रहर्षजम् ।
प्रलयः सुखदुःखाभ्यां चेष्टाज्ञाननिराकृतिः ॥१७१॥ (घ)

यथा मम,—

"तनुस्पर्शादस्या दरमुकुलिते हन्त नयने
उदञ्चद्रोमाञ्चं व्रजति जड़तामङ्गमखिलम् ।

(घ) स्तम्भादीन् व्याकरोति, स्तम्भ इति ।—भयं—व्याघ्रादिदर्शनजन्यः अन्तःकम्पहेतुस्त्रासः, हर्षः,—पुत्रादिजन्मजनितोऽन्तःकरणोल्लासः, आमयः,—ज्वरादिव्याधिः, इत्यादिभिः कारणैः, चेष्टायाः प्रतीघातः,—निश्चलीभावः, स्तम्भः इत्यर्थः । रतिः,—सुरतक्रिया, घर्मः,—निदाघः, श्रमः,—अध्ययनादिव्यापारजन्यः खेदः, आयास इत्यर्थः, इत्यादिभिः कारणैः, वपुषः,—शरीरात्, जलोद्गमः,—जलनिर्गमः, स्वेदः । हर्षः,—आनन्दः, अद्भुतम्—अदृष्टदर्शनाश्रुतश्रवणादिः, भयम् इत्यादिभ्यः कारणेभ्यः, रोम्णां विक्रिया—विकारः, रोमाञ्चः । मदः,—मत्तता, सम्मदः,—सम्यक् आनन्दः, पीड़ा—रोगः, तत्प्रभृतिभिः हेतुभिः, गद्गदम्—अस्पष्टभाषणं, वैस्वर्य्यं—स्वरभङ्गं, विदुः । रागः,—अनुरागः, द्वेषः,—वैरं, श्रमः,—परिश्रमः, इत्यादिभ्यः कारणेभ्यः, गात्रस्य कम्पः वेपथुः । विषादः,—विषण्णता, मदः,—मद्यपानजो विकारः, रोषः,—क्रोधः, तत्प्रभृतिभिः कारणैः, वर्णान्यत्वम्—अन्यवर्णप्राप्तिः, विवर्णता । क्रोधः,—कोपः, दुःखं—मानसः क्षोभः, प्रहर्षः,—प्रकृष्टानन्दः, एभ्यः जातं नेत्रोद्भवं वारि—जलम्, अश्रु—तत्पदवाच्यम् । सुखदुःखाभ्यां—सुखेन दुःखेन वा इत्यर्थः, चेष्टायाः,—शारीरव्यापारस्य, ज्ञानस्य च निराकृतिः,—अपगमः, प्रलयः ।

कपोलौ घर्मार्द्रौ ध्रुवमुपरताशेषविषयं
मनः सान्द्रानन्दं स्पृशति झटिति ब्रह्म परमम्॥" (द)

एवमन्यत्। (ध)

अथ व्यभिचारिणः,—

विशेषादाभिमुख्येन चरन्तो व्यभिचारिणः।
स्थायिन्युन्मग्ननिर्मग्नास्त्रयस्त्रिंशच्च तद्भिदाः॥१७२॥(न)

(द) उदाहरति, तन्विति।—नायकाङ्गस्पर्शजनितस्य सात्त्विकभावस्य वर्णनमिदम्। अस्याः,—कान्तायाः इत्यर्थः, तनुस्पर्शात्—नायकशरीरस्पर्शात्, उपचारात् तज्जनितादानन्दात् हेतोः, नयने—नेत्रे, हन्त—आश्चर्य्ये, दरमुकुलिते—ईषन्मुकुलिते, कुड्मलाकारतां प्राप्ते इत्यर्थः, ("दराव्ययं मनागर्थे" इति मेदिनी) अखिलं—समग्रम्, अङ्गम् उदञ्चन्तः,—उद्गच्छन्तः, रोमाञ्चाः यत्र तथाभूतं सत्, जडतां—जडत्वं, व्रजति—गच्छति, ["नयने उदञ्चत्" अत्र "ईदूदेद्द्विवचनं प्रगृह्यम्" (१।१।११ पा०) इति द्विवचनस्य प्रगृह्यसंज्ञायां ततः "प्लुतप्रगृह्या अचि नित्यम्" (६।१।१२५ पा०) इति प्रकृतिभावे प्रगृह्यनिमित्तकोऽसन्धिः, स च असकृत्प्रयोगे एव दोषाश्रयः।] कपोलौ—गण्डदेशौ, घर्मार्द्रौ—स्वेदाम्बुसिक्तौ, जातौ इति शेषः, किं बहुना, मनः उपरताः,—विरताः, अशेषाः,—समग्राः, विषयाः,—बाह्येन्द्रियव्यापाराः यस्मात् तादृशं सत्, झटिति—सहसा, सान्द्रानन्दं—घनानन्दस्वरूपं, परमं ब्रह्म—परब्रह्म, स्पृशति—परमब्रह्मसाक्षात्करणजनितसुखमिव सुखमनुभवति, परमानन्दरसमास्वादयति इत्यर्थः, ("वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः" इति रसानुभवलक्षणे ग्रन्थकृतोक्तत्वात्) ध्रुवं—निश्चितम्। अत्र स्तम्भस्वेदरोमाञ्चप्रलयाः उदाहृताः। शिखरिणी वृत्तं,—"रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी" इति तल्लक्षणात्।

(ध) एषां विविक्तान्युदाहरणानि गवेषणीयानीत्याह, एवमिति।—यथा उदाहृते पद्ये स्तम्भस्वेदादयः कतिपये सात्त्विका भावा दर्शिताः, तथाऽन्येऽनुदाहृता अपि विविक्ता अन्यत्रोह्या इति भावः। तथा च—"बाले! नाथ! विमुञ्च मानिनि रुषम्—" इत्यत्र स्वरभङ्गः, "मा गर्वमुद्वह—" इत्यत्र वेपथुः, "शोणं वीक्ष्य—" इत्यत्र वैवर्ण्यमश्रु चेति बोध्यम्। विस्तरस्त्वन्यत्र।

(न) व्यभिचारिभावमाह, विशेषादिति।—विशेषात्—विभावानुभावापेक्षया

स्थिरतया वर्त्तमाने हि रत्यादौ निर्वेदादयः प्रादुर्भाव-तिरोभावाभ्यामाभिमुख्येन चरणात् व्यभिचारिणः कथ्यन्ते। (प)

के ते? इत्याह,—

निर्वेदावेगदैन्यश्रममदजड़ता औग्र्यमोहौ विबोधः
स्वप्नापस्मारगर्वा मरणमलसताऽमर्षनिद्राऽवहित्थाः।
औत्सुक्योन्मादशङ्काः स्मृतिमतिसहिता व्याधि-
सन्त्रासलज्जाः
हर्षासूयाविषादाः सधृतिचपलता ग्लानिचिन्ता-
वितर्काः॥ १७२॥ (फ)

उत्प्रेक्षमाणात्, व्यभिमुख्येन—व्यानमुख्येन, चरणात्—प्रादुर्भवनात्, रत्यादुमुख्येन रत्यादौ रसरूपतया मुख्यतया रत्यादेः, आदिनि—रत्यादौ, उत्पन्नाः,—सहायित् लक्षिताः, बुद्बुदवत् क्षणिकं प्रतीयमानत्वेन प्रादुर्भूता इत्यर्थः, निर्मग्नाः,—विलय-प्रतीतिरूपेण सहायित् तिरोहिताः, ये वर्णाः ते व्यभिचारिणः, त्रेया इति शेषः। ["चरणात्" इत्यत्र "चरणात्" इति पाठे—व्यानिनि उत्पन्ननिमग्ना ये वर्णाः, ते विशेषादाभिमुख्येन चरणात्—गमनात्, इत्येवं व्याख्येयम्] तावदाः,—तेषां व्यभि-चारिणां भावाः, सिद्धाः,—प्रकाराः, व्यवस्थिताः। एतच्च न्यूनसङ्ख्याव्यवच्छेदकं, न त्वधिकसङ्ख्याव्यवच्छेदकम्; अत एवोक्तम्;—"हर्षौत्सुक्यादयः मुकारादौ व्यभिचारिणः" इति। एतदर्थमेव चकार उपयुक्तः।

(प) व्याख्याइष्टे मुनिमतात्, स्थिरतयेति।—स्थिरतया—स्थायिभावरूपेण, यावद्रसं यावत् स्थितिमाश्रित्यर्थः, वर्त्तमाने—व्यवस्थाने, हि—एव, न तु व्यव-स्थाने इति भावः, [एतेन रत्यादेः स्थिरतयाऽवस्थानात् रत्यादीनामपि स्थायि-भावत्वं सूचितम्, अत एवोक्तं "रत्यादयोऽपि यदि रसे मुख्यं व्यभिचारिणः" इति] रत्यादौ—प्रतिष्ठायादौ भावे, [विषये उपलक्षणम्] निर्वेदादयः,—यद्यप्यभावाव्यभिचारि-सङ्ख्या निर्वेदादिनप्रकृतयः, प्रादुर्भाव-तिरोभावाभ्यां—उन्मेष तरङ्गवत् क्षुरवाक्षुरवात् भाव, व्यभिमुख्येन—व्यानमुख्यन, चरणात्—उत्थानिसत्वा, व्यभिचारिणः कथ्यन्ते।

(फ) तान् नामतो निर्दिशति, के इति।—ते—निर्वेदादयो व्यभिचारिणः, के?—निर्दिशनामानः? इति—रत्यादुमुख्यात्, चाह, निर्वेदेत्यादि।—अवतु।

तत्र निर्वेदः,—

तत्त्वज्ञानाऽऽपदौर्ध्यादिर्निर्वेदः स्वावमाननम् ।
दैन्यचिन्ताऽश्रुनिश्वासवैवर्ण्योच्छ्वसितादिकृत् ॥२०॥ (ग)

तत्र तत्त्वज्ञानात् निर्वेदो यथा,—

"वल्कलबालुकारन्ध्रविधानरचनाऽर्थिना ।
दक्षिणावर्तशङ्खोऽयं हन्त ! चूर्णीकृतो मया ॥" (घ)

(ग) निर्वेदनाह, तत्त्वेति ।—तत्त्वज्ञानात्—ईदृशविषयादौ यत्पदार्थतत्त्वज्ञानात्, न तु जीवपरमात्मनोरभेदज्ञानात्, तथा सति जीव एव ब्रह्मवेत्ता, न तु आत्मनोऽवमाननम् इति बोध्यम्, एवञ्च तत्त्वज्ञानपदार्थेन बाधादनुपपत्तेश्च तत्त्वपदं बाधविषयं, अथवा च तत्कारके वैराग्यादौ; आपदः, दुर्भाग्यादेः,—परोत्कर्षाऽवज्ञितादेः हेतुतः, [अत्र आदिपदेन आधिव्याध्यादीनां ग्रहणम्] दैन्यं—दीनत्वं, चिन्ता, अश्रु—नेत्रजलं, निश्वासः,—श्वासातिशयः, वैवर्ण्यं—विवर्णत्वं, दुर्वर्णत्वम्—श्यामिकाऽतिलमिति यावत्, उच्छ्वसितं—दीर्घश्वासवत्त्वम्, तदादिं करोतीति तथाभूतः, [चकारेण अशरीरपातार्थिमाधादेर्ग्रहणम्] स्वावमाननं—स्वस्मिन् आत्मनि, स्वकीये विषये वा अवज्ञानमित्यर्थः, निर्वेदः । [यथा,—ब्रह्मादिपदात् पुराणश्रवणादीनां, द्वितीयादिपदात् स्वस्य कुबेरौदार्यादीनां ग्रहणम्, अन्यत् पूर्ववत् इति सङ्क्षेपः] ।

(घ) तत्त्वज्ञानजनिर्वेदमुदाहरति, वल्कलेति ।—वल्कलञ्च—वल्लिविशेषत्वक्, बालुकारन्ध्रं, तस्य विधानम्—आच्छादनं, तथा च वल्कलबालुकारन्ध्रविधानवत् तुच्छं नैवमिदमुक्तं, तस्य रचना—घनसूक्ष्मव्यापारः, तदर्थिना—तत्कामेन, मया इत्थम्—अहम् ! अयं दक्षिणावर्तशङ्खः,—अथवा तत्सदृशं शरीरमित्यर्थः, चूर्णीकृतः,—अथवा अर्थनमर्थः, ऋतः दत्तयः, याचारविचिन्तनरत्नार्थिना मया परमार्थज्ञानरत्नमर्थयता चक्षुषाऽहं; अयं ईदृशः दक्षिणावर्तशङ्खसदृशोऽपि विषयाभिनिविष्टत्वेन दुष्टरत्नत्वया अरत्नो जनोऽस्य इति भावः । एवञ्च विरक्तस्य दक्षिणावर्तशङ्खचूर्णनजननसदृशमिदमुक्तमनया निजशंसाऽपहारः । यथा,—रावणभक्त्या लोकत्रयजये प्रवृत्ते शोकानलदग्धस्य वरिदैवतोक्तिरिवम्, तद्धि यथा अयमेव दक्षिणावर्तशङ्खः,—ब्रह्मत्वपदार्थः, मया चूर्णीकृतः,—विनाशितः, चूर्णत्वप्रत्यक्षविषयीकृतश्च, [शङ्खादिकं कृत्वा चूर्णनस्य ("चूर्ण" इति वक्ष्यमाण) ब्रह्मत्वरत्नमविदुषः] रावणत्वादिदेव

अथ आवेगः,—

आवेगः सम्भ्रमस्तत्र वर्षजे पिण्डिताङ्गता ।
उत्पातजे स्खलताऽङ्गे धूमाद्याकुलताऽग्निजे ॥
राजोपद्रवजादेस्तु श्रस्खलनादियोजनम् ।
गजादेः स्तम्भकम्पादिः पांश्वाद्याकुलताऽनिलात् ॥
दृष्टाद्धर्षाः शुचोऽनिष्टाज्ज्ञेयाश्चान्ये यथायथम् ॥१७५॥(ल)

स्वकुलधातुसुधारन्धुपिधानं, तद्वचनाद्यासेन मवेति पूर्वेणान्वयः । अस्मिन् पक्षे विषविद्या दंशिदाहसंग्रहेण विषयस्य सप्तधात्वासेदमपनीय निगरणम्, अतोऽस्य रूपकोपपादकः अतिशयोक्त्यलङ्कारः । पूर्वपक्षे—तत्त्वज्ञानजम्, अस्मिन् पक्षे—पुनः आपदुत्थं आवेगनं (निर्वेदः) बोध्यम् । एवमन्यदपि ।

(ल) सम्भ्रमेदमावेगमाह, आवेग इति ।—सम्भ्रमः,—चलनात् उपस्थितघटनाऽऽलोकितमनोवेगः, आवेगः । तत्र—आवेगे, वर्षजे—दृष्टिजाते सति, पिण्डिताङ्गता—सङ्कुचिताङ्गत्वं, भवति इति शेषः । ["वर्षजे" इत्यत्र "हर्षजे" इति पाठान्तरे,—उल्लासजनिते आवेगे, जडवत् स्तब्धावयवता इत्यर्थः । "पीडिताङ्गता" इति पाठस्तु स्पष्टार्थः] उत्पातजे—उत्पातात् जाते, दिव्यनाभसभूमिजरूपविविधोत्पातजन्ये सति इत्यर्थः, अङ्गे—शरीरे, स्खलता—शैथिल्यं, भवति इति शेषः । अग्निजे, आवेगे सति, धूमादिभिः आकुलता, भवति इति शेषः । राजोपद्रवात्—युद्धादियोजनादिरूपाज्जायते इति स आदिर्यस्य तस्मात् हेतोः, श्रस्खलनादियोजनम्—आत्मरक्षार्थं राजद्वाद्याद्यर्थं वा इतस्ततो द्राद्यादीनामायोजनमित्यर्थः, भवति । ["राजविद्रवजादेः" इति पाठान्तरेऽपि अयमेवार्थः ; आदिना चौरोपद्रवजादीनां सङ्ग्रहः] । गजादेः, जाते इति शेषः, आवेगे सतीति शेषः, स्तम्भकम्पादिः, जायते इति शेषः ; अनिलात्, जाते इति शेषः, प्रभञ्जनवायुजनिते आवेगे सतीत्यर्थः, पांश्वादिभिः,—धूल्यादिभिः, आकुलता, भवति इति शेषः । दृष्टात्—अभिलषितार्थसिद्धेः, जाते इति शेषः, आवेगे सति, हर्षाः,—आनन्दाः, तज्जनितसुखविलासादयः इति यावत् । अनिष्टात्—अहितात्, अभिलषितार्थविरोधित्वार्थोपस्थितेरिति भावः, जाते इति शेषः, आवेगे सति,—शोकाः, दुःखोद्वेगादयोऽनुभावाः भवन्ति इत्यर्थः । अन्ये—आवेगजा यथायथं शेषाः,—देहितव्याः ।

तत्र भग्नजो यथा,—

"अर्घ्यमर्घ्यमिति वादिनं नृपं सोऽनवेक्ष्य भरताग्रजो यतः।
अथकोपदहनार्चिषं ततः सन्दधे दृशमुदग्रतारकाम्॥" (य)

एवमन्यत् जन्यम्।

अथ दैन्यम्,—

'दौर्गत्याद्यैरनौज्ज्वल्यं दैन्यं मलिनताऽऽदिकृत्॥१७६॥ (र)

यथा,—

"दृष्टोऽभ्यः पतिरेव मच्चकगतः, खण्डावशेषं गृहं,
क्षालोऽभ्यर्णजलागमः, कुशलिनी वत्सश्च वार्त्ताऽपि नो।
यत्नात् सञ्चिततैलबिन्दुघटिका भग्नेति पर्य्याकुला,
दृष्ट्वा गर्भभरालसां निजवधूं श्वश्रूश्चिरं रोदिति॥" (ल)

[एवञ्च,—भग्नज आवेग इत्यावेगस्य सामान्यं लक्षणं, वर्षणादयश्च तस्य भेदाः। अनौ चावज्ञया इति यथायथं स्वयमूह्या इति सूचितम्]।

(य) भग्नजमावेगमुदाहरति, अर्घ्यमिति।—सः,—भार्गवः, अर्घ्यम् अर्घ्यं, पूजार्हमिति शेषः, इति वादिनं नृपं—दशरथम्, अनवेक्ष्य—अनवधिलेक्ष्यं, यतः,—यस्मिन् प्रदेशे, भरताग्रजः,—रामः, तिष्ठतीति शेषः, ततः,—तस्मिन् प्रदेशे, अनेन कोप एव दहनः,—अग्निः, तस्य अर्चिः,—भाः, शिखा इति यावत्, तदिव अर्चिः यस्याः तां, ("ज्वालाभासार्चिषौ पुंसि" इत्यमरः) उदग्रतारकां—तीक्ष्णतारां, दृशं—चक्षुषं, सन्दधे—संहितवान्। अत्रार्घ्यमर्घ्यमिति मुहुर्वदतो दशरथस्य भार्गवदर्शने सम्भ्रमः। रघुवंशस्येदं पद्यम्। उपजातिः वृत्तम्।

(र) दुःखदारिद्र्यादिनदापराधोत्थः खलीभवत्त्वापनाहेतुः मनोऽवस्थाविशेषः दैन्यं, तदाह, दौर्गत्याद्यैरिति।—दौर्गत्याद्यैः,—दारिद्र्यादिभिः हेतुभिः, [चकादिपदैश्च मनादेर्ग्रहणम्] मलिनताऽऽदिकृत् अनौज्ज्वल्यम्—ओजः बलं तेजो वा तच्छून्यत्वं, निस्तेजस्त्वमिति यावत्, दैन्यं—दीनत्वं नाम व्यभिचारिभावः कथ्यते।

(ल) उदाहरति, दृष्ट इति।—अत्राग्निविषयभावा दशावर्णनमिदम्। एषः पतिः दृष्टः, अथ च अभ्यः, अत एव मच्चकगतः,—पर्य्यङ्कस्थायी, [एतेन चात्र अवर्णनत्वम्, उत्थानशक्तिरहितत्वम्, अत एव ततः पोषणादिसुखावगाहनत्वञ्च, अभाव एवाऽऽकुलत्वं व्यज्यते] गृहं कथा;,—तत्रादावपि एव, पतिरेव

अथ श्रमः,—

खेदो रत्यध्वगत्यादेः श्वासनिद्राऽऽदिकृच्छ्रमः॥१७७॥(व)

यथा,—

"सद्यः पुरीपरिसरे च शिरीषमृद्वी
गत्वा जवात् त्रिचतुराणि पदानि सीता।
गन्तव्यमस्ति कियदित्यसकृत् ब्रुवाणा
रामाश्रुणः कृतवती प्रथमावतारम्॥" (श)

यस्य तादृशं, निपतनाभिमुखमिति यावत्, [एतेन तदुद्धारेऽक्षमत्वकथनेन निर्द्धनत्वं व्यज्यते] कालः,—समयः, अभ्यर्णजलागमः,—अभ्यर्णः,—समीपवर्त्ती, जलागमः,—जलपातः यत्र तादृशः, वर्षाप्रारम्भः इति यावत्, [एतेन स्वतः पतनाभिमुखस्य तादृशस्य गृहस्य वर्षायाम् अवश्यपतनसम्भावनया तत्र अवस्थाने प्राणधारणस्यैव संशयितत्वाशङ्का, अतस्तत्रानशनतयाऽप्यवस्थानं दुःशकं, किं पुनः स्थानान्तरात् आहार्य्यादिसङ्ग्रहणम् इति व्यज्यते] वत्सस्य—विदेशगतस्य पुत्रस्येत्यर्थः, कुशलिनी—कल्याणिनी, वार्त्ता—वृत्तान्तः अपि, नो, उपलभ्यते इति शेषः, [एतेन शोकव्याकुलताऽतिशयो व्यज्यते, "पुत्रशोको महाकष्टम्" इति प्रसिद्धिश्च तन्मूलम्] यत्रात्—कथमपि इतस्ततो याचनादिव्यापारात्, सञ्चिततैलबिन्दुघटिका—सञ्चितानां तैलबिन्दूनां घटिकाऽल्पो घट इत्यर्थः, कतिपयतैलबिन्दूनामेव यदत्यल्पं पात्रं ममासीत् तत् इत्यर्थः, भग्ना, [एतेन पौरुषप्रतिकाराभावोऽपि व्यज्यते] इति—एवमनेकासामापदामुत्तरोत्तरमापातात् हेतोः, पर्य्याकुला—व्याकुला, श्वश्रूः निजवधूम्—आत्मस्नुषां, गर्भभरालसां—पूर्णगर्भाम्, आसन्नप्रसवामिति भावः; दृष्ट्वा चिरं रोदिति। शार्दूलविक्रीडितं वृत्तम्।

(व) श्रममाह, खेद इति।—रत्यध्वगत्यादेः,—सुरताध्वगमनादिभिः, श्वासस्य निद्राऽऽदेश्च कारकः खेदः,—अवसादः, श्रमः। अनेकशारीरव्यापारोत्पन्ननिश्वासाङ्गमर्दनिद्राऽऽदिकारणस्वरूपः अङ्गावसादविशेषः श्रम इति सारः। एष हि शारीरे बले वर्त्तमानेऽपि समुत्पद्यते, ग्लानिः न तथा इति ग्लानेरस्य विशेषः।

(श) उदाहरति, सद्य इति।—महानाटके सीतया सह रामस्य वनगमनाऽऽरम्भवर्णनमिदम्। शिरीषमृद्वी—शिरीषकुसुमसदृशसुकुमारावयवेत्यर्थः, सीता—जानकी, पुर्य्याः,—अयोध्यायाः, परिसरः,—प्रान्तभागः तस्मिन् अयोध्यायामेव, न तु

अथ मदः,—

सम्मोहानन्दसम्भेदो मदो मद्योपयोगजः।
अमुना चोत्तमः शेते, मध्यो हसति गायति॥
अधमप्रकृतिश्चापि परुषं वक्ति रोदिति॥१७८॥ (ष)

यथा,—

"प्रातिभं त्रिसरकेण गतानां वक्रवाक्यरचनारमणीयः।
गूढसूचितरहस्यसहासः सुभ्रुवां प्रववृते परिहासः॥" (स)

ततः किञ्चिद्दूरं वनादेः प्रान्तदेशे इत्यर्थः, ("पर्य्यन्तभूः परिसरः" इत्यमरः) जवात्—वेगात्, त्रिचतुराणि—त्रीणि वा चत्वारि वेति तथोक्तानि, पदानि यावत्, गत्वा च—गत्वैव, सद्यः,—तत्क्षणं, "कियत् गन्तव्यमस्ति" इति असकृत्—पुनः पुनः, ब्रुवाणा—कथयन्ती, पृच्छन्ती सतीति यावत्, रामस्य अश्रु—नयनजलं, तस्य प्रथमावतारं—पूर्वाविष्करणं, कृतवती, तत्पूर्वं न कदाऽपि कश्चित् रामस्याश्रुद्गमं कृतवान्, किन्तु तदानीं सीतैव तथा ब्रुवती कृतवतीति भावः। [अत्र वारंवारं गन्तव्याध्वपरिमाण-जिज्ञासया सीतायाः स्वल्पपथलङ्घनेऽपि श्रममवधार्य्य श्रीरामस्य रोदनमवगन्तव्यम्]। वसन्ततिलकं वृत्तम्।

(ष) सप्रभेदं मदमाह, सम्मोहेति।—मद्यस्य—आसवस्य, उपयोगः,—पानं, तस्मात् जातः, सम्मोहानन्दयोः सम्भेदः,—सम्मेलकः, मदः, आसवाद्युपयोगोद्भवः मुक्तासाह्वः स्वापप्रहसितादिनिमित्तः मनोवृत्तिविशेषः मदः इति निष्कर्षः। अस्य त्रैविध्यसूचनाय अनुभावत्रैविध्यमाह, अमुनेति।—अमुना—मदेन, उत्तमः,—साधु-शीलो जनः, शेते; मध्यः,—नातिनीचो न चात्युत्तमो लोकः, हसति गायति च; अधमप्रकृतिः,—नीचस्वभावो जनः, परुषं—कर्कशं, वक्ति रोदिति च, अतोऽयं त्रिविधानुभावतया त्रिविध इति बोध्यम्।

(स) उदाहरति, प्रातिभमिति।—त्रिसरकेण—त्रिवारमधुपानेनेत्यर्थः, ["सरकं शीधुपात्रे स्यात् शीधुपाने च शीधुनि" इति विश्वः। "त्रिपानं मदातिभूमिः" इति पानविधिः। "तद्धितार्थोत्तरपदसमाहारे च" (२।१।५१ पा०) इति द्विगुः। "पात्राद्यन्तस्य न" (वा०) इति पात्रादित्वात् नपुंसकत्वम्] प्रातिभं—प्रतिभा—ज्ञानबीजभूतः संस्कारविशेषः, तत्र भवं तत् तथोक्तं, ज्ञानप्रभावविशेषमिति भावः, [भवार्थेऽच्] यद्वा,—प्रतिभा बुद्धिविशेष एवेति तत् तथोक्तं [स्वार्थेऽच्] प्रागल्भ्यं, गतानां

अथ जड़ता,—

अप्रतिपत्तिर्जड़ता स्यादिष्टानिष्टदर्शनश्रुतिभिः ।
अनिमिषनयननिरीक्षणतूष्णीम्भावाद्यस्तत्र ॥ १७६ ॥ (च)

यथा मम कुवलयाश्वचरिते प्राकृतकाव्ये,—

"अवरिअ तं सुअणुअलं अप्पाणम्मि णिहिदसअलमंथरदिट्ठिम् ।
आलेक्खओपिअं विअ खणमेत्तं तत्थ संठिअं सुत्तसरिसम् ॥" (छ)

—प्रियारतसुखपानोद्दीप्तमदोद्भूतधार्ष्ट्यसुप्तम् दृष्ट्वा, सुभ्रुवा—रतक्रीडा, यत्नवाक्य-रचनारतक्रीडा;,—मध्ये—श्लिष्टार्थकं, यत् वाक्यं तत्र रचनया रतक्रीडा;, श्लिष्टार्थकवाक्य-प्रयोगद्वारा मनोहर इति भावः, गूढानि—प्रथमं सपदि सङ्कुचानि, सूचितानि—तत्समये सहैव प्रकटीकृतानि, दृष्टानि—प्राप्याङ्गभङ्गीव्यापारप्रणयमनोहरैः वक्त्रैः यत् गूढसूचितदृष्टम्;, स चासौ सङ्घातश्च इति, [विशेषणसमासोऽयं, वैयधिकरण्यविशेषण-विशेष्यभावात्] ("सङ्घो सङ्घातः" इत्यमरः) परिहासः;,—मनसिजैः;, उपहासचेष्टा इति यावत्, ("हसनेङ्गितपरीहासाः" इत्यमरः) प्रवृत्तः—प्रवृत्तः । प्रियपात्रवधस्वेदं प्रस्तुतम् । उपजातिः छन्दः ।

(च) जड़तामाह, अप्रतिपत्तिरिति ।—इष्टानिष्टयोः,—प्रियाप्रिययोः, दर्शन-श्रुतिभिः अप्रतिपत्तिः,—अवर्त्तव्यविमूढता, जड़ता स्यात् । तथा हि,—वियोग भीति-चिन्तोत्सङ्घातेष्टानिष्टप्रेक्षणाकर्णनादिसमुत्थनिश्चितवर्त्तव्यविषयविरोधस्मरणात् मनोवृत्तिः जड़ता इति निष्कर्षः । तत्र—जड़तायाम्, अनिमिषेण—निर्निमेषेण, नयनेन निरीक्षणं, तूष्णीम्भावः,—मौनित्वं, तत्प्रभृतयः, भवतीति शेषः । [एवा हि कदाचित् मोहात् पूर्वं, कदाचित् परञ्च समुत्पद्यते ; यदाचक्ष्युः प्राचीनाः,— "ज्ञात्वाविवेको जड़ता पश्चात् मूर्खतोऽपि वा । तद्भावाः प्रियानिष्टदर्शनश्रवणे क्रमात् ॥ अनुभावास्तनौ तूष्णीम्भावविस्मरणादयः । सा पूर्वं परतो वा स्याद्मोहादिति विदां मतम् ॥" इति] एवञ्च मोहात् पूर्वजाताया उत्तरजाताया चेति विविधेति वेदितव्यम् ।

(छ) अनिमेषप्रेक्षणमनुदाहरति, अवरिअ इति ।—["वैयधिकरण्यं तत् सुवदनस-म्भोऽनिमिषसजलनयनमन्थरदृष्टि । आलेख्यार्पितमिव चपलाभं तत्र संस्थितं सुप्त-सदृशम् ॥" इति संस्कृतम्] । कदाचित् पथि सम्मिलितयोः परस्परं दृष्टिं निक्षिपतोः युवयोः नितम्बयोः सदालोलनोलवस्त्रा दृष्टवत उक्तिरियम् ; यद्वा,—बहुवचनात् पूर्वं

अथ उग्रता,—

✓शौर्यापराधादिभवं भवेच्चण्डत्वमुग्रता।
तत्र खेदशिरःकम्पतर्जनाताड़नादयः॥ १८०॥(ख)

यथा,—

"प्रणयिसखीसङ्कोचपरिहासरसाधिगतेः
स्खलितशिरोरुपुष्पहननैरपि ताम्यति यत्।
वपुषि वधाय तत्र तव शस्त्रमुपक्षिपतः
पततु शिरस्यकाण्डयमदण्ड इवैष भुजः॥" (ग)

निखिलयोः नायकनायिकयोः अवज्ञां दृष्ट्वा; तस्मा उक्तिरियम्। [तत्र "युवयुगलम्" इत्यत्र युवा च युवती च इत्येकशेषः। अपरिचयभ्रष्टः केवलार्थे देशीयः]। तत् युवयुगलं—तरुणतरुणं, केवलम्—धनलवव्यापारं यथा तथा, अक्ष्णोरन्तर्निहिता—अर्पिता, तरला—चञ्चलपूर्णा, मन्थरा—जड़ा, दृष्टिः येन ताडनम्, अत एव आलेख्यार्पितमिव—चित्रलिखितमिव, मूकमकम्—आकङ्कारहितं सत्, तत्र अवसरे संस्थितम्—अवस्थितमित्यर्थः। स्खलच्छत्रमेतत्। तल्लक्षणं यथा,—"स्खलच्छत्रमिति तत् यत्र चतुश्चलनघाटकैर्नाड्यां स्यात्। तत्तुल्यनिमिदलं भवति चतुःषष्टिमात्रकमरीरमिदम्॥" इति।

(ख) उग्रतामाह, शौर्येति।—शौर्यं—वलमाश्रितम्, अपराधः,—अन्यजनानुचारः, एवमादिभ्यः भवतीति तथोक्तं, चण्डत्वम्—अन्यानवस्थितत्वं, तीक्ष्णत्वमित्यर्थः, उग्रता ज्ञात्। अस्यानुभावान् निर्दिशति, तत्रेति।—तत्र—तस्मात् उग्रतायां सत्यामित्यर्थः, खेदः, शिरःकम्पः, तर्जना, ताड़नादयश्चानुभावा भवन्ति इति शेषम्।

(ग) उदाहरति, प्रणयीति।—प्रणयिनी—प्रेमवती, या सखी—सहचरी, तस्याः सकाशात्,—सविधात्, यः परिहासः,—केलिः, तस्य रसेन—अनुरागेण, अधिगतानि—प्राप्तानि तैः, स्खलितैः,—मुग्धैः, शिरोरुपुष्पैः यानि हननानि—प्रहाराः तैः अपि, यत्—वपुः, म्लायति इति शेषः, ताम्यति—क्लिश्यतीत्यर्थः, तत्र वपुषि—नायकीशरीरे, वधाय—हन्तुं, शस्त्रं—बाहुम्, उपक्षिपतः,—उत्तोलयतः, तव शिरसि एवः,—उद्यत इत्यर्थः, भुजः, सन इति भावः, अकाण्डयमदण्ड इव—अकाण्डे अकाण्डतः यमदण्ड इत्यर्थः, पततु। आकस्मिकत्वेन अप्रतिक्रियत्वमुक्तम्। भुजपदेन बाहुव्यापारेणैव हन्तव्योऽसौति नीचांतिक्रयः उक्तः। नायकीनायकयोर्

अथ मोहः,—

मोहो विचित्तता भीतिदुःखावेगानुचिन्तनैः।
मूर्छनागात्रपतनभ्रमादर्शनादिकृत् ॥ १८१ ॥ (घ)

यथा,—

"तीव्राभिषङ्गप्रभवेण दृष्टिं मोहेन संस्तभयतेन्द्रियाणाम्।
अज्ञातभर्तृव्यसना मुहूर्तं ज्ञातोपचारेव रतिर्बभूव ॥" (ङ)

वचनम्। [अत्र नायकीशरीरे प्रस्तावार्थं कुर्वतोऽधीरचरस्यापराधेन नायकस्य चरणतलनिपातदर्शनेन व्याख्यानं। अनन्तरश्लोकोपन्यासेन सुप्तरूपकोपनेयस्य सादृश्योद्भावनात् उपन्यासोऽयम्:]। नर्दटकं छन्दः,—"यदि भवति नगौ भजजला गुरु नर्दटकम्" इति लक्षणात्।

(घ) मोहनाम, मोह इति।—भीतिदुःखावेगानुचिन्तनैः,—भीतिः,—भयं, दुःखं—क्लेशः, तयोरावेगः,—उद्रेकः, तस्यानुचिन्तनानि—चलत्तरङ्गचित्तविचाराधीनत्वं: तैः, तथा—भीतिश्च दुःखञ्च, तयोरावेगः,—उद्रेकश्च, तस्यानुचिन्तनं—पदार्थानां तत्तद्रूपतः इतस्ततः, मूर्छना—चक्षुरादीनां भ्रमणं, गात्रपतनं, भ्रमणं—भ्रमः, अदर्शनम्—अज्ञानम्, एवमादिकृत्—एवमादिहेतुभूता, या विचित्तता—विभ्रमं चित्तम्—अनुत्पन्नानामप्रवृत्तिनिदानः स्मरणं, वाह्यज्ञानराहित्यरूपा इत्यर्थश्च तस्य भावस्तत्ता तथोक्ता, निर्मोचनमसिति यावत्, मोहः। ["मूर्छनागात्रपतन" इत्यत्र "मूर्छनाज्ञानपतन" इति पाठान्तरं अष्टार्थकम्] भीतिविभ्रमोन्मादिकव्याधिता यथार्थवस्तुतत्त्वज्ञानानवबोधिनी मनोवृत्तिः मोहः इति निष्कर्षः।

(ङ) उदाहरणति,तीव्रेति।—तीव्राभिषङ्गप्रभवेण—तीव्रः,—तीक्ष्णः,दुःखञ्च इति यावत्, दुः खनिषङ्गः,—पतनः परामर्शः, ("अभिषङ्गः परामर्शे" इत्यमरः) तस्मात्प्रभवेण, दृष्टिदाक्षां दृष्टिं—विषयग्रहणशक्तिं, संस्तभयता—निरुध्यता, प्रतिबध्नतेति यावत्, [एतेन मोहस्य चक्षुरादेरपि सूचितम्] मोहेन—विचित्ततया, अज्ञातभर्तृव्यसना—अज्ञातम्—अननुभूतं, भर्तुः,—स्वामिनः, व्यसनं—विपत्, विशेष इत्यर्थः तथा तथाभूता सती, रतिः,—स्वामिनी ("रतिः स्त्री सुरतेऽरदारेषु रागे सुरतभूषणी:" इति मेदिनी) मुहूर्तं—क्षिप्तिप्रावधि, यावन्मोहस्तुपगता यावदिति यावत्, ज्ञातोपचारा—ज्ञातोपचारा इव, बभूव। उपचारः इवम्। कुमारसम्भवस्थोऽयं श्लोकः।

अथ विबोधः,—

निद्राऽपगमहेतुभ्यो विबोधस्चेतनाऽऽगमः।
सूक्ष्माऽङ्गभङ्गनयनमीलनाङ्गावलोककृत् ॥१८२॥ (च)

यथा,—

"चिररतिपरिखेदात् प्राप्तनिद्रासुखानां
चरममपि ग्रयित्वा पूर्वमेव प्रबुद्धाः।
अपरिचलितगात्राः कुर्वते न प्रियाणाम्
अभिलिषितभुजाग्राऽऽश्लेषमेतं तरुण्यः॥" (छ)

(च) विशेषणाद्, निद्रेति।—निद्रायाः अपगमः,—निद्रापि:, तस्य हेतुभ्यः,—सकलादिभ्यः, आगमः—आजायेत सुखजागरणम्, अङ्गभङ्गं—पार्श्वादीनामङ्गानां मोटनं, नयनमीलनं—नेत्रसङ्कोचनं, [इदमत्र हि लोके प्रायशः, विबोधानन्तरमेव आलोकायुज्जागरणसुखा अभिलषितं चक्षुः आकुञ्चनादिकर्मा विदधति इति] अङ्गावलोकं,—अवलम्बादिदर्शनम्, करोति—जनयतीति तथोक्तः, चेतसायाः जागरः, —उपलब्धिः, ज्ञानमात्र इति यावत्, विबोधः,—ज्ञानापविनाशात् परं जनुष्मन्: बोधविशेषः इत्यर्थः। ज्ञानापविनाशो हि श्रवणपूर्वता-ग्रहणालम्बढोपलब्धालोक-स्पर्शादिभिः जनुष्मन्यते, विज्ञाना: ते एवाम इति शेषम्। अङ्गसङ्गादिनिमीलता-दयोऽनुभावाः।

(छ) उदाहरति, चिरेति।—चिरं—पश्चात्, पतिश्रवणालम्बरतिमिति यावत्, अपि, अविज्ञा—ज्ञापित्वा, पूर्वं—प्रथमं, पतिप्रबोधात् प्रागिति यावत्, एव प्रबुद्धाः—अपगतनिद्राः, जागरिता इति यावत्, [एवञ्च जाग्रां पतिव्रतानां सूचितं, "सुप्ते पत्यौ या स्त्री पूर्वमेव प्रबुध्यते। नान्यं जानपदे चित्ते सा स्त्री ज्ञेया पतिव्रता॥" इति स्मरणात्] तथाऽपि अपरिचलितगात्राः,—अपरिचलितं—नेत्रसङ्गतः अनपायं, गात्रं —पार्श्वादि अङ्गं यासां: तास्तथोक्ताः, प्रतीतां निद्रासङ्गभङ्गात् यासां: प्रबुद्धाभिरपि प्रार्श्वपरिवर्तनसुलभमपि न कर्तुं प्रार्थ्यते तथाभूता इति भावः, [यथा,— स्वपतिप्रेमवशेन जागरणतोद्यतास्ति: दृश्यते, "सुप्ते स्वपिति" इति "सुप्ता न प्रतिवर्तते" इति च अनुशासनवशे सतिसप्तमात्] तरुण्यः चिररतिपरिखेदात्—चिरं—बहुकालं यावत्, या क्रमा रतिः,—रमणं, सुरतमत्यङ्ग इति यावत्, तया या: परिखेदः,—तरुण्यः यत: तस्मात्तथोक्तात्, प्राप्तनिद्रासुखानां—प्राप्तः—लब्धः

अथ स्वप्नः,—

स्वप्नो निद्रामुपेतस्य विषयानुभवस्तु यः।
सोपाऽऽवेगभयग्लानिसुखदुःखादिकारकः॥१८३॥ (ज)

यथा,—

"मामाकाशप्रणिहितभुजं निर्दयाश्लेषहेतोः
लब्धायास्ते कथमपि मया स्वप्नसन्दर्शनेषु।
पश्यन्तीनां न खलु बहुशो न स्थलीदेवतानां
मुक्तास्थूलास्तरुकिसलयेष्वश्रुलेशाः पतन्ति॥" (झ)

निद्रासुखं यैः तेषां तथोक्तानां, ["चिरश्रमपरिखेदप्रसन्ननिद्रासुखानाम्" इति क्वचित् पाठान्तरम्] प्रियायां—प्रथमनायिकायां, पत्युर्नायिकेति शेषः, श्लिष्टभुजपाशश्लेषभेदम्—श्लिष्टाश्च ते भुजपाशाश्च श्लिष्टभुजपाशाः, तेषां श्लेषः, श्लिष्टभुजपाशश्लेषः, तं भेदः,—विश्लेषः, विश्लेषनमिति यावत् तं तथोक्तं, न कुर्वते—न कुर्वन्ति, किन्तु आश्लिष्यैव स्थिताः, अन्यथा तेषां निद्राभङ्गः स्यात्। "प्रियां न प्रबोधयेत्" इति स्मरणात् शास्त्रतः प्रियानुभवसंपादनद्वारा प्रियायां निद्राभङ्गो मा भूदिति तानाश्लिष्यैव स्थिता आसन्निति भावः। ["श्लिष्टभुज" इति पाठे—निद्राभङ्गात् भुजश्लेषित्वं, प्रियः प्रबुध्य भुजाश्लेषं कर्तुमर्हति इति सारः। यत्तु "श्लिष्टभुज" इत्यंशात् परं "श्लेषाश्लेषभङ्गम्" इति टीकाकृतोक्तात् पाठः, स चाधुनिकपुस्तकेषु न पर्यवेक्ष्यते। अत्र पतिनिद्राभङ्गभयव्याक्षेपानौत्सुक्यादिभयहेतुभूतप्रियाऽऽश्लिष्टभङ्गविभावाभावोऽत्रेत्यंशोक्तिः। रतिश्रमोऽत्र सञ्चारी, तदनुभावो निद्रा]। प्रियपात्रवधखेदं पश्यन्। नायिनो इत्यत्र ,—"ननन्दयिषुतेयं नायिनो श्रीनिवासयोः" इति तत्रत्यवत्।

(ज) स्वप्नमाह, स्वप्न इति।—निद्रां—शयनं, शयनार्थं तल्पाद्यास्तरणमिति यावत्, ["शयनम्" इति पाठान्तरे तु—आसनस्थसुप्तप्रहरादेरुपरागवत्त्वात्, चाक्षुषत्वप्रसक्तानिमर्थः] उपेतस्य—गतस्य, यः विषयानुभवः,—सुप्तदृष्टानां पुनस्तत्रैव प्रत्यक्षीक्षणवत्त्वावधानम्, सः स्वप्नः, उच्यते इति शेषः। सः कीदृशः? सोपावेगभयग्लानिसुखदुःखादिकारकः। [आदिना श्रीत्वादीनां ग्रहणम्। अतोऽत्र कोपावेगादयोऽनुभावा इति बोद्धव्यम्]।

(झ) उदाहरति, मामिति।—वचनं श्लेषं प्रति प्रियायै शयनविधायकमिदम्।

अथ अपस्मारः,—

मनःक्षेपस्त्वपस्मारो ग्रहाद्यावेशनादिजः।
भूपातकम्पप्रस्वेदफेनलालादिकारकः ॥१८४॥ (अ)

यथा,—

"आश्लिष्टभूमिं रसितारमुच्चैर्लोलद्भुजाकारवृकोत्तरङ्गम्।
फेनायमानं पतिमापगानामसावपस्मारिषमाग्रहीत् ॥" (ट)

अग्रवृन्दर्शनेषु—व्यग्राः,—सुखजनानां विज्ञानानि, वृन्दर्शनानि—ज्ञानानि तेषु, [चुतड्यादिवस्त्रानाम्बिशेषेणेन बहुवचनम्] ("व्यग्राः सुखज विज्ञानम्" इति विश्वः। "दर्शनं समये ज्ञाने दृष्टौ श्रद्धेक्षि संविदि" इति मेदिनीकोषः) यथा,—स्वप्ने—निद्राजाविकविषयानुभवे, यत् वृन्दर्शनम्—चक्षुरीक्षणं तेषु, मया अक्षणपि—नयनेन आजातेन, उन्मीलाः,—स्फुटीभावाः, दृष्टाया इति यावत्, ते—तव, निर्दयाश्लेषचेतोः,—निर्गता दया परपीडनाबहिष्कृतं यत् तादृशोऽसौ आश्लेषः,—आश्लिष्टम्, स एव चेतुः तस्मात्, गाढाश्लिष्टमर्थमेनिति भावः, आकाशे—निर्विघ्ने देशे दत्तः, प्रविक्षिप्तभुजं—प्रविक्षिप्तौ आपितौ, भुजौ येन तादृशं, प्रसारितबाहुमिति यावत्, मां पक्ष्मलानां अक्षोदेवतानां—वनदेवतानां, मुक्ताफलाः,—मुक्ताइव अश्रूणि, अश्रुलेशाः,—नयनोदबिन्दवः, तद्विग्रहयेषु—इयामाभिनवपल्लवाङ्कुरोपरिभागेषु दत्तवः, बहुधाः,—बहुवारं, न खलु पतसि, इति न, किन्तु पतन्येवेति भावः। अत्र,—"गङ्गाम्बु-गुरु-देवानामनुपातः चितौ यदि। देवमंगो गङ्गादुःखं मरणस्य भवेत् ध्रुवम्॥" इति पृथिव्यां देवानुपातनिषेधदर्शनात् यत्तस्य मरणाभावसूचनार्थं तद्विग्रहयेषु पतसि इत्युक्तमवधेयम्। मेघदूतखेदं पद्यम्। मन्दाक्रान्ता वृत्तम्।

(अ) अपस्मारमाह, मन इति।—ग्रहादीनाम्, (आदिपदेन भूतादीनां परिग्रहः) आवेशनादिना—आक्रमणादिना, (आदिपदेन धातुवैषम्यादिपरिग्रहः) जनितः मनसः,—चित्तस्य, क्षेपः,—विकृतिः, अपस्मारः, तस्य भूपातः,—भुवि पतनं, कम्पः, प्रस्वेदः खेदः, फेनलालादीनामुद्गमश्च भवति। अतोऽत्र भूमिपातादयोऽनुभावा वेदितव्याः।

(ट) उदाहरति, आश्लिष्टेति।—अयं—ग्रहः, आश्लिष्टा—आश्लिष्टिता, भूमिः,—भूमिसतं येन तथोक्तम्, [एतेन भूपातः सूचितः] उच्चैः,—उच्चस्वरेण, रसितारं—नदन्तं कुर्वन्तं, लोलतः,—चञ्चलतः, भुजाकाराः,—हस्तसदृशाः, वृकाः,—गङ्गाम्बु, तरङ्गाः यत्र तादृशं, फेनायमानं—फेनमुद्गमयन्तं, आपगानां—

अथ गर्वः,—

गर्वो मदः प्रभावश्रीविद्यासत्कुलताऽऽदिजः।
अवज्ञासविलासाङ्गदर्शनाविनयादिकृत् ॥१८५॥ (ठ)

शौर्यगर्वो यथा,—

"धृतायुधो यावदहं तावदन्यैः किमायुधैः?।
यद्वा न सिद्धमस्त्रेण मम तत् केन साध्यताम्?॥" (ड)

अथ मरणम्,—

शरादेर्मरणं जीवत्यागोऽङ्गपतनादिकृत् ॥१८६॥ (ढ)

नदीनां, पतिं—समुद्रम्, अपजगारिवस्—अपजगरीगरणम्, आजग्रहे—तर्कितवान्। भूनिपातीक्षेरसनभुजाकारतरङ्गास्फोटनफेनोद्गमनादिना समुद्रोऽपजगारवत् इवाचरत्यतेति भावः। अत एवापजगारध्वननम्। मिश्रपाखण्डवत्तेदं पद्यम्। इन्द्रवज्रोपेन्द्रवज्रयोरुपजातिश्छन्दः।

(ठ) गर्वनाह, गर्व इति।—प्रभावः,—शौर्यदक्षादिजन्यः प्रतापः, श्रीः,—सम्पत्तिः, विद्या—आन्वीक्षिक्यादिषु ज्ञानं, तथा सत्कुलतादि—अभिजात्यादिजम्, [आदिपदेन सौन्दर्यादीनां परिग्रहः] तज्जात् जातः,—उत्पन्नः, यो मदः,—अहङ्कारः, चित्तविकारविशेषः इति यावत्, स गर्वः,—तन्नाम्ना प्रसिद्धः; स च अवज्ञा—लोकान् प्रति ऐश्वर्यबुद्धिः, सविलासं—सभङ्गि, अङ्गदर्शनं, ["दर्शनम्" इति तु विजन्यादिजन्यदृश्यशोभाः दृश्यं, तेन अधिजन्यपदे आत्मना आत्मशरीरावलोकनम्, अन्यत्र—परकीयशोभनविषयावलोकनम् इति] तथा अविनयादिः,—अशिष्टव्यवहारादिस्तान् करोतीति तथोक्तः, ["सुखमंपापमन्यपुरुषेषु क्रञः" (३।२।८ पा०) इति क्विप्, केचित् तु ताच्छील्ये क्विप् इति] तथा च—प्रभावादिजन्यावज्ञोपयुक्तावयवसमुदायो मानसविकारो गर्वो ज्ञेय इति निष्कृष्टम्।

(ड) उदाहरति, धृतायुध इति।—वैणीकंकारे अयत्नाच्च उल्लिखितम्। यावत्—यत्परिमाणपर्यन्तम्, अहं धृतायुधः,—अस्त्रधारी सन्, विद्यामीति शेषः, तावत् अन्यैः,—नवधृतायुधभिन्नैरित्यर्थः, आयुधैः,—अस्त्रैः, किम्? विपक्षजन्यैरिमानस्त्रधारणमिति भावः। मम अस्त्रेण इत्र—आर्ये, न सिद्धं—न निष्पन्नं, तत्—आर्ये, केन वा साध्यताम्? यदीति शेषः।

(ढ) मरणनाह, शरादेरिति।—शरादेः,—शस्त्रप्रहारादेः, [अत्र आदिपदेन

यथा,—

"रामनन्मथशरेण ताड़िता दुःसहेन हृदये निशाचरी।
गन्धवद्रुधिरचन्दनोक्षिता जीवितेशभवसतिं जगाम सा॥" (च)

रोगमोहमूर्च्छादीनां परिग्रहः] जीवत्—जीवनञ्च, त्यागः,—उपचारात् तदाशीर्जननी भवत्या, न तु तत्प्राप्तिरिति भावः, मरणम्; तत्र पक्षपतनादि भवति। [अत्र विप्रियो यथा रघुवंशाकरे—"रोगादिजन्या मूर्च्छादिदशा मरणभावना मरणम्; न चात्र प्राणवियोगात्मकं मुख्यं मरणमुचितं ग्रहीतुं, चिरन्तनत्वात्मकेषु भावेषु तस्य अप्रसक्तेः; भावेषु च सर्वेषु कार्यसदृशसिद्धया शरीरप्राणवियोगस्य हेतुत्वात्"। उदाहरणम्;—"हृदितस्य गुणानुस्मरन्ती शयने सन्निति या विलोकिताऽसीत्। अधुना खलु तत्र सा क्षमाङ्गी निरपत्रपकुरुते न भाविताऽपि॥" प्रियविरहोऽत्र विभावः, वचनविरोधोऽनुभावः, हृदयपदस्यानन्यसुपचारवत्त्वादाक्षिप्तस्याऽप्यर्थं भावः पदमयुक्तामावहति, हृदितस्य गुणानुस्मरन्तीत्यनेन व्यज्यमानं चरमावस्थायामपि तस्या हृदितगुणविस्मरणं सा मृदिति विप्रलम्भस्य मोक्षस्य वा चरमनभिव्यक्तश्च पोषकम्। अवश्य विशेषः,—लक्ष्यक्रमव्यङ्ग्योत्तरवर्त्तिना वाच्यान्तरेण सन्दर्भघटकेन नायिकाऽऽदेः प्रत्यभिज्ञानवर्णने विप्रलम्भस्य, अन्यथा तु करुणस्य पोषक इति। अवयः पुनरयं प्राधान्येन न वर्ण्यते, अनङ्गप्रायत्वात्। प्रदीपकारा अप्याहुः,—"जीवज्जीवनमात्रस्य मरणं परिकीर्त्तितम्। तस्माद्दैन्द्रियसंन्यासिनामविषेपणादिदम्॥" इति]।

(च) उदाहरति, रामेति।—दुःसहेन—सोढुमशक्येन, रामनन्मथशरेण—राम एव मन्मथः कामः, मन्मथ,—रामः,—अभिरामः,मनोहर इत्यर्थः, मन्मथः, तस्य शरेण, हृदये—मनसि च, ("हृदयं मनउरसोः" इति विश्वः) ताड़िता—आहता, विद्धेति यावत्, अत एव गन्धवद्रुधिरचन्दनोक्षिता—गन्धवत् दुर्गन्धि, यत् रुधिरम् असृक्, तदेव चन्दनं चन्दनमालीवलिप्तमित्यर्थः, तेन उक्षिता लिप्ता, अपरञ्च,—गन्धवती ये रुधिरचन्दने कुङ्कुमचन्दने, ताभ्यां उक्षिता सती, ("रुधिरं कुङ्कुमासृजोः" इति विश्वः) सा—विख्याता, निशासु चरतीति निशाचरी—राक्षसी, ताड़केति यावत्, जगाम,—अभिसारिका नायिका इत्यर्थः, जीवितेशभवसतिं—जीवितेशः पतिः, जगाम,—शिवः, ("जीवितेशो पतौ पुंसि विषु आजीवितेश्वरे" इति मेदिनी) तस्य भवसतिं—भावस्थानं, जगाम। अभिसारिकायाः प्रियसन्निधौ अभिसरणं स्यात्, यत्तस्मिन्नौ प्रवाच्य ताड़कायाः वाच्यम् इति बोध्यम्। रघुवंशस्येदं पद्यम्। रघोद्धता छन्दः,—"राजरामा रघोद्धता सगौ" इति तल्लक्षणात्।

अथ आलस्यम्,—

आलस्यं श्रमगर्भाद्यैर्जाड्यं जृम्भाऽऽसितादिकृत् ॥१८७॥(ग)

यथा,—

"न तथा भूषयत्यङ्गं न तथाऽऽभाषते सखीम् ।
जृम्भते मुहुरासीना बाला गर्भभरालसा ॥" (थ)

अथ अमर्षः,—

निन्दाऽऽक्षेपापमानादेरमर्षोऽभिनिविष्टता ।
नेत्ररागशिरःकम्प-भ्रूभङ्गोत्तर्जनादिकृत् ॥१८८॥ (द)

यथा,—

"प्रायश्चित्तं चरिष्यामि पूज्यानां वो व्यतिक्रमात् ।
न त्वेवं दूषयिष्यामि शस्त्रग्रहमहाव्रतम् ॥" (ध)

(ग) आलस्यमाह, आलस्यमिति ।—श्रमेण गर्भादिना वा [आदिपदेन प्रचुरभोजनादेः ग्रहणम्] शरीरस्य जाड्यं—आलस्यानुभावत्वमित्यर्थः, जर्जरेत्युच्यते इति यावत्, आलस्यम् ; तत्र जृम्भा, आसितम्—उपवेशनं, तदादिकं भवति, किन्तु इदमवधेयम्,—यत्र न सर्वथा सामर्थ्याभावः, नापि कार्य्यान्तरव्यग्रतया, यतः कार्य्यान्तरव्यग्रत्वेन अनुभावस्य समानत्वेऽपि नेदं व्यभिचरि वा अङ्गतेति ।

(घ) आलस्यमुदाहरति, येति ।—बाला—बालिका, गर्भभरेण अलसा—मन्थरा सती, अङ्गं तथा—पूर्ववद्विभूषयेत्, न भूषयति—नालङ्करोति, सखीम् तथा न आभाषते—सख्या वचनमपि चाखादयं न करोतीत्यर्थः, केवलम् आसीना—उपविष्टा सती, मुहुः,—पुनः पुनः, जृम्भते—आलस्यं प्रकटयति इति भावः । यत्र गर्भभरालसत्वतः, प्रतिबोधनानुपपत्तेरनाकरणोद्दीपनम्, मन्थरत्वननाद्यनुभावत्वात्, आलस्यं नाम व्यभिचारी भवति ।

(ङ) अमर्षमाह, निन्देति ।—निन्दा—गर्हा, आक्षेपः,—तिरस्कारः, अपमानम्—अवज्ञा, इत्यादिकेषां [अपमानादिपदेन चित्तपक्षपातादेर्ग्रहणम्] अभिनिविष्टता—वैरनिर्यातनादावभिनिवेशः, अमर्षः । क्रोधस्तु उत्कटावधिर्योवा, इत्यनयोर्भेदः । अत्र नेत्ररागः,—चक्षुषो रक्तत्वं, शिरःकम्पः, भ्रूभङ्गः, तथा उत्तर्जनादि भवति ।

(च) उदाहरति, प्रायश्चित्तमिति ।—निग्रहमिश्रादीन् इति परत्राक्षेपः

अथ निद्रा,—

चेतःसम्मीलनं निद्रा श्रमक्लममदादिजम्।
जृम्भाऽक्षिमीलनोच्छ्वासगात्रभङ्गादिकारणम् ॥१८८॥(ग)

यथा,—

"सार्थैकानर्थकपदं ब्रुवती मन्थराक्षरम्।
निद्रार्धमीलिताक्षी सा लिखितेवास्ति मे हृदि॥" (घ)

अथ अवहित्था,—

भयगौरवलज्जाऽऽदेर्हर्षाद्याकारगुप्तिरवहित्था।
व्यापारान्तरसक्त्यन्यथाऽवभाषणविलोकनादिकरी॥१८९॥(ङ)

रिवम्। पूज्यानां वः,—युष्माकं, व्यतिक्रमात्—विशेषेण आज्ञाभङ्गात्, प्रायश्चित्तं—पापशोधनानुकूलं कर्म, चरिष्यामि, येन पूज्यपूजाव्यतिक्रमजं पापं नश्येदिति भावः; तु—किन्तु, ब्रह्मव्रतः,—ब्रह्मचारक्येव, मद्गात्रतम्, एवं—सङ्कल्पितस्वार्थसम्पादनेनैव स्वात्मकमेव, न दूषयिष्यामि; भवद्भिः पूज्यैः ब्रह्मव्रतं मम निषिध्यते, यदहं भवतां सदाज्ञामनवधार्यैव अधुना ब्रह्मव्रतेन स्थातुं यतिष्यामि, ततः प्रायश्चित्तं चरिष्यामीति भावः। महावीरचरितस्यैतत् पद्यम्।

(ग) निद्रामाह, चेत इति।—श्रमेण, क्लमेन—ग्लान्या, मदादिना च जनितं चेतसः,—चित्तस्य, सम्मीलनं—मुकुलीभावः, नेत्रयोरीषन्निमेषेण निश्चलतानित्यर्थः, निद्रा, तत्र जृम्भा, अक्षिमीलनम्, उच्छ्वासः, तथा गात्रभङ्गादिश्च भवति।

(घ) उदाहरति, सार्थेति।—स्वस्यां प्रति यत्किञ्चिद्भाषमाणस्य उक्तिः। सा—मत्कान्ता, निद्रया अर्धमीलिते अक्षिणी यस्याः तथाभूता, अत एव सार्थकानि—अर्थयुक्तानि, अनर्थकानि—अर्थविरहितानि च, पदानि यस्मिन् तत् यथा तथा, मन्थराणि—जडानि, असम्पूर्णानि वा, अक्षराणि यस्मिन् तत् यथा तथा, ब्रुवती सती, मे—मम, हृदि लिखितेव,—चित्रितेव, द्वारपालिकाभरणस्त्रीरत्नमिव इति भावः, अस्ति। यथा वा "निमीलिताक्षियुगलां निद्रया क्लोऽपि बालेन्दियमौलिमुद्वहतात्। यदर्धं क्लमीव यदाऽव्यमीलितौ रक्षतमजां; स मङ्गलायोपतिः॥" इति।

(ङ) अवहित्थामाह, भयेति।—भयात् गौरवात् लज्जाऽऽदेश्च हेतोः हर्षादीनाम् आकारस्य—तत्तद्भावसूचकमुखरागादीनामित्यर्थः, गुप्तिः,—गोपनं, संवरणमिति

यथा,—

"एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी।
लीलाकमलपत्राणि गणयामास पार्वती॥" (ब)

अथ औत्सुक्यम्,—

इष्टानवाप्तेरौत्सुक्यं कालक्षेपासहिष्णुता।
चित्ततापत्वरास्वेददीर्घनिश्वसितादिकृत्॥१९१॥ (भ)

यथा,—

"यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपाः
ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः।
सा चैवास्मि तथाऽपि तत्र सुरतव्यापारलीलाविधौ
रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते॥" (म)

अत्र यत् काव्यप्रकाशकारेण रसस्य प्राधान्यमित्युक्तं, तत्

यावत्, अवहित्था—अ बहिः स्थानमिति तथोक्ता, ['सुपि स्थः' (३।२।४ पा०) इत्यत्र "स्थः" इति विभागे कप्रत्यये कृते, स्त्रियां पुनष्टापि पृषोदरादित्वात् रूपमिदम्] तत्र व्यापारान्तरे—कार्य्यान्तरे, सक्तिः,—आसङ्गः, अन्यथा—अप्रक्रान्तस्य, अवभाषणं विलोकनादिकञ्च भवति। [अत्रादिपदेन क्रियामात्राणां परिग्रहः]।

(ब) उदाहरति, एवमिति।—देवर्षौ—नारदे, एवंवादिनि सति, पितुः,—हिमाद्रेः, पार्श्वे, स्थिता इति शेषः, पार्वती अधोमुखी—अवनतवदना सती, लीलाकमलपत्राणि—क्रीडार्थं धृतस्य पद्मस्य पत्राणि, गणयामास। अत्र कमलपत्रगणनया महादेवेन समं भाविनः स्वपरिणयस्य प्रेष्ठत्वसूचनं गूहितम्। कुमारसम्भवस्येदं पद्यम्।

(भ) औत्सुक्यमाह, इष्टेति।—इष्टस्य—प्रियस्य, अनवाप्तेः,—अप्राप्तेः हेतोः, कालक्षेपस्य—कालविलम्बस्य, असहिष्णुता औत्सुक्यम्; तत्र चित्तस्य—मनसः, तापः, त्वरा, स्वेदः, दीर्घनिश्वासादिकं भवति।

(म) उदाहरति, य इति।—व्याख्यातं पद्यमिदं काव्यनिरूपणप्रस्तावे १५ पृष्ठे। अत्र "समुत्कण्ठते" इति पदेन नायकेन सममनुभूतस्य रेवारोधसि तत्तत्सुरतविधेरौत्सुक्यं स्फुटं नायिकायाः प्रतीयते।

रसनधर्मयोगित्वात् व्यभिचारिभावस्यापि रसशब्दवाच्यत्वेन गतार्थं मन्तव्यम्। (य)

अथ उन्मादः,—

चित्तसम्मोह उन्मादः कामशोकभयादिभिः।
अस्थानहासरुदितगीतप्रलपनादिकृत् ॥१९२॥ (र)

यथा मम,—

"भ्रातर्द्विरेफ! भवता भ्रमता समन्तात्
प्राणाधिका प्रियतमा मम वीक्षिता किम्?"।

(झङ्कारमनुभूय सानन्दम्)

"ब्रूषे किमोमिति सखे! कथयाशु तन्मे
किं किं व्यवस्यति? कुतोऽस्ति? च कीदृशीयम्?॥" (ल)

(य) अत्रेत्यादि।—अत्र—अस्मिन्नुदाहृते पद्ये, काव्यप्रकाशकारेण रसस्य प्राधान्यम् इत्येवं यत् उक्तं, तत् रसनधर्मयोगित्वात्—"रस्यते" इत्येवमास्वादनधर्मशालितया, व्यभिचारिभावस्यापि रसशब्दवाच्यत्वेन—रसवाच्यत्वोपपत्त्या, गतार्थं—प्राप्तविषयम् इति मन्तव्यम्। अयं भावः,—अत्रानुभावादिकृतपरिपोषरहिततया रतेः सम्पूर्णरसत्वं न सम्भवति, वर्णनीयतया चमत्कारित्वेन औत्सुक्यस्यैव प्राधान्यम्; अत एव प्रकाशटीकाकारा अप्याहुः,—"रसपदं चात्र सम्भोगव्यभिचार्य्यौत्सुक्यमाह "रस्यते आस्वाद्यते" इति व्युत्पत्त्या, न तु सम्भोगनामा रसः, स्वाधीनपतिकायाः क्रीडास्थानं प्रत्युत्सुकताया वर्णनीयत्वात्" इति।

(र) उन्मादमाह, चित्तेति।—कामशोकभयादिभिः हेतुभिः चित्तस्य सम्मोहः,—चेतनाचेतनादिविशेषज्ञानजननाक्षमत्वम्, उन्मादः; तत्र अस्थाने—हासादेरविषये, हासः, रुदितं, गीतं, प्रलपनं—प्रलापः, इत्यादिकं भवति। तथोक्तं नाट्यशास्त्रकारैः,—"इष्टजनविभवनाशादभिघाताद्वातपित्तकफकोपात्। विविधात्पित्तविकारादुन्मादो नाम सम्भवति॥ अनिमित्तहसितरुदितोपविष्टगीतप्रधावितोत्क्रुष्टैः। अन्यैश्च विकारकृतैरुन्मादं सम्प्रयुञ्जीत॥" इति।

(ल) उदाहरति, भ्रातरिति।—हे भ्रातः द्विरेफ!—भ्रमर! समन्तात्—चतुर्दिक्षु, भ्रमता भवता मम प्राणाधिका—प्राणेभ्योऽप्यतिशयिता, अत एव प्रियतमा किं वीक्षिता?—दृष्टा? (झङ्कारं—मधुरध्वनिम्, अनुभूय—स्वीकारार्थकतया

अथ श्रद्धा,—

परक्रौर्य्यात्मदोषाद्यैः शङ्काऽनर्थस्य तर्कणम्।
वैवर्ण्यकम्पवैस्वर्य्यपार्श्वालोकाऽऽस्यशोषकृत्॥१८१॥ (व)

यथा मम,—

"प्राचेतसेन प्रहितनखरेष्वङ्कपेषु सपाऽन्ते
जातातङ्का रक्षयति चिरं चन्दनालेपनानि।
धत्ते वाचामसकृदधरे दत्तदन्तावघाते
वामाक्षीयं चकितमभितश्चक्षुषी विक्षिपन्ती॥" (श)

निक्षिप्त, वासनम्) हे सखे! किं ब्रूषे? चौर् इति?—[चौर् इति खीकारसूचक-मव्ययम्] तत्—तर्हि, चारु—शीघ्र, मे—मह्यं, वयस्य—वृष्टि, इदं किं किं व्यवस्यति—कर्तुमीहते? कुतः,—कुत, चलि? कोऽसौ च? वर्त्तते इति शैवः इति। [अत्र वामेन "अनरः प्रत्युत्तराचनः" इति विश्वेवनिघण्टुरत्नाकरवचनं बोध्यम्]। वसन्ततिलकं वृत्तम्। [यथा वा—"हंस! प्रवच्छ मे वार्त्तां गतिसञ्जाख्यया द्रुता। विधातिवैदेहीहंसं यदभियुञ्जते]॥" इति। परिपुष्टिस्तु विज्ञानोर्ध्वस्थादौ।

(व) श्रद्धामाह, परैति।—परस्य क्रौर्य्यं—क्रूरता, तथा आत्मनः दोषः, सदैवनादिभिः अनर्थस्य—अनिष्टस्य, आपद इति यावत्, तर्कणं—सम्भावना, श्रद्धा। (एषा हि भीत्यादुद्भावनेन प्रवृत्त्यादिका, न हि पूर्वदृष्टश्रुतिः इति विशेषः) तत्र वैवर्ण्यं, कम्पः, वैस्वर्य्यं—स्वरभङ्गः, पार्श्वालोकः,—पार्श्वावलोकनम्, आस्यस्य—मुखस्य, शोषश्च भवति इति भावः।

(श) उदाहरति, प्राचेतसेनेति।—इदं—दृश्यमानं, वामाक्षी—स्त्रीरत्नं, प्राचेतसेन—प्राचनावेन, वाल्मीकेनेति यावत्, प्रहितनखरेषु—दत्तनखविलेखनेषु, अङ्कपेषु जातातङ्का—सञ्जातोपद्रवाशङ्का सती, सपाऽन्ते—राजपत्नीजने, अञ्जनेऽपि इति भावः, चकितः,—सभयः, चकितं—भीतं यथा तथा, यथास्यात्—पुनः पुनः, चक्षुषी विक्षिपन्ती सती, चिरं चन्दनालेपनानि, नखविक्षतशोषनार्थमिति भावः, रक्षयति, तथा दत्तदन्तावघाते—दंशिते इत्यर्थः, अधरे वाचां धत्ते—धारयति, अर्पयति इत्यर्थः। अयं भावः,—यदि सखी अथवा या कापि जनैरनखक्षेपं चर्तं इच्छति, तदा किमयं तया पृष्टोत्तरयिष्यति? परं मयिष्यति तदानीं वाचां वर्णां

अथ स्मृतिः,—

सहजसंस्कारचिन्ताऽऽद्यैर्भ्रूसमुन्नयनादिकृत्।
स्मृतिः पूर्वानुभूतार्थविषयज्ञानमुच्यते ॥१९४॥ (ष)

यथा मम,—

"मयि सकपटं किञ्चित् तापि प्रयोतविलोचने
स्मितमपि नयनं प्राप्ते तिर्यग्विजृम्भिततारकम्।
स्मितमुपगतामालीं दृष्ट्वा सलज्जमवाञ्चितं
कुवलयदृशः क्षेरं क्षेरं क्षरामि तदाननम्॥" (स)

परिचितरङ्गा, इति दृङ्: स्मितेन बहिर्गमनात् प्राक् तद्दीपनार्थमेवं कथयतीति। अत्र सखीनविकसनोपन एव विश्रान्तिरिति ब्रह्मायां एव प्राधान्यम्। मन्दाक्रान्ता छन्दः।

(ष) स्मृतिमाह, सहजेति।—सहजसंस्कारेण चिन्ता—भावनाख्यः संस्कारः, तदादिर्येषां [आदिपदेन सन्निधानादिर्ग्राह्यः] पूर्वं अनुभूतः अर्थः,—उपरक्तादिरूपः यत्र तादृशम्, विषयम्—वस्तुनः, ज्ञानं स्मृतिः उच्यते। [अत्र सहजसंस्कारादेः संस्कारोद्दीपनद्वारा, संस्कारस्य तु स्मृतिं प्रति साक्षादेव कारणत्वम् इति बोध्यम्] तत्र भ्रुवोः समुन्नयनादिकं भवति।

(स) उदाहरति, मयीति।—प्रीतिरस्य कञ्चित् भावस्य सद्भावं प्रत्युन्निरिक्षम्। सकपटं यथा स्यात् तथा तापि—दुःखेपि, भावतः अन्तरानुरागे सतीत्यर्थः, (अनिर्ज्ञातिपदार्थे वा) किञ्चित्—ईषत्, प्रयोतविलोचने—निर्निमेषनयने, मयि, अत्र स्मितमपि—खानिर्गमनज्ञापकरक्तपाषाणाद्युन्मुखं सप्रेमदृष्टिपातरूपं वस्तु द्रष्टव्यं, तिर्यक् विजृम्भिता तारका यत्र तादृशं, नयनं प्राप्ते—अत्र दृष्टिपदं नेते सति, स्मितं—हासम्, उपगतां—सम्प्राप्ताम्, आलीं—तत्र स्मितात् अत एव तत्सदृशे चेष्टिते पश्चात्तीं सखीं, दृष्ट्वा सलज्जं यथा स्यात्तथा अवाञ्चितम्—अवनमितं, कुवलयदृशः,—नीलोत्पलाक्ष्याः, क्षेरं क्षेरं—पुनः पुनः स्मितजन्मं, तत् आननं क्षरामि। अत्र आननमपि परकीयां आलिनीं आलम्बनत्वं अवलम्ब्याः भावस्य विभाव्य, नायिकायाः स्मितनमितमुखनिरीक्षणेन भावस्यापकर्षकं नायिकासुखजरत्वम्। दरिद्रो दुःखं,—"सकलरङ्गा नः यद्येवंविधैर्दरिद्रो मता" इति वक्ष्यमाणात्।

अथ मतिः,—

नीतिमार्गानुसृत्यादेरर्थनिर्द्धारणं मतिः।
औरता धृतिसन्तोषौ बहुमानश्च तद्भवाः॥१९५॥(ङ)

यथा,—

"असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः।
सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः॥" (क)

अथ व्याधिः,—

व्याधिर्ज्वरादिर्वातादैर्भूमीच्छोत्कम्पनादिकृत्॥१९६॥(ख)

(ङ) मतिमाह, नीतीति।—नीतिमार्गैः,—नीतिमार्गं, तस्य अनुसृत्यादेः,—अनुसरणादेः हेतोः, अवगमादेः हेतोरिति यावत्, [आदिपदेन अनुमानादेर्ग्रहणम्] अर्थानां—वाच्यानां, निर्द्धारणं—निर्णयः, मतिः, निगमागमसमाहोचनोत्पन्नः शास्त्रार्थनिर्णयः मतिः इति निष्कर्षः। औरता, धृतिः, सन्तोषः, बहुमानश्च तद्भवाः,—औरताऽऽदयः तदुत्पन्ना इत्यर्थः। [चन्द्रमाप्यत्रम् ;—"आप्तादिविचारजन्यमर्थनिर्द्धारणं मतिः, तस्य निःसङ्कतदर्थानुसन्धानसंशयबोच्छेदादयोऽनुभावा भवन्ति" इति]।

(क) उदाहरति, असंशयमिति।—अकुण्ठसाधनबोधं दुष्यन्तजातुमागमनिदम्। इयं, अकुण्ठसेति शेषः, असंशयं—निश्चितं, यत्तत्र—यस्मिन्नाश्रमे,परिग्रहे—पत्नीत्वेन स्वीकारे, क्षमा—योग्या, क्षत्रियविशाङ्गोचितेति यावत्, यत्—यस्मात्, आर्य्ये—साधु, निर्दोषमिति यावत्, मे—मम, मनः अस्यां—अकुण्ठसाधनाम्, अभिलाषि—अनुसन्धानम् ; तदेव समर्थयते, सतामिति।—हि—यतः, सन्देहपदेषु—सन्दिग्धेषु, वस्तुषु—विषयेषु, सतां—साधूनां, सदाऽप्यनाचरितपापकर्मणामित्यर्थः, अन्तःकरणप्रवृत्तयः,—आन्तरणि तत्त्वानि, सद्भावादयः इति यावत्, प्रमाणं—निश्चयबीजम् ; साधुजनस्य यत् आत्मायते, तदवश्यमेव आसवितव्यं, नात्र वैपरीत्यसम्भव इति भावः। अत्र अकुण्ठसाधनाः स्वपरिग्रहोचितत्वनिर्द्धारणम्। संशयविधं वस्तु।

(ख) व्याधिमाह, व्याधिरिति।—वातादैः,—वातपित्तश्लेष्मादिप्रकोपैरित्यर्थः, जात इति शेषः, ज्वरादिः व्याधिः ; दोषविषौषधाद्युत्पन्नः चित्तोद्वेगः सन्तापः व्याधिः इति सारः। अत्र विभावाः विषविरेकवातपित्तादिप्रकोपाः, अनुभावाः शरीरग्लैत्यम्लानताद्यः। [एतदाशयः भावप्रकाशकारः,—"दर्पकामौ वेगौ वा धर्मार्थौ वा

तत्र दाहमयत्वे भूमौच्छादयः। श्लेष्ममयत्वे उत्क्लम्पनादयः।
सुष्टमुदाहरणम्।

अथ त्रासः,—

निर्घातविद्युदुल्कादैस्त्रासः कम्पाऽऽदिकारकः॥१२७॥ (ग)

यथा,—

"परिस्फुरन्मीनविघट्टितोरवः
सुराङ्गनात्रासविलोलदृष्टयः।
उपाययुः कम्पितपाणिपल्लवाः
सखीजनस्यापि विलोकनीयताम्॥" (घ)

ज्वरोपतः। वातपित्तकफानां खलु व्याधयो ये ज्वरादयः॥ दृष्ट तत्प्रभवो भावो व्याधिरित्यभिधीयते॥" इति] तत्र भूमौच्छा—भूमौ शयनेच्छा, उत्क्लम्पनादिकञ्च भवति। उदाहरणं यथा,—"प्रियजनपरिरक्षात् वेपनानां त्रपार्त्तो, विलपनवचनवर्णं खेदसंक्षिप्तमाभोम्। विपुलपुलकशीतानाञ्चलस्य ज्वरार्त्तां, कुसलिरमितचिन्ताशान्तरे निर्जनस्य॥" इति।

(ग) त्रासमाह, निर्घातेति।—निर्घातः,—"यदाऽन्तरीक्षे बलवान् नादस्तो नदतोऽऽहतः। पतत्यधः स निर्घातो जायते वायुसञ्ज्ञयः॥" इत्येवंरूपः सुदारुणः शब्दविशेषः, विद्युत्, तथा उल्का—चाक्षुषतेजो ज्योतिरग्निमयः पदार्थविशेषः, उल्मुक,—"उल्किका च सुज्वाला रज्जवोऽग्निस्फोलिङ्गवत्ता। पौरुषी च प्रमाणेन उल्का नानाविधा स्मृता॥" इत्युक्तलक्षणा, एवमादिभिः हेतुभिः कम्पाऽऽदिकारकः त्रासः, भवति इति शेषः।

(घ) उदाहरति, परिस्फुरदिति।—भारवौ अस्यश्लोकस्यार्थकथनमिदम्। सुराङ्गनाः,—अमरस्त्रियः, परिस्फुरद्भिः,—परितः सञ्चरद्भिः, मीनैः,—मत्स्यैः, विघट्टिताः,—चालिताः, त्रासिता इत्यर्थः, ऊरवः,—सक्थिनो यासां ताः, अत एव त्रासेन विलोलाः,—चञ्चलाः, दृष्टयः यासां तथाभूताः, तथा कम्पिताः पाणिपल्लवाः यासां तथोक्ताः सत्यः, सखीजनस्यापि, किं पुनर्विलासिनामित्यपिशब्दार्थः, विलोकनीयतां—दर्शनीयताम्, उपाययुः,—प्रापुः। वंशस्थविलं वृत्तम्। [यथा वा—"समुत्थितम् यः पृथिवीभृतां वरं वरप्रदानञ्च चकार मुखिनः। ससुन्दरादित्सुतासखस्मनसखकृष्णयोर्न सुखेन निक्रमम्॥" इति शिशुपालवधे २ स० ५० श्लोकः]।

अथ व्रीड़ा,—

आर्ज्याभावो व्रीड़ा वदनाननमनादिकृद्दुराचारात्॥१२८(क)

यथा,—"मयि सकपटम्" इत्यादि।

अथ हर्षः,—

हर्षस्त्विष्टावाप्तेर्मनःप्रसादोऽश्रुगद्गदादिकरः ॥१२९ (ख)

यथा,—

"समीक्ष्य पुत्रस्य चिरात् पिता मुखं
निधानकुम्भस्य यथैव दुर्गतः।
मुदा शरीरे प्रबभूव नात्मनः
पयोधिरिन्दूदयमूर्च्छितो यथा॥" (ग)

(क) व्रीड़ामाह, आर्ज्याभाव इति।—आर्ज्यम्—निर्लज्जत्वम्, अभावः,—राहित्यं, व्रीड़ा; सा चैत् दुराचारात् भवति, तदा वदनम्—उपलक्षणात् मस्तकम्, आननमादिं करोतीति तथोक्ता। नायिकानां नायकसम्भावनीयजनादेः, पुरश्चाच्च व्रीडातनिबन्धनमङ्गापनमादेः समुद्भवः निर्लज्जत्वादिनिमित्तीभूतः मनोऽन्तर्विक्षेपो व्रीड़ा। [केचित्तु एवमुदाहरन्ति, यथा हि,—"चेतोनिलीयनं व्रीड़ा व्यक्तरागत्वादिभिः" इति। उदाहरणं यथा वा,—"पटाञ्चले पत्यौ नमयति मुखं नातिविनया दुढाश्लेषे बाल्हत्यपटरति नाभावि निभृतम्। न शक्नोत्याक्षातुं जितमुखशशीदन्तमदना प्रिया लात्वलत: प्रथमपरिहासे नववधूः॥" इति]।

(ख) हर्षमाह, हर्ष इति।—इष्टस्य—प्रियस्य वस्तुनः, अवाप्तेः,—लाभात्, यत्—नैसर्गकं, गद्गदम्—पदस्खलनादिकं, तदादिकरः मनसः,—चित्तस्य, प्रसादः,—प्रसन्नता, हर्षः।

(ग) उदाहरति, समीक्ष्येति।—दुर्गतः,—दरिद्रः, यथा एव निधानकुम्भस्य—रत्नसमूहस्य लाभात्, दर्शनात् भवति इति शेषः, तथैव पिता—जनकः, चिरात् पुत्रस्य मुखं समीक्ष्य—निरीक्ष्य, इन्दूदयेन—चन्द्रोदयेन, मूर्च्छितः,—वर्द्धितः, पयोधिः यथा—समुद्र इव, [अधिप्रवृद्धस्य समुद्रस्य लाञ्छितत्वं भवतीति अधिप्राप्तौ यथा प्रयोगः, यथया,—यथा पयोनिधिरिन्दूदयेन तरङ्गो भवति, तथा पुत्रोत्पत्त्या हर्षतरङ्गो जनुष इति उपमा] मुदा—हर्षेण, आत्मनः,—स्वस्य, शरीरे—शरीरचेष्टायां,

असू[illegible]युता ।
डोष[illegible]ताऽऽदिकृत् ॥२००॥ (अ)

[illegible]विहितं मधुद्विषः ।
[illegible]परद्विमत्सरि मनो हि मानिनाम्॥"(झ)

[illegible]भूव, अपरिमितदर्पवान् आसीदित्यर्थः । इदं केनापि [illegible]तिनिमित्तेन चतुरा नृपस्य ज्ञानं विषतः सुतानामम् । सदोद्यमः [illegible]दयम् गुरुः प्रहर्षः प्रबभूव नात्मनि ॥" इति जाह्निदासकृतरघुवंशटीकां विलक्ष्य [illegible]तया प्रदर्शितमिति ज्ञेयम् । वंशस्थविल इत्तम् । यथा वा,—"युगान्त-ज्वालप्रतिसंहृतात्मनो जगन्ति यस्यां सविकाशमासत । तनौ मनुष्यस्य न कैटभद्विष-स्वयोधनाभ्यागमसम्भवा मुदः ॥" इति शिशुपालवधे १ स० २१ श्लोकः ।

(अ) असूयामाह, असूयेति ।—औद्धत्यात्—उद्धतस्वभावत्वात्, अन्येषां गुरुज्ञ तथा वृद्धानां—सत्पदाम्, असहिष्णुता असूया । तत्र दोषाद्यान्—अपरनिष्ठानामिति भावः, उद्घोषः,—उत्कीर्तनं, भ्रूविभेदः,—भ्रूभङ्गः, अवज्ञा, क्रोधेङ्गितादि—मुखरागादि क्रियते । अत एवाहुः,—"परोत्कर्षदर्शनादिजन्यः परनिन्दाऽऽदिकारणीभूतस्वित्तवृत्ति-विशेषोऽसूया" इति ।

(झ) उदाहरति, अथेति ।—अथ—ज्ञात्वानन्तरं च सर्वेभ्योऽप्यार्येभ्यः प्रथमं श्रेष्ठतया बुधिष्ठिरेण विहितायाः पूजायाः अनलं, तत्र—तस्यां, सकलभुवन-मण्डनीभवनद्वात्मजनपरिमण्डिततया विख्यातायामित्यर्थः, सदसि—सभायां, ("सभाध्या परिषदनीकोऽथसभासंसितिसंसदः" इत्यमरः) चेदिपतिः,—चेदीनां विषयस्य पति-रधीश्वरः, शिशुपालः इत्यर्थः, पाण्डुतनयेन—युधिष्ठिरेण, विहितं—कृतं, वर्द्धितमित्यर्थः, मधुद्विषः,—कृष्णस्य, मानं—सम्मानं, न अक्षमत—सोढुं नाशकदित्यर्थः ; हि—यतो हि, मानिनाम्—अभिमानवताम्, उद्धतस्वभावानामिति यावत्, मनः परेषां हतौ—अभ्यु-दये, मत्सरि—विद्वेषि, भवति । अत्र मद्रामद्विषमण्डनीयस्य भगवतो नानाविधगुणजालेन आक्षिप्तं तन्निन्दनायानुभावयती शिशुपालगता भगवद्गुणासूयाऽभिव्यज्यते । शिशुपालवधश्लोकेऽयं पद्यम् । उद्धृता इत्तं,—"प्रभौ सती यदि सती च, गुणज्ञगुणवत्सला-मत्सरम् । यद्यप भगवन्तः सुरास्तथा च भवतीयमनुचिता ॥" इति ग्रन्थकृता ।

अथ विषाद

उपायाभावजन्मा तु विषा

निश्वासोच्छ्वासहृत्तापसहायान्

यथा मम,—

"एसा कुडिलघणेण सुचिउरकडावेण तुह णि

मह सहि ! दारइ दंसइ आयसजट्ठिव्व जमउर

अथ धृतिः,—

ज्ञानाभीष्टाऽऽगमाद्यैस्तु सम्पूर्णस्तृप्तता धृ

सौहित्यवचनोच्छ्वाससहासप्रतिभाऽऽदिकृत्॥२०२॥(ठ)

(ञ) विषादमाह, उपायेति।—उपायानामभावात् तस्य यत्र लाहवः, सत्त्व-स्खलनः,—उच्छ्वासश्वासः, विषादः। तत्र निश्वासः, उच्छ्वासः, हृत्तापः, सहायान्वेषणादिकृत्य भवति।

(ट) उदाहरति, एसा इति।—["एषा कुटिलघनेन सुचिकुरकलापेन तव निपतिता वेणी। मम सखि! दारयति दशनायसयष्टिरिव यमोरगीव हृदयम्।" इति संस्कृतम्] हे सखि! [एतेन तस्याः मेखोर्धिलं स्रावेदनीयस्य कर्मणो-विपाकमन्दतामंदसस्य चावेद्यते] कुटिलघनेन—कुत्सितनिविडेन, [अत्र विग्रह-श्रीभवसमासः] सुचिकुरकलापेन—शोभनेन कुत्सकसमूहेन, ["चिउरकडावेण (चिकुरकलापेन") इति नागपाठे छन्दोभङ्गः] ("चिकुरः कुत्सने वाच्यः" इत्यमरः) निपतिता, एषा—दृश्यमाना, तव वेणी आयसयष्टिरिव—लोहदण्ड इव, यष्टिरिव वा, मम हृदयं दारयति—छिनत्ति, तथा यमोरगीव—आशीरगीव, [आशीरगीवेति पाठान्तरे छन्दोभङ्गः] दशति च। [यमीऽस्या दारयद्दशन-मङ्गं यथा मम न भवेत् तथा तथा यतितव्यम्; तत्र यत्नगौरवतदानिवर्त्यमेवेति व्यञ्जयति। 'यमीमेखा वेणी दारय-दंसणजोमयविधयाभ्यंकारिताऽभिधानेन आयसयष्टि-यमोरगीजोमयविधीपमानापेक्षया उपमेयदयावत्सला व्यतिरेकाधमतिरेकोऽभिव्यज्यते] आर्यागीतिश्छन्दः,—"आर्याग्राम्यवनगेयविशुद्धं लाहवं परार्द्धमार्यागीतिः" इति तल्लक्षणात्।

(ठ) धृतिमाह, ज्ञानेति।—ज्ञानस्य यथा अभीष्टस्य आगमः, एवमादिभिः

यथा मम,—

"कृत्वा दीननिपीड़नां निजजने बद्ध्वा वचोविग्रहं
नैवालोच्य गरीयसीरपि चिरादामुष्मिकीर्यातनाः ।
द्रव्यौघाः परिसञ्चिताः खलु मया यस्याः कृते साम्प्रतं
नीवाराञ्जलिनाऽपि केवलमहो ! सेयं कृतार्था तनुः ॥" (ड)

अथ चपलता,—

मात्सर्य्यद्वेषरागादेश्चापल्यं त्वनवस्थितिः ।
तत्र भर्त्सनपारुष्यस्वच्छन्दाऽऽचरणादयः ॥२०३॥ (ढ)

हेतुभिः, सम्पूर्णस्पृहता—पूर्णकामत्वं, धृतिः । तत्र सौहित्यं—तृप्तिः, ("सौहित्यं तर्पणं तृप्तिः" इत्यमरः) वचनानामुल्लासः, सहासा—हास्यसहिता, प्रतिभा—नवनवोन्मेषशालिनी बुद्धिः, तस्याः स्फूर्त्तिश्च भवति । तथाऽऽहुः,—"लोभशोकभयादिजनितोपप्लवनिवारणकारणीभूतचित्तवृत्तिविशेषो धृतिः" इति ।

(ड) उदाहरति, कृत्वेति ।—कृतानि पापानि तत्त्वज्ञानदशायां स्मरतः कस्यापि सर्वतो विरक्तस्योक्तिरियम् । दीनानां—नानाविपद्ग्रस्तानां जनानामिति भावः, निपीड़नाम्—उत्कोचादिद्वारा उत्पीड़नमित्यर्थः, कृत्वा, निजजने—पुत्रमित्रभ्रात्रादिरूपे बन्धुजने, वचसां विग्रहं—वाक्कलहं, बद्ध्वा—कृत्वेत्यर्थः, वाक्स्तोत्रेणापि प्रीणनं परित्यज्येति भावः, चिरात्—बहुकालिकीरित्यर्थः, गरीयसीः,—अतिमहतीः, आमुष्मिकीः,—पारलौकिकीः, यातनाः अपि,—नानानरकसम्बन्धीनि दुःखान्यपीति भावः, नैव आलोच्य—अगणयित्वा इत्यर्थः, दीनोत्पीड़नादिप्रत्यवायभयं सर्वथा विस्मृत्येति भावः, यस्याः,—तन्वाः, कृते—निमित्तम्, उपभोगार्थमित्यर्थः, मया द्रव्यौघाः,—द्रव्यस्य—स्वर्णरत्नादिरूपवित्तस्य, ओघाः,—राशयः, धनराशयः इत्यर्थः, ("द्रव्यन्तु पित्तले वित्ते पृथिव्यादौ विलेपने । क्लीबे च भेषजे भव्ये द्रुविकारे च वाच्यवत् ॥" इति मेदिनी) परिसञ्चिताः,—सङ्गृहीताः, सा इयं—मामकीना, तनुः,—शरीरं, खलु साम्प्रतं—वार्द्धके इत्यर्थः, तत्त्वज्ञानदशायामिति यावत्, केवलं नीवाराञ्जलिना अपि—एकाञ्जलिमितेन तृणधान्येनापि, कृतार्था—अवसितप्रयोजना, बुध्यते इति यावत्, इति अहो—आश्चर्य्यम् । अत्र तत्त्वज्ञानेन निस्पृहत्वं धृतेः प्रत्यायकम् । शार्दूलविक्रीड़ितं वृत्तम् ।

(ढ) चपलतामाह, मात्सर्य्येति ।—मात्सर्य्यात्, द्वेषात्, रागादेः,—अनु-

यथा,—

"अन्यासु तावदुपमर्दसहासु भृङ्ग !
लोलं विनोदय मनः सुमनोलतासु।
मुग्धामजातरजसं कलिकामकाले
व्यर्थं कदर्थयसि किं नवमालिकायाः ?" ॥ (ण)

रागादेश्च हेतोः, अनवस्थितिः,—एकत्रानवस्थानं, तु चापल्यम्। तत्र भर्त्सनं, पारुष्यं, तथा स्वच्छन्दचारित्वं भवति। यथाऽऽहुः,—"अमर्षप्रातिकूल्येर्ष्यारागद्वेषाश्च मत्सरः। इति यत्र विभावाः स्युरनुभावस्तु भर्त्सनम्॥ वाक्पारुष्यं प्रहारश्च ताडनं वधबन्धने। तच्चापलमनालोच्य कार्य्यकारित्वमिष्यते॥" इति।

(ण) उदाहरति, अन्यास्विति।—कस्याश्चिदुपभोगानुचितावस्थायामुपभोगं कामयमानं निषेधन्त्या विदग्धोक्तिरियम्। हे भृङ्ग !—हे मधुप ! अन्यत्र,—उपचारात् तद्वत् रसिक ! इत्यर्थः, [एतेन आवेदनौचित्यं व्यज्यते] अन्यासु—एतद्भिन्नासु, उपमर्दसहासु—मधुपानकालिकचरणाघातादिरूपमुपमर्दनं सहन्ते—सोढुं, क्षमन्ते इति तथाभूतासु, अन्यत्र,—सम्भोगकालिकचुम्बनालिङ्गनादिसहासु इत्यर्थः, सुमनोलतासु—कुसुमवल्लीषु, अन्यत्र,—सुमनसाम्—उदारचेतसां, लताः,—लता इवामोदहेतुभूतास्तासु, सुन्दरीषु इति यावत्, लोलं—चपलम्, अन्यत्र,—मन्मथोद्रेकेणोद्धतमिति भावः, मनः तावत् विनोदय—प्रीणय, नवमालिकायाः,—वासन्त्याः, अन्यत्र,—उपचारात् नवा—अभिनवपरिणयाऽसौ, मालिका—विलासिनीति तस्यास्तथोक्तायाः, मुग्धाम्—अभिनवां, कोमलामित्यर्थः, अन्यत्र,—सुरतमूढाम्, अजातरजसम्—अनुद्भूतपरागां, तत्र मधुनोऽभावात् इति भावः, अन्यत्र,—अजातार्त्तवां, तदुपभोगोऽधर्मकारकतया निषेधात् इति भावः, कलिकां—कोरकं, ("कलिका कोरकः पुमान्" इत्यमरः) अन्यत्र,—उपचारात् तत्सदृशं गुह्याङ्गमिति भावः, अकाले—मकरन्दाभावदशायाम्, अन्यत्र,—बाल्यतया सङ्गानर्हदशायामित्यर्थः, किं—कथं, व्यर्थं—निरर्थकं, कदर्थयसि ?—क्लेशयसि ? अत्रोपभोक्तुः उपभोगानर्हामपि उपभोक्तुं कामयमानस्य कालासहिष्णुतया चापल्यं प्रतीयते। श्लोकेऽस्मिन् उपमर्दादिश्लिष्टविशेषणमहिम्ना प्रस्तुतहठकामुकप्रौढ़नायिकादिषु अप्रस्तुतभृङ्गसुमनोलतादीनां तथा प्रस्तुतबालिकादिषु अप्रस्तुतनवमालिकादीनां व्यवहारसमारोपात् श्लेषोत्था समासोक्तिः। वसन्ततिलकं वृत्तम्।

अथ ग्लानिः,—

रत्यायासमनस्तापश्रुत्पिपासाऽऽदिसम्भवा।
ग्लानिर्निष्प्राणता काम्यकार्श्यानुत्साहतादिकृत्॥२०३॥(द)

यथा,—

"किंशुलयमिव सुग्धं बन्धनात् विप्रलूनं
हृदयकुसुमशोषी दारुणो दीर्घशोकः।
म्लपयति परिपाण्डु श्यामलक्ष्मा शरीरं
शरदिज इव घर्मः केतकीगर्भपत्रम्॥" (ध)

(द) ग्लानिमाह, रत्यायासेति।—रत्यायासेन—सुरतपरिश्रमेण, मनस्तापेन, क्षुधा, पिपासाऽऽदिना च समुद्भवा, निष्प्राणता—बलमप्यनिच्छेः, ग्लानिः। तत्र कार्श्यम्, अनुत्साहताऽऽदिकृत् स्यात्। यथाऽऽहुः,—"रत्यायासक्षुत्कृषि-ग्लानिर्निष्प्राणता मता। अनुत्साहाङ्गदौर्बल्यखेदाद्यैरित्रिमेति सा॥" इति।

(ध) उदाहरति, किंशुलयमिवेति।—ग्रीष्मकौ विशेषेण तत्सदृशं निदर्शयन्नाह शुरद्यामा इत्तिरियम्। शरदिजः,—शरत्कालजः, घर्मः,—निदाघः, सूर्यताप इति यावत्, केतकीगर्भपत्रं—केतक्याः,—केतकीपुष्पस्य, गर्भपत्रं,—मध्यस्थितं पत्रम् इव, हृदयकुसुमशोषी—हृदयमेव कुसुमं शोषयतया पुष्पं, तत् शोषयतीति तथोक्तः, यद्वा, —हृदयञ्च कुसुमं कुसुमाकारं गर्भस्थानं तच्छोषी, अत एव दारुणः,—भयङ्करः, दीर्घशोकः,—दीर्घः आयतः, बहुकालस्थापितयावद्यावत् इति यावत्, शोकः,—विरहजनखेदविशेषः इति तथोक्तः, बन्धनात्—बन्धात्, उत्पत्तिस्थानादिति यावत्, विप्रलूनं—विच्छिन्नं, सुग्धं—बालं, ननोरनमिति यावत्, किंशुलयमिव किंशुकम्, श्यामलक्ष्मा:,—सीतायाः, परिपाण्डु—परितः पाण्डु श्वेतच्छायं, श्यामं—श्यामं, शरीरं म्लपयति—म्लानं करोतीत्यर्थः। [म्लै हर्षक्षये इति धातोः णिचि पुचि चाचिकर्मकः] अत्र सीतायाः विरहावस्थायां मनस्तापाद्यनना शरीरपाण्डुत्वादयुभावा ग्लानिः प्रतीयते। उत्तररामचरितेऽयं पद्यम्। मालिनी वृत्तम्। यथा वा "क्षुत्क्षितमनसामाः श्यामलक्ष्मेन्दुबिम्बा रजनय इव निदाघाम्लानशोभोत्पलास्याः। तिमिरनिभ दधानाः संहिनः केशपाशान् अवनिपतिरहीनो याज्ञसेनीरवन्ध्याः॥" इति। पूर्वत्र विरह-जन्या, अत्र पुनः सुरतपरिश्रमजन्या ग्लानिरिति विशेषः।

अथ चिन्ता,—

ध्यानं चिन्ता हितानाप्तेः शून्यताश्वासतापकृत् ॥२०५॥(ट)

"कमलेण विअसिएण अ
संजोअंती विरोहिणं ससिबिंबं ।
करअलपल्लत्थमुही
किं चिंतसि ? सुमुहि ! अंतराहिअहिअआ ॥" (ठ)

अथ वितर्कः,—

तर्को विचारः सन्देहाद्भ्रूशिरोऽङ्गुलिनर्त्तकः ॥२०६॥(ड)

यथा,—"किं रुदः प्रियया ?—"इत्यादि ।

एते च त्रयस्त्रिंशद्व्यभिचारिभेदाः" इति यदुक्तं तदुपलक्षणमित्याह (ढ),—

(ट) चिन्तामाह, ध्यानमिति ।—हितस्य अनाप्तेः,—अलाभात्, शून्यता—हृदयस्य आलम्बनत्वं तया:, तया श्वासतापयोः कारकं ध्यानं चिन्ता ।

(ठ) उदाहरति, कमलेनेति ।—["कमलेन विकसितेन च संयोजयन्ती विरोधिनं शशिबिम्बम् । करतलपर्यस्तमुखी किं चिन्तयसि सुमुखि ! अन्तराहितहृदया ?" इति संस्कृतम्]। हे सुमुखि! अन्तराहितम्—अन्तरभिनिवेशितं, हृदयं यया सादृश्यो, [अत्र हृदयशब्देन हृद्गतं ज्ञायमानरूपं वस्तु व्यज्यते] तथा करतले, वामे इति भावः, पर्यस्तं—न्यासितं, मुखं यया तथाभूता, अत एव विकसितेन—प्रफुल्लेन, कमलेन—पद्मेन च, विरोधिनं—स्वभाववैरिणं, शशिबिम्बं संयोजयन्ती सती किं चिन्तयसि ? [अत्र करतलं कमलं मुखं शशिबिम्बमिति त्रयोऽपि भेदेऽभेदरूपा रोचन्ते । करतलोपरि कपोलनिधानं श्रोणिप्रदेशे श्रोणिप्रदेशे नाभिदेशा नाभिदेशा नाभेरधोभुवतया चिन्ताऽभिव्यज्यते]। आर्यागीतिश्छन्दः ।

(ड) वितर्कमाह, तर्क इति ।—सन्देहात्—संशयात् हेतोः, भ्रुवौ:, शिरसः, अङ्गुलीनाञ्च नर्त्तकः विचारः तर्कः ।

(ढ) ननु एतेषां सञ्चारिभावानां कथमेतावत्त्व एव सङ्ख्या नियता स्यात्, विप्रलोभकादिषु दर्शविधेषु कथमालेख्यकुतुकाधाधेयसंशयनाट्यधर्मीविनोदानामपि सञ्चारेषु सत्त्वेन तेषां तत्र तत्र सर्वेषामनुपलक्षणत्वात् ? एवञ्चेत् एतेऽपीत्यनन्तरमुपलक्षणत्वा इत्याह, एते चेति ।—

रत्यादयोऽप्यनियते रसे स्युर्व्यभिचारिणः ॥२०७॥(फ)

तथा हि शृङ्गारे अनुच्छिद्यमानतयाऽवस्थानात् रतिरेव स्थायिशब्दवाच्या। हासः पुनरुत्पद्यमानो व्यभिचार्य्येव व्यभिचारिलक्षणयोगात्। तदुक्तं,—

"रसावस्थः परं भावः स्थायितां प्रतिपद्यते" इति।

तत् कस्य स्थायिनः कस्मिन् रसे सञ्चारित्वम्? इत्याह,—

शृङ्गारवीरयोर्हासो वीरे क्रोधस्तथा मतः।
शान्ते जुगुप्सा कथिता व्यभिचारितया पुनः।
इत्याद्यन्यत् समुन्नेयं स्वयं भावितबुद्धिभिः॥२०८॥(ब)

लक्षितलक्ष्याश्च इत्यर्थः। त्रयस्त्रिंशत्—तत्सङ्ख्याकाः, व्यभिचारिणां—सञ्चारिभावानां, भेदाः भवन्ति, इत्येवं प्राक् यदुक्तम्—अभिहितं, तत् उपलक्षणम्—अन्येषामप्युपलक्षकमिति भावः। अयं भावः;—उपलक्षणं नाम स्वप्रतिपादकत्वे सति इतरप्रतिपादको धर्मविशेषः, एवञ्च एषाम् उपलक्षकत्वस्वीकारेण तत्सदृशानामन्येषामपि ग्रहणमुचितमेव इति बोध्यम्। अन्ये तु नैतेभ्योऽन्ये केचित् व्यतिरिच्यन्ते, किन्त्वेतेषु अन्तर्भूयन्ते; तथा हि,—लज्जायां विनयस्य, औत्सुक्ये उत्कण्ठायाः कुतूहलस्य च, मतौ निर्णयस्य विवेकस्य च, धृतौ क्षमायाः, दैन्ये क्लैब्यस्य, चापले धृष्टतायाः, अवहित्थायां दम्भस्य, तर्के संशयस्य, असूयायां मात्सर्य्यस्य, त्रासे उद्वेगस्य च अन्तर्भावोपपत्तेः स्फुटं पार्थक्येन कल्पनं व्यर्थम्। यदि च विनयाऽऽदीनां शिरोनमनादिरूपानुभावसाम्येन लज्जाऽऽदावन्तर्भाव्यत्वोपपत्तावपि निन्द्यानिन्द्यकर्मालम्बनत्वादिभेदेन भिन्नतया तेषाम् अस्ति किमपि सूक्ष्ममवच्छेदकम् इत्येवाग्रहः, तर्हि तत्रापि सूक्ष्मसूक्ष्मावच्छेदककल्पनायामानन्त्यम् इति यथोक्तमेव न्याय्यं शरणम्।

(फ) रत्यादयः इति।—रत्यादयः,—रतिहासादयः, अपि—ये एव शृङ्गारादौ स्थायितयाऽभिमतास्तेऽपि, किं पुनर्मात्सर्य्यादय इति भावः, अनियते—अनिर्द्धारिते, स्वावस्थितनियमरहिते इत्यर्थः, रसे व्यभिचारिणः स्युः।

(ब) शृङ्गारेति।—शृङ्गारवीरयोः हासः, तथा वीरे क्रोधः, मतः,—बोद्धव्य इत्यर्थः। शान्ते पुनः जुगुप्सा व्यभिचारितया कथिता। इत्यादि—एवमादि, अन्यत् सर्वं भावितबुद्धिभिः,—भाविता परिपक्वा बुद्धिर्येषां तैस्तथोक्तैः, काव्यशास्त्रनिष्णातै-

अथ स्थायिभावः,—

अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमाः।
आस्वादाङ्कुरकन्दोऽसौ भावः स्थायीति सम्मतः॥२०८॥ (अ)

यदुक्तम्,—

"सकृत्सूत्रहृषा भावानामन्येषामनुगामुकः।
न तिरोधीयते स्थायी तैरसौ पुष्यते परम्॥" इति (आ)

रित्यर्थः, अयं समुदायः—बोद्धव्यम्; यथा शृङ्गारे शोकः, करुणे रतिः अद्भुते, भयानके विस्मयः, शान्ते उत्साहः, बीभत्से भयम् इत्यादि।

(अ) स्थायिभावलक्षणाह, अविरुद्धा इति।—अविरुद्धाः,—अविरोधिनः, विरुद्धाः,—विरोधिनः वा भावाः, यं तिरोधातुम्—आच्छादयितुम्, अक्षमाः,—असमर्थाः, तथा आस्वादस्य—रसस्य, अङ्कुरः,—प्ररोहः, तस्य कन्दः,—मूलम्, असौ भावः स्थायीति सम्मतः। अयमेतदवधेयम्,—अत्र स्थायिनश्चित्तसत्त्वलक्षणात्मकस्य रत्यादेर्भावस्य चिरतिरोऽपि सुप्तसंस्कारकल्पेन बहुसमयं वर्त्तमानत्वात् यावद्रसपर्यवसमयमन्येषाञ्च स्थायित्वम्। तथाभिहितमभियुक्तैः,—"विरुद्धैरविरुद्धैर्वा भावैर्यस्तिरस्क्रियते न यः। आत्मभावं नयत्यन्यान् स स्थायी लवणाकरः॥ चिरं चित्तेऽवतिष्ठन्ते सत्त्वस्यैतेऽनुबन्धिनः। रसत्वं ये प्रपद्यन्ते स्थिराः स्थायिनोऽत्र ते॥" इति। [अत्र "चिरम्" इति पदं व्यभिचारिव्यवच्छेदाय] अनुबन्धिनः,—अनुसूतैः, विभावादिभिरित्यर्थः। तथोक्तम्;—"सजातीयविजातीयैर्व्यविरुद्धानभूषितान्। यावद्रसं वर्त्तमानः स्थायिभाव उदाहृतः॥" इति। "यथा नराणां नृपतिः प्रियाणाञ्च यथा गुरुः। एवं हि सर्वभावानां भावः स्थायी महानिह॥" इति च नाट्यशास्त्रकारैः। अयमत्र सारः,—यथा समानसत्त्वाः समानाङ्गप्रत्यङ्गाः कुलविद्याशर्मस्थितिभेदवत्त्वात् राजत्वमनुभवन्ति, तथैव च अन्ये अल्पबुद्धयः तेषामेवानुचरा भवन्ति, तथा विभावानुभावव्यभिचारिणः स्थायिभावान् उपाश्रिता भवन्ति। तत्र यद्यप्यवस्थात् स्थायिभूताः स्थायिनो भावाः, तत्स्थानीयपुरुषवत्पुनर्भूताः अन्ये भावास्तान् गुणवदवाऽऽश्रयन्ते, परिजनभूता व्यभिचारिणो भावाः; यथा वा बहुजनपरिवारः स एव राजमान भजते, नान्यः सुसहायोऽपि पुरुषः, तथा विभावानुभावव्यभिचारिपरिष्कृतः स्थायिभावो रसतां भजते इति।

(आ) उक्तमर्थं प्राचां संवादेन अष्टभवति, सकृदिति।—सकृत्सूत्रहृषा—भावानामन्येषामनुगामुकः,—भावानां चनुगामुकः;—अनुसरणशीलः, अर्थात्—

तद्भेदानाह,—

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
जुगुप्सा विस्मयश्चेत्यमष्टौ प्रोक्ताः शमोऽपि च ॥२१०॥

तत्र,—

रतिर्मनोऽनुकूलेऽर्थे मनसः प्रवणायितम्।
वागादिवैकृताच्चेतोविकासो हास उच्यते ॥
दृष्टनाशादिभिश्चेतोवैक्लव्यं शोकशब्दभाक्।
प्रतिकूलेषु तैच्ण्यस्यावबोधः क्रोध उच्यते ॥
कार्य्यारम्भेषु संरम्भः स्थेयानुत्साह उच्यते।
रौद्रशक्त्या तु जनितं चित्तवैक्लव्यदं भयम् ॥
दोषोच्चारणादिभिर्गर्हा जुगुप्सा विषयोद्भवा।
विविधेषु पदार्थेषु लोकसीमाऽतिवर्त्तिषु ॥
विस्फारश्चेतसो यस्तु स विस्मय उदाहृतः।
शमो निरीहावस्थायामात्मविश्रामजं सुखम् ॥२११॥ (य)

स्थायिभावः, तैः,—भावैः, न तिरोधीयते—तिरोहितस्वरूपो विधीयते, परं—केवलं, (तैः) पुष्यते—पुष्टिं प्रति नीयते।

(य) रत्यादीनाह, रतिरिति।—मनसः,—चित्तस्य, अनुकूले—प्रीतिकरे, अर्थे—वस्तुनि, ("अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु" इत्यमरः) प्रवणायितं—तदायत्तायितं, रतिः, अत्र उपचारात् तद्भवं, प्रेमरसार्द्रचित्तत्वं रतिरिति भावः। वागादीनां—वचनप्रभृतीनाम्, [आदिपदेन सञ्चारादीनां ग्रहणम्] वैक्लवात्—विक्लवितभावात्, चेतसः,—मनसः, विकासः,—स्फारणं, हास उच्यते। दृष्टस्य—प्रियस्य, नाशादिभिः हेतुभिः चेतसः वैक्लव्यं—व्याकुलीभावः, शोकशब्दभाक्—शोकं प्रति अयं भजते इत्यर्थः। प्रतिकूलेषु—विरुद्धेषु, तैक्ष्ण्यस्य—उग्रतायाः, अवबोधः,—हार्दचञ्चलविशेष इत्यर्थः, क्रोध उच्यते। कार्य्यारम्भेषु—कर्त्तव्यकर्म्मादिषु, स्थेयान्

यथा,—मालतीमाधवे रतिः, नटनमेलके हासः, रामायणे शोकः, महाभारते शमः, एवमन्यत्रापि। एते हि एतेषु अन्तरा उत्पद्यमानैः तैस्तैर्विरुद्धैरविरुद्धैश्च भावैरनुच्छिन्नाः प्रत्युत परिपुष्टा एव सहृदयानुभवसिद्धाः। (ङ)

किञ्च,—

नानाऽभिनयसम्बन्धान् भावयन्ति रसान् यतः।
तस्माद्भावा अमी प्रोक्ताः स्थायिसञ्चारिसात्त्विकाः॥२१२॥

यदुक्तं,—

"सुखदुःखादिभिर्भावैर्भावस्तद्भावभावनम्।" इति। (च)

—स्थिरतरः, संरम्भः,—समावेशः, उद्यतत्वमिति यावत्, उत्साहः उच्यते। रौद्ररसस्य —विषयं तीव्रज्ञानध्यंदर्शनेन, जनितम्—उत्पादितं, चित्तस्य वैक्लव्यं—व्याकुलताऽऽपादकं मनोऽवस्थाविशेषस्तु दत्वर्थः, भयम्। दीर्घदर्शनादिभिः,—दीर्घदर्शनादिभिः कारणैः, विषयीकृत्य—विषयेषु भोग्यवस्तुषु सतृष्णया, गर्द्धा—तृष्णा, सतृष्णा। विविधेषु—नानाविधेषु, स्त्रीकलीनाऽतिवर्त्तिषु—स्त्रीकौलिकेषु, पदार्थेषु चेतसः,—चित्तस्य, वस्तु विस्तारः,—विस्तारः, स विषय उदाहृतः,—कथितः। निर्गोढावस्थां—निस्तब्धदशायां, आत्मनि—चेतसि, विश्रान्तजं—विश्रान्तजनितं, नानाविषय-[व्यासङ्गापरावस्तुतया सकलक्लेशनिवृत्तिहेतुकमिति यावत्, सुखं मतः।

(ङ) एते इति।—एतेषु—रसेषु। एते—रत्यादयः। अन्तरा—मध्यतः। अनुच्छिन्नाः,—उच्छेदं न प्राप्ताः। सहृदयानां—ज्ञानाभिज्ञानाम्, अनुभवसिद्धाः।

(च) स्थाय्यादीनां भावशब्दवाच्यत्वे हेतुमाह, नानेति।—नानाऽभिनयसम्बन्धान्—विविधैरभिनयैर्बन्धान्नियमैः, रसान् यतः भावयन्ति—व्यञ्जयन्ति, तस्मात् अमी स्थायिसञ्चारिसात्त्विकाः भावाः प्रोक्ताः,—कथिताः।

(छ) उक्तमर्थं प्राचां संवादेन दृढयति, यदुक्तमिति।—यदीयमित्यर्थः। सुखेति।—सुखदुःखादिभिः,—मनोऽनुकूलादिविषयैः, [यथादिपदेन रत्यादेः परिग्रहः] भावैः,—स्थायिभावैः, तस्य रसस्य भावः,—रसत्वमित्यर्थः, तस्य भावनं—प्रापणं, भावः, भावयतीत्यर्थः। रतिहासादिभिः स्थायिभावैः रसस्य यत् रसत्वोपकारकं तद्भावपदव्यपदेश्यमिति भावः।

अथ रसस्य भेदानाह,—

शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।
बीभत्सोऽद्भुत इत्यष्टौ रसाः शान्तस्तथा मतः ॥२१३॥ (ग)

(ग) रसभेदानाह, शृङ्गारेति।—शृङ्गारः, हास्यः, करुणः, रौद्रः, वीरः, भयानकः, बीभत्सः, अद्भुतः, इति—एवम्, अष्टौ रसाः, मता इति शेषः, तथा—यथाऽमी रसास्तथा, शान्तः मतः, रस इति शेषः। अयमेवं बीजम्;—शृङ्गारादयः शान्तान्ता नव रसाः, तथाष्टौ इति नाट्याभिधायीव प्रथमं निर्दिष्टाः, शान्तस्य पुनः पार्थक्येन उल्लेखः। यतः केषाञ्चिन्मते शान्तस्य स्वरूपेणास्वादाङ्गीकाराभावः श्रूयते। तन्निराकरणपरत्वेन "तथा" इति, अभिधाय तत्स्वीकारेण परेषां ततस्वादीकमत्वमपि सूच्यते इति। अयं भावः,—"शान्तस्य शमस्थायित्वात्र च तदनुभवात्। अष्टावेव रसा नाट्ये न शान्तस्तत्र युज्यते॥" इति केषाञ्चित् मतम्। तत्रोच्यते,—न हि नटे रसस्थितिः स्वाभिप्रायेण लोक्यते। अथ सहृदयानां शमस्थायितया तेषु रसव्यवहारेण एव न; न च नटस्य शमस्थायितोऽभावेन शान्तस्थायिनयव्यञ्जकत्वासम्भव इति वक्तुं युज्यते, तस्य काव्यान्तरापेक्षया रसान्तराभिनयव्यञ्जकत्वस्यापि सम्भवापत्तेः। न च सहृदयस्य, अनुभवापह्नवापत्तेः। अथ नाट्ये लौकिकानां प्रतिकूलानां सहृदयेन सहृदयैरपि तत्तद्विषयवैरस्यव्यक्तिरूप शान्तस्य कथमभिव्यक्तिः? इति चेत्, फलबलेन लौकिकत्वम्। तथा हि,—तत्र रसान्तरमिव तत्रापि रसमनुभवन्ति: सहृदयैः; तत्रापि लौकिकाद्यो प्रतिकूले तत्तायां दूरमपसारितत्वात्। यदि तु विषयविशेषेण प्रतिकूलतयाऽलौकिकतां, तदाऽऽलम्बनस्य विषयोपभोगविरहरूपत्वम्, उद्दीपनस्य च स्तुतिस्मृतिपुराणेतिहासादिरूपपरमर्षीश्वरोपासनतीर्थपरिसेवनादेरपि विषयत्वेन प्रतिकूलत्वम्। अत एव "अष्टावेव रसा नाट्येचिति केचिदचुदन्। तदयुक्तं यतः क्वचित् न रसं स्वदते नटः॥" इत्यादिना सङ्कीर्णरसाकरकल्पा नाट्येऽपि रसोऽसौ खिद्यन्तिः। शान्तः नाट्ये नास्ति रसः इति ये व्याचक्षते, तेऽपि प्रबोधचन्द्रोदयनाटकादिप्रबन्धान् अवलोकयन्तः शान्तरसमनुभवन्ति इति विधिविहितं सहृदयानाम्। यतः सकलजनानुभवसिद्धतया इत्थमभ्युपगन्तव्यः कोमलविषेऽपि काव्ये लोऽवश्यं लोकार्थः। अत एव "अष्टौ नाट्ये रसाः स्मृताः" इत्यनुपदमेव "शान्तोऽपि नवमो रसः" इति ग्रन्थकारा अपि सूचितवन्तः। एवञ्च प्रकृतं रसं प्रकारान्तरेण सप्तदशधा नाट्यान्तरेषु सप्तदशं दृश्यत्वमनुभवतीव प्रतिभासते इति दिक्।

तत्र शृङ्गारः,—

शृङ्गं हि मन्मथोद्भेदस्तदागमनहेतुकः।
उत्तमप्रकृतिप्रायो रसः शृङ्गार इष्यते॥
परोढ़ां वर्जयित्वाऽत्र वेश्यामाननुरागिणीम्।
आलम्बनं नायिकाः स्युर्दक्षिणाद्याश्च नायकाः॥
चन्द्रचन्दनरोलम्बरुताद्युद्दीपनं मतम्।
भ्रूविक्षेपकटाक्षादिरनुभावः प्रकीर्त्तितः॥
व्यभिचारिणो व्रीडामरणालस्यजुगुप्सा व्यभिचारिणः।
स्थायिभावो रतिः श्यामवर्णोऽयं विष्णुदैवतः॥२१८॥ (व)

(व) शृङ्गारमाह, शृङ्गं हीति।—मथ्नाति दमनदमया इति मन्मथान् इति मथीत् शृङ्गं, ["शृङ्गशृङ्गारौ रुक् क्लश्च" (उ० ३ पा० १३६ सू०) इत्युणादिसूत्रेण शृङ्गशृङ्गक्लाः] हि—नाम, मन्मथस्य—कामस्य, उद्भेदः,—उद्रेकः, मन्मथोद्रेकेण मरणावस्थोपलक्षणको व्यापार इति भावः, तदागमनहेतुकः,—तस्य आगमनं प्राप्तिस्तस्य हेतुभूत इत्यर्थः, शृङ्गारः,—शृङ्गमृच्छति गारयत्येन प्राप्नोतीति, शृङ्गेणाप्यते प्राप्यते कामादिभिः यस्मादिति वा, शृङ्गमारादि समन्ततो ददातीति वा तथोक्तः, ["ऋदोरप्" (३।३।१ पा०) इत्यप्; यद्वा,—"आतो ङः" इति ङ] रसः इष्यते। स च प्राय उत्तमप्रकृतिः,—उत्तमनायकः। अत्र—शृङ्गारे, परोढां—परकीयाम्, [एतेन जन्मतोऽपि यद्यं सूचितम्] अननुरागिणीं वेश्यां च वर्जयित्वा, तद्विषयरतस्य शृङ्गारानास्वादादिति भावः, अन्याः नायिकाः आलम्बनं—तदाख्यविभावद्वारा इत्यर्थः, तथा दक्षिणाद्याः,—दक्षिणानुकूलधृष्टशठाः, नायकाः स्युः। चन्द्रः, चन्दनं, रोलम्बश्च—भृङ्गश्च, रुतं—झङ्कारः, (आदिपदेन कोकिलकूजनादयः दीप्तत्वादयश्च गृह्यन्ते) उद्दीपनं—तदाख्यविभाव इत्यर्थः, मतं—कथितम्। भ्रुवोः विक्षेपः, कटाक्षादिश्च अनुभावः प्रकीर्त्तितः। व्रीडाम्—लज्जा, मरणम्, आलस्यं, जुगुप्सा च ताः व्यक्ता अन्ये भावाः व्यभिचारिणः स्युः। रतिः,—पूर्वोक्ता मनसः प्रेमात्मिका वृत्तिः इत्यागमः, स्थायी भावः। अयं—रसः, श्यामवर्णः, विष्णुर्देवता यस्य सः इत्येवंविधश्च कथितः। प्रथमं साङ्गमाह,—"शृङ्गारो विष्णुदैवः" इति "श्यामो भवति शृङ्गारः" इति च।

यथा,—"शून्यं वासगृहं·····" इत्यादि। अत्र उत्तमरूपः पतिः, उत्तमरूपा च बाला आलम्बनविभावौ। शून्यं वासगृहम् उद्दीपनविभावः। चुम्बनम् अनुभावः। लज्जाहासौ व्यभिचारिणौ। एतैरभिव्यक्तः सङ्कुचितविषयो रतिभावः शृङ्गार-रसरूपतां भजते।

तद्भेदावाह,—

विप्रलम्भोऽथ सम्भोग इत्येष द्विविधो मतः॥२१५॥(स)

तत्र,—

यत्र तु रतिः प्रकृष्टा नाभीष्टमुपैति विप्रलम्भोऽसौ॥२१६॥(ह

अभीष्टं—नायकं नायिकां वा।

(स) तद्भेदौ (शृङ्गारभेदौ इत्यर्थः) आह, विप्रलम्भ इति।—एषः,—शृङ्गारः, विप्रलम्भः, अथ सम्भोगः, इति—एवं, द्विविधः मतः—स्वीकृतः; शृङ्गारो नाम रसः सम्भोगविप्रलम्भभेदेन द्विप्रकार इति भावः। तत्र संयोगकालावच्छिन्नत्वेन प्रकृष्ट-रतिविषयः सम्भोगः, वियोगकालावच्छिन्नत्वेन विप्रलम्भो नाम शृङ्गारः। अत्रापि नायिकानायकयोः सामानाधिकरण्येनैवविधरत्याश्रयौ न संयोगवियोगौ स्वीकृतौ, भिन्नतत्त्वैकतत्त्वप्रत्ययेऽपि प्रेम्णोऽऽदिसञ्चारेण सम्भोगविप्रलम्भयोः वर्त्तनप्रसङ्गात्; तस्मात् द्वावप्येतौ संयोगवियोगावच्छेदकावच्छिन्नभेदौ। तत्र सम्भोगोदाहरणम्;—"प्रथिता कविभिऽप्यनीश्वरा सकलीकर्त्तुमलौ! मनोरथान्। दयिता दयिताऽऽननाऽलुलं दरलीलवलना निरीक्षते॥" इति। विप्रलम्भोदाहरणम्;—"बाधो नाकृतिकौ:) प्रयाणसमये तत्प्रत्यनलं जने केवलमन्दिरमादतायतमुखे विम्बजबन्धूलता। निश्वास-म्बलिताधरोपरिपतत्काश्चार्द्रबाष्पोदका बाला लोलविलोचना प्रियमिव! प्रायेण-नालोकते॥" इति रसगङ्गाधरे स्पष्टम्।

(ह) तत्र (तयोर्मध्ये स्वामीः) विप्रलम्भमाह, यत्रेति।—यत्र—शृङ्गारे, रतिः—अनुरागः, प्रकृष्टा—प्रकारत्वादिना प्रकर्षं गता, तु—किन्तु, (यत्र नायिका नायको वा इति कर्तृपदमुद्धरणीयम्) अभीष्टम्—अभिलषितं, नायकरूपं नायिकारूपमालम्बनं वा इति यावत्, न उपैति—नोपसुद्धते, असौ विप्रलम्भः। तथा च,—उपलोगा-प्रावबंधविषयप्रकृष्टरतिविषयौ रसौ विप्रलम्भ इति निर्गलितोऽर्थः। तदर्थादौ श्लोकानु-

स च पूर्वरागमानप्रवासकरुणात्मकश्चतुर्द्धा स्यात्॥२१७॥

तत्र,—

श्रवणात् दर्शनात् वाऽपि मिथः संरूढ़रागयोः।
दशाविशेषो योऽप्राप्तौ पूर्वरागः स उच्यते॥ (ख)
श्रवणन्तु भवेत् तत्र दूतवन्दिसखीमुखात्।
इन्द्रजाले च चित्रे च साक्षात् स्वप्ने च दर्शनम्॥

द्दीपनतया रतिसत्त्वेन तत्रातिव्याप्तिवारणाय प्रकृष्टेति, सम्भोगेऽतिव्याप्तिवारणाय उपभोगाभावेति, विप्रलम्भसमानविषयके ज्ञानान्तरे संस्कारे वा अतिव्याप्तिवारणाय रस इति। यत्तु प्राहुः,—"यत्र दुःखसंवलितत्वात् रतिर्न प्रकृष्टाऽभीष्टमुपैति (विषयीकरोति) स विप्रलम्भः" इति, तन्न, करुणेऽतिव्याप्तेः। यदि च "यत्र" इत्यस्य "शृङ्गारे" इति व्याख्यानात् न करुणेऽतिप्रसङ्ग इत्युच्यते, तदा "अभीष्टमुपैति" इति किमर्थम्? अभीष्टविषयरतेरेव शृङ्गाररूपेण परिणामात्। यच्च,—"नायिकाऽऽदिभिरभीष्टं न उपैति—न सङ्गच्छते, तथा च,—अभीष्टविच्छेदसंवलिता रतिर्यत्र स विप्रलम्भः" इति केषाञ्चिद्व्याख्यानं, तदसत्; प्रणयमानादौ अभीष्टविच्छेदाभावेन अव्याप्तेः। एवमेव,—"संयोगः सुखसम्भिन्नो विप्रलम्भस्तु दुःखयुक्। रतिस्तयोः प्रकर्षः स्यात् आधिक्यात् सुखदुःखयोः॥" इति दर्शनात् दुःखसंवलितरतिस्थायिभावको रसो विप्रलम्भः" इति यत् केचिदाहुः, तदपि न साधु; प्रणयमाने दुःखायोगादव्याप्तेः।

(क) अस्य भेदानाह, स चेति।—स च—विप्रलम्भः, चतुर्द्धा इतीदमुपलक्षणम्; तेन विरहोपाधिकः पञ्चमोऽन्योऽपि अस्य भेदो वेदितव्यः, स च देशान्तरप्रयाणादिजन्यत्वाभावेऽपि गुर्वादिपरतन्त्रत्वात् अभीष्टस्य एकत्रावस्थानविच्छेदाज्जायते। स यथा,—"किं रुद्धः प्रियया" इत्यादि; अन्यथा तस्य निरुक्तप्रकारचतुष्टयानन्तर्भावाल्लक्ष्यत्वाभावेन तत्र सामान्यलक्षणस्याव्याप्तिप्रसङ्गात्।

(ख) तत्र (प्रतिपादितपूर्वरागादिषु) पूर्वरागमाह, श्रवणादिति।—श्रवणात्, अपि वा दर्शनात्, मिथः—परस्परं, संरूढ़रागयोः—सञ्जातानुरागयोः, स्त्रीपुंसयोरिति शेषः, अप्राप्तौ—अन्योऽन्यमलाभे, परस्परासङ्गमे इति यावत्, यः दशाविशेषः—अवस्थाभेदः, सः पूर्वराग उच्यते।

अभिलाषश्चिन्तास्मृतिगुणकथनोद्वेगसम्प्रलापाश्च ।
उन्मादोऽथ व्याधिर्जड़ता मृतिरिति दशात्र
कामदशाः ॥ (ग)

अभिलाषः स्पृहा चिन्ता प्राप्त्युपायादिचिन्तनम् ।
उन्मादश्चापरिच्छेदश्चेतनाचेतनेष्वपि ॥
अलक्ष्यवाक् प्रलापः स्याच्चेतसो भ्रमणात् भृशम् ।
व्याधिस्तु दीर्घनिश्वासपाण्डुताकृशताऽऽदयः ॥
जड़ता हीनचेष्टत्वमङ्गानां मनसस्तथा ॥ २१८ ॥(घ)

शेषं स्पष्टम् ।

क्रमेण उदाहरणानि,—

"प्रेमाऽऽर्द्राः प्रणयस्पृशः परिचयादुद्गाढ़रागोदयाः
तास्ता मुग्धदृशो निसर्गमधुराश्चेष्टा भवेयुर्मयि ।

(ग) दशाविशेषान् आह, अभिलाष इति ।—दश—दशप्रकाराः इत्यर्थः । अत्र—पूर्वरागे, कामदशाः—कामकृताः अवस्थाः, मन्मथोद्रेके जाता अवस्था इत्यर्थः । अन्यत् स्पष्टम् ।

(घ) अभिलाषमाह, अभिलाष इति । स्पृहा—अभीष्टप्राप्तीच्छा । चिन्तामाह,—चिन्तेति । प्राप्त्युपायादीति ।—अत्रादिपदेन अभीष्टावगमप्रतिरोधकाः अपायादयोऽपि चिन्तनीयाः ; अन्यथा कदाचित् व्याघातोऽपि सम्भवेदिति बोध्यम् । उन्मादमाह, उन्माद इति ।—चेतनाचेतनेषु—सजीवनिर्जीवेषु अपि, अपरिच्छेदः—अविवेकः, विशेषनिर्द्धारणाभाव इति यावत्, उन्मादः । प्रलापमाह, अलक्ष्यवागिति—भृशम्—अत्यर्थं, चेतसः भ्रमणात्—अभीष्टं प्रति धावनात्, या अलक्ष्या—विना लक्ष्यमित्यर्थः, वाक्—वचनं, निर्विषयं वच इति यावत्, सः प्रलापः स्यात् । व्याधिमाह, व्याधिस्त्विति ।—दीर्घनिश्वासः, पाण्डुता, कृशता—क्षीणौजस्कत्वं, तदादिरूपो व्याधिः । जड़तामाह, जड़तेति ।—अङ्गानां—करचरणादीनां, तथा मनसः—अन्तरात्मनः, बुद्धेरिति यावत्, हीनचेष्टत्वं—निश्चेष्टत्वं, कर्त्तव्याक्षमत्वमिति यावत्, जड़ता ।

यास्वन्तःकरणस्य बाह्यकरणव्यापाररोधी यथात्
आर्द्रंसापरिकल्पितास्वपि भवत्यानन्दसान्द्रो लयः॥" (ङ)

अत्र मालतीसाक्षाद्दर्शनप्रकटरागस्य माधवस्याभिलाषः।

"कथमीदृशे कुरङ्गाक्षीं साक्षाल्लक्ष्मीं मनोभुवः?।
इति चिन्ताऽऽकुलः कान्तो निद्रां नेति निशीथिनीम्॥"(च)

अत्र कस्याश्चित् नायिकाया इन्द्रजालदर्शनप्रकटरागस्य नायकस्य चिन्ता। इदं मम। "मयि सकपटम्" इत्यादौ

(ङ) चक्षिसावसुदाहरति, प्रेमार्द्रा इति।—मुग्धे—सुन्दरि, मनोहरि इत्यर्थः, इमौ यास्वाक्षेपभूतायाः, नायिकायाः इत्यर्थः, प्रेमार्द्राः,—प्रेमचा—आन्तरक्लेदविशेषेण, आर्द्राः—स्निग्धाः, प्रेमाभिषिक्तिका इति यावत्, अत एव प्रचयक्षमाः—प्रचयः—बहुत्वं, तत्क्षमाः—तत्पूर्णा इत्यर्थः, परिकल्पात्—पुनः पुनः दर्शनादिव्यापारात्, उद्गाढः—उद्रिक्तः, उद्रिक्त इति यावत्, रागश्च—अनुरागश्च, सुरतेच्छाया इति भावः, उदयः—आविर्भावः यासु ताः, निसर्गमधुराः—स्वभावमनोज्ञाः, ताः चेष्टाः—अपाङ्गप्रेक्षणादिकाः क्रियाः, मयि भवेयुः—पुनर्भवन्तु इत्यर्थः, यासु—चेष्टासु, आर्द्रसा—मनोरथः, तया परिकल्पिताश्चापि—विरचिताश्चापि, सङ्कल्पविषयीभूताश्च सतीः यदि इति यावत्, यथात्—यथानामेव, मनोरथस्वरूपानामेवेत्यर्थः, बाह्यं—बहिर्भवं, यत् करणम्—इन्द्रियं, चक्षुरादिकमिति यावत्, तस्य व्यापारः—स्वविषयग्रहणं, तस्य रोधी—अवरोधकः, बाह्येन्द्रियस्वस्वप्रतिनियतस्य इत्यर्थः, यतः करणम्—अन्तरिन्द्रियम्, मनश्च इत्यर्थः, आनन्देन सान्द्रः—निबिडः, घनः—विषयः, निविडाभिनिवेश इति यावत्, ["आनन्दसान्द्रोदयः" इति पाठान्तरे—आनन्दश्च सान्द्रोदयः—गाढोदयः, गाढानन्दोदय इत्यर्थः; सान्द्रः—गाढः, आनन्दः इति कर्मधारये तु आनन्दसान्द्रेत्यभयत्रापि प्राक्तिपातसप्तम्यलेन आनन्दश्च तथात्वम्] भवति; तथाच च यतः करणानन्दसन्निधौ विधेयं भवतीति फलितार्थः। मालतीसाक्षाद्दर्शनजं प्रथमं। आर्द्रसाविस्मृतिकृतं द्वितीयं।

(च) चिन्तासुदाहरति, कथमिति।—साक्षात्—मूर्त्तिमतीमित्यर्थः, मनोभुवः—कामस्य, लक्ष्मीं—श्रीभासरूपां, कुरङ्गाक्षीं—हरिणनयनां, अर्थ—केन प्रकारेण, दृष्टे?—पश्यामि? इति चिन्तया आकुलः कान्तः, निशीथिनीं—रात्रिं प्राप्य, [चक्षावन्तर्गतौ हि दिवौका] निद्रां न इति—प्राप्नोति।

नायकस्य स्मृतिः। "नेत्रे खञ्जनगञ्जने" इत्यादौ गुण-कथनम्। "श्वासान् मुञ्चति" इत्यादौ उद्वेगः। (छ)

"त्रिभागशेषासु निशासु च क्षणं
निमील्य नेत्रे सहसा व्यबुध्यत।
क्व नीलकण्ठ! व्रजसीत्यलक्ष्यवाक्
असत्यकण्ठार्पितबाहुबन्धना॥" (ज)

अत्र प्रलापः। "भ्रातर्द्विरेफ" इत्यादौ उन्मादः। (झ)

(छ) अत्रेति।—इन्द्रजालेन—कुहकस्य लोकोत्तरार्थदर्शिकया विद्यया, दर्शनात्—प्रेक्षणात्। स्मृतिमुदाहरति, मयीति।—स्मृतिभावोदाहरणतया (२०१ पृष्ठे) उदाहृतपूर्वमिदं पद्यम्। [एवञ्च भावविशेषरागविशेषरूपयोः स्मृत्योरभिन्नत्वं व्यज्यते] गुणकथनमुदाहरति, नेत्रे इति।—प्ररूढयौवनोदाहरणप्रसङ्गे (१२१ पृष्ठे) उदाहृतमिदम्। अत्र हि नेत्रादीनां खञ्जनगञ्जनत्वादिवर्णनेन गुणवर्णनं स्पष्टम्। उद्वेगमुदाहरति, श्वासानिति।—तपनोदाहरणप्रसङ्गे (१६६ पृष्ठे) उदाहृतं पद्यमिदम्। [एवञ्च तपनोद्वेगयोरैक्यं व्यज्यते]।

(ज) प्रलापमुदाहरति, त्रिभागेति।—त्रिसङ्ख्याविशिष्टो भागः, यद्वा,—तृतीयो भागः त्रिभागः, [सङ्ख्याशब्दस्य वृत्तिविषये क्वचित् पूरणार्थत्वमिष्यते इति बोध्यम्] स शेषो यासां तासु, तृतीयभागावशिष्टासु इत्यर्थः, निशासु—रात्रिषु, [अत्र पार्वतीति कर्तृपदमध्याहरणीयम्] क्षणं नेत्रे निमील्य—निद्रया निमीलितनेत्रा भूत्वेत्यर्थः, हे नीलकण्ठ!—हर! क्व व्रजसि?—कुत्र गच्छसि? इति अलक्ष्या—विना लक्ष्यमित्यर्थः, वाक्—वचनं यस्याः तथाभूता अविषयवचना इत्यर्थः, असत्ये—स्वप्नविषयत्वात् अप्रकृते, (हरस्य) कण्ठे, यद्वा,—असत्यस्य स्वप्नमात्रोद्भाविततया अलीकस्य शिवस्य, कण्ठे अर्पितं बाह्वोर्बन्धनं यया, यद्वा,—असत्यम् आलम्बनस्यासत्यतया मृषैव, कण्ठे बाह्वोर्बन्धनं यस्याः तादृशी सती, सहसा—सद्यः, व्यबुध्यत—जागरिता, आसीदिति शेषः। [एतेन स्वप्नसादृश्यप्रतिकृतिदर्शनतदङ्गस्पृष्टस्पर्शनाख्येषु चतुर्षु विरहिणां विनोदेषु पार्वत्याः स्वप्नदशा सखीमुखेन दर्शिता इति हृदयम्]। कुमारसम्भवस्येदं पद्यम्। वंशस्थविलं वृत्तम्।

(झ) उन्मादमुदाहरति, भ्रातर्द्विरेफ इति।—उन्मादोदाहरणावसरे (१९९ पृष्ठे) व्याख्यातमिदं पद्यम्। [एवञ्च उभयविषयोरुन्मादयोरभिन्नत्वमभिहितमिति बोध्यम्]।

"पाण्डु श्यामं वदनं हृदयं सरसं तवालसश्च वपुः।
आवेदयति नितान्तं चेतियरोगं सखि! हृदन्तः॥" (अ)

अत्र व्याधिः।

"भिसिणीदलसयणीए णिहित्तं सव्वं सुणिच्चलं अंगं।
दीहो णीसासहरो एसो साहेइ जीवइ त्ति परं॥" (ट)

अत्र जड़ता। इदं मम।

रसविच्छेदहेतुत्वात् मरणं नैव वर्ण्यते।
जातप्रायन्तु तत् वाच्यं चेतसाऽऽकाङ्क्षितं तथा॥
वर्ण्यतेऽपि यदि प्रत्युज्जीवनं स्यादूरतः॥२१९॥ (ठ)

(अ) व्याधिमुदाहरति, पाण्डुरिति।—हे सखि! तव पाण्डु—मलिनश्वेतवर्णं, श्यामं—क्रमं, वदनं, सरसं—प्रेमावेशपूर्णं, हृदयम्, अलसं—सर्वविषयनिरुत्सुकनिरस्थं:, वपुः—शरीरञ्च, हृदन्तः—हृदयाभ्यन्तरे, नितान्तं—गाढ़, चेतियरोगं—चेतियः—आशरीरपातं स्थायी, अयं रोगकं तथोक्तम्, एतच्छरीरावधिविनाशीयं व्याधिमित्यर्थः, आवेदयति—प्रकटयति। अत्र आर्यां छन्दः।

(ट) जड़तामुदाहरति, भिसिणीति।—["भिसिनीदलशयनीये निहितं सर्वं सुनिश्चलमङ्गम्। दीर्घो निश्वासभरः एव साधयति जीवतीति परम्॥" इति संस्कृतम्]। दयीयांसं नायकमनुलक्ष्य तद्विरहेणासन्नमरणाया आत्मतल्या अवस्थावर्णनमिदम्। भिसिनीदलशयनीये—भिसिनीनां जलसिनीनां, दलानि पत्राणि, तेषां शयनीये शय्यायां, पद्मपत्ररचितशय्यायामिति यावत्, निहितम्—अर्पितं, सर्वम् अङ्गं—शरीरं, सुनिश्चलं—अस्पन्दरहितं, परं—केवलम्, एषः,—अनुभूयमानः इत्यर्थः, अनुद्दिश्य वर्णनमिदं तं प्रत्यर्थं इत्याशयः, दीर्घः—आयतः, निश्वासभरः—निश्वासातिशयः, जीवतीति साधयति—व्यनक्ति। गीतिश्छन्दः,—"आर्यांप्रथमदलोक्तं यदि यत्रापि यत्र तत्र प्रवेदुषयोः। दलयोः क्रमयतियोगां तां गीतिं गीतवान् भुजगेशः॥" इति तत्रत्वात्।

(ठ) रसेति।—रसस्य—उपचारात् रतेः, विच्छेदहेतुत्वात्—विनाशहेतुत्वात्, रसोत्पत्तेश्च मरणाद्रतेरेव इति मरणस्यानुभावेन रतेर्निर्वेदाभावात् रसत्वं नोपपद्यते इति भावः। तत्—मरणम्। प्रत्युज्जीवनं—मरणात् परं पुनर्जीवनमित्यर्थः।

तत्र आद्यं यथा,—

"प्रेक्षालिकां विदलितामवलोक्य तन्वी
प्राणान् कथञ्चिदपि धारयितुं प्रभूता।
आकर्ण्य सम्प्रति रुतं चरणायुधानां
किं वा भविष्यति न वेद्मि तपस्विनी सा॥" (ङ)

द्वितीयं यथा,—

"रोलम्बाः परिपूरयन्तु हरितो झङ्कारकोलाहलैः
मन्दं मन्दमुपैतु चन्दनवनोजातो नभस्वानपि।
मायन्तः कलयन्तु चूतशिखरे केलौपिकाः पञ्चमं
प्राणाः सत्वरमश्मसारकठिना गच्छन्तु गच्छन्त्वमी॥" (च)

ममेती।

(ङ) आद्यं लक्षणमुदाहरति, प्रेक्षालिकामिति।—प्रवासविरहसन्तापसन्तप्तया मृतप्रायया नायिकया तदानीमेव नायकानयनाय प्रेषितायाः दूत्याः नायकं प्रति उक्तिरियम्। सा तपस्विनी—ब्रह्मचारिणी, तव विरहे व्यक्तभोजनाभरणा भूत्वा विषयेभ्यो वैमुख्यापादनद्वारा तपश्चरतीत्यर्थः; अत एव तन्वी—कृशाङ्गी, अस्थिसारावशेषशरीरेति यावत्, प्रेक्षालिकां—मरुत्काले विकासप्रायां; सुरभिसनीरमपुष्पप्रधानी क्षुद्रविशेषः, तल्लीं: प्रवोऽपि प्रेक्षालिका ("शिउली फुल" इति बङ्गभाषा) सा, विदलितां—विकसिताम्, [एतेन अर्द्धरात्रः व्यज्यते] अवलोक्य—दृष्ट्वा, कथञ्चिदपि—क्लेशेन, प्राणान् धारयितुं प्रभूता—समर्था अभूदित्यर्थः, यद्यपि तदानीमेव प्राणाः प्रयातुमुद्यता आसन्, तथाऽपि रात्रेरर्द्धावशिष्टतया दूत्या सह नायकागमनं सम्भाव्य कथञ्चिदं सहता आयासेन निरोद्धुं पारिता इति भावः; सम्प्रति—रात्रिशेषयामार्द्धे, चरणायुधानां—कुक्कुटानां, रुतं—रवम्, आकर्ण्य; किं—कीदृगवस्था इत्यर्थः, [निपातानामनेकार्थत्वात्] वा भविष्यति इत्यहं न वेद्मि—न जानामि। अथ यदि तदीयं शरीरं मज्जसात् भवेत्, इत्यपि न चित्रं मन्ये इति तत्त्वम्। प्रेक्षालिकाः रात्रेर्मध्यभागे विकसन्ति, तद्भ्रमेण रात्रेरवशेषत्वात् कान्तागमनं प्रति आशासत्यः, कुक्कुटरवश्रवणात्तु रात्र्यवसानसूचकत्वात् नैराश्यमिति भावः। [अत हि किंवा भविष्यतीत्यादिपदप्रयोगं स्मरणं सन्निधानं द्योतते]। वसन्ततिलकं वृत्तम्।

(च) पीनवाऽऽक्षिप्तं लक्षणमुदाहरति, रोलम्बा इति।—प्रियविरहे सन्तप्त-

तृतीयं यथा,—आदग्धर्ष्यां महाश्वेतापुण्डरीकवृत्तान्ते। एष च प्रकारः 'कस्यचिदप्रलभ्भविषयः' इति वक्ष्यामः। (च)

केचित् तु,—

"नयनप्रीतिः प्रथमं चित्तासङ्गस्ततोऽथ सङ्कल्पः।
निद्राच्छेदस्तनुता विषयनिवृत्तिस्त्रपानाशः॥
उन्मादो मूर्च्छा मृतिरित्येताः स्मरदशा दशैव स्युः॥"(त)

क्रीडिताद्या उक्तिरिवम्। रोरूक्ष्यः—भ्रमराः, झङ्कारकोलाहलैः, दिशः—दिशः, ("दिशस्तु ककुभः आशा आशाश्च दिशश्च ताः" इत्यमरः) परिपूरयन्तु, चन्दनवनी-जातः—चन्दनवन्यां जातः, चन्दनगन्धेन मनोहरः दक्षिणोत्थ इति भावः, मलयानिलः—वायुरपि, मन्दं मन्दम् उपेतु—वहतु, केलीपिकाः—केल्याः सुरतक्रीडायाः, उपचारात् तद्विषयिण्याः उत्कण्ठाया उद्भावका इति यावत्, ("दृषकेलिपरीहासाः क्रीडा" इत्यमरः) [अत्र "अदिकारादक्तिनः" इति वार्तिकेन ङीष्] पिकाः—कोकिलाः, चूतमञ्जरीं—आम्रतरुमञ्जरीमपि, खिता इति शेषः, मायन्तः—चूताङ्कुरस्वादेन सञ्जातमदाः सन्त इत्यर्थः, पञ्चमं—स्वरविशेषं, जनयन्तु—गायन्तु, अनो अन्नसारः,—लोहः, तद्वत् कठिनाः, प्राणाः सत्वरं—शीघ्रं, गच्छन्तु गच्छन्तु। ["लिम्बीम्बयोः" (८।१।४५।०) इत्यादीच्छया द्विरुक्तम्] [अत्र मदनादीनां मन्मथोद्दीपकतया विरहिणां मारकत्वेन कविसमयेन विद्यमानेऽपि तत्तेषां झङ्कारादीनां प्रायेण मरणस्य चैतन्या-ऽऽक्षिप्तत्वं व्यज्यते]। आर्द्रूषविकीडितं वृत्तम्।

(च) मरणात् परं प्रत्यभिज्ञानं तृतीयमुदाहरति,—आदग्धर्ष्यामिति। अयमेव प्रकारः कस्यचिदप्रलभ्भविषय इति वक्ष्यितुं प्रतिजानीते, एष चेति।—अष्टम्।

(त) रतिरङ्गकारणत्वं दर्शयति, केचिदिति।—प्रथमं—गुरुभयलज्जाभावसमये, नयनप्रीतिः—चक्षुरागः, नेत्रयोरन्योन्यानुराग इति यावत्, प्रेयसी परस्परं प्रथमं सङ्गमाभिलाषरूपचाक्षुषोद्रेकेण परं नेत्रे सानुरागे भवतः इति भावः, ततः,—तत्पर-मनोरमविषयाभ्यासे, चित्तस्य—मनसः, आसङ्गः—आसक्तिः, अथ—तस्मिन् सति सङ्गः,—"कथं कस्या ? कस्या च एवमनुरागः" इत्येवंरूपः मनोरथ-विशेषः, ततः—सङ्कल्पमनुध्यायतः, निद्राच्छेदः—जागरणं, निद्रामप्राप्नुवतः तनुता —शरीरस्यार्द्धं, ततः विषयनिवृत्तिः—बाह्यवस्तुवैमुख्यम्, अथवा तदायत्तमानस-त्वादस्मात् विषयात् दयदग्धस्यानलस्येव लोपवक्ष्यतीति तात्पर्यं, विषयेभ्यः प्रति-निवृत्तस्य मनसः—निर्वृत्यभावात् पूर्वतोऽपि न त्रपेति त्रपानाशः।

इत्याहुः। तत्र च,—

आदौ वाच्यः स्त्रिया रागः पुंसः पश्चात्तदिङ्गितैः॥२२०॥(ङ)

इङ्गितानि उक्तानि यथा रत्नावल्यां सागरिकावत्सराजयोः। आदौ पुरुषानुरागे सम्भवत्यप्येवमधिकं हृदयङ्गमं भवति। (ङ)

नीलीकुसुम्भमञ्जिष्ठाः पूर्वरागोऽपि च त्रिधा।

तत्र,—

न चातिशोभते यन्नापैति प्रेम मनोगतम्।
तं नीलीरागमाख्यान्ति यथा श्रीरामसीतयोः॥ (ध)
कुसुम्भरागं तत्प्राहुर्यदपैति च शोभते। (न)
मञ्जिष्ठारागमाहुस्तं यन्नापैत्यतिशोभते॥ २२१॥ (प)

विगटनपक्ष निर्भीतिशोभादः, ततः मूर्च्छा—चानद्रावामपि बाह्येन्द्रियव्यापार-मूर्च्छाऽवस्था, ततः मृतिः,—प्राणवियोगः, इत्येताः दश एव अवदशाः,—कामज्ञता अवस्थाः, स्तुः।

(ङ) आदाविति।—आदौ—अवतः, स्त्रियाः—नायिकायाः, रागः—नायकं प्रति अनुरागः, वाच्यः—वर्णनीय इत्यर्थः, पश्चात्—तदनन्तरं, तस्याः इङ्गितैः—चेष्टाविशेषैः, नेत्रविक्षेपादिभिरिति यावत, पुंसः—नायकस्य, रागः वाच्य इति शेषः।

(ङ) इङ्गितानीति।—आभासादिरूपाधीत्यर्थः, एवं प्रथमं स्त्रिया नायक-विषयानुरागवर्णनमुचितमित्यभिहितं भवति; वस्तुतस्तु प्रायोवादोऽयम्, अत एव नैषधचरितादौ नायिकाविषयानुरागोऽपि नायकस्य प्रथमनुपपद्यते इति सारः।

(ध) नीलीरागमाह, न चेति।—यत् मनोगतं—मनोहरं, प्रेम न च अति-शोभते—नातिमात्रं वर्द्धते इत्यर्थः, न चापैति—न गच्छति च, तं—नालुद्विलमनि-वर्त्तितनिलयं, नीलीरागम् आख्यान्ति—कथयन्ति।

(न) कुसुम्भरागमाह, कुसुम्भरागमिति।—यत्—प्रेम, चापैति—गच्छति, शोभते च, तत्—उद्विलं, चपलनिलयं, प्रेम इति शेषः, कुसुम्भरागं प्राहुः। पुरुषका-रे "दैवक्ता खलं बहत् खदनलक्ष तपक्षिनः" इति पाठोऽनुपलभ्यते, एतेनोद्धा-हरणान्तरप्रदर्शनमाशयवत्प्रकाशनम्।

(प) मञ्जिष्ठारागमाह, मञ्जिष्ठेति।—यत्—प्रेम, न चापैति—न गच्छति,

अथ मानः,—

मानः कोपः स तु द्वेधा प्रणयेर्ष्यासमुद्भवः।
द्वयोः प्रणयमानः स्यात् प्रमोदे समहत्यपि॥
प्रेम्णः कुटिलगामित्वात् कोपो यः कारणं विना।२२२॥(क)

द्वयोरिति नायकस्य नायिकायाश्च उभयोः प्रणयमानो वर्णनीयः। उदाहरणं तत्र नायकस्य यथा,—

"अलिअपसुत्तअ! णिमिलिअच्छ! देसु सुहअ! मज्झं ओआसं।
गण्डपरिउम्बणपुलइआंग! ण उणो चिराइस्सं॥" (ख)

अतिशेभते च, तम्—अविद्यमानत्वदिङ्मिलित्यर्थः, रागमिति शेषः, मञ्जिष्ठारागम् आहुः,—कथयन्ति। कुसुम्भरागमञ्जिष्ठारागयोर्लक्ष्यं दर्शयितव्यमनयम्, यदि श्राव्यम् "इन्दुलता यथाऽऽत्मन इनयन्त्या नखक्षं वा" इति पुस्तकान्तरीयाधिकपाठाङ्गीकारे तु नोदाहरणान्तरगवेषणायास्मत्कृतम।

(क) मानमाह, मान इति।—स तु मानस्तु, द्वयोः—स्त्रीपुंसयोः, प्रमोदे—प्रेम्णि, प्रणयमानसंज्ञकः। ननु प्रमोदे सति कोप एव न भवति, तत् कथं मानसम्भवसङ्गतिः? इत्यत आह,प्रेम्णो इति।—कुटिलगामित्वात्—कुटिलनायकनायिकागतत्वादित्यर्थः, यत्र नायकः कुटिलः, नायिका वा कुटिला, तत्र भवोऽत्र मानस्य सम्भव इति भावः। कारणम्—अपराधादि। कुटिलस्य विनाऽपि कारणं तत्सम्भावनया कोपी भवतीति सारः; यद्वा,—कुटिलगामित्वात्—दुरवगमस्वभावत्वात् इति शेषम्।

(ख) अलिअ इति।—[अलीकप्रसुप्तक! निमीलिताक्ष! देहि सुभग! मह्यमवकाशम्। गण्डपरिचुम्बनपुलकिताङ्ग! न पुनश्चिरयिष्यामि॥ इति संस्कृतम्]। नायिकाऽऽगमने विलम्बमसहमानं कपटनिद्रितं नायकं प्रति गण्डपरिचुम्बनेन सात्त्विकभावविशेषरोमाञ्चमि ज्ञाततत्कपटनिद्राया: नायिकाया उक्तिरियम्। हे अलीकप्रसुप्तक!—कपटनिद्रित! निमीलिते अक्षिणी येन तत्सम्बुद्धौ। हे सुभग!—प्रियतम! गण्डस्य परिचुम्बनेन पुलकितानि—रोमाञ्चितानि, अङ्गानि यस्य तत्सम्बोधने। [एतेन अलीकनिद्रेति व्यज्यते]। मह्यम् अवकाशं—स्थानं, देहि, मम विलम्बे तव क्रोधो भात इति लक्ष्यते, पुनः—इतः परं, न चिरयिष्यामि—पुनर्मम विलम्बे तव क्रोधो भात इति लक्ष्यते, पुनः—इतः परं, न चिरयिष्यामि—पुनरेवं न विलम्बिष्ये इति भावः। अत्र नायिकाया विलम्बेन नायकस्य मान इति अलीकसुप्तत्वात् कौटिल्यञ्च बीजम्। आर्या छन्दः।

नायिकाया यथा,—कुमारसम्भवे सन्ध्यावर्णनावसरे।
उभयोर्यथा,—

"पणअकुविआणं दोणं वि अलिअपमुत्ताणं माणइस्साणं।
णिच्चलणिरुद्धणीसासदिण्णकण्णाणं को मल्लो ?॥" (भ)

पत्युरन्यप्रियासङ्गे दृष्टेऽथानुमिते श्रुते।
ईर्ष्यामानो भवेत् स्त्रीणां, तत्र त्वनुमितिस्त्रिधा।
उत्स्वप्नायितभोगाङ्कगोत्रस्खलनसम्भवा ॥२२३॥ (म)

तत्र दृष्टे यथा,—

"विनयति सुदृशो दृशः परागं प्रणयिनि कौसुममाननानिलेन।
तदहितयुवतेरभीक्ष्णमक्ष्णोः द्वयमपि रोषरजोभिरापुपूरे॥" (य)

(भ) पणअ इति।—[प्रणयकुपितयोर्द्वयोरप्यलीकप्रसुप्तयोर्मानिनोः। निश्चल-निरुद्धनिश्वासदत्तकर्णयोः को मल्लः ?॥ इति संस्कृतम्]। प्रणयेन—प्रेम्णा, कुपितयोः—कोपं गतयोः, अत एव अलीकप्रसुप्तयोः—कपटनिद्रितयोः, द्वयोः—उभयोः, मानिनोः—मानवती-मानवतोः, "नाहं प्रथममेतेन संवदिष्यामि" "नाहमेतया संवदिष्यामि" इत्येवं दृढनिश्चययोरिति यावत्, निश्चलं यथा तथा, निरुद्धे निश्वासे दत्तकर्णयोः—स्थिरकर्णयोरित्यर्थः, दम्पत्योरिति शेषः, को मल्लः मानभङ्गसमर्थः ? न कोऽपीत्यर्थः।

(म) पत्युरिति।—पत्युः—प्रियस्य, अन्यप्रियासङ्गे—अपरनायिकासक्तौ, दृष्टे, श्रुते, अथवा अनुमिते सति, स्त्रीणाम् ईर्ष्यामानः भवेत्, तत्र—तेषु त्रिविधेषु मध्ये इत्यर्थः, अनुमितिः—अनुमानं, त्रिधा भवतीति शेषः, उत्स्वप्नायितं—स्वप्ने तदुत्कीर्तनं, भोगाङ्कः—सम्भोगचिह्नं, तथा गोत्रस्खलनं—नामव्यतिक्रमः, तत्सम्भवा, एतत्त्रयस्य कारणत्वात्।

(य) विनयतीति।—प्रणयिनि—कान्ते, आननानिलेन—आननं—मुखं, तस्य अनिलः—वायुः, फूत्कार इति यावत्, तेन तथोक्तेन निजमुखफूत्कारेणेत्यर्थः, सुदृशः—अन्यसुनयनायाः इति भावः, दृशः—नेत्रस्य, एकलोचनस्येति यावत्, उपरि पतितमिति शेषः, [यद्वा,—दृश इति पञ्चम्यन्तम्। अस्मिन् पक्षे "अपादाने पञ्चमी" (२।३।२८ पा०) इति पञ्चमी] एकस्मादेव नेत्रादित्यर्थः, कौसुमं—कुसुमस्य पुष्पस्येदं

सम्भोगचिह्नेनानुमिते यथा,—

"नवनखपदमङ्गं गोपयत्यंशुकेन,
स्खलयति पुनरोष्ठं पाणिना दत्तदष्टम्।
प्रतिदिशमपरस्त्रीसङ्गशंसी विमर्षन्
नवपरिमलगन्धः केन शक्यो वरीतुम्? ॥" (ङ)

अनुनयपर्य्याप्तावहने (च) तु अस्य न विप्रलम्भभेदता, किन्तु सम्भोगसञ्चारीर्ष्यास्वभावत्वम्। यथा,—

तत् तवोरुं, परागं—रजः, विनयति—निरस्यति, दूरीकुर्वति सतीति यावत्, तस्याः—सुहृदः, अधिक्षिपति:—विपक्षकामिनी, तस्याः सपत्न्या इति भावः, अक्षीर्ष्यमपि—ईर्ष्यारहितमपि, न लक्ष्मीमेवेति भावः; अभीक्ष्णम्—अत्यर्थं, रोधस्तोभिः,—श्रोणिदेशैः, आपपूरे—आपूरितं, क्षोभयन्नधिक्षितमुदिति भावः। अत्र "एकत्र रजोऽपनयनम्, अन्यत्र—रजःपुरश्चारणत्वात्तयोर्माहात्म्यातिशयमेव पुरस्कुर्वतः विभावनाऽलङ्कारीकृत्यानुप्राणितः" इति साहित्यविद्याधरः; "एकत्रान्यैवात् रजोऽपनेतुं यत्नो द्वयोरपि नेत्रयोः रजसा पूरयतीति विषमम्" इत्यन्ये। रजोऽपनयनरूपाभीष्टार्थसिद्धेरभीष्टार्थान्तरसाधनभूतकार्यनिर्वर्तनादिति रसगङ्गाधरकारमतानुसारिणः; तथाहि रसगङ्गाधरकाराः,—"अभीष्टार्थसिद्धेरभीष्टार्थान्तरसाधनं विषादनम्" इति। विप्रयोगसञ्चारिणोर्दं पद्यम्। पृथ्वीछन्दसा वृत्तम्।

(ङ) नवेति।—नायकं प्रति नायिका उक्तिरियम्। नवानि नखपदानि—नखक्षतानि यस्मिन् तादृशम्, अङ्गं—शरीरावयवम्, अंशुकेन—वसनेन, गोपयसि—आच्छादयसि, दत्तदष्टम् ओष्ठं पुनः पाणिना—करपल्लवेन, स्खलयसि—निरोधयसि, (परन्तु) प्रतिदिशं—दिशि दिशि इत्यर्थः, [विभक्त्यर्थेऽव्ययीभावः। "अव्ययीभावे शरत्प्रभृतिभ्यः" (५।४।१०७ पा०) इति समासान्तष्टच्प्रत्ययः] अपरस्त्रीसङ्गशंसी—अन्यकान्तासम्भोगसूचकः, विमर्षन्—निर्भर्त्सयन्, नवपरिमलगन्धः,—नूतनविमर्दजनितसौरभविशेषः, केन (प्रकारेण) वरीतुं—गोपयितुं शक्यः? न केनापीत्यर्थः। [अत्र नखाघातदन्तदंशनओष्ठाद्याहने, विमर्षस्य तत्सूचनाद्यर्थे च विशेषणत्वेन उक्तत्वात् काव्यलिङ्गयोः सङ्करः]। विप्रयोगसञ्चारिणोर्दं पद्यम्। मालिनी वृत्तम्।

(च) अनुनयपर्य्याप्तावहने—प्रियतमादिना मानभञ्जनानुकूलो व्यापारः, तद्वहने, तत्पर्य्याप्ते प्रशमने सोढ्यलक्ष्यक्रमे, तं विनैव सहसैव इति यावत्।

"भ्रूभङ्गे रचितेऽपि दृष्टिरधिकं सोत्कण्ठमुद्दीक्षते।
वाचायामपि वाचि सस्मितमिदं दग्धानलं जायते।
वार्कण्ठ्यं गमितेऽपि चेतसि तनूरोमाञ्चमालम्बते
दृष्टे निर्वहणं भविष्यति कथं मानस्य तस्मिन् जने?॥" (व)

यथा वा,—

"एकस्मिन् शयने पराङ्मुखतया वीतोत्तरं ताम्यतोः
अन्योऽन्यस्य हृदि स्थितेऽप्यनुनये संरुद्धतोर्गौरवम्।
दम्पत्योः शनकैरपाङ्गवलनान्मिश्रीभवच्चक्षुषोः
भग्नो मानकलिः सहासरभसव्यासक्तकण्ठग्रहः॥" (श)

एवमन्यत्र।

(व) भ्रूभङ्गे इति।—मानाचरणे तिरस्कुर्वन्तौ सखौ प्रति कस्याश्चिदुक्तिः। भ्रूभङ्गे—भ्रूभङ्गे, रचिते—कृते सति अपि, दृष्टिः अधिकं सोत्कण्ठं—सतृष्णं यथा तथा, उद्दीक्षते—सदृशं पश्यति, यं दृष्टुमधिकं विलसितं भवतीत्यर्थः; वाचि—वाक्प्रवृत्तौ, वाचायां—सर्वतोभावेन संयतायामपि, सस्मितम्—दूयद्दाक्षसहितं, जायते, यं दृष्ट्वा यदादरः स्मरन् प्रमोदः हासमनुभावयतीत्यर्थः, ['अधिकम्' इति उत्तरत्रापि अनुषज्यते]। चेतसि—चित्ते, वार्कण्ठ्यं—वाढिर्त्यं, गमितेऽपि—नीतेऽपि, तनुः—शरीरं, रोमाञ्चम् आलम्बते—रोमाञ्चिता भवति, रोमाञ्चितेन सदयमालिङ्गनक्षेपमनुभवतीति भावः; अतः तस्मिन् जने—साहसे प्रियजने, दृष्टे सति, मानस्य निर्वहणं—निर्वाहः, मानावलम्बनमित्यर्थः, कथं—केन प्रकारेण, भविष्यति? न कथमपीत्यर्थः। [अत्र दर्शनादीनामनुभावानां बलवत्त्वेन तैः परिपुष्टा रतिः सम्भोगत्वमेवावलम्बते, भ्रूभङ्गादिभिर्व्यज्यमानायाः दूर्व्याव्याप्तत्वात्मकत्वमेवेति भावः]। अनङ्गशतकस्येदं पद्यम्। आर्द्रवार्कीक्षितं इत्यम्।

(श) एकस्मिन्निति।—एकस्मिन् शयने—शय्यायां, पराङ्मुखतया—वैमुख्येन, वीतोत्तरं—तूष्णीं यथा तथा, ताम्यतोः—क्लाम्यतोः, अत एव अनुनये—अनुनयाभिलाषे सत्यपि, अन्योऽन्यस्य—परस्परस्य, हृदि—मनसि स्थितेऽपि, गौरवं—मानं, संरुद्धतोः—नीरुद्धवन्तौ कुर्वतीत्यर्थः, शनकैः—शनैः, अपाङ्गवलनात्—तिर्यङ्नेत्रान्तरालात्, मिश्रीभवति चक्षुषी यथोः साहसयोः, दम्पत्योः—स्त्रीपुंसयोः,

साम भेदोऽथ दानञ्च नत्युपेक्षे रसान्तरम्।
तद्भङ्गाय पतिः कुर्य्यात् षडुपायानिति क्रमात्॥
तत्र प्रियवचः साम, भेदस्तत्सख्युपार्जनम्।
दानं व्याजेन भूषाऽऽदेः, पादयोः पतनं नतिः॥
सामादौ तु परिक्षीणे स्यादुपेक्षाऽवधीरणम्।
रभसत्रासहर्षादेः कोपभ्रंशो रसान्तरम्॥२२४॥(ष)

मानकलिः—प्रणयकलहः, सहासं यथा तथा, रभसेन—वेगेन, हर्षेण वा, ("रभसो वेगहर्षयोः" इत्यमरः) व्यासक्तः—दत्तः, कण्ठग्रहः—कण्ठाश्लेषः यत्र तथाविधः सन्, भग्नः—विनष्टः। अमरुशतकस्येदं पद्यम्। शार्दूलविक्रीडितं वृत्तम्।

(ष) मानभञ्जनोपायानाह, सामेति।—पतिः—वल्लभः, तस्य—मानस्य भङ्गाय—भञ्जनार्थं, साम, भेदः, दानं, नतिः, उपेक्षा, रसान्तरं चेति षट् उपायान्, क्रमात्—पूर्वपूर्वस्य निरासे इति भावः, कुर्य्यात्—अवलम्बेत। स्त्रीणां मानभञ्जनार्थं षडेव सामादय उपाया नायकैः विधेयाः, किन्तु पूर्वोपायेन मानाभङ्गे उत्तर उपायः इत्येवंक्रमेण, न तु उत्तरोपायेन मानाभङ्गे पूर्वोपाय आश्रयणीयः; उत्तरोपायापेक्षया पूर्वोपायस्य अकिञ्चित्करत्वात् इति भावः। तत्र—तेषु मध्ये, प्रियवचः—प्रियवाक्यं, सामः; तस्याः—नायिकायाः, सख्याः, उपार्जनम्—आयत्तीकरणं, भेदः; व्याजेन—छलेन, भूषाऽऽदेः अर्पणं, दानं; पादयोः पतनं—प्रणिपत्य प्रसादनं, नतिः। सामादौ तु—सामभेददाननमनरूपे चतुर्विधे अनुष्ठितेऽप्युपाये इत्यर्थः, परिक्षीणे,—परितः—सर्वथा, क्षीणे—विफले सति, तदनन्तरमिति भावः, अवधीरणम्—अवज्ञया किमप्यकरणम्, उपेक्षा, स्यात्—भवेत्, (एतस्यामपि क्षीणायां) रभसः—वेगः, बलात्कार इति यावत्, तथा त्रासः—भीत्युत्पादनं, हर्षः—प्रमोदः, आदिर्यस्य तथोक्तः, तस्मात् कोपभ्रंशः—मानखण्डनं, रसान्तरम्—अन्यो रसः, तत्संज्ञ उपायः स्यात् इत्यर्थः; सहसा भावान्तरयोगात् पूर्वभावस्य कोपस्य विध्वंसः रसान्तरसंज्ञः स्यादिति भावः। रसान्तरेण मानभङ्गो यथा,—"कथं ममोरसि क्रतपक्षनिस्वनः शिलीमुखोऽपतदिति जल्पति प्रिये। विवृत्य किं किमिति सजल्पया तया ससाध्वसं कुपितममोचि कान्तया॥" इति, अत्र कान्तवक्षसि शरपतनशङ्कया मानभङ्गः।

यथा,—"नो चाटुश्रवणं कृतम्" इत्यादि। अत्र हि सामादयः पञ्च सूचिताः। रसान्तरमूह्यम्।

अथ प्रवासः,—

प्रवासो भिन्नदेशित्वं कार्य्याच्छापाच्च सम्भ्रमात्।
तत्राङ्गचेलमालिन्यमेकवेणीधरं शिरः॥
निश्वासोच्छ्वासरुदितभूमिपातादि जायते ॥२२५॥ (ङ)

किञ्च,—

अङ्गेष्वसौष्ठवं तापः पाण्डुता कृशताऽरुचिः।
अधृतिः स्यादनालम्बस्तन्मयोन्मादमूर्च्छनाः॥
मृतिश्चेति क्रमाज्ज्ञेया दश स्मरदशा बुधैः। (च)

(ङ) प्रवासमाह, प्रवास इत्यादि।—कार्य्यात्—अभीष्टफललाभनिमित्तं, किङ्करत्वादिप्रसङ्गात् वा, शापात्—अभिसम्पातात्, सम्भ्रमात्—उपद्रवादिभवादित्यर्थः, च भिन्नदेशित्व—देशान्तरवर्त्तित्वं, इत्यर्थः एकत्र निवासाभाव इति यावत्, प्रवासः—तन्नामा विप्रलम्भ इत्यर्थः; [यत्र "यत्र" इत्यनुषज्यते] यत्र स्त्रीपुंसयोर्भिन्नदेशित्वं, तत्तदनुभावजनकत्वेन ज्ञायते, सः प्रवास इति सारः। यत्नानुभावानाह, तत्रेति।—तत्र—प्रवासप्रभेदके विप्रलम्भ इत्यर्थः, अङ्ग—शरीरञ्च, चेलञ्च—वस्त्रञ्च मालिन्यं, शिरः एकवेणीधरं, निश्वासः—दीर्घश्वासः, उच्छ्वासः—अलमुखश्वासः, रुदितं, भूमिपातादिकञ्च जायते। एतत् तु सर्वं प्रायेण नायिकाया एव, नायकस्य तु यथासम्भवमनुद्रेयमिति बोध्यम्।

(च) मतान्तरे स्मरस्य एकादश दशाः क्रमेणाह, अङ्गेष्विति।—इह—प्रवासे, अङ्गेषु—गात्रेषु, असौष्ठवं—सुन्दरत्वाभावः, मनोरमचीवलवेषध्येयमिति यावत्, प्रसाधनाभाव इति भावः, तापः—सन्तापः, पाण्डुता—पाण्डुवर्णत्वं, कृशता—क्षीणाङ्गत्वं, (दशानां दशकं मतान्तरे तु पाण्डुताकृशतेत्येकं पदं स्त्रीत्वस्य पाण्डुतया संवलिता कृशतेति व्याचक्षते) अरुचिः—विषयवैदग्ध्यम्, अधृतिः—धैर्य्याभावः, अनालम्बः—अनाश्रयत्वं, सर्वशून्यता इत्यर्थः, तन्मयः—तदेकतानचित्तत्वम्, उन्मादः—मूर्तावमूर्तिमेवाध्यवसितचित्तत्वं, मूर्च्छना—मूर्च्छा, मृतिः च इत्येताः असौष्ठवादयः

असौष्ठवं मलापत्तिस्तापस्तु विरहज्वरः ॥
अरुचिर्वस्तुवैराग्यं, सर्ववारागिताऽधृतिः ।
अनालम्बनता चापि शून्यता मनसः स्मृता ॥
तन्मयं तत्प्रकाशो हि वाह्याभ्यन्तरतस्तथा ॥२२६॥(क)

श्रेयं अष्टम् ।

एकदेशतो यथा मम तातपादानाम् ;—

"चिन्ताभिः स्तिमितं मनः, करतले लीना कपोलस्थली,
प्रत्यूषक्षणदेशपाण्डुवदनं, श्वासैकखिन्नोऽधरः ।
अम्भःशीकरपांसुनौकिशलयैर्नोपैति तापः शमं,
कोऽप्यः प्रार्थितदुर्लभोऽस्ति सहते दीनां दशामीदृशीम् ?॥" (ख)

सलक्षणाः एकादश अरदशाः, क्रमात्—उत्तरोत्तरं, सम्पद्यमानाः, ज्ञेयाः । ["ज्ञेया दश" इत्यत्र "एकादश" इति पाठः सम्यगीयः, अन्यथा अष्टौअसौष्ठवमित्यादि सलक्षणा विप्रतिः असङ्गता स्यात्]।

(क) असौष्ठवमाह, असौष्ठवमिति ।—मलानाम्, आपत्तिः—प्राप्तिः, मालिन्यमित्यर्थः, असौष्ठवम् । तापमाह, ताप इति ।—विरहेण ज्वरः,—आधिस्तु तापः । [पाण्डुता—पाण्डुवर्णत्वं, दुःखेन शरीरस्य निर्लेखस्वतया मलिनश्वेतीभावः, क्षमता—दौर्बल्यम्, इत्येते प्रसिद्धे, अत एवैते अनुक्ते, मतान्तरे तु—पाण्डुतासंवलिता क्षमतैत्यर्थः]। अरुचिमाह, अरुचिरिति ।—अरुचिः, वस्तुषु वैराग्यं—विगतस्पृहत्वम् । अधृतिमाह, सर्वत्रेति ।—सर्वत्र—सर्वस्मिन् वस्तुनि, अरागिता—अननुरागिता, प्रमोदजनकतायां अविश्वास इति यावत्, अधृतिः । अनालम्बनतामाह, अनेति ।—मनसः शून्यता च, अनालम्बनता—अवलम्बनराहित्यं, स्मृता । तन्मयमाह, तन्मयमिति ।—तथा वाह्याभ्यन्तरतः—बहिरिन्द्रियग्राह्ये मनोग्राह्ये च इत्यर्थः, तत्र—असौष्ठवम्, नायकस्येति यावत्, प्रकाशः—सर्वत्र अध्यासवशात् सर्वत्रैव परिचयः, अत्र प्रकाशीकरणेऽपि भासनमिति यावत्, तन्मयम् । [उन्मादमूर्च्छनायोस्तु प्रसिद्धा, इत्यमूः न लक्षिता इति वेदितव्यम् ; अत एव इत्यादि वक्ष्यति—"श्रेयं अष्टम्" इति ।

(ख) चिन्ताभिरिति ।—चिन्ताभिः विषयान्तरिणीभिः दुश्चिन्ताभिः विस्मरणैरित्यर्थः ।

भावी भवन् भूत इति त्रिधा स्यात्तत्रकार्य्यजः ॥२२७॥

कार्य्यजस्य बुद्धिपूर्वकत्वात् त्रैविध्यम्। (ग)

तत्र भावी यथा मम,—

"यामः ? सुन्दरि ! याहि पान्थ ! दयिते ! शोकं वृथा मा कृथाः,
शोकस्ते गमने कुतो मम ? ततो वाष्पं कथं मुञ्चसि ?।
शीघ्रं न व्रजसीति, मां गमयितुं कस्मादियं ते त्वरा ?
भूयानस्य सह त्वया जिगमिषोर्जीवस्य मे सम्भ्रमः ॥" (घ)

चन्द्राः—चन्द्रमसश्च रतिमपि तिरस्कृत्यांधाया: जातायाः, प्राप्तिंतदुर्लभः—प्राप्तिंतः पुनरपि दुर्लभः—एतज्ञाननुरक्तः, [चन्द्र "विशेषणं विशेष्येण बहुलम्" (२।१।५७ वा०) इत्यनेन विशेषणविशेष्ययोः प्राग्निपातादिशेषसमासः] कः—को जनः, अस्ति ? यत्प्रसादे इयम् दुःखितौ दीनां दशाम्—चन्द्रमाः, विपन्निमिति यावत्, लभते —अनुभवति, दुःखितो दीनदशो ? इत्याह,—जनः—जनरिन्द्रियं, चित्तमित्यर्थः—ध्यानैः, क्लिन्नं—क्लिष्टं, जड़ीकृतमित्यर्थः, विषयान्तरपदार्थानलनालीतमिति यावत्, [एतेन अनालम्बनता सूचिता] कपोलस्थली—गण्डदेशः, करतले, क्षीणा—क्षिप्ता, वदनं—मुखं, म्लायत्यस्य या चन्द्रदा—रात्रिः, तस्याः दुःखः—पतिः, ("रात्रिस्त्रिवामा चन्द्रदा क्षपा" "क्षीरधीशो निशापतिः" इति चामरोक्तेः) चन्द्रदेशः—चन्द्रः, तद्वत् पाण्डु —मलिनश्चेतोभावमापन्नमित्यर्थः, अधरः, श्वासेन—दीर्घनिश्वासेन, एकं—केवलं, खिन्नः—म्लानः, शुष्क इति यावत्, तापः—अन्तःसन्तापः, चन्द्रमसां, शीकरैः—बिन्दुभिः, [यद्यपि "शीकरोऽम्बुकणाः स्मृताः" इत्यमरोक्तिः तथाऽप्यत्र "विशिष्टवाचकानां पदानां सति विशेषणसमवधाने विशेष्यमात्रपरत्वम्" इति नयेन चन्द्रःशब्दयोगात् शीकरशब्देन कणमात्रं बोद्धव्यम्] पद्मिनीविशेषस्य:—जलजिनी-पतेः, चन्द्रदा,—चन्द्रःशीकरयुतेः पद्मिनीविशेषस्य:, [अस्मिन् पदे मध्यपदलोपी समासः] भ्रमं—भ्रान्तिं, न उपैति—न प्राप्नोति। आर्द्रूस्थविशेषितं इत्यम्।

(ग) कार्य्यजस्येत्यादि।—बुद्धिपूर्वकत्वात्—इच्छया विधीयमानत्वात् इत्यर्थः। [एतच्च भिन्नदेशजननस्य सम्भावनायां भावित्वं, तद्विषये वर्त्तमानत्वं, तद्विषयतो भूतत्वम्; चन्द्रयोस्तु आपन्नसम्भ्रमयोः सम्भावनानिश्चयासम्भवादैक्येऽविवक्षयेति भेदः]।

(घ) याम इति।—इत्यसोक्तिरनुभूतौ। हे सुन्दरि ! यामः—गच्छामः ?

भवन् यथा,—

"प्रस्थानं वलयैः कृतं, प्रियसखैरस्रैरजस्रं गतं,
धृत्या न क्षणमासितं, व्यवसितं चित्तेन गन्तुं पुरः ।
यातुं निश्चितचेतसि प्रियतमे सर्वे समं प्रस्थिताः,
गन्तव्ये सति जीवित ! प्रियसुहृत्सार्थः किमु त्यज्यते ?" ॥ (ङ)

["वर्त्तमानसामीप्ये वर्त्तमानवद्वा" (३।३।१३१ पा०) इति वर्त्तमानसामीप्ये भविष्यदर्थे लट्। अविशेषणत्वात् बहुवचनम्]। (इति नायकस्योक्तिः)। हे पान्थ !—पथिक ! याहि—गच्छ, (इति नायिकायाः प्रत्युक्तिः)। अत्र गमनसम्भावनामात्रेण यत् 'पान्थ' इति सम्बोधनं, तत् आत्मनि कान्तस्य प्रेमाभावसूचनाय, तदवगत्य झटित्येव 'दयिते' इत्यनेन प्रतिसम्बोधनम् ; तथा हि, हे दयिते !—प्रिये ! वृथा शोकं मा कृथाः—न कुरु, (इति नायकस्योक्तिः)। ते—तव, गमने, मम शोकः कुतः ?—किमर्थम् ? (इति नायिकायाः प्रत्युक्तिः)। ततः—तर्हि, कथं—किमर्थं, बाष्पं—नेत्रजलं, मुञ्चसि—त्यजसि ? रोदिषीत्यर्थः (इति नायकस्योक्तिः)। शीघ्रं—सत्वरं, न व्रजसि—न गच्छसि, इति—इति हेतोः, बाष्पं मुञ्चामीति शेषः (इति नायिकायाः प्रत्युक्तिः)। मां गमयितुं ते—तव, इयं त्वरा—व्यग्रता, कस्मात् ?—किमर्थम् ? (इति नायकस्योक्तिः)। त्वया सह जिगमिषोः—गन्तुमिच्छोः, मे—मम, मदीयस्येति यावत्, अस्य, जीवस्य—जीवितस्य, भूयान्—महान्, अयं, सम्भ्रमः—त्वरा, व्यग्रतेति यावत्। अवश्यं जिगमिषावपि त्वयि विलम्बं कुर्वाणे मम प्राणाः कण्ठावरुद्धा इवोद्विज्यन्ते, यतस्तेऽपि त्वया सह गन्तुं कृतनिश्चयाः सन्ति इति हृदयम् (इति नायिकायाः प्रत्युक्तिः)। अत्र हि कान्तासम्मतिसापेक्षतया, गमनस्य सम्भावनामात्रं ज्ञेयम्। शार्दूलविक्रीडितं वृत्तम्।

(ङ) प्रस्थानमिति।—कान्तप्रवासं निश्चित्य स्वजीवितं प्रति नायिकायाः उक्तिरियम्। भो जीवित ! प्रियतमे—त्वत्तोऽपि अत्यन्ते प्रिये, यातुं—विदेशं गन्तुं, निश्चितचेतसि—स्थिरचित्ते, सति, वलयैः—करभूषणविशेषैः, प्रस्थानं—यात्रा, कृतम् ; कान्तस्य भाविविरहचिन्तया शरीरकार्श्यात् हस्तात् वलयभ्रंशो जात इति भावः ; तथा प्रियसखैः—प्रियबन्धुभिः, सततम् एकत्रावस्थितेरिति भावः, यद्वा,—ईदृशदुःखे अश्रुपातेनैव जीवनधारणं भवतीति स्वरक्षाकारित्वात् प्राणप्रियैरित्यर्थः, अस्रैः—अश्रुभिः, अजस्रं—निरवच्छिन्नं, गतं—प्रस्थितं, पतितुमारब्धमित्यर्थः ; "समप्राणः सखा मतः" इत्युक्तेः सख्युर्गमने सख्युरपि गमनस्य उचितत्वात् इति भावः ; यद्वा नित्यमश्रूणां

भूतो यथा,—"चिन्ताभिः स्तिमितम्" इत्यादि। आपात् यथा—"तां जानीथाः" इत्यादि। सम्भ्रमो दिव्यमानुषनिर्घातोत्पातादिजः। यथा—विक्रमोर्वश्यामुर्वश्यौपुरूरवसोः। (च)

निपाते तेषामपि चिराय विरहो जातः, इदानीम् अस्मिन् न पतन्ति इत्यभिप्रायः। (एषु पुनः प्रियसख्युपादानमत्यन्तप्रियत्वख्यापनाय; अन्ये तु—अस्मज्जीवितयोरिवहृदयगामित्वादत्यन्तप्रियत्वमित्याहुः; नायीविशेषेण इत्युक्तेः अस्मन्निर्गमात्। न चैवं धृतेरपि प्रियसख्यापत्तिरिति वाच्यं, धृतेरात्मधर्मत्वेन मनोधर्मत्वेन वा हृदयव्याप्तित्वायोगात्; यद्वा,—प्रियजीवने एव वयस्या धार्यन्त इति वयस्यानां धृतेः प्रीतिजनकत्वात्, चित्तस्य तत्प्रवणत्वात् प्रियस्य सुहृत्त्वम्; अस्माकास्तु मानसदुःखसहनतयाऽत्यन्तप्रियत्वमित्यत्र पृथक् प्रियसख्युपादानम् इति) तथा धृत्या—धैर्येण, अयं—अवसादमपि, न आसितं—न स्थितं, विनोगादिष्वलेन धैर्येण विनष्टमिति भावः, चित्तेन—मनसा, पुरः—अग्रतः, प्रियतमस्येति भावः, गन्तुं व्यवसितम्—उद्युक्तम्; इत्थं सर्वे—मदाश्रिता वयस्यादय इत्यर्थः, समं—युगपत्, प्रियेण सह वा, प्रस्थिताः—प्रवसिताः; अतः गन्तव्ये—त्वयाऽपि एवस्मिन् समये अवश्यं गन्तव्यमिति स्थिते सति, प्रियसुहृत्त्वार्थः—प्रियाश्च ते सुहृदश्चेति प्रियसुहृदस्तेषां भावः—समुदायः, ("वार्तौ वणिक्समूहे स्यात् अपि सङ्घातमात्रके" इति मेदिनी) वयस्यादित्यर्थः, [अत्र "जीवितप्रिय" इति क्वचित्पाठे—जीवितस्य जीवनोपायस्य वा तस्य प्रिय इत्यर्थः] किमु—कथं, त्यज्यते?—त्यक्तुं न युज्यते, तेनैव साकं गन्तव्यमित्यर्थः। प्रियसुहृदः सह गमने कष्टातिशयो न भविष्यति इति प्रियतमगमने मन्तुमुद्यताः वयस्यादयः सख्यश्चित्तं कर्षन्ति, यदि च त्वं प्रियश्च सुहृदवसि, तत् तवापि अवश्यं तदनुगमनं भविष्यति; ततः साम्प्रतमेवानुगमनं व्याप्स्यमिति भावः। [अत्र नायिकारतेर्नायकाश्रयत्वं, विरहदशायामेकाकित्वेन अवस्थानादुद्दीपनं, तथाऽभिधानं चानुभावः, अस्यवासहत्तापव्यङ्ग्यः, विषादो व्यभिचारी प्रतीयते]। अमरुशतकस्थेदं पद्यम्। आर्द्रव्यविशेषितं इत्तम्।

(च) भूत प्रवासमुदाहरति, चिन्ताभिरिति।—(२३२ पृष्ठे) व्याख्यातमिदं पद्यम्। खहृदयगमस्य सङ्गमाभावे विरहिण्या दुःखावर्जनेयम्; अत एव भूतोऽत्र प्रवास इति बोध्यम्। आपन्नमुदाहरति—"तां जानीथाः" इति। इदमपि व्याख्यातपूर्वं पद्यम्। प्रीतिजनभूतायां नायिकायां तदाहरणमिदम्। अत्र हि यत्नेनापात् यत्नेन प्रवासः स्पष्टः। दिव्यः,—विद्युदुल्कादिः, मानुषः,—सम्भ्रमोद्भवः;

सङ्ख्यातुमशक्यतया चुम्बनपरिरम्भणादिबहुभेदात्।
अयमेक एव धीरैः कथितः सम्भोगशृङ्गारः॥
तत्र स्याद्दृतुषट्कं चन्द्रादित्यौ तथोदयास्तमयः।
जलकेलिवनविहारप्रभातमधुपानयामिनीप्रभृतिः॥
अनुलेपनभूषाऽऽद्या वाच्यं शुचि मेध्यमन्यच्च ॥२३०॥(ट)

तथा च भरतः,—"यत्किञ्चिल्लोके शुचि मेध्यमुज्ज्वलं दर्शनीयं वा, तत् सर्वं शृङ्गारेणोपमीयते" इति। किञ्च, (ठ)—

कथितश्चतुर्विधोऽसा-
वानन्त्यात् तु पूर्वरागादेः॥ २३१ ॥ (ड)

(ट) ननु अयं कतिविधः? इत्याशंसायामाह, सङ्ख्यातुमिति।—अयं सम्भोग-शृङ्गारः, चुम्बनम्—अधरपानं, परिरम्भणम्—आश्लिङ्गनं, तदादिबहुभेदभिन्नत्वेन सङ्ख्यातुम्, अशक्यतया—न शक्या इत्यनेन हेतुनेत्यर्थः, धीरैः—सहृदयैः, एकः एव कथितः। प्रकाशकृताऽप्यभिहितम्;—"तत्र आद्यः परस्परावलोकनाश्लिङ्गनाधरपान-परिचुम्बनाद्यनन्तभेदत्वादपरिच्छेद्य एक एव गण्यते" इति। तत्र—सम्भोगे इत्यर्थः, ऋतुषट्कादिकं, वाच्य—सम्भोगोद्दीपकतया वर्णनीयं, शुचि—निर्मलं, मेध्यं—पवित्रम्, अन्यत्—इत्यादि, स्यात्—उपयुक्तं भवेत्; तथाहि रसगङ्गाधरकृता,—"यद् यत् पवित्रं सङ्गस्य तेन पुष्टिं प्रदर्शयेत्" इति।

(ठ) एवमानन्त्यसङ्ख्योपपत्त्या एकविधत्वेनैव अङ्गीकारौचित्येऽपि, प्राधान्येन सङ्ख्यातुं शक्याः ये सम्भोगभेदाः तेषां चतुर्विधत्वं वक्तुमुपक्रमते, किञ्चेति।—एतद्भेदवादिमतापेक्षया पक्षान्तरसूचनम्।

(ड) कथित इति।—असौ—सम्भोगशृङ्गारः, पूर्वरागादेः, आनन्त्यात्—अनन्तरसम्भवत्वात्, तु—पुनः, चतुर्विधः कथितः। आदिपदेन पूर्वराग-मान-प्रवास-करुणाः चत्वारः गृह्यन्ते, पूर्वरागादेरनन्तरमयं सम्भवति, इत्यवगम्यते पूर्वरागसम्भोगः, मानसम्भोगः, प्रवाससम्भोगः, करुणसम्भोगश्चेति चतुर्विध इति भावः।

यदुक्तम्,—

"न विना विप्रलम्भेन सम्भोगः पुष्टिमश्नुते।
कषायिते हि वस्त्रादौ भूयान् रागो विवर्द्धते॥" इति। (ढ)

तत्र पूर्वरागानन्तरं सम्भोगो यथा,—कुमारसम्भवे पार्वतीपरमेश्वरयोः। प्रवासानन्तरं सम्भोगो यथा मम तातपादानाम्,—

"क्षेमं ते ननु पक्ष्मलाक्षि?—किसअं क्खेमं महंगं दिढ़ं,
एतादृक् कृशता कुतः?—तुह पुणो पुट्ठं सरीरं जदो।
केनाहं पृथुलः प्रिये?—प्पणइणीदेहस्स सम्मीलणात्,
त्वत्तः सुभ्रु! न काऽपि मे—जइ इदं क्खेमं कुदो पुच्छसि?॥"(ण)

एवमन्यत्रापि ऊह्यम्।

(ढ) ननु दुःखबहुले विप्रलम्भे किं नाम रसत्वम्? इत्याशङ्क्य तस्य सम्भोगानुगुणत्वं सम्पादयति, नेति।—विप्रलम्भेन विना सम्भोगः न पुष्टिम् अश्नुते—परिपोषं न प्राप्नोति, विप्रलम्भपूर्वको हि सम्भोगः प्रकृष्टो भवतीति भावः। हि—तथाहि, वस्त्रादौ कषायिते—कषायजलेन सिद्धे इत्यर्थः, भूयान्—महान्, रागः विवर्द्धते—वृद्धिं गच्छति। [एतेन पूर्वरागादिकं विनाऽपि सम्भोगः सम्भवतीति सूचितम्; तथा च प्रकृष्टापकृष्टभेदेन सम्भोगो द्विविधः; विप्रलम्भानन्तरः सम्भोगः प्रकृष्टः; स च विप्रलम्भः पूर्वरागादिचातुर्विध्येन चतुर्विधः; तद्विपरीतोऽपकृष्ट इति फलितम्]।

(ण) क्षेममिति।—नायकनायिकयोरुक्तिप्रत्युक्ती,—तत्र नायकस्य संस्कृतभाषयोक्तिः, नायिकायाः प्राकृतभाषया पुनः प्रत्युक्तिरित्यवधेयम्। हे पक्ष्मलाक्षि!—प्रशस्तलोमशोभितनयने! ते—तव, क्षेमं—कुशलं, ननु—किम्? (इति नायकस्योक्तिः)। [किसअमिति।—कृशकं क्षेमं मदङ्गं दृढम् इति संस्कृतम्]। दृढम्—अत्यर्थं, कृशकं—शीर्णं, यत् मम अङ्गं, तदेव क्षेमं—कुशलं, ममाङ्गस्य कार्श्यमेव क्षेममिति भावः। (इति नायिकायाः प्रत्युक्तिः)। एतादृक्—एतादृशी, एवंविधेति यावत्, ("तव" इत्यध्याहार्य्यम्) कृशता—शरीरदौर्बल्यमित्यर्थः, कुतः—कथं जाता? (इति नायकस्य प्रश्नः)। [तुह इति।—तव पुनः पुष्टं शरीरं यतः इति संस्कृतम्]। यतः,—यस्मात्, तव शरीरं पुनः पुष्टम्। (इति नायिकायाः प्रत्युक्तिः)। हे प्रिये! अहं, केन—केन हेतुना, पृथुलः—स्थूलाङ्गः? अभवमिति शेषः। (इति नायिकस्योक्तिः)। [प्पणइणी इति।—प्रणयिनीदेहस्य सम्मेलनात् इति संस्कृतम्]। प्रणयिन्याः—

अथ हास्यः,—

विकृताकारवाग्वेषचेष्टादेः कुहकाद्भवेत्।
हास्यो हासस्थायिभावः श्वेतः प्रमथदैवतः॥
विकृताऽऽकारवाक्चेष्टं यदालोक्य हसेज्जनः।
तद्वालम्बनं प्राहुस्तच्चेष्टोद्दीपनं मतम्॥
अनुभावोऽक्षिसङ्कोचवदनस्मेरताऽऽदिकम्।
निद्राऽऽलस्यावहित्याद्या अत्र स्युर्व्यभिचारिणः॥
ज्येष्ठानां स्मितहसिते
मध्यानां विहसिताबहसिते च।

अपरवाग्वायाः, देवत्र सम्बोधनात्—सम्प्रति। ["सम्बोधनात्" इति पाठे तु तदन्तःप्रवेशात् इत्यर्थः] (इति नायिकायाः प्रश्नोक्तिः)। हे सुभु!—सुन्दरि! [भ्रूशब्दोकङ्कारीयतया "नेयङुवङ्स्थानावस्त्री" (१।४।४ पा०) इति ङीप्रतिषेधे "यञञोश्च" (७।३।१०७ पा०) इति कृत्तद्धितसमासाश्चेति प्रकृतिभावे "अचोऽन्त्यादि टि" (७।१।७१ पा०) इति टिलोपे "यस्येति च" (६।४।१४८ पा०) इति ईकारलोपे सुभ्रूशब्दात् सम्बोधनैकवचने "अमाङि आतेश्चाऽऽदौ" इति वार्त्तिके "पूर्वादयः" "ङर्कर्तृः" इत्यादिकारात्पूर्वमुदात्तत्वात् सम्बोधनस्य चाद्युदात्तत्वात् सुभ्रूशब्दस्य] सम्बुद्धेः—तदपेक्षया इत्यर्थः, आऽपि, से—मम, न, प्रथयिनीति शेषः। (इति नायकस्योक्तिः)। [अह इति।—यदि इदं चेमं कुतः पृच्छसि? इति संस्कृतम्]। यदि इदं—त्वमेव मम प्रथयिनी इति तवेदमेवाभिमतं, तर्हि इति भावः, कुतः—किमर्थं, चेमं—कुशलं, पृच्छसि?—मम स्वाभ्यविषयकजिज्ञासाभावाः किं प्रकृतम्? त्वयि प्रथयिनि किं मम कुशलम्? प्रवासक्षितकाऽऽलम्बालक्षितेऽपि त्वय्यात्मनापि मनाग्येव क्षेमं प्रथयिनीत्वधीः, इत्थोऽपि किमपि मे कुशलं नासीति भावः। (इति नायिकायाः प्रश्नोक्तिः)। आर्द्रज्वलिकोक्तिः इत्तम्। अपरौ (मानवत्यौ) यथा,—"पादप्रणतमालोक्य कान्तमेवाऽन्यकातरम्। सुभ्रुवौ वामवलनां सुमुखौ वेद मुग्धिका॥" इति। "कान्ते! घोरतरान्धकारकुहरात् त्वं पुष्पपुञ्जेन मे सुप्ता ह्यस्य तदर्जनक्षणमयं प्रत्यक्षमालिङ्ग्य माम्। इत्याकर्ण्य निमीलिताक्षियुगलं चोरं प्रणेतुर्गतं क्षीणाशं मलयाचलं मलयजः खेदं पुनर्मे दिवः॥" इति च व्याख्याताः।

नीचानामपहसितं
तथाऽतिहसितञ्च षड् भेदाः ॥ (त)

ईषद्विकासिनयनं स्मितं स्यात् स्पन्दिताधरम् ।
किञ्चिल्लक्ष्यद्विजं तत्र हसितं कथितं बुधैः ॥

मधुरस्वरं विहसितं
सांसशिरःकम्पमवहसितम् ।
अपहसितं सास्राक्षं
विक्षिप्ताङ्गं भवत्यतिहसितम् ॥ २३२ ॥ (थ)

(त) हास्यरसमाह, विकृतेत्यादि ।—विकृतः आकारः, वाक्, वेशः, चेष्टादिश्च यस्य तादृशात्, कुहकात्—विस्मापकात्, नटादित्यर्थः, [कुह विस्मापने इत्यस्य कुनि रूपमिदं, विस्मापकत्वञ्च नानाऽऽविष्कारप्रकटनकारितया नटस्य सिद्धमेव] (उपलक्षणमेतत्, तेन विकृताकारादिविषयकश्रव्यकाव्यादेरपि ग्रहणं बोध्यम्) कुतुकादिति पाठे—कौतुकजनकात्, विकृताकारवाक्चेष्टादेर्वैलक्षण्यादित्यर्थः] हास्यः—तदाख्यः रसः, भवेत्; (अत एवोक्तं,—"विपरीतालङ्कारैर्विकृताचाराभिधानवेषैश्च । विकृतैरङ्गविकारैर्हसतीति रसः स्मृतो हास्यः ॥" इति)। तस्य स्थायिभावो हासः, श्वेतः वर्णः, (तथोक्तं—"सितो हास्यः प्रकीर्त्तितः" इति)। प्रमथः—शिवानुचरः, दैवतं यस्य तादृशः, (तथोक्तं—"हास्यः प्रमथदैवतः" इति) यत् विकृताकारवाक्चेष्टं वस्तु आलोक्य—दृष्ट्वा, जनः हसेत्, तत्, अत्र—रसे, आलम्बनं प्राहुः, तथा तस्य चेष्टा—विकृताकारादिरूपा इत्याशयः, उद्दीपनं मतम् । अक्ष्णोः—नेत्रयोः, सङ्कोचः, वदनस्य—मुखस्य, स्मेरताऽऽदिकञ्च अत्र अनुभावः । निद्रा, आलस्यम्, अवहित्थादयश्च अत्र व्यभिचारिणः स्युः । हास्यरसस्थायिभावस्य हासस्य पात्रभेदेन भेदानाह, ज्येष्ठानामिति ।—ज्येष्ठानाम्—उत्तमानां, स्मितं हसितञ्च, मध्यानां—मध्यमानां, विहसितम् अवहसितञ्च, नीचानाम्—अधमानाम्, अपहसितं तथा अतिहसितञ्च, इत्येवं हासस्य षट् भेदाः, भवन्ति इति शेषः । ["तदेष षड्भेदः" इति पाठे,—तत्—तस्मात्, हास्यभेदादित्यर्थः, एषः—हास्यरसः, षड्भेदः—षट्प्रकारः इति] ।

(थ) स्मितादीनां लक्षणमाह, ईषदिति ।—ईषत् विकासिनी वदने यत्र तत्,

यथा मम,—

"गुरोर्गिरः पञ्च दिनान्यधीत्य
वेदान्तशास्त्राणि दिनत्रयञ्च।
अमी समाम्नाय च तर्कवादान्
समागताः कुक्कुटमिश्रपादाः॥" (ढ)

तथा, अन्वितः अधरो यस्मिन् तथाभूतं हास्यं, खितं स्यात्। यथा—हासेषु मध्ये, किञ्चित्—ईषत्, जल्पाः—दृश्याः, दिनाः—दन्ताः, यत्र तादृशं, ("दन्तविप्रायजना दिनाः" इत्यमरः) हास्यं, वृधेः दृहितं यथितम्। मधुरः—मनोहरः, अरः यत्र तादृशं हास्यं, विहसितम्; अंसल—स्कन्धवत्, शिरसत्, कम्पेन सहितं हास्यम्, अपहसितम्। साश्रुयम्—अश्रुपूर्णनयनं, हास्यम्, अपहसितं; विवियानि, अङ्गानि यस्मिन् तादृशं हास्यम्, अतिहसितं भवति। [यत्र एवोत्तमप्रियुक्तेः,—"आत्मस्थः परसंस्थश्चेत्यत्र भेदद्वयं मतम्। आत्मस्थो दृष्टुरुत्पन्नो विभावैरुच्यमानतः॥ इत्यनन्तरं इदृशा विभावोपजायते। योऽसौ हास्यरसस्यत्वे: परत्वः परिकीर्त्तितः॥ उत्तमानां मध्यमानां नीचानामप्यसौ भवेत्। त्रयाणां यथितस्यात्र षड् भेदाः स्युः आपरे॥ यितस्य हसितं श्रेष्ठमुत्तमे पुरुषे बुधैः। भवेद्विहसितं चोपहसितं मध्यमे नरे॥ नीचेऽपहसितस्यातिहसितं परिकीर्त्तितम्। ईषत्फुल्लकपोलाक्ष्णां कटाक्षैरप्यलक्षितैः॥ अदन्तदर्शनो हासो मधुरः स्मितमुच्यते। वक्त्रनेत्रकपोलैरीषदुत्फुल्लैरवलक्षितः॥ किञ्चिल्लक्षितदन्तश्च तदा हसितमिष्यते। सस्वनं मधुरं काञ्चगतं वदनरागवत्॥ साकुञ्चिताक्षि मन्दञ्च विदुर्विहसितं बुधाः। निकुञ्चितांसशीर्षञ्च स्निग्धदृष्टिविलोकनः॥ उत्फुल्लनासिको हासो ज्ञेयोऽपहसितं मतम्। अश्रुनेत्रः सास्रदृष्टिरास्यरागसमूर्ध्वगः॥ भ्रूकुंदेवेन सहितो हासोऽतिहसितात्मकः। खलजर्घट्टघुर्घुराणो बाष्पपूरप्लुतेक्षणः॥ शिरोधगूढगात्रश्च हासोऽतिहसितं मतम्॥" इति]।

(ढ) ढदाहरति, गुरोरिति।—अमी कुक्कुटमिश्रपादाः, गुरोः—प्रभाकरस्य, गिरः—मीमांसाशास्त्राणीत्यर्थः, पञ्च दिनानि—पञ्चदिनमानम्, अधीत्य—पठित्वा, तथा वेदान्तशास्त्राणि—शारीरकमीमांसाशास्त्रान्, दिनत्रयं—त्रीण्यहानि यावत्, अधीत्य, एवं तर्कवादान्—तर्कशास्त्राणि, न्यायदर्शनानीत्यर्थः, समाम्नाय—शास्त्रेन्द्रियविषयनाम विधायेत्यर्थः, शास्त्राभ्यासं कृत्वा, न तु अधीत्य इति भावः, समागताः। [यत्र कुक्कुटमिश्रा आजन्मनः, यत्र अनधीतशास्त्रत्वेऽपि सभायामधीतशास्त्रपदानमनं, अर्थसाधनञ्च तादृशतत्त्वोद्दीपनम्, आश्रित्या दन्तविप्रायादृश्योद्दीपन-

अस्य लटकमेलकप्रभृतिषु परिपोषो द्रष्टव्यः। (ध)

अत्र च, (न)—

यस्य हासः स चेत् क्वापि साक्षान्नैव निबध्यते।
तथाप्येष विभावादिसामर्थ्यादुपलभ्यते॥
अभेदेन विभावादिः साधारण्यात् प्रतीयते।
समाजिकैस्ततो हास्यरसोऽयमनुभूयते॥२३३॥ (प)

एवमन्येष्वपि रसेषु बोद्धव्यम्।

अथ करुणः,—

इष्टनाशादनिष्टाप्तेः करुणाख्यो रसो भवेत्।
धीरैः कपोतवर्णोऽयं कथितो यमदैवतः॥

भावाः, हर्षादयः सञ्चारिभावाः, इत्येषां संयोगात्सामाजिकानां हासोऽभिव्यज्यते इति बोध्यम्]। उपजातिः वृत्तम्। यथा वा रसगङ्गाधरकृतोदाहृतं,—"मत्तातपादैर्विहिते निबन्धे निरूपिता नूतनयुक्तिरेषा॥ अङ्गं गवां पूर्वमहो! पवित्रं कथं न वा रासभधर्मपत्न्याः?॥" इति। [अत्र हि वक्तुस्तात आलम्बनं, तदीया युक्तिरुद्दीपनम्, आक्षिप्यो दन्तविकाशादिरनुभावः, पादादिपादव्यङ्ग्या निन्दा च व्यभिचारी भावः, इत्येषां संयोगाद्धास्योऽभिव्यज्यते]।

(ध) परिपोषः—बाहुल्यम्।

(न) ननु रसे नायकस्याऽभेदः सामाजिके भासते, स चात्र श्लोके न निबद्धः, तत् कथं तस्याभेदारोपो जायताम्? इत्यत आह, अत्र चेति।—अत्र—हास्यरसे इत्यर्थः, चकारादन्यत्रापि।

(प) यस्येति।—यस्य—नायकस्य इत्यर्थः, हासः, वर्ण्यते इति शेषः, चेत् स क्वापि—कस्मिंश्चिदुदाहरणे, साक्षात् नैव निबध्यते—विरच्यते, तथाऽपि एषः—नायक इत्यर्थः, विभावादीनां, सामर्थ्यात्—शक्तेः, अन्यथाऽनुपपत्तिज्ञानादिति बोध्यम्, उपलभ्यते—प्रतीयते; ततः किम्? इत्यत आह, अभेदेनेति।—साधारण्यात्—साधारणीकरणव्यापारात्, विभावादिः, अभेदेन—तादात्म्येन, प्रतीयते, ततः—साधारण्यज्ञानात्, सामाजिकैः, अयं हास्यरसः, अनुभूयते। यत्रोदाहरणे रसनायकस्य साक्षान्न निबन्धः, तत्र आक्षेपादेव तदुपादानमिति भावः।

शोकोऽत्र स्थायिभावः स्याच्छोच्यमालम्बनं मतम्।
तस्य दाहादिकाऽवस्था भवेदुद्दीपनं पुनः॥
अनुभावा दैवनिन्दा भूपातक्रन्दितादयः।
वैवर्ण्योच्छ्वासनिश्वासस्तम्भप्रलपनानि च॥
निर्वेदमोहापस्मारव्याधिग्लानिस्मृतिश्रमाः।
विषादजडतोन्मादचिन्ताद्या व्यभिचारिणः॥२११(क)

शोच्य—विनष्टबन्धुप्रभृति। यथा,—मम राघवविलासे,—

"विधिने क्व जटानिबन्धनं तव चेदं क्व मनोहरं वपुः।
अनयोर्घटना विधेः स्फुटं ननु खड्गेन गिरीपकर्त्तनम्॥" (ख)

(क) अवयवरचनाह, अथेत्यादि।—इष्टस्य—प्रियस्य वस्तुनः, पुत्रादेर्वा, नाशात्—विच्छेदात्, मरणाद्वा, अनिष्टस्य, वाप्तेः—लाभात्, अवस्थाः—अवस्था नाम, रत्यः भवेत्। [तथोक्तं प्रदीपकृता,—"इष्टवस्तुदर्शनाद्वा विप्रियश्रवणस्य श्रेत्रवाहादपि। अभिलाषविशेषेः अवस्थरतो नाम जायते॥" इति]। अथ, शोकः—पण्डितैः, प्रदीपकारैः,—अभीष्टबन्धुवरवाजिः, तथा धनदेवतः, कथितः। [तथोक्तं,—"अभीष्टः अवस्थ-वेव"धनदो धनदेवतः" इति च]। अत्र—रसे, शोकः—धनप्रियजनादिप्रध्वंसः-जन्यः, आविभावः आत्मा, शोचं—शोकविषयीभूतं वस्तु, अवयवदाहश्वसनादि कृतिः भावत्, भावस्थानं मतम्; तत्र—शोचस्य, दाहादिका अवस्था, पुनः—सु, उद्दीपनं, भवेत्। दैवनं—दैवस्य, निन्दा, क्षुति—दुष्टिया, पातः—पतनं, [illegible] क्रन्दितादयः—रोदनविषयवनादयः, वैवर्ण्यं—विवर्णत्वम्, उच्छ्वासः, दीर्घनिश्वासः—निश्वासः—अन्तर्मुखश्वासः, स्तम्भः—जाड्य, प्रलपनानि, अनुभावाः, [illegible] भवेत्। अत्र च निर्वेदः, मोहः, अपस्मारः, व्याधिः, ग्लानिः, स्मृतिः, श्रमः, विषादः, जडता, उन्मादः, चिन्ताऽऽदयश्च व्यभिचारिणः—व्यभिचारिणाः त्रेया इति शेषः। [अत्र एतेषां रसमयावस्थता,—"अवयविदहिदेर्लोकानेकैः परिदेवितैर्विषयविरतैरेव। अनिमेषः अवस्थरतो दिशावासाभिजातेव॥" इति]।

(ख) उदाहरति, विधिने इति।—विधिने—अने, जटानिबन्धनं—जटाधारणं, क? इदं, मनोहरं—सुशोभनं, तव वपुः, क? अनयोः—जटाधारणमनोहरं

अत्र हि रामवनवासजनितशोकार्त्तस्य दशरथस्य दैव-निन्दा। एवं बन्धुवियोगविभवनाशादौ अप्युदाहार्य्यम्। (भ) परिपोषस्तु महाभारते स्त्रीपर्व्वणि द्रष्टव्यः।

अस्य करुणविप्रलम्भाद्भेदमाह,—

शोकस्थायितया भिन्नो विप्रलम्भादयं रसः।
विप्रलम्भे रतिः स्थायी पुनः सम्भोगहेतुकः॥२३५(म)

अथ रौद्रः,—

रौद्रः क्रोधस्थायिभावो रक्तो रुद्राधिदैवतः।
आलम्बनमरिस्तत्र तच्चेष्टोद्दीपनं मतम्॥
मुष्टिप्रहारपतनविकृतच्छेदावदारणैश्चैव।
सङ्ग्रामसम्भ्रमाद्यैरस्योद्दीप्तिर्भवेत् प्रौढ़ा॥

शरीरयोः, घटना—एकत्र योजना, विधेः—विधातुः, खड्गेन, शिरीषस्य—तदाख्यस्य पुष्पस्य, कर्त्तनं—छेदनम्, इति स्फुटं—व्यक्तं, ननु—खलु। अत्रोत्प्रेक्षेत्येके, दृष्टान्त इति अपरे, विषम इति तु वयम्। उपेन्द्रवज्रा वृत्तम्।

(भ) अत्र प्रकरणात् दशरथ एव नायक इति बुध्यते, इत्यत आह, अत्रेति।—अस्मिन् उदाहृते पद्ये, रामस्य वनवासेन जनितो यः शोकस्तेन आर्त्तः—पीड़ितः, तस्य—तथाभूतस्य, दशरथस्य, दैवस्य—भागधेयस्य, निन्दा—दोषाविष्करणम्। एवं बन्धूनां वियोगः—मरणं, विभवस्य च नाशस्तदादौ अपि उदाहार्य्यम्। क्रमेण यथा,—"गृहिणी, सचिवः, सखी मिथः, प्रियशिष्या ललिते कलाविधौ। करुणाविमुखेन मृत्युना हरता त्वां वद किं न मे हृतम्?॥" इति। अत्रेन्दुमतीमरणजनितशोकार्त्त-स्याजस्य मृत्युनिन्दा। "प्रातर्भवामि वसुधाऽधिपचक्रवर्त्ती सोऽहं व्रजामि विपिने जटिलस्तपस्वी। यच्चिन्तितं तदिह दूरतरं प्रयाति यच्चेतसा न गणितं तदिहाभ्युपैति॥" इति। अत्र नष्टराज्यस्य रामस्य परिदेवनं स्थायिभावः इति।

(म) करुणविप्रलम्भादस्य व्यवच्छेदमाह, शोकेति।—अयं रसः—करुण इत्यर्थः, शोकस्थायितया, विप्रलम्भात्, करुणविप्रलम्भात्, भिन्नः। विप्रलम्भे—करुण-विप्रलम्भे, पुनः, सम्भोगहेतुकः रतिः स्थायिभावः अस्ति, अत्र च शोक इत्यनयोर्भेद इति भावः।

भ्रूविभङ्गौष्ठनिर्देशबाहुस्फोटनतर्जनाः।
आत्मावदानकथनमायुधोत्क्षेपणानि च॥
अनुभावास्तथाक्षेपक्रूरसन्दर्शनादयः।
उग्रताऽऽवेगरोमाञ्चस्वेदवेपथवो मदः।
मोहामर्षादयश्चात्र भावाः स्युर्व्यभिचारिणः॥२१६(य)

यथा,—

"क्षतमनुमतं दृष्टं वा येरिदं गुरु पातकं
मनुजपशुभिर्निर्मर्य्यादैर्भवद्भिरुदायुधैः।
नरकरिपुणा सार्द्धं तेषां सभौमकिरीटिना-
मयमहमसृक्पेदोमांसैः करोमि दिशां बलिम्॥" (र)

(य) रौद्ररसमाह, रौद्र इति।—क्रोधः, स्थायिभावः, यस्य ताहशः, रक्तः—रक्तवर्णः, रुद्रः अधिदेवतं यस्य तथोक्तः, रसः, रौद्रः, नामेति शेषः। तत्र—रौद्रे रसे, अरिः—शत्रुः, आलम्बनम्—आलम्बनविभावः, तत्र—अरौ, चेष्टा, उद्दीपनं मतं मुष्टिप्रहारादि यत् पतनं तेन, विक्षतच्छेदनेन, अवदारणेन, यथा—विक्षतं—विदलाचरणं, छेदः—खड्गादिना छेदनम्, अवदाहरणं—शूलादिना वेधनं, तैः; सङ्ग्रामसम्भ्रमाद्यैः—युद्धव्यवसायादिभिश्च, यत्र—रौद्रत्व, क्रोधः—प्रबुद्धः, उद्दीप्तिः—उद्दीपनं, भवेत्; मुष्टिप्रहारादय उद्दीपनविभावा इति भावः। भ्रूविभङ्गः, ओष्ठनिर्देशनं, बाहुस्फोटनं, तर्जनम्, आत्मनः अवदानकथनं—क्षतजसंभवः प्रशंसनमित्यर्थः, आयुधानाम्—शस्त्राणाम्, उत्क्षेपणानि—ऊर्द्धनिक्षेपणानि, तथा आक्षेपः—तिरस्कारः, क्रूरसन्दर्शनानि—कुटिलावलोकनानि च, इत्येवमादयः अनुभावाः। अत्र—रौद्रे, उग्रता, आवेगः, रोमाञ्चः, स्वेदः, वेपथुः—कम्पश्च, तथा मदः, मोहः, अमर्षादयः, एते भावाः व्यभिचारिणः खुः। [तथोक्तं,—"युद्धप्रहारपतनविक्षतच्छेदनविदारणैश्च। सङ्ग्रामसम्भ्रमाद्यैरिः सञ्जायते रौद्रः॥ नानाप्रहरणोद्भेदैः शिरःप्रभृतिभञ्जनैश्चैव। एभिश्चावयविशेषैरङ्गानि प्रयोक्तव्यः॥ इति रौद्ररसो दृष्टो रौद्रवानङ्गचेष्टितः। अस्त्रप्रहारभूयिष्ठ उग्रकर्मक्रियाऽऽत्मकः॥" इति]।

(र) उदाहरति, क्षतमित्यादि।—विक्षतनिधनात्तेन क्रुद्धस्याग्रजस्य भाषणात् प्रतिज्ञातमुद्धोधिरियम्। यैः, निर्मर्य्यादैः,—अतिक्रान्तक्षितिभिः, उद्धतनियमै-

अत्र युद्धवीरात् भेदमाह, (ख)—

रक्ताक्षनेत्रता चात्र भेदिनी युद्धवीरतः ॥१२७॥ (व)

रिति यावत्, युद्धे अवज्ञाज्ञान इनने युद्धनर्यादाभङ्ग इति प्रसिद्धम्। अत एव, मनुजेषु —मनुष्येषु, पशुभिः—पशुवत् आर्याचारार्थविमूढैरित्यर्थः, उदायुधैः—उद्यतशस्त्रैः, अस्त्रयाचिभिरित्यर्थः, भवद्भिः, इदं—मत्पिष्टगिरम्हेदकरं, गुरु—महत्, पातकं—पापं, अस्त्रादि परित्यज्य युद्धतश्च विरम्य समाहितत्वयाऽवस्थितस्याचार्यस्य निहननरूपं महापापमिति समुदायार्थः, कृतम्, अनुमतं वा, दृष्टं वा; नरवरिपुणा—नरवासुर-निसूदनेन, क्रुधेन इत्यर्थः; सार्द्धं—सह, वर्त्तमानामामिति शेषः, तस्माद्याद्येन युद्धे प्रवृत्तानामिति भावः, सभीमकिरीटिनां—भीमार्जुनसहितानां, तेषाम्, वक्षसेदो-मांसैः—रुधिरवसामांसैः, दिशां—दिक्संस्थितमृतानामित्यर्थः, यजिम्—उपहारम्, अयम् अहं—एषोऽहं, करोमि, दिशः पूजयामीत्यर्थः। [अत्र क्रुद्धाद्यवस्थाव्यञ्जकौ भीमार्जुनादयः सर्वेऽपि स्वपिष्टनिहननमिमित्तभूता आलम्बनभूताः, अयमेव पिष्टहननमुद्दीपनं, निहन्तृत्वानवबोधोऽनुभावः, आवेगादिः सञ्चारी चेति बोध्यम्]। वैरीसंहारखेदं पश्यन्। वैरिणो इत्यं,—"न समरसखा नः षड्वैदेर्हवैर्वैरिणो मता" इति स्मरणात्। यदि तु भीमाद्यस्त्रवर्षादिसहटनाभावेन नाम रौद्ररस-व्यञ्जनक्षमा इत्तिरिति वक्तव्यानां हृदयं, तदेदमुदाहरणं,—"नवीच्छ्वसितयौवन-स्फुरदखर्वगर्वज्वरे नदीयगुरुवक्षसां मुकुलितस्तनाभ्यासं ह्यति; अयं पतत्तु निर्दयं दलितदन्तभूभृद्गजस्खलदृगुधिरप्लवो नल परत्वयो भैरवः॥" इति। परशुरामस्य श्रीरामचन्द्रं प्रत्युक्तिरियम्। [अत्र सर्वंसहता रक्तनीलगुणप्राधिनया प्रकृतरक्तानु-भूता इति अष्टम्]।

(ख) ननु रौद्र-युद्धवीरयोः रिपुरक्तस्यं विभावः, इत्यनयोरभेद एवापतितः, इति तयोर्भेदं दर्शयितुमाह, अत्रेति।—रौद्रस्येत्यर्थः।

(व) युद्धवीरादस्य भेदमाह, रक्ताक्षेति।—रक्तं—रक्तवर्णम्, आस्यं, नेत्रञ्च यस्मिन् तस्य भावः तत्ता, अत्र—रौद्रे रसे, युद्धवीरतः—युद्धवीरात्, भेदिनी—भेद-कारिणी; युद्धवीरे सुखस्य नेत्रस्य च रक्तत्वं न स्यात्, अत्र तु नायकस्य रक्ताक्षनेत्रता-व्यङ्ग्यः क्रोधः, इति तस्यैवानयोः भेद इति भावः। तथा वीभत्स-रिपोरक्तस्यालेऽपि क्रोधाविर्भावे रौद्रः, उत्साहाविर्भावे वीरः; न हि उत्साहे रक्ताक्षत्वादि सम्भवति, अत्र तामसत्वेन तामसत्वासम्भवात्, इत्यनयोर्भेदः इति निष्कर्षः।

अथ वीरः,—

उत्तमप्रकृतिर्वीर उत्साहस्थायिभावकः।
महेन्द्रदैवतो हेमवर्णोऽयं समुदाहृतः।
आलम्बनविभावास्तु विजेतव्यादयो मताः॥
विजेतव्यादिचेष्टाद्यास्तस्योद्दीपनरूपिणः।
अनुभावास्तु तत्र स्युः सहायान्वेषणादयः॥
सञ्चारिणस्तु धृतिमति-
गर्वस्मृतितर्करोमाञ्चाः।
स च दानधर्मयुद्धै-
र्दयया च समन्वितश्चतुर्द्धा स्यात्॥२३८॥ (श)

(श) वीररसमाह, उत्तमेति।—उत्तमप्रकृतिः,—उत्तमा—उत्कृष्टधीरोदात्तरूपा, प्रकृतिः नायकः यस्य तादृशः, यद्वा,—उत्तमा चमत्कारातिशयाधायितया रसान्तरादुत्कृष्टा प्रकृतिः स्वभावो यस्य इत्यर्थः; उत्साहः स्थायिभावो यस्य तथोक्तः, महेन्द्रदैवतः,—महेन्द्रः—सुरपति, दैवतं—देवता, यस्य तथोक्तः, हेमवर्णः—हेमवद्वर्णो यस्य तथोक्तः, अयं, वीरः—वीररसः, समुदाहृतः—कथितः; तस्य—रसस्य, आलम्बनविभावाः, तु—पुनः, विजेतव्यादयः—प्रतिनायकादयः, [अत्रादिपदेन कर्त्तव्यकर्मादीनां ग्रहणम्] मताः। विजेतव्यादिचेष्टाऽऽद्याः—प्रतिनायकादिचेष्टितादयः, [अत्रादिपदाभ्यां कर्त्तव्यकर्मतत्साधनोपायविज्ञानादीनां ग्रहणम्; यद्वा,—प्रथमादिपदेन दानीयधर्म्यानुकम्पनीयानां, द्वितीयादिपदेन दाने सत्त्वाध्यवसायादेः; धर्मे धर्मशास्त्राध्ययनादेः, दयायां दीनस्य कातरोक्त्यादेश्च ग्रहणम्] उद्दीपनरूपिणः, विभावा इति शेषः, तत्र—तादृशे वीरे रसे इत्यर्थः, सहायान्वेषणादयः, [अत्रादिपदेन स्वपराक्रमोद्भावनादीनां ग्रहणम्] तु—पुनः, अनुभावाः, स्युः, तथा धृतिः—धैर्य्यं, मतिः—बुद्धिः, कर्त्तव्यनिश्चय इति यावत्, गर्वः, स्मृतिः—स्मरणं, तर्कः, रोमाञ्चश्च, सञ्चारिणः—व्यभिचारिभावाः। एवं वीरं लक्षयित्वाऽस्य भेदानाह, स चेति।—सः—वीररसः, च, दानधर्मयुद्धैः दयया च समन्वितः,

स च वीरः दानवीरो धर्मवीरो युद्धवीरो दयावीरश्चेति चतुर्विधः। (घ)

तत्र दानवीरो यथा,—परशुरामः। "त्यागः सप्तसमुद्रमुद्रितमहीनिर्व्याजदानावधिः" इति। अत्र परशुरामस्य त्यागे उत्साहः स्थायी भावः। सम्प्रदानभूतैर्ब्राह्मणैरालम्बनविभावैः सत्त्वाध्यवसायादिभिश्च उद्दीपनविभावैर्विभावितः सर्वस्वत्यागादिभिरनुभावैरनुभावितो हर्षधृत्यादिभिः सञ्चारिभिः पुष्टिं नीतो दानवीरतां भजते। (ङ)

सप्तद्वीपाधिनाथ इतिति भावः, चतुर्धा—चतुःप्रकारः, स्यात् इति शेषम्। [चतु उत्साहः स्थायी भावः, उत्साहश्च दानदेवयुद्धचले इति चित्तोत्साहविशेषः, अत एवास्य देवराजो देवता, निर्व्याजतया च सर्वसहत्वसंभवात्, उत्तमप्रकृतित्वम्, अथवा लम्बरत्नालम्बादिवृत्तत्वम्; दानादीनाम् [illegible] विभावादिभिर्विभावितत्वेन भावविभावनिर्देशेन पदार्थनवीरादि[illegible] परार्थ शेषः, धर्मवीरादयस्तु धर्मवीरस्यैव [illegible]

(घ) वीरभेदान् विदधीति, स चेति।—स [illegible] दानवीरादिभेदेन चतुर्विध इति। अत्र मेव नियमः सङ्गच्छते, "राज्यञ्च" इत्यादौ "स प्रजानां विभवाय" इत्यादिविधेश्च परार्थं पाठबलवत्त्वेन [illegible] वीरस्य। अत्र धर्मवीरानन्तरतया धर्मवीरेण सतावलम्बनमिति [illegible] एवं सति दानवीरदयावीरयोरपि धर्मवीरान्तर्भावतया पार्थक्योच्छेदात्। [illegible] वीरस्य एवास्य वचनम: प्रभेदः, किन्तु दानवीरः, याचितवीरः दयादयोऽप्यस्य प्रभेदाः यथायथमवधेयाः। अत एवाकीर्तनावानो दयावीरादिभिरभेदैः सङ्कलनपुरोधेन इति द्विक्। दानवीर दयावीरयोर्धर्मवीरान्तर्भावोचित्येऽपि सम्प्रदानपुरोधेन तथाऽभिधानमिति[illegible]

(ङ) दानवीरमुदाहरति, तत्र इति।—सप्तभिः, समुद्रैः, मुद्रिता—वेष्टिता, या मही तया:, निर्व्याजम्—अकपटं, दानम्, तस्यावधिः यत्र तथाविधः इति। "सप्तद्वीपाधिनाथः" इ अमरवान् इवः विभाजो युद्धयोश्च तत्र न लक्षितमनुपमं यत्र [illegible] उत्साहांशः। आत्मः सप्तसमुद्रमुद्रितमहीनिर्व्याजदानावधिः उत्साहस्तदीयविभावसंग[illegible]

किं किल्ल जीवलोकस्य॥" इति तु महावीरचरिते बलवत् पठ्यम्। उदाहरणं सङ्गमयति, यथेति।—उदाहृते पद्यांशे इत्यर्थः। परशुरामस्य, त्यागे—दाने, उत्साहः—उदारभावेन चित्तप्रवृत्तिः, स्थायी भावः। अतोऽयं सम्प्रदानभूतैः—विद्याविनयार्जनादिना पात्रतां गतैः, ब्राह्मणैः, याचनविभावैः सख्याध्यवसायादिभिः,—सख्यं—सौम्यताऽऽवर्जको गुणविशेषः, तस्य अध्यवसायः—उद्रेकः, प्रतिज्ञासम्पादनार्थकः प्रत्ययः इत्यर्थः, तदादिभिः [आदिना प्ररोचनादेर्ग्रहणम्] उद्दीपनविभावैः च, विभावितः—समुद्रेकं नीतः, सर्वस्वत्यागादिभिः अनुभावैः, अनुभावितः—कार्यात्मना परिणतः, हर्षधृत्यादिभिः—हर्षधृतीत्यादिभिः, सञ्चारिभिः, पुष्टिं—आदरौचित्यं, नीतः, दानवीरतां भजते। [वस्तुतस्तु यत्र तातो दाहृतं "त्यागः सहजसुहृदुदितसहो—" इति पद्यं न रसनीयं प्रतिभासते; अत्र वाक्यार्थस्य जनहृदयसन्दनप्रशंसनपरतया व्यङ्ग्यस्य गुणीभूततया ध्वन्युदाहरणीयताऽनुपपत्तेः। एवमेव यत् केनाप्युदाहृतं "यज्ञोद्दामदिवानिशाऽऽर्थिविसरद्दानप्रवाहप्रथामाकर्ण्याविनयज्वलागतविपद्दन्दोन्द्रन्दानानात्। दूर्यानिर्भरफुल्लरोमनिकरव्याघट्टनदूयःसवत् पीयूषप्रकरैः सुरेन्द्रसुरभिः प्रावृट् पयोदायते॥" इति, तदपि तथा। यद्यपि अत्र सकलसज्जनहृदयाह्लादकत्वं, भूमण्डलालग्नविपद्दरिद्रराजकीर्त्तिभूपतिदानकीर्त्तनमुद्दीपनम्, अथःपतत्सुधाधाराऽनुभावः, दूर्यानिर्भरादिः सञ्चारी च, परिपुष्यते चैषां संयोगात् अधिगत उत्साहः, त्वयाऽपि कवेः भूपतिस्तुतिकीर्त्तनपरतया तङ्गत उत्साहो ध्वनिरूपतानप्राप्त्या गुणीभूतात्मतयैवावतिष्ठते। अतः,—"विघटितमधिकं नो यद् दिनायार्थिविते अवचनरचनीयं कुण्डले चार्पयन्ति। अजदवचनवज्रत्व द्राक् कृपाचेन नित्यं दहसि हृदयविरचारं नौमिमावेदयामि॥" इति रसवदाद्यरीयमेव पद्यमुदाहरणीयम्; ब्राह्मणविषये याचकाय दैवराताय अवचकुण्डलसमर्पणपरस्य दानवीरस्य वर्णस्य तद्दानेन विस्मयं नाटयतः सामाजिकान् प्रत्युक्तिरियम्। इह हि दृष्टस्य याचकब्राह्मणवेषधारित्वमालम्बनं, तद्दैन्य, तत्कृतं प्रशंसनं चोद्दीपनं, अवचकुण्डलयोः तुच्छत्वादानमनुभावः, "मे" इति पदेन अर्थान्तरसङ्क्रमितवाच्यात्मना समुदितो गर्वः, स्रोत्यास्रोत्रिजनकजनत्वादिधृतिश्च व्यभिचारी भावः। तत्तदर्थानुरूपयाचनपरतया धृतिरपोह नितान्तं सहृदयहृदयावर्जिका समुदयते, उत्साहपरिपोषकश्च अवचादिहसनपर्यन्तेन अनुत्साहात्मकश्च हि समर्थिका पूर्वभागे निर्विघ्नमवस्थानम्, उत्तरभागे च "नौमिमावेदयामि" इतः पूर्वं दानिनः सहजदारानुग्रहोत्साहपरिपोषाय समुद्यतत्वम्। एवं दानोत्साहोऽपि स्वामिनः पर्थिनः पुरस्तात् "नावेदयामि" इति सविनयत्वमेवावेदयतीति दिक्]।

धर्मवीरो यथा युधिष्ठिरः,—

"राज्यञ्च वसु देहश्च भार्य्या भ्रातृसुताश्च ये।
यच्च लोके ममायत्तं तद्ममाय सदोद्यतम्॥" (ङ)

युद्धवीरो यथा श्रीरामचन्द्रः,—

"भो लङ्केश्वर! दीयतां जनकजा, रामः स्वयं याचते,
कोऽयं ते मतिविभ्रमः? स्मर नयं, नाद्यापि किञ्चिन्नतम्?।
नेच्चेत्,—खरदूषणत्रिशिरसां कण्ठासृजा पङ्क्तिभिः
पत्री नेष सहिष्यते मम धनुर्ज्यावन्धबन्धुक्रतः॥" (च)

(ङ) धर्मवीरमुदाहरति, राज्यमिति।—राज्यं, वसु—धनं, देहः, भार्य्या, भ्रातरः, सुताश्च, किं बहुना, लोके—जगति, यत्—वस्तु, मम, आयत्तम्—अधीनं, तत्सर्वं, सदा, ममाय ["परस्मै" इति पाठान्तरे तु,—अन्यनिमित्तं, परोपकारार्थमिति यावत्, न तु स्वार्थनिमित्तं:] उद्यतं—निरूपितनिमित्तं:, नवेति शेषः। [अत्र युधिष्ठिरस्य वैदिकधर्मकर्मणि उत्साहः तथाविधोत्साहानुभावेनाधिक्षेप च विभावादिना आत्मादपदवीं गतः मामाजिकानां रसतया परिणमतीति बोध्यम्]।

(च) युद्धवीरमुदाहरति, भो इति।—रावणं प्रति रामस्योक्तिरियम्। भो लङ्केश्वर! जनकजा—सीता, दीयतां—प्रत्यर्प्यतां, मत्प्रभुरिति शेषः, रामः, स्वयं—साक्षात्, न तु परमुखेनेति भावः, याचते—प्रार्थयते, ते—तव, अयं मतिविभ्रमः,—मतौ—बुद्धौ, विभ्रमो—विपरीतो भ्रमः, बुद्धिविपर्य्यास: इत्यर्थः, कः?—किमर्थम? नयं—नीतिं, स्मर, सन्मार्गमवलम्बस्वेति भावः, अद्यापि, किञ्चित्—नीत्यादिकं, न गतम्?—न विनष्टम? तवेति शेषः, [गतमित्यत्र "क्षतम्" इति पाठे,—किञ्चित् दक्षादिविधानं न क्षतं, नवेति शेषः] चेत्—यदि, एवं—मया यदभिहितं तव श्रेयसे तत्, न, करोषीति शेषः, इदानीमपि नीत्यवज्ञात् मदचनं यदि न साधु मन्यसे, तर्हीति भावः, खरश्च, दूषणश्च, त्रिशिरसश्च, कण्ठासृजा—कण्ठरुधिरेण, पङ्क्तिभिः—सङ्घैः, सिक्त इत्यर्थः, धनुषः, ज्यावन्धेन—मौर्वीबन्धनेन, बन्धुक्रतः,—एकमात्रबन्धुरिव कृतः, गुणयोजित इत्यर्थः, मम, एषः, प्रभो—शरः, न सहिष्यते, त्वामिति शेषः; मम शरस्तु शीघ्रं विनाशयिष्यति तव जीवितमिति भावः। [अत्रात्मनोऽवज्ञानं परिहारोचितं, रिपुहनने तत्र 'प्रभावोपायलक्षणं भाव] । वाक्यन्यायमपश्येदं प्रयुक्तम्। अत्र रावणे वृत्ते उत्साहः प्रभावसम्भवः

दयावीरो यथा जीमूतवाहनः,—

"शिरामुखैः स्यन्दत एव रक्त-
मद्यापि देहे मम मांसमस्ति।
तृप्तिं न पश्यामि तवापि यावत्
किं भक्षणात्त्वं विरतो गरुत्मन्?॥" (ख)

एष्वपि विभावादयः पूर्वोदाहरणवदूह्याः।

अथ भयानकः,—

भयानको भयस्थायिभावः कालाधिदैवतः।
स्त्रीनीचप्रकृतिः कृष्णो मतस्तत्त्वविशारदैः॥
यस्मादुत्पद्यते भीतिस्तदत्रालम्बनं मतम्।
चेष्टा घोरतरास्तस्य भवेदुद्दीपनं पुनः।
अनुभावोऽत्र वैवर्ण्यगद्गदस्वरभाषणम्।
प्रलयस्वेदरोमाञ्चकम्पदिक्प्रेक्षणादयः॥

पितैः विभावाद्यैः आस्वाद्यमानः रसतामापद्यते इति बोद्धव्यम्। शार्दूलविक्रीडितं वृत्तम्।

(ख) दयावीरमुदाहरति, शिरामुखैरिति।—स्वदेहं भक्षयन्तं गरुडं प्रति जीमूतवाहनस्य उक्तिरियम्। हे गरुत्मन्!—गरुड! शिरामुखैः,—शिराणां—नाडीनां, मुखानि—छिद्रभागाः, तैः तद्द्वारेति यावत्, छिन्ननाड्यग्रभागैरित्यर्थः, रक्तं, स्यन्दत एव—क्षरत्येव, अद्यापि—उपचारात् साम्प्रतमपि इत्यर्थः, मम, देहे, मांसम्, अस्ति, तवापि तावत्—तव पुनरित्यर्थः, तृप्तिम्—उदरपूर्त्तिजनितं परितोषमित्यर्थः, न पश्यामि—न सम्भावयामीत्यर्थः, (तथापि) किं—कथं, त्वं, भक्षणात्—मन्मांसभक्षणव्यापारादित्यर्थः, विरतः?—निवृत्तः?। [अत्र जीमूतवाहनस्य परदुःखहरणेच्छारूपायां दयायाम् उत्साहः तत्तद्विभावानुभावसञ्चारिभिः परिपुष्टः रसतामाप्नोतीति ज्ञेयम्]। नागानन्दस्येदं पद्यम्। इन्द्रवज्रोपेन्द्रवज्रयोरुपजातिश्छन्दः।

जुगुप्साऽऽवेगसम्मोहसन्त्रासग्लानिदीनताः।
शङ्काऽपस्मारसम्भ्रान्तिमृत्य्वाद्या व्यभिचारिणः॥२३९॥(ग)

यथा,—"नष्टं वर्षवरैः" इत्यादि। (घ)

(ग) भयानकरसमाह, भयानक इति।—भयस्थायिभावः—भयमेव स्थायिभावः यस्य तादृशः, कालाधिदैवतः—कालः—यमः, अधिदैवता यस्य तथोक्तः, ("कालदेवो भयानकः" इति भरतोक्तेः) स्त्रीनीचेति।—स्त्री, नीचश्च, प्रकृतिः—नायकः, यस्य तथोक्तः, ("बालस्त्रीनीचनायकः" इति रुद्रभट्टोक्तेः एतस्य बालनायकत्वमपि बोध्यम्) कृष्णः—कृष्णवर्णः, रस इति शेषः, तत्त्वविशारदैः,—तत्त्वज्ञैः जनैः, भयानकः—तदाख्यो रसः, मतः—कीर्त्तितः। (तथोक्तं—"कृष्णश्च भयानकः" इति)। यस्मात् भीतिः—भयम्, उत्पद्यते, अत्र—रसे, तत् आलम्बनं मतं, तस्य—भयालम्बनस्य, घोरतराः—अतिभीषणाः, चेष्टाः पुनः उद्दीपनं भवेत्। अत्र—रसे, वैवर्ण्यं, गद्गदस्वरेण—अस्पष्टस्वरेण, भाषणं, प्रलयः—नष्टचित्तता, नष्टचेष्टता वा, ("प्रलयो नष्टचेष्टता" इत्यमरोक्तेः) स्वेदः—घर्मजलं, रोमाञ्चः, कम्पः, दिक्प्रेक्षणादयः—सहायान्वेषणार्थं पलायनार्थं वा इतस्ततो दृष्टिपातादयः, च अनुभावाः; जुगुप्सा—घृणा, आवेगः, सम्मोहः, सन्त्रासः, ग्लानिः, दीनता, शङ्का, अपस्मारः, सम्भ्रान्तिः—उन्मादः, मृत्युः—मरणं, तदाद्याः, [एतेन व्याधेरपि ग्रहणम्] व्यभिचारिणः—सञ्चारिभावाः, ज्ञेयाः इति शेषः। [तथोक्तं प्रदीपकृता,—"भयानके भयं स्थायी कालो देवोऽस्य सम्मतः। कृष्णो वर्णो नीचपात्रो भीम आलम्बनं मतम्॥ चेष्टा तस्योद्दीपनं स्यादनुभावो विवर्णता। गद्गदस्वरभूपातमूर्च्छाश्च प्रलयादयः॥ सन्त्रासावेगसम्मोहा व्यभिचारिण ईरिताः॥" इति]।

(घ) भयानकमुदाहरति, नष्टमिति।—अत्र वर्षवरादीनां नीचानां भयं स्थायी भावः, मन्दुरातः निर्गतो वानरवेषी अन्तःपुरप्रविष्टः विदूषकः आलम्बनविभावः, तस्य उल्लम्फनादिव्यापाराः उद्दीपनानि, त्रासादयो व्यभिचारिणः, अनुभावाश्च पलायनादयः, एतैरास्वाद्यमानः सामाजिकानां रसतामापद्यते इति बोध्यम्। स्त्रीप्रधानोदाहरणं दृश्यते यथा रत्नावल्यां १०९ पृष्ठे,—"इदं मघोनः कुलिशं धारासन्निहिताननम्। स्मरणं यस्य दैत्यस्त्रीगर्भपाताय कल्पते॥" इति। रुद्रोक्तबालकनायको यथा,—"घोरमम्भोधरध्वानं निशम्य व्रजबालकाः। मातुरङ्के निलीयन्ते सकम्पविकृतस्वराः॥" इति।

अथ बी

जुगुप्सास्थायिभावस्तु बीभत्सः कथ्यते रसः।
नीलवर्णो महाकालदैवतोऽयमुदाहृतः॥
दुर्गन्धमांसरुधिरमेदांस्यालम्बनं मतम्।
तत्रैव कृमिपाताद्यमुद्दीपनमुदाहृतम्॥
निष्ठीवनास्यवलननेत्रसङ्कोचनादयः। (ङ)
अनुभावास्तत्र मतास्तथा स्युर्व्यभिचारिणः॥
मोहोऽपस्मार आवेगो व्याधिश्च मरणादयः॥२४०॥

यथा,—

"उत्कृत्योत्कृत्य कर्त्तिं प्रथममथ पृथूच्छ्रोथभूयांसि मांसा-
न्यस्थिक्रूष्टपिण्डाद्यवयवसुलभान्यूरुपृष्ठीर्न जघ्वा।
आत्तैः पर्य्यस्तनेत्रैः प्रकटितदशनैः प्रेतरङ्गैः कबन्धात्
अङ्गस्थादांस्यसंख्यं स्रपुटगतमपि क्रव्यमव्यग्रमात्त॥" (च)

(ङ) बीभत्सरसमाह. जुगुप्सेति।—जुगुप्सा—घृणा, स्थायिभावः यस्य तादृशः, रसः बीभत्सः कथ्यते; अथ—रसः, नीलवर्णः, तथा महाकालो दैवतं यस्य तथोक्तः, उदाहृतः—उक्तः, ("नीलवर्णस्तु बीभत्सः" "बीभत्सस्य महाकालः" इति च भरतः,) दुर्गन्धमांसानि, रुधिराणि, मेदांसि च आलम्बनं मतम; तत्र—दुर्गन्धमांसादिषु, एव कृमिपाताद्यम उद्दीपनम, उदाहृतं—कथितम; निष्ठीवनं—थूत्कारः, आस्यवलनं—मुखसंवरणम। आदि शब्दात्। [तथोक्तं सुश्रुते।—"अभक्ष्यभक्षणैश्च मनुष्यस्यर्द्धोपघातैश्च। उद्वेजनैश्च बहुभिर्बीभत्सरसः समुद्भवति॥ मुखनेत्रावयवानां सङ्कोचनया मांसाप्रच्छादनावनमिताक्षैः। अव्यक्तपादपतनैर्नीलः कृष्णमभिनेतव्यः॥" इति]।

(च) उदाहरति, उत्कृत्योत्कृत्य।—प्रथमे अथ सुश्रुतं प्रेतं दृष्ट्वा माधवस्योक्तिरियम। प्रेतरङ्गैः—प्रेतगणैः, प्रथमं, अथ—पश्चात्, उत्कृत्य उत्कृत्य—पुनः पुनः छित्वा, पक्षीत्यनेनान्वयः। आत्त—भक्षितं, पृथुना—महता, उच्छ्रोथेन—स्फीततया, भूयांसि—प्रचुराणि, मांसानि—क्रव्यानि, स्थिरं—निश्चलं, पृष्ठपिण्डादयश्च अवयवा

अथाद्भुतः,—

अद्भुतो विस्मयस्थायिभावो गन्धर्वदेवतः।
पीतवर्णो वस्तु लोकातिगमालम्बनं मतम्।
गुणानां तस्य महिमा भवेदुद्दीपनं पुनः॥ (छ)
स्तम्भः स्वेदोऽथ रोमाञ्चगद्गदस्वरसम्भ्रमाः।
तथा नेत्रविकासाद्या अनुभावाः प्रकीर्त्तिताः॥
वितर्कोऽऽवेगसम्भ्रान्तिहर्षाद्या व्यभिचारिणः॥२४१॥

[आदिना ऊर्णादेः परिग्रहः] तेषु अंसावयवेषु, सुखमानि—सुखेन खाद्यानि, खण्डपूतीनि—उत्कटदुर्गन्धीनि, मांसानि, अनुभ्वा—अभक्षयित्वा, क्षितः इति शेषः, अथापि आर्त्तः—दुःखितः, क्षुधया पीडित इति यावत्, ["अलः" इति पाठे—अलः—अत्यर्थेऽव्ययम्] अत एव पर्य्यले—इतस्ततः, पतिते, नेत्रे यस्य तादृशः, (कस्मिंश्चिच्च नेत्रयोरिति भयात्पर्य्यस्तनेत्रत्वम्) तथा प्रकटिताः—आविष्कृताः, दशनाः—दन्ताः, येन तथोक्तः सन्, अकथ्यात्—अत्यन्तनिन्दितात्, करकात्—अस्थिशेषात्, अवात् निरोभागाद्वा, ("करङ्कोऽस्थ्नि शिरोभागे" "करङ्कः प्रेतशरीरम्" "करङ्को मस्तके" इति च मेदिनी) अस्थिसंघम—अस्थिसमूहम्, अत्र च अपूतिगत—विकट-नरीरभागस्थितं, यन्मिश्रितमिति यावत्, अपि, क्रव्यं—मांसम्, अव्यय—नि अक्षं यथा तथा, अपि—भक्षयति। क्रमेण भक्षणादव्ययतया भक्षणक्रमो दार्शतः। [अत्र तथा-विधभक्षणप्रेक्षी आश्रयणविभावौ, पूतिमन्मांसादीनि उद्दीपनविभावाः, तद्दर्शिभिः आत्मोपलब्धाः निर्वेदादयः अनुभावाः, औग्र्यादयः व्यभिचारिणो यथायथं ज्ञेयाः। एतैरभिव्यक्तः साधारणः जुगुप्साऽपस्मारविभावः बीभत्सो रसः सहृदयानां रसतया परिणमति]। नागरसोमाधवस्येदं पद्यम्। आर्द्धमविकोक्तं ज्ञेयम्।

(छ) अद्भुतरसमाह. अद्भुत इति।—विस्मयः स्थायी भावो यस्य तादृशः, गन्धर्वदेवतः—गन्धर्वौ देवतं यस्य तथोक्तः, (भरतस्तु "अद्भुतो ब्रह्मदैवतः" इत्याह) तथा पीतवर्णो रसः, अद्भुतः, (तथोक्तं,—"पीतश्चैवाद्भुत स्मृतः" इति) लोकातिगं—लोकातिगमिति, अलौकिकमिति यावत्, वस्तु, अत्र आलम्बनं मतम्; तस्य—अद्भुतालम्बनस्य, गुणानां महिमा पुनः उद्दीपनं भवेत्। अन्यत् स्पष्टम्।

यथा,—

दोर्दण्डाञ्चितचन्द्रशेखरधनुर्दण्डावभङ्गोद्यतः
टङ्कारध्वनिरार्यबालचरितप्रस्तावनाडिण्डिमः।
द्राक्पर्य्यस्तकपालसम्पुटमिलद्ब्रह्माण्डभाण्डोदर-
भ्राम्यत्पिण्डततण्डिमा कथमहो! नाद्यापि विश्राम्यति?॥ (ज)

अथ शान्तः,—

शान्तः शमस्थायिभाव उत्तमप्रकृतिर्मतः।
कुन्देन्दुसुन्दरच्छायः श्रीनारायणदैवतः॥
अनित्यत्वादिनाऽशेषवस्तुनिःसारता तु या।
परमात्मस्वरूपं वा तस्यालम्बनमिष्यते॥
पुण्याश्रमहरिक्षेत्रतीर्थरम्यवनादयः।
महापुरुषसङ्गाद्यास्तस्योद्दीपनरूपिणः॥

(ज) उदाहरति, दोर्दण्डेति —हरधनुर्भङ्गध्वनिमाकर्ण्य विस्मितस्य जामदग्न्यस्योक्तिरियम्। दोर्दण्डाभ्यां—बाहुदण्डाभ्याम्, अञ्चितः—आक्रान्तः, यः चन्द्रशेखरश्च—हरश्च, धनुर्दण्डः, तस्य अवभङ्गात्—खण्डनात्, उद्यतः—उद्युक्तः, आर्यस्य—रामस्य इत्यर्थः, बालचरितप्रस्तावनायां,—बालस्य—बाल्यस्य, चरितानि, तदानीमनानीति यावत्, तेषां प्रस्तावना—कीर्त्तनारम्भः, तत्र, डिण्डिमः—वाद्यविशेषखरूप इत्यर्थः, टङ्कारध्वनिः, द्राक्—झटिति, पर्य्यस्तेन—पतितेन, कपालसम्पुटेन—विधानपालविशेषेणेत्यर्थः, मिलत—सङ्गच्छमान, यत ब्रह्माण्डमेव भाण्डं—पात्रविशेषः, तुटच्छब्दोत्पत्यर्थः, तस्य उदरे—अभ्यन्तरे, भ्राम्यन्, अत एव पिण्डिततः—एकत्र विस्तृतः, बहुलीभूत इत्यर्थः, [अवाचाञ्चन्मुखज्वालीजघने जायमानः ग्रन्थो बहुलो भवतीत्यभिप्रायेणेदमुक्तम्] पण्डिमा—पण्डत्व यस्य तथोक्तः सन्, अयम अद्यापि—इदानीमपि, उपचारात् अतीतबहुकाले धनुर्भङ्गेऽपीति भावः, न विश्राम्यति इति अहो!—आश्चर्यम्। [अत्र धनुष्टङ्कारः बालत्वम्, तस्यातिदीर्घत्वादिलम्बोदरत्वम्, तत्तदुचितानुभावः, यथामूलमाचिख्यासव्यभिचारिणः, एतैरभिव्यक्तः करुणरस विषयः सामाजिकानां रसतामेतीति बोध्यम्]। महावीरचरितस्येदं पद्यम्। भार्गवविक्रीडितं वृत्तम्।

रौमाद्याद्यानुभावास्तथा स्युर्व्यभिचारिणः।
निर्वेदहर्षस्मरणमतिभूतदयाऽऽदयः ॥२४२॥ (मृ)

(मृ) आलम्बनादि, आलम्ब इति।—अत्र:—विभावव्याख्यायां स्वात्मानुभवे सत्यवलम्बनविभावविज्ञानस्य आनन्दविशेषः, स एव आविर्भावः यस्य तथोक्तः, उत्तमा, प्रकृतिः—सत्त्वम्, यस्य तादृशः, कृष्णः—कृष्णविशेषः, इन्दुवन्द्रव, तद्वत् सुन्दरी, छाया—आत्मिर्यस्य तथाभूतः, कुन्दवर्णः, चन्द्रवर्णो वेत्यर्थः, रौमारामणो देवतं यस्य तथाविधः रसः, आत्मा। चित्तत्वादिना—चित्तरत्वादिना, अवैद्यार्थो—ज्ञस्वादीनां, चक्षूनां यदादीनां, विषयाणामित्यर्थः, या निःसारता—सारत्वादित्यं, परमात्मस्वरूपं या, तस्य—आत्मनः, ज्ञानस्यानिमित्ते। रौमाद्याद्याः [इत्यादिपदेन हर्षाऽऽदीनां ग्रहणम्] अनुभावाः, तथा, निर्वेदः—वैराग्यं, तदाद्याः अभिचारिणः स्युः। अन्यत् स्पष्टम्। [अनेन रौद्रं,—अत्र निर्वेदः आविर्भावः, तत्रापि परमानन्दैकतमेशात्मकत्वं, निर्वेदस्य व्यभिचारित्वेन आविर्भावोनात्, प्रकृत आविर्भावानुभूयमानत्वात् तत्प्रकृता तदुपेक्षितम्। तदेव विभजोक्तियते; तथाहि,—सत्त्वम्: आत्मा रजो लक्षणः, प्रकृत विभावत्वेन तस्य सुखदुःखहेतुत्वेन यत्नात्, न चात्र निर्वेदः आर्यीति वक्तुं युक्तं, तस्य विषयेषु पर्यन्तिरूपत्वात्, आत्मावलम्बनत्वात्। न चैवम्: अनीऽपि सकलानां विषयाणां परित्यागोत्तरं आत्मानन्दस्य स्वात्मविषयकानन्दस्यानित्यत्वात्; (तथाऽभिहितमनिषुक्तैः,—"यत्र आत्मसुखं लोके यत्र दिव्यं महत् सुखम्। तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम्॥" इति) नन्वेवं आदौतत्व सत्यत्वस्यरत्व. स्यादिभावः इति चेत्? सदपि एतेनैव निरस्तम्; निर्वेदस्य अभावाभिन्नतया आविर्भावानुपपत्तेः, एवञ्च "निर्वेदस्यादिभावोऽपि आत्मोऽपि नवमो रसः" इति नन्वष्टौत्यनेन अदत्तम् इत्यादुः; आविरभावानुभवैक्यपक्षपातात्। नन्वष्टसंख्यानुपपत्तिस्तु न मम एतत्व आर्यीति वक्तुं युक्तम्. तत्त्वप्रामाण्यमूलं निर्वेदमवलम्ब्य अनादेः आदुर्भावमात्रितया अनन्यादि तत्त्वत्वेन निर्वेदस्यैव तद्वलम्बनत्वेन आविर्भावात्, विषयेषु पर्यन्तिरूपत्वस्य आत्मावलम्बनत्वस्य वा निर्वेदस्य मोक्षस्येव समाधेयत्वेन च; नापि "क्रोधस्वभावः" इति भरतसूत्रेः विरोधापत्तिः, "अस्यतेऽज्ञात्" इति व्युत्पत्त्यनुसारेण एतस्यापि निर्वेदव्यभिचारित्वोपपत्तात्। "तृष्णाक्षयसुखस्यैते" इत्यत्र च तृष्णाक्षयशब्दस्यापि "तृष्णाया: क्षयोऽज्ञात्" इति व्युत्पत्त्यनुसारेण निर्वेदव्यभिचारित्वोपपत्तात्। अत एवाभियुक्ताः,—"रतिः शोकश्च निर्वेदशोषोत्साहाश्च विस्मयः। क्रोधो भयं जुगुप्सा च आविर्भावाः क्रमादमी॥" इत्यादुः। एतेन "दक्षोनवरसाम्नायाः" इति सुधाकरोऽपि क्रमार्हतः;

यथा,—

"रथ्याऽम्बुसरनस्तथा धृतजरत्कन्थालवस्त्राध्वगैः
सन्नामश्च सकौतुकश्च सदयं दृष्टश्च तैर्नागरैः।
निर्व्याजोज्झितचित्तधारसमुदा निद्रायमाणश्च मे
निःशङ्कं करटः कदा करपुटीभिक्षां विधास्यति ?॥" (अ)

पुष्टिस्तु महाभारतादौ द्रष्टव्या।

तथाहि—यदौ खायिनः, यदौ खास्विजः, यथास्विश्च व्यभिचारिणः, इति सर्वेषु-नेन सङ्गच्छते स्फुटं तेषामेकोनपञ्चाशत्त्वम् इति दिक्]।

(अ) उदाहरति, रथ्येत्यादि।—कश्चित् जातनिर्वेदश्च प्राक्तनसौख्यमिदम्। करटः—नाम, ("करटो गजगण्डे स्यात्…दुर्दुरेऽपि नायते" इति मेदिनी) कदा रथ्याम्बुसरनः—रथ्यासु जलोपदेशस्थश्च पथः, तस्य चलनः, पथिजनेषु इत्यर्थः, धृतजरत्कन्थालवस्त्राध्वगैः—भिक्षार्थं भ्रमतः, तथा धृतः—गृहीतः, स्वस्मदेशे स्थापित इत्यर्थः, जरत्—जीर्णतामापन्नः, कन्थालवः—छिन्नकन्थाखण्डं, येन तथोक्तश्च, चाध्वगैः—पथि गच्छद्भिः, तैः,—पूर्व-परिचितैः, नागरैः—नगरवासिभिः, सन्नामं—शोभनप्रवेषदर्शनेन यः मानः तत्सहितं, सकौतुकम्—अनुपादेयवस्त्वाधारत्वेन यत् कौतुकं तत्सहितं, सदयं—दीनत्वेन या दया तत्सहितं यथा तथा, दृष्टश्च, मां इष्टा "चिन्तोऽयम्" इति केषाञ्चित् मतं, "किमनेन क्रियते ?" इति केषाञ्चित् दृष्टेति भावः; तथा निर्व्याजोज्झित-नाम्नादिनाशेन निष्प्रतिबन्धमुज्झितः, ["निर्वोजोज्झितः" इति पाठेऽपि बीजं—वासना, तच्छून्योज्झित इत्यर्थः] यः चित्तधारसः,—चित्—ज्ञानं, सा एव सुधा—अमृतं, तया रसः—आस्वादः, तेन या मुत्—हर्षः, तया, तत्तस्य ज्ञानामृतपानपरिवृंहितेनेत्यर्थः, आनन्देनेत्यर्थं, निद्रायमाणश्च—निद्रितसदृश्च, बाह्यविषयेभ्य इन्द्रियाणि रोधं विदधत इत्यर्थः, मे—मम, करपुटीभिक्षां—करपुटस्थितां केनचित् दत्तां भिक्षाम्, अन्नादीन् इत्यर्थः, निःशङ्कं—निर्भयं यथा तथा, ताडनभयाभावादिति भावः, विधास्यति—विधेयं करिष्यतीत्यर्थः। [अत्र तत्त्वविषयनिर्विण्णस्य परमात्मज्ञानेन, भिक्षाटनवस्तुनिःसारता-ज्ञानेन वा ज्ञानेन, तत्त्वावबोधाभिज्ञेन च उद्बोधनेन, तत्तदुचितरूपेणानुभावेन, धृतिनेन च निर्वेदादिना व्यभिचारिणा परिपुष्टः अयं ज्ञानिनां रत्यात्मा भावाभासः रत्याभास इति बोध्यम्]। प्राक्तनसौख्यञ्च पद्यमिदम्। प्राक्तनसौख्योक्तिरूपं वचनम्।

निरहङ्काररूपत्वाद्दयावीरादिरेष नो ॥२४३॥ (ट)

दयावीरादौ हि नागानन्दादौ जीमूतवाहनादेरन्तरा मलयवत्याद्यनुरागादेरन्ते च विद्याधरचक्रवर्त्तित्वाद्यासेर्दर्शनाद्दहङ्कारोपशमो न दृश्यते। शान्तस्तु सर्वाकारेणाहङ्कारप्रशमैकरूपत्वात्र तत्रान्तर्भावमर्हति। अतश्च नागानन्दादेः (ठ) शान्तरसप्रधानत्वमपास्तम्। ननु,—

"न यत्र दुःखं, न सुखं, न चिन्ता,
न द्वेषरागौ, न च काचिदिच्छा।
रसः स शान्तः कथितो मुनीन्द्रैः,
सर्वेषु भावेषु समप्रमाणः॥" (ड)

(ट) निरहङ्कारेति।—एषः—शान्तरसः, निरहङ्काररूपत्वात्—सर्वथा अहङ्काररहितत्वात्, दयावीरादिः—तद्रूपः, [आदिना धर्मवीरदेवताविषयरतिप्रभृतीनां ग्रहणम्] नो—नैव। ततश्च साहङ्कारा दया एव दयावीरादौ, यत्र तु न सेति अनयोर्भेदः; तथा चाहङ्कारसंवलितो दयाऽऽदि दयावीरादेर्घटकः, शुद्धा दया पुनः शान्तरसस्य इति सारः।

(ठ) अतश्च—दुःखप्रविश्लेषावधारणात्येत्यर्थः। नागानन्दादेः—दयावीरादिप्रधानत्वमित्यादेः। अन्यत् सुगमम्।

(ड) नेति।—यत्र—रसे, न दुःखं, न सुखं—विषयजनितसुखमित्यर्थः, न चिन्ता—स्त्रीमनोरञ्जनादिविषयिणी भावना, न द्वेषः—अनभिप्रेतनेच्छा, रिपुजनपक्षपातिनीत्यर्थः, न रागः—प्रियेष्वनुरक्तिः, सुहृदामुपकारीति यावत्, न च काचित्—काऽपि, इच्छा—कामपि विषयमवलम्ब्य वैषयिकसुखतदुपायाभिलाषः, तथा सर्वेषु भावेषु—वस्तुषु, स्त्रीरत्नाद्यादिविभावादिषु निमित्तेषु पदार्थेषु सत्सु अपि, समं—रागद्वेषरहितत्वेन अविषमं, प्रमाणं—प्रतीतिः येन सः, ["प्रमप्रधानः" इति पाठे तु "प्रम एव स्थायितया प्रधानं यत्र सः" इत्यर्थः। "प्रमः प्रधानः" इति पाठस्तु न समीचीनः, पौनरुक्त्यापत्तेः] सः—तादृशः, रसः, मुनीन्द्रैः—महर्षिभिः, शान्तः कथितः। यद्यपि हि पूर्वोक्तस्थायिभावानां अष्टानां एकतमस्यापि न शान्तत्वं विषयते, परं तेभ्यो निवृत्तिरेवा प्रतीयते, स हि शान्तो रसः, इति फलितार्थः।

इत्येवंरूपस्य शान्तस्य मोक्षावस्थायामेवात्मस्वरूपापत्तिलक्षणायां प्रादुर्भावात् तत्र सञ्चार्यादीनामभावात् (ठ) कथं रसत्वम्? इत्युच्यते,—

युक्तवियुक्तदशाया-
मवस्थितो यः शमः स एव यतः।
रसतामेति तदस्मिन्
सञ्चार्यादेः स्थितिश्च न विरुद्धा ॥ २४४ ॥ (ण)

यच्च अस्मिन् सुखाभावोऽपि उक्तस्तच्च वैषयिकसुखपरत्वाच्च विरोधः। उक्तं हि,—

"यच्च कामसुखं लोके यच्च दिव्यं महासुखम्।
तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम् ॥ (त)

(ठ) मोक्षावस्थायां—मुक्तिदशायाम्, आत्मस्वरूपापत्तिलक्षणायां—परमात्मस्वरूपत्वप्राप्तिरूपायामवस्थायामित्यर्थः, सञ्चार्यादीनां—निर्वेदादीनाम्, अभावात्—अनवस्थानात्, अस्थितेरिति यावत्।

(ण) युक्तवियुक्तदशायामिति।—युक्तः—विषयैः प्रमाद्यन् सांसारिकधर्म्ये वस्तुनि मनो निधाय वर्तमानश्चिन्तामननादिवान्, वियुक्तो मनः समाधाय परमात्मनि संयोज्य स्थितः इति यावत्, अस्य योगज धर्मसहकृतेन मनसा निष्पादितवस्तुसाक्षात्कारः जायते इत्यागमः। वियुक्तः—मूर्तान्द्रियमनो, समाधिप्रभावेण अधिमात्राः आनविद्धाः, दूरमवधावन्तीन्द्रियविद्धाः आत्मादनवान् इत्यर्थः, प्रायेण विद्धिमान् इति भावः; अस्य योगजधर्मसहकृतानि यानीन्द्रियाणि स्वे स्वे विषये मनस्त्वसन्निकर्षादिसहकारिनिरपेक्षाणि वर्तन्ते, स एव युक्तवियुक्त., तद्दशायां—तादृशावस्थायामित्यर्थः। अस्मिन्—आत्मरसे। अन्यत् स्पष्टम्।

(त) नन्वत्र प्रमदपरः सुखश्च शब्देन "न सुखम्" इत्यवक्तव्यं स्यात्? इत्याह, यच्चेति।—लोके—पृथिव्यां, यत् कामसुखं—भोगजं सुखं, यच्च दिव्यं—स्वर्गीयं, महासुखम्, एते—द्वे कामसुख-दिव्यसुखे इत्यर्थः, तृष्णाक्षयः—निस्पृहता, तेन यत् सुखं तस्य, अनसुखस्येति शेषः, षोडशीं कलाम्—अंशं, न अर्हतः।

सर्वाकारमहङ्काररहितत्वं व्रजन्ति चेत्।
अन्तर्भावमहन्ति दयावीरादयस्तदा॥" (च)

आदिशब्दात् धर्मवीर-दानवीरदेवताविषयरतिप्रभृतयः।

तत्र देवताविषया रतिर्यथा, (ट)—

"कदा वाराणस्यामिह सुरधुनीरोधसि वसन्,
वसानः कौपीनं, शिरसि निदधानोऽञ्जलिपुटम्।
अये गौरीनाथ! त्रिपुरहर! शम्भो! त्रिनयन!
प्रसीदेति क्रोशन् निमिषमिव नेष्यामि दिवसान्॥" (छ)

(च) सर्वेति।—सर्वे देहेन्द्रियादि, आकारः आत्मनो यस्य तत् सर्वाकारं—सर्वप्रकारमित्यर्थः, अहङ्कारः—अभिमानः, तद्रहितत्व—तदभावत्वं, चेत्—यदि, व्रजन्ति, दयावीरादिनायकाः इति शेषः, यदि दयावीरादिनायकाः देहेन्द्रियादिविषयकाभिमानशून्याः भवन्ति इति भावः [अभिमानस्य देहेन्द्रियेष्वहंममाकारोपः, देहादिसम्बन्धिनि पुत्रादौ ममेत्याकारोपश्च] तदा दयावीरादयोऽपि रसाः, अत्र—आन्तरसे, अन्तर्भावम्, अर्हन्ति, आन्तरसस्वरूपाः भवन्ति इति तदर्थः।

(ट) तत्रेति।—आन्तरसान्तर्भूतेषु दयावीरादिषु मध्ये, आन्तरसेऽन्तर्भूता देवताविषया रतिरित्यर्थः।

(छ) कदेति।—त्रैवोक्तविषयम्। अहं कदा इह वाराणस्यां—काशीक्षेत्रे, सुरधुनीरोधसि,—सुराणां—देवानां, धुनी—नदी, तस्या रोधः—तीरं, तस्मिंस्तथोक्ते, ("तटिनी कूलिनी धुनी" इति 'कूलं रोधश्च तीरञ्च' इति चामरः) गङ्गातीरे इत्यर्थः, वसन्, कौपीनं वसानः—परिदधानः, [अत्र कौपीनपरिधानेच्छया अहङ्कारराहित्यं प्रतीयते] तथा, शिरसि अञ्जलिपुटं निदधानः सन्, "अये गौरीनाथ! त्रिपुरहर! शम्भो! त्रिनयन! प्रसीद"—प्रसन्नो भव, इति क्रोशन्—उच्चैः स्वरेण रटन्, दिवसान् निमिषमिव, नेष्यामि—अतिवाहयिष्यामि। [अत्र कौपीनाधानलालायितया प्रसीदलालः प्रभुः वाराणसीनिवासमाहात्म्यप्रयुक्तमनोहीपितः भगवदाराधनः सर्वतो विरक्त्यावस्थानेनानुभावत्वात् दयादिव्यभिचारिसंवलितः आन्तरसेषु शान्तादिषु व्याख्यायते, यश्च चित्तस्य भगवत्परचेतनतानताऽभिधानेन भगवद्विषया रतिः चमत्क्रियते, साऽपि तत्रैव अन्तर्भूतेति बोध्यम्]। शिखरिणी वृत्तम्।

अथ मुनीन्द्रसम्मतो वत्सलः,—

वत्सलश्च रस इति तेन स दशमो मतः।
स्फुटं चमत्कारितया वत्सलञ्च रसं विदुः।
स्थायी वत्सलतास्नेहः पुत्र्याद्यालम्बनं मतम्॥
उद्दीपनानि तच्चेष्टा विद्याशौर्य्योदयाऽऽदयः।
आलिङ्गनाङ्गसंस्पर्शशिरश्चुम्बनमीक्षणम्॥
पुलकानन्दबाष्पाद्या अनुभावाः प्रकीर्त्तिताः।
सञ्चारिणोऽनिष्टशङ्काहर्षगर्वादयो मताः॥
पद्मगर्भच्छविर्वर्णो दैवतं लोकमातरः॥२४५॥ (न)

यथा,—

"यदाह धात्र्या प्रथमोदितं वचो
ययौ तदीयामवलम्ब्य चाङ्गुलीम्।
अभूच्च नम्रः प्रणिपातशिक्षया
पितुर्मुदं तेन ततान सोऽर्भकः॥" (प)

(न) अथ मुनीन्द्रमते दशमो वत्सलोऽपि रस इति तमाह, वत्सल इति। स्फुटमिति।—स्फुटं—सुव्यक्तम्, उत्कटमिति यावत्। विदुः इत्यत्र केचिदिति शेषः। अन्ये पुनरस्य भावकाव्यत्वमेवेच्छन्ति; तन्न, चमत्कारातिशययोगेन रसत्वस्यैव युक्तत्वात्। वत्सलता—प्रियता, तया सहितः स्नेहः—रतिः, स्थायी। सा च लालनपालनादीच्छा; [पुत्र्यादीत्यादिना कनिष्ठभ्रात्रादिग्रहणम्; भ्रात्रालम्बनो यथा,—"देशे देशे कलत्राणि देशे देशे च बान्धवाः। तं तु देशं न पश्यामि यत्र भ्राता सहोदरः॥" इति। अत्र श्रीरामचन्द्रस्य भ्रातृस्नेहः तादृशोक्त्यनुभावेन आस्वाद्यमानो रसतामेति। केचित् "सहोदरः" इति सहः—सङ्ग्रामसहः, अदरः—निर्भयश्च, इति व्याकुर्वन्ति; तन्मते तदुभयमुद्दीपनविभावः]। लोकमातरः—शचीत्यादयः। अन्यत् स्पष्टम्।

(प) वत्सलरसमुदाहरति, यदाहेति।—धात्र्या—उपमात्रा, प्रथमम्, उदितं—शिक्षितं, वचः—"तात! प्रणमामि" इत्यादिरूपं, यत् आह—ब्रवीति स्म,

एषान्तु रसानां परस्परविरोधमाह,—

आद्यः करुणबीभत्सरौद्रवीरभयानकैः।
भयानकेन करुणेनापि हास्यो विरोधभाक्।
करुणो हास्यशृङ्गाररसाभ्यामपि तादृशः॥
रौद्रस्तु हास्यशृङ्गारभयानकरसैरपि।
भयानकेन शान्तेन तथा वीररसः स्मृतः॥
शृङ्गारवीररौद्राख्यहास्यशान्तैर्भयानकः।
शान्तस्तु वीरशृङ्गाररौद्रहास्यभयानकैः॥
शृङ्गारेण तु बीभत्स इत्याख्याता विरोधिता॥२४६॥(क)

आद्यः,—शृङ्गारः। एषान्तु समावेशप्रकारो वक्ष्यते।

तदीयां—धात्रीसम्बन्धिनीम् अङ्गनाम्, अवलम्ब्य—आश्रित्य, यत्र यथा—यस्मिन् क्व, प्रविपाताग्रहया—"व्यसनं प्रथमाद् कार्य्यात्" इत्युपदेशेन, यत्र तत्र:—यावत-तावत्कः, अभूत, तेन—ऊनना, सः अभंक—भिन्नः, रघुः इति यावत्, पितुः—जनकस्य, दिलीपस्येत्यर्थः, मुदं—हर्षं, ततान—विस्तारयामास [अत्र दिलीपस्य खेदः पुत्रदर्शनाभावजन्य पादत्रयोन्नतदीर्घाङ्गुष्ठदर्शनादिना उद्दीपनेन यथायथमाक्षिप्तेन अनुभावादिना च आस्वाद्यमानः रसतामापद्यते। अत्र रसानां तत्तदर्थक्रियं तत्तद्देवता-ऽभिप्रायेण इति बोध्यम्। अथ यैषां मतेऽत्र भावकाश्रयं न रसत्वं, तेषां मतमाश्रयः,—"यदाह" इत्यादौ रतिरेव वासनात्मचर्वणा प्रतीयते,न तेन वत्सलरसस्य प्रतीतिः, भाव-त्वेनैव तस्य प्रतीयमानत्वात्। ननु यदि तादृशरतेरात्मा वत्सलोऽपि रसः, तर्हि परमेश्वरा-लम्बनः, दीनाद्यालम्बनभावत्वात् दयादिसञ्चारिभावकः, भागवतभारतभगवत्कीर्त्ताऽऽदि-श्रवणे भवत्यायासः, प्रत्युत्तमनुभूयमानः, भक्तिरसोऽपि रसान्तरं कथं न स्यात्? भगवती विषयप्रेमात्मिका भक्तिर्हि अत्र स्थायिभावः। न हि आत्मे चलभंक्तत्वं, विषयान्तरानस्थैर्यप्रतिकूलत्वात्, इति भक्तिरसोऽपि रसान्तरमिति कोलिखता वा शक्यम्? इति चेन्न, तथाऽङ्गीकारे सुखनुभासनादिकमे रसानां नियतसङ्ख्याधिक्य-लक्षणे समाधानाभावादिति दिक्]। रघुवंशस्य पञ्चमसर्गः। [अजविलापं इत्यन्तम्]।

(क) आद्य इति।—आद्यः—शृङ्गारः रसः, शृङ्गार इत्यर्थः। एषान्तु

कुतोऽपि कारणात् क्वापि स्थिरतामुपयन्नपि।
उन्मादादिर्न तु स्थायी न प्राप्ते स्थैर्यमेति यत् ॥२४७॥ (ब)

यथा विक्रमोर्वश्यां चतुर्थेऽङ्के पुरूरवस उन्मादः।

रसभावौ तदाभासौ भावस्य प्रशमोदयौ।
सन्धिः शबलता चेति सर्वेऽपि रसनाद्रसाः॥२४८॥ (भ)

रसनधर्मयोगित्वाद्भावादिष्वपि रसत्वमुपचारादित्यभिप्रायः। (म)

काव्यरस.। विरोधं भजते इति विरोधभाक् -विरोधीत्यर्थः, श्रोकलुप्तसामग्यवस्थेन रतेरनुभवादिति भावः। तादृशः—विरोधभागित्यर्थः। इति—इत्थं, विरोधिता—परस्परविरोधः, आम्नाता—कथिता।

(ब) ननु ग्रहणादौ उन्मादादेरपि मनसत्वात्, रत्यादिवत्, यत्र उन्मादादिः प्रतीयते, तत्रोन्मादादेरपि स्थायिभावत्वे रत्यादिष्वायिभावानां नियतत्व कथम? इत्याह, कुत इति।—कुतोऽपि—कस्मादपि कारणात्, क्वापि—कस्मिंश्चिदनिर्देश्ये, उन्मादादिः, स्थिरता—स्थायित्वम्, उपयन्नपि—लभमानोऽपि, न तु स्थायी—नैव स्थायिपदवाच्यः, यत—यस्मात्, प्राप्ते—आधारभूते नायकादौ तदभत्वावच्छिन्ने इत्यर्थः, [स्थः] स्थैर्यं—स्थिरत्वम्, अविनश्वरत्वमित्यर्थः, न एति—न प्राप्नोति; परन्तु तदपायादिति भावः, रत्यादिस्तु क्वचित् तिरोभूतत्वेन क्वचित्यनरतितिरोभूततया तिष्ठत्वेवेति एतच्च नियतस्थितिकतया स्थायित्वमेवेति सुधीभिर्विभाव्यम्।

(भ) इदानीं रसपदस्य मुख्यलक्षणायोगमुपपाद्य, रसभावादिति।—तदाभासौ—तच्च—रसश्च, भावश्च तदाभासौ, रसाभासः भावाभासश्च इत्यर्थः, भावस्य प्रशमः भावप्रशमः, भावस्य उदयः भावोदयः, सन्धिः—भावसन्धिरित्यर्थः, शबलता—भावशबलता इत्यर्थः, एते सर्वेऽपि रसनात्—आस्वादनरूपगुणयोगात्, आनन्दसंवलितज्ञानरूपत्वादित्यर्थः, रसाः—रसपदभाक्तपदाः, गौणा रसा इत्यर्थः, उच्यन्ते इति शेषः। रसो विभावादिभिरभिव्यक्तश्चिदानन्दघनत्वचमत्कारकरणतां भजते, भावादिस्तु लौकिकत्वार्थक्रियादिभिरिति विशेषो बोध्यः।

(म) उपचारादिति।—रत्यादिस्थायिभावानामभावेन मुख्यलक्षणायोगादिति भावः। ननु काम देवादिविषयकरतित्वात् कथं स्थायिभावाभावः? इति चेत्, सत्यं, श्रृङ्गारादिविषयरतेरेव स्थायित्वोपपादनात्।

भावादय उच्यन्ते,—

सञ्चारिणः प्रधानानि देवादिविषया रतिः।
उद्बुद्धमात्रः स्थायी च भाव इत्यभिधीयते ॥२४८॥(य)

"न भावहीनोऽस्ति रसो, न भावो रसवर्जितः।
परस्परकृता सिद्धिरनयोः रसभावयोः॥" (र)

इत्युक्तदिशा परमालोचनया परमविश्रान्तिस्थानेन रसेन सहैव वर्त्तमाना अपि राजानुगतविवाहप्रवृत्तभृत्यवत् आपाततो यत्र प्राधान्येनाभिव्यक्ता व्यभिचारिणः, देवमुनिगुरुनृपादिविषया च रतिः, उद्बुद्धमात्रा विभावादिभिरपरिपुष्टतया रसरूपतामनापद्यमानाश्च स्थायिनो भावा भावशब्दवाच्याः।

(य) सञ्चारिण इति।—प्रधानानि—प्रधानभूताः, आपाततः प्राधान्येन रत्याद्यपेक्षया अभिव्यक्ताः इति भावः, सञ्चारिणः—प्रागुक्ता निर्वेदादयः, तथा देवादिविषया रतिः—भक्त्यादिपदव्यपदेश्यः अनुरागः, तथा उद्बुद्धमात्रः—उद्रिक्त एव, किञ्चित् भासमानः इति यावत्, न तु विभावादिभिः परिपोषित इति भावः, स्थायी—रत्यादिः, च भाव इत्यभिधीयते। यथा विभावादिभिरभिव्यक्तो रत्यादिश्चिदानन्दचमत्काररूपत्वेन परिणतो रसतामापद्यते, तथा स्वकार्य्यकारणाभ्यामभिव्यक्तो देवादिविषयकरत्यादिः चिदानन्दस्वरूपतां न प्राप्तो भावत्वं प्राप्नोति; चमत्कारसत्त्वाऽसत्त्वाभ्यामनयोर्भेद इति भावः। यद्यपि देवादिविषयाऽपि रतिरास्वाद्यते, तथाप्यसौ न स्थायिशब्देनोच्यते, नायिकादिविषयस्य रत्यादेरेव स्थायिशब्देनाभिधातुमुचितत्वात् इति बोध्यम्।

(र) कारिकां व्याचक्षाणः सञ्चारिणां प्रधानत्वं निर्दिशति, न भावेति।—भावेन—निर्वेदाद्यन्यतमेन, हीनः—वर्जितः, रसः, नास्ति। यतो भावेभ्यः एव सामान्यगुणयोगेन रसाः प्रादुर्भवन्ति, एवं रसेन वर्जितः भावोऽपि नास्ति; तद् यथा—"योऽर्थो हृदयसंवादी तस्य भावो रसोद्भवः। शरीरं व्याप्यते तेन शुष्ककाष्ठमिवाग्निना॥" इति। इत्येवं कृत्वा अनयोः, रसभावयोः, सिद्धिः—निष्पत्तिः, परस्परकृता—परस्परसम्पादिता। भावेन रसः परिपुष्यते, रसोऽपि भावेनेति भावः। अत्र पुस्तकान्तरे "यथा मरिचकर्पूरसमीक्षाऽऽदिप्रपाणके। न पार्थक्यं भवेत् स्वादस्तथैव रसभावयोः॥" इति पाठान्तरमुपलभ्यते। अर्थस्तु स्पष्टः।

तत्र व्यभिचारी यथा,—"एवंवादिनि देवर्षौ" इत्यादि। अत्रावहित्था। (ल)

देवविषया रतिः यथा मुकुन्दमालायाम्,—

"दिवि वा भुवि वा ममास्तु वासो
नरके वा नरकान्तक! प्रकामम्।
अवधीरितशारदारविन्दौ
चरणौ ते मरणेऽपि चिन्तयामि॥" (व)

(ल) इति—एवम्, उक्तदिशा—भरताद्युक्तमार्गेण, परमया—सूक्ष्मया, आलोचनया, परमविश्रान्तिस्थानेन—स्वपरिपाकस्वरूपभूतेन, रसेन सह एव वर्त्तमाना अपि, राजानुगता विवाहप्रवृत्ता भृत्या इव—राजानुगतभृत्यस्य अप्राधान्येऽपि विवाहकाले शिबिकारोहणोन्नतासनोपवेशनादिभिः यथा तात्कालिकप्राधान्याभिव्यक्तिर्भवति, तद्वदित्यर्थः, आपाततो यत्र प्राधान्येन अभिव्यक्ता व्यभिचारिणो भावाः, तथा देव-मुनि-गुरु-नृपादिर्विषयो यस्याः सा च रतिः, [नृपादीत्यत्रादिपदेन मित्रादेर्ग्रहणम्; आदिपदात् पुत्रादेरपि ग्रहणम् इत्यन्ये, तन्न; तद्विषयकरतेर्वत्सलरसत्वेनैव ग्रन्थकृता दर्शितत्वात्] उद्बुद्धमात्रा अतः विभावादिभिरपरिपुष्टतया रसरूपतामनापद्यमानाः स्थायिनो भावा अपि भावशब्दवाच्याः इति बोध्यम्। उदाहरति, तत्रेति।—तत्र—तेषु, व्यभिचारिभावो यथा,—"एवंवादिनि देवर्षौ....." इत्यादि। अत्र शिवप्रसङ्गजातहर्षसूचकमुखरागादेर्लज्जया गोपनेन अवहित्था नाम व्यभिचारी भावः। स चाधोमुखत्वव्यङ्ग्यलज्जया कारणेन लीलाकमलपत्रगणनारूपव्यापारान्तरप्रसङ्गेन च प्राधान्येन झटिति अभिव्यक्तः भावशब्दवाच्यत्वं गाहते इति। पुस्तकान्तरे तु "स्मरत्यगस्तिं पथिकः प्रपापाल्यञ्जलिं स्पृशन्। साऽपि स्मरति वामाक्षी भजते सप्त वारिधीन्॥" अत्र परस्परानुरागलक्षणाया रतेरुद्बोधमात्रम्, इति पाठान्तरमुपलभ्यते।

(व) देवविषयिणीं रतिमुदाहरति, दिवीति।—हे नरकान्तक!—नरकासुरनिसूदन! कृष्ण! दिवि—स्वर्गे वा, भुवि—पृथिव्यां वा, नरके वा, मम प्रकामं—सम्यक्, वासः—स्थितिः, अस्तु—भवतु। तत्र नैव मे क्षतिरिति भावः; कथम्? इत्याशंसायामाह, अवेति।—मरणे—मृत्युकालेऽपि, अवधीरितम्—अवज्ञातं, शारदारविन्दं—शरत्कालीनकमलं, याभ्यां तादृशौ, ते—तव, चरणौ, चिन्तयामि—ध्यायामि। अत्र वः श्रीकृष्णभक्तिरूपा रतिः। वैतालीयं वृत्तम्।

मुनिविषया रतिर्यथा,—

"विलोकनेनैव तवामुना मुने !
कृतः कृतार्थोऽस्मि निरर्हितांहसा ।
तथापि शुश्रूषुरहं गरीयसी-
र्गिरोऽथवा श्रेयसि केन तप्यते ? ॥" (ग)

राजविषया रतिर्यथा मम,—

"त्वदाजिराजिनिधूतधूलीपटलपङ्क्तिलाम् ।
न धत्ते शिरसा गङ्गां भूरिभारभिया हरः ॥" (घ)

एवमन्यत्र । (ङ)

(ग) मुनिविषयिणीं रतिमुदाहरति विलोकनेनेति ।—नारदं प्रति श्रीकृष्ण उक्तिरियम् । हे मुने ! तव निरर्हितं—निराकृतम्, अंहः—पापं, येन तादृशेन, विनाग्नितपोपनेयत्वं:, अमुना विलोकनेन—दर्शनेन, एव कृतार्थः—विहतमनोरथः, कृतः अस्मि । तथापि—विलोकनेन कृतार्थत्वेऽपीत्यर्थः, अहं गरीयसी:—गुर्वर्थ-प्रतिपादिकाः, गिरः—वाचः, शुश्रूषुः—श्रोतुमिच्छुः ; अथवा—किंवा, केन—जनेन, श्रेयसि—कल्याणे, तप्यते ? न केनापीत्यर्थः । यद्वा,—अत्र प्रश्ने, श्रेयसि केन वा तप्यते ? अत्र श्रीकृष्ण मुनिविषयिणी रतिः प्रतीयते । शिशुपालवधस्थेदं पद्यम् । वंशस्थविलं वृत्तम् ।

(घ) राजविषयिणीं रतिमुदाहरति, त्वदिति ।—कश्चित् राजानं प्रति कस्य-चिदुक्तिरियम् । हे राजन् ! हरः—शिवः, भूरिभारभिया—अत्यधिकभारजनितत्रासेन हेतुना, शिरसा तव वाजिराजिभिः—अश्वसमूहैः, निर्धूतैः—क्षिप्तैः, धूलीपटलैः—रजोराशिभिः, पङ्क्तिलां—सञ्जातपङ्कां, तां तथाविधां गङ्गां, न धत्ते—न धारयति । अत एव जनत्यविलोकरक्षार्थमाजिरं तां जलटाजूटतः परिमुञ्चतीति भावः । अत्र कश्चित् स्तुतिपाठकस्य निश्चितरूपेण प्रस्तुतरागं उत्प्रेक्षणीयरूपा रतिः ।

(ङ) एवमिति ।—एवं—निरुक्तप्रकारेण, अन्यत्र—गुर्वादौ, अपि रतिरन्येषा इति शेषः । तत्र गुरुविषया रतिः यथा,—"अस्त्रीत्रमहत्तरः क्रतुमुखानलत्रायमाणो रविर्यज्ञानो वयमत्र ते भगवती भूरत्र राजन्वती । अत्र त्वं बहुमन्यते तदपरे-ष्वाभिराखण्डलो येनैतावदकल्मतोपतिरपि खेनाऽनुगच्छाति नः ॥" इति । अत्र ब्रह्मरथस्थे यज्ञिष्ठे गुरौ रतिः । विष्णोरपि गुरुत्वात् तद्विषया रतिः यथा,—"लोकस्तु

उद्बुद्धमात्रस्थायिभावो यथा,—

"हरस्तु किञ्चित्परिवृत्तधैर्य्यश्चन्द्रोदयारम्भ इवाम्बुराशिः ।
उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि॥" (ह)

अत्र पार्वतीविषया भगवतो रतिः । (क)

ननूक्तं "प्रपाणकरसवद्विभावादीनामेकोऽवभासो रस इति" तत्र सञ्चारिणः पार्थक्याभावात् कथं प्राधान्येनाभिव्यक्तिः ? इत्युच्यते,—

यथा मरीचखण्डादेरेकीभावे प्रपाणके ।
उद्रेकः कस्यचित् क्वापि तथा सञ्चारिणो रसे ॥२५०॥(ख)

तातपादेषु नवे दारपरिग्रहे । मातृभिश्चिन्त्यमानानां ते हि नो दिवसा गताः ॥" अत्र श्रीरामस्य पित्रोः रतिः । मित्रे रतिर्यथा,—"अद्य राज्यं मया प्राप्तमद्य वाली हतो मया । हरीणामद्य पूज्योऽस्मि यद्भवान् मित्रतां गतः ॥" अत्र सुग्रीवस्य श्रीरामे मित्रे रतिः ।

(ह) नायिकाऽऽलम्बनाया अपि रतेर्विभावादिभिरपरिपुष्टत्वे उद्बुद्धमात्रस्थायिभावमुदाहरति, हर इति ।—हरस्तु, चन्द्रोदयारम्भे—चन्द्रोदयोपक्रमे, अम्बुराशिः—समुद्र इव, किञ्चित्—ईषत्, परिवृत्तं—विचलितं, धैर्य्यं यस्य तथोक्तः, ईषद्विचलितधैर्य्यः सन्, बिम्बफलवत् अधरोष्ठौ यत्र तादृशे, उमामुखे, विलोचनानि—नेत्राणि, व्यापारयामास—साभिलाषमद्राक्षीदिति भावः । इन्द्रवज्रोपेन्द्रवज्रयोरुपजातिः वृत्तम् । अत्र पार्वतीविषया भगवतो रतिः स्थायिभावः अनुभावादिभिरपरिपुष्टतया रसतामप्राप्य स्थितः, इत्यस्य उद्बुद्धमात्रत्वम् ; वस्तुतस्तु अत्र रतिः पार्वतीमुखविलोकनरूपेणानुभावेन, अधरोष्ठयोर्बिम्बफलसाम्यकथनरूपेण उद्दीपनविभावेन, समाक्षिप्तेन च वसन्तोदयेन लज्जाऽऽदिना च व्यभिचारिणा परिपोषिता रसतामेतीति बोध्यम् ।

(क) अत्रेति ।—उमामुखावलोकनरूपानुभावमात्रेण व्यक्ता रतिः, उद्दीपनविभावादिकृतपरिपोषराहित्येन रसतां नापद्यते इति भावव्यपदेश एवास्योचितः इति भावः ।

(ख) यथेति ।—यथा मरीचखण्डादेः एकीभावे—मिश्रणेऽपि, प्रपाणके—पानीयद्रव्यविशेषे, कस्यचित्—वस्तुनः, क्वापि—कदापि, उद्रेकः—स्फुरणं भवतीति

अथ रसाभासभावाभासौ,—

अनौचित्यप्रवृत्तत्त्वे आभासो रसभावयोः ॥२५१॥(ग)

अनौचित्यञ्च अत्र रसानां भरतादिप्रणीतलक्षणानां सामग्रीरहितत्वे सत्येकदेशयोगित्वोपलक्षणपरं बोध्यम्; तच्च बालव्युत्पत्तये एकदेशतो दर्श्यते, (घ)—

उपनायकसंस्थायां मुनिगुरुपत्नीगतायाञ्च।
बहुनायकविषयायां रतौ तथाऽनुभयनिष्ठायाम्॥
प्रतिनायकनिष्ठत्वे तद्वदधमपात्रतिर्य्यगादिगते।
शृङ्गारेऽनौचित्यं रौद्रे गुर्वादिगतकोपे॥
शान्ते च हीननिष्ठे गुर्वाद्यालम्बने हास्ये।
ब्रह्मवधाद्युत्साहेऽधमपात्रगते तथा वीरे॥
उत्तमपात्रगतत्वे भयानके ज्ञेयमेवमन्यत्र ॥२५२॥ (ङ)

शेषः, तथा—तद्वत्, क्वापि—कस्मिंश्चित् रसे, कस्यचित् सञ्चारिणः, उद्रेकः भवति इति शेषः, अतः सञ्चारिणः प्रधानानीत्युक्तं ज्ञेयम्।

(ग) रसभावयोराभासावाह, अनौचित्येति।—रसभावयोः अनौचित्यप्रवृत्तत्वे—अनुचितभावेन वर्त्तमानत्वे, आभासः—रसाभासः, भावाभासश्च इत्यर्थः।

(घ) अथ रसानामनौचित्यमाह, अनौचित्यञ्चेति।—अनौचित्यपदञ्चेत्यर्थः, अत्र—रसभावयोः। भरतादीति।—भरतादिभिः आचार्य्यैः, प्रणीतानि—लक्षितानि, लक्षणानि—स्वरूपाणि, येषां तथाभूतानां, रसानां [बहुवचनमादिवाचकम्, तेन शृङ्गारादीनां निर्वेदादीनां चेत्यर्थः] सामग्रीरहितत्वे,—सामग्री—कारणकूटः, तद्रहितत्वे—तदभावे, विभावादिरूपकारणासत्त्वे सति इत्यर्थः, एकदेशयोगित्वोपलक्षणपरम्,—एकदेशयोगित्वं—यत्किञ्चिल्लक्षणसम्बन्धः, तदुपलक्षणं—तत्प्रत्यायनं, तत्परं—तत्तात्पर्य्यकं, कियदंशे तल्लक्षणयोगः, कियदंशे च तल्लक्षणायोगः इति यतः प्रतिपत्तिः स्यात् तथाभूतमिति यावत्। तच्च—अनौचित्यञ्चेत्यर्थः, बालव्युत्पत्तये—बालानाम् अज्ञानां, व्युत्पत्तये—बोधाय, एकदेशतः—एकांशेन, दर्श्यते—प्रदर्श्यते।

(ङ) एकदेशं दर्शयति, उपनायकेति।—शृङ्गारे—शृङ्गाररसे, रतौ उप-

नायकः तत्र सन्तिष्ठतीति तथाभूतायां, च—तथा, गुरवश्चेलेखां परस्त्रियः—प्रमदाः, तत्र गतायां—तन्निष्ठायां, बहवो नायकाः विषया: यस्यास्तथाभूतायां, तथा न उभयनिष्ठा—नायिकागतत्वेन नायकगतत्वेन, नायकगतत्वे नायिकागतत्वाभावेन च, नायिकानायकानुभयगतत्वात्, तथाभूतायां सख्यां, तथा प्रकारे, प्रतिनायकः—नायकप्रतिपक्षो, तन्निष्ठत्वे, तदन्त अधमपात्रम्—अवत्कृष्टजातिनायकः, तथा तिर्यगादि—पशुपक्षिप्रभृति, तद्गते—तन्निष्ठत्वे सति, (तिर्यगादीनां नायकत्वयोग्यत्वाभावादिति भावः) अनौचित्यं बोध्यमिति शेषः । [अत एव तर्कवागीशा अप्याहुः,—"प्रकारे दक्षिणादाश्च नायकाः" इत्यमरम् । नायकत्वयोग्ये "कुलीनः" इत्यनेन उत्कृष्टजातित्वम् । "शीलवान्" इत्यनेन सद्वृत्तत्वञ्च नायकस्य लभ्यते । "नायकलक्षणमेवंभवति यत्सम्भवेदुक्ता" इत्यनेन नायिकायाश्च सद्वृत्तं लभ्यते; नायकस्य निषिद्धयाविलक्षणे, नायिकायाश्च निषिद्धपुरुषसङ्गमे सद्वृत्तं न भवतीति तद्विषयप्रकारश्च यथोत्तरनायकाभावादेकदेशयोगित्वम् । निषिद्धयोषित उक्ता: प्रकारतिलके,—"सम्बन्धिमित्रदिग्रागतकौलवर्याधिकानां प्रमदा न गम्याः । अप्राप्तया प्रार्थिता विभिन्नसन्धाय वर्णार्थमनोभवद्भिः ॥" इति । एवं योषितामपि सम्बन्धादयः पुरुषाः निषिद्धाः । [एवञ्च मुनिगुरुपत्नीगतायां चेति चकारेण सम्बन्धादिपरो बोध्यः । "उपनायकसंज्ञायाम्" इत्यत्र सम्बन्ध्याद्यन्यतम उपनायको बोध्यः । अन्यथा "बहुनायकविषयायाम्" इति "प्रतिनायकनिष्ठत्वे" इति च व्यर्थं स्यात्] । बहुनायकेति ।—सम्बन्ध्यादिभिन्ना अपि बहुनायका निषिद्धाः इति भावः । अनुभयनिष्ठायामिति ।—"विभिन्नसन्धाय" इत्यनेन अन्यतरस्यां सतौ निषिद्धत्वादिति भावः । नायकस्य प्रतिपक्षः प्रतिनायकः । अत्र सम्बन्ध्यादिभिन्नत्वेनानिषिद्धेऽपि भर्तुरनभिमताचरणेनासद्वृत्तं नायिकाया इति भावः । इति] तथा रौद्रे रसे, गुर्वादिगतक्रोधे—गुरुजनप्रवर्तितक्रोधे सति, अनौचित्यं बोध्यमिति भावः । "क्रोधात्मको भवेद्रौद्रः प्रतिशत्रोरसंयतः । कृत्यप्रायो भवेदत्र नायकोऽस्यविषयः ॥" इत्यभियुक्तोक्त्या रौद्रे प्रतिशत्रुगतिक्रोधः, न तु गुर्वादिगतिक्रोधः, नायके युक्त इति भावः । शान्ते रसे, क्षीणनिष्ठे—निवृत्तव्यभिचारिणि सति, "उत्तमप्रकृतिप्रायः" इति मुनिदर्शितसञ्चारिपरित्यागात् "गतेच्छो नायकगत तमोरागपरिक्षयात्" इत्युक्तनायकत्वयोग्यत्वाभावात्, अनौचित्यं शेषमिति भावः । व्याजे रसे, गुर्वाद्यालम्बने—गुर्वादिरूपे आलम्बने सति, अनौचित्यमित्यर्थः, गुर्वादीनां व्याजालम्बनत्वेऽपि नायके, अवगतानां तान् पतितो भवतीत्यनौचित्यमिति हृदयम् ; (अत एवोक्तम्,—"न कुर्वीत, न प्रतिवदेत्, न पृष्ठं दूषयेत्, नीचैरासीत" इत्यादि)। तथा वीरे—उत्साहप्रधानिके

तत्र रतेरुपनायकनिष्ठत्वे यथा मम,—

"स्वामी मुग्धतरो, वनं घनमिदं, बालाऽहमेकाकिनी,
स्त्रीणामावृणुते तमालनलिनच्छाया तमःसन्ततिः।
तन्मे सुन्दर! मुञ्च कृष्ण! महमा वर्त्मेति गोप्या गिरः,
श्रुत्वा तां परिरभ्य मन्मथकलाऽऽलापी हरिः पातु वः॥" (च)

रसे, ब्रह्मवधादयस्त्वाहे—ब्रह्मवधादिषु उत्साहस्यास्मिन् वतीत्यर्थः, तेषां वेदविरुद्धतया वहिष्यक्षीत्याहवतः नायकत्वं न सम्भवतीत्यनौचित्यमित्यर्थः, तथा अधमपात्रगते, उत्साहे सति इति शेषः, अनौचित्यमिति भावः। "उत्तमप्रकृतिवीरः·····" इति पूर्वोक्तन्यायापत्तेः "उत्साहाध्यवसायादविषादित्वादिविषयान्मोहात्। विविधादर्थविशेषादीररसो नाम सम्भवति॥ स्थितिधैर्यौचित्यगर्वोत्साहपरानन्दमयभावेषु। वाक्येषाक्षेपक्षतेः·····" इत्युक्तगुणयुक्तत्वापत्तेश्च न तथाविधे उत्साहे वीरस्य स्वरूपसत्त्वमिति निष्कर्षः। तथा भयानके रसे, भयस्य उत्तमपात्रगतत्वे सति "स्त्रीनीचप्रकृतिः" इत्यनेन स्त्रीनीचादिनायकत्वमेव उचितमिति अनौचित्यं ज्ञेयम्। एवं—निरूपणप्रकारेण, अन्यत्र—रसान्तरे, ज्ञेयम्। यत् यत् औचित्यादन्यत् प्रतीयेत, तत्सर्वमनौचित्यं स्वयं विवेचकैरिहेत्यमिति भावः। तद् यथा,—अदेवतपात्रगते क्रुद्धे, तत्त्वप्रगते बीभत्से, विशेषदर्शितपात्रगते जुगुप्सिते, अपकार्य्यालम्बने वत्सले अनौचित्यं ज्ञेयम् इति सङ्क्षेपः।

(च) स्वामीति।—हे कृष्ण! स्वामी—पतिः, मनीति शेषः, मुग्धतरः—अतिमूढः, [एतेनास्य सुरतानभिज्ञत्वं, विलम्बे कोपावेशात् प्रहारशीलत्वञ्च ध्वनितम्] इदं वनं, घनं—निबिडम्, [एतेन तस्य भयङ्करत्वं, निबिडतया जनदर्शनाभावेन सुरतयोग्यस्थानरूपत्वप्रत्यायनञ्च सूचितम्] अहम् एकाकिनी बाला [एतेन गमने विभेमीति, मया सह स्वच्छन्दं रमस्व इति च सूच्यते] तमालवत् मलिना छाया—कान्तिर्यस्याः तादृशी, तमसां—तिमिराणां, सन्ततिः—समूहः, द्यौः—पृथिवीम्, आवृणुते—आच्छादयति, [एतेन गमनसहाय्यप्रार्थनं, क्रोड्यावां न पश्येदिति च सूचितम्] तत् हे सुन्दर!—मनोहर! [एतेन पथि परित्यागाय स्तवः, त्वां परित्यज्य नाहं गन्तुं शक्नोमि, त्वं मे मनो हृतवानिति च सूचितम्] मे—मम, वर्त्म—पन्थानं, मुञ्च—त्यज, [एतेन राजमार्गे, परनारीस्पर्शाभावरूपसदाचारश्च सूचित इति ध्वनितम्] इति—इत्थं, गोप्याः—गोपनार्य्याः, गिरः—वाचः, श्रुत्वा, तां—गोपीं, सहसा—सद्यः, परिरभ्य—आश्लिष्य, मन्मथकलायां—कामव्यापारे, आलापः, हरिः—

बहुनायकनिष्ठत्वे यथा,—

"कान्तास्त एव भुवनत्रितयेऽपि मन्ये
येषां कृते सुतनु ! पाण्डुरयं कपोलः ॥" (छ)

अनुभयनिष्ठत्वे यथा—मालतीमाधवे नन्दनस्य मालत्याम्। "पश्चादुभयनिष्ठत्वेऽपि प्रथममेकनिष्ठत्वे रतेराभासत्वम्" इति श्रीमल्लोचनकाराः।

तत्रोदाहरणं यथा—रत्नावल्यां सागरिकाया अन्योन्यसन्दर्शनात् प्राक् वत्सराजे रतिः।

प्रतिनायकनिष्ठत्वे यथा—हयग्रीववधे हयग्रीवस्य जलक्रीड़ावर्णने।

अधमपात्रगतत्वे यथा,—

"जघनस्थलनद्धपत्रवल्ली-
गिरिमल्लीकुसुमानि काऽपि भिल्ली।
अवचित्य गिरौ पुरो निषण्णा
स्वकचानुत्कचयाञ्चकार भर्त्रा ॥" (ज)

कृष्णः, वः—युष्मान्, पातु—रक्षतु। अत्र श्रीकृष्णस्य नन्द-(गोप))-नन्दनतया सम्बन्धित्वेन गोप्यास्तदनुरागोऽनुचितः इति भावः। "स्वामी निश्वसितेऽप्यसूयति—" इत्यादिपरनायिकोदाहरणन्तु न शृङ्गाराभासः, तथात्वे शृङ्गारे परनायकोदाहरणमनर्थकं स्यादिति ज्ञेयम्। शार्दूलविक्रीडितं वृत्तम्।

(छ) कान्ता इति।—हे सुतनु !—शुभाङ्गि ! भुवनत्रितये त एव (जनाः) कान्ताः—रम्याः, येषां कृते—यन्निमित्तम्, अयं कपोलः, तवेति शेषः, पाण्डुः—विरहात् मलिनश्वेतिमानमापन्न इत्यर्थः, इत्यहं मन्ये—सम्भावयामि। अत्र कपोलपाण्डिमवर्णनमनुरागप्रदर्शनार्थं, स हि, "ते" इत्यनेन बहुनायकनिर्दिष्टत्वादनुचित एव इति बोध्यम्।

(ज) जघनेति।—जघनस्थले नद्धा—बद्धा, पत्रवल्ली—पत्रलता यया तादृशी, काऽपि भिल्ली—किराती, गिरौ—पर्वते, गिरिमल्लीकुसुमानि—कुटजपुष्पाणि ("कुटजो गिरिमल्लिका" इत्यमरः) अवचित्य, पुरः—समक्षं, भर्त्तुरिति शेषः, निषण्णा—

तिर्य्यग्गतत्वे यथा,—

"मल्लीमतल्लीषु वनान्तरेषु वल्ल्यन्तरे वल्लभमाह्वयन्ती।
चञ्चद्विपञ्चीकलनादभङ्गीसङ्गीतमङ्गीकुरुते स्म भृङ्गी॥" (झ)

आदिशब्दात् तापसादयः। (ञ)

रौद्राभासो यथा,—

"रक्तोत्फुल्लविशाललोलनयनः कम्पोत्तराङ्गो मुहु-
र्मुक्त्वा कर्णमपेतभीर्धृतधनुर्बाणो हरेः पश्यतः।
आध्मातः कटुकोक्तिभिः स्वमसकृद्दोर्विक्रमं कीर्त्तयन्
अंसास्फोटपटुर्युधिष्ठिरमसौ हन्तुं प्रविष्टोऽर्जुनः॥" (ट)

उपविष्टा सती, भर्त्रा—स्वामिना, स्वकचान्—निजकेशान्, उत्कचयाञ्चकार—बन्धयामास। अत्र रतेरधमपात्रगतत्वेन अनुचितत्वं बोध्यम्। उदारराघवस्येदं पद्यम्। वैतालीयं वृत्तम्।

(झ) मल्लीति।—भृङ्गी—भ्रमरी, मल्लीभिः—मल्लिकाकुसुमतरुभिः, मतल्लीषु—अतिप्रशस्तेषु, मनोहरेषु इत्यर्थः, ("मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ। प्रशस्तवाचकान्यमूनि" इत्यमरः) वनान्तरेषु—वनमध्येषु, वल्ल्यन्तरे—अन्यस्यां लतायां, स्वाधिष्ठितलताभिन्नलतायाम् इति भावः, स्थितमिति शेषः, वल्लभं—पतिं, भ्रमरमित्यर्थः, आह्वयन्ती—सङ्गमार्थम् आकारयन्ती सती, चञ्चन्त्याः—स्वनन्त्याः, अथवा,—चञ्चत्—प्रवाहवत् निरवच्छिन्नम् [आस्मिन् पक्षे सङ्गीतमित्यस्य विशेषणम्] विपञ्च्याः—वीणायाः, यः कलः—मधुरास्फुटः नादः, तस्य भङ्ग्या—अनुसारेण, सङ्गीतम्, अङ्गीकुरुते स्म—स्मरोद्दीपनोपकरणं गीतवतीत्यर्थः। उदारराघवस्येदं पद्यम्। इन्द्रवज्रा वृत्तम्।

(ञ) आदिशब्दात् "तिर्य्यगादिगते" इत्यत्रस्थादिपदादिति ज्ञेयम्।

(ट) रक्तोत्फुल्लेति।—असौ अर्जुनः, रक्ते—रक्तवर्णे, उत्फुल्ले—विकसिते, कोपेन विस्फारिते इति भावः, विशाले—आयते, लोले—चञ्चले, नयने यस्य तथोक्तः, मुहुः—पुनः पुनः, कम्पोत्तराणि—कम्पप्रधानानि, अङ्गानि यस्य तादृशः, सकम्प इत्यर्थः, अपेतभीः—निर्भयः, धृतधनुर्बाणः—गृहीतधनुःशरः, कटुकोक्तिभिः—युधिष्ठिरस्य दुर्वचोभिः, आध्मातः—आपूरितः, क्षोभितः इत्यर्थः, [आध्मातः—दग्धः, इत्यर्थे "कटुकोक्तिभिः" इत्यत्र "अनलैः" इति रूपकं व्यङ्ग्यम्] पश्यतः हरेः—

भयानकाभासो यथा,—

"अशक्नुवन् सोढ़मधीरलोचनः
सहस्ररश्मेरिव यस्य दर्शनम्।
प्रविश्य हेमाद्रिगुहागृहान्तरं
निनाय बिभ्यत् दिवसानि कौशिकः॥" (ट)

स्त्रीनीचविषयमेव हि भयं रसप्रकृतिः। एवमन्यत्र।

भावाभासो लज्जा-
ऽऽदिके तु वेश्याऽऽदिविषये स्यात् ॥२५३॥ (ड)

स्पष्टम्।

श्रीकृष्णस्य [अनादरे षष्ठी], पश्यन्तं हरिम् अनादृत्य इत्यर्थः, असकृत्—पुनः पुनः, स्वं—स्वकीयं, दोर्विक्रमं—बाहुविक्रमं, कीर्त्तयन्—प्रथयन् सन्, तथा अंसास्फोटपटुः,—अंसस्य—स्कन्धस्य, आस्फोटे—करेण ताड़ने, पटुः,—तत्परः सन्, कर्णं—सूतपुत्रं, प्रतिशूरमिति भावः, मुक्त्वा—प्रहरन्तमपि तं त्यक्त्वा इत्याशयः, युधिष्ठिरं हन्तुं प्रविष्टः, स्कन्धावारमिति शेषः। एकदा कुरुपाण्डवसङ्ग्रामे नित्यम् "अद्यैवाहं कौरवान् निहनिष्यामि" इत्येवं स्वविक्रमं कीर्त्तयन्तं प्रतिज्ञां निस्तर्त्तुमशक्नुवन्तञ्च अर्जुनं युधिष्ठिरः "यदि त्वं कौरवान् हन्तुम् असमर्थः स्याः, तदा गाण्डीवस्य असम्मानं मा कुरु, त्यजैनं, श्रीकृष्णाय समर्पय" इत्यादिरूपं निर्भर्त्सयामास; तत् सोढुमशक्नुवन् पार्थः, "यो ममायुधं त्यक्तुमादिशेत्, तिरस्कुर्य्यात् वा, तमहं हनिष्यामि" इति पूर्वप्रतिज्ञामनुस्मृत्य पूज्यतममपि युधिष्ठिरं हन्तुं प्रवृत्ते इति पौराणिकी वार्त्ता अत्रानुसन्धेया। अत्र रौद्ररसस्य स्थायिनि कोपे गुरुनिष्ठत्वानौचित्येन रौद्राभासत्वं बोध्यम्। शार्दूलविक्रीड़ितं वृत्तम्।

(ठ) अशक्नुवन्निति।—कौशिकः—इन्द्रः, [पेचक इति तु ध्वन्योऽर्थः] सहस्ररश्मेरिव—सूर्य्यस्येव, यस्य—रावणस्य, दर्शनं सोढुम् अशक्नुवन्, अत एव अधीरलोचनः—चञ्चलदृष्टिः, बिभ्यत्—भयं गच्छन् सन्, हेमाद्रिगुहा एव गृहं तस्य अन्तरम्—अभ्यन्तरं, प्रविश्य, दिवसानि निनाय—यापयामास इत्यर्थः। अत्र भयस्य इन्द्रगतत्वेन स्त्रीनीचाद्यन्यतमविषयत्वाभावे उत्तमप्रकृतिगतत्वमिति भयानकाभासत्वम्। शिशुपालवधस्य पद्यमिदम्। वंशस्थविलं वृत्तम्।

(ड) भावाभासमाह, भावाभास इति।—लज्जाऽऽदिके सञ्चारिणि, वेश्याऽऽदि-

भावस्य शान्तावुदये सन्धिमिश्रितयोः क्रमात्।
भावस्य शान्तिरुदयः सन्धिः शबलता मता ॥२५४॥ (ढ)

विषये—आराधनाऽऽदिनिष्ठे इति, भावाभावः स्यात्। [अत्र प्रथमादिपदेन चिन्ताऽऽदीनां, द्वितीयादिपदेनानुरागिण्यादीनां ग्रहणम्]। यथा—"राजासुधाकरमुखी तरलायताक्षी सा क्षीरयौवनतरङ्गितविभ्रमाक्षी। तत् किं करोमि विदधे जघनस्य भारं तन्वी क्षतिं व्यतिकरे क इवोपायः॥" इति क्षीरार्णवदिग्वर्णनायां रामायणोक्तिः, सा—सीता, अस्ति इति शेषः। [अत्र नायिकायाः स्वीकारोपायचिन्तयाऽनुरागाभावो व्यज्यते। अत्र इवशब्दः सम्भावनायाम्, अतः चिन्तास्वरूपमप्राप्य आभासमात्रतयाऽवतिष्ठते। एवं नृपादिविषयकरतेः श्रावणादिविषयलेऽप्यनौचित्याद् आभासरूपत्वम्)।

(ढ) भावशान्त्यादीनाह, भावस्येति।—एतत्समस्यन्तपदेनान्वेति, तेन भावस्येति पदस्य शान्तित्वादिना सप्तम्यन्तेन प्रत्येकं सम्बन्धः। तथा च, भावस्य शान्तौ, भावस्य शान्तिः, भावस्योदये भावस्योदयः, भावस्य (इदं वचनविपरिणामेनान्वेति, तेन) भावयोरित्यर्थः, सन्धौ, भावस्य—भावयोः, सन्धिः, भावस्य—(अत्रापि वचनविपरिणामेनान्वयः) भावानाम्, मिश्रिते—मिश्रणे, [अत्र भावे क्तः] भावस्य—भावानां, शबलता, इत्येवं क्रमात् मता। अत्र भावो व्यभिचारिभावः, शान्तिः—प्रशमः, उदितस्यापि तिरोभाव इति यावत्, अयमपि उत्पत्तिस्वभावावच्छिन्न एव बाध्यः। उदयः—उत्पत्तिः, स्वसामग्रीबलेनोद्बुद्धभावस्येति यावत्, सन्धिः—परस्परातिरस्कृतयोः परस्परातिरस्करणयोग्ययोरेकाश्रयत्वम्, परस्परसामग्रीनाद्यात्मना परस्परविमर्दाविषयत्वेनावस्थितत्वमिति यावत्। एतदपि एकदेशवृत्तित्वावशंयिते बाध्यबाधकत्वरूपम्। केचित्तु—"विरुद्धयोरेकस्मिन्नेवदेशावच्छेदकभेदेन स्थितिः सन्धिः" इत्याहुः, तन्न, वक्ष्यमाणोदाहरणासङ्गतिप्रसङ्गात्। तत्रावच्छेदकानुपपत्तेः। ननु अनुपस्थितत्वापि लक्षणादेरवच्छेदकत्वं वक्ष्यतीति चेत् न, एकदेशस्य असङ्गतत्वापत्तेः। मिश्रितं—मिश्रणं, तत्र बाध्यबाधकभावापन्नानामुदासीनानां बाध्योऽन्यानीतत्वं, पूर्वपूर्वस्य बाध्यत्वेन उत्तरोत्तरस्य बाधकत्वेनैव बाध्ये निवेशनमिति यावत्। अत्रापि बाध्यत्वं नाम विरोधिसामग्रीस्थितिपरिपुष्टिकत्वम्, बाधकत्वञ्च विरोधि। एकस्मिन् मते दन्त्यवान् शबलशब्दः। शान्तौ उदये च एकस्यैव भावस्य शान्तिरुदयश्च, सन्धौ द्वयोरेव सुखदुःखयोः शान्त्युदयौ, शबलतायां पुनः बहूनां भावानां मिश्रणम्; केचित्तु—"भावानामुत्कर्षोत्तरत्वत्वं शबलं बलवन्मूलो वा" इत्याहुः, तत्र, वक्ष्यमाणोदाहरणे हि द्वयोरेवोभयोः भावयोरुत्तरत्वेन बलवत्त्वं, न तु सर्वेषामुत्तरत्वात् इति दिक्।

क्रमेण यथा,—

"सुतनु ! जहिहि कोपं पश्य पादानतं मां
न खलु तव कदाचित् कोप एवंविधोऽभूत्।
इति निगदति नाथे तिर्य्यगामीलिताक्ष्या
नयनजलमनल्पं मुक्तमुक्तं न किञ्चित्॥" (ख)

अत्र वाष्पमोचनेन ईर्ष्याऽऽख्यसञ्चारिभावस्य शमः।

"चरणपतनप्रत्याख्यानात् प्रसादपराङ्मुखे
निभृतकितवाचारेत्युक्त्वा रुषा परुषीकृते।
व्रजति रमणे निश्वस्योच्चैः स्तनस्थितहस्तया
नयनसलिलच्छन्ना दृष्टिः सखीषु निवेशिता॥" (त)

अत्र विषादस्योदयः।

(ख) भावशान्तिमुदाहरति, सुतन्विति।—हे सुतनु !—सुन्दरि ! कोपं जहिहि—त्यज, पादानतं मां पश्य—अवलोकय, कदाचित् तव एवंविधः कोपः, न खलु—नैव, अभूत्, इति—इत्थं, नाथे निगदति—कथयति सति, तिर्य्यक् यथा तथा आमीलिते—ईषदुन्मीलिते, अक्षिणी यथा तथाभूतया, कयाचित् कान्तया इति शेषः, अनल्पम्—अधिकतरं, नयनजलं मुक्तं, न—न तु, किञ्चित् उक्तं—कथितम्। अत्र पादपतनरूपप्रसादसामग्र्या ईर्ष्यायाः प्रशम इति व्यज्यते इति। समरुशतकस्येदं पद्यम्। मालिनी वृत्तम्।

(त) भावोदयमुदाहरति, चरणेति।—निभृतः—गुप्तः, कितवाचार—कपटाचारः, यस्य तत्सम्बुद्धौ हे निभृतकितवाचार !—सहसाऽनुपलक्षितविटाचरण ! इति उक्त्वा, नायिकया इति शेषः, रुषा—कोपेन, चरणयो पतनेऽपि यत् प्रत्याख्यानं—निराकरणं, तस्मात् हेतोः, चरणाक्षेपादिना निराकरणात् इत्याशयः, प्रसाद-पराङ्मुखे—अप्रसन्ने, प्रसादरूपफलविमुखे इत्यर्थः, अत एव परुषीकृते—कठिनीकृते, स्नेहहीनीकृते इति यावत्, रमणे—कान्ते, व्रजति—गच्छति सति, कयाचित् उच्चैः निश्वस्य—दीर्घं निश्वस्य, स्तने स्थितः हस्तः यस्याः तथाभूतया सत्या, स्तनमध्ये हस्तनिवेशेन "हृदय ! मा स्फुट" इति हृदयाश्वास इति भावः, सखीषु नयन-सलिलच्छन्ना—अश्रुपूर्णा, दृष्टिः निवेशिता—अर्पिता, [एतेन यौवनस्य अचिर-स्थायित्वमिति, पादपतनेऽपि मया कान्तो निराकृत इति चातिशयेन अनौचित्यं कृतम्

"नयनयुगासेचनकं मानसदुष्प्रापि दुष्प्रापम्।
रूपमिदं मदिराक्ष्या मदयति हृदयं दुनोति च मे॥" (थ)

अत्र हर्षविषादयोः सन्धिः। (द)

"आकार्य्यं, मयलक्ष्यः क्व च कुलं, भूयोऽपि दृश्येत सा,
दोषाणां प्रशमाय मे श्रुतमहो! कोपेऽपि कान्तं मुखम्।
किं वक्ष्यन्त्यपकल्मषाः कृतधियः, स्वप्नेऽपि सा दुर्लभा,
चेतः! स्वास्थ्यमुपैहि, कः खलु युवा धन्योऽधरं धास्यति॥"(ध)

इति दूषितम्। अत्र मानसप्रत्याख्यानरूपवाक्यार्थया विषादस्य उदय इति व्यज्यते इति]। अनन्तरमनयोर्लक्षणं पद्यम्। इदानीं उदाहृतम्।

(थ) मानसन्धिमाह, नयनेति।—नयनयुगस्य—नेत्रद्वयस्य, आसेचनकम्—अतिशयोपकरं, ("तदासेचनकं दृश्येनांक्ष्णो यस्य दर्शनात्" इत्यमरः) मानसदुष्प्रापमपि दुष्प्रापं—मनोरथस्यापि विषयीभवितुमशक्यं:, मदिराक्ष्याः,—मदिरः—खलु:, तद्वदतिचपले अक्षिणी यस्याः; तथाविधायाः [मदिरा दृष्टिभेदः इति मन्याः, तद्वत्वं चोक्तं सुधोत-क्षितिवाक्षाम्;—"दीर्घत्वेन परिम्लाना अरागाकुलतोदरा। वेपमानान्तरा दृष्टिर्मदिरा परिकीर्त्तिता॥" इति। इदमिदानीन्तनव्याख्यानानुसारेणापि तथैवोक्तम्,—"आघूर्णमानमज्जा या बाला चाञ्चलतारका। दृष्टिर्विकसितापाङ्गा मदिरा तद्वदे नदे॥" इति। अतः, मदिरे—दृष्टिविशेषयुक्ते, अक्षिणी—नयने, यस्याः तथाभूतस्या इति व्याख्येयम्]। इदं रूपं मे—मम, हृदयं मदयति—आनन्दयति, दुनोति—सन्तापयति च। अनेनैवैव खानिनीदर्शनं नेत्रद्वन्द्वितयत्वेन आनन्दजनकत्वम्, अप्राप्यत्वेन तापजनकत्वमिति हर्ष-विषादयोः सन्धिरत्रोक्तः। उपगीतिश्छन्दः,—"आर्य्याद्वितीयकेऽर्द्धे यद्गदितं तत्तृतीयकं तत् स्यात्। यद्युभयोरपि दलयोरुपगीतिं तां मुनिर्भणते॥" इति तल्लक्षणात्।

(द) अनेति।—अत्र—उदाहृते पद्ये, हर्षविषादयोः, (अत्युत्कृष्टत्वज्ञानजन्ये हर्षः, उपभोगप्रतीतिजन्यत्वज्ञानजन्ये विषादः) एवं विरुद्धयोरपि तयोः, सन्धिः—एक-स्मिन् क्षणावेशः, आशुभावेन संसर्गप्रतिभासः इत्यर्थः।

(ध) भावशबलतामुदाहरति, क्वेति।—दर्शनोत्तरियोगेन स्मरणमुपजन्य पश्चात्तिरस्कारजनक पुनरनुसन्धानमिदम्। अकार्य्यं—स्त्रीत्वियोगात् आत्मदूषणरूपं, क्व? अत्यन्तशत्रुः—चन्द्रज, कुलं क्व? चन्द्रवंशोद्भवं वयमात्मघाती भवामीति अत्यन्त-क्षतावेशमूलकं त्रासयतीति भावः। सा—उर्वशी, भूयोऽपि—पुनरपि, दृश्येत—दृष्टि-विषयवर्त्तिनी भवेत्; दोषाणाम्—अकार्य्यानुष्ठानानां, प्रशमाय—शान्तये, मे—मम,

अत्र वितर्कौत्सुक्यमतिस्मरणमत्यौग्र्यदैन्यधृतिचिन्तानां सञ्चारिता।

इति श्रीमन्महाराजकुमारविश्वनाथविरचिते साहित्यदर्पणे रसभावादिनिरूपणो नाम तृतीयः परिच्छेदः॥ ३॥

श्रुत—श्राव्यज्ञानम्, अधीतं वा, श्राव्यं श्रावा अवगतसङ्गत्यर्थं करोमीति भावः। अहो! —आश्चर्ये, कोपेऽपि सुखं, तथाः इति शेषः, कान्तं—मनोहरम्। अपकलयाः:—अपापाः, कृतधियः:—परिचतबुद्धयः, विद्वांस इत्यर्थः, किं वक्ष्यन्ति? एवमवार्थ-कारित्वं मामुद्दिश्येति शेषः, मयि धृत्वां दर्शयिष्यन्तीति भावः। सा—उर्वशी, स्वप्नेऽपि दुर्लभा—अप्राप्यमप्रका। हे चेतः! श्लाघ्यां—श्लाघ्यम्, उपैहि—प्राप्नुहि, सुस्थिरं भव इत्यर्थः, कः खलु धन्यः—पुण्यवान्, युवा—तरुणः पुरुषः, अधरम्,उर्वश्या इति शेषः, पास्यति?—पास्यति? आर्द्रज्वलितोक्तिरियं द्रुतम्। [अत्र प्रथमपादे वितर्कौत्सुक्ये, यथा हि,—कुलमित्यत्रेन चन्द्रकुले स्त्रीविरहादात्मदहनमनकार्यम् इत्येवंरूपविचारवती वितर्कः, "सा" इत्यत्रेनौत्सुक्यम्; द्वितीयपादे मतिस्मरणे, यथा हि,—"सुतम्" इत्यत्रेन सर्वथा तदनुरागी दोषायेव इत्यर्थनिर्धारणरूपा मतिः, "सुखम्" इत्यत्रेन सुखस्य कमनीयत्वस्मरणं; तृतीयपादे औग्र्यदैन्ये, यथा हि,—"कृतधियः" इत्यत्रेन अहो, "दुर्लभा" इत्यत्रेन स्वाऽनौचित्यरूपं दैन्यम्; चतुर्थे धृतिचिन्ते स्थिते, यथा हि, —"उपैहि" इत्यत्रेन धृतिः,"श्लाघ्यां" इत्यत्रेन चिन्ता व्यङ्ग्या। अत्र त्रयीर्द्वयोः भावस्य पूर्वस्य प्रथमादेरस्य बाध्यत्वम्, उत्तरस्य विप्रलम्भादेरस्य बाधकत्वम्। चिन्तायां विश्रान्तेः तदङ्गस्य विप्रलम्भप्रकारस्य श्लाघ्यापेक्षया परिपोषः। तस्माच्चतुरोऽन्तरा प्रथमोदया-देवान्तमभिलाषस्य नाऽऽस्वाद्यत्वमिति स्वल्परसत्वमित्यवधेयम्। उभयाङ्गस्य भाव-समूहस्य बाध्यबाधकभावो मुख्यत्वेनास्वाद्यते इति भावप्रबलतायां एव प्रधानत्व-मिति दिक्]।

इत्यग्रेवमाखाटवीसुधारपद्मानन-पण्डितकुलपतिना वि, ए, उपाधिधारिणा श्रीमज्जीवानन्दविद्यासागरभट्टाचार्येण विरचितायां, तदात्मजाभ्यां पण्डितश्रीशामुबोधविद्याभूषण-पण्डितश्रीनित्यबोधविद्यारत्नाभ्यां प्रतिसंस्कृतायां विमलाख्यायां साहित्यदर्पणव्याख्यायां तृतीयः परिच्छेदः॥ ३॥

चतुर्थः परिच्छेदः ।

अथ काव्यभेदमाह (क) ।—

काव्यं ध्वनिर्गुणीभूतव्यङ्ग्यञ्चेति द्विधा मतम् ॥२५३॥

तत्र,—

वाच्यातिशायिनि व्यङ्ग्ये ध्वनिस्तत्काव्यमुत्तमम् ॥२५४॥ (ख)

(क) अधुना काव्यस्वरूपं निरूप्य काव्यभेदं निदर्शयितुं प्रतिजानीते, अथेति ।—अथ—काव्यघटकरसादिनिरूपणानन्तरमित्यर्थः, काव्यस्य—"वाक्यं रसात्मकं काव्यम्" इत्युक्तलक्षणस्य वाक्यविशेषस्य, भेदः—प्रकारस्तम्, आह ।

(ख) ध्वनिमाह, वाच्येति ।—व्यङ्ग्ये—व्यञ्जनया बोध्ये अर्थे, वाच्यातिशायिनि—वाच्यार्थात् अधिकचमत्कारिणि सति, तत् काव्यमुत्तमं ध्वनिः, कथ्यते इति शेषः । ध्वन्यते—व्यज्यते, अस्मिन्—वाक्यार्थसमुदाये इति विग्रहः । गुणीभूतव्यङ्ग्ये उक्तव्युत्पत्तिसम्भवेऽपि ध्वनिपदस्य निरुक्तरूढिसापेक्षत्वान्न तत्र व्यवहारः । वस्तुतस्तु "ध्वन्यते" इति ध्वनिः, रसादिः ; ध्वनतीति ध्वनिः, शब्दादिगता शक्तिः ; ध्वननं ध्वनिः, रसादिप्रतीतिः इति व्युत्पत्तिभेदात् ध्वनिपदार्थभेदो बोध्यः । ततश्चाधिकचमत्कारि व्यङ्ग्यं काव्यं ध्वनिरिति फलितम् । अयं भावः,—यत्र अभिधया वृत्त्या प्रतिपाद्यस्य वाच्याभिधेयस्यार्थस्यापेक्षया व्यञ्जनया वृत्त्या प्रतिपाद्यस्य व्यङ्ग्याभिधेयस्यार्थस्य चमत्कारातिशायित्वं स्यात्, तद् ध्वनिरिति व्यपदेश्यं काव्यम् ; तच्च वाच्यापेक्षयाऽधिकचमत्कारशालित्वात् उत्तममिति व्यपदिश्यते, यद्वा,—वाच्येतिपदं लक्ष्यस्याप्युपलक्षणं, तेन वाच्यापेक्षया लक्ष्यापेक्षया चेत्यर्थः, अथवा,—वाच्येतिपदं लक्ष्यस्येव यत्र व्यङ्ग्याद् व्यङ्ग्यान्तरस्यापि व्यङ्ग्यत्वं, तत्र व्यङ्ग्यान्तरव्यञ्जकस्य पूर्वव्यङ्ग्यस्याप्युपलक्षणं, तेन वाच्यापेक्षया, लक्ष्यापेक्षया, पूर्वव्यङ्ग्यापेक्षया च यत्र व्यङ्ग्यस्य चमत्कारातिशायित्वं, तदुत्तमं काव्यम् । अत्राहुर्ध्वनिकाराः,—"प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात् सर्वविद्यानां, ते च श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति" इति । अभिनवगुप्ता अप्याहुः,—"श्रोत्रशष्कुलीं सन्तानेनागता अन्त्याः शब्दाः श्रूयन्ते इति प्रक्रियायां शब्दाः, श्रूयमाणा इत्युक्तं, तेषां घण्टाऽनुरणनरूपत्वं तावदस्ति, ते च

वाच्यादधिकचमत्कारिणि व्यङ्ग्यार्थे "ध्वन्यतेऽस्मिन्" इति व्युत्पत्त्या ध्वनिर्नामोत्तमं काव्यम्।

भेदौ ध्वनेरपि द्वावुदीरितौ लक्षणाऽभिधामूलौ।
अविवक्षितवाच्योऽन्यो विवक्षितान्यपरवाच्यश्च॥२५५॥(ग)

ध्वनिशब्देनोक्ताः। यदाह भगवान् भर्तृहरिः—"यः संयोगवियोगाभ्यां करणैरुपजायते। स स्फोटः शब्दजः शब्दो ध्वनिरित्युच्यते बुधैः॥" इति। एवं घण्टाऽऽदिनिर्ह्रादस्थानीयोऽनुरणनात्मोपलक्षितो व्यङ्ग्योऽप्यर्थो ध्वनिरिति व्यवहृतः। इत्येष प्रकारोऽव्यक्तशब्दानामेव वर्त्तते। व्यक्तशब्दानां तथा श्रूयमाणा ये वर्णा नादशब्दवाच्या अन्त्यबुद्धिनिर्ग्राह्याः स्फोटाभिव्यञ्जकास्ते ध्वनिशब्देनोक्ताः। यदाह भगवान् स एव—"प्रत्ययैरनुपाख्येयैर्ग्रहणानुग्रहैस्तथा। ध्वनिप्रकाशिते शब्दे स्वरूपमवधार्य्यते॥" इति। तेन व्यञ्जकौ शब्दार्थावपीह ध्वनिशब्देनोक्तौ। किञ्च वर्णेषु तावन्मात्रपरिमाणेष्वपि सत्सु। यथोक्तम्,—"अल्पीयसाऽपि यत्नेन शब्दमुच्चारितं मतिः। यदि वा नैव गृह्णाति वर्णं वा सकलं स्फुटम्॥" इति। तेषुतावत्स्वेषु श्रूयमाणेषु वक्तुर्योऽन्यो द्रुतविलम्बितादिवृत्तिभेदात्मा प्रसिद्धादुच्चारणादिव्यापारादभिव्यक्तः, स ध्वनिरुक्तः। यदाह स एव—"शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदास्तु वैकृताः। ध्वनयः समुपोहन्ते स्फोटात्मा नैव भिद्यते॥" इति। इदमभिहितम्;—घटः, पटः इत्यादिसमुदितस्वरूपैः क्षणावस्थानैः पदैर्नित्यः स्फोटात्मा शब्दः प्रतिपद्यते, एतेन प्रतिपन्नेन च अर्थः प्रतिपद्यते इति तथाभूतस्य प्रधानतयाऽवस्थितस्फोटव्यञ्जकस्य वर्णसमुदयात्मकस्य घटादिशब्दस्य ध्वनिरिति व्यपदेशो वैयाकरणानां सिद्धान्ते। अत एतदनुयायिभिरितरैरपि प्रधानतयाऽवस्थितव्यङ्ग्यव्यञ्जकत्वसाम्यादप्रधानीभूताभिधेयं यद् व्यञ्जनयाऽप्रतिपाद्यं, तत् अव्यञ्जनसहस्य शब्दार्थद्वन्द्वरूपस्योत्तमस्य काव्यस्य ध्वनिरिति व्यपदेश आम्नातः। अत एवाहुर्ध्वनिकाराः,—"यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ। व्यङ्ग्यः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः॥" इति।

(ग) काव्यात्मभूतस्य ध्वनेर्भेदेनैव ध्वनिकाव्यप्रभेदमाह, भेदाविति—इह यद्यपि वस्त्वलङ्कारध्वनीनां काव्यात्मत्वं नाङ्गीकृतं, तथाऽपि रसादिप्रकर्षकत्वेनैव तेषां काव्यात्मत्वमित्यभिप्रायेण तत्साधारणं ध्वनिप्रभेदनिरूपणं प्रक्रमते इति बोध्यम्। ध्वनेरपि लक्षणाऽभिधामूलौ—लक्षणामूलोऽभिधामूलश्चेत्यर्थः, द्वौ भेदौ उदीरितौ—उक्तौ, तयोः आद्यः लक्षणामूलो ध्वनिः; अविवक्षितवाच्यः,—न विवक्षितम्—

तत्राविवक्षितवाच्यो नाम लक्षणामूलो ध्वनिः। लक्षणामूलत्वादेव अत्र वाच्यमविवक्षितं बाधितस्वरूपम्। विवक्षितान्यपरवाच्यस्तु अभिधामूलः। अत एव अत्र वाच्यं विवक्षितम्। अन्यपरं व्यङ्ग्यनिष्ठम्। अत्र हि वाच्योऽर्थः स्वरूपं प्रकाशयन्नेव व्यङ्ग्यार्थस्य प्रकाशकः; यथा,—प्रदीपो घटस्य। अभिधामूलस्य बहुविषयतया पश्चान्निर्देशः। (घ)

अविवक्षितवाच्यस्य भेदावाह,—

अर्थान्तरं सङ्क्रमिते वाच्येऽत्यन्तं तिरस्कृते।
अविवक्षितवाच्योऽपि ध्वनिर्द्वैविध्यमृच्छति॥२५६॥(ङ)

उपयुक्तम्, अन्वयार्हं वा, वाच्यं—वाच्योऽर्थः यत्र तथोक्तः, अन्यः—द्वितीयः, अभिधामूलो ध्वनिरिति यावत्, विवक्षितान्यपरवाच्यः,—विवक्षितं—वाच्यताऽवच्छेदकरूपेणान्वयबोधकः, तस्मात् अन्यपरं—व्यङ्ग्यपरं, व्यङ्ग्योपसर्जनीभूतं वा, वाच्यं—वाच्योऽर्थो यत्र तथाविध इति भावः।

(घ) अविवक्षितवाच्यत्वे हेतुमाह, लक्षणेति।—लक्षणामूलत्वात्—लक्षणामूलं यस्य तस्य भावः तत्त्वं, तस्मात् तथोक्तात्, मुख्यार्थबाधविषयिणी हि वृत्तिर्हि लक्षणा तन्मूलत्वात्, अत्र वाच्यस्य बाधितत्वम् (अविवक्षितत्वम्) इति भावः। अभिधामूलः—अभिधानाश्रित्याविर्भूतः, ध्वनिरित्यनुषज्यते। अत एव अभिधामूलत्वादेव इत्यर्थः। वाच्यार्थस्य व्यङ्ग्यपरत्वमुपपादयति, अत्र हीति।—अत्र—विवक्षितान्यपरवाच्ये ध्वनौ, हि—यतः, स्वरूपं प्रकाशयन्—स्वरूपेण अवस्थितः सन्, प्रकाशकः—प्रत्यायकः। (वाच्यार्थस्य स्वोपस्थितिद्वारा शाब्दबोधं प्रति कारणत्वनियमाभिप्रायेणेदम्)। निदर्शनमाह, यथेति।—यथा प्रदीपः घटस्य, एतदुपलक्षणं, तेन घटपटादेरित्यर्थः, स्वरूपेण स्वयं प्रदीप्यमानः सन् अन्यमपि स्वरूपेण सन्तं प्रदीपयति, तथेति भावः। लक्षणामूलध्वनेः अल्पविषयत्वात् तृणीघटादन्यायेन प्रथमनिर्देशः, तदन्यस्य पश्चादित्यवधेयम्। अन्यत् स्पष्टम्।

(ङ) अर्थान्तरमिति।—अविवक्षितवाच्योऽपि—लक्षणामूलोऽपि, ध्वनिः, वाच्ये—मुख्येऽर्थे, अर्थान्तरम्—उपयोगिलक्ष्यतावच्छेदकं, सङ्क्रमिते—आश्रितत्वेन प्रविष्टे, अथवा अत्यन्तं—सर्वथा, तिरस्कृते—न केनापि रूपेण अन्वयं प्रविष्टे सति, द्वैविध्यम्, ऋच्छति—प्राप्नोति।

अविवक्षितवाच्यो नाम ध्वनिरर्थान्तरसङ्क्रमितवाच्योऽत्यन्ततिरस्कृतवाच्यश्चेति द्विविधः । यत्र स्वयमनुपयुज्यमानो मुख्योऽर्थः स्वविशेषरूपेऽर्थान्तरे परिणमति, तत्र मुख्यार्थस्य स्वविशेषरूपार्थान्तरसङ्क्रमितत्वादर्थान्तरसङ्क्रमितवाच्यत्वम् । (च)

यथा,—

"कदली कदली, करभः करभः,
करिराजकरः करिराजकरः ।
भुवनत्रितयेऽपि बिभर्त्ति तुला-
मिदमूरुयुगं न चमूरुदृशः ॥" (छ)

(च) अविवक्षितवाच्य इति ।—यत्र—प्रकृतान्वये, मुख्यः—वाच्यः, अर्थः, स्वयं—साक्षात्, मुख्यताऽवच्छेदकरूपेणेति यावत्, अनुपयुज्यमानः—उपयुक्ततामप्राप्नुवन् सन्, स्वविशेषरूपे—स्वप्रकारभूते, अर्थान्तरे—स्वकीयमुख्यताऽवच्छेदकव्याप्यधर्मे, परिणमति—विशेष्यतया भासते, तत्र—निरुक्तस्वरूपे वाक्ये, मुख्यार्थस्य—वाच्यार्थस्य, स्वस्वरूपेण प्रकृतान्वयेऽनुपयुज्यमानस्याभिधया प्रतिपाद्यस्य अर्थस्येति यावत्, स्वविशेषरूपार्थान्तरसंक्रमितत्वात्,—स्वविशेषरूपं यदर्थान्तरं तत्र सङ्क्रमितत्वात्—विशेष्यतया भासमानत्वात्, [एतेन मुख्यार्थस्य मुख्यताऽवच्छेदकरूपेण प्रकृतान्वयानुपयोगित्वं बाधः, तस्यैव विशेषणान्तररूपेण बोधः इति इयमुपादानलक्षणा इति सूचितम्] ।

(छ) उदाहरति, कदलीति ।—कदली—रम्भाकाण्डः, कदली—अतिशीतेति भावः, करभः—आमणिबन्धात् कनिष्ठाऽन्तो हस्तस्य बाह्यभागः, ("मणिबन्धादाकनिष्ठं करस्य करभो बहिः" इत्यमरः) करभः—अतिह्रस्व इति भावः, करिराजकरः—हस्तिशुण्डादण्डः, करिराजकरः—अतिकर्कश इति भावः, अस्मात् कारणात्, चमूरुः—मृगविशेषः, तस्येव दृशौ यस्यास्तथाभूतायाः, चमूरु(मृग)नयनसदृशनयनायाः, कान्तायाः इति शेषः, इदम् ऊरुयुगम्,—ऊर्वोः—जानूपरिभागयोः, युगं—द्वयं, भुवनत्रितये—त्रिषु लोकेषु, अपि किं पुनरेकस्मिन् द्वयोर्वा भुवनयोरिति भावः, तुलां—सादृश्यं, न बिभर्त्ति । अयं भावः—ऊर्वोः घटादौ सादृश्यं सर्वथा न सम्भवत्येव, यत्र तु कदल्यादौ सादृश्यं सम्भाव्यते, तदतिशैत्यादिनाऽपकृष्टमिति स्पष्टं तस्या ऊर्वोः सादृश्यं न कुत्रापि । एवञ्च अत्र व्यतिरेकालङ्कारः । प्रसन्नराघवस्येदं पद्यम् । तोटकं वृत्तम् ;—"वद तोटकमब्धिसकारयुतम्" इति तल्लक्षणात् ।

अत्र द्वितीयकदल्यादिशब्दाः पौनरुक्त्यभिया सामान्यकदल्यादिरूपे मुख्यार्थे बाधिता जाड्यादिगुणविशिष्टकदल्यादिरूपमर्थं बोधयन्ति; जाड्याद्यतिशयश्च व्यङ्ग्यः। यत्र पुनः स्वार्थं सर्वथा परित्यजन् अर्थान्तरे परिणमति, तत्र मुख्यार्थस्य अत्यन्ततिरस्कृतत्वादत्यन्ततिरस्कृतवाच्यत्वम्। (ज)

यथा,—

"निश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते"। (झ)

(ज) ननु कदल्यादिपदानामतिप्रौढार्थः कुतः प्रतिपद्यते, तत्र केनाप्यङ्गेतितत्वात्, इति चेत्? तत्राह, अत्रेति।—उदाहृते पद्ये इत्यर्थः, द्वितीयकदल्यादिशब्दाः,—द्वितीयाः—द्वितीयवारं पठिताः, येषामतिप्रौढार्थाः प्रतिपाद्याः तादृशा इति भावः, ये कदल्यादयः शब्दाः, जाड्यादिः,—जाड्यं—शैत्यं, तदादिः, शैत्यकृत्वकर्कशत्वरूप इति भावः, यो गुणः, तेन विशिष्टः—विशेषितः, तादृशं, कदल्यादिरूपम् अर्थम्, बोधयन्ति—उपचारात् लक्षयन्ति। यद्यपि शैत्यादिः जलादावेव, तथापि तत्र परम्परया कदल्यादिवृत्तित्वमवगन्तव्यम्। न च शैत्यादीनामम्बवादि सत्त्वात् कथं कदल्यादिन्याय्यत्वम्? इति वाच्यं, शैत्यादिविशेषस्यैवात्र विवक्षितत्वात्। जाड्याद्यतिशयः—शैत्याद्यतिशयः, व्यङ्ग्यः—प्रयोजनमूताया: लक्षणायाः बोधविषयः। सर्वत्रैव मुख्यार्थस्याभेदः सम्बन्धः। एवञ्च कदल्यतिप्रौढा, करभोऽतिकृशः, करिराजकरः अतिकर्कशः, इति चमत्कृतयः इदमूदयुगम अवहट्टभणितावाश्रयः। एवमर्थान्तरसंक्रमितवाच्यध्वनिभेदमभिधाय अत्यन्ततिरस्कृतवाच्यरूपं ध्वनिभेदमाह, यत्रेति।—यत्र पुनः, शब्द इति शेषः, स्वार्थे—स्वाख्यम् सङ्केतितमर्थमित्यर्थः, सर्वथा परित्यजन्—गौणत्वेनापि अप्रतिपादयन्नित्यर्थः, अर्थान्तरे—मुख्यार्थभिन्ने, परिणमति—लक्षणया वर्तते, तत्र मुख्यार्थस्य, अत्यन्ततिरस्कृतत्वात्—सर्वथा बाध्यत्वात्, अत्यन्ततिरस्कृतवाच्यत्वम्,—अत्यन्तं तिरस्कृतः—अगृहीतसम्बन्धः, वाच्यः—मुख्यार्थो यत्र तस्य भावः तत्त्वम् इत्यर्थः।

(झ) निश्वासान्ध इति।—निश्वासेन—मुखनासाभ्यां निर्गतेन वायुना, अन्धः,—नष्टविकाश इति तादृशः, आदर्शः—दर्पणः, ("आदर्शो दर्पणे टीकाप्रतिपुस्तकयोरपि" इति मेदिनी) इव चन्द्रमाः न प्रकाशते। अत्र च पूर्वार्द्धम्—"रविसङ्क्रान्तसौभाग्यस्तुषाराहतनलिनश्रीः" इति। एतच्च वाक्यैकदेशे रूपकालङ्कारस्य पद्यम्।

अत्रान्यशब्दो मुख्यार्थं बाधितोऽप्रकाशरूपमर्थं बोधयति; अप्रकाशातिशयश्च व्यङ्ग्यः। अन्यत्वाप्रकाशत्वयोः सामान्यविशेषभावाभावात् नार्थान्तरसङ्क्रमितवाच्यत्वम्। (अ)

यथा,—

"भम धम्मिअ! वीसत्थो सो सुणओ अज्ज मारिओ तेण।
गोलावरीकच्छकुंजवासिणा दरीअसीहेण॥" (ट)

(अ) अत्रेति।—अन्यशब्दः, मुख्यार्थं—चक्षुष्मत्तादिलक्षणरूपेऽर्थे, बाधितः—स्वरूपेऽनुपपद्यमानः, अप्रकाशरूपं—विम्बोपादानशक्तिशून्यरूपम्, अर्थं, बोधयति—प्रतिपादयति। ननु तर्हि अप्रकाशशब्द एव कथं नोपात्तः? इत्याह, अप्रकाशेति।—अप्रकाशस्यातिशयः इत्यर्थः, स व्यङ्ग्यः—प्रदीपनमूलायाः लक्षणायाः प्रदीपनरूपोऽर्थः, अन्यत्वाप्रकाशत्वयोः,—अन्यत्वं—चक्षुष्मत्तारहितत्वम्, अप्रकाशत्वं—चाकचक्यरहितत्वम्, अनुज्ज्वलत्वमित्यर्थः; (अत्र चाक्षुषज्ञानाऽजनकत्वरूपैकधर्मवत्त्वं मुख्यलक्ष्यार्थयोः सम्भवः) तयोः, सामान्यविशेषभावाभावात्—व्यापकव्याप्यत्वभावाभावादित्यर्थः। तथाहि—मुख्यार्थतावच्छेदकलक्ष्यार्थावच्छेदकयोः सामान्यविशेषभावाभावे एवार्थान्तरसंक्रमितवाच्यत्वं भवति। यथा—"लाभाम्हि वच्चमि—" इत्यादौ। न च "यस्य मित्राणि मित्राणि" अनयः अन्वयव्यतिरेकयोः। अनुकम्प्योऽनुकम्पायाश्च स जातः स च जीवति॥" इत्यादौ काव्यप्रकाशकारादीनां निवृत्तादीनां मुख्यतावच्छेदकानां लक्ष्यतावच्छेदकैरान्वयव्यतिरेकयोरभावे सह सामान्यविशेषभावाभावात् अन्यसङ्क्रमितायम्: ? इति वाच्यम्, आश्रयत्वादिविशेषस्यैवात्र विवक्षितत्वात्।

(ट) ननु "भम धम्मिअ"—इत्यादौ विपरीतलक्षणाऽभावे लाक्षणिकरूपस्य वाच्यध्वनेरिदमुदाहरणं भवितुमर्हति इति विप्रतिपद्यमानं प्रत्याह,—भम इति।—["भ्रम धार्मिक! विश्वस्तः स श्वाऽद्य मारितस्तेन। गोदावरीकच्छकुञ्जवासिना दरीसिंहेन" इति संस्कृतम्]। आश्रमवर्तिनः; कस्यचित् व्यभिचारिणः गोदावरीकुञ्जरूपे सङ्केतस्थाने प्रथमं पुष्पचयनेन क्रियमाणे सङ्केतभङ्गे खलनीरक्षणकारिणं स्वप्रेरितकुक्कुरोपदेशेन अपि अनिष्टं कमपि धार्मिकं प्रति तस्या एव द्वितीयवारे उक्तिरियम्। हे धार्मिक! विश्वस्तः—निःशङ्कः सन्, भ्रम—पुष्पचयनार्थं पर्यट, अद्य स श्वा—कुक्कुरः, यस्यां प्रति प्रथमङ्गमनपदवतीति भावः, गोदवर्याः कच्छः—तीरं, ("परिभाषाचाषौ कच्छो जलप्राये निकुञ्जके" इत्यमरः) तत्र यः कुञ्जः—लतोऽऽदिपिहितं स्थानं, तत्र वासिना, तेन—धार्मिकेण, दरसिंहेन—प्रथमङ्गमेऽरिणा, मारितः—

अत्र "भ्रम धार्मिक" इत्यतो भ्रमणस्य विधिः प्रकृतेऽनुपयुज्यमानतया भ्रमणनिषेधे पर्य्यवस्यतीति विपरीतलक्षणाऽऽशङ्का न कार्य्या। यत्र खलु विधिनिषेधावुत्पद्यमानावेव निषेधविध्योः पर्य्यवस्यतः, तत्रैव तदवसरः; यत्र पुनः प्रकरणादिपर्य्यालोचनेन विधिनिषेधयोर्निषेधविधी अवगम्येते, तत्र ध्वनित्वमेव। (ठ) तदुक्तम्;—

"क्वचित् बाध्यतया ख्यातिः क्वचित् ख्यातस्य बाधनम्।
पूर्वत्र लक्षणैव स्यादुत्तरत्राभिधैव तु" ॥ (ड)

निहतः। गाथा सप्तशत्याः पद्यमिदम्। अत्र आर्य्याऽपरपर्य्याया गाथा नाम छन्दः।

(ठ) अत्रेति।—धार्मिक भ्रम, इत्यतः—इत्यनेन कथनेन, भ्रमणस्य—पर्य्यटनस्य, विधिः—विधानं, तदर्थाभ्यनुज्ञानमित्यर्थः, प्रकृते—कुलटायाः तात्पर्य्यविषयीभूते स्वैरविहारे इत्यर्थः, न उपयुज्यत इति, तत्तया—तद्रूपेण हेतुना, भ्रमणनिषेधे भ्रमणं न कार्य्यमित्यभिधाने, पर्य्यवस्यति—परिणमति, इति—अस्मात् हेतोः, विपरीत लक्षणाऽऽशङ्का,—विपरीता—विरुद्धार्थप्रतिपादिका, या लक्षणा तस्याः आशङ्का—सम्भावनं, न कार्य्या। ननु तर्हि कस्तस्या विषयः? इत्याशङ्क्याह, यत्रेति।—यत्र—यस्मिन् वाक्ये, खलु उत्पद्यमानौ—उत्पत्तिं गच्छन्तौ, एव विधिनिषेधौ निषेधविध्योः पर्य्यवस्यतः—परिणमतः, विधिवाक्यं श्रूयमाणमेव निषेधं, निषेधवाक्यं श्रूयमाणमेव पुनः विधिं बोधयतीत्यर्थः, ["उत्पद्यमानौ" इत्यत्र "उत्पत्स्यमानौ" इति पाठे—अन्वयबोधात्प्राक् उत्पत्स्यमानान्वयबोधौ इत्यर्थः] तत्रैव—तथाविधे एव स्थले इत्यर्थः, तदवसरः—विपरीतलक्षणायाः अवसरः। यत्र—"भ्रम धार्मिक" इत्यादौ पुनः, प्रकरणादीनां पर्य्यालोचनेन विधौ निषेधे च क्रमात् निषेधो विधिश्च अवगम्येते—प्रतीयेते, तत्र, ध्वनित्वम्—अभिधामूलध्वनित्वमित्यर्थः, एवं चात्र लक्षणामूलध्वनेरवसरो नास्त्येवेति भावः।

(ड) क्वचिदिति।—क्वचित् बाध्यतया—अनुपपन्नतया, विपरीतार्थे पर्य्यवसन्नतया इत्यर्थः, ख्यातिः—आपातमात्रेण अन्वयबोधः, क्वचित् ख्यातस्य—उपपन्नतया प्रतीतस्य, अन्वयबोधविषयीभूतस्येति यावत्, बाधनं—बाधोदयाद्विपरीतार्थपर्य्यवसानमित्यर्थः, पूर्वत्र—यत्र बाध्यतया ख्यातिस्तत्र, लक्षणा—लक्षणामूलो ध्वनिः, एव, उत्तरत्र—ख्यातस्य बाधनस्थले इत्यर्थः, अभिधैव—अभिधामूलध्वनिरेव इत्यर्थः, स्यात्।

अत्राद्ये मुख्यार्थस्य अर्थान्तरे सङ्क्रमणं प्रवेशः, न तु तिरोभावः; अत एव अत्र अजहत्स्वार्थलक्षणा। द्वितीये तु स्वार्थस्यात्यन्तं तिरस्कृतत्वात् जहत्स्वार्था। (ढ)

विवक्षिताभिधेयोऽपि द्विभेदः प्रथमं मतः।
असंलक्ष्यक्रमो यत्र व्यङ्ग्यो लक्ष्यक्रमस्तथा ॥२५७॥ (ण)

विवक्षितान्यपरवाच्योऽपि ध्वनिरसंलक्ष्यक्रमव्यङ्ग्यः, संलक्ष्यक्रमव्यङ्ग्यश्च इति द्विविधः।

तत्राद्यो रसभावादिरेक एवात्र गण्यते।
एकोऽपि भेदोऽनन्तत्वात् सङ्ख्येयस्तस्य नैव यत्॥२५८॥(त)

(ढ) अत्रेति।—अत्र—अनयोर्मध्ये, आद्ये—अर्थान्तरसंक्रमितवाच्ये लक्षणामूलध्वनौ इति यावत्, द्वितीये—अत्यन्ततिरस्कृतवाच्ये, जहत्स्वार्था, लक्षणेत्यनुषज्यते।

(ण) विवक्षितेति।—विवक्षितं—वक्तुमिष्टम्, अबाधितस्वरूपमित्यर्थः, अभिधेयं—वाच्यं, यत्र तादृशः, ध्वनिरिति शेषः, अपि प्रथमं द्विभेदः—द्विप्रकारः, मतः, पश्चादस्यापरे भेदाः वक्तव्याः इति भावः। तावेव निर्दिशति, असंलक्ष्येति।—यत्र—यस्मिन् ध्वनौ, व्यङ्ग्यः—व्यञ्जनाबोध्योऽर्थः, असंलक्ष्यक्रमः,—न सं—सम्यक्, लक्ष्यः,—लक्षयितुं शक्यः, इत्यसंलक्ष्यः, क्रमः—पौर्वापर्य्यं, यस्य तादृशः, सः असंलक्ष्यक्रमव्यङ्ग्यः इत्यर्थः; तथा यत्र व्यङ्ग्यः लक्ष्यक्रमः, स संलक्ष्यक्रमव्यङ्ग्य इत्यर्थः। व्यक्ते हि तावत् प्रस्तावे झटिति ज्ञातेषु विभावादिषु काव्यार्थभावनास्वतन्त्रेण प्रमात्रा अल्पीयसा समयेन सोऽर्थः ज्ञायते, तत्र हेतुहेतुमद्भावयोः पूर्वापरभावक्रमस्य असंलक्षणाद्धेतोः असंलक्ष्यक्रमव्यङ्ग्यः कथ्यते। यत्र हि विचारबोध्यः प्रस्तावः, विचारणीया वा विभावादयः, तत्र चमत्कारस्य साधनसामग्रीप्रतीक्षणोन्मुखकालायत्ततया मन्थरा प्रवृत्तिः, इति तथाविधस्य चमत्कारस्य संलक्ष्यक्रमव्यङ्ग्य इति व्यपदेशो बोध्यः।

(त) तत्रेति।—तत्र—तयोर्मध्ये, आद्यः—असंलक्ष्यक्रमव्यङ्ग्य इत्यर्थः, रसभावादिः, [आदिना रसाभासादिग्रहणम्] एक एव—एकविध एव, अत्र—काव्यप्रभेदगणनाऽवसरे, गण्यते; एकप्रकारत्वे हेतुमाह, एक इति।—यत् यस्मात्, तस्य—व्यङ्ग्यस्य, एकोऽपि भेदः—विशेषः, अनन्तत्वात्—अतिबाहुल्यात्, नैव, सङ्ख्येयः—सङ्ख्यातुं शक्य इत्यर्थः। एतदीयस्यैकस्य प्रभेदस्यापि अवान्तरभेदप्रभेदावतारानन्त-

उक्तस्वरूपो रसभावादिरसंलक्ष्यक्रमव्यङ्ग्यः। अत्र व्यङ्ग्यप्रतीतेर्विभावादिप्रतीतिकारणकत्वात् क्रमोऽवश्यमस्ति, किन्तु उत्पलपत्रशतव्यतिभेदवल्लाघवान्न संलक्ष्यते। एषु रसादिषु च एकस्यापि भेदस्यानन्तत्वात् सङ्ख्यातुमशक्यत्वादसंलक्ष्यक्रमव्यङ्ग्यध्वनिर्नाम काव्यमेकभेदमेवोक्तम्। तथाहि,—एकस्यैव हि शृङ्गारस्य एकोऽपि सम्भोगरूपो भेदः परम्परालिङ्गनाधरपानचुम्बनादिभेदात् प्रत्येकञ्च विभावादिवैचित्र्यात् सङ्ख्यातुमशक्यः, का गणनाऽत्र सर्वेषाम्? (थ)

शब्दार्थोभयशक्त्युत्थे व्यङ्ग्येऽनुस्वानसन्निभे।
ध्वनिर्लक्ष्यक्रमव्यङ्ग्यस्त्रिविधः कथितो बुधैः॥२५९॥(द)

तथा बालानां बोधसौकर्य्याय सर्वभेदप्रभेदमूलभूत एक एवाद्यः प्रभेदोऽभिमन्यते इति भावः।

(थ) अत्र तावद्व्यङ्ग्यस्यासंलक्ष्यक्रमत्वं समर्थयते, अत्रेति।—व्यङ्ग्यस्य असंलक्ष्यक्रमत्वेनाभिमतस्य व्यङ्ग्यार्थस्य, या प्रतीतिः—स्वरूपेण सत्त्वं, तस्याः, विभावादीनां प्रतीतिः—बोधः, कारणं यस्य तत्त्वात्, विभावादिप्रतीतिमात्रावष्टम्भनत्वादिति यावत्, विभावादिप्रतीतेश्च क्रमेण (विभावप्रतीत्यनन्तरमनुभावप्रतीतिरनुभावप्रतीत्यनन्तरञ्च सञ्चारिप्रतीतिरित्येवं पौर्वापर्य्येण) सम्पद्यमानत्वादिति भावः। क्रमः—पौर्वापर्य्यम्, अवश्यम् अस्ति, किन्तु, उत्पलपत्रशतस्य—कमलपत्रशतकस्य, व्यतिभेदः—झटिति भेदनं, तद्वत् लाघवात्—रसभावादेः अतिशीघ्रजन्यत्वादित्यर्थः, न संलक्ष्यते। अयं भावः—कमलस्य शतपत्राणि यदि कश्चिद्भिन्द्यात्, तर्हि नैकेन कालेन, किन्तु अनेकैः कालैः, अतस्तत्र क्रमोऽवश्यमस्ति, तथाऽपि स क्रमो यथा न लक्ष्यते, तथा विभावानुभावसञ्चारिणामानुपूर्व्येण प्रतीयमानत्वेऽपि न क्रमस्तत्र प्रतीयते, तेषामति झटिति सम्मिलिततयैव प्रतीतेः, इति विभावादिप्रतीतिरसंलक्ष्यक्रमव्यङ्ग्यव्यपदेश्येति स्थितम्। इति। एषु—रसभावादिषु इत्यर्थः, अनन्तत्वात्, अत एव सङ्ख्यातुमशक्यत्वात् इति सारः। उक्तमर्थं विशेषाख्यानेन द्रढयति, तथाहीति—विभावादीनां वैचित्र्यात्—वैलक्षण्यात्। स्पष्टमन्यत्।

(द) लक्ष्यक्रमव्यङ्ग्यध्वनिमाह, शब्देति।—अनुस्वानः—अनुरञ्जनं, प्रति-

ध्वनिरिति यावत्, (तत्र खलु जनकीभूतशब्दोत्तरजायमानलक्षणप्रधानी वक्ष्यते। तत्रभेदे—तद्गुणरूपे, व्यङ्ग्ये, शब्दार्थोभयशक्त्याश्रये,—शब्दशक्त्यैव तदुभयत्र च प्रतीयमाने—वाचिर्भवति, यत् तस्मिन्, शब्दशक्त्या उक्तिते, अर्थशक्त्या उक्तिते, शब्दार्थोभयशक्त्या च उक्तिते सति इत्यर्थः, वक्ष्यमाणस्यः ध्वनिः, बुधैः—विदग्धैः, विविधः—शब्दशक्त्युद्भवः अर्थशक्त्युद्भवः शब्दार्थोभयशक्त्युद्भवश्चेति त्रिप्रकारः, कथितः। (इदमत्राकूतम्;—ननु यदि शब्दनिष्ठया शक्त्या प्रतीयमानो यत्रेतरौ वर्णौ ध्वनेः विशेषोऽपि भवेत्, तर्हि शब्दनिष्ठया शक्त्याऽर्थान्तररूपः श्रेयो विद्युत्सदृश एव भवेत्, इति चेत् एवं व्यवस्था,—यत्र शब्दनिष्ठया शक्त्या साक्षादनुत्थापितः, किन्तु वाचिना सन् प्रतीयेत, स सर्वो ध्वनेर्विषयः, यस्तु तया साक्षादुत्थापितात्मा, स सर्वः श्रेयश्च विषय इति। तथाऽऽहुर्ध्वनिकाराः,—"वाचिन एवालङ्कारः शब्दशक्त्या प्रकाश्यते। यत्रिरनुरणः शब्देन शब्दशक्त्युद्भवो हि सः॥" इति। अलङ्कारो वस्तु चेत्यनयं यत्र प्रकाश्यते, स शब्दशक्त्युद्भवो ध्वनिः, यत्र तु ते वस्तुनी प्रकाशेते स श्रेयः, यथोदाहृते "येन भङ्गमनोभवेन" इत्यादौ। अत्र हि माधवीमाधवस्वरूपवर्णनरूपे ते वस्तुनी प्रकरणादेरनियन्त्रिततया तत्तेन्द्रियेण प्रतिभावतां प्रतिभासमं गाहेते, यद्यपि भट्टोद्भटेन अलङ्कारान्तरप्रतीतावपि श्रेयोऽङ्गीकृतः, यथा,—"तथा विनाऽपि हारेण निसर्गादेव हारिणी। जनयामासतुः कस्य विस्मयं न पयोधरौ?॥" इत्यादौ अलङ्कारो विरोधः, तदन्यत्र अलङ्कारस्वचारी विस्मयः प्रकाश्यते इति अलङ्कारान्तरस्य विस्मयस्य प्रतीतेः विरोधानुगतः श्रेयः; न तु अत्र वक्ष्यमाणव्यङ्ग्यो ध्वनिः; यद्यपि यत्र वाचिना नालङ्कारान्तरप्रतीतिः तत्रैव स्यात्, किन्तु यत्र सामर्थ्यादाक्षिप्तं सत् शब्दशक्त्या अलङ्कारान्तरं प्रतिभासते, स सर्व एव ध्वनेर्विषयः। तथा हि—"कदाचित् कुसुमसमयमुपसंहरन्नुच्चत्र वीचानिलाः सम्फुल्लमल्लिका वनराजयो मदालसाः" इत्यादौ हर्षचरिते ऋतुवर्णनप्रकरणेनेन्द्रियेण अभिधायां नियन्त्रितायाम् "अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी" इति न्यायानुसारेण मदालसादिषु शब्देषु स्वस्वार्थे बोधयित्वा च विरतेषु अपि सकलवस्तुदर्शी भावुकः यः कोऽपि, स शब्दशक्त्याऽऽक्षिप्तं इति शब्दशक्त्युद्भव इति बोद्धव्यम्। इति। अतैव—"अनेकवर्णानां शब्दानां प्रकरणादिनेन्द्रियेण अर्थान्तरेषु नियन्त्रितेषु एक एवार्थोऽभिधया प्रतिपादयितुं शक्यते, तदनन्तरं भासमानः श्रोद्धव्यः शब्दशक्त्युद्भवः, एवं सति शब्दाभिमृष्टस्यन्यत्वाद्विरोधः" इत्यादु; अपरे त्वाहुः—"श्रोचादि शब्दानां नानाऽर्थतात्पर्यवत्त्वाभिधा सत्यपि नियन्त्रणान्तरेऽपि भासमानमर्थमुपस्थापयतीति शब्दशक्त्युद्भवत्वं दुर्वारम्" इति। केचित् पुनः प्राहुः—"शब्दभेदे शाब्दः श्रेयः, शब्दार्थभेदे च अभिन्नेदेन शब्दभेदोऽप्यङ्गीकर्तव्यः, यत्र तु शब्दार्थशक्ति-

क्रमसह्यत्वादेवानुरणनरूपो (ध) यो व्यङ्ग्यस्तस्य शब्दशक्त्युद्भवत्वेन अर्थशक्त्युद्भवत्वेन शब्दार्थशक्त्युद्भवत्वेन च त्रैविध्यात् संलक्ष्यक्रमव्यङ्ग्यानाम्नो ध्वनेः काव्यस्यापि त्रैविध्यम्। तत्र,—

वस्त्वलङ्काररूपत्वाच्छब्दशक्त्युद्भवो द्विधा ॥२६०॥(न)

निर्यन्त्रितत्वेऽपि अर्थान्तरप्रतीयमानत्वेन च शब्दभेदाङ्गीकारानौचित्यं, तत्र प्रतीयमानार्थरूपत्वम्" इति। "सम्फुल्लमल्लिकाधवलाट्टहासः" इत्यादौ सम्फुल्लमल्लिका एव धवलाट्टहासो यस्य तादृशः इत्यादिव्युत्पत्त्यनुसारेण व्याख्यानान्तरप्रतिपादनेऽभिधाऽन्तरमेवोचितमिति, एवं सति अर्थान्तरमभिधयैव न तु व्यञ्जनया बोध्यम्; अत्र तयोः प्राकरणिकाप्राकरणिकयोर्द्वयोरर्थयोर्या रूपचा सा प्रतीयमाना, तत्र अभिधाया असम्भवात्। अतः तथाविधायां रूपचायां शब्दशक्तिमूला व्यञ्जनैव शरणं, व्यञ्जनया विना तथाविधायाः रूपचायाः प्रतीतेरसम्भवात्। अत एवायमलङ्कारध्वनिरिति वक्तुं युक्तम्। एवंविधोदाहरणस्थलेषु अभिधया प्राकरणिके प्रथमार्थे नियन्त्रिते शब्दशक्त्या द्वितीयार्थे प्रकाशमाने सति वाक्यार्थस्वीकृतेः प्राकरणिकाप्राकरणिकार्थयोरुपमानोपमेयभावः अवश्यमङ्गीकार्यः, श्लेषस्तु "अर्थभेदे शब्दभेदः" इति शब्दद्वयमूलः, अयं पुनर्ध्वनिः नियन्त्रितानेकाप्राकरणिकार्थानां शब्दानां सामर्थ्यादाक्षिप्तत्वात् इति भिन्न एवायं श्लेषादिति दिक्।

(ध) क्रमेति।—क्रमस्य—व्यङ्ग्यप्रतीतिपौर्वापर्यस्य, सह्यत्वात्—स्फुटं प्रतीयमानत्वात्, एव अनुरणनरूपः, प्रतिध्वनितुल्यः इत्यर्थः। अन्यत् स्पष्टम्।

(न) वस्त्विति।—शब्दशक्त्युद्भवः, व्यङ्ग्य इति शेषः, वस्तुरूपत्वात्, अलङ्काररूपत्वाच्च द्विधा भवति, ततश्च शब्दशक्त्युद्भवो वस्तुध्वनिः, अलङ्कारध्वनिश्चेति फलितम्। अत्रेदं बोध्यं,—यत्र यत् किमपि प्रतीयमानमलङ्कारशून्यं सत् चमत्क्रुते, तत्र तद्वस्तुध्वनिव्यपदेश्यम्; यद्वोदाहरिष्यमाणे "पंथिअ" इत्यादौ। यत्र पुनर्वस्तुचमत्कारकारणमलङ्कारप्रतीयमानत्वं भवेत्, तत्र तदलङ्कारध्वनिव्यपदेश्यम्, इति प्राचामाशयः, उक्तञ्च रसगङ्गाधरकारैः,—"अलङ्कारप्रतीतिश्चेत् स्वयं यत्र चमत्कृते। अलङ्कारध्वनिस्तत्र स्यात्चमत्कारकारणम्॥ यत्र तु स्वादलङ्कारशून्यमेव चमत्कृते। तत्र वस्तुध्वनिर्द्वयो भेदस्तु पिण्डखजूरवत्॥" इति। वयन्तु उभयोश्चमत्कारकारणत्वे वस्त्वलङ्कारोभयध्वनिमपि अङ्गीकुर्मः; काव्यस्य रसमात्रजीविततया रसस्य च "रसे सारश्चमत्कारः" इति नारायणोक्त्या "चमत्कारैकमूलं स्यात् काव्यम्" इति भरतोक्त्या च काव्यात्मनामपि चमत्कारमात्रप्राणत्वादिति।

अलङ्कारशब्दस्य पृथगुपादानादनलङ्कारं(प)वस्तुमात्रं गृह्यते। तत्र वस्तुरूपशब्दशक्त्युद्भवो व्यङ्ग्यो यथा,—

"पंथिअ! ण एत्थ सत्थरमत्थि मणं पत्थरत्थले गामे।
उण्णअपओहरं पेक्खि ऊण जइ वससि ता वससु॥" (फ)

अत्र सत्थरादिशब्दशक्त्या यद्युपभोगक्षमोऽसि तदाऽऽस्स्वेति वस्तु व्यज्यते। (ब)

(प) अलङ्कारेति।—अनलङ्कारम्—अलङ्कारशून्यम् [अलङ्कारशब्दोऽत्र धर्मपरः, तेन न विद्यते अलङ्कारः,—अलङ्कारत्वं यत्र इति बहुव्रीहिः, तत्पुरुषसमासे क्लीबत्वं न स्यात्। "शेषतत्पुरुषद्वन्द्वावन्त्यस्थपदलिङ्गकौ" इति अनुशासनेन पुंस्त्व प्रसक्तेः]।

(फ) पंथिअ इति।—["पथिक! नात्र स्रस्तरमस्ति मनाक् प्रस्तरस्थले ग्रामे। उन्नतपयोधरं प्रेक्ष्य पुनर्यदि वससि तद् वस॥" इति संस्कृतम्]। वासार्थिनं पथिकं प्रति कस्याश्चित् स्वयंदूत्या उक्तिरियम्। हे पथिक! अत्र प्रस्तरस्थले—पाषाणबहुले, ग्रामे, मनाक्—अल्पम्, अपीति शेषः, स्रस्तरम्—आसनं, शयनीयकट इति यावत्, न अस्ति, प्रस्तरेष्वेव वयं स्वपिमः, नात्र अन्यः शय्याविधाननियम इति भावः। उन्नतपयोधरम्—उन्नतमेघं, दृष्ट्वा—अविलम्बमेव वर्षिष्यतीत्यालोच्य, यदि वससि—वासमिच्छसि, तत्—तदा, वस, नात्र पुनः कश्चिदिवावरोध इति भावः। अत्र निवासोपयुक्त शयनीयकटादिकमत्र नास्त्येव मेघप्रतिरुद्धगतिकतया यदि वससि, तद्वस इत्यर्थः आपाततः प्रतीयते। आर्य्या छन्दः।

(ब) व्यङ्ग्यमवगमयति, अत्रेति।—सत्थरादिशब्दशक्त्या,—अत्र आदिपदेन पत्थरपओहरशब्दयोर्ग्रहणम्। यदि असि [इदमव्ययम्] त्वं, (सम्बोध्यः) देशदेशान्तरसञ्चारितयोपार्जितसकलेङ्गितादिविज्ञान इति यावत्, उपभोगक्षमः,—परदारोपगमनरहस्यविज्ञतया पर्य्यटनश्रमानातुरतया वा प्रियतमारहितत्वेन मदनार्दितत्वेन वा रमणीलामेच्छुकतया कामिन्या आमोदं वर्द्धयितुं शक्तो भवसि, तदा—तर्हि, आस्स्व—क्षणमुपविश, इति—एवंविधं, वस्तु व्यज्यते। अयं भावः,—सत्थरशब्दः प्राकृतभाषायां शयनीयार्थः, परदारगमननिषेधपरशास्त्रार्थकश्चेति श्लिष्टः, पत्थर-(प्रस्तर)-शब्दः संस्कृतभाषायां पाषाणवाचकः, लक्षणया तत्सदृशजडार्थश्चेति श्लिष्टः, पओहर-(पयोधर)-शब्दश्चैवं प्राकृतसंस्कृतभाषयोः स्तनमेघार्थकतया श्लिष्टः, इत्येतेषां सत्थर-(स्रस्तर)-पत्थर-(प्रस्तर)-पओहर-(पयोधर)-शब्दानां प्राकृतसंस्कृततदुभयभाषणेषु स्रस्तराद्यनेका-

अलङ्काररूपो यथा,—"दुर्गालङ्घितविग्रहः" इत्यादि। अत्र प्राकरणिकस्य उमानाममहादेवीवल्लभभानुदेवनामनृपतेर्वर्णने द्वितीयार्थसूचितमप्राकरणिकस्य पार्वतीवल्लभस्य वर्णनमसम्बद्धं मा प्रसाङ्क्षीदितीश्वरभानुदेवयोरुपमानोपमेयभावः कल्प्यते। (भ) तदत्र "उमावल्लभ उमावल्लभ इव" इत्युपमाऽलङ्कारो व्यङ्ग्यः।

यथा वा,—

"अमितः समितः प्राप्तैरुत्कर्षैर्हर्षद ! प्रभो !।
अहितः सहितः साधुयशोभिरसतामसि॥" (म)

र्थकतया अत्र शयनीयं, परदारगमनदोषविचारश्च नास्ति, प्रस्तरप्रायोऽयं मूर्खप्रायोऽयञ्च देशोऽस्ति, अतो यदि पयोधरं मेघोपस्थितिं सम्भाव्य पुरो गन्तुं नेच्छसि, यदि वा स्तनमण्डलमुच्चैः स्फुरदवलोक्य तावता तयोः सौन्दर्य्याद्यनुमाय रिरंसुरसि, तत् यावत् सायंसमयः, यावच्च तिमिरं न प्रसरेत्, तावत् प्रमदाविरहेण प्रमदाऽन्तरविषयिणीं पर्य्युत्सुकतां निरुन्धेति स्वप्रार्थनीयं वस्तु स्वयंदूत्या कयाऽपि नायिकया कस्यचित् पान्थस्य पुरस्तात् प्रकट्यते इति। परम्परयाऽपि शब्दशक्त्युद्भवो ध्वनिः सम्भवति, यथा,—"शनिरशनिश्च तमुच्चैर्निहन्ति कुप्यसि नरेन्द्र ! यस्मै त्वम्। यत्र प्रसीदसि पुनः स भात्युदारोऽनुदारश्च॥" शनिः,—ग्रहविशेषः इत्यर्थः, अशनिः,—वज्रं, तमुच्चैः, निहन्ति, स उदारः,—स्वयं सम्पत्तिं प्राप्य परेभ्यः सम्प्रदानपरः, अनुदारः,—अनुमतदार इत्यर्थः; स्पष्टमन्यत्। अत्र यः शनिर्न सोऽशनिरित्येवं विरोधाभाससाहचर्य्येण शनिरशनिश्चेत्येतौ, उदारोऽनुदारश्चेत्येतौ च विरुद्धावपि त्वदनुवर्त्तनार्थमेकं कार्य्यं कुरुत इति वस्तु प्रतीयते। स्पष्टञ्चैतत् काव्यप्रकाशे इति।

(भ) अलङ्कारेति।—अलङ्काररूपः, शब्दशक्त्युत्थव्यङ्ग्य इति अनुषङ्गः। मा प्रसाङ्क्षीत—प्रसक्तं मा भूदित्यर्थः। स्पष्टमन्यत्।

(म) शब्दशक्तिमूलमलङ्कारान्तरमाह, अमित इति।—हे प्रभो ! हे हर्षद !—हर्षं ददाति मित्रेभ्य इति तथोक्त; हर्षं द्यति—छिनत्ति, नाशयतीति यावत्, शत्रूणामिति तथोक्त ! च, मित्रहर्षदायक ! शत्रुहर्षखण्डक ! इत्यर्थः, एवं पदाभङ्गेऽपि विरोधः ["हर्षदः" इति पाठान्तरे तु तथाभूतस्त्वमित्यर्थः,] समितः,—सङ्ग्रामात्, प्राप्तैः,—लब्धैः, उत्कर्षैस्त्वम्, अमितः,—अपरिमितः, असि। साधुयशोभिः,

अत्रामित इत्यादावपिशब्दाभावाद्विरोधाभासो व्यङ्ग्यः। व्यङ्ग्यस्यालङ्कार्य्यत्वेऽपि ब्राह्मणश्रमणन्यायादलङ्कारत्वमुपचर्य्यते। (य)

वस्तु वाऽलङ्कृतिर्वाऽपि द्विधाऽर्थः सम्भवी स्वतः।
कवेः प्रौढ़ोक्तिसिद्धो वा तन्निबद्धस्य चेति षट्॥
षड्भिस्तैर्व्यज्यमानस्तु वस्त्वलङ्काररूपकः।
अर्थशक्त्युद्भवो व्यङ्ग्यो याति द्वादशभेदताम्॥२६१॥(र)

—पवित्रकीर्त्तिभिः, सहितः,—युक्तस्त्वम्, असतां—दुष्टानाम्, अहितः,—शत्रुः, असि। अत्रामितस्य समितत्वमिति, अहितस्य सहितत्वमिति च आपाततो विरोधः, इति तात्पर्य्यम्।

(य) विरोधाभासस्य वाच्यत्वे पदयोः समानविभक्तिकत्वमपिचकारसत्त्वञ्चापेक्षितं, तदभावादेवात्र व्यङ्ग्यत्वमित्याह, अपिशब्दाभावादिति।—अपिशब्दस्य प्रयोगाकरणादित्यर्थः, (एतदुपलक्षणं, तेन समानविभक्तिकत्वाभावात्, चेतिनिवेशाभावाच्च इत्यपि द्रष्टव्यम्)। ननु रसस्य प्रकर्षतया उपमाऽऽदेः यदा गौणत्वं, तदैवालङ्कारत्वमिति उत्तरत्र निरूपयिष्यते, अत्र तु व्यङ्ग्यत्वेनास्वाद्यतया मुख्यत्वं, तत् कथमलङ्कारत्वम्? इत्याशङ्क्याह, व्यङ्ग्यस्येति।—ब्राह्मणोऽसौ श्रमणः,—बौद्धसन्न्यासी, इति ब्राह्मणश्रमणः तस्य न्यायः,—युक्तिः, निदर्शनमिति यावत्, तस्मात्, सन्न्यासिदशायां तस्य ब्राह्मणत्वाभावेऽपि यथा दशाऽन्तरीयं ब्राह्मणत्वमादाय असौ ब्राह्मण इति व्यपदिश्यते, तथा अलङ्कारस्यात्र व्यङ्ग्यत्वेऽपि वाच्यतादशीयमलङ्कारत्वमादाय इति भावः, अलङ्कारत्वम्, उपचर्य्यते—व्यपदिश्यते।

(र) अर्थशक्त्युद्भवं व्यङ्ग्यमाह, वस्त्विति।—वस्तु वा, अलङ्कृतिः वा इत्येव द्विधा—द्विप्रकारः, अर्थः, स्वतःसम्भवी—समुचिततया बहिरपि सम्भाव्यमानसत्स्वरूपः, न हि केवलं वाग्विन्यासेन निष्पन्नात्मा, किन्तु स्वभावसिद्ध इत्यर्थः, कवेः प्रौढ़ोक्त्या सिद्धः—बहिरवर्त्तमानोऽपि कवयितृप्रतिभायोगेन तथा निरूपितः ["अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हि" इति नयादिति बोध्यम्] तथा सन्निबद्धस्य—कविनिबद्धस्य जनस्य, कविवर्णितस्य वक्तुः इत्यर्थः, च प्रौढ़ोक्तिसिद्धः, इति षट्प्रकारो भवति। तैः षड्भिः, व्यज्यमानः,—प्रतीयमानः, अर्थशक्त्या उद्भवः व्यङ्ग्यः, तु—पुनः, वस्त्वलङ्कार-

स्वतःसम्भवी औचित्यात् बहिरपि सम्भाव्यमानः। प्रौढ़ोक्त्या सिद्धः, (ल) न तु औचित्येन। तत्र क्रमेण यथा,—

"दृष्टिं हे प्रतिवेशिनि! क्षणमिहाप्यस्मद्गृहे दास्यसि,
प्रायेणास्य शिशोः पिता न विरसाः कौपीरपः पास्यति।
एकाकिन्यपि यामि सत्वरमितः स्रोतस्तमालाकुलं
नीरन्ध्रास्तनुमालिखन्तु जरठच्छेदा नलग्रन्थयः॥" (व)

रूपकः,—वस्तुरूपो वा अलङ्काररूपो वा इत्यर्थः, द्वादशभेदतां, याति—प्राप्नोति। तथा हि, स्वतःसम्भवी, कविप्रौढ़ोक्तिसिद्धः, कविवर्णितनायकादि-(कथयितृ)-प्रौढ़ोक्तिसिद्धः, इति भेदेन त्रिप्रकारः; पुनः वस्तुमात्रालङ्कृतिरूपाभ्यां द्विधा भिन्नः षट्प्रकारः, षट्प्रकाराणां प्रत्येकं वस्तुव्यङ्ग्यालङ्कृतिव्यङ्ग्यभेदाभ्यां भिन्नत्वे द्वादशभेदाः इति सारः। ततश्च स्वतःसम्भविना वस्तुना व्यज्यमानो वस्तुरूपव्यङ्ग्य इत्येकः, स्वतःसम्भविना वस्तुना व्यज्यमानो अलङ्काररूपव्यङ्ग्य इति द्वितीयः, स्वतःसम्भविना अलङ्कारेण व्यज्यमानो वस्तुरूपव्यङ्ग्यः इति तृतीयः, स्वतःसम्भविना अलङ्कारेण व्यज्यमानोऽलङ्काररूपव्यङ्ग्य इति चतुर्थः, कविप्रौढ़ोक्तिसिद्धेन वस्तुना व्यज्यमानो वस्तुरूपव्यङ्ग्य इति पञ्चमः, कविप्रौढ़ोक्तिसिद्धेन वस्तुना व्यज्यमानः अलङ्काररूपव्यङ्ग्य इति षष्ठः, कविप्रौढ़ोक्तिसिद्धेन अलङ्कारेण व्यज्यमानो वस्तुरूपव्यङ्ग्य इति सप्तमः, कविप्रौढ़ोक्तिसिद्धेन अलङ्कारेण अलङ्काररूपव्यङ्ग्य इति अष्टमः, कविनिबद्धव्यक्तिप्रौढ़ोक्तिसिद्धेन वस्तुना व्यज्यमानो वस्तुरूपव्यङ्ग्य इति नवमः, कविनिबद्धव्यक्तिप्रौढ़ोक्तिसिद्धेन वस्तुना व्यज्यमानोऽलङ्काररूपव्यङ्ग्य इति दशमः, कविनिबद्धव्यक्तिप्रौढ़ोक्तिसिद्धेन अलङ्कारेण व्यज्यमानो वस्तुरूपव्यङ्ग्य इति एकादशः, कविनिबद्धव्यक्तिप्रौढ़ोक्तिसिद्धेन अलङ्कारेण व्यज्यमानोऽलङ्काररूपव्यङ्ग्यः द्वादश इति फलितम्।

(ल) स्वतःसम्भविपदार्थं व्याचष्टे, स्वत इति।—औचित्यात्—याथार्थ्यात्, बहिरपि, सम्भाव्यमानः,—तादृशशब्दातिरिक्तप्रमाणेनाऽपि प्रतीयमानः, रूपकाऽलङ्कारे रूप्यरूपकयोरभेदस्यालीकत्वेऽपि तयोः सादृश्यस्यापि लोकप्रसिद्धत्वे स्वतःसम्भवित्वम्; अत एव "अधरस्नानकमलदलम्" इति रूपकं स्वतःसम्भवितया काव्यप्रकाशे उक्तम्। "धम्मिल्ले नवमल्लिकासमुदयः" इति सादृश्याप्रसिद्ध्या प्रौढ़ोक्तिसिद्धं रूपकमुदाहरिष्यति। प्रौढ़ोक्तिपदार्थमाह, प्रौढ़ोक्त्येति।—प्रौढ़ोक्त्या—वर्णनमात्रेण, सिद्धः,—निष्पन्नवत्प्रतीयमान इत्यर्थः।

(व) तत्र स्वतःसम्भविवस्तुव्यङ्ग्यत्वमाह, दृष्टिमित्यादि।—कस्याश्चित्कुलटा-

अनेन स्वतःसम्भविना वस्तुमात्रेण एतत्प्रतिपादिकाया भावि-परपुरुषोपभोगजनखक्षतादि गोपनरूपं वस्तुमात्रं व्यज्यते। (श)

"दिशि मन्दायते तेजो दक्षिणस्यां रवेरपि।
तस्यामेव रघोः पाण्ड्याः प्रतापं न विषेहिरे॥" (ष)

अनेन स्वतःसम्भविना वस्तुना रवितेजसो रघुप्रतापोऽधिक इति व्यतिरेकालङ्कारो व्यज्यते। (स)

नायिकायाः कामपि प्रतिवेशिनीं प्रत्युक्तिरियम्। हे प्रतिवेशिनि!—मम गृहान्तिक-निवासिनि! क्षणम्, इह, अस्मद्गृहे, अपि [एतेन स्वगृहे च इति बोध्यते] दृष्टिं दास्यसि, अस्य शिशोः,—बालकस्य, पिता—मद्भर्त्ता इत्यर्थः, विरसाः,—विस्वादाः, कौपीः,—कूपभवाः, अपः,—जलानि, प्रायेण—प्रायः, न तु सर्वदेति भावः, न पास्यति, (अतः) एकाकिनी अपि इतः,—अस्मात् प्रदेशात्, सत्वरं, तमालाकुलं—तमालवनवेष्टितं स्रोतः,—नदीमित्यर्थः, यामि—गच्छामि, नीरन्ध्राः,—निविड़ाः, निरवकाशा इत्यर्थः, जठरच्छेदाः,—जठरः,—कठिनः, छेदः,—अग्रभागो येषां ते, नलग्रन्थयः,—नलानां—तृणविशेषाणां, ग्रन्थयः,—पर्वाणि, तनुं—शरीरम्, आलिखन्तु—अङ्कयन्तु, खण्डयन्तु इति यावत्; न ततो मे काऽपि क्षतिरिति भावः। विज्ञाकायाः पद्यमिदम्। शार्दूलविक्रीड़ितं वृत्तम्।

(श) व्यङ्ग्यमाह, अनेनेति।—अनेन—वाक्यार्थेन, वाक्यार्थद्वारेति भावः, स्वतःसम्भविना—स्वभावसिद्धेन, लोकप्रसिद्धेन इति यावत्, वस्तुमात्रेण—अनलङ्कारेण वस्तुना, तद्द्वारेति यावत्, एतत्प्रतिपादिकायाः,—एतस्य वाक्यार्थस्य वक्त्र्याः, भाविपर-पुरुषोपभोगजनखक्षतादिगोपनरूपं—भावी यः परपुरुषकर्तृक उपभोगः,—अधर-पानादिस्तस्माज्जायते यत्तथाभूतं नखक्षतादि तस्य यद्गोपनम्—आच्छादनं तद्रूपं, वस्तु-मात्रम्, [मात्रपदेनालङ्कारसम्भवव्यवच्छेदः सूच्यते] अस्या नायिकाया वैशिष्ट्यादिति शेषः, व्यज्यते—ध्वन्यते।

(ष) स्वतःसम्भविवस्तुव्यङ्ग्यालङ्कारमाह, दिशीति।—दक्षिणस्यां दिशि, रवेः,—सूर्य्यस्य, अपि तेजः, मन्दायते—मन्दीभवति, मृदूभवतीत्यर्थः, पाण्ड्याः,—तदाख्यक्षत्रियभेदाः, तस्यामेव—दक्षिणस्यामपि (अत्र एवकारः अप्यर्थे) दिशि रघोः प्रतापं—दण्डजं तेजः, ("स प्रतापः प्रभावश्च यत्तेजः कोषदण्डजम्" इत्यमरः) न विषेहिरे—न सोढुं शक्ता आसन् इत्यर्थः। रघुवंशस्येदं पद्यम्।

(स) अनेनेति।—अनेन—निरुक्तवाक्यार्थद्वारकेण, स्वतःसम्भविना—दक्षिणा-

"आपतन्तममुं दूरादूरीकृतपराक्रमः।
बलोऽवलोकयामास मातङ्गमिव केशरी॥" (ह)

अत्र उपमाऽलङ्काररूपेण स्वतःसम्भविना (क) व्यञ्जकार्थेन "बलदेवः क्षणेनैव वेणुदारिणः क्षयं करिष्यति" इति वस्तु व्यज्यते।

"गाढ़कान्तदशनक्षतव्यथासङ्कटादरिवधूजनस्य यः।
ओष्ठविद्रुमदलान्यमोचयन्निर्दशन् युधि रुषा निजाधरम्॥"(ख)

यनेऽपि प्रभावाधिक्यवर्णनावष्टम्भेन अवश्यम्भाविनेत्यर्थः, वस्तुना—रवितेजसो मन्दीभावेनेत्यर्थः, व्यतिरेकः,—उपमानादुपमेयस्याधिक्यं, न्यूनत्वं वा, व्यज्यते—ध्वन्यते, तस्य व्यङ्ग्यत्वञ्च प्रकृतोपयोगिप्रकर्षनिकर्षयोरन्यतरस्य बोधाभिप्रायेण प्रयुक्तधर्मस्य तत्प्रकारत्वाऽसम्भवेन तद्बोधानुपपत्त्या निरुक्तधर्मव्यङ्ग्यकारणमुखेन तद्बोधोपपत्तौ भवति, दिशीत्यादौ पुनः रवितेजसो मार्दवयुक्तो यो निकर्षः तस्यासह्यत्वप्रयुक्तरघुप्रतापगतप्रकर्षनिरूपकत्वाभावात् प्रकृतानुपयोगितया मार्दवव्यङ्ग्यसह्यत्वेन प्रकृतोपयोगिनिकर्षप्रत्यायनात् व्यतिरेकस्य व्यङ्ग्यत्वं सम्पन्नमिति भावः।

(ह) स्वतःसम्भव्यलङ्कारव्यङ्ग्यवस्त्वाह, आपतन्तमिति।—ऊरीकृतः,—स्वीकृतः, पराक्रमो येन तथोक्तः, पराक्रमितुमुद्यतः इत्यर्थः, कृतयुद्धप्रतिज्ञ इति यावत्; बलः,—हलधरः, केशरी—सिंहः, मातङ्गं—गजमिव, (विपुलविक्रमत्वेन बलस्य केशरिसादृश्यं, मदान्धत्वेन वेणुदारिणः मातङ्गसादृश्यं, लोकप्रसिद्धमेव) दूरात् आपतन्तम्—अभिमुखमागच्छन्तमित्यर्थः, अमुं—वेणुदारिणं बाणात्मजम्, अवलोकयामास; शिशुपालवधस्येदं पद्यम्।

(क) अत्रेति।—स्वतःसम्भविना—लोकप्रसिद्धेन।

(ख) स्वतःसम्भव्यलङ्कारव्यङ्ग्यमलङ्कारमाह, गाढ़ेति।—यः युधि—युद्धे, रुषा—क्रोधेन, निजाधरं निदर्शन् सन्, अरीणां—शत्रूणां, वधूजनस्य ओष्ठः एव विद्रुमः,—प्रवालं, तस्य दलानि—खण्डानि तानि, गाढ़ं यत् कान्तानां दशनक्षतं—दन्तदंशनक्षतं, तेन या व्यथा सैव सङ्कटः,—विपत्, तस्मात् अमोचयत्—मुक्तानि अकरोत्। क्रोधेन निजाधरं निदंश्य निहते शत्रौ तद्वधूनां कान्तकर्त्तव्यः रतिकालिकः अधरदंशः निवर्त्तते इत्यर्थः। अधरदंशनेन व्यथा एव जायते, न तु तन्मोचनमित्यापाततो विरोधः, आश्रयभेदे त्वविरोध एवेति बोध्यम्। रथोद्धता वृत्तं,—"रात् परैर्नरलगै रथोद्धता" इति तल्लक्षणात्।

अत्र स्वतःसम्भविना विरोधालङ्कारेण "अधरो निर्दष्टः अवयो व्यापादिताश्च" इति समुच्चयालङ्कारो व्यङ्ग्यः। (ग)

"सज्जेइ सुरहिमासो ण आपएइ जुअइजणलक्खसङ्के।
अहिणवसहआरमुहे णवपल्लवपत्तले अणंगस्स सरे॥" (घ)

अत्र "वसन्तः शरकारः, कामी धन्वी, युवतयो लक्ष्यं, पुष्पाणि शराः", इति कविप्रौढोक्तिसिद्धं वस्तु प्रकाशीभवन्मदन-विजृम्भणरूपं वस्तु व्यनक्ति। (ङ)

(ग) अत्रेति।—व्यापादिताः,—मारिता इत्यर्थः। "धनोति चार्थं तनुते च कीर्त्तिम्" इत्यादौ एकाधिकरणे चैव दृश्यते इति वक्ष्यमाणवदत्र कार्य्यकारण-कालनियमविपर्य्ययरूपातिशयोक्तिमूलं क्रियायौगपद्यं समुच्चयः। निर्दशन्निति वर्त्तमान-निर्देशात् तत्काक्षिप्तमोचनेन सह्तुमवध्यापादनस्यापि तत्काक्षिकत्वलाभः। कार्य्य-कारणयोः अवध्यापादनाऽधरदंशनयोः समकालिकत्वं बाधितमपि आक्षार्थ्यप्रतीतिविषय एव औत्पत्तिकारिताव्यञ्जननित्यवधेयम्। अत्र समुच्चयार्थकचकारादभावेन अवध्यापादन-क्रियया "अधरनिर्दंशनसमकाले एव अवयो मारिताः" इत्यर्थस्य व्यङ्ग्यत्वेन एकत्र युगपत् निर्दंशनव्यापादनक्रिययोः समावेशरूपः समुच्चयस्य व्यङ्ग्यत्वं सिद्धम्।

(घ) कविप्रौढोक्तिसिद्धवस्तुव्यङ्ग्यं वस्त्वाह, सज्जेइ इति।—["सज्जयति सुरभिमासो न चापयति युवतिजनलक्ष्यसङ्कान्। अभिनवसहकारमुखान् नवपल्लव-पत्रलाननकुसुमशरान्॥" इति संस्कृतम्]। सुरभिमासः,—वसन्तमासः, युवतिजना एव लक्ष्याणि तत्सङ्कान्—तदुपयुक्तान् ["मुहे" इति पाठे—"मुखान्" इति सं० तत्र तन्मुखान्—तदभिमुखान्, तत्संलक्ष्य प्रेरितान् इत्यर्थः] अभिनवः,—नवसमुकुलितः, सहकारः,—अतिसौरभाढ्यः ("सहकारोऽतिसौरभः" इत्यमरः) सुखम् आदिर्येषां तान्, नवपल्लव एव पर्व—पत्रः, तत् लान्ति—गृह्णन्तीति तथोक्तान्, अनङ्गशरान् सज्जयति—प्रस्तुतान् करोति, न च—नैव, अर्पयति अनङ्गायेति शेषः। एतच्च वर्णनस्यौत्पत्तिकत्वञ्च कविप्रौढोक्तिसिद्धत्वं बोध्यम्। गाथासप्तशत्याः पद्यमिदम्। अत्र गाथा छन्दः।

(ङ) अत्रेति।—प्रकाशीभवत्—सिद्धवद्भासमानं, मदनविजृम्भणरूपं—कामस्य विप्रलम्भे वर्द्धनरूपं, व्यनक्ति—प्रकटयति। अत्र वसन्तादीनां शरकारत्वादिसमर्थनमौचि-त्यमिति सङ्क्षेपः।

"रजनीषु विमलभानोः करजालेन प्रकाशितं वीर!।
धवलयति भुवनमण्डलमखिलं तव कीर्त्तिसन्ततिः सततम्॥"(च)

अत्र कविप्रौढ़ोक्तिसिद्धेन वस्तुना कीर्त्तिसन्ततेश्चन्द्रकरजालादधिककालप्रकाशकत्वेन व्यतिरेकालङ्कारो व्यङ्ग्यः।

"दशाननकिरीटेभ्यस्तत्क्षणं राक्षसश्रियः।
मणिव्याजेन पर्य्यस्ताः पृथिव्यामश्रुबिन्दवः॥" (छ)

अत्र कविप्रौढ़ोक्तिसिद्धेनापह्नुत्यलङ्कारेण भविष्यद्राक्षसश्रीविनाशरूपं वस्तु व्यज्यते। (ज)

"धम्मिल्ले नवमल्लिकासमुदयो, हस्ते सिताम्भोरुहं,
हारः कण्ठतटे, पयोधरयुगे श्रीखण्डलेपो घनः।

(च) कविप्रौढ़ोक्तिसिद्धवस्तुव्यङ्ग्यमलङ्कारमाह, रजनीष्विति।—हे वीर! रजनीषु—रात्रिषु, विमलभानोः,—उज्ज्वलकिरणस्य, चन्द्रस्येत्यर्थः, करजालेन—किरणसमूहेन, प्रकाशितम् अखिलं—समग्रं, भुवनमण्डलं, तव कीर्त्तिसन्ततिः,—यशोराशिः, सततं—रात्रिन्दिवमित्यर्थः, धवलयति—प्रकाशयति। अत्र यशसा निखिलभुवनधवलीकरणमलीकमपि कविप्रौढ़ोक्तिसिद्धम्, अखिलमित्यनेनाधिकदेशप्रकाशकत्वञ्च बोध्यम्। रात्रिन्दिवप्रकाशकस्यापि रात्रिप्रकाशकत्वमस्तीति तस्य निकर्षकारणत्वासम्भवात् तद्व्यङ्ग्येन रात्रिमात्रप्रकाशकत्वेन निकर्षप्रत्यायनात् व्यतिरेकस्य व्यङ्ग्यत्वम् इति ज्ञेयम्। गीतिश्छन्दः,—"आर्य्या प्रथमदलोक्तं यदि कथमपि लक्षणं भवेदुभयोः। दलयोः कृतयतिशोभां तां गीतिं गीतवान् भुजङ्गेशः॥" इति तल्लक्षणात्।

(छ) कविप्रौढ़ोक्तिसिद्धालङ्कारव्यङ्ग्यं वस्त्वाह, दशाननेति।—तत्क्षणं—रामजन्मक्षणे इत्यर्थः, यस्मिन् क्षणे श्रीरामः पृथिव्यामवतीर्णः, तत्क्षणं व्याप्येति भावः, राक्षसानां श्रियः,—लक्ष्म्याः, अश्रुबिन्दवः, दशाननस्य—रावणस्य, किरीटेभ्यः,—मुकुटेभ्यः, मणिव्याजेन—रत्नपतनमिषेण, पृथिव्यां पर्य्यस्ताः,—पतिताः, रावणमुकुटेभ्यः रत्नानि पेतुरित्यर्थः। [प्रकृतानां मणीनां प्रतिषेधेन अप्रकृतानामश्रुबिन्दूनां स्थापनमपह्नुति]। वृत्तमनुष्टुप्। रघुवंशस्येदं पद्यम्।

(ज) अत्रेति।—अत्र राक्षसश्रियः अश्रुबिन्दूनामलीकत्वात् अपह्नुत्यलङ्कारस्य अवास्तवत्वेन कविप्रौढ़ोक्तिमात्रसिद्धत्वमिति भावः; तेन च भविष्यद्राक्षसलक्ष्मीविनाशरूपं वस्तु व्यज्यते।

एकोऽपि त्रिकलिङ्गभूमितिलक! त्वत्कीर्त्तिराश्चर्य्ययौ
नानामण्डनतां पुरन्दरपुरीवामभ्रुवां विग्रहे॥"(झ)

अत्र कविप्रौढोक्तिसिद्धेन रूपकालङ्कारेण "भूमिष्ठोऽपि स्वर्गस्थानामुपकारं करोषि" इति विभावनाऽलङ्कारो व्यज्यते।

"शिखरिणि क्व नु नाम कियच्चिरं
किमभिधानमसावकरोत् तपः।
सुमुखि! येन तवाधरपाटलं
दशति बिम्बफलं शुकशावकः॥" (ञ)

(झ) कविप्रौढोक्तिसिद्धालङ्कारव्यञ्जनमलङ्कारमाह, धम्मिल्ल इति।—हे त्रिकलिङ्गभूमितिलक!—त्रैलङ्गदेशाभरण! एकोऽपि तव कीर्त्तिराशिः,—यशःस्तोमः, पुरन्दरपुरी—अमरावती, तत्र स्थिताः याः वामभ्रुवः,—सुन्दर्यः, तासां विग्रहे—शरीरे, नानामण्डनतां—विविधालङ्कारत्वं, ययौ—प्राप। तथा हि, धम्मिल्ले—संयतकेशे, ("धम्मिल्लः संयताः कचाः" इत्यमरः) नवमल्लिकानां समुदयः,—समूहः, कुसुमं—पुष्पं, अम्भोरुहं—पद्मं, कर्णतटे हारः, पयोधरयुगे—स्तनद्वये, घनः,—सान्द्रः, श्रीखण्डलेपः,—चन्दनविलेपनं, सज्जातः इति शेषः। [अत्र कीर्त्तिराशेर्धवल्यरूपसाद्दश्यप्रसिद्धमपि कविप्रतिभाभासासिद्धमिति तस्यालङ्करूपत्वाभावेऽपि तथात्वाङ्गीकारात् तद्भावस्य नवमल्लिकादितादात्म्येनाध्यवसायात् रूपकालङ्कारः। स्वर्गस्थितिरूपकारणं विनाऽपि कीर्त्तेः तत्स्थानामुपकारकत्वकार्य्यवर्णनात् विभावना च तदुत्थापितेति अनयोः अङ्गाङ्गिभावेन सङ्करः]। शार्दूलविक्रीडितं वृत्तम्।

(ञ) कविनिबद्धप्रौढोक्तिसिद्धवस्त्वलङ्कारं दर्शयन्नाह, शिखरिणीति।—हे सुमुखि! असौ शुकशावकः [ग्रीष्मेऽपि युवजनोचिताचाराद्यैः तपोयोगादेव इति सरसजनतयः] क्व नु—क्वचिदपि, शिखरिणि—पर्वते, कियत् चिरं—कियत्समयं व्याप्य, किमभिधानं—किमाख्यायुक्तम्, अज्ञातनामकमित्यर्थः, तपः अकरोत्—अनुष्ठितवान्, नाम—(इदं सम्भावनायाम्) सम्भाव्यते इदं मयेति भावः; येन—तपःफलेनेत्यर्थः, तव अधरवत् पाटलं—रक्तं, पाटलशब्दश्च श्वेतरक्तार्थवलेऽपि अत्र उपचारात् रक्तवर्णं बोध्यम्; बिम्बफलं दशति—निरवच्छिन्नसम्बन्धेन आस्वादयते, न केवलं सुमुखितयदुक्तिरित्यर्थः। रसज्ञतास्तेऽयं तपोबलमन्तरा न सम्भवन्ति इति सारः। द्रुतविलम्बितवृत्तं,—"द्रुतविलम्बितमाह नभौ भरौ" इति लक्षणात्।

अत्र अनेन कविनिबद्धस्य कस्यचित् कामिनः प्रौढ़ोक्ति-सिद्धेन वस्तुना "तवाधरः पुण्यातिशयलभ्यः" इति वस्तु प्रतीयते।

"सुभगे! कोटिसङ्ख्यत्वमुपेत्य मदनाशुगैः।
वसन्ते पञ्चता त्यक्ता पञ्चताऽऽसीद्वियोगिनाम्॥" (ट)

अत्र कविनिबद्धवक्तृप्रौढ़ोक्तिसिद्धेन कामशराणां कोटि-सङ्ख्यत्वप्राप्त्या निखिलवियोगिमरणेन वस्तुना "शराणां पञ्चता शरान् विमुच्य वियोगिनः श्रितेव" इत्युत्प्रेक्षाऽलङ्कारो व्यज्यते।

"मल्लिकामुकुले चण्डि! भाति गुञ्जन् मधुव्रतः।
प्रयाणे पञ्चबाणस्य शङ्खमापूरयन्निव॥" (ठ)

अत्र कविनिबद्धवक्तृप्रौढ़ोक्तिसिद्धेन उत्प्रेक्षाऽलङ्कारेण "कामस्य अयमुन्मादकः कालः प्राप्तः, तत् कथं मानिनि! मानं न मुञ्चसि?" इति वस्तु व्यज्यते। (ड)

(ट) कविनिबद्धप्रौढ़ोक्तिसिद्धवस्तुव्यङ्ग्यमलङ्कारमाह, सुभगे इति।—हे सुभगे! वसन्ते मदनाशुगैः,—कामशरैः, कोटिसङ्ख्यत्वम्—असङ्ख्यत्वमित्यर्थः, उपेत्य—प्राप्य, पञ्चता—पञ्चसङ्ख्यकत्वमित्यर्थः, त्यक्ता, परन्तु पञ्चता—मरणं, वियोगिनां—विरहिणाम्, आसीत्; विरहिणः कामशरार्त्ता मृता इति भावः।

(ठ) कविनिबद्धप्रौढ़ोक्तिसिद्धालङ्कारव्यङ्ग्यं वस्त्वाह, मल्लिकेति।—हे चण्डि!—अत्यन्तकोपने! मल्लिकामुकुले, गुञ्जन्—झङ्कारं कुर्वन्, मधुव्रतः,—भ्रमरः, पञ्चबाणस्य—कामस्य, प्रयाणे—विजययात्रायां, शङ्खम् आपूरयन्निव—आध्मापयन्निव, भाति—राजते। ["मल्लिकामुकुले भाति गुञ्जन्मत्तमधुव्रतः" इति पाठं केचिदाहुः। तन्मते—मधुव्रतस्य मत्तेति विशेषणस्य अयमभिप्रायः यत्,—शङ्खाऽऽपूरणे कर्त्तव्ये शङ्खस्य मार्गदेश एव मुखेन पूर्य्यते, अनेन तु सम्मुखभागः, इति स्थिते मधुकरस्य तद्विपर्य्ययादिति]।

(ड) अत्रेति।—कामस्येत्यत्र सहाय इति शेषः। ["कामस्य" इत्यत्र "मानस्य" इति पाठे—यथाश्रुत एवार्थो ज्ञेयः]। उन्मादकः,—प्रोषितपीड़ाऽतिशय-जनक इत्यर्थः।

महिलासहस्सभरिए तुह हिअए सुहअ ! सा अमाअंती।
अणुदिणमणण्णकम्मा अंग तणुअं पि तणुएइ॥" (ढ)

अत्र "अमाअन्ती" इति कविनिबद्धवक्तृप्रौढ़ोक्तिसिद्धेन काव्यलिङ्गालङ्कारेण "तनोस्तनूकरणेऽपि तव हृदये न वर्त्तते" इति विशेषोक्त्यलङ्कारो व्यज्यते। न खलु कवेः कविनिबद्धस्येव रागाद्याविष्टता, अतः कविनिबद्धवक्तृप्रौढ़ोक्तिः कविप्रौढ़ोक्तेरधिकं सहृदयचमत्कारकारिणीति पृथक् प्रतिपादिता; एषु च अलङ्कृतिव्यञ्जनस्थले रूपणोत्प्रेक्षणव्यतिरेचनादिमात्रस्य प्राधान्यं सहृदयसंवेद्यं, न तु रूप्यादीनामित्यलङ्कृतेरेव मुख्यत्वम्। (ण)

(ढ) महिलेति।—["महिलासहस्रभरिते तव हृदये सुभग! सा अमान्ती। अनुदिनमनन्यकर्मा अङ्गं तनुकमपि तनयति॥" इति संस्कृतम्]। दूत्याः कस्याश्चित् नायकं प्रत्युक्तिरियम्। हे सुभग! सा—तव कान्ता, महिलानां—नारीणां, सहस्रेण, भरिते—पूरिते [एतेन स्थानाभावः सूचितः। भरो जातोऽस्य तत् भरितम् "तदस्य सञ्जातं तारकादिभ्य इतच्" (५।२।२६ पा०) इति इतच्प्रत्ययः] तव हृदये, अमान्ती—अवकाशमलभमाना इत्यर्थः, अनुदिनं—प्रतिदिनं, लक्षणया निरन्तरमित्यर्थः, अनन्यकर्मा—नान्यत् कर्म यस्याः सेति तथोक्ता, त्यक्तकार्य्यान्तरा सती इति यावत्, तनुकम्—अत्यन्तकृशमपि, अङ्गं तनयति—तनूकरोति, कृशीकरोतीत्यर्थः; तनोः कार्श्यातिशये जाते यदि स्थानं प्राप्नुयादित्याशया इति भावः। तव विरहे सा नितरां कृशा जाता, तदेनामनुगृहाणेति भावः। आर्य्या वृत्तम्।

(ण) अत्रेति।—अत्र "अमाअन्ती" इति—मनसोऽणुत्वात् अनुपलभ्यत्वाच्च तत्र मानमेव न सम्भवति, कुतः तल्लाभः? पदार्थतया हेतुः निर्दिष्ट इति "हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते" इति काव्यलिङ्गमलङ्कारः, स च पदार्थस्य कविनिबद्धवक्तृप्रौढ़ोक्तिसिद्धतया तथाविधो व्यङ्ग्यः इति भावः, तेन; तनोः,—शरीरस्य, तनूकरणेऽपि—कृशीकरणेऽपीत्यर्थः। "तनुतनूकरणरूपकारणस्य सत्त्वेऽपि त्वद्धृदयवृत्तित्वरूपफलं नास्ति" इति "सति हेतौ फलाभावे विशेषोक्तिः" इति निर्दिष्टा विशेषोक्तिः। ननु कविनिबद्धप्रौढ़ोक्तिसिद्धस्य कविप्रौढ़ोक्तिसिद्धत्वमस्त्येवेति कथं तस्य पृथगुपादानम्? इत्यत्र आह, न खल्विति।—रागाद्याविष्टता—प्रणयिता इत्यर्थः।

एकः शब्दार्थशक्त्युत्थे ॥ २६२ ॥ (त)

उभयशक्त्युद्भवे व्यङ्ग्ये एको ध्वनेर्भेदः।

यथा,—

"हिममुक्तचन्द्ररुचिरः सपद्मको
मदयन् द्विजान् जनितमीनकेतनः।
अभवत् प्रसादितसुरो महोत्सवः
प्रमदाजनस्य स चिराय माधवः॥" (थ)

[आदिशब्देन उत्साहादिपरिग्रहः ज्ञेयः]। प्रौढ़ोक्त्या हि वक्तृरागाद्याविष्टचित्तत्वं प्रतीयते। तत्र कव्यपेक्षया कविनिबद्धस्य वक्तुरधिकरागाद्याविष्टचित्तत्वमिति तद्व्यञ्जिकायाः प्रौढ़ोक्तैरधिकचमत्कारकारित्वमिति भावः। प्रतिपादिता—गृहीता। ननु यत्रालङ्कारस्य व्यञ्जकत्वमुक्तं, तत्रालङ्कार्य्यस्य वस्तुनोऽपि व्यञ्जकत्वमस्त्येव, इति कथमलङ्कारस्य पृथगुपादानम्? अत आह, एषु चेति।—एषु—प्रागुक्तेषु द्वादशभेदेषु मध्ये, अलङ्कृतिव्यञ्जनस्थले—यत्रालङ्कारो व्यञ्जकस्तत्रेत्यर्थः। सहृदयसंवेद्यं—सामाजिकगम्यम्। रूप्यादीनाम्—आरोप्यमाणानां, नवमल्लिकासमुदयप्रभृतीनामित्यर्थः। [आदिपदेन उत्प्रेक्षणीयव्यतिरेचनीयादीनां ग्रहणम्]। मुख्यत्वं—प्राधान्यम्। अत एव प्राधान्येन व्यवहारः इति सारः।

(त) एक इति।—शब्दार्थशक्त्युत्थे—शब्दार्थयोः, शक्त्या—सामर्थ्येन, उत्थे—उत्पन्ने, व्यङ्ग्ये इति शेषः, एकः, भेद इति शेषः; शब्दार्थोभयशक्त्युत्थः संलक्ष्यक्रमव्यङ्ग्य एकभेद एवेत्यर्थः। अयं भावः,—शब्दशक्तिकारणकत्वमर्थशक्तिकारणकत्वञ्च इत्युभयस्यापि सर्वव्यङ्ग्यसाधारण्यं सिद्धम्; तयोः परामर्शाभावे व्यङ्ग्यस्यास्फुरणात्, तथाऽपि विनिमयमसहमानानां शब्दानामाधिक्ये तत्प्रतिपादितात् मुख्यत्वात् वर्त्तमानाया अत्यर्थशक्तेरमुख्यत्वाच्च शब्दशक्तिकारणकत्वेन एव निर्देशः; विनिमयं सहमानानां चाधिक्ये अर्थनिष्ठायाः शक्तेरेव मुख्यत्वात् वर्त्तमानाया अपि शब्दनिष्ठायाः शक्तेः मुख्यानुसार्य्यर्थतया भट्टपल्लीग्रामादिवत् मुख्येनैव निर्देशः ज्ञेयः। यत्र विनिमयस्य सहिष्णूनामसहिष्णूनाञ्च शब्दानां न ह्येकजातीयं प्राचुर्य्यं, किन्तु सादृश्यमेव, तत्रोभयशक्तिकारणकस्य व्यङ्ग्यस्यावस्थानमिति शब्दार्थोभयोत्थः ध्वनिः; न चासौ एकशक्तिकारणकतया कथयितुमर्हः, प्रमाणाभावात्; इति सारः।

(थ) हिमेति।—हिममुक्तः,—हिमावरणशून्यः, निर्मल इत्यर्थः, यश्चन्द्रः तद्वत्

अत्र "माधवः कृष्णो माधवो वसन्त इव" इत्युपमाऽलङ्कारो व्यङ्ग्यः। एवञ्च व्यङ्ग्यभेदादेव व्यञ्जकानां काव्यानां भेदः। (द)

तदष्टादशधा ध्वनिः ॥ २६३ ॥ (ध)

अविवक्षितवाच्यः, अर्थान्तरसङ्क्रमितवाच्योऽत्यन्ततिरस्कृतवाच्यश्च इति द्विविधः। विवक्षितान्यपरवाच्यस्तु असंलक्ष्यक्रमव्यङ्ग्यत्वेनैकः। संलक्ष्यक्रमव्यङ्ग्यत्वेन च शब्दार्थोभयशक्तिमूलतया पञ्चदशेति अष्टादशभेदो ध्वनिः। (न)

रुचिरः,—मनोहरः, अन्यत्र,—तेन रुचिरः,—दीप्यमानः, पद्मया—लक्ष्म्या सह वर्त्तमानः सपद्मकः, अन्यत्र—पद्मयुक्तः, द्विजान्—ब्राह्मणान्, अन्यत्र—पक्षिणः, कोकिलादीन् इत्यर्थः, मदयन्—हर्षयन्, जनितः,—उत्पादितः, मीनकेतनः,—कामः, प्रद्युम्नः इत्यर्थः, येन तथोक्तः, अन्यत्र—जनितसुरताभिलाष इत्यर्थः, प्रसादिताः,—प्रसन्नतां प्रापिताः, सूराः,—देवाः, येन सः, दैत्यविध्वंसनादिनेति भावः, अन्यत्र—प्रसारिताः,—विमलीकृताः, सुराः,—मद्यानि, येन तथाविधः, स माधवः,—कृष्णः, अन्यत्र—वसन्तः, चिराय प्रमदाजनस्य—नारीजनस्य, महोत्सवः,—महाऽऽनन्दस्वरूपः अभवत्। अत्र चन्द्रपद्मादिशब्दार्थोभयशक्तिव्यङ्ग्यस्य वसन्तस्योपमा शब्दार्थोभयशक्तिव्यङ्ग्या, विनिमयाक्षमत्वेन चन्द्रादीनां, विनिमयक्षमत्वेन च हिममुक्तादीनाम्; शब्दार्थयोरेव मुख्यत्वेन व्यञ्जकत्वमिति शब्दार्थोभयशक्तिनिमित्तकत्वं तस्याः सिद्धम्। तथाहि—प्रमदाजनस्य महोत्सवजनने वसन्तस्यैव सामर्थ्यमित्यर्थः,(यदर्थे यस्य प्रसिद्धिः तत्रैव तदर्थस्य सामर्थ्यम्; एवमेव काव्यप्रकाशकारः) प्रतिसन्धानसहकृतेन माधवपदेन वसन्तपदार्थ एव व्यज्यते, न त्वर्थान्तरम्; तस्य तत्र सामर्थ्याभावात्। न चात्र शब्दार्थोभयश्लेषसत्त्वेन शब्दार्थोभयशक्तिमूला व्यङ्ग्योपमेति वाच्यं, तथा सति "दुर्गालङ्घित—" इत्यत्रापि उभयश्लेषसत्त्वेन उभयशक्तिव्यङ्ग्यत्वं स्यात्। "गृहीतगरिमा—" इत्यर्थश्लेषस्यापि तत्र सत्त्वादिति सङ्क्षेपः। मञ्जुभाषिणी वृत्तम्;—"सजसा जगौ च यदि मञ्जुभाषिणी" इति तल्लक्षणात्।

(द) ननूक्तभेदेषु व्यङ्ग्यस्यैव भेदो दर्शितः, तच्च प्रकृतानुपयुक्तम्, अत आह, एवञ्चेति।—उक्तरीत्या इत्यर्थः। व्यङ्ग्यभेदात्—व्यङ्ग्यस्य—व्यञ्जनाजन्यबोधविषयस्य अर्थस्य, भेदात्—पार्थक्यात्, व्यञ्जकानां—व्यञ्जयन्तीति व्यञ्जकानि तेषाम्।

(ध) तदिति।—उक्तक्रमादित्यर्थः।

(न) अष्टादशत्वमुपपादयति, अविवक्षितेति।—लक्षणामूलो ध्वनिरित्यर्थः।

एषु च (घ)—

वाक्ये शब्दार्थशक्त्युत्थस्तदन्ये पदवाक्ययोः॥२६४॥(फ)

तत्र अर्थान्तरसङ्क्रमितवाच्यो ध्वनिः पदगतो यथा,—

"धन्यः स एव तरुणो नयने तस्यैव नयने च।
युवजनमोहनविद्या भवितेयं यस्य सम्मुखे सुमुखी॥"(ब)

अत्र द्वितीयनयनशब्दो भाग्यवत्ताऽऽदिगुणविशिष्टनयनपरः।

वाक्यगतो यथा,—

"त्वामस्मि वच्मि विदुषां समवायोऽत्र तिष्ठति।
आत्मीयां मतिमाख्याय स्थितिमत्र विधेहि तत्॥" (भ)

विवक्षितान्यपरवाच्य,—अभिधामूल इत्यर्थः। शब्दार्थोभयशक्तिमूलतया पञ्चदशेति।—तथाहि,—वस्त्वलङ्कारमूलत्वात् शब्दशक्तिमूलौ द्वौ, अर्थशक्तिमूला चतस्रोऽवान्तरीक्षा दश, उभयशक्तिमूल एक इति पञ्चदशभेदेति भावः, पुनरेषोक्तभेदत्रयेण साकं मेलने अष्टादशधा इति दिक्।

(घ) एषु—अष्टादशसु भेदेषु मध्ये इत्यर्थः।

(ङ) वाक्ये इति। शब्दार्थशक्त्युत्थ.,—शब्दार्थोभयशक्तिमूलो ध्वनिः, वाक्ये—केवलं वाक्ये एव, भवतीति शेषः, तदन्ये—तस्मादन्ये, उभयशक्त्युत्थादन्ये, अर्थान्तरसङ्क्रमितवाच्यादश; सप्तदश भेदाः इत्यर्थः, पदवाक्ययोः,—पदगताः वाक्यगताश्च भवन्तीति शेषः। [अत्रेदमवधेयं—यत्र मुख्यवादेनैव पदस्य व्यङ्ग्यार्थावगोचरत्वं, साहचर्यमात्रत्वं पुनरन्येषाम्; तत्र पदगतत्वं स्थिरम्; अनेकपदानां तथात्वे वाक्यगतत्वमिति सारः] ततश्च उभयशक्तिजो भेद एक एव, अन्ये सप्तदश पदवाक्यगतत्वेन द्विविधत्वात् चतुस्त्रिंशत्, मिलित्वा पञ्चत्रिंशद् भेदाः, इति बोध्यम्।

(च) धन्य इति।—स एव तरुणः,—युवा, धन्यः,—पुण्यवानित्यर्थः, तस्यैव—तरुणस्यैवेत्यर्थः, नयने—नेत्रे, नयने—धन्ये इत्यर्थः, च, यस्य सम्मुखे युवजनमोहनविद्या—युवजनमोहनकारिणी या विद्या तद्रूपेत्यर्थः, इयं—लोकोत्तरसौभाग्या, सुमुखी—सहनीयतया दर्शनीयेति भावः, भविता—स्थास्यतीत्यर्थः। यद्यपि "सदसी सदसी—" इत्यादौ पदगतोऽर्थान्तरसङ्क्रमितवाच्यार्थध्वनिरुदाहृत एव, तथाऽप्युदाहरणान्तरदर्शनेनेतद्दृढयितुमयमुपन्यस्त इति बोध्यम्। षड्डोमिश्रकृतः।

(छ) त्वामिति।—वक्तीत्यध्याहृत्य, पदमित्यर्थः, त्वाम्—उपदेष्टारं भवन्तं,

अत्र प्रतिपाद्यस्य सम्मुखीनत्वादेव लब्धे प्रतिपाद्यत्वे "त्वाम्" इति पुनर्वचनमन्यव्यावृत्तिविशिष्टं त्वदर्थं लक्षयति। एवं वच्मीत्यनेनैव कर्त्तरि लब्धे "अस्मि" इति पुनर्वचनमन्यव्यावृत्तिविशिष्टं मदर्थं लक्षयति। तथा "विदुषां समवायः" इत्यादिवचनेनैव वक्तुः प्रतिपादने सिद्धे पुनः "वच्मि" इति वचनम् "उपदिशामि" इति वचनविशेषरूपमर्थं लक्षयति। एतानि च लक्षितानि स्वातिशयं व्यञ्जयन्ति। एतेन मम वचनं तवात्यन्तं हितं, तदवश्यमेतत् कर्त्तव्यमित्यभिप्रायः। तदेवमयं वाक्यगतोऽर्थान्तरसङ्क्रमितवाच्यो ध्वनिः।

अत्यन्ततिरस्कृतवाच्यः पदगतो यथा,—"निश्वासान्ध इव" इत्यादि। वाक्यगतो यथा,—"उपकृतं बहु तत्र" इत्यादि, अन्येषां वाक्यगतत्वे उदाहृतम्। (म)

वच्मि—ब्रवीमि, उपदिशामीति यावत्, अत्र विदुषां, समवायः,—सङ्घः, समूह इत्यर्थः,[समुदाय इति पाठे—समुदायः,—समूहः] तिष्ठति, तत्—तस्मात्, आत्मीयाम्—आत्मने हितां, मतिम् आस्थाय—आश्रित्य, अत्र—विदुषां समवाये, स्थितिं—कर्त्तव्यनिश्चयं, विधेहि—कुरु, इतीति शेषः।

(म) लक्षणाबीजमन्वयानुपपत्तियोगित्वं प्रदर्श्य लक्ष्यार्थं व्यङ्ग्यार्थञ्च दर्शयति, अत्रेति।—"अस्मि" इति पुनर्वचनं हितकारिमदर्थं लक्षयति। सर्वत्र मुख्यार्थस्य अभेदः सम्बन्धः। एतानि—अन्यव्यावृत्तिविशिष्टत्वादिवस्तूनि। तथाहि,—अन्यव्यावृत्तिविशिष्टमिति त्वामेव, न त्वन्यमिति भावः। अन्यव्यावृत्तिविशिष्टमिति अहमेव, नान्यः इति लक्षयति इत्याशयः। स्वातिशयमिति।—त्वत्पदार्थस्य वादजल्पादिक्षमत्वं मत्पदार्थस्यात्यन्तहितैषित्वम्, उपदेशस्यानुपेक्षणीयत्वमतिशयः इत्यर्थः। प्रत्येकपदव्यङ्ग्यत्वं प्रदर्श्य वाक्यव्यङ्ग्यत्वं दर्शयति, एतेनेति।—उक्तवाक्येनेत्यर्थः। अभिप्रायः, प्रतीयते इति शेषः। "निश्वासान्धः,—" इत्यादिवत् "उपकृतम्" इत्यपि पूर्वमेव व्याख्यातम्। अत्र तु लाक्षणिकपदानामेकवाक्यस्थत्वाद्वाक्यत्वेनैव व्यञ्जकत्वम्; यद्यपि उपकृतादिलाक्षणिकपदानां प्रत्येकवाक्यस्थत्वं, तथाऽपि महावाक्यगतत्वेनैकवाक्यस्थत्वं वेद्यम्। अन्येषाम्—असंलक्ष्यक्रमव्यङ्ग्यादीनाम् इत्यर्थः। उदाहृतम् इति।—अत्र निरुक्तरसाद्युदाहरणमेव तदुदाहरणमित्यर्थोऽवगन्तव्यः।

पदगतत्वे यथा,

"लावण्यं तदसौ कान्तिस्तद्रूपं स वचःक्रमः।
तदा सुधाऽऽस्पदमभूदधुना तु ज्वरो महान्॥" (य)

अत्र लावण्यादीनां तादृगनुभवैकगोचरताव्यञ्जकानां तदादिशब्दानामेव प्राधान्यम्। अन्येषान्तु तदुपकारित्वमेवेति तन्मूलक एव ध्वनिव्यपदेशः। (र)

(य) असंलक्ष्यक्रमव्यङ्ग्यं पदप्रकाश्यमाह, लावण्यमिति।—कस्यचिद् वियोगिन उक्तिरियम्। तत् लावण्यम्—अङ्गप्रभाविशेषः, सर्वावयवगतो विदग्धनयनोत्सवहेतुः कोऽप्यतिशय इत्यर्थः, असौ कान्तिः,—औज्ज्वल्यं, (प्रत्येकमवयवानां संस्थानसौभाग्यं कान्तिरिति चण्डीदासः) तत् रूपं—सौन्दर्य्यं, स वचसां क्रमः,—परिपाटी, भङ्गीत्यर्थः, तदा—तस्मिन् काले, नायिकासन्निधानसमये इति यावत्, सम्भोगावसरे इति भावः, सुधाऽऽस्पदम्—अमृतपात्रम्, अभूत्; अधुना—नायिकाविच्छेददशायां, तद्विरहे इत्यर्थः, तु महान्, ज्वरः,—व्याधिः, सन्तापजनक इति यावत्, तत्तत्स्मरणस्य अतीवसन्तापकत्वादिति भावः।

(र) विभावादिव्यङ्ग्ये रसे तदादिपदानां व्यञ्जकत्वमुपपादयति, अत्रेति।—अनुभवैकगोचरताव्यञ्जकानाम्—अनिर्वचनीयत्वव्यञ्जकानाम्, प्राधान्यम्, अत्युत्कृष्टविप्रलम्भव्यञ्जने इति शेषः; अन्येषां—विभावादीनां, लावण्यादीनां वा, तदुपकारित्वं—तदादिपदसहकारित्वमेव, इति हेतोः, तन्मूलक एव—पदमूलक एव, न तु वाक्यमूलकः इति भावः; "प्रधाने हि व्यपदेशाः भवन्ति" इति न्यायादित्यर्थः। अत्यन्तसन्तोषसम्पादकवस्तुस्मरणात् विरहिणां दुःखातिशयो भवति इति विप्रलम्भातिशयो व्यज्यते, इत्येतत्पदगतासंलक्ष्यक्रमव्यङ्ग्यध्वनेरुदाहरणमुपपन्नम्। ननु तदादिपदानाम् अनुभवगोचरेऽभिधैव, कथं पुनः व्यञ्जना? इति चेत्, न, अनुभवैकगोचरतेत्यनेनानिर्वचनीयत्वस्य विवक्षणात्। (अत एव चण्डीदासः,—"अनुभवैकगोचराः,—तत्कालचमत्कारिणो निर्वक्तुमशक्याः, सर्वस्वव्ययप्राणपणादिभिरपि प्रार्थनीयाः" इति व्याचकार)। इदञ्च बोध्यम्;—देहिनामिव काव्यानां सङ्घटनाविशेषसाध्यः मनोरमत्वप्रत्ययः अन्वयव्यतिरेकाभ्यां सङ्घटनाभागेषु समर्थ्यते, तस्मात् पदानाम् अपि, न केवलं वाक्यानां व्यञ्जकत्वद्वारा ध्वनिप्रसङ्गः सिद्धः इति ध्वन्यालोके विशदीकृतम्। प्रदीपकृताऽपि व्याख्यातम्;—"ननु पदस्य व्यञ्जकत्वे किमुपलब्धम्? न च वाक्यात्मनां काव्यानां ध्वनित्वमिति, न वा केवलपदस्य

तदुक्तं ध्वनिकृता,—

"एकावयवसंस्थेन भूषणेनेव कामिनी।
पदस्योत्तेन सुकवेर्ध्वनिना भाति भारती॥" (ख)

एवं भावादिष्वपि क्रमम्। (ग)

"भुक्तिमुक्तिकृदेकान्तसमादेशनतत्परः।
कस्य नानन्दनिस्यन्दं विदधाति सदागमः?॥" (घ)

व्यञ्जकत्वे सकलस्य वाक्यस्य मनोरमत्वं सङ्घटेत इति वक्तुं युक्तम्, इति चेत्?—केवलपदव्यञ्जकत्वेन न पदप्रकाश्यता, यदि तु तत्सम्बन्धित्वेन, केवलपदस्य व्यञ्जकत्वाभावेऽपि यविवक्षितवाच्यध्वनौ यदाकाङ्क्षितस्य शब्दस्य अर्थस्य वा या यतिशयितार्थव्यञ्जकता, सा वाक्यस्यैव इति न दोषलेशः।

(ख) नन्वितरवाच्यं विना पदस्य व्यञ्जकत्वं तावन्न सम्भवति, तत्र प्राधान्याप्राधान्यविवेचनमविचित्करम्; तथा सति सर्वत्र वाक्यस्यैव व्यञ्जकत्वम् उपपन्नम्। पदगतध्वनिप्रभेदाङ्गीकारस्तु प्राचीनमतानुसारेणैवेत्यभिप्रायेण प्राचीनमतमुपन्यस्यति,—तदुक्तमिति। एकेति।—एकावयवसंस्थेन—एकाङ्गस्थितेन, मुख्येन—चक्षुरादेव, नासिकाक्षणशुक्लादिना द्रव्येण, कामिनीव—सुन्दरीवत्, पदस्योक्तेन—एवंरूपस्थितेन साङ्गपदप्रकाश्येन, ध्वनिना—व्यङ्ग्येन, सुकवेः,—साधुकवेः, भारती—वाणी, समस्तमेव वाक्यमित्यर्थः, भाति—राजते, रमयतीत्युपपद्यते इति भावः।

(ग) एवं भावादिष्वपीति।—पदप्रकाश्यमावादिष्वपीत्यर्थः। तेषामपि यसंबन्ध्यङ्गमव्यङ्ग्यध्वनिलेशोदाहर्तुमुचितत्वात्; यथा रसस्योपसंबन्ध्यङ्गमव्यङ्ग्यानि काव्यानि उदाहृतानि, तथा भावस्योपसंबन्ध्यङ्गमव्यङ्ग्यानामपि उदाहरणानि सम्भवीति भावः।

(घ) भुक्तीति।—पदप्रकाश्यं वस्त्वाह, भुक्तीति।—जगदान्तरसन्निधावुपनायके जानते प्राधान्यसंबन्धाभावेन पूर्वं सूचयन्त्याः वस्त्वन्तरदृष्टिरियम्। भुक्तिः,—भोगः, स्वर्गादिसुखमित्यर्थः, मुक्तिः,—अपवर्गः, तयोः कृत्—प्रदर्शनं इत्यर्थः, अथवा,—मुक्तिः,—सुरतसुखभोगः, मुक्तिः,—स्वदेहत्यागः, तयोः कर्त्री, एकान्ते—निर्जने, समादेशने—तत्त्वोपदेशे, तत्परः,—निरतः, निर्जनोपासनाया एव मोक्षैकत्वादिति भावः, अथवा,—एकान्ते—जनसम्बन्धरहितस्थाने, समादेशने—शिष्यानुमतौ, तत्परः; यद्वा,—एकान्तसमादेशनस्य—बहूनामेवोपदेशस्य कारकः, सदागमः,—सच्छास्त्रं,

अत्र सदागमशब्दः सन्निहितमुपनायकं प्रति सच्छास्त्रार्थमविधाय "सतः पुरुषस्यागमः" इति वस्तु व्यनक्ति। ननु "सदागमः सदागमः इव" इति न कथमुपमाध्वनिः? सदागमशब्दार्थयोरुपमानोपमेयभावाविवक्षणात्। रहस्यसङ्गोपनार्थमेव हि द्व्यर्थपदप्रतिपादनम्: प्रकरणादिपर्य्यालोचनेन च सच्छास्त्राभिधानस्य असम्बन्धत्वात्। (ष)

"अनन्यसाधारणधीर्धृताखिलवसुन्धरः।
राजते कोऽपि जगति स राजा पुरुषोत्तमः॥" (स)

पुराणादिकम् इत्यर्थः, अन्यत्र,—व्यङ्ग्यार्थस्य सतः,—सत्पुरुषस्य भवादृशस्य, आगमः,—उपस्थितिः, कस्य—मद्विधस्य जनस्य, आनन्दनिस्यन्दम्—आमोदप्रस्रवणम्, आनन्दातिशयमित्यर्थः, न विदधाति—न उत्पादयति? न करोतीत्यर्थः; अपि तु सर्वस्यैवेति।

(ष) ईदृशार्थस्य काव्यव्यङ्ग्यत्वेऽपि तत्र सदागमपदस्य प्रधानत्वादन्येषां सहकारित्वात् पदव्यङ्ग्यव्यपदेश इत्याह, अत्रेति।—सन्निहितं—जनान्तरसन्निधौ उपस्थितमित्यर्थः। सच्छास्त्रार्थमभिधाय—अभिधया बोधयित्वा। सदागमशब्दार्थयोः,—सत्पदार्थस्यागमपदार्थस्य चेत्यर्थः, सच्छास्त्रसत्पुरुषागमनयोरिति भावः। उपमानोपमेयभावस्य, अविवक्षणात्—वक्तुमनभिलाषात्। अविवक्षायां हेतुमाह, रहस्येति।—हि—यस्मात्, द्व्यर्थपदानां प्रतिपादनं—प्रयोगः। ननु "तदर्थं कृतमेतदर्थं भवति" इति न्यायादुपमानोपमेयत्वबोधकः कथं न स्यात्? इत्यत आह, प्रकरणादीति।—[आदिना वयोऽवस्थादिसङ्ग्रहः]। सच्छास्त्राभिधानस्यासम्बन्धत्वाच्चेत्यन्वयः। असम्बन्धत्वात्—प्रकृतानुपयोगित्वात्। तथा च यत्र वाच्यार्थः प्रकृतोपयुक्तः, व्यङ्ग्यार्थस्त्वसम्बद्धः, तत्रैवागत्या तयोरुपमानोपमेयभावः कल्प्यते। अत्र तु व्यङ्ग्यार्थस्यैव प्रकृतोपयोगित्वं, वाच्यार्थस्य तदङ्गत्वमिति न तदवसरः। उपनायकानुरागस्य गोपनार्थताया एव विवक्षितत्वात्, न तु उपमानोपमेयभावबोधनार्थम् इति भावः।

(स) शब्दशक्तिमूलं पदप्रकाश्यमलङ्कारमाह, अनन्येति।—न अन्येषां साधारणी—अनन्यतुल्या इत्यर्थः, धीर्यस्य तादृशः, धृता—पालिता, हस्तेनोद्धृता च, अखिला—समग्रा, वसुन्धरा—पृथ्वी, येन तथाविधः, स पुरुषोत्तमः,—पुरुषश्रेष्ठः, कोऽपि राजा, जगति—पृथिवीतले, राजते। [अत्र पुरुषोत्तमपदस्यैव प्राधान्यमिति पदद्योत्य उपमाध्वनिरिति बोध्यम्]।

अत्र पुरुषश्रेष्ठः पुरुषोत्तम इवेत्युपमाध्वनिः। अनयोः शब्दशक्तिमूलौ संसृष्टिरूपमभेदौ। (ङ)

"सायं स्नानमुपासितं मलयजेनाङ्गं समालेपितं
यातोऽस्ताचलमौलिमम्बरमणिर्विश्रम्भमत्रागतिः।
आश्चर्यं तव सौकुमार्यमभितः क्लान्ताऽसि येनाधुना
नेत्रद्वन्द्वममीलनव्यतिकरं श्लक्ष्णोति ते नासितुम्॥" (क)

(ङ) अनेति।—पुरुषोत्तम इव—विष्णुरिव। ननु अत्र पूर्वार्द्धेऽपि श्रेष्ठशब्देन "दुर्गाखण्डितविग्रहः" इतिवत् वाक्यस्थरूपमेवोपमालोपमेयत्वमिति चेत्? सत्यम्। अनेकार्थस्य पुरुषोत्तमपदस्य सार्थकत्वाय एकार्थकानामपि अनयेतिपदानां द्यर्थकत्वं कल्प्यते इति पुरुषोत्तमपदस्यैव प्रधानत्वम्। "दुर्गाखण्डित:,—" इत्यादौ तु बहूनामेव पदानां स्वभावत एवानेकार्थकत्वमिति ततोऽस्य भेदः। ननु संज्ञायामेव ["संज्ञायाम्" (२।१।४४ पा०) इति समासप्रकरणात्] कथं पुरुषोत्तमपदस्य अनेकार्थत्वम्? न च समभीव्यमासस्यैव संज्ञायां विधानात् षष्ठीसमासेन पुरुषश्रेष्ठवाचकत्वमिति वाच्यं, निर्द्धारणे विहितायाः षष्ठ्याः ["न निर्द्धारणे" (२।३।१० पा०) इति] समासनिषेधात्; उच्यते,—पुरुषम् उत्तमयति—संसर्गेण उत्कृष्टं करोतीति व्युत्पत्त्या तस्य पुरुषश्रेष्ठवाचकत्वात्। अनयोरिति।—शब्दशक्तिः मूलं ययोः तौ, शब्दशक्त्युद्भवावित्यर्थः। अष्टमन्यत्।

(क) स्वतःसम्भविवस्तुव्यङ्ग्यं वस्तु पदप्रकाश्यमाह,—सायमिति।—पथि उपलायकेन भृत्या स्नातागतां सखीम् उपहसन्त्याः कस्याश्चिदुक्तिरियम्। सायं—सन्ध्यायां, स्नानम्, उपासितं—कृतं, मलयजेन—चन्दनेन, अङ्गं समालेपितम्, [एतेन स्नानमलयजलेपयोः श्रमप्रतिबन्धकत्वं दर्शितम्]। सायंपदस्य विमुक्तसंरम्भसायाह्नपरत्वे तत्रातपसञ्चारणया तां वारयति, यात इति।—अम्बरमणिः,—सूर्यः, अस्ताचलमौलिम्—अस्ताचलस्य चूडां, यातः, (अतः) अत्र—मलयजाद्रौ इत्यर्थः, विश्रम्भं—निःशङ्कं, स्वच्छन्दमित्यर्थः, यथा तथा आगतिः,—आगमनं, ["विश्रब्धमन्दागतिः" इति काव्यप्रकाशकारसम्मतः पाठः, तथा सति विश्रब्धम् अत्र च मन्दं यथा स्यात्तथाऽऽगतिरित्यर्थः। अत्र असमस्तत्वाद्विशेषणे विश्रब्धाऽसौ मन्देति तथोक्ता गतिः,—गमनं, सञ्चरणमिति भावः। एतेन सायं सूर्यस्य अस्तगतत्वात् आतपक्लेशोऽपि नास्तीति सूचितम्] (तथाऽपि) तव सौकुमार्यं—मार्दवम्, आश्चर्यम्—अद्भुतम्,

अत्र स्वतःसम्भविना वस्तुना कृतपरपुरुषपरिचया स्नाताऽसीति वस्तु व्यज्यते । तच्च "अधुना क्लान्ताऽसि, न तु पूर्वं कदाचिदपि तव एवंविधः क्लमो दृष्टः" इति बोधयतोऽधुनापदस्य एवेतरपदार्थोत्कर्षादधुनापदस्यैव पदान्तरापेक्षया वैशिष्ट्यम् ।(ख)

"तदप्राप्तिमहादुःखविलीनाशेषपातका ।
तच्चिन्ताविपुलाह्लादक्षीणपुण्यचया तथा ॥
चिन्तयन्ती जगत्सूतिं परब्रह्मस्वरूपिणम् ।
निरुच्छ्वासतया मुक्तिं गताऽन्या गोपकन्यका ॥" [युग्मकम्] (ग)

अनन्यसाधारणमित्यर्थः, येन—सौकुमार्य्येण हेतुना, अधुना—इदानीमेव, न तु इतः प्रागिति भावः, अभितः,—बहिरन्तश्च उभयतः, क्लान्ताऽसि । क्लमज्ञापकमाह, नेत्रद्वन्द्वमिति ।—(यतः) ते—तव, नेत्रद्वन्द्वं—नयनयुगलम्, अमीलनव्यतिकरं—न विद्यते मीलनस्य—मुद्रणस्य, व्यतिकरः,—पौनःपुन्येन प्रवृत्तिः सम्बन्धो वा यस्मिन् तत् तथोक्तं, मीलनसम्पर्करहितम् इति यावत्, तत् यथा स्यात् तथा, स्वत एव मुद्रितं न भूत्वा इत्यर्थः, आसितुम्—अवस्थातुं, न शक्नोति—न पारयति। शार्दूलविक्रीडितं वृत्तम् ।

(ख) अत्रेत्यादि ।—स्वतःसम्भविना—स्वभावतः सम्भवितुं योग्येन, वस्तुना—वाक्यार्थरूपेण । ननु तादृशार्थस्य वाक्यार्थव्यङ्ग्यत्वे वाक्यगतध्वनिरेवायं, न तु पदगतः ? इत्यत आह,तच्चेति ।—तच्च—तादृशव्यङ्ग्यञ्चेत्यर्थः,"अधुना क्लान्ताऽसि"इत्यादि बोधयत इति ।—तथा च तादृशक्लमस्य सौकुमार्य्यप्रयुक्तत्वे दिनान्तरेऽप्येवं स्यात्, अतोऽधुनापदादाधुनिकक्लमहेतुलाभः इति भावः । ननु तथाप्यधुनापदस्यैवेति नियमः कथमुपपद्यते ? स्व समर्थं बोधयतां पदान्तराणामपि व्यञ्जनायामुपकारसम्भवात् ; इत्यत आह, इतरेति ।—अधुनापदस्य इतरपदार्थानामुत्कर्षाधानात् तस्यैव पदान्तरापेक्षया, वैशिष्ट्यं—प्राधान्यम् ; अधुनापदार्थप्राधान्येन तावद्वाक्यार्थेन तादृशपदान्तराणामपि परपुरुषपरिचयव्यञ्जकत्वम् ; तथाहि "सायम्" इत्यादि अधुनापदार्थप्रतिसन्धानेन सायन्तनस्नानस्य निमित्तान्तरानुसन्धानप्रतिबन्धादविलम्बितमेव परपुरुषपरिचयं, मलयजलेपने तत्सम्भोगगोपनं, सूर्य्यास्तगमनं चान्यविधोपभोगलक्षणदर्शनाभावं प्रत्याययति । अत्रोपहास एव महावाक्यव्यङ्ग्यः, इदञ्च व्यङ्ग्यं तत्प्रकर्षकमित्यवधेयम् ।

(ग) स्वतःसम्भविवस्तुव्यङ्ग्यमलङ्कारं पदप्रकाश्यमाह, तदिति ।—रासोत्सवे

"पश्यन्त्यसङ्ख्यपथगां त्वद्दानजलवाहिनीम्।
देव! त्रिपथगाऽऽत्मानं गोपयत्युग्रमूर्धनि॥" (ङ)

इदं मम। अत्र "पश्यन्ती" इति कविप्रौढोक्तिसिद्धेन काव्यलिङ्गालङ्कारेण न केऽप्यन्ये दातारस्तव सदृशा इति व्यतिरेकालङ्कारोऽसङ्ख्यपदद्योत्यः। एवमन्येषु अपि अर्थशक्तिमूलसंलक्ष्यक्रममेदेषु उदाहार्यम्। (च)

पुष्पनं कृतं, येन स्नानत्वमिति काव्यलिङ्गालङ्कारः स्नानादिपदद्योत्यः। कविप्रौढोक्तिसिद्धवस्त्वलङ्कारं वस्तु पदप्रकाश्यं यथा,—"चन्द्रश्चवक्त्रासु रात्रिषु धनुरपि कुसुमं धनास्काल्य। एकच्छत्रमनङ्गस्त्रिभुवनराज्यं करोत्यनिशम्॥" अत्रानङ्गस्य चापास्फालनपूर्वकत्रिभुवनाधिकारकरणस्याकौचित्यात् कविप्रौढोक्तिसिद्धेन तेन वस्तुना शेषां कामिनामसौ राजा, तेषां न कोऽपि तदादेशपराङ्मुख इति जागदिदमोगपरैः केवलं तैर्निर्गादितिवाक्यते इति त्रिभुवनराज्यपदद्योत्यं वस्तु व्यज्यते। कविप्रौढोक्तिसिद्धवस्त्वलङ्कारः पदप्रकाश्यो यथा,—"निश्चितपरविषयार्पणत्वनङ्गो दृशि सुहृदः खलु वयस्यराले। दिशि निपतति यत्र मा च तव व्यतिकरमेत्य समुन्मिषन्त्यबलाः॥" अबलाः,—प्रायुक्ताः विरहकातिकाः दग्ध कामदशाः। अत्र क्रमिकाणां युगपदुन्मेषरूपं वस्तु वाक्यार्थः, स च स्वतोऽसम्भवित्वात् कविप्रौढोक्तिसिद्धः, तेन व्यतिकरपदद्योत्यो विरोधो व्यज्यते। कविप्रौढोक्तिसिद्धालङ्कारव्यङ्गं वस्तु पदप्रकाश्यं यथा,—"स्खलापभाजा हृदयेन हारो निवार्यमाणोऽपि मुहुर्भृगाक्ष्याः। बलोज्झमारब्ध वयस्यभावाविशुद्धजातिर्न चलत्यमुष्मात्॥" [विशुद्धजातिः,—विशुद्धमुक्ताजातिघटितः]। अत्र विशुद्धजातित्वहेतुकालङ्कारेणानवरतकम्पमान एवासौ इति न चलतीति पदव्यङ्गं वस्त्वपगमनहेतुत्वस्य अवान्तरत्वेन गारोप्यमाणत्वात् कविप्रौढोक्तिसिद्धत्वम् इति सङ्क्षेपः।

(ङ) कविप्रौढोक्तिसिद्धालङ्कारव्यङ्ग्यमलङ्कारं पदप्रकाश्यमाह, पश्यन्तीति।—हे देव! त्रिपथगा—गङ्गा, तव दानजलवाहिनीम्, असङ्ख्यपथगां—बहुमार्गगामिनीं, पश्यन्ती आत्मानम्, उग्रस्य—हरस्य, मूर्धनि—शिरसि, [उग्रमूर्धपदेन मूर्धोऽत्यन्तगोपनसमर्थदेशत्वं सूचितम्] गोपयति। [अत्र दानजलस्य नदीरूपत्वं स्वतोऽसम्भवि कविप्रौढोक्त्या सिद्धम्। अन्योन्यमेदोऽपि व्यङ्ग्या]।

(च) अनेति।—काव्यलिङ्गालङ्कारेण—"हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम्" इति लक्षणेन, पश्यन्तीति हेतुगर्भविशेषणरूपेण हृद्यर्थः। एवमन्येष्वपि इति।—कविप्रौढोक्तिसिद्धस्वतोऽसम्भवद्वस्त्वलङ्कारव्यङ्ग्यमुदाहरणं कविनिबद्धवक्तृ-

तदेवं ध्वनेः पूर्वोक्तेषु अष्टादशसु भेदेषु मध्ये शब्दार्थशक्त्युत्थो व्यङ्ग्यो वाक्यमात्रे भवत्येकः। अन्ये पुनः सप्तदश वाक्ये, पदे चेति चतुस्त्रिंशदिति पञ्चत्रिंशद्भेदाः।

प्रबन्धेऽपि मतो धीरैरर्थशक्त्युद्भवो ध्वनिः॥२६५॥(छ)

प्रबन्धे—महावाक्ये। अनन्तरोक्तादष्टादशभेदोऽर्थशक्त्युत्थः; यथा महाभारते गृध्रगोमायुसंवादे,—

"अस्मिं स्थित्वा श्मशानेऽस्मिन् गृध्रगोमायुसङ्कुले।
कङ्कालबहुले घोरे सर्वप्राणिभयङ्करे॥
न चेह जीवितः कश्चित् कालधर्ममुपागतः।
प्रियो वा यदि वा द्वेष्यः प्राणिनां गतिरीदृशी॥" (ज)

प्रौढोक्तिसिद्धवस्त्वलङ्कारव्यङ्ग्येषु चतुर्षु भेदेषु यथा,—"सुतरामबलस्य पञ्चभिः पुष्पशरैरिभिः। युवतेरभवत्तया सखा जगदिष्यति मन्मथः॥" अत्र नायिकारूपशक्त्या मन्मथस्य जगद्वशनसमर्थत्वे, कविनिबद्धप्रौढोक्तिसिद्धं वस्तु, तेन नायिकायाः सर्वमनोहरत्वरूपं वस्तु जगत्पदद्योत्यं प्रकाश्यते। "यो व्रजत्यतितरां सहायतां हन्त! विश्वविजये मनोभुवः। तं निरस्य मधुरं पिकस्वरं कः प्रयाति धृतिमानतानने!॥" अत्र पिकस्वरसहायत्वरूप विशेषणे वस्तु कविनिबद्धप्रौढोक्तिसिद्धं, "तेन मानमहाशत्रौ पिकस्वरे सत्यपि मानो न भग्नः" इति विशेषोक्तिरलङ्कारः आनत इति पदद्योत्यो व्यज्यते। "सन्नद्धमानीकरणादवर्यं कर्यं निवृत्तं नवकर्णिकारम्। तदेव अस्त्रं मदनस्य जेतुं जगत्त्रयं तेन जितं भवत्या॥" अत्र नायिकाकर्णार्पितं नवकर्णिकारमेव मदनशस्त्रमिति रूपकं कविनिबद्धप्रौढोक्तिसिद्धं, कर्णिकारेण तव सुखस्य ताडनो भीता जाता, यथा वीतरागा अपि अस्मदपराधीना भवन्ति, इति वस्तु जगत्त्रयपदप्रकाश्यं व्यञ्जयति। "यस्यन्दते प्रवाभाति राकेऽहो दानसम्भवम्। दैन्यं न दृश्यते हन्त! तेन दृष्टिर्विरोधिनी मे॥" अत्र यस्यन्दः गलत्वासम्भवात् तेन चन्द्रोपमानमप्यसम्भवि कविनिबद्धप्रौढोक्तिसिद्धं, तेन दैन्यमेव तमः इति रूपकं दृष्टिपदद्योत्यं व्यज्यते इति दिक्।

(छ) प्रबन्धे इति।— अर्थशक्त्युद्भवः ध्वनिः धीरैः,—विद्वद्भिः, प्रबन्धे—महावाक्येऽपि, मतः,—कथितः। पञ्चत्रिंशद्भेदाः पूर्वोक्ताः; प्रबन्धगताश्च दशभेदाः लिखिता सप्तचत्वारिंशद्भेदाः इति बोध्यम्।

(ज) अस्मदादिवस्तुव्यङ्ग्यवस्तु प्रबन्धप्रकाश्यमाह, अस्मिन्निति।—श्मशान

इति दिवसे शक्तस्य गृध्रस्य, श्मशाने मृतं बालमुपादाय तिष्ठतां दिवसे तं परित्यज्य गमनमिष्टम्। (झ)

"आदित्योऽयं स्थितो मूढाः! स्नेहं कुरुत साम्प्रतम्।
बहुविघ्नो मुहूर्त्तोऽयं जीवेदपि कदाचन॥
अमुं कनकवर्णाभं बालमप्राप्तयौवनम्।
गृध्रवाक्यात् कथं बालास्त्यजध्वमविशङ्किताः॥" (ञ)

इति निशि समर्थस्य गोमायोर्दिवसे परित्यागोऽनभिलषित इति वाक्यसमूहेन द्योत्यते। अत्र स्वतःसम्भवी व्यञ्जकः।

मृतबालकं त्यजतः तद्बन्धून् प्रति गृध्रस्य वचनमिदम्। गृध्रैः, गोमायुभिः,—शृगालैश्च, सङ्कुले—व्याप्ते, कङ्कालाः,—शरीरास्थीनि, बहला यत्र तादृशे ["कङ्कालबहले" इति पाठे—कङ्कालेन व्याप्ते इत्यर्थः] अत एव सर्वेषां प्राणिनां भयङ्करे, घोरे—दारुणे, अस्मिन् श्मशाने स्थित्वा अलं—स्थितिर्न कर्त्तव्येत्यर्थः; कालधर्मः,—पञ्चत्वं, तम् उपागतः,—प्राप्तः; प्रियो वा, यदि वा द्वेष्यः,—अप्रियः, कश्चित्, इह—श्मशाने, न च जीवितः, जात इति शेषः; प्राणिनां गतिः ईदृशी—एवम्प्रकारा; पञ्चत्वमुपागतः कश्चित् न पुनरुज्जीवति इति भावः। महाभारतस्येदम्।

(झ) इति दिवसे इति।—दिवसे शक्तस्य—दिने भक्षणक्षमस्येत्यर्थः। गमनमिष्टमिति।—"वाक्यसमूहेन द्योत्यते" इत्यग्रेणान्वयः बोध्यः।

(ञ) गोमायुप्रबन्धस्य तादृशव्यङ्ग्यमाह, आदित्योऽयमिति।—हे मूढाः! ["बालाः!" इति पाठे—शिशुबुद्धय इत्यर्थः] अयम् आदित्यः,—सूर्य्यः, स्थितः, नेयं रात्रिरिति भावः, [आदित्यसत्त्वात् युष्माकं रात्रिचरतोऽपि भीतिर्नास्तीति सूचितम्] साम्प्रतं स्नेहं कुरुत, स्नेहकारणं स्थितिरेवेति भावः, अयं—सन्ध्यासमयासन्नः, मुहूर्त्तः बहुविघ्नः—दारुणतया विघ्नपूर्णः, सम्भावितभूताद्यावेशः इत्यर्थः, [तदवगमात् मुहूर्त्तान्तरे जीवनस्य सम्भावना दर्शिता] कदाचन जीवेदपि; जीवनसम्भावनायां हेतुमाह, अमुमिति।—हे बालाः!—अज्ञा इत्यर्थः, कनकवर्णाभं—काञ्चनकान्तिं, [कनकवर्णाभत्वे रूपविपर्य्यासाभावात् जीवनसम्भावना दर्शिता] अप्राप्तयौवनं—किशोरम्, अमुं, बालं, गृध्रस्य वाक्यात् अविशङ्किताः,—सर्वथा प्रत्युज्जीवनाऽऽशां परित्यज्य गृध्रादिना व्यापादनभयशून्याः सन्तः, कथं त्यजध्वम्?। ["त्यजध्वम्" इत्ययमार्षः प्रयोगः]।

एवमन्येषु एकादशभेदेषु उदाहार्य्यम्। एवं वाच्यार्थव्यञ्जकत्वे उदाहृतम्।

लक्ष्यार्थस्य यथा,—"निःशेषच्युतचन्दनम्" इत्यादि। व्यङ्ग्यार्थस्य यथा,—"उअ णिच्चल" इत्यादि। अनयोः स्वतःसम्भविनोर्लक्ष्यव्यङ्ग्यार्थौ व्यञ्जकौ। एवमन्येषु एकादशभेदेषु उदाहार्य्यम्। (ट)

पदांशवर्णरचनाप्रबन्धेष्वस्फुटक्रमः।
असंलक्ष्यक्रमव्यङ्ग्यो ध्वनिस्तत्र पदांशकः॥२६६॥ (ठ)

प्रकृतिप्रत्ययोपसर्गनिपातादिभेदादनेकविधः।

यथा,—

"चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं
रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः।
करं व्याधुन्वत्याः पिबसि रतिसर्वस्वमधरं
वयं तत्त्वान्वेषान्मधुकर! हतास्त्वं खलु कृती॥" (ड)

(ट) इति निशीति।—समर्थस्य—भक्षणक्षमस्येत्यर्थः। अत्र स्वतःसम्भवी, वाक्यार्थः इति शेषः, व्यञ्जकः,—वाच्यम्। एवं—निरुक्तध्वनिसमूहः इत्यर्थः। [अनयोः स्वतःसम्भविना वस्तुना महावाक्यगतेन वस्तु व्यज्यते]। लक्ष्यार्थस्येति।—व्यञ्जकत्वे इति शेषः, एवमग्रेऽपि। निःशेषेत्यादि।—लक्ष्यार्थस्य—"तस्यान्तिकमेव गतासि" इति विपरीतलक्षणया बोधितस्य इत्यर्थः, [अनेन स्वतःसम्भविना वस्तुना रमणरूपं वस्तु व्यज्यते इति बोध्यम्]। "उअ" इत्यत्र स्वतःसम्भविभ्यां लक्ष्यार्थव्यङ्ग्यार्थाभ्यां वस्तुभ्यां सङ्केतस्थानरूपं वस्तु व्यज्यते इति बोध्यम्। एवमन्येष्विति।—एकादशत्वं लक्ष्यव्यङ्ग्ययोः प्रत्येकापेक्षया, उभयापेक्षया तु द्वाविंशमिति द्रष्टव्यम्।

(ठ) पदांशेति।—अस्फुटक्रमः असंलक्ष्यक्रमव्यङ्ग्यः ध्वनिः, पदांशे, वर्णे, रचनायां, प्रबन्धे च भवति। तत्र—पदांशादिषु मध्य इत्यर्थः, पदांशकः, ध्वनिरिति शेषः, प्रकृत्यादिभेदादनेकविधः इति गद्यांशेनान्वेति।

(ड) पदांशगतमुदाहरति, चलेति।—भ्रमरं प्रति दुष्मन्तस्योक्तिरियम्। हे मधुकर!—भ्रमर! करं—पाणिं, व्याधुन्वत्याः,—बाधनार्थमितस्ततो विक्षिपन्त्याः,

अत्र "हताः" इति न पुनः "दुःखं प्राप्तवन्तः" इति क्त्वन् प्रकृतेः।(ढ)

"मुहुरङ्गुलिसंहृताधरोष्ठं
प्रतिषेधाक्षरविक्लवाभिरामम्।
सुखमंसविवर्त्ति पक्ष्मलाक्ष्याः
कथमप्युन्नमितं न चुम्बितं तु॥" (ण)

अक्ष्याः प्रकृत्यक्षायाः इति शेषः, अक्ष्णी—चक्षुषी, अपाङ्गौ—नेत्रप्रान्तौ ("अपाङ्गौ नेत्रयोरन्तौ" इत्यमरः) यस्याः तां तथोक्तां, वेपथुमतीं—त्वदाननसङ्गजया दृतसतः सत्तर्कदृष्टिपातेन वर्तिष्यमाणत्वं, दृष्टिं—नयनं, मुहुः,—पुनः पुनः, मृशसि; रङ्गाख्यानीव—गुप्तभावीव, अर्थालिङ्गचरः,—अर्थसमीपगः सन्, मृदु—मन्दं, स्पृशसि—गृह्णसि; [अनेन अपीलचुम्बनविशेषः ध्वन्यते। यानिनः खलु रङ्गाख्यानव्याजेन अपीलं चुम्बन्ति इति प्रसिद्धिः] तथा रतिसर्वस्वं—सुरतसर्वधनम्; यद्वा,—रतौ सर्वस्मिन् आदरणीयम्, [अनेन तस्य खाभिलाषः व्यज्यते] अधरं—दशनच्छदं, पिबसि—चुम्बसि, दशसि इत्यर्थः; अतः त्वं खलु—त्वमेव, अतौ—अतएव कृतार्थः एव, तवैव कृतित्वं सर्वभावेन सिद्धतीति भावः; वयम्—एवंविधाभिलाषिणः यदि तद्दृष्टिपथादिवर्त्तिनः इत्यर्थः, [अत्र बहुवचनेन आत्मनि गौरवं, तच्च अहं प्रख्यातपुरुषवंशोत्पन्नः, सुकृतः, युवा, मानवः, नृपतिः, अन्या: सर्वथा योग्योऽपि इत्यादिकं व्यज्यते] तस्मान्नेवात्—इदं खपरिग्रहतया न वैधादितस्त्वपरीक्षातः, हताः,—हतप्रायाः, अतिपीडिताः इत्यर्थः; यद्वा.—वस्तुतस्तु अन्तिष्यमाणे भाग्यसाम्यापन्नीभूता जाता इत्यर्थः। [अत्र त्वं क्षत्री, न वयमिति व्यतिरेको व्यङ्ग्यः, अमरत्व खभावोक्तेः खभावोक्तिः, नयनस्य क्रतित्वे पादत्रयगतं वाक्यजातं हेतुभूतमिति वाच्यसिद्धं, अमरत्व च जनकपत्न्यनुरागौचित्येन सुखे तद्विधेयानुरञ्जनमिति कृत्वा भाविनाम् व्यङ्ग्यमेति बोध्यम]। अत्रिप्रायप्रकृत्यक्षखेदं पद्यम्। त्रिष्टुबिन्दो इत्तम्।

(ढ) अत्रेति।—हता इत्यनेन दुःखातिशयो व्यज्यते, दुःखं प्राप्तवन्त इति प्रयोगेण प्रकृतोपयुक्तस्य दुःखातिशयस्य प्रतीतिर्न स्यात् इत्याशयः। क्त्वन् प्रकृतेरिति।—क्त्वन् प्रकृतेरेव प्राधान्येन व्यङ्ग्यत्वमिति शेषः।

(ण) मुहुरिति।—नीतस्या प्रकृत्यक्षायां नीतायां दुःखप्राप्तावपि वर्त्तमानेऽतीते पक्ष्माणि सन्त्यस्योदिति पक्ष्मली—["सिध्मादिभ्यश्च" (५।२।९७ पा०) इति लच्] शोभनपक्ष्मशालिनी, अक्षिणी—नयने, यस्याः सोक्ष्याः, ["बहुव्रीहौ सक्थ्यक्ष्णोः"

अत्र "तु" इति निपातस्यानुतापव्यञ्जकत्वम्। "व्यक्तारो श्रूयसेव मे यदरयः" इत्यादौ "अरयः" इति बहुवचनस्य, "तापसः" इत्येकवचनस्य, "अत्रैव" इति सर्वनाम्नः, "निहन्ति" इति "जीवति" इति च तिङः, "अहो" इत्यव्ययस्य, "ग्रामटिका" इति टिकच्कृदन्तस्य, "विलुण्ठन" इति उपसर्गस्य, "भुजेः" इति बहुवचनस्य व्यञ्जकत्वम्। (त)

(४।१।१२१ पा०) इति ङीषि "विङ्कीरादिभ्यश्च" (४।१।४१ पा०) इति ङीप्] अकुलजाया इति शैवः, मुहुः,—पुनः पुनः, अकुलिभिः, संहतौ—आच्छादितौ, अधरोष्ठौ यस्य तादृशं, प्रतिषेधाचरेण—"न हि न हि" इत्येवं वर्णनयोगेन, वो-विक्लवः,—वेक्लव्यं, तेन अभिरामं—मनोहरम्; यद्वा,—प्रतिषेधवचसा विक्लवं—व्याकुलम्, अत एवाभिराममित्यर्थः, अंशवितिं—अंशे—स्कन्धदेशे, विवर्तयितुं—परिवर्त्य स्थातुं शीलमस्य तत्, मुखं, कथमपि—महताऽऽयासेन, चक्षुःपरागापहारच-क्षुषेण इति यावत्, उन्नमितम्—ऊर्ध्वीभावमूर्ध्वीकृत्य धृतं, चुम्बनयोग्यतां नीत-मित्यर्थः, तु—किन्तु, न चुम्बितं—न मया इतपुरुषेण चुम्बितुं शक्तमित्यनुतापातिशयः। [अत्र स्वभावोक्तिरलङ्कारः]। अभिज्ञानशकुन्तलस्येदं पद्यम्। अत्रोपच्छन्दसवचनान्-च्छन्दः, तदुक्तं यथा वैकृते,—"गोपच्छन्दसवत्" इति।

(त) व्यक्तारो इति।—व्याख्यातमिदं प्राक्। "अरयः इति बहुवचनस्य" इत्यादि षष्ठ्यन्तानां, "व्यञ्जकत्वम्" इत्येतेनैवान्वयः। "अरयः" इति बहुवचनेन अरेरेकस्यादि बहुत्वोऽनुचितः, किं पुनर्बहूनामिति। तापस इत्येकवचनेन अरीणां प्रतीकारासमर्थं ज्ञापितम्; यद्वा,—यदि विदितपराक्रमा महान्तो दैवराजावन्यतमाः प्रभवःसमुद्यताः स्युः, तदाऽपि चमं, किन्तु तवाप्यज्ञातं भवत्यतापसः! अहो! अत्रापि तापस इति एकवचनेन चमर्थातिशयं, तथा हि,—यद्यपि एकतापसनियहेऽपि सर्वरक्षा न सम्भवति, परन्तु सोऽपि सर्वनाशे: कर्तुमक्षम इति। अनेति इदं पदेन, यदि सोऽपि दूरं परोक्षं निहन्तुं समुद्यतः स्यात्, तदाऽपि किञ्चित् चमं, किन्तु नास्त्येव एवोच्च-मनोरथपरोक्षनपराधिलक्षात्मनसहनीयमिति; यद्वा,—रिपुनिग्रहे दूरमनसादि-व्यापारो नास्ति, तथापि स न शक्तुं प्रक्रमते इति। विहन्तीति वर्त्तमानापकार-कथनेन, विलुण्ठनेति रिपुनिग्रहे नाशाकमुद्यमः। जीवतीति जीवनस्य वर्त्तमानत्व-ख्यापनेन, इतः पूर्वमेव मे नरक्षमुचितमासीत्, किन्तु नासीदित्येव कष्टं, न हि नरकीटं पराभवः कर्तुमपि शक्नोति इति। अहो! इति अव्ययस्य जीवनस्य सापर्यत्व-

"आहारे विरतिः समस्तविषयग्रामे निवृत्तिः परा
नासाग्रे नयनं तदेतदपरं यच्चैकतानं मनः।
मौनच्छेदमिदच्च शून्यमधुना यद्विस्मयाभाति ते
तद्ब्रूयाः सखि! योगिनो किमसि भोः! किंवा वियोगिन्यसि?॥"(घ)

ख्यापनं, मानिनाम् एतादृशपरिभवे यौवनमत्यन्तमनुचितमिति। स्वर्गपानटिकेति स्वर्गश्च चूडापानत्वख्यापनेन तच्छ्रवणमपि यस्य श्लाघ्यं न, सोऽपि तापसेन पराभूयते, अहो! दुर्दैवविलसितमेतत् इति। यद्वा,—टिक्चूरुपश्च अत्यर्थश्च तद्धितप्रत्ययश्च स्वर्गश्च विलुप्तनेऽतिप्रयोगाभावरूप व्यञ्जकत्वम्, इति। व्युत्पन्नश्च लुप्तश्च विलुप्तश्च —स्वर्विलुप्तस्तस्येवार्थः, वैशिष्ट्यवचनेन सुरपतेः अचलपराभवकारिणो रावणस्य एवतापसेन पराभव दुर्दैवेनोपपद्यते इति। भुजैरिति बहुवचनेन भुजानां बहुत्वख्यापनेन, रिपुनिधेः रावणस्य एतादृशाधिकसाधनसत्त्वेऽपि स कर्तुं न शक्यते इति व्यज्यते। यद्यप्येते संसर्गस्वरूपसम्बन्धा वस्तुधर्मयः एव, तथाप्येते चर्वणस्वरूपव्यङ्ग्यस्य निर्वेदाख्यभावस्य पोषकाः, इति तेनैव व्यपदेशः।

(घ) आहारे इति।—विरहिणीमुपहसन्त्याः सख्या उक्तिरियम्। भोः सखि! [इदञ्च प्रत्ययसूचकं सम्बोधनं, तेन योगिन्या न कुत्रापि प्रत्ययो भवति, तव तु प्रत्ययोऽस्तीति सम्बोधनेन व्यज्यते]। आहारे—भोजने, विरतिः,—रागाभावः, अप्रवृत्तिरित्यर्थः, आहारे इति विषयसप्तम्या आहारविषयकरागाभाव एव, न तु योगिनीवत् अनिष्टसाधनताज्ञानात् योगप्रतिबन्धकाहाराश्रितिः; तदुक्तं,—"नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः" इति (अ० को०), एवञ्च योगिन्या वैराहारे प्रवृत्तिरस्ति वियोगिन्यास्तु (तव) सर्वस्मिन्नेवाहारे वीतरागतेति भावः। समस्तविषयग्रामे—सर्वेषां विषयाणां—भोग्यानां, ग्रामे—समूहे, परा—आत्यन्तिकी, निवृत्तिः; [अत्र समस्तेति पदेन च विशेषणेन योगिन्याः सर्वविषयनिवृत्तिर्न दृश्यते, शरीरधारणोपयोगिषु तस्याः प्रवृत्तिदर्शनात्, वियोगिन्यास्तु सर्वेष्वपि विषयेषु न प्रवृत्तिर्भवतीति, तथा—योगिन्याः निवृत्तेरात्यन्तिकत्वं नास्ति, वियोगिन्यास्तु आत्यन्तिकता, योगिन्याः योगसाधने बहूच्छोपपन्ने च विषये प्रवृत्तेः, तत्र च सर्वस्मिन् विषयाश्रितेः पार्थक्यं व्यज्यते]। नासाग्रे नयनं, निश्चलमिति शेषः, चिन्ताविप्रलिप्सितत्वादिति भावः, यच्च एकतानम्—एकाग्रम्, अनन्यवृत्तीत्यर्थः, मनः तदेतत् अपरम्—अन्यत्। [योगिन्या ध्यानसमये एव नासाग्रे नयनं, मनसश्च एकतानत्वं भवति, वियोगिन्यास्तु (तव) सर्वदैव बहुभवनिति तदेतदपरमिति व्यञ्जयतीति]। इदं

अत्र तु "आहारे" इति विषयसप्तम्याः, "समस्त" इति "परा" इति च विशेषणद्वयस्य, "मौनं चेदम्" इति प्रत्ययपरामर्शिनः सर्वनाम्नः, "आभाति" इत्युपसर्गस्य, "सखि" इति प्रणयस्मारणस्य, "असि भोः" इति सोपहासोत्प्रासस्य, "किं वा" इत्युत्तरपक्षदार्ढ्यसूचकस्य वाशब्दस्य, "असि" इति वर्त्तमानोपदेशस्य तत्तद्विशेषव्यञ्जकत्वं सहृदयसंवेद्यम्। (द)

वर्णरचनयोरुदाहरिष्यते। प्रबन्धे यथा,—महाभारते

मौनं—तूष्णीम्भावश्च,[योगिनी मौनसमये इङ्गितादिना अर्थं बोधयति, तव तु इङ्गिताऽऽदिनाऽपि अर्थबोधकत्वं नास्तीति इदंपदेन व्यज्यते]। इदञ्च विश्वं, यत् ते—तव, अधुना शून्यम् आभाति—आ—सम्यक्प्रकारेण भातीत्यर्थः; [योगिन्याः विश्वं तत्त्वेनासद्भूतं प्रतिभाति, वियोगिन्याश्च सदपि विश्वं प्रकृतानुपयोगित्वेनासदिव प्रतिभातीति इदंपदेन व्यज्यते, तथा योगिन्याः विश्वस्य शून्यत्वेन ज्ञानं परमात्मावच्छिन्नस्य तु न, वियोगिन्यास्तु तव सब्रह्मैव विश्वं शून्यमिति आङुपसर्गेण व्यज्यते]। तत्—तस्मात्, ब्रूयाः,—कथयेः, योगिनी असि किम्? वा अथवा, [इदञ्च वियोगिन्येवासीत्युत्तरपक्षं द्रढयति, तथा चास्य न त्वं योगिनी, किन्तु सत्यं वियोगिन्येवासीति व्यञ्जयति] किं वियोगिनी असि? [अयञ्च परिहाससूचकः प्रश्नः, तेन सोत्प्रासस्य उपहाससूचकस्य अस्य प्रश्नस्य योगिनीव प्रतीयसे, न तु तथाभूता त्वमिति व्यक्तिविषयं, तथा असीति वर्त्तमानकालिका क्रिया प्रत्यक्षतामनुभावयति]। शार्दूलविक्रीडितं वृत्तम्।

(द) अत्र त्विति।—"आहारे" इति, विषयसप्तम्याः व्यञ्जकत्वमिति शेषः, एवं परत्रापि षष्ठ्यन्तेन व्यञ्जकत्वमिति सम्बन्धनीयम्। "मौनं चेदम्" इति।—प्रत्ययपरामर्शिनः,—प्रतीयते इति प्रत्ययः,—प्रतीतिविषयः, तस्य परामर्शि—वाचकं तस्य, ["प्रत्यय" इत्यत्र "प्रत्यक्ष" इति क्वचित् पाठः, तथा सति प्रत्यक्षवाचकस्येत्यर्थः]। सर्वनाम्नः,—सर्वादिगणान्तर्गतस्य प्रातिपदिकस्य, इदंशब्दस्येति यावत्। प्रणयस्मारणस्य—प्रणयं—प्रेम, स्मारयति—प्रत्याययतीति तस्य तथोक्तस्य, प्रेमसूचकस्येत्यर्थः, [अत्र नन्द्यादित्वात् ल्युः]। उपहासेन सह वर्त्तते इति स चासौ उत्प्रासः,—कथनं तस्य। तत्तद्विशेषव्यञ्जकत्व—तत्तेषाम्—आहारादिविषयविरत्यादिरूपाणां प्रतिपाद्यानां, ये विशेषाः,—प्रकाराः, ["विशेष" इत्यत्र "विषय" इति पाठे—तेषां तेषां ये विषयाः, प्रतिपाद्याः इत्यर्थः] तेषां व्यञ्जकत्वं—तत्कर्मद्योतकत्वं, सहृदयसंवेद्यं—सचेतसामनुभवविषयम्।

शान्तः; रामायणे करुणः; मालतीमाधवरत्नावल्यादौ शृङ्गारः। एवमन्यत्र। (ध)

(५१)

तदेवमेकपञ्चाशद्भेदास्तस्य ध्वनेर्मताः। (न)

(ध) वर्णरचनेति।—वर्णः,—माधुर्यादिगुणव्यञ्जकः, रचना—पदविन्यासविशेषः, साऽपि माधुर्यादिगुणव्यञ्जिका, तयोः, माधुर्यादिगुणव्यञ्जकत्वादिति भावः। उदाहरिष्यते इति गुणपरिच्छेदे इति शेषः। एवमन्यत्रेति।—"नाथे जिष्णुपाण्डुतनौ तन्वी याचे वस्तुनामरूपी विषयः प्रबन्धव्यक्ती दृश्यते" इति षष्ठीदाहः।

(न) तदेवमिति।—तत्—तस्मात्, एवम्—उक्तरीत्या, तस्य—पूर्वोक्तस्य, ध्वनेः एकपञ्चाशत् भेदा मताः। तथाहि,—तत्र वर्णपदसमूलध्वनिः, वर्णान्तरसङ्क्रमितवाच्यः अत्यन्ततिरस्कृतवाच्य इति त्रिविधोऽपि पदवाक्यगतत्वेन चतुर्विधः। असंलक्ष्यक्रमव्यङ्ग्यः, पदपदांशवर्णरचनावाक्यसङ्घातवाक्यगतत्वेन षड्विधः। प्रबन्धमात्रव्यः संलक्ष्यक्रमव्यङ्ग्यः, वस्तुरूपालङ्काररूपत्वेन त्रिविधोऽपि पदवाक्यगतत्वेन चतुर्विधः। अर्थशक्तिमूलः संलक्ष्यक्रमव्यङ्ग्यः, वस्तुरूपालङ्काररूपौ स्वतःसिद्धकविप्रौढोक्तिसिद्धकविनिबद्धवक्तृप्रौढोक्तिसिद्धत्वेन षड्विधौ वस्तुरूपालङ्काररूपौ द्वादशविधोऽपि पदवाक्यसङ्घातवाक्यगतत्वेन त्रैविध्यात् षट्त्रिंशत्प्रकारः। उभयशक्तिमूलस्तु वाक्यगतः, एकविध एवेति [पूर्वं पञ्चत्रिंशद्भेदाः उक्ताः; अर्थशक्तिमूलध्वनेः प्रबन्धप्रधान्येन पुनर्द्वादशविधत्वम्। असंलक्ष्यक्रमव्यङ्ग्यध्वनेरपि पदांशवर्णरचनावयवप्रधान्येन चतुर्विधत्वमिति षोडशः] मिलित्वा एकपञ्चाशद्विधो ध्वनिरिति फलितार्थः। यद्यप्यर्थानां वाच्यलक्ष्यव्यङ्ग्यभेदेन पदांशानाञ्च प्रकृत्यादिभेदेनानन्तोऽधिका अपि प्रकाराः सम्भवन्ति, तथापि तत्प्रदर्शनानुरोधेनैवमयं भेदः प्रदर्शितः; अथ वैशद्यविभावः,—अविवक्षितवाच्यावविवक्षितान्यपरवाच्यसंज्ञौ लक्षणाऽभिधामूलकौ प्रथमं ध्वनेः द्वौ प्रकारौ। अर्थान्तरसंक्रमितात्यन्ततिरस्कृतवाच्यत्वनिमित्तकत्वेन द्विप्रकारश्च अविवक्षितवाच्यश्च वाक्यपदांशगतत्वेन त्रैविध्ये चतुःप्रकारत्वम्। संलक्ष्यक्रमव्यङ्ग्यासंलक्ष्यक्रमव्यङ्ग्यभेदेन विवक्षितान्यपरवाच्यश्च द्विप्रकारः, प्रबन्धप्रधानमूलकसंलक्ष्यक्रमव्यङ्ग्यश्च वस्तुरूपालङ्काररूपत्वेन द्विप्रकारत्वे वाक्यपदगतत्वनिमित्तकं चतुःप्रकारत्वम्। अर्थशक्तिमूलकसंलक्ष्यक्रमव्यङ्ग्यश्च स्वतःसम्भविनार्थेन कविप्रौढोक्तिसिद्धत्वार्थेन कविनिबद्धवक्तृप्रौढोक्तिसिद्धत्वार्थेन च द्विप्रकारत्वम्। तत्र पुनः वस्तुरूपालङ्काररूपत्वेन द्विप्रकारत्वे षट्-

प्रकारत्वम्। तच्च यापि व्यङ्ग्यव्यञ्जकत्वमेदेन द्विप्रकारत्वे चादशप्रकारत्वम्। द्वादश-प्रकारस्य पुनः प्रबन्धगतत्व वाक्यगतत्व-पदगतत्वरूपत्रिप्रकारैश्च चतुर्त्रिंशत्प्रकारत्वम्। अत्रिंशत्प्रभेदमूलकः वाक्यगतत्वेनैकप्रकारः, संलक्ष्यक्रमव्यङ्ग्यध्वनेः एवमेकचत्वारिंशद्भेदाः। असंलक्ष्यक्रमव्यङ्ग्यात्मक प्रबन्धवाक्य-पदपदैकदेशरचनावयवगतत्वमेदेन रसादिध्वनेः षट्प्रकारत्वम्; विवक्षितान्यपर-वाच्यध्वनेः सप्तचत्वारिंशत्प्रकाराः एवं त्रेधा। अविवक्षितवाच्यश्च चतुर्विधभेदैः सार्कं प्रथमं विभुद्विधा एकपञ्चाशद्भेदाः ध्वनेरवगन्तव्याः। ते पृथक् नामनिर्देशेन प्रदर्श्यन्ते।—(१) पदनिष्ठोऽर्थान्तरसंक्रमितावाच्यध्वनिः, (२) वाक्यनिष्ठोऽर्थान्तरसंक्रमितावाच्यध्वनिः, (३) पदनिष्ठात्यन्ततिरस्कृतावाच्यध्वनिः, (४) वाक्यनिष्ठोऽत्यन्ततिरस्कृतावाच्यध्वनिः, (५) पदनिष्ठः अर्द्धमात्रिमूलसंलक्ष्यक्रमवस्तुध्वनिः, (६) पदनिष्ठः अर्द्धमात्रिमूलसंलक्ष्यक्रमालङ्कारध्वनिः, (७) वाक्यनिष्ठः अर्द्धमात्रिमूलसंलक्ष्यक्रमवस्तुध्वनिः, (८) वाक्यनिष्ठः अर्द्धमात्रिमूल-संलक्ष्यक्रमालङ्कारध्वनिः, (९) पदनिष्ठः स्वतःसिद्धार्थमात्रिमूलो वस्तुद्वारको वस्तु-ध्वनिः, (१०) पदनिष्ठः स्वतःसिद्धार्थमात्रिद्वारको वस्तुद्वारकोऽलङ्कारध्वनिः, (११) पदनिष्ठः स्वतःसिद्धार्थमात्रिमूलोऽलङ्कारद्वारकोऽलङ्कारध्वनिः, (१२) पद-निष्ठः स्वतःसिद्धार्थमात्रिमूलोऽलङ्कारद्वारको वस्तुध्वनिः, (१३) वाक्यनिष्ठः स्वतः-सिद्धार्थमात्रिमूलो वस्तुद्वारको वस्तुध्वनिः, (१४) वाक्यनिष्ठः स्वतःसिद्धार्थमात्रि-मूलो वस्तुद्वारकोऽलङ्कारध्वनिः, (१५) वाक्यनिष्ठः स्वतःसिद्धार्थमात्रिमूलोऽलङ्कार-द्वारकोऽलङ्कारध्वनिः, (१६) वाक्यनिष्ठः स्वतःसिद्धार्थमात्रिमूलोऽलङ्कारद्वारको वस्तु-ध्वनिः, (१७) प्रबन्धनिष्ठः स्वतःसिद्धार्थमात्रिमूलो वस्तुद्वारको वस्तुध्वनिः, (१८) प्रबन्धनिष्ठः स्वतःसिद्धार्थमात्रिमूलो वस्तुद्वारकोऽलङ्कारध्वनिः, (१९) प्रबन्ध-निष्ठः स्वतःसिद्धार्थमात्रिमूलोऽलङ्कारद्वारकोऽलङ्कारध्वनिः, (२०) प्रबन्धनिष्ठः स्वतः-सिद्धार्थमात्रिमूलोऽलङ्कारद्वारको वस्तुध्वनिः, (२१) पदनिष्ठः अविमौढ़ोक्तिसिद्धार्थ-मात्रिमूलो वस्तुद्वारको वस्तुध्वनिः, (२२) पदनिष्ठः अविमौढ़ोक्तिसिद्धार्थमात्रिमूलो वस्तुद्वारकोऽलङ्कारध्वनिः, (२३) पदनिष्ठः अविमौढ़ोक्तिसिद्धार्थमात्रिमूलोऽलङ्कार-द्वारकोऽलङ्कारध्वनिः, (२४) पदनिष्ठः अविमौढ़ोक्तिसिद्धार्थमात्रिमूलोऽलङ्कारद्वारको वस्तुध्वनिः, (२५) वाक्यनिष्ठः अविमौढ़ोक्तिसिद्धार्थमात्रिमूलो वस्तुद्वारको वस्तु-ध्वनिः, (२६) वाक्यनिष्ठः अविमौढ़ोक्तिसिद्धार्थमात्रिमूलो वस्तुद्वारकोऽलङ्कारध्वनिः, (२७) वाक्यनिष्ठः अविमौढ़ोक्तिसिद्धार्थमात्रिमूलोऽलङ्कारद्वारकोऽलङ्कारध्वनिः, (२८) वाक्यनिष्ठः अविमौढ़ोक्तिसिद्धार्थमात्रिमूलोऽलङ्कारद्वारको वस्तुध्वनिः,

सङ्करेण त्रिरूपेण संसृष्ट्या चैकरूपया।

(४) (०) (३) (५) (५) (५) (३) (५)

वेदखाग्निशराः शुद्धैरिषुबाणाग्निसायकाः॥२६७॥(प)

(२९) प्रबन्धनिष्ठः कविप्रौढोक्तिसिद्धार्थशक्तिमूलो वस्तुद्वारको वस्तुध्वनिः, (३०) प्रबन्धनिष्ठः कविप्रौढोक्तिसिद्धार्थशक्तिमूलो वस्तुद्वारकोऽलङ्कारध्वनिः, (३१) प्रबन्धनिष्ठः कविप्रौढोक्तिसिद्धार्थशक्तिमूलोऽलङ्कारद्वारकोऽलङ्कारध्वनिः, (३२) प्रबन्धनिष्ठः कविप्रौढोक्तिसिद्धार्थशक्तिमूलोऽलङ्कारद्वारको वस्तुध्वनिः, (३३) पदनिष्ठः कविनिबद्धवक्तृप्रौढोक्तिसिद्धार्थशक्तिमूलो वस्तुद्वारको वस्तुध्वनिः, (३४) पदनिष्ठः कविनिबद्धवक्तृप्रौढोक्तिसिद्धार्थशक्तिमूलो वस्तुद्वारकोऽलङ्कारध्वनिः, (३५) पदनिष्ठः कविनिबद्धवक्तृप्रौढोक्तिसिद्धार्थशक्तिमूलोऽलङ्कारद्वारकोऽलङ्कारध्वनिः, (३६) पदनिष्ठः कविनिबद्धवक्तृप्रौढोक्तिसिद्धार्थशक्तिमूलोऽलङ्कारद्वारको वस्तुध्वनिः, (३७) वाक्यनिष्ठः कविनिबद्धवक्तृप्रौढोक्तिसिद्धार्थशक्तिमूलो वस्तुद्वारको वस्तुध्वनिः, (३८) वाक्यनिष्ठः कविनिबद्धवक्तृप्रौढोक्तिसिद्धार्थशक्तिमूलो वस्तुद्वारकोऽलङ्कारध्वनिः, (३९) वाक्यनिष्ठः कविनिबद्धवक्तृप्रौढोक्तिसिद्धार्थशक्तिमूलोऽलङ्कारद्वारकोऽलङ्कारध्वनिः, (४०) वाक्यनिष्ठः कविनिबद्धवक्तृप्रौढोक्तिसिद्धार्थशक्तिमूलोऽलङ्कारद्वारको वस्तुध्वनिः, (४१) प्रबन्धनिष्ठः कविनिबद्धवक्तृप्रौढोक्तिसिद्धार्थशक्तिमूलो वस्तुद्वारको वस्तुध्वनिः, (४२) प्रबन्धनिष्ठः कविनिबद्धवक्तृप्रौढोक्तिसिद्धार्थशक्तिमूलो वस्तुद्वारकोऽलङ्कारध्वनिः, (४३) प्रबन्धनिष्ठः कविनिबद्धवक्तृप्रौढोक्तिसिद्धार्थशक्तिमूलोऽलङ्कारद्वारकोऽलङ्कारध्वनिः, (४४) प्रबन्धनिष्ठः कविनिबद्धवक्तृप्रौढोक्तिसिद्धार्थशक्तिमूलोऽलङ्कारद्वारको वस्तुध्वनिः, (४५) प्रबन्धनिष्ठोऽसंलक्ष्यक्रमव्यङ्ग्यो रसादिध्वनिः, (४६) वाक्यनिष्ठोऽसंलक्ष्यक्रमव्यङ्ग्यो रसादिध्वनिः, (४७) पदनिष्ठोऽसंलक्ष्यक्रमव्यङ्ग्यो रसादिध्वनिः, (४८) पदैकदेशनिष्ठोऽसंलक्ष्यक्रमव्यङ्ग्यो रसादिध्वनिः, (४९) रचनानिष्ठोऽसंलक्ष्यक्रमव्यङ्ग्यो रसादिध्वनिः, (५०) वर्णनिष्ठोऽसंलक्ष्यक्रमव्यङ्ग्यो रसादिध्वनिः, (५१) वाक्यनिष्ठः शब्दार्थोभयशक्तिमूलो ध्वनिरिति।

(प) सङ्करेणेति।—त्रिरूपेण—त्रिविधेन, अलङ्कारपरिच्छेदे अङ्गाङ्गिभावसन्देहैकाश्रयानुप्रवेशरूपेण ["अङ्गाऽङ्गित्वेऽलङ्कृतीनां तद्वदेकाश्रयस्थितौ। सन्दिग्धत्वे च भवति सङ्करस्त्रिविधः पुनः॥" इत्यलङ्कारसङ्करस्य त्रैविध्यमुक्तं, तदनुसारेण सङ्करत्रैविध्यं ज्ञेयम्। अत्र "एकाश्रयस्थितौ" इत्यत्र एकव्यञ्जकानुप्रवेशे इत्यर्थः। सन्दिग्धत्वे "अयं ध्वनिः स ध्वनिर्वा" इति संशये, अङ्गाङ्गिभावापन्नम्, अनेक-

शुद्धैः,—शुद्धभेदैरेकपञ्चाशता योजनेनेत्यर्थः। (फ)

व्यञ्जकानुप्रविष्टः इति सङ्क्षेपः] वक्ष्यमाणेन इत्यर्थः, सङ्करेण, एकरूपया—एकविधया, असन्दिग्धध्वनिसमुदायरूपया इत्यर्थः, संसृष्ट्या च वक्ष्यमाणलक्षणया इति शेषः, (ते एकपञ्चाशद्भेदाः) वेदखाग्निशराः,—वेदाः,—चत्वारः, खं—शून्यम्, अग्नयः,—त्रयः, शराः,—पञ्च इत्यर्थः। सजातीयानेकसंख्याप्रस्तावे "अङ्कानां वामतो गतिः" इत्यङ्कविदां नियमेन ५३०४ चतुरधिकानि त्रिपञ्चाशच्छतानि इति निष्कृष्टोऽर्थः, शुद्धैः,—अविमिश्रैरित्यर्थः, एकपञ्चाशता मिलिता इति शेषः, ५३५५ पञ्चपञ्चाशदधिकत्रिपञ्चाशच्छतभेदाः इत्यर्थः। ननु कथमेतत्? एकपञ्चाशतः चतुर्गुणने चतुरधिकशतद्वयमेव भवति इति चेत्? न; यतः प्रथमस्य सजातीयेनैकेन विजातीयैः पञ्चाशता च संसृष्टौ एकपञ्चाशत्त्वम्। एवं द्वितीयस्य सजातीयेनैकेन विजातीयैरूनपञ्चाशता च संसृष्टौ पञ्चाशत्त्वम्। तृतीयस्य सजातीयेनैकेन विजातीयैः अष्टचत्वारिंशता च संसृष्टौ ऊनपञ्चाशत्त्वं भवति। चतुर्थस्य सजातीयेनैकेन विजातीयैः सप्तचत्वारिंशता च संसृष्टौ अष्टचत्वारिंशत्त्वम्। एवमन्येषामेकैकह्रासेन सप्तचत्वारिंशदादिकम्। चरमस्य सजातीयेनैकेन संसृष्टौ एकविषयत्वमेवेति मिलित्वा षड्विंशत्यधिकत्रयोदशशतत्वं ध्वनिसंसृष्टेः। एवं क्रमेण अष्टसप्तत्युत्तरनवशताधिकत्रिसहस्रत्वं त्रिविधध्वनिसङ्करस्य। मिलित्वा "वेदखाग्नि—" इत्यादिसंख्यायाः उपपत्तिः। न चैकपञ्चाशतः तावता गुणने एकाधिकषड्विंशतिशती संसृष्टौ, तत्रैव तत्त्रिगुणसङ्करयोजने "वेदखाब्धिवियच्चन्द्राः" इति काव्यप्रकाशोक्तसङ्ख्या भवति; कथं "वेदखाग्नि" इत्यादिसङ्ख्या? इति वाच्यं, संसृष्टिसङ्करयोः पूर्वपूर्वसंसर्गस्योत्तरोत्तरगणनायामप्रवेशात् तावत्संख्यत्वानुपपत्तेः। अत एव काव्यप्रकाशटीकाकारचण्डीदासेन "संसृष्टौ सङ्करयोजने च सिन्धुगगनशिखिशराः, शुद्धयोगे शरबाणाग्निबाणाः" इत्युक्तम्।

(फ) शुद्धैरिति।—संसृष्टिसङ्कररहितैर्योगे इत्यर्थः। इषवः,—पञ्च, बाणाः,—पञ्च, अग्नयः,—त्रयः, सायकाः,—पञ्च। तथा च, पञ्चपञ्चाशदुत्तरशतत्रयाधिकपञ्चसहस्राणीत्यर्थः। एके प्रकाशमतानुयायिनस्त्वेवमाहुः,—एकपञ्चाशतः प्रकाराणामेकपञ्चाशता प्रकारैः सम्मेलनम्, इत्येवं तत्सङ्ख्यकानां तत्सङ्ख्यकगुणनेन एकोत्तरषट्शताधिकद्विसहस्रं (२६०१) सम्पद्यते। संसृष्ट्यादिचतुर्भेदैः सम्मेलनञ्चेति चतुर्भिः तत्सङ्ख्यकानां गुणनेन "वेदखाब्धिवियच्चन्द्राः" (१०४०४) चतुरुत्तरचतुःशताधिकदशसहस्राणीति सङ्ख्या जायते। नन्वेकपञ्चाशद्भेदानामेकतराणां पञ्चाशत्सङ्ख्यया मेलनम्, चात्मनस्तु चात्मना मेलनं कथमिति चेत्? न; विजातीयस्यैव सजातीयस्य

दिग्मात्रं तु उदाह्रियते,—

"अत्युन्नतस्तनयुगा तरलायताक्षी
हारि स्खलत्तदुपयानमहोत्सवाय।
सा पूर्णकुम्भनवनीरजतोरणश्रक्-
सम्भारमङ्गलमयत्नकृतं विधत्ते॥" (ब)

अत्र "स्तनावेव पूर्णकुम्भौ, दृष्टय एव नवनीरजस्रजः" इति रूपकध्वनिरसध्वन्योरेकाश्रयानुप्रवेशः सङ्करः।

स्यापि सङ्करयोगात् इति मम्मटादयः। यत्तु प्रकाशव्याख्याताः चक्षीदासप्रमुखाः, "सिन्धुननगमिखिमरा:" (५२०४) चतुरुत्तरशतमयाधिकपञ्चसहस्राणि इत्यादि प्रतिपादितवन्तः, तदुच्यते,—इक्षुदण्डमहीधादिरसादाविव श्रवणादपि प्रेष्टत्वातिशयातिशयौ अनुभवसिद्धौ। एवञ्च यत्र अर्थान्तरसंक्रमितवाच्यध्वनातिशयः, तत्र अत्यन्तिरस्कृतवाच्ये न तन्मेलनम्। वैपरीत्यलक्षणे तु इतरेषात्यन्तिरस्कृतवाच्यस्य मेलनं "प्राधान्येन व्यपदेशाः भवन्ति" इति न्यायेन सिद्धान्तितत्वात्। इदमेव मुख्यत्वमवलम्ब्य श्रीमौ (ध्वनिकारसुधीभ्यां) नखना खिदा। ननु एवं यत्र द्वयोः सदृशमेव सौन्दर्यं, तत्र प्रकारान्तरं सम्पद्येत, इति चेत्? न, अतिशयपदेन उपकर्षाभावस्य अभिधित्सितत्वात्, तत्र भेदव्यवहाराङ्गीकारात् इति काव्यप्रदीपादौ स्पष्टम्।

(ब) अत्युन्नतेति।—प्रवासादागतं पतिं श्रुत्वा बाह्यगृहद्वारि स्थितायाः नायिकायाः वर्णनमिदम्। अत्युन्नतम्—अत्युच्चं, [एतेन पीनत्वं सूच्यते] स्तनयुगं यस्याः सा, तरले—चञ्चले, [एतेन प्रतीक्षोन्मुखीत्वं सूच्यते] आयते—विस्तारिणी, [एतेन दर्शिष्यापि पत्युः दर्शनपरत्वं सूच्यते] च आयते—नेत्रे, यस्याः तथोक्ता, सा, द्वारि स्थिता सती, तस्य—पत्युः, उपयानम्—उपस्थितिः, एव महोत्सवः तस्मै, द्वारगृहप्रवेशजन्याधिकमहानन्दव्यापारायेत्यर्थः, अयत्नकृतं—विना प्रयासेन जनितं, पूर्णकुम्भौ च नवनीरजानां—पद्मानां, तोरणस्रजः—द्वारदेशशोभार्थं लम्बितस्य तेषां सम्भारः,—आहरणमेव मङ्गलं, विधत्ते—करोति। प्रवासादागतस्य गृहप्रवेशसमये पूर्णकुम्भस्थापनादिमङ्गलं क्रियते इति लोकाचारः। [अत्र रसः शृङ्गार एव, स च स्तनयोः पूर्णकुम्भत्वारोपमूलकेन दृष्टीश्च नवनीरजस्रक्त्वारोपमूलकेन रूपकेणाङ्गाङ्गिभावेन नायकरतेतरेच्छापल्लवात् एकाश्रयीभावेन स्थितः, इत्येव व्यङ्ग्यानुप्रवेशः श्रेयः]। सुखलालसृष्टं तत्।

"धिन्वन्त्यमूनि मदमूर्च्छदलिध्वनीनि
धूताध्वनीनहृदयानि मधोर्दिनानि।
निस्तन्द्रचन्द्रवदनावदनारविन्द-
सौरभ्यसौहृदसगर्वसमीरणानि॥" (भ)

अत्र निस्तन्द्रेत्यादिलक्षणामूलध्वनीनां संसृष्टिः। (म)

अथ गुणीभूतव्यङ्ग्यम्,—

अपरन्तु गुणीभूतव्यङ्ग्यं वाच्यादनुत्तमे व्यङ्ग्ये॥१६८॥(य)

अपरं—काव्यम्। अनुत्तमत्वं न्यूनतया साम्येन च सम्भवति।

(भ) धिन्वन्तीति।—वसन्तादिवसवर्णनमिदम्। मदेन—हर्षेण, मूर्च्छन्तः,—वृद्धिं गच्छन्तः, अलीनां—भ्रमराणां, ध्वनयः, येषु तानि; धूतानि—कम्पितानि अध्वनीनानां—पान्थानां, हृदयानि यैः तथोक्तानि; तथा निस्तन्द्रः,—अतिप्रकाशमानः, पूर्ण इति यावत्, यश्चन्द्रः, स एव वदनं यासां तासां, वदनारविन्दानि—मुखपद्मानि तत्सम्बन्धि यत् सौरभ्यं—सौगन्ध्यं, तेन यत् सौहृदं—सख्यं, सादृश्यसम्बन्ध इति यावत्, तेन सगर्वाः,—साहङ्काराः, उत्कृष्टा इति यावत्, समीरणाः,—वायवः, यत्र तथाविधानि, अमूनि—अनुभूयमाननवोल्लासवानि, मधोः,—वसन्तस्य, दिनानि, धिन्वन्ति—प्रीणयन्ति, लोकानिति शेषः। वसन्तर्तुवर्णनं कृतम्।

(म) निस्तन्द्रेत्यादौति।—निस्तन्द्रः,—निद्रारहित इति मुख्योऽर्थः। इत्यादि इति।—अत्र आदिपदेन सौरभादीनां ग्रहणम्। चन्द्रे निस्तन्द्रतायाः असम्भवात् तदर्थस्य बाधः, तस्मात् लक्षणया निस्तन्द्रशब्दः प्रकाशमानत्वरूपमर्थं बोधयति, प्रकाशातिशयबोधनस्य तस्य प्रयोजनम्; एवं प्रेमाहङ्कारवाचको सौहृदगर्वशब्दौ चेतनमात्रधर्मत्वात् प्रकृते असम्भवन्तौ लक्षणया सादृश्योत्कर्षरूपौ अर्थौ बोधयतः, सादृश्यातिशयबोधनमुत्कर्षातिशयबोधनञ्च तत्प्रयोजनम्। तस्मात् अत्र वाच्यार्थानामत्यन्ततिरस्कृतत्वात् (वाच्यार्थस्यार्थान्तरसंक्रमितत्वाभावादित्यर्थः) उक्तविविधसङ्कराभावात् अत्यन्ततिरस्कृतवाच्यलक्षणामूलध्वनीनां संसृष्टिरेव सहृदयगम्येति भावः।

(य) ध्वनिं निरूप्य गुणीभूतव्यङ्ग्यं निरूपयति, अथेति।—अपरमिति।—अपरं—द्वितीयप्रकारं, ध्वनिभिन्नं काव्यमित्यर्थः, तु—पुनः, वाच्यात्—वाच्यार्थापेक्षया, अनुत्तमे—निकृष्टे, व्यङ्ग्ये—व्यञ्जनया बोध्येऽर्थे सति, गुणीभूतव्यङ्ग्यं—गुणीभूतं व्यङ्ग्यं यत्र तादृशं द्वितीयमिति शेषः, वाच्यापेक्षया चमत्कारानुत्कर्षे व्यङ्ग्यस्य गुणीभावः सम्प्रदायसिद्धः।

तत्र स्यादितराङ्गं काक्वाऽऽक्षिप्तञ्च वाच्यसिद्ध्यङ्गम्।
सन्दिग्धप्राधान्यं तुल्यप्राधान्यमस्फुटमगूढम्।
व्यङ्ग्यमसुन्दरमेवं भेदास्तस्योदिता अष्टौ ॥२६९॥(र)

इतरस्य—रसादेः, (ल) अङ्गं—रसादिव्यङ्ग्यम्।

यथोक्तं ध्वनिकृता,—"प्रकारोऽन्यो गुणीभूतव्यङ्ग्यः काव्यस्य दृश्यते। यत्र व्यङ्ग्यान्वये वाच्यचारुत्वं स्यात् प्रकर्षवत्॥" इति, "प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्। यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनानाम्॥" इति।

(र) अस्य भेदानाह, तत्रेति।—तत्र—गुणीभूतव्यङ्ग्ये काव्ये, व्यङ्ग्य—व्यञ्जनया बोध्योऽर्थः, इतराङ्गम्—इतरस्य—रसादेः, वाक्यार्थस्य इति सारः, अङ्गं—पोषकमित्यर्थः, काक्वा—काकुः,—ध्वनिविकारविशेषः, तया, आक्षिप्तम्—आहृतं, झटिति वाच्यवत् प्रतीयमानमित्यर्थः, च—तथा, वाच्यसिद्ध्यङ्गं—वाच्यस्य—मुख्यार्थस्य सिद्धेः अङ्गं—साधकं, वाच्यस्यान्वयबोधबीजमित्यर्थः, आपाततः प्रतीतस्य वाच्यस्य प्रतिसन्धानानुपपत्तिबाधकमिति भावः, सन्दिग्धप्राधान्यं—सन्दिग्धं—संशयितं, वाच्यकृतं व्यङ्ग्यकृतं वेत्यनिश्चितमिति यावत्, प्राधान्यं—प्रधानभावः, यस्य यत्र वा तादृशम्, अथवा सन्दिग्धं चमत्कारोत्पत्तौ सन्देहाश्रयं प्रधान्यं यत्र तथाभूतमित्यर्थः, तुल्यप्राधान्यं—समानप्रधानभावम्, अस्फुटं—सहृदयैरपि झटित्यबोध्यमित्यर्थः, अगूढं—स्फुटतया वाच्यवत् प्रतीयमानम् [अगूढमरसिकैरपि सहसाऽवधार्य्यम्, तत् हि वाच्यवत् प्रतीयमानत्वेन न तथा चमत्कारकं भवति; व्यङ्ग्यं हि कामिनीकुचकलशवत् नातिगूढं, न वाऽगूढं सहृदयान् आमोदयति; अत एवोक्तं,—"नाऽऽन्ध्रीपयोधर इवातितरां प्रकाशो नो गुर्ज्जरीस्तन इवातितरां निगूढः। अर्थो गिरामपिहितः पिहितश्च कश्चित् सौभाग्यमेति मरहट्टवधूकुचाभः॥" इति। अयं भावः,—कामिनीकुचकलशन्यायेन रसिकैरपि दुर्बोध्यम्, अरसिकैरपि सुबोध्यं वा गुणीभूतव्यङ्ग्यमेवेति; एवं भेदान्तरेष्वपि अनुभवसाक्षिकत्वं ग्रन्थान्तरादौ द्रष्टव्यम्] असुन्दरं—चमत्कारिताशून्यम्। एवं—निर्दिष्टरीत्या इत्यर्थः, तस्य—गुणीभूतव्यङ्ग्यस्य काव्यस्य, अष्टौ भेदाः, उदिताः,—कथिताः। उक्तञ्च वृत्तिवार्त्तिकेऽप्ययदीक्षितैः,—"व्यङ्ग्यस्य यदि वाच्याङ्गत्वं वा काक्वा च नेयता। वाच्यसिद्ध्यङ्गता वाऽपि सन्दिग्धमुख्यताऽथवा॥ वाच्यतुल्यप्रधानत्वसत्त्वं विस्फुटताऽपि वा। अस्फुटत्वमचारुत्वं तत् स्यादष्टविधं परम्॥" इति।

(ल) इतरस्य रसादेः इति।—अत्रादिपदेन भावादीनां ग्रहणम्।

यथा,—

"अयं स रसनोत्कर्षी पीनस्तनविमर्दनः।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः॥" (व)

अत्र शृङ्गारः करुणस्याङ्गम्। (श)

"मानोन्नतां प्रणयिनीमनुनेतुकामः
त्वत्सैन्यसागररवोद्गतकर्णतापः।
हा! हा! कथं नु भवतो रिपुराजधानी-
प्रासादसन्ततिषु तिष्ठति कामिलोकः॥" (ष)

(व) इतराङ्गमुदाहरति, अयमिति।—भूरिश्रवसः समरक्षेत्रपतितं छिन्नं हस्तं दृष्ट्वा तत्पत्न्याः शोकार्त्ताया वचनमिदम्। रसनोत्कर्षी—रसनां—काञ्चीं, ["स्त्रीकट्यां मेखला काञ्ची सप्तकी रसना तथा" इत्यमरः] मज्जघनस्थितामिति भावः, उत्कर्षयति—आक्षिपतीति तथोक्तः, अथवा ताम् उत्कर्षयितुं मार्जनादिना उत्कृष्टीकर्त्तुमाकृष्टुं वा शीलमस्य तथोक्तः; पीनस्तनविमर्दनः,—पीनौ स्तनौ विमर्दयतीति तथोक्तः, नाभ्यूरुजघनस्पर्शी—नाभिम् ऊरू जघनञ्च स्पृशतीति तादृशः, सुरताभिलाषोद्बोधनार्थं नाभ्यादिस्पर्शशील इत्यर्थः, तथा नीवीविस्रंसनः,—नीवीं—(मम) कटिदेशस्थवसनग्रन्थिं ["स्त्रीकटीवस्त्रबन्धेऽपि नीवी" इत्यमरः] विस्रंसयति—श्लथयति इति तथोक्तः, मदीयकटिवसनग्रन्थिमोक्षणकर इति यावत्, सः,—तत्तत्कर्मणि मुहुरनुभूतः इति यावत्, करः,—हस्तः, अयम्—इदानीम् ईदृगवस्थः। महाभारतस्येदं पद्यम्।

(श) अत्रेति।—शृङ्गारः, आलम्बनविच्छेदेन रतेरपरिपुष्टतया रसतामनापद्यमानत्वे स्मर्य्यमाणानां तदङ्गानां शोकोद्दीपकतयेति शेषः, करुणस्य—करुणरसस्य, अङ्गं—पोषकभूतः। एवं शृङ्गारः करुणाङ्गं, करुणश्च शृङ्गाराङ्गी, अत एव प्राकरणिकत्वेन प्रधानस्य करुणस्य व्यञ्जकवाक्यार्थमपेक्ष्य तदानीमप्राप्तरसभावस्य न्यूनत्वम् (अचमत्कारित्वम्)। ननु तदानीं शृङ्गारस्य रसत्वाप्राप्त्या कथमस्य रसाङ्गरसोदाहरणत्वं सङ्गच्छतामिति चेत्? न; तदानीं शृङ्गाररसस्य पूर्णरसत्वाभावेऽपि खण्डरसत्वमस्त्येवेति परत्र (दोषपरिच्छेदे) निर्णेष्यते। ध्वनिकारास्तु अत्र करुणमेव शृङ्गाराङ्गमाचक्षते, तदानीं तद्दर्शनादिना करुणस्योद्भूततया शृङ्गारस्य च रसनोत्कर्षित्वादिना उद्भूयमानस्यापि तदपेक्षया अनुद्भूतत्वात् इति दिक्।

(ष) भावाङ्गमाह, मानोन्नतामिति।—राजस्तुतिरियम्। हे राजन्! भवतः

अत्रौत्सुक्यत्रासयोः सन्धिसंकलनस्य करुणस्य राजविषयरतौ अङ्गभावः। (ङ)

"जनस्थाने भ्रान्तं कनकमृगतृष्णान्वितधिया
वचो वैदेहीति प्रतिपदमुदस्रं प्रलपितम्।
कृता लङ्काभर्त्तुर्वदनपरिपाटीषु घटना
मयाऽऽसं रामत्वं कुशलवसुता न त्वधिगता॥" (च)

रिपुराजधानीप्रासादसन्ततिः क्षिप्त इति शेषः, कानिलोकः, मानोन्नताम्—उन्नतमानां, प्रणयिनीं—कान्ताम्, अनुनेतुकामः,—अनुनिनीषुरित्यर्थः, तव सैन्यसागरस्य—सैनिकसमूहरूपस्य समुदस्य, रवेश्च—कोलाहलेन, उद्गतः,—जनितः, कर्णतापः,—श्रोत्रपीड़ा, यस्य तादृशः सन्, हा हा इति विषादद्योतकमव्ययम्, अहो इत्यर्थः, कथं नु तिष्ठति? अतिकष्टेन वर्त्तते इत्यर्थः। वसन्ततिलकं वृत्तम्।

(ङ) अत्रेति।—मानोन्नतामिति प्रथमे पादे औत्सुक्यं, त्वत्सैन्येति द्वितीये त्रासः, तयोः सन्धिना—संयोगेन, समावेशेनेति यावत्, संकलनस्य—पुष्टस्य इत्यर्थः, [एतेन भावसन्धेः रसाङ्गत्वं दर्शितम्] करुणस्य राजविषया या रतिस्तस्याम्, अङ्गभावः,—पोषकतया निविष्टत्वम्। ततश्च भावसन्धिः करुणस्याङ्गं, करुणस्य राजविषयकरतिरूपस्य भावस्येति बोध्यम्। अत्र तु मुख्यार्थः व्यङ्ग्यकरुणनिरपेक्ष एव भावव्यङ्ग्यः, करुणस्तु वाच्यसापेक्षतादात्म्यापन्नः सन् तत्प्रकर्षक इति वाच्यार्थापेक्षया व्यङ्ग्यस्य न्यूनत्वमत्कारित्वमवधेयम्। एवं भावादीनां भावाद्यङ्गत्वे उदाहरणानि काव्यप्रकाशादुक्तानि बोध्यानि, ग्रन्थप्रपञ्चभयादिह नोक्तानि।

(च) वाच्यार्थस्याङ्गं ग्रन्थग्रन्थिमूलमनुरणनरूपव्यङ्ग्यमुदाहरन्, साहश्यघटकानि स्वरूपशब्दवाच्यत्वरूपसाधर्म्याण्याह, जनस्थाने इति।—धनार्थं कृतेऽपि प्रयत्नेऽपायसम्भवस्य सर्वसिद्धत्वादिदमिति। (रामेण) कनकमृगे—तद्रूपधारिणि मारीचे, (नया तु) कनकस्य—सुवर्णस्य, धनस्येत्यर्थः, मृगे—अन्वेषणे, ("मृगः पशौ कुरङ्गे च करिणश्चान्वेषयोः।" अन्वेषणे च यात्रायाम्" इति मेदिनी) या तृष्णा—प्रलोभा, लोभ इति यावत्, तया—तद्रूपवैक्षव्या, अन्धम्,—तत्सङ्कल्पकामनया इत्यर्थः, यद्वा,—मृगतृष्णाभ्याम्—अन्वेषणप्रलोभाभ्यामित्यर्थः; अन्विता—आच्छन्ना, विप्लुता इत्यर्थः, धीर्यस्य तादृशेन सता, [केचित्तु—"कनकमेव मृगतृष्णा—मरीचिका, कनके मृगतृष्णाऽऽरोपश्च दुष्प्रापत्वाद्यन्विनो मृगतृष्णात्वादिनेव दुष्प्रापत्वादिनार्थिनः कनकेऽपि प्रवृत्तेः तादृशप्रवृत्तिविषयत्वरूपसाधर्म्यात्" इत्याहुः, तन्न; करुणतः कनकस्य बुद्ध्यारोहस्यासम्भवात् तत्प्राप्तौ-

अत्र रामत्वं प्राप्तमित्यवचनेऽपि शब्दशक्तेरेव रामत्वमवगम्यते। वचनेन तु सादृश्यहेतुकतादात्म्यारोपणमाविष्कुर्वता तद्गोपनमपाकृतम्। तेन वाच्य सादृश्यं वाक्यार्थान्वयोपपादकतयाऽङ्गतां नीतम्। (क)

च्छायां लक्षणाऽवश्यमङ्गीकार्य्या; एवञ्च तत्र निरुक्तसाधर्म्यासम्भवात्, रूपकासङ्गतेः इति सारः] जनानां—धनिनामित्यर्थः, स्थाने—समीपे, अन्यत्र,—जनस्थाने—तदाख्यदण्डकारण्यप्रदेशविशेषे, भ्रान्तं—पर्य्यटितं, (रामेण) प्रतिपदं—पदे पदे, वैदेहि! हे विदेहवंशसम्भूते सीते! इति वचः, उदश्रु—सजलनयनं यथा तथा, प्रलपितम्—अनर्थकमुक्तम्, ("प्रलापोऽनर्थकं वचः" इत्यमरः). अन्यत्र,—वै—निश्चितं, ("वै"शब्दः निश्चयार्थः पादपूरणार्थो वा) "देहि" इति वचः, (रामेण) लङ्काभर्त्तुः,—रावणस्य, वदनानां परिपाट्यां—पङ्क्तौ, इषुघटना—शरयोजना, कृता, अन्यत्र,—भर्त्तुः,—धनस्वामिनः, वदनपरिपाटीषु—वदनस्य—मुखस्य, परिपाट्यः,—सन्तोषासन्तोषसूचकविविधभङ्गयः, तासु तथोक्तासु, का घटना—परिचयः, अलम्—अत्यर्थं, कृता? न कापीत्यर्थः। भर्त्तुः क्रोधोदयो वा, सन्तोषाविर्भावो वाऽस्तु. तद्विषयेषु कोऽपि विचारो न कृत इति भावः; अथवा,—भर्त्तुः वदनस्य परिपाटीषु—आनुपूर्व्येण, अनुकूलतास्विति यावत्, का घटना मया अलं—न, ("अलं भूषणपर्य्याप्तिवारणेषु" इति मेदिनी) कृता? वद त्वमिति शेषः, अपि तु सर्वविधैव मया कृतेति भावः; (अतः तत्तत्साधर्म्येण) मया रामत्वं—रामसाधर्म्यम्, आप्तं—प्राप्तं, तु—किन्तु, (रामेण) कुशलवसुता—कुशलवौ सुतौ यस्याः सा सीता प्राप्तैवेति तुशब्दलभ्योऽर्थः; मया कुशलं—दारिद्र्यहरणे समर्थमित्यर्थः, वसु—धनं यस्य तस्य भावस्तत्ता, तु न अधिगता—प्राप्ता। [अनेन मया रामत्व प्राप्तमित्यापाततः प्रतीयते, पश्चादन्यस्य धर्मं कथमन्यो लभतामित्यनुपपत्तिं प्रतिसन्दधतः स्वरूपशब्दसामर्थ्येन व्यज्यमानं सादृश्यमादाय रामसादृश्यं प्राप्तमिति बोधः पारमार्थिकः]। शिखरिणी वृत्तम्। उदात्तराघवस्येदं पद्यम्।

(क) अस्योपमाध्वनित्वं वारयन् वाक्यार्थाङ्गत्वमुपपादयति, अत्रेति।—अत्र—उदाहृते पद्ये, रामत्वं,प्राप्तं—लब्धम्,इत्यवचने—इत्येवं यावत् वर्णनेऽकृते अपि, शब्दशक्तेरेव—स्वरूपशब्दसामर्थ्यादेव, रामत्वं—रामसादृश्यमित्यर्थः, अवगम्यते—प्रतीतिविषयत्वं नीयते, वचनेन तु—मया रामत्वमाप्तमिति वाक्येन पुनः, सादृश्यहेतुकं—रामसादृश्यस्य कारणभूतं, यत् तादात्म्यं—रामत्वं, तस्य आरोपणम्—अभेदेन प्रतिपादनं,

काक्वाऽऽक्षिप्तं यथा,—

"मथ्नामि कौरवशतं समरे न कोपाद् ?
दुःशासनस्य रुधिरं न पिबाम्युरस्तः ? ।
सञ्चूर्णयामि गदया न सुयोधनोरू ?
सन्धिं करोतु भवतां नृपतिः पणेन ॥" (ख)

तत्, आविष्कुर्वता—व्यञ्जयता, प्रकटयता इत्यर्थः, तद्गोपनं—तस्य रामसादृश्यस्य गोपनं—गूढ़त्वम्, अपाकृतं—निराकृतं, खण्डितमिति यावत्, [एतेन अधिकचमत्कारित्वाभावेन अस्योपमाध्वनित्वं वारितम्] तेन—सादृश्यगोपनाकरणेन, वाच्यं—वाच्यवत् झटिति प्रतीयमानं, सादृश्यं—तुल्यत्वं,—वाक्यार्थस्य—रामसादृश्यप्राप्तिरूपस्य, अन्वयोपपादकतया—अन्वयसम्पादकतया, अन्वयप्रतियोगित्वेनान्वयस्य निर्वाहकतयेत्यर्थः, अङ्गतां—पोषकतां, नीतं—प्रापितम्। अत्र सादृश्यस्य गूढ़त्वापाकरणेन अधिकचमत्कारित्वस्य खण्डनात् गुणीभूतव्यङ्ग्यत्वं, नोपमाध्वनिरित्यवधेयम्। यत्रापाततः प्रतीतस्यार्थस्य अनुपपत्तिर्व्यङ्ग्यं निरस्यति, स वाच्यसिद्ध्यङ्गस्य विषयः। यत्र त्वापाततः प्रतीतस्य बाधनेन तत्स्थाने आत्मानमर्पयित्वा अन्वयं निर्वाहयति, सोऽस्य विषयः; इत्यनयोर्भेदः। [अत्र "उपमानोपमेयभावो व्यङ्ग्यो वाच्याङ्गतां नीतः" इति काव्यप्रकाशवृत्तिं केचिदेवं विवृण्वन्ति,—"उपमानोपमेयभाव उपमा रामत्वप्राप्तिव्यङ्ग्या, वाच्यस्य, कुशलवसुताप्राप्त्याप्राप्ततत्कार्य्यात् रामात् व्यतिरेकरूपस्य अस्य अङ्गतां (प्रकर्षकतां) नीतः" इति, तन्न, अङ्गतामुपपादकतामित्यस्यैव वक्तुं युक्तत्वात्; उपमानव्यञ्जनाऽभावे व्यतिरेकप्रतीत्यनुपपत्तेः, उपपत्त्यतिशयाधायकस्यैव प्रकर्षत्वसम्भवात्। अर्थशक्तिमूलानुरणनरूपस्य वाच्यस्य अङ्गत्वं यथा,—"आगत्य सम्प्रति वियोगविसंष्ठुलाङ्गीमम्भाजिनीं क्वचिदपि क्षपितत्रियामः। एतां प्रसादयति पश्य शनैः प्रभाते तन्वङ्गि ! पादपतनेन सहस्ररश्मिः ॥" अत्र नायकवृत्तान्तः अर्थशक्तिमूलः वस्तुरूपः रविकमलिनीवृत्तान्ताध्यारोपेण स्थितः इति बोध्यम्]।

(ख) मथ्नामीति।—सहदेवं प्रति सन्धिकरणासहिष्णोः भीमसेनस्योक्तिरियम्। समरे—युद्धे, कोपात् कौरवाणां—कुरुवंशीयानां, धृतराष्ट्रसुतानामित्यर्थः, शतं न मथ्नामि ?—न मर्दयामि ? न नाशयामीत्यर्थः; दुःशासनस्य उरस्तः,—वक्षसः, रुधिरं—रक्तं, न पिबामि ? गदया सुयोधनस्य, ऊरू न सञ्चूर्णयामि ? अत्र काकुवशात् अपि तु मथ्नाम्येव, पिबाम्येव, सञ्चूर्णयाम्येवेत्यर्थो बोध्यः। नृपतिः,—युधिष्ठिर इत्यर्थः, पणेन—इन्द्रप्रस्थादिग्रामपञ्चकप्रापणरूपेण विनिमयेन, भवताम् अभिमतमिति शेषः,

अत्र "मय्येव" इत्यादि व्यङ्ग्यं वाच्यस्य निषेधस्य सहभावेनैव स्थितम्। (ग)

"दीपयन् रोदसीरन्धूमेष ज्वलति सर्वतः।
प्रतापस्तव राजेन्द्र! वैरिवंशदवानलः॥" (घ)

अत्र अन्वयस्य वेणुत्वारोपरूपो व्यङ्ग्यः। प्रतापस्य दवानलत्वारोपसिद्ध्यङ्गम्। (ङ)

स्तां करोतु; अन्यत्र,—भवतां नृपतिः,—भवद्भिमतकार्यकारितयाऽभिमतो राजा युधिष्ठिर इत्यर्थः, [एतेन स्वामीष्टानाचरणात् स्वनृपतित्वाभावसूचनम्]। अत्र व्यङ्ग्यं, वाच्यार्थेन सहैव प्रतीयते इति चमत्कारित्वस्यापगमनात् गुणीभूतव्यङ्ग्यत्वमिति बोध्यम्। वसन्ततिलकं वृत्तम्। वेदीमहारस्येदं पद्यम्।

(ग) अथेति।—अत्र मय्येवेत्यादि [आदिना शिवायामेव सच्चक्षुर्ध्यायेत्येवमन्वयोः ग्रहणम्]। व्यङ्ग्यं वाच्यस्य—न मय्येवेत्यादेरर्थरूपस्य, निषेधस्य—निषेधनरूपस्य, सहभावेन एव स्थितम्। [अत्र प्रबलतरपरिपार्श्वस्थिप्रसङ्गसमुज्झनमात्रसंरम्भविश्रब्धकण्ठतालुसंयोगजन्येन शिरश्चालनसहोत्पन्नेन नञा (न ह्येवात्" इत्यादिवाक्यगतेन निषेधवाचिना शब्देन) झटिति अर्थागम्यवच्छेदो व्यज्यते, स एवकारेण (काङ्क्षात्मकतया निषायकतां गतेन नञ्शब्देन) दर्शितः]। अयं भावः,—वाच्यप्रतीतिसमकालमेव दीप्तभावगद्गदसाकाङ्क्षतया काकुरेव व्यङ्ग्यप्रतीतिः, अतः तन्मात्रं व्यङ्ग्यमेव एवादिभिराक्ष्यमाणं वाच्यायमानं भवति; अत एवात्र "मुख्यार्थबाधाद्यनुसरणविलम्बासहत्वाल्लक्षणा" इति प्राचीनाः, "मुख्यार्थबाधो झटिति अर्थपर्यवसानाय प्रतीयते" इति च नवीनाः, वाच्यार्थप्रतीतिसमये व्यञ्जनाया अर्थबोधनासामर्थ्यमेव प्राचीनमताक्षरसः। केचित्तु,—"न मंस्यामि इत्यादिरीत्या अपरनञर्थ आक्षिप्यते; तथा च नञर्थद्वयन एवकारार्थः पर्यवस्यति" इत्याहुः, तत्र; वाच्यार्थस्यैव व्यञ्जनयोपस्थितेरसम्भवात्, वाच्यव्यङ्ग्ययोः युगपत् उपस्थित्यर्थयोगाच्च इति।

(घ) वाच्यसिद्ध्यङ्गं व्यङ्ग्यमुदाहरति, दीपयन्निति।—राज्ञः स्तुतिरियम्। हे राजेन्द्र! वैरिणां—शत्रूणां, वंशेषु—कुलेषु, यद्वा वैरिणः,—शत्रवः, एव वंशाः,—वेणवः, तेषु, दवानलः,—दावाग्निः, एषः एव प्रतापः,—कोपदण्डजं तेजः, ("स प्रभावः, प्रतापश्च यत्तेजः कोपदण्डजम्" इत्यमरः) रोदसीरन्ध्रं—द्यावापृथिव्योरन्तरालं, दीपयन्—भासयन्, सर्वतः,—सर्वासु दिक्षु, ज्वलति।

(ङ) अथेति।—अत्र अन्वयस्य—वंशस्य, वेणुत्वारोपरूपः, व्यङ्ग्यः,—व्यञ्जना-

"हरस्तु किञ्चित् परिवृत्तधैर्य्यः" इत्यादौ विलोचनव्यापारः चुम्बनाभिलाषयोः प्राधान्ये सन्देहः। (च)

"ब्राह्मणातिक्रमत्यागो भवतामेव भूतये।
जामदग्न्यश्च वो मित्रमन्यथा दुर्मनायते॥" (छ)

बोध्योऽर्थः। प्रतापस्य दवानलत्वारोपस्य सिद्धेः अङ्गं—साधकम्, उपपादकमित्यर्थः, अन्यथा प्रतापे दवानलत्वारोपणमसङ्गतं स्यादिति भावः; यत्र व्यङ्ग्यं विना वाच्यार्थस्य नोपपत्तिस्तत्रैव वाच्यसिद्ध्यङ्गस्यावसरः; यत्र तु न तथा, तत्र इतराङ्गमित्यनयोर्भेदः, इति वाच्यार्थस्य साधकतया च अत्र व्यङ्ग्यस्य न तथा चमत्कारित्वमिति गुणीभूतव्यङ्ग्यत्वमिति च ध्येयम्। इदं तत्त्वम्,—अन्वयस्य (कुलस्य) प्राथमिकबोधे दवानलस्य शत्रुगोत्रसम्बन्धासम्भवोपलम्भादप्रामाण्यग्रहः, ततः प्रतापस्य दवानलत्वोपपत्त्या व्यङ्ग्यं कुलस्य वेणुत्वारोपणमभिसन्दधतः श्रोतुः वैरिकुलवेणुदवानल इति द्वितीयबोधः; आरोप्यमाणस्य वेणोः दवानलसम्बन्धित्वमक्षतम् इत्यनुपपत्तिनिरासेन दवानलत्वारोपणस्याङ्गं व्यङ्ग्यरूपकं प्रतापस्य दाहकत्वेन कविपरम्परासिद्धपिशङ्गत्वेन च दवानलसादृश्यं प्रसिद्धमिति तद्रूपकं वैरिकुलस्य वेणुत्वारोपणकारणमिति श्लिष्टनिबन्धनं परम्परितरूपकमिदम्। क्वचिच्च प्रकरणादिनियमाभावेन रूप्यरूपकयोरुभयोरेव श्लिष्टशब्दवाच्यत्वम्; यथा,—"विद्वन्मानसराजहंस" इत्यादौ, प्रकृते तु नियन्त्रणवशात् रूपकस्य व्यङ्ग्यत्वमेवेत्यवधेयम् इति।

(च) सन्दिग्धप्राधान्यं व्यङ्ग्यमाह, हर इति।—आकालिकवसन्ते पार्वतीम् आलोकमानस्य हरस्य धैर्य्यविपर्य्ययवर्णनमिदम्। अत्र विलोचनव्यापारणं वाच्यं, चुम्बनाभिलाषश्च व्यङ्ग्यः; मुखमात्रे लोचनव्यापारेण चुम्बनाभिलाषः सम्भाव्यते। न च द्वयोरेव शृङ्गारव्यञ्जकतया प्राधान्यमिति तुल्यप्राधान्यमेवेदम् इति वाच्यम्, उभयोः प्राधान्यसन्देहे तस्यानवकाशात्। इह विलोचनव्यापारणं रतेरनुभावरूपत्वेन शृङ्गारव्यञ्जनेन प्रधानं, वा चुम्बनाभिलाषव्यञ्जकत्वेन अङ्गम् इति, तथा चुम्बनाभिलाषः सम्भाव्यत्वेन अप्रधानम्, उत आस्वादविषयत्वेन शृङ्गारव्यञ्जकतया प्रधानम् इत्यनयोः सन्देह एव प्राधान्यसन्देह इति भावः। प्राधान्यनिश्चयाभावादेव व्यङ्ग्यस्य अनधिकचमत्कारितया वाच्यादनुत्तमत्वे गुणीभूतव्यङ्ग्यत्वमवधेयम्।

(छ) तुल्यप्राधान्यं व्यङ्ग्यमुदाहरति, ब्राह्मणेति।—परशुरामप्रेषितां पत्रिकां पठतः दशग्रीवं प्रति माल्यवत उक्तिरियम्। ब्राह्मणस्य—जामदग्न्यस्य, अतिक्रमः,—आक्रमणं, पराभव इति यावत्, तस्य त्यागः,—अनाक्रमणमित्यर्थः, भवतामेव, भूतये—

अत्र परशुरामो रक्षःकुलक्षयं करिष्यतीति व्यङ्ग्यस्य वाच्यस्य च समं प्राधान्यम्। (ज)

"सन्धौ सर्वस्वहरणं विग्रहे प्राणनिग्रहः।
अलाउद्दीननृपतौ न सन्धिर्न च विग्रहः॥" (झ)

कल्याणाय, न तु स्वार्थं ब्रवीमि इति भावः; अन्यथा—अतिक्रमे इत्यर्थः, वः,—युष्माकं, मित्रञ्च, एकाचार्य्यतया सतीर्थत्वादिति भावः, [अत्र चकारस्य मित्रपदेन सहान्वयेन उभयोरेकाचार्य्याध्ययननिमित्तकं निरतिशयमित्रत्वं, तस्यातिक्रमः न केवलं ब्राह्मणातिक्रमः, मित्रातिक्रमश्च इति सूचितम्] जामदग्न्यः, दुर्मनायते—विद्वेषमाचरतीत्यर्थः, [इह "वर्त्तमानसामीप्ये—" (३।३।१३१ पा०) इति भविष्यत्सामीप्येऽर्थे लट्] तस्यातिक्रमप्रवृत्तावतिक्रमो न सेत्स्यति, परन्तु तस्य दौर्मनस्यमेव भविष्यति; यथा कार्त्तवीर्य्येण तद्दौर्मनस्यमाचर्य्य क्षत्रियकुलं नाशितं, तथा भवताऽपि रक्षःकुलं नाशयितव्यमिति भावः। महावीरचरितस्येदं पद्यम्।

(ज) अत्रेति।—अत्र जामदग्न्यदौर्मनस्यव्यङ्ग्यो रक्षःकुलक्षयः, मित्रब्राह्मणातिक्रमत्यागजन्या विभूतिर्वाच्या, ताभ्यां जामदग्न्यातिक्रमो न कर्त्तव्यः इत्यर्थनिर्धारणरूपा मतिर्व्यज्यते, इत्युभयोः समं प्राधान्यम्, अत एव वाच्यादनुत्तमत्वमेतस्य। क्वचित्—"वाच्यस्य मित्रब्राह्मणदौर्मनस्यस्य समं प्राधान्यमिति त्रासरूपव्यभिचारिभावव्यञ्जने द्वयोः साम्यात् शापपापोत्पादकत्वेन हि वाच्यात् त्रासो व्यङ्ग्यात् तु साक्षात्" इत्याहुः, तन्न; दुर्वृत्तस्य पापसम्भावनया त्रासासम्भवात्, ब्राह्मणदौर्मनस्यजन्यशापसम्भावनया त्राससम्भवेऽपि वाच्यस्य व्यङ्ग्यापेक्षया व्यवहितत्वात्, तुल्यप्राधान्यासम्भवाच्चेति बोध्यम्।

(झ) अस्फुटव्यङ्ग्यमुदाहरति, सन्धौ इति।—अलाउद्दीननृपतौ—अलाउद्दीनाख्ये दिल्लीश्वरे यवनराजे विषये, [क्वचित् "अलाउद्दीन" इत्यत्र "अल्लापदीन" इति, क्वचित् पुनः "अल्लावदीन" इति पाठः, स सर्वोऽपि न सम्यक्, संज्ञायाः परिवृत्तौ प्रमाणाभावात्] सन्धौ—मित्रताकरणे, युद्धात् निवर्त्तने इति यावत्, सर्वस्वहरणं—सर्वधनदानमित्यर्थः, सर्वधनदानं विना न कोऽपि अलाउद्दीननृपेण सह सन्धिं कर्त्तुं शक्नोतीति भावः; विग्रहे—युद्धे, प्राणनिग्रहः,—प्राणदण्डः, अलाउद्दीनेन सह संग्रामे प्राणनाशो भवेदिति भावः; अतः तत्र न सन्धिः, न च—नापि, विग्रहः,—युद्धं, युक्त इति शेषः।

अत्र अलाउद्दीनाख्ये नृपतौ दानसामादिमन्तरेण नान्यः प्रशमोपायः, इति व्यङ्ग्यं व्युत्पन्नानामपि झटित्यस्फुटम्। (ञ)

"अनेन लोकगुरुणा सतां धर्मोपदेशिना।
अहं व्रतवती स्वैरमुक्तेन किमतः परम्॥" (ट)

अत्र प्रतीयमानोऽपि शाक्यमुनेस्तिर्य्यग्योषिति बलात्कारोपभोगः स्फुटतया वाच्यायमानः, इत्यगूढम्। (ठ)

"वाणीरकुडङ्गुड्डीणसउणिकोलाहलं सुणंतीए।
घरकम्मवावडाए बहुए सीअन्ति अंगाइं॥" (ड)

(ञ) अत्रेति—अत्र व्यङ्ग्यं सामदानादिरूपमुचितमिति तात्पर्य्यग्रहणरूपबुद्धेः व्यभिचारिभावस्य, सन्धिविग्रहानिष्टसाधनरूपं वाच्यं व्यङ्ग्यनिरपेक्षमेव व्यञ्जकं वाच्यसन्धिविग्रहाभावसापेक्षतयाऽनधिकचमत्कारकम्, अतः वाच्यादनुत्तममेव तत्, इति गुणीभूतत्वमिति बोध्यम्।

(ट) अगूढं व्यङ्ग्यमुदाहरति, अनेनेति।—शाक्यमुनेस्तिर्य्यक्जातीययोषिति बलात्कारमसहमानायास्तत्पत्न्या उक्तिरियम्। अहं व्रतवती—व्रतं—गृहस्थधर्म्मानुष्ठानं, तद्वती इत्यर्थः, लोकगुरुणा—लोकानां गुरुः,—उपदेशेन अज्ञानरूपतिमिरविनाशकत्वादाचार्य्यः, तेन तथाभूतेन, अनेन—शाक्यमुनिना इत्याशयः, सतां—महात्मनामिति भावः, धर्म्मस्य—कर्त्तव्यस्य, पुण्यानुष्ठानस्येति यावत्, उपदेशी—शिक्षकः, तेन, स्वैरम्—एतावन्मात्रकथनमेव यथेष्टम्, अतः परम् उक्तेन किम्? किमपि न वक्तव्यम्; लोकगुरोः सद्धर्म्मोपदेशकस्य अस्य दुष्कर्मानुष्ठानमनुचितमेव, अथाऽपि अनेन यदाचरितं तत् किं कथयेयम्? मम तु व्रताचरणसहायस्य तादृशस्य कथनमपि नोचितमिति भावः।

(ठ) अत्राक्षेपालङ्कारेण व्यङ्ग्यरूपो विशेषो झटिति एव प्रतीयते इति वाच्यायमानत्वस्य व्यङ्ग्यनिरपेक्ष एव वाच्य आक्षेपालङ्कार ईर्ष्यासञ्चारिभावावगमकः, प्रतिनायिकायास्तिर्य्यक्त्वेन व्यङ्ग्यस्य तदुपभोगस्य नेर्ष्योत्कर्षाधायकत्वमिति व्यङ्ग्यादनुत्तमत्वमेतस्येति बोध्यम्।

(ड) असुन्दरं व्यङ्ग्यमुदाहरति, वाणीरेति।—["वाणीरकुञ्जोड्डीनशकुनिकोलाहलं शृण्वन्त्याः। गृहकर्मव्यापृताया वध्वाः सीदन्त्यङ्गानि॥" इति संस्कृतम्]। वाणीरकुञ्जात्—वेतसलतावेष्टितात् स्थानात्, उड्डीनानाम्—उत्पतितानां, शकुनीनां—पक्षिणां, कोलाहलं—कलरवं, कूजितमित्यर्थः, शृण्वन्त्याः, गृहकर्मणि, व्यापृतायाः,

अत्र दत्तसङ्केतः कश्चिल्लतागृहं प्रविष्ट इति व्यङ्ग्यात् "सीदन्त्यङ्गानि" इति वाच्यस्य चमत्कारः सहृदयसंवेद्यः, इत्यसुन्दरम्। (ढ)

किञ्च, यो दीपकतुल्ययोगिताऽऽदिषु उपमाऽऽद्यलङ्कारो व्यङ्ग्यः, स गुणीभूतव्यङ्ग्य एव। काव्यस्य दीपकादिमुखेनैव चमत्कारविधायित्वात्। (ण) तदुक्तं ध्वनिकृता,—

—व्यग्रायाः, निरतायाः इति यावत्, [चण्डीदासस्तु प्राकृत "बावडाए" इत्यस्य "वारतायाः" इति संस्कृतोक्तिं स्वीकृत्य, वारतायाः,—व्याकुलायाः, इत्यर्थं व्याख्यातवान्] बध्वाः अङ्गानि, सीदन्ति—अवसादं गच्छन्ति, गृहकर्म्मणः निवृत्तानि भवन्तीति यावत्, लक्षणातः इति शेषः। गृहकर्म्मव्यापृतायाः इति तु तात्पर्य्यग्राहकम्।

(ढ) अत्रेति।—कश्चित्—उपनायकः। व्यङ्ग्यात्—व्यङ्ग्यमपेक्ष्य इत्यर्थः। वाच्यस्य—अङ्गसादनाभिधानस्य। चमत्कारः,—हर्षावेगसंवलितानुरागोद्रेककृतमदनपरवशताप्रतीतिः। सहृदयसंवेद्यः,—सहृदयानुभवगम्यः। व्यङ्ग्यस्तु तटस्थप्रायम्। एतच्च स्वविषये वाच्यसिद्ध्यङ्गादिसर्वापवादस्वरूपं द्रष्टव्यम्। तेषु व्यङ्ग्यस्यापि चारुत्वसम्भवात् इति चण्डीदासः। तटस्थस्य व्यवहितोपकारत्वेन उदासीनवदाभासमानम्; तथाहि,—शकुनिकोलाहलश्रवणेनोपनायकस्य लतागृहप्रवेशानुमानं, ततो हर्षावेगौ, ताभ्यामनुरागोद्रेकः, ततो मदनपरवशताप्रतीतिः; एवञ्च व्यङ्ग्यस्य चमत्काराप्रत्यासन्नत्वमेवासुन्दरत्वमिति फलितम्। केचित्तु "रसादिबोधजनने वाच्यसापेक्षत्वमेवासुन्दरत्वम् इति। व्यङ्ग्यात्—इत्यादिव्यङ्ग्यादित्यर्थः, तथा च वधूश्च न तत्र गतेत्येतत्पर्य्यन्तादित्यर्थः। बध्वा अगमनमेव न केवलं तदीयविप्रलम्भव्यञ्जकं, किन्तु, शकुनिकोलाहलश्रवणेन सीदन्त्या बध्वा अगमनम् इति वाच्याङ्गावसादसहकारेणैव रसव्यञ्जनायाः वाच्यमुखनिरीक्षकत्वात् तदपेक्षया न्यूनचमत्कारि" इति वदन्ति, तन्न; अङ्गावसादव्यङ्ग्यविषादसहकृतस्यैव बध्वगमनस्य विप्रलम्भव्यञ्जनसम्भवेन वाच्याङ्गावसादमुखनिरीक्षणायोगात् तदानीन्तनगमनाभावसत्त्वेऽपि गमनसम्भावनया विप्रलम्भासम्भवात्। न च गृहकर्म्मव्यापृतायाः इत्यनेन गमनाभावनिश्चयेन गमनसम्भावनैव नास्तीति वाच्यं, गृहकर्म्मान्तःपातिजलाहरणादिच्छलेनापि तत्सम्भवात्; इतेर्दविष्ठोपनायकविषयत्वेन विप्रलम्भाभासस्यैव वक्तुमुचितत्वाच्च।

(ण) विषयविशेषे केषाञ्चिद्ध्वनिभ्रमं निरस्य गुणीभूतव्यङ्ग्यं व्यवस्थापयन्ति, किञ्चेति।—काव्यस्य—काव्यार्थस्य, दीपकादिमुखेन—दीपकादिसद्भावेनेत्यर्थः,

"अलङ्कारान्तरस्यापि प्रतीतौ यत्र भासते।
तत्परत्वं न काव्यस्य नासौ मार्गो ध्वनेर्मतः॥" (त)

यत्र च शब्दान्तरादिना गोपनकृतचारुत्वस्य विपर्य्यासः।

यथा,—

"दृष्ट्या केशव! गोपरागहृतया किञ्चिन्न दृष्टं मया
तेनात्र स्खलितास्मि नाथ! पतितां किं नाम नालम्बसे?।
एकस्त्वं विषमेषु खिन्नमनसां सर्वाबलानां गतिः
गोप्यैवं गदितः सलेशमवताद् गोष्ठे हरिर्वश्चिरम्॥" (थ)

["दीपकादिमुखेनैव" इत्येवकारेण व्यङ्ग्योपमादिव्यवच्छेदः]। चमत्कारविधायित्वात्—चित्तरञ्जकत्वात्।

(त) उक्तमर्थं प्राचां संवादेन प्रमाणयति, तदुक्तमिति।—ध्वनिकृता—गोवर्द्धनाचार्य्येणेत्यर्थः। अलङ्कारेति।—अलङ्कारान्तरस्य—अन्यस्य व्यङ्ग्यभूतस्य अलङ्कारस्य, प्रतीतौ—व्यञ्जने, अपि यत्र काव्यस्य तत्परत्वं—व्यङ्ग्यालङ्कारतात्पर्य्यबोधकत्वं, न भासते—न प्रकाशते, असौ ध्वनेः मार्गः,—विषयः, न मतः,—न कथितः। यथाहि दीपकादिषु अलङ्कृतिषु उपमाऽलङ्कृतेः व्यज्यमानतायामपि वाच्यपरत्वेन सुन्दरताया अनवस्थितेः न ध्वनिरिति व्यपदेश्यत्वं, यथा,—"लता पुष्पोद्गमैर्नारी हावभावादिभिः, शुभैः। रात्रिर्ज्योतिर्गणाभासैर्ध्वनिभिः कविता स्फुरेत्॥" इत्यादौ उपमासहितत्वेऽपि वाच्यालङ्कृतिद्वारैव सुन्दरत्वं, न तु व्यङ्ग्यालङ्कृतिनिष्ठत्वेन; तस्मात् तत्र वाच्यालङ्कृतिद्वारेणैव काव्यं व्यपदिश्यते। इत्थं समासोक्त्याक्षेपानभिहितनिमित्तविशेषोक्तिपर्य्यायोक्तापह्नुतिसङ्करालङ्कृतिप्रभृतावपि बोध्यम्। "उपोढरागेण विलोलतारकं तथा गृहीतं शशिना निशामुखम्। यथा समस्तं तिमिरांशुकं तया पुरोऽपि रागाद्गलितं न लक्षितम्॥" इत्यादौ समासोक्त्यलङ्कृतौ व्यङ्ग्यार्थेन सङ्गतो वाच्यार्थ एव मुख्यत्वेन अवगम्यते, आरोपितकान्ताकान्तचेष्टितयोः रात्रिचन्द्रमसोरेव पदोच्चयविशेषार्थरूपत्वात्। एवं पुरस्तादपि द्रष्टव्यम्। तथोक्तं प्रदीपकृता,—"व्यङ्ग्यस्य यत्राप्राधान्यं वाच्यमात्रानुयायिनः। समासोक्त्यादयस्तत्र वाच्यालङ्कृतयः स्फुटाः॥" व्यङ्ग्यस्य प्रतिभामात्रं वाच्यार्थानुगमेऽपि वा। न ध्वनिर्यत्र वा तस्य प्राधान्यं न प्रतीयते॥" इति।

(थ) दृष्ट्येति।—हे केशवः! गोपरागैः,—गवां,परागैः,—रजोभिः, ("परागः कौसुमे रेणौ स्नानीयादौ रजस्यपि" इत्यमरः) हृतया—आच्छन्नया, दृष्ट्या,

अत्र गोपरागादिशब्दानां गोपे राग इत्यादिव्यङ्ग्यार्थानां "सलेशम्" इति पदेन स्फुटतयाऽवभासः। सलेशमिति पदस्य परित्यागे ध्वनिरेव। (८)

[चरणे हतीयेवम्] तथा [इदं कर्मपदम्] न लिखित, मानादिष्वनिति शेषः, दृष्टं, तेन—निरङ्कुशहेतुना, अयि—चपल, यत—तव अयत इत्यर्थः, ["यत" इत्यत्र "इह" इति पाठान्तरम्] स्खलिता—पतिता, भवानि इति शेषः; हे नाथ! पतितां—च्युतां, मामिति शेषः, किं—कथं, नाथ न आलम्बसे?—न धारयसि? ननु धारणे को हेतुः? इत्याह, एकस्त्वमिति।—त्वम्, एकः,—केवलः, विषमेषु—मानवर्षादिसङ्कटेषु, खिन्नमनसां—क्लान्तचेतसां, सर्वेषाम् अबलानां—दुर्बलानां, स्मरबाधाभानाधामित्यर्थः, जनानां, गतिः,—आश्रयः, गोप्ता, गोप्ते एवं सलेशं—सव्याजं, सश्लेषं यथा तथा इत्यर्थः, गदितः,—अभिहितः, प्रार्थित इति यावत्, हरिः,—कृष्णः, स्थिरं वः,—युष्मान्, अवतात्—रक्षतु। श्लिष्टार्थस्तु,—केशव एव गोपः,—गां—इन्द्रियाणि, उपलक्षणेन तदादीनि इन्द्रियाणि, पाति—तत्तदभिमतविषयात्मना उपलक्षयति रक्षतीति तथोक्तः, ("गौः.....स्त्री स्वरभेदोद्दृग्वाक्पशूपस्रसु मूर्ध्नि च" इति मेदिनी। एतेनानुरागौचित्यमावेदितम्) तस्मिन् रागः,—अनुरागः, तेन हृतया—आक्रष्टया, दृष्ट्या—नेत्रवृत्त्या, बाह्यज्ञानेनेत्यर्थः, केशवानुरागेण बाह्यज्ञानस्य तिरोहितत्वादिति भावः, लिखितं—कुड्यादिकं, न दृष्टं—न मन्यितमित्यर्थः। यद्वा,—"केशव" इति सम्बोधनपदं गोपे—निजस्वामिनि, यो रागः, तेन हृतया—लुप्तया, दृष्ट्या—ज्ञानेन, लिखितं—तव रूपं, मया न दृष्टं—नानुभूतमित्यर्थः, तेन—हेतुना, अत्र—आसु गोपीषु मध्ये, अहमेव स्खलिता—परमसुखाद्भ्रष्टाऽस्मि, अतः हे नाथ! पतितां—प्रपतितां, यावधि चरणानुपसादनजन्यापराधस्य क्षमापणाय साक्षात् अरणं प्रयातामिति यावत्, मां, खिन्नाम, नालम्बसे?—नानुगृह्णासि? ननु परस्त्रियां मनागनुयतो नोचितः इत्यत आह, एकस्त्वमिति।—विषमेषु—पञ्चशरेण, कामेनेति यावत्, खिन्नमनसां—व्याकुलचेतसां, सर्वासाम्, अबलानां—नारीणाम्, एकः,—अद्वितीयः, त्वं—त्वमेवेत्यर्थः, गतिः,—अरणैकत्र्यमाश्रयः, इति। आर्द्धवृत्तिकोक्तितं वृत्तम्।

(८) अत्रेति।—अत्र "सलेशम्" इति पदेन—अभिप्रायान्तरगर्भितवाक्यघटकेन पदेन, स्फुटतया—बाध्यत्व प्रकाशभावेन इत्यर्थः, अवभासः,—प्रतीतिः, इति अगूढं गुणीभूतं व्यङ्ग्यमिति भावः। तथाच कामिनीकुचकलशवत गूढमेव व्यङ्ग्यं चमत्करोति, अगूढं तु न, तत्र स्फुटतया वाच्यवत्प्रतीतत्वादिति निष्कर्षः। अतः "सलेशम्"

किन्तु यत्र वस्त्वलङ्काररसादिरूपव्यङ्ग्यानां रसाभ्यन्तरे गुणीभावः, तत्र प्रधानत्वात एव काव्यव्यवहारः। तदुक्तं तेनैव, (ध)—

"प्रकारोऽयं गुणीभूतव्यङ्ग्योऽपि ध्वनिरुपताम्।
याति रसादितात्पर्यपर्य्यालोचनया पुनः॥" इति (न)

यत्र तु,—

"यत्रोन्मदानां प्रमदाजनानां
मर्भस्पृशः शोषमयीमयूखाः।
सन्ध्याभ्रमं प्रापुवतामकाण्डे
ऽप्यनङ्गनेपथ्यविधिं व्यधत्त॥" (प)

इति पदस्य परित्यागे—अनभिधाने, ध्वनिः,—ध्वनिकाव्यत्वम्, एव; यद्यपि वस्तुमात्रतया तत्राऽभिधाने मातापित्रोः रतिवर्धननिबन्धनौचित्यम्, अथापि सुखेनमिति पदस्यैव अनौचित्यावहत्वं मुख्यमिति तथोक्तमवधेयम्।

(ध) इदानीं गुणीभूतव्यङ्ग्यप्रकारेष्वपि यत्र विश्रान्तधामतया रसादिकं प्रधानमस्ति, तत्र तेनैव काव्यव्यपदेशः इत्याह, किञ्चेति।—गुणीभावः,—अप्राधान्येऽवस्थितिरित्यर्थः, "प्रधानेन हि व्यपदेशा भवन्ति" इति न्यायादिति भावः। तेनैव—ध्वनिकारेणैव, गोवर्द्धनाचार्येणेति यावत्।

(न) प्रकार इति।—अयं गुणीभूतव्यङ्ग्यः प्रकारः अपि रसादिषु यत्, तात्पर्ये—तत्परत्वे, तस्य पर्य्यालोचनया—अनुशीलनेन, पुनः, ध्वनिरूपताम्—अगुणीभूतव्यङ्ग्यत्वं, याति—प्राप्नोति। रसादितात्पर्यवत्त्वे सति गुणीभूतव्यङ्ग्यादपि ध्वनित्वव्यपेक्षी भवतीति भावः।

(प) नन्वेवं यत्र रसादीनामन्यतमतात्पर्यविषयत्वेन प्रधानत्वं, तत्रैव काव्यव्यवहार इति फलितम्; एवञ्च ध्वनित्वसद्भावे गुणीभूतव्यङ्ग्यं क्वापि नास्ति इति कुतस्तस्य काव्यविभागजत्वम्? अत आह, यत्र त्विति।—यस्मिन् पुनः काव्ये तात्पर्यम्। यत्रेति।—मनसीवर्धननिदम्। यत्र—मनस्यर्थे, अथापि खेदि इति अभ्रंलिहः,—गगनस्पर्शी, ["वहाभ्रे लिहः" (३।२।३२ पा० इति खश्] शोचानां मयीनां—पयूरमाणानिलार्थः, मयूखः,—किरणः, [मयूखशब्दस्यैकवचनान्ततया सम्भाधनप्रकारत्वानुपपत्तेः "शोचन्ति विग्रहाग्राः" इति पाठ्यम्। एवं सति छन्दोभङ्गभिया मयिग्रहात् प्रियमाणस्य क्रीपृत्वयक्ष नाशस्यत्वम्] सन्ध्याभ्रं—सन्ध्यारागः

इत्यादौ रत्नादीनां नगरीवृत्तादिवस्तुमात्रेऽङ्गत्वं, तत्र तेषामतात्पर्यविषयत्वेऽपि तैरेव गुणीभूतैः काव्यव्यवहारः। (फ) तदुक्तमस्माभिरेवकविपण्डितगुण्यश्रीचक्रादासपादैः,—"काव्यार्थस्यात्मकबुद्धिवेद्यतया तन्मयीभावेनास्वादप्रायां गुणप्रधानभावावभासस्तावन्नानुभूयते, कालान्तरे तु प्रकरणादिपर्य्यालोचनया भवत्यसौ न काव्यव्यपदेशं व्याहन्तुमीशः, तस्मात्स्वादमात्रायत्तत्वात्" इति। (ब)

ज्ञातानाम्, यत एव चक्षाक्षेऽपि—चक्षुषोऽपि, तस्माच्चक्षुं प्राप्नुवतां प्रमदाजनानाम् चक्षुरेवप्यविधिं—सुरतोपयोगिनेत्रभूषाऽऽदिकं, अयत्न—कारयानाह ["अयत्न" इत्यत्र "विधत्ते" इति पाठे—तस्मादवतीत्यर्थः]। उपजातिः छन्दः।

(फ) रत्नादीनामिति।—नगरीवृत्तादिवस्तुनाम्—नगरीवृत्तान्तः, तदादि—तत्प्रभृति, यत् यत्, तन्मात्रे, [मात्रपदेनात्रकारस्य व्यवच्छेदः सूचितः] अङ्गत्वं—नगरीवृत्तान्तपरिपोषकत्वनिमित्तं, तत्र—"वर्णोऽङ्गानाम्" इत्यादौ, तेषां—रत्नादीनाम्, अतात्पर्यविषयत्वेऽपि—तात्पर्यविषयत्वाभावेऽपीत्यर्थः, नगरीवृत्तस्यैव तात्पर्यविषयत्वादिति भावः, तैरेव—रत्नादिभिरेव, गुणीभूतैः,—गुणीभावेन तिरोहितैरिति भावः, काव्यव्यवहारः; तथा च वर्णोभवत्कुरः, तत्र व्यवहारस्तेषु तथा निरूपितम्; यत्र तु उभयवत्कुरो नास्ति, तत्र रत्नादीनामत्यन्तमङ्गत्वे चमत्कारनिबन्धनत्वेन काव्यव्यवहारः, न तु प्रधानत्वेऽपीति भावः।

(ब) काव्यार्थस्येति।—काव्यार्थस्य—विभावादिपदार्थनिचयस्य, चक्षुष्कबुद्धिवेद्यतया—एकमनोनिर्ग्राह्यतया। ननु चर्वणापदार्थानां कथमेकबुद्धिवेद्यत्वनियमः? इत्यत आह, तन्मयीभावेनेति।—चक्षुष्कबुद्धिस्वरूपीभावेन, आस्वादप्रायाम्—चर्वणाभावप्रायां, गुणप्रधानभावस्य—अङ्गाङ्गिभावस्य, अवभासः,—प्रतीतिः, तावत् न अनुभूयते, कालान्तरे—आस्वादविनाभूतप्रायायां तु, प्रकरणादिपर्य्यालोचनया—प्रकाशयनुसन्धानद्वारा, भवन् अपि, असौ—गुणप्रधानभावावभासः, काव्यव्यपदेशं—काव्यसंज्ञां, ध्वनिकाव्यमिदं वा गुणीभूतव्यङ्ग्यमिदमिति निर्णीतं काव्यं नाम इति यावत्, व्याहन्तुं—खण्डयितुं, निराकर्तुमित्यर्थः, न ईशः—न प्रभुः, तत्र—काव्यव्यपदेशत्र। तथा च, उक्तरीत्या रत्नादितात्पर्यविषयत्वाभावेऽपि प्रावहित्वरत्नादिवस्तुत्वेनापि काव्यत्वमस्तीति भावः।

केचित् चित्राख्यं तृतीयं काव्यभेदमिच्छन्ति । तदाहुः,—

"शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम् ।" (भ) इति,

तन्न । यदि हि अव्यङ्ग्यत्वेन व्यङ्ग्याभावः, तदा तस्य काव्यत्वमपि नास्तीति प्रागेवोक्तम् । ईषद्व्यङ्ग्यत्वमिति चेत् ? किं नाम ईषद्व्यङ्ग्यत्वम् ? आस्वाद्यव्यङ्ग्यत्वम्, अनास्वाद्यव्यङ्ग्यत्वं वा ? आद्ये प्राचीनभेदयोरेवान्तःपातः, द्वितीये तु अकाव्यत्वम् । यदि च आस्वाद्यत्वं, तदाऽक्षुद्रत्वमेव ; क्षुद्रतायामनास्वाद्यत्वात् । (म) तदुक्तं ध्वनिकृता,—

"प्रधानगुणभावाभ्यां व्यङ्ग्यस्यैवं व्यवस्थिते ।
उभे काव्ये ततोऽन्यद् यत् तच्चित्रमभिधीयते ॥" इति । (य)

इति श्रीमन्नारायणचरणारविन्दमधुव्रतसाहित्यार्णवकर्णधारध्वनिप्रस्थापनपरमाचार्य्य-
कविसूक्तिरत्नाकराष्टादशभाषावारविलासिनीभुजङ्गसान्धिविग्रहिकमहापात्र-
श्रीविश्वनाथकविराजकृतौ साहित्यदर्पणे ध्वनिगुणीभूतव्यङ्ग्याख्य-
काव्यभेदनिरूपणं नाम चतुर्थः परिच्छेदः ॥ ४ ॥

(भ) काव्यप्रकाशकारादिमतं दूषयति, केचिदिति ।—केचित्—मम्मटादयः, तृतीयं—ध्वनिगुणीभूतव्यङ्ग्याभ्यां भिन्नम् । तद्वाक्यं निर्दिशति, शब्दचित्रमिति ।—अव्यङ्ग्यं, काव्यमिति शेषः, तु अवरम्—अधमं, स्मृतं, तत् द्विविधं,—शब्दचित्रं वाच्यचित्रञ्च इति ।

(म) व्यङ्ग्याभावः, विवक्षित इति शेषः । ईषद्व्यङ्ग्यत्वं, विवक्षितमित्यनुषज्यते । प्राचीनभेदयोः,—प्राचीनोक्तध्वनिगुणीभूतव्यङ्ग्ययोः । आद्योऽनुपपत्त्यन्तरमाह, यदि चेति ।—तदा अक्षुद्रत्वमेवेत्यकारप्रश्लेषः । तथा च व्यङ्ग्यस्य आस्वाद्यत्वे क्षुद्रत्वायोगादनास्वाद्यत्वे काव्यत्वायोगाच्च ईषद्व्यङ्ग्यमिति काव्यम् अपार्थकमेवाभिधानमिति भावः ।

(य) चित्रस्य काव्यप्रकारत्वाभावे प्राचीनसंवादमप्याह, प्रधानेति ।—व्यङ्ग्यस्य प्रधानगुणभावाभ्याम्, एवं—निरुक्तरीत्या, उभे काव्ये—ध्वनिगुणीभूतव्यङ्ग्यरूपे इत्यर्थः, व्यवस्थिते—सिद्धान्तिते, ततः,—ताभ्याम् अन्यत्, यत् काव्यं तत्, चित्रं—काव्याभासमात्रं, केष्वप्रतिमतया निर्जीवमिति भावः, अभिधीयते—कथ्यते, न तु तत् काव्यशब्देनोच्यते ; रसवर्जितत्वादिति भावः, रसस्यैव काव्यजीवनत्वेनाभिहित-

त्वादिति बोध्यम् । अत्रेयं व्यवस्था,—व्यङ्ग्यार्थस्य प्राधान्ये ध्वनिसंज्ञितकाव्यव्यवहारः, गुणभावे तु गुणीभावव्यङ्ग्यता ; ततोऽन्यद् रसभावादिरहितं व्यङ्ग्यार्थविशेषप्रकाशन-शक्तिशून्यञ्च काव्यं केवलवाच्यवाचकवैचित्र्यमात्राश्रयेणोपनिबद्धमालेख्यप्रख्यं यदा-भासते, तत् चित्रसदृशत्वात् चित्रमिति केचित् स्वीक्रियमाणमपि न स्वीकार्य्यम्, आत्मभूतस्य रसभावादेरभावेन तस्य वास्तविककाव्यत्वानुपलब्धेः । यथा चित्रेऽङ्कितः पुरुषो निर्जीवोऽपि बालानां पुरुषेति व्यपदेश्यः, तथा शब्दार्थयोऽस्तु अनुप्रासादौ उपपादितस्वरूपं काव्यं नीरसमपि काव्येति व्यपदेश्य न युक्तम् इति । इदमत्रावधेयम् ;—व्यज्यमानस्यार्थस्य मुख्यत्वे ध्वनिरिति व्यपदेशः, मुख्यत्वाभावे पुनः गुणीभूतव्यङ्ग्यमिति बोद्धव्यम् । आभ्यामितरद्रसभावाद्यभिप्रायशून्यं व्यज्यमानार्थविशेष-प्रत्यायनसामर्थ्यरहितञ्च काव्यं केवलाभिधेयाभिधायकवैलक्षण्यमात्रावष्टम्भेन सङ्ग्रथितं चित्रप्रतिमं यदुद्भासते, तच्चित्रमिति व्यपदिश्यते । इदञ्च द्वेधा ; तदिदं गोवर्द्धनाचार्य्ये-णैव,—"चित्रं शब्दार्थभेदेन द्विविधञ्च व्यवस्थितम् । तत्र किञ्चिच्छब्दचित्रं वाच्यचित्र-मतः परम् ॥" इति कारिकया स्फुटीकृतम् । अत्र किञ्चिच्छब्दचित्रं दुष्करयमकानु-प्रासादिरूपं, शब्दचित्राद्भिन्नं व्यज्यमानार्थसम्पर्कशून्यं मुख्यतया वाक्यार्थात्मना-ऽवस्थितं सद्रसाद्यभिप्रायशून्यमुत्प्रेक्षादिरूपं वाच्यचित्रम् । इदमभिहितं भवति,—यत्र वस्तुरूपम् अलङ्काररूपं वा व्यङ्ग्यं नास्ति, स विषयश्चित्रस्येति व्याख्यातॄणां सिद्धान्तः, अथेदं प्रतिपत्तव्य,—यत्र रसादीनां संस्पर्श एव न, स काव्यविशेष इति वक्तुं न शक्यते, रसादीनाञ्च सर्वथा संस्पर्शशून्यत्वे काव्यत्वापायात् । रसादि हि सर्वस्मिन् काव्यसंसारे आत्मतयाऽनुस्यूतम् । रसादेर्विभावादिरूपत्वेन विभावादेश्च चित्तवृत्तिविशेष-तया सर्वत्र स्फूर्त्तिमत्त्वम् ; तथा सति काव्यस्य चित्रेति व्यपदेश एव न शोभते, वस्त्वलङ्कारयोरपि रसाद्यभिन्नत्वात् इति । अत्राहुः काव्यप्रकाशकारानुयायिनः,—यद्यपि यत्र न रसादि, तत् काव्यमेव न ; रसादेरसत्त्वे च वस्त्वादेरपि असत्त्वं स्वतःसम्भवीति बाढम् ; वस्त्वादेरपि रसाद्यभिन्नत्वात् । एवं सति वस्तुरूपाल-ङ्काररूपव्यङ्ग्यशून्यत्वेऽपि स्वीक्रियमाणं चित्रकाव्यं वस्तुतो नास्त्येवेति सिद्धम् ; तथाऽपि यत्र रसादितात्पर्य्यशून्यः शाब्द आर्थो वाऽलङ्कारः स्यात्, तदा तात्पर्य्यशून्यतया रसादिशून्यत्वं, तत्सत्त्वे च चित्रकाव्यत्वं स्वीकार्य्यम् । अयं भावः,—तात्पर्य्यमूलो हि काव्ये शब्दानामर्थः, अर्थसामर्थ्येन च कवेस्तादृशतात्पर्य्यशून्यत्वेऽपि तादृशे विषये रस-भावादिप्रत्ययः सर्वतः क्षीणो भवतीति विरसतामुररीकृत्य चित्रकाव्यविषय उररी-क्रियते । अत एवोक्तं प्रदीपकृता,—"रसभावादिविषयविवक्षा विरहे सति । अल-ङ्कारनिबन्धो यः स चित्रविषयो मतः ॥ रसादिषु विवक्षा तु स्यात् तात्पर्य्यवती यदा ।

तदा नाख्येव तत्काव्यं ध्वनेर्यत्र न गोचरः॥" इति। एतेन तृतीयं काव्यप्रकारं निरस्तो निरस्तः। एवञ्च "अव्यङ्ग्यं काव्यम्" इत्यविमृश्यविधेयांशतयाऽप्रतीयमानार्थगुणत्वमेव अव्यङ्ग्यपदवाच्यम्। "अतादृशगुणीभूता व्यङ्ग्या काव्यन्तु मध्यमम्" इत्यत्र मध्यमकाव्यत्वेऽव्यङ्ग्यपदस्य अभिप्रेतव्यङ्ग्यमानविषयतायुक्तार्थत्वं, स्फुटव्यङ्ग्यमानगुणार्थत्वं वा। "अव्यङ्ग्यम्" इत्यत्र च नञ्शब्दो न सर्वथा निषेधार्थोऽभिमतः, किन्तु ईषदर्थः इति। अव्यक्तोचितादयस्त्वाहुः,—"यत्तु काव्यप्रकाशकारैरव्यक्तिरस्फुटत्वं वाच्यचित्रमव्यङ्ग्यं त्ववरं भणितम्" इत्यत्र, तत्र अस्फुटिनवाच्यचित्रयोरभेदेनाधमकाव्यत्वाङ्गीकारो न युक्तः; प्रतिभासते, न हि क्वचित् सचेता भवन् 'विनिगैतं मानदमात्मनन्दिरात्रवस्तुषु यद्यच्छयाऽपि यत्। ८ सद्मभेदद्रुतपातिताऽगैवा निलीखिताऽधीव भियाऽमरावती॥' इति, 'स छिन्नमूलः चतजेन रेणुसञ्जीवपरिप्लवेन पवनावधूतः। अङ्गारशेषस्य कृताश्रयस्य पूर्वोत्थितो धूम इवावभासे॥' इत्यादिभिर्वाच्यचित्रैः काव्यैः समं 'अच्छन्दोच्छन्दश्च कच्छकुहरच्छातेतरान्युच्छटा मूर्च्छन्मोह-मदर्धिदर्पविधित खानाक्रिडाक्रायवः। भिन्दादुद्यदुदारदर्दुरदरीदीर्घादरिद्रद्रुनद्रीद्रेकनदीर्निमेदुरमदा मन्दाकिनी मन्दताम्॥' इत्यादीनां अव्यङ्ग्यवाच्यचित्रतया स्फुटाभिमतानां काव्यानामभेदमङ्गीकुर्यात्" इति। रसगङ्गाधरकारा अपि एतनैव विषयं सिद्धान्तयन्तः प्राहुः,—"सत्यपि विनिगैतं मानदमात्मनन्दिरात्" इत्यादिना "अच्छन्दोच्छन्द....." इत्यादेः भिन्नत्वे यथोत्तमप्रकारत्वमेवाङ्गीकार्यं, कः तर्हि ध्वनिगुणीभूतव्यङ्ग्ययोरल्पभेदयोर्भिन्नप्रकारत्वाङ्गीकारे दृष्टबाधः इति। "अव्यङ्ग्यं त्ववरं भणितम्" इति सिद्धान्तयद्भिः काव्यप्रकाशकारानुयायिभिरुक्तम्,—अव्यङ्ग्यपदेन स्फुटप्रतीयमानार्थरहितवाक्यस्य ग्रहणम्, अवरपदेन च अवरप्रभेदार्थग्रहणम्; अवरप्रभेदत्वञ्च ध्वनिगुणीभूतव्यङ्ग्यरूपभेदद्वयापेक्षया भिन्नं सत् तृतीयत्वापन्नमेव, न त्वधमत्वपरम्; तृतीयतायां एव ध्वनिगुणीभूतव्यङ्ग्यापेक्षया भिन्नचित्रकाव्यगतत्वेन वक्तुं युक्तत्वात्। चित्रत्वञ्च गुणालङ्कारयोगित्वम्। तच्च चित्रं काव्यं शब्दचित्रवाच्यचित्रभेदाभ्यां द्विधा। यत्तूक्तं रसगङ्गाधरैरभिनवगुप्तपादैः,—"तत्तुल्यमेवार्थचित्रं मन्तव्यम्" इति, तत् प्रौढोक्तिमात्रम्; शब्दचित्रवाच्यचित्रयोरुत्तमयोरविशेषेणार्थचित्रत्वानौचित्यात्। यद्यपि शब्दार्थशरीरत्वेन चित्रत्वे तदन्तरचित्रत्वमपि अर्थतः प्रतिपद्यते, तथाऽपि "प्राधान्येन व्यपदेशा भवन्ति" इति न्यायेन तत्र भिन्नतायां एव वक्तुं युक्तत्वात्। एतेन काव्यस्य चातुर्विध्यं सिद्धान्तयन्तोऽप्यधोचिताभिनवगुप्तपादप्रदीपकाराद्याः सर्वेऽपि निरस्ताः। इदमभिप्रेत्य रसगङ्गाधरप्रदीपकाराद्यैः,—यत्र पदपदार्थौ तथाविधौ गुणीभूतस्वरूपौ सन्तौ अपि अप्रधानीयमर्थं द्योतयतः, तदुत्तमम्; यथा,—"निःश्रेषच्युतचन्दनम्..." इत्यादि, तद्वदेव

रसनकाधरकारा उत्तमोत्तमं प्राहुः, यत्र गुणीभूतं सदेव व्यङ्ग्यं चमत्कारकारकं भवत्, तत्काव्यम्, यथा,—"अद्यापि नो दुरधिरोहतनोर्विभाति बिम्बं शशिन: कलङ्करहितम्। यच्छायया प्रणयिनां परवारयन्त्या कान्तासु कोऽपि सुभग: सततं वरोऽभूत्॥" इति। एवमेव रसनकाधरप्रदीपकारादय उत्तमं प्राहुः, तत्र यथा,—"राघवविरहज्वालाजालावलीपरिवेष्टितसकलत्रिलोकेषु। निर्निद्रे सुखं प्रयाता: शबरा: कुम्भनि पवनतनयाय॥" इत्यादुदाहरणं बोध्यम्। अत्र हि सीताकुमुदखण्डालिनिवेदनेन रजनन्दन: निर्निद्रीकृत: इति व्यङ्ग्यानीतेः: चाक्षुषिकवानरकर्तृकदहनविषयकबोधोपकारितया गुणीभूतमपि दुर्लक्ष्यत्वेन विस्फुरत्वं गता राजदारा इव जानपि चाक्षतालङ्कारयति। यत्र व्यङ्ग्यमनुत्तमीयतातुल्याधिकरणाऽभिधेयचमत्कारीयता स्यात्, तत् काव्यचित्रम्; यथा—"विनिर्गतम्···" इत्यादि. अत्र हि "अमरावती" इत्यत्र श्रीमत्त्वप्रकृतकान्तात्वाध्यवसायावष्टम्भोत्प्रेक्षाऽभिधेयैव चमत्कारीयताहेतुः। वीररसस्तु अत्यन्तया चमत्कुर्वांऽपि उत्प्रेक्षाऽलङ्कृतिचमत्कारीयतोल्लङ्घनेरीश्वितो वाच्यकान्ताकल्पितकैशरसाकरागप्रकृतलिंगरत्वः स्वगौरिमेवाभाति। इदमेव रसनकाधरप्रदीपकारादयो मध्यममामनन्ति। यत्र वाच्यचमत्कारीयतापुरस्कृता शब्दचमत्कारीयता प्राधान्यमवलम्बेत तत् शब्दचित्रं काव्यम्; यथा,—"अच्छन्दोच्छल···" इत्यादि। अत्र हि शब्दचमत्कारीयतालिंगीभूतोऽर्थचमत्कारीयता चारसमुद्रप्रवाहपतितजाह्नवीपूरवाद इव न प्रतीयते। इदं चाधमं प्राहुः। एवं चतुर्थः प्रभेदः प्रदीपकाररसगङ्गाधरकारादिभिरङ्गीकृतेष्वपि निकृष्टेषु विषु भेदेषु एवानन्तर्भाव्यः इति दिक्।

इत्यग्नेयमहाराष्ट्रीयब्राह्मण-पण्डितकुलपतिना वि, ए, उपाधिधारिणा
श्रीमज्जीवानन्दविद्यासागरभट्टाचार्येण विरचितायां, तदात्मजाभ्यां
पण्डितश्रीशरच्चन्द्रविद्याभूषण-पण्डितश्रीनित्यबोधविद्यारत्नाभ्यां
प्रतिसंस्कृतायां विमलाख्यायां साहित्यदर्पणव्याख्यायां
चतुर्थः परिच्छेदः॥ ४॥

पञ्चमः परिच्छेदः ।

अथ केयमभिनवा व्यञ्जना नाम वृत्तिः ? इत्युच्यते, (क)—

वृत्तीनां विश्रान्तेरभिधातात्पर्य्यलक्षणाख्यानाम् ।
अङ्गीकार्य्या तुर्य्या वृत्तिर्बोधे रसादीनाम् ॥२७०॥(ख)

(क) ननु व्यङ्ग्यं तावत् काव्यबीजं, तच्च व्यञ्जनावृत्तिबोध्यं वस्तु, व्यञ्जना च अभिनवा वृत्तिः, अभिनवायाश्च तस्याः स्वीकारे प्रयोजनविशेषमन्तराऽनुपपत्तिः ; इतीयं कथमङ्गीक्रियते ? इत्याशङ्क्याह, अथेत्यादि ।—इयं—व्यङ्ग्यबोधसाधनीभूता, अभिनवा—नव्यैरङ्गीकृता इत्यर्थः ।

(ख) प्रामाण्योपन्यासाय प्रथमं तस्याः स्वरूपं निरूपयति, वृत्तीनामिति ।—यद्यपि "विरतासु" इत्यादिना व्यञ्जनायाः स्वरूपं निरूपितमेव, "व्यञ्जनध्वननावगत-प्रत्यायनादिव्यपदेशविषया" इत्यनेन तत्र प्रमाणं चोपन्यस्तं, तथाऽपि दृढप्रत्ययप्रति-पत्तये प्रमाणान्तरोपन्यासार्थञ्च पुनरारम्भोऽयम् । अभिधातात्पर्य्यलक्षणाऽऽख्यानां वृत्तीनां, विश्रान्तेः,—स्वस्वार्थं निर्वाह्य विरामात्, रसादीनाम् [अत्रादिपदेन भावा-दयो वस्तूनि अलङ्काराश्च गृह्यन्ते] बोधे—प्रतीतौ, तुर्य्या वृत्तिः,—चतुर्थी व्यञ्जना नाम व्यापारः इत्यर्थः, अङ्गीकार्य्या—स्वीकार्य्या ।

अत्रेदं तात्पर्य्यम्—"गङ्गायां घोषः" इति गङ्गाशब्दघोषशब्दौ साधारणे नीर-स्रोतोगोपालगृहस्तोमयोः कृतसङ्केतौ, साधारणेऽर्थे एव प्रथमतः सर्वेषां शब्दानां प्रवृत्तेः, असाधारणस्य हि सङ्केतोत्पादने असङ्ख्यत्वं व्यभिचारितत्वञ्च भवेत्, तेन च शक्त्या नीरस्रोतोमात्रं गोपालगृहस्तोममात्रञ्च ज्ञातं भवेत्, इति आद्या सरणिः । एतद्बोध्यान्यबोधनाय चाशक्ता शक्तिः, "विशेष्यं नाभिधा गच्छेत्क्षीणशक्तिर्विशेषणे" इति शास्त्रनियमात् ; (अभिधा—शक्तिः, विशेष्यं—व्यक्तिस्वरूपं धर्मिणं, न गच्छेत्—नाव-लम्बेत इति च तदर्थः । यस्माद्विशेषणे—जात्यात्मन्युपाधौ, क्षीणशक्तिः,—स्वव्यापारा-दुपरता) "नागृहीतविशेषेणा बुद्धिर्विशेष्ये चोपजायते" इति नयेन "विशेषणं प्रत्याय्य विरामात्" इति तात्पर्य्यकेण तस्या विराममनुष्ठाय क्रियोद्योगाप्रसङ्गात्, "सामान्या-न्यथ सिद्धेर्विशेषं गमयन्ति हि" इति शास्त्रनियमात् अभिप्रायशक्तिद्वारा साधा-रणान्याधाराधेयभावेन वर्त्तमानम् असाधारणं गङ्गाघोषाद्युद्गमयन्ति इत्यभिप्राये-

अभिधायाः सङ्केतितार्थमात्रबोधनविरतायाः न वस्त्वलङ्कार-रसादिव्यङ्ग्यबोधने क्षमत्वम्। न च सङ्केततो रसादिः, न हि विभावाद्यभिधानमेव तदभिधानं, तस्य तदेकरूप्यानङ्गीकारात्; यत्र च स्वशब्देनाभिधानं तत्र प्रत्युत दोष एवेति वक्ष्यामः। क्वचित्तु "शृङ्गाररसोऽयम्" इत्यादौ स्वशब्देनाभिधानेऽपि न तत्-प्रतीतिः, तस्य स्वप्रकाशानन्दरूपत्वात्। (ग)

त्मोऽन्यसंवलितत्वनावमेव भ्रायते, इति द्वितीया वरणिः। गौरस्रोतसश्च गोपाल-त्वाभावात्मसङ्गतमित्यन्यप्रमाणनिवृत्तः गङ्गाशब्दः तदाधारोचितं तीरं लक्षणया बोधयति इति तृतीया वरणिः। अत्र तावत् "मुख्यार्थबाधे तद्युक्तो ययाऽन्योऽर्थः प्रतीयते। रूढेः प्रयोजनाद्वापि—" इति नियमेन लक्षणा निरूपितमुख्यार्थ-बाधादिरयसन्निधाने एव सम्भवति। मुख्यार्थबाधः तस्यां तावदन्यप्रमितिमूलकः। यः पुनः स्नाभीष्यादिसंसर्गः, स अन्यप्रमाणावगीत एव; यत्पुनरेतत् गङ्गातीरस्य श्रीतलत्वपवित्रताऽऽपादकत्वादिकं कार्यार्थिन्यं प्रज्ञायते, तदन्यशब्दाप्रतिपादितम् अन्यप्रमाणायुक्तं कुतो लक्षणायां पतितम्? न प्रत्यक्षात्, लक्षितशब्दादेव तत्प्राप्तिसिद्धेः, शब्दार्थे हि तदप्राप्तिप्रसङ्गात्; न चानुमितेः, तेनाऽपि पावित्र्यशीतत्वादेः वस्तुमात्रेण व्यभिचारितत्वात्; न श्रुतेश्च, तदनुभवाभावप्रसङ्गात्। श्रुतौ सत्यामपि निरन्तरज्वरव्याप्तत्वात्। "एतस्माद् एव शब्दादिदमेव प्रायते" इति च किम्? यस्मादस्मिन् शब्दव्यापारः निषेधदयोगो विज्ञेयः; निषिद्धेदयोगश्च अर्थप्रत्यायकत्वा-भावात्। स तावत् नाऽभिधा(शक्ति)स्वरूपः, तत्राव्यापाराभावात्। तात्पर्यस्वरूपोऽपि न, अन्वयप्रतीतावेव तन्नाशात्। न च स्वयंस्वरूपः, मुख्यार्थबाधादेरभावप्रसङ्गात्। यस्मादभिधादिचित्रयव्यतिरिक्तचतुर्थवरणिरपि पतितः व्यक्तीऽयं व्यञ्जनाभिधेदयोगः व्यञ्जनप्रज्ञाप्रज्ञानादिसधर्म्यव्यपदेशप्रसञ्जादिसोऽवसेय इति सङ्क्षेपः।

(ग) ननु अभिधैव रसादिबोधः स्वादित्वात् आह, अभिधाया।—सङ्केतितार्थ एवेति सङ्केतितार्थमात्रं, तस्य बोधनात्—बोधं कारयित्वा, विरतायाः,—निवृत्तव्यापारायाः, [मात्रपदेन वस्त्वादिव्यवच्छेदः] पुनस्तस्यामाभावा-दिति शेषः। वस्तुनः, वस्त्वलङ्कारस्य, रसादिव्यङ्ग्यस्य च बोधने न क्षमत्वं—सामर्थ्यम्। ननु रसादिरपि सङ्केततोऽङ्गीक्रियताम्? इत्याशङ्क्याह, न चेति।—रसादिः, [आदिपदेन भावादीनां, वस्त्वलङ्कारयोश्च ग्रहणम्] न च सङ्केततः,—अन्वयस्वरूपः

अभिहितान्वयवादिभिरङ्गीकृता तात्पर्य्याख्या वृत्तिरपि संसर्गमात्रे परिशीला न व्यङ्ग्यबोधिनी। (घ)

यच्च केचिदाहुः,—

"सोऽयमिषीरिव दीर्घदीर्घतरोऽभिधाव्यापारः" इति। (ङ)

अङ्गीकारादिति यावत्, तेन रसादीनां रसादिपदसङ्केतितत्वेऽपि न क्षतिः। न चेति।—हि—यतः, विभावादीनां—विभावादीनाम् [अनुभावादिपदेन अनुभावसञ्चारिणौ गृह्यते] अभिधानं—कथनम्, अभिधया प्रतिपादनमिति यावत्, एव तदभिधानं—तस्य—वस्त्वलङ्काररसादेः, अभिधानं, न, तस्य—वस्त्वलङ्काररसादेः, तदैकरूप्यानङ्गीकारात्—आस्वादरूपरसादिप्रतीतितादात्म्यास्वीकारात्, विभावादिरूपतायां अस्वीकारादिति यावत्; तथा च विभावादिभिधानानन्तरं भावनायां आस्वादरूपरसादिप्रतीतेः कारणतया व्यञ्जनाऽवश्यं स्वीकार्येति भावः; तादृशप्रतीतेः रसादिपदाज्जातत्वमपि प्रतिपादयति, यत्र चेति।—"तामुदीक्ष्य कुरङ्गाक्षीं रसो नः कोऽप्यजायत" इत्यादौ चेत्यर्थः, स्वशब्देन—रसशृङ्गारादिपदेन, अभिधानं—कथनं, रसादेरिति शेषः, तत्र प्रभुत [इदं वैपरीत्ये] दोषः एव [एवकारेण आस्वादरूपरसप्रतीतिव्यवच्छेदः]। ननु रसस्य स्वशब्दाभिधानं काव्ये एव दोषः, न तु लौकिकवाक्ये, एवञ्च काव्यदोषजन्यात्तादृशी प्रतीतिर्नास्तु, लौकिकवाक्ये तु स्वादेरेवत्र आह, क्वचिदिति।—लौकिकवाक्ये चेत्यर्थः, तत्प्रतीतिः,—तस्य रसादेः प्रतीतिः। तस्य—रसस्य, तथा चाभिधया भावनानन्तरं बोधस्य स्वप्रकाशत्वभावादानन्दरूपत्वाभावाच्च न रसस्वरूपत्वस्वीकार इति भावः।

(घ) अत्रिरीक्तमेव तात्पर्यवृत्तेरपि व्यञ्जनाबोधनाक्षमत्वमुपपादयति, अभिहितेति।—अभिहितानां—कथितानां, सर्वेषां पदानामिति शेषः, अन्वयः,—परस्परं सम्बन्धः, तात्पर्यग्रहः सत एव तात्पर्यवाक्यस्य वाक्यार्थज्ञानाकाङ्क्षितत्वमिति यावत्, ये वदन्ति—स्वीकुर्वन्तीति ये: मीमांसकैरित्यर्थः, अङ्गीकृता, तात्पर्य्याख्या—तात्पर्यज्ञान, वृत्तिः अपि संसर्गमात्रे—केवलान्वयबोधे इत्यर्थः, परिशीला—गतशक्तिः, न तथा अपरार्थबोधने क्षमत्वमिति भावः। एतेन वक्तृतात्पर्यरूपेवास्तु व्यञ्जनेति वदन्तः परास्ताः।

(ङ) ग्रन्थस्यवचनानन्तरं यावतः वर्णाः प्रतीयन्ते, तावत्येव ग्रन्थस्य अभिधा एव व्यापारः, इति मतमुत्थाप्य दूषयति, सोऽयमिति।—अतिदीर्घः इषुव्यापारो यथैकस्मात् शरात् भिन्नः शरान्तरमपि भिनत्ति, तथा एकैवाभिधा वाच्यार्थं बोधयित्वा व्यङ्ग्यार्थमपि बोधयतीति भावः; तथा इषुः यथैकेन शरेण, अनेकशरव्यक्तिभेदेन भिन्ना-

यच्च ध्वनिकेनोक्तम्,—

"तात्पर्य्याव्यतिरेकाच्च व्यञ्जकत्वस्य न ध्वनिः।
यावत्काव्यप्रसारित्वात् तात्पर्य्यं न तुलाधृतम्॥" इति। (च)

तयोरुपरि "शब्दबुद्धिकर्मणां विरम्य व्यापाराभावः" इति वादिभिरेव पातनीयो दण्डः। (छ)

ग्रीवेण अवयोर्द्वैतं वक्षोविदारणं जीवनापहरणञ्च प्रतियोद्धुः सम्पादयति, तथैव एत्र शब्दः अभिधाऽऽख्येन एकेनैव क्रियायोगेन पदार्थरूपं, वाक्यार्थविज्ञानं, व्यङ्ग्यार्थप्रत्ययञ्च संविधत्ते, तस्माद्वाक्यत्वसम्पादकं अर्थक्रियायोगञ्च वाच्यमवलम्बनीयेति सारः। अदृष्टतोपकारिणां खोङ्गटादीनामयमाशयः इति।

(च) तात्पर्य्येति।—तात्पर्य्यस्य अव्यतिरेकात्—अभिन्नत्वात्, शब्दादेरिति शेषः, तथा च शब्दादिसम्बन्धिनस्तात्पर्य्यस्य भिन्नत्वाभावादित्यर्थः, अव्यञ्जकत्वस्य—व्यञ्जनाया, न ध्वनिः,—न व्यञ्जनानाम्नो वृत्तिरङ्गीकार्य्या इत्यर्थः, एवञ्च तात्पर्य्यवृत्तिरेव व्यञ्जनेति भावः। नन्विदं संसर्गमात्रबोधकं कथं व्यङ्ग्यं बोधयतु? इत्याह, यावदिति।—तात्पर्य्ये यावत्काव्यप्रसारित्वात्—यावन्ति काव्यानि इति यावत्काव्यं, तत्र प्रसारित्वात्—व्यापकत्वात्, तुलया—तोलनपात्रेण धृतं न, तात्पर्य्यम् एतावत्काव्ये साधयेत्, नान्यत्, इति नेत्यर्थः। अयं भावः,—व्यञ्जना तात्पर्य्यञ्च नामतो भिद्येते, न पुनः स्वरूपतः; तात्पर्य्यं हि न केनापि तुलायां धृत्वा द्रव्यमिव एतावदिति निश्चितम्। संसर्गमात्रबोधकत्वेन न नियन्त्रितमित्यर्थः; एतस्य सर्वकाव्यव्यापित्वात्। अतः वाक्यस्य तात्पर्य्यार्थस्वीकारेणैव व्यञ्जनया प्रतिपाद्यस्यार्थस्य नानार्थत्वेन व्यञ्जनायाः पुनः स्वीकारौचित्यम् इति।

(छ) तयोरिति।—तयोः,—द्वयोः, अभिधाव्यापारवादि-यावत्काव्यप्रसारितात्पर्य्यवादिनोरित्यर्थः। अन्येति।—शब्दबुद्धिकर्मणां विरतानां व्यापारोत्थानं न पुनर्भवतीत्यर्थः; तत्र शब्दः,—घटादि, बुद्धिः,—ज्ञानं, कर्म—क्रिया, एतेषां विरतत्वं नाम एकं व्यापारमुद्भाव्य द्वितीयं व्यापारमुद्भावयितुं खण्डितत्वम्। तथा सति घटादिः शब्दः एकमर्थं बोधयित्वा विरतः सन् नान्यमर्थं बोधयितुं शक्नोति, बुद्धिः एकमर्थं विषयीकृत्य नान्यमर्थं विषयीकर्तुं शक्नोति। तदुक्तं,—यथा बुद्ध्या घटो विषयीक्रियते, न तया पुनः पटो विषयीकर्तुं पार्य्यते, तदासौ बुद्धेः घटाकारेणावस्थितत्वेनानायाः पटाकारेणावस्थातुमशक्यत्वात्। तत एवोक्तं,—बुद्धिरेकमर्थं विषयीकृत्य नान्यं विषयीकर्तुं शक्नोतीति द्वितीय शक्त्या व्यापाराभावात्, तथा पचनादिरूपं क्रियाप्रपञ्चार्थं कर्म एकं स्वानुकूलं

एवञ्च किमिति लक्षणाऽप्युपास्या? दीर्घदीर्घतराभिधाव्यापारेणापि तदर्थबोधसिद्धेः। (ज) किमिति च "ब्राह्मण! पुत्रस्ते जातः," "कन्या ते गर्भिणी" इत्यादावपि हर्षशोकादीनामपि न वाच्यत्वम्। (झ)

तण्डुलादीनां विक्लेदनादिरूपं व्यापारं निर्वाह्य नापरं निर्वाहयितुं शक्नोति। इदं तत्त्वम्;—"तण्डुलान् पचति" इत्यादौ तण्डुलपाकानुकूला क्रिया "ग्रामं गच्छति" इत्यादौ गमनानुकूला न भवति वक्तुं शक्या, तस्य तत्रैव सत्यस्य वर्त्तमानत्वात्, तस्मात् तस्या अन्वयासम्भवमानत्वम् असम्भवीति विरतव्यापारत्वं वाढम्। इति।

(ज) ननु वृद्धादयो विरता नाम्नमर्थं बोधयितुं शक्नुवन्तीति लोपपद्यते, एकया वृद्धा एतेन शब्दादिना च बहुवार्थसाधनस्य अनेकार्थादिबोधनस्य च सर्वत्रैव प्रसिद्धेरित्यत्रस्वरसमाह—इत्यत्रेति।—एवञ्च—निरूढप्रकारेण पुनः, अभिधयैव व्यङ्ग्यबोधस्वीकारेण चेत्यर्थः, किमिति—किमर्थम्? यदि तथाविधेन अभिधासामर्थ्येनैव व्यङ्ग्यतया बोध्योऽर्थोऽपि बोध्यत्वेन स्वीक्रियते, तदा किमभिप्रायी लक्षणाया अपि स्वीकारः? लक्षणया बोध्यस्यार्थस्य तथाविधेन अभिधाव्यापारेणैव बोध्यत्वस्वीकार्यात् इत्यर्थः। अयं भावः,—"लोऽवर्णयोरिव" इत्यभिधायिनो लोमांसकाः, लोमांसायाश्च आचार्यो जैमिनिः, तथा सिद्धान्ते च स्वाचार्यसिद्धान्तेनापि विरोधः; तथा हि,—"श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्" (मीमां० द० ३अ० ३ पा० १४ सू०) इति जैमिनिसूत्रम्; एतेन च श्रुतिलिङ्गादीनां पूर्वपूर्वबलिष्ठत्वं परपरदुर्बलत्वञ्च प्रतिपादितम्। तत्र यदि यथा श्रुतिरस्ति तथा लिङ्गमस्तीति शब्दाऽऽत्मकौशरसवनस्यमानानामर्थानां दीर्घदीर्घतराभिधाव्यापारेणैव अवगतिः स्यात्, तदा लिङ्गप्रभृतीनां दुर्बलत्वं अवधारमुपपद्यते? इति। विस्तरस्तु माधवीये जैमिनिन्यायमालाविस्तरे, भाष्यैश्वरचिते मीमांसान्यायप्रकाशे, रामेश्वरभिट्टरचितायां मीमांसासर्वस्वकौमुद्यां, श्रीलक्ष्यात्मिकनिर्मितायां मीमांसापरिभाषायामेति दिक्। तदर्थस्य—लक्षणाजन्यबोधविषयस्य, लक्ष्यार्थस्य इत्यर्थः, बोधसिद्धेः,—प्रतीतिसिद्धेः। तथा हि, लक्षणाजन्यबोधान्तरमपि व्यङ्ग्यबोधाय अभिधावत्तत्स्वीकारे लक्षणावत्तत्स्वीकारस्य अकिञ्चित्करत्वमिति भावः।

(झ) ननु लक्षणाया अपि अस्वीकारे का हानिः? इति सामान्यतः समाधत्ते, किमिति चेति।—ते—तव, सम्बोध्यस्येति यावत्, पुत्रो जातः,—उत्पन्नः, कन्या—अनूढा पुत्री च, गर्भिणी—गर्भवती, धृतस्तनावरोधा वर्त्तते इति।

यत्पुनरुक्तं "पौरुषेयमपौरुषेयञ्च वाक्यं सर्वमेव कार्य्यपरम्, अतत्परत्वेऽनुपादेयत्वादुन्मत्तवाक्यवत्, ततश्च काव्यशब्दानां निरतिशयसुखास्वादव्यतिरेकेण प्रतिपाद्यप्रतिपादकयोः प्रवृत्त्योपयिकप्रयोजनान्तरानुपलब्धेर्निरतिशयसुखास्वाद एव कार्य्यत्वेनावधार्य्यते; "यत्परः शब्दः स शब्दार्थः" इति न्यायादिति। (ञ)

भाव:, इत्यादौ यद्यपि वाक्ये श्रूयमाणे दर्भमोचादीनां पुत्रजननसम्बन्धादिना मननि स्मरतो दर्भादिदोषत्व, कन्याया अन्यवंशोत्पन्नत्वादिना कुलक्षयजननीत्वादिना श्रोत्रादिदुष्यत्वेन्न न वाच्यत्वमापद्येतेति भाव:। "पुत्रस्ते जात:" "कन्या ते गर्भिणी" इत्यादीनामपि "विधुदुदित:" "सूर्योऽस्तमित:" इत्यादीनामिव वाचकत्वाङ्गीकार्य्यत्वौचित्यात्। तत्र मते व्यञ्जकत्वाभावात् वाचकत्वाङ्गीकारस्य सर्वत्र आपातत उपस्थितौ तथा प्रातिस्विकस्य बोधस्य निर्मूलत्वमेव। अन्यन्मते तु व्यञ्जनाद्यपक्ष व्यापारान्तरस्य नागत्यत्वात् नाऽपि क्षति:; इति दरमुन्मुलितनयनं खलदये निहितशरेण वर्णं विधाय वाच्यम्।

(ञ) रसादीनां तात्पर्यविषयत्वमनुमानेन मतार्थवतामन्विताभिधानवादिनां मतं दर्शयति, यत्पुनरित्यादिना।—यत्पुन: शब्दम्—अन्विताभिधानवादिना सिद्धान्तितं, पौरुषेयं—पुरुषसम्बन्धि, "दध्यानय" इत्यादि लौकिकवाक्य, "धर्म एव हतो हन्ति" इत्यादि मन्वादिवाक्यमित्यर्थ:, अपौरुषेयं—यत्र पौरुषेयं, "ज्योतिष्टोमेन स्वर्गकामो यजेत" इत्यादि वेदवाक्यम्; तदेतत्सर्वमेव वाक्यं कार्य्यपरं—कार्य्यसाधनप्रयोजनकम्। कार्य्यं हि दध्यानयन-देवयजनादिरूपं भोजनस्वर्गार्थपरम्। व्यतिरेकव्याप्तिं दर्शयति, अतत्परत्वे इति।—अतत्परत्वे लौकिकवाक्ये पुन: यत्र तत्र वाक्ये उपादेयत्वं न स्यात्, उपादेयत्वाभावे चोन्मत्तप्रलपितसदृशत्वमेव निर्बाधम् इति वर्त्तुलोऽर्थ:। एवञ्च सिद्धमर्थमाह, ततश्चेति।—तत्पुनरित्यर्थ:। काव्यशब्दानां शब्दानां निरतिशयसुखास्वादनमेव फलं, तदतिरिक्तञ्च अनुपलब्धे:; प्रतिपाद्यप्रतिपादकयो:,—"दध्यानय" "ज्योतिष्टोमेन स्वर्गकामो यजेत" इत्यादीनां यं प्रत्यभिधानं, स प्रतिपाद्य:; यश्चाभिधाता, स प्रतिपादक इति तयो:,—श्रोतृवाचकयोरित्यर्थ:; प्रवृत्ति:,—काव्यश्रवणकाव्यपाठयोरिच्छा इत्यर्थ:, तस्या औपयिकं—दृष्टिदृष्टं साधनमित्यर्थ:, यत्प्रयोजनान्तरं—निरतिशयानन्दात् अन्यत् प्रयोजनं, तस्य अनुपलब्धे:,—शब्देनानुपस्थितेरित्यर्थ:, अवधार्य्यते—निर्णीयते, तात्पर्य्येणेति शेष:।

तत्र प्रष्टव्यम्;—किमिदं तत्परत्वं नाम? तदर्थत्वं वा, तात्पर्य्यवृत्त्या तद्बोधकत्वं वा? आद्ये न विवादः, व्यङ्ग्यत्वेऽपि तदर्थताऽनपायात्। द्वितीये तु केयं तात्पर्य्याख्या वृत्तिः? अभिहितान्वयवादिभिरङ्गीकृता, तदन्या वा? आद्ये दत्तमेवोत्तरम्। द्वितीये तु नाममात्रे विवादः; तन्मतेऽपि तुरीयवृत्तिसिद्धेः। (ट)

नन्वस्तु युगपदेव तात्पर्य्यशक्त्या विभावादिसंसर्गस्य रसादेश्च प्रकाशनमिति चेन्न, तयोर्हेतुफलभावाङ्गीकारात्। यदाह मुनिः,—"विभावानुभावव्यभिचारिसंयोगात् रसनिष्पत्तिः" इति। सहभावे च कुतः सव्येतरविषाणयोरिव कार्य्यकारणभावः? पौर्वापर्य्यविपर्य्ययात्। (ठ)

उक्तमर्थं मीमांसकमतेन द्रढ़यति, यत्पर इति।—शब्दः यत्परः,—यत्र यद्बोधेच्छया प्रयुक्तः इत्यर्थः, स शब्दार्थः,—शब्दप्रतिपाद्यः, इति, ततश्च तात्पर्य्येणैव रसादिप्रतीतिर्भवेत्, न तदर्थं व्यञ्जनाऽङ्गीकार्य्या इति भावः।

(ट) एतन्मतं दूषयति, तत्रेति।—व्यङ्ग्यत्वे—व्यञ्जनया बोध्यमानत्वे, अपि किं पुनरबोध्यमानत्वे इत्यर्थः, तदर्थताऽनपायात्—तदर्थतायाः,—तत्परतायाः, अनपायात्—अनपगमात्। व्यञ्जनावादिमते सिद्धसाधनमिति भावः। द्वितीये त्विति।—अत्राभिधया "कार्य्यं कुरु" इत्यादिवाक्ये, जलाऽऽहरणार्थं "घटमानय" इत्यादौ च कार्य्यप्रतिपादके व्यभिचारोऽपि द्रष्टव्यः। दत्तमिति।—संसर्गबोधे परिक्षीणत्वात् कार्य्यबोधनाक्षमत्वं तात्पर्य्यस्येत्युत्तरं बोध्यम्। तन्मतेऽपि—रसादीनां तात्पर्य्यग्राह्यत्ववादिमतेऽपि। स्पष्टमन्यत्।

(ठ) ननु विभावादिसंसर्गबोध-रसादिबोधयोः क्रमिकत्वाङ्गीकार एव दूषणमुक्तं, यौगपद्याङ्गीकारे तु नास्यावसर इत्यभिप्रायेणाह, नन्वस्त्विति।—तयोः,—विभावादिसंसर्गस्य रसादेश्चेत्यर्थः, हेतुफलभावाङ्गीकारात्—कारणकार्य्यभावस्वीकारात्। मुनिवचनेन द्रढ़यति, यदाहेति।—"विभावानुभावव्यभिचारिसंयोगात् रसनिष्पत्तिः" इति। तत्र विभावादयोऽभिहिताः, एतेषां संयोगः,—सम्बन्धः, तस्मात्, रत्यादीनाम् इति शेषः, रसनिष्पत्तिः,—रसात्मना प्रतीयमानत्वम्। इदमत्रावधेयम्;—विभावानुभावेति भरतमुनिसूत्रम्, इदञ्च स्वस्वशेमुषीसमुन्मेषवशेन अनेकैर्महाऽनुभावैः विभा-

वितार्थमपि भरतमतेन पुनर्विभाव्यते,—"विभाव इति कस्मात्? उच्यते,—विभावो विज्ञानार्थः, विभाव्यन्तेऽनेन वागङ्गसत्त्वाभिनया इत्यतो विभावः, विभावितं विज्ञातमित्यनर्थान्तरम्। अत्र श्लोकः,—"बहवोऽर्था विभाव्यन्ते वागङ्गाभिनयाश्रयाः। अनेन यस्मात् तेनायं विभाव इति संज्ञितः॥" अथानुभाव इति कस्मात्? उच्यते,—यदयमनुभावयति वागङ्गसत्त्वकृतमभिनयम्। अत्र श्लोकः,—"वागङ्गसत्त्वाभिनयैर्यस्मादर्थो विभाव्यते। वागङ्गोपाङ्गसंयुक्तस्त्वनुभाव इति स्मृतः॥" एवमेतेषां विभावानुभावसंयुक्तानां लक्षणनिदर्शनान्यभिव्याख्यास्यामः। तत्र विभावानुभावौ लोकप्रसिद्धौ। लोकस्वभावोपगतत्वादनयोर्लक्षणं नोच्यतेऽतिप्रसङ्गनिवृत्त्यर्थम्; तत्र श्लोकः,—"लोकस्वभावसंसिद्धा लोकयात्राऽनुगामिनः। अनुभावा विभावाश्च ज्ञेयास्त्वभिनयैर्बुधैः॥" तत्राष्टौ भावाः स्थायिनः, त्रयस्त्रिंशद् व्यभिचारिणः, अष्टौ सात्त्विकाः, एवमेते काव्यरसाभिव्यक्तिहेतव एकोनपञ्चाशद्भावाः प्रत्यवगन्तव्याः। एभ्यश्च सामान्यगुणयोगेन रसा निष्पद्यन्ते। भवति चात्र श्लोकः,—"योऽर्थो हृदयसंवादी तस्य भावो रसोद्भवः। शरीरं व्याप्यते तेन शुष्ककाष्ठमिवाग्निना॥" अत्राह,—कथं स्थायिन एव भावाः रसत्वमाप्नुवन्ति? उच्यते,—यथा हि समानलक्षणाः तुल्यपाणिपादोदरशरीराः समानाङ्गप्रत्यङ्गाः कुलविद्याकर्मशिल्पविचक्षणत्वाद्राजत्वमाप्नुवन्ति, तत्रैव च अन्येऽल्पबुद्धयस्तेषामेवानुचरा भवन्ति, तथा विभावानुभावव्यभिचारिणः स्थायिभावानुपाश्रिता भवन्ति, बह्वाश्रयत्वात् स्वामिभूताः स्थायिनो भावाः। तत्स्थानीयपुरुषगुणभूता अन्ये भावास्तान् गुणतया आश्रयन्ते परिजनभूताः व्यभिचारिणो भावाः। यथा नरेन्द्रो बहुजनपरिवारोऽपि स एव नाम लभते, नान्यः सुमहानपि पुरुषः, तथा विभावानुभावव्यभिचारिपरिष्कृतः स्थायिभावो रसतां लभते। "यथा नराणां नृपतिः शिष्याणाञ्च यथा गुरुः। एवं हि सर्वभावानां भावः स्थायी महानिह॥....." को दृष्टान्तः? अत्राह यथा,—नानाव्यञ्जनौषधिद्रव्यसंयोगाद् रसनिष्पत्तिः। यथाहि गुडादिभिर्द्रव्यैः व्यञ्जनैरौषधिभिश्च षाड़वादयो रसा निवर्त्तन्ते, तथा नानाभावोपगता अपि स्थायिनो भावाः रसत्वमाप्नुवन्ति इति। एतेन विभावादीनां संयोगो हेतुरिति प्रतिपादितम्। विभावादिसंसर्गः रसप्रतीतौ हेतुः, रसश्च कार्य्यम्; तत् कथं तयोर्यौगपद्ये प्रतीतिः? कार्य्यकारणयोः पौर्वापर्य्यनियमात्; न हि कार्य्यं कारणञ्च युगपद्भवतीति भावः। सहभावे—युगपदुत्पत्तौ, सव्येतरविषाणयोः,—वामदक्षिणशृङ्गयोः, इव कुतः,—कथं, कार्य्यकारणभावः? शृङ्गयोः समकाले उत्पन्नयोर्यथा परस्परं कार्य्यकारणभावो न स्यात्, तथा विभावादिसंसर्गरसयोः तथात्वे मुनिवचनविरोध इति भावः।

"गङ्गायां घोषः" इत्यादौ तटाद्यर्थमात्रबोधनविरताया लक्षणायाश्च कुतः शीतत्वपावनत्वादिव्यङ्ग्यबोधकता ? तेन तुरीया वृत्तिरुपास्यैवेति निर्विवादमेतत्। (ड)

किञ्च,—

बोद्धृस्वरूपसङ्ख्यानिमित्तकार्य्यप्रतीतिकालानाम्।
आश्रयविषयादीनां भेदाद्भिन्नोऽभिधीयते व्यङ्ग्यः॥२७१॥(ढ)

वाच्यार्थव्यङ्ग्यार्थयोर्हि पदतदर्थमात्रज्ञाननिपुणैर्वैयाकरणैरपि सहृदयैरेव च संवेद्यतया बोद्धृभेदः; "भम धम्मिअ!" इत्यादौ क्वचिद्वाच्ये विधिरूपे निषेधरूपतया, क्वचित् "निःशेषच्युतचन्दनम्" इत्यादौ निषेधरूपे विधिरूपतया च स्वरूपभेदः। "गतोऽस्तमर्कः" इत्यादौ च वाच्योऽर्थ एक एव प्रतीयते, व्यङ्ग्यस्तु तद्बोद्ध्रादिभेदात्; क्वचित् "कान्तमभिसर"

(ड) ननु लक्षणया रसादिबोध आस्तामित्याशङ्क्याह, गङ्गायामिति।—तुरीया—चातुर्थी। स्पष्टमन्यत्।

(ढ) अभिधेयव्यङ्ग्ययोरन्योऽन्यं भेदमुपपाद्य, तेनैव अभिधातः, व्यञ्जनायाः भेदमुपपादयति, किञ्चेत्यादिना।—बोद्धा च स्वरूपञ्च सङ्ख्या च निमित्तञ्च कार्य्यञ्च प्रतीतिश्च कालश्चेति तेषाम्; तत्र बोद्धा—ज्ञाता, स्वरूपं—विधिरूपं, निषेधरूपं वा; सङ्ख्या—प्रसिद्धा, निमित्तं—कारणं, कार्य्यं—प्रसिद्धं, प्रतीतिः,—निश्चयः, कालः,—पौर्वापर्य्यम्। आश्रयविषयादीनाम्—आश्रयश्च विषयश्चेति तावादौ येषां तेषाम्। एतदनन्तरं चकारो द्रष्टव्यः। तत्र आश्रयः,—अवलम्बनं विषयः,—प्रतिपाद्योऽर्थः, [आदिना देशौचित्यादीनां ग्रहणं] भेदात्—भिन्नत्वात्, व्यङ्ग्यः,—व्यञ्जनया बोध्योऽर्थः, भिन्नः,—भेदं प्राप्तः, अभिधीयते। अत्र "वाच्यात्" इत्यस्यानुषङ्गः ["अभिधेयतः" इति पाठे—वाच्यार्थात् इति तदर्थो ज्ञेयः]। अयं भावः,—वाच्यस्य अर्थस्य यो बोद्ध्रादिः, सोऽन्य एव, यश्च व्यङ्ग्यस्यार्थस्य, स चान्यः; इति तयोः परस्परमनैक्यात् स्याद्भेदो विदितचरः। यद्वा,—व्यङ्ग्योऽर्थो बोद्ध्रादिभेदादनेकविधतां यथा प्रतिपद्यते, न तथा वाच्योऽर्थः; तस्मात् स्फुट एव बोद्ध्राद्यनेकविधत्वाद् व्यङ्ग्यस्य अनेकविधत्वं, वाच्यस्य च बोद्ध्राद्यनेकविधत्वाभावादेकविधत्वम् इति भावः।

इति, "गावो निरुध्यन्ताम्" इति, "नायकश्च अयमागमनावसरः" इति "सन्तापोऽधुना नास्ति" इत्यादिरूपेणानेक इति सङ्ख्याभेदः। वाच्यार्थः शब्दोच्चारणमात्रेण वेद्यः। एष तु तथाविधप्रतिभा-नैर्मल्यादिनेति निमित्तभेदः। प्रतीतिमात्रकरणात् चमत्कारकरणाच्च कार्यभेदः। केवलरूपतया चमत्कारितया च प्रतीतिभेदः। पूर्वपश्चाद्भावेन च कालभेदः। शब्दाश्रयत्वेन शब्दतदेकदेशतदर्थवर्णसङ्घटनाश्रयत्वेन च आश्रयभेदः। (च)

(च) बोद्धृभेदं दर्शयति, वाच्यार्थेत्यादिना इति।—पदतदर्थेनाम्ब—पदपदार्थेनाम्ब, [नामपदेन व्यक्तत्वच्छेदः] ज्ञाने निपुणैः वैयाकरणैः अपि [एतेन सहृदयानामपि परिग्रहः] सहृदयैः एव [एतेन वैयाकरणव्यवच्छेदः] च संवेद्यतया —बोद्धव्यतया, बोद्धृभेदः; वैयाकरणा वाच्यार्थमेव, न तु व्यङ्ग्यार्थं बोद्धुं प्रभवन्ति, काव्यतत्त्वं सुहृदयैरेवोद्धुं शक्यं: सहृदयास्तु उभयमेव वाच्यं व्यङ्ग्यं चेति विविधमप्यर्थं बोद्धुं प्रभवन्ति, इति वाच्यार्थबोद्धारो वैयाकरणाः, व्यङ्ग्यार्थबोद्धारस्तु सहृदया एवेति स्फुटं बोद्धृभेद इति भावः। [ध्वनिज्ञता भोजराजसूरिणापि तथोक्तम् ;—"शब्दार्थशासनज्ञानमात्रेणैव न वेद्यते। वेद्यते स हि काव्यार्थतत्त्वज्ञैरेव केवलम्॥" इति। "यदि च वाच्यरूप एवासावर्थः स्यात्, तर्हि वाच्यावबोधरूपपरिज्ञानादेव तत्प्रतीतिः स्यात्। अथ वाच्यावबोधरूपव्यतिरिक्ततयमानां काव्यतत्त्वार्थभावनाविमुखानां खरशुष्कादिशब्दमिव प्रतीतानां मन्दैकलक्षणविज्ञानगोचर एवासावर्थः" इति च तद्व्याख्यायां रालामकैर्निरूपितम्]। स्वरूपभेदं दर्शयति,—"अत्र धर्मिण!" इत्यादिनेति।—विधिरूपे वाच्ये प्रतीत्यन्वयः, निषेधरूपतया, व्यङ्ग्येति शेषः। निषेधरूपे वाच्ये प्रतीत्यन्वयः। स्वरूपभेदः, वाच्यव्यङ्ग्यार्थयोरिति पूर्वेणान्वयः। एवमग्रेऽपि। अत्र च "धार्मिक! वृषल" इति वाच्यार्थः विधिरूपः, व्यङ्ग्यार्थस्तु निषेधरूपः, इति वाच्यव्यङ्ग्ययोः स्वरूपं सुलभत्वं भिन्नमिति भावः। "निःशेष—" इति सप्तपदादिनतेनोदाहरणम्। सङ्ख्याभेदं दर्शयति, अत्र इति।—बोद्धा—प्रतिपाद्यः, [पादिना प्रकरणादीनां ग्रहणम्] अत्र एक एव वाच्यार्थः, व्यङ्ग्यस्तु बहुविध इति भावः। निमित्तभेदं दर्शयति, वाच्यार्थः इति।—शब्दश्च, उच्चारणं—ज्ञानं, तस्मादेव [ज्ञानशब्देन प्रतिभानैर्मल्यादिव्यवच्छेदः] वाच्यार्थबोधे शब्दज्ञानस्यैव निमित्तत्वात्। एष तु व्यङ्ग्यार्थस्तु। प्रतिभेति।—प्रतिभा—गूढार्थपदघटनाशक्तिः, तस्या नैर्मल्यं—सहृद-

"कस्स व ण होइ रोसो दट्ठूण पिआए सव्वणं अहरम्।
सभमरपअ्मागवाइणि ! वारिअवामे ! सुहअ्स दाणीम्"॥ (त)

यदृच्छाप्रतिबन्धकीभूतदुरदृष्टासंसर्गः, [आदिना वह्न्यादिवैशिष्ट्यज्ञानादिपरिग्रहः]। वाच्यभेदं दर्शयति, प्रतीतीति।—वाच्यार्थे प्रतीतिनाम—बोधनम्, [नामपदेन चमत्कारव्यवच्छेदः] व्यङ्ग्यार्थे चमत्कारकरणं—चित्तीकृतविधानम्। प्रतीतिभेदं दर्शयति, केवलेति।—वाच्यप्रतीतेः सुखचमत्कारहीनतया, व्यङ्ग्यप्रतीतेश्चदुभयचमत्कारतया भेदः। आश्रयभेदं दर्शयति, पूर्वेति।—वाच्यार्थव्यङ्ग्यार्थयोः प्रतीतिपौर्वापर्ये च आश्रयभेद इत्यर्थः, वाच्यार्थः प्रथमं प्रतीयते, व्यङ्ग्यार्थस्तु पर्य्यालोचनया परम इति भावः। आश्रयभेदं दर्शयति, शब्दाश्रयत्वेनेति।—वाच्यस्य शब्दनाश्रयत्वेन—शब्दमात्रसम्बन्धित्वेन, व्यङ्ग्यस्य शब्दादिसम्बन्धित्वेन तयोराश्रयभेदः; वाच्यार्थः केवलं शब्दमाश्रयति, व्यङ्ग्यार्थस्तु शब्दादिकमिति भावः। तदेकदेशेति।—शब्दैकदेशेत्यर्थः; स च प्रकृतिप्रत्ययोपसर्गादिरूपः, तदर्थः,—तस्य—शब्दस्य, अर्थः।

(त) विषयभेदं दर्शयति, कस्स इति।—["कस्स वा ण भवति रोषो दृष्ट्वा प्रियायाः सव्रणमधरम्। सभ्रमरपद्माघ्रायिणि ! वारितवामे ! सुखेदानीम्॥" इति संस्कृतम्]। उपपतिना दष्टाधरां भार्यां प्रति क्रुद्धं नायकं कुलयितुमीहमानायां नायिकायां सख्या उक्तिरियम्। हे वारितवामे !—वारिता—निवारिताऽसौ वामा—प्रतिकूला तत्सम्बुद्धौ, हे सभ्रमरपद्माघ्रायिणि !—सभ्रमरं पद्मं जिघ्रतीति तत्सम्बोधने, प्रियायाः सव्रणं—व्रणयुक्तम्, अधरं दृष्ट्वा कस्य—नायकस्य, रोषः,—क्रोधः, न भवति ? अपि तु सर्वस्यैव भवतीत्यर्थः। इदानीं सुखं, अभूततर्जनां व्रणवेदनामेति शेषः। अत्र "वारितवामे" इति "सभ्रमरपद्माघ्रायिणि" इति च सामिप्रायमनापि वामपद्मशब्दयोर्विशेषणीभूतौ वारितसभ्रमरशब्दौ सामिप्रायौ इति परिकराख्यालङ्कारः। अत्रानुचितजनोचितसाम्यं लोचनकारो गोविन्दभट्टः,—"कस्य वेति अनीर्ष्यालोरपि, न भवति रोषो दृष्टेति कुतश्चिदेवापूर्वतया प्रियायाः सव्रणमधरं दृष्ट्वा—अवलोक्य, सभ्रमरपद्माघ्रायिणीति ! शीलं हि कथञ्चिदपि वारयितुं न शक्यम् इति ध्वनेः, वारिते—वारणायां कृतायां, वामे—तदनङ्गीकारिणि ! सुखेदानीम्, उपालम्भपरम्परानिमित्तं; अवायं भावः,—कश्चिदविनीतो कुतश्चित् खण्डिताधरा तत्सविधसंविधाने अपरि तमनवलोकयतीव कयाचित् विदग्धसख्या तदाचतापरिहारायेवमुच्यते। सुखेदानीमिति वाचनविनयवतीविषयम्। अभूतविषयस्तु अपराधो नाकीलादिसमानं व्यञ्जनम्। तस्माच्च प्रियतमेन गाढमुपालभ्यमानायां तदभीक्ष्णप्रक्षिप्तपातिवैक्लव्य-

इति सखीतत्कान्तविषयत्वेन विषयभेदः; तस्मान्नाभिधेय एव व्यङ्ग्यः। (थ)

तथा,—

प्रागसत्त्वात् रसादेर्नो बोधिके लक्षणाऽभिधे।
किञ्च मुख्यार्थबाधस्य विरहादपि लक्षणा॥२७२॥(द)

"न बोधिका" इति शेषः। न हि कोऽपि रसनात्मकव्यापाराद् भिन्नो रसादिपदप्रतिपाद्यः पदार्थः प्रमाणसिद्धोऽस्ति, यमिमे लक्षणाऽभिधे बोधयेताम्। किञ्च, यत्र "गङ्गायां घोषः"

लोकविषयञ्चाविनयच्छादनेन प्रत्यायनं व्यङ्ग्यम्। तत्सपत्न्याञ्च तदुपालम्भतदविनयप्रहृष्टायां सौभाग्यातिशयख्यापनं प्रियाया इति शब्दबलादिति सपत्नीविषयं व्यङ्ग्यम्। सपत्नीमध्ये इयत्खलीकृताऽस्मीति लाघवमात्मनि ग्रहीतुं न युक्तम्; प्रत्युतायं बहुमानः, सहस्व शोभस्वेदानीमिति सखीविषयं सौभाग्यप्रख्यापनव्यङ्ग्यम्। अद्येयं तव प्रच्छन्नानुरागिणी हृदयवल्लभेत्थं रक्षिता पुनः प्रकटरदनदंशनविधिनं विधेय इति तच्चौर्य्यकामुकविषयसम्बोधनं व्यङ्ग्यम्। इत्थं मयैतदपह्नुतमिति स्ववैदग्ध्यख्यापनं तटस्थविदग्धलोकविषयं व्यङ्ग्यम्" इति।

(थ) सखीतत्कान्तविषयत्वेनेति।—अत्र वाच्यार्थबोधे सखी उद्देश्या, भ्रमरेणास्या अधरो दष्टः, न पुनः उपपतिना; इति व्यङ्ग्यार्थबोधे उद्देश्यः कान्तः इति विषयभेदः, सख्या कान्तेन चोभयबोधः सम्भवतीति न बोद्धृभेदः। उपसंहरति, तस्मादिति।—न एव व्यङ्ग्य इत्यन्वयः।

(द) व्यङ्ग्यान्तरबोधे यथा तथाऽस्तु, रसादिबोधस्तु व्यञ्जनावृत्त्यङ्गीकारमन्तरेण सर्वथा न सम्भवतीत्यभिप्रायेणाह, प्रागिति।—रसादेः प्राक् असत्त्वात्—अविद्यमानत्वात्, बोधात् पूर्वं प्रमाणान्तरासिद्धत्वादित्यर्थः, लक्षणाऽभिधे—लक्षणावृत्तिरभिधावृत्तिश्चेत्यर्थः, नो बोधिके—बोधयितुं न शक्नुत इत्यर्थः। लक्षणा अभिधा च प्रमाणान्तरसिद्धमेव वस्तु बोधयतः, इति नियमाभिप्रायेणेदं, रसादिपदन्तु व्यञ्जनासिद्धं रसादिम् अभिधया बोधयतीति न दोष इति भावः। लक्षणया रसादिबोधे सामग्र्यन्तरमाह, किञ्चेति।—किञ्च—अन्यच्च, मुख्यार्थबाधस्य विरहात्—अभावादपि, लक्षणा, नो बोधिका इति शेषः; लक्षणया मुख्यार्थबाधे हि प्रमाणान्तरसिद्धं वस्तु बोध्यते, रसादिबोधे तु न मुख्यार्थबाधः, नापि रसादिः प्रमाणान्तरसिद्धः इति भावः।

इत्यादावुपात्तशब्दार्थानां बुभूषन्नेवान्वयोऽनुपपत्त्या बाध्यते, (ध) तत्रैव हि लक्षणायाः प्रवेशः। यदुक्तं न्यायकुसुमाञ्जलावुदयनाचार्य्यैः ;—

"श्रुतान्वयादनाकाङ्क्षं न वाक्यं ह्यन्यदिच्छति।
पदार्थान्वयवैधुर्य्यात् तदाक्षिप्तेन सङ्गतिः॥" इति। (न)

(ध) पूर्वार्द्धं विवृणोति, न हीति।—व्यापारात्—कार्य्यात्। द्वितीयार्द्धं विवृणोति, किञ्चेति।—उपात्तशब्दार्थानां—वाच्यार्थानां, बुभूषन्—भवन्, अन्वयः,—अन्वयबोधः, अनुपपत्त्या—अन्वयानुपपत्तिग्रहेण, बाध्यते—प्रतिबध्यते।

(न) श्रुतेति।—श्रुतान्वयात्—श्रुतानां—शब्दोपात्तानाम्, अन्वयात्—अन्वयबोधजनकात्, वाच्यार्थान्वयबोधजननादित्यर्थः, अनाकाङ्क्षम्—आकाङ्क्षारहितं, वाक्यम् अन्यत्—अर्थान्तरं, न इच्छति—आकाङ्क्षति; पदार्थान्वयवैधुर्य्यात्—पदार्थानाम्, अन्वयस्य—सम्बन्धस्य, वैधुर्य्यम्—अनुपपत्तिः, तस्मात्, मुख्यार्थान्वयानुपपत्तिग्रहादित्यर्थः, तदाक्षिप्तेन—मुख्यार्थसम्बन्धितया गृहीतेन, अर्थेनेति शेषः, सङ्गतिः,—अन्वयबोधः, भवतीति शेषः। "गामानय" इत्यादीनां वाक्यानां श्रुतमात्राणामन्वयेन स्वस्वार्थबोधकत्वेन स्वमर्थं बोधयितुं न पदान्तराकाङ्क्षित्वम्। "गङ्गायां घोषः" इत्यादीनां पुनः श्रुतमात्राणामन्वयेन स्वस्वार्थाबोधकतया स्वमर्थं बोधयितुं पदान्तराकाङ्क्षित्वमस्त्येवेति तदर्थमवश्यं पदान्तरमाक्षेप्तव्यम्; तथैवान्वयेन स्वस्वार्थबोधकत्वोपयोगिताभावात् इति भावः। इदमभिहितं भवति,—"कर्म्मणि कुशलः," "गङ्गायां घोषः" इत्यादौ कुशलगङ्गाऽऽदिशब्दानां कुशग्राहिप्रवाहादिरूपो मुख्योऽर्थः, तत्र च बाधसद्भावः, मुख्यार्थस्य च तत्सदृशतीरादौ सम्बन्धः, तत्सदृशतीरादेश्च लक्षणयाऽऽनयनं, तत्सदृशतीरादिरूपैर्मुख्यशब्दैरुद्बोधयितुमसम्भाव्यस्य विवेकित्वपावनत्वादेश्च प्रत्यायनं फलम्, इति कुशलगङ्गाऽऽदिशब्दैः कुशग्राहिसदृशतीरादि आनीयते। यद्येवं कुशग्राहिसदृशतीराद्यपि, कुशलगङ्गाऽऽदिशब्दानां मुख्योऽर्थो भवेत्, तत्र कुशग्राहिताघोषाधिकरणताऽऽद्यसम्भवरूपो बाधो भवेत्, फलस्य च कुशग्राहिगङ्गाऽऽदिनिष्ठकुशग्राहिसदृश(विवेकि)त्वपावनत्वादिविशेषरूपस्य कुशग्राहिसदृशतीरादिना साक्षात्सम्बन्धो भवेत्, लक्षणया फलोद्बोधनस्य च फलान्तरं भवेत्, तदा कुशलगङ्गाऽऽदिशब्दाः फलं लक्षयेयुः, न चेदं किञ्चित्सम्भवति, अथात्र यदि कुशग्राहिसदृशतीरादिनिष्ठविवेकित्वपावनत्वाऽऽत्मनि फलेऽपि लक्षणीये लक्षणीयकुशल-

न पुनः "शून्यं वासगृहम्" इत्यादौ मुख्यार्थबाधः। यदि च "गङ्गायां घोषः" इत्यादौ प्रयोजनं लक्ष्यं स्यात्, तीरस्य मुख्यार्थत्वं बाधितत्वञ्च स्यात्, तस्याऽपि च लक्ष्यतया प्रयोजनान्तरं, तस्याऽपि प्रयोजनान्तरमित्यनवस्थाऽऽपातः। (५)

घोषादिनिष्ठपावनत्वादेरात्मनि फलान्तरत्वेनोक्तियोग्यत्वात्, तदिह फलानुपयोगं लक्षणोद्धारे फलवैयर्थ्यानवस्थाने प्रस्तुत्य घोषाभावधारिणो अनवस्थाऽऽपत्तेरेति।

(५) प्रकृते मुख्यार्थबाधाभावं दर्शयति, न पुनरिति।—"शून्यं वासगृहम्..." इत्यादौ—शून्यं वासगृहमित्यत्रतत्रैये काव्योदाहरणत्वेन उदाहृतपूर्वे पदे इत्यर्थः, मुख्यस्य—वाच्यस्य, अर्थस्य, बाधः,—अनुपपत्तिः, पुनः न। तस्मात् यत्र प्रतीयमानस्य वाच्यतो व्यतिरिक्तस्य अर्थस्य बोधनाय न लक्षणाऽपि अङ्गीकर्तुं शक्या स्यात्। अतः प्रतीयमानोऽर्थः वाच्यद्वारा लक्ष्य इत्यभिधातुं शक्यः। मुख्यार्थबाधनरा लक्षणाया अपप्रवृत्तेरिति भावः। व्यङ्ग्यस्य लक्षणाबीज्यत्वाङ्गीकारे अनवस्थादोषमाह, यदि चेति।—यदि पुनरित्यर्थः, "गङ्गायां घोषः" इत्यादौ प्रयोजनं लक्ष्यं चेदिति।—प्रयोजनं—शीतत्वपावनत्वादिरूपः, लक्ष्यं—लक्षणाजन्यबोधविषयः, स्यात् ("तदा" इति अध्याहार्यं) तीरस्य मुख्यार्थत्वं—गङ्गाशब्दमुख्यार्थत्वं, बाधितत्वञ्च—बाधस्य स्यात्। अतश्च पावनत्वादिप्रत्ययेन लक्षणीयेन सम्बन्धस्यापि बोध्यम्। न च मुख्यार्थाभिमते तीरे लक्ष्यार्थाभिमतपावनत्वादिप्रत्ययस्य सम्बन्धस्यैव वर्थं तदाश्रितिरिति वाच्यं, तीरे तु लक्षणाद्वारे सम्बन्धस्य वाक्यार्थतयोपस्थितिविषयस्य प्रवाहवृत्तिपावनत्वादिप्रत्ययस्य सम्बन्धाभावात्, स्नात्ययवाहसम्बन्धित्वादिरूपपरम्परासम्बन्धस्यापि व्यावर्त्तकत्वेन लक्षणाहितुत्वाभावात्, तटादिनिष्ठपावनत्वादीनां गङ्गापदेनानुपस्थितेरविशिष्टत्वात्। दृष्टापत्त्याह, तस्यापीति।—तस्यापि—शीतत्वपावनत्वादिरूपस्य लक्ष्यनाथप्रयोजनस्यापि, लक्ष्यतया—[विशेषणे तृतीया] लक्ष्यनिष्ठत्वेन, प्रयोजनान्तरम्—अन्यत्प्रयोजनम् इति तथोक्तम्; [नयूरव्यंसकादित्वाद्वान्यत्वान्तरादेशः, प्रयोजनस्य च पूर्वनिपातः]। अनवस्थाऽऽपातः,—तथोक्तत्वात् लक्ष्यप्रयोजनानां न क्वाऽपि व्यवस्थेति भावः। अयं भावः;—गङ्गायां घोषः प्रतिवसतिः" इत्यत्र गङ्गाशब्दस्य तीरलक्षणात्मनिरूढलक्षणयावाधो मुख्यार्थः, तत्र घोषाधाधिकरणत्वासम्भवरूपबाधात्, तत्सम्बन्धतीरस्य लक्षणयोपस्थितिः, लक्षणाप्रयोजनस्य शीतत्वपावनत्वादिप्रत्ययस्य गङ्गादिशब्दाभिधया बोधयितुमशक्यतया व्यञ्जनयैव बोध इति गङ्गाशब्दस्य तीरं लक्ष्यं, तादृशपावनत्वादि व्यङ्ग्यम्। अत्र गङ्गायां, यदि चेत्या-

न चापि प्रयोजनविशिष्ट एव तीरे लक्षणा; विषयप्रयोजनयोर्युगपत्प्रतीत्यनभ्युपगमात्, नीलादिसंवेदनानन्तरमेव हि ज्ञाततायाः अनुव्यवसायस्य वा सम्भवः। (फ)

दिना।—तथाच, यदि गङ्गाशब्दस्य शीतत्वपावनत्वादिरूपप्रयोजनं लक्ष्यं स्यात्, तदा तीरस्य गङ्गाशब्दमुख्यार्थत्वं स्यात्, तथात्वे तु तत्र घोषवासाद्यधिकरणत्वासम्भवरूपबाधोऽपि स्यात्, मुख्यार्थबाधस्थले एव लक्षणास्वीकारात्। एवं लक्ष्यत्वाभिमतशीतत्वपावनत्वादेः मुख्यार्थाभिमततीरेण साक्षात्सम्बन्धोऽपि स्यात्, शक्यसम्बन्धे एव लक्षणास्वीकारात्। एवं शीतत्वपावनत्वादिरूपप्रयोजने लक्षणास्वीकारे तत्र प्रयोजनान्तरमपेक्षणीयं, यतः प्रयोजनादेव लक्षणा स्वीक्रियते। एवं तादृशप्रयोजनान्तरस्यापि लक्ष्यत्वापत्तिः तत्रापि प्रयोजनान्तरस्याप्यपेक्षेत्यनवस्थेति। इदमुक्तम्—अनवस्थाऽऽपाते निर्णयो न जायते, अत एवं न वक्तव्यम्। अस्तु वाऽनवस्थाया अपि स्वीकारः, किन्तु "भक्षितेऽपि लशुने न शान्तो व्याधिः" इतिवत् अनवस्थायामपि पूर्वपूर्वापेक्षया उत्तरोत्तरस्यैव व्यङ्ग्यत्वेनावशिष्यमाणत्वमापातत आपद्यते इति अनवस्थायाः प्रकृताप्रतिपत्तिकरत्वं दूषकताबीजं न निवारयितुं शक्यमिति भावः।

(फ) विशिष्टलक्षणावादिनां मतं दूषयति, न चापि इति।—प्रयोजनेन—पावनत्वाद्यतिशयेन विशिष्टे, तथा च "अतिपावने तीरे घोषः" इति लक्षणाजन्यो बोधः; तस्य च "गङ्गातटे घोषः" इत्यभिधाजन्यबोधादधिकार्थप्रतीतिः फलम्; एवञ्च फलफलिनोरभेद एव पर्य्यवसन्नः। इममेव दोषमाह, विषयप्रयोजनयोरिति।—विषयः,—कारणीभूतज्ञानं, प्रयोजनं—फलीभूतज्ञानं, तयोर्युगपत्—समकालिकी, या प्रतीतिः तस्याः अनभ्युपगमात्—अनङ्गीकारात्, एतदभ्युपगमे फलफलिनोरभेदापत्तिः; न हि कारणज्ञानं कार्य्यज्ञानञ्च समकाले सम्भवतीति भावः। फलफलिनोर्भेदमेव समर्थयति, नीलादीति।—नीलादीनां संवेदनानन्तरमेव—प्रत्यक्षात् परमेव, न तु पूर्वं, यद्वा प्रत्यक्षसमकाले इत्यर्थः, ज्ञाततायाः—प्रकटतायाः, मीमांसकमतानुयायिनां सङ्केतविशेषः इति यावत्, यथा नीलो ज्ञात इत्यादिरूपः, तस्याः, वा—यद्वा, अनुव्यवसायः,—नैयायिकमतानुयायिनां सङ्केतविशेषः, यथा,—नीले प्रत्यक्षे नीलमहं जानामीत्येवंरूपोऽर्थः, तस्य, ततश्च नीलादिप्रत्यक्षं कारणं, तदनन्तरं ज्ञातता वा अनुव्यवसायः तस्य फलं, तयोर्युगपद्यं न केऽप्यङ्गीकुर्वन्ति। प्रकृते तीरज्ञानात् परमेव शैत्यपावनत्वादिप्रतीतिः, न तु समकालिकीति फलितार्थः। एतदुपलक्षणम्। गङ्गापदात्प्रतीयमानस्य पावनत्वादेः तीरे वैशिष्ट्यासम्भवोऽपि द्रष्टव्यः। यदि पुनः दूरतीरा-

नानुमानं रसादीनां व्यङ्ग्यानां बोधनक्षमम्।
आभासत्वेन हेतूनां स्मृतिर्न च रसादिधीः॥२७३॥(ब)

व्यक्तिविवेककारेण हि—"याऽपि विभावादिभ्यो रसादीनां प्रतीतिः साऽनुमान एवान्तर्भवितुमर्हति। विभावानुभावव्यभिचारिप्रतीतिर्हि रसादिप्रतीतेः साधनमिष्यते। ते हि रत्यादीनां भावानां कारणकार्य्यसहकारिभूतास्ताननुमापयन्त एव रसादीन् निष्पादयन्ति। त एव हि प्रतीयमाना आस्वादपदवीं गताः सन्तो रसा उच्यन्ते, इत्यवश्यम्भावी तत्प्रतीतिक्रमः केवलमाशुभावितया असौ न लक्ष्यते, यतोऽयमद्याप्यभिव्यक्तिक्रमः" इति यदुक्तं तत्र प्रष्टव्यम्;—किं शब्दाभिनयसमर्पितविभावादिप्रत्ययानुमित-रामादिगत-रागादिज्ञानमेव रसत्वेनाभिमतं भवतः, तद्भावनया भावकैर्भाव्यमानः स्वप्रकाशानन्दो वा? आद्ये न विवादः; किन्तु "रामादिगत-रागादिज्ञानं रससंज्ञया नोच्यतेऽस्माभिः" इत्येव विशेषः। द्वितीयस्तु व्याप्तिग्रहणाभावाद्धेतोराभासतयाऽसिद्ध एव। यच्चोक्तं तेनैव,—"यत्र

पेक्षया समीपतीरे पावनत्वाद्यतिशयः सम्भवति, स एव गङ्गापदेन प्रत्याय्यते इति सम्भाव्यते, तदा नायं दोषः। अत एव "तीरस्य मुख्यार्थत्वं बाधितत्वञ्च स्यात्" इत्यत्र ग्रन्थकृता "पावनत्वाद्यतिशयेन लक्षणीयेन सम्बन्धश्च" इत्यापत्तिः काव्यप्रकाशोक्ताऽपि नोक्ता; तयोः सम्बन्धसत्त्वेनापत्त्ययोगादिति भावः।

(ब) नाट्ये रामत्वेनाहार्य्यज्ञानविषये नटे, काव्ये तु रामे एव विभावादिभिरत्याद्यनुमानं, ततः तदनुमानोद्बोधितया सामाजिकानां वासनारूपप्रत्यासत्त्या साक्षात्कृतो रामादिरत्यादि रसः, इति श्रीशङ्कुमतानुयायिनां मतं दूषयन् अनुमानप्रमाणलभ्यत्वं रसादेर्निराकरोति, नेति।—हेतूनां—कारणानाम्, आभासत्वेन—दुष्टत्वेन, व्यभिचरितत्वेनेत्यर्थः, अनुमानं—व्याप्तिपक्षधर्मताज्ञानं, रसादीनां व्यङ्ग्यानां—व्यञ्जनाजन्यबोधविषयाणां, न बोधने, क्षमं—समर्थम्; रसादिबुद्धेः संस्कारजन्यज्ञानत्वेन स्मृतित्वं साधयतां मतं दूषयति, स्मृतिरिति।—स्मृतिः,—संस्कारविशेषः, च, रसादीनां धीः,—ज्ञानसाधनं, न। अत्रापि प्रागुक्त एव हेतुर्बोध्यः।

यत्र एवंविधानां विभावानुभावसात्त्विकसञ्चारिणामभिधानमभिनयो वा, तत्र तत्र शृङ्गारादिरसाविर्भावः" इति। सुग्रहैव व्याप्तिः पक्षधर्मता च। (भ) तथा,—

(भ) कारिकयोक्तमेवार्थं विशदयितुं तत्र तावत् पूर्वपक्षमुपपाद्य दर्शयति, व्यक्तिविवेकेति।—व्यक्तिविवेककारेण—व्यक्तेः,—व्यञ्जनाया वृत्तेः, विवेकः,—"अनुमानेऽन्तर्भावं सकलस्यैव ध्वनेः प्रकाशयितुम्। व्यक्तिविवेकं कुरुते प्रणम्य महिमा परां वाचम्॥" इति तदुक्तदिशाऽनुमानेऽन्तर्भावाय विचारः, तं करोतीति तेन, महिमभट्टेनेत्यर्थः, हि—(निपातानामनेकार्थत्वात्) पुनः, "यदुक्तम्" इत्यग्रेणान्वितम्; या अपि विभावादिभ्यः,—विभावानुभावसञ्चारिसात्त्विकभावेभ्यः, तेषां सम्बन्धेभ्यः इति यावत्, रसादीनां—रसभावतदाभासादीनां, प्रतीतिः,—प्रतिभासः, पण्डितम्मन्यैः कैश्चित् वाच्यत्वलक्ष्यत्वानालिङ्गिततया स्वीक्रियमाणेति शेषः, सा—तथाविधा विभावादिसम्बन्धाद्रसादीनां प्रतीतिः, अनुमाने—अनुमितौ, व्याप्यस्य दर्शनेन व्यापकस्य निश्चयात्मिकायां बुद्धौ इति यावत्, एव (एवकारेण परानुमतव्यञ्जनाजन्यबोधव्यवच्छेदः)। अन्तर्भवितुम्—अभेदमवगाहितुम्, अर्हति—युज्यते। ननु कथमित्याशङ्क्य तत्कारणं निर्दिशति, विभावेति।—हि—यतः, ("हि हेताववधारणे" इत्यमरः) विभावानुभावव्यभिचारिणाम्—उपलक्षणेन स्थायिभावानां, सात्त्विकभावानाञ्चेत्यर्थः, प्रतीतिः,—प्रत्ययः, रसादिप्रतीतेः,—रसादीनाम् (आदिपदेन भावतदाभासादीनां ग्रहणम्) प्रतीतिः तस्याः साधनं,—"क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम्। विवक्ष्यते यदा यत्र करणं तत् तदा स्मृतम्॥" इत्युक्तं करणम्, इष्यते—अभिप्रेयते। ननु विभावादिप्रतीतेर्व्याप्तिज्ञानत्वाभावात् कथं तज्जन्यरसादिप्रतीतेरनुमितित्वम्? अतो विभावादीनां व्याप्यत्वमुपपादयति, ते हीति।—विभावादयो हीत्यर्थः, रत्यादीनां—रतिहासादीनां, भावानां—स्थायिभावानामित्यर्थः, कारणकार्य्यसहकारिभूताः,—"कारणान्यथ कार्य्याणि सहकारीणि यानि च। रसादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः॥ विभावा अनुभावास्तत् कथ्यन्ते व्यभिचारिणः। व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः॥" इत्युक्त्या कारणादिस्वरूपाः सन्तः, धूमादिकारणम् आर्द्रेन्धनादि यथा धूमादिव्याप्यं, वह्न्यादिकार्य्यं धूमादिवह्न्यादिव्याप्यं, तथा रत्यादेः कारणं विभावः, कार्य्यमनुभावश्च रत्यादिव्याप्य इति भावः। तान्—रत्यादीन्, अनुमापयन्तः,—स्वविषयकव्याप्तिपक्षधर्मताज्ञानेन बोधयन्तः, यथा "पर्वतो वह्निमान्, धूमात्" इत्यत्र वह्निव्याप्यधूमवान् पर्वत इति प्रतीतिः, तथा "शून्यं वासगृहम्" इत्यादि

यत् काव्यं तत् शृङ्गाररसवत्, तत्तद्विभावादिमत्त्वात्; इत्यनुमितौ शृङ्गाररसव्याप्य-विभावादिमत् काव्यमिति प्रतीतिर्भवेदिति भावः। रसादिप्रतीतिं प्रति विभावादीनां कारणत्वमुपपादयति, त इति।—त एव—विभावादय एव, प्रतीयमानाः,—प्रतिभास-मानाः, आस्वादपदवीं—रसनीयतापदं, गताः,—प्राप्ताः सन्तः, रसाः उच्यन्ते—रस-गङ्गाधरकारादिभिरभिधीयन्ते, तथा च,—पयो यथाऽम्लयोगेन दधित्वं प्राप्नुवत् दध्नः कारणमुच्यते, तथा विभावादयोऽपि अनुमीयमानरत्यादियोगेन रसादिरूपतां प्राप्नुवन्तो रसादेः कारणान्युच्यन्ते इति भावः। ननु एतादृशकार्य्यकारणभावस्वीकारे रसादेरसं-लक्ष्यक्रमव्यङ्ग्यत्वं कथमुपपन्नम्? अत आह, अवश्यम्भावीति।—अवश्यम्भावी—निश्चितं सम्भवी, तत्प्रतीतिक्रमः,—ताः,—विभावानुभावादिप्रतीति-व्याप्तिपक्षधर्मताग्रहरसा-द्यनुमित्यास्वादरूपाः, याः प्रतीतयः,—प्रत्ययाः, तासां क्रमः,—पौर्वापर्य्यम्; अन्यथा कथं "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः" इति सङ्गच्छेतेति भावः; केवलम् आशुभावितया—शीघ्रोत्पन्नत्वेन, असौ—क्रमः, न लक्ष्यते—नानुभूयते; तथा च, आसां शतपत्रव्यतिभेदवत् क्रमसत्त्वेऽपि सूक्ष्मकालतया स न लक्ष्यते इति भावः। ननु भवतामिदमधिकं कल्पनम्, अत आह, यत इति।—यतः, अयम्—ईदृशः, अद्यापि—रसादेर्व्यङ्ग्यत्वस्वीकारेऽपि, अभिव्यक्तिः,—व्यञ्जनाजन्यबोधः, तस्याः क्रमः। यथा भवतां बोधः प्रथमं विभावाद्युपस्थितिः, ततो रत्यादिव्यञ्जनं, ततः साधारण्याभिमानः, ततो रसाद्युत्पत्तिः इति क्रमसत्त्वेऽपि रसादेरसंलक्ष्यक्रमत्वमुपपन्नं, तथाऽस्माकमपीति भावः। तथोक्तं रसगङ्गाधरकारैः,—विभावा अनुभावाश्च तथा सञ्चारिणः क्रमात्। पक्षाः सपक्षाः कथिता विपक्षा रसबोधने॥ वस्तुनोऽलङ्कृतेर्वाऽपि व्यङ्ग्यत्वे तु मनीषिणः। वक्तृवाच्यादिधीवृत्तीः पक्षादीन् सम्प्रचक्षते॥" इति दिक्। इत्येवं रसगङ्गाधर-कारादिसिद्धान्तमनुसृत्य व्यक्तिविवेकं रचितवतो महिमभट्टाचार्य्यस्य मतमुपन्यस्य तत् खण्डयितुमुपक्रमते, तत्रेति।—तत्र—निरुक्तसिद्धान्तस्वीकारे, प्रष्टव्यं—जिज्ञास्यम्। तदेव निर्दिशति, किं शब्देति।—शब्दाभिनयेन—दृश्यश्रव्यरूपकाव्यद्वयाभिप्रायेण इत्यर्थः, समर्पितः,—उत्पादितः, यः विभावादीनां प्रत्ययः,—प्रतीतिः, तेन अनुमितः, रामादिगतः यः रागादिः,—सीताऽऽदिविषयकः प्रणयादिः, तस्य ज्ञानं—प्रतीतिः, एव, रसत्वेन—रसस्वरूपेण, भवतः,—तव, रसगङ्गाधरकारादिमतानुयायिनः महिम-भट्टाचार्य्यस्येत्यर्थः, अभिमतं—स्वीकृतम्, किमिति पूर्वतोऽन्वेति। तद्भावनया—तस्य भावनया, रामादिगतरागादिध्यानरूपेण विभावादिबोधेनेत्यर्थः, भावकैः,—सहृदयैः, भाव्यमानः,—आस्वाद्यमानः, स्वप्रकाशानन्दः,—स्वेन—आत्मना, प्रकाशो यस्य सः रसत्वेनाभिमतः इति शेषः, (अभिमतः इति लिङ्गव्यत्ययेनान्वयः)। व्याप्ति-

"याऽर्थान्तराभिव्यक्तौ वः सामग्र्यौष्टा निबन्धनम्।
सैवानुमितिपक्षे नो गमकत्वेन सम्मता॥" (म) इति।
इदमपि नो न विरुद्धम्। न हि एवंविधा प्रतीतिरास्वाद्यत्वेन अस्माकमभिमता; किन्तु स्वप्रकाशमात्रविश्रान्तः

यदभावादिति।—व्याप्तिपक्षधर्मताऽनुपपत्तेरित्यर्थः। असिद्धः,—नानुमितिविषयः; श्रोत्रियजरन्नीलांसकादीनां विभावादिप्रत्ययसत्त्वेऽपि स्वप्रकाशानन्दानुत्पत्तिदर्शनादयं हेतुर्व्यभिचारी, इति व्याप्तिपक्षधर्मताभावात् तस्यानुमानं न सम्भवतीति भावः। प्रकारान्तरेण व्याप्तिपक्षधर्मते साधयित्वा रसादेः अनुमानासिद्धत्वं साधयति, यद्यपीत्यादि।—तेनैव—व्याप्तिविवेचकारेणैव, एवंविधानां—तत्तद्व्यापारशालिनामित्यर्थः, विभावनादिव्यापारभागिनामिति भावः, अभिधानं—शब्दानुपस्थापनम्, अभिनयः,—नटचेष्टाऽऽदिभिरुपस्थापनम्। रसादिभावः,—रसाद्युत्पत्तिः। व्याप्तिरिति।—यत्र यत्र धूमस्तत्र वह्निरिति साध्यधर्मनियमः, साध्याभाववदवृत्तित्वमिति भावः, सुबद्धेव—विभावनादिव्यापारभागि विभावाद्युपस्थानं रसाद्याविर्भावव्याप्यमिति व्याप्तिपक्षः, श्रोत्रियादीनान्तु विभावादिरेवोपस्थितिः, न तु विभावनादिव्यापारभागिनः, तत्र तादृग्व्यापाराङ्गीकारादिति न व्यभिचारः। पक्षधर्मता—पक्षस्य—व्याप्यस्य, धूमादेरिति यावत्, पर्वतादिसत्त्वमिति भावः, सुबद्धेवेत्यन्वयः, "यद्यं रामाद्याविर्भावव्याप्यत्वाद्दृश्यभावाद्युपस्थानवान्" इति सामाजिकानां व्याप्तिविशिष्टपक्षधर्मताषट्कः। अत्र व्याप्तिः,—अव्यभिचारिहेतुत्वं, पक्षधर्मता—पक्षसत्ता, पर्वे विद्यमानत्वमित्यर्थः, यथा "पर्वतो वह्निमान्" इत्यत्र पक्षः पर्वतः, तत्र वह्नेः सत्ताऽस्ति, तथाऽत्र सामाजिकानाम् "यद्यं रामो सीताविषयकरतिमान्" इत्येवं प्रतीतौ भावनाजन्यायां "यद्यं रसवान्" इति प्रतीतिर्जायते, तत्सत्त्वे च रसिकजनः पक्षः रसस्य तत्सत्ताऽस्तीति भावः, इत्यवधेयम्।

(म) यैरिति।—अर्थान्तरस्य—भवन्मते व्यङ्ग्यस्य, वाच्यादिव्यतिरिक्तार्थस्येति यावत्, अभिव्यक्तौ—व्यञ्जनया प्रकटने, वः,—व्यञ्जनावृत्तिं स्वीकुर्वतां युष्माकं, या सामग्री—शब्दबोधादिरूपः कारणसमूहः, निबन्धनं—प्रधानम्, इष्टा—अभिलषिता, सैव—उक्तलक्षणैव सामग्री, अनुमितिपक्षे, तिष्ठतामिति शेषः, नः,—अस्माकम्, व्याप्तिविवेचकरसमङ्गाधरादिकारादीनामिति भावः, गमकत्वेन—रसाद्यनुमापकत्वेन सम्मता।

स्वाद्वानन्दनिर्भरः। तेन अत्र विषाधयिषितादर्थादर्थान्तरस्य साधनाद्धेतोराभासता। (य)

यच्च "भम धम्मिअ !" इत्यादौ प्रतीयमानं वस्तु (र)

"जलकेलितरलकरतलमुक्तपुनःपिहितराधिकावदनः।
जगदवतु कोकयुनोर्विघटनसङ्घटनकौतुकी कृष्णः॥" (ल)

इत्यादौ च रूपकालङ्कारादयोऽनुमेया एव। (व) तथाहि,—

(य) दूषयति, इदमिति।—इदमपि—एवंरूपमपि अनुमानं, नः,—व्यञ्जनावादिनाम्, आर्द्धं न विरुद्धं—न विपरीतम्, अस्माभिरपि तादृशमनुमानं स्वीक्रियते एवेति भावः। ननु किमधिकं भवान् ब्रवीतीत्यत आह, न त्विति।—न तु इत्यर्थः। स्वप्रकाशनाविश्रान्तः,—स्वप्रकाशनमात्रेण—स्वरूपेण प्रकाशनमात्रेणैव, विश्रान्तः,—विषयीकृतः; सान्द्रश्च—निरन्तरश्च, आनन्दश्च निर्भरः,—अतिशयः, आस्वादलेनास्वादनमित्यर्थः। तेन—तादृशानुमितेरास्वादलक्षीकारेण, विषाधयिषितात्—साधयितुमिष्टात्, अर्थात्—स्वप्रकाशानन्दरूपात्, अर्थान्तरस्य—भिन्नार्थस्य, रसाद्यविर्भावस्य इति भावः, साधनात्—अनुमापनात्, हेतोः, आभासता—दुष्टहेतुत्वमित्यर्थः। अनुमितौ तु येन हेतुना यत् कार्यं साध्यते, तदेव कार्यमवश्यम्भावि, यदि तेन हेतुना अभिप्रेतकार्यं साध्यते, तदेव तस्य हेतोराभासत्वं, नियतहेतुका ह्यनुमितिरिति बोध्यम्।

(र) इदानीं वस्त्वलङ्कारयोरपि अनुमानेनैव बोधः, न तु तदर्थमपि व्यञ्जनावृत्तिः स्वीकार्येति पुनरपि व्यक्तिविवेकाकारस्यैव मतान्तरं दूषयितुमुल्लापयति, यच्चेति।—इदञ्च "पर्य्यवस्यति" इत्यत्रेनान्वेति। प्रतीयमानं वस्तु—अधमरूपमनुमेयं यस्मात् विवक्षीयत।

(ल) जलेति।—जलकेली—वारिविहारे, तरलाभ्यां—चञ्चलाभ्यां, करतलाभ्यां, मुक्तं—त्यक्तं, पुनः पिहितम्—आच्छादितं, राधिकायाः वदनं येन तादृशः, अत एव कोकयुनोः,—कोकी च कोकश्चेति कोकौ, युवती च युवा चेति युवानौ, कोकौ एव युवानौ तयोक्तकोकयोः, चक्रवाकदम्पत्योरित्यर्थः, विघटनसङ्घटने—विश्लेषसंयोगौ, तयोः कौतुकी—कुतूहलवान्, कृष्णः जगत्, अवतु—रक्षतु।

(व) अत्र राधिकावदने मुक्ते सति तस्य चन्द्रबुद्ध्या रात्रिज्ञानेन तयोः विघटनं, पिहिते सति चन्द्रानुपलब्ध्या रात्र्यभावज्ञानेन तयोः सङ्घटनम्। तयोर्ज्ञात्या मुक्तविश्लेषसंयोगदर्शनेन कृष्णस्य कौतुकमिति भावः। राधिकावदने चन्द्रत्वारोपेण

अनुमानं नाम पक्षसत्त्वसपक्षसत्त्वविपक्षव्यावृत्तत्वविशिष्टा-ल्लिङ्गाल्लिङ्गिनो ज्ञानम्। (श) ततश्च वाच्यादसम्बद्धोऽर्थस्तावन्न प्रतीयते; अन्यथाऽतिप्रसङ्गः स्यादिति बोध्यबोधकयोरर्थयोः कश्चित् सम्बन्धोऽस्त्येव। ततश्च बोधकोऽर्थो लिङ्गं, बोध्यश्च लिङ्गी, बोधकस्य चार्थस्य पक्षसत्त्वं निबद्धमेव। सपक्षसत्त्व-विपक्षव्यावृत्तत्वे अनिबद्धेऽपि सामर्थ्यादवसेये। तस्मादत्र यद् वाच्यार्थाल्लिङ्गरूपाल्लिङ्गिनो व्यङ्ग्यार्थस्यावगमस्तदनुमान एव पर्य्यवस्यतीति (ष) तन्न। तथाहि अत्र "भम धम्मिअ!"

रूपकालङ्कारः। अनुमेया एव—"वाच्यस्तदनुमितो वा यत्रार्थोऽर्थान्तरं प्रकाशयति। सम्बन्धतः कुतश्चित् सा काव्यानुमितिरित्युक्ता॥" इत्यादिव्यक्तिविवेककारोक्त्याऽनुमिति विषया एव, न तु व्यङ्ग्याः इति भावः॥

(श) अनुमानत्वमुपपादयति, तथा हीति।—अनुमानलक्षणमाह, अनुमान-मिति।—सन्दिग्धसाध्यकः सिषाधयिषाविरहविशिष्टसिद्ध्यभाववान् वा पक्षः, पक्ष-सत्त्वं यथा,—वह्निसाध्यकधूमहेतौ साध्यसन्देहसत्त्वेन पर्वतः पक्षः, तत्र सत्त्वं—वर्त्त-मानत्वं, लिङ्गस्य धूमस्य। सपक्षसत्त्वं—सपक्षः,—निश्चितसाध्यवान्, यथा तादृशस्थले महानसं तत्र सत्त्वं धूमस्य। विपक्षव्यावृत्तत्वं—विपक्षः साध्याभाववान्, यथा,—तादृशस्थले ह्रदः, तद्व्यावृत्तत्वं—तस्मिन् अवर्त्तमानत्वं धूमस्य। इयं व्याप्तिः। तादृश-पक्षसत्त्वादिविशिष्टात् लिङ्गात्—साधनात्, लिङ्गिनः,—साध्यस्य, ज्ञानं—प्रतीतिः, अनुमानम्। पर्वते धूमदर्शनानन्तरं "पर्वतो वह्निमान्, धूमवत्त्वात्, यत्र यत्र धूमस्तत्र तत्र वह्निः, यथा महानसम्" इत्यादिका धूमस्य वह्न्यभाववदवृत्तित्वरूपव्याप्तिज्ञानान-न्तरं वह्निव्याप्यधूमवानिति परामर्शात् पर्वते वह्न्यनुमितिरिति बोध्यम्।

(ष) वाच्यात्तावत् व्यङ्ग्यं प्रतीयते, इति वाच्यार्थस्य लिङ्गत्वमभिप्रेत्य तत्र पक्ष-सत्त्वादित्रयमुपपादयति, ततश्चेति।—वाच्यात्—अभिधेयात्, असम्बद्धः,—सम्बन्ध-वर्जितः। अन्यथा—असम्बद्धप्रतीतिस्वीकारे, अतिप्रसङ्गः,—अतिप्राप्तिः, अलक्ष्ये लक्षणगमनरूप इत्यर्थः; यथा "भम धम्मिअ!" इत्यत्र भ्रमणाभावः प्रतीयते, तथा घटाभावोऽपि प्रतीयते। इति—इति हेतोः "भम धम्मिअ!" इत्यत्र बोध्यबोधकयो-रर्थयोर्वैपरीत्यलक्षणः सम्बन्धो बोध्यः, स एव व्यापकताघटक इति भावः। ततश्च—बोध्यबोधकयोर्वैपरीत्यरूपसम्बन्धसत्त्वाच्च, तत्र पक्षसत्त्वादिज्ञानस्यैवोपयोगित्वात्;

इत्यादौ गृहे श्वनिहत्या विहितं भ्रमणं गोदावरीतीरे सिंहोपलब्धेरभ्रमणमनुमापयतीति यदुक्तव्यं तत्र अनैकान्तिको हेतुः, भीरोरपि गुरोः प्रभोर्वा निदेशेन प्रियानुरागेण च गमनस्य सम्भवात्। पुंसत्या वचनं प्रामाणिकं न वेति सन्दिग्धासिद्धश्च। "जलकेलि" इत्यत्र "य आत्मदर्शनादर्शनाभ्यां चक्रवाकविघटनसङ्घटनकारी स चन्द्र एव" इत्यनुमितिरेवेयमिति न वाच्यम्, उन्मासकादावनैकान्तिकत्वात्। "एवंविधोऽर्थ एवंविधार्थबोधक एवंविधार्थत्वात्, यन्नैवं तन्नैवम्" इत्यनुमानेऽपि आभाससमानयोगक्षेमो हेतुः। "एवंविधार्थत्वात्" इति हेतुना एवंविधानिष्टार्थसाधनस्याप्युपपत्तेः। (स)

तदुपपादयति, बोधकस्येति।—अर्थस्य—वाच्यार्थस्य, पक्षसत्त्वं—पक्षे—शब्दे, सत्त्वं—वर्त्तमानत्वं, निबद्धं—शब्देनोपस्थितम्, एव। सामर्थ्यात्—संस्कारवशात्, अवसेये—प्रत्येतव्ये। एतत्सदृशः पक्षः,—सपक्षः,एतद्विपरीतस्तु विपक्ष इति भावः। महावाक्यार्थं निरूपयति, तत्रादिति।—वाच्यार्थात्—अभिधेयार्थात्, लिङ्गरूपात्—साधनरूपात्, लिङ्गिनः,—साध्यरूपस्य व्यङ्ग्यस्य, अवगमः,—प्रतीतिः। ततश्च "भ्रम धन्मिल्ल!" इत्यादौ श्वनिहत्या विहितं भ्रमणं भ्रमणरूपवाच्यार्थः वैपरीत्यसम्बन्धेन गोदावरीतीरे सिंहोपलब्धेर्भ्रमणशब्दे भ्रमणार्थवत्त्वमनुमापयतीति भावः।

(स) दूषयति, तन्नेति।—गृहे—गृहसमीपे अत्वरादौ, श्वनिहत्या—कुक्कुरमरणप्रदर्शनेन, विहितं—विधिविषयः, "भ्रमणभ्रमनुमापयति" इत्यनेनान्वितम्। अत्र श्वनिहत्तिविधीयमानगृहसमीपभ्रमणं लिङ्गं, तच्च भीरुत्वपर्य्यवसन्नम्। सिंहवल्लीदावरीतीराभ्रमणं साध्यं, प्राणिकः पक्षः, सामानिकोऽनुमाता। अनैकान्तिकः,—व्यभिचारीत्यर्थः। भीरोरपीति।—अनेन निरुक्तलिङ्गवैशिष्ट्यञ्च सूचनम्। गमनस्य सम्भवादिति।—अत्र भ्रमणानुमापकलिङ्गसत्त्वेन साध्याभावसत्त्वप्रदर्शनसन्दिग्धासिद्धमिति भावः। इतीर्दोषान्तरमाह, पुंसत्या इति। कुक्कटायाः इत्यर्थः, प्रामाणिकं—प्रमाजनकम्; तथा च इदं वाक्यं प्राणिकस्य भयोत्पादकं, यदा कुक्कुरस्पर्शशङ्कासङ्कुचितभ्रमणस्य तस्य स्वच्छन्दभ्रमणविधायकम्, इति सामानिकानां सन्देहात् भीरुत्वसन्देह इति हेतोः सन्दिग्धत्वेन असिद्धत्वमिति भावः। अनुमितौ असन्दिग्धो हेतुरावश्यकः; अत्र तु न तथा, इति हेतोः सन्दिग्धत्वात् न अनानुमानमिति भावः।

तथा यत् "दृष्टिं हे प्रतिवेशिनि! क्षणमिहाप्यस्मद्गृहे दास्यसि—" इत्यादौ नलग्रन्थीनां तनूलेखनम्, एकाकितया च स्रोतोगमनं, तस्याः परकामुकोपभोगस्य लिङ्गिनो लिङ्गमित्युच्यते; तच्च तत्रैवाभिहितेन स्वकान्तस्नेहेनापि सम्भवतीति अनैकान्तिको हेतुः। (ङ)

रूपकालङ्कारानुमानं दूषयति, जलकेलीति।—उत्त्रासकादाविति।—उत्त्रासकः,—भयप्रदः। [आदिना वियोगकारणरात्रिसाधर्म्यान्तरस्यापि ग्रहणम्]। यदि कश्चित् भयं प्रदर्शयति, तदाऽपि वियोगस्य सम्भव इति चन्द्रोदयाभावेऽपि कारणान्तरेण वियोगदर्शनात् कारणान्तरे तादृशविघटनकारित्वरूपहेतोः सत्त्वेन तत्र तादात्म्येन चन्द्ररूपसाध्याभावसत्त्वाद् व्यभिचारः। तादात्म्यसम्बन्धेन साध्यस्य चन्द्रस्य वदने बाधात्; बाधोऽपि अत्र हेतुदोषः बोध्यः इति भावः। अनुमानञ्च कदाचित् व्यभिचारभयात् पक्षमात्रवृत्तिहेतुना अपि सम्भवति, इति तेनैव इष्टसिद्धिं कुर्वतोऽस्य मतं दूषयति,—एवमिति। आभाससमानेति। आभासस्य—व्यभिचारादिरूपहेतुदोषस्य, समानो योगक्षेमः,—कार्य्यसाधकः हेतुः; दुष्टहेतुप्रयोगेण यथा वादिविजयो भवति, तथाऽर्थान्तरसाधकहेतुप्रयोगेणापीत्याभासतुल्ययोगक्षेमत्वमिति भावः। तथा च एवंविधः,—"गतोऽस्तमर्कः" इत्यादिरूपः, एवंविधार्थानां—"गावो निरुध्यन्ताम्" इत्यादिरूपाणां, बोधकः, एवंविधार्थत्वात्—एवंविधार्थबोधाय प्रयुक्तत्वादित्यर्थः। हेतोः पक्षमात्रवृत्तित्वेनान्वयदृष्टान्तासम्भवात् अन्वयव्याप्तिग्रहो न सम्भवति इति व्याप्तिग्रहाय व्यतिरेकोदाहरणमाह, यन्नैवमिति।—यत्—वस्तु, नैवं—न एवम्प्रकारम्, एवंविधार्थबोधकत्वाभाववदित्यर्थः, तत्—वस्तु, नैवम्—एवंविधार्थत्वाभाववदित्यर्थः। "देवदत्तो भवतीति वाक्यार्थवत्" इति दृष्टान्तोऽत्र द्रष्टव्यः इति। आभाससमानयोगक्षेमत्वमेवोपपादयति, एवंविधार्थत्वादिति।—एवंविधार्थत्वादिति हेतुः एवंविधानिष्टार्थस्यापि साधकत्वसम्भवादित्यर्थः, तथात्वे पक्षमात्रवृत्त्यनुमानेऽपि हेतोर्दुष्टत्वमिति अनुमानं पक्षमात्रवृत्त्यादिदुष्टे हेतौ नैव सम्भवतीति भावः। यथा दुष्टहेतुप्रयोगेण वादिविजयो भवति, तथाऽर्थान्तरसाधकहेतुप्रयोगेणापि, इत्याभासतुल्ययोगक्षेमत्वमिति हृदयम्।

(ङ) अत्रापि व्यभिचारमाह, तथेति।—एकाकितया चेति।—अत्र चकारो वाऽर्थः। स्रोतोगमनं वेत्यर्थः। लिङ्गं—तादात्म्येन साधनं, तच्च—प्रागुक्तमर्थद्वयञ्च, तत्रैव—"दृष्टिम्" इत्यादि श्लोके एव, अभिहितेन—द्वितीयपादप्रतिपादितेन; तथा च यत्र स्नेहस्य किं दुष्करम् इति जानतां सर्वेषामेव श्रोतॄणां तादृशबोधो न

यच्च "निःशेषच्युतचन्दनम्" इत्यादौ दूत्यास्तत्कामुकोपभोगोऽनुमीयते तत् किं प्रतिपाद्यया दूत्या, तत्कालसन्निहितैर्वाऽन्यैः, तत्काव्यार्थभावनया वा सहृदयैः? आद्ययोर्न विवादः। तृतीये तु तथाविधाभिप्रायविरहस्थले व्यभिचारः। (क)

ननु वक्त्राद्यवस्थासहकृतत्वेन विशेष्यो हेतुरिति न वाच्यम्, एवंविधव्याप्त्यनुसन्धानस्याभावात्। (ख)

किञ्च एवंविधानां काव्यानां कविप्रतिभामात्रजन्मनां प्रामाण्यानावश्यकत्वेन सन्दिग्धासिद्धत्वं हेतोः। व्यक्तिवादिना चाधम-

---

जायते, तत्रैव तादृशार्थद्वयबोधकत्वाभावाद् व्यभिचार इति भावः। यदि तु कालान्तरे तादृग्वाक्यप्रयोगेण यस्य कस्यापि श्रोतुः तादृशार्थबोधाद् व्यभिचारो न भवति, इति विभाव्यते, तदाऽत्र "तद्वाक्यप्रतिपाद्यं तादृशार्थद्वयं परकामुकोपभोगप्रतिपादकं तादृशार्थत्वात्" इत्यनुमाने बाधरूपहेतुदोषो द्रष्टव्यः। यथा—"गन्धप्रागभावकालीनो घटो गन्धवान्" इत्यादौ तत्कालीनघटे साध्याभावमादाय बाधः, तथाऽत्रापि व्यक्तिविशेषे कालविशेषे वा एवंविधार्थबोधकत्वरूपसाध्याभावमादाय बाधो बोध्यः।

(क) तत्कामुकेति।—नायिकाकामुकेत्यर्थः। अनुमीयते इति।—चन्दनच्यवनादिरत्र हेतुः, तत्कालसन्निहितैः,—तादृशकथनसमये नायिकासन्निधानवृत्तिभिः, काव्यार्थभावनयेति—[विशेषणे तृतीया]। न विवाद इति।—चन्दनच्यवनादीनां स्नानादिनाऽपि सम्भवात्। सम्भोगव्यभिचारित्वेऽपि तेषां दूतीतत्कालसन्निहितयोः प्रत्यक्षतो वैलक्षण्यसहस्रग्रहसम्भवेन व्यभिचारज्ञानानुदयात् व्याप्तिग्रहः सम्भवतीति भावः। ननु सामाजिकानामपि निःशेषादिपदाभिप्रायेणैव वैलक्षण्यग्रहो भविष्यतीत्यत आह, तथाविधेति।—निशेषादिपदानां सम्भोगजन्यत्वबोधाभिप्रायविरहस्थल इत्यर्थः।

(ख) यदि सामान्यतश्चन्दनच्यवनादेः हेत्वाभासेन अनुमितिर्न सम्भवति, तदाऽत्र विशिष्टतादृशहेतुर्वाच्य इति मतं दूषयति, नन्विति।—वक्त्रादीत्यादि।—[तद्गुणसंविज्ञानबहुव्रीहिणा प्रतिपाद्यदूतीपरिग्रहः]। अवस्था—कामुकत्वादिवैशिष्ट्यं, तत्सहकृतचन्दनच्यवनादिहेतुर्बोध्यः। एवंविधेति।—एवंविधा या व्याप्तिः तस्याः अनुसन्धानस्य अभावात्—शब्देनानुपस्थानात्, तथाच प्रतिपाद्यावस्थासहकृतत्वस्य शब्देनानुपस्थितेः प्रमाणान्तरस्य च असद्भावात्कथं तादृशविशिष्टहेत्वन्तर्भावेण व्याप्तिग्रहसम्भव इति भावः।

पदसहायानामेवैषां पदार्थानां व्यञ्जकत्वमुक्तं, तेन च तत्कान्तस्याधमत्वं प्रामाणिकं न वेति कथमनुमानम् ? (ग)

एतेनार्थापत्तिवेद्यत्वमपि व्यङ्ग्यानामपास्तम्। अर्थापत्तेरपि पूर्वसिद्धव्याप्तीच्छामुपजीव्यैव प्रवृत्तेः। यथा,—"यो जीवति स कुत्राप्यवतिष्ठते, जीवति चात्र गोष्ठ्यामविद्यमानश्चैत्रः", इत्यादि। (घ)

किञ्च वस्त्रक्रयादौ तर्ज्जनीतोलनेन दशसङ्ख्याऽऽदिवत् सूचनबुद्धिवेद्योऽप्ययं न भवति; सूचनबुद्धेरपि सङ्केतादिलौकिकप्रमाणसापेक्षत्वेनानुमानप्रकारताऽङ्गीकारात्। (ङ)

(ग) किञ्चेति।—कविप्रतिभामात्रजन्मनां—कवीनां प्रतिभा—बुद्धिनैर्मल्यं, तन्मात्रेण जन्म—उत्पत्तिर्येषां तादृशानां, प्रामाण्यस्य—याथातथ्यरूपानुसन्धानस्य, अनावश्यकत्वेन हेतोः सन्दिग्धासिद्धत्वं—किमियं परपुरुषार्थिनी स्रोतसि जलाहरणार्थं गता, उत स्वकान्तस्नेहेन ? इति सन्देहः, तेन हेतोर्न प्रामाण्यं, तत् कथमत्रानुमानं सम्भवतीति भावः। एषां पदार्थानां—"निःशेषच्युतचन्दनम्" इत्यादीनामित्यर्थः, व्यञ्जकत्वं—व्यङ्ग्यबोधकत्वम्। प्रामाणिकं—प्रमाणानुगतं, तथ्यमित्यर्थः।

(घ) एतेन—हेतोराभासत्वेन इत्यर्थः। पूर्वेति।—पूर्वं सिद्धा—निर्णीता इत्यर्थः, या व्याप्तिः तस्याः इच्छां—ज्ञानमित्यर्थः, उपजीव्य—अवलम्ब्य इत्यर्थः, अर्थस्य—अपरार्थस्य, आपत्तिः,—आक्षेपः, अर्थापत्तिः, यथा "जीवति" इति,—यतो जीवति, अतः कुत्रापि—गोष्ठीभिन्नेऽपि स्थाने, अवतिष्ठते इति अर्थापत्त्या प्रतीयते। अत्र "जीवति" इति व्याप्तिग्राहकमित्यवधेयम्। अत्र जीवित्वस्य यत्किञ्चिदधिकरणावस्थानव्याप्यत्वज्ञानमपेक्षणीयमिति व्याप्तिग्रहप्रदर्शनपुरःसरमर्थापत्तिप्रदर्शनमिदम्। "जीवति च" इत्यादिकमर्थापत्तिदर्शनम्। जैमिन्यनुमताऽर्थापत्तिः दृष्टश्रुतधर्माभ्यां द्विप्रकारा; तत्र दृष्टाऽर्थापत्तिः,—एकत्र अधिकरणे यद्भाव उपलब्धः, अपरत्रापि तद्भावः अङ्गीक्रियते एव। श्रुतार्थापत्तिः यथा,—"पीनो देवदत्तो दिवा न भुङ्क्ते" अतोऽवगम्यते रात्रौ भुङ्क्ते इति।

(ङ) किञ्चेति।—तर्जनीतोलनेन—तर्जन्या उत्क्षेपेण, सूचनबुद्धिवेद्यः,—सूचनं सङ्केतः, तद्विषयिणी या बुद्धिः तद्वेद्यः, अयं—व्यङ्ग्यरूपोऽर्थ इत्यर्थः, सूचनबुद्धेरपि सङ्केतादि लौकिकप्रमाणसापेक्षत्वेन—सहचारग्रहजन्यत्वेन; अयं भावः,—यदि

यच्च "संस्कारजन्यत्वाद्रसादिबुद्धिः स्मृतिः" इति केचित्, तत्रापि प्रत्यभिज्ञायामनैकान्तिकतया हेतोराभासता। (च)

"दुर्गालङ्घित" इत्यादौ च "द्वितीयार्थो नास्त्येव" इति यदुक्तं महिमभट्टेन, तदनुभवसिद्धिमपलपतो गजनिमीलिकैव। (छ)

तदेवमनुभवसिद्धस्य तत्तत् रसादिलक्षणार्थस्याशक्यापलापतया तत्तत् शब्दाद्यन्वयव्यतिरेकानुविधायितया च अनुमानादिप्रमाणावेद्यतया च अभिधादिवृत्तित्रयाबोध्यतया च तुरीया वृत्तिरुपास्यैवेति सिद्धम्। इयञ्च व्याप्त्याद्यनुसन्धानं विनाऽपि भवतीत्यखिलं निर्मलम्। (ज)

कश्चित् पूर्वं व्यवहारार्थं व्यवहारिकेण सह साधारणजनगोपनार्थम् एवं व्यवस्थापयति, यत् मम तर्जनीतोलने युष्माभिर्दशसंख्या बोद्धव्येति, तदा तत्सूचनेन तस्य व्यवहारः सिध्यति ; तत्र च सूचने प्रामाण्यस्य सद्भावेन, अनुमानप्रकारताऽङ्गीकारात्—व्याप्तिज्ञानविशेषत्वस्वीकारात् इति, सा सूचनबुद्धिरनुमानविशेष एवेति भावः। प्रकृते वक्तुरुक्तिवैचित्र्यविशेष एव सङ्केतः, तेन व्यङ्ग्यार्थप्रतीतिर्व्याप्तिग्रहेणैव भवतीति कथं व्यञ्जनास्वीकारः ? इत्यापत्तिरपि न भवति। वक्तुरुक्तिविशेषवैचित्र्यसत्त्वेऽपि सर्वेषामेव श्रोतॄणामनभिज्ञतया व्यङ्ग्यार्थानवबोधस्थले व्यभिचारदर्शनादिति बोध्यम्।

(च) "स्मृतिर्न वा" इति कारिकास्थं विवृणोति, यच्चेति।—संस्कारजन्यत्वात्,—संस्कारजन्यज्ञानत्वादित्यर्थः, अन्यथा संस्कारादौ संस्कारध्वंसादौ तज्जन्यत्वस्य सत्त्वात् व्यभिचारस्यात्यन्तस्फुटत्वापत्तेः। प्रत्यभिज्ञायां—सोऽयमित्याकारकप्रतीतौ, अनैकान्तिकतया—साध्यं विना विद्यमानतया, हेतोः,—संस्कारजन्यज्ञानत्वरूपस्य, आभासता—व्यभिचारिता, दुष्टता इत्यर्थः। एतच्च साधनं रसप्रतीतिकारणीभूतवासनायाः संस्कारविशेषत्ववादिमते। अतिरिक्तत्ववादिमते तु हेतोः पक्षावृत्तित्वेन स्वरूपासिद्धिरपि दोषः, न तु व्यभिचारमात्रम्। ये तु प्रत्यभिज्ञायाः स्मृतित्वापत्तिभयेन स्मृतिजन्यत्वमेव मन्यन्ते, न तु संस्कारजन्यत्वं, तन्मते व्यभिचारो न भवतीत्यवधेयम्।

(छ) अभिधामूलव्यञ्जनामनङ्गीकुर्वतो मतं दूषयति, दुर्गेत्यादि।—द्वितीयार्थः,—अप्राकरणिकार्थबोधः, अपलपतः,—निह्नुवानस्य, महिमभट्टस्य इत्यर्थः, गजनिमीलिका—हस्तिवत् मूर्खता इति भावः।

(ज) उपसंहरति, तदेवमिति।—तत्तद्रसादिलक्षणार्थस्य—तत्तद्रसादि-

तत् किंनामिकेयं वृत्तिः ? इत्युच्यते—

सा चेयं व्यञ्जना नाम वृत्तिरित्युच्यते बुधैः।
रसव्यक्तौ पुनर्वृत्तिं रसनाख्यां परे विदुः ॥२७४॥ (झ)

एतच्च विविच्योक्तं रसनिरूपणप्रस्ताव इति सर्वमवदातम्। (ञ)

इति श्रीनरसिंहराजकविविरचिते साहित्यार्णवसर्वस्वाभिधानसाहित्यशास्त्रविवरणे
कविसूक्तिरत्नाकरोद्भासिभावाविर्भावतिरोभावसान्धिविग्रहिकनिदर्शनोपपादन-
श्रीविश्वनाथकविराजकृतौ साहित्यदर्पणे व्यञ्जनाव्यापारस्थापनं
नाम षष्ठः परिच्छेदः ॥ ६ ॥

अदुष्टार्थत्वं,["विरुद्धत्वार्थत्वं" इति पाठे—तत्तटस्थादिदूषणं,वाच्यादिविरुद्धत्वमित्यर्थः] अनुमानादीत्यादिपदेन अर्थापत्त्यादेर्ग्रहणम्। अभिधादीत्यादिपदेन लक्षणातात्पर्ययोर्ग्रहणम्।

(झ) सा चेयमिति।—रसव्यक्तौ—रसप्रकटने इत्यर्थः, वृत्तिं—व्यापारं, परे—अन्ये विद्वांसः, नैयायिका: इति यावत्, न त्वालङ्कारिकाः; तेषामयमाशयः,—"वस्त्वलङ्कारपरार्थे व्यञ्जनावृत्तिरवश्यं स्वीकार्या, तयैव रसादेरपि सम्भवेऽस्तु। तदर्थमतिरिक्तरसनाऽऽख्यवृत्तिस्वीकारेष्वासम्" इति। न च व्यञ्जनाजन्यबोधस्यास्वादरूपत्वं नास्ति, रसनाख्यव्यापारजन्यबोधस्य तु तदूपत्वमिति वाच्यम्, एतादृशनियमस्य प्रयोजनविरहेण अयोगात्। व्यञ्जनया वस्त्वलङ्कारयोरर्थावगतिः, रसनया तु रसादिरूपार्थावगतिरिति परमतम्; अन्यत्तु सामान्येन व्यञ्जनयैव सर्वव्यङ्ग्यार्थावगम इति बोध्यम्।

(ञ) एतत्—रसनाख्यवृत्तिस्वरूपम्। अवदातम्—अविरुद्धम्।

कुलश्रीमाच्चाटवीसारपत्तनम-पण्डितकुलपतिना वि, ए, उपाधिधारिणा
श्रीनरसीवानन्दविद्यासागरभट्टाचार्येण विरचितायां, तदात्मजाभ्यां
वङ्गितश्रीबाबुबोधविद्याभूषण-पण्डितश्रीनित्यबोधविद्यारत्नाभ्यां
प्रतिसंस्कृतायां विमलाख्यायां साहित्यदर्पणव्याख्यायां
षष्ठः परिच्छेदः ॥ ६ ॥

षष्ठः परिच्छेदः ।

एवं ध्वनिगुणीभूतव्यङ्ग्यत्वेन काव्यस्य भेदद्वयमुक्त्वा पुनर्दृश्यश्रव्यत्वेन भेदद्वयमाह, (क)—

दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम् ।
दृश्यं तत्राभिनेयम् ॥ २७५ ॥ (ख)

तस्य रूपकसंज्ञाहेतुमाह,—

तद्रूपारोपात्तु रूपकम् ॥ २७६ ॥ (ग)

तत्—दृश्यं काव्यं, नटे रामादिस्वरूपारोपाद्रूपकमित्युच्यते। (घ)

(क) अथ ग्रन्थसङ्गतिं दर्शयन् प्रकरणान्तरमारभमाणः तत्र प्रतिपाद्यं दर्शयितुं प्रतिजानीते, एवमित्यादिना।—एवं—निदर्शितप्रकारेणेत्यर्थः, ध्वनिश्च गुणीभूतव्यङ्ग्यं चेत्येतयोर्भावस्तत्त्वं तेन, ध्वनिरूपत्वेन गुणीभूतव्यङ्ग्यत्वेन चेत्यर्थः। ध्वन्यते—प्राधान्येन व्यज्यतेऽर्थो यत्रासौ ध्वनिः; गुणीभूतं व्यङ्ग्यं यत्र तद्गुणीभूतव्यङ्ग्यम्। काव्यस्य भेदद्वयम् उक्त्वा, पुनः तस्यैव ध्वनिकाव्यस्य गुणीभूतव्यङ्ग्यस्य वा काव्यस्य दृश्यत्वेन श्रव्यत्वेन चेत्येवं कृत्वेति भावः, भेदद्वयम् आह।

(ख) दृश्येति।—अभिनीयते इति अभिनेयं, [कर्म्मणि यत्प्रत्ययः] नटाद्यभिनीयमानं नायकादिचरितमित्यर्थः।

(ग) तदिति।—तत्—दृश्यं काव्यन्तु, रूपस्य—अभिनेयस्य, नायकादिस्वरूपस्य इत्यर्थः, आरोपः,—आरोपणं, तस्मात्—तं हेतुं निमित्तीकृत्येत्यर्थः, रूपकमित्युच्यते। तथोक्तं दशरूपके,—"रूपकं तत्समारोपात्" इति। "नटे रामाद्यवस्थाऽऽरोपेण वर्त्तमानत्वाद्रूपकं, मुखचन्द्रादिवत्; इत्येकस्मिन्नर्थे प्रवर्त्तमानस्य शब्दत्रयस्य 'इन्द्रः पुरन्दरः शक्रः' इतिवत् प्रवृत्तिनिमित्तभेदो दर्शितः" इति च तद्व्याख्याकारैः। "यथा मुखादौ पद्मादेरारोपो रूपकं भवेत्। तथैव नायकारोपो नटे रूपकमुच्यते॥" इति भावः।

(घ) तदेव स्पष्टयति, तदित्यादिना।—तत् दृश्यं काव्यं, न तु श्रव्यमित्यर्थः, नटे—अभिनेतरि, रामादेः,—अभिनेयस्य नायकादेरिति भावः, स्वरूपं—देशकालावस्थाऽनुरूपत्वं, तस्यारोपात् रूपकमित्युच्यते।

कोऽसावभिनय इत्याह,—

भवेदभिनयोऽवस्थाऽनुकारः स चतुर्विधः।
आङ्गिको वाचिकश्चैवमाहार्य्यः सात्त्विकस्तथा॥२७७॥ (ङ)

नटैरङ्गादिभिः रामयुधिष्ठिरादीनामवस्थाऽनुकरणमभिनयः।

रूपकस्य भेदानाह,—

नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः।
ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश॥२७८॥ (च)

किञ्च,—

नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम्।
प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकं तथा॥
संलापकं श्रीगदितं शिल्पकञ्च विलासिका।
दुर्मल्लिका प्रकरणी हल्लीशो भाणिकेति च॥

(ङ) भवेदिति।—अवस्था—आलम्बनस्य शोकहर्षादिना यादृशी मुखविकासाविकासादिव्यवस्था तस्याः, अनुकारः,—अनुकरणम्, अभिनयः। अभिनयव्युत्पत्तिर्यथोक्ता,—"अभिपूर्वस्तु णीञ्धातुः पुरा मुख्यार्थनिर्णये। यस्मात् प्रयोग नयति तस्मादभिनयः स्मृतः॥ विभावयति यस्माच्च नानाऽर्थान् हि प्रयोगतः। शाखाऽङ्गोपाङ्गसंयुक्तस्तस्मादभिनयः स्मृतः॥" इति। अस्य चातुर्विध्यमाह, स इति। सः,—निरुक्तलक्षणोऽभिनयः, चतुर्विधः,—चतुर्भेदः, आङ्गिकः,—अङ्गेन निष्पन्नः, वाचिकः,—वचनेन निष्पन्नः, आहार्य्यः,—आहरणीयः, वेशरचनादिरूपः इत्यर्थः, सात्त्विकः,—सत्त्वोद्रेकात् जनितः, स्तम्भस्वेदादिरित्यर्थः। तथोक्तं भरतेन,—"आङ्गिको वाचिकश्चैव ह्याहार्य्यः सात्त्विकस्तथा। ज्ञेयस्त्वभिनयो विप्राः! चतुर्धा परिकल्पितः॥" इत्यादि।

(च) नाटकमिति।—नाटकं, प्रकरणं, भाणः, व्यायोगः, समवकारः, डिमः, ईहामृगः, अङ्कः, वीथी, प्रहसनमिति दश रूपकाणि भवन्ति। दशरूपकेऽप्युक्तम्;—"नाटकं सप्रकरणं भाणः प्रहसनं डिमः। व्यायोगसमवकारौ वीथ्यङ्केहामृगा इति॥" इति।

अष्टादश प्राहुरुपरूपकाणि मनीषिणः।
विना विशेषं सर्वेषां लक्ष्म नाटकवन्मतम्॥२७९॥(छ)

सर्वेषां—प्रकरणादिरूपकाणां नाटिकाद्युपरूपकाणाञ्च।

तत्र,—

नाटकं ख्यातवृत्तं स्यात् पञ्चसन्धिसमन्वितम्।
विलासर्द्ध्यादिगुणवद् युक्तं नानाविभूतिभिः॥
सुखदुःखसमुद्भूतिनानारसनिरन्तरम्।
पञ्चादिका दशपरास्तत्राङ्काः परिकीर्त्तिताः॥
प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान्।
दिव्योऽथ दिव्यादिव्यो वा गुणवान् नायको मतः॥
एक एव भवेदङ्गी शृङ्गारो वीर एव वा।
अङ्गमन्ये रसाः सर्वे कार्य्यं निर्वहणेऽद्भुतम्॥
चत्वारः पञ्च वा मुख्याः कार्य्यव्यापृतपूरुषाः।
गोपुच्छाग्रसमाग्रन्तु बन्धनं तस्य कीर्त्तितम्॥२८०॥(ज)

(छ) एवं रूपकभेदानभिधाय उपरूपकभेदानपि आह, नाटिकेति।—नाटिकामारभ्य भाणिकाऽन्तं निर्दिष्टान्यष्टादश उपरूपकाणि भवन्ति इति मनीषिणः,—विद्वांसः, प्राहुः। विनेति।—विशेषं विना सर्वेषां—प्रकरणादीनां रूपकाणां, नाटिकादीनाम् उपरूपकाणाञ्चेत्यर्थः, लक्ष्म—लक्षणं, स्वरूपमित्यर्थः, नाटकवत् मतं—कथितम्।

(ज) ननु किं तत् नाटकलक्षणमित्यपेक्षायां नाटकलक्षणमाह, नाटकमिति।—ख्यातवृत्तं—पुराणेतिहासादिप्रसिद्धवृत्तान्तं, न तु स्वकपोलकल्पितवृत्तान्तमिति भावः; अत एवोक्तं,—"तत्प्रख्यातं विधातव्यं वृत्तमत्राधिकारितम्" इति। पञ्चभिः (वक्ष्यमाणैः) सन्धिभिः,—मुखादिभिरङ्गविशेषैः, समन्वितं—सम्बद्धम्। दशरूपककारस्त्वाह,—"आद्यन्तमेवं निश्चित्य पञ्चधा तद्विभज्य च। खण्डशः सन्धि-

ख्यातं—रामायणादिप्रसिद्धं वृत्तम्। यथा,—रामचरितादि। सन्धयो वक्ष्यन्ते, नानाविभूतिभिर्युक्तमिति महासहायम्। सुखदुःखसमुद्भूतत्वं रामयुधिष्ठिरादिवृत्तान्तेषु अभिव्यक्तम्। राजर्षयः,—दुष्मन्तादयः। दिव्याः,—श्रीकृष्णादयः। दिव्यादिव्यः,—यो दिव्योऽप्यात्मनि नराभिमानी। यथा,—श्रीरामचन्द्रः। गोपुच्छाग्रसमाग्रमिति—"क्रमेणाङ्काः सूक्ष्माः कर्त्तव्याः" इति केचित्। अन्ये त्वाहुः,—"यथा गोपुच्छे केचिद् बाला ह्रस्वाः, केचिद्दीर्घाः, तथेह कानिचित् कार्य्याणि मुखसन्धौ समाप्तानि, कानिचित् प्रतिमुखे। एवमन्येष्वपि कानिचित् कानिचित्" इति।

प्रत्यक्षनेतृचरितो रमभावसमुज्ज्वलः।
भवेदगूढ़शब्दार्थः क्षुद्रचूर्णकसंयुतः॥
विच्छिन्नावान्तरैकार्थः किञ्चित् संलग्नबिन्दुकः।
युक्तो न बहुभिः कार्य्यैर्बीजसंहृतिमान् न च॥

संज्ञांश्च विभागानपि खण्डयेत॥" इति। विलासर्द्ध्यादिगुणवत्—विलासः,—"धीरा दृष्टिर्गतिश्चित्रा विलासे सस्मितं वचः" इतिलक्षणोक्तनायकगुणविशेषः, ऋद्धिः,—अभ्युन्नतिः, [आदिना धैर्य्यगाम्भीर्य्यादिग्रहणं] तद्गुणवत्—तद्गुणयुक्तम्। तथोक्तं,—"सर्वसम्पत्प्रभूतं स्यात्" इति। सुखस्य दुःखस्य च समुद्भूत्या—कदाचित् सुखसमुद्भूत्या, कदाचित् दुःखसमुद्भूत्या चेत्यर्थः, नाना—विविधाः, ये रसाः,—आस्वादव्यापाराः, तैः निरन्तरं—सान्द्रं, पूर्णमित्यर्थः; ["सुखदुःखसमुद्भूति" इति पृथक्पदस्वीकारे तु सुखदुःखाभ्यां समुद्भूतिः,—सम्भवः यस्य तत्] तथोक्तं,—"सुखदुःखोत्पत्तिकृतम्" इति। अङ्गी—प्रधानभूतः, अङ्गम्—अप्रधानम्। निर्वहणे—निर्वहणाख्ये सन्धौ, अद्भुतं—विस्मयजनकव्यापारः, [अद्भुत इति पाठान्तरे—तदाख्यो रस इत्यर्थः] कार्य्यं—वर्णनीयम्, अत्र एवोक्तं दशरूपककृता,—"एको रसोऽङ्गीकर्त्तव्यो वीरः शृङ्गार एव वा। अङ्गमन्ये रसाः सर्वे कुर्य्यात् निर्वहणेऽद्भुतम्॥" बन्धनं—रचनम्। शेषं स्पष्टम्।

नानाविधानसंयुक्तो नातिप्रचुरपद्यवान्।
आवश्यकानां कार्य्याणामविरोधाद्विनिर्मितः॥
नानेकदिननिर्वर्त्त्यकथया सम्प्रयोजितः।
आसन्ननायकः पात्रैर्युतस्त्रिचतुरैस्तथा॥
दूराह्वानं वधो युद्धं राज्यदेशादिविप्लवः।
विवाहो भोजनं शापोत्सर्गौ मृत्यू रतं तथा॥
दन्तच्छेद्यं नखच्छेद्यमन्यद् व्रीड़ाकरञ्च यत्।
शयनाधरपानादि नगराद्यवरोधनम्॥
स्नानानुलेपने चैभिर्वर्ज्जितो नातिविस्तरः।
देवीपरिजनादीनाममात्यवणिजामपि॥
प्रत्यक्षचित्रचरितैर्युक्तो भावरसोद्भवैः।
अन्तनिष्क्रान्तनिखिलपात्रोऽङ्क इति कीर्त्तितः॥२८१॥(झ)

विन्द्वादयो वक्ष्यन्ते। आवश्यकं—सन्ध्यावन्दनादि।

(झ) अङ्कमाह, प्रत्यक्षेति।—प्रत्यक्षं—प्रत्यक्षवत् आभासमानं, नेतुः,—नायकस्य, चरितं यत्र सः, तथाऽऽह दशरूपककारः,—"प्रत्यक्षनेतृचरितः" इति। रसेन भावेन च समुज्ज्वलः; अत एवोक्तम्,—"अङ्को नानाप्रकारार्थसंविधानरसाश्रयः" इति। अगूढ़ः,—स्फुटः, शब्दार्थः,—वाक्यतात्पर्य्यं, यत्र तथाविधः, क्षुद्रेण—अल्पकलेवरेण, चूर्णकेन—गद्येन, संयुतः, विच्छिन्नः,—विच्छेदं प्राप्तः, अवान्तरं—सन्दर्भैकदेशः, एव एकः,—मुख्यः, अर्थः,—प्रयोजनं, यस्मिन् तथोक्तः, किञ्चित्—ईषत्, संलग्नाः—संविहिताः, विन्दवः,—वक्ष्यमाणलक्षणाः यस्मिन् तथोक्तः; उक्तञ्च दशरूपककृता,—"विन्दुव्याप्तिपुरस्कृतः" इति। बहुभिः,—हास्योद्वेगादिजनकतया बहुविधैः, कार्य्यैः,—व्यापारैः, न युक्तः, न च बीजस्य—ग्रन्थप्रकृतिरूपस्य मूलकारणस्य, संहृतिः,—संहारः, तद्वान्; नानाविधानैः,—विविधैः विहितकर्मभिः, संयुक्तः, नातिप्रचुरपद्यवान्—अतिबहुभिः पद्यैः न संयुतः, आवश्यकानां—धर्मशास्त्रानुसारेण

अङ्गप्रस्तावाद् गर्भाङ्कमाह,—

अङ्कोदरप्रविष्टो यो रङ्गद्वाराऽऽमुखादिमान्।
अङ्कोऽपरः स गर्भाङ्कः सबीजः फलवानपि॥२८२॥(अ)

यथा,—बालरामायणे रावणं प्रति कञ्चुकी,—

"श्रवणैः पेयमनेकैर्दृश्यं दीर्घैश्च लोचनैर्बहुभिः।
भवदर्थमिव निबद्धं नाट्यं सीतास्वयंवरणम्॥" (ट)

इत्यादिना विरचितः सीतास्वयंवरो नाम गर्भाङ्कः। इति।

निर्वितमनुष्ठेयानां, आर्याभ्यां—मन्त्रावन्दनादीनाम्, अविरोधात्—अव्याघातात्, विनिर्मितः,—विरचितः, नानेतृभिः,—अनटभिः, अल्पकृद्भिरित्यर्थः, निर्व्यूढा—निष्पादा, वा यथा तथा सम्पादितः; आसन्नः,—समीपवर्ती, नायको यत्र, वर्ण्यमानत्वेनेति शेषः, तथोक्तः, विचतुरैः,—विभिः चतुर्भिर्वेत्यर्थः, पात्रैः,—नाटकीयपुरुषैः, वृतः। उत्सर्गैः,—मनुष्यादिभिः। एभिः,—दूराह्वानादिभिः। परिजनाः,—दैव्याः परिचारकाः, राजकुमारादयो वा, तेषाम्। अन्ते—शेषे, निष्क्रान्तानि निर्गतानि—अनवधि, पात्राणि यत्र तथाविधः, अङ्कः,—परिच्छेदविशेषः। दशरूपकाण्यारोऽप्याह,…"दूराह्वानं वधं युद्धं राज्यदेशादिविप्लवम्। संरोधं भोजनं स्नानं सुरतं चानुलेपनम्॥ अध्वरण्डनादीनि प्रत्यक्षाणि न निर्दिशेत्। नाधिक्षारिवधं क्वापि नाज्यनाशस्रुवं न च॥ एवमाद्यपरिच्छेद्यनिबन्धनासन्ननायकम्। पात्रैश्चित्तुरैरङ्गं तेषामन्तेऽस्य निर्गमः॥……पञ्चाङ्कमेतदवरं दशाङ्कं नाटकं परम्॥" इति। अन्यत् स्पष्टम्।

(अ) गर्भाङ्कमाह, अङ्कोदरेति।—रङ्गद्वारं—नूतनधारक्रियमाणं मङ्गलम्, आमुखं—प्रस्तावना [आदिना समाप्त्यादिपरिग्रहः] तद्वान्, अङ्कस्य उदरं—मध्यं, प्रविष्टः, सबीजः,—सूचकारथसहितः, फलवान्—नायकनिर्व्यापारप्रधानप्रयोजनान्वितः, यः अपरः अङ्कः, सः गर्भाङ्कः,—गर्भं दधाति इति तथोक्तः।

(ट) उदाहरति, श्रवणैरिति।—सीतास्वयंवरणं—तदाख्यं, नाट्यम्, अनेकैः श्रवणैः,—कर्णैः, पेयं—सुखजनकं श्रव्यं श्रवणोचितमित्यर्थः, बहुभिः दीर्घैः,—आयतैः, लोचनैः,—नेत्रैः, दृश्यं—सुखजनदर्शनोचितमित्यर्थः, अत एव भवदर्थमिव—तव निमित्तमिव, दर्शनसुखा बहुकर्णेन्द्रियत्वादिति भावः, निबद्धं—रचितम्। आर्या स्पष्टम्।

तत्र पूर्वं पूर्वरङ्गः सभापूजा ततः परम्।
कथनं कविसंज्ञादेर्नाटकस्याप्यथाऽऽमुखम्॥२८३॥(ठ)

तत्रेति—नाटके।

यन्नाट्यवस्तुनः पूर्वं रङ्गविघ्नोपशान्तये।
कुशीलवाः प्रकुर्वन्ति पूर्वरङ्गः स उच्यते॥
प्रत्याहारादिकान्यङ्गान्यस्य भूयांसि यद्यपि।
तथाऽप्यवश्यं कर्त्तव्या नान्दी विघ्नोपशान्तये॥२८४॥(ड)

अस्याः स्वरूपमाह,—

आशीर्वचनसंयुक्ता स्तुतिर्यस्मात् प्रयुज्यते।
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता॥
मङ्गल्यशङ्खचन्द्राब्जकोककैरवशंसिनी।
पदैर्युक्ता द्वादशभिरष्टभिर्वा पदैरुत॥२८५॥ (ढ)

(ठ) नाटकरचनापरिपाटीमाह, तत्रेति।—तत्र—नाटके, पूर्वं—प्रथमं, पूर्वरङ्गः,—वक्ष्यमाणलक्षणः, तदनन्तरं, सभापूजा—सभाप्रशंसनं, ततः कविसंज्ञादेः, ["संज्ञादेः" इति आदिपदेन गोत्रमातापितृत्वं यद्यत्] नाटकस्यापि कथनं—कीर्त्तनम्, अथ—अनन्तरम्, आमुखं—प्रस्तावना, निबद्धव्येति शेषः।

(ड) पूर्वरङ्गमाह, यदिति।—रङ्गः,—नृत्यस्थानं, तस्य विघ्नोपशान्तये—अन्तरायनिवर्त्तनाय, नाट्यवस्तुनः,—नाटकेतिवृत्तप्रस्तावात्, पूर्वं, कुशीलवाः,—सूत्रधारप्रधाना नटाः, यत्—यज्ञं, प्रकुर्वन्ति, सः पूर्वरङ्गः,—मङ्गलाचरणनिमित्तकः, उच्यते। यद्यपि अस्य—पूर्वरङ्गस्य, प्रत्याहारादिकानि—ध्यानधारणाप्रभृतीनि, भूयांसि—बहूनि, अङ्गानि, सन्ति इति शेषः, तथाऽपि विघ्नोपशान्तये नान्दी अवश्यं कर्त्तव्या।

(ढ) नान्दीपदार्थमाचष्टे, आशीरिति।—यस्मात् देवद्विजनृपादीनाम् [नृपादीनामित्यादिपदेन गुर्वादिपरिग्रहः] आशीः,—शुभचिन्तनं, तद्वचनेन संयुक्ता स्तुतिः,—गुणकीर्त्तनं, ["स्तुतिः" इत्यत्र "नित्यम्" इति पाठे—स्तुतिरध्याहार्य्या] प्रयुज्यते—क्रियते, तस्मात् सा नान्दी इति संज्ञिता—कथिता, नन्दयतीति व्युत्पत्तियोगात्

अष्टपदा यथा अनर्घराघवे,—"निष्प्रत्यूहम्" इत्यादि। द्वादशपदा यथा मम तातापादानां पुष्पमालायाम्,—

"शिरसि धृतसुरापगे स्मरारा-
वरुणमुखेन्दुरुचिर्गिरीन्द्रपुत्री।
अथ चरणयुगानते स्वकान्ते
स्मितसरसा भवतोऽस्तु भूतिहेतुः॥" (ख)

देवद्विजनृपप्रभृतीनामानन्दयित्री स्तुतिर्नान्दीति फलितार्थः। सा तु मङ्गल्यं—मङ्गलाय हितं, शङ्खचन्द्रादिं शंसयति—सूचयतीति तथोक्ता, तथा (क्वचित्) द्वादशभिः पदैः,—सुप्तिङन्तरूपैः, वा—अथवा, अष्टभिः पदैः, उत—अथवा, क्वचिद्वा इत्यर्थः, पदैः,—पद्यस्य तुर्य्यांशभूतैः चरणैः, युक्ता। यत्र द्वादशपदा नान्दी, तत्र पदशब्दः सुप्तिङन्तान्यतमवाचकः, यत्राष्टपदा, तत्र पदशब्दः पद्यचतुर्थांशवाचको बोद्धव्यः। अत एवानर्घराघवे, पद्यद्वयेनाष्टपदा नान्दी, पुष्पमालायाञ्चैकेनैव पद्येन द्वादशपदा नान्दी उदाहरिष्यते इति हृदयम्। नान्दीपदव्युत्पत्तिस्तु यथोक्ता नाट्यप्रदीपे—"नन्दन्ति काव्यानि कवीन्द्रवर्गाः कुशीलवाः पारिषदाश्च सन्तः। यस्मादलं सज्जनसिन्धुहंसी तस्मादियं सा कथितेह नान्दी॥" इति। भरतेन तस्या यथोक्ता व्यवस्था—"पूर्वं कृता मया नान्दी आशीर्वचनसंयुता। अष्टाङ्गपदसंयुक्ता प्रशस्ता वेदसम्मता॥" इति। "सूत्रधारः पठेन्नान्दीं मध्यमं स्वरमाश्रितः। नान्दीं पदैर्द्वादशभिरष्टाभिर्वाऽप्यलङ्कृताम्॥" इति। एषा च तदीया व्याख्या—"अनेन त्र्यस्रतालानुगता त्रिपदा षट्पदा द्वादशपदेति, चतुरस्रतालाऽनुगता चतुष्पदाऽष्टपदा षोडशपदेति पृथक् त्रिविधैव। नातः परमपि भूयस्त्वादादृता। पदानि श्लोकावयवभूतानि तिङन्तानि सुबन्तानि वा, श्लोकतुरीयांशरूपाणि वा, अवान्तररूपाणि वा। आचार्य्यस्वरसात्त्ववान्तरवाक्येष्वेव पदत्वम्।" इति। नाट्यप्रदीपकारैश्च—"श्लोकपादः पदं केचित् सुप्तिङन्तमथापरे। परेऽवान्तरवाक्यैकस्वरूपं पदमूचिरे॥" इति।

(ख) तत्र द्वादशपदामुदाहरति, शिरसीति।—स्मरारौ—हरे, शिरसि धृता, सुरापगा—गङ्गा येन तादृशे सति, अरुणा—रक्ता, मुखेन्दोः,—मुखचन्द्रस्य, रुचिः,—कान्तिः, यस्यास्तथाभूता, अथ—अनन्तरं, स्वकान्ते—तस्मिन् स्मरारौ इत्यर्थः, चरणयुगानते—अपराधं स्वीकृत्य पादतलपतिते सति, स्मितेन—मन्दहासेन, सरसा—सद्भावार्द्रा, गिरीन्द्रपुत्री—गौरी, भवतः,—तव, भूतिहेतुः,—कल्याणदायिनी, अस्तु—भवतु। एतत् पद्यं द्वादशभिः पदैः रचितम्।

एवमन्यत्र। "एतन्नान्दी" इति कस्यचिन्मतानुसारेणोक्तम्। वस्तुतस्तु "पूर्वरङ्गस्य रङ्गद्वाराऽभिधानमङ्गम्" इत्युच्यते। (त)

यदुक्तम्,—

"यस्मादभिनयो ह्यत्र प्राथम्यादवतार्य्यते।
रङ्गद्वारमतो ज्ञेयं वागङ्गाभिनयात्मकम्॥" इति। (थ)

उक्तप्रकारायाश्च नान्द्या रङ्गद्वारात् प्रथमं नटैरेव कर्त्तव्यतया न महर्षिणा निर्देशः कृतः। (द)

कालिदासादिमहाकविप्रबन्धेषु च,—

"वेदान्तेषु यमाहुरेकपुरुषं व्याप्य स्थितं रोदसी
यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथाऽर्थाक्षरः।

(त) केचित्तु रत्नावल्यादौ श्लोकत्रयरूपाया नान्द्या दर्शनात् अत्र प्रथमपदशब्दस्यापि श्लोकचतुर्थभागपरत्वं व्याचक्रुः, तन्न; "इदं गुरुभ्यः पूर्वेभ्यो नमोवाकं प्रशास्महे। विन्देम देवतां वाचममृतामात्मनः कलाम्॥" इत्युत्तरचरितनाटके द्वादशपदायाः नान्दीत्वानुपपत्तेः। एवं चाष्टाभिरिति तदधिकोपलक्षणत्वेन श्लोकत्रयेणापि नान्दी सङ्गच्छते। अत एव महानाटके त्र्यधिकैः श्लोकैः नान्दी कृता। नन्वभिज्ञानशकुन्तलायां "या सृष्टिः—" इत्यादौ द्वादशाधिकपदघटितैकश्लोकप्रणीतायाः नान्द्याः कथं संग्रहः? इति चेत्, तस्याः "कालिदासादिमहाकविप्रबन्धेषु च" इत्यनेन ग्रन्थकृतैव नान्दीत्वाभावस्य वक्ष्यमाणत्वात्, इति विभिन्नमालोक्योक्तम्, एतदिति।—"कस्यचित्" इत्यनेनास्वरसः सूचितः। तर्हि तस्य किं नाम? इत्यत आह, वस्तुतस्त्विति।—पूर्वरङ्गस्य—सामान्यमङ्गलाचरणरूपस्य, रङ्गद्वारम् अभिधानं यस्य तादृशम्, अङ्गं—विशेषः।

(थ) अत्र मुनेरपि स्वरसमाह, यस्मादिति।—यस्मात्—यतः, अत्र—सूत्रधारक्रियमाणे मङ्गले, प्राथम्यात्—आरम्भं विधाय, अभिनयः,—नाट्यव्यापारः, अवतार्य्यते—क्रियते इत्यर्थः, अतः वाक् च अङ्गञ्च तयोरभिनयात्मकं (क्रियमाणं मङ्गलं) रङ्गद्वारं ज्ञेयम्।

(द) तस्य नान्दीत्वे मुनेरस्वरसतामाह, उक्तेति।—उक्तप्रकारायाः,—आशीर्वचनसंयुक्तेतिलक्षणोक्तरूपायाः, चशब्दो हेतौ, महर्षिणा—भरतेन, निर्देशः,—नियमः। ग्रन्थारम्भात् प्रागेव सा नान्दी निर्विघ्नं ग्रन्थसमाप्तये कविनाऽपि क्रियते इति भावः।

अन्तर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते
स स्थाणुः स्थिरभक्तियोगसुलभो निःश्रेयसायाऽस्तु वः ॥" (ध)

एवमादिषु नान्दीलक्षणायोगात् । उक्तञ्च—"रङ्गद्वारमारभ्य कविः कुर्य्यात्" इति । अत एव प्राक्तनपुस्तकेषु—"नान्द्यन्ते सूत्रधारः" इत्यनन्तरमेव "वेदान्तेषु" इत्यादिश्लोकलिखनं दृश्यते । यच्च पश्चात् "नान्द्यन्ते सूत्रधारः" इति लिखनं, तस्यायमभिप्रायः,—"नान्द्यन्ते सूत्रधार इदं प्रयोजितवान्, इतः प्रभृति मया नाटकमुपादीयते, इति कवेरभिप्रायः सूचितः" इति ।

पूर्वरङ्गं विधायैव सूत्रधारो निवर्त्तते ।
प्रविश्य स्थापकस्तद्वत् काव्यमास्थापयेत् ततः ॥
दिव्यमर्त्त्ये स तद्रूपो मिश्रमन्यतरस्तयोः ।
सूचयेद्वस्तु बीजं वा मुखं पात्रमथापि वा ॥२८६॥ (न)

(ध) वेदान्तेष्विति ।—वेदान्तेषु—उपनिषत्सु, यं—स्थाणुमिति भावः, रोदसी—द्यावापृथिव्यौ, व्याप्य स्थितम्, एकम्—अद्वितीयं, पुरुषं—ब्रह्म, आहुः,—कथयन्ति, बुधा इति शेषः, यस्मिन्—स्थाणौ, अनन्यविषयः,—तन्मात्रप्रतिपादकः, ईश्वर इति शब्दः, यथार्थाक्षरः,—यथार्थानि—व्युत्पत्त्यनुकूलानि इत्यर्थः, अक्षराणि यस्य तादृशः, योगार्थनिरूढ इत्यर्थः, यश्च स्थाणुः, नियमिताः,—संयमिताः, प्राणादयः,—शरीरस्थाः पञ्च वायवः यैः तादृशैः, प्राणायामादिपरैरित्यर्थः, मुमुक्षुभिः,—मोक्तुमिच्छुभिः, योगिभिः इत्यर्थः, अन्तः,—अन्तःकरणमध्ये, मृग्यते—अन्विष्यते, चिन्त्यते इति यावत्, स्थिरा—निश्चला या भक्तिः तस्याः योगेन [व्यासवाक्ये त्वस्मिन् भक्तिशब्दे परे पुंवद्भावस्य विशदविधिनिषेधौ अस्मत्कृताभिज्ञानशकुन्तलव्याख्याने २१ पृष्ठे "विदितभक्तिः" इत्यत्र द्रष्टव्यौ । स्थिरः यो भक्तियोगः तेन इति वा केचित्] सुलभः,—सुदृढभक्तिमात्रलभ्य इत्यर्थः, सः स्थाणुः,—शिवः, वः,—युष्माकं, निःश्रेयसाय—मङ्गलाय, यद्वा कैवल्याय, ("निःश्रेयसन्तु कल्याणमोक्षयोः" इत्यमरः) अस्तु—निःश्रेयसदायी भवतु इत्यर्थः । विक्रमोर्वश्यां नान्दीरूपेण निबद्धोऽयं श्लोकः । शार्दूलविक्रीडितं वृत्तम् ।

(न) पूर्वरङ्गमिति ।—सूत्रधारः,—सूत्रं—प्रयोगानुष्ठानं, धारयति—प्रवर्त्तयति;

काव्यस्यार्थस्य ख्यापनात् ख्यापकः। तदुक्तम्—सूत्रधार-सदृशगुणाकारः। इदानीं पूर्वरङ्गस्य सम्यक्प्रयोगाभावादेक एव सूत्रधारः सर्वं प्रयोजयतीति व्यवहारः। स ख्यापको दिव्यं वस्तु दिव्यो भूत्वा, मर्त्यं मर्त्यो भूत्वा, मिश्रस्य दिव्यमर्त्ययोरन्यतरो भूत्वा सूचयेत्। वस्तु—प्रतिवृत्तम्। यथा—उदात्तराघवे,—

"रामो मूर्ध्नि निधाय काननमगान्मान्यामिवाज्ञां गुरोः,
तद्वत्या भरतेन राज्यमखिलं मात्रा सहैवोज्झितम्।
तौ सुग्रीवविभीषणावनुगतौ नीतौ परां सम्पदं,
प्रोत्क्षिप्ता दशकन्धरप्रभृतयो ध्वस्ताः समस्ताः द्विषः॥" (प)

तीति सूत्रधारः। तथोक्तं—"नाट्योपकरणादीनि सूत्रेणानुविधीयते। सूत्रं धारयतीत्यर्थे सूत्रधारो निगद्यते॥" इति। "चतुरातोद्यनिष्णातोऽनेकभाषाकुलान्वितः। नानाभावज्ञतत्त्वज्ञो नीतिशास्त्रार्थतत्त्ववित्॥ नानागतिप्रचारज्ञो रसभावविशारदः। नाट्यप्रयोगनिपुणो नानाशिल्पकलान्वितः॥ छन्दोविधानतत्त्वज्ञः सर्वशास्त्रविचक्षणः। तत्तद्दोषानुगुणयत्नवानालोचधारणः॥ अवधार्य प्रयोक्ता च योक्तृवाक्यमुपदेशकः। एवं गुणगणोपेतः सूत्रधारोऽभिधीयते॥" इति। पूर्वरङ्गं विधाय—कृत्वेव, निवर्त्तते। ततः ख्यापकः,—तदाख्यः द्वितीयो नटः, प्रविश्य, रङ्गमिति शेषः, काव्यम् काव्यापयेत्—प्रकटयेत्, सभाप्रजादिपुरःसरं सूचयेत् इति सरलार्थः। "पूर्वरङ्गं विधायादौ सूत्रधारे विनिर्गते। प्रविश्य तदनुचरः काव्यमाख्यापयेन्नटः॥" इति। अन्यत् स्पष्टम्।

(प) वस्तु उदाहरति, राम इति।—रामः मान्यामिव [एतेन प्रमोदातिशयः सूच्यते] गुरोः,—पितुः, ("गुरुर्नां जनके पूज्ये श्रेष्ठे नहति तु त्रिषु" इति गोपालः) आज्ञां, मूर्ध्नि—शिरसि, निधाय—स्थापयित्वा, काननं—वनं, ("काननं गहनं वनम्" इत्यमरः) अगात्; भरतेन तद्वत्या—तस्मिन् रामे, या भक्तिः,—अनुरागविशेषः, तया; मात्रा—जनन्या, सहैव, अखिलं—समग्रं, राज्यम् उज्झितं—त्यक्तम्; तौ—प्रसिद्धौ, अनुगतौ—आश्रितौ, सुग्रीवविभीषणौ, परां—निरतिशयां, सम्पदं—राज्यनित्यं, नीतौ—प्रापितौ, वाल्मिदमाननवधात् रामेणेति शेषः, प्रोत्क्षिप्ताः,—अतिगर्विताः, दशकन्धरप्रभृतयः समस्ताः, द्विषः,—शत्रवः, ध्वस्ताः,—विनाशिताः। अत्रापि रामेणेति शेषः। अत्र समस्तं रामायणवृत्तं प्राधान्येन सूचितम्। आदर्शविक्रीडितं वृत्तम्।

बीजं यथा रत्नावल्याम्—

"द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोऽप्यन्तात्।
आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः॥" (फ)

अत्र हि समुद्रे वहित्रभङ्गमग्नोत्थिताया रत्नावल्या अनुकूलदैवलालितो (ब) वत्सराजगृहप्रवेशो यौगन्धरायणव्यापारमारभ्य रत्नावलीप्राप्तौ बीजम्।

मुखं—श्लेषादिना (भ) प्रस्तुतवृत्तान्तप्रतिपादको वाग्विशेषः।

यथा,—"आसादितप्रकटनिर्मलचन्द्रहासः
प्राप्तः शरत्समय एष विशुद्धकान्तिः।
उत्खाय गाढ़तमसं घनकालमुग्रं
रामो दशास्यमिव सम्भृतबन्धुजीवः॥" (म)

(फ) द्वीपादिति।—अभिमुखीभूतः,—अनुकूलतां प्राप्तः, विधिः,—दैवं, ("विधिर्ना नियतौ काले विधाने परमेष्ठिनि" इति मेदिनी) अन्यस्मात्—निजावासभिन्नात्, द्वीपात्—सर्वतो जलवेष्टितभूभागात्, अपि जलनिधेः,—समुद्रस्य, मध्यात्, अपि दिशः अन्तादपि अभिमतम्—अभिलषितं वस्तु, आनीय, झटिति—शीघ्रं, घटयति—सङ्गमयति।

(ब) वहित्रम्—अर्णवयानम्। अनुकूलदैवलालितः,—अनुकूलदैववशात् सञ्जातः।

(भ) श्लेषादिना—शब्दानामनेकार्थकत्वादिना, [अत्रादिपदेन समासोक्त्यप्रस्तुतप्रशंसादेर्ग्रहणम्]।

(म) आसादितेति।—शरद्वर्णनमिदम्। आसादितः,—प्राप्तः, प्रकटः,—परिस्फुटः, निर्मलस्य—मेघाद्यावरणशून्यतया पूर्णप्रकाशस्य, चन्द्रस्य हासः,—विकासः, येन तथोक्तः, अन्यत्र—आसादितः,—प्राप्तः, रावणवधादिति भावः, प्रकटः,—समुज्ज्वलः, निर्मलः,—शाणेऽवस्थाप्य तीक्ष्णधारतां नीत इत्यर्थः, चन्द्रहासः,—रावणस्य असिः येन तादृशः, विशुद्धा—समुज्ज्वला, कान्तिः,—नक्षत्रादीनां ज्योतिः, अन्यत्र—स्वस्य शोभा इति भावः, यस्य तथोक्तः, तथा सम्भृतानि—सम्यक् पोषितानि, विकासितानि इत्यर्थः, बन्धुजीवानि,—तदाख्यपुष्पाणि येन सः, [बन्धुजीवशब्दात् प्रसवार्थे अणि, "फले लुक्" इति तद्धितलुकि "द्विहीनं प्रसवे सर्वम्" इत्यमरोक्तेः नपुंसकता बोध्या] अन्यत्र—सम्भृताः,—संरक्षिताः, बन्धूनां—विभीषणसुग्रीवादीनां, जीवाः,—

पात्रं यथा शाकुन्तले,—

"तवास्मि गीतरागेण हारिणा प्रसभं हृतः।
एष राजेव दुष्मन्तः सारङ्गेणातिरंहसा॥" (य)

रङ्गं प्रसाद्य मधुरैः श्लोकैः काव्यार्थसूचकैः।
रूपकस्य कवेराख्यां गोत्राद्यपि स कीर्त्तयेत्॥
ऋतुञ्च कञ्चित्प्रायेण भारतीं वृत्तिमाश्रितः॥२८७॥ (र)

प्राणाः, राक्षसेभ्य इति भावः, येन तथाभूतः, एषः शरत्समयः, दशास्यमिव—रावणमिव, उग्र—भीषणं, गाढ़तमसं—निविडान्धकारम्, अन्यत्र—तमोगुणाच्छन्नं, घनकालं—मेघसमयं, वर्षाकालमित्यर्थः, अन्यत्र—अतिकृष्णवर्णम्, उत्खाय—उन्मूल्य, राम इव प्राप्तः,—उपस्थितः। अत्र श्लेषेण रामायणरूपप्रस्तुतवृत्तान्तः सूचितः। वसन्ततिलकं वृत्तम्। एवं नायकनामसूचनात् पात्रसूचनमपि सम्भवति। अस्य पात्रासङ्कीर्णोदाहरणं, यथाऽनर्घराघवे,—"यान्ति न्यायप्रवृत्तस्य तिर्य्यञ्चोऽपि सहायताम्। अपन्थानन्तु गच्छन्तं सोदरोऽपि विमुञ्चति॥" अत्र वानराणां रामसाहाय्यं, विभीषणेन रावणत्यागश्च श्लेषेण सूचितः।

(य) तवेति।—अतिरंहसा—अतिवेगवता, हारिणा—चित्ताकर्षकेण, दूरसमाकर्षिणा वा, सारङ्गेण—मृगेण, एष इति आमुखनिर्वाहार्थं पुरतो निर्द्दिष्टः, राजा दुष्मन्त इव, अतिरंहसा—अति—अत्यन्त, रंहः,—वेगः, मनसः इति शेषः, यस्मात् तेन, मधुरतया श्रवणार्थम् अतीव मनोवेगकारिणा, हारिणा—मनोहरेण, तव गीतरागेण—सङ्गीतरागेण, हृतः,—आकृष्टः, राजपक्षे—सुदूरं प्रापितः, अस्मि, अहम् इति शेषः। पथ्यावक्त्रं वृत्तम्।

(र) रङ्गमिति।—रङ्गं—रङ्गस्थसामाजिकसमूहमित्यर्थः, प्रसाद्य—प्रीणयित्वा, श्लोकैरिति।—[बहुवचनमविवक्षितमाद्यार्थं वा, तेन गद्यस्यापि ग्रहणम्]। रूपकस्य—नाटकादेः। [एतदेव रहस्यं प्रकारान्तरेण भावप्रकाशिकायां सन्निबध्यते। तद्यथा—"इत्थं रङ्गविधानस्य सम्बन्धादिप्रसिद्धये। गोत्रं नाम च बध्नीयात्पूजावाक्यं सभासदाम्॥ वाञ्छाकलापः प्रथमं कलाविधिरनन्तरम्। वाञ्छाशून्या न दृश्यन्ते व्यवहाराः कथञ्चन॥ वाञ्छाकलापस्तु कवेरभीष्टार्थप्रकाशनम्। स्वाभिधेयगतत्वेन स द्विधा परिपठ्यते॥ स्वगतन्तु स्वगोत्रादिस्वीयकीर्त्तिप्रकाशनम्। अभिधेयगतं यत्तु तत् काव्यनाम्ना प्रकाशनम्॥" इति]।

बीजं यथा रत्नावल्याम्—

"द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोऽप्यन्तात्।
आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः॥" (फ)

अत्र हि समुद्रे वहित्रभङ्गमग्नोत्थिताया रत्नावल्या अनुकूलदैवलालितो (ब) वत्सराजगृहप्रवेशो यौगन्धरायणव्यापारमारभ्य रत्नावलीप्राप्तौ बीजम्।

मुखं—श्लेषादिना (भ) प्रस्तुतवृत्तान्तप्रतिपादको वाग्विशेषः।

यथा,—"आसादितप्रकटनिर्मलचन्द्रहासः
प्राप्तः शरत्समय एष विशुद्धकान्तिः।
उत्खाय गाढ़तमसं घनकालमुग्रं
रामो दशास्यमिव सम्भृतबन्धुजीवः॥" (म)

(फ) द्वीपादिति।—अभिमुखीभूतः,—अनुकूलतां प्राप्तः, विधिः,—दैवं, ("विधिर्ना नियतौ काले विधाने परमेष्ठिनि" इति मेदिनी) अन्यस्मात्—निजावासभिन्नात्, द्वीपात्—सर्वतो जलवेष्टितभूभागात्, अपि जलनिधेः,—समुद्रस्य, मध्यात्, अपि दिशः अन्तादपि अभिमतम्—अभिलषितं वस्तु, आनीय, झटिति—शीघ्रं, घटयति—सङ्गमयति।

(ब) वहित्रम्—अर्णवयानम्। अनुकूलदैवलालितः,—अनुकूलदैववशात् सञ्जातः।

(भ) श्लेषादिना—शब्दानामनेकार्थकत्वादिना, [अत्रादिपदेन समासोक्त्यप्रस्तुतप्रशंसादेर्ग्रहणम्]।

(म) आसादितेति।—शरद्वर्णनमिदम्। आसादितः,—प्राप्तः, प्रकटः,—परिस्फुटः, निर्मलस्य—मेघाद्यावरणशून्यतया पूर्णप्रकाशस्य, चन्द्रस्य हासः,—विकासः, येन तथोक्तः, अन्यत्र—आसादितः,—प्राप्तः, रावणवधादिति भावः, प्रकटः,—समुज्ज्वलः, निर्मलः,—शाणेऽवस्थाप्य तीक्ष्णधारतां नीत इत्यर्थः, चन्द्रहासः,—रावणस्य असिः येन तादृशः, विशुद्धा—समुज्ज्वला, कान्तिः,—नक्षत्रादीनां ज्योतिः, अन्यत्र—स्वस्य शोभा इति भावः, यस्य तथोक्तः, तथा सम्भृतानि—सम्यक् पोषितानि, विकासितानि इत्यर्थः, बन्धुजीवानि,—तदाख्यपुष्पाणि येन सः, [बन्धुजीवशब्दात् प्रसवार्थे अणि, "फले लुक्" इति तद्धितलुकि "द्विहीनं प्रसवे सर्वम्" इत्यमरोक्तेः नपुंसकता बोध्या] अन्यत्र—सम्भृताः,—संरक्षिताः, बन्धूनां—विभीषणसुग्रीवादीनां, जीवाः,—

पात्रं यथा शाकुन्तले,—

"तवास्मि गीतरागेण हारिणा प्रसभं हृतः।
एष राजेव दुष्मन्तः सारङ्गेणातिरंहसा॥" (य)

रङ्गं प्रसाद्य मधुरैः श्लोकैः काव्यार्थसूचकैः।
रूपकस्य कवेराख्यां गोत्राद्यपि स कीर्त्तयेत्॥
ऋतुञ्च कञ्चित्प्रायेण भारतीं वृत्तिमाश्रितः॥२८७॥ (र)

प्राणाः, राक्षसेभ्य इति भावः, येन तथाभूतः, एषः शरत्समयः, दशास्यमिव—रावणमिव, उग्र—भीषणं, गाढ़तमसं—निविडान्धकारम्, अन्यत्र—तमोगुणाच्छन्नं, घनकालं—मेघसमयं, वर्षाकालमित्यर्थः, अन्यत्र—अतिकृष्णवर्णम्, उत्खाय—उन्मूल्य, राम इव प्राप्तः,—उपस्थितः। अत्र श्लेषेण रामायणरूपप्रस्तुतवृत्तान्तः सूचितः। वसन्ततिलकं वृत्तम्। एवं नायकनामसूचनात् पात्रसूचनमपि सम्भवति। अस्य पात्रासङ्कीर्णोदाहरणं, यथाऽनर्घराघवे,—"यान्ति न्यायप्रवृत्तस्य तिर्य्यञ्चोऽपि सहायताम्। अपन्थानन्तु गच्छन्तं सोदरोऽपि विमुञ्चति॥" अत्र वानराणां रामसाहाय्यं, विभीषणेन रावणत्यागश्च श्लेषेण सूचितः।

(य) तवेति।—अतिरंहसा—अतिवेगवता, हारिणा—चित्ताकर्षकेण, दूरसमाकर्षिणा वा, सारङ्गेण—मृगेण, एष इति आमुखनिर्वाहार्थं पुरतो निर्द्दिष्टः, राजा दुष्मन्त इव, अतिरंहसा—अति—अत्यन्त, रंहः,—वेगः, मनसः इति शेषः, यस्मात् तेन, मधुरतया श्रवणार्थम् अतीव मनोवेगकारिणा, हारिणा—मनोहरेण, तव गीतरागेण—सङ्गीतरागेण, हृतः,—आकृष्टः, राजपक्षे—सुदूरं प्रापितः, अस्मि, अहम् इति शेषः। पथ्यावक्त्रं वृत्तम्।

(र) रङ्गमिति।—रङ्गं—रङ्गस्थसामाजिकसमूहमित्यर्थः, प्रसाद्य—प्रीणयित्वा, श्लोकैरिति।—[बहुवचनमविवक्षितमाद्यार्थं वा, तेन गद्यस्यापि ग्रहणम्]। रूपकस्य—नाटकादेः। [एतदेव रहस्यं प्रकारान्तरेण भावप्रकाशिकायां सन्निबध्यते। तद्यथा—"इत्थं रङ्गविधानस्य सम्बन्धादिप्रसिद्धये। गोत्रं नाम च बध्नीयात्पूजावाक्यं सभासदाम्॥ वाञ्छाकलापः प्रथमं कलाविधिरनन्तरम्। वाञ्छाशून्या न दृश्यन्ते व्यवहाराः कथञ्चन॥ वाञ्छाकलापस्तु कवेरभीष्टार्थप्रकाशनम्। स्वाभिधेयगतत्वेन स द्विधा परिपठ्यते॥ स्वगतन्तु स्वगोत्रादिस्वीयकीर्त्तिप्रकाशनम्। अभिधेयगतं यद्वत् काव्यनाम्ना प्रकाशनम्॥" इति]।

सः,—स्थापकः। प्रायेणेति कचिदृतोरकीर्त्तनमपि। यथा रत्नावल्याम्।

भारतीवृत्तिस्तु,—

भारती संस्कृतप्रायो वाग्व्यापारो नराश्रयः ॥२८८॥

संस्कृतबहुलो वाक्प्रधानो व्यापारो भारती।

तस्याः प्ररोचना वीथी तथा प्रहसनामुखे।

अङ्गान्यत्रोन्मुखीकारः प्रशंसातः प्ररोचना ॥२८९॥ (ल)

प्रस्तुताभिनयेषु प्रशंसातः श्रोतॄणां प्रवृत्त्युन्मुखीकरणं (व) प्ररोचना। यथा रत्नावल्याम्,—

"श्रीहर्षो निपुणः कविः, परिषदप्येषा गुणग्राहिणी,
लोके हारि च वत्सराजचरितं, नाट्ये च दक्षा वयम्।
वस्त्वेकैकमपीह वाञ्छितफलप्राप्तेः पदं, किं पुन-
र्मद्भाग्योपचयादयं समुदितः सर्वो गुणानां गणः ? ॥" (श)

वीथीप्रहसने वक्ष्येते।

(ल) तस्या इति।—तस्याः,—भारत्याः वृत्तेः, प्ररोचना, वीथी तथा प्रहसनम्, एवम् आमुखम् इति चत्वारि अङ्गानि बोध्यानि। अत्र—एषु चतुर्षु अङ्गेषु मध्ये, प्रशंसातः,—सामाजिकादीनां गुणकीर्त्तनेन, उन्मुखीकारः,—उन्मुखीकरणम्, उत्कण्ठोत्पादनमित्यर्थः, प्ररोचना नाम भारतीवृत्तिरित्यर्थः। सुधाकरे द्विप्रकारा प्रशंसा निरूपिता; यथा,—"प्रशंसा तु द्विधा ज्ञेया चेतनाऽचेतनाश्रया। चेतनास्तु कथानाथकविसभ्यनटाः स्मृताः। अचेतनौ देशकालौ कालो मधुशरन्मुखः॥" इति।

(व) प्रवृत्त्युन्मुखीकरणं—प्रवृत्त्यौपयिकेच्छाजननम् इत्यर्थः।

(श) श्रीहर्ष इति।—श्रीहर्षः निपुणः,—सुदक्षः, कविः,—काव्यरचयिता, एषा परिषत्—सभाऽपि, गुणग्राहिणी—गुणग्रहणे तत्परा, न तु दोषग्रहणे इत्यर्थः, वत्सराजस्य—उदयनस्य, चरितं, लोके—जगति, हारि—मनोहरञ्च, वयञ्च नाट्ये—अभिनयव्यापारे, दक्षाः,—निपुणाः, इह—अस्मिन् अभिनयव्यापारे, एकैकमपि, न पुनः सर्वमित्यर्थः, वस्तु—कवित्वादिकं, वाञ्छितस्य—सभासन्तोषरूपस्य फलस्य,

नटी विदूषको वाऽपि पारिपार्श्विक एव वा।
सूत्रधारेण सहिताः संलापं यत्र कुर्वते॥
चित्रैर्वाक्यैः स्वकार्य्योत्थैः प्रस्तुताक्षेपिभिर्मिथः।
आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनाऽपि सा॥२९०॥(ष)

सूत्रधारसदृशत्वात् स्थापकोऽपि सूत्रधार उच्यते, तस्य अनुचरः पारिपार्श्विकः, तस्मात् किञ्चिदूनो नटः।

उद्घात्यकः कथोद्घातः प्रयोगातिशयस्तथा।
प्रवर्त्तकावलगिते पञ्च प्रस्तावनाभिदाः॥२९१॥(स)

प्राप्तेः,—इष्टसिद्धेरित्यर्थः, पदं—स्थानं, यद्वा कारणम्; मम भाग्यस्य उपचयात्—अभ्युन्नतेः हेतोः, अयं सर्वः गुणानां—कवित्वनाट्यदक्षत्वादिरूपाणामित्यर्थः गणः,—समूहः,—समुदितः,—सम्यक् उदयं प्राप्तः, अत्र किं पुनः, वक्तव्यमिति शेषः। अवश्यमेव मम भाग्यमेव अत्र कारणमिति भावः। अत्र कविप्रभृतीनां प्रशंसया सभ्यानामुन्मुखीकरणरूपा प्ररोचना। शार्दूलविक्रीडितं वृत्तम्।

(ष) आमुखमाह, नटीति।—नटी (अत्र "नटः" इति वक्तुमुचितं "तस्मात् किञ्चिदूनो नटः" इति वृत्तिनिबन्धनत्वात्, मन्दारमकरन्दे तु उभयोरपि नटीनटयोः, उपादानं दृश्यते, यथा हि,—"नटी विदूषको वाऽपि नटो वा पारिपार्श्विकः" इति)। विदूषकः,—"कुसुमवसन्ताद्यभिधः" इत्यादिनोक्तलक्षणकः, वाऽपि—अथवा, पारिपार्श्विकः,—पार्श्ववर्त्तिनटविशेषः; एते सूत्रधारेण सहिताः यत्र चित्रैः,—मनोज्ञैः, स्वकार्य्यात्—स्वकर्त्तव्यव्यापारात्, उत्थैः,—उद्भूतैः, यद्वा—स्वकार्य्यं—पात्रप्रवेशः, तदुपयुक्तैरित्यर्थः, प्रस्तुताक्षेपिभिः,—प्रकृतवृत्तमुत्थापयद्भिः, वाक्यैः, मिथः,—अन्योऽन्यं, संलापं—सम्यक् भाषणं, कुर्वते, तत् तु आमुखं विज्ञेयं, सा नाम्ना प्रस्तावनाऽपि, विज्ञेयेति शेषः। प्रस्तावनास्वरूपः सुधाकरे यथोक्तः,—"विधेर्यथैव सङ्कल्पो मुखतां प्रतिपद्यते। प्रधानस्य प्रबन्धस्य तथा प्रस्तावना मता॥" इति।

(स) प्रस्तावनाभेदानाह, उद्घात्यक इति।—स्पष्टम्।

तत्र,—

पदानि त्वगतार्थानि तदर्थगतये नराः ।
योजयन्ति पदैरन्यैः स उद्घात्यक उच्यते ॥२९२॥(ङ)

यथा मुद्राराक्षसे सूत्रधारः,—

"क्रूरग्रहः सकेतुश्चन्द्रमसम्पूर्णमण्डलमिदानीम् ।
अभिभवितुमिच्छति बलात्—" (क) इत्यनन्तरं [नेपथ्ये]
"आः !! क एष मयि स्थिते चन्द्रगुप्तमभिभवितुमिच्छति बलात् ?" इति ।

अत्र अन्यार्थवन्त्यपि पदानि हृदिस्थार्थागत्या अर्थान्तरे सङ्क्रमय्य पात्रप्रवेशः । (ख)

(ङ) उद्घात्यकमाह, पदानीति ।—अगतः,—अप्रसिद्धतया अप्रतीतः, अर्थः,—अभिप्रेतार्थः, येषु: तानि अगतार्थानि—अबोधिताभीष्टार्थानि इत्यर्थः, पदानि तदर्थगतये—तदर्थस्य—अभिप्रेतार्थस्य, गतये—बोधाय, नराः (यत्र) अन्यैः,—अभिप्रेतार्थनावप्रतिपादकैरित्यर्थः, पदैः योजयन्ति—अभिप्रेतार्थे सङ्क्रमयन्ति, स उद्घात्यक उच्यते ।

(क) क्रूरग्रह इति ।—क्रूरः,—अनिष्टफलदत्वेन निष्ठुरः, ग्रहः,—राहुः, सकेतुः,—सपातः, चन्द्रतुल्यकान्तिश्च इत्यर्थः, इदानीं—सम्प्रति, असम्पूर्णमण्डलम्—अपरिपूर्णबिम्बं, चन्द्रं, बलात्—हठात्, अभिभवितुम्—आक्रमितुं, ग्रसितुमिति यावत्, इच्छति—प्रवर्तते ।

(ख) अत्रेति ।—अत्र अन्यार्थवन्ति यथा,—क्रूरः ग्रहः,—आशयः, यस्य तथोक्तः, अथवा—क्रूरे—क्रूरकर्मणि, कुटव्यवहारे इत्यर्थः, ग्रहः,—आसक्तो यस्य तथाविधः, सकेतुः,—मत्सरकेतुना सह वर्त्तमानः, राक्षसः इत्यर्थः, इदानीमसम्पूर्णमण्डलम्—अचिरराज्याभिषिक्ततया स्वस्य सम्यगाज्ञाप्रचाराभावेन अस्वाधीनप्रकृतिमण्डलः, चन्द्रः—चन्द्रगुप्तः, बलात्—बलं सामर्थ्यं, निमादिहेत्वं वा, आश्रित्य (त्यबलोपे पञ्चमी] अभिभवितुं—पराभवितुम्, इच्छति । इत्यादीनि अभिप्रेतार्थप्रतिपादकानि, अपि पदानि हृदिस्थस्य—अभिमतस्य, [अलुक् समासः] अर्थस्य—द्वितीयार्थस्य, अगत्या—अबोधेन, द्वितीयार्थस्य प्रतिपादनं नासीदिति बुद्ध्या इत्यर्थः, अन्यान्तरे—द्वितीयार्थे, सङ्क्रमय्य—तत्तच्छब्दात् श्रोतृः अभिधाय इत्यर्थः, चन्द्रगुप्तं प्रति

सूत्रधारस्य वाक्यं वा समादायार्थमस्य वा।
भवेत् पात्रप्रवेशस्तेत् कथोद्घातः स उच्यते ॥२९३॥

वाक्यं यथा रत्नावल्याम्;—"द्वीपादन्यस्मादपि" इत्यादि सूत्रधारेण पठिते [नेपथ्ये] "एवमेतत्। कः सन्देहः? द्वीपादन्यस्मादपि" इत्यादि पठित्वा यौगन्धरायणस्य प्रवेशः। (ग)

वाक्यार्थो यथा वेण्याम्,—

"निर्वाणवैरदहनाः प्रशमादरीणां
नन्दन्तु पाण्डुतनयाः सह माधवेन।
रक्तप्रसाधितभुवः क्षतविग्रहाश्च
स्वस्था भवन्तु कुरुराजसुताः सभृत्याः॥" (घ)

शमनत्रयकेतोः क्षमात्वराक्षयात् भयमाशङ्कमानस्य पात्रस्य—नटस्य, वाक्यनेपथ्यभूतस्य इत्यर्थः, प्रवेशः।

(ग) वाक्यमिति।—अयं भावः,—काव्येन्दुप्रकाशगता "कृदिन्तानामर्थवतां पदानामन्वयाकृतेः। यः पात्रस्य प्रवेशः स्यात् स कथोद्घात इष्यते॥" इत्युक्तः कथोद्घातः, तथान्यथाकरणं पदसमुदायभङ्गभेदाभ्यां द्विप्रकारकम्, इति कथोद्घातोऽपि द्विविधः "सूत्रधारस्य वाक्यं वा" इत्यादिना लक्षित इति बोध्यम्। अतः,—प्रथमोदाहरणम्—"द्वीपादन्यस्मात्" इति; द्वितीयस्य "निर्वाण" इति।

(घ) निर्वाणेति।—पाण्डुतनयाः,—पाण्डवाः, माधवेन—कृष्णेन, सह अरीणां—शत्रूणां, दुर्योधनादीनामित्यर्थः, प्रशमात्—सन्धिकरणे शत्रुभावापगमात्, अन्यत्र—युद्धे निधनात्, निर्वाणं—निहतं, वैरस्य—विद्वेषस्य, दहनं—तापो येषां तथाभूताः सन्तः, एवञ्च शत्रुदलव्यपगमात् अन्यत्र शत्रूणां समूलमुच्छेदात् तद्विषयकविद्वेषनिहत्या प्रशमनिततज्जन्यसन्तापा इत्यर्थः, नन्दन्तु—आनन्दमनुभवन्तु; [अत्र वरिप्रशमनरूपहेतोरन्वयोपपत्तये पूर्वपदार्थप्रधानः वैरं दहन इवेति उपमितसमासो ग्राह्यः, न तु वैरमेव दहन इति रूपकसमासः, तस्य उत्तरपदार्थप्रधानतया उक्तहेतोरन्वयानुपपत्तेः। अत्र "नन्दन्तु" इति पदस्य दुःखाभावपरत्वं बोध्यं, दुःखसत्त्वे आनन्दानुदयात्, तथा च उक्तरूपविग्रह एव साधीयान्, न तु रूपकार्थबोधकः वैरमेव दहन इति विग्रहः]। सभृत्याः,—सानुजीविनः, कुरुराजस्य—धृतराष्ट्रस्य, सुताः,—पुत्राः, दुर्योधनादय

इति सूत्रधारेण पठितस्य वाक्यस्यार्थं गृहीत्वा [नेपथ्ये] "आः दुरात्मन्! हृता मङ्गलपाठक! कथं खला भवन्तु मयि जीवति धार्त्तराष्ट्राः?" ततः सूत्रधारनिष्क्रान्तौ भीमसेनश्च प्रवेशः।

यदि प्रयोग एकस्मिन् प्रयोगोऽन्यः प्रयुज्यते।
तेन पात्रप्रवेशश्चेत् प्रयोगातिशयस्तदा ॥२६४॥ (ङ)

यथा कुन्दमालायाम्,—"[नेपथ्ये] इत इतोऽवतरत्वार्या। सूत्र। कोऽयं खलु आर्य्याऽऽज्ञानेन (च) सहायकमपि मे सम्पादयति? [विलोक्य] कष्टमतिकरुणं वर्त्तते,—

लङ्केश्वरश्च भवने सुचिरं स्थितेति
रामेण लोकपरिवादभयाकुलेन।
निर्वासितां जनपदादपि गर्भगुर्वीं
सीतां वनाय परिकर्षति लक्ष्मणोऽयम्॥" (छ)

इति यावत्, रक्षेन—अनुरागेण, प्रत्ययेनेत्यर्थः, प्रसादिता—आयत्तीकृता, भूः,—पृथिवी, यैः तादृशाः, चण्डत—रक्षेन—खगाग्रहधिरेण, प्रसादिता—अवशीकृता, भूः यैः तथाभूताः, तथा चतः,—विनष्टः, विपक्षः,—शत्रवः, सन्धिश्वरत्वादिति भावः, येषां तादृशाः, अन्यत्र—चताः,—व्रणिताः, विपक्षाः,—अरयोऽपि येषां, युद्धप्रहारादिति भावः, तथाभूताः सन्तः, सुखाः,—सुखिनः, अन्यत्र—स्वर्गस्थाः, सता इत्यर्थः, ("सुखिते च सते सुखः" इति कोषः) भवन्तु। [अस्मिन् पक्षे "स्वर्गे स्यात् वा विसर्गलोपो वक्तव्यः" इति विसर्गलोपः] एतेन कुबेरालसमुपदर्शनाद्याय पात्रस्य प्रवेशः सूचितः। यथासंख्यमिदं द्वयम्।

(ङ) प्रयोगातिशयमाह, यदीति।—यदि एकस्मिन् प्रयोगे अन्यः प्रयोगः प्रयुज्यते, तेन—द्वितीयेन प्रयोगेण, पात्रस्य—नटस्य, प्रवेशः चेत् भवति, तदा प्रयोगातिशयः, भवतीति शेषः।

(च) आर्य्यापदेनात्र सूत्रधारः स्वभार्य्याऽऽज्ञानं लक्ष्यमाणो वदति,—कोऽयमित्यादि।

(छ) लङ्केश्वरश्चेति।—लङ्केश्वरः—रावणः, भवने—गृहे, लङ्कायामिति

अत्र नृत्यप्रयोगार्थं स्वभार्य्याऽऽह्वानमिच्छता सूत्रधारेण "सीतां वनाय परिकर्षति लक्ष्मणोऽयम्" इति सीतालक्ष्मणयोः प्रवेशं सूचयित्वा निष्क्रान्तेन स्वप्रयोगमतिशयान एव प्रयोगः प्रयोजितः। (ज)

कालं प्रवृत्तमाश्रित्य सूत्रधृग् यत्र वर्णयेत्।
तदाश्रयश्च पात्रस्य प्रवेशस्तत् प्रवर्त्तकम् ॥२९५॥ (झ)

यथा "आसादितप्रकट" इत्यादि। ततः प्रविशति यथा-निर्दिष्टो रामः।

यत्रैकत्र समावेशात् कार्य्यमन्यत् प्रसाध्यते।
प्रयोगे खलु तज्ज्ञेयं नाम्नाऽवलगितं बुधैः॥२९६॥(ञ)

यथा,—शाकुन्तले सूत्रधारो नटीं प्रति—"तवास्मि गीत-रागेण" इत्यादि। ततो राज्ञः प्रवेशः।

यावत्, सुचिरं—दीर्घकालं, दशमासपर्य्यन्तं व्याप्य इत्यर्थः, [कालात्यन्तसंयोगे द्वितीया, क्रियाविशेषणत्वेन वा क्लीवत्वम्] स्थिता, सीतेति शेषः, इति—इत्थं, लोकानां परिवादः,—दोषारोपणम्, अपवाद इति यावत्, ("परिवादोऽपवादे स्यात्" इति मेदिनी) तस्मात् भयं, तेन आकुलः,—कातरः, तेन, रामेण जनपदात्—देशात्, निर्वासितां—निष्कासितां, गर्भेण गुर्वीं—भारवतीं तां, गुरुगर्भभराक्रान्तामित्यर्थः, अपि सीताम् अयं लक्ष्मणः वनाय—वनं नेतुमित्यर्थः, परिकर्षति—आकर्षति। वसन्ततिलकं वृत्तम्। कुन्दमालायाः पद्यमिदम्।

(ज) अत्रेति।—अत्र—नृत्यप्रयोगे, प्रयोगः,—सीतालक्ष्मणयोः प्रवेशसूचनं, स्वप्रयोगं—नृत्यरूपम्, अतिशयानः,—अतिक्रामन्, प्रयोजितः।

(झ) कालमिति।—यत्र प्रवृत्तम्—उपस्थितं, कालं—वसन्तादिकमित्यर्थः, आश्रित्य सूत्रधृक्—सूत्रधारः, वर्णयेत्, तत्र (यः) तदाश्रयः,—तदाश्रित इत्यर्थः, पात्रस्य —नटस्य, प्रवेशः, भवति इति शेषः, तत् प्रवर्त्तकम्।

(ञ) यत्रेति।—यत्र—यस्मिन्, प्रयोगे, एकत्र—एकस्मिन् विषये, समावेशात् —सादृश्योद्भावनात्, अन्यत् कार्य्यं—पात्रप्रवेशरूपं, प्रसाध्यते—सूच्यते, तत् बुधैः,—पण्डितैः, अवलगितम् (अव-लग्-क्तः। लग् गतौ) इति नाम्ना ज्ञेयम्।

योज्यान्यत्र यथालाभं वीथ्यङ्गानीतराण्यपि॥२९७॥(ट)

अत्र—आमुखे। उद्घात्यकावलगितयोरितराणि वीथ्यङ्गानि वक्ष्यमाणानि। नखकुट्टस्तु,—

नेपथ्योक्तं श्रुतं तत्र त्वाकाशवचनं तथा।
समाश्रित्यापि कर्त्तव्यमामुखं नाटकादिषु॥
एषामामुखभेदानामेकं कञ्चित् प्रयोजयेत्॥
तेनार्थमथ पात्रं वा समाक्षिप्यैव सूत्रधृक्।
प्रस्तावनाऽन्ते निर्गच्छेत् ततो वस्तु प्रयोजयेत्॥२९८॥(ठ)

वस्तु—इतिवृत्तम्।

इदं पुनर्वस्तु बुधैर्द्विविधं परिकल्प्यते।
आधिकारिकमेकं स्यात् प्रासङ्गिकमथापरम्॥
अधिकारः फले स्वाम्यम्, अधिकारी च तत्प्रभुः।
तस्येतिवृत्तं कविभिः आधिकारिकमुच्यते॥२९९॥(ड)

फले—प्रधानफले। यथा,—वालरामायणे रामचरितम्।

(ट) योज्यानीति। अत्र—आमुखे, यथालाभं—यथासम्भवम्, इतराणि—अन्यानि, वीथ्यङ्गानि अपि योज्यानि—प्रयोक्तव्यानि।

(ठ) नेपथ्योक्तमिति।—तत्र—नाटकादिषु, तु श्रुतं नेपथ्योक्तं—नेपथ्यभाषितं, तथा आकाशवचनं समाश्रित्यापि आमुखं—प्रस्तावना, कर्त्तव्यम्। एषाम् आमुखभेदानाम्—एतद्ग्रन्थोक्तानां, नखकुट्टोक्तानां वा, एकं कञ्चित् प्रयोजयेत्—विदध्यात्। अथ सूत्रधृक्—सूत्रधारः, तेन अर्थं—वस्तु, वा—अथवा, पात्रं समाक्षिप्य—उपक्षाप्य, सूचयित्वा इति यावत्, एव प्रस्तावनाऽन्ते निर्गच्छेत्, रङ्गादिति शेषः, नेपथ्यात्: प्रविशेदिति भावः। ततः,—सूत्रधारगमनानन्तरं, वस्तु—इतिवृत्तं, प्रयोजयेत्—उपक्षापयेत्, प्रविष्टं पात्रमिति शेषः।

(ड) इदमिति।—इदं वस्तु पुनः बुधैः द्विविधं परिकल्प्यते—विभज्यते, एकं—वस्तु आधिकारिकम्, अथ अपरं प्रासङ्गिकं स्यात्। अधिकारिणां तावदाधि-

अस्योपकरणार्थन्तु प्रासङ्गिकमितीष्यते ॥३००॥(ढ)

अस्य—आधिकारिकेतिवृत्तस्य उपकरणनिमित्तं यच्चरितं तत् प्रासङ्गिकम्। यथा,—सुग्रीवादिचरितम्।

पताकास्थानकं योज्यं सुविचार्य्येह वस्तुनि॥३०१॥(ण)

इह—नाट्ये।

यत्रार्थे चिन्तितेऽन्यस्मिंस्तल्लिङ्गोऽन्यः प्रयुज्यते।
आगन्तुकेन भावेन पताकास्थानकन्तु तत् ॥३०२॥(त)

तल्लक्षणाह,—

सङ्क्षैवार्थसम्पत्तिर्गुणवत्युपचारतः।
पताकास्थानकमिदं प्रथमं परिकीर्त्तितम्॥३०३॥(थ)

यथा रत्नावल्यां,—"वासवदत्तेयम्" इति राजा यदा तत्

कारिकस्थानजनकं, तत्राधिकारस्थानाधीनम्, इत्यधिकारं निरूपयति, अधिकार इति।—फले—कार्य्यस्य प्रधानफले, आस्यं—स्वामित्वम्, अधिकारः, तस्य—स्वाम्यस्य, प्रभुत्व अधिकारी, तस्य—अधिकारिणः, इतिवृत्तस्य, कविभिः,—विदुषां,—आधिकारिकम् उच्यते।

(ढ) अस्येति।—अस्य—आधिकारिकेतिवृत्तस्य, तु—पुनः, उपकरणार्थम्—उपकाराय प्रसङ्गेन निर्वृत्तं वस्तु, प्रासङ्गिकम् इति इष्यते।

(ण) पताकास्थानप्रयोगनियममाह, पताकेति।—इह वस्तुनि—नाट्यरूपे इतिवृत्ते, सुविचार्य—सम्यक् विचिन्त्य, पताकास्थानकं योज्यं—प्रयोक्तव्यम्।

(त) पताकास्थानलक्षणमाह, यत्रेति। यत्र अन्यस्मिन् अर्थे—प्रयोजने, चिन्तिते, तल्लिङ्गः,—तस्य अर्थस्य लक्षणान्वितः, अन्यः,—अन्यार्थः, आगन्तुकेन—अतर्कितेन, भावेन—उपस्थापितेन वस्तुना, प्रयुज्यते—क्रियते, तत्—निरूपितलक्षणम् इदं, तदिति शेषः, पताकास्थानकं, बोध्यमिति शेषः।

(थ) सङ्क्षेति।—उपचारतः,—अतर्कितभावोपनतत्वात्, सङ्क्षेपा एव गुणवती—परमप्रीतिकारी, अर्थसम्पत्तिः,—फलसाभः, यत्र भवेदिति शेषः, इदं तदिति शेषः, पताकास्थानकं, प्रथमम्—आद्यं, परिकीर्त्तितम्।

कण्ठपाशं मोचयति, तदा तदुक्त्या (ङ) "सागरिकेयम्" इति प्रत्यभिज्ञाय "कथं प्रिया मे सागरिका,—

अलमलमतिमात्रं साहसेनानुना ते,
त्वरितमयि! विमुञ्च त्वं लतापाशमेतम्।
चलितमपि निरोद्धुं जीवितं जीवितेशे!
क्षणमिह मम कण्ठे बाहुपाशं निधेहि॥" (च)

इत्यादि फलरूपार्थसम्पत्तिः पूर्वापेक्षया उपचारातिशयात्, गुणवती—उत्कृष्टा। (न)

वचः सातिशयश्लिष्टं नानाबन्धसमाश्रयम्।
पताकास्थानकमिदं द्वितीयं परिकीर्त्तितम्॥३०४॥(प)

(ङ) वासवदत्तेयमिति।—वासवदत्तारूपधारिणी सागरिका सङ्केतं प्राप्ता, वासवदत्तायां तद्विज्ञातमिति सागरिका वासवदत्तापरिभवभयेन गले पाशं दत्त्वा तत्रैव मर्तुमारब्धा, इति राज्ञः सागरिकायां वासवदत्ताभ्रम इति बोध्यम्। तदुक्त्या—सागरिकोक्त्या।

(च) अलमिति।—अतिमात्रं यथा भवति तथा, ते तव, अनुना—उद्दम्भनद्वारा प्राणत्यागरूपेण, साहसेन—साहसिकव्यापारेण, दुष्टात्मरक्षव्यापारेणेति यावत्, अलम् अलम्, (सम्भ्रमे द्विरुक्तिः)। अयि सागरिके! त्वम् एतं लतापाशं, त्वरितं—झटिति, विमुञ्च—परित्यज, हे जीवितेशे!—प्राणेश्वरि! चलितं—स्थानात् दूरं गतं, मृतदेहं परित्यज्य बहिर्गन्तुं प्रवृत्तमिति भावः, अपि जीवितं—मदीयान् प्राणान् निरोद्धुं क्षणम्, इह—अस्मिन्, मम कण्ठे, बाहुपाशं—पाशाकारं बाहुयुगलं, निधेहि—अर्पय। अत्र वासवदत्तायाः अनुनयपूर्वकं सुरतं राज्ञोऽभिप्रेतं, तदन्यत्र सागरिकायाः अनुनयपूर्वकसुरतस्यानुष्ठानम्। वासवदत्ता दृष्टा इति विकलचित्तेन राज्ञा तर्कितस्य सागरिकाप्राप्तिरूपस्य कारणस्य फलं सागरिकासुरतम्। मालिनी वृत्तम्।

(छ) फलेति।—फलरूपार्थसम्पत्तिः,—फलरूपस्य—सागरिकारूपस्य, अर्थस्य सम्पत्तिः,—लाभः। पूर्वापेक्षया—वासवदत्तालाभापेक्षया इत्यर्थः, उपचारातिशयात्—अतर्कितोपनतत्वातिशयात्।

(प) वच इति।—सातिशयम्—अतिमात्रं यथा तथा, श्लिष्टं—नानार्थं,

यथा वेण्याम् ;—"रक्तप्रसाधितभुवः क्षतविग्रहाश्च स्वस्था भवन्तु कुरुराजसुताः सभृत्याः॥" अत्र रक्तादीनां रुधिरशरीरार्थहेतुकश्लेषवशेन बीजार्थप्रतिपादनात् नेतृमङ्गलप्रतिपत्तौ सत्यां द्वितीयं पताकास्थानम्। (फ)

अर्थोपक्षेपकं यत्तु लीनं सविनयं भवेत्।
श्लिष्टप्रत्युत्तरोपेतं तृतीयमिदमुच्यते॥ ३०५॥ (ब)

लीनम्—अव्यक्तार्थं, श्लिष्टेन—सम्बन्धयोग्येनाभिप्रायान्तरप्रयुक्तेन, प्रत्युत्तरेणोपेतं, सविनयं—विशेषनिश्चयप्राप्त्या सहितं, सम्पाद्यते यत् तत् तृतीयं पताकास्थानम्। (भ)

यथा वेण्यां द्वितीयेऽङ्के—

"कञ्चुकी। देव! भग्नम्। राजा। केन? कञ्चु। भीमेन। राजा। कस्य? कञ्चु। भवतः। राजा। आः! किं प्रलपसि? कञ्चु। [समयं] देव! ननु ब्रवीमि,—भग्नं भीमेन भवतः।

नानाविधो यो बन्धः,—रचना, विविधविशेषणसम्बन्ध इति यावत्, तत्समाश्रयं—तद्विषयकं, वचः,—वचनं, द्वितीयम् इदं पताकास्थानकं परिकीर्त्तितम्।

(फ) अत्र सामान्यलक्षणं सङ्गमयति, अत्रेति।—रक्तादीनां—रक्तादिपदानाम्, [आदिना प्रसाधितविग्रहपदयोर्ग्रहणम्]। रुधिरशरीरेति।—रुधिरशरीरयोर्मध्ये "मण्डितः" इति ज्ञेयम्। बीजार्थप्रतिपादनात्—भीमसेनक्रोधोपचितो युधिष्ठिरोत्साहः सन्दर्भस्य बीजं, तस्य अर्थः,—प्रयोजनं, फलमित्यर्थः, शत्रुनिपातनरूपमिति भावः, तस्य प्रतिपादनात्—सूचनात्, नेतुः,—नायकस्य, युधिष्ठिरस्य इत्यर्थः, मङ्गलप्रतिपत्तौ—मङ्गलानुष्ठाने निश्चिते, तथा च प्रतिनायकस्य दुर्योधनस्य मङ्गले चिन्तिते आगन्तुकेन भावेन (प्रधानफलसूचनेन इत्यर्थः) नेतृमङ्गलप्रतिपत्तिरिति द्वितीयं पताकास्थानकं बोध्यम्।

(ब) अर्थोपक्षेपकमिति।—अर्थस्य—कार्य्यस्य, फलरूपस्य इति यावत्, उपक्षेपकम्—उपस्थापकं, वक्ष्यमाणविष्कम्भकादिपञ्चकान्यतममित्यर्थः। स्पष्टमन्यत्।

(भ) लीनमिति।—सम्बन्धयोग्येन—प्रस्तुतान्वयोपयुक्तेन, अभिप्रायान्तरप्रयुक्तेन—अप्रस्तुतबोधाभिप्रायेण प्रयुक्तेन इत्यर्थः।

राजा। धिक्! वृद्धापसद! कोऽयमद्य ते व्यामोहः? (म)

कञ्च। देव! न व्यामोहः, सत्यमेव,—

भग्नं भीमेन भवतो मरुता रथकेतनम्।

पतितं किङ्किणीक्वाणबद्धाक्रन्दमिव क्षितौ॥" (य)

अत्र दुर्य्योधनोरुभङ्गरूपप्रस्तुतसङ्क्रान्तमर्थोपक्षेपणम्। (र)

द्व्यर्थो वचनविन्यासः सुश्लिष्टः काव्ययोजितः।
प्रधानार्थान्तरापेक्षी पताकास्थानकं परम्॥३०६॥(ल

यथा रत्नावल्याम्,—

"उद्दामोत्कलिकां विपाण्डुररुचिं प्रारब्धजृम्भां क्षणा-
दायासं श्वसनोद्यमैरविरलैरातन्वतीमात्मनः।
अद्योद्यानलतामिमां समदनां नारीमिवान्यां ध्रुवं
पश्यन् कोपविपाटलद्युति मुखं देव्याः करिष्याम्यहम्॥" (व)

(म) वृद्धेति।—वृद्धापसद—वृद्धेषु अपसदः,—अधमः, तत्सम्बुद्धौ, वृद्धतयाऽपहतविवेकेष्वधम इति भावः। व्यामोहः,—वैचित्त्यं, मदोद्रेक इति यावत्।

(य) भग्नमिति।—भीमेन—भयानकेन, मरुता—वायुना, भग्नं—खण्डितं, भवतः,—तव, रथकेतनं—रथध्वजः, किङ्किण्यः,—क्षुद्रघण्टिकाः, तासां क्वाणः,—शब्दः, तेन बद्धः,—कृतः, आक्रन्दः,—रोदनध्वनिर्येन तथाभूतमिव, क्षितौ—भूमौ, पतितम्। यथा कोऽपि शत्रुणा आहतः क्षितौ पतन् रोदिति, तद्वदिति भावः। भवत इति च प्रस्तुते ऊरुभङ्गेऽप्यन्वययोग्यम्; मरुता इति विशेषणिश्चयः, अत्र रथकेतनभङ्गनिवेदनमभिमतम्, ऊरुभङ्गनिवेदनमुपपन्नम्। पथ्यावक्त्रं वृत्तम्।

(र) एतदेवोपपादयति, अत्रेति।—सङ्क्रान्तं—पर्य्यवसन्नमित्यर्थः।

(ल) द्व्यर्थ इति।—द्व्यर्थः,—अर्थद्वयसहितः, सुश्लिष्टः,—सुसम्बद्धः, काव्येषु योजितः,—प्रयोजितः, काव्यप्रयोगार्हः, न तु सभाऽभ्यन्तरतया काव्यप्रयोगायोग्य इत्यर्थः; सर्वत्रैव काव्ययोजितस्य विद्यमानत्वेन काव्ययोजितत्वविशेषणस्य निरर्थकत्वापत्तेरिति भावः। प्रधानं—फलम्, एव (यत्) अर्थान्तरम्—अर्थविशेषः, तत् अपेक्षते इति प्रधानार्थान्तरापेक्षी—मुख्यफलरूपस्य अर्थस्य सूचक इत्यर्थः, परं—चतुर्थं, पताकास्थानकम्।

(व) उदाहरति, उद्दामेति।—वत्सराजस्य विदूषकं प्रत्युक्तिरियम्। अहम्

अत्र भाव्यर्थः सूचितः। (ग)

एतानि चत्वारि पताकाख्यानानि क्वचिन्मङ्गलार्थं क्वचिदमङ्गलार्थमपि सर्वसन्धिषु भवन्ति। काव्यकर्तुरिच्छावशाद् भूयोऽपि भवन्ति। यत् पुनः केनचिदुक्तं,—"मुखसन्धिमारभ्य सन्धिचतुष्टये क्रमेण भवन्ति" इति, तदन्ये न मन्यन्त, एषामत्यन्तमुपादेयानामनियमेन (घ) सर्वत्रापि सर्वेषामपि भवितुं युक्तत्वात्।

उद्गमन—उत्कटं यथा तथा, उत्—उद्गताः, कलिकाः,—कोरकाः, यस्यास्ताम्, अत्यन्त—उद्गमा—उत्कटा, उत्कलिका—कान्तार्थमुत्कण्ठा, ("कलिका कोरकः पुमान्" "उत्कण्ठोत्कलिके समे" इति अमरः) यस्याः, तां, विपाण्डुरा—कुसुमविकासात् विशेषेण पाण्डुवर्णा, रुचिः,—कान्तिः यस्याः, तथाभूताम्, अत्यन्त—विशेषेण पाण्डुकान्तिं, प्रारब्धजृम्भां—विकासोद्यताम्, अत्यन्त—जृम्भा—आलस्यमङ्गः, प्रारब्धा जृम्भा यया तादृशीं, (कामाभिलाषव्यञ्जकमिदम्) अविरलैः,—घनैः, स्वेदलोद्गमैः,—वात्याप्रसवैः, अत्यन्त—निश्वासवद्भिः, अथात—अथ अथ, मुहुर्मुहुरित्यर्थः, आत्मनः,—स्वस्य, आयासम्—श्रमः ततः विचिपन्, अत्यन्त—क्लान्तिम्, आतन्वतीं—प्रकटयन्तीम्, समदनां—मदनशान्तिताम्, अत्यन्त—कामार्त्तां, उपाध्यायानलताम्—उपवनलतिकां, अन्याम्—अपरां, नारीमिव अद्य, पश्यन्—अवलोकयन्, दैत्याः,—महाराजाः, वासवदत्तायां इति यावत्, सुखं, भृशं—निश्चितं, क्रोधेन विपाटला द्युतिः यस्य तादृशं, करिष्यामि। साध्वी स्त्री भर्तारम् अपरामवलोकयन्तं दृष्ट्वा कुप्यति इति प्रसिद्धिः; यथा विरक्तक्लिष्टसागरिकादर्शनेन तस्याः क्रोधः, तथोपाध्यानलतादर्शनक्रतकालविलम्बेनापीति भावः। आर्द्धखण्डितोक्तिं वृत्तम्। रत्नावल्यां पद्यमिदम्।

(ग) अत्र भावी अर्थः,—राजानं सागरिकाऽऽसक्तं दृष्ट्वा वासवदत्ता कोपं करिष्यतीत्येवंरूपप्रधानार्थान्तरमित्यर्थः, तन्मूलकमिति बोध्यम्; यद्वा,—विरक्तक्लिष्टसागरिकासङ्गमः, प्रधानमर्थः सूचितः; द्वितीये, श्लेषवशेनैव प्रधानार्थसूचनम्, अत्र तु न तथेति भेदः। इह सागरिकाप्रसादे चिन्तिते दैव्याः प्रसादोऽनुद्वेगप्राय इति सामान्यलक्षणगमनम्।

(घ) एतानीति।—भूयोऽपि—पुनरपि, भवन्ति, प्रयुञ्जानैरिति शेषः। उपादेयानां—सुहृदयजनोरस्याणामित्यर्थः, अविचलेन—नियमं विनेत्यर्थः।

यत् स्यादनुचितं वस्तु नायकस्य रसस्य वा।
विरुद्धं तत् परित्याज्यमन्यथा वा प्रकल्पयेत्॥३०७(स)

अनुचितमिति।—उक्तं यथा—रामस्य छद्मना बालिवधः। तच्च उदात्तराघवे नोक्तमेव। सुग्रीववीरचरिते तु बाली रामवधार्थमागतो रामेण हतः, इत्यन्यथा कृतः।

अङ्गेष्वदर्शनीया या वक्तव्यैव च सम्मता।
या च स्यात् वर्षपर्य्यन्तं कथा दिनद्वयादिजा॥
अन्या च विस्तरा सूच्या साऽर्थोपक्षेपकैर्बुधैः॥३०८॥(ब)

अङ्गेषु अदर्शनीया कथा—युद्धादिकथा।

वर्षादूर्ध्वन्तु यद्वस्तु तत् स्याद्वर्षाद्यधोभवम्॥३०९॥(ब)

(स) यदिति।—यत् वस्तु नायकस्य वा रसस्य अनुचितं—स्वरूपच्युतिप्रत्यायकं, तत् विरुद्धं—प्रतिकूलं, परित्याज्यं स्यात्, वा अन्यथा—उचितं यथा भवति तथा, पुराणादिविरुद्धमपि स्वेच्छया इति शेषः, प्रकल्पयेत्—रचयेत्। अत एवोक्तम्,—"अपारे काव्यसंसारे कविरेव प्रजापतिः। यथास्मै रोचते विश्वं तथेदं परिवर्त्तते॥ शृङ्गारी चेत् कविः काव्ये जातं रसमयं जगत्। स एव वीतरागश्चेन्नीरसं सर्वमेव तत्॥ भावानचेतनानपि चेतनवच्चेतनाचेतनवत्। व्यवहरति यथेष्टं सुकविः काव्ये स्वतन्त्रतया॥" इति ध्वन्यालोके।

(ब) अङ्गेष्विति।—या—कथा, अङ्गेषु, अदर्शनीया—निषेधनीया, सा सम्मता—वक्तुरभीष्टा चेत्, वक्तव्या—कथया निबन्धव्या, एव, न तु कार्य्येत इति भावः; या—कथा, वर्षपर्य्यन्तं—संवत्सरसाध्येति भावः, सा दिनद्वयादिजा—दिवसद्वयादिभिः निर्वर्त्त्या इत्यर्थः, स्यात्। ["नानेकदिननिर्वर्त्त्यकथया सम्प्रयोजितः" इत्यनेन तस्य अङ्के निषिद्धत्वेऽपि वर्षपर्य्यन्तम् इति नियमार्थं पृथगुपादानम्]। अन्या, सा विस्तरा—अतिमहती कथा, सा—सम्मताऽपि कथा, बुधैः—पण्डितैः, अर्थोपक्षेपकैः,—अर्थसूचकैः बाकोः, वक्ष्यमाणैर्विष्कम्भकादिभिरित्यर्थः, सूच्या—प्रकाश्या।

(ब) वर्षादिति।—यत् वस्तु वर्षात् ऊर्द्धं—वत्सरादधिकसम्पाद्यमित्यर्थः, तत् वर्षात् अधोभवं—वर्षात् न्यूनकालेन निर्वर्त्त्यमित्यर्थः, स्यात्।

उक्तं हि मुनिना,—

"अङ्कच्छेदे कार्य्यं मासकृतं वर्षसञ्चितं वाऽपि।
तत् सर्वं कर्त्तव्यं वर्षादूर्द्धं न तु कदाचित्॥" (ख)

एवञ्च चतुर्दशवर्षव्यापिन्यपि रामवनवासे ये ये विराधवधादयः कथांशाः, ते ते वर्ष-वर्षावयव-दिनयुग्मादीनामेकतमेन सूचनीया न विरुद्धाः।

दिनावसाने कार्य्यं यद् दिनेनैवोपपद्यते।
अर्थोपक्षेपकैर्वाच्यमङ्कच्छेदं विधाय तत्॥३१०॥(ग)

के ते अर्थोपक्षेपकाः? (घ) इत्याकाङ्क्षायामाह,—

अर्थोपक्षेपकाः पञ्च विष्कम्भकप्रवेशकौ।
चूलिकाऽङ्कावतारोऽथ स्यादङ्कमुखमित्यपि॥३११॥(ङ)

अथ विष्कम्भकः,—

वृत्तवर्त्तिष्यमाणानां कथाऽंशानां निदर्शकः।
सङ्क्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः।

(ख) अङ्कच्छेद इति।—अङ्कस्य छेदे—अवसाने, विष्कम्भकादावित्यर्थः, यत् कार्य्यं मासकृतं, वा, वर्षसञ्चितं—संवत्सरकृतमित्यर्थः, तत् सर्वं वर्षात् ऊर्द्धं कदाचित् न तु—नैव, कर्त्तव्यम्।

(ग) एकदिनसिद्धत्वेन कथाऽंशस्य निर्वर्त्तनीयत्वप्रकारमाह, दिनेति।—यत् कार्य्यं दिनेन—सम्पूर्णेन दिवसेन, उपपद्यते—सङ्कुलते, तत्—सम्पूर्णदिवसनिर्वर्त्त्यं कार्य्यमित्यर्थः, अङ्कच्छेदम्—अङ्कविरामं, विधाय—कृत्वा, दिनावसाने—दिवसावसानावसरे, अर्थोपक्षेपकैः,—वक्ष्यमाणैः विष्कम्भकादिभिः, वाच्यं—वक्तव्यम्।

(घ) अर्थोपक्षेपकानभिधातुमाकाङ्क्षामुत्थापयति, के ते? इति।—के?—किंस्वरूपाः?

(ङ) अर्थेति।—अर्थस्य—कार्य्यस्य, उपक्षेपकाः,—उपक्षेपयितारः, पञ्च—पञ्चसङ्ख्यकाः। तान् नामतो निर्दिशति,—विष्कम्भकः, प्रवेशकः, चूलिका, अङ्कावतारः, तथा अङ्कमुखम् इति।

मध्येन मध्यमाभ्यां वा पात्राभ्यां सम्प्रयोजितः।
शुद्धः स्यात् स तु सङ्कीर्णो नीचमध्यमकल्पितः॥२१२॥(च)

तत्र शुद्धो यथा,—मालतीमाधवे श्मशाने कपालकुण्डला। सङ्कीर्णो यथा,—रामाभिनन्दे चपणककापालिकौ।

अथ प्रवेशकः,—

प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजितः।
अङ्कद्वयान्तर्विज्ञेयः शेषं विष्कम्भके यथा॥२१३॥(छ)

अङ्कद्वयस्यान्तरिति प्रथमाङ्कस्य प्रतिषेधः। यथा—वेण्याम् अश्वत्थामाङ्के राक्षसमिथुनम्।

अथ चूलिका,—

अन्तर्जवनिकाऽऽसंस्थैः सूचनाऽर्थस्य चूलिका॥२१४॥(ज)

यथा,—वीरचरिते चतुर्थाङ्कस्यादौ। [नेपथ्ये] "भो भोः

(च) विष्कम्भकमाह, शुद्धेति।—शुद्धवर्त्तिष्यमाणानां—शुद्धानाम्—अतीतानां, वर्त्तिष्यमाणानाम्—आगामिनां, कथांशानां निदर्शकः,—सूचकः, अङ्कस्य आदौ—प्रथमं, दर्शितः,—सङ्क्षिप्तः,—सङ्क्षेपेणोक्तः, यः अर्थः,—कथाविभागः, स विष्कम्भः। स तु मध्येन—मध्यविधेन एकेन पात्रेण, वा मध्यमाभ्यां पात्राभ्यां सम्प्रयोजितः चेत् भवति, तदा शुद्धः स्यात्। नीचमध्यमाभ्यां, पात्राभ्यामिति शेषः, कल्पितश्चेत् सङ्कीर्णः,—मिश्रः, विष्कम्भको नाम अर्थोपक्षेपकः इति शेषः।

(छ) प्रवेशकमाह, प्रवेशक इति।—नीचपात्रप्रयोजितः,—नीचानि—जात्या, न तु कर्मतो निकृष्टानि, यानि पात्राणि तैः प्रयोजितः,—कृतप्रयोग इत्यर्थः, अनुदात्तया—प्राकृतया, उक्त्या—भाषया, रचितः कथाविभागः इति शेषः, प्रवेशकः। ननु स कुत्र स्यात्? इत्याह, अङ्केति।—स तु अङ्कद्वयस्य,—द्वयोरङ्कयोर्मध्ये, विज्ञेयः,—विधातव्यः इत्यर्थः। ननु किमयमेतावत्स्वरूप एव? इत्याह, शेषमिति।—शेषं—सङ्क्षेपोक्त्यादि, विष्कम्भके यथा—विष्कम्भकवत्, शेषमिति शेषः।

(ज) चूलिकामाह, अन्तरिति।—जवनिका—तिरस्करिणी, तस्याः अन्तः,—अभ्यन्तरे, आसंस्थैः (जनैः) या अर्थस्य—आर्थस्य, सूचना सा चूलिका।

वैमानिकाः! प्रवर्त्तन्तां रङ्गमङ्गलानि" इत्यादि। "रामेण परशुरामो जितः" इति नेपथ्ये पात्रैः सूचितम्।

अथ अङ्कावतारः,—

अङ्कान्ते सूचितः पात्रैस्तदङ्कस्याविभागतः।
यत्राङ्कोऽवतरत्येषोऽङ्कावतार इति स्मृतः॥३१५॥(झ)

यथा,—अभिज्ञाने पञ्चमाङ्के पात्रैः सूचितः षष्ठाङ्कस्तदङ्कस्याङ्कविशेष इवावतीर्णः।

अथाङ्कमुखम्,—

यत्र स्यादङ्क एकस्मिन्नङ्कानां सूचनाऽखिला।
तदङ्कमुखमित्याहुर्बीजार्थस्यापकञ्च तत्॥३१६॥(ञ)

यथा,—मालतीमाधवे प्रथमाङ्कादौ कामन्दक्यवलोकिते भूरिवसुप्रभृतीनां भाविभूमिकानां परिच्छिन्नकथाप्रबन्धस्य च प्रसङ्गात् सन्निवेशं सूचितवत्यौ। (ट)

अङ्कान्तपात्रैर्वाऽङ्कास्यं छिन्नाङ्कस्यार्थसूचनात्॥३१७॥ (ठ)

(झ) अङ्कावतारमाह, अङ्कान्ते इति।—अङ्कस्य अन्ते—अवसाने, पात्रैः,—नाटकीयपुरुषैः, न तु कविना इति भावः, सूचितः,—सङ्केत्य दर्शितः, अथ च तदङ्कस्य—यस्यान्ते पात्रैः सूचितः, तस्याङ्कस्य, अविभागतः,—अविच्छेदेन, यत्र—य इत्यर्थः, [अव्ययमेतत्] अङ्कः अवतरति, एषः अङ्कावतार इति स्मृतः,—कथितः।

(ञ) अङ्कमुखमाह, यत्रेति।—यत्र एकस्मिन् अङ्के अङ्कानां—सर्वेषामङ्कार्थानाम्, अखिला—समस्ता, सूचना स्यात्, तत् अङ्कमुखं, यत् केवलं बीजार्थस्य—सूक्ष्मभूतस्य विषयस्य, व्यापकं—सूचकं, च तदप्यङ्कमुखम् इत्याहुः।

(ट) भावीति।—भाविभूमिकानां—भविष्यन्नेपथ्यपात्राणाम्, परिच्छिन्नः,—सङ्क्षिप्तः, यः कथाप्रबन्धः, तस्य प्रसङ्गात्—प्रस्तुतमनुसृत्य, सन्निवेशं सूचितवत्यौ।

(ठ) अथ धनिकमतेनाङ्कमुखमाह, अङ्कान्तेति।—वा—यदा, अङ्कान्ते (प्रविष्टैः) पात्रैः,—नटैः, छिन्नस्य—छेदं प्राप्तस्य, अङ्कस्य—विच्छेदकस्य इत्यर्थः, अर्थस्य सूचनात्, अङ्कास्यम्—अङ्कमुखम्।

अङ्कान्तपात्रैः,—अङ्कान्ते प्रविष्टैः पात्रैः। यथा वीरचरिते द्वितीयाङ्कान्ते,—"सुमन्त्रः। [प्रविश्य] भगवन्तौ वशिष्ठविश्वामित्रौ भवतः सभार्गवानाह्वयतः। इतरौ। क्व भगवन्तौ? सुमन्त्रः। महाराजदशरथस्यान्तिके। इतरौ। तत् तत्रैव गच्छामः" इत्यङ्कपरिसमाप्तौ "ततः प्रविशत्युपविष्टा वशिष्ठविश्वामित्रपरशुरामाः" इत्यत्र पूर्वाङ्कान्त एव प्रविष्टेन सुमन्त्रपात्रेण श्रुतानन्दजनककथाविच्छेदे उत्तराङ्कमुखसूचनादङ्कास्यमिति। एतच्च धनिकमतानुसारेणोक्तम्।

अन्ये तु—"अङ्कावतारेणैव इदं गतार्थम्" इत्याहुः। (ङ)

अपेक्षितं परित्यज्य नीरसं वस्तु विस्तरम्।
यदा सन्दर्शयेच्छेषमामुखानन्तरं तदा॥
कार्यो विष्कम्भको नाट्य आमुखाक्षिप्तपात्रकः॥११८॥ (च)

यथा,—रत्नावल्यां यौगन्धरायणप्रयोजितः।

यदा तु सरसं वस्तु मूलादेव प्रवर्त्तते।
आदावेव तदाऽङ्कः स्यादामुखाक्षेपसंश्रयः॥११९॥ (छ)

यथा,—शाकुन्तले।

(ङ) अन्ये इति।—अन्ये तु—नाट्यप्रदीपकारादयस्तु, अङ्कावतारेण—अङ्कान्तरङ्कारोपस्थितिस्वीकारेण, एव गतार्थं—ज्ञातार्थम्। एवंविधमङ्कमुखञ्च स्वीकारो निरर्थक इति भावः, इत्याहुः।

(च) प्रथमाङ्कादावपि कर्त्तव्यतामाह, अपेक्षितमिति।—नीरसं विस्तरं वस्तु परित्यज्य—विच्छिद्य, अपेक्षितम्—आकाङ्क्षितं, यदा सन्दर्शयेत्, तदा शेषं—सरसं वस्तु, सन्दर्शयितुमिति शेषः, नाट्ये आमुखानन्तरम्—आमुखात्—प्रस्तावनायाः, अनन्तरम्—पश्चात्, आमुखेन आक्षिप्तम्—आकृष्टं, पात्रं यत्र तादृशः, विष्कम्भकः कार्यः।

(छ) यदेति।—यदा तु मूलादेव—मूलमारभ्यैव, सरसं वस्तु प्रवर्त्तते, तदा आदौ एव आमुखम् आक्षिपति इति तथोक्तः संश्रयो यस्य तथाभूतः, आमुखसूचितः इत्यर्थः, अङ्कः स्यात्।

विष्कम्भकाद्यैरपि नो वधो वाच्योऽधिकारिणः।
अन्योऽन्येन तिरोधानं न कुर्याद्रसवस्तुनोः॥२२०॥(त)

रसः,—शृङ्गारादिः। यदुक्तं ध्वनिकृता,—

"न चातिरसतो वस्तु दूरं विच्छित्तिमां नयेत्।
रसं वा न तिरोदध्याद् वस्त्वलङ्कारलक्षणैः॥" इति। (थ)

बीजं बिन्दुः पताका च प्रकरी कार्य्यमेव च।
अर्थप्रकृतयः पञ्च ज्ञात्वा योज्या यथाविधि॥२२१॥ (द)

अर्थप्रकृतयः,—प्रयोजनसिद्धिहेतवः।

(त) विष्कम्भकाद्यैरिति।—विष्कम्भकाद्यैः अपि इत्यपिना अङ्केरपीत्यर्थः। अधिकारिणः,—प्रधानफलप्रभोः, वधः,—मारणं मरणं वा, नो वाच्यः,—न वर्णनीयः, किं पुनः साक्षाद्दर्शनीय इति भावः। इदमुक्तं भवति, नायको नायिकैव वा नाटकफलाधिदेवता भवति, तद्वधे वर्ण्यमाने नाटकफलस्यापि संहारः, अस्य तदायत्तत्वात्; तथा सति प्रकृते सर्वतो विघ्नापत्तिः इति। तथा रसस्य, वस्तुनः,—इतिहासस्य, च अन्योऽन्येन—परस्परेणेत्यर्थः, तिरोधानं न कुर्यात्, रसे इतिहासयोगः, इतिहासे रसयोगः यथा स्यात् तथा रचयितव्यमित्यर्थः, नैतयोः परस्परं विच्छेदः कार्य इति भावः। यथोक्तं भरतमुनिना,—"अङ्के प्रवेशके वा प्रकरणमाश्रित्य नाटके वाऽपि। न वधः कर्त्तव्यः स्याद् यस्तव स नायकः स्यात्॥ अवतरणमेव कार्ये सन्धिर्वा यद्यमेव वा नित्यम्। बहुभिः कार्यविशेषैः प्रवेशके सूचयेद् वाऽपि॥" इति।

(थ) ध्वनिकृतेति।—अतिरसतः,—अतिरसात्, रसस्यातिरेकेणेत्यर्थः, वस्तु—इतिहासं, दूरम्—अत्यर्थं, विच्छित्तिमां—विच्छेदं, न च नयेत्—नैव प्रापयेत्; तथा वस्तुनः,—इतिहासस्य, अलङ्कारलक्षणैः,—अलङ्कृतिरचनैः, अनुप्रासोपमाऽऽदीनां विधानैरित्यर्थः, रसं वा न तिरोदध्यात्—न विच्छेदं गमयेदित्यर्थः। अतः यथा रसवस्तुनोः सम्बन्धोऽपि सम्पद्येत, परस्परस्य तदन्यतरोत्कर्षेण एकस्य तिरोधानं न स्यात् तथा यतितव्यमिति भावः।

(द) बीजमिति।—अर्थस्य—प्रयोजनस्य, प्रकृतयः,—सिद्धिहेतवः, पञ्च। तासां नामतो निर्दिशति,—बीजं, बिन्दुः, पताका, प्रकरी, तथा कार्यम् इति। फलमाह,—(एताः बीजाद्याः अर्थप्रकृतीः) ज्ञात्वा यथाविधि, योज्याः,—प्रयोक्तव्या इत्यर्थः।

तत्र बीजम्,—

अल्पमात्रं समुद्दिष्टं बहुधा यद्विसर्पति।
फलस्य प्रथमो हेतुर्बीजं तदभिधीयते ॥३२२॥ (ध)

यथा,—रत्नावल्यां वत्सराजस्य रत्नावलीप्राप्तिहेतुर्दैवानुकूल्य-लालितो यौगन्धरायणव्यापारः। यथा वा,—वेण्यां द्रौपदीकेश-संयमनहेतुर्भीमसेनक्रोधोपचितो युधिष्ठिरोत्साहः। (न)

अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम् ॥३२३॥(प)

यथा,—रत्नावल्याम् अनङ्गपूजापरिसमाप्तौ कथाऽर्थविच्छेदे सति "उदयनस्येन्दोरिवोद्दीप्यते" इति सागरिका श्रुत्वा [सहर्षं] "कधं एसो सो उदअणणरिंदो" इत्यादिरवान्तरार्थहेतुः। (फ)

(ध) बीजमाह, अल्पमात्रमिति।—यत् अल्पमात्रं—यत्किञ्चित्, समुद्दिष्टं सत् बहुधा विसर्पति—विस्तारं गच्छति, सहकारियोगेनोपचितं सत् विविधावान्तर-कार्याणि जनयति इत्यर्थः, तत् फलस्य—प्रधानफलस्य, प्रथमः,—प्रधानं, हेतुः,—कारणं, बीजम् अभिधीयते—कथ्यते। अत्र विशेषो यथोक्तः मातृगुप्ताचार्यैः,—"फले यत्र हि संहारः फलबीजन्तु तद्भवेत्। वस्तुबीजं कथा श्रेया अर्थबीजन्तु नायकः॥" इति। प्रथमं बीजमुत्पन्नः, ततः परं बहुविधविस्तारवान् कार्यप्रयोजनः कारणविशेषः बीजवत् बीजमिति सारः।

(न) यथा रत्नावल्यामिति।—रत्नावल्याः,—सागरिकायाः, प्राप्तिहेतुः दैवस्य अनुकूल्यं—फलाभिमुखत्वं तेन लालितः,—अनुमोदित इत्यर्थः, यौगन्धरायणस्य व्यापारः बीजं, रत्नावलीप्राप्तिरूपं तत्फलं बोध्यमिति शेषः। वेण्यामिति।—द्रौपदी-केशसंयमनहेतुः भीमसेनस्य क्रोधेन उपचितः,—वृद्धिं गतः, युधिष्ठिरस्य उत्साहः, वेणीसंहारनाटकस्य बीजं, द्रौपदीकेशसंयमनञ्च तत्फलं बोध्यमिति शेषः।

(प) बिन्दुमाह, अवान्तरेति।—अवान्तरस्य—सङ्घाबाह्यरूपसम्बन्धेनटीकायाः, अर्थस्य—प्रयोजनस्य, विच्छेदे—समाप्तौ, अच्छेदस्य—अविरामस्य, कारणं बिन्दुः। तथोक्तम्,—"अवान्तरप्रबन्धविच्छेदे तत्सन्धानकारी बिन्दुः। जले तैलबिन्दुवत् विस्तारित्वात् बिन्दुरिति व्यपदिश्यते॥" इति।

(फ) उदाहरति, यथेति।—रत्नावल्याम् अनङ्गस्य—कामस्य, पूजा तथाः

व्यापि प्रासङ्गिकं वृत्तं पताकेत्यभिधीयते ॥३२४॥ (ब)

यथा,—रामचरिते सुग्रीवादेः, वेण्यां—भीमादेः, शाकुन्तले—विदूषकस्य चरितम्।

पताका नायकस्य स्यात् न स्वकीयफलान्तरम्।
गर्भे सन्धौ विमर्षे वा निर्वाहस्तस्य जायते॥३२५॥(भ)

यथा,—सुग्रीवादेः राज्यप्राप्त्यादिः।

यत्तु मुनिनोक्तम्, (म)—

"आगर्भादाविमर्षाद्वा पताका विनिवर्त्तते।
यस्मात् कस्मान्निबन्धोऽस्याः परार्थः परिकीर्त्त्यते॥" (य)

परिसामाप्तौ सत्यां, कथायाः,—प्रकृतसन्दर्भस्य, अर्थः,—तात्पर्य्यं, तस्य विच्छेदे सति "अस्तापास्तसमस्तभासि नभसः पारं प्रयाते रवावास्थानीं समये समं नृपजनः सायन्तने सम्पतन्। सम्प्रत्येष सरोरुहद्युतिमुषः पादांस्तवासेवितं प्रीत्युत्कर्षकृतो दृशामुदयनस्येन्दोरिवोद्वीक्ष्यते॥" इति श्रुत्वा सागरिका (सहर्षम्) कथमिति।—["कथम् एषः स उदयननरेन्द्रः" इति संस्कृतम्] अवान्तरस्यार्थस्य हेतुः, अवान्तरार्थश्च सागरिकाया वत्सराजं प्रति अनुरागस्य अविराम इति बोध्यम्।

(ब) पताकामाह, व्यापीति।—व्यापि—व्यापकं, निर्वहणपर्य्यन्तं स्थायीत्यर्थः, प्रासङ्गिकं—प्रसङ्गतः आगतं, वृत्तं—चरितं, पताका इति अभिधीयते। तथोक्तं भरतेन,—"यद्वृत्तं हि परार्थं स्यात् प्रधानस्योपकारकम्। प्रधानवच्च कल्प्येत सा पताकेति कीर्त्तिता॥" इति।

(भ) पताकेति।—पताका नायकस्य स्वकीयफलान्तरं—निजप्रयोजनविशेषोपयोगिनीत्यर्थः, न स्यात् ["पताकानायकस्य" इति समस्तपाठे—पताकायाः नायकस्य—स्वामिनः, स्वकीयं—स्वमात्रोपकारि यत्फलान्तरं "न पताका" इत्यनुषङ्गेणान्वयः]। अस्य व्यापकताभावमुपपादयति, गर्भे इति।—गर्भे सन्धौ, विमर्षे वा—विमर्षसन्धौ वा, तस्य—फलान्तरस्य, निर्वाहः,—समाप्तिः, जायते। रसगङ्गाधरे तूक्तं,—"नायकस्य फलं यत्तत् पताका परिकीर्त्त्यते। प्रतिनायकगं वाऽपि पताका यत् प्रयोजनम्॥" इति।

(म) फलान्तरे मुनेः पताकापदप्रयोगस्याभिनवगुप्तपादाचार्य्यव्याख्यानानुसारेण गौणत्वमङ्गीकृत्य स्वोक्तिविरोधं परिहरति, यत्तु इति।—मुनिना—भरतेन।

(य) आ गर्भादिति।—यस्मात् कस्मात् हेतोः अस्याः,—तथाविधायाः

तत्र "पताकेति।—पताका (र) नायकफलं निर्वहण-पर्य्यन्तमपि पताकायाः प्रवृत्तिदर्शनात्" इति व्याख्यातमभिनवगुप्तपादैः।

प्रासङ्गिकं प्रदेशस्थं चरितं प्रकरी मता।

यथा,—कुलपत्यङ्के रावणजटायुसंवादः।

प्रकरी नायकस्य स्यान्न स्वकीयं फलान्तरम्॥३२६॥ (ल)

अपेक्षितन्तु यत्साध्यमारम्भो यन्निबन्धनः।

समापनन्तु यत्सिद्ध्यै तत्कार्य्यमिति सम्मतम्॥३२७॥(व)

यथा,—रामचरिते रावणवधः।

अवस्थाः पञ्च कार्य्यस्य प्रारब्धस्य फलार्थिभिः।

आरम्भयत्नप्राप्त्याशानियताप्तिफलागमाः॥३२८॥(श)

पताकायाः, निबन्धः,—रचना, सङ्घटनमित्यर्थः, परार्थः परिकीर्त्त्यते, तत आ गर्भात्—गर्भसन्धिपर्य्यन्तम्, आ विमर्षात्—विमर्षसन्धिपर्य्यन्तं, वा पताका विनिवर्त्तते।

(र) तत्रेति।—अत्र पताकाशब्देन पताकानायकफलं बोध्यम्।

(ल) प्रकरीमाह, प्रासङ्गिकमिति।—प्रासङ्गिकं—प्रसङ्गतः प्राप्तं, प्रदेशस्थम् एकदेशव्यापि, चरितं प्रकरी मता। सा तु नायकस्य स्वकीयं फलान्तरं—फलविशेषः, न स्यात्। अन्ये तु—"शोभायै वैदिकादीनां यथा पुष्पाक्षतादयः। अथर्त्तुवर्णनादिस्तु प्रसङ्गे प्रकरी मता॥" इत्याहुः। तत्रोदाहरणं पुनर्यथा शाकुन्तले षष्ठेऽङ्के,—"ततः प्रविशति चूताङ्कुरमालोकयन्ती चेटी तत्पृष्ठे अपरा च....." इत्यारभ्य "नेपथ्ये" इत्यन्तेन इति।

(व) कार्य्यमाह, अपेक्षितमिति।—यत् साध्यं—साधनीयम्, अपेक्षितम्—आकाङ्क्षितं, न तु प्रासङ्गिकं, यन्निबन्धनः,—यदर्थः, आरम्भः,—उपाये प्रथमप्रवृत्तिः, उद्योगः इति यावत्, तथा यस्य सिद्ध्यै—सिद्ध्यर्थं, समापनं—सामग्रीसमवधानं, तत्तु कार्य्यमिति सम्मतम्।

(श) कार्य्यस्य अवस्थाभेदानाह, अवस्था इति।—फलार्थिभिः,—फललाभाभिलाषिभिः, प्रारब्धस्य—कृतारम्भस्य, कार्य्यस्य, पञ्च अवस्थाः,—अङ्गानि, परिकीर्त्त्यन्ते

तत्र,—

भवेदारम्भ औत्सुक्यं यन्मुख्यफलसिद्धये॥३२९॥ (घ)

यथा,—रत्नावल्यां रत्नावल्यास्तःपुरनिवेशार्थं यौगन्धरायणस्य औत्सुक्यम्। एवं नायकनायिकादीनामपि (ङ) औत्सुक्यमाकरेषु बोद्धव्यम्।

प्रयत्नस्तु फलावाप्तौ व्यापारोऽतित्वरान्वितः॥३३०॥(च)

यथा रत्नावल्यां,—"तह वि ण अत्थि अण्णो दंसणोवाओ त्ति जधा तधा आलिहिअ जधासमीहिदं करइस्सम्" इत्यादिना प्रतिपादितो रत्नावल्याश्चित्रलेखनादिर्वत्सराजसङ्गमोपायः। (क)

यथा च रामचरिते समुद्रबन्धनादिः।

उपायापायशङ्काभ्यां प्राप्त्याशा प्राप्तिसम्भवः॥३३१॥(छ)

इति शेषः, तावच्च आरम्भः, यत्नः, प्राप्त्याशा, नियताप्तिः तथा फलागम इति बोध्या इति भावः।

(घ) आरम्भमाह, भवेदिति।—मुख्यस्य—प्रधानस्य, फलस्य सिद्धये यत् औत्सुक्यं, स आरम्भः भवेत्।

(ङ) उदाहरति, यथेति।—अत्र रत्नावलीलाभ एव मुख्यं फलं बोध्यम्। नायकेति।—[नायकश्च नायिकाऽऽदयश्च इति विग्रहः, अतो नैकशेषः]।

(च) प्रयत्नमाह, प्रयत्न इति।—फलस्य—प्रधानफलस्य, अवाप्तौ,—प्राप्तौ, तद्विषये इति यावत्, [विषये सप्तमीयम्] अतित्वरान्वितः,—अत्यन्तत्वाऽधिकतया पुरस्कृतः, व्यापारः,—चेष्टा, प्रयत्नः। तथोक्तम्,—"अपश्यतः फलप्राप्तिं यो व्यापारः फलं प्रति। परं औत्सुक्यगमनं प्रयत्नः परिकीर्त्तितः॥" इति भरतशास्त्रे।

(छ) उदाहरति, यथेति।—तह वि इति।—["तथाऽपि नास्त्यन्यो दर्शनोपाय इति यथा तथा आलिख्य यथासमीहितं करिष्यामि" इति संस्कृतम्]। सागरिका वासवदत्ताभयेन राजानं पुनर्द्रष्टुमपि अपारयन्ती राजानमालिख्य "तदन्यो न कश्चिद्दर्शनोपाय इति चिन्ते तथा राजानं पश्यन्ती कृतार्था भविष्यामि" इति चिन्तितवतीति भावः। वत्सेति।—वत्सराजस्य सङ्गमोपायः। अयं भावः,—साक्षात्सङ्गमे महाराज्ञाः प्रतिबन्धात् झटिति तद्धेतुः चित्रलिखनमिति।

(ज) प्राप्त्याशामाह, उपायेति।—उपायापायशङ्काभ्याम्—उपायः,—उपाय-

यथा,—रत्नावल्यां तृतीयेऽङ्के वेशपरिवर्त्तनाभिसरणादेः सङ्गमोपायाद् वासवदत्तालक्षणापायशङ्कया च अनिर्द्धारितैकान्तसङ्गमरूपफलप्राप्तिः प्रत्याशा। एवमन्यत्र।

अपायाभावतः प्राप्तिर्नियताप्तिस्तु निश्चिता॥३३२॥(ग)

अपायाभावान्निर्द्धारितैकान्तफलप्राप्तिर्नियताप्तिः। यथा रत्नावल्याम्;—"राजा। देवीप्रसादनं त्यक्त्वा नान्यमत्रोपायं पश्यामि" इति देवीलक्षणापायस्य प्रसादनेन निवारणात् नियतफलप्राप्तिः सूचिता।

साऽवस्था फलयोगः स्याद् यः समग्रफलोदयः॥३३३॥(घ)

यथा,—रत्नावल्यां रत्नावलीलाभसङ्गवर्त्तित्वलक्षणफलान्तरलाभसहितः। एवमन्यत्र। (ङ)

यथासङ्ख्यमवस्थाभिराभिर्योगात् तु पञ्चभिः।
पञ्चधैवेतिवृत्तस्य भागाः स्युः पञ्च सन्धयः॥३३४॥(च)

साधनम्, अपायशङ्का—उद्यमसिद्धौ विघ्नभयं, ताभ्यां प्राप्तौ, फलस्येति शेषः, सन्धयः,—सम्भावना, प्राप्त्याशा।

(ग) नियताप्तिमाह, अपायेति।—अपायस्य—विघ्नस्य, अभावतः,—अपगमात्, निश्चिता, प्राप्तिः,—फलस्याप्तिः, नियताप्तिः।

(घ) फलागममाह, सेति।—यः समग्रस्य—अनेकस्य, फलस्य—प्रयोजनस्यागम्य, उदयः,—सम्भावना, सा अवस्था फलयोगः,—फलागमः, स्यात्। पण्डितराजेन रसगङ्गाधरे तूक्तं,—"फलागमः समं यत्र नायकप्रतिनायकौ। सम्पत्तिञ्च विपत्तिञ्च प्रपद्येतां कृतश्रमौ॥" इति।

(ङ) एवमिति।—अन्यत्र—वीरचरितादौ, सीता लाभादिसहितो रावणवधादिः इति शेषम्।

(च) सन्धिमाह, यथेति।—आभिः,—अनन्तरोक्ताभिः, पञ्चभिः अवस्थाभिः,—आरम्भप्रभृतिभिरङ्गैरित्यर्थः, यथासङ्ख्यं—निर्दिष्टक्रममनुसृत्य, योगात्—सम्बन्धात्, इतिवृत्तस्य—सन्दर्भवस्तुनः, पञ्चधा एव—पञ्चप्रकारा एव, भागाः, पञ्च सन्धयः स्युः।

तल्लक्षणमाह,—

अन्तरैकार्थसम्बन्धः सन्धिरेकान्वये सति ॥३३५॥(छ)

एकेन प्रयोजनेनान्वितानां कथांशानामवान्तरैकप्रयोजन-सम्बन्धः सन्धिः। तद्भेदानाह,—

मुखं प्रतिमुखं गर्भो विमर्ष उपसंहृतिः।
इति पञ्चास्य भेदाः स्युः क्रमाल्लक्षणमुच्यते ॥३३६॥

यथोद्देशं लक्षणमाह,—

यत्र बीजसमुत्पत्तिर्नानाऽर्थरससम्भवा।
प्रारम्भेण समायुक्ता तन्मुखं परिकीर्त्तितम्॥३३७॥(ज)

यथा,—रत्नावल्यां प्रथमेऽङ्के (झ)।

फलप्रधानोपायस्य मुखसन्धिनिवेशिनः।
लक्ष्यालक्ष्य इवोद्भेदो यत्र प्रतिमुखञ्च तत्॥३३८॥(ञ)

अतश्च आरम्भयोगिनी अवस्था मुखसन्धिः, यत्नयोगिनी अवस्था प्रतिमुखसन्धिः, प्रत्याशायोगिनी अवस्था गर्भसन्धिः, नियताप्तियोगिनी अवस्था विमर्षसन्धिः, फलागम-योगिनी अवस्था उपसंहृतिसन्धिश्चेति बोध्यम्।

(छ) सन्धिलक्षणमाह, अन्तरैकार्थसम्बन्ध इति।—एक एव अन्वयः,—प्रयोजनं, तस्मिन् सति, अन्तरा—मध्ये, एकार्थसम्बन्धः,—एकेन अपरेणेत्यर्थः, अर्थेन सम्बन्धः,—संयोगः, सन्धिः। मन्दारमकरन्देऽप्युक्तं,—मुख्यप्रयोजनवशात् तथाऽङ्गानां समन्वये। अवान्तरार्थसम्बन्धः सन्धिः सन्धानरूपतः॥" इति।

(ज) मुखसन्धिमाह, यत्रेति।—यत्र—अंशे, नाना अर्थाः,—प्रयोजनानि, रसाः,—शृङ्गारादयश्च, तेषां सम्भवः,—व्यञ्जनं यत्र तादृशी, प्रारम्भेण—प्रकृष्टयत्नेन, समायुक्ता, बीजस्य—सन्दर्भमूलकारणस्य, समुत्पत्तिः,—समुद्भवः, तत् मुखं—मुख-सन्धिरित्यर्थः, परिकीर्त्तितम्।

(झ) उदाहरति, यथेति।—अत्र रत्नावलीवत्सराजयोरनुरागरूपस्य बीजस्य समुत्पत्तिरिति लक्षणसमन्वयः।

(ञ) प्रतिमुखसन्धिमाह, फलेति।—यत्र मुखसन्धिनिवेशिनः,—मुखसन्धौ

यथा,—रत्नावल्यां द्वितीयेऽङ्के वत्सराजसागरिकासमागम-हेतोरनुरागबीजस्य प्रथमाङ्कोपचिन्नस्य सुसङ्गता-विदूषकाभ्यां ज्ञायमानतया किञ्चिल्लक्ष्यस्य वासवदत्ताया चित्रफलकवृत्तान्तेन किञ्चिदुद्बोध्यमानोऽस्य उद्देश्यरूप उद्भेदः। (ट)

फलप्रधानोपायस्य प्रागुद्भिन्नस्य किञ्चन।
गर्भो यत्र समुद्भेदो ह्रासान्वेषणवान्मुहुः ॥३३६॥(ठ)

फलस्य गर्भीकरणाद्गर्भः। (ड) यथा रत्नावल्यां द्वितीयेऽङ्के,—"सुसङ्गता। सखि! अदक्खिण्णा दाणिं सि तुमं, जा एवं भट्टिणा दूरेण गहिदावि कोवं ण मुञ्चसि" (ढ) इत्यादौ समुद्भेदः। पुनर्वासवदत्ताप्रवेशे ह्रासः। तृतीयेऽङ्के—"तदार्त्ताऽन्वेषणाय गतः कथं चिरयति वसन्तकः?" इत्यन्वेषणम्। विदूषकः। "हो हो भोः! कोसम्बीरज्जलम्भेणावि ण तादिसो पिअवअस्सस्स

क्षितस्य, फलप्रधानोपायस्य—फलस्य—प्रधानफलस्य, यः प्रधानोपायः तस्य, बीजस्येत्यर्थः, लक्ष्यालक्ष्य इव—ईषल्लक्ष्य इव, उद्भेदः,—प्रकाशः, उद्भेद इति यावत्, तत् प्रतिमुखं—प्रतिमुखं नाम सन्धिरित्यर्थः।

(ट) उदाहरति, यथेति।—सागरिकावत्सराजसमागमः प्रधानफलम्। अनुरागबीजस्य—अनुरागरूपबीजस्येत्यर्थः। सुसङ्गता—सागरिकायाः वयस्या। अन्यत् स्पष्टम्।

(ठ) गर्भलक्षणमाह, फलेति।—यत्र फलस्य—प्रधानप्रयोजनस्य, यः प्रधानोपायः तस्य, प्राक्—पूर्वं, किञ्चन—कथञ्चन, ईषदित्यर्थः, उद्भिन्नस्य—उद्भेदं गतस्य, प्रतिमुखोद्दिष्टस्य किञ्चिल्लक्ष्यतया प्रकाशितस्य बीजस्येति भावः, मुहुः,—पुनः पुनः, ह्रासान्वेषणवान्,—क्वचित् तिरोभाववान् क्वचिदा अनुसन्धानवान्, समुद्भेदः,—सम्यक् प्रकाशः, स गर्भः,—गर्भनामा सन्धिरित्यर्थः। यथोक्तं नाट्यशास्त्रकारैः,—"उद्भेदस्तस्य बीजस्य प्राप्तिरप्राप्तिरेव वा। पुनश्चान्वेषणं यत्र स गर्भ इति संज्ञितः॥" इति।

(ड) फलस्येति।—गर्भीकरणात्—अन्तर्गतकरणादित्यर्थः।

(ढ) सखीति।—["सखि! अदक्षिणा इदानीमसि त्वं, या एवं भर्त्रा दूरेणापि कोपं न मुञ्चसि" इति संस्कृतम्]।

परितोसो, जादिसो मम सक्कारादो पियवअस्सं सुणिअ भविस्सदि" (ण) इत्यादौ उद्भेदः। पुनरपि वासवदत्ताप्रत्यभिज्ञानात् क्रासः। पुनः सागरिकायाः सङ्केतस्थानगमने अन्वेषणम्। पुनर्लतापाशकरणे उद्भेदः।

अथ विमर्षः,—

यत्र मुख्यफलोपाय उद्भिन्नो गर्भतोऽधिकः।
प्राप्त्याद्यैः सान्तरायश्च स विमर्ष इति स्मृतः॥३४०॥ (त)

यथा शाकुन्तले चतुर्थाङ्कादौ,—"अनसूया। हला पिअंवदे! जइ वि गन्धव्वेण विवाहविहिणा णिव्वत्तकल्लाणा पिअसही सउंतला अणुरूवभत्तिभाइणी संवुत्ता, तह वि मे ण णिव्वुदं हिअअं" (थ) इत्यत आरभ्य सप्तमाङ्कोपक्षिप्तात् शकुन्तला-प्रत्यभिज्ञानात् प्रागर्थसञ्चयः (द) शकुन्तलाविस्मरणरूपविघ्नालिङ्गितः।

(ण) हो होति।—["कौशाम्बीराज्यलाभेनापि न तादृशः प्रियवयस्यस्य परितोषः, यादृशो मम सत्काराद् प्रियवचनं श्रुत्वा भविष्यति" इति संस्कृतम्]।

(त) विमर्षसन्धिमाह, यत्रेति।—यत्र मुख्यफलस्य—प्रधानफलस्य, उपायः गर्भतः,—गर्भसन्धिमपेक्ष्य इत्यर्थः, अधिकः,—श्रेष्ठ इत्यर्थः, उद्भिन्नः,—प्रकाशितः, प्राप्त्याद्यैः,—अभिलप्यातप्रभृतिभिः, [आद्यशब्देन मयादिग्रहणं] सान्तरायश्च—सविघ्नश्च, स विमर्ष इति स्मृतः,—कथितः। भवेन सान्तरायो यथा,—रत्नावल्यां सागरिकासङ्गमोपायः वत्सराजस्यानुरागः वासवदत्ताभयेन संसृष्टः। तथोक्तम्;—"गर्भाङ्गिभिन्नबीजार्थो विलोभनक्षमोऽपि वा। क्रोधव्यसनजो वाऽपि स विमर्ष इति स्मृतः॥" इति।

(थ) हला पिअंवदे इति।—["हला प्रियंवदे! यद्यपि गान्धर्वेण विवाहविधिना निर्वृत्तकल्याणा प्रियसखी शकुन्तला अनुरूपभर्तृभागिनी संवृत्ता, तथापि मे न निर्वृतं हृदयम्" इति संस्कृतम्]।

(द) सप्तमेति।—सप्तमाङ्कोपक्षिप्तात्—सप्तमाङ्के उपक्षिप्तम्—उपसंहृतम्, प्रत्यात्, शकुन्तलायाः प्रत्यभिज्ञानात् प्राक्—पूर्वम्, अर्थसञ्चयः,—फलसमुदायः।

अथ निर्वहणम्,—

बीजवन्तो मुखाद्यर्था विप्रकीर्णा यथायथम्।
एकार्थमुपनीयन्ते यत्र निर्वहणं हि तत्॥३४१॥ (ध)

यथा वेण्याम्;—"कञ्चुकी। (उपसृत्य सहर्षम्) महाराज! वर्द्धसे। अयं खलु भीमसेनो दुर्य्योधनक्षतजारुणीकृतसर्वशरीरो दुर्लक्ष्यव्यक्तिः" इत्यादिना द्रौपदीकेशसंयमनादिमुखसन्ध्यादिबीजानां निजनिजस्थानोपक्षिप्तानामेकार्थयोजनम्। यथा वा,—शाकुन्तले सप्तमाङ्के शकुन्तलाऽभिज्ञानात् उत्तरोऽर्थराशिः। (न)

एषामङ्गान्याह, (प)—

उपक्षेपः परिकरः परिन्यासो विलोभनम्।
युक्तिः प्राप्तिः समाधानं विधानं परिभावना।
उद्भेदः करणं भेद एतान्यङ्गानि वै मुखे॥३४२॥ (फ)

(ध) निर्वहणसन्धिमाह, बीजेति।—यत्र यथायथं—यथाप्रदेशं, विप्रकीर्णाः,—विनिवेशिताः, बीजवन्तः,—मूलकारणसमन्विताः, मुखाद्यर्थाः,—मुखादयः, मुखसन्धिप्रभृतिरूपा इति यावत्, अर्थाः,—कार्य्याणि, इतिवृत्तभागाः इति यावत्, एकार्थम्—एकप्रयोजनम्, उपनीयन्ते—प्राप्यन्ते, [ऐक्यार्थम् इति पाठे—एकवाक्यत्वार्थमुपनीयन्ते—प्रतिपाद्यन्ते इत्यर्थः] तत् हि निर्वहणं—निर्वहणसन्धिः, उपसंहार इत्यर्थः। यथोक्तं सुधाकरकारैः,—"मुखसन्ध्यादयो यत्र विकीर्णा बीजसंयुताः। महाप्रयोजनं यान्ति तन्निर्वहणमुच्यते॥" इति।

(न) उदाहरति, यथेति।—दुर्लक्ष्यव्यक्तिः,—दुर्लक्ष्या—दुःखेन लक्षणीया, व्यक्तिः,—प्रकाशः यस्य तादृशः, स एवायमिति निश्चेतुमशक्य इत्यर्थः। द्रौपदीकेशसंयमनादीन्येव मुखसन्ध्यादयश्च बीजञ्च इति तेषामिति विग्रहः। शकुन्तलाऽभिज्ञानात्—"शकुन्तलेयम्" इति प्रत्यभिज्ञानात्, उत्तरः,—अनन्तरोक्त इत्यर्थः, अर्थराशिः,—कार्य्यसमुदायः।

(प) एषामिति।—एषां—मुखादीनाम्।

(फ) द्वादश मुखसन्ध्यङ्गान्याह, उपक्षेप इति।—स्पष्टम्।

यथोद्देशं लक्षणमाह,—

काव्यार्थस्य समुत्पत्तिरुपक्षेप इति स्मृतः ॥३४३॥ (ब)

काव्यार्थः,—इतिवृत्तलक्षणप्रस्तुताभिधेयः। यथा वेण्यां "भीमः,—

लाक्षागृहानलविषान्नसभाप्रवेशैः
प्राणेषु वित्तनिचयेषु च नः प्रहृत्य।
आक्रम्य पाण्डवबधूपरिधानकेशान्
स्वस्था भवन्ति मयि जीवति धार्त्तराष्ट्राः ?॥" (भ)

समुत्पन्नार्थबाहुल्यं ज्ञेयः परिकरः पुनः ॥३४४॥(म)

यथा तत्रैव,—

"प्रहृष्टं यद् वैरं मम खलु शिखीरेव कुरुभिः
न तत्रार्थो हेतुर्न भवति किरीटी न च युवाम्।

(ब) उपक्षेपमाह, काव्येति।—काव्यार्थस्य—सन्दर्भप्रतिपाद्यस्य, समुत्पत्तिः,—उपक्षेप उत्थापनमित्यर्थः, [क्वचित्—"समुत्थितिः" इति पाठः] उपक्षेप इति स्मृतः।

(भ) उदाहरति, लाक्षेति।—धार्त्तराष्ट्राः,—धृतराष्ट्रसुताः दुर्योधनादयः, लाक्षागृहानलविषान्नसभाप्रवेशैः,—लाक्षाभिर्निर्मितं गृहमिति लाक्षागृहं, तत्र दाहाय दत्तः अनलः,—अग्निः, तेन—लाक्षागृहानलेन, विषेण मिश्रितमन्नं विषान्नं तेन, विषान्नप्रयोगेण इत्यर्थः, सभायां प्रवेशः,—प्रवेशनं तेन, द्यूतक्रीडार्थेन आह्वानेन इत्यर्थः, प्राणेषु वित्तनिचयेषु—धनसमुदायेषु, च नः,—अस्मान्, प्रहृत्य—प्रथमद्वितीयाभ्यां द्वाभ्यामुपायाभ्यां प्राणनिधनार्थं चेष्टयित्वा, तृतीयेनोपायेन च धनानि हृत्वा इत्यर्थः, पुनश्च तृतीयेन पाण्डवानां या वधूः,—पाञ्चाली, तस्याः परिधानं—वस्त्रं, केशांश्च आक्रम्य, मयि—भीमे, जीवति स्वस्था भवन्ति ? [अत्र भविष्यत्कालेऽपि लट्] अत्र "स्वस्थाः" इति काकुः, तया च न स्वस्था भविष्यन्तीति निष्कृष्टोऽर्थः। अत्र द्रौपदी-केशसंयमनरूपस्य काव्यार्थस्य अथवा वैरप्रकाशनेनात्मसन्धावनया च वैरोद्धारप्रकार-स्येतिवृत्तस्य समुत्थापनम्। वस्तुनिष्ठं इदम्।

(म) परिकरमाह, समुत्पन्नेति।—समुत्पन्नस्य—समुत्थितस्य, अर्थस्य—काव्या-र्थस्य, बाहुल्यं—विस्तारः, अतिशयेन वर्णनमित्यर्थः, परिकरः ज्ञेयः।

जरासन्धस्योरःस्थलमिव विरूढं पुनरपि
क्रुधा भीमः सन्धिं विघटयति यूयं घटयत ॥" (य)

तन्निष्पत्तिः परिन्यासः ॥ ३४५ ॥ (र)

यथा तत्रैव,—

"चक्षुर्भुजभ्रमितचण्डगदाऽभिघात-
सञ्चूर्णितोरुयुगलस्य सुयोधनस्य।
स्यानावनद्धघनशोणितशोणपाणि-
रुत्तंसयिष्यति कचांस्तव देवि! भीमः॥" (ल)

(य) उदाहरति, प्रहृष्टमिति।—सन्धिकरणार्थमुद्यतस्य राज्ञः सन्देशं श्रावयन्तं सहदेवं प्रति भीमसेनस्य उक्तिरियम्। कुरुभिः,—धार्तराष्ट्रैः, शिशोरेव मम—भीमस्य, (यदा मम—भीमस्य, शिशोः,—शिशुकालस्य आरभ्य एव) यत् वैरं—विद्वेषः, प्रहृष्टं खलु, [शिशुत्वेनात्मनिर्देशः वैरस्याविस्मरणीयत्वख्यापकः] तत्र—वैरे आर्यः,—गुरुत्वात् माननीयः, युधिष्ठिरः इति यावत्, न हेतुः,—न कारणं, किरीटी—अर्जुनः, च न हेतुरिति शेषः, युवामपि—नकुलसहदेवावपीत्यर्थः, न हेतुः, भवति इत्यनेन सर्ववानुषङ्गः, अहमेव विद्वेषकारणं कुरुष्वामिति भावः; तस्मात् भीमः क्रुधा—कोपेन, विरूढं—संयोजितं, जरासन्धस्य उरःस्थलमिव सन्धिं पुनरपि विघटयति—विच्छेदयति, यूयं घटयत—योजयत। भवद्भिः कृतमपि सन्धिकर्मं भेत्स्यामीत्यर्थः; युष्माकं सन्ध्युत्पादनप्रयासः इथेति भावः। (पुरा किल सहदेव-नामधेयेन राज्ञा यज्ञशेषं पायितयोः धर्म्मपत्न्योः गर्भदोषात् समार्द्धशरीरेण विनिर्गतस्य श्मशानपातितस्य शिशोः शरीरे जराऽभिधानराक्षसी संहिते "जरासन्धः" इति तस्यानामभूत्। तद्धि प्रथमसंहितं जरासन्धस्य उरः भीमेन विपाटितम्, इति भारते)। अत्र सन्धिविघटनेन वैरनिर्यातनस्य सनधिकं सूचनम्। शिखरिणी वृत्तम्।

(र) परिन्यासमाह, तन्निष्पत्तिरिति।—तत्र—अधिक्षुभितस्य काव्यार्थस्य, निष्पत्तिः,—निश्चयेन सङ्कीर्त्तनं, परिन्यासः।

(ल) उदाहरति, चक्षुरिति।—हे देवि!—पाञ्चालि! भीमः चक्षुषा—क्रूरतया, भुजेन, भ्रमिता—घूर्णिता, या चण्डा—भीषणा, गदा तस्याः अभिघातेन—प्रहारेण, सञ्चूर्णितम् ऊरुयुगलं यस्य तथाविधस्य, सुयोधनस्य—दुर्य्योधनस्य, स्यानं—स्निग्धं, ("स्यानं स्निग्धे प्रतिध्वाने घनलाक्षजलोरपि" इति मेदिनी) तथा अवनद्धं—संसक्तं,

अत्र उपक्षेपो नाम इतिवृत्तलक्षणस्य काव्याभिधेयस्य सङ्क्षेपेणोपक्षेपणमात्रं, परिकरस्तस्यैव बहुलीकरणं, परिन्यासस्ततोऽपि निश्चयापत्तिरूपतया परितो हृदये न्यसनम्, इत्येषां भेदः। एतानि च अङ्गानि उक्तेनैव पौर्वापर्य्येण भवन्ति। अङ्गान्तराणि तु अन्यथाऽपि। (व)

गुणाख्यानं विलोभनम् ॥३४६॥ (श)

यथा तत्रैव,—"द्रौपदी। णाध! किं दुक्करं तुए परिकुविदेण?" यथा वा मम चन्द्रकलायां चन्द्रकलावर्णने,—"सेयं, तारुण्यस्य विलासः" इत्यादि। यत्तु शकुन्तलादिषु,—ग्रीभङ्गाभिरामम्" इत्यादि मृगादिगुणवर्णनं, तद्बीजार्थसम्बन्धाभावान्न सन्ध्यङ्गम्। एवमङ्गान्तराणामप्यूह्यम्। (ष)

सम्प्रधारणमर्थानां युक्तिः ॥३४७॥ (स)

यत् घनं—गाढं, शोणितं तेन शोणः,—रक्तः, पाणिर्यस्य तथाभूतः सन्, तव कचान्—केशान्, उत्तंसयिष्यति—अलङ्करिष्यति, रक्ताक्तहस्तेन संयमनादिति भावः। अत्रात्यन्तसूचितस्य गदाप्रहारादिना दुर्य्योधनोरुविघटनादिपूर्व्वकं द्रौपदीकेशसंयमनस्य निश्चयेन कर्त्तव्यत्वाभिधानम्। वसन्ततिलकं वृत्तम्।

(व) अत्रेत्यादि।—उपक्षेपणमात्रम्—उत्थापनमात्रम्। बहुलीकरणं—विस्तरेण सूचनम्। उक्तेनैव—कथितेनैव। अन्यथा वैपरीत्येन, अपिकारात् क्रमेण अपीत्यर्थः।

(श) विलोभनमाह, गुणाख्यानमिति।—गुणानाम् आख्यानं—कथनं, विलोभनं—विशेषेण लोभप्रदर्शनमित्यर्थः, उत्तेजनं वा।

(ष) उपक्षेपादीनां त्रयाणां भेदं स्पष्टयति, यथा तत्रेत्यादिना।—णाधेति।—["नाथ! किं दुष्करं त्वया परिकुपितेन?" इति संस्कृतम्]। विलासः,—प्रकाशः। बीजार्थस्य—कार्य्यस्य। एवमङ्गान्तराणामित्यत्र बीजार्थसम्बन्धेऽङ्गत्वं, नान्यथा इत्यर्थोऽवगन्तव्यः।

(स) युक्तिमाह, सम्प्रधारणमिति।—अर्थानां—कर्त्तव्यानां, सम्प्रधारणं—निश्चयः, युक्तिः।

यथा वेण्यां सहदेवो भीमं प्रति,—"आर्य्य ! किं महाराज-सन्देशोऽयमव्युत्पन्न (ह) एवार्य्येण गृहीतः ?" इति। अतः प्रभृति यावद्भीमवचनम्,—

"युष्मान् क्षेपयति क्रोधाल्लोके शत्रुकुलक्षयः।
न लज्जयति दाराणां सभायां केशकर्षणम् ?॥" इति (क)

प्राप्तिः सुखागमः ॥३४८॥ (ख)

यथा तत्रैव,—"मथ्नामि कौरवशतं समरे न कोपात् ?" इत्यादि।

द्रौपदी। [श्रुत्वा सहर्षम्]—"णाध ! अस्सुदपुव्वं क्खु एदं वअणं, [illegible]ा पुणो पुणो भणाहि।" (ग)

बीजस्यागमनं यत्तु तत् समाधानमुच्यते ॥३४९॥ (घ)

यथा तत्रैव,—"[नेपथ्ये] भो भो विराटद्रुपदप्रभृतयः ! श्रूयताम्,—

यत् सत्यव्रतभङ्गभीरुमनसा यत्नेन मन्दीकृतं
यद् विस्मर्त्तुमपीहितं शमवता शान्तिं कुलस्येच्छता।

(ह) उदाहरति, यथेति।—अव्युत्पन्नः,—अनवहितः, अविचार्य्य इति यावत्।

(क) युष्मानिति।—क्रोधात् शत्रूणां कुलक्षयः युष्मान् लोके—जगति, क्षेपयति—लज्जयति, सभायां दाराणां—पत्न्या इत्यर्थः, केशकर्षणं न लज्जयति ? अत्र शत्रुकुलक्षयस्य कार्य्यस्य निश्चयेन कर्त्तव्यतासूचनम्। पथ्यावक्त्र वृत्तम्।

(ख) प्राप्तिमाह, प्राप्तिरिति।—सुखस्य आगमः,—उदयः, लाभ इत्यर्थः, प्राप्तिः। यथोक्तं नाट्यशास्त्रकारैः,—"सुखार्थस्याभिगमनं प्राप्तिरित्यभिधीयते।" इति।

(ग) णाधेति।—["नाथ ! अश्रुतपूर्वं खल्विदं वचनं, तत् पुनःपुनर्भण" इति संस्कृतम्]। अत्र भीमवाक्यस्य सुखहेतुता पुनः पुनरिति सोत्कण्ठश्रवणावेदनेन द्रौपद्याः प्रतीयते।

(घ) समाधानमाह, बीजस्येति।—बीजस्य—मूलकारणस्य, आगमनं—प्रधान-लक्ष्यगतत्वेन कीर्त्तनं, प्रधाननायकाभिमतत्वेन ज्ञानं वा इत्यर्थः, यत् तत् तु समाधानम् उच्यते।

तद् द्यूतारणिसम्भूतं नृपसुताकेशाम्बराकर्षणैः
क्रोधज्योतिरिदं महत् कुरुवने यौधिष्ठिरं जृम्भते ॥" (ङ)

अत्र "स्वस्था भवन्ति मयि जीवति" इति आदिबीजस्य प्रधाननायकाभिमतत्वेन सम्यगाहितत्वात् समाधानम्। (च)

सुखदुःखकृतो योऽर्थस्तद्विधानमिति स्मृतम्॥३५०॥(छ)

यथा बालचरिते,—

"उत्साहातिशयं वत्स ! तव बालस्य पश्यतः।
मम हर्षविषादाभ्यामाक्रान्तं युगपन्मनः ॥" (ज)

यथा वा मम प्रभावत्यां,—"नयनयुगासेचनकम्" इत्यादि।

(ङ) उदाहरति, यदिति।—सत्यव्रतस्य—सत्यरक्षणैकव्रतनियमस्य, द्वादशवर्षवनवासरूपस्य एकवर्षाज्ञातवासरूपस्य चेत्यर्थः, भङ्गात् भीरु मनः यत्र तादृशेन, यत्नेन यत्—क्रोधज्योतिरित्यर्थः, एवमुत्तरत्रापि, मन्दीकृतं—खर्वीकृतं, कुलस्य शान्तिम्—अक्षयतामित्यर्थः, इच्छता भगवता—शान्तेन मनसा, यत् विक्रर्तुमपि दुःहितं—चेष्टितं, द्यूतमेव अरणिः,—अग्निमन्थनदारुविशेषः, तेन सम्भृतं—सम्भृतपादितं, नृपसुतायाः,—द्रौपद्याः, केशानाम् अम्बरस्य—वस्त्रस्य, च आकर्षणैः,—आकर्षरूपैर्बाधुभिरिति भावः, उद्दीपितमिति शेषः, तत् महत् इदं, युधिष्ठिरस्य इदं यौधिष्ठिरं, क्रोधज्योतिः,—क्रोधाग्निरित्यर्थः, कुरुवने—कुरव एव वनं, दाह्यत्वादिति भावः, तस्मिन्, जृम्भते—परिस्फुरति। मार्दूलविक्रीडितं वृत्तम्।

(च) अथेति।—आदिबीजस्य—भीमसेनात्माहरूपस्य इत्यर्थः, सम्यगाहितत्वात्—सम्पूर्णतया उक्तेजितत्वादित्यर्थः।

(छ) विधानमाह, सुखेति।—सुखदुःखाभ्यां कृतः,—विनिश्चित इत्यर्थः, यः अर्थः,—कार्य्यं, तद्विधानमिति स्मृतम्। यथाऽऽहुः,—"विधानं दुःखसुखयोर्विनिश्चयं यदि वर्णनम्" इति।

(ज) उदाहरति, उत्साहातिशयमिति।—वीरामं प्रति परशुरामस्योक्तिरियम्। हे वत्स ! तव उत्साहातिशयं, बाल्यम्—अविचारितं कर्म, धनुर्भङ्गसङ्कल्पमित्याशयः, यद्वा,—बाल्यं—शैशवं, च पश्यतः मम मनः हर्षविषादाभ्यां युगपत् आक्रान्तम्। तव उत्साहदर्शने भविष्यद्वीरत्वसम्भावनया हर्षः, बाल्यदर्शनेन "अयं

कुतूहलोत्तरा वाचः प्रोक्ता तु परिभावना ॥३५१॥ (झ)

यथा वेण्यां,—"द्रौपदी। [युद्धं स्यान्न वा इति संशयाना तूर्य्यशब्दानन्तरम्] णाध! किं दाणिं एसो पलअजलहरघणत्थणिदमंसलो क्खणे क्खणे समरदुंदुही ताड़ीअदि?" (ञ)

बीजार्थस्य प्ररोहः स्यादुद्भेदः ॥३५२॥ (ट)

यथा तत्रैव,—"[द्रौपदी] णाध! तुह्मेहिं पुणो वि समरादो आअच्छिअ अहं आस्सासइदव्वा। (ठ) भीमः,—

भूयः परिभवक्लान्तिलज्जाविधुरिताननम्।
अनिःशेषितकौरव्यं न पश्यसि वृकोदरम्॥" (ड)

करणं पुनः।

प्रकृतार्थसमारम्भः ॥३५३॥ (ढ)

कथमनेन सह योत्स्ये?" इति विषादः, इत्युभयोर्विमिश्रणं बोध्यम्। अत्र भार्गवस्य रामपराभवोद्यमरूपोऽर्थः सुखदुःखाभ्यां विहितः।

(झ) परिभावनामाह, कुतूहलेति।—कुतूहलम्—औत्सुक्यं, तदुत्तराः,—तद्भूयिष्ठा इत्यर्थः, वाचः,—वाक्यानि, परिभावना प्रोक्ता—कथिता।

(ञ) णाधेति।—["नाथ! किमिदानीमेष प्रलयजलधरघनस्तनितमांसलः क्षणे क्षणे समरदुन्दुभिस्ताड्यते?" इति संस्कृतम्]। घनस्तनितं—निरन्तरगर्जितं, तदिव मांसलः,—गभीर इत्यर्थः। अत्र समरदुन्दुभिताडनं किमर्थमिदानीमित्यौत्सुक्यावेदनम्।

(ट) उद्भेदमाह, बीजेति।—बीजार्थस्य—मूलीभूतविषयस्य, प्ररोहः,—अङ्कुरोदयः, भवत्प्रायत्वेनोद्भावनमित्यर्थः, उद्भेदः स्यात्।

(ठ) णाधेति।—["नाथ! युष्माभिः पुनरपि समरादागत्य अहम् आश्वासयितव्या" इति संस्कृतम्]। अत्र केशसंयमनार्थस्य बीजं समरोद्योजनम्।

(ड) भूय इति।—परिभवेन—शत्रुभ्यः अवमानेन, या क्लान्तिः, ततो या लज्जा तया विधुरितम्—अवनतमित्यर्थः, [बन्धुरितेति पाठे—व्याप्तम्] आननं यस्य तम्, अनिःशेषिताः,—निःशेषतामनीताः, कौरव्याः येन तादृशं, वृकोदरं—भीमं, भूयः,—पुनः, न पश्यसि—न द्रक्ष्यसीत्यर्थः, [भविष्यत्सामीप्ये लट्]। अत्र बीजार्थस्य वैरनिर्य्यातनार्थमुत्पन्नस्य क्रोधस्य प्ररोहः।

(ढ) करणमाह, करणमिति।—प्रकृतस्य—प्रस्तुतस्य, अर्थस्य—विषयस्य,

यथा तत्रैव,—"देवि! गच्छामो वयमिदानीं कुरुकुलक्षयाय" इति।

भेदः संहतिभेदनम् ॥३५४॥ (ग)

यथा तत्रैव,—"अत एव अद्य प्रभृति भिन्नोऽहं भवद्भ्यः"। केचित्तु (त) "भेदः प्रोत्साहना" इति वदन्ति।

अथ प्रतिमुखाङ्गानि,—

विलासः परिसर्पश्च विधूतं तापनं तथा।
नर्म नर्मद्युतिश्चैव तथा प्रगमनं पुनः॥
विरोधश्च प्रतिमुखे तथा स्यात् पर्य्युपासनम्।
पुष्पं वज्रमुपन्यासो वर्णसंहार इत्यपि ॥३५५॥ (घ)

तत्र,—

समीहा रतिभोगार्था विलास इति कथ्यते॥३५६॥(ङ)

रतिलक्षणस्य भावस्य यो हेतुभूतो भोगो विषयः प्रमदा पुरुषो वा, तदर्था समीहा विलासः। (च)

समारम्भः,—सम्यक् आरम्भः, उद्योग इत्यर्थः, पुनः,—तु, करणम्। तथोक्तम्,—"आरम्भः प्रकृतार्थस्य करणं नाम तन्मतम्" इति।

(ग) भेदनाह, भेद इति।—संहतेः,—सङ्घातस्य, भेदनं—पृथक्करणं, भेदः, स्यादिति शेषः। ["संहतभेदनम्" इति पाठे,—संहतानाम्—अविच्छेदसंश्लेषेण निश्चितानां, भेदनं—सङ्घातात् चालनमित्यर्थोऽवसेयः इति]।

(त) उदाहरति, यथेति।—भवद्भ्यः भिन्नः,—पृथग्भूतः, युष्माकं नानुगच्छे इति हृदयम्। केचित्तु—दशरूपक रसगङ्गाधरकारादयस्तु इत्यर्थः।

(घ) प्रतिमुखाङ्गान्याह, विलास इति।—विलासादयश्चयोदश प्रतिमुखस्य अङ्गानि इति वर्णनोऽर्थः।

(ङ) विलासमाह, समीहेति।—तत्र—तेषु मध्ये, रतिभोगार्था—सुरतसम्भोगविषयिणी, समीहा—चेष्टा, स्पृहा वा, विलास इति कथ्यते।

(च) तदर्था—तदुपभोगार्था। अन्यत् स्पष्टम्।

यथा शाकुन्तले,—

"कामं प्रिया न सुलभा मनस्तु तद्भावदर्शनाश्वासि।
अकृतार्थेऽपि मनसिजे रतिमुभयप्रार्थना कुरुते॥" (न)

इष्टनष्टानुसरणं परिसर्पश्च कथ्यते ॥३५७॥ (प)

यथा शाकुन्तले,—"राजा।.....भवितव्यम्। तथा हि,—

अभ्युन्नता पुरस्तादवगाढ़ा जघनगौरवात् पश्चात्।
द्वारेऽस्य पाण्डुसिकते पदपङ्क्तिर्दृश्यतेऽभिनवा॥" (फ)

(न) उदाहरति, काममिति।—प्रिया—शकुन्तला, कामं—सम्यक्, न सुलभा—न सुप्रापा, यद्वा,—[सा इत्यध्याहार्य्यं] शकुन्तला कामम्—अत्यर्थं, प्रिया—प्रियतमा, तर्हि तूष्णीं स्थीयतां, किं वृथा खेदेन? इत्याह, न सुलभा इति।—न सुखेन लभ्या, गुरुजनाधीनत्वात्, गुरोरपि दूरवर्त्तित्वादिति भावः। यद्येवं दुर्लभा, तर्हि किं प्रयत्नेन? इत्याह,—तु—किन्तु, मनः,—चित्तवृत्तिः, तस्याः,—शकुन्तलायाः, भावदर्शनेन—मयि अनुरागव्यञ्जकतादृशचेष्टाविशेषदर्शनेन, आश्वासि—आश्वस्तं, प्रिया लभ्येति आशास्ते, ["तद्भावदर्शनायासि" इति पाठे,—तद्भावदर्शने—तच्चेष्टाऽवलोकने, आयासि—प्रयासयुक्तं, प्रयत्नपूर्व्वकं लालसमित्यर्थः] यद्वा,—तस्याः प्रियायाः, भावः सुरतचेष्टा च, दर्शनञ्च ते आयसति वाञ्छति इत्यर्थः; (अस्मिन् पाठे तु-शब्दः, खेदातिशयद्योतकः) तथाहि,—मनसिजे—कामे, अकृतार्थे—असङ्गत्या अकृतकार्य्ये, अपि, उभयोः,—स्त्रीपुंसयोः, प्रियायाः प्रियस्य मम च इत्यर्थः, यद्वा,—प्रियाभावदर्शनयोः, प्रार्थना—कामना, रतिम्—अनुरागम्, "अहं तत्र गमिष्यामि, तामेवं वक्ष्ये" इत्यभिलाषजनितसन्तोषमिति यावत्, कुरुते—जनयति। अत्र नायिकासम्भोगविषयिणी स्पृहा प्रदर्शिता। आर्य्या जातिः।

(प) परिसर्पमाह, इष्टेति।—इष्टस्य—अभिलषितस्य, नष्टस्य—अदर्शनं गतस्य, अनुसरणम्—अन्वेषणं, च परिसर्पः कथ्यते।

(फ) उदाहरति, अभ्युन्नतेति।—अस्य—लतामण्डपस्य, पाण्डुसिकते—पाण्डुवर्णा सिकता—वालुका यत्र तथाभूते, द्वारे—प्रवेशमार्गे, पुरस्तात्—अग्रतः, पादाग्रभागे इत्यर्थः, (पश्चाद्भागापेक्षया) अभ्युन्नता, पश्चात्—पार्ष्णिदेशे इति भावः, जघनस्य—श्रोणिपुरोभागस्य, गौरवात्—भारवत्त्वात्, अवगाढ़ा—अवनता, अतिनिम्ना इति यावत्, अभिनवा—अचिराङ्किता इत्यर्थः, पदपङ्क्तिः,—पदन्यासपद्धतिः, दृश्यते। अत्र अभिलषितान्वेषणं ज्ञेयम्। आर्य्या जातिः।

कृतस्यानुनयस्यादौ विधृतत्वपरिग्रहः ॥३५८॥ (ब)

यथा तत्रैव,—"अलं वो अंतेउरविरइपज्जुस्सुएण राएसिणा उवकरेण?" केचित्तु "विधूतं सादरतिः" इति वदन्ति। (भ)

उपायादर्शनं यत्तु तापनं नाम तद्भवेत् ॥३५९॥(म)

यथा रत्नावल्यां सागरिका,—

"दुल्लहजणाणुराओ लज्जा गुरुई परवसो अप्पा।
पियसहि! विसमं पेम्मं मरणं सरणं णवरि एक्कं॥" (य)

(ब) विधूतमाह, कृतस्येति।—आदौ—अयतः,कृतस्य अनुनयस्य परिग्रहः,—अवधीरणं, विधूतम्।

(भ) अलमिति।—["अलं वोऽन्तःपुरविरहपर्युत्सुकेन राजर्षिणा उपकरणेन?" इति संस्कृतम्]। अन्तःपुरस्य—अन्तःपुरवर्तिनः महिलाजनस्य, विरहेण पर्युत्सुकः,—उत्कण्ठितः तेन, राजर्षिणा, वः,—युष्माकम्, उपकरणेन—अनुनयेन, अलम्—व्यर्थम्, अलानुनयो न कर्तव्य इत्यर्थः। अत्र सख्या कृतस्य राजावल्यानानुनयस्य प्रकुपितया अपरिग्रहः सूचितः। केचित्तु—दशरूपककारादयः, धृतिः,—अवज्ञाभावः।

(म) तापनमाह, उपायेति।—यत्तु उपायस्य अदर्शनं, तत् तापनं नाम भवेत्। दशरूपककारास्तु तापनलक्षणे भ्रमः इति व्यवहरन्ति। [तथाहि,—"तप्तस्य भ्रमः" इति; तस्याः,—पूर्वं निरूपायाया धरतेः, भ्रमः भ्रम उच्यते इति च तदर्थः]।

(य) उदाहरति, दुल्लहेति।—["दुर्लभजनानुरागो लज्जा गुर्वी परवश आत्मा। प्रियसखि! विषमं प्रेम मरणं शरणं केवलमेकम्।" इति संस्कृतम्]। अवधीरणे: केवलार्थो देशीयः। दुर्लभे—दुष्प्रापे जने, अनुरागः, लज्जा, गुर्वी—महती, आत्मा परवशः,—पराधीनः। हे प्रियसखि! प्रेम विषमम्—उत्कटं, तस्मात् केवलं मरणम् एकं शरणम्—आश्रयः। अत्र इष्टलाभे उपायाभावेन सन्तापः। आर्या छन्दः। दशरूपककारमते तु उदाहरणं यथा रत्नावल्याम्;—राजा। वयस्य! अनया विलिखितोऽहमिति यत् सत्यम्, आत्मानेव बहुमानः; तत् कथं न पश्यामि? इति प्रकाशे"सागरिका [आत्मगतम्] प्रियव! समस्तस समस्तस। नवोरहो किं ह्रीत्यं भूमिं च गतो।" इति विलिखदात्मोपगमनाच्छन्नः। ["हृदय! समाश्वसिहि समाश्वसिहि, नवोरहोऽपि ते प्रत्यावर्तो भूमिं न गतः" इति संस्कृतम्]।

परिहासवचो नर्म ॥३६०॥ (र)

यथा रत्नावल्याम्;—"सुसङ्गता। सखि! जस्स किदे तुमं आअदा सो अअं दे पुरदो चिट्ठदि। सागरिका। [साभ्यसूयम्] कस्स किदे अहं आअदा? सुसङ्गता। [विहस्य] अइ अप्पसंकिदे! णं चित्तफलअस्स"। (ल)

द्युतिस्तु परिहासजा।

नर्मद्युतिः ॥३६१॥ (व)

यथा तत्रैव,—"सुसङ्गता। सखि! अदक्खिणा दाणिंसि तुमं जा एवं भट्टिणा हत्थावलम्बिदावि कोवं ण मुञ्चसि। सागरिका। [सभूभङ्गमोषद्विहस्य] सुसङ्गते! दाणिं वि कीलिदं ण विरमसि?"(श) केचित्तु—"दोषस्याच्छादनं हास्यं नर्मद्युतिः"इति वदन्ति। (ष)

प्रगमनं वाक्यं स्यादुत्तरोत्तरम् ॥३६२॥ (स)

(र) नर्मेति, परिहासेति।—परिहासवचः;,—परिहासवाक्यं, नर्म। नाट्याचार्यकारा अप्याहुः,—"क्रीडार्थं विहितं यत्र हास्यं नर्मेति तत् स्मृतम्" इति।

(ल) सखीति।—["सखि! यस्य कृते त्वमागता, सोऽयं ते पुरतः तिष्ठति!.....। कस्य कृते अहमागता?.....अयि! अल्पशङ्किते! मनु चित्रफलकस्य" इति संस्कृतम्]।

(व) नर्मद्युतिमाह, द्युतिरिति।—परिहासजा—परिहासेन जाता, द्युतिः,—शोभा, नर्मद्युतिः।

(श) सखीति।—["सखि! अदक्षिणा इदानीमसि त्वं, या एवं भर्त्रा हस्तावलम्बितापि कोपं न मुञ्चसि।.....सुसङ्गते! इदानीमपि क्रीडितं न विरमसि?" इति संस्कृतम्]।

(ष) केचित्विति।—तथा हि भरतः,—"दोषस्याच्छादनार्थन्तु नर्मद्युतिरिति स्मृतम्" इति। "नर्मद्युतिः क्रीडद्युतिः" इति काव्येन्दुप्रकाशकारश्च।

(स) प्रगमनमाह, प्रगमनमिति।—उत्तरोत्तरम्—उत्तरम्—उत्कृष्टतरम्, उत्तरं युक्तं तत् वाक्यं प्रगमनं स्यात्।

यथा विक्रमोर्वश्याम्,—"जयतु जयतु महाराजो। राजा। मया नाम जितं यस्य त्वया जय उदीर्यते" इत्यादि। (ङ)

विरोधो व्यसनप्राप्तिः ॥३६३॥ (क)

यथा चण्डकौशिके,—"राजा। नूनमसमीक्ष्यकारिता मया अक्ष्णेव स्फुरच्छिखाकलापो ज्वलनः पक्ष्मां समाक्रान्तः।" (ख)

कृतस्यानुनयः पुनः।
स्यात् पर्य्युपासनम् ॥३६४॥ (ग)

यथा रत्नावल्याम्;—"विदूषकः। भो! मा कुप्प, एसा हि कदलीघरंतरं गदा" इत्यादि। (घ)

(ङ) जयतु इति।—["जयति जयति महाराजः" इति संस्कृतम्]। मयेति।—यस्य (मम) त्वया जयः उदीर्यते—ऊर्ध्वते, (तेन) मया, जितं नाम—जितमेव। नामशब्दोऽत्र अवधारणार्थः।

(क) विरोधमाह, विरोध इति।—व्यसनस्य—विपदः, प्राप्तिः विरोधः। इदमुपलक्षणमात्रम् विरोधमेव निरोधमाह; तथाहि,—"अथ निरोधः। द्वितरोधः" इति। यथा रत्नावल्याम्;—"राजा। धिक्मूर्ख! प्राप्ता अवमपि देवात्, कण्ठनलीतेव सा प्रकटरागा। रत्नावलीव क्षान्ता मम हस्तात् भ्रंशिता भवता॥" इत्यनेन वत्सराजस्य सागरिकासमागमसंपत्तिरूपस्य वासवदत्ताप्रवेशसूचकेन विदूषकवचसा निरोधात् निरोधनम्" इति।

(ख) उदाहरति, यथेति।—असमीक्ष्यकारिता—अविवेचकेन, मया अक्ष्णेव—दृष्टिहीनेनेव, स्फुरन्—विराजन्, शिखाकलापः,—अर्चिःसमूहः, अग्निः तथाभूतः, ज्वलनः,—अग्निः, पक्ष्मां, समाक्रान्तः,—दलितः। अत्राग्निकल्पस्य कौशिकस्य कोपात् राज्ञः व्यसनप्राप्तिः।

(ग) पर्य्युपासनमाह, कृतस्येति।—कृतस्य—जातस्यापराधस्य, पुनः अनुनयः,—विनयोक्त्याऽनुसन्धानं, प्रसादनमिति यावत्, पर्य्युपासनं स्यात्। नाट्यग्रन्थेऽयुक्तम्;—"कृतस्यानुनयो यस्तु भवेत् तत् पर्य्युपासनम्" इति।

(घ) भो! मा कुप्पेति।—["भो! मा कुप्प, एषा हि कदलीगृहान्तरं गता" इति संस्कृतम्]।

पुष्पं विशेषवचनं मतम् ॥३६५॥ (ङ)

यथा तत्रैव,—"[राजा इसे गढ़ीला स्वयं नाटयति]। विदूषकः। भो वयस्स! एसा अपुव्वा सिरी तुए समासादिदा। (च) राजा। वयस्य! सत्यम्;—

श्रीरेषा पाणिरप्यस्याः पारिजातस्य पल्लवः।
कुतोऽन्यथा स्रवत्येष स्वेदच्छद्मामृतद्रवः॥" (छ)

प्रत्यक्षनिष्ठुरं वज्रं ॥३६६॥ (ज)

यथा तत्रैव,—"राजा। कथमिहस्थोऽहं त्वया ज्ञातः? सुसङ्गता। ण केवलं देवो, चित्तफलएण सह सव्वोवि वुत्तंतो मए विण्णादो, ता देवीए गदुअ णिवेदइस्सं।" (झ)

उपन्यासः प्रसादनम् ॥३६७॥ (ञ)

यथा तत्रैव,—"सुसङ्गता। पसण्णा मे भट्टा, अलं संकाए।

(ङ) पुष्पमाह, पुष्पमिति।—विशेषस्य—प्रकर्षस्य, वचनम्—अनुरागजनकं वाक्यमित्यर्थः, पुष्पं मतम्।

(च) भो वयस्सेति।—["भो वयस्य! एषा अपूर्वा श्रीस्त्वया समासादिता" इति संस्कृतम्]।

(छ) श्रीरिति।—एषा—स्त्री, श्रीः,—लक्ष्मीस्वरूपा, अस्याः पाणिरपि—हस्तोऽपि, पारिजातस्य—देवतरुविशेषस्य, पल्लवः, अन्यथा कुतः,—कथम्, स्वेदच्छद्मा—घर्मव्याजः, एषः अमृतद्रवः स्रवति—निःसरति। एतत्सर्वमनुरागहेतुकत्वात् विशेषवचनम्। धनिकेनाप्युक्तम्—"इत्यनेन नायकयोः साक्षादन्योन्यदर्शनादिना सविशेषानुरागोद्घाटनात् पुष्पम्" इति। पद्यावली इयम्।

(ज) वज्रमाह, प्रत्यक्षेति।—प्रत्यक्षं—साक्षात्, निष्ठुरं—परुषवचनं, वज्रवत् दुःखदत्वाद् वज्रम्। नाट्यशास्त्रेऽप्युक्तं,—"विरुद्धवचनप्रायं वज्रमित्यभिधीयते" इति।

(झ) ण केवलमिति।—["न केवलं देवः, चित्रफलकेन सह सर्वोऽपि वृत्तान्तो मया विज्ञातः, तद् देव्यै गत्वा निवेदयिष्यामि" इति संस्कृतम्]।

(ञ) उपन्यासमाह, उपन्यास इति।—प्रसादनं—प्रसन्नतासम्पादनम्, उपन्यासः।

एदिणा भट्टिणो पसादेण मए कीलिदं एव्व, ता किं कसाभरणेण ? अदो वि मे गुरुओ पसादो एसो, जं तुए अहं एत्थ आलिहिदत्ति कुविदा मे पिअसही सागरिआ, एसा एव्व पसादीअदु।" (ट)

केचित्तु,—उपपत्तिकृतो योऽर्थ उपन्यासः स कीर्त्तितः।" इति वदन्ति, उदाहरन्ति च तत्रैव,—"अदिमुहरा खु एसा गब्भदासी" इति। (ठ)

चातुर्वर्ण्योपगमनं वर्णसंहार दृष्यते ॥३६८॥(ड)

यथा वीरचरिते तृतीयेऽङ्के,—

"परिषदियमृषीणामेष वीरो युधाजित्
सह नृपतिरमात्यैर्लोमपादश्च वृद्धः।
अयमविरतयज्ञो ब्रह्मवादी पुराणः
प्रभुरपि जनकानामङ्ग! भो! याचकास्ते॥" (ढ)

(ट) पसन्नो इति।—["प्रसन्नो मे भर्त्ता, अलं गर्ह्यया। एतेन भर्तुः प्रसादेन मया क्रीडितमेव, तत् किं कर्णाभरणेन ? अतोऽपि मे गुरुकः प्रसाद एषः, यत् त्वया अहम् अत्र आलिखिता इति कुपिता मे प्रियसखी सागरिका, एषैव प्रसाद्यताम्" इति संस्कृतम्]।

(ठ) भरतादीनां मतमाह, केचित्त्विति।—केचित्—नाट्यशास्त्रानुयायिनः, प्राहुः इति शेषः। उपपत्तिः,—युक्तिः, हेतुरित्यर्थः, तया कृतः यः अर्थः,—वस्तु, स उपन्यासः कीर्त्तितः इति। उदाहरन्ति पुनस्ते एव; तत्रैव—रत्नावल्यां द्वितीयेऽङ्के, [विदूषकः]। अदीति।—["अतिमुखरा खलु एषा गर्भदासी" इति संस्कृतम्]। एषा—सुसङ्गता, अतिमुखरा—अत्यन्तं वाचाला, गर्भदासी—गर्भेण—जन्मना, दासीत्यर्थः।

(ड) वर्णसंहारमाह, चातुर्वर्ण्येति।—चतुर्णां वर्णानां—ब्राह्मणक्षत्रियवैश्यशूद्राणां समाहारः, चत्वारो वर्णाः वा चातुर्वर्ण्यं, तस्य उपगमनं—मेलनं, वर्णसंहारः दृश्यते।

(ढ) उदाहरति, परिषदिति।—ऋषीणामग्रणीः। भो अङ्ग! भो जान-

इत्यत्र ऋषिक्षत्रादीनां वर्णानां मेलनम्। अभिनवगुप्तपादास्तु,—"वर्णशब्देन पात्राण्युपलक्ष्यन्ते" "संहारो मेलनम्" इति व्याचक्षते; उदाहरन्ति च रत्नावल्यां द्वितीयेऽङ्के,—"एसो एव्व मे अअं गरुअरो पसादो" इत्यादेरारभ्य "णं हत्थेगेह्णिअ पसादेहि णं। (ण) राजा। क्वासौ क्वासौ?" इत्यादि।

अथ गर्भाङ्गाणि,—

अभूताहरणं मार्गो रूपोदाहरणे क्रमः।
सङ्ग्रहश्चानुमानञ्च प्रार्थना क्षिप्तिरेव च॥
त्रोटकाधिबलोद्वेगा गर्भे स्युर्विद्रवस्तथा।
तत्र व्याजाश्रयं वाक्यमभूताहरणं मतम्॥३६९॥ (त)

यथा वेणीसंहारे अश्वत्थामाऽङ्के,—

"अश्वत्थामा हत इति पृथा-सूनुना स्पष्टमुक्त्वा
स्वैरं शेषे गज इति पुनर्व्याहृतं सत्यवाचा॥" (थ)

दग्न्य!—इयम् ऋषीणाम् [ऋषन्ति—वेदं पश्यन्ति इति ऋषयः तेषां, गत्यर्थधातूनां ज्ञानार्थकत्वस्वीकारात् धातूनामनेकार्थत्वसिद्धेर्वा ऋषतेर्दर्शनार्थे वृत्तिः यास्कमतानुरूपा ज्ञेया; प्रत्यक्षीकरणमेव अत्र दर्शनं, न चाक्षुषज्ञानमिति] परिषत्—सभा, समूह इति यावत्, एष वीरो युधाजित्—कैकेयीभ्राता, अमात्यैः सह नृपतिः,—दशरथः, वृद्धो लोमपादश्च, अयम् अविरतयज्ञः,—सततयज्ञानुष्ठायी, पुराणः,—स्थविरः, ब्रह्मवादी—वेदनिरतः, जनकानां—विदेहवंशीयानां, प्रभुः,—सीरध्वजः इति भावः, अपि ते—तव, याचकाश्च, एते सर्वे समवेता इति शेषः। अत्र मालिनी छन्दः।

(ण) एसो एव्व इति।—["एष एव मे अयं गुरुतरः प्रसादः" इति, "ननु हस्तेगृह्य प्रसादय एनाम्" इति च संस्कृतम्]। अत्र राजविदूषकसागरिकासुसङ्गतारूपाणां पात्राणां मेलनम्। ["हस्तेगृह्य" इति समस्तत्वात् ल्यप्]।

(त) गर्भसन्ध्यङ्गानि आह, अथेति।—अभूताहरणमिति।—अभूताहरणादीनि त्रयोदश गर्भसन्धेरङ्गानीत्यर्थः। तत्र—तेषु मध्ये, व्याजाश्रयं—कपटाश्रयं, वाक्यम् अभूतस्य—असत्यस्य, आहरणमित्यभूताहरणं मतं—कथितम्।

(थ) उदाहरति, यथेति।—अश्वत्थामेति।—अश्वत्थामा हतः,—विनाशितः,

तत्त्वार्थकथनं मार्गः ॥३७०॥ (द)

यथा चण्डकौशिके,—"राजा। भगवन्!—

गृह्यतामर्ज्जितमिदं भार्य्यातनयविक्रयात्।

शेषस्यार्थे करिष्यामि चाण्डालेऽप्यात्मविक्रयम्॥" (ध)

रूपं वाक्यं वितर्कवत् ॥३७१॥ (न)

यथा रत्नावल्यां,—"राजा,—

मनः प्रकृत्यैव चलं दुर्लक्ष्यञ्च तथाऽपि मे।

कामेनैतत् कथं विद्धं समं सर्वैः शिलीमुखैः?॥" (प)

उदाहरणमुत्कर्षयुक्तं वचनमुच्यते ॥३७२॥ (फ)

इति पृथा—कुन्ती, तस्याः सूनुः,—सुतः तेन, युधिष्ठिरेणेत्यर्थः, सत्यवाचा—सत्यवादिना सता, स्पष्टं—सुव्यक्तम्, उक्त्वा, शेषे—वाक्यावसाने, पुनः स्वैरं—मन्दं, यथा स्यात् तथा, ["पुनः" इत्यत्र "किल" इति पाठान्तरम्] गज इति व्याहृतम्—उक्तम्। अत्र युधिष्ठिरस्य द्रोणाचार्य्यं श्रावयितुम् "अश्वत्थामा हतः" इत्युच्चैः, "गजः" इति तु वाक्यावसाने तत्रापि नीचैरिति स्फुटं कैतवपूर्णमिदं वचनम्।

(द) मार्गमाह, तत्त्वेति।—तत्त्वार्थस्य कथनं मार्गः।

(ध) उदाहरति,—गृह्यतामिति।—विश्वामित्रं प्रति राज्ञः हरिश्चन्द्रस्येयमुक्तिः। भार्य्या च तनयश्च तयोः विक्रयात्—मूल्यग्रहणपूर्वकार्पणात्, अर्जितं—लब्धम्, इदं धनं गृह्यतां, शेषस्य—अवशिष्टस्य, देयस्य इत्यर्थः, अर्थे—निमित्तं, चाण्डालेऽपि आत्मविक्रयं—दास्यमित्यर्थः, करिष्यामि। अत्र राज्ञः तत्त्वार्थभाषणम्।

(न) रूपमाह, रूपमिति।—वितर्कवत् वाक्यं रूपम्। नाट्यशास्त्रेऽप्युक्तं,—"चित्रार्थसमवायो यस्तद्रूपमिति कीर्त्तितम्" इति।

(प) उदाहरति, मन इति।—मनः,—चित्तं,—प्रकृत्यैव—स्वभावेनैव, चलं—चञ्चलं, दुर्लक्ष्यञ्च—लक्षयितुं—शरव्यीकर्त्तुम्, अशक्यञ्च, तथाऽपि कामेन मे—मम, एतत्—मनः, समं—युगपत्, सर्वैः शिलीमुखैः,—शरैः, कथं विद्धम्? अत्र राज्ञः सवितर्कं वचनम्।

(फ) उदाहरणमाह, उदाहरणमिति।—उत्कर्षयुक्तं वचनं—वाक्यम्, उदाहरणम् उच्यते—कथ्यते। काव्यप्रदीपकृता तु,—"परस्योद्वेगजनकं स्वात्मविक्रम-

यथा अश्वत्थामाऽङ्के,—

"यो यः शस्त्रं बिभर्त्ति स्वभुजगुरुमदात् पाण्डवीनां चमूनां,
यो यः पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्यां गतो वा।
यो यस्तत्कर्मसाक्षी, चरति मयि रणे यश्च यश्च प्रतीपः,
क्रोधान्धस्तस्य तस्य स्वयमिह जगतामन्तकस्यान्तकोऽहम्॥"(ब)

भावतत्त्वोपलब्धिस्तु क्रमः स्यात्॥३७३॥ (भ)

यथा शाकुन्तले—"राजा।—स्थाने खलु विस्मृतनिमेषेण चक्षुषा प्रियामवलोकयामि। तथाहि,—

कीर्त्तनम्। उदाहरणमित्युक्तं परिणामे मृषाऽर्थकम्॥" इति लक्षयित्वा यथा कंसवधे,—"कंसः। अहो! कोऽयं नन्दगोपस्य बालः? सत्यमहं प्रतिजाने तमहं तृणमिव धक्ष्यामि। [सक्रोधम्] हन्त! को नाम मत्प्रतीपमाचरन् सुखं शयिता, यदि साक्षात् मृत्युरापतितः स्यात्" इत्युदाहृतम्।

(ब) उदाहरति, यो य इति।—पितरि द्रोणे अन्यायतः पाञ्चालसुतेन धृष्टद्युम्नेन निहते क्रुद्धस्य अश्वत्थाम्न उक्तिरियम्। पाण्डवीनां चमूनां—सेनानां मध्ये, यः यः स्वभुजगुरुमदात्—निजबाहुबलस्यातिदर्पादित्यर्थः, ["स्वभुजगुरुबलः" इति पाठे—आत्मबाहुमात्रसहाय इत्यर्थः] शस्त्रं बिभर्त्ति—धरति, पाञ्चालगोत्रे—द्रुपदवंशे, यः यः शिशुः, अधिकवयाः,—प्रवयाः, वा गर्भशय्यां—जरायुं गतः, मातृजठरस्थित इत्यर्थः, यः यः तस्य कर्मणः,—मत्पितृनिधनरूपस्येति भावः, साक्षी—साक्षात् द्रष्टा, दृष्टाऽपि प्रतीकारार्थं यत्नाभावेन उदासीन इव स्थित इत्यर्थः, तथा यश्च यश्च मयि रणे—सङ्ग्रामव्यापारे, चरति—भ्रमति सति, प्रतीपः,—प्रतिकूलो भविष्यतीत्यर्थः, अहं—द्रोणपुत्रः, अश्वत्थामेति यावत्, क्रोधेन—पितृनिधनजनितेन इति भावः, अन्धः,—कर्त्तव्याकर्त्तव्यविवेकशून्यः सन्, स्वयं—साक्षात्, (न तु अन्यसहायः) जगताम् अन्तकस्य—यमस्य अपि, सकलकोकोच्छेदनसमर्थस्यापीत्यर्थः, इह—रणभूमौ, (न तु अन्यत्र) तस्य तस्य अन्तकः,—विनाशकः, भविष्यामीति शेषः। स्रग्धरा वृत्तम्।

(भ) क्रममाह, भावेति।—भावस्य—निर्विकारचित्तस्य, प्रथमविकृतिरूपस्य, ("निर्विकारात्मके चित्ते भावः प्रथमविक्रिया" इति पूर्वोक्तलक्षणात्) तत्त्वोपलब्धिः,—याथार्थ्यानुभवः, क्रमः स्यात्।

उन्नमितैकभ्रूलतमाननमस्याः पदानि रचयन्त्याः।
पुलकाञ्चितेन कथयति मय्यनुरागं कपोलेन॥" (म)

सङ्ग्रहः पुनः।

सामदानार्थसम्पन्नः॥३७४॥ (य)

यथा रत्नावल्यां—"राजा। साधु वयस्य! इदं ते पारितोषिकम् [इति कटकं ददाति]" (र)।

लिङ्गादूहोऽनुमानता॥ ३७५॥ (ल)

यथा जानकीराघवे नाटके—"रामः,—

लीलागतैरपि तरङ्गयतो धरित्रीम्
आलोकनैर्नमयतो जगतां शिरांसि।

(म) उदाहरति, उन्नमितैकभ्रूलतमिति।—उन्नमिता—उत्क्षिप्ता, एका भ्रूलता यत्र तादृशं, पदानि—सुप्तिङन्तरूपाणि, व्यवसितानि वा, रचयन्त्याः अस्याः,—शकुन्तलायाः, आननं—मुखं, पुलकाञ्चितेन—पुलको रोमाञ्चो नाम सात्त्विकभावः, स जातोऽस्य तादृशेन, कपोलेन, (यद्दिक्स्थभ्रूलतोन्नमनं तद्दिक्स्थकपोलस्यैव पुलकाञ्चितत्वमिति एकवचनस्वरसः) मयि [पुण्यवत्त्वं सुभगम्मन्यत्वं ध्वनयितुं, स्वस्याधिकरण्यम्] अनुरागं—रतेः षष्ठ्यवस्थां, [निरूपितञ्च सुधाकरे—"अङ्कुरपल्लवकलिकाप्रसूनफलभोगभागियं क्रमशः। प्रेमा मानः प्रणयः स्नेहो रागोऽनुराग इत्युक्तेः"॥ इति] कथयति—प्रकटयति, इव। अत्र शकुन्तलायाः प्रथमविकृतिरनुभवः। अत्र यद्यपि भावस्य अल्पसंलक्ष्यविकारत्वात् हावत्वप्रतीतिः, तथापि अत्र भावस्य एव विशेषतया स्थितिः इति नानुपपत्तिः। शाकुन्तलस्येदं पद्यम्। आर्य्या जातिः।

(य) सङ्ग्रहमाह, सङ्ग्रह इति।—साम्ना प्रियवाक्येन, दानेन च अर्थस्य सम्पत्तिः, समाधानमित्यर्थः, सङ्ग्रहः।

(र) उदाहरति, साध्विति।—स्पष्टम्। अत्र प्रियवचनदानाभ्यां दूतपरितोषद्वारा सागरिकासङ्घटनारूपस्य अर्थस्य समाधानम्।

(ल) अनुमानमाह, लिङ्गादिति।—लिङ्गात्—पक्षसत्त्वं सपक्षसत्त्वं विपक्षव्यावृत्तत्वविशिष्टात् साधनज्ञानात्, ऊहः,—साध्यज्ञानं, व्यापकताऽनुभव इत्यर्थः, अनुमानता—अनुमानमित्यर्थः। [स्वार्थे ताप्रत्ययः]। नाट्यशास्त्रेऽप्युक्तम्;—"रूपानुरूपगमनमनुमानमिति स्मृतम्" इति।

तस्यानुमापयति काञ्चनकान्तिगौर-
कायस्य सूर्य्यतनयत्वमधृष्यताञ्च ॥" (ब)

रतिहर्षोत्सवानान्तु प्रार्थनं प्रार्थना भवेत्॥३७६॥(श)

यथा रत्नावल्याम् ;—"प्रिये सागरिके !—
शीतांशुर्मुखमुत्पले तव दृशौ, पद्मानुकारौ करौ,
रम्भास्तम्भनिभं तथोरुयुगलं, बाहू मृणालोपमौ ।
इत्याह्लादकराखिलाङ्गि ! रभसान्निःशङ्कमालिङ्ग्य माम्
अङ्गानि त्वमनङ्गतापविधुराण्येह्येहि निर्वापय ॥" (ष)

इदञ्च प्रार्थनाख्यमङ्गम् । यन्मते निर्वहणे इह भूतावसर-

(ब) उदाहरति, लीलागतैरिति ।—लीलागतैः,—सविलासगमनैः, धरित्रीं—पृथिवीं, तरङ्गयतः,—कम्पयतः, आलोकनैः,—दृष्टिभिः, जगतां शिरांसि नमयतः,—नतानि कुर्वतः, काञ्चनस्य—स्वर्णस्य, या कान्तिः तद्वत् गौरः कायो यस्य तादृशस्य, तस्य—लक्ष्मणस्य, सूर्य्यतनयत्वं—सूर्य्यवंशीयत्वम्, अधृष्यतां—दुरासदत्वं च, अनुमापयति—अनुमानविषयीकरोति । [लीलागतमालोकनञ्चेति कर्त्तृपदमध्याहार्य्यम्]। अत्र लीलागमनादिप्रयुक्तधरित्रीकम्पनादिरूपात् साधनात् साध्यस्य सूर्य्यतनयत्वस्य अधृष्यत्वस्य च अनुमानम् । वसन्ततिलकं वृत्तम् ।

(श) प्रार्थनामाह, रतीति ।—रतेः,—अनुरागात्, हर्षाच्च उत्सवानां प्रार्थनं—याच्ञा, प्रार्थना भवेत् ।

(ष) उदाहरति, यथेति । शीतांशुरिति ।—तव मुखं शीतांशुः,—चन्द्रः, दृशौ—नेत्रे, उत्पले—नीलोत्पले इत्यर्थः, करौ—हस्तौ, पद्मानुकारौ—पङ्कजोपमौ, ऊरुयुगलं रम्भास्तम्भनिभं—कदलीगर्भस्तम्भदण्डसदृशं, तथा बाहू—भुजौ, मृणालोपमौ ; इत्थम् आह्लादकराणि—आनन्ददातॄणि, अखिलानि—सर्वाणि, अङ्गानि यस्यास्तत्सम्बुद्धौ, [शीतांश्वादिसमानत्वेनावयवानामनङ्गानलतापनिर्वापणपटुत्वं सूचितम्] त्वं रभसात्—वेगात्, हर्षाद्वा, ("रभसो वेगहर्षयोः" इत्यमरः) निःशङ्कं यथा स्यात् तथा, माम् आलिङ्ग्य अनङ्गतापविधुराणि—मदनसन्तापविक्लवानि, मम अङ्गानि निर्वापय—शीतलय, एहि एहि—आगच्छ, आगच्छ, [आभीक्ष्ण्ये द्विरुक्तिः]। शार्दूलविक्रीडितं वृत्तम् ।

त्वात् (स) प्रशस्तिनामाङ्गं नास्ति, तन्मतानुसारेणोक्तम्; अन्यथा-ऽङ्गानां पञ्चषष्टिसङ्ख्यत्वप्रसङ्गात् ।

रहस्यार्थस्य तूद्भेदः क्षिप्तिः स्यात् ॥३७७॥ (ह)

यथा अश्वत्थामाऽङ्के,—

"एकस्यैव विपाकोऽयं दारुणो भुवि वर्त्तते ।
केशग्रहे द्वितीयेऽस्मिन् नूनं निःशेषिताः प्रजाः ॥" (क)

त्रोटकं पुनः ।

संरब्धवाक् ॥ ३७८ ॥ (ख)

यथा चण्डकौशिके,—"कौशिकः । आः ! पुनः कथमद्यापि न सम्भूताः (ग) स्वर्णदक्षिणाः ?"

अधिबलमभिसन्धिश्छलेन यः ॥३७९॥ (घ)

(स) यन्मते इति ।—निर्वहणे—निर्वहणाख्ये सन्धौ, भूतावसरत्वात्—प्रार्थनायां प्राप्तविषयत्वात्, अन्यथा—निर्वहणे प्रशस्तिसत्त्वे, पञ्चषष्टिसङ्ख्यत्वे को दोषः ? इति चेत् सम्प्रदायविरोध इति । महर्षिप्रतिपादितः सम्प्रदायो यथा,—"चतुःषष्टिर्बुधैर्ज्ञेयान्येतान्यङ्गानि सन्धिषु" इति ।

(ह) क्षिप्तिमाह, रहस्येति ।—रहस्यस्य—गुप्तस्य अर्थस्य, उद्भेदः,—प्रकटनं, क्षिप्तिः स्यात् ।

(क) उदाहरति, यथेति ।—एकस्यैवेति ।—भुवि—पृथिव्याम्, एकस्य—द्रौपदीकेशग्रहस्य इत्यर्थः, एव अयं दारुणो विपाकः,—दुष्परिणामः, वर्त्तते, अस्मिन् द्वितीये केशग्रहे—द्रोणकेशाकर्षणे, नूनं—मन्ये, प्रजाः निशेषिताः, भविष्यन्तीति शेषः । केशानाकृष्य द्रोणं निहतवान् धृष्टद्युम्न इति पुराणम् ।

(ख) त्रोटकमाह, त्रोटकमिति ।—संरब्धा—सकोपा, वाक् पुनः त्रोटकम् ।

(ग) उदाहरति, यथेति ।—सम्भूताः,—सम्प्राप्ताः इत्यर्थः । [भूधातोः प्राप्त्यर्थत्वमत्र बोध्यम्] ।

(घ) अधिबलमाह, अधिबलमिति ।—छलेन—कपटेन, अभिसन्धिः,—अभिप्रायानुसरणम्, अधिबलम् । अन्ये त्वाहुः,—"यद्वेष्टजनसन्धानं बुधा अधिबलं विदुः । त्रोटकस्यान्यथाभावं केचिच्चाधिबलं जगुः ॥" इति ।

यथा रत्नावल्यां—"आसनमाला। भट्टिणि! इअं सा चित्त-सालिआ, ता इध लेक्ख चिट्ठ; अहं पि वसंतअस्स सअं देमि" इत्यादि। (ङ)

नृपादिजनिता भीतिरुद्वेगः परिकीर्त्तितः ॥३८०॥(च)

यथा वेण्याम्—

"प्राप्तावेकरथारूढौ पृच्छन्तौ त्वामितस्ततः।
स कर्णारिः, स च क्रूरो दुष्कर्मा दुष्कोदरः॥" (छ)

शङ्का-भय-त्रासकृतः सम्भ्रमो विद्रवो मतः॥३८१॥(ज)

"कालान्तककरालास्यं क्रोधोद्भूतं दशाननम्।
विलोक्य वानरानीके मम्भ्रमः कोऽप्यजायत॥" (झ)

(ङ) उदाहरति, यथेति।—भट्टिणीति।—["भर्त्रि! इदं सा चित्रशालिका, तत् इहैव तिष्ठ, अहमपि वसन्तकस्य संज्ञां ददामि" इति संस्कृतम्]। चित्रशालिका—आलेख्यगृहं, संज्ञां—सङ्केतम्। आदिशब्देन "किं पद्मस्य ऋधिं न हन्ति" इत्यादि श्लोकपर्य्यन्तस्य परिग्रहः। अत्र आसनमाला-वासवदत्तावेषधारिण्योः सुसङ्गता-सारिकयोः छद्मेन आसनमाला-वासवदत्ताभ्यां राजविदूषकयोरभिप्रायज्ञानम्।

(च) उद्वेगमाह, नृपादीति।—नृपादेः,—विषधरनृपचौरादिना, जनिता—उत्पादिता, भीतिः,—भयम्, उद्वेगः परिकीर्त्तितः।

(छ) उदाहरति, प्राप्ताविति।—दुर्योधनं प्रति तदीयपुरुषस्य उक्तिरियम्। स कर्णारिः,—कर्णशत्रुः, अर्जुनः इत्यर्थः, स च क्रूरः,—निष्ठुरः, दुष्कर्मा—दुष्टः,—व्याघ्रविशेषः, तद्वत् क्रूरं यस्य तादृशः, दुःशासनोरःस्थलात् रुधिरपानादिति भावः, दुष्कोदरः,—भीमः, एकः,—अभिन्नः, रथः तमारूढौ इतस्ततः त्वां पृच्छन्तौ प्राप्तौ—आगतवन्तौ। अत्र दुर्योधनस्य भीमार्जुनाभ्यां जनिता भीतिः। पथ्यावक्त्रं वृत्तम्।

(ज) विद्रवमाह, शङ्केति।—शङ्कया—अनिष्टाशंसया, भयेन—त्रासेन, भयानुकूलव्यापारेण, च सम्भ्रमः,—आवेगः, विद्रवः मतः,—अभिमतः।

(झ) उदाहरति, कालान्तकेति।—कालान्तकः,—प्रलयकालीनो यमः तस्येव करालानि—भीषणानि, आस्यानि—मुखानि यस्य तादृशं, क्रोधोद्भूतं—कोपपूर्णं, दशाननं—दशमुखं रावणं, विलोक्य—दृष्ट्वा, वानरानीके—सैन्ये, कोऽपि—अनिर्वचनीय इत्यर्थः, सम्भ्रमः,—आवेगः, अजायत—अभूत्।

अथ विमर्षाङ्गानि।—

अपवादोऽथ सम्फेटो व्यवसायो द्रवो द्युतिः।
शक्तिः प्रसङ्गः खेदश्च प्रतिषेधो विरोधनम्।
प्ररोचना विमर्षे स्यादादानं छादनं तथा॥ (ञ)
दोषप्रख्याऽपवादः स्यात्॥ ३८२॥ (ट)

यथा वेण्यां,—"युधिष्ठिरः। पाञ्चालक! क्वचिदासादिता तस्य दुरात्मनः पदवी? पाञ्चालकः। न केवलं पदवी, स एव दुरात्मा दैवीकेशपाशस्पर्शपातकप्रधानहेतुरुपलब्धः।" (ठ)

सम्फेटो रोषभाषणम्॥३८३॥ (ड)

यथा तत्रैव,—"राजा। अरे रे मरुत्तनय! हतस्य राज्ञः पुरतो निन्दितमप्यात्मकर्म श्लाघसे? (ढ) शृणु रे!—

कृष्टा केशेषु भार्या तव तव च पशोस्तस्य राज्ञस्तयोर्वा
प्रत्यक्षं भूपतीनां मम भुवनपतेराज्ञया द्यूतदासी।

(ञ) विमर्षाङ्गाण्याह, अथेति।—अपवादादीनि त्रयोदश विमर्षाख्यस्य सन्धेरङ्गानि।

(ट) अपवादमाह, दोषेति।—दोषस्य प्रख्या—कथनम्, अपवादः स्यात्।

(ठ) उदाहरति, पाञ्चालकेति।—आसादिता—प्राप्ता, दुरात्मनः,—दुष्टस्वभावस्य, तस्य—दुर्योधनस्य। दैवीति।—दैव्याः,—द्रौपद्याः, केशपाशस्य स्पर्शात् यत् पातकं तस्य प्रधानहेतुः,—मुख्यकारणं, दुर्योधन इत्यर्थः, उपलब्धः,—प्राप्तः। अत्र दुर्योधनस्य दोषकथनम्।

(ड) सम्फेटमाह, सम्फेट इति।—रोषेण—क्रोधेन, भाषणं—कथनं, सम्फेटः। क्रोधावस्थायामुक्तं वचनं सम्फेटो विमर्षाङ्गमिति भावः।

(ढ) उदाहरति, यथेति।—मरुत्तनय!—वायुपुत्र! भीम इत्यर्थः, हतस्य राज्ञः,—धृतराष्ट्रस्य, पुरतः,—अग्रतः, निन्दितं—लोकगर्हितमपि, आत्मनः कर्म

तस्मिन् वैरानुबन्धे वद किमपकृतं तैर्हता ये नरेन्द्राः
बाह्वोर्वीर्य्यातिभारद्रविणगुरुमदं मामजित्वैव दर्पः॥

भीमः। [सक्रोधम्] आः पाप ! राजा। आः पाप !" इत्यादि। (ण)

व्यवसायश्च विज्ञेयः प्रतिज्ञाहेतुसम्भवः॥३८४॥ (त)

यथा तत्रैव "भीमः,—

निहताशेषकौरव्यः क्षीबो दुःशासनासृजा।
भङ्क्ता दुर्य्योधनस्योर्वोर्भीमोऽयं शिरसा नतः॥" (थ)

द्रवो गुरुव्यतिक्रान्तिः शोकावेगादिसम्भवा॥३८५॥ (द)

(ण) उदाहरति, कृष्टेति।—भीमार्ज्जुनौ प्रति दुर्य्योधनवचनम्। भुवनपतेः,—समस्तपृथिवीश्वरस्य, मम—दुर्य्योधनस्य, आज्ञया भूपतीनां—राज्ञां, प्रत्यक्षं द्यूतेन निर्जिता दासी—किङ्करी, द्यूतेन जितत्वात् दासीव अपमानयथेष्टाचरणयोग्यत्वात् इति भावः; अत एव तव (इति भीमं प्रति उक्तिः) पशोः,—पशुतुल्यस्य इत्यर्थः, तव च (इति अर्ज्जुनं प्रति उक्तिः) तस्य राज्ञः,—युधिष्ठिरस्य, तयोः,—नकुल-सहदेवयोर्वा, (वाशब्दोऽत्र आक्षेपे अनादरे वा); भार्य्यां—द्रौपदी, केशेषु कृष्टा—गृहीता, दुःशासनेनेति शेषः, तस्मिन् वैरस्य—विद्वेषस्य, अनुबन्धे—कारणे, जाते सतीति शेषः, ये नरेन्द्राः,—राजानः, हताः,युष्माभिरिति शेषः, तैः किम् अपकृतम् ? वद। बाह्वोः,—भुजयोः, वीर्य्यातिभारः,—अतिवीर्य्यं, तद् एव द्रविणं—धनं, तेन गुरुः,—महान्, मदः,—गर्व्वः,यस्य तादृशं,माम् अजित्वैव दर्पः,—अहङ्कारः, क्रियते युष्माभिरिति शेषः। अत्र क्रोधेन भीमदुर्य्योधनयोर्भाषणम्। स्रग्धरा वृत्तम्।

(त) व्यवसायमाह, व्यवसाय इति।—प्रतिज्ञायाः,—कार्य्यनिर्देशस्य, हेतोः,—साधननिर्देशस्य, च सम्भवः,—सम्मेलनं, व्यवसायः विज्ञेयः।

(थ) उदाहरति, निहतेति।—पूर्णप्रतिज्ञस्य भीमस्य धृतराष्ट्रं प्रति प्रणति-वचनम्। निहताः,—विनाशिताः, अशेषाः,—समस्ताः, कौरव्याः,—कुरुवंशीयाः, येन तादृशः, दुःशासनस्य असृजा—रक्तेन, रक्तपानेनेत्यर्थः, क्षीबः,—मत्तः, तथा दुर्य्यो-धनस्य ऊर्वोः, ऊरुद्वयस्य, भङ्क्ता—भञ्जनकर्त्ता, अयं भीमः शिरसा नतः,—शिरसा प्रणमतीत्यर्थः। अत्र कार्य्यस्य कौरवहननादिकस्य क्षीबत्वहेतोश्च दुःशासन-रुधिरपानस्य सम्मेलनम्।

(द) द्रवमाह, द्रव इति।—शोकावेगादिना—शोकः,—पुत्रादिवियोगदुःखम्,

यथा तत्रैव,—"युधिष्ठिरः। भगवन्! कृष्णाग्रज! सुभद्राभ्रातः!—

भ्रातिप्रीतिर्मनसि न ज्ञता, क्षत्रियाणां न धर्मो
रूढं सख्यं तदपि गणितं नानुजस्यार्जुनेन।
तुल्यः कामं भवतु भवतः शिष्ययोः स्नेहबन्धः
कोऽयं पन्था यदसि विमुखो मन्दभाग्ये मयि त्वम्?॥" (ध)

तर्जनोद्वेजने प्रोक्ता द्युतिः ॥३८६॥ (न)

यथा तत्रैव दुर्य्योधनं प्रति कुमारब्रुकोदरेणोक्तम्,—

"जन्मेन्दोर्विमले कुले व्यपदिशस्यद्यापि धत्से गदां
मां दुःशासनकोणशोणितमधुक्षौद्रं रिपुं मन्यसे।
दर्पान्धो मधुकैटभद्विषि हरावप्यूहतं चेष्टसे
त्रासान्मे नृपशो! विहाय समरं पङ्केऽधुना लीयसे॥" (प)

आवेगः,—भयादिजनितमनसः सम्भ्रमः, तदादिना, सम्भवा—सम्भूता, गुरूणां—पूज्यानां, व्यतिक्रान्तिः,—व्यतिक्रमः, समादरलङ्घनमिति यावत्, द्रवः, क्षय्यते इति शेषः।

(ध) उदाहरति, भ्रातीति।—भ्रातिप्रीतिः,—एकवंशजत्वनिबन्धनः प्रणयः इत्यर्थः, युधिष्ठिरचन्द्रदेवयोरैक्ष्वाकचन्द्रवंशप्रभवत्वात् भ्रातिलमिति भावः, मनसि न ज्ञता—न गणिता इत्यर्थः, क्षत्रियाणां धर्मः,—संग्रामे प्रणयिनि पक्षपातो नास्ति इत्येवंरूप इति भावः, "न गणितः" इत्यन्वयः; अर्जुनेन, सममिति शेषः, अनुजस्य—क्षत्रस्य, रूढं—बद्धं, प्रसिद्धमिति यावत्, सख्यं—मित्रता, यत् तदपि, न गणितं—तुच्छीकृतं, भवतेति सर्व्वत्राध्याहार्य्यम्। भवतः,—तव, शिष्ययोः,—गदायुद्धेऽस्त्रेवासिनोः भीमदुर्य्योधनयोः, स्नेहबन्धः, कामं—सम्यक्, तुल्यः,—समानः, भवतु, स्नेहतुल्ये एकस्य साङ्ग्राम्यकरणमनुचितमिति भावः। अयं कः पन्थाः,—नयः, यत् मन्दभाग्ये—भाग्यहीने, मयि त्वं विमुखः,—प्रतिकूलः, असि?—भवसि? अत्र बलदेवं प्रति अनादरसूचकवचनात् गुरुव्यतिक्रमः। मन्दाक्रान्ता वृत्तम्।

(न) द्युतिमाह, तर्ज्जनेति।—तर्ज्जनं—भर्त्सनम्, उद्वेजनं—भयप्रदर्शनेन उद्वेगजननञ्च, द्युतिः, प्रोक्ता—कथिता।

(प) उदाहरति, जन्मेति।—इन्दोः,—चन्द्रस्य, विमले—निर्म्मले, निर्दोषे

शक्तिः पुनर्भवेत् ।

विरोधस्य प्रशमनम् ॥३८७॥ (फ)

यथा तत्रैव,—

"कुर्व्वन्त्वाप्ता हतानां रणशिरसि जना भस्मसाद्देहभारान्
अश्रून्मिश्रं कथञ्चिद्ददतु जलममी बान्धवा बान्धवेभ्यः ।
मार्गन्तां ज्ञातिदेहान् हतनरगहने खण्डितान् गृध्रकङ्कैः
अस्तं भास्वान् प्रयातः सह रिपुभिरयं संह्रियन्तां बलानि ॥" (ब)

इत्यर्थः, कुले जन्म व्यपदिशसि—कथयसि, अयुक्तं ख्यापयसीत्यर्थः ; ननु सहाया-भावात् कथं योत्स्ये ? इत्याशङ्क्याह,—अद्यापि गदां धत्से—गदासहायस्यान्यसहाया-पेक्षा नेति भावः, अथवा भ्रात्रादिवधेन निर्वेदे गदात्याग एवोचितः, स च न त्वया कृतः, इत्यतोऽद्यापि युद्धश्रद्धाऽस्तीति गम्यते इति भावः। मां दुःशासनस्य यत् कोष्णम्—ईषदुष्णं, प्रत्यग्रहतत्वात् तदानीमेव निःसरदिति यावत्, शोणितं—रुधिरं, तदेव मधु—सुरेति यावत्, तेन—तत्पानेनेत्यर्थः, क्षीबः,—मत्तः, तं, रिपुं—शत्रुं, मन्यसे—गणयसि, यद्वा,—मत्ततयाऽवज्ञायसे इत्यर्थः ; तथा दर्पान्धः सन्, मधुकैटभ-द्विषि—मधुदैत्य-कैटभदैत्यध्वंसिनि, हरौ—कृष्णे, अपि उद्धतं यथा स्यात् तथा, चेष्टसे, तस्य बन्धने कृतोद्योगत्वादिति भावः। हे नृपशो !—नृषु—नरेषु, पशुः,—पशुरिव, त्यक्तमनुष्यधर्म्मा, तत्सम्बुद्धौ तथोक्तः, द्विपदपशो इत्यर्थः, नराधम इति यावत्, मे—मम, त्रासात्—भयात्, समरं—सङ्ग्रामं, विहाय—त्यक्त्वा, अधुना, पङ्के लीयसे—लीनः सन् तिष्ठसि। अत्र तर्ज्जनरूपा द्युतिः। उद्वेजनरूपा यथा,—"भो लङ्केश्वर ! दीयताम्" इत्यादि। शार्दूलविक्रीडितं वृत्तम्।

(फ) शक्तिमाह, शक्तिरिति।—विरोधस्य—विद्वेषस्य, प्रशमनं पुनः शक्तिः भवेत्।

(ब) उदाहरति, कुर्वन्त्विति।—आप्ताः,—पूज्याः, मान्या वा, जनाः,—बन्धुजना इति भावः, रणशिरसि—उद्धतरूपेण वर्त्तमाने सङ्ग्रामे इत्यर्थः, हतानां देहभारान्—शरीरचयान्, भस्मसात्—कार्त्स्न्येन वह्निसात्, कुर्व्वन्तु—दहन्तु इत्यर्थः, ["वह्निसात्" इति पाठान्तरम्। कार्त्स्न्येन देये अर्थे सात्प्रत्ययः] तथा अमी बान्धवाः,—सपिण्डाः, बान्धवेभ्यः,—सपिण्डेभ्यः, रणहतेभ्यः इति शेषः, अश्रून्मिश्रं—नेत्रजलसंवलितं, जलं कथञ्चित् ददतु, तथा हतनरगहने—हतैः,—मारितैः, नरैः,—वीरपुरुषैः, गहने—

प्रसङ्गो गुरुकीर्त्तनम् ॥३८८॥ (भ)

यथा मृच्छकटिकायां,—"चाण्डालकः। एसो क्खु सागलदत्तस्स सुदो अज्जविस्सदत्तस्स णत्तिओ चालुदत्तो वावादितुं वज्झट्ठाणं णिज्जइ। एदेण किल गणिआ वसंतसेणा सुअण्णलोहेण वावादिदत्ति। (म) चारुदत्तः। [सनिर्वेदं स्वगतम्]—

मखशतपरिपूतं गोत्रमुद्भासितं यत्
सदसि निविड़चैत्य-ब्रह्मघोषैः पुरस्तात्।
मम निधनदशायां वर्त्तमानस्य पापै-
स्तदसदृशमनुष्यैर्घुष्यते घोषणायाम्॥" (य)

निविड़े, अस्मिन् क्षेत्रे इति शेषः, गृध्रैः, कङ्कैः,—पक्षिविशेषैरिति यावत्, खण्डितान् ज्ञातिदेहान्—बान्धवशरीराणि, मार्गन्ताम्—अन्विष्यन्तां, तानि अन्विष्यान्विष्य तेषामन्त्यं संस्कारं यथेष्टं विदधतु इति भावः, अयं भास्वान्—सूर्य्यः, रिपुभिः,—शत्रुभिः, सह, अस्तं—चरमाचलं, प्रयातः,—प्राप्तः, [वर्त्तमाने क्तप्रत्ययः] अतो बलानि—सैन्यानि, संह्रियन्तां—निवर्त्त्यन्ताम्। अत्र सह रिपुभिरित्युक्त्या सहोक्तिरलङ्कारः, तथा शत्रूणां निधनेन विरोधशान्तिरिति ध्येयम्। स्रग्धरा वृत्तम्।

(भ) प्रसङ्गमाह, प्रसङ्ग इति।—गुरु—अत्यर्थम्, अमर्षप्रयुक्ततयोद्धतमिति यावत्, कीर्त्तनं—दोषादिख्यापनं, प्रसङ्गः। अत एवोक्तं नाट्यशास्त्रकारैः,—प्रसङ्गश्चैव विज्ञेयो वाक्यैरामर्षयोजितैः" इति।

(म) यथेति।—["एष खलु सागरदत्तस्य सुत आर्य्यविश्वदत्तस्य नप्ता चारुदत्तो व्यापादयितुं वध्यस्थानं नीयते। एतेन किल गणिका वसन्तसेना सुवर्णलोभेन व्यापादिता" इति संस्कृतम्] नप्ता—पौत्रः। स्पष्टमन्यत्।

(य) उदाहरति, मखेति।—मखानां—यज्ञानां, (सप्ततन्तुर्मखः क्रतुः" इत्यमरः) शतैः,—शतशोऽनुष्ठानैरित्यर्थः, परिपूतं—विशुद्धं, यत् गोत्रं—मदीयं कुलं, पुरस्तात्—पूर्वं, सदसि—सभायां, निविड़चैत्यब्रह्मघोषैः,—निविड़ानि—लोकैः आकीर्णानि, यानि चैत्यानि—पूजाद्यायतनस्थानानि ("चैत्यमायतनं तुल्ये" इत्यमरः) तेषु ये ब्रह्मघोषाः,—वेदवादाः, वेदपाठकाः वा तैः, उद्भासितं—समुज्ज्वलीकृतम् इत्यर्थः, आसीदिति शेषः, (इदानीं) निधनदशायां—मृत्युदशायां, वर्त्तमानस्य—वध्यस्थानं प्रति नीयमानस्य, वृथा कलङ्कितस्येति यावत्, मम तत्—गोत्रं,

इत्यनेन चारुदत्तवधाभ्युदयानुकूलप्रसङ्गाद् गुरुकीर्त्तनमिति प्रसङ्गः।

मनश्चेष्टासमुत्पन्नः श्रमः खेद इति स्मृतः ॥३८९॥ (र)

मनःसमुत्पन्नो यथा मालतीमाधवे,—

"दलति हृदयं गाढ़ोद्वेगं, द्विधा न तु भिद्यते
वहति विकलः कायो मोहं, न मुञ्चति चेतनाम्।
ज्वलयति तनूमन्तर्दाहः, करोति न भस्मसात्
प्रहरति विधिर्मर्मच्छेदी, न कृन्तति जीवितम् ॥" (ल)

एवं चेष्टासमुत्पन्नोऽपि।

ईप्सितार्थप्रतीघातः प्रतिषेध इतीष्यते ॥३९०॥ (व)

यथा मम प्रभावत्यां विदूषकं प्रति,—"प्रद्युम्नः। सखे! कथमिह त्वमेकाकी वर्त्तसे? क्व नु पुनः प्रियसखीजनानुगम्य-

पापैः,—नीचैः, असदृशमनुष्यैः,—स्पर्शमात्रस्याप्यनर्हैरिति यावत्, घोषणायाम्—अपवादवाद्यध्वनौ, घुष्यते—विख्याप्यते, किमतःपरमाक्षेपकरम्? इति भावः। मालिनी वृत्तम्।

(र) खेदमाह, मन इति।—मनसा, चेष्टया वा, समुत्पन्नः,—जातः, श्रमः खेदः इति स्मृतः।

(ल) उदाहरति, दलतीति।—मम हृदयं गाढ़ोद्वेगं—गुरुपीड़म्, अत एव दलति—स्वयं दलितं भवति, न तु द्विधा भिद्यते—द्विखण्डं नैव भवतीत्यर्थः; विकलः,—अवशः, कायः,—शरीरमिति यावत्, मोहं—मूर्च्छां, वहति, चेतनां न मुञ्चति—न त्यजति; अन्तर्दाहः,—अभ्यन्तरे वर्त्तमानः शोकाग्निरित्यर्थः, तनूं—शरीरं, ज्वलयति—उद्दीपयति, भस्मसात् न करोति; मर्मच्छेदी विधिः प्रहरति, जीवितं न कृन्तति—न नाशयति। अत्र विरोधाभासालङ्कारः। उत्तरचरितेऽपि श्लोकोऽयं सीताशोकसन्तप्तचेतसो रामस्योक्तौ दृश्यते। हरिणी वृत्तम्।

(व) प्रतिषेधमाह, ईप्सितार्थेति।—ईप्सितार्थस्य—अभीष्टविषयस्य, प्रतीघातः प्रतिषेध इति इष्यते।

माना प्रियतमा मे प्रभावती ? विदूषकः। असुरवदृच्छा आकार्य इव कांक्षिं वि पीदा। (ग) प्रकाशम्। [दीर्घं निश्वस्य]—

हा पूर्णचन्द्रमुखि ! मत्तचकोरनेत्रे !
मामानताङ्गि ! परिहाय कुतो गताऽसि ?।
गच्छ त्वमद्य ननु जीवित ! तूर्णमेव
दैवं कदर्थनपरं कृतकृत्यमस्तु ॥" (घ)

कार्य्यात्ययोपगमनं विरोधनमिति स्मृतम् ॥३९१॥(ङ)

यथा वेण्यां युधिष्ठिरः,—

"तीर्णे भीष्ममहोदधौ, कथमपि द्रोणानले निर्वृते,
कर्णाशीविषभोगिनि प्रशमिते, शल्ये च याते दिवम्।
भीमेन प्रियसाहसेन रभसादल्पावशेषे जये
सर्वं जीवितसंशयं वयममी वाचा समारोपिताः ॥" (च)

(ग) असुरवदृच्छा इति।—["असुरपतिना आकार्य्यं कुतापि नीता" इति संस्कृतम्]। आकार्य्य—आहूय, ("हूतिराकारआह्वानम्" इत्यमरः)।

(घ) हा इति।—हा—इति खेदे, पूर्णचन्द्रमुखि !—पूर्णचन्द्र इव मुखं यस्यास्तत्सम्बुद्धौ तथोक्ते ! मत्तचकोरनेत्रे !—मत्तौ चकोरौ, यद्वा,—मत्तचकोरस्य इव नेत्रे यस्यास्तत्सम्बोधने; आनताङ्गि !—आनतानि—पयोधरभरक्लान्ततयाऽवनतानि, अङ्गानि यस्यास्तत्सम्बुद्धौ, मां परिहाय—त्यक्त्वा, कुतः गताऽसि ?—गता त्वम् ? ननु जीवित ! त्वम् अद्य तूर्णं—शीघ्रम्, एव गच्छ, कदर्थनपरं—क्लेशदानतत्परं, दैवं—विधिः, कृतकृत्यं—कृतार्थम्, अस्तु—भवतु। अत्र ईप्सितस्य प्रतीघातः। वसन्ततिलकं वृत्तम्।

(ङ) विरोधनमाह, कार्य्येति।—कार्य्यस्य अत्ययः,—ध्वंसः, तस्य उपगमनं—प्राप्तिः, आपनम् इति यावत्, विरोधनमिति स्मृतम्।

(च) उदाहरति, तीर्णे इति।—भीष्म एव महोदधिः,—महासमुद्रः, [महार्णव इति पाठान्तरम्] तस्मिन्, तीर्णे—गतपारे सति, पराक्ते इति भावः, द्रोण एव अनलः तस्मिन्, सत्यपि—सेनापि सत्येव, निर्वृते—निर्वापितां नीते, (स्वयमस्त्रत्यागेन शान्ते, न तु जयादिना, अत एव "सत्यपि" इत्युक्तम्) कर्ण एव आशीविषभोगी—आशां—दंष्ट्रायां, विषं—हालाहलं, यत्र वाहयः, भोगः,—देहः, विद्यते

प्ररोचना तु विज्ञेया संहारार्थप्रदर्शिनी ॥३९२॥ (क)

यथा वेण्यां,—"पाञ्चालकः ।...अहञ्च देवेन चक्रपाणिना" इत्युपक्रम्य, "कृतं सन्देहेन,—

पूर्य्यन्तां सलिलेन रत्नकलसा राज्याभिषेकाय ते,
कृष्णाऽत्यन्तचिरोज्झिते तु कवरीबन्धे करोतु क्षणम् ।
रामे शातकुठारभास्वरकरे क्षत्रद्रुमोच्छेदिनि,
क्रोधान्धे च वृकोदरे परिपतत्याजौ कुतः संशयः ? ॥" (ख)

यस्य, सविषदन्तपन्नगः इति यावत्, ("भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोः" इत्यमरः) तस्मिन् प्रशमिते—प्रकर्षेण शान्तिं नीते, हते इति भावः, शल्ये च दिवं—स्वर्गं, याते, युद्धे निधनादिति भावः, इत्थं जये अल्पावशेषे—केवलं दुर्य्योधनवध-मात्रावशिष्टे इत्यर्थः, प्रियसाहसेन—अतिसाहसवता, भीमेन रभसात्—वेगात्, वाचा—"अद्यैव यदि दुर्य्योधनं न हन्मि तदाऽग्निं प्रवेक्ष्यामि" इत्येवंरूपेण वाक्येनेति भावः, सर्वे अमी वयं जीवितसंशयं—जीवनं स्थास्यति न वा एवं सन्देहं, मरणसम्भावनामिति यावत्, समारोपिताः,—गमिताः । तत्प्रतिज्ञाश्रवणेन अदर्शनं गतस्य दुर्य्योधनस्यादर्शने युद्धाभावेन भीमस्याग्निप्रवेशे अस्माभिरपि मर्त्तव्यमिति भावः । शार्दूलविक्रीडितं वृत्तम् ।

(क) प्ररोचनामाह, प्ररोचनेति ।—संहारस्य—उपसंहारस्य, अर्थः,—विषयः, उपसंह्रियमाणप्रयोजन इति यावत्, तं प्रदर्शयति या सा, उक्तिरिति शेषः, प्ररोचना विज्ञेया ।

(ख) उदाहरति, पूर्य्यन्तामिति ।—["हे राजन् !" इत्यध्याहार्य्यम्] ते—तव, राज्याभिषेकाय रत्नकलसाः सलिलेन पूर्य्यन्ताम् ; कृष्णा—द्रौपदी, अत्यन्तचिरोज्झिते—अतिचिरपरित्यक्ते, कवरीबन्धे—केशबन्धने, क्षणम्—अधिवासनमाल्यग्रथनरूपमुत्सवं, ("क्षण उद्धर्षो मह उद्धव उत्सवः" इत्यमरः) करोतु, शातेन—शाणितेन, ["घोर" इति पाठान्तरे—घोरेण—भीषणेन इत्यर्थः] कुठारेण—परशुना, भास्वरः,—देदीप्य-मानः, ["भासुर" इति पाठे—समुज्ज्वलः] करो यस्य तादृशे, क्षत्राः,—क्षत्रियाः, एव द्रुमाः,—वृक्षाः, तेषां छेदिनि रामे—भार्गवे, तथा क्रोधान्धे—अतिक्रुद्धे, वृकोदरे—भीमे, च आजौ—युद्धे, ("समित्याजिसमिद्युधः" इत्यमरः) परिपतति—प्रवृत्ते सति इत्यर्थः, संशयः,—सन्देहः, जये इति शेषः, कुतः ?—न कुतोऽपीत्यर्थः । अत्र महा-वाक्यस्य उपसंहारदर्शनम् । शार्दूलविक्रीडितं वृत्तम् ।

कार्य्यसङ्ग्रह आदानम् ॥ ३९३ ॥ (ग)

यथा वेण्याम्;—"ननु भो भोः समन्तपञ्चकचारिणः! (घ)—
नाहं रक्षो, न भूतो, रिपुरुधिरजलाह्लादिताङ्गः प्रकामं
निस्तीर्णोरुप्रतिज्ञाजलनिधिगहनः क्रोधनः क्षत्रियोऽस्मि।
भो भो राजन्यवीराः! समरशिखिशिखाभुक्तशेषाः, कृतं वः
त्रासेनानेन, लीनैर्हतकरितुरगान्तर्हितैरास्यते यत्॥" (ङ)

अत्र समस्तरिपुवधकार्य्यस्य सङ्गृहीतत्वादादानम्।

(ग) आदानमाह, कार्य्येति।—कार्य्याणां सङ्ग्रहः,—सम्यक् ग्रहणम्, उपपादनं, संहारो वेति भावः, आदानम्। तथोक्तं मुनिना,—"बीजकार्य्योपगमनमादानमिति संज्ञितम्" इति। अभिनवगुप्ताचार्य्यास्तु,—"अर्थसंहार आदानम्" इति व्याचक्रुः। अत एव कविराजाः,—उपगमनसंहारोभयार्थतयाऽऽदानपदं प्रयुक्तवन्त इति बोध्यम्।

(घ) उदाहरति, यथेति।—समन्तपञ्चकचारिणः,—समन्तात् पञ्चकं—ह्रदपञ्चकं, कुरुक्षेत्रस्थतीर्थविशेषः इति यावत्, यत्र कुरुपाण्डवसङ्ग्रामः समभवत् इति भावः, यत्र तथोक्तं, तत्र चारिणः, योद्धृवर्गा इति शेषः।

(ङ) नाहमिति।—भीमसेनं रिपुरुधिराक्तदेहं धावन्तं दृष्ट्वा भयात् निहतपतितगजाश्वगणान्तराले गोपितकलेवरान् सङ्ग्रामवर्त्तिनः योधान् प्रति भीमसेनोक्तिरियम्। अहं न रक्षः,—राक्षसो नाहमित्यर्थः, न भूतः,—देवयोनिविशेषः न, रिपूणां रुधिरजलैः,—शोणितवारिभिः, आह्लादितानि—आप्यायितानि, विराजितानीत्यर्थः, [प्लावित इति पाठे—प्लावितानि—संसिक्तानि] अङ्गानि—अवयवाः यस्य तथोक्तः, क्रोधनः, प्रकामं—सम्यक् यथा तथा, निस्तीर्णः—उत्तीर्णः, उरुः—महान्, प्रतिज्ञा एव जलनिधिः,—समुद्रः येन सः, अत एव गहनः,—निबिडः, दुरासद इत्यर्थः, क्षत्रियः, अस्मि—भवामि; भो भो राजन्यवीराः!—क्षत्रियेषु शौर्य्यशालिनः! यूयं समरशिखिनः,—रणाग्नेः, शिखाभिः,—ज्वालाभिः,—भुक्तेभ्यः,—दग्धेभ्यः इत्यर्थः, शेषाः,—अवशिष्टाः, नाधुना रणाग्निर्युष्मान् धक्ष्यतीति भावः, अतः वः,—युष्माकम्, अनेन, त्रासेन—भीत्या, कृतम्—अलं, त्रासकारणं किमपि नास्तीत्यर्थः; यत्—यस्मात्, त्रासादित्यर्थः, हतेषु—युद्धे मृतेषु, करिषु—हस्तिषु, तुरगेषु—अश्वेषु, च अन्तर्हितैः,—अन्तर्द्धानं गतैः, तिरोहितैरित्यर्थः, अत एव लीनैः,—विलयं प्राप्तैरिव स्थितैरिति भावः, सद्भिः आस्यते—स्थीयते, युष्माभिरिति शेषः। अत्र भ्रान्तापह्नुति-

तदाहुश्छादनं पुनः।
कार्य्यार्थमपमानादेः सहनं खलु यद्भवेत्॥३९४॥(च)

यथा तत्रैव—"अर्ज्जुनः। आर्य्य!—

अप्रियाणि करोत्वेष वाचा शक्तो न कर्मणा।
हतभ्रातृशतो दुःखी प्रलापैरस्य का व्यथा?॥"(छ)

अथ निर्वहणाङ्गानि।—

सन्धिर्विबोधो ग्रथनं निर्णयः परिभाषणम्।
कृतिः प्रसाद आनन्दः समयोऽप्युपगूहनम्॥
भाषणं पूर्ववाक्यञ्च काव्यसंहार एव च।
प्रशस्तिरिति संहारे ज्ञेयान्यङ्गानि नामतः॥३९५॥(ज)

तत्र,—

बीजोपगमनं सन्धिः॥ ३९६॥ (झ)

रिति कुवलयानन्दकाराः, "भ्रान्तापह्नुतिरन्यस्य शङ्कातस्तथ्यवारणे" इति तदुक्त-लक्षणात्। स्रग्धरा वृत्तम्।

(च) छादनमाह, तदाहुरिति।—कार्य्यार्थं यत् खलु अपमानादेः सहनं भवेत्, तत् पुनः छादनम् आहुः। काव्यप्रदीपकारास्तु,—"छलेन छादनं यत् स्यादर्थस्य छादनं तु तत्" इत्याहुः।

(छ) उदाहरति, अप्रियाणीति।—हतं—विनाशितं, भ्रातॄणां—दुःशासना-दीनां, शतं यस्य तादृशः, अत एव दुःखी—अतिशोकार्त्त इत्यर्थः, एषः,—दुर्य्योधनः, वाचा अप्रियाणि करोतु—कटुवाक्यं वदतु, कर्मणा न शक्तः, अपकर्त्तुमिति शेषः, कार्य्येण किमपि अपकर्त्तुं न शक्नोति इति भावः; अस्य—दुर्य्योधनस्य, प्रलापैः,—अनर्थकैः वाक्यैः, व्यथा—वेदना, का?—न काऽपीत्यर्थः। यथा विकाररोगवतः प्रलापाः, एवं शतभ्रातृवधव्यसनविकारवतस्तेनास्य कार्य्यासामर्थ्यं ध्वनितम्। अत्र दुर्य्योधनस्य वाक्येन अपमानस्य कार्य्यकारित्वात् सहनम्।

(ज) निर्वहणाङ्गान्याह, अथेति।—सन्ध्यादीनि चतुर्द्दशप्रकाराणि निर्वहणा-ख्यस्य सन्धेरङ्गानीत्यर्थः।

(झ) सन्धिमाह, बीजेति।—बीजस्य (पूर्वोक्तस्य) उपगमनम्—उद्भावनं,

यथा वेण्यां,—"भीमः।...भवति यज्ञवेदिसम्भवे!...स्मरति भवती यन्मयोक्तं—चञ्चद्भुज—" इत्यादि। अनेन मुखे क्षिप्तबीजस्य पुनरुपगमनमिति सन्धिः। (ञ)

विबोधः कार्य्यमार्गणम् ॥३९७॥ (ट)

यथा तत्रैव,—"भीमः। मुञ्चतु मामार्य्यः क्षणमेकम्। युधिष्ठिरः। किमपरमवशिष्टम्? भीमः। सुमहदवशिष्टं, संयमयामि तावदनेन सुयोधनशोणितोक्षितेन पाणिना पाञ्चाल्या दुःशासनावकृष्टं केशहस्तम्। युधिष्ठिरः। गच्छतु भवान्, अनुभवतु तपस्विनी (ठ) वेणीसंहारम्" इति। अनेन केशसंयमनकार्य्यस्यान्वेषणाद्विबोधः।

उपन्यासस्तु कार्य्याणां ग्रथनम् ॥३९८॥ (ड)

यथा तत्रैव,—"भीमः। पाञ्चालि! न खलु मयि जीवति संहर्त्तव्या दुःशासनविलुलिता (ढ) वेणिरात्मपाणिभ्याम्।

सन्धिः। वृत्तिवार्त्तिकेऽप्ययदीक्षितैस्तु,—"दोषारोपेण नष्टस्य कार्य्यस्योन्नतये पुनः। अन्वेषणं भवेत् सन्धिः" इत्युक्तम्।

(ञ) उदाहरति, यथेति।—भवति!—इत्यामन्त्रणम्; यज्ञवेदिसम्भवे!—याज्ञसेनि! द्रौपदि! इत्यर्थः। मुखे—मुखाख्यसन्धौ, क्षिप्तस्य—उद्भूतस्य, बीजस्य—कार्य्यस्य, पुनरुपगमनं—पुनः सम्पादनम्, इति—अस्मात् हेतोः।

(ट) विबोधमाह, विबोध इति।—कार्य्यस्य—कर्त्तव्यस्य, मार्गणम्—अन्वेषणं, विबोधः। नाट्यशास्त्रकारेणाप्युक्तं—"कार्य्यस्यान्वेषणं युक्त्या विबोध इति कीर्त्तितः" इति।

(ठ) उदाहरति, यथेति।—संयमयामि—बध्नामि। केशहस्तं—केशसमूहं, ("पाशो हस्तश्च पक्षश्च कलापार्थाः कचात् परे" इत्यमरः)। तपस्विनी—वराकी।

(ड) ग्रथनमाह, उपन्यास इति।—कार्य्याणाम् उपन्यासः,—कीर्त्तनं, ग्रथनम्।

(ढ) उदाहरति, यथेति।—दुःशासनविलुलिता—दुःशासनेन विपर्य्यासिता, आकर्षणेन बन्धनात् च्याविता इत्यर्थः।

तिष्ठ, स्वयमेवाहं संहरामि" इति। अनेन कार्य्यस्योपक्षेपाद् ग्रथनम्।

निर्णयः पुनः।

अनुभूतार्थकथनम् ॥ ३९९ ॥ (ण)

यथा तत्रैव,—"भीमः। देव! अजातशत्रो!···कुतोऽद्यापि दुर्य्योधनहतकः!!···मया हि तस्य दुरात्मनः पाण्डुकुलपरिभाविणः,—

भूमौ क्षिप्तं शरीरं निहितमिदमसृक्चन्दनं भीमगात्रे
लक्ष्मीरार्य्ये निषिक्ता चतुरुदधिपयःसीमया सार्द्धमुर्व्या।
भृत्या मित्राणि योधाः कुरुकुलमनुजा दग्धमेतद्रणाग्नौ,
नामैकं यद् ब्रवीषि क्षितिप! तदधुना धार्त्तराष्ट्रस्य शेषम्॥"(त)

वदन्ति परिभाषणम्।

परिवादकृतं वाक्यम् ॥४००॥ (थ)

(ण) निर्णयमाह, निर्णय इति।—अनुभूतस्य—भुक्तस्य, ज्ञातस्य इत्यर्थः, अर्थस्य—वाच्यस्य, कथनं निर्णयः।

(त) उदाहरति, देव इति। भूमाविति।—तस्य धार्त्तराष्ट्रस्य—दुर्य्योधनस्य इत्यर्थः, शरीरं भूमौ—पृथिव्यां, क्षिप्तं—पातितं, भूमिसात् कृतमित्यर्थः, इदम् असृक्—रुधिरम्, एव चन्दनं, भीमगात्रे—भयङ्करशरीरे, निहितम्—अर्पितम्, चतुर्णां, उदधीनां—समुद्राणां, पयांसि—जलानि, ("पयो दुग्धं पयस्तोयम्" इति मेदिनी) सीमानो यस्यास्तादृश्या, उर्व्या,—पृथिव्या, सार्द्धं लक्ष्मीः आर्य्ये—ज्येष्ठे भ्रातरि, भवतीत्यर्थः, निषिक्ता—अर्पिता; (तस्य) भृत्याः,—दासाः, मित्राणि—बान्धवाः, किं बहुना, कुरुकुलेषु ये मनुजाः,—मानवाः, योधाः,—युद्धार्थमुपस्थिता इत्यर्थः, एतत् सर्वं, रणाग्नौ—सङ्ग्रामरूपायामग्निज्वालायामित्यर्थः, दग्धं—भस्मीकृतं, निहतमित्यर्थः, हे क्षितिप!—राजन्! यत् एकं नाम, दुर्य्योधनेति शेषः, ब्रवीषि—कथयसि, धार्त्तराष्ट्रस्य—धृतराष्ट्रपुत्रस्य, दुर्य्योधनस्येति यावत्, अधुना तत्—तस्मात्, नामैव, शेषं, नामशेषः कृतो धार्त्तराष्ट्र इति भावः। अत्र ज्ञातस्यार्थस्य कथनम्। स्मरणमिदम्।

(थ) परिभाषणमाह, वदन्तीति।—परिवादः,—कृत्वा, तेन कृतं वाक्यं

यथा शाकुन्तले—"राजा। आर्ये! अथ सा तत्रभवती किमाख्यस्य राजर्षेः पत्नी? तापसी। को तस्य धर्मदारपरित्यागिनो नाम गृह्णिष्यति?" (द)

लब्धार्थागमनं कृतिः ॥ ४०१ ॥ (ध)

यथा वेण्यां,—"जवः। एते भगवन्तो व्यासवाल्मीकिप्रभृतयोऽभिषेकं धारयन्तस्तिष्ठन्ति" इति। अनेन प्राप्तराज्यस्याभिषेकमङ्गलैः स्थिरीकरणं कृतिः। (न)

शुश्रूषादिः प्रसादः स्यात् ॥ ४०२ ॥ (प)

यथा तत्रैव,—भीमेन द्रौपद्याः केशसंयमनम्।

आनन्दो वाञ्छितागमः ॥४०३॥ (फ)

यथा तत्रैव,—"द्रौपदी। विसुमरिदं एदं बावारं, णाधस्स पसादेण पुणो वि सिक्खिस्सं"। (ब)

समयो दुःखनिर्याणम् ॥ ४०४ ॥ (भ)

परिभावणं वदन्ति। उद्योतकारास्तु,—"प्रेम्णा द्वेषाच्चलाद्वाऽपि भावणं परिभावणम्" इत्याहुः।

(द) तापसीति।—["कस्तस्य धर्मदारपरित्यागिनो नाम गृह्णिष्यति?" इति संस्कृतम्]। अथ कृत्सानन्तरवाक्यकथनम्।

(ध) कृतिमाह, लब्धेति।—लब्धस्य—प्राप्तस्य, अर्थस्य—विषयस्य, आगमनं—प्राकाश्येन स्थिरीकरणं, ["लब्धार्थगमनम्" इति पाठे—लब्धैरर्थैः गमनं—श्रीकादिलाभनमित्यर्थः] कृतिः।

(न) अनेनेति।—स्थिरीकरणं—श्रीकादिकृताक्षेप्यादिनाशनमित्यर्थः।

(प) प्रसादमाह, शुश्रूषादिरिति।—शुश्रूषादिः,—सेवादिः, प्रसादः स्यात्।

(फ) आनन्दमाह, आनन्द इति।—वाञ्छितस्य—अभीष्टस्य, आगमः,—तज्जनिता प्रीतिरिति भावः, आनन्दः।

(ब) उदाहरति, यथेति।—["विसुमरितमेतं व्यापारं, नाथस्य प्रसादेन पुनरपि शिक्षिष्ये" इति संस्कृतम्]। एतं व्यापारं—केशबन्धनकार्यमित्यर्थः।

(भ) समयमाह, समय इति।—दुःखस्य निर्याणम्—अपगमः, समयः।

यथा रत्नावल्याम् ;—"वासवदत्ता। [रत्नावलीमालिख्य] समस्सस बहीणिए! समस्सस। (म)

तत्तुल्यैदुपगूहनम्।

यत् स्यादद्भुतसम्प्राप्तिः ॥ ४०५ ॥ (य)

यथा मम प्रभावत्याम् ;—नारददर्शनात् "प्रद्युम्नः। [ऊर्ध्वमवलोक्य]। —

"दधदिद्युल्लेखामिव कुसुममालां परिमल-
भ्रमद्भृङ्गश्रेणीध्वनिभिरुपगीतां तत इतः।
दिगन्तं ज्योतिर्भिस्तुहिनकरगौरैर्धवलय-
न्नितः कैलासाद्रिः पतति वियतः !! किं पुनरिदम् ?॥"(र)

सामदानादि भाषणम् ॥४०६॥ (ल)

यथा चण्डकौशिके,—"धर्म्मः। तदेहि, धर्म्मलोकमधितिष्ठ।" (व)

(म) समस्ससेति।—["समाश्वसिहि भगिनि ! समाश्वसिहि" इति संस्कृतम्।

(य) उपगूहनमाह, तदिति।—यत् अद्भुतञ्च—आश्चर्य्यञ्च, सम्प्राप्तिः,—समागमः, तत् उपगूहनं भवेत्।

(र) उदाहरति, यथेति। दधदिति।—परिमलेन—सौरभेण हेतुना, भ्रमताम्—सञ्चरताम्, भृङ्गाणां या: श्रेणयः,—समूहाः, तासां ध्वनिभिः,—गुनगुनशब्दैः, उपगीताम्—ग्रथितां, विद्युल्लेखामिव—तडित्पुञ्जमिव, कुसुममालां—पुष्पमालां, दधत्—धारयन्, ततः इतः,—समन्तात्, तुहिनकरः,—चन्द्रः, तद्वत् गौरैः,—शुभ्रैः, ज्योतिर्भिः,—दीप्तप्रभाभिः, दिगन्तं—दिशां पर्य्यन्तं, धवलयन्—श्वेतीकुर्व्वन्, वियतः,—आकाशात्, इतः,—अस्मिन् प्रदेशे, कैलासाद्रिः पतति !! इदं पुनः किम् ?—आश्चर्य्यमेतदित्यर्थः। अत्र अद्भुतप्राप्तिपत्तिः। मिश्रस्त्रिष्टुभौ छन्दः।

(ल) भाषणमाह, सामेति।—साम—प्रियभाषणं, दानादि च, तत् भाषणम्। भरतेनाप्युक्तम् ;—"सामदानादिसम्पन्नं भाषणं समुदाहृतम्" इति।

(व) उदाहरति, यथेति।—स्पष्टम्। अत्र पठति धर्म्मश्च प्रियवाक्यं, धर्म्मलोकमधितिष्ठ इति धर्म्मलोकश्च दानञ्च।

पूर्ववाक्यन्तु विज्ञेयं यथोक्तार्थोपदर्शनम् ॥४०७॥ (ग)

यथा वेण्यां,—"भीमः। बुद्धिमतिके! क्व सा भानुमती? परिभवतु सम्प्रति पाञ्चवदारान्।" (घ)

वरप्रदानसम्प्राप्तिः काव्यसंहार इष्यते ॥४०८॥(ङ)

यथा सर्वत्र,—(च) "किन्ते भूयः प्रियमुपकरोमि?" इति।

नृपदेशादिशान्तिस्तु प्रशस्तिरभिधीयते ॥४०९॥(क)

यथा प्रभावत्याम्,—

"राजानः सुतनिर्विशेषमधुना पश्यन्तु नित्यं प्रजाः
जीयासुः सदसद्विवेकपटवः सन्तो गुणग्राहिणः।
शश्वत्सर्वसमृद्धयः समधिकाः सन्तु क्षमामण्डले
भूयादव्यभिचारिणी त्रिजगतो भक्तिश्च नारायणे॥" (छ)

(ग) पूर्ववाक्यमाह, पूर्ववाक्यमिति।—यथोक्तस्य अर्थस्य उपदर्शनं—समुचितोत्तरदानं, पूर्ववाक्यं विज्ञेयम्।

(घ) उदाहरति, यथेति।—भानुमती—दुर्योधनपत्नी। पूर्वं भानुमत्या पाञ्चालीं प्रति परिहसितम्, इदानीं दुर्योधने निहते भीमसेनेन तस्य प्रत्युत्तरमभिहितम्।

(ङ) काव्यसंहारमाह, वरेति।—वरस्य—अभीष्टस्य, यत् प्रदानं तस्य सम्प्राप्तिः, काव्यस्य संहार इष्यते।

(च) उदाहरति, यथेति।—सर्वत्र—नाटकप्रभृतिषु।

(क) प्रशस्तिमाह, नृपेति।—नृपस्य देशादेश्च, [आदिपदेन विद्वद्ब्राह्मणादीनां ग्रहणम्]। शान्तिः,—अनिष्टवारणमिष्टप्राप्तिश्च,प्रशस्तिः अभिधीयते। साहित्यकौमुदीकारः पण्डितराजास्तु,—"प्रशंसनं प्रशस्तिः स्याद् यशसः पृथिवीभृताम्" इत्याहुः।

(छ) उदाहरति, राजान इति।—अधुना—साम्प्रतं, राजानः सुतनिर्विशेषं—पुत्रसदृशं, प्रजाः,—लोकान्, ("प्रजा लोके च सन्ताने" इति मेदिनी) नित्यं—सततं, पश्यन्तु—अवलोकयन्तु, सदसतां विवेके पटवः,—समर्थाः, गुणग्राहिणः सन्तः,—साधवः, जीयासुः,—जययुक्ता भूयासुः; क्षमामण्डले—पृथिवीतले, समधिकाः,—प्रचुराः, प्रजानां स्वर्णानाञ्च समृद्धयः,—सम्पदः, सन्तु भवन्तु, तथा त्रिजगतः,—

अत्र च उपसंहारप्रशस्त्योरन्ते एकेन क्रमेणैव स्थितिः। "इह च मुखसन्धौ उपक्षेपपरिकरपरिन्यासयुक्त्युद्भेदसमाधानानां, प्रतिमुखे च परिसर्पणप्रगमनवज्रोपन्यासपुष्पाणां, गर्भे अभूताहरणमार्गसोटकाधिबलचेपाणां, विमर्षे अपवादशक्तिव्यवसायप्ररोचनादानानां प्राधान्यम्। (ग) अन्येषान्तु यथासम्भवं स्थितिः" इति केचित्।

चतुःषष्टिविधं ह्येतदङ्गं प्रोक्तं मनीषिभिः।
कुर्य्यादनियते तस्य सन्धावपि निवेशनम्।
रसानुगुणतां वीक्ष्य रसस्यैव हि मुख्यता॥४१०॥(घ)

यथा वेणीसंहारे द्वितीयाङ्के,—दुर्योधनकर्णयोर्मद्वत् सम्भाषणम्; एवमन्यत्रापि। यत्तु रुद्रटादिभिः "नियम एव" इत्युक्तं, तल्लक्ष्यविरुद्धम्। (ङ)

त्रिलोक्याः, नारायणे—परमात्मनि, अव्यभिचारिणी—अचला, भक्तिः भूयात्। आर्द्रवित्रीक्षितं हृतम्।

(ग) इह चेति।—निर्वहणे चेत्यर्थः। तयोः काव्यसंहार-प्रशस्त्योः "प्राधान्यम्" इत्यनेनान्वयः। एवमन्येऽपि। प्राधान्यख्यापनं तत्तदङ्गानामावश्यकत्वख्यापनम्।

(घ) चतुःषष्टिविधमिति।—एतत् चतुःषष्टिविधम् अङ्गं, सन्धेरिति शेषः, मनीषिभिः,—विद्वद्भिः, प्रोक्तम्; (मुखस्य द्वादशावयवाः, प्रतिमुखस्य त्रयोदश, तावतः गर्भावयवाः, तावन्तः विमर्शावयवाः, चतुर्दश निर्वहणावयवाः, इति सन्धेर्लक्षणेन पञ्चषष्टिरपि, केचित् इति निर्वहणावयवस्वरूपप्रश्नसमाधानाः; प्रश्नोक्तसन्धौ स्वीकुर्वन्तस्तु केचित् गर्भावयवस्वरूपायाः प्रार्थनाया अनङ्गीकारमाहुः, इत्युभयपक्षेऽपि चतुःषष्टिसङ्ख्या अक्षता इति)। अनियते—अनिर्द्धारिते, उक्तरीत्या इति भावः, सन्धौ—मुखगर्भाद्यन्यतमसन्धौ, अपि रसानुगुणतां—शृङ्गारादन्यतमरसपोषकत्वं, वीक्ष्य तस्य—चतुःषष्टिविधस्य अङ्गस्य, निवेशनं—समावेशं, कुर्य्यात्; नियतेऽपि मुखगर्भादिसन्धौ रसानुकूल्यविवेचनया अन्यसन्ध्यङ्गान्यपि निवेशयेदिति भावः; हि—हेतोः, रसस्यैव मुख्यता—प्राधान्यम्।

(ङ) रुद्रटादिभिः, प्रभृतिभिः।—सन्धावर्थे—युक्तिः, सा तु मुखसन्धेरङ्गम्। तस्य

दृष्टार्थरचनाऽऽश्चर्य्य-लाभो वृत्तान्तविस्तरः।
रागप्राप्तिः प्रयोगस्य गोप्यानां गोपनं तथा॥
प्रकाशनं प्रकाश्यानामङ्गानां षड्विधं फलम्॥
अङ्गहीनो नरो यद्यन्नैवारम्भक्षमो भवेत्।
अङ्गहीनं तथा काव्यं न प्रयोगाय युज्यते॥
सम्पादयेतां सन्यङ्गं नायकप्रतिनायकौ।
तदभावे पताकाऽऽद्यास्तदभावे तथेतरत्॥४११॥(च)

आदि—सन्धौ तदर्थनं इष्यते। नियम इति।—यदङ्गं यस्य,तदङ्गं तस्यैव,नान्यस्य कदाऽपीति नियम इति भावः। लक्ष्यविरुद्धं—महाजनीनां प्रयोगस्य विरुद्धम्; महाजनीनां नियमेषु न नियतं तथा विधानं इष्यते इति नियमाभिधानं न सङ्गच्छते इति भावः।

(च) अङ्गानां फलमाह, इष्टेति।—अङ्गानां—सन्ध्यङ्गानां, फलं—निवेश-प्रयोजनमिति भावः,षड्विधम्। ता एव षड्विधा आह,—इष्टार्थरचना—अभिलषितार्थस्य विधानम्, आश्चर्य्यलाभः,—अलौकिकार्थप्राप्तिः, वृत्तान्तविस्तरः,—इतिवृत्तस्य सुष्ठीकरणं, रागप्राप्तिः,—अनुरागस्य लाभः, प्रयोगस्य—निवेशस्य, अभिनयप्रेक्षकस्य वा,[प्रेक्षकस्येत्यर्थे (५।२।१२७ पा०) इति अर्थे आदित्वाच्च] गोप्यानां—रहस्यार्थानां, गोपनं—गुप्ततया संरक्षणं, तथा प्रकाश्यानां—प्रकटनेनैव चमत्काराधायकानाम्, अङ्गानां प्रकाशनं—प्रकटनम् इति। ननु अङ्गानामविधाने का हानिः? इत्याह,—अङ्गहीन इति।—अङ्गहीनः,—शरीरावयवादिविकलः,नरः, यद्यत् आरम्भक्षमः,—कार्य्यक्षमः, नैव भवेत्, तथा अङ्गहीनं—मुखसन्ध्यादिसन्धिरहितशून्यं, काव्यं प्रयोगाय—व्यवहाराय, अभिनयाय, प्रेक्षकानुरागाय वा; न युज्यते—न प्रयोगार्हं भवतीत्यर्थः। सन्ध्यङ्गानि कैश्च सम्पादनीयानीत्याशंक्याहाह, सम्पादयेतामिति।—नायक-प्रतिनायकौ—नायकः तत्प्रतिद्वन्द्वी च, सन्धेः अङ्गं सम्पादयेतां, प्रायस्तु तत्रापि नायक एवेति बोध्यम्। ननु यदि सन्ध्यङ्गनिवेशो न सम्पद्येत, तदा किं कार्य्यमित्याह, तदिति।—तत्र—सन्ध्यङ्गस्य,अभावे—अनिवेशे, पताकाद्याः,—अर्थप्रकृतीः, पताकाप्रभृत्यादीनि अङ्गानीति यावत्, सम्पादयेताम्; तदभावे—पताकाद्यभावे, इतरत्—अन्यत्, बीजमिति यावत्, सम्पादयेतामित्यन्वयः।

प्रायेण प्रधानपुरुषप्रयोज्यानि सन्ध्यङ्गानि भवन्ति। किन्तु उपक्षेपादिचयं (छ) बीजस्यात्यमात्रसमुद्दिष्टत्वात् अप्रधानपुरुषप्रयोजितमेव साधु।

रसव्यक्तिमपेक्ष्यैषामङ्गानां सन्निवेशनम्।
न तु केवलया शास्त्र-स्थितिसम्पादनेच्छया॥४१२॥(ज)

तथा च,—यद्देष्यां दुर्योधनस्य भानुमत्या सह विप्रलम्भः दर्शितः, तत् तादृशेऽवसरेऽत्यन्तमनुचितम। (झ)

अविरुद्धन्तु यद्वृत्तं रसादिव्यक्तयेऽधिकम्।
तदप्यन्यथयेद् धीमान् न वदेद्वा कदाचन॥४१३॥(ञ)

अनयोरुदाहरणं सन्ध्यवयवेषु अभिव्यक्तमेव। (ट)

(छ) प्रायेण इत्यस्य व्याकृतिमाह, किन्विति।—उपक्षेपादीति।—[अवादिपदेन परिकरपरिन्यासयोर्ग्रहणम]।

(ज) रसेति।—रसव्यक्तिं—रसस्य प्रकटतामपेक्ष्य, एषाम् अङ्गानां सन्निवेशनं—प्रयोगः, कार्य्यमिति शेषः, न तु—न पुनः, केवलया शास्त्रस्थितिसम्पादनेच्छया, सन्निवेशनमिति शेषः, रसव्यक्तिर्भवतु, न वा भवतु, शास्त्रमर्य्यादारक्षणार्थमेव नैषां प्रयोगार्हतेति भावः। तथोक्तं मुनिना,—"सन्धिसन्ध्यङ्गघटनं रसादिव्यक्तयपेक्षया। न तु केवलया शास्त्र-स्थितिसम्पादनेच्छया॥" इति।

(झ) भानुमत्येति।—भानुमत्या—तन्नाम्न्या स्वपत्न्या सह, विप्रलम्भः,—शृङ्गाररसभेदः। तादृशे—तथा प्रवर्त्तमाने सङ्गमे, अनुचितं—न युक्तं, वीरस्यैव तदानीं युक्तत्वादिति भावः।

(ञ) अविरुद्धमिति।—धीमान्—अभिनेता जनः, अविरुद्धम्—अननुकूलं, रसाद्युपकारकतयोपादेयमिति यावत्, यत् वृत्तं—चरितं, रसादीनां व्यक्तये,—प्रकाशाय, तदपि अधिकं यथा तथा अन्यथयेत्—विपर्य्यासयेत, अन्यथा कुर्य्यात इति यावत्, वा—यथा, कदाचन न वदेत्। रसनक्षत्रचरत्राभिनवगुप्तप्रभृतयो नर्म्मप्रकाशव्याख्यायान्तूक्तम्,—"अविरुद्धं रसादीनामधिकं नापि वर्णयेत्। विपरीतन्तु सङ्क्षिप्य विस्तरेण न च क्वचित्॥" इत्यादि।

(ट) अनयोरिति।—अनयोः,—अनन्तराङ्कयोः, उदाहरणं सन्ध्यवयवेषु—सन्ध्यङ्गेषु, अभिव्यक्तं—स्पष्टम् एव।

अथ वृत्तयः,—

शृङ्गारे कौशिकी वीरे सात्त्वत्यारभटी पुनः।
रसे रौद्रे च बीभत्से वृत्तिः सर्वत्र भारती॥
चतस्रो वृत्तयो ह्येताः सर्वनाट्यस्य मातृकाः॥४१४॥(ठ)
स्युर्नायकादिव्यापारविशेषा नाटकादिषु॥४१५॥(ड)

तत्र कौशिकी, (ढ)—

या श्लक्ष्णनेपथ्यविशेषचित्रा
स्त्रीसङ्कुला पुष्कलनृत्यगीता।
कामोपभोगप्रभवोपचारा
सा कौशिकी चारुविलासयुक्ता॥४१६॥(ण)

(ठ) नाटकवृत्तीराह, अथेति।—वृत्तयः,—वर्त्तते रस आभिरिति तथोक्ताः, नायकादिचेष्टा इति यावत्। ता वृत्तयः चतस्रः,—चतुर्व्विधाः। अथासामुपयोगस्थाननिर्देशपूर्वकं नामानि निर्दिशति,—शृङ्गारे कौशिकी, वीरे सात्त्वती, रौद्रे बीभत्से च रसे पुनः आरभटी। सर्वत्र—एतद्व्यतिरिक्ते, भारती; एताः चतस्रः वृत्तयः सर्वनाट्यस्य मातृकाः,—जनन्यः। एतासामन्यतरया यथोक्तया यथोक्तरूपाणि नाटकानि रचयितव्यानीति भावः। व्यक्तिविवेककारास्त्वाहुः,—"कौशिक्यारभटी चैव सात्त्वती भारती तथा। वृत्तयः स्युश्चतस्रस्ता नाट्यशास्त्रस्य मातृकाः॥ शृङ्गारे कौशिकी रौद्रे रसे त्वारभटी पुनः। वीरे स्यात् सात्त्वती वृत्तिः भारती तु समन्ततः॥ न तस्या रसनिर्देशः सर्वत्र यदसौ मता। शृङ्गारे वाऽपि हास्ये वा रौद्रे वीरेऽपि वा बुधैः॥" इति।

(ड) तासां स्वरूपमाह, स्युरिति।—नाटकादिषु—नाटकप्रकरणभाणादिषु रूपकेषु, नाटिकादिषूपरूपकेषु चेत्यर्थः, नायकादीनाम्, [अत्रादिपदेन नायिकादेर्ग्रहणं] व्यापारविशेषाः,—चेष्टाभेदाः, वृत्तय इति शेषः, स्युः,—भवेयुः।

(ढ) तत्रेति।—तत्र,प्रसिद्धा इति शेषः,[इयञ्च सामोद्भवा,तथा हि भरतः,—"ऋग्वेदात् भारती वृत्तिर्यजुर्वेदात् तु सात्त्वती। कौशिकी सामवेदात् तु शेषा चाथर्वणी तथा॥" इति।

(ण) कौशिकीमाह, येति।—या श्लक्ष्णेन—मनोहरेण, नेपथ्यविशेषेण—

नर्म च नर्मस्फूर्जो नर्मस्फोटोऽथ नर्मगर्भश्च।
चत्वार्य्यङ्गान्यस्याः ॥४१७॥ (त)

तत्र,—

वैदग्ध्यक्रीड़ितं नर्म।
इष्टजनावर्ज्जनकृत् ॥ ४१८ ॥ (थ)

तच्चापि त्रिविधं मतम्।
विहितं शुद्धहास्येन सशृङ्गारभयेन च ॥४१९॥ (द)

तत्र केवलहास्येन विहितं यथा रत्नावल्यां,—"वासवदत्ता।

नायिकादीनां भूषणविशेषेण, चित्रा—मनोज्ञा, शोभाऽतिशयवतीत्यर्थः, स्त्रीसङ्कुला—नारीभूयिष्ठा, पुष्कलनृत्यगीता—पुष्कलानि—प्रचुराणि, नृत्यगीतानि—नृत्यानि गानानि चेत्यर्थः, यस्यां तादृशी, कामोपभोगप्रभवोपचारा—कामोपभोगः,—शृङ्गारः, तस्य प्रभवः,—उत्पत्तिर्येभ्यः, एवंविधाः उपचाराः,—प्रयोज्यपदार्थाः, अङ्गानि इति यावत्, यस्याः तादृशी, तथा चारुविलासयुक्ता—चारुभिः,—मनोरमैः, विलासैः,—मुखनेत्रगत्यादिचेष्टाविशेषव्यञ्जकवाक्यः इत्यर्थः, युक्ता च, सा वृत्तिः कौशिकी।

(त) एवमस्याः स्वरूपमभिधाय विशेषजिज्ञासायां भेदानाह, नर्म्मेति।—अस्याः,—कौशिक्याः, चत्वारि अङ्गानि—भेदाः; नर्म्म, नर्म्मस्फूर्जः, नर्म्मस्फोटः तथा नर्म्मगर्भः इति।

(थ) नर्म्माह, वैदग्ध्येति।—इष्टजनानां—सामाजिकानाम्, आवर्जनकृत्—आहरणकारि, मनोरञ्जकमिति यावत्, वैदग्ध्येन—चातुर्य्येण, क्रीड़ितं—क्रीड़नं, [भावे क्तप्रत्ययः] नर्म्म।

(द) तस्य भेदानाह, तच्चेति।—तच्चापि—निरुक्तमपि, कौशिक्या वृत्तेः नर्म्मनामकमङ्गमिति यावत्, त्रिविधं मतम्; शुद्धहास्यविहितं, सशृङ्गारहास्यविहितं, सभयहास्यविहितञ्चेति। काव्यप्रदीपकारास्त्वाहुः,—"रहस्यार्थस्य कथनं क्रीड़ितव्यपदेशतः। नर्म्मेति गदितं तस्य त्रयो भेदाः पुनः स्मृताः॥ प्रेमपात्रं कोपपात्रं प्रेमकोपास्पदं तथा॥" इति। व्यक्तिविवेककारेण तु,—"औदासीन्याश्रयं नर्म्म चतुर्थमपि दृश्यते" इत्युक्तम्।

[प्रकाशसहित्य सङ्गतम] एसा वि अवरा तव समीवे जधा लिहिदा, इदं किं अज्जअसंतअस्स विम्हाणं ?" (ध)

सम्भ्रमहास्येन यथा शाकुन्तले,—["राजानं प्रति प्रकुलसा] असंतुट्टो उण किं करिस्सदि ? राजा। इदम्। [इति व्यवस्थितः। प्रकुलसा बलं ढौकते"]। (न)

सभयहास्येन यथा रत्नावल्याम् आलेख्यदर्शनावसरे,—"सुसङ्गता। साधो मए एसो वुत्तंतो समं चित्तफलएण। ता देवीए गदुअ णिवेदइस्सं" एतदाकाशसम्बन्धि नर्मादाहृतम्। एवं वेषचेष्टासम्बन्ध्यपि। (प)

नर्मस्फूर्जः सुखारम्भो भयान्तो नवसङ्गमः ॥४२०॥(फ)

यथा मालविकायां सङ्केतं सायमभिसृतायाम्,—"राजा,—

विसृज सुन्दरि ! सङ्गमसाध्वसं
तव चिरात् प्रभृति प्रणयोन्मुखे ।

(ध) रत्नावल्यामिति।—["एषाऽप्यपरा तव समीपे यथा लिखिता, इदं किमार्य्यवसन्तकस्य विस्मानम् ?" इति संस्कृतम्]। वासवदत्ता—वत्सराजस्य महाराज्ञी।

(न) प्रकुलसेति।—["असन्तुष्टः पुनः किं करिष्यति ?" इति संस्कृतम्]। असन्तुष्टो मधुकर इति पूर्वोक्तेनान्वयः। व्यवस्थितः,—प्रस्थः इत्यर्थः, उद्यत इति यावत्, तुम्बितुमिति शेषः। ढौकते—उपसारयति, आच्छादयति वा।

(प) सुसङ्गतेति।—["साधो मया एष वृत्तान्तः समं चित्रफलकेन, तत् देव्यै गत्वा निवेदयिष्यामि" इति संस्कृतम्]। वेषसम्बन्धिसभयहास्यजातं नर्म यथा,—"सुसङ्गता। [इदं विहस्य] आर्य वातरे ! मा विभीहि, न भवत्येष बालः, आर्य-वसन्तकः खल्वेषः"।

(फ) नर्मस्फूर्जेत्यादि, नर्मस्फूर्ज इति।—सुखारम्भः,—प्रथमसुखकरः, भयान्तः, —भयावसानः, नवः सङ्गमः नर्मस्फूर्जः,—नर्मणः,—परिहासस्य, स्फूर्जः,—भयावहः शब्दः, तथेत्या ताडनादिनवर्णनमिति यावत्। मुनिनाऽप्युक्तं,—"नवसङ्गमसम्भोगो प्रतिक्षणसुदयंमयाकर्षयुक्तः। प्रेयो नर्मस्फूर्जो अवसानभयात्मकश्चैव ॥" इति।

परिगृहाण गते सहकारतां
त्वमतिमुक्तलताचरितं मयि ॥ (ब)

मालविका। देवीए भएण अप्पणो वि पिअं कादुं ण पारेमि" (भ) इत्यादि।

अथ नर्मस्फोटः,—

नर्मस्फोटो भावलेशैः सूचितोऽल्परसो मतः ॥४२१॥(म)

यथा मालतीमाधवे,—

"गमनमलसं, शून्या दृष्टिः, शरीरमसौष्ठवं,
श्वसितमधिकं, किं न्वेतत् ? स्यात् किमन्यदितोऽथवा।
भ्रमति भुवने कन्दर्पाज्ञा, विकारि च यौवनं,
ललितमधुरास्ते ते भावाः क्षिपन्ति च धीरताम् ॥" (य)

(ब) उदाहरति, विसृजेति।—हे सुन्दरि! सङ्गमे साध्वसं—भयं, विसृज—त्यज, चिरात् प्रभृति तव प्रणयोन्मुखे—प्रणयार्थिनि, अत एव सहकारताम्—अत्यन्तसुगन्धशालिरसालभावं, गते—प्राप्ते, मयि, नायके इति शेषः, त्वम् अतिमुक्तलतायाः,—[शौक्ल्यान्मुक्ताम् अतिक्रान्ता इति अतिमुक्ता, सा चासौ लता च तस्याः] माधवीलतायाः, ("अतिमुक्तः पुण्ड्रकः स्याद्वासन्ती माधवीलता" इत्यमरः) चरितं परिगृहाण; यथा अतिमुक्तलता सहकारमालिङ्गति, तथा त्वं मामालिङ्गस्वेति भावः। द्रुतविलम्बितं वृत्तं, "द्रुतविलम्बितमाह नभौ भरौ" इति लक्षणात्।

(भ) मालविकेति।—["देव्या भयेनात्मनोऽपि प्रियं कर्त्तुं न पारयामि" इति संस्कृतम्]।

(म) नर्म्मस्फोटमाह, नर्मस्फोट इति।—भावलेशैः,—ईषत्सूचितैः भावैरित्यर्थः, सूचितः,—प्रकाशितः, अत एव अल्परसः,—मनाक् प्रतीयमानः स्वादात्मकः शृङ्गारः, ["सूचिताल्परसः" इति पाठान्तरे—अल्पं सूचितः सूचिताल्पः, रसः,—शृङ्गारो यत्र तादृशः] नर्म्मस्फोटो मतः। मुनिनाऽप्युक्तम्;—"विविधानां भावानां लवैर्लवैर्भूषितो बहुविशेषैः। असमग्राक्षिप्तरसो नर्म्मस्फोटस्तु विज्ञेयः॥" इति।

(य) उदाहरति, गमनमिति।—माधवस्य पूर्व्वरागविप्रलम्भवर्णनमिदम्। गमनम् अलसम्—आलस्ययुक्तं, मन्दमित्यर्थः, दृष्टिः,—दृष्टिपातः, शून्या—नावहिता कुत्रापि पततीति भावः, शरीरम् असौष्ठवं—सौष्ठवरहितम्, आहार्य्यशोभादिवर्जनात्

अलसगमनादिभिर्भावलेशैर्माधवस्य मालत्यामनुरागः स्तोकः प्रकाशितः।

नर्मगर्भो व्यवहृतिर्नेतुः प्रच्छन्नवर्त्तिनः ॥४२२॥ (र)

यथा तत्रैव,—सखीरूपधारिणा माधवेन मालत्या मरणव्यवसायवारणम्।

अथ सात्त्वती,—

सात्त्वती बहुला सत्त्व-शौर्य्यत्यागदयाऽऽर्जवैः।
सहर्षा क्षुद्रशृङ्गारा विशोका साद्भुता तथा॥४२३॥ (ल)

मलाद्यपनयनाभावाच्च अरमणीयम् इति भावः, श्वसितं—निश्वासः, अधिकं—दीर्घमित्यर्थः, एतत्—अलसगमनादिकं सर्वं, किं नु?—किं खलु? अथवा इतः,—अस्मात्, अन्यत्—भिन्नं, किं स्यात्? भुवने—जगति, कन्दर्पस्य आज्ञा भ्रमति, यौवनञ्च विकारि—[विकरोति—विकृतं करोति, इत्येवं शीलमिति तथोक्तं, न तु विकारोऽस्यास्तीति, अस्मिन्नस्तीति वेति तथोक्तमिति वाच्यम्; तथा सति वक्तव्यस्वारस्यानुदयः] चित्तविकारकारणं, ते ते ललितमधुराः,—ललितेन—"वाग्वेषयोः मधुरता तद्वत् शृङ्गारचेष्टितं ललितम्" इति लक्षणोक्तेन भावविशेषेण, मधुराः,—अतिमनोहराः, भावाः,—प्रकाराः, धीरतां—धैर्य्यं, क्षिपन्ति—च्यावयन्ति च। हरिणी वृत्तम्।

(र) नर्मगर्भमाह, नर्मगर्भ इति।—प्रच्छन्नवर्त्तिनः,—गूढ़चारिणः, नेतुः,—नायकस्य, व्यवहृतिः,—व्यवहारः, नर्मगर्भः,—नर्म—क्रीड़ायां रहस्यार्थकथनं, गर्भे यस्य तथोक्तः।

(ल) सात्त्वतीमाह, अथेति।—सत्त्वेन—महानुभावतया, शौर्य्येण—बलेन, त्यागेन—दानशक्त्या, दयया आर्जवेन च बहुला—पूर्णा, सहर्षा—सानन्दा, क्षुद्रशृङ्गारा—अल्पशृङ्गारभावा, विशोका—शोकरहिता, तथा साद्भुता—सचमत्कारा, वृत्तिः इति शेषः, सात्त्वती। एषा परिष्कृत्य यथोक्ता मुनिना,—"या सत्त्वजेनेह गुणेन युक्ता न्यायेन वृत्तेन समन्विता च। हर्षोत्कटा संहृतशोकभावा सा सात्त्वती नाम भवेत् तु वृत्तिः॥ वागङ्गाभिनयवती सत्त्वोत्थानवचनप्रकरणेषु। सत्त्वाधिकारयुक्ता विज्ञेया सात्त्वती वृत्तिः॥ वीराद्भुतरौद्ररसा निरस्तशृङ्गारकरुणनिर्वेदा। उद्धतपुरुषप्राया परस्पराधर्षणकृता च॥" इति।

उत्थापकोऽथ सङ्घात्यः संलापः परिवर्त्तकः।
विशेषा इति चत्वारः सात्त्वत्याः परिकीर्त्तिताः॥४२४॥ (ङ)
उत्तेजनकरी शस्त्रोर्वागुत्थापक उच्यते॥४२५॥ (च)

यथा वीरचरिते पञ्चमाङ्के,—

"आनन्दाय च विस्मयाय च मया दृष्टोऽसि दुःखाय वा
वैदग्ध्यान्तु ममापि सम्प्रति कृतस्त्वद्दर्शने चक्षुषः?।
त्वत्साङ्गत्यसुखस्य नास्मि विषयस्तत् किं वृथा व्याकृतेः?
अस्मिन् विस्मृतजामदग्न्यदमने पाणौ धनुर्जृम्भताम्॥" (छ)

(ङ) एवं स्वरूपतो निर्दिश्य भेदा नाह, उत्थापक इति।—तत्रात्यन्तारो विशेषाः,—भेदाः; उत्थापकः, सङ्घात्यः, संलापः, परिवर्त्तकश्च।

(च) उत्थापकमाह, उत्तेजनकरीति।—शस्त्रोः,—प्रतिनायकस्य, उत्तेजनकरी—क्रोधोद्दीपनी, उत्साहातिशय्यप्रवर्त्तिनी इति यावत्, वाक् उत्थापकः,—उत्थापयति—प्रथमं निवर्त्य युद्धार्थमुद्योजयति अर्थं योऽभिनयः स तथोक्तः, उपचारात् तत्प्रयोजिका वागपीति यावत्, उच्यते। अयमेव विश्वनाथाभिहितो मुनिना,—"यदमर्षोत्साहादि तं तावद्दर्शयतः प्रथमं। इति सङ्घर्षसमाश्रयमुत्थितमुत्थापको ज्ञेयः॥" इति।

(छ) उदाहरति, आनन्दायेति।—श्रीरामं प्रति वाक्यं उक्तिरियम्। आनन्दाय—प्रीतये, विस्मयाय—लोकोत्तरचरितरूपदर्शनजनितचमत्काराय, वा—पक्षान्तरे, दुःखाय—एतादृशोऽपि हृतस्त्र इति विषादायेत्यर्थः, सम्प्रति मया दृष्टोऽसि, तु—किन्तु, तव दर्शने मम चक्षुषः वैदग्ध्यमपि—दक्षताऽभावोऽपि, दक्षिरपीति यावत्, कृतः?—नैव दक्षिरकोत्यर्थः, पुनः पुनस्तव दर्शनेच्छा मम वर्त्तते इति भावः। त्वत्-साङ्गत्यसुखस्य—तव साङ्गत्यं—सङ्गः स्वत्यर्थः, [सङ्गतिरेव साङ्गत्यम्, तत्र स्वार्थे यञ्] तेन यत् सुखं—प्रमोदः, तस्य विषयः,—पात्रं, न अस्मि—नहं तव नैवोसुखभाजनं न इति भावः; तत्—तस्मात् हेतोः, वृथा—निरर्थकैरित्यर्थः, व्याकृतेः,—भावितेः, किम्?—न किमपि प्रयोजनमित्यर्थः, अस्मिन् विस्मृत—विस्मृतं, प्रख्यातमित्यर्थः, जामदग्न्यदमने—भार्गवदमने, दमनं तेन ताडने, ["विस्मृतजामदग्न्यविजये" इति पाठस्तु चिन्त्यः] पाणौ धनुः,—अरालं, जृम्भतां—राजताम्; धनुर्दृढाघेति भावः। आर्द्रं चरितकीर्त्तिं वृत्तम्।

मन्त्रार्थदैवशक्त्यादेः सङ्घात्यः सङ्घभेदनम्॥४२६॥(स)

मन्त्रशक्त्या यथा मुद्राराक्षसे,—राक्षससहायानां चाणक्येन खबुद्धया भेदनम्। अर्थशक्त्याऽपि तत्रैव। दैवशक्त्या यथा रामायणे,—रावणाद् विभीषणस्य भेदः।

संलापः स्याद्गभीरोक्तिर्नानाभावसमाश्रया॥४२७॥(ह)

यथा वीरचरिते,—"रामः। अयं सः, यः किल पुरा सपरिवारकार्त्तिकेयविजयावर्जितेन भगवता नीललोहितेन परिवत्सरसहस्रान्तेवासिने तुभ्यं प्रसादीकृतः परशुः। परशुरामः। राम! दाशरथे! स एवायमाचार्य्यपादानां प्रियः परशुः" इत्यादि। (क)

प्रारब्धादन्यकार्य्याणां करणं परिवर्त्तकः॥४२८॥ (ख)

यथा वेण्यां,—"भीमः। सहदेव! गच्छ त्वं, गुरुमनुवर्त्तस्व, अहमप्यस्त्रागारं प्रविश्यायुधसज्जायो भवामीति यावत्, अथवा आमन्त्रयितव्यैव मया पाञ्चाली" इति। (ग)

(स) सङ्घात्यमाह, मन्त्रेति।—मन्त्रः,—मन्त्रणाप्रकारः, अर्थः,—धनं, दैवशक्तिः,—दैवी प्रभुता, [आदिपदेन लौकिकादिपरिग्रहः] एतत्प्रभृतेः कारणात्, सङ्घस्य—समवायस्य, भेदनं—पृथक्करणं, सङ्घात्यः। तथोक्तं भरतमुनिना,—"मन्त्रार्थबाह्यशक्त्या दैवसमादात्मदोषयोगाद्वा। सङ्घातभेदजननस्तज्ज्ञैः सङ्घात्यको ज्ञेयः॥" इति।

(ह) संलापमाह, संलाप इति।—नानाभावानां—नानाविधयाथां, समाश्रया—आश्रयवती, गभीरा—अर्थगुर्वी, उक्तिः संलापः स्यात्।

(क) उदाहरति, यथेति।—सपरिवारेति।—सपरिवारस्य—सानुचरस्य, कार्त्तिकेयस्य विजयेन, परशुरामकार्त्तिकेयेति भावः, आवर्जितः,—वशीकृतः, प्रीणित इत्यर्थः, तेन, भगवता—अणिमाऽऽद्यैश्वर्य्यशालिना, नीललोहितेन—महादेवेन, ("धूर्जटिर्नीललोहितः" इत्यमरः) प्रसादीकृतः,—दत्तः। स्पष्टमन्यत्। अत्र देवविषयरतियुक्तेन वीररसस्य समाश्रयेण उक्तेर्गभीरता।

(ख) परिवर्त्तकमाह, प्रारब्धादिति।—प्रारब्धात्—कर्त्तुमुपक्रान्तात् कार्य्यात्, अन्यकार्य्याणां—तदङ्गानां कार्य्यान्तराणित्यर्थः, करणं—निधानं, परिवर्त्तकः।

(ग) उदाहरति, यथेति।—गुरुं—युधिष्ठिरम्, अनुवर्त्तस्व—शृणुष्व। अस्त्रा

अथारभटी,—

मायेन्द्रजालसङ्ग्राम-क्रोधोद्भ्रान्तादिचेष्टितैः ।
संयुक्ता बधबन्धाद्यैरुद्धताऽऽरभटी मता ॥४२९॥ (घ)
वस्तूत्थापनसम्फेटौ सङ्क्षिप्तिरवपातनम् ।
इति भेदास्तु चत्वार आरभट्याः प्रकीर्त्तिताः ॥४३०॥(ङ)
मायाद्युत्थापितं वस्तु वस्तूत्थापनमुच्यते ॥४३१॥(च)

यथा उदात्तराघवे,—

"जीयन्ते जयिनो नितान्ततिमिरव्रातैर्वियद्व्यापिभि-
र्भास्वन्तः सकला रवेरपि कराः कस्मादकस्मादमी ? ।
एते चोग्रकबन्धकण्ठरुधिरैराध्मायमानोदराः
मुञ्चन्त्याननकन्दरानलमुचस्तीव्रान् रवान् फेरवाः ॥" इत्यादि(छ)

स्पष्टम् । अत्र आयुधागारप्रवेशरूपात् आरब्धात् पाञ्चालीसमामन्त्रणरूपस्य अन्य-कार्य्यस्य करणम् ।

(घ) आरभटीमाह, मायेति ।—माया—छलविशेषः, इन्द्रजालम्—अद्भुत-प्रदर्शकविद्याविशेषः, ("असतो वस्तुनो माया सद्रूपोद्भावना तथा ।" इति "इन्द्रजालं स्थितार्थस्य मन्त्रचूर्णौषधादिभिः । अदर्शनमपारोक्ष्यमन्यथाकृतिरुच्यते ॥" इति चोक्तरूपे मायेन्द्रजाले इति सारः) सङ्ग्रामः,—युद्धं, क्रोधेन उद्भ्रान्तत्वादि, इत्येवं चेष्टितैः,—व्यापारैः, तथा बधबन्धनाद्यैश्च संयुक्ता उद्धता—दारुणा, वृत्तिः इति शेषः, आरभटी ।

(ङ) तद्भेदानाह, वस्त्वित्यादि ।—वस्तूत्थापनं, सम्फेटः, सङ्क्षिप्तिः, अवपातनं च इत्येते चत्वारः आरभट्याः भेदाः प्रकीर्त्तिताः ।

(च) तत्र वस्तूत्थापनमाह, मायेति ।—मायादिना [आदिना तपःप्रभावादे-र्ग्रहणम्] उत्थापितं वस्तु, वस्तूत्थापनम् उच्यते ।

(छ) उदाहरति, जीयन्ते इति ।—अमी—प्रत्यक्षीभूताः, जयिनः,—सर्वोत्कर्ष-शालिनः, भास्वन्तः,—दीप्यमानाः, सकलाः,—समग्राः, रवेः,—सूर्य्यस्य, कराः,—मयूखाः अपि, कस्मात्—कथम्, अकस्मात्—सहसा, वियद्व्यापिभिः,—गगना-च्छादिभिः, नितान्ततिमिरव्रातैः,—गाढान्धकारनिचयैः, जीयन्ते ?—पराभूयन्ते ? आच्छाद्यन्ते इत्यर्थः ; एते च फेरवाः,—"फे" इत्यव्यक्तो रवो येषां ते तथोक्ताः, शृगालाः

सम्फेटस्तु समाघातः क्रुद्धसत्वरयोर्द्वयोः ॥४३२॥(ज)

यथा मालत्यां,—माधवाघोरघण्टयोः।

सङ्क्षिप्ता वस्तुरचना शिल्पैरितरथाऽपि वा।
सङ्क्षिप्तिः स्यान्निवृत्तौ च नेतुर्नेत्रन्तरग्रहः ॥४३३॥(झ)

यथा उदयनचरिते,—किलिञ्जहस्तिप्रयोगः। द्वितीयं यथा,—बालिनिवृत्त्या सुग्रीवः। यथा वा,—परशुरामस्यौद्धत्यनिवृत्त्या शान्तत्वापादनं, "पुण्या ब्राह्मणजातिः" इति। (ञ)

इत्यर्थः ["फेरवः" इति पाठान्तरेऽप्ययमेवार्थः। अस्मिन् पक्षे फेरुशब्दः, "फे" इत्यव्यक्तं रौतीति फेरुः। "रु शब्दे," ततो डुः] उग्राणां—भीषणानां, कबन्धानाम्—अशिरस्ककलेवराणां, ("कबन्धोऽस्त्री क्रियायुक्त-व्यपमूर्द्धकलेवरे" इति मेदिनी) कण्ठरुधिरैः आध्मायमानं—पूर्य्यमाणम्, अथवा ईषद्दह्यमानम्, उदरं येषां तादृशाः, तथा आननं—मुखम् एव, कन्दरा—गुहा, गर्त्तविशेष इत्यर्थः, तस्याः अनलम्—अग्निं, मुञ्चन्ति—त्यजन्ति इति तथोक्ताः, उल्कामुखाः सन्तः इत्यर्थः, तीव्रान्—उग्रान्, रवान्, मुञ्चन्ति—त्यजन्ति, कठोरं शब्दायन्ते इत्यर्थः। अत्र मायया अन्धकारकबन्धादीनां वस्तूनाम् उत्थापनम्। शार्दूलविक्रीड़ितं वृत्तम्। इन्द्रजालोत्थापितं वस्तु यथा—"एष ब्रह्मा सरोजे रजनिकरकलाशेखरः शङ्करोऽयं, दोर्भिर्दैत्यान्तकोऽसौ सधनुरसिगदाचक्रचिह्नैश्चतुर्भिः। एषोऽप्यैरावतस्थस्त्रिदशपतिरमी देवि! देवास्तथाऽन्ये नृत्यन्ति व्योम्नि चैताश्चलचरणरणन्नूपुरा दिव्यनार्य्यः॥" इन्द्रजालोत्थापितवस्तुकथनमात्रमेवेदं, नारभटीभेदः, रौद्रबीभत्साभ्यतरसूचकत्वाभावात्।

(ज) सम्फेटमाह, सम्फेट इति।—क्रुद्धसत्वरयोः—क्रुद्धस्य शीघ्रं कार्य्यकारिणश्च, समाघातः,—सम्यक् प्रहारः, सम्फेटः।

(झ) सङ्क्षिप्तिमाह, सङ्क्षिप्तेति।—शिल्पैः इतरथाऽपि—शिल्पेतरेणापि, सङ्क्षिप्ता वस्तूनां रचना सङ्क्षिप्तिः; च—किञ्च, नेतुः,—नायकस्य, निवृत्तौ, स्वव्यापारात् इति भावः, नेत्रन्तरस्य—अन्यनायकस्य, ग्रहः,—ज्ञानमित्यर्थः, सङ्क्षिप्तिः।

(ञ) उदाहरति, यथेति।—किलिञ्जहस्तिप्रयोगः,—काष्ठनिर्मितहस्तिप्रयोगः, अत्र शिल्पेन रचना। नेत्रन्तरत्वं व्यक्तिभेदाद्धर्मभेदाच्च भवति; व्यक्तिभेदात् यथा—बालि-इत्यादि। धर्मभेदान्नेत्रन्तरत्वमाह, यथा—परशुरामस्य औद्धत्यस्य—उद्धत-

प्रवेशश्चासनिष्क्रान्ति-हर्षविद्रवसम्भवम्।
अवपातनमित्युक्तम् ॥ ४३४ ॥ (ट)

यथा कृत्यरावणे षष्ठेऽङ्के,—"[प्रविश्य खड्गहस्तः पुरुषः]" इत्यतः प्रभृति निष्क्रमणपर्य्यन्तम्।

पूर्वमुक्तौ च भारती ॥४३५॥ (ठ)

अथ नाट्योक्तयः,—

अश्राव्यं खलु यद् वस्तु तदिह स्वगतं मतम्।
सर्वश्राव्यं प्रकाशं स्यात्, तद्भवेदपवारितम् ॥
रहस्यन्तु यदन्यस्य परावृत्य प्रकाश्यते ॥
त्रिपताकाकरेणान्यानपवार्य्यान्तरा कथाम्।
अन्योऽन्यामन्त्रणं यत् स्याज्जनान्ते तज्जनान्तिकम् ॥
किं ब्रवीषीति यन्नाट्ये विना पात्रं प्रयुज्यते।
श्रुत्वेवानुक्तमप्यर्थं तत् स्यादाकाशभाषितम् ॥४३६॥ (ड)

खलावज्ञ, निहत्या—अपनयेन, श्रान्तस्य आपादनं—पदर्शनं तदचनं निर्दिशति, पुष्पा इति। मदाभीरचरिते स्थलमिदम्।

(ट) अवपातनमाह, प्रवेशेति।—विद्रवः,—पलायनम्। प्रवेशादिसम्भवं वस्तु अवपातनमित्यर्थः।

(ठ) पूर्वमिति।—पूर्वं—स्थापकवर्त्तव्यकथनावसरे, भारती—तदाख्या वृत्तिः।

(ड) नाट्योक्तीराह, अश्राव्यमिति।—अश्राव्यं—पात्रान्तरैः श्रोतुमनर्हं-मित्यर्थः। अन्यस्य परावृत्य—पश्चात् कृत्वा, परावृत्तीभूय वा स्थानान्तरं गत्वा वा, यत् रहस्यं—गुप्तं वस्तु, प्रकाश्यते—कथ्यते, तत् अपवारितं भवेत्। जनान्ते—जन-जनीये, तिस्रः पताकाः यस्य तादृशेन, तत्तिस्रोऽङ्गुलियुक्तेनेत्यर्थः, करेण अन्यान् जनान् अपवार्य्य—वारयित्वा, कथाम् अन्तरा—कथामध्ये, यत् अन्योऽन्यामन्त्रणं—परस्परं सम्बोधनं, स्यात्, तत् जनान्तिकम्। नाट्ये पात्रं—व्यक्तिं, वक्तृत्वमित्यर्थः, विना

यः कश्चिदर्थो यस्मात् गोपनीयः, तस्यान्तरत ऊर्द्ध्वसर्वाङ्गुलि नामितानामिकं त्रिपताकलक्षणं करं कृत्वा अन्येन सह यन्मन्त्र्यते, तत् जनान्तिकम्। परावृत्यान्यस्य रहस्यकथनमपवारितम्। शेषं स्पष्टम्।

दत्तां सिद्धाञ्च सेनाञ्च वेश्यानां नाम दर्शयेत्।
दत्तप्रायाणि वणिजां चेटचेट्योस्तथा पुनः॥
वसन्तादिषु वर्ण्यस्य वस्तुनो नाम यद्भवेत्॥४३७॥(ढ)

वेश्या यथा,—वसन्तसेनादिः। वणिक्,—विष्णुदत्तादिः। चेटः,—कलहंसादिः। चेटी,—मन्दारिकादिः।

नाम कार्य्यं नाटकस्य गर्भितार्थप्रकाशकम्॥४३८॥(ण)

यथा,—रामाभ्युदयादिः।

नायिकानायकाख्यानां संज्ञा प्रकरणादिषु॥४३९॥(त)

यथा,—मालतीमाधवादिः।

अनुक्तमपि, अर्थं—विषयं, श्रुत्वेव—श्रवणाभिनयं कृत्वेवेत्यर्थः, किं ब्रवीषीति यत् प्रयुज्यते, तत् आकाशभाषितं स्यात्।

(ढ) दत्तामिति।—वेश्यानां दत्तां सिद्धां सेनाञ्च नाम—नाम्नश्चरमाञ्चलं, तेन दत्तान्तादिनाम इत्यर्थः, दर्शयेत्; यथा,—कामदत्ता मदनसेना इत्यादि। तथा वणिजां दत्तप्रायाणि—दत्तान्तबहुलानि, नामानि दर्शयेत्; यथा,—धर्म्मदत्तो नाम वणिगित्यादि। प्रायशब्देन क्वचित् तद्व्यभिचारोऽपि द्रष्टव्यः। यथा शाकुन्तले—"धनवृद्धिर्नाम वणिक्" इति। तथा वसन्तादिषु वर्ण्यस्य—वर्णनीयस्य, वस्तुनः यत् नाम भवेत्, यथा कलहंसादिः; तत् चेटचेट्योः,—चेटस्य चेट्याश्च, प्रदर्शयेत् इति शेषः। अत्र एकशेषाभावश्चिन्त्यः।

(ण) नामेति।—नाटकस्य नाम गर्भितस्य—सन्दर्भसूचकव्युत्पत्तिलभ्यस्य, अर्थस्य प्रकाशकं—सूचकं, कार्य्यम्।

(त) नायिकेति।—प्रकरणादिषु [आदिपदेन भाणादिपरिग्रहः] नायिकानायकाख्यानां—नायिकया सहितो नायकः नायिकानायकः, तदाख्यानां—तन्नाम्नां,

नाटिकासट्टकादीनां नायिकाभिर्विशेषणम् ॥४४०॥ (घ)

यथा,—रत्नावली-कर्पूरमञ्जर्य्यादिः ।

प्रायेण ण्यन्तकः साधिर्गमेः स्थाने प्रयुज्यते ॥४४१॥ (ट)

यथा शाकुन्तले,—"वैखा। "गच्छामः" इत्यर्थे "साधयामस्तावत्" ।

राजा स्वामीति देवेति भृत्यैर्भट्टेति चाधमैः ।
राजर्षिभिर्वयस्येति तथा विदूषकेण च ॥
राजन्नित्यृषिभिर्वाच्यः सोऽपत्यप्रत्ययेन च ।
स्वेच्छया नामभिर्विप्रैर्विप्र आर्य्येति चेतरैः ॥
वयस्येत्यथवा नाम्ना वाच्यो राज्ञा विदूषकः ।
वाच्यौ नटीसूत्रधारावार्य्यनाम्ना परस्परम् ॥
सूत्रधारं वदेद्भाव इति वै पारिपार्श्विकः ।
सूत्रधारो मारिषेति हण्डे इत्यधमैः समाः ॥
वयस्येत्युत्तमैर्हंहो मध्यैरार्य्येति चाग्रजः ।
भगवन्निति वक्तव्याः सर्वैर्देवर्षिलिङ्गिनः ॥

संज्ञा—नाम, कार्य्या इति शेषः। एतदुक्तं भवति—नायिकानायकयोरुभयोरेव नाम्ना प्रकरणादेः नाम कर्त्तव्यमिति। [एतत् प्रायिकं, तेन सौगन्धिकाहरणादि संज्ञाऽपि]।

(घ) नाटिकेति।—नाटिकासट्टकादीनां प्रयोगाणां, नायिकाभिर्विशेषणं—विशिष्य व्यवस्थापनं, संज्ञाकरणमित्यर्थः, तेषां नायिकाप्रधानत्वादिति भावः।

(ट) प्रायेणेति।—ण्यन्तकः साधिः,—साधधातुः, गमेः,—गमधातोः, स्थाने प्रायेण प्रयुज्यते, न तु सर्वत्रेति भावः; तेन अन्यदपि तत्समानार्थकं प्रयोज्यम्। यथा,—"सुहं चिट्ठउ अज्जउत्तो! अहं गमिस्सं" इत्युत्थाय गच्छतीति रत्नावल्यां गमेः प्रयोगः, यथा वा उत्तरचरिते—"तदेहि हरिणप्लुतैः पलायामहे" इति।

वदेद्राज्ञीञ्च चेटीञ्च भवतीति विदूषकः।
आयुष्मन् रथिनं सूतो वृद्धस्तातेति चेतरैः॥
वत्स पुत्रक तातेति नाम्ना गोत्रेण वा सुतः।
शिष्योऽनुजश्च वक्तव्योऽमात्य आर्य्येति चाधमैः॥
विप्रैरयममात्येति सचिवेति च भण्यते।
साधो इति तपस्वी च प्रशान्तश्चोच्यते बुधैः॥
अगृहीताभिधः पूज्यः शिष्याद्यैर्विनिगद्यते।
उपाध्यायेति चाचार्य्यो महाराजेति भूपतिः॥
स्वामीति, युवराजस्तु कुमारो भर्त्तृदारकः।
सौम्य भद्रमुखेत्येवमधमैस्तु कुमारकः॥
वाच्या प्रकृतिभी राज्ञः कुमारी भर्त्तृदारिका।
पतिर्यथा तथा वाच्या ज्येष्ठमध्याधमैः स्त्रियः॥
हलेति सदृशी, प्रेष्या हञ्जे, वेश्याऽज्जुका तथा।
कुट्टिन्यम्बेत्यनुगतैः पूज्या च जरती जनैः॥
आमन्त्रणैश्च पाषण्डा वाच्याः स्वसमयागतैः।
शकादयश्च सम्भाष्या भद्रदत्तादिनामभिः॥
यस्य यत्कर्म शिल्पं वा विद्या वा जातिरेव वा।
तेनैव नाम्ना वाच्योऽसौ ज्ञेयाश्चान्ये यथोचितम्॥४४२॥(च)

(च) राजेति।—राजा, भट्टे: स्वामी इति, देव इति वा, अधमैः,—नीचैः जनैः, भट्टा इति, राजर्षिभिः, अन्यैरिति शेषः, तथा विदूषकेण च वयस्य इति, ऋषिभिः राजन् इति, अपत्यप्रत्ययेन—अपत्यप्रत्ययान्तपदेन च इत्यर्थः, यथा,—दाशरथे! पौरव! पाण्डव! इत्यादिरूपेण, तः,—राजा, वाच्यः, एतच्च पुत्रादिसम्बन्धिपदोप-

लक्षणं, तेन रघुनन्दन ! इत्यादिनाऽपीति ज्ञेयम्। विप्रः विप्रैः स्वेच्छया—अपत्यप्रत्ययेन इत्याशयः, नामभिर्वा, इतरैः,—क्षत्रियादिभिः, आर्य्य इति वाच्यः, तेन अनर्घराघवादौ विश्वामित्रेति कौशिकेति कुशिकनन्दनेत्यादिना शतानन्देन विश्वामित्रः उक्तः। विदूषकः राज्ञा वयस्य इति, नाम्ना वा वाच्यः। नटीसूत्रधारौ परस्परम् आर्य्यनाम्ना —नट्या सूत्रधारः आर्य्य इति, सूत्रधारेण नटी आर्य्या इति रूपेणेत्यर्थः, वाच्यौ। पारिपार्श्विकः,—सूत्रधारादवरो नटः, सूत्रधारं भाव इति वै वदेत्। सूत्रधारः तं पारिपार्श्विकं मारिष इति वदेत्। अधमैः,—नीचैः जनैः, समाः,—आत्मतुल्याः, हण्डे इति वाच्याः। ["हण्डे" इत्यामन्त्रणद्योतकमव्ययम्] उत्तमैर्जनैः समाः वयस्य इति, मध्यैः समाः हंहो इति च वाच्याः। अग्रजः,—ज्येष्ठः भ्राता, आर्य्यः इति वाच्यः, सर्वैः देवर्षिलिङ्गिनः,—देवलिङ्गिनः ऋषिलिङ्गिनश्च, भगवन् इति वक्तव्याः; विदूषकः राज्ञीञ्च, चेटीञ्च—राज्ञ्याः सहचरीञ्चेत्यर्थः, भवतीति वदेत्। अत्रैवं बोध्यम्;—"राजपत्न्यस्तु सम्भाष्याः सर्वाः परिजनेन तु। भट्टिनी स्वामिनी देवी इत्येवं नाटके बुधैः॥ देवीति महिषी वाच्या राज्ञा परिजनेन तु। भोगिन्य इति शेषास्तु स्वामिन्य इति वा पुनः॥" इति। सूतः,—सारथिः, रथिनम् आयुष्मन् इति वदेत्; वृद्धो जनः इतरैः,—कनिष्ठैः, तात इति, सुतः—पुत्रः, शिष्यः, अनुजः,—कनिष्ठश्च, वत्स पुत्रक तात इति नाम्ना, गोत्रेण—अपत्यप्रत्ययान्तेन इत्यर्थः, वा वाच्यः। अमात्यः अधमैः जनैः, आर्य्य इति वक्तव्यः, विप्रैः अयम् अमात्य इति, सचिव इति च भण्यते। तपस्वी च, प्रशान्तः,—वीतरागश्च जनः, बुधैः साधो इति उच्यते। शिष्याद्यैः,—शिष्यप्रभृतिभिः, [आद्यशब्देन भ्रातृपुत्रादीनां ग्रहणम्] पूज्यः,—पूजनीयो जनः, अगृहीताभिधः,—अगृहीता अभिधा यस्य तादृशः, नाम अगृहीत्वा सम्मानसूचकेन सम्बोधनेन इति भावः, विनिगद्यते—कथ्यते, ["स्वगृहीताभिधः" इति पाठे—स्वगृहीता—स्वेच्छया प्रयुक्ता, अभिधा—पूज्यत्वप्रकाशकनाम, भगवन्निति महाभागेत्यादि वा यस्य स इति विग्रहः]। आचार्य्यः,—वेदाध्यापयिता, ("उपनीय ददद् वेदमाचार्य्यः स उदाहृतः" इति वचनात्) गुरुर्वा, उपाध्याय इति, भूपतिः (प्रजाभिः) महाराज इति, स्वामी इति वा विनिगद्यते इत्यन्वयः। युवराजस्तु कुमारः, भर्त्तृदारको वा, वाच्यः। अधमैस्तु कुमारकः,—कुमारः, राजकुमार इति यावत्, सौम्य ! भद्रमुख ! इत्येवं वाच्यः। प्रकृतिभिः,—अमात्यादिभिः, राज्ञः कुमारी भर्त्तृदारिका वाच्या। यत् तु नाटकादेरन्यत्र कादम्बर्य्यां तरलिकया महाश्वेतासम्बोधने "भर्त्तृदारिके !" इत्युक्तं, तत् प्रयोगमधुरत्वख्यापनाय इति बोद्धव्यम्। पतिर्यथा ज्येष्ठमध्याधमैः,—उत्तमः उत्तमेन वयस्य इति, मध्यमेन मध्यमः हंहो इति, अधमेन

अथ भाषाविभागः,—

पुरुषाणामनीचानां संस्कृतं स्यात् कृतात्मनाम्।
शौरसेनी प्रयोक्तव्या तादृशीनाञ्च योषिताम्॥
आसामेव तु गाथासु महाराष्ट्रीं प्रयोजयेत्।
अत्रोक्ता मागधी भाषा राजान्तःपुरचारिणाम्॥
चेटानां राजपुत्त्राणां श्रेष्ठिनाञ्चार्द्धमागधी।
प्राच्या विदूषकादीनां, धूर्त्तानां स्यादवन्तिका॥
योधनागरिकादीनां दाक्षिणात्या हि दीव्यताम्।
शकाराणां शकादीनां शाकारीं सम्प्रयोजयेत्॥
बाह्लीकभाषा दिव्यानां द्राविड़ी द्रविड़ादिषु।
आभीरेषु तथाऽऽभीरी चाण्डाली पुक्कसादिषु॥
आभीरी शावरी चापि काष्ठपत्त्रोपजीविषु।
तथैवाङ्गारकारादौ पैशाची स्यात् पिशाचवाक्॥

अधमः हण्डे इति वाच्यः, तथा स्त्रियः वाच्याः,—ज्येष्ठया स्त्रिया ज्येष्ठा स्त्री वयस्येति, मध्यमया स्त्रिया मध्यमा स्त्री हंहो इति, अधमया स्त्रिया अधमा स्त्री हण्डे इति वाच्येत्यर्थः। सदृशी—स्वसमाना स्त्री, हलेति वाच्या; प्रेष्या—किङ्करी, हञ्जे इति, वेश्या अज्जुका इति वाच्या। ["हला" इति "हञ्जे" इति चामन्त्रणद्योतके उभे अव्यये] कुट्टिनी अनुगतैः,—सेवकैः, अम्ब इति, पूज्या तथा जरती—वृद्धा स्त्री च, जनैः अम्ब इति वाच्या; यद्वा,—कुट्टिनी तथा—अज्जुका इति वाच्या। अनुगतैः, जनैरिति शेषः, पूज्या जरती च अम्ब इति वाच्या, पाषण्डाः,—शकारादयः, स्वसमयागतैः,—स्वसङ्केतानुसारिभिः, कापालिकेत्यादिभिरित्यर्थः, आमन्त्रणैः,—सम्बोधनपदैः, वाच्याः। शकादयः,—शकयवनकिरातप्रभृतयः, भद्रदत्तादिनामभिः सम्भाष्याः। यस्य यत् कर्म—मालाकरणादि, शिल्पं—कलाविज्ञानं वा, विद्या—मीमांसादिः वा, जातिः,—ब्राह्मणादिः वा, तेनैव—तदनुगतेनैव, नाम्ना असौ—मालाकारादिः, वाच्यः। अन्ये—एभ्यो भिन्नाः, यथोचितं (सम्भाषणे) ज्ञेयाः।

चेटीनामप्यनीचानामपि स्यात् शौरसेनिका।
बालानां षण्डकानाञ्च नीचग्रहविचारिणाम्।
उन्मत्तानामातुराणां सैव स्यात् संस्कृतं क्वचित्॥
ऐश्वर्य्येण प्रमत्तस्य दारिद्र्योपस्कृतस्य च।
भिक्षुबन्धधरादीनां प्राकृतं सम्प्रयोजयेत्॥
संस्कृतं सम्प्रयोक्तव्यं लिङ्गिनीषूत्तमासु च।
देवीमन्त्रिसुतावेश्यास्वपि कैश्चित् तथोदितम्॥
यद्देश्यं नीचपात्रन्तु तद्देश्यं तस्य भाषितम्।
कार्य्यतश्चोत्तमादीनां कार्य्यो भाषाविपर्य्ययः॥
योषित्सखीबालवेश्या-कितवाप्सरसां तथा।
वैदग्ध्यार्थं प्रदातव्यं संस्कतञ्चान्तरान्तरा॥४४३॥ (न)

(न) भाषाविभागानाह, अथेति।—अनीचानाम्—उत्कृष्टानाम्, उत्तमप्रकृतीनामित्यर्थः, ज्ञातात्मनां—विदुषां, भाषा संस्कृतं स्यात्। तादृशीनाम्—उत्कृष्टमध्यमानामित्यर्थः, योषितां शौरसेनी भाषा प्रयोक्तव्या। आसामेव—उत्कृष्टानां नारीणामेव, गाथासु—श्लोकेषु, सङ्गीतेषु वा, नाट्यारम्भे प्रयोजयेत्। अत्र—नाट्ये, राज्ञः अन्तःपुरचारिणां—बालनादीनां, भाषा मागधी। चेटानां—भृत्यानां, राजपुत्राणां, श्रेष्ठिनां—धनवतां वैश्यानाञ्च, अर्द्धमागधी—मागधी खदेशभाषां चान्तरान्तरामिश्रित्य वदतीति भावः, तथोक्तं साहित्यकौमुद्याम्;—"राजपुत्रादिभाषा तु मागध्या स्वानुरूपतः" इति। ("स्वानुरूपतः,—स्वस्य यस्मिन् देशे जन्मादि, तदनुरूपतामाश्रित्य" इति तद्व्याख्यायां पण्डितराजेन व्याख्यातम्)। विदूषकादीनां भाषा प्राच्या—गौडीया। धूर्त्तानाम्—अवन्तिजानां, भाषा अवन्तिका। दीव्यतां—क्रीडतां, योषानागरिकादीनाञ्च, दाक्षिणात्या—वैदर्भी भाषा। शकाराणां—राजश्यालकानां, ("सोऽयमनुढाभ्राता राज्ञः श्यालः शकार इत्युक्तः") शाकारीं—शकारदेशसम्बन्धिनीं, ["शकाराणां शकादीनां शाकरीम्" इति पाठान्तरे तु—"राज्ञः श्यालाः शका

एषामुदाहरणान्याकरेषु बोद्धव्यानि। भाषालक्षणानि मम तातपादानां भाषार्णवे।

वाऽपि शाकार्य्यां प्रपठन्ति ते" इति रसगङ्गाधरादिविरोधापत्तिर्बोध्या] भाषां सम्प्रयोजयेत्। दिव्यानां—दैवप्रभावसम्पन्नानां, बाह्लीकभाषा—बाह्लीकदेशीया भाषा, बाह्लीकदेशभवानां नराणां या भाषा साऽभिनेतव्येति यावत्, बाह्लीकदेशश्च गान्धारदेशतः उत्तरपश्चिमदिग्गतः। ["बाह्लीकभाषोदीच्यानाम्" इति पाठे—उदीच्यानाम्—उत्तरदेशवासिनाम्] द्रविडादिषु द्राविडी भाषा, प्रयोज्या इति शेषः। आभीरेषु आभीरी, पुक्कसादिषु (आदिपदेन तत्सदृशादीनां ग्रहणम्) चाण्डाली, काष्ठपत्रोपजीविषु—काष्ठजीविषु—तक्षकेषु, पत्रजीविषु—पत्रावलीविक्रयशीलेषु च, आभीरी शाबरी च भाषा। अङ्गारकारादौ—अङ्गारकारः,—लोहपात्रादिनिर्माणोपजीवी, तदादौ, तथैव—आभीरी वा शाबरी भाषा। पिशाचानां वाक् पैशाची। अनीचानाम्—उत्कृष्टानाम्, उत्तममध्यमानामित्यर्थः, चेटीनामपि शौरसेनिका—शौरसेनी भाषा। बालानां षण्डकानां—वर्षवराणां, नीचानां ग्रहविचारिणां—दैवज्ञानामित्यर्थः, उन्मत्तानाम् आतुराणाञ्च सैव—शौरसेनिका एवेत्यर्थः, क्वचित् संस्कृतञ्च प्रयोज्यम्। ऐश्वर्य्येण प्रमत्तस्य, दारिद्र्येण उपस्कृतस्य—अभिभूतस्य, भिक्षूणां तथा बन्धधरादीनां—जैनबौद्धादीनां, ["भिक्षुवल्कधरादीनाम्" इति पाठान्तरे तु—भिक्षवः,—सन्न्यासिनः, याचका वा, वल्कधराः,—वानप्रस्थाः, वनमानुषा वा, आदिपदेन असभ्यान्तरस्यापि ग्रहणम्] प्राकृतं वचनं—शौरसेन्यादिद्राविडीपर्य्यन्तानामन्यतमं, महाराष्ट्रीं वेत्यर्थः, सम्प्रयोजयेत्। लिङ्गिनीषु—सन्न्यासादिचिह्नधारिणीषु, उत्तमासु—उत्कृष्टासु नारीषु च, संस्कृतं प्रयोक्तव्यम्। कैश्चित्—अन्यैराचार्य्यैः, देवीमन्त्रिसुतावेश्यासु अपि तथा—संस्कृतमित्यर्थः, उदितम्—उपदिष्टम्। नीचपात्रं—नीचं यत्पात्रं—नाटकीयपुरुष इति तथोक्तं, तु—पुनः, यद्देश्यं—यद्देशीयं, तस्य भाषितं—भाषा, तद्देश्यं—तद्देशोचितं, प्रयोक्तव्यम् इत्यर्थः। उत्तमादीनां कार्य्यतः,—कर्मानुसारेणेत्यर्थः, भाषाविपर्य्ययः,—देशानुरूपा भाषेत्यर्थः, कार्य्यः; तेन उत्तमस्य राजान्तःपुरचारित्वे मागधी, न तु संस्कृतम्; एवमन्यत्रापि। अत एवानर्घराघवादौ राजपुत्रस्यापि रामचन्द्रादेः उत्तमकार्य्यकारित्वेन संस्कृतेनैव व्यवहारो वर्णितः, न त्वर्द्धमागध्या इति सङ्क्षेपः। योषित्प्रभृतीनाम् अन्तरान्तरा—मध्ये मध्ये, तत्तद्भाषाणां मध्ये इत्यर्थः, वैदग्ध्यार्थं—वैचित्र्यार्थं, विलासितार्थं, वैदग्ध्यज्ञापनार्थं वा, संस्कृतं प्रदातव्यम्।

षट्त्रिंशल्लक्षणान्यत्र नाट्यालङ्कृतयस्तथा ।
चयस्त्रिंशत् प्रयोज्यानि वीथ्यङ्गानि त्रयोदश ॥
लास्याङ्गानि दश यथा-लाभं रसव्यपेक्षया॥४४४॥(प)

अत्रेति—नाटके। यथालाभं प्रयोज्यानीति सम्बन्धः।

तत्र लक्षणानि, (फ)—

भूषणाक्षरसङ्घातौ शोभोदाहरणं तथा ।
हेतुसंशयदृष्टान्तास्तुल्यतर्कः पदोच्चयः ॥
निदर्शनाभिप्रायौ च क्षमिर्विचार एव च ।
दिष्टोपदिष्टे च गुणातिपातातिशयौ तथा ॥
विशेषणनिरुक्तौ च सिद्धिर्भ्रंशविपर्य्ययौ ।
दाक्षिण्यानुनयौ मालाऽर्थापत्तिर्गर्हणं तथा ॥
पृच्छा प्रसिद्धिः सारूप्यं सङ्क्षेपो गुणकीर्त्तनम् ।
लेशो मनोरथोऽनुक्त-सिद्धिः प्रियवचस्तथा ॥४४५॥

तत्र,—

लक्षणानि गुणैः सालङ्कारैर्योगस्तु भूषणम्॥४४६॥(ब)

(य) भाष्यालङ्कृतीराह, षट्त्रिंशदिति।—तत्र—नाटके, लक्षणानि षट्त्रिंशत्, तथा नाट्यालङ्कृतयः त्रयस्त्रिंशत्, वीथ्यङ्गानि त्रयोदश, लास्याङ्गानि दश, यथालाभं—यथोचितं, रसव्यपेक्षया—रसानुगुण्यमपेक्ष्य, रसालङ्कृत्या वैचित्र्यं, प्रयोज्यानि। यस्मिन् रसे यदाङ्गादिकं योग्यत्व भवति, तत्तस्मिन् तथोपनिबध्नीयादिति भावः।

(फ) लक्षणान्याह, तत्रेति।—तत्र—तेषु मध्ये, लक्षणानि—वक्ष्यमाण-भूषणादीनि, षट्त्रिंशल्लक्षणानि, भवन्ति।

(ब) भूषणमाह, लक्षणानीति।—सालङ्कारैः,—सालङ्काराः,—वक्ष्यमाणाः अनुप्रासोपमादयः, तैः सहितैः, गुणैः,—माधुर्य्यौजःप्रसादैः, योगस्तु—परस्परमेलन-मेव, भूषणम्।

यथा,—

"आक्षिपन्त्यरविन्दानि मुग्धे! तव मुखश्रियम्।
कोषदण्डसमग्राणां किमेषामस्ति दुष्करम्?॥" (भ)

वर्णनाऽक्षरसङ्घातश्चित्रार्थैरक्षरैर्मितैः॥ ४४७॥ (म)

यथा शाकुन्तले,—"राजा। कच्चित् सखीं वो नातिबाधते शरीरसन्तापः? प्रियंवदा। संपदं लक्ष्मीसखो उपशमं गमिष्यदि।" (य)

**सिद्धैरर्थैः समं यत्र असिद्धोऽर्थः प्रकाशते।
श्लिष्टलक्षणचित्रार्था सा शोभेत्यभिधीयते॥४४८॥ (र)**

(भ) उदाहरति, आक्षिपन्तीति।—हे मुग्धे!—सुन्दरि! अरविन्दानि—पद्मानि, तव मुखस्य श्रियं—कान्तिम्, आक्षिपन्ति—निन्दन्ति। तथा हि,—कोषदण्डसमग्राणां,—कोषः,—बीजकोषः, धनागारश्च, दण्डः,—सैन्यानं, चतुर्थोपायश्च, तैः समग्राणां—सम्पूर्णानाम्, उक्तैश्वर्यशालिनाम् इति भावः, एषाम्—अरविन्दानां, किं दुष्करम्—असाध्यम्, अस्ति?—सर्वमेव सुकरमित्यर्थः। अत्र अरविन्दानामचेतनतया निन्दा न सम्भवतीति उपमा कल्प्यते इति असम्भवद्वस्तुसम्बन्धरूपा निदर्शना, तथा अर्थान्तरन्यासः, श्लेषश्च, एते अलङ्काराः माधुर्यप्रसादाभ्यां गुणाभ्यां सङ्कलिताः सान्यं भूषयन्तीति भूषणम्।

(म) अक्षरसङ्घातमाह, वर्णनेति।—चित्रार्थैः,—विदग्धजनमनोहरार्थसूचकैः, मितैः,—अल्पैः, अक्षरैः वर्णना—रचना, अक्षरसङ्घातः।

(य) उदाहरति, यत्रेति।—यः—युष्माकं, सखीं—शकुन्तलां, शरीरसन्तापः,—शरीरे वर्त्तमानः अरक्षतः सन्तापः, कच्चित्—स्वाभिप्रायसूचकमव्ययं, ("कच्चित् कामप्रवेदने" इत्यमरः) न बाधते—सन्तापयति। ["सान्त्वं लक्ष्मीश्च उपशमं गमिष्यति" इति संस्कृतम्]। अत्र "संपदम्" इत्यादिचित्रार्थाव्ययैः रचना।

(र) शोभामाह, सिद्धैरिति।—यत्र सिद्धैः,—साधयितुमारब्धैः, अर्थैः सम—सह, असिद्धः,—अनभिमतः, अर्थः प्रकाशते, सा श्लिष्टेन—श्लेषालङ्कृतेन, लक्षणेन, चित्रार्था—विदग्धजनोरञ्जनार्था, रचना इति श्लेषः, शोभा इति अभिधीयते—कथ्यते।

यथा,—

"सद्वंशसम्भवः शुद्धः कोटिदोऽपि गुणान्वितः।
कामं धनुरिव क्रूरो वर्जनीयः सतां प्रभुः॥" (ल)

यत्र तुल्यार्थयुक्तेन वाक्येनाभिप्रदर्शनात्।
साध्यतेऽभिमतश्चार्थस्तदुदाहरणं मतम्॥४४९॥ (व)

यथा,—

"अनुयान्त्या जनातीतं कान्तं साधु त्वया कृतम्।
का दिनश्रीर्विनाऽर्केण का निशा शशिना विना?"॥ (श)

हेतुर्वाक्यं समासोक्तमिष्टकृद्धेतुदर्शनात्॥४५०॥ (ष)

यथा वेण्यां,— "[भीमं प्रति चेटी] एवं मए भणिदं—भाणु-

(ल) उदाहरति, सद्वंशेति।—सत्—साधुः, वंशः,—अन्ववायः, अन्यत्र—वेणुविशेषः, तत्र, पक्षान्तरे,—तस्मात्, सम्भवो यस्य तादृशः; शुद्ध इति—उभयत्र समानम्; कोटिद इति—कोटिः,—सङ्ख्याविशेषः, अन्यत्र,—अग्रभागः; गुणान्वितः—गुणः,—शौर्य्यगाम्भीर्य्यादिः, अन्यत्र,—मौर्वी, तेन युक्तः, क्रूरः,—निष्ठुरः, निर्दयकार्य्यकारित्वादिति भावः, उभयत्र समानं, वक्र इति वा। अत्र साधयितुमारब्धैरन्वयादिभिः समं श्लेषेण एकदैव प्रसिद्धानभिमतवेण्वाद्यर्थप्रकाशनात् शोभा।

(व) उदाहरणमाह, यत्रेति।—यत्र तुल्यार्थयुक्तेन वाक्येन अभिप्रदर्शनात्—दृष्टान्तरूपेण प्रदर्शनात्, वक्तुरभिप्रायात् हेतोः इति यावत्, अभिमतः,—बोधयितुमिष्टः, अर्थः साध्यते—ज्ञाप्यते, प्रकाश्यते इत्यर्थः, तत् उदाहरणं मतम्।

(श) उदाहरति, अनुयान्त्येति।—सीतां प्रति लोपामुद्राया उक्तिरियम्। जनातीतम्—अलोकसामान्यं, कान्तं—श्रीराममित्यर्थः, अनुयान्त्या—अनुगच्छन्त्या, त्वया साधु कृतं—सदाचरितम्। तथा हि,—अर्केण—सूर्य्येण, विना—विरहिता इति भावः, दिनश्रीः,—दिवसशोभा, का? शशिना—चन्द्रेण, विना—विरहितेति भावः, निशा—रजनी, का? अत्र तुल्यार्थयुक्तवाक्येन पतिविहीना योषिन्न शोभते इत्येवमभिमतार्थसाधनम्। वाल्मीकीयरामायणस्यारण्यकाण्डे पद्यमिदम्।

(ष) हेतुमाह, हेतुरिति।—हेतुदर्शनात्—कारणप्रदर्शनात्, इष्टकृत्—अभिमतार्थप्रकाशकं, समासोक्तं—सङ्क्षिप्तं, वाक्यं हेतुः।

मदि! तुह्माणं अमुक्केसु केसहत्थेसु कधं अह्माणं देवीए केसा संजमीअंति त्ति"। (स)

संशयोऽज्ञाततत्त्वस्य वाक्ये स्याद्यदनिश्चयः॥४५१॥(ह)

यथा ययातिविजये, (क)—

"इयं स्वर्गाधिनाथस्य लक्ष्मीः? किं यक्षकन्यका?।
किञ्चास्य विषयस्यैव देवता? किमु पार्वती?॥" (ख)

दृष्टान्तो यस्तु पक्षार्थ-साधनाय निदर्शनम्॥४५२॥(ग)

यथा वेण्यां,—"सहदेवः। आर्य्य! उचितमेवैतत् तस्याः, यतो दुर्य्योधनकलत्रं हि सा" इत्यादि। (घ)

तुल्यतर्को यदर्थेन तर्कः प्रकृतगामिना॥४५३॥ (ङ)

(स) उदाहरति, यथेति।—एवमिति।—["एवं मया भणितम्,—भानुमति! युष्माकम् अमुक्तेषु केशहस्तेषु कथमस्माकं देव्याः केशाः संयम्यन्ते?" इति संस्कृतम्]। केशहस्तेषु—केशपाशेषु। अत्र देव्याः केशासंयमनस्य हेतुः भानुमत्याः केशसंयमः, तत्प्रदर्शनेन दुर्य्योधनवधे सत्येव देव्याः केशसंयमनं भविष्यतीत्येवमभिमतार्थः प्रकाशते।

(ह) संशयमाह, संशय इति।—अज्ञाततत्त्वस्य—विशेषमजानतो जनस्येत्यर्थः, वाक्ये यत् [यदित्यव्ययं य इत्यर्थे] अनिश्चयः,—अनिर्द्धारणं, स संशयः स्यात्।

(क) उदाहरति, यथेति।—ययातिविजये—राजानकमम्मटभट्टरचिते नाटकविशेषे।

(ख) इयमिति।—देवयानीं कूपे दृष्टवतो राज्ञ उक्तिरियम्। इयं—देवयानी, स्वर्गाधिनाथस्य—इन्द्रस्य, लक्ष्मीः?—सम्पत्तिः? किमिति शेषः। किं च—किं वा, विषयस्य—देशस्य। किमु—उत, वेति भावः। अत्र नायिकायां ययातेरनिश्चयः।

(ग) दृष्टान्तमाह, दृष्टान्त इति।—पक्षे अर्थस्य—साध्यस्य, साधनाय—ज्ञापनाय, यः,—यदित्यर्थः, निदर्शनं—हेतुप्रदर्शनं, स दृष्टान्तः।

(घ) उदाहरति, यथेति।—तस्याः,—भानुमत्याः। सा—भानुमती। अत्र द्रौपद्यां भानुमतीकर्त्तृकः परिहासः दुर्य्योधनकलत्रसम्बन्धित्वेन निदर्शित इति बोध्यम्।

(ङ) तुल्यतर्कमाह, तुल्यतर्क इति।—प्रकृतगामिना—प्रस्तुतानुसारिणा,

यथा तत्रैव,—

"प्रायेणैव हि दृश्यन्ते कामं स्वप्नाः शुभाशुभाः।
शतसङ्ख्या पुनरियं सानुजं स्पृशतीव माम्॥" (च)

सञ्चयोऽर्थानुरूपो यः पदानां स पदोच्चयः॥४५४॥(छ)

यथा शाकुन्तले,—

"अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम्॥" (ज)

अत्र पदपदार्थयोः सौकुमार्य्यं सदृशमेव।

प्रकृतेनेति यावत्, न तु प्रकृतिविपर्य्यासरूपेण अद्भुतेनेत्यर्थः, अर्थेन—वस्तुना, यत्—यः, [इदमव्ययं] तर्कः,—भाव्यर्थस्य सूचनं, स तुल्यतर्कः।

(च) उदाहरति, यथेति।—प्रायेणेति।—कामम्—अकामम्, अनभिमतरूपमिति यावत्, अथवा,—कामं—यथेष्टमित्यर्थः, ("अकामानुमतौ कामम्" इति कोषः) शुभाः,—मङ्गलोदर्काः, कदाचिदिति शेषः, अशुभाः,—अनिष्टोदर्काः वा, कदाचिदिति शेषः, स्वप्नाः प्रायेण दृश्यन्ते, जनैरिति शेषः। इयं—स्वप्नावस्थायां भानुमत्या दृष्टेन नकुलेन हन्यमानाहिसम्बन्धिनी इत्यर्थः, शतसङ्ख्या सानुजं मां स्पृशति—विषयीकरोति इव, तेषामिव अस्माकमपि शतसङ्ख्यावत्त्वादित्यर्थः; एतेन दुर्य्योधनादीनां शतभ्रातॄणां भाविनिधनरूपार्थस्य सूचनम्। अत्र तु शतसङ्ख्यायाः सादृश्यम् आत्मनि सम्भावना तुल्यतर्क इति। पथ्यावक्त्रं वृत्तम्।

(छ) पदोच्चयमाह, सञ्चय इति।—पदानाम् अर्थानुरूपः,—अभिधेयसदृशः, यः सञ्चयः,—समूहः, स पदोच्चयः। अर्थानुरूपः इत्यनेन सुकुमारार्थे सुकुमारार्थसूचकपदप्रयोगः, उद्भटार्थे तत्सूचकपदप्रयोग इति बोध्यम्।

(ज) उदाहरति, अधर इति।—अधरः,—अधरोष्ठः, किसलयस्येव रागः,—लौहित्यं यस्य तथाभूतः, बाहू, कोमलविटपौ—मृदुस्कन्धोर्द्धशाखे, तदनुकारिणौ—तत्सदृशौ, ("स्कन्धादूर्द्धं तरोः शाखा कटपो विटपो मतः" इति कात्यः) अङ्गेषु—अवयवेषु, सन्नद्धं—कृतसन्नाहम्, अत्युत्कटमिति यावत्, [प्रकृते बाधितमुख्यार्थः सन्नद्धशब्दः, सन्नद्धम् उत्साहान्वितो भवति इति अन्वितत्वसम्बन्धेन यौवनं लक्षयंस्तद्गतमातिशय्यं व्यञ्जयति] यौवनं—तारुण्यं, कुसुममिव लोभनीयं—चित्ताकर्षकं, द्रष्टॄणामिति भावः। आर्य्या वृत्तम्। अत्र तु प्रस्तुतार्थानाम् अधरादीनां तत्सदृशपल्लवादिभिः

यत्रार्थानां प्रसिद्धानां क्रियते परिकीर्त्तनम्।
परपक्षव्युदासार्थं तन्निदर्शनमुच्यते ॥ ४५५ ॥ (झ)

यथा,—"क्षात्रधर्मोचितैर्धर्मैरलं शत्रुवधे नृपाः!।
किन्तु वालिनि रामेण मुक्तो बाणः पराङ्मुखे॥" (ञ)

अभिप्रायस्तु सादृश्यादद्भुतार्थस्य कल्पना॥४५६॥ (ट)

यथा शाकुन्तले,—"इदं किलाव्याजमनोहरं वपु-
स्तपःक्लमं साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया
शमीलतां छेत्तुमृषिर्व्यवस्यति॥" (ठ)

पदसञ्चयैरुपमानं पदोच्चयः। यथा वा,—"प्रागप्राप्तनिशुम्भशाम्भवधनुर्द्वेधाविधाऽऽविर्भवत्क्रोधप्रेरितभीमभार्गवभुजस्तम्भापविद्धः क्षणात्। उज्ज्वालः परशुर्भवत्वशिथिलस्त्वत्कण्ठपीठातिथिर्येनानेन जगत्सु खण्डपरशुर्देवो हरः ख्याप्यते॥" अत्र शब्दार्थयोरुद्भटत्वं सदृशम्।

(झ) निदर्शनमाह, यत्रार्थानामिति।—परपक्षः,—परमतं, तस्य व्युदासार्थं—निराकरणार्थं, यत्र प्रसिद्धानाम् अर्थानां—सत्यरूपविषयाणां, परिकीर्त्तनं क्रियते, तत् निदर्शनम्।

(ञ) उदाहरति, क्षात्रेति।—हे नृपाः! क्षत्र एवेति क्षात्रः, तस्य क्षात्रस्य धर्मः,—स्वभावः, तस्य उचिताः,—योग्याः तैः, धर्मैः,—"शौर्य्यं तेजो धृतिर्दाढ्यं युद्धे चाप्यपलायनम्। दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम्॥" इत्यादिना प्रदर्शितैः कर्मविशेषैः, अलं—समर्थाः, ("अलं व्यर्थसमर्थयोः" इत्यमरः) किन्तु [इति यथेत्यर्थे अव्ययः] मुक्तः,—त्यक्तः, पराङ्मुखे—अन्यासक्ते। अत्र क्षत्रियधर्मरूपस्य परपक्षस्य निराकरणाय प्रसिद्धस्य रामकर्त्तृकवालिहननरूपस्य अर्थस्य कीर्त्तनम्।

(ट) अभिप्रायमाह, अभिप्राय इति।—सादृश्यात्—साम्यात्, अद्भुतस्य—असम्भाविनः, ["अभूतार्थस्य" इति पाठे,—स एवार्थः] अर्थस्य—वस्तुनः, कल्पना अभिप्रायः।

(ठ) उदाहरति, इदमिति।—यः अव्याजमनोहरं—स्वभावमनोरमम्, अकृत्रिममनोरञ्जनम् इति यावत्, इदं—पुरो दृश्यमानमनुपमं, वपुः,—शकुन्तलाशरीरमित्यर्थः, तपःक्लमं—तपश्चरणक्लेशसहं, साधयितुं—कर्त्तुम्, इच्छति, सः ऋषिः,

ज्ञप्तिः केनचिदंशेन किञ्चिद् यत्रानुमीयते॥४५७॥(ङ)

यथा मम प्रभावत्याम्,—"अनेन खलु सर्वतश्चरता चञ्चरीकेणावश्यं विदिता भविष्यति प्रियतमा मे प्रभावती।" (ढ)

विचारो युक्तवाक्यैर्यदप्रत्यक्षार्थसाधनम् ॥४५८॥(ण)

यथा मम चन्द्रकलायाम्;—"राजा। नूनमियमन्तःपिहितमदनविकारा वर्त्तते। यतः,—

हसति परितोषरहितं निरीक्ष्यमाणाऽपि नेक्षते किञ्चित्।
सख्यामुदाहरन्त्यामसमञ्जसमुत्तरं दत्ते॥" (त)

—कण्वः इत्यर्थः, ध्रुवं—निश्चितं, नीलोत्पलपत्रधारया—नीलकमलपत्राग्रभागेन, शमीलतां—शम्याख्य तरुमित्यर्थः, (उपमेये शकुन्तलावपुषि कोमलत्वसौभाग्यवत्त्वादिसाधारणधर्मसद्भावसूचनार्थं तरुपदोपादाने लिङ्गव्यत्ययेन अनौचित्यदोषप्रसङ्गाच्च शम्यां लतात्वारोप इति भाष्यम्) छेत्तुं—द्विधाकर्त्तुं, व्यवस्यति—उद्युङ्क्ते, इच्छतीत्यर्थः। अत्र नीलोत्पलपत्रधारया शमीलताच्छेदनमिव शकुन्तलाशरीरेण तपश्चरणं न सम्भवति। अनेन च शमीलतासादृश्योद्भावनात् अभिप्रायनामकं नाटकलक्षणमुपन्यस्तम्। अत्र निदर्शनाऽलङ्कारः। वंशस्थविलं वृत्तम्।

(ङ) ज्ञप्तिमाह, ज्ञप्तिरिति।—केनचित् अंशेन—प्रकारेण, विशेषणेनेत्यर्थः, यत्र किञ्चित् अनुमीयते—ज्ञाप्यते, सा ज्ञप्तिः।

(ढ) उदाहरति, यथेति।—चञ्चरीकेण—भ्रमरेण। अत्र सर्वतश्चरता इति विशेषणरूपेण अंशेन भ्रमरस्य स्वप्रियतमाज्ञानानुमानं नायकेन क्रियते।

(ण) विचारमाह, विचार इति।—युक्तैः—युक्तियुक्तैः, हेतुबोधकैरित्यर्थः, वाक्यैः,—वचनैः, यत् अप्रत्यक्षस्य—अदृष्टस्य, अर्थस्य साधनं—ज्ञापनं, स विचारः।

(त) उदाहरति, हसतीति।—परितोषरहितम्—असन्तोषं यथा तथा, हसति, निरीक्ष्यमाणाऽपि किञ्चित् न ईक्षते—न पश्यति, तथा सख्यां—वयस्यायाम्, उदाहरन्त्याम्—आलपन्त्याम्, असमञ्जसम्—अयोग्यम्, उत्तरं दत्ते—ददाति। अत्र अपरितोषहासादिरूपैर्हेतुमद्वचनैः अप्रत्यक्षस्य मनोविकारस्य साधनम्। अयं भावः,—चन्द्रकलाऽन्तर्मदनविकारेति साध्यम्, अपरितोषहासादिमत्त्वादिति हेतुः, तथा च यत्र यत्र अपरितोषहासादिमत्त्वं, तत्र तत्रान्तर्मदनादिविकारत्वमिति युक्तिरन्तर्मदनादिविकारसाधिकेति।

देशकालस्वरूपेण वर्णना दिष्टमुच्यते ॥ ४५९ ॥ (थ)

यथा वेण्यां,—"सहदेवः,—

यद् वैद्युतमिव ज्योतिरार्ये कृष्णेऽद्य सम्भृतम्।
तत्प्रावृडिव कृष्णेयं नूनं संवर्धयिष्यति ॥" (द)

उपदिष्टं मनोहारि वाक्यं शास्त्रानुसारतः ॥४६०॥(ध)

यथा शाकुन्तले,—

"शुश्रूषस्व गुरून्, कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृताऽपि रोषणतया मा स्म प्रतीपं गमः।
भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी,
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥" (न)

(थ) दिष्टमाह, देशेति।—देशकालस्वरूपेण—देशकालयोः साधर्म्येण, वर्णना—रचना, दिष्टम् उच्यते।

(द) उदाहरति, यदिति।—अद्य कृष्णे आर्ये—भीमसेने इति भावः, वैद्युतमिव—ताडितमिव, यत् ज्योतिः,—तेजः, सम्भृतं—समुत्थितं, तत् इयं कृष्णा—द्रौपदी, प्रावृट्—वर्षाऋतुः इव, नूनं—निश्चितं, संवर्धयिष्यति। अत्र देशकालानुरूपवर्णनम्।

(ध) उपदिष्टमाह, उपदिष्टमिति।—शास्त्रानुसारतः,—यथाशास्त्रं, मनोहारि—मनोरञ्जनकृत्, वाक्यम् उपदिष्टम्—उपदेशवचनमित्यर्थः।

(न) उदाहरति, शुश्रूषस्वेति।—पतिगेहं गच्छन्तीं शकुन्तलां प्रति कण्वशिष्यैरेषोऽयम्। गुरून्—पूज्यान् जनान्, शुश्रूषस्व—शुश्रूषुरादीनिति यावत्, शुश्रूषस्व; सपत्नीजने प्रियसखीवृत्तिं—प्रियसखीव्यवहारं, कुरु; विप्रकृताऽपि—अपमानिताऽपि, भर्तरि प्रेयः, रोषणतया—क्रोधनतया, भर्तुः प्रतीपं—प्रतिकूलभावमित्यर्थः, मा स्म गमः,—न गच्छ, प्रतिकूलवर्त्तिनी मा भवेत्यर्थः, परिजने—दासीवर्गे, भूयिष्ठम्—अत्यर्थं, दक्षिणा—सरला, भव; तथा भोगेषु—सुखसम्पदां साधनेषु इत्यर्थः, अनुत्सेकिनी—अगर्विणी, भवेति शेषः; अथवा,—भोगेषु—विषयजनसुखेषु, अनुत्सेकिनी—उत्साहाभाववती, अगर्विता वा सती, परिजने दक्षिणा भव इति पूर्वेणान्वयः। एवम्—इत्थम् अनुष्ठिते सति, युवतयः,—तरुण्यः, न केवलं त्वम्, अपि तु स्त्रीजनाः इति भावः, गृहिणीपदं—"गृहिणी" इति अधिकारं, यान्ति—लभन्ते; वामाः,—

गुणातिपातः कार्य्यं यत् विपरीतं गुणान् प्रति ॥४६१॥ (प)

यथा मम चन्द्रकलायां,—[चन्द्रं प्रति],—

"जइ संहरिज्जइ तमो घेय्यई सअलेहिं ते पाओ ।
वससि सिरे पसुवइणो तहवि हा !! इत्थीअजीअणं हरसि ॥"(फ)

यः सामान्यगुणोद्रेकः स गुणातिशयो मतः॥४६२॥(ब)

यथा तत्रैव,—"राजा । [चन्द्रकलाया मुखं निर्दिश्य],—

असावन्तश्चञ्चद्विकचनवनीलाब्जयुगल-
स्तलस्फूर्जत्कम्बुर्विलसदलिसङ्घात उपरि ।
विना दोषासङ्गं सततपरिपूर्णाखिलकलः
कुतः प्राप्तश्चन्द्रो विगलितकलङ्कः सुमुखि ! ते ? ॥" (भ)

एतत्प्रतिकूलवर्त्तिन्य इत्यर्थः, कुलस्य—पितृश्वशुरवंशयोः इत्यर्थः, आधयः,—मनस्ताप-कारिण्यः, मनःपीड़ा इव इत्यर्थः, भवन्तीति शेषः । इह सङ्क्षेपेण वात्स्यायनकथितमेक-चारिणीवृत्तं सङ्कलितं कालिदासेन । एतेन हि स्वामिसकाशावस्थानरूपशुभसम्भावनया मनोहारिवाक्येन शास्त्रानुसारतः प्रयोजनम् उपदिष्टमिति । अत्र गुरुशुश्रूषादिकं शास्त्रानुसारि मनोहारि वचनम् । शार्दूलविक्रीड़ितं वृत्तम् ।

(प) गुणातिपातमाह, गुणातिपात इति ।—गुणान् प्रति यत् विपरीतं कार्य्यं —गुणविरोधिकार्य्यमित्यर्थः, स गुणातिपातः ।

(फ) उदाहरति,जइ इति ।—["यदि संह्रियते तमो गृह्यते सकलैस्ते पादः । वससि शिरसि पशुपतेस्तथाऽपि हा !! स्त्रीजीवनं हरसि ॥" इति संस्कृतम्] । अत्र चन्द्रस्य तमोहरणादिगुणानां विपरीतं स्त्रीजनजीवनहरणम् ।

(ब) गुणातिशयमाह, य इति ।—यः सामान्यगुणेभ्यः,—उपमानोपमेयवृत्ति-साधारणधर्मेभ्यः, उद्रेकः,—आधिक्यम्, उपमेयस्येति शेषः, स गुणातिशयः मतः,—कथितः ।

(भ) उदाहरति, असाविति ।—हे सुमुखि ! ते—त्वया, अन्तः,—अभ्यन्तरे, चञ्चत्—स्फुरत्, विकचं—विकसितं, नवनीलाब्जयुगलं—नीलकमलद्वयं यस्य तादृशः, तले—अधोभागे, स्फूर्जन्—विकसन्, कम्बुः,—शङ्खः, कण्ठरूप इति भावः, यस्य तथाविधः, उपरि—तदूर्द्ध्वदेशे, विलसन्तः—विचरन्तः, अलीनां—भ्रमराणां, सङ्घाताः,—समूहाः यस्य तथाभूतः, सततं—निरन्तरं, पौर्णमासीव्यतिरिक्तेऽपि

अर्थान् सिद्धान् बहूनुक्त्वा विशेषोक्तिर्विशेषणम् ॥४६३॥ (म)

यथा,—"तृष्णाऽपहारी विमलो द्विजावासो जनप्रियः।
ह्रदः पद्माकरः किन्तु बुधस्त्वं, स जड़ाशयः॥" (य)

पूर्वसिद्धार्थकथनं निरुक्तिरिति कीर्त्त्यते ॥४६४॥ (र)

काले इत्यर्थः, परिपूर्णाः अखिलाः,—समग्राः, कलाः,—कलाशास्त्राणि, षोड़श-भागश्च यस्य तथोक्तः, विगलितकलङ्कः,—निष्कलङ्कः, असौ चन्द्रः,—मुखचन्द्र इति भावः, दोषासङ्गं विना—दोषरहित इत्यर्थः, अथ च दोषा—रात्रिः, ("दोषा रात्रौ भुजेऽपि च" इति मेदिनी) तस्याः सङ्गं—सम्पर्कं, विना—रात्रिमन्तरेणेत्यर्थः, कुतः,—कस्मात्, प्राप्तः? अत्र कलाशब्देन चतुःषष्टिविद्याया अपि गम्यमानत्वात् दोषाणामासङ्गं विना सकलविद्यालाभः असम्भव इति ध्वनिः। इह आह्लादकत्वादि-साधारणधर्मेभ्यः नीलाब्जयुगलादिसम्बन्धात् उपमेयस्य मुखस्य चन्द्रादाधिक्यम्; चन्द्रे तु नीलाब्जादिसम्बन्धाभावान्न आधिक्यमिति बोध्यम्।

(म) विशेषणमाह, अर्थानिति।—सिद्धान्—प्रसिद्धान्, बहून् अर्थान् उक्त्वा विशेषेण उक्तिः,—भेदकथनमित्यर्थः, विशेषणं—विशिष्यते—विभिद्यतेऽनेनेति तथोक्तम्। [करणे ल्युट्]।

(य) उदाहरति, तृष्णेति।—विद्वांसं धनिनं प्रति उक्तिरियम्। ह्रदः त्वञ्च, तुल्य इति शेषः; तथा हि,—तृष्णा—जलपानेच्छा, धनाशा च; ("तृष्णा स्यात्तर्षलिप्सयोः" इति मेदिनी) तस्याः अपहारी—नाशकः, जलदानेन धनदानेन च इति भावः, विमलः,—स्वच्छः, निर्दोषश्च; द्विजावासः,—द्विजानां—पक्षिणां, जलचराणां हंसादीनामिति यावत्, ब्राह्मणानाञ्च; ("द्विजः पक्षिद्विजन्मनोः" इति गोपालः) आवासः,—आश्रयः, जनानां प्रियः,—सन्तोषकरः, पद्माकरः,—पद्मानां—कमलानाम्, आकरः,—उत्पत्तिस्थानं, पद्मायाः,—लक्ष्म्याः, ("लक्ष्मीः पद्मालया पद्मा" इत्यमरः) आकरः,—आवासः, धनवानित्यर्थश्च, किन्तु त्वं बुधः,—विद्वान्, सः,—ह्रदः, जड़ाशयः,—जड़स्य—जलस्य, जाड्यगुणस्य च, [डलयोः सावर्ण्यमङ्गी-कृत्येदमुक्तम्] आशयः,—स्थानम्। ["जलाशयः" इति पाठेऽपि स एवार्थः] अत्र बहून् समानधर्मानुक्त्वा बुधत्वजड़ाशयत्वाभ्याम् अन्त्यपादे भेदकथनम्। व्यतिरेका-लङ्कारोऽयम्।

(र) निरुक्तिमाह, पूर्वेति।—पूर्वसिद्धानां—पूर्वं निष्पन्नानां, पूर्वं कृतानां,

यथा वेण्याम् ;—

"निहताशेषकौरव्यः क्षीबो दुःशासनासृजा।
भङ्क्ता दुर्य्योधनस्योर्वोर्भीमोऽयं शिरसा नतः॥" (ल)

बहूनां कीर्त्तनं सिद्धिरभिप्रेतार्थसिद्धये ॥४६५॥ (व)

यथा,—"यद्वीर्य्यं कूर्मराजस्य यश्च शेषस्य विक्रमः।
पृथिव्या रक्षणे राजन्! एकत्र त्वयि तत् स्थितम्॥"(श)

दृप्तादीनां भवेद्भ्रंशो वाच्यादन्यतरद्वचः ॥४६६॥ (ष)

जातानां वेति यावत्, अर्थानां—कार्य्याणां, कथनं—पुनः प्रतिपादनं, निरुक्तिरिति कीर्त्त्यते।

(ल) उदाहरति, निहतेति।—धृतराष्ट्रं प्रति भीमस्योक्तिरियम्। निहताः,—विनाशिताः, अशेषाः,—समग्राः, कौरव्याः,—कौरवाणाम् इमे इति तथोक्ताः, कुरुपक्षीययोधा इत्यर्थः, येन सः, दुःशासनस्य असृजा—शोणितेन, वक्षोरक्तपानेन इत्यर्थः, क्षीबः,—मत्तः, उन्मत्त इत्यर्थः, दुर्य्योधनस्य ऊर्वोः,—ऊरुयुगस्य, भङ्क्ता—भाविभञ्जनकारी, [भविष्यदर्थे तृन्] अयम्—उपस्थितः भीमः, शिरसा नतः,—प्रणतः, भवन्तमिति शेषः। ["शिरसाऽञ्चति" इति पाठे—अञ्चति—पूजयति, शिरोनमनपूर्वकं प्रणमतीत्यर्थः]। अत्र पूर्वं कृतस्य कौरव्यादिहननरूपस्य कार्य्यस्य निर्वचनात् निरुक्तिरिति बोध्यम्।

(व) सिद्धिमाह, बहूनामिति।—अभिप्रेतस्य—इष्टस्य, अर्थस्य—कार्य्यस्य, सिद्धये—निष्पत्तये, बोधनायेत्यर्थः, (एकमधिकृत्य) बहूनाम् (एतदनेकोपलक्षणं, तेन नोक्तोदाहरणासङ्ग्रहः) कीर्त्तनं—गुणकथनमित्यर्थः, सिद्धिः।

(श) उदाहरति, यदिति।—हे राजन्! कूर्मराजस्य—कूर्मावतारस्य विष्णोः, यत् वीर्य्यं—बलं, यश्च शेषस्य—अनन्तस्य, विक्रमः,—वीर्य्यमित्यर्थः, तत्—उभयोः कूर्मशेषयोः सामर्थ्यं, पृथिव्याः रक्षणे—पालनविषये, एकत्र—एकस्मिन्, त्वयि स्थितम्। अत्र अभिप्रेतस्य राज्ञः पृथ्वीपालनभारसहिष्णुतातिशयबोधनाय तदुभयकीर्त्तनम्।

(ष) भ्रंशमाह, दृप्तादीनामिति।—दृप्तादीनाम्—[आदिपदेन हृष्टदुःखितादेर्ग्रहणम्] अहङ्कृतहृष्टदुःखितादीनामित्यर्थः, वाच्यात्—विवक्षितादित्यर्थः, अन्यतरत्—भिन्नं, विपरीतमिति यावत्, वचः भ्रंशः भवेत्।

यथा वेण्यां,—"दुर्योधनः। [भीमसेनं प्रति],—

सहभृत्यगणं सबान्धवं सहमित्रं ससुतं सहानुजम्।
खबलेन निहन्ति संयुगे न चिरात्पाण्डुसुतः सुयोधनम्॥ (ङ)

विचारस्यान्यथाभावः सन्देहात्तु विपर्य्ययः॥४६७॥(घ)

यथा,—"मत्वा लोकमदातारं सन्तोषे यैः स्थिता मतिः।
त्वयि राजनि ते राजन्! न तथा व्यवसायिनः॥" (क)

दाक्षिण्यं चेष्टया वाचा परचित्तानुवर्त्तनम्॥४६८॥(ङ)

(ङ) उदाहरति, सहभृत्यगणमिति।—सहभृत्यगणं—भृत्यगणैः,—अनुचरजनैः सह वर्त्तमानमित्यर्थः, सबान्धवं—बान्धवैः,—अनुजव्यतिरिक्तैः ज्ञातिभिः सह वर्त्तमानं, सहमित्रं—मित्रैः सह वर्त्तमानं, ससुतं—सपुत्रं, सहानुजं—कनिष्ठभ्रातृभिः सहितं, सुयोधनं—दुर्योधनं, पाण्डुसुतः,—भीमसेनः, खबलेन—स्वपराक्रमेण, न चिरात्—अविलम्बेन, संयुगे—सङ्ग्रामे, निहन्ति—विनाशयति। अत्र "चिरादपि न हन्ति" इति विवक्षितम्; किन्तु न चिरात् हन्तीति खबलेन भंग्राख्यं लाटवाक्यं बोध्यमिति। सुन्दरी प्राह,—"विषमे ससजा गुरुः समे सभरा लघौ यदि सुन्दरी तदा" इति सचयात्।

(घ) विपर्य्ययमाह, विचारस्येति।—सन्देहात्—संशयात्, विचारस्य—तत्त्वनिर्णयस्य, अन्यथाभावः,—विपरीततया ग्रहणं, स्वरूपज्ञान्यथाकरणमित्यर्थः, विपर्य्ययः,—तन्नामकालङ्कारविशेषः।

(ङ) उदाहरति, मत्वेति।—लोकं—जगतीलोकम्, अदातारम्—अवदान्यं, मत्वा—विचार्य, ये: सन्तोषे—धनहृताऽपमानजन्यसुखे, मतिः,—विचारः, स्थिता—स्थापिता इत्यर्थः, सन्तुष्टेरेव स्थिरं, न कुत्रापि याचितुं मतमिति भावः; हे राजन्! त्वयि राजनि—नृपे सति, ते तथा व्यवसायिनः,—ताहशाचारवन्तः, अदातृत्वनिश्चयवन्त इत्यर्थः, न, भवन्तीति शेषः, सन्तोषजनयत्वञ्च न निष्ठतीति भावः। अत्र पूर्वं दातृत्वाभावस्य निश्चयो जातः, इदानीं त्वयि रात्रि तन्निश्चयाभाव एव विचारस्य अन्यथाभावः इति बोध्यम्।

(ङ) दाक्षिण्यमाह, दाक्षिण्यमिति।—चेष्टया—शारीरव्यापारेण, वाचा—वचनेन च, परचित्तस्य—अन्यलोकस्य मनसः, अनुवर्त्तनम्—अनुसरणम्, अनुरञ्जनमित्यर्थः, दाक्षिण्यम्।

वाचा यथा,—

"प्रसाधय पुरीं लङ्कां राजा त्वं हि विभीषण !।
आर्य्येणानुगृहीतस्य न विघ्नः सिद्धिमन्तरा ॥" (ग)

एवं चेष्टयाऽपि। (घ)

वाक्यैः स्निग्धैरनुनयो भवेदर्थस्य साधनम्॥४६९॥ (ङ)

यथा वेण्याम् ;—"कृपः। [अश्वत्थामानं प्रति],—दिव्यास्त्रग्राम-कोविदे भारद्वाजतुल्यपराक्रमे किं न सम्भाव्यते त्वयि ?" (च)

माला स्याद् यदभीष्टार्थं नैकार्थप्रतिपादनम्॥४७०॥ (छ)

यथा शाकुन्तले,—"राजा।—

किं शीकरैः क्लमविमर्दिभिरार्द्रवातं
सञ्चालयामि नलिनीदलतालवृन्तम् ?।
अङ्के निधाय चरणावुत पद्मताम्रौ
संवाहयामि करभोरु ! यथासुखं ते ?॥" (ज)

(ग) उदाहरति, प्रसाधयेति।—विभीषणं प्रति लक्ष्मणस्योक्तिः। हे विभीषण ! लङ्कां पुरीं प्रसाधय—अलङ्कुरु, हि—यतः, त्वं राजा, इदानीमिति शेषः, आर्य्येण—श्रीरामेण, अनुगृहीतस्य, जनस्य इति शेषः, सिद्धिं—फलनिष्पत्तिम्, अन्तरा—विना, मध्ये वा, न विघ्नः, स्यादिति शेषः। अत्र वाचा विभीषणचित्तानुवर्त्तनं दाक्षिण्यम्।

(घ) चेष्टया यथा शाकुन्तले,—"तदहमेनामनृणां करोमि [इत्यङ्गुलीयकं ददाति]"। अत्राङ्गुलीयदानरूपया चेष्टया शकुन्तलाचित्तप्रीणनं दाक्षिण्यम्।

(ङ) अनुनयमाह, वाक्यैरिति।—स्निग्धैः,—स्नेहयुक्तैः, वाक्यैः अर्थस्य—कार्य्यस्य, प्रयोजनस्येत्यर्थः, साधनं—करणम्, अनुनयः भवेत्।

(च) उदाहरति, दिव्येति।—दिव्यास्त्राणां ग्रामः,—समूहः, तस्मिन् कोविदः,—विचक्षणः तस्मिन् ; भारद्वाजः,—भरद्वाजस्य अपत्यं पुमान्, द्रोण इत्यर्थः, तस्य तुल्यः पराक्रमः यस्य तादृशे। अत्र स्निग्धवाक्येन अश्वत्थाम्नः सन्तोषरूपस्य कार्य्यस्य साधनम्।

(छ) मालामाह, मालेति।—अभीष्टार्थं—स्वाभीष्टसिद्धये इत्यर्थः, यत् नैकार्थ-प्रतिपादनम्—अनेककार्य्यस्य ज्ञापनं, सा माला स्यात्।

(ज) उदाहरति, किमिति।—हे करभोरु !—करभवत्—करस्य बाह्यभागवत्,

अर्थापत्तिर्यदन्यार्थोऽर्थान्तरोक्तेः प्रतीयते ॥४७१॥ (झ)

यथा वेण्याम् ;—"राजा। [द्रोणोऽश्वत्थामानं राज्येऽभिषेक्तुमिच्छतीति कथयन्तं कर्णं प्रति],—साधु अङ्गराज! साधु। कथमन्यथा,—

दत्त्वाऽभयं सोऽतिरथो बध्यमानं किरीटिना।
सिन्धुराजमुपेक्षेत नैवं चेत् कथमन्यथा ? ॥" (ञ)

दूषणोद्घोषणायां तु भर्त्सना गर्हणं तु तत्॥४७२॥(ट)

("करस्य करभो बहिः" इत्यमरः) ऊरू यस्याः तत्सम्बुद्धौ तथोक्ते ["ऊरूत्तरपदादौपम्ये" (४।१।६९ पा०) इत्यूङ्] क्लमविमर्दिभिः,—श्रान्तिहरैः, शीकरैः,—अम्बुकणैः, आर्द्रः,—सिक्तः, शीतल इत्यर्थः, वातो यस्य तादृशं, नलिन्याः,—कमलिन्याः, दलं—पत्रं, तदेव तालवृन्तं—व्यजनम् इति तथोक्तं, ("व्यजनं तालवृन्तकम्" इत्यमरः) किं सञ्चालयामि ?—मन्दं मन्दं चालयामीति भावः ; ["वृन्तैः" इति पाठे,—शीकरैः सह नलिनीदलतालवृन्तैः आर्द्रवातं सञ्चालयामि ?—स्मरतप्तशरीरं प्रीणयामि ? इत्यन्वयोऽवगन्तव्यः] उत—अथवा, पद्मताम्रौ—पद्मे इव ताम्रौ—आरक्तौ, ते—तव, चरणौ अङ्के—क्रोडे, निधाय—निवेश्य, यथासुखं संवाहयामि ?—मन्दविमर्दनेन खेदम् अपनयामि ? अत्र अभीष्टस्य शकुन्तलापरितोषस्य (सुखसाधकस्येत्यर्थः) साधनाय वातसञ्चालनादीनामनेकार्थानां प्रतिपादनम्। वसन्ततिलकं वृत्तम्।

(झ) अर्थापत्तिमाह, अर्थापत्तिरिति।—अर्थान्तरस्य उक्तेः हेतोः यत्—य इत्यर्थः, अन्यार्थः प्रतीयते, सा अर्थापत्तिः।

(ञ) उदाहरति, दत्त्वाऽभयमिति।—अतिरथः [अनेन विशेषणेन तस्य सामर्थ्येऽपि उपेक्षा अभिसन्धिसूचिकेति बोध्यम्] सः,—द्रोणः, अभयं—पूर्वेद्युः "मा त्वाम् अर्जुनो वधीत्" इत्येवंरूपमिति यावत्, दत्त्वा किरीटिना—अर्जुनेन, बध्यमानं—हन्यमानं, सिन्धुराजं—जयद्रथम्, उपेक्षेत ; एवं—त्वदुक्तप्रकाराश्वत्थामाभिषेकरूपाभिसन्धिः, चेत्—यदि, न, स्यादिति शेषः, तर्हि अन्यथा—जयद्रथरक्षणरूपप्रतिज्ञापालने औदासीन्यं, कथम् ?—किमर्थम् ? न किमपि उपेक्षणे हेतुरित्यर्थः। अत्र सिन्धुराजोपेक्षारूपार्थान्तरप्रकटनेन द्रोणस्य स्वपुत्राभिषेकाभिप्रायः प्रतीयते।

(ट) गर्हणमाह, दूषणेति।—दूषणस्य उद्घोषणायां, कृतायामिति शेषः, या भर्त्सना, तत् गर्हणम्।

यथा तत्रैव,—"अश्वत्थामा। [कर्णं प्रति],—

निर्वीर्य्यं गुरुशापभाषितवशात् किं मे तवेवायुधम् ?
सम्प्रत्येव भयाद्विहाय समरं प्राप्तोऽस्मि किं त्वं यथा ?।
जातोऽहं स्तुतिवंशकीर्त्तनविदां किं सारथीनां कुले ?
क्षुद्रारातिकृताप्रियं प्रतिकरोम्यस्रेण नास्त्रेण किम् ?॥" (ठ)

अभ्यर्थनापरैर्वाक्यैः पृच्छाऽर्थान्वेषणं मतम्॥४७३॥(ड)

यथा तत्रैव,—"सुन्दरकः। अज्जा ! अज्ज अवि णाम सारहि-दुइओ दिट्ठो तुह्मेहिं महाराओ दुज्जोधणो ण वेत्ति ?" (ढ)

(ठ) उदाहरति, निर्वीर्य्यमिति।—गुरोः,—परशुरामस्य, शापभाषितवशात्—शापोक्त्या, तव आयुधम् इव मे, आयुधमिति शेषः, किं निर्वीर्य्यम् ?—अकिञ्चित्करम् ? त्वं यथा भयात् समरं विहाय अत्रागतः, तथा इति शेषः, सम्प्रत्येव—अधुनैव, भयात् समरं विहाय—त्यक्त्वा, प्राप्तोऽस्मि—आगतोऽहं, किम् ? स्तुतिवंशकीर्त्तनविदां—स्तुत्यै—राज्ञां स्तवाय, मनोरञ्जनायेति यावत्, यत् वंशकीर्त्तनं—राज्ञां पूर्वपुरुषाणां नाम-गुणाद्युद्घोषणं, तत् विदन्तीति तेषां तथाविधानां, सारथीनां—सूतानां, कुले—वंशे, त्वमिवेति शेषः, किमहं जातः ?—उत्पन्नः ? क्षुद्रारातिकृताप्रियं—क्षुद्राः,—नगण्याः, ये अरातयः,—भीमार्जुनादिशत्रवः, तैः कृतः,—अनुष्ठितः, यः अप्रियः,—दुष्टव्यव-हारः, मत्पितृनिधनरूप इत्यर्थः, तं, किम् अस्रेण—नेत्रवारिणा, अश्रुवर्षणेनेति यावत्, प्रतिकरोमि ?—प्रतिविदधामि ? मत्पितृवधरूपवैरतायाः प्रतिकारं किं केवलम् अश्रुजलेनैव सम्पादयामि ? इत्यर्थः, अस्त्रेण न ? करोमीति पूर्वतोऽनुवृत्तम्। द्रोणपुत्रस्य महावीरस्य ममाश्वत्थाम्नः अस्त्रेणैव प्रतीकार्य्योऽयं विषयः, न पुनः समरपराङ्मुखस्य निर्वीर्य्यास्त्रस्य नीचस्य सूतपुत्रस्य तव इव अस्त्रेण इति भावः। अत्र अश्वत्थामकर्त्तृका कर्णभर्त्सना।

(ड) पृच्छामाह, अभ्यर्थनेति।—अभ्यर्थनापरैः,—प्रार्थनासूचकैः, सविनय-रित्यर्थः, वाक्यैः अर्थानाम् अन्वेषणं, पृच्छा इति मतम्।

(ढ) उदाहरति, यथेति।—अज्जेति।—["आर्य्याः ! अद्य अपि नाम सारथि-द्वितीयो दृष्टो युष्माभिः महाराजो दुर्य्योधनो न वेति ?" इति संस्कृतम्] अत्र प्रार्थना-सूचकवाक्येन दुर्य्योधनान्वेषणम्।

प्रसिद्धिर्लोकसिद्धार्थैरुत्कृष्टैरर्थसाधनम् ॥ ४७४ ॥ (ण)

यथा विक्रमोर्वश्याम् ;—"राजा।—

सूर्य्यचन्द्रमसौ यस्य मातामहपितामहौ।
स्वयं हृतः पतिर्ह्याभ्यामुर्वश्या च भुवा च यः ॥" (त)

सारूप्यमभिभूतस्य सारूप्यात् स्तोभवर्त्तनम्॥४७५॥(थ)

यथा वेण्याम् ;—"युधिष्ठिरः। [दुर्य्योधनभाल्या स्तोभं प्रति] दुरात्मन्! दुर्य्योधनहतक!" इत्यादि। (द)

(ण) प्रसिद्धिरिति, प्रसिद्धिरिति।—उत्कृष्टैः लोकसिद्धैः,—लोकप्रसिद्धैः, अर्थैः, —लोकख्यातवस्तुभिरित्यर्थः, अर्थस्य—साध्यस्य, साधनं—पदार्थपरिचय इति यावत्, प्रसिद्धिः।

(त) उदाहरति, सूर्य्येति।—पुरूरवस इयमुक्तिः। यस्य—पुरूरवसः, सूर्य्यचन्द्रमसौ मातामहपितामहौ—सूर्य्यः मातामहः, चन्द्रमाः पुनः पितामहः, यस्य उर्वश्या, भुवा—पृथिव्या च, ह्याभ्यां स्वयम्—आत्मनैव, स्वेच्छया एव इति यावत्, पतिः,—स्वामिरूपेण इत्यर्थः, हृतः। [पुरा किल स्वायम्भुवमनुपुत्रः सूर्य्यतनया सुद्युम्नापरनाम्नी इलो नाम राजा मृगयाप्रसङ्गेन हरनिवारितपुरुषान्तरप्रवेशमुपवनं प्रविष्टः स्तोभावस्थामगमत् ; अतस्तस्यैव इला नामाभूत् ; तांच तत्र परिभ्रमन्तौ चन्द्रतनयो बुधश्चक्रमे, सा च तं, तयोः पुत्र ऐलापरनामधेयः पुरूरवा आसीत् ; तेन पुरूरवसः सूर्य्यो मातामहः, चन्द्रश्च पितामहः ; इति कथानकमनुसन्धेयम्]। एवञ्च अत्र स्तोभप्रसिद्धैः सूर्य्यचन्द्रवंशौद्भवत्वादिभिः आत्मपरिचयरूपस्य अर्थस्य साधनम्।

(थ) सारूप्यमिति।—सारूप्यात्—समानरूपत्वात्, रूपसादृश्यादिति यावत्, अभिभूतस्य—अभिभवं प्राप्तस्य, वैचित्त्यं गतस्य इत्यर्थः, समानरूपत्वेन स्तोभं, न वा? इति तत्त्वंविमूढस्य, जनस्येति शेषः, ["अनुभूतस्य" इति पाठे—सादृश्यादनुभूतस्य, अनविषयस्वेत्यर्थोऽवगन्तव्यः ; "अनुरूपस्य" इति पाठे—सदृशस्य, वस्तुन इति शेषः, सारूप्यात्—सादृश्यजनितभ्रमात्, उभयत्र द्रष्टुरित्यध्याहार्य्यं] यत् स्तोभेन वर्त्तनं—व्यवहारः, तत् सारूप्यम्।

(द) उदाहरति, यथेति।—अत्र दुर्योधनस्य सादृश्येनाभिभूतस्य युधिष्ठिरस्य स्तोभवर्त्तनम्।

सङ्क्षेपो यत् तु सङ्क्षेपादात्माऽन्यार्थं प्रयुज्यते॥४७६॥(ध)

यथा मम चन्द्रकलायाम्;—"राजा। प्रिये!—

अङ्गानि खेदयसि किं शिरीषकुसुमपरिपेलवानि सुधा?।

[आत्मानं निर्दिश्य]

अयमीहितकुसुमानां सम्पादयिता तवास्ति दासजनः॥" (न)

गुणानां कीर्त्तनं यत्तु तदेव गुणकीर्त्तनम्॥४७७॥ (प)

यथा तत्रैव,—"नेत्रे खञ्जनगञ्जने" इत्यादि। (फ)

स लेशो भण्यते वाक्यं यत् सादृश्यपुरःसरम्॥४७८॥(ब)

यथा वेण्याम्;—"राजा।—

हते जरति गाङ्गेये पुरस्कृत्य शिखण्डिनम्।

या श्लाघा पाण्डुपुत्राणां सैवास्माकं भविष्यति॥" (भ)

(ध) सङ्क्षेपमाह, सङ्क्षेप इति।—सङ्क्षेपात्—साधारण्यात्, अविशेषादित्यर्थः, अन्यार्थं—अन्यस्य अर्थं, परस्यार्थं इति यावत्, अर्थान्तरस्थाने वा, यत् आत्मा—स्वयं, आत्मशब्दप्रयोगो वा, प्रयुज्यते—नियुज्यते, निर्दिश्यते वा, स तु सङ्क्षेपः।

(न) उदाहरति, अङ्गानीति।—शिरीषकुसुमवत् परिपेलवानि—परितः पेलवानि, सर्वतोभावेन विरलानीति यावत्, सुकोमलानीति भावः, ("पेलवं विरलं तनु" इत्यमरः) अङ्गानि, किं—कथं, सुधा—वृथा, खेदयसि?—क्लेशयसि? अयं दासजनः,—किङ्करः, तव—कोमलाङ्ग्याः इत्यर्थः, ईहितकुसुमानाम्—अभीष्टपुष्पाणां, सम्पादयिता—कर्त्ता, विकासयिता च, कुसुमपदसाम्यात् इति बोध्यम्, अतः; यत्ते अभीष्टं, तत् अयं दास एव सम्पादयति, किं तव आयासेन? इति भावः। अत्र चन्द्रकलापरिचर्य्यार्थं राज्ञ आत्मनियोगः।

(प) गुणकीर्त्तनमाह, गुणानामिति।—स्पष्टम्।

(फ) उदाहरति, यथेति।—तत्रैव—चन्द्रकलायामेव। अत्र नायिकाया रूपगुणानां कथनम्।

(ब) लेशमाह, स इति।—सादृश्यपुरःसरं—सादृश्यतात्पर्यकं, यत् वाक्यं भण्यते—कथ्यते, स लेशः।

(भ) उदाहरति, हते इति।—शिखण्डिनं—तन्नामानं द्रुपदपुत्रं, पुरस्कृत्य—अग्रेकृत्य, जरति—हते, ("जरत् हतोऽधिकवयाः प्रवया जीर्णं इत्यपि" इति गोपालः)

मनोरथस्त्वभिप्रायस्योक्तिर्भङ्ग्यन्तरेण यत् ॥४७९॥(म)

यथा,—"रतिकेलिकलः किञ्चिदेष मन्मथमन्थरः।
पश्य सुभ्रु! समाश्वस्तां कादम्बयुम्बति प्रियाम्॥" (य)

विशेषार्थोपविस्तारोऽनुक्तसिद्धिरुदीर्य्यते ॥४८०॥ (र)

यथा गृहवृक्षवाटिकायाम्; (ल)—
"दृश्यते तन्वि! यावेतौ चारुचन्द्रमसं प्रति।
प्राज्ञे! कल्याणनामानावुभौ तिष्यपुनर्वसू॥" (व)

गाङ्गेये—गङ्गानन्दने, भीष्मे इति यावत्, इते, अर्जुनेनेति शेषः, पाण्डुपुत्राणां—युधिष्ठिरादीनां, या श्लाघा—विकत्थना, प्रशंसेति यावत्, अभूदिति शेषः, अस्याकं—कौरवाणां, सैव—तादृशी एव, श्लाघा भविष्यति, अभिमन्युवधे इति शेषः। यथा तेषां इडया छलेन इनने श्लाघाऽनुपयुक्ता, तथा अस्माकमपि बालकस्यैकाकिनोऽभिमन्योर्बहभिर्हनने भविष्यतीति भावः। अत्र अभिमन्युवधः भीष्मवधतुल्य इति सादृश्यम्।

(म) मनोरथमाह, मनोरथ इति।—भङ्ग्यन्तरेण—भङ्गिविशेषेण, सदृशदर्शनादिना इत्यर्थः, यत्—या, [अन्यथनिदम] अभिप्रायस्य उक्तिः,—ज्ञापनं, स मनोरथः।

(य) उदाहरति, रतीति।—नायिकां प्रति कस्याश्चदुक्तिः। हे सुभ्रु! पश्य, एषः मन्मथमन्थरः,—मदनपरवशः, कामेन व्याकुलीकृत इति यावत्, अत एव रतिकेलौ—सुरतविहारे, कलः,—मधुरवाक्, यद्वा,—रतिकेलिं कलयति—आचरितुं निच्छति यः सः, कादम्बः,—कलहंसः, ("कादम्बः कलहंसः स्यात्" इत्यमरः) समाश्वस्तां—विश्वस्ताम्, आदराधिक्यदर्शनेन विश्वासवतीम् इत्यर्थः, ["समालब्धात्" इति पाठे —आदराधिक्यादित्यर्थः] प्रियां—भार्य्यां, हंसीमिति यावत्, किञ्चित्—ईषत्, चुम्बति; ईषच्चुम्बनन्तु अस्या उत्तरोत्तरकामोद्रेकाय इति भावः। अत्र नायकेन कादम्बस्य तत्प्रियाचुम्बनोक्तिरूपभङ्ग्या स्वाभिप्रेतस्य स्वकालाये चुम्बनस्य उक्तिः।

(र) अनुक्तसिद्धिमाह, विशेषार्थेति।—विशेषः,—रूपलावण्यादितिशयज्ञापनरूपः, यः अर्थः,—प्रयोजनं, तस्य उपविस्तारः,—तत्रातिशयः, अनुक्तसिद्धिः,—अनुक्तस्य अर्थस्य ज्ञापनमिति भावः, उदीर्य्यते—कथ्यते।

(ल) उदाहरति, यथेति।—गृहवृक्षवाटिकायां—गृहसमीपस्थां वृक्षवाटिकां प्रस्तुत्य रचिते रूपकविशेषे।

(व) दृश्येते इति।—गृहोपवने विश्वामित्रसमीपे श्रीरामलक्ष्मणौ दृष्ट्वा कौशि

स्यात् प्रमाणयितुं पूज्यं प्रियोक्तिर्हर्षभाषणम् ॥४८१॥(अ)

यथा शाकुन्तले,—"उदेति पूर्वं कुसुमं, ततः फलं,
घनोदयः प्राक्, तदनन्तरं पयः।
निमित्तनैमित्तिकयोरयं विधिः
तव प्रसादस्य पुरस्तु सम्पदः॥" (ब)

प्रति तत्सखीनां सवितर्कमुक्तिरियम्। हे तन्वि।—कृशाङ्गि! चारुचन्द्रमसं प्रति—मनोहरचन्द्रं प्रति, चन्द्रसमीपे इत्यर्थः, यौ एतौ—प्रभाविशेषशालिनौ इति भावः, दृश्येते, हे प्राज्ञे!—विदुषि! उभौ, तावेताविति शेषः, कल्याणनामानौ—शुभाभिधौ, तिष्यपुनर्वसू—पुष्यपुनर्वसू इत्यर्थः, ("तिष्यः पुष्ये कलियुगे" इत्यमरः) इति तर्कयामो वयमिति शेषः। अत्र रूपलावण्याद्यतिशयात् विश्वामित्ररामलक्ष्मणेषु पृथिव्याम् असम्भवेऽपि चन्द्रपुष्यपुनर्वसुत्वधर्मारोपेण तर्कातिशयरूपानुक्तसिद्धिः।

(अ) प्रियोक्तिमाह, स्यादिति।—पूज्यं जनं प्रमाणयितुं—प्रमाणं कर्तुं, तन्मर्य्यादां दर्शयितुमित्यर्थः, यत् हर्षभाषणं—प्रेम्णा सम्भाषणं, हर्षजनकं भाषणं वा, सा प्रियोक्तिः स्यात्।

(ब) उदाहरति, उदेतीति।—मारीचमुनिं प्रति दुष्मन्तस्योक्तिरियम्। पूर्वं—प्रथमं, फलोत्पत्तेः प्रागित्यर्थः, कुसुमम् उदेति—उदयं प्राप्नोति, विकसतीति यावत्, ततः,—अनन्तरं, कुसुमोदयात् परमित्यर्थः, फलम्, उदेतीत्यनेनान्वयः। प्राक्, वृष्टेरिति शेषः, घनानां—मेघानाम्, उदयः,—उद्गमः, भवतीति शेषः, तदनन्तरं—मेघोदयात् परं, पयः,—जलं, वृष्टिरित्यर्थः, उदेतीति योजना। निमित्तनैमित्तिकयोः,—कारणकार्य्ययोः, हेतुफलयोरिति यावत्, अयं—पौर्वापर्य्यरूप इत्यर्थः, विधिः,—क्रमः, सर्वत्र दृश्यते इति शेषः, तव—भवतः, प्रसादस्य—अनुग्रहस्य, ("प्रसादोऽनुग्रहे काव्य-गुणस्वाख्यप्रसक्तिषु" इति मेदिनी) तु—पुनः, पुरः,—अग्रतः, अनुग्रहात् प्रागित्यर्थः, सम्पदः,—समृद्धयः, सम्भूता इति शेषः। अत्र कारणत्वात् सम्पदः पूर्वमेव अनुग्रहः, कार्य्यन्तु सम्पत् तत्पश्चात् भवितुं युज्यते, तद्वैपरीत्येन तु पूज्यस्यातिप्रभावशालित्वकथनेन हर्षोत्पादनरूपा प्रियोक्तिः। अत्र कार्य्यकारणयोः पौर्वापर्य्यव्यत्ययरूपातिशयोक्तिरलङ्कारः। अत एव "सिद्धत्वेऽध्यवसायस्यातिशयोक्तिर्निगद्यते" इति वक्ष्यते। वंशस्थविलं वृत्तम्।

अथ नाट्यालङ्काराः,—

आशीराक्रन्दकपटाक्षमागर्वोद्यमाश्रयाः।
उत्प्रासनं स्पृहाक्षोभ-पश्चात्तापोपपत्तयः॥
आशंसाऽध्यवसायौ च विसर्पोल्लेखसंज्ञितौ।
उत्तेजनं परीवादो नीतिरर्थविशेषणम्॥
प्रोत्साहनञ्च साहाय्यमभिमानोऽनुवर्त्तनम्।
उत्कीर्त्तनं तथा याञ्चा परीहारो निवेदनम्॥
प्रवर्त्तनाख्यानयुक्ति-प्रहर्षाश्चोपदेशनम्।
इति नाट्यालङ्कृतयो नाट्यभूषणहेतवः॥४८२॥ (स)

आशीरिष्टजनाशंसा॥ ४८३॥ (ह)

यथा शाकुन्तले,—

"ययातेरिव शर्मिष्ठा पत्युर्बहुमता भव।
पुत्रं त्वमपि सम्राजं सेव पूरुमवाप्नुहि॥" (क)

(स) नाट्यालङ्कारानाह, आशीरिति।—आशीःप्रभृतयः त्रयस्त्रिंशत् नाट्यालङ्कारा इत्यर्थः। अलङ्कृतिपदस्य योगार्थमाह, नाट्यभूषणहेतव इति।

(ह) आशिषमाह, आशीरिति।—इष्टजनस्य—बन्धोः, आशंसा—अभिमतप्राप्तीच्छा, इष्टलाभाशंसनमिति यावत्, आशीः।

(क) उदाहरति, ययातेरिति।—शकुन्तलां प्रति कण्वस्य शुभाशंसनमिदम्। शर्मिष्ठा—वृषपर्वसुता, ययातेरिव त्वं पत्युः,—दुष्मन्तस्य, बहुमता—बहु आदरणीया, भव। सा—शर्मिष्ठा, पूरुं—तन्नामानम् इव, त्वमपि सम्राजं—चक्रवर्त्तिनं, पुत्रम् अवाप्नुहि—लभस्व। अत्र यद्यपि ययातेर्देवयान्येव महिषी बभूव, किन्तु दैत्यगुरोः शापात् प्राप्तां जरां पुत्रेष्वेकतमे सङ्क्रामयितुमुद्यतस्य यदुप्रभृतिभिः पुत्रैः प्रत्याख्यातस्य च तस्य तां गृह्णन् कनिष्ठपुत्रः पूरुरेव प्रियतम आसीत्, तेनैव पुनस्तन्माता शर्मिष्ठाऽपि प्रियतमाऽऽसीदिति विभावनीयम्।

ऽऽ(आ)क्रन्दः प्रलपितं शुचा ॥४८४॥(ख)

यथा वेण्यां,—"कञ्चुकी। हा देवि! कुन्ति! राजभवन-पताके!" इत्यादि।

कपटं मायया यत्र रूपमन्यद्विभाव्यते ॥ ४८५ ॥ (ग)

यथा कुलपत्यङ्के,—

"मृगरूपं परित्यज्य विधाय कपटं वपुः।
नीयते रक्षसा तेन लक्ष्मणो युधि संशयम् ॥" (घ)

अक्षमा सा परिभवः स्वल्पोऽपि न विषह्यते॥४८६॥(ङ)

यथा शाकुन्तले,—"राजा। भोः सत्यवादिन्! अभ्युपगतं तावदस्माभिः एवंविधा एव वयम्; किं पुनरिमामभिसन्धाय लभ्यते? शार्ङ्गरवः। विनिपातः" इत्यादि। (च)

(ख) आक्रन्दमाह, आक्रन्द इति।—शुचा—शोकेन, पुत्रादिमरणजन्येन आन्तरतापोद्रेकेणेति यावत्, प्रलपितं—प्रलापः, [भावे क्तः] आक्रन्दः।

(ग) कपटमाह, कपटमिति।—यत्र मायया—छलेन, अन्यत् रूपं विभाव्यते—प्रदर्श्यते, तत् कपटम्। चित्रमीमांसायामप्युक्तं,—"प्रतारणार्थमन्यस्य यत् कर्म कपटन्तु तत्" इति।

(घ) उदाहरति, मृगरूपमिति।—तेन—मायिकेषु प्रसिद्धेन, रक्षसा—मारीचेन, मृगरूपं,—काञ्चनहरिणकायं, परित्यज्य—विहाय, कपटं—कृत्रिमं, वपुः,—शरीरं, विधाय लक्ष्मणः ["श्रीरामः" इति तु साधु] युधि—युद्धे, संशयं नीयते—प्राप्यते। अत्र मायया मृगरूपानन्तरं रूपान्तरप्रत्यायनमिति कपटाख्योऽलङ्कारः।

(ङ) अक्षमामाह, अक्षमेति।—स्वल्पः,—अत्यल्पः अपि, परिभवः यत्—यतः, न विषह्यते—सोढुं पार्य्यते, [अत्र "अभिसह्यते" इति पाठे—स एवार्थः] सा अक्षमा।

(च) उदाहरति, यथेति।—शार्ङ्गरवं प्रति राज्ञ उक्तिरियम्। भोः सत्यवादिन्! [विपरीतलक्षणयेयं सूचना]। अभ्युपगतं—स्वीकृतम्। एवंविधाः,—पराभिसन्धायिन इत्यर्थः। इमां—शकुन्तलाम्, अभिसन्धाय—प्रतार्य्य। अत्र राज्ञः "भोः सत्यवादिन्"! इति सोल्लुण्ठनोक्त्या परिभूतस्य शार्ङ्गरवस्य "विनिपातः" इति वचनेन अक्षमत्वद्योतनादक्षमा नाम नाट्यालङ्कारः।

गर्वोऽवलेपजं वाक्यम् ॥ ४८७ ॥ (छ)

यथा तत्रैव,—"राजा। ममापि नाम सत्त्वैरभिभूयन्ते गृहाः?"। (ज)

कार्य्यस्यारम्भ उद्यमः ॥ ४८८ ॥ (झ)

यथा कुम्भाङ्के,—"रावणः। पश्यामि शोकविवशोऽन्तकमेव तावत्।" (ञ)

ग्रहणं गुणवत्कार्य्य-हेतोराश्रय उच्यते ॥४८९॥ (ट)

यथा विभीषणनिर्भर्त्सनाङ्के,—"विभीषणः। राममेवाश्रयिष्यामि" इति। (ठ)

उत्प्रासनं तूपहासो योऽसाधौ साधुमानिनि ॥४९०॥(ड)

यथा शाकुन्तले,—"शार्ङ्गरवः। राजन्! अथ पुनः पूर्व-

(छ) गर्वमाह, गर्व इति।—अवलेपजं—साहङ्कारमुक्तं, वाक्यं गर्वः।

(ज) उदाहरति, यथेति।—तत्रैव—शाकुन्तले एव। सत्त्वैः,—प्राणिभिः, अभिभूयन्ते?—पराजीयन्ते? अत्र ममापीत्यनेन राज्ञः गर्वातिशयः सूचितः।

(झ) उद्यममाह, कार्य्यस्येति।—कार्य्यस्य—अभिप्रेतार्थस्य, आरम्भः,—सम्पादनार्था प्रथमप्रवृत्तिः, उद्यमः।

(ञ) उदाहरति, यथेति।—शोकविवशः,—अतिशोकार्त्तः, बहुपुत्रभ्रातृबन्धुवर्गनाशादिति भावः, अन्तकमेव—यममेव, तावत्—कार्त्स्न्येन, ("यावत् तावच्च साकल्ये" इत्यमरः) पश्यामि। अत्र रणकर्मणः उद्यमः सूचितः।

(ट) आश्रयमाह, ग्रहणमिति।—गुणवत्कार्य्यहेतोः,—उत्कृष्टकार्य्यनिमित्तमित्यर्थः, ग्रहणम् आश्रय उच्यते।

(ठ) उदाहरति, यथेति।—स्पष्टम्। अत्र विभीषणस्य स्वराज्यप्राप्तिरूपोत्कृष्टकार्य्यस्य हेतुः श्रीरामाश्रयः इति।

(ड) उत्प्रासनमाह, उत्प्रासनमिति।—साधुमानिनि—आत्मानं साधु मन्यते इति साधुमानी तस्मिन्, ["आत्ममाने खश्च" (३।२।८३ पा०) इति णिनिः] स्वं श्रेष्ठं मन्यमाने इति भावः, अत एव असाधौ यः उपहासः [स इत्यध्याहारः] उत्प्रासनम्।

वृत्तान्तः व्यासङ्गाद्विस्मृतो भवेत्, तत् कथमधर्मभीरोर्दारपरित्यागः ?" इत्यादि। (ढ)

आकाङ्क्षा रमणीयत्वात् वस्तुनो या स्पृहा तु सा॥४९१॥(ण)

यथा तत्रैव,—राजा।—

चारुणा स्फुरितेनायमपरिक्षतकोमलः।
पिपासतो ममानुज्ञां ददातीव प्रियाधरः॥" (त)

अधिक्षेपवचःकारी क्षोभः प्रोक्तः स एव तु॥४९२॥(थ)

यथा,—

"त्वया तपस्विचाण्डाल! प्रच्छन्नवधवर्त्तिना।
न केवलं हतो बाली, स्वात्मा च परलोकतः॥" (द)

(ढ) उदाहरति, यथेति।—अथ पुनरिति—वितर्के, पूर्ववृत्तान्तः,—शकुन्तलापरिणयरूपा पूर्वघटनेत्यर्थः, व्यासङ्गात्—भार्य्यान्तरसंसर्गात्, राजकार्य्यगौरवात्, मोहात् वा, विस्मृतः,—स्मृतिपथं न गतः, भवेत्—स्यात्, तत्—तस्मात्, अधर्मभीरोः,—अधर्मात् बिभ्यतस्ते, दारपरित्यागः,—स्त्रीपरित्यागः, कथं—कीदृक्? स्त्रीत्यागे अधर्मसम्भवादिति भावः। अत्र धर्मपत्नीं परित्यक्तुकामस्य अत एव असाधौ राज्ञि अधर्मभीरुत्वाभिधानेन साधुमानित्वं प्रतिपाद्य उपहासः।

(ण) स्पृहामाह, आकाङ्क्षेति।—वस्तुनः,—विषयस्य, रमणीयत्वात्—मनोहरत्वात्, या आकाङ्क्षा—तत्प्राप्तीच्छा इत्यर्थः, सा स्पृहा।

(त) उदाहरति, चारुणेति।—अपरिक्षतः,—नायकेनादष्टतया अव्रणितः, अत एव कोमलः, प्रियायाः,—शकुन्तलायाः, अयम् अधरः चारुणा—मनोहरेण, स्फुरितेन—स्फुरणेन, पिपासतः,—पातुमिच्छतः, मम अनुज्ञां ददातीव। अत्र अधरस्य रमणीयत्वात् पानाकाङ्क्षारूपा स्पृहा।

(थ) क्षोभमाह, अधिक्षेपवच इति।—अधिक्षेपवचःकारी—भर्त्सनोक्तिहेतुकः, क्षोभः,—मनोविकारविशेषः, स एव—क्षोभनामाऽलङ्कार एव, प्रोक्तः।

(द) उदाहरति, त्वयेति।—रामं प्रति बालिन उक्तिः। हे तपस्विचाण्डाल!—तपस्विषु चाण्डालवत् नृशंसकर्मिन् इत्यर्थः, प्रच्छन्नवधवर्त्तिना—गुप्तभावेन स्थित्वा हिंसाकारिणा, त्वया केवलं बाली न हतः, किन्तु परलोकतः स्वात्मा च—अपि, हत इति शेषः। यादृशं दुष्कार्य्यं त्वया कृतम्, एतेन परलोके तव निस्तारो नास्ति, "धर्म

मोहावधीरितार्थस्य पश्चात्तापः स एव तु॥४९३॥(ध)

यथाऽनुतापाङ्के,—"रामः।—

किं देव्या न विचुम्बितोऽस्मि बहुशो मिथ्याऽभिशप्तस्तदा"

इति। (न)

उपपत्तिर्मता हेतोरुपन्यासोऽर्थसिद्धये ॥ ४९४॥ (प)

यथा बध्यशिलायाम् ; (फ)—

"म्रियते म्रियमाणे या त्वयि जीवति जीवति।

तां यदीच्छसि जीवन्तीं रक्षात्मानं ममासुभिः॥ (ब)

एव हतो हन्ति" इति स्मरणादिति भावः। अत्र वालिकर्त्तृकः श्रीरामचन्द्रकर्ममूलकः "तपस्विचाण्डाल!" इत्यादिवाक्यार्थरूपः क्षोभः।

(ध) पश्चात्तापमाह, मोहेति।—मोहेन—अनवधानतया इत्यर्थः, अज्ञानेन वा, अवधीरितस्य—अवज्ञातस्य, अर्थस्य—विषयस्य, प्रयोजनस्येति यावत्, तु यः पश्चात्तापः,—अवज्ञाऽनन्तरं शोकः, स एव पश्चात्तापालङ्कारः। तथोक्तं मुनिना,—"अकार्य्यं सहसा कृत्वा कृत्वा कार्य्यमथापि वा। सन्तापो मनसो यस्तु पश्चात्तापः स कीर्त्तितः॥" इति।

(न) उदाहरति, यथेति।—देव्या—सीतया। मिथ्याऽभिशप्तः,—मिथ्यादत्तपरीवादः। अत्र चुम्बनरूपस्य अर्थस्य मोहेनावधीरणात् पश्चात्तापालङ्कारः।

(प) उपपत्तिमाह, उपपत्तिरिति।—अर्थस्य—कार्य्यस्य, सिद्धये हेतोः,—कारणस्य, उपन्यासः,—कीर्त्तनम्, उपपत्तिर्मता।

(फ) उदाहरति, यथेति।—बध्यशिलायां—यत्र गरुडेन भक्षणार्थं बधाय नागाः नीयन्ते तस्याम्।

(ब) म्रियते इति।—नागानुज्जीवयितुं गरुडाय स्वदेहार्पणं कर्त्तुकामं शङ्खचूडं प्रति नायकस्योक्तिरियम्। त्वयि—भवादृशे तनये इत्यर्थः, म्रियमाणे—मरणासन्ने सति, या म्रियते—मरणासन्ना भवति, त्वयि जीवति—वर्त्तमाने सति इत्यर्थः, या जीवति—जीविता वर्त्तते, यदि तां, भवन्मातरमिति शेषः, जीवन्तीम् इच्छसि—जीववतीमभिलषसि, तदा मम असुभिः,—प्राणैः, मद्देहमुपायनीकृत्येत्यर्थः, आत्मानं—स्वं, रक्ष; अत्र प्रियस्य जीवितार्थे स्वोपस्थितिप्रार्थनं सोपपत्तिकमित्युपपत्तिः। नागानन्दस्येदं पद्यम्।

आशंसनं स्यादाशंसा ॥ ४९५ ॥ (भ)

यथा श्मशाने,—"माधवः।—

तत् पश्येयमनङ्गमङ्गलगृहं भूयोऽपि तस्या मुखम्" इति। (म)

प्रतिज्ञाऽध्यवसायकः ॥ ४९६ ॥ (य)

यथा मम प्रभावत्याम् ;—"वज्रनाभः।—

अस्य वक्षः क्षणेनैव निर्मथ्य गदयाऽनया।

लीलयोन्मूलयाम्येव भुवनद्वयमद्य वः॥" (र)

विसर्पो यत् समारब्धं कर्मानिष्टफलप्रदम्॥४९७॥ (ल)

(भ) आशंसामाह, आशंसनमिति।—आशंसनम्—अभीष्टलाभे मनसो व्यापारणम्, आशंसा स्यात्। अत्र स्वस्याभीष्टलाभेच्छा, आशीरलङ्कारे तु बन्धुजनस्येति विशेषः।

(म) उदाहरति, यथेति।—तस्याः,—मालत्याः, अनङ्गस्य—कामदेवस्य, मङ्गलगृहं—महोत्सवार्थं निर्मितस्थानम्, उपचारात् तदभिन्नमिति यावत्, तत्—अनुभूतास्वादपूर्वं, मुखं भूयोऽपि—पुनरपि, पश्येयं—विलोकयेयम्। अत्र प्रियतमामुखावलोकनाशंसनादाशंसा। पादत्रयाणीत्यमस्य श्लोकस्य मालतीमाधवीयस्य,—"सम्भूयेव सुखानि चेतसि परं भूमानमातन्वते, यत्रालोकपथावतारिणि रतिं प्रस्तौति नेत्रोत्सवः। यद्बालेन्दुकलोच्चयादवचितैः सारैरिवोत्पादितम्" इति।

(य) अध्यवसायमाह, प्रतिज्ञेति।—प्रतिज्ञा—"शरीरं वा पातयेयं, कार्य्यं वा साधयेयम्" इत्येवम्भूतः कार्य्यस्य कर्त्तव्यत्वेन दृढतरनिश्चयनिर्देशः, अध्यवसायकः,—अध्यवसायः, [स्वार्थे कः]।

(र) उदाहरति, यथेति।—अस्य—प्रद्युम्नस्य, वक्षः,—उरःस्थलं क्षणेनैव—न तु विलम्बेनेति भावः, अनया—प्राणान्तकारिण्या, गदया निर्मथ्य—सञ्चूर्ण्य, लीलया—अनायासेन, अद्य वः,—युष्माकम्, [इति अनादरे षष्ठी] युष्मान् अनादृत्य इति भावः, भुवनद्वयं—स्वर्गं भुवञ्च, रसातलं विहाय इत्यर्थः, स्वस्य रसातलवासित्वादिति भावः, उन्मूलयाम्येव—उत्पाटयाम्येव। अत्र वज्रनाभस्य प्रद्युम्नवक्षोभेदनादिरूपकार्य्ये दृढतरनिर्देशरूपोऽध्यवसायः।

(ल) विसर्पमाह, विसर्प इति।—अनिष्टफलप्रदं यत् कर्म समारब्धं—प्रक्रान्तं, स विसर्पः।

यथा वेण्याम् ;—"एकस्य तावत् पाकोऽयम्" इत्यादि। (व)

कार्य्यग्रहणमुल्लेखः ॥ ४९८ ॥ (श)

यथा शाकुन्तले,—"तापसौ। [राजानं प्रति] समिदाहरणाय प्रस्थितावावाम्। इह च अस्मद्गुरोः कण्वस्य साधिदैवत इव शकुन्तलया अनुमालिनीतीरमाश्रमो दृश्यते, न चेत् कार्य्यातिपातः, प्रविश्य गृह्यतामतिथिसत्कारः" इति। (ष)

उत्तेजनमितीष्यते।

स्वकार्य्यसिद्धयेऽन्यस्य प्रेरणाय कठोरवाक्॥४९९॥ (स)

यथा,—

"इन्द्रजिच्चण्डवीर्य्योऽसि नाम्नैव बलवानसि।
धिक्! धिक्! प्रच्छन्नरूपेण युध्यसेऽस्मद्भयाकुलः॥" (ह)

(व) उदाहरति, यथेति।—एकस्य, द्रौपदीकेशग्रहस्य इति शेषः, पाकः,—फलम्, अयं—सङ्ग्रामे बहुराजन्यनिधनरूप इति भावः। अत्र द्रौपदीकेशग्रहणरूपस्य कर्मणोऽनेकानेकातिरथमहारथमरणरूपफलकतया द्रोणकेशग्रहरूपस्य विश्वविनाशारम्भकफलतया च विसर्पः। उक्तञ्च चित्रमीमांसाकृता जगन्नाथपण्डितराजेन,—"यत् कर्म परिणामे स्यात् सर्वतोऽनिष्टकारकम्। हालाहलमिवात्यन्तं विसर्पस्तु विसर्पणात्॥" इति।

(श) उल्लेखमाह, कार्य्यग्रहणमिति।—कार्य्यस्य ग्रहणं—सम्पादनार्था प्रवृत्तिः, उल्लेखः।

(ष) उदाहरति, यथेति।—समिदाहरणाय—हवनोपयोगिकाष्ठाहरणाय। अस्मद्गुरोः कण्वस्य शकुन्तलया—गुरुवर्य्येण दुहितृत्वेन कल्पितया, साधिदैवत इव—अधिदेवता—अधिष्ठातृदेवता, तया सहित इव, अनुमालिनीतीरं—मालिन्याः नद्याः तीरे इत्यर्थः। कार्य्यातिपातः,—कार्य्यस्य व्याघातः, [अन्यकार्य्यातिपातः" इति पाठान्तरम्]। अत्र समिदाहरणरूपकार्य्यसम्पादनार्थं प्रवृत्तेरभिधानादुल्लेखः।

(स) उत्तेजनमाह, उत्तेजनमिति।—स्वकार्य्यस्य—स्वाभीष्टस्य, सिद्धये—सम्पत्तये, तथा अन्यस्य प्रेरणाय—प्रवर्त्तनाय, कठोरवाक्—कटुवाक्यम्, उत्तेजनमिति इष्यते—कथ्यते।

(ह) उदाहरति, इन्द्रजिदिति।—मेघनादं प्रति लक्ष्मणस्योक्तिः। हे इन्द्र-

भर्त्सना तु परीवादः ॥ ५०० ॥ (क)

यथा सुन्दराङ्के,—"दुर्योधनः। धिक्! धिक्!! सूत! किं कृतवानसि? वत्सस्य मे प्रकृतिदुर्ललितस्य पापः पापं विधास्यति" इत्यादि। (ख)

नीतिः शास्त्रेण वर्त्तनम् ॥५०१॥ (ग)

यथा शाकुन्तले,—"दुष्मन्तः। विनीतवेषप्रवेश्यानि तपोवनानि" इति। (घ)

उक्तस्यार्थस्य यत्तु स्यादुत्कीर्त्तनमनेकधा।
उपालम्भस्वरूपेण तत् स्यादर्थविशेषणम् ॥५०२॥ (ङ)

जित्! अधि—(अध्यवसितम्) त्वमित्यर्थः, नास्त्येव—न तु कार्यत इति भावः, अधर्यैः,—प्रधर्षणपरायणः, बलवान् असि—भवसि, इन्द्रजिदाख्यश्चैव तव प्रधर्षत्वं बलवत्त्वञ्च ख्याप्यते इत्यर्थः, धिक् धिक्—त्वां पुनः पुनः निन्दामि इत्यर्थः, ("धिक् वर्जनेऽनिन्दायाः" इत्यमरः)। निन्दावीजीभूतं दौर्बल्यं समर्थयते, प्रच्छन्नेत्यादि।—यत्तस्य अपजयाकुलः सन्, प्रच्छन्नरूपेण,—अपचितरूपेण, युध्यसे, यदि तव निर्भयत्वं स्यात् तदाऽवश्यं प्रकाशयुद्धे तव वर्त्तनं स्यादिति भावः। अत्र प्रकाशयुद्धे इन्द्रजितो वर्त्तनं स्वकार्यम्।

(क) भर्त्सनामाह, भर्त्सनेति।—परीवादः,—तिरस्कारः, तु—पुनः, भर्त्सना, स्यादिति शेषः।

(ख) उदाहरति, यथेति।—मूर्च्छितदुर्योधनरक्षणाय रथात् रथं प्रत्यावर्त्तितव्यं सूतं प्रति क्रोधावेशाने दुर्योधनस्य भर्त्सनमिदम्। प्रकृतिदुर्ललितस्य—प्रकृत्या—स्वभावेन, दुर्ललितस्य—दुर्विनयशिक्षितस्य, चपलस्येति यावत्, वत्सस्य—दुःशासनस्य, पापः,—पापात्मा, नीच इत्यर्थः, पापम्—अनिष्टं, वधोविदारणरूपमित्यर्थः, विधास्यति—करिष्यति। अत्र सारथेः रथात् प्रत्यावर्त्तनरूपः तिरस्कारत्वात् भर्त्सना।

(ग) नीतिमाह, नीतिरिति।—शास्त्रेण—यथाशास्त्रं, वर्त्तनं—व्यवहरणं, शास्त्रानुसारेण कर्मानुष्ठानमित्यर्थः, नीतिः।

(घ) उदाहरति, यथेति।—"तपोवनप्रवेशे नीचत्वं त्यजेत्" इति शास्त्रमत्र द्रष्टव्यम्।

(ङ) अर्थविशेषणमाह, उक्तस्येति।—उक्तस्य—कथितस्य, अर्थस्य—विषयस्य,

यथा शाकुन्तले,—"शार्ङ्गरवः। [राजानं प्रति] आः! कथमिदं नाम, किमिदमुपन्यस्तमिति। ननु भवानेव नितरां लोकवृत्तान्तनिष्णातः। (च)

सतीमपि ज्ञातिकुलैकसंश्रयां
जनोऽन्यथा भर्तृमतीं विशङ्कते।
अतः समीपे परिणेतुरिष्यते
प्रियाऽप्रिया वा प्रमदा स्वबन्धुभिः॥" (छ)

उपालम्भस्वरूपेण—तिरस्कारस्वरूपेण, अनेकधा—बहुधा, यत् उत्कीर्त्तनं—सूचनम्, उल्लेख इति यावत्, स्यात्, तत् अर्थविशेषणं स्यात्। ["उपालम्भविशेषेण" इति पाठे तु—प्रतिकूलोल्लिखनेनेति भावः]।

(च) उदाहरति, यथेति।—आः! कथमिदम्, उन्नमिति शेषः। उपन्यस्तं—वक्तुमारब्धम् ("उपन्यासस्तु वाक्यादेः" इत्यमरः)। नितराम्—अतिशयेन, लोकवृत्तान्तनिष्णातः,—लोकवृत्तान्ते—लौकिकव्यवहारे इत्यर्थः, निष्णातः,—अभिज्ञः। ["निनदीभ्यां स्नातेः कौशले" (८।३।८९ पा०) इति षत्वम्]।

(छ) ननु "सत्यं परिणीता मया, यतो राजानो हि बहुपत्नीका भवन्ति, किन्तु कथं मयीदृशः परस्त्रेहसमागीता ?" इत्याशङ्क्याह, सतीमिति।—जनः,—लोकः, भर्तृमतीं—सधवां स्त्रियं, ज्ञातिकुलं—पितृकुलमित्यर्थः, एकः,—तस्मात् इत्यर्थः, संश्रयः,—आश्रयः यस्याः तादृशीं, पित्रादिगृहसमाश्रयवासिनीमित्यर्थः, सतीं—साध्वीमपि, अन्यथा—अन्यरूपाम्, [अत्र जनसंसदि तापसकोऽयं अनौचित्यदोषपरिहाराय अविना दुष्टेति पदमप्रयुज्य अन्यथेति प्रयुक्तमिति बोध्यम्] विशङ्कते—विशेषेण आशङ्कते, सदोषां सम्भावयतीत्यर्थः; अतः (कारणात्) स्वबन्धुभिः स्वकीयैः,—स्त्रिया इत्यर्थः, बन्धुभिः,—पित्रादिभिः, प्रमदा—नारी, प्रकृष्टमदेत्यर्थः, (वार्डके तस्याः पितृभवनावस्थाने जनानां दोषशङ्काऽभावादिति भावः, अत एव स्त्रीसामान्यवाचकपदमपहाय प्रमदेति विशेषपदमुपात्तम्। "प्रमदः सम्मदे मत्ते स्त्रियामुत्तमयोषिति" इति मेदिनी) प्रिया, अप्रिया वा, भवतु इति शेषः, परिणेतुः,—पत्युः, समीपे इष्यते, रक्षितुमिति शेषः। अत्र "किमिदमुपन्यस्तम्" इति राज्ञ उक्तौ तन्निर्भर्त्सनरूपेण "आः! कथम्" इत्यादिवाक्यत्रयेण "तदिदानीमापन्नसत्त्वेयं दुहृतां सदृशमाचरणाय" इति स्त्रीलोकार्थः आर्ङ्गरवेण सूचितः इति अर्थविशेषणम्। अप्रस्तुतप्रशंसा च अर्थालङ्कारः। वंशस्थविलं वृत्तम्।

प्रोत्साहनं स्यादुत्साह-गिरा कस्यापि योजनम्॥५०३॥ (ज)

यथा बालरामायणे,—

"कालरात्रिकरालेयं स्त्रीति किं विचिकित्ससि ?।
तज्जगत्त्रितयं त्रातुं तात ! ताड़य ताड़काम् ॥" (झ)

साहाय्यं सङ्कटे यत् स्यात् सानुकूल्यं परस्य च॥५०४॥(ञ)

यथा वेण्याम्,—"अश्वत्थामा। [कृपं प्रति] त्वमपि तावद्राज्ञः पार्श्ववर्त्ती भव। कृपः। वाञ्छाम्यहमद्य प्रतिकर्त्तुम्"(ट) इत्यादि।

अभिमानः स एव स्यात् ॥ ५०५ ॥ (ठ)

यथा तत्रैव,—"दुर्य्योधनः,—

मातः ! किमप्यसदृशं कृपणं वचस्ते" इत्यादि। (ड)

(ज) प्रोत्साहनमाह, प्रोत्साहनमिति।—उत्साहगिरा—उत्साहसूचकवाक्येन, कस्यापि योजनं—नियोजनं, कार्य्ये प्रवर्त्तनमित्यर्थः, प्रोत्साहनं स्यात्। दशरूपककारस्तु "भेदः प्रोत्साहना मता" इत्याह।

(झ) उदाहरति, कालरात्रीति।—स्त्री इति हेतोः किं विचिकित्ससि ?—हन्यां न वेति संशयं करोषि ? ("विचिकित्सा तु संशयः" इत्यमरः) हे तात ! (सप्रेमसम्बोधनमिदम्) इयं, राक्षसीति शेषः, कालरात्रिवत्—प्रलयरात्रिवत्, ("कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा" इति दुर्गासप्तशतीवाक्यव्याख्यायां गुप्तवतीसमाख्यायां कालरात्रिशब्दस्य व्याख्या यथा,—"कालरात्रिः सर्वजन्तुमरणोपलक्षिता कल्परात्रिः" इति सर्वमवदातम्) कराला—दारुणा, त्रिलोकग्रासिनीत्यर्थः, तत्—तस्मात्, जगतां त्रितयं—त्रिभुवनमित्यर्थः, त्रातुं—रक्षितुं,—ताड़कां ताड़य—जहि। अत्र उत्साहवाक्येन रामस्य ताड़कावधे प्रवर्त्तनम्।

(ञ) साहाय्यमाह, साहाय्यमिति।—सङ्कटे—विपदि, परस्य सानुकूल्यम्—अनुकूलतया सह वर्त्तनं यत्, तत् साहाय्यं स्यात्।

(ट) उदाहरति, यथेति।—प्रतिकर्त्तुं—प्रत्यर्थिनां शस्त्रातिपातं निवार्य्य तेषु शस्त्रातिपातविधानेन प्रतिकारायेत्यर्थः। स्पष्टमन्यत्। अत्र रणव्यापाररूपे सङ्कटे राज्ञो दुर्य्योधनस्य आनुकूल्यविधानम्।

(ठ) अभिमानमाह, अभिमान इति।—स एव—अभिमानालङ्कार एव।

(ड) उदाहरति, यथेति।—तत्रैव—वेणीसंहारे एव। मातरिति।—

प्रश्रयादनुवर्त्तनम् ।

अनुवृत्तिः ॥ ५०६ ॥ (ढ)

यथा शाकुन्तले,—"राजा । [शकुन्तलां प्रति] अयि ! तपो वर्द्धते ? अनसूया । दाणिं अदिधिविसेसलाहेण" (ण) इत्यादि ।

भूतकार्य्याख्यानमुत्कीर्त्तनं मतम् ॥५०७॥ (त)

यथा बालरामायणे,—

"अत्रासीत् फणिपाशबन्धनविधिः शक्त्या भवद्देवरे
गाढं वक्षसि ताड़िते हनुमता द्रोणाद्रिरत्राहृतः ।" इत्यादि ।(थ)

भीमेन दुःशासनादौ मारिते तेन सह पुनर्योद्धुमीहमानस्य मात्रा गान्धार्या च निषिद्धस्य दुर्य्योधनस्येयमुक्तिः । हे मातः !—गान्धारि ! ते—तव, सुचरित्रायाः इति यावत्, वचः,—वचनं, किमपि—अशोभनं, वक्तुमनर्हमित्यर्थः, असदृशम्—अयोग्यं, क्षपणं—क्षुद्रम् ; ["क्षपणम्" इत्यत्र "विक्षतम्" इति पाठे—विपरीतम्]। चरमपादत्रयी त्वेषा—"सुचरित्रया क्व भवती क्व च दीनतेषा । निर्बन्धमेतं ! सुतयोरतस्य विपत्तिमेतां, त्वं नानुचिन्तयसि रत्नसि मामयोग्यम् ॥" इति । अत्र मातुराचेपेण दुर्य्योधनस्य अभिमानः सूच्यते । वसन्ततिलकं वृत्तम् ।

(ढ) अनुवृत्तिमाह, प्रश्रयादिति ।—प्रश्रयात्—विनयात्, अनुवर्त्तनम्—अनुसरणं, प्रतिवचनादिना सन्तोषणमिति यावत्, अनुवृत्तिः ।

(ण) उदाहरति, दाणिमिति ।—["इदानीमतिथिविशेषलाभेन" इति संस्कृतम्] । अतिथिविशेषस्य—अतिथिश्रेष्ठस्य, भवत इत्यर्थः । अन्यत् स्पष्टम् । अत्र अनसूयायाः राजानं प्रत्युत्तरदाने प्रश्रयपूर्विकाऽनुवृत्तिः ।

(त) उत्कीर्त्तनमाह, भूतेति ।—भूतस्य—वृत्तस्य, कार्य्येण आख्यानं—कथनम्, उत्कीर्त्तनं मतम् ।

(थ) उदाहरति, अत्रेति ।—अत्र—अस्मिन् देशे, फणिनां—नागानां, पाशेन बन्धनं तस्य विधिः,—विधानम्, आसीत् ; अत्र च भवद्देवरे—भवत्याः,—तव, सीतायाः इत्यर्थः, देवरः,—लक्ष्मण इति भावः, तस्मिन्, शक्त्या—मेघनादस्य अस्त्रिनामास्त्रविशेषेण, वक्षसि गाढम्—अत्यर्थं, ताड़िते—प्रहृते सति इत्यर्थः, हनुमता, तत्सञ्जीवनार्थमिति शेषः, द्रोणाद्रिः,—गन्धमादनपर्वत इत्यर्थः, आहृतः । एतस्य परार्द्धं त्वेतत्,—"दिव्यैरिन्द्रजिदस्त्रपञ्चशरैर्योऽकारयं व्यथितः, केनाप्यत्र समाधि !

याञ्चा तु क्वापि याञ्चा या स्वयं दूतमुखेन वा ॥५०८॥ (द)

यथा,—

"अद्यापि देहि वैदेहीं दयालुस्त्वयि राघवः ।
शिरोभिः कन्दुकक्रीड़ां किं कारयसि वानरान् ? ॥" (ध)

परिहार इति प्रोक्तः कृतानुचितमार्ज्जनम् ॥५०९॥ (न)

यथा,—

"प्राणप्रयाणदुःखार्त्त उक्तवानस्म्यनक्षरम् ।
तत् क्षमस्व विभो ! किञ्च सुग्रीवस्ते समर्पितः ॥" (प)

राक्षसपतेः कृत्ता च कण्टाटवी ॥" इति । अत्र सीतां प्रति रामस्य भूतस्य नाग-पाशबन्धनादेः कार्य्यस्य कथनम् । शार्दूलविक्रीड़ितं वृत्तम् ।

(द) याञ्चामाह, याञ्चेति ।—स्वयं, वा दूतमुखेन क्वापि जने या याञ्चा—प्रार्थना, सा याञ्चा ।

(ध) दूतमुखेन उदाहरति, अद्यापीति ।—रावणं प्रति अङ्गदस्योक्तिरियम् । अद्यापि—इदानीमपि, वैदेहीं—सीतां, देहि—प्रत्यर्पय, राघवः,—रामः, त्वयि—आततायिनि, दयालुः, अस्तीति शेषः ; शिरोभिः,—रामबाणप्रहारेण निपतितैः मस्तकैः, दशभिरिति भावः, वानरान् किं—कथं, कन्दुकक्रीड़ां कारयसि ? वानरास्तव संग्राम-पतितैः शिरोभिः कन्दुकक्रीड़ां करिष्यन्ति, तत् कथं सहसे ? इति भावः । [अत्र "हृक्रोरन्यतरस्याम्" (१।४।५३ पा०) इति सूत्रेण "वानरान्" इति प्रयोज्यकर्त्तुः याचिकं कर्मत्वम्] स्वयं याञ्चाया उदाहरणम् ;—"भो लङ्केश्वर ! दीयतां जनकजा रामः स्वयं याचते" इत्यादि ।

(न) परिहारमाह, परिहार इति ।—कृतस्य अनुचितस्य, कर्मण इति शेषः, मार्जनं—तज्जन्यापराधक्षमापनं, परिहार इति प्रोक्तः ।

(प) उदाहरति, प्राणेति ।—रामं प्रति वालिन उक्तिः । प्राणप्रयाणे—प्राणान्तसमये, यत् दुःखं—यातना, तेन आर्त्तः,—व्यथितः सन्, यत् अनक्षरं—दुर-क्षरमित्यर्थः, उक्तवान्—"त्वया तपस्विचाण्डाल !" इत्यादि कटुवाक्यं कथितवान्, अस्मि, हे विभो !—श्रीराम ! तत् क्षमस्व ; किञ्च—अन्यच्च, सुग्रीवः,—मम कनीयान् भ्राता, ते—तुभ्यं, समर्पितः । अत्र अनुचितकार्य्यस्य पूर्वकृतस्य क्षमाप्रार्थनारूपं मार्जनम् ।

अवधीरितकर्त्तव्य-कथनन्तु निवेदनम् ॥५१०॥ (फ)

यथा राघवाभ्युदये,—"लक्ष्मणः। आर्य्ये! समुद्राभ्यर्थनया गन्तुमुद्यतोऽसि!! तत् किमेतत्?" (ब)

प्रवर्त्तनन्तु कार्य्यस्य यत् स्यात् साधु प्रवर्त्तनम् ॥५११॥(भ)

यथा वेण्यां,—"राजा। कञ्चुकिन्! देवस्य देवकीनन्दनस्य बहुमानात् वत्सस्य भीमसेनस्य विजयमङ्गलाय प्रवर्त्तन्ताम्; तत्रोपचिताः समारम्भाः।" (म)

आख्यानं पूर्ववृत्तोक्तिः ॥ ५१२ ॥ (य)

यथा तत्रैव,—"देशः सोऽयमरातिशोणितजलैर्यस्मिन् ह्रदाः पूरिताः" इत्यादि। (र)

(फ) निवेदनमाह, अवधीरितेति।—अवधीरितस्य—अवज्ञातस्य, तिरस्कृतविषयस्येति यावत्, कर्त्तव्यकथनं—कर्त्तव्यतेनाभिधानं, निवेदनम्।

(ब) उदाहरति, यथेति।—स्पष्टम्। अत्र समुद्राभ्यर्थनया गमनं चिरमवस्थानं, कथं पुनस्तद्वारा गमनमिति लक्ष्मणस्य तद्वारकं निवेदनम्।

(भ) प्रवर्त्तनमाह, प्रवर्त्तनमिति।—कार्य्यस्य यत् साधु प्रवर्त्तनं, तत् प्रवर्त्तनं स्यात्।

(म) उदाहरति यथेति।—उपचिताः,—वर्द्धिताः, समारम्भाः,—समुद्योगाः। अत्र युद्धकार्य्यस्य सम्यक् प्रवर्त्तनम्।

(य) आख्यानमाह, आख्यानमिति।—पूर्ववृत्तस्य—पुराघटितस्य, उक्तिः,—कथनम्, आख्यानम्।

(र) उदाहरति, यत्रेति।—तत्रैव—वेणीसंहारे एव। देश इति।—सः,—पुराणादौ श्रुतः, अयं—प्रत्यक्षः कुरुक्षेत्रैकदेशः, यस्मिन्—यत्रैकदेशे, समन्तपञ्चकनामके, ह्रदाः,—जलाशयाः, अरातीनां—शिबिरवधकर्त्तॄणां हैडियानां, शोणितानि जलानीव तैः पूरिताः। अत्यं पादत्रयं तु एतस्य,—"चपादेव तथाविधः परिभवस्तातस्य कैलासधृक्। तान्येवाद्रितनूजघर्घरगुरुस्यन्दीनि भास्वन्ति मे, यद्रामेण कृतं तदेव कुरुते द्रौपायनिः क्रोधनः॥" अत्र हैडियशोणितैः ह्रदपूरणादिकं पूर्ववृत्तात् स्फुटि। मार्दूलविक्रीडितं वृत्तम्।

युक्तिरर्थावधारणम् ॥ ५१३ ॥ (ख)

यथा तत्रैव,—

"यदि समरमपास्य नास्ति मृत्यो-
र्भयमिति युक्तमितोऽन्यतः प्रयातुम्।
अथ मरणमवश्यमेव जन्तोः
किमिति मुधा मलिनं यशः कुरुध्वम्?" ॥ (ग)

प्रहर्षः प्रमदाधिक्यम् ॥ ५१४ ॥ (घ)

यथा शाकुन्तले,—"राजा। तत् किमिदानीमात्मानं पूर्ण-मनोरथं नाभिनन्दामि?" (ङ)

शिक्षा स्यादुपदेशनम् ॥ ५१५ ॥ (च)

यथा तत्रैव,—"सहि! ण जुत्तं अम्हमवासिणो जणस्स अकिदसक्कारं अदिधिविसेसं उज्झिअ सच्छन्ददो गमणं"। (छ)

(ख) युक्तिमाह, युक्तिरिति।—अर्थस्य—प्रयोजनस्य, अवधारणं—कर्तव्यत्व-निश्चयः, युक्तिः।

(ग) उदाहरति, यदीति।—यदि समरं—युद्धम्, अपास्य—त्यक्त्वा, (स्थित-स्येत्यध्याहार्यं) मृत्योः भयं नास्ति—न भवेत् इत्यर्थः, तदा इतः,—समरात्, अन्यतः,—अन्यत्र, प्रयातुं—गन्तुं, युक्तम्—उचितम् इति। अथ—पक्षान्तरे, जन्तोः,—प्राणिनः, मरणम् अवश्यमेव—निश्चितमेव, भविष्यतीति शेषः, ("मृत्युर्जन्मवतां वीर! देहेन सह जायते। अद्य वाब्दशतान्ते वा मृत्युर्वै प्राणिनां ध्रुवः॥" इत्यादि भाग-वतवचनादिना तस्य समर्थितत्वात्) तदा किमिति—कथं, मुधा—वृथा, निष्कारण-मित्यर्थः, यशः मलिनं कुरुध्वम्? अत्र समरः कर्तव्य एवेत्यर्थावधारणम्। पुष्पितायां उक्तम्।

(घ) प्रहर्षमाह, प्रहर्ष इति।—प्रमदस्य—प्रकृष्टानन्दस्य, आधिक्यम्—औत्-कर्ष्यम्, अतिशय्यमिति यावत्, प्रहर्षः।

(ङ) उदाहरति, यथेति।—स्पष्टम्। अत्र शाकुन्तलायाः पुनः प्राप्तौ आनन्दातिशयः।

(च) शिक्षेति।—शिक्षा—शास्त्रविरोधि उपदेशवचनम्, उपदेशनम्।

(छ) उदाहरति, सहीति।—["सखि! न युक्तमाश्रमवासिनो जनस्याकृत-

एषाञ्च लक्षणं नाट्यालङ्काराणां सामान्यत एकरूपत्वेऽपि भेदेन व्यपदेशो गड्डलिकाप्रवाहेण। एषु च (क) केषाञ्चित् गुणालङ्कारभावसन्यङ्कविशेषान्तर्भावेऽपि नाटके प्रयत्नतः कर्त्तव्यत्वात् तद्विशेषोक्तिः। एतानि च, (ख)—

"पञ्चसन्धि चतुर्वृत्ति चतुःषष्ट्यङ्गसंयुतम्।
षट्त्रिंशल्लक्षणोपेतमलङ्कारोपशोभितम्॥
महारसं महाभोगमुदात्तरचनान्वितम्।
महापुरुषसञ्चारं साध्वाचारं जनप्रियम्॥
सुश्लिष्टसन्धियोगञ्च सुप्रयोगं सुखाश्रयम्।
मृदुशब्दातिपातञ्च कविः कुर्य्यात्तु नाटकम्॥" (ग)

सत्कारमतिथिविशेषमुज्झित्वा स्वच्छन्दतो गमनम्" इति संस्कृतम्]। अष्टम्। अत्र प्रकृतस्थां प्रति तत्सख्या उपदेशवाक्यम्।

(क) ननु भूषणादीनि यानि लक्षणान्युक्तानि, तानि नाट्यभूषणेतुल्यरूपसामान्यधर्मयोगेन नाट्यालङ्कारमध्ये एवान्तर्भवितुमर्हन्ति, तद्वेषां भिन्नत्वेनोपादानमनर्थकमित्यभिप्रायेणाह, एषामिति।—यदि च भूषणादीनि पूर्वोक्तानि नाट्यभूषणेतुल्यरूपसामान्यधर्मयोगात् नाट्यालङ्कारेऽन्तर्भवितुमर्हन्ति, तथाऽप्येषां भेदकथनं गड्डलिकाप्रवाहेण—गतानुगतिकन्यायेन इत्यर्थः, प्राचीनोक्तिरीत्येति भावः। ननु भूषणस्य यथायथं गुणेऽलङ्कारे च, श्रीभायाः श्लेषे, विशेषणस्य विशेषोक्त्यलङ्कारे, एवमाशीरादिनाट्यालङ्काराणामाशीरायलङ्कारेषु, तथा युक्त्यादीनां युक्त्यादिसन्ध्यङ्गेषु चान्तर्भावे सिद्धे पुनरुपादानमनर्थकमित्यत आह, एषु चेति।—एषु—लक्षणनाट्यालङ्कारेषु।

(ख) एतानीति।—एतानि—लक्षणादीनि, "नाटके अवश्यं कर्त्तव्यानि" इत्यर्थेनान्वयः।

(ग) पञ्चेति।—पञ्च सन्धयः,—मुखादयः यत्र तत्, चत्वारः वृत्तयः,—कौशिक्यादयः यत्र तत्, चतुःषष्ट्या अङ्गैः पूर्वोक्तैः संयुतं, षट्त्रिंशता लक्षणैः पूर्वोक्तैः, उपेतं—युक्तम्, अलङ्कारैः,—नाट्यालङ्कारैः पूर्वोक्तैः, उपशोभितं, महान्—परिपुष्ट इत्यर्थः, रसः,—शृङ्गारः वीरो वा यत्र तादृशं, महान् भोगः,—भावादिः यत्र तादृशं, महासङ्घाय वा, उदात्ता—विलासद्यादिगुणयुक्ता इति भावः, या रचना तया

इति मुनिनोक्तत्वात् नाटकेऽवश्यं कर्त्तव्यान्येव। वीथ्यङ्गानि वक्ष्यन्ते।

लास्याङ्गान्याह,—

गेयपदं स्थितपाठ्यमासीनं पुष्पगण्डिका।
प्रच्छेदकस्त्रिगूढ़ञ्च सैन्धवाख्यं द्विगूढ़कम्॥
उत्तमोत्तमकञ्चान्यदुक्तप्रत्युक्तमेव च।
लास्ये दशविधं ह्येतदङ्गमुक्तं मनीषिभिः॥५१६॥(घ)

तत्र,—

तन्त्रीभाण्डं पुरस्कृत्योपविष्टस्यासने पुरः।

अन्वितं—युक्तं, महापुरुषस्य—नायकप्रधानस्य, धीरोदात्तस्य इत्यर्थः, सञ्चारः,—स्थितिः यस्मिन् तथोक्तं, ["सञ्चारम्" इत्यत्र "सत्कारम्" इति वा पाठः; तत्र सत्कारः,—गुणवर्णनं यत्र इति विग्रहः] साधुः,—सद्भिरनुष्ठेय इत्यर्थः, आचारः,—व्यवहारः, यद्वा,—साधुः,—अविगीतः, आचारः,—वैदिकं कर्म यत्र तादृशं, जनप्रियं—लोकरञ्जनं, सुश्लिष्टः सन्धेः,—मुखादेः, योगः,—समावेशः यस्मिन् तथाभूतं, सुप्रयोगं—सुखाभिनयं, सुखाश्रयम्—आनन्दनिलयं, मृदुः,—सुकोमलः, शब्दानाम् अतिपातः,—प्रयोगः यस्मिन् तथाभूतम्, ["अतिपातः" इत्यत्र "अभिपातः" "अभिधानम्" इति च पाठान्तरम्] नाटकं कविः कुर्य्यादित्यन्वयः। अत एव मुनिना पुनरन्यत्र समर्थितं,—"चेक्रीयते प्रभृतिभिर्विकृतैश्च शब्दैर्युक्ता न भान्ति ललिता भरतप्रयोगाः। यज्ञक्रियेव शरवर्मधरैर्धृताक्तैः वेश्या द्विजैरिव कमण्डलुदण्डहस्तैः॥" इति। नाटकस्य प्राधान्यमपि तेनैव प्रतिपादितम्;—"न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला। न तत् कर्म न वा योगो नाटके यन्न दृश्यते॥" इति।

(घ) गेयपदमिति।—गेयपदादीनि दश लास्याङ्गानि मनीषिभिरुक्तानीत्यर्थः। "ताण्डवं नटनं नाट्यं लास्यं नृत्यञ्च नर्त्तने" इत्यमरेण नृत्यपर्य्याये लास्यशब्दः कथितः; अत्र तु गेयपदादिलक्षणेन लास्यशब्दस्य गानपरता तथा वक्ष्यमाणपुष्पगण्डिकालक्षणे—"आतोद्यमिश्रितं" "स्त्रीपुंसयोर्विपर्य्यासचेष्टितम्" इत्युक्तेः नृत्यगन्धिगानपरता च; तेन अत्र लास्यशब्देन नृत्य-गीत-वाद्यान्येव लक्ष्यन्ते इति; अत एवोक्तं मेदिनीकारेण "लास्यं तौर्य्यत्रिके मतम्" इति दिक्।

शुष्कं गानं गेयपदम् ॥ ५१७ ॥ (ङ)

यथा गौरीगृहे वीणां वादयन्ती मलयवती,—

"उत्फुल्लकमलकेसरपरागगौरद्युते ! मम हि गौरि !।
अभिवाञ्छितं प्रसिध्यतु भगवति ! युष्मत्प्रसादेन ॥" (च)

स्थितपाठ्यं तदुच्यते।

मदनोत्तापिता यत्र पठति प्राकृतं स्थिता॥५१८॥ (छ)

अभिनवगुप्तपादास्त्वाहुः,—"उपलक्षणञ्चैतत्; क्रोधोद्भ्रान्तस्यापि प्राकृतपठनं स्थितपाठ्यम्" इति।

निखिलातोद्यरहितं शोकचिन्ताऽन्विताऽबला।
अप्रसाधितगात्रं यदासीनासीनमेव तत् ॥५१९॥(ज)

(ङ) गेयपदमाह, तन्त्रीति।—तन्त्रीभाण्डं—वीणायन्त्रं, पुरस्कृत्य—अग्रेकृत्य, गानोपाधेयोगित्वेनाङ्गत्वेत्यर्थः, पुरः,—अग्रतः, आसने उपविष्टस्य यत् शुष्कं—शृङ्गारादिरसविरहितमित्यर्थः, गानं तत् गेयपदम्। उक्तञ्च भरतेन,—"आसनेनोपविष्टेर्यत् तन्त्रीभाण्डोपबृंहितम्। गायनैर्गीयते शुष्कं तत् गेयपदमुच्यते ॥" इति।

(च) उदाहरति, उत्फुल्लमिति।—उत्फुल्ल—विकसितं, यत् कमलं—पद्मं, तस्य केसरपरागवत्—किञ्जल्करजोरागवत्, गौरी—गौरवर्णा, द्युतिः,—दीप्तिः यस्यास्तादृशि! कनकप्रभे! इत्यर्थः, भगवति! गौरि!—पार्वति! युष्मत्प्रसादेन—भवत्याः अनुग्रहेण, मम अभिवाञ्छितं—प्रार्थितं, हि—निश्चितं, प्रसिध्यतु—सफलतामेतु। आर्या वृत्तम्। नागानन्दस्य पद्यमिदम्।

(छ) स्थितपाठ्यमाह, स्थितपाठ्यमिति।—यत्र मदनेन उत्तापिता स्थिता सती, प्राकृतं—यथायथमिति भावः, पठति, तत्—स्थानमित्यर्थः, स्थितपाठ्यम् उच्यते। यथा—विक्रमोर्वश्यामुर्वशीगानम्।

(ज) आसीनमाह, निखिलेति।—शोकेन चिन्तया चान्विता अबला अप्रसाधितम्—अनलङ्कृतं, गात्रं यस्मिन् तत् यथा तथा, आसीना—उपविष्टा सती, निखिलातोद्यरहितं—निखिलेन आतोद्येन—वाद्येन, ("चतुर्विधमिदं वाद्यं वाद्यिातोद्यनामकम्" इत्यमरः) रहितं, केनापि वाद्येन न सङ्गतमित्यर्थः, यत्, गायन्ति इति शेषः, तत् आसीनम्। उदाहरणमनूद्यम्।

आतोद्यमिश्रितं गेयं छन्दांसि विविधानि च।
स्त्रीपुंसयोर्विपर्य्यास-चेष्टितं पुष्पगण्डिका॥५२०॥(झ)
अन्यासङ्गं पतिं मत्वा प्रेमविच्छेदमन्युना।
वीणापुरःसरं गानं स्त्रियाः प्रच्छेदको मतः॥५२१॥(ञ)
स्त्रीवेशधारिणां पुंसां नाट्यं श्लक्ष्णं त्रिगूढ़कम्॥५२२॥ (ट)

यथा मालत्यां,—"मकरन्दः। एषोऽस्मि मालती संवृत्तः।"

कश्चन भ्रष्टसङ्केतः सुव्यक्तकरणान्वितः।
प्राकृतं वचनं वक्ति यत्र तत् सैन्धवं विदुः॥५२३॥(ठ)

करणं—वीणादिक्रिया।

(झ) पुष्पगण्डिकामाह, आतोद्येति।—आतोद्येन—वादित्रेण, मिश्रितं—सङ्गतं, गेयं, विविधानि—नानाप्रकाराणि, छन्दांसि—छन्दोबन्धनपूर्वकगीतानि इत्यर्थः, तथा स्त्रीपुंसयोः विपर्य्यासचेष्टितं—विपर्य्यासेन—वैपरीत्येन, चेष्टितं—नृत्यगीताद्यभिनयो यत्र तत्, वैपरीत्यप्रकटनमिति भावः, पुष्पगण्डिका। यदुक्तं भरतेन,—"नृत्यन्तु द्विविधं यत्र गीतमातोद्यमेव च। स्त्रियः पुंवच्च चेष्टन्ते सा ज्ञेया पुष्पगण्डिका॥" इति।

(ञ) प्रच्छेदकमाह, अन्येति।—पतिम् अन्यासङ्गम्—अन्यस्याम् आसक्तमित्यर्थः, मत्वा प्रेमविच्छेदेन यः मन्युः,—शोकः, तेन हेतुना स्त्रियाः वीणापुरःसरं गानं प्रच्छेदकः मतः। यथा शाकुन्तले,—"अहिणवमहुलोहभाविदो" इत्यादि। ["अभिनवमधुलोभभावितः" इति संस्कृतम्]।

(ट) त्रिगूढ़माह, स्त्रीति।—स्त्रीवेशधारिणां पुंसां श्लक्ष्णं—मनोज्ञं, नाट्यं—नर्त्तनादित्रिकं, त्रिगूढ़कं—त्रीणि नर्त्तनादीनि गूढ़ानि यत्र तथोक्तम्। अत्र पुंस्त्ववाक्य-भावानां त्रयाणां गोपनात् त्रिगूढ़त्वम्।

(ठ) सैन्धवमाह, कश्चनेति।—भ्रष्टसङ्केतः,—सङ्केतस्थाने नायिकाया अनागमनात् च्युतसङ्केतस्थान इत्यर्थः, सुव्यक्तेन—समग्रेणेत्यर्थः, करणेन—कामोद्दीपकवीणादिसाधनेनेत्यर्थः, अन्वितोऽपि कश्चन—कोऽपि पुरुषः, यत्र प्राकृतं वचनं वक्ति, तत् सैन्धवं विदुः। यथा उत्तरकाण्डे रावणधृतायाः रम्भायाः अनागमने नलकूबरः।

चतुरस्रपदं गीतं मुखप्रतिमुखान्वितम् ।
द्विगूढं रसभावाढ्यम् ॥ ५२४ ॥ (ड)

उत्तमोत्तमकं पुनः ।

कोपप्रसादजमधि-क्षेपयुक्तं रसोत्तरम् ।
हावहेलान्वितं चित्र-श्लोकबन्धमनोहरम् ॥५२५॥(ढ)
उक्तिप्रत्युक्तिसंयुक्तं सोपालम्भमलीकवत् ।
विलासान्वितगीतार्थमुक्तप्रत्युक्तमुच्यते ॥५२६॥ (ण)

स्पष्टान्युदाहरणानि ।

एतदेव यदा सर्वैः पताकास्थानकैर्युतम् ।
अङ्कैश्च दशभिर्धीरा महानाटकमूचिरे ॥५२७॥ (त)

(ड) द्विगूढमाह, चतुरस्रपदमिति ।—चतुरस्राणि—सामाजिकमनोहराणीति भावः, पदानि यत्र तादृशं, यद्वा,—चतुरस्रपदं—स्वरग्रामादिपूर्णं, मुखसन्धिप्रतिमुखसन्धिसमन्वितम्—उक्तिप्रत्युक्तिसहितं, रसभावाभ्याम् आढ्यं—पूर्णं चेति विशेषणत्रयविशिष्टं गीतं द्विगूढं, नाम ज्ञेयमिति शेषः ।

(ढ) उत्तमोत्तमकमाह, उत्तमोत्तमकमिति ।—कोपप्रसादाभ्यां जातम्, अधिक्षेपः,—तिरस्कारः, तद्युक्तं, रसोत्तरं—सरसमित्यर्थः, हावेन—"भ्रूनेत्रादिविकारैस्तु" इति लक्षणोक्तेन, हेलया—"हेलाऽत्यन्तसमालक्ष्य-विकारः स्यात् स एव च" इत्युक्तलक्षणेन भावविशेषेण, अन्वितं, चित्रेण—मनोज्ञेन, श्लोकबन्धेन—पद्यरचनेन, मनोहरं गीतं पुनः उत्तमोत्तमकम् ।

(ण) उक्तप्रत्युक्तमाह, उक्तीति ।—उक्तिप्रत्युक्तिभ्यां—वचनोत्तराभ्यां, संयुक्तं, सोपालम्भं—तिरस्कारव्यञ्जकम्, अलीकवत्—मृषावादसहितम्, अप्रियवद्वा, विलासेन अन्वितः,—युक्तः, गीतस्य अर्थः यत्र तादृशं, गीतम् उक्तप्रत्युक्तम् उच्यते । एतेषामुदाहरणानि सनातनगीता-गीतगोविन्दादौ यथायथं मृग्याणि ।

(त) महानाटकमाह, एतदिति ।—एतत्—नाटकम् एव, यदा सर्वैः,—पूर्वोक्तैः, पताकास्थानकैः दशभिरङ्कैश्च युतं, तदा धीराः,—विद्वांसः, महानाटकम् ऊचिरे—उक्तवन्तः ।

एतदेव नाटकम्। यथा,—बालरामायणम्।

अथ प्रकरणम्,—

भवेत् प्रकरणे वृत्तं लौकिकं कविकल्पितम्।
शृङ्गारोऽङ्गी नायकस्तु विप्रोऽमात्योऽथवा वणिक्।
सापायधर्मकामार्थ-परो धीरप्रशान्तकः ॥५२८॥ (थ)

विप्रनायकं यथा,—मृच्छकटिकम्। अमात्यनायकं,—मालतीमाधवम्। वणिङ्नायकं,—पुष्पभूषितम्।

नायिका कुलजा क्वापि वेश्या क्वापि द्वयं क्वचित्।
तेन भेदास्त्रयस्तस्य तत्र भेदस्तृतीयकः।
कितवद्यूतकारादि-विटचेटकसङ्कुलः ॥५२९॥ (द)

कुलस्त्री पुष्पभूषिते। वेश्या तु रङ्गदत्ते। द्वे अपि

(थ) नाटकमुक्त्वा प्रकरणमाह, अथेत्यादिना।—भवेदिति।—प्रकरणे वृत्तं—वर्णनीयं नायकचरितं, लौकिकं—लोकचरितमात्रप्रसिद्धम्, अत एव कविना कल्पितं—स्वबुद्धीश्वरचितमित्यर्थः, न तु पुराणादिप्रसिद्धं, भवेत्। शृङ्गारः अङ्गी—प्रधानम्। नायकः धीरप्रशान्तकः,—पूर्वोक्तलक्षणकः, सापायाः,—अपायः,—क्षयः, तत्सहिताः ये धर्माः,—स्वर्गसाधनभूताः, कामाः,—स्त्रीपुत्रादयः, अर्थाः,—भोगसाधनानि, धनादीनीति यावत्, तत्परः,—तदासक्तः, न तु अपायरहितमुक्तिकामीति भावः; धर्मस्य स्वर्गसाधनत्वेन, कामस्य पुत्रपत्न्यादिविषयकत्वेन, अर्थस्य भोगसाधनत्वेन सापायत्वं प्रविष्टम्।

(द) नायिकेति।—क्वापि—प्रकरणे, नायिका कुलजा—कुलीना, क्वापि वेश्या—गणिका, क्वचिद्वा द्वयं—कुलजा वेश्या चेत्यर्थः, तेन—नायिकाभेदेन, (हेतुना) तस्य—प्रकरणस्य, त्रयः भेदाः,—विशेषाः। तत्र—तेषु भेदेषु, तृतीयः भेदः,—यत्र कुलजा वेश्या च नायिका स इति भावः, कितवः,—धूर्तः, द्यूतकारः, [आदिपदेन सभिकादीनां ग्रहणं] तथा विटः,—पूर्वोक्तलक्षणकः, तथा चेटकः एते सङ्कुलः,—व्याप्तः।

टिकायाम्, अस्य नाटकप्रकृतित्वात् (ध)। शेषं नाटकवत्।

अथ भाणः,—

भाणः स्याद्धूर्त्तचरितो नानावस्थान्तरात्मकः।
एकाङ्क एक एवात्र निपुणः पण्डितो विटः॥
रङ्गे प्रकाशयेत् स्वेनानुभूतमितरेण वा।
सम्बोधनोक्तिप्रत्युक्ती कुर्य्यादाकाशभाषितैः॥
सूचयेद्वीरशृङ्गारौ शौर्य्यसौभाग्यवर्णनैः।
तत्रेतिवृत्तमुत्पाद्यं वृत्तिः प्रायेण भारती।
मुखनिर्वहणे सन्धी लास्याङ्गानि दशापि च॥५३०॥(न)

तत्र आकाशभाषितरूपं परवचनमपि स्वयमेवानुवदन्नुत्तर-प्रत्युत्तरे कुर्य्यात्। शृङ्गारवीररसौ च सौभाग्यशौर्य्यवर्णनया

(ध) अस्येति।—"विना विशेषं सर्वेषां खल्वस्य नाटकवन्मतम्" इत्युक्तेः अस्य—प्रकरणस्य, नाटकमेव प्रकृतिः,—मूलकारणं यस्य तथोक्तः, तस्य भावः तत्त्वात्।

(न) भाणमाह, भाण इति।—धूर्त्तस्य, नायकस्य इति शेषः, चरितं यत्र सः, नानाविधम् अवस्थान्तरं—कार्य्यसाधर्म्यभेदः, दशाभेदः वा, आत्मा—स्वरूपं यस्य तादृशः, [निरुक्तप्रहसनादिषष्ठविधावस्थातिरिक्तावस्थाभाव अलरूपदम्] तथा एकाङ्कः,—एकेनैव अङ्केन समापनीय इत्यर्थः, भाणः स्यात्। अत्र एक एव निपुणः,—चतुरः, पण्डितः विटः स्वेन—आत्मना, इतरेण वा अनुभूतं, वस्तु इति शेषः, रङ्गे—नाट्यशालायां, प्रकाशयेत्। आकाशभाषितैः सम्बोधनेन उक्तिप्रत्युक्ती कुर्य्यात्। शौर्य्यसौभाग्यवर्णनैः वीरशृङ्गारौ रसौ,—शौर्य्यवर्णनेन वीरं, सौभाग्यवर्णनेन शृङ्गार-मित्यर्थः, सूचयेत्, न तु प्रधानत्वेन प्रयुञ्जीतेति भावः। तत्र—भाणे, इतिवृत्तं—वर्णनीयं वस्तु, उत्पाद्यं—कविभिः कल्पनीयं, न तु पुराणादिप्रसिद्धमित्यर्थः, प्रायेण—बाहुल्येन, मुख्यत्वेन इत्यर्थः, भारती वृत्तिः, मुखं निर्वहणञ्चेत्तौ सन्धी, तथा लास्याङ्गानि दशापि, प्रयोज्यानीति शेषः।

सूचयेत्। प्रायो भारती, क्वापि कौशिक्यपि वृत्तिर्भवति। लास्याङ्गानि—गेयपदादीनि। उदाहरणं,—लीलामधुकरः।

अथ व्यायोगः,—

ख्यातेतिवृत्तो व्यायोगः स्वल्पस्त्रीजनसंयुतः।
हीनो गर्भविमर्षाभ्यां नरैर्बहुभिराश्रितः॥
एकाङ्कश्च भवेदस्त्री-निमित्तसमरोदयः।
कौशिकीवृत्तिरहितः प्रख्यातस्तत्र नायकः॥
राजर्षिरथ दिव्यो वा भवेद्धीरोद्धतश्च सः।
हास्यशृङ्गारशान्तेभ्य इतरेऽत्राङ्गिनो रसाः॥५३१॥(प)

यथा,—सौगन्धिकाहरणम्।

अथ समवकारः,—

वृत्तं समवकारे तु ख्यातं देवासुराश्रयम्।
सन्धयो निर्विमर्षास्तु त्रयोऽङ्कास्तत्र चादिमे॥
सन्धी द्वावन्त्ययोस्तद्वदेक एको भवेत् पुनः।
नायका द्वादशोदात्ताः प्रख्याता देवमानवाः॥
फलं पृथक् पृथक् तेषां वीरमुख्योऽखिलो रसः।
वृत्तयो मन्दकौशिक्यो नात्र विन्दुप्रवेशकौ॥

(प) व्यायोगमाह, ख्यातेतिवृत्त इति।—ख्यातं—पुराणादिषु प्रसिद्धम्, इतिवृत्तं यस्य यत्र वा तादृशः, व्यायुज्यन्तेऽस्मिन् बहवः पुरुषा इति व्यायोगः, गर्भविमर्षाभ्यां—तृतीयचतुर्थसन्धिभ्यां, हीनः,—गर्भविमर्षसन्धिरहित इत्यर्थः। अस्त्रीनिमित्तसमरोदयः,—स्त्रीनिमित्तं विना समरस्य—सङ्ग्रामस्य, उदयः,—उपस्थितिः यस्मिन् तथाभूतः; यथा—परशुरामस्य पितुर्वधं निमित्तीकृत्य हैहयवंश्यैः समं समरे प्रवृत्तिरिति बोध्यम्। कौशिकीति।—कौशिक्या वृत्त्या रहितः, अत्र कौशिकीं वृत्तिं परित्यज्य अन्यया कयाऽपि वृत्त्या बन्धनं कुर्य्यात् इत्यर्थः। अन्यत् सुगमम्।

वीथ्यङ्गानि च तत्र स्युर्यथालाभं त्रयोदश।
गायत्र्युष्णिङ्मुखान्यत्र छन्दांसि विविधानि च॥
त्रिशृङ्गारस्त्रिकपटः कार्य्यश्चायं त्रिविद्रवः।
वस्तु द्वादशनाड़ीभिर्निष्पाद्यं प्रथमाङ्कगम्॥
द्वितीयेऽङ्के चतसृभिर्द्वाभ्यामङ्के तृतीयके॥५३२॥ (फ)

नाड़िका—घटिकाद्वयमुच्यते। विन्दुप्रवेशकौ च नाटकोक्तौ अपि नेह विधातव्यौ।

तत्र,—

धर्मार्थकामैस्त्रिविधः शृङ्गारः, कपटः पुनः।

(फ) समवकारमाह, वृत्तमिति।—देवासुराश्रयं—देवासुरसम्बद्धम्। निर्विमर्षाः,—विमर्षरहिताः, सन्धयः,—चतुर्थसन्धिं विना चत्वारः सन्धयः प्रयोज्या इत्यर्थः; अङ्काः,—तदाख्याः परिच्छेदाः, त्रयः, तत्र आदिमे अङ्के, द्वौ सन्धी—मुखप्रतिमुखे इति भावः, अन्त्ययोः,—द्वितीयतृतीययोरङ्कयोरित्यर्थः, एकः एकः,—गर्भः निर्वहणञ्च इत्यर्थः, सन्धिरिति शेषः, भवेत्। उदात्ताः,—धीरोदात्ताः, देवमानवाः,—दिव्यादिव्याः इत्यर्थः, ["देवमानवाः" इत्यत्र "देवदानवाः" इति पाठान्तरम्] तेषां—नायकानां, पृथक् पृथक्—भिन्नं भिन्नं, फलम्। अखिलः,—समग्रः, रसः वीरमुख्यः,—वीररस एव अङ्गी, अन्ये अङ्गानीति भावः। मन्दकौशिक्यः,—मन्दा कौशिकी यासु ताः, प्रायेण कौशिकीहीना इत्यर्थः। गायत्रीति।—गायत्री—षड़क्षरा वृत्तिः, उष्णिक्—सप्ताक्षरा वृत्तिः, तत्प्रभृतीनि। विद्रवः,—गर्भसन्ध्यङ्गं, स च शङ्काभयत्रासकृतः सम्भ्रमः, नाटकप्रकृतित्वादेव विद्रवप्राप्तौ प्रकारत्रयस्यावश्यकत्वार्थमिदं वचनम्। द्वादशनाड़ीभिः,—चतुर्विंशतिघटिकाभिः, (उक्तञ्च दशरूपकक्रता,—"द्विसन्धिरङ्कः प्रथमः कार्य्यो द्वादशनालिकः। चतुर्द्विनालिकावन्त्यौ नालिका घटिकाद्वयम्॥" इति) प्रथमाङ्कगं—प्रथमाङ्कनिविष्टं वस्तु, निष्पाद्यं—सम्पादनीयम्। द्वितीयेऽङ्के चतसृभिः, नाड़ीभिः इति शेषः, घटिकाऽष्टकेन वस्तु निष्पाद्यमिति भावः, ["चतसृभिः" इत्यत्र "च तिसृभिः" इति पाठान्तरम्] तथा तृतीये अङ्के द्वाभ्यां, नाड़ीभ्याम् इति शेषः, चतुर्भिः घटिकाभिरिति भावः, तत्रत्यं वस्तु निष्पाद्यमिति शेषः।

स्वाभाविकः कृत्रिमश्च दैवजो विद्रवः पुनः ॥
अचेतनैश्चेतनैश्च चेतनाचेतनैः कृतः ॥ ५३३ ॥ (ब)

अत्र शास्त्राविरोधेन कृतो धर्मशृङ्गारः। अर्थलाभार्थकल्पितः अर्थशृङ्गारः। प्रहसनशृङ्गारः कामशृङ्गारः। तत्र कामशृङ्गारः प्रथमाङ्के एव ; अन्ययोस्तु न नियम इत्याहुः। चेतनाचेतनाः,—गजादयः। समवकीर्य्यन्ते (भ) बहवोऽर्था अस्मिन्निति समवकारः। यथा,—समुद्रमथनम्।

अथ डिमः,—

मायेन्द्रजालसङ्ग्राम-क्रोधोद्भ्रान्तादिचेष्टितैः।
उपरागैश्च भूयिष्ठो डिमः ख्यातेतिवृत्तकः ॥
अङ्गी रौद्ररसस्तत्र सर्वेऽङ्गानि रसाः पुनः।
चत्वारोऽङ्का मता नेह विष्कम्भकप्रवेशकौ ॥

(ब) शृङ्गारस्य कपटस्य विद्रवस्य च त्रैविध्यं दर्शयति, धर्मार्थेति।—शृङ्गारः धर्मार्थकामैः त्रिविधः,—धर्मशृङ्गारः, अर्थशृङ्गारः, कामशृङ्गारश्चेत्यर्थः ; कपटः,—कपटाचरणं पुनः, स्वाभाविकः, कृत्रिमः, दैवजः,—दैवेन जनितः इति त्रिविधः। विद्रवः,—शङ्का भय-त्रासकृतः सम्भ्रमः पुनः, अचेतनकृतः, चेतनकृतः, तथा चेतनाचेतनकृत इति त्रिविधः। दशरूपककारस्त्वाह,—"प्रत्यङ्कञ्च यथासङ्ख्यं कपटाः। तथा नगरोपरोधयुद्धवाताग्न्यादिविद्रवाणां मध्ये एकैको विद्रवः कार्य्यः। धर्मार्थकामशृङ्गाराणामेकैकः शृङ्गारः प्रत्यङ्कमेव विधातव्यः" इति। "अङ्कास्त्रयस्तत्र चाद्ये मुखप्रतिमुखौ तथा। वस्तुस्वभावदैवारि-कृताः स्युः कपटास्त्रयः। कथामपि निबध्नीयात् तथा द्वादशनालिकाम्। द्वितीयेऽङ्केऽपि च चतुर्नालिकावधिकां कथाम्। पुररोधरणाग्न्यादि-निमित्ता विद्रवास्त्रयः॥ तृतीयेऽङ्के निबद्धव्या कथा चापि द्विनालिका। धर्मार्थकामानुगुणास्तस्रः शृङ्गाररीतयः॥" इति च मन्दारमकरन्दकारः।

(भ) धर्मशृङ्गार इति।—निषिद्धकाले निषिद्धयोषिति कृतः शृङ्गारः शास्त्रविरुद्धः, तदितरो धर्मशृङ्गारः इत्यर्थः। समवकीर्य्यन्ते—सम्यक् प्रयुज्यन्ते, निबध्यन्ते इत्यर्थः।

नायका देवगन्धर्व-यक्षरक्षोमहोरगाः।
भूतप्रेतपिशाचाद्याः षोड़शात्यन्तमुद्धताः॥
वृत्तयः कौशिकीहीना निर्विमर्षाश्च सन्धयः।
दीप्ताः स्युः षड्रसाः शान्त-हास्यशृङ्गारवर्जिताः॥५२४॥(म)

अत्रोदाहरणञ्च.—"त्रिपुरदाहः" इति महर्षिः।

अथ ईहामृगः,—

ईहामृगो मिश्रवृत्तश्चतुरङ्कः प्रकीर्त्तितः।
मुखप्रतिमुखे सन्धी तत्र निर्वहणं तथा॥
नरदिव्यावनियमौ नायकप्रतिनायकौ।
ख्यातौ धीरोद्धतावन्यो गूढ़भावादयुक्तकृत्॥
दिव्यस्त्रियमनिच्छन्तोमपहारादिनेच्छतः।
शृङ्गाराभासमप्यस्य किञ्चित् किञ्चित् प्रदर्शयेत्॥
पताकानायका दिव्या मर्त्या वाऽपि दशोद्धताः।
युद्धमानीय संरम्भं परं व्याजान्निवर्त्तते॥
महात्मानो वधप्राप्ता अपि वध्याः स्युरत्र नो॥
एकाङ्को देव एवात्र नेतेत्याहुः परे पुनः।
दिव्यस्त्रीहेतुकं युद्धं नायकाः षड़ितीतरे॥५२५॥(य)

(म) त्रिपुरदाहः, यथेति।—उपरागैः,—चन्द्रसूर्य्यग्रहैः, चकारेण निर्घातोल्कापातधूमकेतूदयाद्यैः, भूयिष्ठः,—बहुलः। ख्यातेति।—ख्यातं—पुराणादिप्रसिद्धम्, इतिवृत्तं यस्य तादृशः। इह—त्रिषु इत्यर्थः। दीप्ताः,—उज्ज्वलाः, विभावादिसामर्थ्यवशेन झटिति प्रतीयमाना इति भावः। अन्यत् स्पष्टम्।

(य) ईहामृगमाह, यथेति।—मिश्रवृत्तः,—ख्याताख्यातेतिवृत्तः।—अनियतौ

मिश्रं—ख्याताख्यातम् । अन्यः,—प्रतिनायकः । पताका-नायकास्तु नायकप्रतिनायकयोर्मिलिता दश । नायको मृगवत् अलभ्यां नायिकामत्र ईहते—वाञ्छतीति ईहामृगः । यथा,—कुसुमशेखरविजयादिः ।

अथ अङ्कः,—

उत्सृष्टिकाङ्क एकाङ्को नेतारः प्राकृता नराः ।
रसोऽत्र करुणः स्थायी बहुस्त्रीपरिदेवितम् ॥
प्रख्यातमितिवृत्तञ्च कविर्बुद्ध्या प्रपञ्चयेत् ।
भाणवत् सन्धिवृत्ताङ्गान्यस्मिन् जयपराजयौ ॥
युद्धञ्च वाचा कर्त्तव्यं निर्वेदवचनं बहु ॥ ५३६ ॥ (र)

—नियमवर्जितौ, क्वचित् नरो नायकः प्रतिनायको वा, क्वचित् दिव्यः नायकः प्रतिनायको वा इति नायकप्रतिनायकयोर्नियमो नास्तीति भावः । अन्यः,—प्रतिनायकः, गूढभावात्,—गोपनभावात्, अयुक्तकृत्—अनुचितकार्य्यकारीत्यर्थः । अपहारादिना—बलात्कारादिना, [आदिपदेन छलादिपरिग्रहः] परं—शत्रुं, प्रतिनायकमित्यर्थः, संरम्भं—क्रोधम्, आनीय—प्रापय्य, क्रुद्धं कृत्वेत्यर्थः, स्थितस्य नायकस्येति शेषः, व्याजात्—कार्य्यान्तरच्छलात् । ["निवर्त्तते" इत्यत्र "निवर्त्तयेत्" इति पाठे—परं युद्धस्थानमानीय संरम्भं निवर्त्तयेदित्यर्थः] महात्मान इति ।—वधप्राप्ताः—वधप्राप्तियोग्या अपीत्यर्थः ; प्रतिनायकानां वधे पुराणादिप्रसिद्धेऽपि स न वर्णनीय इति भावः । अन्यत् सुगमम् ।

(र) अङ्कमाह, उत्सृष्टिकेति ।—उत्सृष्टिकाङ्कः,—अङ्कस्यैव नामान्तरमेतत् । प्राकृताः,—सामान्याः, नातिमहान्त इत्यर्थः ; अत्र करुणो रसः स्थायी—स्थिरतरः, प्रधानभूत इति यावत् ; अत एव बह्वीनां स्त्रीणां परिदेवितं—विलापः, तथा प्रख्यातं—प्रसिद्धम्, इतिवृत्तम् । प्रपञ्चयेत्—बहुलीकुर्य्यात् । अत एवोक्तं "प्रख्यातवस्तुविषयस्त्वप्रख्यातः कदाचिदेव स्यात् । दिव्यपुरुषैर्वियुक्तः शेषैरन्यैर्भवेत् पुम्भिः ॥" इति । भाणवदिति ।—भाणे यथा मुखनिर्वहणे सन्धी, कौशिकी-भारत्यौ वृत्ती, दश लास्याङ्गानि, तथाऽत्रापीत्यर्थः । अस्मिन्—अङ्के, जयपराजयौ वाचा वर्णनीयौ ; अत एवोक्तं,—"वाचा युद्धं विधातव्यं तथा जयपराजयौ" इति । अन्यत् स्पष्टम् ।

इमञ्च केचित्,—"नाटकाद्यन्तःपात्यङ्कपरिच्छेदार्थम् उत्सृष्टिकाङ्कनामानम्" आहुः। अन्ये तु,—"उत्क्रान्ता—विलोमरूपा, सृष्टिर्यत्र" इति। उत्सृष्टिकाङ्कः यथा,—शर्मिष्ठाययातिः।

अथ वीथी,—

वीथ्यामेको भवेदङ्कः कश्चिदेकोऽत्र कल्प्यते।
आकाशभाषितैरुक्तैश्चित्रां प्रत्युक्तिमाश्रितः।
सूचयेद्भूरिशृङ्गारं किञ्चिदन्यान् रसानपि।
मुखनिर्वहणे सन्धी अर्थप्रकृतयोऽखिलाः॥५३७॥(ल)

कश्चिदिति—उत्तमो मध्यमोऽधमो वा। शृङ्गारबहुलत्वाच्च अस्याः कौशिकीवृत्तिबहुलत्वम्।

अस्यास्त्रयोदशाङ्गानि निर्दिशन्ति मनीषिणः
उद्घात्यकावलगिते प्रपञ्चस्त्रिगतं छलम्॥
वाक्केल्यधिबले गण्डमवस्यन्दितनालिके।
असत्प्रलापव्याहार-मृदवानि च तानि तु॥५३८॥(व)

तत्र उद्घात्यकावलगिते प्रस्तावनाप्रस्तावे सोदाहरणं लक्षिते।

(ल) वीथीमाह, अथेति।—अत्र—वीथ्याम्,एकः,—अद्वितीय इत्यर्थः, कश्चित्, नायक इति शेषः, कल्प्यते—निबध्यते। अखिलाः,—समग्राः, पञ्चेति भावः, अर्थप्रकृतयः,—बीजादयः, प्रयोज्या इति शेषः। दशरूपककारस्त्वाह,—"वीथी तु कौशिकी वृत्तिः सन्ध्यङ्काङ्कैस्तु भाणवत्। रसः सूच्यस्तु शृङ्गारः स्पृशेदपि रसान्तरम्॥ युक्ता प्रस्तावना ख्यातैरङ्कैरुद्घात्यकादिभिः। एवं वीथी विधातव्या द्व्येकपात्रप्रयोजिता॥" इति।

(व) अस्या इति।—अस्याः,—वीथ्याः, त्रयोदश अङ्गानि मनीषिणः,—विद्वांसः, निर्दिशन्ति—प्राहुरित्यर्थः। तान्येव नामतो गणयति,—उद्घात्यकम्, अवलगितं, प्रपञ्चः, त्रिगतं, छलं, वाक्केलिः, अधिबलं, गण्डम्, अवस्यन्दितं, नालिकम्, असत्प्रलापः, व्याहारः, मृदवं चेति।

मिथो वाक्यमसद्भूतं प्रपञ्चो हास्यकृन्मतः ॥५३९॥ (श)

यथा विक्रमोर्वश्याम्;—बड़भीस्थविदूषकचेट्योरन्योऽन्यवचनम् ।

त्रिगतं स्यादनेकार्थ-योजनं श्रुतिसाम्यतः ॥५४०॥ (ष)

यथा तत्रैव,—"राजा ।—

सर्वक्षितिभृतां नाथ ! दृष्टा सर्वाङ्गसुन्दरी ।

रामा रम्ये वनान्तेऽस्मिन् मया विरहिता त्वया ? ॥" (स)

नेपथ्ये तथैव प्रतिशब्दः । "राजा । कथं दृष्टेत्याह" । अत्र प्रश्नवाक्यमेवोत्तरत्वेन योजितम् । "नटादित्रितयविषयमेवेदम्" (ह) इति कश्चित् ।

(श) प्रपञ्चमाह, मिथ इति ।—मिथः,—परस्परं, हास्यकृत्—हास्यजनकम्, असद्भूतं—मिथ्याभूतं, वाक्यं प्रपञ्चः ।

(ष) त्रिगतमाह, त्रिगतमिति ।—श्रुतिसाम्यतः,—शब्दसादृश्यात्, अनेकार्थयोजनं—बह्वर्थे कल्पनं, त्रिगतं स्यात् ।

(स) उदाहरति, सर्वेति ।—पर्वतं प्रति उर्वशीविरहितस्य पुरूरवसः प्रश्नात्मिकेयमुक्तिः, अर्थान्तरयोजनेन राजानं प्रति पर्वतस्यापि प्रतिध्वनिना तत्प्रतिवचनरूपा च प्रत्युक्तिरियम् । हे सर्वक्षितिभृतां—सर्वेषां पर्वतानां, नाथ !—श्रेष्ठ ! अस्मिन् रम्ये—सुभगे, वनान्ते—वनमध्ये, त्वया सर्वाङ्गसुन्दरी—सर्वावयवशोभना, अत्युत्कृष्टरूपा इत्यर्थः, मया विरहिता—मया वियुक्ता, रामा—उर्वशीत्यर्थः, दृष्टा ?—अवलोकिता ? (इति प्रश्नपक्षः ; उत्तरपक्षे पुनः,—) हे सर्वक्षितिभृतां नाथ !—निखिलक्षितिपश्रेष्ठ ! मया कर्त्रा त्वया विरहिता रामा दृष्टा इत्येवं व्याख्येयम्, अन्यत् समानम् । अत्रास्य वाक्यस्य प्रतिध्वनेश्च साम्यात् "सर्वक्षितिभृतां नाथ !" इत्यस्य पर्वतश्रेष्ठ-राजश्रेष्ठरूपार्थद्वयघटितत्वेन, तथा "त्वया" इतिपदस्य प्रश्नपक्षे "दृष्टा" इति क्रियायां कर्तृत्वेनान्वयः, "मया" इत्यस्य च विरहिता-पदेनान्वयः ; उत्तरपक्षे तु —"त्वया" इत्यस्य विरहितेतिपदेन, "मया" इत्यस्य च दर्शनक्रियायां कर्तृत्वेनान्वयः इति चोभयार्थप्रतिपादनेन अनेकार्थयोजनं बोध्यम् ।

(ह) त्रिगतपदव्युत्पत्तिमाह, नटादीति ।—आदिना नटीप्रतिनटयोर्ग्रहणम् । इदं—त्रिगतम् । तथाऽऽह दशरूपककारः,—"श्रुतिसाम्यादनेकार्थयोजनं त्रिगतन्त्विह । नटादित्रितयालापः पूर्वरङ्गे तदिष्यते ॥" इति ।

प्रियाभैरप्रियैर्वाक्यैर्विलोभ्य च्छलना च्छलम् ॥५४१॥(क)

यथा वेण्यां,—"भीमार्जुनौ ।—

कर्त्ता द्यूतच्छलानां जतुमयशरणोद्दीपनः सोऽभिमानी
कृष्णाकेशोत्तरीयव्यपनयनपटुः पाण्डवा यस्य दासाः ।
राजा दुःशासनादेर्गुरुरनुजशतस्याङ्गराजस्य मित्रं
क्वास्ते दुर्य्योधनोऽसौ ? कथयत न रुषा द्रष्टुमभ्यागतौ स्वः ॥"(ख)

अन्ये त्वाहुश्छलं किञ्चित् कार्य्यमुद्दिश्य कस्यचित् ।
उदीर्य्यते यद्वचनं वञ्चनाहास्यरोषकृत् ॥५४२॥ (ग)

(क) छलमाह, प्रियाभैरिति ।—प्रियाभैः—प्रियसदृशैः, अप्रियैः वाक्यैः विलोभ्य छलना—परप्रतारणा, छलम् । तथोक्तम् ;—"छलन्तु च्छलनावाक्यैः प्रियाभैरप्रियैः स्वतः" इति ।

(ख) उदाहरति, कर्त्तेति ।—भृत्यान् प्रति भीमसेनस्योक्तिरियम् । द्यूतच्छलानां—द्यूतक्रीडारूपकपटानां, कर्त्ता, जतुमयं—जतुप्रचुरं, [प्रचुरार्थे मयट्] यत् शरणं—गृहं, ("शरणं गृहरक्षित्रोः" इत्यमरः) तस्य उद्दीपनः,—विरोचनद्वारा जतुगृहदाहक इत्यर्थः, अभिमानी—अहङ्कारवान्, कृष्णायाः,—द्रौपद्याः, केशानाम् उत्तरीयस्य च व्यपनयने—आकर्षणे, पटुः,—नियोजयिता इत्यर्थः, ["व्यपनयनपटुः" इत्यत्र "व्यपनयनमरुत्" इति पाठे—व्यपनयने—अपसारणे, मरुत्—वायुस्वरूपः] पाण्डवाः,—युधिष्ठिरादयः, यस्य दासाः,—किङ्कराः, द्यूतजयेन दासत्वेन सम्भाषिता इति भावः ; दुःशासनादेः,—दुःशासनप्रभृतिकस्य, अनुजशतस्य—कनिष्ठभ्रातृशतस्य, गुरुः, अङ्गराजस्य—कर्णस्य, मित्रं—बन्धुः, सः,—प्रसिद्धः, असौ राजा दुर्य्योधनः क्व—कुत्र, आस्ते ?—तिष्ठति ? कथयत, यूयमिति शेषः ; रुषा—क्रोधेन, द्रष्टुं—तं साक्षात्कर्त्तुं, न अभ्यागतौ—उपस्थितौ, स्वः,—भवावः, आवामिति शेषः । द्यूतच्छलादिकर्त्तृत्वकथनेन अप्रियाभत्वं, तथा "न रुषा द्रष्टुमभ्यागतौ" इति वाक्ये तु प्रियाभत्वम् इत्युभाभ्यां दुर्य्योधनं प्रति छलना । स्रग्धरा वृत्तम् ।

(ग) मतान्तरेण छलमाह, अन्ये त्विति ।—किञ्चित् कार्य्यमुद्दिश्य कस्यचित् वञ्चनाहास्यरोषकरं यत् वचनम् उदीर्य्यते—कथ्यते, अन्ये—अपरे पण्डितास्तु, तत् छलम् आहुः,—कथयन्ति । उदाहरणम् अनुसन्धेयम् ।

वाक्केलिर्हास्यसम्बन्धो द्वित्रिप्रत्युक्तितो भवेत्॥५४३॥(घ)

द्वित्रीत्युपलक्षणम्; यथा,—

"भिक्षो! मांसनिषेवणं प्रकुरुषे? किं तेन मद्यं विना?
मद्यञ्चापि तव प्रियम्? प्रियमहो! वाराङ्गनाभिः सह।
वेश्याऽप्यर्थरुचिः, कुतस्तव धनम्? द्यूतेन चौर्य्येण वा,
चौर्य्यद्यूतपरिग्रहोऽपि भवतः? नष्टस्य काऽन्या गतिः॥" (ङ)

केचित्,—"प्रक्रान्तवाक्यस्य साकाङ्क्षस्यैव निवृत्तिर्वाक्केलिः" इत्याहुः। अन्ये च,—"अनेकस्य प्रश्नस्यैकमुत्तरम्।"

अन्योऽन्यवाक्याधिक्योक्तिः स्पर्द्धयाऽधिबलं मतम्॥५४४(च)

यथा मम प्रभावत्यां,—"वज्रनाभः।—

अस्य वक्षः क्षणेनैव निर्मथ्य गदयाऽनया।
लीलयोन्मूलयाम्येव भुवनद्वयमद्य वः॥ (छ)

(घ) वाक्केलिमाह, वाक्केलिरिति।—द्वे वा तिस्रो वा प्रत्युक्तयः,—प्रतिवचनानि ताभ्यः, [समासप्रत्ययानामनित्यत्वादत्र डच्प्रत्ययाभावः] यः हास्यसम्बन्धः, स वाक्केलिर्भवेत्। अनेकवाक्यस्यैकमुत्तरं वाक्केलिरिति भावः। तथाऽऽह,—"विनिवृत्त्याऽस्य वाक्केलिर्द्वित्रिःप्रत्युक्तितोऽपि वा" इति।

(ङ) उदाहरति, भिक्षो इति।—हे भिक्षो! मांसनिषेवणं—मांसभोजनं, प्रकुरुषे? (इति प्रश्नः); मद्यं विना तेन—मांसेन, किम्? (इत्युत्तरम्) मद्यसहितमांसभोजनमेव रुचिकरमित्यर्थः; मद्यञ्चापि तव प्रियम्? (इति प्रश्नः); अहो! प्रियं सत्यं, परन्तु वाराङ्गनाभिः सह (इत्युत्तरम्); विना वेश्याभिर्मद्यमपि न प्रीतिकरमित्यर्थः; वेश्या—वाराङ्गना, अपि, अर्थरुचिः,—अर्थाभिलाषिणी, (त्वन्तु भिक्षुः) कुतस्तव धनम्? आयातीति शेषः, (इति प्रश्नः); द्यूतेन चौर्य्येण वा, धनम् उपार्ज्यते मयेति शेषः, (इत्युत्तरम्); भवतः चौर्य्यद्यूतयोरपि परिग्रहः,—स्वीकारः? वर्त्तते इति शेषः, (इति प्रश्नः); नष्टस्य—आचारभ्रष्टस्य, अन्या—अपरा, गतिः,—सरणिः, का?—न काऽपीत्यर्थः, (इत्युत्तरम्)। अत्र उक्तिप्रत्युक्तितः वाक्केलिः स्पष्टार्था।

(च) अधिबलमाह, अन्योऽन्येति।—स्पर्द्धया—अहङ्कारेण, अन्योऽन्यं—परस्परं, वाक्यस्य आधिक्येन—अतिशयेन, उक्तिः अधिबलं मतम्।

(छ) उदाहरति, अस्येति।—अस्य—प्रद्युम्नस्य, वक्षः क्षणेनैव अनया—हस्त-

प्रथमः। अरे रे असुरापसद! (ङ) अलमसुना बहुप्रलापेन; मम खलु,—

यस्य प्रचण्डभुजदण्डसमर्पितोरु-
कोदण्डनिर्गलितकाण्डसमूहपातैः।
आस्तां समस्तदितिजव्रततोऽपि तेषां
कीर्णो जगेन पिशिताशनलोभनीया॥" (ञ)

गण्डं प्रस्तुतसम्बन्धि भिन्नार्थं सत्वरं वचः॥५४५॥(ञ)

यथा वेण्यां,—"राजा।—

लोलांशुकस्य पवनाकुलितांशुकान्तं
त्वद्दृष्टिहारि मम लोचनबान्धवस्य।
अध्यासितं तव चिराज्जघनस्थलस्य
पर्य्याप्तमेव करभोरु! ममोरुयुग्मम्॥" (ट)

क्षितयेति भावः, गदया निर्मथ्य—चूर्णयित्वेत्यर्थः, लीलया—अवहेलया, अद्य वः,—युष्माकं, दैवानामिति यावत्, [वनादरे षष्ठी] युष्माननादृत्येत्यर्थः, भुवनत्रयं—स्वर्गं पृथिवीञ्च, खलु पातालवासित्वादिति भावः, उत्पाटयाम्येव—उत्पाटयाम्येव।

(ङ) असुरापसद!—असुराधम!

(ञ) अथेति।—प्रचण्डभुजदण्डे—भीषणबाहुदण्डे, समर्पितात्—निहितात्, क्षेपितादिति यावत्, उरुकोदण्डात्—महाधनुषः, निर्गलितानां—निःसृतानां, काण्डानां—शराणां, समूहस्य पातैः,—क्षेपैः, इयं लीला—पृच्छा, जगेन—जगत्यजालेन, समस्तानां दितिजानां—दैत्यानां, व्रततेः,—वृन्दैः, लक्षिता—अभिलषणीया, स्तनी, पिशिताशनानां—मांसभोजिनां, लोभनीया—अभिलषणीया, दर्शनदर्शिनीत्यर्थः, आस्तां—भवतु। पक्षद्वये परस्परसङ्गत्या बाधिकाख्यापनम्। वक्रोक्तिरलङ्कारः।

(ट) उदाहरति, लोलांशुकेति।—भानुमतीं प्रति दुर्योधनस्योक्तिः। हे करभोरु!—करभाविवोरू यस्यास्तत्सम्बुद्धौ! लोलं—चञ्चलं, पवनेन दोलायमानमित्यर्थः, अंशुकं—वस्त्रं यस्य तस्य लोलांशुकस्य, मम लोचनबान्धवस्य तादृशस्य, तव [लक्षणलक्षितस्य], जघनस्थलस्य चिरात्—चिरकालादपि, अध्यासितम्—अधिष्ठितम्,

अनन्तरं प्रविश्य,—"कञ्चुकी। देव! भग्गं भग्गम्" इत्यादि।

अत्र रथकेतनभङ्गार्थं वचनमूरुभङ्गार्थे सम्बद्धे सम्बद्धम्। (ठ)

व्याख्यानं स्वरसोक्तस्यान्यथाऽवस्यन्दितं भवेत्॥५४६॥ (ड)

यथा छलितरामे,—"सीता।—जाद! कल्लं क्खु अओज्झाए गंतव्वं, तहिं सो राआ विणएण पणयिदव्वा।" लवः।—"अथ किमावाभ्यां राजोपजीविभ्यां भवितव्यम्?" सीता।—"जाद! सो क्खु तुह्माणं पिदा।" लवः।—"किमावयोः रघुपतिः पिता?" सीता। [साशङ्कम्]—"मा अण्णधा संकद्धं, ण क्खु तुह्माणं, सअलाए ज्जेव पहवीए त्ति।" (ढ)

प्रहेलिकैव हास्येन युक्ता भवति नालिका॥५४७॥(ण)

संवरणकार्य्युत्तरं प्रहेलिका। यथा रत्नावल्यां,—"सुसङ्गता। सहि! जस्स किदे तुमं आअदा, सो इध ज्जेव चिट्ठदि।

पवनेन आकुलितः,—चञ्चलीकृतः, उड्डायित इत्यर्थः, अंशुकान्तः,—वस्त्रैकदेशो यत्र तादृशं, तव दृष्टिः,—नेत्रं, प्रेक्षणमिति यावत्, तां हर्त्तुं शीलमस्यास्तीति तत् त्वद्दृष्टिहारि—तव नेत्रोत्सववर्द्धकमित्यर्थः, मम—मत्सम्बन्धि, ऊरुयुग्मं, पर्य्याप्तमेव—समुचितमेव, समर्थमेव वा। अत्र राजोरुयुग्मं प्रस्तुतवर्णनं वक्ष्यमाणेन "भग्नं भग्नम्" इति कञ्चुकिवाक्येन भिन्नार्थमिति गण्डम्। वसन्ततिलकं वृत्तम्।

(ठ) सम्बद्धे—प्रस्तुते। अन्यत् स्पष्टम्।

(ड) अवस्यन्दितमाह, व्याख्यानमिति।—स्वरसोक्तस्य—स्वभावत उक्तस्य, वाक्यस्य इति शेषः, अन्यथा व्याख्यानम् अवस्यन्दितं भवेत्।

(ढ) उदाहरति, यथेति।—जादेति। ["पुत्र! कल्यं खलु अयोध्यायां गन्तव्यं, तत्र स राजा विनयेन प्रणयितव्यः" इति संस्कृतम्]। जादेति।—["पुत्र! स खलु युवयोः पिता" इति संस्कृतम्]। मा इति।—["मा अन्यथा शङ्कध्वं, न खलु युवयोः, सकलाया एव पृथिव्याः" इति संस्कृतम्]। अत्र स्वभावोक्तस्य "स युवयोः पिता" इति वाक्यस्य सकलायाः पृथिव्याः इत्यनेन पितृशब्दस्य पालकरूपत्वेन अन्यथा व्याख्यानम्।

(ण) नालिकामाह, प्रहेलिकैवेति।—हास्येन युक्ता प्रहेलिका एव नालिका भवति।

सागरिका। कस्स किदे अहं आअदा? सुसङ्गता। णं चित्त-फलअस्स।" अत्र त्वं राज्ञः क्रते आगतेत्यर्थः संवृत्तः। (त)

असत्प्रलापो यद्वाक्यमसम्बद्धं तथोत्तरम्।
अगृह्णतोऽपि मूर्खस्य पुरो यच्च हितं वचः॥५४८॥(थ)

तत्राद्यं (द) यथा मम प्रभावत्यां,—"प्रकाशं। [सहकारवनी-मवलोक्य सानन्दम्] अहो! कथमिहैव,—

अलिकुलमञ्जुलकेशी परिमलबहला रसावहा तन्वी।
किशलयपेशलपाणिः कोकिलकलभाषिणी प्रियतमा मे॥" (ध)

एवमसम्बद्धोत्तरेऽपि। उक्तौ यथा वेण्यां,—दुर्योधनं प्रति गान्धारीवाक्यम्।

(त) उदाहरति, सखीति।—["सखि! यस्य क्रते त्वमागता, स इह एव तिष्ठति" इति संस्कृतम्]। कस्य इति।—["कस्य क्रते अहमागता?" इति संस्कृतम्]। णं इति।—["ननु चित्रफलकस्य" इति संस्कृतम्]। अत्र राज्ञः क्रते त्वमागतेति उत्तरं संवृत्तम्। इयं छाल्यपेक्षयोक्तसन्दिग्धादस्था भेदः।

(थ) असत्प्रलापमाह, असत्प्रलाप इति।—असम्बद्धं—पूर्वापरसम्बन्धरहितं, यत् वाक्यं तथा उत्तरं, यच्च अगृह्णतः,—हितवाक्यमग्रहत इत्यर्थः, मूर्खस्य पुरः,—अग्रतः, हितं वचः अज्ञोऽपि असत्प्रलापः।

(द) आद्यम्—असम्बद्धं वाक्यमित्यर्थः।

(ध) अलीति।—अलिकुलं—भ्रमरसमूहः, तद्वत् मञ्जुलकेशी—मनोहरकेशा, परिमलः,—विमर्दोत्थगन्धः, ("स्यात् परिमलोऽतिमर्दोत्थमनोहरगन्धयोरपि" इति मेदिनी) तद्बहुला—पुष्पवर्गसंसर्गजगन्धप्रायिणी, अकृतपुरुषसंसर्गायां रमणीनां तत्प्रायं मनसा अनुभवकोटीनाम् अपि घर्मादिना तद्वन्धसम्भवात् इयमुक्तिः, अन्यथा पतिव्रताया स्वप्नवया भवितव्यम् इति बोद्धव्यम्। रसम्—अनुरागम्, आवहतीति रसावहा, अत्यनुरागवतीत्यर्थः, तन्वी—क्षामाङ्गी, किशलयः,—पल्लवः, तद्वत् पेशलौ—कोमलौ, पाणी यस्याः सा तद्वती, कोकिलवत् कलभाषिणी—मधुरभाषिणी, मे—मम, प्रियतमा—अतिप्रेयसी, "कथमिहैव" इति गद्यखण्डेन व्याख्यायेऽपि अन्वेतव्यम्। अतापरे व्याख्या तु सुगमा। अत्र सहकारवनतायां खलिप्रारोपः इति वाक्यम् अशुद्धम्। गीतिरार्या छन्दः।

व्याहारो यत् परस्यार्थे हास्यक्षोभकरं वचः॥५४९॥(न)

यथा मालविकाऽग्निमित्रे,—"विदूषकः। [लास्यप्रयोगावसाने मालविका निर्गन्तुमिच्छति] मा दाव उवदेसमुद्धा गमिस्ससि [इत्युपक्रमेण] दासः। [विदूषकं प्रति] आर्य्य! उच्यतां यस्त्वया क्रमभेदो लक्षितः। विदूषकः। पढ़मं बह्मणपूआ भोदि, सा इमाए लंघिदा। (प) मालविका। स्मयते" इत्यादिना नायकस्य विशुद्धनायिकादर्शनप्रयुक्तेन हासलोभकारिणा वचसा व्याहारः।

दोषा गुणा गुणा दोषा यत्र स्युर्मृदवं हि तत्॥५५०॥(फ)

क्रमेण यथा,—

"प्रिय! जीवितता क्रौर्य्यं निःस्नेहत्वं कृतघ्नता।
भूयस्त्वद्दर्शनादेव ममैते गुणतां गताः॥ (ब)

(न) व्याहारमाह, व्याहार इति।—परस्य—नायकादेः, अर्थे—निमित्तं, यत् हास्यक्षोभकरं वचः असौ व्याहारः।

(प) उदाहरति, यथेति।—मा इति।—["मा तावदुपदेशमुग्धा गमिष्यसि" इति संस्कृतम्। पढ़मं इति।—["प्रथमं ब्राह्मणपूजा भवति, सा अनया लङ्घिता" इति संस्कृतम्]।

(फ) मृदवमाह, दोषा इति।—यत्र—यस्मिन् वाक्ये, दोषाः गुणाः, गुणाः दोषाश्च, स्युः तत् मृदवम्।

(ब) उदाहरति, प्रिय इति।—हे प्रिय! जीवितता—त्वद्विरहे जीवनमित्यर्थः, देहे जीवनस्थितिरिति यावत्, क्रौर्य्यं—निष्ठुरता, (जीवितताक्रौर्य्यमिति समस्तपदे—जीवनकाठिन्यं, तव विरहेऽपि देहे अवस्थानात् जीवनस्य क्रूरता इति भावः) निःस्नेहत्वं—स्नेहशून्यता, तथा कृतघ्नता—उपकारिणोऽपकारकरणं, तदा जीवनेन देहत्याग एव प्रत्युपकारः, तदनाचरणात् कृतघ्नता इति तात्पर्य्यम्; त्वद्विरहे मम जीवनेनैव क्रौर्य्यादयः सुव्यक्ता इति तव विरहेऽपि देहे मम जीवनस्थितिरतीव क्लेशावहा, तस्मात् तदानीं जीवनस्य देहादपगमः श्रेयान्, नो चेत् तस्य क्रौर्य्यादिकमवश्यवक्तव्यमिति भावः। भूयः,—पुनः, त्वद्दर्शनात्—तव दर्शनं प्राप्येत्यर्थः, मम एते—जीवनस्य क्रौर्य्यादयः, गुणताम्—अनुकूलतां, गताः। अत्र दोषाणां गुणत्वम्।

तस्यास्तद्रूपसौन्दर्य्यं भूषितं यौवनश्रिया।
सुखैकायतनं जातं दुःखायैव ममाधुना॥" (भ)

इति चाङ्गानि नाटकादिषु सम्भवन्त्यपि वीथ्यामवश्यं विधेयानि। विस्पष्टतया नाटकादिषु विनिविष्टान्यपोहोदाहृतानि। वीथीव नानारसानाञ्चात्र मालारूपतया स्थितत्वाद्वीथीयम्। यथा,—मालविका।

अथ प्रहसनम्,—

भाणवत्सन्धिसन्ध्यङ्ग-लास्याङ्गाङ्कैर्विनिर्मितम्।
भवेत् प्रहसनं वृत्तं निन्द्यानां कविकल्पितम्॥५५१॥(म)
अत्र नारभटी नापि विष्कम्भकप्रवेशकौ।
अङ्गी हास्यरसस्तत्र वीथ्यङ्गानां स्थितिर्न वा।
तपस्विभगवद्विप्र-प्रभृतिष्वत्र नायकः॥ ५५२ ॥(य)

(भ) तस्या इति।—बन्धुं प्रति विरहिणो नायकस्योक्तिरियम्। तस्याः—कान्तायाः, यौवनश्रिया—तारुण्यलक्ष्म्या, भूषितं—विराजितं, यत् रूपसौन्दर्य्यं—रूपमाधुर्य्यं, मम सुखैकायतनं—सुखस्य एकम् आयतनं—स्थानं, सुखमात्राधारमित्यर्थः, जातम्, अधुना—विरहे इत्यर्थः, तत् दुःखाय एव—दुःखप्राप्तये एव। अत्र गुणानां दोषत्वम्।

(म) प्रहसनमाह, भाणवदिति।—भाणवत्—भाण इव, सन्धिना, सन्ध्यङ्गैः, लास्याङ्गैः, अङ्केन च विनिर्मितं—योजितमित्यर्थः, तथा कविना कल्पितं—स्वप्रतिभया उद्भावितं, निन्द्यानां वृत्तं प्रहसनं भवेत्। इतिवृत्तनिष्पादने नियमो यथा भरतशास्त्रे,—"लोकोपचारयुक्ता या वार्त्ता यश्च दम्भसंयोगः। तत्प्रहसनेषु योज्यं धूर्त्तोक्तविवादसंयुक्तम्॥" इति।

(य) तत्र विशेषमाह, अत्रेति।—अत्र प्रहसने, आरभटी वृत्तिर्न, प्रयोज्येति शेषः; वीथ्यङ्गानां स्थितिः,—अवस्थानं, न वा—नैव, अथवा,—वीथ्यङ्गानां स्थितिः,—नियतेत्यर्थः। अत्र—प्रहसने, तपस्यादिषु मध्ये कश्चित् नायको वाच्यः। तत्र भगवच्छब्देन सन्न्यासी प्रोच्यते। अन्यत् सुगमम्।

एको यत्र भवेत् धृष्टो हास्यं तच्छुद्धमुच्यते॥५५३॥(र)

यथा,—कन्दर्पकेलिः।

आश्रित्य कञ्चन जनं सङ्कीर्णमिति तत् विदुः॥५५४॥(ल)

यथा,—धूर्त्तचरितम्।

वृत्तं बहूनां धृष्टानां सङ्कीर्णं केचिदूचिरे।
तत् पुनर्भवति द्व्यङ्कमथवैकाङ्कनिर्मितम्॥५५५॥ (व)

यथा,—लटकमेलकादिः। (श) मुनिस्त्वाह,—

"वेश्याचेटनपुंसकविटधूर्त्ता बन्धकी च यत्र स्युः।
अविकृतवेशपरिच्छदचेष्टितकरणन्तु सङ्कीर्णम्॥" (ष) इति।

विकृतन्तु विदुर्यत्र षण्डकञ्चुकितापसाः।
भुजङ्गचारणभट-प्रभृतेर्वेशवाग्युताः॥ ५५६ ॥ (स)

इदन्तु सङ्कीर्णेनैव गतार्थमिति मुनिना पृथक् नोक्तम्।

(र) प्रहसनस्य भेदत्रयं वक्तुमारभते, एक इत्यादि।—यत्र एकः,—मुख्यः, नायक इत्यर्थः, धृष्टः,—प्रगल्भः, भवेत्, तत् हास्यं—प्रहसनं, शुद्धम् उच्यते।

(ल) सङ्कीर्णमाह, आश्रित्येति।—कञ्चन जनं—धृष्टभिन्नं नायकम्, आश्रित्य, यत् हास्यं क्रियते इति शेषः, तत् सङ्कीर्णम् इति विदुः।

(व) मतान्तरे सङ्कीर्णमाह, वृत्तमिति।—यत्र बहूनां धृष्टानां वृत्तं—चरितं, तत् केचित् सङ्कीर्णम् ऊचिरे—उक्तवन्तः; तत्—सङ्कीर्णप्रहसनं, पुनः द्व्यङ्कम्—अङ्कद्वयघटितं, वा एकेनैव अङ्केन निर्मितं भवति।

(श) उदाहरति, यथेति।—लटकानां—दुर्जनानां, मेलकं तदादिः। ["लटको दुर्जनः" इत्युणादिसूत्रवृत्तावुज्ज्वलदत्तः]"नटकमेलकादिः" इति पाठान्तरन्तु न साधु।

(ष) वेश्येति।—यत्र—प्रहसने, वेश्याऽऽदयः स्युः,—वर्णनीया भवेयुरित्यर्थः, तथा तेषामविकृतानां—यथाऽवस्थितानामिति भावः, वेशानां, परिच्छदानां, चेष्टितानाञ्च करणम्—अनुकरणमित्यर्थः, तत् सङ्कीर्णम्।

(स) विकृतमिति।—यत्र षण्डकञ्चुकितापसाः भुजङ्गस्य—विटस्य, चारणस्य—

अथोपरूपकाणि। तत्र,—

नाटिका क्लृप्तवृत्ता स्यात् स्त्रीप्राया चतुरङ्किका।
प्रख्यातो धीरललितस्तत्र स्यान्नायको नृपः॥
स्यादन्तःपुरसम्बद्धा सङ्गीतव्यापृताऽथवा।
नवानुरागा कन्याऽत्र नायिका नृपवंशजा॥
सम्प्रवर्त्तेत नेताऽस्यां देव्यास्त्रासेन शङ्कितः।
देवी पुनर्भवेज्ज्येष्ठा प्रगल्भा नृपवंशजा॥
पदे पदे मानवती तद्वशः सङ्गमो द्वयोः।
वृत्तिः स्यात् कौशिकी स्वल्प-विमर्षाः सन्धयः पुनः॥५५७॥(ङ)

द्वयोः,—नायिकानायकयोः। यथा,—रत्नावली विद्धशाल-भञ्जिकादिः।

अथ त्रोटकम्,—

सप्ताष्टनवपञ्चाङ्कं दिव्यमानुषसंश्रयम्।
त्रोटकं नाम तत् प्राहुः प्रत्यङ्कं सविदूषकम्॥५५८॥(क)

नटस्य, भटप्रभृतेश्च वेशयुक्ताः वचनयुक्ताश्च, भवेयुरिति शेषः, तत् (हास्यमिति पूर्वतोऽनुवृत्तं) विकृतं विदुः।

(ङ) उपरूपकाण्याह, अथेति।—नाटिकेति।—क्लृप्तवृत्ता—कल्पितवृत्तान्ता, न तु पुराणादिषु प्रसिद्धवृत्तेति भावः, स्त्रीप्राया—नारीबहुला नटीबहुला वा, चतुरङ्किका—चतुर्भिरङ्कैः सम्पाद्या इत्यर्थः, प्रख्यातः,—प्रसिद्धः, धीरललितः,—"निश्चिन्तो मृदुरनिशम्" इति लक्षणोक्तः। अन्तःपुरसम्बद्धा—अन्तःपुरसम्बन्धवती, अन्तःपुरचारिणीत्यर्थः। नेता—नायकः, देव्याः,—महिष्याः, त्रासेन—भयेन, शङ्कितः सन्, अस्यां—नायिकायां, सम्प्रवर्त्तेत—समासजेत। द्वयोः,—नायिकानायकयोः, सङ्गमः तद्वशः,—देव्यधीनः। स्वल्पविमर्षाः,—प्रायेण विमर्षाख्यसन्धिहीना इत्यर्थः। अन्यत् सुगमम्।

(क) त्रोटकमाह, सप्तेति।—सप्त वा, अष्टौ वा, नव वा, पञ्च वा अङ्काः; तत्

प्रत्यङ्गं सविदूषकत्वादेवात्र शृङ्गारोऽङ्गी। सप्ताङ्गं यथा,—स्वप्नितरम्भम्। पञ्चाङ्गं यथा,—विक्रमोर्वशी।

अथ गोष्ठी,—

प्राकृतैर्नवभिः पुम्भिर्दशभिर्वाऽप्यलङ्कृता।
नोदात्तवचना गोष्ठी कौशिकीवृत्तिशालिनी॥
हीना गर्भविमर्षाभ्यां पञ्चषड्योषिदन्विता।
कामशृङ्गारसंयुक्ता स्यादेकाङ्कविनिर्मिता॥५५८॥(ख)

यथा,—रैवतमदनिका।

अथ सट्टकम्,—

सट्टकं प्राकृताशेष-पाठ्यं स्यादप्रवेशकम्।
न च विष्कम्भकोऽप्यत्र प्रचुरश्चाद्भुतो रसः।
अङ्काजवनिकाख्याः स्युः स्यादन्यन्नाटिकासमम्॥५५९॥(ग)

यथा,—कर्पूरमञ्जरी।

अथ नाट्यरासकम्,—

नाट्यरासकमेकाङ्कं बहुतालल्यस्थिति।
उदात्तनायकं तद्वत् पीठमर्दोपनायकम्॥

तथोक्तं. दिव्यमानुषसंश्रयं—दैवमनुष्यसम्बद्धं, दिव्यादिव्यनायकमिति यावत्, प्रत्यङ्गं, सविदूषकं—विदूषकचरितसंकीर्णं, यत् नाट्यमिति शेषः, तत् त्रोटकं नाम प्राहुः।

(ख) गोष्ठीमाह, प्राकृतैरिति।—प्राकृतैः,—नातिविदग्धैः। नोदात्तवचना—संस्कृतानभाषिणी। पञ्चभिः षड्भिर्वा योषिद्भिरन्विता। [ङच्प्रत्ययस्यानित्यत्वात्तद्रूपसिद्धिः] कामशृङ्गारः प्रागुक्तः। अन्यत् स्पष्टम्।

(ग) सट्टकमाह, सट्टकमिति।—प्राकृतं—संस्कृतादन्यत्, अशेषं—सकलं, पाठ्यं—वाक्यं यस्मिन् तत्, अप्रवेशकं—प्रवेशकवर्जितं, प्रचुरः,—बहुलः। जवनिकाख्याः अङ्काः स्युः,—अङ्कस्थाने जवनिकाशब्दः प्रयोज्यः इत्यर्थः। अन्यत्—अङ्कनाटिकादिकम्।

हास्योऽङ्ग्यत्र सशृङ्गारो नारी वासकसज्जिका।
मुखनिर्वहणे सन्धी लास्याङ्गानि दशापि च॥
केचित् प्रतिमुखं सन्धिमिह नेच्छन्ति केवलम्॥५६१॥(घ)

तत्र सन्धिद्वयवती यथा,—नर्मवती। सन्धिचतुष्टयवती यथा,—विलासवती।

अथ प्रस्थानम्,—

प्रस्थाने नायको दासो हीनः स्यादुपनायकः।
दासी च नायिका वृत्तिः कौशिकी भारती तथा॥
सुरापानसमायोगादुद्दिष्टार्थस्य संहृतिः।
अङ्गौ द्वौ लयतालादिर्विलासो बहुलस्तथा॥५६२॥(ङ)

यथा,—शृङ्गारतिलकम्।

अथोल्लाप्यम्,—

उदात्तनायकं दिव्य-वृत्तमेकाङ्कभूषितम्।
शिल्पकाङ्गैर्युतं हास्य-शृङ्गारकरुणै रसैः॥

(घ) नाट्यरासकमाह, नाट्यति।—बह्वी तालस्य—कालक्रियामानस्य, लयस्य—साम्यस्य च, स्थितिर्यस्मिन् तत्, (तालः कालक्रियामानं लयः साम्यम्" इत्यमरः) उदात्तनायकम्—"अविकत्थनः क्षमावान्" इत्याद्युक्तलक्षणधीरोदात्तनायकयुतं, पीठमर्दः,—"दूरानुवर्त्तिनि स्यात्तस्य" इत्याद्युक्तलक्षणः नायकात् किञ्चित् गुणहीनः सहायविशेषः, उपनायकः,—नायकसहकारी यत्र तत्; सशृङ्गारः,—शृङ्गाररससहितः, हास्यः अत्र अङ्गी—प्रधानं, नारी—नायिका, वासकसज्जिका—"कुरुते मण्डनं यस्याः" इत्याद्युक्तलक्षणा। केचिदिति।—केचित्, पण्डिता इति शेषः, प्रतिमुखसन्धिं वर्जयित्वा मुखनिर्वहणगर्भविमर्षाख्याः चत्वारः सन्धय इच्छन्ति इत्यर्थः। अन्यत् स्पष्टम्।

(ङ) प्रस्थानमाह, प्रस्थाने इति।—हीनः,—दासादपि इतर इत्यर्थः। सुरापानसमायोगात्—मद्यपानवशात्, उद्दिष्टस्य—प्रस्तुतस्य, अर्थस्य—इतिवृत्तस्य, संहृतिः,—समापनम्। अन्यत् सुगमम्।

उल्लाप्यं बहुसङ्ग्रामं व्रासगीतमनोहरम्।
चतस्रो नायिकास्यत्र वयोऽङ्का इति केचन॥५६३॥(च)

शिल्पकाङ्गानि वक्ष्यमाणानि। यथा,—देवीमहादेवम्।

अथ काव्यम्,—

काव्यमारभटीहीनमेकाङ्कं हास्यसङ्कुलम्।
खण्डमात्रा-द्विपदिका-भग्नतालैरलङ्कृतम्॥
वर्णमात्राच्छडुलिका-युतं शृङ्गारभाषितम्।
नेता स्त्री चाप्युदात्तौ च सन्धी आद्यौ तथान्तिमः॥५६४॥(छ)

यथा,—यादवोदयः।

(च) उल्लाप्यमाह, उदात्तेति।—उदात्तः,—धीरोदात्तः, नायको यत्र तत्, दिव्यवृत्तं—दिव्यनायकोचितचरितवृत्तम्, एकेनाङ्केन भूषितं, शिल्पकाङ्गैः, वक्ष्यमाणैरिति शेषः, तथा हास्येन शृङ्गारेण करुणेन च रसेन युतं, बहुसङ्ग्रामं—बहुविधसङ्ग्रामवर्णनसम्पन्नं, व्रासेन—विभागेन इति भावः, गीतेन, यद्वा,—त्रिपदीगीतेन, मनोहरम्। ["व्रासगीतमनोहरम्" इति पाठान्तरे तु—व्रासगीतेन—"उत्तरोत्तरकर्षं यत प्रस्तुतार्थपरिष्कृतम्। अन्तर्जवनिकं गीतमव्रासगीतं तदुच्यते॥" इत्युक्तेन गीतविशेषेण, मनोहरम्] केचन, पण्डिता इति शेषः, इदम उल्लाप्यं,वदन्तीति शेषः।

(छ) काव्यमाह, काव्यमिति।—भारभटी—वृत्तिविशेषः, तया हीनम्। खण्डमात्रा-द्विपदिका-भग्नतालैः,—तदाख्यगीतविशेषैरित्यर्थः, वर्णमात्रा तथा छड्डुलिका—छन्दोभेदौ ताभ्यां युतं, ["वर्णमात्राच्छगणिकायुतम्" इति पाठान्तरे तु,—वर्णमात्रेण अच्छा—स्वच्छा, या गणिका तया—तच्चरितेनेत्यर्थः, युतम्। मात्रपदेन मनसो व्यवच्छेदः। अत एवोक्तं काव्येन्दुप्रकाशगतता,—"वर्णमात्रस्वच्छवेश्यायुतम्" इति, "वर्णमात्रस्वच्छा न तु मनःस्वच्छा" इति तदर्थः; "वर्णमात्राङ्गुलिकायुतम्" इति पुस्तकान्तरे पाठस्तु नितान्तमसत्, छन्दोभङ्गप्रसङ्गात्] शृङ्गारभाषितं—शृङ्गाररसपूर्णवाक्यसमन्वितम्; नेता—नायकः, उदात्तः, स्त्री—नायिका च, उदात्ता। अत्र—काव्ये, आद्यौ—मुखप्रतिमुखे इत्यर्थः, सन्धिनः,—निर्वहणसन्धिवर्जिताः। अन्यत् सुगमम्।

अथ प्रेङ्खणम्,—

गर्भावमर्षरहितं प्रेङ्खणं हीननायकम्।
असूत्रधारमेकाङ्कमविष्कम्भप्रवेशकम्॥
नियुद्धसम्फेटयुतं सर्ववृत्तिसमाश्रितम्।
नेपथ्ये गीयते नान्दी तथा तत्र प्ररोचना॥५६५॥(ज)

यथा,—बालिवधः।

अथ रासकम्,—

रासकं पञ्चपात्रं स्यान्मुखनिर्वहणान्वितम्।
भाषाविभाषाभूयिष्ठं भारतीकौशिकीयुतम्॥
असूत्रधारमेकाङ्कं सवीथ्यङ्गं कलाऽन्वितम्।
श्लिष्टनान्दीयुतं ख्यात-नायिकं मूर्खनायकम्॥
उदात्तभावविन्यास-संश्रितं चोत्तरोत्तरम्।
ब्रुवते प्रतिमुखं सन्धिमपि केचित् प्रचक्षते॥५६६॥(झ)

यथा,—मैनकाहितम्।

(ज) प्रेङ्खणमाह, गर्भेति।—गर्भावमर्षरहितं—गर्भावमर्षसन्धिद्वयवर्जितं, हीनः,—प्राकृतः, नायको यत्र तत्, नीचनायकमित्यर्थः, नियुद्धं—बाहुयुद्धं, तथा सम्फेटः,—सङ्घोषभाषणं ताभ्यां युतं, सर्वाभिः वृत्तिभिः,—कौशिक्यादिभिः, समाश्रितं—युक्तम्। केन नान्दी पाठ्या? प्ररोचना वा केन कार्या? इत्याह, नेपथ्ये इति।—गीयते—पठ्यते। तत्र—नेपथ्ये, प्ररोचना—भारत्या वृत्तेरङ्गविशेषः, सा च कविपरिषदादीनां प्रशंसया सामाजिकानाम् उन्मुखीकरणम्। तथा चाग्र नेपथ्यस्थेन येन केनचित् नटेन नान्दी पठनीया, प्ररोचना च कर्तव्या इति भावः।

(झ) रासकमाह, रासकमिति।—पञ्चपात्रं—पञ्चभिः पात्रैः,—नटैः, सम्पाद्यमित्यर्थः, मुखञ्च निर्वहणञ्च ताभ्यां सन्धिविशेषाभ्यामन्वितं, भाषया विभाषया च—संस्कृतेन प्राकृतेन च इत्यर्थः, भूयिष्ठं—पर्याप्तं, भारत्या कौशिक्या च वृत्त्या युतं,

अथ संलापकम्,—

संलापकेऽङ्काश्चत्वारस्त्रयो वा नायकः पुनः।
पाषण्डः स्याद्रसस्तत्र शृङ्गारकरुणेतरः॥
भवेयुः पुरसंरोध-च्छलसङ्ग्रामविद्रवाः।
न तत्र वृत्तिर्भवति भारती न च कौशिकी॥५६७॥(ञ)

यथा,—मायाकापालिकम्।

अथ श्रीगदितम्,—

प्रख्यातवृत्तमेकाङ्कं प्रख्यातोदात्तनायकम्।
प्रसिद्धनायिकं गर्भ-विमर्षाभ्यां विवर्जितम्॥
भारतीवृत्तिबहुलं श्रीति शब्देन संयुतम्।
मतं श्रीगदितं नाम विद्वद्भिरुपरूपकम्॥५६८॥ (ट)

यथा,—क्रीड़ारसातलम्।

क्वचित् भारतीवृत्तिप्रधानं, क्वचित् पुनः कौशिकीवृत्तिप्रधानमिति भावः। वीथ्यङ्काभ्यां सह वर्त्तमानं, कला—नृत्यादिकं चतुःषष्टिप्रकारं, तया अन्वितं, श्लिष्टया—भिन्नार्थया, काव्यार्थं प्रकारान्तरेण संसूचयन्त्येति यावत्, नान्द्या युतं, ख्याता—प्रसिद्धा, नायिका यत्र तत्। उदात्तभावस्य—नायकमहत्त्वस्य, विन्यासेन—वर्णनेन, संश्रितम्। सुगममन्यत्।

(ञ) संलापकमाह, संलापके इति।—पाषण्डः,—मूर्खः, अधार्मिको वा। पुरसंरोधः,—नगरावरोधः, छलं—"प्रियाभैरप्रियैर्वाक्यैर्विलोभ्य च्छलना च्छलम्" इत्युक्तलक्षणं, सङ्ग्रामः,—युद्धं, विद्रवः,—"शङ्काभयत्रासकृतः सम्भ्रमो विद्रवो मतः" इत्युक्तलक्षणः। अन्यत् स्पष्टम्।

(ट) श्रीगदितमाह, प्रख्यातेति।—प्रख्यातवृत्तं—पुराणादिप्रसिद्धवृत्तान्तम्। प्रसिद्धा नायिका यत्र तत्; गर्भविमर्षसन्धिद्वयवर्जितं, भारतीवृत्तिबहुलञ्च, श्री-इति शब्देन संयुतं—बहुशः श्रीशब्दप्रयोगयुतं, ["सङ्कुलम्" इति पाठे—"श्री" इति शब्देन सङ्कुलं—बहुलम् इत्यर्थः]।

श्रीरासीना श्रीगदिते गायेत् किञ्चित् पठेदपि।
एकाङ्को भारतीप्राय इति केचित् प्रचक्षते॥५६९॥(ठ)

ऊह्यमुदाहरणम्।

अथ शिल्पकम्,—

चत्वारः शिल्पकेऽङ्काः स्युश्चतस्रो वृत्तयस्तथा।
अशान्तहास्याश्च रसा नायको ब्राह्मणो मतः॥
वर्णनाऽत्र श्मशानादेर्हीनः स्यादुपनायकः।
सप्तविंशतिरङ्गानि भवन्त्येतस्य तानि तु॥
आशंसातर्कसन्देह-तापोद्वेगप्रसक्तयः।
प्रयत्नग्रथनोत्कण्ठाऽवहित्थाप्रतिपत्तयः॥
विलासालस्यवाम्यानि प्रहर्षाश्वासमूढ़ताः।
साधनाऽनुगमोच्छ्वास-विस्मयाः प्राप्तयस्तथा॥
लाभविस्मृतिसम्फेटा वैशारद्यं प्रबोधनम्।
चमत्कृतिश्चेत्यमीषां स्पष्टत्वाल्लक्ष्म नोच्यते॥५७०॥(ड)

(ठ) श्रीरिति।—श्रीगदिते आसीना—उपविष्टा, श्रीः,—लक्ष्मीवेशधारिणी नटीत्यर्थः, किञ्चित् गायेत् पठेदपि, तथा एकाङ्कः,—एकेनैव अङ्केन समाप्यः, भारतीप्रायः,—भारतीवृत्तिबहुलः सन्दर्भः, इति केचित्—पण्डिताः प्रचक्षते। यथा—श्रीशिवनाथसूरिरचितम् अजितं नाम श्रीगदितम्।

(ड) शिल्पकमाह, चत्वार इति।—वृत्तयः,—कौशिक्यादयः, अशान्तहास्याः,—शान्तहास्याभ्यामन्ये इत्यर्थः। श्मशानादेरित्यादिना शवादेर्ग्रहणम्। उपनायकः,—नायकसहकारी, हीनः,—इतरः; एतस्य—शिल्पकस्य, आशंसादीनि चमत्कृत्यन्तानि सप्तविंशतिः अङ्गानि। प्रसक्तिः,—आसक्तिः, अवहित्था—आकारगोपनं, प्रतिपत्तिः,—क्रियार्थावगमः। ["विलासालस्यवाम्यानि" इत्यत्र "विलासालस्यवाम्यानि" तथा "प्रहर्षाश्वासमूढ़ताः" इत्यत्र "प्रहर्षाश्लीलमूढ़ताः" इति पाठान्तरद्वयम्] साधनाऽनु-

सम्फेटग्रथनयोः (ढ) पूर्वमुक्तत्वादेव लक्ष्म सिद्धम्। यथा,—कनकावतीमाधवः।

अथ विलासिका,—

शृङ्गारबहुलैकाङ्का दशलास्याङ्गसंयुता।
विदूषकविटाभ्याञ्च पीठमर्देन भूषिता॥
हीना गर्भविमर्षाभ्यां सन्धिभ्यां हीननायका।
स्वल्पवृत्ता सुनेपथ्या विख्याता सा विलासिका॥५७१॥(ण)

केचित्तु अत्र विलासिका-स्थाने "विनायिका" इति पठन्ति, तस्यास्तु "दुर्मल्लिकायामन्तर्भावः" इत्यन्ये।

अथ दुर्मल्लिका,—

दुर्मल्ली चतुरङ्का स्यात् कौशिकीभारतीयुता।
अगर्भा नागरनरा न्यूननायकभूषिता॥
त्रिनालिः प्रथमोऽङ्कोऽस्यां विटक्रीड़ामयो भवेत्।
पञ्चनालिर्द्वितीयोऽङ्को विदूषकविलासवान्॥
षड्नालिकस्तृतीयस्तु पीठमर्दविलासवान्।
चतुर्थो दशनालिः स्यादङ्कः क्रीड़ितनायकः॥५७२॥(त)

यथा,—विन्दुमती।

नमः,—साधनस्य—इष्टसाधनस्य, अनुगमः। अमीषाम्—अङ्गानां, स्पष्टत्वात्—सहजत्वात्, लक्ष्म—लक्षणं, न उच्यते।

(ढ) "सम्फेटो रोषभाषणम्" तथा "उपन्यासस्तु कार्य्याणां ग्रथनम्" इत्युक्तलक्षणे सम्फेटग्रथने।

(ण) विलासिकामाह, शृङ्गारेति।—स्वल्पानि—नातिबहुलानि, वृत्तानि—पद्यानि, इतिवृत्तानि वा यत्र तादृशी। अन्यत् स्पष्टम्।

(त) दुर्मल्लिकामाह, दुर्मल्लीति।—अगर्भा—गर्भसन्धिवर्जिता, नागरनरा—

अथ प्रकरणिका,—

नाटिकैव प्रकरणी सार्थवाहादिनायका।
असमानवंशजा नेतुर्भवेद्यत्र च नायिका ॥५७३॥ (थ)

सूत्यमुदाहरणम्।

अथ हल्लीशः,—

हल्लीश एक एवाङ्कः सप्ताष्टौ दश वा स्त्रियः।
नागुदात्तैकपुरुषः कौशिकीवृत्तिसङ्कुलः ॥
मुखान्तिमौ तथा सन्धी बहुताललयस्थितिः॥५७४॥(द)

यथा,—केलिरैवतकम्।

अथ भाणिका,—

भाणिका श्रव्यनेपथ्या मुखनिर्वहणान्विता।
कौशिकीभारतीवृत्ति-युक्तैकाङ्कविनिर्मिता ॥
उदात्तनायिका मन्द-पुरुषाऽवाङ्गसप्तकम्।
उपन्यासोऽथ विन्यासो विबोधः साध्वसं तथा ॥

नागराः,—नगरे जाताः, नराः वर्त्तमानाः यत्र तादृशी, चतुरजनबहुलेति भावः, न्यूनेन—आत्मा निकृष्टेन, नायकेन भूषिता; अस्यां प्रथमः अङ्कः विनाशिः,—षड्-घटिकासाध्येतिवृत्तवर्त्तिः, विटस्य क्रीडामयः,—कौशिकबहुलः; पञ्चनाडिः,—दश-घटिकासम्पाद्यः; षड्नाडिकः,—द्वादशघटिकासम्पादनीयः; दशनाडिः,—विंशति-घटिकानिर्वाह्यः। अन्यत् स्पष्टम्।

(थ) प्रकरणिकामाह, नाटिकेवेति।—सार्थवाहः—वणिक्। अन्यत् स्पष्टम्।

(द) हल्लीशमाह, हल्लीश इति।—हल्लीशे एकः एवाङ्कः, न तु ततोऽधिका-ङ्करचना कर्त्तव्येति भावः; सप्तसङ्ख्यातो न न्यूनाः, दशसङ्ख्यातश्च नाधिकाः स्त्रियः, कर्त्तव्याः इति शेषः, वाक्—भाषणं च, उदात्ता, एकपुरुषः,—एकनायकनटः, कौशिक्या इत्या सङ्कुलः,—प्रायेण कौशिकीवृत्त्या निर्व्याहतेतिवृत्त इति भावः; मुखान्तिमौ—आद्यचरमौ, सुखान्तसंज्ञके इत्यर्थः। अन्यत् स्पष्टम्।

समर्पणं निवृत्तिश्च संहार इति सप्तमः ॥५७५॥ (ध)
उपन्यासः प्रसङ्गेन भवेत् कार्य्यस्य कीर्त्तनम् ।
निर्वेदवाक्यव्युत्पत्तिर्विन्यास इति स स्मृतः ॥
भ्रान्तिनाशो विबोधः स्यान्मिथ्याऽऽख्यानन्तु साध्वसम् ।
सोपालम्भवचः कोप-पीड़येह समर्पणम् ॥
निदर्शनस्योपन्यासो निवृत्तिरिति कथ्यते ।
संहार इति च प्राहुर्यत् कार्य्यस्य समापनम् ॥५७६॥ (न)

स्पष्टान्युदाहरणानि, यथा,—कामदत्ता ।

एषां सर्वेषामपि नाटकप्रकृतिकत्वेऽपि यथौचित्यं यथालाभं नाटकोक्तविशेषपरिग्रहः । यत्र च नाटकोक्तस्यापि पुनरुपादानं, तत्र तत्सद्भावस्य नियमः ।

अथ श्रव्यकाव्यानि,—

श्रव्यं श्रोतव्यमात्रं तत् पद्यगद्यमयं द्विधा ॥५७७॥ (प)

(ध) भाणिकामाह, भाणिकेति ।—श्लक्ष्णनेपथ्या—परिच्छन्नपरिच्छदा । मन्दः,—हीनः, पुरुषः,—नायकः यस्यां तादृशी । अङ्गसप्तकम्—उपन्यासादीनि संहारान्तानि अस्या भाणिकायाः सप्ताङ्गानि, तानि च स्पष्टानि इति नोदाह्रियन्ते । अन्यत् स्पष्टम् ।

(न) उपन्यासादिसप्ताङ्गानां लक्षणान्याह, उपन्यास इति ।—प्रसङ्गेन कार्य्यस्य कीर्त्तनं—सूचनम्, उपन्यासः भवेत् । निर्वेदः,—"तत्त्वज्ञानापदीर्षादेः" इत्युक्तलक्षणः, तस्य वाक्ये—तत्सूचकवचसि, व्युत्पत्तिः,—विशेषज्ञता, विन्यासः इति स्मृतः । भ्रान्तेः,—भ्रमस्य, अज्ञानस्य इत्यर्थः, नाशः,—विच्छेदः, विबोधः स्यात् । मिथ्या आख्यानं—कथनं, साध्वसम् । इह—भाणिकायां, कोपेन पीड़या वा सोपालम्भवचः,—तिरस्कारवचनं, समर्पणम् । निदर्शनस्य—दृष्टान्तस्य, उपन्यासः,—कीर्त्तनं, निवृत्तिरिति कथ्यते । कार्य्यस्य यत् समापनं, तत् संहार इति प्राहुः, प्राञ्च इति शेषः ।

(प) दृश्यकाव्यमुक्त्वा श्रव्यकाव्यमाह, श्रव्यमिति ।—श्रोतव्यमात्रमिति मात्रशब्देन दृश्यकाव्यस्य च्छेदः ।

तत्र पद्यमयान्याह,—

छन्दोबद्धपदं पद्यं तेनैकेन च मुक्तकम् ।
द्वाभ्यान्तु युग्मकं सन्दानितकं त्रिभिरिष्यते ॥
कलापकं चतुर्भिश्च पञ्चभिः कुलकं मतम् ॥५७८॥(फ)

तत्र मुक्तकं यथा मम,—

"सान्द्रानन्दमनन्तमव्ययमजं यत् योगिनोऽपि क्षणं
साक्षात्कर्त्तुमुपासते प्रति मुहुर्ध्यानैकतानाः परम् ।
धन्यास्ता मथुरापुरीयुवतयस्तत् ब्रह्म याः कौतुकात्
आलिङ्गन्ति समालपन्ति शतधाऽऽकर्षन्ति चुम्बन्ति च ॥"(ब)

युग्मकं यथा मम,—

"किं करोषि ? करोपान्ते कान्ते ! गण्डस्थलीमिमाम् ।
प्रणयप्रवणे कान्तेऽनैकान्ते नोचिताः क्रुधः ॥

(फ) छन्द इति ।—छन्दोभिः,—गायत्र्यादिभिः, बद्धानि—रचितानि, पदानि—सुप्तिङन्तरूपाणि यत्र तादृशम् । एकेन तेन—पद्येन, ["तेन मुक्तेन" इति पाठे—मुक्तेन—पद्यान्तरनिरपेक्षेण एकेन इत्यर्थः] द्वाभ्यां—परस्परापेक्षाभ्यां पद्याभ्याम्, एवमग्रेऽपि । सन्दानितकमिति ।—अस्यैव विशेषकमिति तिलकमिति च संज्ञा । पञ्चभिरिति न्यूनसंख्याव्यवच्छेदः, तेन माघादौ दशादिभिः श्लोकैः कुलकं सङ्गच्छते ।

(ब) मुक्तकमुदाहरति, सान्द्रेति ।—मुहुः,—पुनः पुनः, ध्यानैकतानाः,—ध्यानैकाग्रचित्ताः, समाधिनिष्ठा इति भावः, योगिनः अपि सान्द्रानन्दम्—आनन्दघनम्, अनन्तम्—अपारम्, अव्ययम्—अच्युतम्, अजं—जन्मरहितं, परं यत् ब्रह्म क्षणं—क्षणमपि, प्रतिसाक्षात्कर्त्तुं—प्रत्यक्षीकर्त्तुम्, उपासते—भजन्ते, ताः,—प्रसिद्धाः, मथुरापुरीयुवतयः, धन्याः,—पुण्यवत्यः, ["मधुरापुरी" इति पाठे—स एवार्थः, तत्र मधुसूदनसरस्वतीपद्यं प्रमाणं यथा,—"काञ्ची ते धृतयोगसम्पदभितो जाता विशालाकृतिर्याऽवन्ती मधुरा ध्वनिं विदधती पश्चादयोध्याऽभवत् । माया द्वारवती शिवाधिवसतिः सा काशिका दृश्यते तच्चित्रं न वदामि माधव ! यतः त्वां सा सदा संश्रिता ॥" इति] याः तत्—परं ब्रह्म, कौतुकात्—आनन्दात्, शतधा—बहुधा इत्यर्थः, आलिङ्गन्ति, समालपन्ति, आकर्षन्ति क्रीडार्थमाहरन्ति, चुम्बन्ति च ॥ शार्दूलविक्रीडितं वृत्तम् ॥

इति यावत् कुरङ्गाक्षीं वक्तुमीहामहे वयम्।
तावदाविरभूच्चूते मधुरो मधुपध्वनिः॥" (भ)

एवमन्यान्यपि।

सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः।
सद्वंशः क्षत्रियो वाऽपि धीरोदात्तगुणान्वितः॥
एकवंशभवा भूपाः कुलजा बहवोऽपि वा।
शृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते॥
अङ्गानि सर्वेऽपि रसाः सर्वे नाटकसन्धयः।
इतिहासोद्भवं वृत्तमन्यत् वा सज्जनाश्रयम्॥
चत्वारस्तस्य वर्गाः स्युस्तेष्वेकञ्च फलं भवेत्।
आदौ नमस्क्रियाऽऽशीर्वा वस्तुनिर्देश एव वा॥
क्वचिन्निन्दा खलादीनां सताञ्च गुणकीर्त्तनम्।
एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः॥
नातिस्वल्पा नातिदीर्घाः सर्गा अष्टाधिका इह।
नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते॥

(भ) किमिति।—हे कान्ते! करस्य उपान्ते—प्रान्तभागे, करतले इत्यर्थः, इमां गण्डस्थलीं किं—कथं, करोषि? न एकान्तः,—एकावसानं यस्य सः नैकान्तः, अन्यासक्त इति यावत्, स न भवतीति अनैकान्तः तस्मिन्—अव्यभिचारिणि, त्वन्मात्र-वल्लभे इत्यर्थः, प्रणयप्रवणे—प्रणयाकाङ्क्षिणीत्यर्थः, कान्ते क्रुधः,—कोपाः, न उचिताः; इति—एवं प्रकारेण, यावत् वयं कुरङ्गाक्षीं—मृगनयनां, वक्तुम् ईहामहे—चेष्टामहे, तावत् चूते—रसाले, मधुरः,—मनोहरः, मधुपध्वनिः,—भ्रमरझङ्कारः, आविरभूत्—अजायत; भ्रमररवेणैव मानभङ्गो जातः, नास्माकं प्रयासस्यावश्यकतेति भावः।

सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत् ।
सन्ध्यासूर्य्येन्दुरजनी-प्रदोषध्वान्तवासराः ॥
प्रातर्मध्याह्नमृगया-शैलर्त्तुवनसागराः ।
सम्भोगविप्रलम्भौ च मुनिस्वर्गपुराध्वराः ॥
रणप्रयाणोपयम-मन्त्रपुत्रोदयादयः ।
वर्णनीया यथायोगं साङ्गोपाङ्गा अमी इह ॥
कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा ।
नामास्य सर्गोपादेय-कथया सर्गनाम तु॥५७९॥(म)

(म) महाकाव्यमाह, सर्गबन्ध इति ।—सर्गैः,—अवान्तरार्थवर्णनैः, उपलक्षितः बन्धः,—पद्यबन्ध इत्यर्थः, महाकाव्यम् । तत्र—महाकाव्ये इत्यर्थः, सुरः,—देवविशेषः, यथा,—किरातादि । बहवः,—अनेके, नायका वा इत्यर्थः, यथा,—रघुवंशे । नाटकसन्धयः,—नाटकोक्तमुखप्रतिमुखगर्भविमर्षनिर्वहणाख्याः पञ्चसन्धयः, प्रयोज्याः इति शेषः । इतिहासेषु पुराणादिषु,उद्भवम्—उत्पन्नं,वृत्तं—चरितं, भारतादिप्रसिद्धमित्यर्थः, अन्यत्—लोकप्रसिद्धमित्यर्थः, सज्जनाश्रयं—साधुजनाचरितमित्यर्थः । चत्वारो वर्गाः,—धर्मार्थकाममोक्षाः, ("त्रिवर्गो धर्मकामार्थैश्चतुर्वर्गः समोक्षकैः" इत्यमरः) । तेषु—चतुर्वर्गेषु मध्ये, एकञ्च [इति चकारो वाऽर्थः] फलं—वर्गः, भवेत् । आदौ—आरम्भे, महाकाव्यस्येति शेषः, नमस्क्रिया—देवतादीनां नमस्कारः, आशीर्वा—शुभाशंसनं वा, लोकानामिति शेषः, वस्तुनिर्देशः,—वस्तुनः,—इतिवृत्तसम्बन्धिनः प्रधानस्य, वर्णनीयनायकस्य नाम्ना वा, निर्देशः,—कीर्त्तनम् । खलादीनां—दुर्जनादीनाम् । एकवृत्तमयैः,—एकविधच्छन्दोनिबद्धैरित्यर्थः, अवसाने—सर्गसमाप्तौ, अन्यवृत्तकैः,—भिन्नच्छन्दोविरचितैरित्यर्थः, उपलक्षिताः, अष्टाधिकाः,—अष्टान्यूनाः । इह—महाकाव्ये । नानावृत्तमयः,—बहुभिश्छन्दोभिः रचित इत्यर्थः ; यथा,—माघे चतुर्थः सर्गः, किराते पञ्चमः, रघुवंशे नवमः । उपयमः,—विवाहः । यथायोगं—यथासम्भवं, साङ्गोपाङ्गाः,—अङ्गप्रत्यङ्गसहिताः, वर्णनीयाः ; एतेन नयेन केनाप्यङ्गेन हीनमपि काव्यं न दुष्टमिति भावः, [अत्राहुरलङ्कारशेखरकाराः,—"नृपे विद्या नयः शक्तिर्बलं तस्करताक्षमः । प्रजाशास्तिः प्रजारागो धर्मकामार्थतुल्यता ॥ प्रयाणरणखड्गादि-शास्त्रा-

ग्यरिपराजयः। अरिनागोऽरिरम्भोऽरि-वासोऽरिपुरगुप्तता॥ मदः शौर्यादिजन्योत्था गर्वोत्था रूपवर्णनम्। मदाभावे मयः शास्त्रं धैर्यं बुद्धिर्गभीरता॥ श्रमः श्रम-जन्योभवं जनरागो विवेकिता॥ परोक्षिते श्रुतिर्वेदा निमित्तापत्प्रतिक्रिया॥ दक्षनीति-ज्ञता बुद्धिर्धर्मज्ञोऽकृतक्षमा॥ दैन्यं विज्ञानचातुर्यं व्यपाश्रोऽनुनतादयः। रूपलावण्य-सौभाग्य-प्रेमप्रकारभेदतः। वेषोभाषाङ्गसौष्ठव भाषाश्रवणजाविद्याः। व्यपाश्रयस्तेन-भ्रू-कटाक्षदयनोक्तयः॥ कण्ठबाहुकरोरोज-नाभ्यो मध्यं वलित्रयम्। रोमालिर्योषितश्रोणी-गतिक्रमनखाः क्रमात्॥ कुमारे शस्त्रशास्त्रज्ञो ज्ञानबलगुणोच्छ्रयः। वाग्मी खरस्तो राज-भक्तिः शुभगतादयः॥ सेनापतौ सहोत्साहः स्वामिभक्तिरभीरुता। अध्यक्षो वाहने शास्त्रे शस्त्रे च विजयी रणे। दुर्गे बहुखनिद्रव्य-पण्यधान्याजरोदयः। दुर्गयामजनाश्रिक्य-नदीमातृकतादयः॥ ग्रामे धान्यसतोक्षु-सरसीपशुपुष्टयः। क्षेत्रारघट्टकेदार-सीमेयीमुख्यविक्षमाः॥ पुरेऽट्टपरिखावप्र-प्रतोलीतोरणादयः। प्रासादाध्वपण्याऽऽराम-वाप्यो वेश्या सतोत्तरी॥ सरस्यम्भोरुहश्रेण्यो गजाद्याश्चञ्चरीकषट्पदाः। हंसचक्रा-दयस्तीरोद्यानश्रीपान्थकैरवाः॥ अब्धौ द्वीपाद्रिरत्नोर्मि पोतयादोजगत्पथाः। विष्णु-कुल्यागमश्चन्द्रादृद्धिरौर्वोऽब्दपूरणम्॥ सरित्स्वम्बुधियायित्वं श्रोत्रो जलगजादयः। पद्मानि षट्पदा हंस-चक्राद्याः कूलशाखिनः॥ उद्याने सरणिः सर्व-फलपुष्पलता-द्रुमाः। पिकालिकेकिहंसाद्याः क्रीडावाप्यध्वगश्रमाः॥ शैले मेघोपधीधातु-वंशझिल्लर-निर्झराः। शृङ्गपादगुहारत्न-वनश्रीवायुपत्यकाः॥ अरण्येऽद्रिवराद्रीभ यूथसिंहादयो द्रुमाः। व्याकोलूकपोताद्याः भिल्लभल्लदवादयः॥ आश्रमेऽतिथिपूजेज्य-विश्वासो हिंस्रशान्तता। यज्ञधूमो मुनिसुता दुसेको वल्कलद्रुमाः॥ मन्त्रे पद्धारुता भक्ति-षाड्गुण्योपायसिद्धयः। उदयास्थिनयोयाश्च स्त्र्यौद्रित्यादिसूत्रयः॥ दूते स्वस्वामितेजः-शौ-विक्षनोन्नत्यलब्धयः। अनुद्योगकरो वेष्टा धार्ष्ट्यं दाक्ष्यमभीरुता॥ युद्धे तु वर्मवस्त्रोर-व्रजांसि तूर्यविस्वासनादश्वरथस्कन्धपरक्षणम्। क्षिप्तातपत्रध्वजाश्वरकेतुकुञ्जिमुक्तासुरो-द्धतभटाश्वरपृष्ठवर्षाः॥ प्रयाणे भेरिनिस्वान-मूलस्थबलधूलयः। खरोष्ट्रयानच्छत्र-वधिकुक्कुटवैश्वराः॥ मृगयायां श्वसञ्चारो वागुरा लोलवेगता। भटटङ्कास्त्रगवास-सिंहयुद्धं त्वरागतिः॥ अश्वे खरखुरोत्खात-रजः सल्लक्षणस्थितिः। तेजो वेगित्वलोल्यं जातिर्धारा प्रपक्षणम्॥ गजे सहस्रधोधित्वमुच्चं कर्णचापलम्। अरित्यूहविभेदित्वं कुम्भमुक्तामदाक्षिणः॥ सुरभौ दोहाकीलिमाहतसूर्यगतितद्दलोद्वेदाः। जातो-त्तरपुष्पचयाम्लसरीक्षनरभक्षद्वाराः॥ यौधे पाटलगन्धोत्पवरःपद्मिकमोषधातात्र्यः। सक्तुप्रपाप्रपाक्षीरमहत्यामादिफलपाकाः॥ वर्षासु घनगर्जितमयहंसगमाः पद्म-चन्द्रलोद्वेदो। जातीकदम्बकेतकभक्षाभिसविलगा इक्षिप्रीतिः। शरदीन्दुरविपटुत्वं

जलाच्छताऽनल्पहंसवदपाः। सतच्छदपद्मसिताम्बुगन्धिपद्मसदपाताः॥ हैमन्ते दिन खचुता श्रीतयस्तल्यमदवक्त्रिमानि। गिरिरे करीषचयम: कृमुदाल्युदाहगिरिं-रतोत्करा:॥ सूर्योऽवचता रविमणिचक्राम्बुजपद्मिकलीचनप्रीतिः। तारेन्दुदीप-ओषधिधूतमनोरकुमुदकुलटार्त्ति:॥ चन्द्रे कुलटाचक्राम्बुरुहविरहितलोहानि-रौक्यवल्यम। जलाधलनेत्रकैरवचकोरचन्द्राश्मदल्यतिप्रीतिः॥ विवाहे स्नान-मुधाङ्क-भृवालुलुवयोरवा:। वेदी श्रीनन्ततारेखा लाजामङ्गलवर्त्तनम॥ विरहे तापनिश्वास-चिन्ता मौनं क्षमाकृता। चलग्रन्था निशादैर्घ्ये जागर: गिरिरीषता॥ स्वयंवरे प्रधोरेखा मङ्गलस्पर्शजता। राजपुत्रोनृपाकारान्वयचेष्टाप्रकाशनम्॥ सुरापाने विजलता स्खलनं वचने गतौ। लज्जा मानच्युति: प्रेमाधिक्यं रक्तेक्षण-मना:॥ पुष्पावचये पुष्पावचय: पुष्पार्पणार्थिने दयिते। मानादं गोवस्खलनेर्ष्या-वक्रोक्तिसम्भ्रमाश्रेषा:॥ जलकेलौ सर:क्षोभचक्रहंसापसर्पणम। पद्मस्नानि: पय:-पेपी हयागी भूषणच्युति:॥ सुरते सात्त्विका भावा: सीत्कार: कुड्मलाचता। काक्षोकटाक्षमञ्जीर-रवोऽधरनखक्षते॥ प्रात: कोकाम्बुकोत्कर्षो मध्याह्ने तापसम्भव:। सायं सूर्य्यास्तलौहित्यं चक्रपद्मादिविप्लव:॥ अन्धकारेऽतिसान्द्रत्वं विश्लेषसमर्थता। चान्द्रिकासमारम्भा नि:शङ्कमभिसारिका:॥ वर्णेषु वर्णभावानां दिग्मात्रमिह दर्शि-तम्। चित्रवैचित्र्यनानानां भवत्येषामनन्तता॥" इति]। कवे:,—प्रणेतु:, वा इतस्य —वर्णनीयचरितस्य, वा नायकस्य, वा इतरस्य—अन्यस्य, नाम्ना अस्य—महाकाव्यस्य, नाम, कर्त्तव्यमिति शेष:। तत्र कविनाम यथा,—माघ-भारविप्रभृति। इतनाम यथा,—कुमारसम्भवादि। नायकनाम यथा,—रघुवंशादि। इतरनाम यथा,—भट्टि-प्रभृति। तु—किन्तु, सर्गनाम सर्गे उपादेया—वर्णनीया, या कथा तया, कर्त्तव्यमिति शेष:; यथा,—रतिविलापो नाम चतुर्थ: सर्ग इत्यादि। अत्र प्रकारा: यथा,—"आख्यं काव्यं आख्यकाव्यं काव्यआख्यं च भेदत:। चतुष्प्रकार: प्रसर: सतां सारस्वतो मत:॥ आख्यं काव्यविद: प्राहु: सर्वकाव्यात्कलक्षणम्। काव्यं विशिष्टशब्दार्थ-साहित्यसदल-कृति॥ आख्यकाव्यं चतुर्वर्ग-प्रायं सर्वोपदेशजुत्। भट्टि-भौमककाव्यादि काव्यआख्यं प्रचक्षते॥ आख्यं कुर्य्यात् प्रयत्नेन प्रसन्नार्थमनुष्टुभा। येन सर्वोपकाराय याति सुखट-सेतुताम्॥ काव्ये रसानुसारेण वर्णनाऽनुगुणेन च। कुर्वीत सर्ववृत्तानां विनियोगं विभागवित्॥ आख्यकाव्येऽतिदीर्घाणां वृत्तानां न प्रयोजनम्। काव्यआख्येऽपि वृत्तानि रसायत्तानि काव्यवित्॥ पुराणप्रतिबिम्बेषु प्रसन्नोपायवर्त्मसु। उपदेशप्रधानेषु कुर्य्यात् सर्वेऽनुष्टुभम्॥ नानावृत्तविधानात्तु कवे: प्रज्ञा प्रसीदति। याति प्रौढ़ि-रिवाभ्यासयोग्या अपि हि योग्यताम्॥" इति।

सन्ध्यङ्गानि यथालाभमत्र विधेयानि। "अवसानेऽन्यवृत्तकैः" इति बहुवचनमविवक्षितम्। साङ्गोपाङ्गा इति जलकेलि-मधुपानादयः। (य) यथा,—रघुवंश-शिशुपालवध-नैषधादयः। यथा वा,—मम राघवविलासादिः।

अस्मिन्नार्षे पुनः सर्गा भवन्त्याख्यानसंज्ञकाः॥५८०॥(र)

अस्मिन्—महाकाव्ये। यथा,—महाभारतम्। (ल)

प्राकृतैर्निर्मिते तस्मिन् सर्गा आश्वाससंज्ञकाः।
छन्दसा स्कन्धकेनैतत् क्वचिद्गलितकैरपि॥५८१॥(व)

यथा,—सेतुबन्धः। यथा वा,—मम कुवलयाश्ववरितम्।

अपभ्रंशनिबन्धेऽस्मिन् सर्गाः कडवकाभिधाः।
तथाऽपभ्रंशयोग्यानि च्छन्दांसि विविधान्यपि॥५८२॥(श)

यथा,—कर्णपराक्रमः।

(य) रसेषु शृङ्गारस्यैव प्राधान्यात् जलकेलिमधुपानादयः तदुदाहरणत्वेन प्रदर्शिताः। एवं वीरादिषु यथासम्भवं साङ्गोपाङ्गोदाहरणं सम्पाद्यम्।

(र) अस्मिन्निति।—आर्षे—ऋषिप्रणीते, अस्मिन्—महाकाव्ये, सर्गाः आख्यान-संज्ञकाः भवन्ति। सर्गस्थाने आख्यानशब्दः प्रयोज्य इति भावः।

(ल) महाभारतमिति।—महाभारतादौ गद्यबन्धेऽपि पद्यप्राचुर्येणैव महा-काव्यत्वव्यवहारः।

(व) प्राकृतैरिति।—प्राकृतैः,—भाषाविशेषैः, निर्मिते—प्रणीते, तस्मिन्—महाकाव्ये। स्कन्धकेन—तदाख्येन, ["छन्दसाऽऽस्कन्दकेन" इति पाठे तु,—आस्कन्दकेन —तदाख्येन, छन्दसा इति बोध्यम्] एतत्—प्राकृतं महाकाव्यमित्यर्थः। गलितकैः, —तदाख्यच्छन्दोविशेषैरित्यर्थः।

(श) अपभ्रंशेति।—अपभ्रंशः,—अपभाषा, तद्रचितनिबन्धः यत्र ताडशे, अस्मिन्—महाकाव्ये, सर्गाः कडवक इत्यभिधा येषां तथोक्ताः। पद्यानि पुनः अप-भ्रंशयोग्यैः विविधैः छन्दोभिः, निबद्धानि भवन्ति इति भावः।

भाषाविभाषानियमात् काव्यं सर्गसमुज्झितम्।
एकार्थप्रवणैः पद्यैः सन्धिसामग्र्यवर्जितम् ॥५८३॥(ष)

यथा,—भिक्षाटनम्, आर्य्याविलासश्च।

खण्डकाव्यं भवेत् काव्यस्यैकदेशानुसारि च॥५८४॥(स)

यथा,—मेघदूतादिः।

कोषः श्लोकसमूहस्तु स्यादन्योऽन्यानपेक्षकः।
व्रज्याक्रमेण रचितः स एवातिमनोरमः ॥५८५॥(ह)

सजातीयानामेकत्र सन्निवेशो व्रज्या। यथा,—मुक्तावल्यादिः।

अथ गद्यकाव्यानि। तत्र गद्यम्,—

वृत्तबन्धोज्झितं गद्यं मुक्तकं वृत्तगन्धि च।
भवेदुत्कलिकाप्रायं चूर्णकञ्च चतुर्विधम् ॥

(ष) काव्यमाह, भाषेति।—भाषा—संस्कृतादि, विभाषा—विरुद्धभाषा, अपभ्रंशादिरिति यावत्, तयोर्नियमात्—भाषया रचिते न विभाषा, विभाषया रचिते न भाषा प्रयोक्तव्या इति नियमेन, रचितमिति शेषः, सर्गसमुज्झितं—सर्गबन्धरहितम्, एकार्थप्रवणैः,—एकार्थप्रतिपादकैः, एकवाक्यताऽऽपन्नैरिति यावत्, पद्यैः, रचितमिति शेषः, सन्धिसामग्र्यवर्जितं—मुखप्रतिमुखादिसन्धिसमुदायहीनं, यत् तत् काव्यम्।

(स) खण्डकाव्यमाह, खण्डेति।—काव्यस्य—अनन्तरनिरूपितस्य, एकदेशानुसारि—कियदंशानुरूपमित्यर्थः; तेनात्र भाषानियमो नास्ति, एकार्थप्रवणैः संस्कृतपद्यैः निर्मितं काव्यं खण्डकाव्यं भवेत्।

(ह) कोषमाह, कोष इति।—अन्योऽन्यानपेक्षकः,—परस्परनिरपेक्षः, श्लोकानां समूहः कोषः। स एव—कोषः, व्रज्याक्रमेण—सजातीयसन्निवेशनियमेन, रचितश्चेत् अतिमनोरमः,—अतिप्रशंसनीय इत्यर्थः। यथा,—अमरकोषादिः। यद्वा,—अकारादि हकारान्ताद्यक्षरपद्यसमूहो व्रज्या, तत्पक्षे,—व्रज्याघटितस्य आर्य्यासप्तशत्यादयः उदाहरणं, तद्भिन्नस्य सुभाषितावलिप्रभृतयः इति बोध्यम्।

आद्यं समासरहितं वृत्तभागयुतं परम्।
अन्यद्दीर्घसमासाढ्यं तुर्य्यं चाल्पसमासकम्॥५८६॥(क)

मुक्तकं यथा,—"गुरुर्वचसि पृथुरुरसि" इत्यादि। वृत्तगन्धि यथा मम,—"समरकण्डूयननिविड़भुजदण्डकुण्डलीकृतकोदण्ड-शिञ्जिनीटङ्कारोज्जागरितवैरिनगर!"। (ख) अत्र "कुण्डली-कृतकोदण्ड" इत्यनुष्टुब्वृत्तस्य पादः। "समरकण्डूयन" इति च प्रथमाक्षरद्वयरहितस्तस्यैव पादः। उत्कलिकाप्रायं यथा ममैव —"अणिसं विसुमरणिसिददरसरविसरविदलितसमरपरिगद-पवरपरबल!"(ग)इत्यादि। चूर्णकं यथा मम—"गुणरत्नसागर! जगदेकनागर! कामिनीमदन! जनरञ्जन!" इत्यादि।

कथायां सरसं वस्तु गद्यैरेव विनिर्मितम्।
क्वचिदत्र भवेदार्य्या क्वचित् वक्त्रापवक्त्रके॥

(क) गद्यमाह, वृत्तेति।—वृत्तबन्धेन—पद्यबन्धेन, उज्झितं—त्यक्तं, श्रव्यकाव्य-मिति शेषः, गद्यम्। तच्च—गद्यमित्यत्राध्याहार्य्यं, चतुर्विधं—मुक्तकं, वृत्तगन्धि, उत्-कलिकाप्रायं, चूर्णकञ्च। आद्यं—मुक्तकमित्यर्थः, समासरहितम्; परं—वृत्तगन्धि, वृत्तभागयुतं—वृत्तस्य—पद्यस्य, भागेन—अंशेन, पादपादांशेनेत्यर्थः, युतम्; अन्यत्—उत्कलिकाप्रायमित्यर्थः, दीर्घसमासेन आढ्यं—युतम्; तुर्य्यं—चतुर्थं, चूर्णकमित्यर्थः, अल्पसमासकम्—अल्पेन समासेन युक्तमित्यर्थः। एतच्च स्पष्टीकृतमस्माभिः अस्मत्कृतायां वृत्तरत्नाकरस्य छन्दोमञ्जर्य्याश्च टीकायाम्।

(ख) समरेति।—समरस्य कण्डूयनाय—कण्डूतिनिवृत्त्यर्थमित्यर्थः, निविड़ाभ्यां—दृढ़ाभ्यां, भुजदण्डाभ्यां कुण्डलीकृतं—मण्डलीकृतं, यत् कोदण्डं—धनुः, तस्य शिञ्जिन्याः,—मौर्व्याः,टङ्कारः तेन उज्जागरितं वैरिणः,—शत्रोः, नगरं येन तत्सम्बुद्धौ।

(ग) अणिसं इति।—["अनिशं विसृमरनिशिततरशरविसरविदलितसमरपरि-गतप्रवरपरबल!" इति संस्कृतम्]। अनिशम्—अनवरतं, विसृमराः,—प्रसरन्तः, ये निशिततराः,—शाणिततराः, अतितीक्ष्णा इत्यर्थः, शराः, तेषां विसरेण—विक्षेपेण, विदलितं समरपरिगतं—सङ्ग्रामस्थितं, प्रवरं—प्रबलमित्यर्थः, परबलं—शत्रुसैन्यं येन तत्सम्बुद्धौ।

आदौ पद्यैर्नमस्कारः खलादेर्वृत्तकीर्त्तनम् ॥५८७॥(घ)

यथा,—कादम्बर्यादिः।

आख्यायिका कथावत् स्यात् कवेर्वंशादिकीर्त्तनम्।
अस्यामन्यकवीनाञ्च वृत्तं पद्यं क्वचित् क्वचित् ॥
कथांशानां व्यवच्छेद आश्वास इति बध्यते।
आर्य्यावक्त्रापवक्त्राणां छन्दसा येन केनचित् ॥

अन्यापदेशेनाश्वास-मुखे भाव्यर्थसूचनम्॥५८८॥(ङ)

यथा,—हर्षचरितादिः।

"अपि त्वनियमो दृष्टस्तत्राप्यन्यैरुदीरणात्" इति दण्डाचार्य्यवचनात् केचित्,—"आख्यायिका नायकेनैव निबद्धव्या" इत्याहुः, तदयुक्तम्। (च) आख्यानादयश्च कथाऽऽख्यायि-

(घ) गद्यभेदरूपां कथामाह, कथायामिति।—कथायां सरसं वस्तु—इतिहासं, गद्यैरेव विनिर्मितं, भवेदिति शेषः। अत्र—कथायां, क्वचित् आर्य्या भवेत्, क्वचिद्वा वक्त्रम् अपवक्त्रकञ्च छन्दसी, प्रयोज्ये इति शेषः। आदौ—कथारम्भात् प्राक्, पद्यैः,—श्लोकैः, नमस्कारः, तथा खलादेः,—दुर्जनादेः, वृत्तस्य—चरितस्य, कीर्त्तनं, भवेदिति शेषः।

(ङ) गद्यस्यापरभेदरूपामाख्यायिकामाह, आख्यायिकेति।—आख्यायिका कथावत् स्यात्—कथायां यथा सरसं वस्तु प्रयोज्य, पद्यैर्नमस्कारः, खलचरितवर्णनञ्च, तथा आख्यायिकायामपीति भावः। विशेषस्त्वेतावान् यत्—कवेः वंशादीनां कीर्त्तनम्, [अत्र "कविवंशानुकीर्त्तनम्" इत्यपि पाठान्तरमस्ति] अस्याम्—आख्यायिकायाम्, अन्यकवीनाञ्च वृत्तं—चरितं क्वचित्, क्वचिद्वा पद्यं, प्रयोज्यमिति शेषः। कथांशानां व्यवच्छेदः,—विशेषः, आश्वास इति नाम्ना बध्यते। आश्वासस्य मुखे—प्रारम्भे, आर्य्यावक्त्रापवक्त्राणां छन्दसां मध्ये येन केनचित् छन्दसा अन्यापदेशेन—अपरव्यक्तिना, भाविनः,—भविष्यतः, अर्थस्य—वस्तुनः, सूचनं—प्रकटनं, भवेदिति शेषः।

(च) अथेति।—तत्रापि—आख्यायिकायामपि, अन्यैः,—नायकव्यतिरिक्तैरपि, उदीरणात्—उद्धारणात्, अनियमः,—अनियमस्तु, दृष्टः इति दण्ड्याचार्य्यस्य वचनात्। नायकेनैव आख्यायिका निबद्धव्येति केषाञ्चिन्मतमयुक्तमिति फलितार्थः।

कयोरेवान्तर्भावाच्च पृथगुक्ताः। यदुक्तं दण्डिनैव,—"अत्रैवान्तर्भविष्यन्ति (छ) शेषाख्यानजातयः" इति। एषामुदाहरणं, —पञ्चतन्त्रादिः।

अथ गद्यपद्यमयानि, (ज)—

गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते ॥ ५८९ ॥

यथा,—देशराजचरितम्।

गद्यपद्यमयी राज-स्तुतिर्विरुदमुच्यते ॥५९०॥

यथा,—विरुदमणिमाला।

करभकन्तु भाषाभिर्विविधाभिर्विनिर्मितम् ॥५९१॥

यथा—मम षोडशभाषामयी प्रशस्तिरत्नावली। एवमन्येऽपि भेदा उद्देशमात्रप्रसिद्धत्वादुक्तभेदानतिक्रमाच्च न पृथक् लक्षिताः। (झ)

इति श्रीनरायणचरणारविन्दमधुव्रतसाहित्याचार्यचक्रवर्तिश्रीविश्वनाथकविराजविरचितायां साहित्यदर्पणटीकायां साहित्यकौमुद्यां दृश्यश्रव्यकाव्यनिरूपणो नाम षष्ठः परिच्छेदः ॥ ६ ॥

(छ) अत्रेति।—अत्रैव—कथायाम्, आख्यायिकायां वेत्यर्थः।

(ज) अथेति।—गद्यपद्यमयानि—दृश्यकाव्यानीत्यर्थः।

(झ) एवमिति।—अत्रेदं बोध्यम्;—"यत्र कत्रापि तालेन गद्यपद्यसमन्वितम्। अपरैस्तूपलक्षणं नाडिकादिप्रासादिभिश्चितम्॥ तदुदाहरणं नाना विधमत्यष्टाङ्गसंयुतम्। सन्धानसन्धिभक्त्या यत्पुरं पद्यपूर्वकम्॥ विरुदपुलराजेष्ट-शब्दैः। आशीर्नमस्क्रियावस्तुनिर्देशान्यतमान्विता॥ अष्टभिर्वा चतुर्भिर्वा वाक्यैः सन्धिसमन्विता। प्रतिसन्धि भिन्नवाक्य रीतिवृत्तोपशोभिता॥ सर्वतो देवशब्दादिरेषा शोभावती मता। वर्ण्यमानाङ्गविरुद-वर्णनप्रचुरोज्ज्वला॥ वाक्याडम्बरसंयुक्ता कथिता विरुदावली। तारान्ता सङ्ख्यया पद्यैर्युक्ता तारावली मता॥ विरुदैश्च सङ्ख्यया पद्यैर्युक्ता विरुदावली मता। रत्नाला सङ्ख्यया पद्यैर्युक्ता रत्नावली मता॥ पद्यैश्च पञ्चभिर्युक्ता भिन्ना पञ्चालिका मता।" इत्यादयः; भेदाः;—कालक्रमप्रकारविशेषाः, अन्यकाव्य-

सप्तमः परिच्छेदः ।

इह हि प्रथमतः काव्ये दोषगुणरीत्यलङ्काराणामवस्थिति-क्रमो दर्शितः । सम्प्रति के ते ? (क) इत्यपेक्षायामुद्देशक्रम-प्राप्तानां दोषाणां स्वरूपमाह,—

रसापकर्षका दोषाः ॥५९२॥ (ख)

विशेषा इत्यर्थः, कविकर्मणः द्विप्रकारौ परिपाकौ प्रायः प्रसिद्धौ, यथा,—"अर्थ-गम्भीरिमा पाकः स द्वेधा कविसम्मतः । द्राक्षापाको नारिकेल-पाकश्च प्रस्फुटान्तरौ ॥ द्राक्षापाकः स कथितो बहिरन्तःस्फुरद्रसः । स नारिकेलपाकः स्यादन्तर्गूढरसोदयः ॥" इति । उद्देशमात्रेति ।—उद्देशमात्रेण—नाममात्रेण, प्रसिद्धाः,—विख्याताः, तद्भावात्, उक्तभेदानतिक्रमात्—उक्तभेदेष्वन्तर्भावात्, तेषां नामत एव भिन्नत्वं, न वस्तुगत्या इति तात्पर्य्यम् ; न पृथक्लक्षिताः,—ते नातिचमत्काराधायकत्वात् विश्वनाथेन परित्यक्ताः ।

इत्यशेषशास्त्राटवीसञ्चरणपञ्चानन-पण्डितकुलपतिना वि, ए, उपाधिधारिणा
श्रीमज्जीवानन्दविद्यासागरभट्टाचार्य्येण विरचितायां, तदात्मजाभ्यां
पण्डितश्रीमदाशुबोधविद्याभूषण-पण्डितश्रीमन्नित्यबोधविद्यारत्नाभ्यां
प्रतिसंस्कृतायां विमलाख्यायां साहित्यदर्पणव्याख्यायां
षष्ठः परिच्छेदः ॥ ६ ॥

(क) अथ काव्यलक्षणं निर्णीय तदीयदोषादीन् विवक्षुः श्रीविश्वनाथकविः तस्य प्रकृतत्वं दोषनिरूपणस्यादिकर्त्तव्यताञ्चोपपादयति, इहेति ।—प्रथमतः,—दोषादि-निरूपणात् प्राक् । काव्ये—काव्यलक्षणे । रीतेश्छन्दोऽनुरोधेन पश्चान्निर्देशेऽपि वक्ष्य-माणयुक्त्या अलङ्कारनिरूपणात् प्रागेव तां निरूपयिष्यति, इति तस्या अलङ्कारात् प्रागिह निर्देशः । ते—दोषादयः । "हेयहानपूर्वकमुपादेयोपादानमिति सूचयितुं दोषनिरूपणस्य प्राथमिकत्वम्" इत्यपरे ।

(ख) दोषाणां तावत् सामान्यलक्षणमाह, रसेति ।—रसं—काव्यात्मभूतं चमत्कारविशेषम्, अपकर्षयन्ति—स्वसन्निधानेन क्वचित्तस्य तिरोधायकतया, क्वचित् विरुद्धतोपस्थापकतया, क्वचित् स्वरूपतश्च्यावकतया, क्वचिदवज्ञेयताप्रत्यायकतया

अस्यार्थः प्रागेव स्फुटीकृतः । (ग) तद्विशेषानाह,—

ते पुनः पञ्चधा मताः ।

पदे पदांशे वाक्येऽर्थे सम्भवन्ति रसेऽपि यत् ॥५९३॥(घ)

तत्र,—

दुःश्रवत्रिविधाश्लीलानुचितार्थाप्रयुक्तताः ।

ग्राम्योऽप्रतीतसन्दिग्ध-नेयार्थनिहतार्थताः ॥

अवाचकत्वं क्लिष्टत्वं विरुद्धमतिकारिता ।

अविमृष्टविधेयांश-भावश्च पदवाक्ययोः ॥

न्यग्भावं नयन्तीति तथोक्ताः, दोषाः, भवन्तीति शेषः । रसश्च न शृङ्गारादिव्यपदेश्य एव चमत्कारः, किन्तु तदाभासादिरूपोऽपीति प्रागेव प्रथमे परिच्छेदे "वाक्यं रसात्मकं काव्यम्" इति काव्यं लक्षयता कविराजेन वृत्तौ प्रतिपादितम् । अयं भावः,—काव्यं हि पुरुषविशेषस्थानीयं, वाक्यञ्च शरीरं, रसश्च तदन्तर्यामी आत्मा । तत्र दोषाः केचित् यथा आगन्तुका भवन्ति, केचित् पुनर्जन्मसिद्धाः, तेष्वपि केचित् शरीरगताः, केचित् पुनरात्मगताः ; तथैव वाक्यगताः, रसगताः, अनित्याः, नित्याश्चेति काव्यदोषा अप्यनेकविधाः । तत्रागन्तुकाः प्रायोऽनित्याः, जन्मसिद्धाः पुनः प्रायो नित्याः, एष्वपि केचित् शरीरगताः ; यथा,—आगन्तुकाः,—वातप्रकोपादयः, जन्मसिद्धाः,—असुन्दरत्वादयः, आत्मगता आगन्तुकाः,—दुःखित्वप्रत्ययादयः, मौढ्यादयः पुनर्जन्मसिद्धाः ; एवं दुःश्रवत्वादयो वाक्यमात्रावष्टम्भा अनित्याः, च्युतसंस्कारत्वादयो नित्याः, तथा रसगताः तस्य तस्य स्वशब्दवाच्यत्वादयो नित्या अनित्याश्चेति तत्र तत्र निर्देक्ष्यन्ते ।

(ग) नन्वेतल्लक्षणं श्रुतिदुष्टापुष्टार्थत्वादौ अव्याप्तं, तस्य शब्दार्थदोषत्वेन रसापकर्षकत्वाभावात्, अत आह, अस्येति ।—प्रागेव—"दोषास्तस्यापकर्षकाः" इति प्रतिपादनावसरे एव । श्रुतिदुष्टत्वादेः शब्दार्थापकर्षकद्वारेण रसापकर्षकत्वमिति नाव्याप्तिरिति भावः ।

(घ) तांश्च विभज्य दर्शयितुमुपक्रममाणस्तावत् तेषां सम्भवस्थलं निर्दिशति, ते इति ।—ते—दोषाः, पुनः पदे, पदांशे—पदैकदेशे, वाक्ये—पदसमुदायविशेषे, अर्थे—वाच्ये, रसे—शृङ्गारादौ निर्वेदादौ च अपि, यत्—यतः, सम्भवन्ति इति हेतोः पञ्चधा—पञ्चप्रकाराः, मताः,—कीर्त्तिताः ।

दोषाः केचिद्भवन्त्येषु पदांशेऽपि पदेऽपरे।
निरर्थकासमर्थत्वे च्युतसंस्कारता तथा ॥५९४॥(ङ)

परुषवर्णतया श्रुतिदुःखावहत्वं दुःश्रवत्वम्। यथा,—
"कार्त्तार्थ्यं यातु तन्वङ्गी कदाऽनङ्गवशंवदा।" (च)
अश्लीलत्वं व्रीड़ाजुगुप्साऽमङ्गलव्यञ्जकत्वात् त्रिधा। (छ)
क्रमेणोदाहरणम्;—

(ङ) तेषां नामानि गणयति, दुःश्रवेति।—अत्र भावप्रत्ययः प्रत्येकं प्रयुज्यते, तथा च—दुःश्रवता, त्रिविधाऽश्लीलता, अनुचितार्थता, अप्रयुक्तता, ग्राम्यता, अप्रतीतता, सन्दिग्धता, नेयार्थता, निहतार्थता, अवाचकत्वं, क्लिष्टत्वं, विरुद्धमतिकारित्वम्, अविमृष्टविधेयांशत्वं, निरर्थकत्वम्, असमर्थत्वं, च्युतसंस्कारत्वञ्चेति। तत्र दुःश्रवत्वमारभ्य अविमृष्टविधेयांशत्वान्तास्त्रयोदश दोषाः पदे वाक्ये चेत्युभयत्रैव सम्भवन्ति। एषु—त्रयोदशसु दोषेषु, केचित्—दुःश्रवत्वाश्लीलत्वनिहतार्थत्वावाचकत्वनेयार्थत्वाख्याः पञ्च दोषाः पदांशेऽपि भवन्ति, अपरे—निरर्थकत्वम्, असमर्थत्वं, च्युतसंस्कारत्वं चेति त्रयो दोषाः, पदे एव, न तु वाक्ये पदांशे वा, सम्भवन्तीति शेषः। एतेष्वपि दुःश्रवत्वाश्लीलत्वनिहतार्थत्वाप्रयुक्तत्वाप्रतीतत्वसन्दिग्धत्वग्राम्यत्वाभिधेयाः सप्त अनित्या दोषाः, अत एवैषां प्रतिप्रसवः प्रदर्शिष्यते। अन्ये नेयार्थत्वच्युतसंस्कारत्वादयोऽष्टौ पुनर्नित्या दोषाः। नित्यत्वं नाम—अनुकृतिमनुद्दिश्य सहृदयेन सति स्वस्वरूपावधाने प्रयोक्तुमशक्यत्वम्; अनित्यत्वं पुनः,—तदन्यथाभूतत्वमिति स्पष्टम्।

(च) अथ यथाक्रमं दुःश्रवत्वादिलक्षणं सोदाहरणमाह, परुषेति।—केषाञ्चित् नामत एव लक्षणस्य स्पष्टबोधात् उदाहरणस्यैव दर्शनम्। श्रुतिदुःखावहत्वं—श्रुतिमात्रतः क्लेशजनकत्वं, दुःश्रवत्वं नाम दोषः; यथा,—कार्त्तार्थ्यमिति।—कार्त्तार्थ्यं—कृतार्थस्य भावः कार्त्तार्थ्यम्, अत्र तथयोः रेफयोगात् कथायाः परुषत्वेन श्रोतुर्दुःखजनकत्वम्। तेनात्र शृङ्गारस्य प्रकर्षहानिरिति रसापकर्षः। यथा वा,—"अनङ्गमङ्गलगृहापाङ्गभङ्गितरङ्गितैः। आलिङ्गितः स तन्वङ्ग्या कार्त्तार्थ्यं लभते कदा॥" इति। इदमेव पारुष्यं "श्रुतिकटु" इत्यभिधीयते। ननु एतत् पदांशपारुष्यमेव, न तु पदपारुष्यमिति चेत्? न, वाक्यघटकद्वित्रादिपदपारुष्यप्रयुक्तवाक्यदुःश्रवत्ववत् पदघटकद्वित्रादिवर्णपारुष्यप्रयुक्तपददुःश्रवत्वस्य स्वीकारात्।

(छ) अश्लीलत्वम्—असभ्यार्थान्तरव्यञ्जकत्वम्; पदांशाश्लीलत्वन्तु असभ्यश्रुति-

"दृप्तारिविजये राजन्! साधनं सुमहत् तव।"
"प्रससार शनैर्वायुर्विनाशे तन्वि! ते तदा।"
अत्र साधन-वायु-विनाशशब्दा अश्लीलाः। (ज)
"शूरा अमरतां यान्ति पशुभूता रणाध्वरे।"
अत्र पशुपदं कातर्य्यमभिव्यनक्तीत्यनुचितार्थत्वम्। (झ)

हेतुत्वमेव, तच्च व्रीडाव्यञ्जकत्वेन जुगुप्साव्यञ्जकत्वेनामङ्गलव्यञ्जकत्वेन च त्रिधाभूतम्। व्रीडा—लज्जा, जुगुप्सा—घृणा, अमङ्गलं—माङ्गल्यप्रतिकूलम्। व्यञ्जकत्वमिह जनकत्वमेव इति सारः। अत्रैवं बोध्यम्;—अश्लीलार्थप्राप्त्या अवधारयितुः प्रातिकूल्यमत्र दूषकत्वकारणम्; यत्र सुभगा-भगिनी-शिवलिङ्ग-ब्रह्माण्डादीनान्तु बोधनीयार्थस्य प्रसिद्धत्वेनाश्लीलार्थो न वर्त्तते, न तत्र दूषकत्वमिति हृदयम्।

(ज) उदाहरति, दृप्तारीति।—हे राजन्! दृप्ता ये अरयः,—शत्रवः, तेषां विजये सुमहत्—अतिशयितं, तव साधनं—सैनिकाद्युपायः, वर्त्तते इति शेषः, (अत्र हि सैन्याद्युपायार्थे प्रयुक्तः साधनशब्दो देशविशेषे पुंश्चिह्नवाचकत्वेन व्यवह्रियते इत्यस्य व्रीडाव्यञ्जकाश्लीलत्वं स्फुटम्। प्रकाशकृता तु,—"साधनं सुमहत् यस्य यन्नान्यस्य विलोक्यते। तस्य धीशालिनः कोऽन्यः सहेतारालितां भुवम्?" इत्युदाहृतम्)। प्रससारेति।—तन्वि!—हे कृशाङ्गि! ते—तव, विनाशे—दर्शनाभावे जाते सति, तदा वायुः,—मलयसमीरणः इत्यर्थः, येनाहं मदनार्दितः इति भावः, शनैः,—मन्दं मन्दं, प्रससार—सञ्चचार। अत्र च समीरणे प्रयुक्तो वायुशब्दः अपानवायुवाचकतया प्रसिद्धः इत्यस्य घृणाव्यञ्जकाश्लीलत्वम्; विनाशशब्दः अदर्शनार्थकतया अप्रसिद्धः, मरणार्थकतया पुनः प्रसिद्धः इत्यस्यामङ्गलव्यञ्जकाश्लीलत्वम्। दूषकतावीजन्तु अश्लीलार्थोपस्थित्या श्रोतुर्वैमुख्यापादकत्वम्। अत्र राजविषयकरतिभावस्य तथा शृङ्गारस्य तत्तच्छब्दानां तादृशार्थव्यञ्जकतया प्रकर्षप्रतिबन्धकः इति। इदन्तु तत्त्वम्;—येषां नैतैः शब्दैरश्लीलत्वावगमस्तेषां कृते अत्र दोषोऽपि न इति।

(झ) अनुचितार्थमुदाहरति, शूरा इति।—शूराः,—वीराः, रणाध्वरे—सङ्ग्रामयज्ञे, पशुभूताः,—छेद्यस्वरूपाः, निहता इति भावः, अमरतां—देवत्वं, यान्ति—प्राप्नुवन्ति। अत्र वाच्यार्थानां शूराणां स्वार्थानां कातर्य्यं दोषः, तस्य व्यञ्जकत्वात् पशुत्वकथनमयुक्तमिति अनुचितार्थत्वं, तेन चात्र वीररसस्य प्रकर्षहानिरिति बोध्यम्। वाच्यार्थदोषप्रतिपादकत्वेन, अर्थासम्भवेन, असत्समर्थकत्वेन च तत् त्रिविधम्। आद्यस्योदाहरणं ग्रन्थकृता प्रदर्शितम्; द्वितीयस्य यथा,—"प्रज्वलज्जलधारावत्

अप्रयुक्तत्वं—तथा प्रसिद्धावपि कविभिरनादृतत्वम्। यथा,—

"भाति पद्मः सरोवरे।" अत्र पद्मशब्दः पुंलिङ्गः। (ञ)

ग्राम्यत्वं यथा,—"कटिस्ते हरते मनः।" अत्र कटिशब्दो ग्राम्यः। (ट)

अप्रतीतत्वम्—एकदेशमात्रप्रसिद्धत्वम्। यथा,—"योगेन दलिताशयः।" अत्र योगशास्त्रे एव वासनार्थ आशयशब्दः। (ठ)

"आशीःपरम्परां वन्द्यां कर्णे कृत्वा कृपां कुरु।"

अत्र "वन्द्याम्" इति किं वन्दीभूतायाम् उत वन्दनीयाम्? इति सन्देहः। (ड)

निपतन्ति शरास्तव" अत्र जलधाराया विशेषणरूपेण प्रयुक्तं प्रज्वलदिति पदम् अर्थासङ्गत्या अनुचितार्थम्। तृतीयस्य यथा,—"दिवाकरादृक्षति यो गुहासु लीनं दिवाभीतमिवान्धकारम्। क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैःशिरसामतीव॥" इत्यत्र असद्भूतस्य अन्धकारभयस्य समर्थकं द्वितीयार्द्धमसत्समर्थकरूपमनुचितार्थम्॥ एवमन्यदपि यथासम्भवं ज्ञेयम्।

(ञ) अप्रयुक्तत्वमिति।—तथा—तेन प्रकारेण, प्रसिद्धौ अपि—कोषादिषु प्रसिद्धिसत्त्वेऽपि। पुंलिङ्गः, कविभिरप्रयुक्त इति शेषः।

(ट) ग्राम्यत्वमिति।—ग्राम्यत्वं—हालिकादिसाधारणजनप्रसिद्धार्थकप्रयोज्यत्वम्। कटिरिति।—अत्र शृङ्गारस्य अगूढत्वप्रकटनेन वैचित्र्यापगमात् प्रकर्षहानिरित्यवधेयम्। अत्रेदं तत्त्वम्;—श्रोणिनितम्बादिकमेव रसिकैः व्यवह्रियते, कटिशब्दस्तु जनसाधारणव्यवहार्य्यत्वात् ग्राम्यः। अस्य पादत्रयं यथा,—"राकाविभावरीकान्त-सङ्क्रान्तद्युति ते मुखम्। तपनीयशिलाशोभा—" इति। इदन्तु त्रिप्रकारकं,—ग्राम्यनागरोपनागरभेदात्; तत्राद्यस्य लक्षणमुक्तं, नागरन्तु प्राज्ञमात्रप्रसिद्धं, ग्राम्यनागरान्तरस्थितमुपनागरम्। अत्र नागरोपनागरे त्यक्त्वा ग्राम्ये एव दोषापातः इत्यधमे विदूषकादौ प्रयोक्तरि न दुष्टत्व, तस्य तथैव योग्यत्वेन निर्देशात्।

(ठ) अप्रतीतत्वमिति।—अप्रतीतत्वम् एकदेशमात्रे, न तु सर्वत्र प्रसिद्धत्वं—ख्यातत्वम्। योगेन—जीवब्रह्मणोरैक्यचिन्तनं योगः तेन, दलितः,—खण्डितः, आशयः,—वासना यस्य तथोक्तः। अत्र वासनार्थत्वम् आशयशब्दस्य अजानतां योगशास्त्रानभिज्ञानां योगिविषयभावबोधविलम्बकरत्वम् इति बोध्यम्।

(ड) आशीरिति।—आशीःपरम्पराम्—आशीर्वादसूचकवाक्यावलीं, कर्णे

नेयार्थत्वं—रूढ़िप्रयोजनाभावादशक्तिकृतं लक्ष्यार्थ-प्रकाशनम्। (ढ) यथा,—

"कमले चरणाघातं मुखं सुमुखि! तेऽकरोत्।"

अत्र चरणाघातेन निर्जितत्वं लक्ष्यम्। (ण)

कृत्वा—श्रुत्वेत्यर्थः। इह प्रकरणादिनियमाभावात् वन्द्यामिति पदं श्लेषवशात् अर्थ-सन्देहजननात् सन्दिग्धम्। अत्र सन्देहवशात् शाब्दबोधविलम्बेन राजविषयरतिभाव-रूपस्य रसनधर्मयोगात् रसपदप्रतिपाद्यस्य प्रकर्षहानिः।

(ढ) नेयार्थत्वमिति।—"निरूढा लक्षणाः काश्चित् सामर्थ्यादभिधानवत्। क्रियन्ते साम्प्रतं काश्चित् काश्चिन्नैव त्वशक्तितः॥" इति भाट्टनियमेन लक्षणाया रूढ़िप्रयोजनान्यतरहेतुकत्वनियमात् अपि तदभावे अशक्तिकृतं—कवेरसामर्थ्यप्रयुक्तम्, अव्युत्पत्तिविजृम्भितं तृतीयलक्षणाविषयमिति यावत्।

(ण) कमले इति।—निर्जितत्वं—पराभव इत्यर्थः, मुखस्य चरणासम्भवेन मुख्यार्थबाधः, स्वजन्यचरणाघातपराभवः स्वजन्यवृत्तिपराभवत्ववत्त्वं मुख्यलक्ष्ययोः सामान्यविशेषभावः सम्बन्धः। अत्र रूढ़िप्रयोजनयोरन्यतरं विना प्रथमं कवेरशक्ति-निश्चयः, तदनन्तरं कथञ्चित् लक्ष्यार्थोपस्थितिः, ततः शाब्दबोधः इति विलम्बेन रसप्रतीतेः प्रतिबन्धकत्वमिति बोध्यम्। प्रकाशकृता तु—"शरत्कालसमुल्लासि-पूर्णिमा-शर्वरीप्रियम्। करोति ते मुखं तन्वि! चपेटापातनातिथिम्॥" इत्युदाहृतम्। तथा च,—चरणाघातचपेटापातशब्दाभ्यां निर्जितत्वं लक्ष्यं, तच्चात्र रूढ़िप्रयोजनमूलयो-र्विषयत्वाभावात् कवेर्व्युत्पत्त्यभावं बोधयत् श्रोतुर्वैरस्यमापादयतीति तदेव दूषकता-बीजम्। केचित्तु,—"निर्जितत्वातिशयस्य प्रयोजनस्यैवोपस्थितेरत्र कथं नेयार्थत्वम्? इति चेत्, न, रूढ़िप्रयोजनाभावपदस्य मुख्यार्थग्रहाभावोपलक्षणपरतया प्रकृते तत एव नेयार्थत्वाभ्युपगमात्" इति। केचित्तु—"पद्मनिर्जितत्वं हि शोभयैव जनितं, न तु चरणाघातेनेति तयोर्जन्यजनकभावसम्बन्धाभावः" इत्याहुः, तन्न; अत्र हि लक्षणाजन्य-बोधानन्तरं सादृश्यप्रतीतिरेवानुभवसिद्धा, न तु निर्जितत्वातिशयप्रतीतिः; तात्पर्या-भावात्, मुख्यलक्ष्ययोरुपदर्शितसम्बन्धसम्भवाच्च। न चात्र सादृश्यप्रतीतिरेव प्रयोजन-मिति वाच्यम्; वक्त्रादिवैशिष्ट्यसचिवयाऽर्थव्यञ्जनया एव तस्या जननात्। लक्षणा-प्रयोजनस्य तु लक्षणामूलव्यञ्जनाजन्यत्वनियमात्, सादृश्यस्य च लक्ष्यार्थतद्वृत्तिधर्मान्य-तरसम्बन्धत्वाभावात्, प्रयोजनस्य तदन्यतरवृत्तित्वनियमात् इति ज्ञेयम्।

निहतार्थत्वम्—उभयार्थस्य शब्दस्याप्रसिद्धेऽर्थे प्रयोगः। यथा,—

"यमुनाम्बरमम्बरं व्यतानीत्।"

अम्बरशब्दो दैत्ये प्रसिद्धः, इह तु जले निहतार्थः। (त)

"गोतेषु कर्णमादत्ते।"

अत्र आङ्पूर्वो दाञ्धातुः दानार्थेऽवाचकः। यथा वा,—

"दिनं मे त्वयि सम्प्राप्ते ध्वान्तच्छन्नाऽपि यामिनी।"

अत्र दिनमिति प्रकाशमयार्थेऽवाचकम्। (थ)

(त) निहतेति।—निहतार्थत्वम् उभयार्थस्य—प्रसिद्धाप्रसिद्धरूपार्थद्वयप्रतिपादकस्य। यमुनेति।—यमुनाम्बरं—कालिन्दीसलिलम्, अम्बरम्—आकाशं, व्यतानीत्—ऊर्ध्वीततया व्याप्नवत्। अत्र अम्बरशब्दः श्रुतिमात्रतः प्रसिद्धार्थं प्रति प्रधावितः, ततस्तदसङ्गतेस्तस्मात् निहतः सन् प्रत्याययन् शाब्दबोधविलम्बात् यमुनाविषयरतिभावस्य प्रकर्षहानिरिति बोध्यम्। यदि तु नपुंसकलिङ्गस्य अम्बरशब्दस्य न दैत्यविशेषवाचकत्वमिति मन्यते, तर्हीदं नोदाहर्त्तव्यं, किन्तु—"भावकरसाट्टपादप्रहारशोभितकचेन दयितेन। सुधा साध्वसतरला विलोक्य परिचुम्बिता सहसा॥"इत्युदाहर्त्तव्यम्, अत्र च शोणितशब्दो रुधिरार्थकतयैव प्रसिद्धः इत्यस्य निहतार्थकत्वम्।

(थ) अवाचकत्वं यथा गोतेष्विति।—न च दाधातोर्दानेऽभिधासत्त्वेन स्वयमवाचकत्वमिति वाच्यम्; धात्वर्थबाधकोपसर्गरहितदाधातोरेव दानेऽभिधाकल्पनात्। एतदस्वीकारे तूदाहरणान्तरमाह, यथा वेति।—दिनमिति।—त्वयि सम्प्राप्ते—उपस्थिते, मे—मम, ध्वान्तच्छन्नाऽपि—तिमिराच्छन्नाऽपि, यामिनी दिनम्। अत्र दिनशब्दः अभिधया सूर्यकिरणावच्छिन्नप्रहरचतुष्टयार्थकः इति प्रकाशमयार्थप्रतीतौ विलम्बात् शाब्दबोधः, तस्मात् रसप्रतीतेः प्रतिबन्धकत्वम्। अत्र तत्त्वम्;—रूढ्यादिसत्त्वे स्वाधिकपदप्रयोगेऽवाचकत्वं, तदसत्त्वे ज्ञेयार्थत्वमिति भेदः; निरूढलक्षणादौ शाब्दबोधविलम्बाभावान्न रसादिबोधविलम्बनमिति नास्त्यवसरः इत्यवधेयम्। "हा धिक् सा किल तामसी मयिमुखी दृष्टा मया यच्च सा तद्दिच्छेदरजाऽस्वकारितमिदं दग्धं दिनं कल्पितम्" इत्यादौ प्रकाशमये दिनपदप्रयोगदर्शनाद्रूढिः प्रकाशातिशयप्रतीतिप्रयोजनं वा। एवमन्यत्रापि बोध्यम्। केचित्तु,—"अमीप्रायसत्त्वेऽवाचकत्वं, तदसत्त्वे ज्ञेयार्थत्वम्" इति वदन्ति, तन्न; दिनमित्यादौ दिनपदस्य प्रकाशमयेऽर्थे अभिधाशक्तिज्ञानाभावात्, "यद्दीनाथत्वमागता" इत्यादिवत्स्वमाचक्षेयार्थोदाहरणे

क्लिष्टत्वम्—अर्थप्रतीतेर्व्यवहितत्वम्। यथा,—

"क्षीरोदजावसतिजन्मभुवः प्रसन्नाः।"

अत्र क्षीरोदजा—लक्ष्मीस्तस्या वसतिः,—पद्मं, तस्या जन्मभुवः,—जलानि। (द)

"भूतयेऽस्तु भवानीशः।"

अत्र भवानीशशब्दो भवान्याः पत्यन्तरप्रतीतिकारित्वात् विरुद्धमतिकृत्। (ध)

भ्रमोन्नायकसत्त्वेऽप्यवाचकत्वानङ्गीकाराच्च इति सङ्क्षेपः। यथा वा,—"अवन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव सम्पदः। अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषाऽऽदरः॥" इति। अत्र हि जन्तुपदं विवक्षितामपि कृपणार्थतां नाभिधत्ते इत्यवाचकत्वम्।

(द) क्लिष्टत्वमिति।—अर्थप्रतीतेः,—अर्थावबोधस्य, पदार्थोपस्थितेरिति यावत्, व्यवहितत्वं—व्यवधानेन उपस्थाप्यत्वम्। पदगतक्लिष्टत्वस्योदाहरणं समासगतत्वेनैव सम्भवति। समासेऽन्वितान्वयलभ्यानतिप्रसक्तविशेष्यताऽवच्छेदककल्पनेन विलम्बो हि व्यवधानं, वाक्यक्लिष्टत्वस्थले तु आसत्तिकल्पनेन विलम्बः। पदगतं क्लिष्टत्वं यथा,—क्षीरोदः,—समुद्रविशेषः, तस्माज्जाता इति तथोक्ता लक्ष्मीः, तस्या वसतिः,—निवासस्थानं, "लक्ष्मीः पद्मालया" इत्याद्युक्तेः, तस्या जन्मभुवः,—"पुष्कराम्भोरुहाणि च" इत्याद्युक्त्या जलानि ताः, प्रसन्नाः,—स्वच्छाः इति। अत्र क्रमेण अन्वितान्वयलभ्यानां क्षीरोदजात्व-क्षीरोदजावसतित्व-क्षीरोदजावसतिजन्मस्थानत्वानां व्याप्यानि लक्ष्मीत्व-पद्मत्व-जलत्वानि प्रकृतोपयोगित्वप्रतिसन्धानेन कल्पनीयानि, ततः शाब्दबोधविलम्बात् रसादिप्रतीतेः प्रतिबन्धकमित्यपकर्षः।

(ध) विरुद्धमतिकारिता—विपरीतबुद्धिघटकत्वम्; यथा भूतये इति।—भवस्य पत्नी भवानी, तस्याः ईशः,—पतिः। अत्र भवान्याः पत्यन्तरप्रतीतिकारित्वात् देवविषयकरतेरपकर्षः। अयं भावः,—[भवशब्दात् "इन्द्र—"(४।१।४९ पा०) इत्यानुकि ङीषि च भवानीति निष्पद्यते] अतः भवपत्नीपतिरितिवत् भवानीशशब्दोऽपि पार्वत्याः पत्यन्तरासत्तिप्रत्यायकमिति विरुद्धार्थमतिकारित्वमेतस्य विदितचरम्। यदि तु पङ्कजादिशब्दवत् साधुत्वार्थकेन योगार्थेन "शिवा भवानी" इत्याद्युक्त्या न तथा प्रत्यायकत्वं, तदा नेदमुदाहार्य्यम् इति बोध्यम्।

अविसृष्टविधेयांशत्वं यथा,—

"स्वर्गग्रामटिकाविलुण्ठनवृथोच्छ्वासैः किमेभिर्भुजैः ?"

अत्र वृथात्वं विधेयं, तच्च समासे गुणीभावादनुवाद्यत्व-प्रतीतिकृत्। यथा वा,—

"रक्षांस्यपि पुरः स्थातुमलं रामानुजस्य मे।

अत्र रामस्येति वाच्यम्।

यथा वा,—

"आ-समुद्रक्षितीशानाम्।"

अत्र आ-समुद्रमिति वाच्यम्। यथा वा,—

"यत्र ते पतति सुभ्रु! कटाक्षः षष्ठबाण इव पञ्चशरस्य।"

अत्र षष्ठ इवेत्युल्लेख्यम्। यथा वा,—

"अमुक्ता भवता नाथ! मुहूर्त्तमपि सा पुरा।"

अत्र अमुक्तेत्यत्र नञः प्रसज्यप्रतिषेधत्वमिति विधेयत्व-मेवोचितम्। (न) यदाहुः,—

(न) अविसृष्टेति।—अविसृष्टः,—प्राधान्येन अनिर्दिष्टः, विधेयांशः यत्र तस्य भावः तत्त्वम्; पदार्थानां मध्ये विधेयस्यैव उपादेयत्वेन प्राधान्यं.तस्य च प्राधान्येन निर्देश एव उचितः, तद्विपरीतम्—"अनुवाद्यमनुक्त्वैव न विधेयमुदीरयेत्" इति नियमस्य अन्यथात्वनिरूपणं:, स च क्वचित् समासे गुणीभावेन, क्वचित् उद्देश्यात् प्राक् विधेयस्य उपादानेन भवति। तदाद्ये पददोषत्वं, द्वितीये वाक्यदोषता। अनुवाद्यत्वप्रतीतिकृत—उद्देश्यत्वबोधजनकम्। तेनात्र शाब्दबोधे बाधता, तया च बोधरसप्रतीतेरपकर्षः। रक्षांसीति।—अलं—समर्थानि.("अलं व्यर्थसमर्थयोः" इत्यमरः) इह वाक्यरचनाद-समर्थत्वं व्यज्यते। अत्र राक्षसवधे रामस्यैव प्राधान्येन उपादेयत्वात् तस्य पृथक् निर्देश एवोचितः, तदन्यरचात् तादृगुपादेयतापतीतेः प्रतिरोधः, तेन च बोधरसस्यापकर्षः। आ-समुद्रेति।—अत्र रघुवंशीयानामधिकारस्य समुद्रपर्यन्तताया एव उपादेय-तया प्राधान्यं, तच्च समासे गुणीभावात् न तथाप्रतीतिकृत् इति रसस्यापकर्षः। षष्ठेति।—अत्र षष्ठत्वस्यैव उपादेयतया प्राधान्यं, तदन्यरचात् रसस्य किञ्चिदपकर्षः। उल्लेख्यम्—उल्लेखितुं योग्यम्। नञि समासगते अविसृष्टविधेयांशत्वोदाहरणमाह, अमुक्तेति।—अत्र प्रसज्यप्रतिषेधे नञो विधेयतैवोचिता, समासे गुणीभावेन

"अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता।
प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ्॥" (घ)

यथा,—

"नवजलधरः सन्नद्धोऽयं न दृप्तनिशाचरः।" (ङ)

तद्विपर्ययात् विधेरप्रधानत्वादिति भावः, अर्थबोधश्च कष्टतया रसापकर्षं इति बोध्यम।

(घ) अप्राधान्यमिति।—यत्र—वाक्ये, विधेः—विध्यर्थस्य, पदार्थान्तरस्येति शेषः, अप्राधान्यम—उद्देश्यतया अमुख्यत्वं, प्रतिषेधे—निषेधे, नञर्थे इत्यर्थः, प्रधानता—विधेयतया मुख्यत्वं, यत्र—यदर्थे, क्रियया—समभिव्याहृतपदार्थतात्पर्यावच्छेदकेन, सह नञ्, तिङन्तेति शेषः, असौ प्रसज्यप्रतिषेधः।

(ङ) नवजलधर इति।—नञ्सर्वनाम्नोर्मुख्या वृत्तायां तद्वियोगेन खिन्नस्य पुङ्खस्य नवजलधरादौ निशाचरत्वादिप्रतीतिवर्णनमिदम। अत्र उद्देश्यत्वेन सन्नद्धनवजलधरस्य दृप्तनिशाचरत्वविधानमप्रधानं, नञर्थस्य तदभावरूपस्य विधेयत्वेन प्राधान्यं, क्रियया समभिव्याहृतपदार्थतात्पर्यावच्छेदकसम्बन्धेन भवतीत्याद्याहृतया नञर्थस्य मुख्यत्वञ्च, तदत्र प्रसज्यप्रतिषेधत्वम; न च विधेर्भावपदार्थस्येति व्याख्येयम, अभावो न जातिमानित्याद्यसङ्गृहीतापत्तेः। अत्र तत्त्वम;—क्रियया इति यद्याश्रुतार्थविवक्षायां तु "अयं न पाकवान्" इत्याद्यसङ्गृहीत्यलौकिकप्रयोगाद्यसङ्गृहीतप्रसङ्गः, न च नञर्थस्य क्रियान्वयित्वाभावेनौत्सर्गिकोदाहरणाद्यौ नञः प्रसज्यप्रतिषेधत्वमेव नास्तीति वाच्यं, तत्र विधेर्विधेयत्वाभावेन पर्युदासत्वापत्त्या तृतीयप्रकारानभिधानाच्च प्रसज्यप्रतिषेधत्वस्यैवावश्यं वाच्यत्वात्, अत एवाव्ययीभावसमासप्रकरणे गोयीचन्द्रेणोक्तम;—"धर्माभावे प्रसज्यप्रतिषेधो मा भूत्" "ब्राह्मणोऽयं न भवति" "ब्राह्मणत्वं धर्मोऽत्र निषिध्यते" इति; "मुनिरयम:" इत्यादौ सत्यामप्युपपदविभक्तावाख्यातेन सह नञर्थस्यान्वयेऽपि प्रसज्यप्रतिषेधत्वं वाच्यं, नञर्थस्य विधेयत्वेनैव तस्यौत्सर्गिकत्वात्, क्रियान्वयित्वञ्चानियतत्वाच्च; एवञ्च "घटो न पटः" इत्यादावुत्तरपदार्थेन पटादिना नञर्थस्य भेदस्य सम्बन्धत्वेऽपि विधेयतामात्रेण प्रसज्यप्रतिषेधत्वम। न चात्र पटत्वाभाव एव विधेयः, न तु पटभेद इति वाच्यम; पटभेदस्यापि विधेयत्वेन नञर्थस्य विधेयत्वेनैव तत्त्वौत्सर्गिकत्वात् क्रियान्वयित्वञ्चानियतत्वाच्च बाधकाभावात्। न च भेदबोधकस्य नञः नित्यसमासविधानमेव बाधकमिति वाच्यं, "यजतिषु ये

उक्तोदाहरणे तत्पुरुषसमासे गुणीभावे नञः पर्य्युदासतया निषेधस्य विधेयताऽनवगमः। (ब) यदाहुः,—

"प्रधानत्वं विधेर्यत्र प्रतिषेधेऽप्रधानता।
पर्य्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्॥" (भ)

तेन—

"जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः।
अगृध्नुराददे सोऽर्थानसक्तः सुखमन्वभूत्॥" (म)

अत्र अत्रस्तताद्यनूद्यात्मगोपनाद्येव विधेयमिति नञः पर्य्युदासतया गुणभावो युक्तः। (य)

यजामहं कुर्वीत (करोति) नानुयाजेषु" इत्यादौ व्यभिचारदर्शनात् कालापानां नित्यसमासविधानस्यायुक्तत्वात्; नित्यसमासवादिमतेऽपि "अयमब्राह्मणः" इत्यादौ ब्राह्मणभेदस्य विधेयत्वमवश्यं वाच्यम्; न चात्रापि ब्राह्मणत्वाभाववानित्येवार्थ इति वाच्यं, समस्यमानपदार्थयोरन्वयाभावे तत्पुरुषानङ्गीकारात्।

(ब) नन्वेवं प्रकृते किमनुपपन्नमित्यत आह, उक्तोदाहरणे इति।—उक्तोदाहरणे—अमुक्तेत्यादौ इत्यर्थः। पर्य्युदासतया—पर्य्युदासवदनुवाद्यत्वप्रतीतिकारितया, विधेयताऽनवगमः,—विधेयताया न स्पष्टावगमः, यथाश्रुतार्थत्वेऽत्र नञः प्रसज्यप्रतिषेधत्वमिति प्रागुक्तेन सह विरोधः स्यात्, विधेर्विधेयत्वाभावे पर्य्युदासासङ्गतिश्च स्यात्।

(भ) पर्य्युदासस्यानुवाद्यत्वमुपपादयति, यदाहुरिति।—प्रधानत्वमिति।—यत्र—वाक्ये, विधेः,—विध्यर्थस्य, पदार्थान्तरस्येत्यर्थः, प्रधानत्वं—विधेयतया मुख्यत्वं, प्रतिषेधे—नञर्थे, अप्रधानता—गुणभावः, उद्देश्यताऽवच्छेदकतया अमुख्यत्वमित्यर्थः; यत्र—यदर्थे, उत्तरपदेन—परवर्त्तिपदार्थेन सह सम्बन्धः, तत्र वाक्ये स नञ् पर्य्युदासः विज्ञेयः। "रात्रौ श्राद्धं न कुर्वीत" इत्यादौ न रात्रौ इति योजनया रात्रावित्यस्योत्तरपदत्वमुपपन्नमिति सङ्क्षेपः।

(म) उदाहरति, जुगोपेति।—सः,—दिलीपः, अत्रस्तः,—अभीतः सन्, आत्मानं जुगोप—ररक्ष, अनातुरः,—अपीडितः सन्, धर्मं भेजे—सिषेवे, अगृध्नुः,—अलुब्धः सन्, अर्थान्—करानिति यावत्, आददे, असक्तः,—अनासक्तः सन्, सुखम् अन्वभूत्—बुभुजे। अत्र विध्यर्थस्य आत्मगोपनस्य प्राधान्यं, प्रतिषेधे अत्रस्त इत्यादिषु स्थिते नञर्थे अप्रधानता, उत्तरपदार्थेन त्रस्ततादिना नञः सम्बन्धश्च।

(य) अत्रेति।—अत्रस्ततादि—त्रस्तभिन्नत्वादि, अनूद्य—उद्देश्यताऽवच्छेदकी-

ननु "अश्राद्धभोजी ब्राह्मणः" "असूर्य्यम्पश्या राजदाराः" इत्यादिवत् "अमुक्ता" इत्यत्रापि प्रसज्यप्रतिषेधो भवतीति चेत्? न; अत्रापि यदि भोजनादिरूपक्रियांशेन नञः सम्बन्धः स्यात्, तदैव तत्र प्रसज्यप्रतिषेधत्वं वक्तुं शक्यम्। न च तथा, विशेष्यतया प्रधानेन तद्भोज्याद्यर्थेन कर्त्तृंशेनैव नञः सम्बन्धात् (र)। यदाहुः,—

"श्राद्धभोजनशीलो हि यतः कर्त्ता प्रतीयते।
न तद्भोजनमात्रन्तु कर्त्तरीनेर्विधानतः॥" इति (ल)

"अमुक्ता" इत्यत्र च क्रिययैव सह सम्बन्धः इति दोष एव। एते च क्लिष्टत्वादयः समासगता एव पददोषाः। (व)

कृत्य इत्यर्थः; तत्पुरुषसमासेनात्यन्ताभावानभिधानात्, वस्तुत्वाभावादेरत्र नोद्देश्यताऽवच्छेदकत्वमित्यवगन्तव्यम्; एवञ्च नञः प्रसज्यप्रतिषेधत्व, पर्य्युदासत्वञ्च विधेयोद्देश्यभावविवक्षाऽधीनं, न तु नियतम्; गुणभावः,—गौणार्थप्रतिपादकत्वम्।

(र) ननु अश्राद्धभोजीति।—समस्तेनापि नञा भोजनदर्शनरूपाभावविधेयत्वस्य सम्यक्प्रतीतौ कथमविमृष्टविधेयांशत्वमिति प्रश्नस्य उत्तरमाह, तदिति।—तद्भोज्याद्यर्थेन—श्राद्धभोज्यादिरूपार्थेन, कर्त्तृंशेनैव—भोजनकर्त्रर्थाद्यंशेन, तत्सम्बन्धाङ्गीकारे णिनाद्यर्थस्य कर्त्तुरनन्वयापत्तेः, कृदुपस्थापितस्य कर्त्तुर्धात्वर्थेनैवान्वयस्य व्युत्पत्तिसिद्धत्वात्। अतः श्राद्धभोजिपदात् तद्भोजनमात्रं श्राद्धभोजनमात्रं, प्रतीयते इत्यनुषङ्गः।

(ल) अमुमेवार्थं कारिकया विशदयति, श्राद्धेति।—यतः,—यस्मात्, श्राद्धभोजनशीलः कर्त्ता प्रतीयते, कर्त्तरि—["व्रते" ३।२।८० इति सूत्रेण] इन्प्रत्ययस्य विधानतः,—विधानात्, न तु तस्य—कर्त्तुः, भोजनमात्रं, प्रतीयते इति पूर्वेणान्वयः।

(व) क्रिययैव सह सम्बन्ध इति।—भवत्कर्त्तृकमोचनाभावप्रतीतिबोधस्यानुभवसिद्धत्वादिति भावः, दोष एव—अविमृष्टविधेयांशत्वमेव, एतन्मते समस्यमानपदार्थैकदेशे नञर्थान्वयेऽपि समासस्वीकारः; यदि पुनः क्तप्रत्ययार्थस्य कर्मणोऽन्वयापत्त्या क्रियया सह नञर्थस्य सम्बन्धमनङ्गीकृत्य मोचनकर्मणैव सम्बन्धः स्वीक्रियते, तदा पुनः "अयमब्राह्मणः" इत्यादिवदत्रापि मोचनकर्मपदस्यैव विधेयत्वं बोध्यम्। किन्तु नञः समस्ततया तस्य न स्पष्टावगमः इत्यविमृष्टविधेयांशत्वमित्यवगन्तव्यम्; अत्रापि रसादिप्रतीतिविलम्बनं दूषकताबीजम्। एते चेति।—आदिपदात् विरुद्धप्रतिकारित्वविधेयाविमर्शयोर्ग्रहणं, विना समासं तेषामसम्भवादिति भावः।

वाक्ये दुःश्रवत्वं यथा,—

"स्मरार्त्त्यन्धः कदा लप्स्ये कार्त्तार्थ्यं विरहे तव।" (श)

"कृतप्रवृत्तिरन्यार्थे कविर्वान्तं समश्नुते॥"

अत्र जुगुप्साव्यञ्जकाश्लीलता। (ष)

(श) सम्प्रति वाक्यगतं दुःश्रवत्वमुदाहरति, स्मरेति।—तव विरहे स्मरस्य—कामस्य, आर्त्तिः,—पीड़ा, तया अन्धः,—मोहित इत्यर्थः, अहं कदा कार्त्तार्थ्यं—कृतार्थतां, लप्स्ये?—प्राप्स्यामि? अत्र अनेकपदस्य परुषवर्णघटितत्वेन वाक्यगतं दुःश्रवत्वम्। यथा वा,—"सोऽध्यैष्ट वेदांस्त्रिदशानयष्ट, पितॄनतार्प्सीत् सममंस्त बन्धून्। व्यजेष्ट षड्वर्गमरंस्त नीतौ समूलघातं न्यवधीदरींश्च॥" इति भट्टौ।

(ष) जुगुप्साव्यञ्जकमश्लीलत्वमुदाहरति, कृतेति।—अन्यस्य—कवेः, अर्थे—वर्णिते वस्तुनीत्यर्थः, कृता प्रवृत्तिर्येन तादृशः, परकवितामनुसृत्य रचयन्नित्यर्थः, कविः वान्तम्—उद्गीर्णं, समश्नुते—भक्षयति। अत्र "वान्तं समश्नुते" इति वाक्यस्य जुगुप्साव्यञ्जकत्वात् अश्लीलत्वम्। यथा वा,—"तेऽन्यैर्वान्तं समश्नन्ति परोत्सर्गं च भुञ्जते। इतरार्थग्रहे येषां कवीनां स्यात् प्रवर्त्तनम्॥" इति। इह हि वान्तोत्सर्गप्रवर्त्तनशब्दानां घृणाऽभिव्यञ्जकत्वेनाश्लीलत्वम्। व्रीडाव्यञ्जकमश्लीलत्वं यथा—"भूपतेरुपसर्पन्ती कम्पना वामलोचना। तत्तत्प्रहरणोत्साह-वती मोहनमादधौ॥" इति। अत्र हि उपसर्पणप्रहरणमोहनशब्दानां कामुकसविधाश्रयण-नितम्बप्रहार-काममोहार्थबोधकतया लज्जाव्यञ्जकमश्लीलत्वम्। यथा वा,—"न साधनोन्नतिर्या स्यात् कलत्रारतिदायिनी" इति। अमङ्गलव्यञ्जकमश्लीलत्वं वाक्यगतं यथा,—"पितृवसतिमहं व्रजामि तां सह परिवारजनेन यत्र मे। भवति सपदि पावकान्वये हृदयमशेषितशोकशल्यकम्॥" इत्यत्र पितृवसति-पावकशब्दौ जनकवेश्म-पवित्रकारिवाचकौ श्मशान-तद्वह्निरूपार्थप्रतीतिकारित्वात् अमङ्गलव्यञ्जकौ। अनुचितार्थत्वं यथा,—कुविन्दस्त्वं तावत् पटयसि गुणग्राममभितो यशो गायन्त्येते दिशि दिशि च नग्नास्तव विभो!। शरज्ज्योत्स्नागौरस्फुटविकटसर्वाङ्गसुभगा तथाऽपि त्वत्कीर्त्तिर्भ्रमति विगताच्छादनमिह॥" नग्नाः,—स्तुतिपाठकाः, पक्षे—दिगम्बराः। अन्यत् स्पष्टम्। अत्र कुविन्दादिशब्दः अर्थान्तरं प्रतिपादयन् स्तुत्यस्य तिरस्कारं व्यनक्तीत्यनुचितार्थत्वम्। अप्रयुक्तत्वं यथा,—"स रातु वो दुश्च्यवनो भावुकानां परम्पराम्। अनेड़मूकताद्यैश्च द्यतु दोषैरसम्मतान्॥" अत्र राधातुर्दाने, दुश्च्यवन इन्द्रे, भावुकं मङ्गले, अनेड़मूकौ मूकबधिरे, दोधातुः खण्डने प्रसिद्धा अपि कविभिरनादृतत्वादप्रयुक्ताः। "अनुत्तमं पश्य" इत्यत्रानुत्तम-

"उद्यत्कमललौहित्यैर्वक्राभिर्भूषिता तनुः।"

अत्र कमललौहित्यं—पद्मरागः। वक्राभिः,—वामाभिः इति नेयार्थता। (स)

पदस्य उत्तमवाचकत्ववत् अनेड़मूकपदस्यानैड़मूकवाचकत्वम्। ग्राम्यत्वं यथा—"ताम्बूलभृतगल्लोऽयं भल्लं जल्पति मानुषः। करोति खादनं पानं सदैव च यथा तथा॥" गल्लः,—कपोलः, भल्लं—भद्रम्। अत्र गल्लभल्लमानुषखादनपानशब्दाः ग्राम्याः। अप्रतीतत्वं यथा—"तस्याधिमात्रोपायस्य तीव्रसंवेगिताजुषः। दृढ़भूमिः प्रियप्राप्तौ यत्नः स फलितः सखे॥" अधिमात्रनामा क्रियाविशेषः उपायो यस्य; संवेगिता—समाधिविशेषः, दृढ़भूमिः,—दृढ़ाभ्यासदायी, प्रियप्राप्तौ—तत्त्वज्ञानलाभे। अत्राधिमात्रादयः शब्दा योगशास्त्रमात्रप्रसिद्धत्वात् अप्रतीताः। सन्दिग्धत्वं यथा—"सुरालयोल्लासकरः प्राप्तपर्य्याप्तकम्पनः। मार्गणप्रवणो भास्वद्भूतिरेष विलोक्यताम्॥" अत्र सुरकम्पनमार्गणभूतिशब्दाः किं देवसेनाशरविभूत्यर्थाः? किं वा मदिराकम्पनपर्य्यटनभस्मार्थाः? इति सन्देहः।

(स) नेयार्थत्वमाह, उद्यदिति।—उद्यद्भिः,—विकस्वरैः, कमललौहित्यैः,—पद्मरागैः, [अत्र करणे तृतीया] वक्राभिः,—वामाभिः, नारीभिरित्यर्थः, तनुः भूषिता—अलङ्कृता। अत्र कमललौहित्यवक्राशब्दौ लक्षणया पद्मरागवामारूपार्थबोधकौ, सा च लक्षणा रूढ़िप्रयोजनाभावात् अशक्तिकृतेति पदद्वयगतत्वेन वाक्यगतं नेयार्थत्वम्। एतत्तु विशदीकृतं रामचरणेन, यथा—"उत्पूर्वस्य इणधातोरुदयगिरिशिखरारोहणं मुख्योऽर्थः, तस्य पद्मरागे बाधात् तज्जन्यप्रकाशे लक्षणा। अत्र रूढ़िसत्त्वेऽपि पद्मरागप्रकाशस्य उदयाजन्यत्वात् मुख्यार्थयोगाभावात् नेयार्थत्वमवगन्तव्यम्। अन्यदपि नेयार्थत्वमुपपादयति, अत्रेति।—पद्मरागपदस्य परिवृत्त्यसहत्वात् कमलपदस्य पद्मशब्दे, लौहित्यपदस्य च रागशब्दे, वक्रापदस्य वामाशब्दे लक्षणा, लक्षितैः पद्मादिभिः पदैरभिधया पद्मरागवामानामुपस्थितिः; यथा—द्विरेफपदेन बहुव्रीहिलक्षणयोपस्थापितात् रेफद्वययुक्तभ्रमरपदादभिधयैव भृङ्गोपस्थितिः, अत्र रूढ़िरस्ति; प्रकृते तु रूढ़िप्रयोजनाभावान्नेयार्थत्वम्, इयमेव लक्षितलक्षणेत्युच्यते। न च लक्षणाद्वयाभावात् कथमियं लक्षितलक्षणा? इति वाच्यम्; यत्र लक्षिताच्छब्दादर्थाभिधानं, तत्रैव लक्षितलक्षणायाः परिभाषितत्वात्। ननु द्विरेफपदस्य रेफद्वययुक्तभ्रमरशब्द एवार्थः, तथा सति "द्विरेफं पश्य" इत्यादौ द्वितीयार्थकर्मतायाः भृङ्गेणान्वयः; तथा हि,—"प्रकृत्यर्थान्वितस्वार्थबोधकत्वं प्रत्ययानाम्" इति नियमादिति चेत्? न; प्रकृत्यर्थाभिन्नत्वे अनाध्यासितस्यापि प्रकृत्यर्थत्वात्। अत एव "मुखचन्द्रं पश्य" इत्यादौ चन्द्राभिन्नत्वे-

"धम्मिल्लस्य न कस्य प्रेक्ष्य निकामं कुरङ्गशावाक्ष्याः।
रज्यत्यपूर्वबन्धव्युत्पत्तेर्मानसं शोभाम्॥"

अत्र धम्मिल्लस्य शोभां प्रेक्ष्य कस्य मानसं न रज्यतीति सम्बन्धः क्लिष्टः। (ह)

नाध्यासिते मुखे कर्मताया अन्वयः; तथा हि,—द्विरेफशब्दाद्भ्रमरशब्दस्य, द्वितीयातश्च कर्मतायाः, लक्षितभ्रमरशब्दात् भृङ्गस्य चोपस्थितौ भृङ्गे भ्रमरशब्दाभेदं कर्मताञ्चावगाहमानः आंशिकाध्यारोपरूपो बोधो जायते; शब्दतदर्थयोरभेदारोपश्च "हिरण्यपूर्वं कशिपुं प्रचक्षते" इत्यादौ दृष्टः। नैयायिकास्तु,—"द्विरेफपदस्य भ्रमरशब्दे एका लक्षणा, लक्षितभ्रमरशब्दवाच्यत्वसम्बन्धेन भृङ्गे चापरलक्षणा, ततश्च प्रकृत्यर्थे भृङ्गे कर्मताऽन्वयबोधः" इत्याहुः, तन्न; सकृदुच्चरितशब्दादावृत्तिं विना क्रमिकबोधाननुभवात्। अजनितान्वयाबोधस्य शब्दस्यावृत्त्यभावात्, आवृत्तौ च द्वितीयाया अप्यावृत्तौ प्रथमोक्तद्वितीयाया अन्वयानुपपत्तेः। अस्मदुक्तरीतेः "मुखचन्द्रं पश्य" इत्यत्रावश्यमाश्रयणीयत्वाच्चेत्यास्तां विस्तरः।" यथा वा,—"वस्त्रवैदूर्य्यचरणैः क्षतसत्त्वरजःपरा। निष्कम्पा रचिता नेत्रयुद्धं वेदय साम्प्रतम्॥" इति, इह हि वस्त्रशब्दः अम्बरापरपर्य्यायाकाशार्थकतया, वैदूर्य्यशब्दो मण्यर्थकतया, चरणशब्दः पादापरपर्य्यायकिरणार्थकतया, क्षतसत्त्वरजःशब्दस्तमोऽर्थकतया, निष्कम्पाशब्दोऽचलार्थकतया, युद्धशब्दो युग्मार्थकतया, वेदयशब्दो बोधयेत्यर्थकतया च नेयः। वाक्यगतं निहतार्थत्वं यथा—"सायकसहायबाहोर्मकरध्वजनियमितक्षमाधिपतेः। अब्जरुचिभासुरस्ते भातितरामवनिप! श्लोकः॥" इति। अत्र हि सायक-मकरध्वज-क्षमाऽब्ज-श्लोकशब्दाः शर-मदन-सहिष्णुता-कमल-पद्यानामेव वाचकाः प्रसिद्धा अपि करवाल-सागर-धरणी-चन्द्र-यशसां वाचकतया प्रयुक्ता इति निहतार्थत्वम्। अवाचकत्वं यथा—"नमन्नृपतिमण्डलीमुकुटचन्द्रिकादुर्दिनस्फुरच्चरणपल्लवप्रतिपदोक्तदोःसम्पदा। अनेन सृजतेतरां तुरगमेधमुक्तभ्रमत्तुरङ्गखुरचन्द्रकप्रकरदन्तुरा मेदिनी॥" इति। अत्र हि चन्द्रिकादुर्दिनशब्दौ किरण-च्छन्नयोर्वाचकतया प्रयुक्तावपि न व्यक्त इति स्फुटमवाचकत्वम्।

(ह) धम्मिल्लस्येति।—कुरङ्गशावाक्ष्याः अपूर्वा बन्धव्युत्पत्तिः,—विन्यासविशेषः यस्य तादृशस्य, धम्मिल्लस्य—संयतकेशपाशस्य, ("धम्मिल्लाः संयताः कचाः" इत्यमरः) शोभां प्रेक्ष्य—दृष्ट्वा, कस्य—जनस्य, मानसं निकामम्—अतिमात्रं यथा तथा, न रज्यति? अत्र पदार्थानाम् अन्वययोजनस्य कष्टसाध्यत्वात् रसास्वादस्य प्रतिबन्धकत्वेन क्लिष्टत्वम्। विरुद्धमतिकारित्वं यथा,—"श्रितक्षमा रक्तभुवः शिवालिङ्गितमूर्त्तयः।

"न्यक्कारो ह्ययमेव मे यदरयः" इति। अत्र च अयमेव न्यक्कार इति न्यक्कारस्य विधेयत्वं विवक्षितम्। तच्च शब्दरचनावैपरीत्येन गुणीभूतम्। रचना च पदद्वयस्य विपरीतेति वाक्यदोषः। (क)

"आनन्दयति ते नेत्रे योऽसौ सुभ्रु! समागतः।" (ख)

इत्यादिषु "यत्तदोर्नित्यः सम्बन्धः" इति न्यायादुपक्रान्तस्य यच्छब्दस्य निराकाङ्क्षत्वप्रतिपत्तये तच्छब्दसमानार्थतया प्रतिपाद्यमाना इदमेतदः शब्दा विधेया एव भवितुं युक्ताः। अत्र तु यच्छब्दनिकटस्थतया अनुवाद्यत्वप्रतीतिकृत्, तच्छब्दस्यापि यच्छब्दनिकटस्थितस्य प्रसिद्धपरामर्शित्वमात्रम्। (ग) यथा,—

विगतसुखपथेनाद्य शेरते ते गतासुखाः॥" गतासुखाः,—गतदुःखाः, पक्षे—गतानि असवः सुखानि—इन्द्रियाणि च येषां ते तथा। अत्र अनादिगुणयुक्ताः सुखमासते इति विवक्षिते इता इति विरुद्धार्थप्रतीतिः।

(क) अविवक्षितविधेयांशत्वमाह, न्यक्कार इति।—अत्र वाक्यगतः विधेयाविमर्शः सहृदयमनःसु तादृशवीररसास्वादस्य मनाक् प्रतिघातं जनयतीति दोषत्वम्।

(ख) आनन्दयतीति।—हे सुभ्रु! योऽसौ समागतः ते—तव, नेत्रे आनन्दयति।

(ग) इत्यादिष्विति।—इत्यादिषु वाक्येषु, यत्तदोः,—यत्तच्छब्दयोः, नित्यः,—सार्वकालिकः, सम्बन्धः,—संयोगः, इति न्यायात्—न्यायमुपाश्य, उपक्रान्तस्य—अनुवाद्यत्वेनोपात्तस्य, यच्छब्दस्य—यच्छब्दार्थस्य, निराकाङ्क्षत्वप्रतिपत्तये—निराकाङ्क्षतापरिहाराय, तच्छब्दसमानार्थकतया प्रतिपाद्यमानाः,—प्रयुज्यमानाः, इदमेतदः शब्दाः विधेयाः,—अनुवाद्यतामप्राप्ताः, विधेयत्वबोधकाः इत्यर्थः, एव भवितुं युक्ताः, किन्तु अत्र यच्छब्दस्य निकटस्थतया अनुवाद्यत्वस्य प्रतीतिं करोतीति तथोक्ताः, अदः शब्द इति शेषः। अयं भावः,—यद्यपि "यत्तदोर्नित्यसम्बन्धः" इति न्यायात् यत्र यच्छब्दस्तत्र तच्छब्दो यावत् प्रयुज्यते, तावदेव साकाङ्क्षत्वं वाक्यस्य। यत्र च यच्छब्दः प्रयुक्तः, तत्र तच्छब्दसमानार्थकतया यदि इदमेतदःशब्दाद्यतमः प्रयुक्तः, तदापि यच्छब्दोत्थापिताऽऽकाङ्क्षा पूर्यते, तदैव "योऽसौ" इति प्रयोगेऽपि यच्छब्दोत्थापिता आकाङ्क्षा पूर्णा स्यादिति शक्यते वक्तुं, तथाऽपि अयं नियमस्तत्रैव, यत्र यत्तदौ पृथक् पृथक् प्रयोगः, विवक्षावैचित्र्यतया वा पार्थक्यम्; अत्र तु समानविभक्त्यन्ततया

"यः स ते नयनानन्द-करः सुभ्रु ! स आगतः।"

यच्छब्दव्यवधानेन स्थितास्तु निराकाङ्क्षत्वमवगमयन्ति। यथा,—

"आनन्दयति ते नेत्रे योऽधुनाऽसौ समागतः।"

एवमिदमादिशब्दोपादानेऽपि। यत्र च यत्तदोरेकस्यार्थत्वं सम्भवति, तत्रैकस्य उपादानेऽपि निराकाङ्क्षत्वप्रतीतिरिति न क्षतिः। तथा हि,—यच्छब्दस्योत्तरवाक्यगतत्वेनोपादाने सामर्थ्यात् पूर्ववाक्ये तच्छब्दस्यार्थत्वम्। यथा,—"आत्मा जानाति यत् पापम्।" (घ)

एवम्,—

"यं सर्वशैलाः परिकल्प्य वत्सं
मेरौ स्थिते दोग्धरि दोहदक्षे।

यच्छब्दसमीपप्रयुक्ततया च अदःशब्दस्यानुवाद्यत्वप्रत्यायकत्वम्, अत एव यच्छब्दोत्थाप्याया आकाङ्क्षायाः नात्र अदःशब्दः पूरकः, तस्मात् विधेयस्यादःशब्दस्यानुवाद्यत्वादप्राधान्येन निर्देश इति विधेयाविमर्षदोषतादवस्थ्यम्। प्रसिद्धपरामर्शित्वमात्रं—प्रसिद्धार्थबोधकत्वं, न तु विधेयार्थप्रतिपादनेन निराकाङ्क्षत्वप्रत्यायकत्वमित्यर्थः। यत्र तु प्रसिद्धादिपरामर्शिनामपि तदिदमादिशब्दानां यत्पदेन सम्बन्धः सम्भवति, तत्र विधेयत्वप्रतीतिकारित्वमस्त्येव। तदुक्तं,—"ख्यातार्थमनुभूतार्थं प्रक्रान्तार्थञ्च तत्पदम्। यत्पदापेक्षया हीनं न विधेयत्वबोधकृत्॥" इति। क्रमेण तदुदाहरणानि यथा,—"करवदरसदृशमखिलभुवनतलं यत्प्रसादतः कवयः। पश्यन्ति सूक्ष्ममतयः सा जयति सरस्वती देवी॥" "यदङ्गलावण्यमनङ्गभङ्गदं यदाननं निन्दति बिम्बमैन्दवम्। मम क्षणं मुञ्चति मानसं न या विहाय तां हन्त न शान्तिरस्ति मे॥" "रसैः कथा यस्य सुधाऽवधीरिणी नलः स भूजानिरभूत् गुणाद्भुतः॥" इति।

(घ) यत्र चेति।—आर्थत्वम्—अर्थवशलभ्यत्वम्। सामर्थ्यात्—योग्यताबलात्, परस्पराकाङ्क्षानैयत्यात् इत्यर्थः। एतेनोत्तरवाक्यस्थं यत्पदं तत्पदनिराकाङ्क्षमिति ज्ञेयम्। आत्मेति।—यत् पापं तत् आत्मा जानातीति सामर्थ्यात् अन्तःकरणीयमिति भावः।

भास्वन्ति रत्नानि महौषधीश्च
पृथूपदिष्टां दुदुहुर्धरित्रीम्॥" इत्यादावपि।
तच्छब्दस्य प्रक्रान्तप्रसिद्धानुभूतार्थत्वे यच्छब्दस्यार्थत्वम्। (ङ)
क्रमेण यथा,—
"स इत्वा बालिनं वीरस्तत्पदे चिरकाङ्क्षिते।
घातोः स्थान इवादेशं सुग्रीवं सन्न्यवेशयत्॥" (च)
"स वः शशिकलामौलिस्तादात्म्यायोपकल्पताम्।" (छ)
"तामिन्दुसुन्दरमुखीं हृदि चिन्तयामि॥" (ज)

(ङ) यमिति।—अत्र "स हिमालयः अस्ति" इति पूर्ववाक्ये आर्थेन तच्छब्देनान्वयः। उत्तरवाक्यस्थयत्पदस्य पूर्ववाक्यस्थतत्पदेन शाब्दः सम्बन्धोऽपि, यथा,—"यस्यालाः गुणरत्नरोहणभुवः" इत्यादि। एवं पूर्ववाक्यस्थयत्पदस्योत्तरवाक्ये प्रतीयमानतत्पदापेक्षा; यथा,—"यस्तां विसृजते मर्त्यः आत्मानं प्रियमीश्वरम्। विपर्यये न्द्रियार्थार्थं विषमत्यमृतं त्यजेत्॥" इति।

(च) स इति।—स वीरः,—रामः, बालिनं इत्वा घातोः स्थाने आदेशमिव चिरकाङ्क्षिते तत्पदे—तस्य—बालिनः, पदे—राज्ये, सुग्रीवं सन्न्यवेशयत्—अभिषिक्तवान्। अत्र स इति यः सुग्रीवनिघ्नमिति आर्थेन यच्छब्देन सम्बध्यते। अत्र तच्छब्दस्य प्रक्रान्तत्वम्। रघुवंशस्येदं पद्यम्।

(छ) स इति।—सः,—प्रसिद्धः, शशिकला मौलौ यस्य तथोक्तः, शिव इत्यर्थः, वः,—युष्माकं, तादात्म्याय—मुक्तये इत्यर्थः, उपकल्पताम्—मुक्तिप्रदो भवतु इत्यर्थः। अत्र यः युष्माभिराराध्यते इति आर्थेन यच्छब्देन स इति सम्बध्यते, प्रसिद्धार्थकत्वेन तच्छब्दः।

(ज) तामिति।—अत्र या मया चिन्तिता इति आर्थेन यच्छब्देन तामिति सम्बध्यते। यद्वा,—या उपलावण्यपूर्णा इत्यर्थतोऽवगम्यते। एवमेव चण्डीदासादयः; तेषामयमाशयः,—प्रक्रान्तादिपरामर्शकस्य तत्पदस्य यत्पदमिराकाङ्क्षति "यत्तदोर्नित्यसम्बन्धः" इति नियममङ्गस्य स्यात्। एवञ्च "यत्पदापेक्षया हीनम्" इति प्रागुक्तं तूत्थिताकाङ्क्षाविरहपरम्। "स इत्वा" इत्यादौ सः कः? इत्युत्थाप्याकाङ्क्षयैव सङ्गतिरिति नियमे तु यत्पदसन्निहितत्वेन यत्पदप्रसिद्धार्थकं यत्पदं तद्देशे निवेशनीय इति। अत्र अनुभूतार्थकस्तच्छब्दः।

यत्र च यच्छब्दनिकटस्थितानामपीदमादिशब्दानां भिन्नलिङ्गविभक्तित्वं, तत्रापि निराकाङ्क्षत्वमेव। क्रमेण यथा,—

"विभाति मृगशावाक्षी येदं भुवनभूषणम्।" (झ)

"इन्दुर्विभाति यस्तेन दग्धाः पथिकयोषितः।" (ञ)

क्वचिदनुपात्तयोर्द्वयोरपि सामर्थ्यादवगमः। (ट) यथा,—

"न मे श्रमयिता कोऽपि भारस्येत्युर्वि! मा शुचः।
नन्दस्य भवने कोऽपि बालोऽस्त्यद्भुतपौरुषः॥" (ठ)

अत्र योऽस्ति स ते भारस्य श्रमयितेति बुध्यते।

"यत् यदिदरद्दुःखं मे तत् को वाऽपहरिष्यति?"

इत्यत्रैको यच्छब्दः साकाङ्क्ष इति न वाच्यम्। तथा हि—यत् यदित्यनेन येन केनचिद्रूपेण स्थितं सर्वात्मकं वस्तु विवक्षितम्। तथाभूतस्य तस्य तच्छब्देन परामर्शः। एवमन्येषामपि वाक्यगतत्वेनोदाहरणं बोध्यम्। (ड)

(झ) विभातीति।—या मृगशावाक्षी विभाति इदं भुवनानां भूषणम्—अलङ्कारः। अत्र निकटस्थितोऽपि इदं शब्दः क्लीवलिङ्गः।

(ञ) इन्दुरिति।—य इन्दुर्विभाति तेन—इन्दुना, पथिकानां योषितः,—कान्ताः, दग्धाः। अत्र निकटस्थितोऽपि तच्छब्दः भिन्नविभक्तिलिङ्गत्वान्न दृष्टः।

(ट) क्वचिदिति।—अनुपात्तयोः,—अप्रयुक्तयोः, द्वयोः,—यत्तच्छब्दयोरित्यर्थः, सामर्थ्यात्—योग्यतावलात्, आकाङ्क्षातः इत्यर्थः, अवगमः,—प्रतीतिः।

(ठ) नेति।—उर्वि!—हे पृथिवि! कोऽपि—जनः, मे—मम, भारस्य श्रमयिता न, अस्तीति शेषः, इति मा शुचः,—शोकं मा कुरु, [नाथोगे लुङ्, अड़ागमप्रतिषेधश्च] नन्दस्य भवने कोऽपि अद्भुतपौरुषः,—अलौकिकपराक्रमः, बालः,—शिशुः, अस्ति।

(ड) ननु यत्र पूर्ववाक्ये यत्पदश्रुतं, तत्र कथमेकतत्पदेन निराकाङ्क्षत्वप्रतीतिः? तत्र तत्पदश्रुतस्यैव वक्तुं योग्यत्वात्; यथा,—यं यं कामयते कामं तं तमाप्नोति लीलया" इति; अत आह, यत् यदिति।—अत्र यच्छब्दश्रुतं, तत्र एकः एकेन तच्छब्देन निराकाङ्क्षः, अपरः साकाङ्क्षः इति न वक्तव्यम्। सर्वात्मकमिति।—विरहदुःखत्वेन सामान्येन सर्वं विरहदुःखमित्यर्थः; तथाभूतस्य—विरहदुःखत्वाव-

पदांशे श्रुतिकटु यथा,—

"तद्गच्छ सिद्ध्यै कुरु देवकार्य्यम्।" (ढ)

"धातुमत्तां गिरिर्धत्ते।" अत्र मत्ताशब्दः क्षीबार्थे निहतः। (ण)

"वर्ण्यते किं महासेनो विजेयो यस्य तारकः।"

अत्र विजेय इति कृत्यप्रत्ययः क्तप्रत्ययार्थेऽवाचकः। (त)

"पाणिः पल्लवपेलवः।" पेलवशब्दस्याद्याक्षरे अश्लीले। (थ)

"सङ्ग्रामे निहताः शूरा वचोबाणत्वमागताः।"

अत्र वचःशब्दस्य गीःशब्दवाचकत्वे नेयार्थत्वम्। तथा तत्रैव बाणस्थाने शरेति पाठे। अत्र पदद्वयमपि न परिवृत्ति-

---

च्छिन्नस्य, तथा च,—वीप्सायाः वक्तृतात्पर्य्यमेव नियामकं, सामान्यरूपेणोपस्थापने वक्तृतात्पर्य्ये सति न तत्पदे वीप्सा, तत्तद्व्यक्तित्वेनोपस्थापने तात्पर्य्ये सति तत्पदे वीप्सा। क्वचित्तु तत्पदे एव वीप्सा, न तु यत्पदे, यथा,—"ते ते सत्पुरुषाः परार्थघटकाः स्वार्थस्य बाधेन ये।" एवमिति।—अन्येषाम्—अनुचितार्थत्वादीनां, तच्च मया दर्शितमेव इति सारः।

(ढ) "दोषाः केचित् भवन्त्येषु पदांशेऽपि पदेऽपरे" इत्युक्तेः पदांशगतदोषस्योदाहरणं प्रदर्शयति, तद्गच्छेति।—अत्र "सिद्ध्यै" इति पदस्य अंशभूतः "द्ध्यै" इति शब्दः श्रवणकार्कश्यमवगमयतीति भावः।

(ण) धातुमत्तामिति।—अत्र मत्ताशब्दः क्षीबार्थे प्रसिद्धो विद्यमानत्वरूपेऽर्थे प्रयुक्त इति निहतार्थत्वम्। स च धातुमत्तामिति पदस्य अंशभूत इति तस्य पदांशगतत्वम्।

(त) वर्ण्यते इति।—यस्य तारको विजेयः स महासेनः,—कार्त्तिकेयः, किं वर्ण्यते? अत्र ["अचो यत्" (३।१।९७ पा०) इति शास्त्रेण विहितः "अर्हे कृत्यतृचश्च" (३।३।१६९ पा०)] इत्यर्हार्थे विजेय इति पदस्यांशभूतः कृत्यसंज्ञो यत्प्रत्ययः विजितभूतत्वरूपे क्तप्रत्ययार्थे अवाचक इति भावः।

(थ) पाणिरिति।—आद्याक्षरे—पेल इति द्वे अक्षरे इत्यर्थः, अश्लीले, लाटभाषासु वृषणरूपगुह्यावयवबोधकतया व्रीडाव्यञ्जकत्वादिति भावः। जुगुप्साव्यञ्जकं यथा,—"पूयते" इत्यत्र पूयशब्दः। अमङ्गलव्यञ्जकं यथा,—"अभिप्रेतः" इत्यत्र प्रेतशब्दः इति ज्ञेयम्।

सहम्; जलध्यादौ तु उत्तरपदं, बाड़वानलादौ पूर्वपदम्; एवमन्येऽपि यथासम्भवं पदांशदोषा ज्ञेयाः। निरर्थकत्वादीनां त्रयाणाञ्च पदमात्रगतत्वेनैव लक्ष्ये सम्भवः। (द)

क्रमेण यथा,—"मुञ्च मानं हि मानिनि!" अत्र हिशब्दो वृत्तिपूरणमात्रप्रयोजनः। "कुञ्जं हन्ति कृशोदरी।" अत्र हन्तीति गमनार्थे पठितमपि न तत्र समर्थम्। (ध)

"गाण्डीवी कनकशिलानिभं भुजाभ्यामाजघ्ने विषमविलोचनस्य वक्षः।" (न)

(द) सङ्ग्रामे इति।—शूराः,—वीराः, सङ्ग्रामे—युद्धे, निहताः सन्तः, वचोबाणत्वं—गीर्वाणत्वं, देवत्वमिति यावत्, आगताः,—प्राप्ताः। अत्र "वचोबाणत्वम्" इति पदस्य अंशभूतो वचःशब्दो गीरित्यर्थं बोधयितुं प्रयुक्तोऽपि तस्य परिवृत्त्यसहत्वात् नेयार्थत्वं सम्पादयति; एवं "वाग्बाणत्वमुपागताः" "गीःशरत्वमुपागताः" इति वाक्यस्याप्ययमेव दोषः, न परिवृत्तिसहं—श्रुतशब्दपरित्यागेन तत्पर्य्यायशब्दान्तरप्रयोगेऽपि न तदर्थबोधकमित्यर्थः। जलध्यादाविति।—उत्तरपदं—"धि" इत्यंशभूतमित्यर्थः, न परिवृत्तिसहमित्यनुषङ्गः। अत्रोक्तमरिसिंहेन,—"जलदादिषु पूर्वपदे, सरोजमुख्येषु चोत्तरपदेषु। सुरपतिसमेषु चोभयपदेषु पर्य्यायपरिवृत्तिः॥ इति परिवृत्तिसहाये योगात्ते यौगिकाः शब्दाः। परिवृत्त्यसहाये तु मिश्रा गीर्वाणतुल्यास्ते॥" पूर्वपदं—"बाड़व" इत्यंशभूतमित्यर्थः, अत्रापि न परिवृत्तिसहमित्यनुषज्यते। अत्र "धि"स्थाने "ध" इति प्रयोगे तथा बाड़वस्थाने अश्वादिपदप्रयोगे नेयार्थत्वमिति भावः। एवमिति।—"प्रकटितम्" इत्यादौ कटिशब्दः ग्राम्यः। "कस्मिन् कर्मणि सामर्थ्यमस्य नोत्तपतेतराम्। अयं साधुचरस्तस्मादञ्जलिर्बध्यतामिह॥" इत्यादिषु सन्दिग्धत्वं पदैकदेशे ज्ञेयम्; तथा हि, अत्र साधुचरशब्दः पूर्वं साधुरित्यर्थे ["भूतपूर्वे चरट्" (५।३।५३ पा०) इति सूत्रेण, एवं "चरेष्टः" (३।२।१६ पा०)] इति सूत्रेण वा साधितः साधुषु चरतीत्यर्थकः प्रसङ्गाद्यभावे वक्तृतात्पर्य्यसन्देहजनकः इति दिक्। "सम्भवन्ति पदेऽपरे" इति यदुक्तं, तदुदाजिहीर्षुः आह, निरर्थकत्वेति।—निरर्थकत्वादीनां—निरर्थकासमर्थच्युतसंस्कारत्वानामित्यर्थः।

(ध) मुञ्चेति।—अत्र हिशब्दो निरर्थक इति भावः। कुञ्जमिति।—समर्थं—बोधयितुं शक्तं, प्रतिपत्तिक्षममित्यर्थः।

(न) गाण्डीवीति।—गाण्डीवी—अर्जुनः, भुजाभ्यां—बाहुभ्यां, कनकशिलाः

"आङो यमहनः" [पा० १।३।२८।] "स्वाङ्गकर्मकाच्च" [पा० १। ३। २८। सू० वा०] इत्यनुशासनबलादाङ्पूर्वस्य हनः स्वाङ्गकर्मकस्यैवात्मनेपदं नियमितम्। इह तु तल्लङ्घितमिति व्याकरणलक्षणहीनत्वात् च्युतसंस्कारत्वम्।

ननु अत्र "आजघ्ने" इति पदस्य स्वतो न दुष्टता, अपि तु पदान्तरापेक्षयैव इत्यस्य वाक्यदोषता। मैवम्। तथा हि, गुणदोषालङ्काराणां शब्दार्थगतत्वेन व्यवस्थितेस्तदन्वयव्यतिरेकानुविधायित्वं हेतुः। इह तु दोषस्य "आजघ्ने"इति पदमात्रस्यैवान्वयव्यतिरेकानुविधायित्वम्। पदान्तराणां परिवर्त्तनेऽपि तस्य तादवस्थ्यादेव इति पददोष एव ; तथा यथेहात्मनेपदस्य परिवृत्तावपि न पददोषः, तथा हन्प्रकृतेरपीति न पदांशदोषः। एवं "पद्मः" इत्यत्राप्रयुक्तस्य पदगतत्वं बोध्यम्। एवं प्राक्तनादिव्याकरणलक्षणहानावपि च्युतसंस्कारत्वमूह्यम्। इह तु शब्दानां सर्वथा प्रयोगाभावेऽसमर्थत्वं, विरलप्रयोगे निहतार्थत्वम्। निहतार्थत्वमनेकार्थशब्दविषयम्, अप्रतीतत्वं त्वेकार्थस्यापि शब्दस्य सार्वत्रिकप्रयोगाविरहः। अप्रयुक्तत्वमेकार्थशब्दविषयम्। असमर्थत्वमनेकार्थशब्दविषयम्। असमर्थत्वे हन्त्यादयोऽपि गमनार्थे पठिताः। अवाचकत्वे दिनादयः प्रकाशमयाद्यर्थे न तथेति परस्परभेदः। एवं पददोषसजातीया वाक्यदोषा उक्ताः, सम्प्रति तद्विजातीया उच्यन्ते। (५)—

निभं—काञ्चनपाषाणसदृशं, विघनविशोचनस्य—विनेतुश्च, यतः आजघ्ने—आहतवान्।

(५) गुणेति।—गुणानां—वक्ष्यमाणानां माधुर्य्यादीनां, दोषाणां—दुःश्रवत्वादीनाम्, अलङ्काराणाम्—अनुप्रासोपमाऽऽदीनां, शब्दार्थगतत्वेन व्यवस्थितेः,—एते शब्दगुणाः, एते अर्थगुणाः, एते शब्ददोषाः, एते अर्थदोषाः, एते शब्दालङ्काराः, एते अर्थालङ्कारा इत्येवं व्यवस्थाया इत्यर्थः, हेतुः,—कारणम्। तदन्वयव्यतिरेकानुविधायित्वं—तत्सत्त्वे तत्सत्ता अन्वयः, तदसत्त्वे तदसत्ता व्यतिरेकः, तौ अनुविदधातीति अन्वय-

वर्णानां प्रतिकूलत्वं लुप्ताहतविसर्गते ।
अधिकन्यूनकथित-पदताहतवृत्तता: ॥
पतत्प्रकर्षता सन्धौ विश्लेषाश्लीलकष्टता: ।
अर्द्धान्तरैकपदता समाप्तपुनरात्तता ॥
अभवन्मतसम्बन्धाक्रमामतपरार्थता: ।
वाच्यस्यानभिधानञ्च भग्नप्रक्रमता तथा ॥
त्याग: प्रसिद्धेरस्थाने न्यास: पदसमासयो: ।
सङ्कीर्णता गर्भितता दोषा: स्युर्वाक्यमात्रगा: ॥५८५॥ (क)

व्यतिरेकानुविधायी, तयो—शब्दार्थगतानां गुणदोषालङ्काराणाम्, अन्वयव्यतिरेकानुविधायी तदन्वयव्यतिरेकानुविधायी, तस्य भाव: तत्त्वम् । अयं भाव:,—यत्र तत्तच्छब्दसद्भावे, न तु तत्परिहारे तत्तद्गुणादिसद्भाव:, तत्र तत्तद्गुणादीनां शब्दगतत्वं, यत्र न तथा तत्र तेषामर्थगतत्वमिति । एव पञ्च इति ।—अप्रयुक्तत्व—अप्रयुक्तस्य, पदगतत्वं—न तु पदांशगतत्वमित्यर्थ: । इदानीं केषाञ्चिद्दोषाणां परस्परभेदं दर्शयति, इह इति ।—सर्वत्रेति ।—यत्र ज्ञापक नास्ति तत्रैव प्रयोगाभाव:, ज्ञापकसत्त्वे तु प्रयोगोऽस्त्येव, यथा,—इनधातोर्गतौ जङ्घा पङ्क्तिरित्यादिप्रयोग: ; अत्र यङ्लोपपच्छब्दो ज्ञापकौ ; कुटिलं गम्यतेऽनया इति जङ्घा, पङ्क्त्या गम्यतेऽत्र इति पङ्क्ति:, एतदर्थमेव इनधातोर्गतौ पाठ: । केचित्तु,—"पुन:पुन: गम्यतेऽनया" इति यङा वाक्यं कुर्वन्ति, तन्न ; गत्यर्थधातो: ["नित्यं कौटिल्ये गतौ" (३।१।२३ पा०) इति सूत्रेण] अत्यर्थं पौन:पुन्ये च यङ्प्राप्त्यभावात् । विरलेति ।—श्लेषादौ प्रयोगो न त्वत्र, एतेनासमर्थत्वनिहतार्थत्वयोर्भेदो दर्शित: । निहतार्थत्वाप्रतीतत्वयोर्भेदमाह, निहतार्थत्वमिति ।—अप्रयुक्तत्वासमर्थत्वयोर्भेदमाह, अप्रयुक्तत्वमिति ।—असमर्थत्वावाचकत्वयोर्भेदमाह, असमर्थत्वे इति ।—न तथा, पठिता इति शेष: तादृशातीया:,—पङ्क्त: दोषविजातीया वाक्यदोषा:, उच्यन्ते ।

(क) वर्णानामिति ।—(१) वर्णानां प्रतिकूलत्वं—प्रतिकूलवर्णता इत्यर्थ:, (२) लुप्तविसर्गता, (३) आहतविसर्गता, (४) अधिकपदता, (५) न्यूनपदता, (६) कथितपदता, (७) हतवृत्तता, (८) पतत्प्रकर्षता, (९) सन्धिविश्लेष ।

वर्णानां रसानुगुण्यविपरीतत्वं प्रतिकूलत्वम्। (ब)

यथा मम,—

"ओवट्टइ उल्लट्टइ सअणे कहिं पि मोट्टाअइ णो परिहट्टइ।
हिअएण फिट्टइ लज्जाइ खुट्टइ दिहीए सा।" (भ)

अत्र टकाराः शृङ्गाररसपरिपन्थिनः केवलं शक्तिप्रदर्शनाय निबद्धाः। एषाञ्चैकद्वित्रिचतुःप्रयोगेण न तादृक् रसभङ्ग इति न दोषः। (म)

---

(१०) सन्ध्यश्लीलता, (११) सन्धिकष्टता, (१२) अर्द्धान्तरैकपदता, (१३) समाप्तपुनरात्तता, (१४) अभवन्मतसम्बन्धता, (१५) अक्रमता, (१६) अमतपरार्थता, (१७) वाच्यानभिधानं, (१८) भग्नप्रक्रमता, (१९) प्रसिद्धित्यागः, (२०) अस्थाने पदन्यासः, (२१) अस्थाने समासन्यासः, (२२) सङ्कीर्णता, (२३) गर्भितता; एते त्रयोविंश वाक्यमात्रगाः,—केवलवाक्यगताः, दोषाः स्युः। एतेष्वपि दोषेषु मध्ये सन्ध्यश्लीलत्वं, कथितपदत्व, सन्धिकष्टत्वं, पुनरुक्तत्व, न्यूनपदत्वम्, अधिकपदत्वं, समाप्तपुनरात्तत्वं, गर्भितत्वं, पतत्प्रकर्षत्वं चेत्येते नव दोषा अनित्याः, अन्ये पुनश्चतुर्दश दोषा नित्याः।

(ब) वर्णानामिति।—रसानुगुण्यविपरीतत्वञ्च प्रकृतरसविरोधिरसगतगुणव्यञ्जकत्वेन ज्ञेयम्।

(भ) वर्णानां प्रातिकूल्यमुदाहरति, यथेति।—ओवट्टइ इति।—["उद्वर्त्तयति उल्लोटयति शयने कस्मिन्नपि मोट्टायति न परिघट्टति। हृदयेन स्फिटयति लज्जया खुट्टयति धृतेः सा॥" इति संस्कृतम्] विप्रलम्भवर्णनमिदम्। उद्वर्त्तयति—देहमुत्तानीकरोति। उल्लोटयति—पार्श्वपरिवर्त्तनं करोति। मोट्टायति—मोट्टायितभावं प्रकटयति। न परिघट्टति—परिघट्टनं न करोति। स्फिटयति—भ्रश्यति। खुट्टयति—कुण्ठिता भवति इत्यर्थः।

(म) शृङ्गाररसपरिपन्थिनः,—शृङ्गारविरुद्धवीरबीभत्सरौद्रगतौजोगुणव्यञ्जकत्वेन शृङ्गारप्रकर्षबोधप्रतिबन्धकाः इत्यर्थः। अत्र टकारवर्णानाम् ओजोव्यञ्जकतया वीरबीभत्सादिषु एव उपयोगित्वात्, तादृक्—वर्णप्रतिकूलत्वनिबन्धनः, रसभङ्गः,—शृङ्गारप्रकर्षबोधप्रतिबन्धः इति भावः। इह दुःश्रवत्वदोषो वर्त्तते एवेति विभाव्यम्। अत एव "निर्वर्ण्यं पत्युर्मुखम्" इत्यत्र रेफयुक्तस्य वर्णत्रयस्य सत्त्वेऽपि नायं दोषः, दुःश्रवत्वन्तु वर्त्तते एव। ननु उक्तोदाहरणे दुःश्रवत्वमेव दोषः इति चेत्,

"गता निशा इमा बाले !" अत्र लुप्तविसर्गा: । (य)

आहता:,—ओत्वं प्राप्ता:, विसर्गो यत्र । यथा,—"धीरो वरो नरो याति" इति । (र)

"पल्लवाकृतिरक्तोष्ठी" अत्राकृतिपदमधिकम् । एवं "सदाशिवं नौमि पिनाकपाणिम्" इति विशेषणमधिकम् । "कुर्य्यां हरस्यापि पिनाकपाणे:" इत्यत्र तु पिनाकपाणिपदं विशेषप्रतिपत्त्यर्थमुपात्तत्वात् युक्तमेव । यथा वा,—"वाचमुवाच कौत्स:" अत्र वाचमित्यधिकम्, उवाचेत्यनेनैव गतार्थत्वात् । क्वचित्तु विशेषणदानार्थं तत्प्रयोगो युज्यते । यथा,—"उवाच मधुरां वाचम्" इति । केचित्त्वाहु:,—"यत्र विशेषणस्यापि क्रियाविशेषणत्वं सम्भवति, तत्रापि तत्प्रयोगो न घटते ।" यथा,—"उवाच मधुरं धीमान्" इति । (ल)

उदाहरणान्तरं बोध्यम् ; यथा,—"इन्दीवरप्रकरमद्य करोत्यशङ्कमानन्दयामि मुनिवृन्दमनन्दमङ्ग !। भङ्गं भुजङ्गनगणस्य भयं नयामि त्वामन्तकातिथिमसन्तमहं विधाय॥" रावणं प्रति श्रीरामस्योक्तिरियम् । अत्र माधुर्य्यव्यञ्जकवर्णप्राचुर्य्ये वीररसस्य पारवश्यं ज्ञेयम् ।

(य) लुप्तविसर्गतामुदाहरति, गता इति ।—बहुश: प्रयोगे एव दोषत्वमस्या:, ओष्ठ्यैरक्षरापादकत्वादिति बोध्यम् । अधिकविसर्गश्रुतौ तु:श्रवत्वमेव यथा,—"अर: खल: खल: कान्त:" इति ।

(र) आहतविसर्गतामुदाहरति, धीर इति ।—अस्या अपि बहुधा प्रयोगे एव दोषत्वमिति बोध्यम ।

(ल) अधिकम्—अनुपयोगि, पदं यत्र तद्भाव: अधिकपदता ; यथा—पल्लवेति ।—अत्राधिकपदप्रयोगे तात्पर्य्यानुपपादनेन सहृदयाना रसास्वादप्रतिबन्ध इति ध्येयम् । अत्राकृतिरिति ।—"स्त्रियाकृतस्य शरीरम्" इतिवत् पल्लवाकृते: पल्लवानतिरिक्तत्वादाकृतिपदमनुपयुक्तार्थमिति भाव: । अन्ये तु—"आकृति:,—संस्थानं, तस्य संयोगरूपमेव, तस्य रक्तत्वस्य बाधादधिकपदम्" इत्याहु:, तन्न ; बाधे अप्रसक्तप्रतियोगित्वस्यैव प्रसक्ते:, न त्वधिकपदत्वस्य, "प्रभातवाताहतिकम्पितस्य आकृति:" इत्याद्यप्रयोगादाकृतिशब्दस्य शरीरवाचकत्वाच्च ; "अन्यथा तत्र संयोगकल्पनाऽनुपपत्ते:" इत्यपरे ।

"यदि मय्यर्पिता दृष्टिः किं ममेन्द्रतया तदा।"

अत्र प्रथमे त्वयेति पदं न्यूनम्। (व)

"रतिलीलाश्रमं भिन्ते सलीलमनिलो वहन्।"

अत्र लीलाशब्दः पुनरुक्तः। (श) एवं—

"सस्नुः पयः पपुरनेनिजुरम्बराणि
जक्षुर्बिसं धृतविकाशिबिसप्रसूनाः।

कुर्य्यामिति।—विशेषप्रतिपत्त्यर्थं पिनाकपाणेरित्यनेन हरस्य दुर्द्धर्षस्वरूपविशेषस्य बोधः, तस्यापि धैर्य्यच्युतिकरणेनात्मनः शौर्य्यातिशयश्च प्रतिपादितः इति भावः। वाचमिति।—यथा "देवं यजति" "गन्धं जिघ्रति" इत्यादौ "सम्भेदेनान्यतरवैयर्थ्यम्" इति न्यायेन यजादेः पूजाग्रहणमात्रार्थता, तथाऽत्रापि वचधातोरुच्चारणमात्रार्थत्वं, न तु वचनोच्चारणार्थत्वम्, अन्यथा पौनरुक्त्यं स्यात्। एवञ्च तादृशकल्पनमेवात्र शाब्दबोधविलम्बनकृत् इति दोषत्वमस्य। गतार्थत्वादिति।—वचधातुनैव वागुच्चारणस्य प्रतिपादनात् वाचमित्यस्य प्रयोगोऽनुपयुक्त एव, प्रत्युतार्थान्तरकल्पनाकर इति भावः।

(व) न्यूनपदतामाह,—न्यूनम्—उपादेयमप्यनुपात्तं, पदं—वाचकपदं यत्र तस्य भाव इत्यर्थः। वाचकेति विशेषणात् वाच्यानभिधानादस्य भेदो दर्शितः, तस्य द्योतकपदानभिधानस्वरूपत्वात्। केचित्तु,—"अध्याहारपूरणीयं पदं न्यूनपदम्; वाच्यानभिधाने त्वध्याहारस्यैवासम्भवादनयोः भेदः। तथा हि,—"व्यतिक्रमलवं कं मे वीक्ष्य वामाक्षि! कुप्यसि?" इत्यत्र व्यतिक्रमलवयोः समाससत्त्वेऽध्याहार्य्यापिकारेणापि व्यतिक्रमीयस्थूलभागसमुच्चयस्यासम्भवात्, किन्तु वस्त्वन्तरस्यैव समुच्चयात्" इत्याहुः, तन्न; "गुणशतमपि दोषः कश्चिदेकोऽतिवृद्धः क्षपयति यदि नान्यस्तद्विरोधी गुणोऽस्ति" इत्यादौ गुणशतयोः समासत्वेऽप्यधिकारेणैकद्व्यादिगुणसमुच्चयदर्शनात्। न्यूनपदतामुदाहरति, यदीति।—यदि मयि दृष्टिः अर्पिता, त्वयेति शेषः, तदा मम इन्द्रतया किम्? नायिकां प्रति नायकस्योक्तिरियम्। अत्र त्वयेति पदाप्रयोगे अपरस्यापि कर्त्तृपदस्याध्याहारसम्भवेन रसप्रतीतिप्रतिरोध इति दोषत्वम्।

(श) कथितपदतामाह, रतीति।—कथितम्—अर्थपौनरुक्त्यभावेऽपि द्विरुपात्तं, पदं यत्र तस्य भाव इत्यर्थः। तदुदाहरणमाह, रतीति।—एकस्यैवार्थस्यैकशब्देन द्विरुपादाने किमिदं पदं नानार्थत्वेन अर्थान्तरबोधकम्, उत तस्यैवार्थस्य प्रतिपादकम्? इति प्रतिसन्धानप्रसङ्गे शाब्दबोधविलम्बनं दूषकताबीजमत्र बोध्यम्। लीलाशब्दप्रयोगे श्रोतुरर्थान्तरानुधावनात् रसभङ्ग इति भावः।

सैन्याः श्रियामनुपभोगनिरर्थकत्व-
दोषप्रवादममृजन्नगनिम्नगानाम् ॥" (ष)

अत्र विसशब्दस्य "धृतपरिस्फुटतत्प्रसूना" इति सर्वनाम्नैव परामर्शो युक्तः। (स)

हतवृत्तं—लक्षणानुसरणेऽप्यश्रव्यं, रसानुगुणम्, अप्राप्तगुरुभावान्तलघु च। क्रमेण यथा,—"हन्त! सततमेतस्या हृदयं भिन्ते मनोभवः कुपितः"। "अयि! मयि मानिनि! मा कुरु मानम्।" इदं वृत्तं हास्यरसस्यैवानुकूलम्। "विकसितसहकारभारहारिपरिमल एष समागतो वसन्तः।" यत्पादान्ते लघोरपि गुरुभाव उक्तस्तत् सर्वत्र द्वितीयचतुर्थपादविषयं, प्रथमतृतीयपादविषयन्तु वसन्ततिलकादेरेव। अत्र "प्रमुदितसौरभ आगतो वसन्तः" इति पाठो युक्तः। (ह) यथा वा,—

(ष) उदाहरणान्तरमुपस्थापयति,—एवमित्यादि। सस्नुरिति।—सैन्याः,—सैनिकजनाः, नगनिम्नगानां—पर्वतेभ्यः सम्भूतानां नदीनां, तत्सम्बन्धिनीनामिति यावत्, श्रियां—सम्पदाम्, अनुपभोगेन यन्निरर्थकत्वं तदेव यो दोषस्तेन यः प्रवादः तम्, अमृजन्—निराकृतवन्तः। कथमित्याह,—सस्नुः,—स्नानं चक्रुः, पयः,—जलं, पपुः,—पिबन्ति स्म, अम्बराणि—वस्त्राणि, अनेनिजुः,—क्षालितवन्तः, धृतानि विकाशीनि—विकसितानि, विसप्रसूनानि—कमलानि यैस्तथाभूताः सन्तः, विसं—मृणालं, जक्षुः,—भक्षितवन्तः। वसन्ततिलकं वृत्तम्। शिशुपालवधस्येदं पद्यम्।

(स) अत्रेति।—अत्र विसशब्दः पुनरुक्तः, तस्मात् विसशब्दस्य "धृतपरिस्फुटतत्प्रसूनाः" इत्येवं सर्वनाम्ना एव परामर्शः युक्तः, अन्यथा दोषतादवस्थ्यम् इति भावः।

(ह) हतवृत्ततां त्रिविधामाह, हतेति।—रसानुगुणमिति।—केषाञ्चित् वृत्तानां रसानुगुण्यं निर्दिश्यते,—["आरम्भे सर्गबन्धस्य कथाविस्तरसङ्ग्रहे। शमोपदेशवृत्तान्ते सन्तः शंसन्त्यनुष्टुभम्॥ शृङ्गारालम्बनोदार-नायिकारूपवर्णनम्। वसन्तादि तदङ्गञ्च सच्छायमुपजातिभिः॥ रथोद्धता विभावेषु भव्या चन्द्रोदयादिषु। षाड्गुण्यप्रगुणा नीतिः वंशस्थेन विराजते॥ वसन्ततिलकं भाति सङ्करे वीररौद्रयोः। कुर्य्यात् सर्गस्य पर्य्यन्ते मालिनीं द्रुततालवत्॥ उपपन्नपरिच्छेद-काले शिखरिणी वरा।

"अन्यास्ता गुणरत्नरोहणभुवो धन्या मृदन्यैव सा
सम्भाराः खलु तेऽन्य एव विधिना यैरेष सृष्टो युवा।
श्रीमत्कान्तिजुषां द्विषां करतलात् स्त्रीणां नितम्बस्थलात्
दृष्टे यत्र पतन्ति मूढमनसामस्त्राणि वस्त्राणि च॥" (क)

अत्र वस्त्राणि चेति बन्धस्य श्लथत्वश्रुतिः। "वस्त्राण्यपि" इति पाठे तु दार्ढ्यमिति न दोषः। "इदमप्राप्तगुरुभावान्तलघु" इति काव्यप्रकाशकारः। वस्तुतस्तु—"लक्षणानुसरणेऽप्यश्रव्यत्वम्" इत्यन्ये। (ख)

औदार्य्यरुचिरौचित्य-विचारे हरिणी मता॥ साक्षेपक्रोधधिक्कारे परं पृथ्वी भरक्षमा। प्रावृट्प्रवासव्यसने मन्दाक्रान्ता विराजते॥ शौर्य्यस्तवे नृपादीनां शार्दूलक्रीडितं मतम्। सावेगपवनादीनां वर्णने स्रग्धरा वरा॥ दोधकतोटकनर्कटयुक्तं मुक्तकमेव विराजति नूनम्। निर्विषयस्तु रसादिषु तेषां निर्नियमश्च सदा विनियोगः॥" इति सङ्क्षेपः]॥ हन्तेति।—अत्र प्रथमद्वितीयगणयोर्भकारसकारयोः सान्निध्यं वैरस्यापादकत्वेन सामाजिकानामनुभवसिद्धमिति दोषः। गुरुभाव उक्त इति।—"सानुस्वारश्च दीर्घश्च विसर्गी च गुरुर्भवेत्। वर्णः संयोगपूर्वश्च तथा पादान्तगोऽपि वा॥" इत्यादिना इति शेषः। द्वितीयचतुर्थपादविषयमिति।—इह प्रथमपादान्तस्य गुरुत्वाप्राप्तेर्दोष इति भावः।

(क) प्रकारान्तरमुदाहरति, अन्या इति।—ताः गुणरत्नानां रोहणभुवः,—उत्पत्तिक्षेत्राणि, अन्याः,—विलक्षणा इत्यर्थः, सा धन्या—प्रशंसनीया, पुण्यवती वा, मृत्—मृत्तिका, अन्या—विलक्षणेत्यर्थः, ते सम्भाराः,—उपादानानि इत्यर्थः, अन्ये—विलक्षणाः इत्यर्थः, खलु—निश्चये, विधिना—विधात्रा, यैः,—सम्भारैः, एष युवा सृष्टः,—उत्पादितः, यत्र—यूनि, दृष्टे सति, मूढमनसाम्—इतिकर्त्तव्यविमूढमतीनां, श्रीमत्कान्तिजुषां—श्रीमती या कान्तिः तां जुषन्ते तेषां, सुरूपाणामित्यर्थः, अपि-रत्राध्याहार्य्यः, तेन परमरूपवतामपि इत्यर्थः, द्विषां—शत्रूणां, करतलात् अस्त्राणि स्त्रीणां नितम्बस्थलात् वस्त्राणि च पतन्ति। परमसुन्दरो महावीरश्चायमिति भावः। शार्दूलविक्रीडितं वृत्तम्।

(ख) अत्रेति।—श्लथत्वश्रुतिः,—शैथिल्यश्रवणम्। लक्षणानुसरणेऽपि—चतुर्थपादान्तस्य लघोर्गुरुत्वप्रापकशासनसत्त्वेऽपि।

"प्रोज्ज्वलज्ज्वलनज्वाला-विकटोरुसटाच्छटः।
श्वासक्षिप्तकुलक्ष्माभृत् पातु वो नरकेशरी॥" (ग)

अत्र क्रमेण अनुप्रासप्रकर्षः पतितः। (घ)

"दलिते उत्पले एते अक्षिणी अमलाङ्गि! ते।" एवंविध-सन्धिविश्लेषस्य असकृत्प्रयोग एव दोषः। अनुशासनमुलङ्घ्य वृत्तभङ्गभयमात्रेण सन्धिविश्लेषस्य तु सकृदपि। यथा,—

"वासवाशामुखे भाति इन्दुश्चन्दनविन्दुवत्।" (ङ)

"चलण्डामरचेष्टितः" इति। अत्र सन्धौ जुगुप्साव्यञ्जक-मश्लीलत्वम्। (च)

(ग) पतत्प्रकर्षतामाह,—तच्च द्विविधं,—बन्धस्य पूर्वापेक्षया उत्तरोत्तरत्र शैथिल्यादनुप्रासपाताच्च निकर्षविशेषः, तदुक्तं—"पतत्प्रकर्षं बन्धस्य शैथिल्यादुत्तरोत्तरम्। पूर्वानुसारतः कोऽपि निकर्षो यत्र जायते॥" तत्र प्रथमस्योदाहरणं यथा,—"अन्यास्ता गुणरत्नरोहणभुवः" इत्यादि। अत्र "वस्त्राणि च" इत्यत्र बन्धस्य श्लथत्व-श्रुतिरूपः आद्यः पतत्प्रकर्षदोषो बोध्यः। द्वितीयमुदाहरति, प्रोज्ज्वलदिति।—प्रोज्ज्वलन्—प्रोद्योतमानः, यः ज्वलनः,—अग्निः, तस्य ज्वालाः,—शिखाः, तद्वत् विकटाः,—उग्राः, उरवः,—महान्तः, सटानां—जटानां, छटाः,—समूहाः यस्य तादृशः, तथा श्वासेन—निःश्वासमारुतेन, क्षिप्ताः,—दूरमपसारिताः, कुलक्ष्माभृतः,—कुलाचलाः येन तथाभूतः, नरकेशरी—नृसिंहः, वः,—युष्मान्, पातु—रक्षतु। अत्र प्रकर्षपतनेन वैरस्यावगमात् देवविषयकरतेः प्रकर्षहानिरिति दोषः।

(घ) अत्र क्रमेणेति।—प्रथमपादे संयुक्तवर्णत्रयेण चानुप्रासः इत्यत्यन्तमुत्कृष्टः, द्वितीयपादे टकारत्रयेणैवेति तदपेक्षयाऽपकृष्टः, तृतीयपादे तु चकारद्वयेनैवेति ततोऽप्यपकृष्टः, चतुर्थपादे तु मृदुवर्णद्वयेनैवेति सर्वापकृष्टः इत्यर्थः। अत्र चतुर्थपादस्य शैथिल्येन निकर्षो बोध्यः।

(ङ) सन्धिविश्लेषमुदाहरति, दलिते इति।—एवंविधेति—अनुशासनसिद्धे-त्यर्थः। सकृदपीति।—सकृत्प्रयोगेऽपि, दोष इत्यन्वयः। वासवेति।—वासवाशामुखे—पूर्वदिशि। अत्र "नित्यं संहितैकपदवत् पादेष्वर्द्धान्तवर्जम्" इत्यनुशासनात् पद्ये सन्धेर्नित्यत्वमिति तल्लङ्घनाद्दोषः इत्यर्थः।

(च) सन्ध्यश्लीलतामाह, चलण्डेति।—"वेगादुड्डीय गगने चलण्डामरचेष्टितः।

"उर्व्यसावत्र तर्वाली मर्वन्ते चावेवस्थितिः।" अत्र सन्धौ कष्टत्वम्। (छ)

"इन्दुर्विभाति कर्पूर-गौरैर्धवलयन् करैः।
जगन्मा कुरु तन्वङ्गि! मानं पादानते प्रिये॥" (ज)

अत्र जगदिति प्रथमार्द्धे पठितुमुचितम्।

"नाशयन्तो घनध्वान्तं तापयन्तो वियोगिनः।
पतन्ति शतशः पादा भामयन्तः क्षमातलम्॥"

अत्र चतुर्थपादो वाक्यसमाप्तावपि पुनरात्तः। (झ)

अयमुड्डीयते पक्षी ततोऽयेव रुचिं कुरु॥" इति सन्दष्टश्लोकः। अयम् यथा स्वागतम् डामरम्—उद्भटं, चेष्टितं यस्य सः, उद्भतव्यापारवानित्यर्थः। अयेति।—अयस्कामरे इत्यर्थः, मन्त्रात्पन्नलक्षणशब्दव्यापभंशविधया पूरोवश्यन्नत्वाज्जगुप्सा। "रुचिर्द्वयं" इत्यत्र स्त्रीगुह्याङ्गयन्नरुचिर्द्युशब्दोत्पन्ना व्रीडा। अमङ्गलाशीलमश्चिसु,—"भजते भ्रूमतम्" इत्यत्र बोध्यः; ऋतं—मत्यं, भजते इति मन्त्रिवशादमङ्गलम्।

(छ) सन्धिकष्टतामाह, उर्वीति।—मर्वन्ते—नरैः,—ऊषरभूमेः, अन्ते—अवसाने, असौ उर्वी—महती, चारु—सुन्दरी, अवस्थितिर्यस्याः तादृशी, तर्वाली—तरुणाम् आली—श्रेणी।

(ज) अङ्गान्तरैकपदतामाह—अङ्गान्तरे—भिन्नवाक्यघटितपद्यार्द्धे, एकमेव पदं यस्य तस्य भावः, ताम्, अत्र यद्यर्थो घटकत्वम्; तथा च—यद्दृक्षमेकमेव पदं भिन्नवाक्यघटितपद्यार्द्धे वर्त्तते, सा ओत्तरार्द्धादौ पूर्वार्द्धान्ते च सम्भवति; तदाद्यामुदाहरति, इन्दुरिति।—इन्दुः,—चन्द्रः, कर्पूरवत् गौरैः,—धवलैः, करैः,—किरणैः, जगत् धवलयन्—श्वेतीकुर्वन्, विभाति—विराजते। तन्वङ्गि!—हे कृशाङ्गि। पादानते—चरणप्रणते, प्रिये मानं मा कुरु। यदि क्षणिति प्रियानुनयनेऽपि मानं न मुञ्चसि, तदा त्वं स्वयं प्रियानुनयाभावेऽपि मदनार्दिता मानं प्रजहासि इति भयं ततः पूर्वमिति भावः। अन्त्यां यथा—"जगत् प्रकाशयन्निन्दुः करैः शुभ्रैर्विभाति मा। मानसायतनेवाले! कुरु पादानते प्रिये॥" अत्र मेति पदमुत्तरार्द्धे पठितुमुचितम्। अवार्द्धान्तरोक्तपदस्य यथायथमुत्तरत्र पूर्वत्र वा वाक्ये निराकाङ्क्षत्वप्रतिसन्धानेन आकाङ्क्षाविरहसम्बन्धमेव दूषकतावीजम्।

(झ) समाप्तपुनरात्ततामाह—समाप्तम्—अन्वयबोधजननान्निराकाङ्क्षमपि, विशेषान्तरेति शेषः, पुनः,—विशेषवाक्यान्तराकाङ्क्षया इत्यर्थः, आत्तं—गृहीतम्, उक्तमिति

अभवन्मतसम्बन्धो यथा,—

"या जयश्रीर्मनोज्ञस्य यया जगदलङ्कृतम्।
यामेणाक्ष्यौ विना प्राणा विफलाः मे कुतोऽद्य सा ?॥" (ज)

अत्र यच्छब्दनिर्दिष्टानां वाक्यानां परस्परनिरपेक्षत्वात् तदेकान्तःपातिना एणाक्षीशब्देन अन्येषां सम्बन्धः कवेरभिमतो नोपपद्यते एव।

"यां विनामी हता प्राणा एणाक्षी सा कुतोऽद्य मे ?।"

इति तच्छब्दनिर्दिष्टवाक्यान्तःपातित्वे तु सर्वैरपि यच्छब्दनिर्दिष्टवाक्यैः सम्बन्धो घटते। यथा वा,—

"ईक्षसे यत्कटाक्षेण तदा धन्वी मनोभवः।"

अत्र यदित्यस्य तदेत्यनेन सम्बन्धो न घटते। "ईक्षसे चेत्" इति तु युक्तः पाठः। यथा वा,—

"ज्योत्स्नाचयः पयःपूरस्तारकाः कैरवाणि च।
राजति व्योमकासार-राजहंसः सुधाकरः॥" (ट)

अत्र व्योमकासारशब्दस्य समासे गुणीभावात्तदर्थस्य न सर्वैः संयोगः। विधेयाविमर्षे (ठ) यदेवाविसृष्टं तदेव दुष्टम्।

यावत्, यत्र तस्य भावः तत्ता समासपुनरात्तता। उदाहरति, नाशयन्त इति।—स्पष्टम्।

(ज) अभवन्मतसम्बन्धतामाह—अभवत्—न सम्भवत्, मतः,—इष्टः, सम्बन्धः यत्र तत्ता। उदाहरति, येति।—या मनोज्ञस्य—कामस्य, जयश्रीः,—विजयलक्ष्मीः, यया जगत् अलङ्कृतं—भूषितं, यामेणाक्ष्यौ—हरिणनयनां, विना मे—मम, प्राणाः विफलाः, अद्य सा कुतः ?—कुत्र ? विद्यते इति शेषः।

(ट) ज्योत्स्नेति।—ज्योत्स्नानां चयः,—राशिः, पयसां—जलानां, पूरः,—राशिः, तारकाः,—नक्षत्राणि, कैरवाणि—उत्पलानि च, व्योम—आकाशमेव, कासारः,—सरः, ("कासारः सरसी सरः" इत्यमरः) तस्य राजहंसः सुधाकरः,—चन्द्रः, राजति—शोभते।

(ठ) अत्र वाक्यमये एव कासारशब्दस्य योगः कवेरभिमतः, स तावत् समासि-

इह तु प्रधानस्य कासारपदार्थस्य प्राधान्येनाप्रतीतेः सर्वोऽपि पयःपूरादिपदार्थस्तदङ्गतया न प्रतीयते इति सर्ववाक्यार्थविरोधावभास इत्युभयोर्भेदः।

"अनेन छिन्दता मातुः कण्ठं परशुना तव।
बद्धस्पर्द्धः कृपाणोऽयं लज्जते मम भार्गव!॥" (ड)

अत्र "भार्गवनिन्दायां प्रयुक्तस्य मातृकण्ठच्छेदनकर्त्तृत्वस्य परशुना सह सम्बन्धो न युक्तः" इति प्राच्याः। "परशुनिन्दामुखेन भार्गवनिन्दाऽऽधिक्यमेव वैदग्ध्यं द्योतयति" इति आधुनिकाः। (ढ)

अक्रमता (ण) यथा,—

"समय एव करोति बलाबलं
प्रणिगदन्त इतीव शरीरिणाम्।

व्याहारविशेषरूपाकाङ्क्षाविरहात् न घटते इत्याह, अत्रेति।—गुणीभावात्—विशेषणत्वेन अन्विततया विश्लेषाभावात्, तदर्थस्य—कासारशब्दस्य, सर्वैः,—पयःपूरादिभिः। ["व्योम्नि सरसि" इति तु युक्तः पाठः]। विधेयाविमर्षस्य भेदं दर्शयति—विधेयेति।

(ड) अनेनेति।—परशुरामं प्रति रामस्योक्तिरियम्। हे भार्गव! मातुः कण्ठं छिन्दता अनेन तव परशुना बद्धस्पर्द्धः अयं मम कृपाणः,—चन्द्रहासाख्यः असिः, लज्जते।

(ढ) अत्रेति।—भार्गवनिन्दायां—प्रतिपाद्यायामित्यर्थः, मातृकण्ठच्छेदनकर्त्तृत्वस्य इत्यत्र परशौ छेदनस्य करणत्वमेव, न तु कर्त्तृत्वम्। यद्वा,—परशौ मातुरित्यस्य सम्बन्धाभावात् अवशिष्टस्य सम्बन्धो न सम्भवति। प्राच्याः,—प्राचीनाः। आधुनिका इति।—अयमाशयः,—"तव" इत्यनुषक्तेन "मातुः" इत्यस्य सम्बन्धः, "स्थाली पचति" इतिवत् करणस्यापि कर्त्तृत्वारोपः; परशोरारोपितेनापि स्त्रीवधकर्त्तृत्वेन पातकं सम्भाव्यते, तव तु मुख्येनैव मातृवधकर्त्तृत्वेन सुतरामतिपातकमिति। अस्य शाब्दबोधविघटकत्वं दूषकतावीजम्।

(ण) अक्रमतामाह, अक्रमतेति।—अविद्यमानः स्वार्थान्वितार्थकपदप्रत्यासत्तिरूपः क्रमो यत्र तत्त्वमित्यर्थः। वाचकपदस्योक्तक्रमाभावे अस्खलस्थपदत्वम्, इदन्तु तदितरपदस्यैव इति ततोऽस्य भेदः।

शरदि हंसरवाः परुषीकृत-
स्वरमयूरमयू रमणीयताम्॥" (त)

अत्र परामृश्यमानवाक्यानन्तरमेव इति-शब्दप्रयोगो युक्तः,(थ) न तु प्रणिगदन्त इत्यनन्तरम्। एवम्,—

"द्वयं गतं सम्प्रति शोचनीयतां
समागमप्रार्थनया कपालिनः।
कला च सा कान्तिमती कलावतः
त्वमस्य लोकस्य च नेत्रकौमुदी॥" (द)

अत्र त्वमित्यनन्तरमेव चकारो युक्तः।

अमतपरार्थता यथा,—

"राममन्मथशरेण ताड़िता—" इत्यादि। अत्र शृङ्गाररसस्य व्यञ्जको द्वितीयोऽर्थः प्रकृतरसविरोधित्वादनिष्टः। (ध)

(त) उदाहरति, समय इति।—समय एव शरीरिणां बलाबलं—सबलतां दुर्बलताञ्च, करोति—जनयति, इति प्रणिगदन्त इव—कथयन्त इव, शरदि—शरत्काले, हंसानां रवाः, परुषीकृताः स्वरा येषां तादृशाः, मयूराः यत्र तत् यथा तथा, रमणीयतां—मनोज्ञताम्, अयुः,—प्राप्तवन्तः। वर्षासु मयूरनिस्वनस्य प्राशस्त्यं, शरत्सु तेषां न तथा प्रादुर्भावः, तत्र हंसानामेवोत्सव इति प्रसिद्धेरिति भावः। द्रुतविलम्बितं वृत्तम्।

(थ) अत्रेति।—परामृश्यमानवाक्यस्य—समय एव करोति बलाबलमित्यस्य, अनन्तरमेव।

(द) उदाहरणान्तरं दर्शयति, द्वयमिति।—शिवप्राप्त्यर्थं तपस्यन्तीं पार्वतीं प्रति ब्रह्मचारिरूपधारिणः शिवस्योक्तिरियम्। कलावतः,—चन्द्रस्य, कान्तिमती सा—प्रसिद्धा, कला—अंशविशेषः, ("कला तु षोड़शो भागः" इत्यमरः) अस्य लोकस्य—जगतः, नेत्रकौमुदी—नयनानन्ददायिनीति भावः, त्वञ्च एतत् द्वयं कपालिनः,—पिनाकिनः, गृहीतशवशिरसः हरस्य इति यावत्, समागमप्रार्थनया—संसर्गाभिलाषेण, सम्प्रति शोचनीयतां गतं—प्राप्तम्। अस्य प्रत्यासत्तिकल्पनेन शाब्दबोधविलम्बनं दूषकताबीजम्। वंशस्थविलं वृत्तम्।

(ध) अमतपरार्थतामाह, अमतेति।—अमतपरार्थता—अमतः,—प्रकृत-

वाच्यस्यानभिधानं यथा,—

"व्यतिक्रमस्तवं कं मे वीक्ष्य वामाक्षि! कुप्यसि?।"

अत्र व्यतिक्रमस्तवमपीत्यपिरवश्यं वक्तव्यो नोक्तः। न्यूनपदत्वे वाचकपदस्यैव न्यूनता विवक्षिता, अपेस्तु न तथात्वमित्यनयोर्भेदः; एवमन्यत्रापि। यथा वा,—

"चरणानतकान्तायास्तन्वि! कोपस्तथापि ते?।"

अत्र "चरणानतकान्ताऽसि" इति वाच्यम्। (न)

भग्नप्रक्रमता यथा, (प)—

"एवमुक्तो मन्त्रिमुख्ये रावणः प्रत्यभाषत।"

अत्र वचधातुना प्रक्रान्तं प्रतिवचनमपि तेनैव वक्तुमुचितम्; तेन "रावणः प्रत्यवोचत" इति पाठो युक्तः। एवञ्च सति न कथितपदत्वदोषः; तस्योद्देश्य-प्रतिनिर्देश्यव्यतिरिक्तविषयकत्वात्। इह हि वचनप्रतिवचनयोरुद्देश्य-प्रतिनिर्देश्यत्वम्। (फ) यथा,—

विरुद्धः, प्रक्रान्तरसविरोधिरसव्यञ्जकः इत्यर्थः, अनभिमत इति यावत्, परार्थैः,—श्लेषादिना व्यज्यमानः अन्यार्थः यत्र तद्भावस्तत्ता। उदाहरति, रामेति।—अत्र प्रक्रान्तरसस्य—वीभत्सस्य इत्यर्थः, विरोधित्वात्—विसंवादित्वात्, अनिष्टः,—अमतः।

(न) वाच्यस्यानभिधानमाह,—व्यतिक्रमेति। अपेस्तु इति।—उपसर्गाणां द्योतकत्वमेव न वाचकत्वम्" इति नियमादिति भावः। न्यूनपदत्वे वाचकत्वाभिप्रायेण पुनरुक्तोदाहरणं तस्यैवेत्युदाहरणान्तरमाह,—चरणेति। अत्र चरणेति।—तथाऽपीत्यस्य भिन्नवाक्यार्थसापेक्षत्वादिति भावः। पूर्वत्र अपेरप्याकारेण शाब्दबोधविलम्बनम्, उत्तरत्र तथाऽपीत्यनेन शाब्दबोधविलम्बनं दूषकतावीजम्।

(प) भग्नप्रक्रमतामाह, भग्नप्रक्रमतेति।—भग्नः,—विच्छिन्नः, प्रक्रमः,—प्रस्तावो यस्य तस्य भावः, प्रस्तावघटकाकाङ्क्षितप्रकारकोऽर्थः, यत् येन प्रकारेण शाब्दनिर्दिष्टं, तस्य तत्प्रकारेणानुक्तिरेव भग्नः; तथा च, प्रस्तुतिताकाङ्क्षाविषयीभूतेन प्रकारेण पदादनुक्तिः क्रमभङ्ग इति फलितम्।

(फ) उदाहरति, एवमुक्त इति।—अत्रैवमुक्त इति साकाङ्क्षवाक्येनोत्थापिता प्रतिवचनस्याकाङ्क्षा, सा च पूर्वोक्तशब्दविशिष्टमेव प्रतिवचनं विषयीकरोति; अतोऽनाकाङ्क्षितायाः वचधातुरूपप्रकृतेः प्रकारस्य भावधातुनिर्देशात् भग्नः इति भावः।

"उदेति सविता ताम्रस्ताम्र एवास्तमेति च।
सम्पत्तौ च विपत्तौ च महतामेकरूपता॥"

इत्यत्र यदि पदान्तरेण स एवार्थः प्रतिपाद्यते, तदाऽन्योऽर्थः इव प्रतिभासमानः प्रतीतिं स्थगयति। (ब) यथा वा,—

तेनैवेति।—तेनैव—वचधातुनैव; तथा सति प्रथमोत्थापिताकाङ्क्षापूरणं भवतीति भावः। ननु "प्रत्यवोचत" इति पाठे कथितपदत्वदोषप्रसङ्गः? इत्यत आह, एवञ्च सतीति।—एवञ्च सति—प्रत्यवोचत इति पाठे कृतेऽपि सतीत्यर्थः। कथं न कथितपदत्वदोषः? इत्यत आह, तस्येति।—तस्य—कथितपदत्वस्य, उद्देश्य-प्रतिनिर्देश्यव्यतिरिक्तविषयकत्वात्—उद्देश्यः,—प्राक् प्रयुक्त एव, प्रतिनिर्देश्यः,—पुनः प्रयोज्यः यत्र तस्मात्, व्यतिरिक्तः,—भिन्नः, विषयः,—अर्थः, प्रतिपाद्य इति यावत्, यस्य तत्त्वात्। पूर्वापरयोः अभिन्नत्वप्रतिपादनाय यत्र प्राक् प्रयुक्तस्यार्थस्य तेन शब्देन तेनैव च प्रकारेण पुनः प्रयोगस्य प्रयोजनीयता, तदितरस्थाने कथितपदत्वदोषः; अत्र तु भेदाभावज्ञापनार्थं पुनः कथनं प्रकर्षावहम्। अयञ्चार्थः अग्रतः "उदेति" इत्यादिश्लोके स्पष्टीकृतः। तथा च,—उद्देश्य-प्रतिनिर्देश्यभावे कथितपदत्वं गुण एव, न पुनर्दोषः, तदुक्तम्;—"प्रक्रमस्यान्यथाभावे स एव तु महान् गुणः" इति। चण्डीदासास्तु—उद्देश्यः,—अनूद्यः, स एव प्रतिनिर्देश्यः,—प्रतीतिमान्थर्य्यपरिहारार्थं पुनरभिधेयो यत्र स तथोक्तः" इत्याहुः। तेषामयमाशयः,—उद्देश्यपदं प्राङ्निर्दिष्टोद्देश्यविधेयान्यतरपरम्; प्रतिनिर्देश्यपदञ्च चरमनिर्दिष्टोद्देश्यविधेयान्यतरपरम्; तथा सति सर्वं समञ्जसम्। अत्र प्रसङ्गतः उक्तस्य उद्देश्य-प्रतिनिर्देश्यभावस्य भेदा अपि ज्ञातव्याः,—स च त्रिविधः,—एकविध्येयार्थमुद्दिष्टस्य विधेयान्तरे प्रतिनिर्देशः १। एकोद्देशेन विहितस्य उद्देश्यान्तरे विधेयतया प्रतिनिर्देशः २। एकोद्देशेन विहितस्य विधेयान्तरे उद्देश्यतया प्रतिनिर्देशः ३। तत्र प्रतिलोमतन्त्रयुक्त्या आदौ प्रथममनुल्लिख्य द्वितीयस्योदाहरणम् "एवमुक्तः" इत्यादि श्लोके अनुसन्धेयम्। उक्तश्लोकस्य द्वितीयोद्देश्यप्रतिनिर्देश्यत्व बोधयितुमाह, इह हीति।—अत्रोदाहरणे रावणोद्देशेन विहितस्य वचनस्य उद्देश्यान्तरे मन्त्ररूपे विधेयतया प्रतिवचनस्य निर्देश इति भावः; प्रतिवचनेऽपि वचनसत्त्वादेकत्वम्।

(ब) प्रथमोद्देश्य-प्रतिनिर्देश्यभावे एकशब्दस्य पुनः प्रयोगे कथितपदत्वरूपदोषाभावमुदाहरणप्रदर्शनेन प्रमाणयति, उदेतीति।—अत्रोदयकालीनताम्रत्वविधौ उद्दिष्टस्य सवितुः अस्तमयकालीनताम्रत्वविधावुद्दिश्यतया प्रतिनिर्देशः इति न दोषः। ताम्र-

"ते हिमालयमामन्त्र्य पुनः प्रेक्ष्य च शूलिनम्।
सिद्धञ्चास्मै निवेद्यार्थं तद्विसृष्टाः खमुद्ययुः॥"

अत्र "अस्मै" इति इदमा प्रक्रान्तस्य तेनैव, तत्समानाभ्यामेतददःशब्दाभ्यां वा परामर्शो युक्तः, न तच्छब्देन। (भ) यथा वा,—

"उदन्वच्छिन्ना भूः स च पतिरपां योजनशतम्।" (म)

अत्र "मिता भूः पत्यापां स च पतिरपाम्" इति युक्तः पाठः। एवं,—

"यशोऽधिगन्तुं सुखलिप्सया वा
मनुष्यसङ्ख्यामतिवर्त्तितुं वा।
निरुत्सुकानामभियोगभाजां
समुत्सुकेवाङ्कमुपैति सिद्धिः॥" (य)

पर्य्यायरक्तशब्ददाने भग्नप्रक्रमत्वं प्रदर्श्य तस्य दूषकताबीजं प्रदर्शयति,—इत्यत्रेति। यदीति।—पदान्तरेण—अन्येन ताम्रभिन्नेन पदेन इत्यर्थः, प्रतिपाद्यते—उपस्थाप्यते। अन्योऽर्थ इवेति।—"न सोऽस्ति प्रत्ययो लोके यत्र शब्दो न भासते" इति नियमात् ताम्ररक्तशब्दरूपविशेषणभेदात् अन्यार्थवद्भासमानत्वं, तथा सति "सम्पत्तौ च विपत्तौ च महतामेकरूपता" इत्युत्तरार्द्धस्य शाब्दबोधविलम्बनमिति भावः। प्रतीति—बोधं, स्थगयति—तिरोदधाति।

(भ) सर्वनामपदस्य प्रक्रमभङ्गं दर्शयति, ते हिमालयमामन्त्र्येति।—यद्यपि सर्वनाम्ना प्रतिनिर्देशे दोषो नास्तीति प्रसिद्धं, तथाऽप्यनुभवबलेनासर्वनामनिर्दिष्टस्य सर्वनाम्ना प्रतिनिर्देशे तद्बोध्यं, सर्वनामनिर्दिष्टस्य नेति बोध्यम्। इदमा—इद शब्देन। तेनैव—इदमैव। समानाभ्यां—समानार्थाभ्याम्। एतदादिशब्दत्रयस्य समानार्थकत्वं सुप्रसिद्धमिति शब्दभेदेऽपि न तु तद्दूषणावकाश इति भावः।

(म) उद्देश्य-प्रतिनिर्देश्यभावस्य तृतीयं प्रकारं दर्शयति, उदन्वदिति।—उदन्वच्छिन्ना—समुद्रपरिच्छिन्ना इत्यर्थः। "मिता भूः पत्यापां स च पतिरपां योजनशतम्" इति, अत्र पृथिव्युद्देशेन विहितस्य अपां पत्युः योजनशतविधौ उद्देश्यतया प्रतिनिर्देशः।

(य) यश इति।—यशः अधिगन्तुं—लब्धुं, सुखलिप्सया—सुखलाभेच्छया, वा

अत्र "सुखमीहितुम्" इत्युचितम्। अत्राद्ययोः प्रकृतिविषयः प्रक्रमभेदः। तृतीये पर्य्यायविषयः, चतुर्थे प्रत्ययविषयः; एवमन्यत्रापि। (र)

प्रसिद्धित्यागो यथा,—"घोरो वारिमुचां रवः।" अत्र मेघानां गर्जितमेव प्रसिद्धम्। (ल) यदाहुः,—

"मञ्जीरादिषु रणितप्रायं पक्षिषु तु कूजितप्रभृति।
स्तनितमणितादि सुरते मेघादिषु गर्जितप्रमुखम्॥" इत्यादि। (व)

मनुष्यसङ्ख्यां—मनुष्येषु गणनाम्, अतिवर्त्तितुम्—अतिक्रमितुं, वा निरुत्सुकानां—निरुद्वेगानाम्, अभियोगभाजां—यत्नवतां, सिद्धिः समुत्सुकेव—उत्कण्ठिता कामिनीव, अङ्कं—क्रोडम्, उपैति—प्राप्नोति। अत्रेच्छार्थक "तुम्" प्रत्ययेनोपक्रमस्य तत्समानार्थक-"सन्" प्रत्ययेन भङ्गः, यशोऽधिगमनोद्देशेन विहिताया इच्छायाः सुखलाभोद्देशेनापि विधेयतया निर्देशः। किरातार्जुनीयस्येदं पद्यम्। उपेन्द्रवज्रा वृत्तम्।

(र) दर्शितोदाहरणानां विशेषमाह, अत्राद्ययोरिति।—एषूदाहरणेषु आद्ययोः—"एवमुक्तः" इति "ते हिमालयम्" इत्येतयोः। तृतीये—"उदन्वच्छिन्ना" इत्यादौ। चतुर्थे—"यशोऽधिगन्तुम्" इत्यादौ बोध्यम्। एवमन्यत्रेति।—कारकोपसर्गादौ अपि प्रक्रमभङ्गो बोद्धव्य इत्यर्थः। तत्र कारकविषयो यथा,—"गाहन्तां महिषा निपानसलिलं शृङ्गैर्मुहुस्ताडितं छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु। विश्रब्धैः क्रियतां वराहपतिभिर्मुस्ताक्षतिः पल्वले विश्रामं लभतामिदञ्च शिथिलज्याबन्धमस्मद्धनुः॥" अत्र प्रत्ययोक्तकर्त्तृकारकोपक्रमस्य क्रियतामित्यत्र भङ्गः, कर्मकारकस्योक्तत्वात्। परे तु कर्त्तृकारकाणां प्रथमोपक्रमस्य वराहपतिभिरिति तृतीयायां भेदः। "विश्रब्धा रचयन्तु शूकरवरा मुस्ताक्षतिं पल्वले" इति युक्तः पाठः। उपसर्गविषयो यथा,—"चपलाचपलास्वेव नापत्सु विकलो भवेत्। विपत्सु धीरता यस्य भाजनं स हि सम्पदः॥" चपलाचपलासु—विद्युच्चञ्चलासु इत्यर्थः, अत्र "आपत्सु" इत्यत्र आङुपसर्गोपक्रमस्य "विपत्सु" इत्यत्र वेरुपादानाद्भङ्गः।

(ल) मेघानामिति।—मेघानां शब्दे गर्जितमेव—गर्जितादिशब्द एव। तत्परित्यागात् रसादिप्रकर्षबोधप्रतिरोधः इति बोध्यम्।

(व) प्रसिद्धमाह, मञ्जीरादिष्विति।—आदिना रशनादीनां ग्रहणम्। रणितप्रायमित्यत्र प्रायशब्द आद्यर्थः, तेन शिञ्जितादीनां ग्रहणम्। मञ्जीरादिशब्देषु रणितादिशब्दः प्रयोक्तव्यः, एवमग्रेऽपि। मेघादिषु इति।—अत्रादिना हस्त्यादिपरिग्रहः।

अस्थानस्थपदता यथा,—

"तीर्थे तदीये गजसेतुबन्धात् प्रतीपगामुत्तरतोऽस्य गङ्गाम्।
अयत्नबालव्यजनीबभूवुर्हंसा नभोलङ्घनलोलपक्षाः॥" (श)

अत्र तदीयपदात् पूर्वं "गङ्गाम्" इत्यस्य पाठो युक्तः। एवं,—"हितान् न यः संशृणुते स किं-प्रभुः।" अत्र "संशृणुते" इत्यतः पूर्वं नञः स्थितिरुचिता। अत्र च "पदमात्रस्यास्थाने निवेशेऽपि सर्वमेव वाक्यं विवक्षितार्थप्रत्यायने मन्थरम्" (ष) इति वाक्यदोषता। एवमन्यत्रापि।

इह केऽप्याहुः,—"पदशब्देन वाचक एव प्रयोगो निगद्यते, न च नञो वाचकता निर्विवादात् स्वातन्त्र्येणार्थबोधनविरहात्" इति। यथा "द्वयं गतम्" इत्यादौ "त्वम्" इत्यनन्तरं चकारानुपादानादक्रमता, तथाऽत्रापीति। (स)

प्रमुखमित्यनेन रसितादिग्रहणम्। एवं भ्रमरादिषु गुञ्जितादि, मण्डूकादिषु रवादि, हयेषु ह्रेषितादि, हस्तिषु बृंहितादि; एवमन्यदपि बोद्धव्यम्।

(श) अस्थानपदन्यासमुदाहरति, तीर्थे इति।—तदीये—तस्याः,—गङ्गायाः इदं तदीयं तस्मिन्, गङ्गासम्बन्धिनि इत्यर्थः, तीर्थे—जलावतारे, गजसेतुबन्धात्—हस्तिभिः सेतुं रचयित्वा इत्यर्थः, प्रतीपगां—प्रतिकूलगामिनीं, समुद्धतामित्यर्थः, गङ्गाम् उत्तरतः,—गङ्गाया अपरतीरं गन्तुमिच्छतः, अस्य—कुशस्य, नभसः,—आकाशस्य, लङ्घनाय लोलाः,—चपलाः, पक्षा येषां तथाभूताः, पक्षान् धूनयन्त इत्यर्थः, हंसाः अयत्नं यथा तथा अबालव्यजनानि बालव्यजनानि बभूवुः,—बालव्यजनकार्य्यं चक्रुरित्यर्थः। हस्तिसाधनेन गङ्गामुत्तर्त्तुमिच्छतः कुशस्य मस्तकोपरि उड्डीयमानबलाकाश्रेणीभिः तस्य चामरवीजनकार्य्यं निष्पन्नमिवेति भावः। उपजातिवृत्तम्।

(ष) ननु पदमात्रस्य अस्थानस्थितिः पददोष एव, कथमस्य वाक्यदोषत्वम्? अत आह, अत्र च पदमात्रस्येति।—सर्वपदमत्रावयवसमुदायपरम्। मन्थरं—विलम्बसहम्।

(स) नञ इति।—वाचकता—अर्थप्रतिपादकता, द्योतकतामात्रमेवेति भावः, निर्विवादात्—कस्यापि अस्मिन्नर्थे विवादो नास्तीति भावः, स्वातन्त्र्येण—स्वाधीनतया, पदान्तरसमभिव्याहारविरहेण इत्यर्थः। इति शब्दो हेतौ। अत्रापि—हितान् न यः संशृणुते इत्यत्रापीत्यर्थः।

अस्थानस्थसमासता (ह) यथा,—

"अद्यापि स्तनशैलदुर्गविषमे सीमन्तिनीनां हृदि
स्थातुं वाञ्छति मान एष धिगिति क्रोधादिवालोहितः।
प्रोद्यद्दूरतरप्रसारितकरः कर्षत्यसौ तत्क्षणात्
फुल्लत्कैरवकोषनिःसरदलिश्रेणीकृपाणं शशी" ॥ (क)

अत्र कोपिन उक्तौ समासो न कृतः, कवेरुक्तौ कृतः। (ख)

वाक्यान्तरपदानां वाक्यान्तरेऽनुप्रवेशः सङ्कीर्णत्वम्। यथा,—

"मुञ्च चन्द्रं कुरङ्गाक्षि! पश्य मानं नभोऽङ्गने।"

अत्र नभोऽङ्गने चन्द्रं पश्य मानं मुञ्चेति युक्तम्। "क्लिष्टत्वमेकवाक्यविषयम्" इत्यस्माद्भिन्नम्। (ग)

(ह) अस्थानस्थसमासतामाह, अस्थानेति।—स्वगुणव्यञ्जकस्य समासस्य तद्रसाव्यञ्जकस्थानपातोऽस्थानस्थसमासता।

(क) तामुदाहरति, अद्यापीति।—एष मानः अद्यापि—इदानीमपि, ममोदयकालेऽपीत्यर्थः, सीमन्तिनीनां—नारीणां, स्तनौ एव शैलौ—पर्वतौ स्तनशैलौ, तावेव दुर्गे ताभ्यां विषमे—दुर्गमे इति भावः, हृदि स्थातुं वाञ्छति—अभिलषति, धिक्—समयान्तरे तु एतदन्तराले वर्त्ततां, तत्र न मे कोऽपि आक्रोशः, मदुदये सत्यपि यदत्र स्थातुमभिलषति, तन्मां धिक् इति भावः, इति क्रोधादिव आलोहितः,—रक्तवर्णः, असौ शशी—चन्द्रः, प्रोद्यन्तः,—प्रकर्षेण उदयं गच्छन्तः, दूरतरं प्रसारिताः कराः,—किरणाः हस्ताश्च यस्य तादृशः सन्, ("बलिहस्तांशवः कराः" इत्यमरः) तत्क्षणात् फुल्लतां—विकसतां, कैरवाणाम्—उत्पलानां, कोषेभ्यः निःसरन्ती—निर्गच्छन्ती, या अलीनां—भ्रमराणां, श्रेणी, तद्रूपं कृपाणम्—असिं, कर्षति—आकर्षति। [कोषपदश्लेषात् कुड्मलस्य खड्गपिधानत्वं व्यङ्ग्यम्]। शार्दूलविक्रीडितं वृत्तम्।

(ख) अत्रेति।—कोपिनः,—क्रुद्धस्य, चन्द्रस्य इति यावत्, उक्तौ—वाक्ये, अद्यापीत्यादिधिक्पर्य्यन्तायामित्यर्थः। कवेरुक्तौ—इतीत्यादिशशीत्यन्तायामित्यर्थः।

(ग) सङ्कीर्णत्वमुदाहरति, मुञ्चेति।—नन्वत्र व्यवहितान्वयत्वात् क्लिष्टत्वमेवेदम् इत्यत आह, क्लिष्टत्वमिति।—सङ्कीर्णत्वन्तु वाक्यद्वयविषयम् इत्यस्मात्—सङ्कीर्णात्, तस्य भेदः इत्यर्थः।

वाक्यान्तरे वाक्यान्तरानुप्रवेशो गर्भितता। यथा,—

"रमणे चरणप्रान्ते प्रणतिप्रवणेऽधुना।
वदामि सखि! ते तत्त्वं कदाचिन्नोचिताः क्रुधः॥" (घ)

अर्थदोषानाह,—

अपुष्टदुष्क्रमग्राम्य-व्याहताश्लीलकष्टताः।
अनवीकृतनिर्हेतु-प्रकाशितविरुद्धताः॥
सन्दिग्धपुनरुक्तत्वे ख्यातिविद्याविरुद्धते।
साकाङ्क्षता सहचर-भिन्नताऽस्थानयुक्तता॥
अविशेषे विशेषश्चानियमे नियमस्तथा।
तयोर्विपर्य्ययो विध्यनुवादायुक्तते तथा॥
निर्मुक्तपुनरुक्तत्वमर्थदोषाः प्रकीर्त्तिताः॥५९६॥(ङ)

तद्विपर्य्ययः,—विशेषेऽविशेषो नियमेऽनियमः।

(घ) गर्भिततामुदाहरति, रमणे इति।—हे सखि! रमणे—कान्ते, चरणप्रान्ते प्रणतिप्रवणे—प्रणामपरायणे, अधुना कदाचित् अपि क्रुधः,—कोपाः, न उचिताः, इति ते—तुभ्य, तत्त्वं—याथार्थ्यं, ब्रवीमि। अत्र प्रथमद्वितीयचतुर्थचरणस्थितैकवाक्ये तृतीयचरणरूपवाक्यप्रवेशः।

(ङ) अर्थदोषानाह, अपुष्टेति।—भावप्रत्ययः प्रत्येकमभिसम्बध्यते; तथा च—अपुष्टता, दुष्क्रमता, ग्राम्यता, व्याहतता, अश्लीलता, कष्टता, अनवीकृतता, निर्हेतुता, प्रकाशितविरुद्धता, सन्दिग्धत्वं, पुनरुक्तत्वं, ख्यातिविरुद्धता, विद्याविरुद्धता, साकाङ्क्षता, सहचरभिन्नता, अस्थानयुक्तता, अविशेषे विशेषार्थता, अनियमे नियमार्थता, विशेषे अविशेषार्थता, नियमे अनियमार्थता, विध्ययुक्तता, अनुवादायुक्तता, निर्मुक्तपुनरुक्तत्वं चेत्येते त्रयोविंशतिसङ्ख्यका अर्थदोषाः। तत्र सन्दिग्धार्थत्वं, कष्टार्थत्वम्, अश्लीलार्थत्वं, ग्राम्यार्थत्वं, निर्हेत्वर्थत्वं, ख्यातिविरुद्धार्थत्वं, पुनरुक्तार्थत्वं चेत्येते सप्तानित्या दोषाः, अन्ये पुनः षोडश दोषा नित्याः। एषां चार्थनिष्ठत्वं शब्दपरिवृत्तावपि अर्थपरिवृत्तिपर्य्यन्तस्थायित्वेनेति बोध्यम्॥

अत्र अपुष्टत्वं—मुख्यानुपकारित्वम्। यथा,—

"विलोक्य वितते व्योम्नि विधुं मुञ्च रुषं प्रिये।"

अत्र विततशब्दो मानत्यागं प्रति न किञ्चिदुपकुरुते। अधिक-पदत्वे पदार्थान्वयप्रतीतेः समकालमेव बाधप्रतिभासः, इह तु पश्चादिति विशेषः। (च)

दुष्क्रमता यथा,—

"देहि मे वाजिनं राजन्! गजेन्द्रं वा मदालसम्॥"

अत्र गजेन्द्रस्य प्रथमं याचनमुचितम्। (छ)

"स्वपिहि त्वं समीपे मे स्वपिम्येवाधुना प्रिय!।" (ज)

अत्रार्थो ग्राम्यः।

(च) अपुष्टत्वमाह, अत्रेति।—मुख्यानुपकारित्वं—मुख्यस्य—प्रतिपाद्यस्य, विशेषणादीनां पर्य्यवसितार्थादुत्कर्षस्येत्यर्थः, अनुपयोगित्वम्। विततशब्द इति।—स्वार्थबोधद्वारेति शेषः; एतदुपलक्षणं, व्योमवृत्तित्वमपि विशेषणमपुष्टम्; स्मरोद्दीपकत्वेन प्रसिद्धस्य चन्द्रस्य दर्शनमेव मानत्यागस्य मुख्यार्थस्य उपकारि, न तु तस्य व्योमवृत्तित्वं व्योम्नो विततत्वं वा। ननु एवं पदद्वयमत्राधिकमित्यधिकपदत्वमेवात्र दोषः, किमपुष्टत्वस्य दोषत्वस्वीकारेण? इत्यतोऽस्य भेदं दर्शयति, अधिकेति।—बाधप्रतिभासः,—मुख्यार्थोपकारविरहप्रत्ययः इति सारः।

(छ) दुष्क्रमतामाह, दुष्क्रमतेति।—दुष्क्रमता—अर्थस्य क्रमविपर्य्यासः, "प्राग्वाच्य उच्यते पश्चात् पश्चाद्-वाच्योऽथवाऽग्रतः। कविना शक्तिवैकल्यात् योऽर्थस्तं दुष्क्रमं विदुः॥" इति लक्षणात्। अक्रमतायां यथाक्रमेण पदस्य न्यासराहित्यम्, इह तु अर्थस्येति भेदो बोध्यः। उदाहरति, देहीति।—प्रथमं बहुमूल्यं वस्तु लोकैः प्रार्थ्यते, तदप्राप्तौ स्वल्पमूल्यमिति नियमः प्रचलति, अत्र स्वल्पमूल्यं वस्तु प्रथमं याच्यते, ततो बहुमूल्यं वस्तु इति याचनक्रमवैपरीत्यात् दुष्क्रमत्वम्। अनयोरर्थस्यापुष्टत्व-दुष्क्रमत्वप्रतिसन्धानेन रसादिप्रतीतिविलम्बनमेव दूषकताबीजम्।

(ज) ग्राम्यत्वमुदाहरति, स्वपिहीति।—कान्तादिषु वैदग्ध्यचेष्टितेन स्वेच्छा-प्रकटनं सभ्यानां प्रसिद्धं, तदन्यथाप्रवर्त्तनं ग्राम्यत्वम्। "स ग्राम्यः स्वरिरंसायां पामरैर्यत्र कथ्यते। वैदग्ध्यविक्रमलयं हित्वैव वनितादिषु॥" इत्युक्तलक्षणात्। लयः,—सम्बन्धः। अत्रोदाहरणे "स्वपिहि स्वपिमि" इति पदद्वयप्रयोगो वैदग्ध्य-एवेति ग्राम्यत्वमिति भावः।

कस्यचित् प्रागुत्कर्षमपकर्षं वा अभिधाय पश्चात्तदन्यप्रतिपादनं व्याहतत्वम्। (झ) यथा,—

"हरन्ति हृदयं यूनां न नवेन्दुकलाऽऽदयः।
वीक्ष्यते यैरियं तन्वी लोकलोचनचन्द्रिका॥" (ञ)

अत्र येषामिन्दुकला न आनन्दहेतुस्तेषामेवानन्दाय तन्व्याश्चन्द्रिकात्वारोपः।

"हन्तुमेव प्रवृत्तस्य स्तब्धस्य विवरैषिणः।
यथाऽऽशु जायते पातो न तथा पुनरुन्नतिः॥" (ट)

अत्र अर्थोऽश्लीलः। (ठ)

(झ) व्याहतत्वमाह, कस्यचिदिति।—प्रतिपादितोत्कर्षस्यापकर्षप्रतिपादनं प्रतिपादितापकर्षस्योत्कर्षप्रतिपादनं व्याहतत्वम् इत्यर्थः। तत्र प्रथमं यथा,—"कान्ते! तव मुखाम्भोजं सुतरां हृदयङ्गमम्। जितानि येन पद्मानि वसन्ति सलिले सदा॥" अत्र मुखे पद्मत्वारोपणेनोत्कर्षकथनं, पश्चान्मुखेन पराभवादपकर्षकथनम् इत्याशयः।

(ञ) द्वितीयमुदाहरति, हरन्तीति।—नवेन्दुकलादयः यूनां—तरुणानां, हृदयं न हरन्ति—न आकर्षन्ति, यैः,—युवभिः, लोकानां लोचनचन्द्रिका—नयनज्योत्स्ना, नेत्रानन्दविधायिनीत्यर्थः, इयं तन्वी—कृशाङ्गी, वीक्ष्यते—दृश्यते। अत्र इन्दुकलादीनामपकर्षमुक्त्वा पश्चात् नायिकायाः उत्कर्षार्थं चन्द्रकलाकिरणरूपचन्द्रिकात्वारोपेण उत्कर्षोऽभिहित इति बोध्यम्।

(ट) अश्लीलत्वमाह, हन्तुमिति।—हन्तुं—विनाशयितुं, शत्रूनिति शेषः, प्रवृत्तस्य—अभिलषतः, किन्तु स्तब्धस्य—निश्चलस्य, अस्त्रक्षेपणकुण्ठस्य, विवेकरहितस्य वेति यावत्, विवरैषिणः,—परच्छिद्रान्वेषणतत्परस्य, यथा आशु—शीघ्रं, पातः,—पतनम्, अभिभव इत्यर्थः, जायते, तथा पुनः उन्नतिः,—जयः, न, भवतीति शेषः। अर्थान्तरन्तु—हन्तुं—प्रवेष्टुमित्यर्थः, [हननं—वात्स्यायनादिप्रसिद्धं निर्घातादि वा] प्रवृत्तस्य—उद्यतस्य, स्तब्धस्य—दृढ़स्थितस्य, अदृढ़लिङ्गस्य वा, विवरं—योनिच्छिद्रम्, इच्छतीति तथोक्तस्य, तद्गामिन इत्यर्थः, लिङ्गस्येति शेषः, यथा आशु—शीघ्रं, पातः,—रेतःस्खलनेन नम्रता इति भावः, तथा पुनः आशु—शीघ्रम्, उन्नतिः,—पुनरुद्गमः, न, भवतीति शेषः।

(ठ) अत्र प्रकरणे योद्धृरूपार्थप्रतीतिसमकालमेव स्तब्धलिङ्गरूपस्य अदृढ़लिङ्ग-

"वर्षत्येतदहःपतिर्न तु घनो धामस्थमच्छं पयः
सत्यं सा सवितुः सुता सुरसरित्पूरो यया प्लावितः।
व्यासस्योक्तिषु विश्वसित्यपि न कः श्रद्धा न कस्य श्रुतौ ?
न प्रत्येति तथाऽपि मुग्धहरिणी भास्वन्मरीचिष्वपः॥"(ड)

अत्र यस्मात् सूर्य्यात् वृष्टेर्यमुनायाश्च प्रभवस्तस्मात्तयोर्जलमपि सूर्य्यप्रभवम्; ततश्च सूर्य्यमरीचीनां जलप्रत्ययहेतुत्वमुचितं, तथाऽपि मृगी भ्रान्तत्वात्तत्र जलप्रत्ययं न करोति,

रूपस्य वा द्वितीयार्थस्य अर्थवशात् प्रतीतेरर्थस्य सहृदयहृदये लज्जाऽऽधायकतया अश्लीलार्थत्वं दोषः, पुंव्यञ्जकप्रकाशकत्वादिति भावः। इदं व्रीडाव्यञ्जकं, जुगुप्साऽमङ्गलव्यञ्जकयोरुदाहरणमूह्यम्।

(ड) कष्टतामुदाहरति, वर्षतीति।—अहःपतिः,—सूर्य्यः, एतत् धामस्थं—निजकिरणस्थं चन्द्रमण्डलस्थं वा, अच्छं—निर्मलं, पयः,—जलं, वर्षति, न तु घनः,—मेघः, वर्षणकर्तृत्वं सूर्य्यस्य, घनस्य तु आधारत्वमात्रमिति भावः, "अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा॥" इति श्रुतेः; सा—यमुना इत्याशयः, सवितुः,—सूर्य्यस्य, सुता—पुत्री सत्यं, (तथा च विष्णुपुराणे—"सूर्य्यस्य पत्नी संज्ञाऽभूत् तनया विश्वकर्मणः। मनुर्यमो यमी चैव तदपत्यानि वै मुने!॥" यमी—यमुना इत्यर्थः) यया—यमुनया, सुरसरित्पूरः,—गङ्गाप्रवाहः, प्लावितः,—परिवर्द्धितः इति यावत्, व्यासस्य—द्वैपायनस्य, उक्तिषु—वचनेषु, पुराणरूपेषु इत्यर्थः, को जनः न विश्वसिति ? कस्य वा जनस्य श्रुतौ—वेदशास्त्रे, न श्रद्धा ? अपि तु सर्व एव पुराणेषु श्रुतिषु च विश्वसितीत्यर्थः; सूर्य्यस्य जलकर्तृत्वं पुराणेषु वेदेषु च प्रसिद्धमिति भावः; (तथा च विष्णुपुराणम्;—"विवस्वानष्टभिर्मासैरादायापो रसात्मिकाः। वर्षत्यम्बु ततस्तस्मादन्नादप्यखिलं जगत्॥ विवस्वानंशुभिस्तीक्ष्णैरादाय जगतो जलम्। सोमं पुष्यत्यथेन्दुश्च वायुनाडीमयैर्दिवि॥ नालैर्विक्षिपतेऽभ्रेषु धूमाग्न्यनिलमूर्त्तिषु। न भ्रश्यन्ति ततस्तेभ्यो जलानभ्राणि तान्यतः॥ अभ्रस्थाः प्रपतन्त्यापो वायुना समुदीरिताः। संस्कारं कालजनितं मैत्रमासाद्य निर्मलाः॥" इति) तथाऽपि—तादृशप्रमाणसद्भावेऽपीत्यर्थः, मुग्धहरिणी—भ्रान्ता हरिणी, भास्वतः,—सूर्य्यस्य, मरीचिषु—किरणेषु, अपः,—जलानि, न प्रत्येति—न विश्वसिति। अत्रासत्त्यादिसत्त्वेऽपि विलम्बबोध्यत्वं कष्टत्वम्। शार्दूलविक्रीडितं वृत्तम्।

अयमप्रस्तुतोऽप्यर्थो दुर्बोधः, दूरे च अस्मात् प्रस्तुतार्थबोध इति कष्टार्थत्वम्। (ढ)

"सदा चरति खे भानुः सदा वहति मारुतः।
सदा धत्ते भुवं शेषः सदा धीरोऽविकत्थनः॥" (ण)

अत्र सदेत्यनवीकृतत्वम्। अत्र अस्य पदस्य पर्य्यायान्तरेण उपादानेऽपि यदि नान्यद्विच्छित्त्यन्तरं तदाऽस्य दोषस्य सद्भावः इति कथितपदत्वाद्भेदः। (त) नवीकृतत्वं यथा, (थ)—

"भानुः सकृद्युक्ततुरङ्ग एव रात्रिन्दिवं गन्धवहः प्रयाति।
बिभर्त्ति शेषः सततं धरित्रीं षष्ठांशवृत्तेरपि धर्म एषः॥" (द)

(ढ) कष्टत्वमुपपादयति, अत्रेति।—प्रभवः,—उत्पत्तिः। तयोः,—वृष्टिवमुनयोरित्यर्थः। अप्रस्तुतः,—अप्रकृतः। अस्मात्—अप्रस्तुतार्थात्, प्रस्तुतस्य अर्थस्य—मुग्धनायिकायाः नायकसकाशात् अभीष्टलाभाप्रत्ययरूपस्य, बोध इति कष्टार्थत्वम्—अर्थस्य प्रणिधानेन विलम्बबोध्यत्वमित्यर्थः। अयं भावः,—"वर्षत्येतत्" इत्यादौ "तथाऽपि मुग्धहरिणी न प्रत्येति" इति वाक्यार्थस्तु तात्पर्य्यवशादवगतेर्दुर्बोधः; स चात्र अप्रस्तुतः, तात्पर्य्यस्य ग्राहकाभावात् विलम्बबोध्य एव। अस्माच्च बोद्धव्यमुग्धनायिकाया नायकसकाशादभीष्टप्राप्त्यभावस्वरूपः प्रस्तुतोऽर्थः अतीव वक्तृविशेषगवेषणापेक्षी इत्यर्थस्य दुर्बोध्यतया शाब्दबोधबाधनं दूरकतावीजमिति कष्टार्थत्वम्।

(ण) अनवीकृततामुदाहरति, सदेति।—अविकत्थनः,—अनात्मश्लाघाकरः।

(त) अनवीकृतत्वम्—अनूतनीकृतत्व, बहुशः प्रतिपादनीयार्थस्य प्रकारपरावृत्तिं विना एकेनैव प्रकारेण पुनःपुनरर्थस्य ग्रथनमित्यर्थः। अत्रैकेन सदा-शब्देन बहुशः प्रतिपादनीयोऽर्थः पुरातनवद्भासमानो रसादेरपकर्षकः। ननु कथितपदत्वादस्य को भेदः? इत्यत आह, अत्रास्येति।—अस्य—अनवीकृतार्थबोधकस्य, उपादानेऽपीत्यपिना तच्छब्दोपादाने च, अन्यत्—पूर्वपदविभक्तिसमासादिप्रतिपादितभिन्नं, विच्छित्त्यन्तरं—विभक्तिसमासादिप्रतिपादितार्थविशेषः, अस्य—अनवीकृतत्वस्य, तथा चोक्तविच्छित्तिविशेषसद्भावे एव कथितपदत्वदोषः।

(थ) नवीकृतत्वग्रहं विना अनवीकृतत्वप्रतीतिर्न जायते इति नवीकृतत्वमाह, नवीकृतत्वमिति।—भङ्ग्यन्तरेण प्रतिपादने नूतनवद्भासमानमित्यर्थः।

(द) भानुरिति।—भानुः,—सूर्य्यः, सकृत्—एकवारं, युक्ततुरङ्गः,—रथे

"गृहीतं येनासौ: परिभवभयान्नोचितमपि
प्रभावात् यस्याभूत् खलु तव कश्चिन्न विषयः।
परित्यक्तां तेन त्वमपि सुतशोकान्न तु भयात्
विमोक्ष्ये शस्त्र! त्वामहमपि यते स्वस्ति भवते॥" (घ)

अत्र द्वितीयशस्त्रमोचने हेतुर्नोक्त इति निर्हेतुत्वम्। (ङ)

"कुमारस्ते नराधीश! श्रियं समधिगच्छतु॥"

अत्र "त्वं श्रियस्व" इति विरुद्धार्थप्रकाशनात् प्रकाशित-विरुद्धत्वम्। (च)

तुरङ्गान् योजयित्वा यमितुं प्रस्थित एव, न तु कदाचित् तस्य विश्राम इति भावः, नित्यवहः,—वायुः, रात्रिन्दिवं—निरन्तरं, प्रयाति—वहति, न कदाचित् विरमतीति भावः, शेषः,—अनन्तनागः, धरित्रीं—पृथ्वीं, सततं बिभर्त्ति—धत्ते, न तु कदाचित् त्यजतीति भावः, षष्ठांशः,—धान्यादीनामुत्पन्नवस्तूनामिति भावः, वृत्तिः,—जीवनोपायः यस्य तथोक्तस्त्वं, प्रजाभ्यः करूपेण षष्ठांशं गृहीत्वा जीवतः इत्यर्थः, राज्ञः इति शेषः, अपि एवः,—सदा कार्य्येदर्शनरूपः, धर्मः। अभिज्ञानशकुन्तलस्थेदं पद्यम्। उपजातिः वृत्तम्।

(घ) निर्हेतुतामुदाहरति, गृहीतमिति।—कश्चं प्रति कोपात् त्यज्यमानं शस्त्रं स्वस्योक्त्या अशस्त्रात्वं स्ववैराग्यं कथनम्। हे शस्त्र! येन—मम पित्रा इत्यर्थः, परिभव-भयात्—परधर्षणभयात्, नोचितं—ब्राह्मणानां शस्त्रग्रहणस्य निषिद्धत्वात् अनुचित-ग्रहणमपीत्यर्थः, त्वं गृहीतम् आसीः,—अभवः, यस्य—मत्पितुः, प्रभावात् तव क्वचित् —कोऽपि जन इत्यर्थः, विषयः,—शस्त्रीभूतः, न अभूत् इति न, मत्पिता त्वां बहुषु शस्त्रेषु प्रयुक्तवानिति भावः; तेन—मत्पित्रा द्वेषेणापि, सुतशोकात्—अशौकपुत्रशोकं प्राप्येत्यर्थः, न तु भयात्, अबुध इति शेषः, त्वं परित्यक्तम्, अहमपि त्वां विमोक्ष्ये—त्यक्ष्यामि, यते—यच्छते, मत्सकाशादिति भावः, ["यतः" इति पाठे—यतो मोचयादित्यर्थः] भवते—तुभ्यं, स्वस्ति—शुभमस्तु इत्यर्थः। अत्र हेतोरप्रसिद्धत्वेना-भाद्धा। निरुक्तिरीतो वृत्तम्। वेदोपबृंहणस्थेदं पद्यम्।

(ङ) अत्रेति।—द्वितीयशस्त्रमोचने, अशस्त्रात्मकत्वे इति शेषः, हेतुः,—आरब्धम्, आक्षाङ्क्षित इति भावः। निर्हेतुत्वं—हेत्वाकाङ्क्षासत्त्वे तदनभिधानं तत्त्वम् इत्यर्थः।

(च) प्रकाशितविरुद्धत्वमाह, कुमार इति।—नराधीश!—हे नृपते! ते—

अचला अबला वा स्युः सेव्या ब्रूत मनीषिणः ! ? ॥

अत्र प्रकरणाभावाच्छान्तसृङ्गारिणोः (फ) को वक्तेति निश्चयाभावात् सन्दिग्धत्वम्।

"सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः॥" (ब)

अत्र द्वितीयार्द्धं व्यतिरेकेण द्वितीयपादस्यैवार्थः (भ) इति पुनरुक्तता।

प्रसिद्धिविरुद्धता यथा,—

"ततश्चचार समरे शितशूलधरो हरिः।"

अत्र हरेः शूलं लोकेऽप्रसिद्धम्।

तथ, कुमारः श्रियं—राजलक्ष्मीं, समधिगच्छतु—प्राप्नोतु। प्रकाशितेति।—प्रकाशितं—प्रकटितं, प्रविधानेन व्यक्तीकृतमिति यावत्, विरुद्धं—प्रकृतस्य राज्ञो मङ्गलरूपस्य विपरीतम्, अमङ्गलरूपं मरणमिति भावः, तस्य भावस्तत्त्वम्।

(फ) सन्दिग्धत्वमुदाहरति, अचला इति।—मनीषिणः !—हे विद्वांसः ! अचलाः,—पर्वताः, वा अबलाः,—कान्तिमत्यः, सेव्याः,—सेवनीयाः, स्युः ?—भवेयुः ? पर्वतसन्निधौ तपश्चरणं कर्त्तव्यम् ? उत कान्तासम्भोगः कर्त्तव्यः ? इति भावः ; ब्रूत—कथयत, यूयमिति शेषः। अत्र अचलसेवनस्य वक्तुरभिप्रेतत्वे शान्तो रसः, तथा अबलासेवनस्य वक्तुरभिप्रेतत्वे शृङ्गारः व्यज्यते, अनयोरेकतरस्मिन् तात्पर्यनिश्चयाभावात् रसनिश्चयाभावेन शान्तशृङ्गारयोः रसयोतिप्रतिबन्धः इत्यस्य दोषत्वं बोध्यम्। शान्तशृङ्गारिणोः इति—[निर्द्धारणे षष्ठी सप्तमी वा]।

(ब) पुनरुक्तत्वमुदाहरति, सहसेति।—सहसा—अविचिन्त्येत्यर्थः, क्रियां—कार्य्यं, न विदधीत—न कुर्य्यात्, अविवेकः,—अविमृश्यकारित्वमित्यर्थः, परम् आपदां पदं—स्थानं, कारणमिति यावत्, भवतीति शेषः ; सम्पदः,—सम्पत्तयः, गुणलुब्धाः,—गुणाकृष्टाः सत्यः इति भावः, स्वयमेव विमृश्यकारिणं—विवेचिनं, हि—निश्चितं, वृणते—आश्रयन्तीत्यर्थः। किरातार्जुनीयस्थेदं पद्यम्।

(भ) अथ द्वितीयार्द्धं—द्वितीयार्द्धस्थितार्थः इत्यर्थः, व्यतिरेकेण—विपर्य्यासेन, द्वितीयपादस्य—"अविवेकः परमापदां पदम्" इत्यस्यैव, अर्थः। यथा "धर्मः सुखसाधनम्" इत्युक्तौ अधर्मस्य दुःखसाधनत्वनियमादुपलभ्यते, तथाऽत्रापीति बोध्यम्।

यथा वा,—"पादाघातादशोकस्ते सञ्जाताङ्कुरकण्टकः॥"

अत्र पादाघातादशोकेषु पुष्पमेव जायते इति प्रसिद्धं, न तु अङ्कुर इति कविसमयख्यातिविरुद्धता। (म)

"अधरे करजक्षतं मृगाक्ष्याः।"

अत्र शृङ्गारशास्त्रविरुद्धत्वाद्विद्याविरुद्धता (य)। एवमन्यशास्त्रविरुद्धत्वमपि।

"ऐशस्य धनुषो भङ्गं क्षत्रस्य च समुन्नतिम्।
स्त्रीरत्नञ्च कथं नाम मृष्यते भार्गवोऽधुना?॥" (र)

अत्र स्त्रीरत्नमुपेक्षितुमित्याकाङ्क्षता। (ल)

(म) ख्यातिविरुद्धतामुदाहरति, प्रसिद्धीति।—प्रसिद्धेः,—ख्यातेः, विरुद्धता—लोककविसम्प्रदायवैपरीत्यम्। शितेति।—शाणितेत्यर्थः। अत्र "शितशूलधरो हरिः" इत्युक्ते सामाजिकानां शूलशब्दार्थसंशयेन प्रथमं तावत् अर्थावबोधवैकल्यात् वीररसस्य आस्वादप्रतिबन्धः इत्यस्य दोषत्वं बोध्यम्। पादेति।—ते—तव, कामिन्या इत्यर्थः। अङ्कुर एव कण्टकः,—रोमोद्गमः। कविसमयेति।—कवीनां समयः,—नियमः, कविसम्प्रदायसिद्धान्त इति भावः, तत्र या ख्यातिः,—प्रसिद्धिः, तद्विरुद्धता—तद्वैपरीत्यं, कविसमयप्रसिद्धिश्च वक्ष्यमाणा बोद्धव्या।

(य) विद्याविरुद्धतामुदाहरति, अधरे इति।—करजक्षतं—करेषु जायन्ते इति करजाः,—नखाः, तैः क्षतं, नखाघात इत्यर्थः। शृङ्गारेति।—शृङ्गारशास्त्रे हि स्तनयोर्नखाघातः प्रसिद्धः, न तु अधरे, अत्र तद्विपर्य्यासात् विद्यायाः,—शास्त्रस्य, विरुद्धता—वैपरीत्यम्।

(र) साकाङ्क्षतामुदाहरति, ऐशस्येति।—भार्गवः,—भृगुनन्दनः परशुरामः, अधुना—इदानीम्, ऐशस्य धनुषः,—हरकार्मुकस्य, भङ्गं, क्षत्रस्य—क्षत्रियजातेः, समुन्नतिञ्च, तथा स्त्रीरत्नं—सीतामित्यर्थः, कथं नाम मृष्यते?—सहते?

(ल) अत्र ईशधनुर्भङ्गस्य क्षत्रोन्नतेश्च द्वेष्यत्वात् असह्यता, स्त्रीरत्नस्य तु न द्वेष्यत्वम्, अतस्तदुपेक्षणस्यैव असह्यत्वाकाङ्क्षा इत्यत आह, उपेक्षितुमिति।—ननु न्यूनपदत्वादस्य को विशेषः? इति चेत्, तत्र शब्दाध्याहारः, इह त्वर्थाध्याहारः इति विशेषः; वस्तुतस्तु,—अनन्वयित्वभ्रमेण प्रयुक्तस्य पदार्थस्य अनुपपत्तिपदार्थसाकाङ्क्षत्वं तुल्यम्; न्यूनपदे तु नेदृशो भ्रमः इति सङ्क्षेपः।

"सज्जनो दुर्गतौ मग्नः कामिनी गर्वितस्तनी।
खलः पूज्यः समज्यायां तापाय मम चेतसः॥" (व)

अत्र सज्जनः कामिनी च शोभनौ, तत्सहचरः खलोऽशोभनः इति सहचरभिन्नत्वम्। (श)

"आज्ञा शक्रशिखामणिप्रणयिनी शास्त्राणि चक्षुर्नवं
भक्तिर्भूतपतौ पिनाकिनि पदं लङ्केति दिव्या पुरी।
उत्पत्तिर्दृहिणान्वये च तदहो! नेट्टग्वरो लभ्यते
स्वाङ्गेदेष न रावणः क्व नु पुनः सर्वत्र सर्वे गुणाः?॥" (ष)

(व) उत्कृष्टेः सह निकृष्टस्य, निकृष्टेः सहोत्कृष्टस्य चैकान्वयिनेन निर्देशरूपां सहचरभिन्नतामुदाहर्तुं प्राक् आद्यामाह, सज्जन इति।—समज्यायां—सभायाम्।

(श) अथेति।—सहचरभिन्नत्वम्—उत्कृष्टेन सह उत्कृष्टस्य यजनम्, अपकृष्टेन सह अपकृष्टस्य यजनञ्च उचितम्, उत्कृष्टापकृष्टयोरेकत्र इति नियमविपरीतम्; तथा च ते सहदयजनसि वैरस्यभावोदयेन रसास्वादापकर्षः स्यादिति बोध्यम्। द्वितीया यथा,—"दुष्टसङ्गेन दौःशील्यं व्यसनेन तथा विपत्। अपथ्यसेवया व्याधिर्विद्याऽभ्यासेन वर्द्धते॥" तत्र दौःशील्यविपद्व्याधयो हेयत्वान्निकृष्टाः, विद्या उपादेयत्वादुत्कृष्टा इति भावः।

(ष) अज्ञानयुक्ततामुदाहर्तुमाह, आज्ञेति।—तत्र अनुपयुक्तज्ञाने समापितवाक्यार्थत्वम् अज्ञानयुक्तता; तच्च द्विविधं—वाक्यार्थस्याधिक्योपयोगे समापनं, समापनोपयोगे चाधिक्यम्; तदुक्तं—युक्ताधिक्ये विसर्गः स्यादाधिक्यञ्च समापने। अर्थे प्रकल्पिते यत्र सोऽज्ञाने स्यात् समुज्झितः॥" इति। तत्राद्या यथा,—"मातुलो माधवो यस्य पिता यस्य धनञ्जयः। सञ्जेते समरे शौरिमभिमन्युर्महाबलः॥" अत्र "नियतिः केन बाध्यते" इत्यधिकं वक्तुं योग्यम्। द्वितीयामुदाहरति, आज्ञेति।—बालरामायणे रावणपुरोहितेन रावणार्थं सीताप्रार्थने कृते जनकपुरोहितस्य शतानन्दस्य रावणस्य प्रशंसापूर्वकमुपेक्षाबीजप्रदर्शनोक्तिरियम्। आज्ञा—आदेशः, शक्रस्य—इन्द्रस्य, शिखायां यः मणिः,—किरीटस्थं रत्नविशेषः, तस्य प्रणयिनी—सङ्गिनी, शक्रेण शिरोमणिरिव रावणाज्ञा धार्य्यते इति भावः, [एतेनास्य वीरत्वं सूचितं, तच्च शौर्यान्[न]भिमतम्] शास्त्राणि एव नवं—नूतनं, विंशतिलोचनेभ्यः अतिरिक्तमिति भावः, चक्षुः, शास्त्रदृष्ट्या कर्मकरत्वात्, [एतेन शौर्यम् सूचितः। "युवा धीमान् जनप्रियः" इत्यनेन वरगुणशालिनाश्लोक्यत्वात्] भूतपतौ—भूतानामीश्वरे,

अत्र न रावण इत्येतावतैव समाप्यम्। (ख)

"क्षीरकाणां निधेरस्य सिन्धोः किं वर्ण्यतामहे ?"

अत्र रत्नानां निधेरित्यविशेष एव वाच्यः। (घ)

"आवर्त्त एव नाभिस्ते नेत्रे नीलसरोरुहे।

तरङ्गा वलयस्तेन त्वं लावण्याम्बुवापिका॥" (क)

अत्रावर्त्त एवेति नियमो न वाच्यः।

पिनाकिनि—हरे, भक्तिः, [एतेन सम्यदैश्वर्यप्रजाभोगित्वं सूचितम् ; सम्यदादीनां शिवसेवाफलत्वेनोक्तत्वात् ; तेन धनवत्त्वमपि वरगुप्तो लभ्यते—"माता वरयते वित्तं पिता वरयते कुलम्। कन्या वरयते रूपं सौभाग्यमितरे जनाः॥" इति। सौभाग्यं—जनप्रियत्वम्] लङ्का इति प्रसिद्धा, दिव्या—उत्तमा, पुरी पदं—स्थानं, दृष्टिपथस्य—ब्रह्मणः, अन्वये—वंशे, उत्पत्तिः,—जननं, [ब्रह्मणः पुलस्त्यः, तस्मात् विश्रवाः, ततो रावणः इति पुराणप्रसिद्धानुसन्धेयम् ; एतेन सत्कुलजातत्वं वरगुप्तः सूचितः] तत्—तस्मात्, अहो !—आश्चर्यम्, दुष्टक्—एतादृशः, वरः,—अभिलषितं वस्तु, न लभ्यते—न प्राप्यते, केनापीति शेषः ; दुष्टक् वरः,—जामाता, न लभ्यते इति वाऽर्थः। उपेक्षाबीजमाह, स्यादिति।—चेत्—यदि, एषः रावयति क्रन्दयति पीडनेन लोकानिति रावणः, न स्यात्—दुर्वृत्तत्वेन ख्यातनामा न स्यात्, [एतेन जनप्रियत्वस्य वरगुप्तस्य वैकल्यं दर्शितम] वरगुप्तत्वं कुत्रापि नास्तीति आह, क्वेति।—क्व—कुत्र, देशे इति शेषः, नु—खलु, सर्वत्र—सर्वस्मिन् जने, पुनः सर्वे गुणाः ? वर्त्तन्ते इति शेषः, न कुत्रापीति भावः। अत्र पुंसां प्रातिस्विकरूपेण सर्वगुणाभाववत्त्वं, यावत्त्वेन तु सर्वगुणसद्भाव एव, यद्वा—सर्वेषु पुरुषेषु मध्ये कुत्र पुरुषे सर्वे वरगुणाः ? न कुत्रापीत्यर्थः। आर्द्रूलविक्रीडितं वृत्तम।

(ख) एतच्च न रावणोपेक्षाबीजमित्येतत्पर्यन्तमस्य, तत्र वाक्यार्थसमापनमयुक्तमित्याह, अत्रेति।—अत्र अस्थाने "क्व नु" इत्यादिपदानां योगः निष्प्रयोजनः इत्यर्थश्च सहृदयानभिमतत्वेन रसास्वादव्यापकर्षं इति बोध्यम्।

(घ) अविशेषे विशेषमाह, क्षीरकाणामिति।—अत्र अविशेषे—सामान्ये वक्तव्ये विशेष उक्त इति बोध्यम्।

(क) अनियमे नियममुदाहरति, आवर्त्त एवेति।—तरङ्गाः,—भङ्गाः, वलयः,—निवलयः। अत्र अनियमे वक्तव्ये नियमोऽभिहितः।

"यान्ति नीलनिचोलिन्यो रजनीष्वभिसारिकाः ॥"

अत्र तमिस्रासिति रजनीविशेषो वाच्यः। (ख)

"आपातसुरसे भोगे निमग्नाः किं न कुर्वते ?।"

अत्र आपात एवेति नियमो वाच्यः। (ग)

ननु वाच्यस्यानभिधाने "व्यतिक्रमलवम्" इत्यादावपेरभावः, इह च एवकारस्येति कोऽनयोर्भेदः ? अत्राह,—"नियमस्य अवचनमेव पृथग्भूतं नियमपरिवृत्तेर्विषयः" इति, तन्न ; तथा सत्यपि हयोः शब्दार्थदोषतायां नियामकाभावात्। तत् का गतिरिति चेत् "व्यतिक्रमलवम्" इत्यादौ शब्दोच्चारणानन्तरमेव दोषप्रतिभासः, इह तु अर्थप्रत्ययानन्तरमिति भेदः। एवञ्च शब्दपरिवृत्तिसहत्वासहत्वाभ्यां पूर्वराद्धतोऽपि शब्दार्थदोषविभागः एवं पर्य्यवस्यति,—यो दोषः शब्दपरिवृत्त्यसहः, स शब्ददोष एव, यस्य पदार्थान्वयप्रतीतिपूर्वबोध्यः, सोऽपि शब्ददोषः, यस्यार्थप्रतीत्यनन्तरं बोध्यः, सोऽर्थाश्रय इति। एवञ्च अनियमपरिवृत्तित्वादेरप्यधिकपदत्वादेर्भेदो बोद्धव्यः। अमतपरार्थत्वे तु "राममन्मथशरेण—" इत्यादौ नियमेन वाक्यव्यापित्वाभिप्रायाद्वाक्यदोषता। अश्लीलत्वादौ तु न नियमेन वाक्यव्यापित्वम्। (घ)

(ख) विशेषे अविशेषमुदाहरति, यान्तीति।—अभिसारिकाः,—कान्तार्थिन्यः, नीलनिचोलिन्यः,—नीलवसनपरिधायिन्यः सत्यः, रजनीषु यान्ति, कान्तागारमिति शेषः। अत्र विशेषे वक्तव्ये सामान्यमभिहितम्। तमिस्रासु—तमोयुक्तरात्रिषु ; ज्योत्स्नाभिसारिकाणां शुक्लपटावरणत्वमेवोचितम् इति भावः।

(ग) नियमे अनियममाह—नियमः,—निर्द्धारणं, तेन वक्तव्ये अनियमेनाभिधानं नियमानियमः। तमुदाहरति, आपातेति।—भोगे—विषयभोगे, निमग्नाः,—एकान्तलालसाः। अत्र नियमे वक्तव्ये अनियमोऽभिहितः।

(घ) वाच्यानभिधानान्नियमपरिवृत्तेर्भेदं निरूपयितुमाह,—नन्विति। नियमस्येति।—अवचनम्—अनभिधानं, नियमद्योतकपदानभिधानमित्यर्थः, पृथग्भूतं—

"आनन्दितस्वपक्षोऽसौ परपक्षान् हनिष्यति।"
अत्र "परपक्षं हत्वा स्वपक्षमानन्दयिष्यति" इति विधेयम्। (ङ)
"चण्डीशचूडाभरण! चन्द्र! लोकतमोऽपह!।
विरहिप्राणहरण! कदर्थय न मां वृथा॥" (च)
अत्र विरहिण उक्तौ हतीयपादस्यार्थो नानुवाद्यः।

विशेषः इति भावः, एवञ्च नियमद्योतकपदानभिधानं नियमपरिवृत्तिः, तद्विपरीतद्योतकपदानभिधानन्तु वाच्यानभिधानञ्च विषय इति भेदः। नियामकाभावात्—नियायकाभावात्। नेति:,—सिद्धान्तः। दोषप्रतिभासः,—दोषस्फुरणम्, इष्ट तु—नियमपरिवृत्तौ इष्टम्, अर्थप्रत्ययानन्तरम्—अर्थबोधनात् अनन्तरम्। निरूपभेदे प्राचीनस्वरसमाह,—एवञ्चेति। शब्दपरिवृत्तौति।—यत्र दोषः शब्दपरिवृत्तिं न सहते, तत्र शब्ददोषः, यत्र न तथा तत्र अर्थदोष इति भावः, पूर्वैः,—प्राचीनैः आचार्यैः। पर्यवस्यति—परिवर्तते, परिवृत्तिः,—पर्यायशब्दान्तरदानं स्वार्थबोधेन निवृत्तिरेति भावः। पदार्थेति।—पदार्थानाम् अन्वयप्रतीतेः पूर्वं बोध्यः,—अनुभवनीयः, स्रोऽपि शब्ददोषः, शब्दश्रवणादेव दोषप्रतिभासादिति भावः। अनियमपरिवृत्तित्वादेः,—अनियमनियमादेरित्यर्थः। अधिकपदत्वे शब्दश्रवणानन्तरमेव दोषप्रतिभासः, अनियमे नियमे तु अर्थप्रतिसन्धानादेवेति परस्परं भेद इति भावः। नन्वेवमसतपरार्थत्वादौ पदार्थबोधानन्तरमेव दोषप्रतिभासादर्थदोषत्वमेव, कथं वाक्यदोषत्वम्? अत आह, अनतेति।—अनतपरार्थत्वं वाक्यस्यापक्षमेव। नियमेन—निश्चयेन, वाक्यस्यापित्वाभिप्रायात्—वाक्यान्वयव्यतिरेकानुविधायित्वात् इत्यर्थः। अश्लीलत्वादौ त्विति।—"हन्तुम्" इत्यादौ अर्थाश्लीलत्वे हनधात्वादेः पारिभाषिकनिघंटादिबोधकत्वं नियमतो नोपपद्यते, परन्तु असभिव्याहारत्वात् तात्पर्यपर्यालोचनया तदर्थकत्वकल्पनेनेति भावः, इति नियमानियमाभ्याम् अनयोः परस्परं भेद इति भावः।

(ङ) विधेयतापर्यायायोग्ये तात्पर्यारोपकं विध्ययुक्तता। तामुदाहरति,—आनन्दितेति। अत्रेति।—परपक्षहननस्वपक्षानन्दनयोः द्वयोरपि विधेयत्वेऽपि परपक्षहननानन्तरमेव स्वपक्षानन्दनविधावेव विधेयतापर्यायान्विधिः, परपक्षहननविधौ तत्परत्वाद्दोषः। नन्वत्र विधेयाविमर्श एव दोषः इति चेत् "आनन्दयति पक्षं स्वं परपक्षं हनिष्यति" इति पाठपरिवर्तनेनोदाहरणं वेदितव्यम्।

(च) अनुवाद्यविशेषणञ्च विधिविरोधित्वम् अनुवादायुक्तता। तामुदाहरति, चण्डीशेति।—चण्डीशश्च—हरश्च, चूडाभरणञ्च!—शिखानङ्गे! लोकानां—जगतां,

"लग्नं रागावृताङ्ग्या सुदृढमिह ययैवासियष्ट्याऽरिकण्ठे
मातङ्गानामपीहोपरि परपुरुषैर्या च दृष्टा पतन्ती।
तत्सक्तोऽयं न किञ्चिद्गणयति विदितं तेऽस्तु तेनास्मि दत्ता
भृत्येभ्यः श्रीनियोगाद्गदितुमिति गतेवाम्बुधिं यस्य कीर्त्तिः॥"(छ)

अत्र "विदितं तेऽस्तु" इत्यनेन समापितमपि वचनं "तेन" इत्यादिना पुनरुपात्तम्। (ज)

तमोऽपह!—ध्वान्तविध्वंसिन्! विरहिणां प्राणहरण!—जीवनहारिन्! मां वृथा—अकारणं, विनाऽपराधमिति भावः, न कदर्थय—न क्लेशय। स्वं मदनार्त्त्या पीड़यन्तं चन्द्रं प्रति विरहिण उक्तिरियम्; तस्मात् "प्रमोदाधाननिपुण" इत्यभिधेयम्; तच्च परित्यज्य प्रार्थनीयम् अन्यथाऽनुदितं विरहिप्राणहरस्य अनुवाद्यचन्द्रविशेषणस्य तद्विधिविरोधित्वात् इति अयुक्तत्वमवधेयम्।

(छ) आकाङ्क्षितस्य कारकस्य क्रियाऽन्वयेन समाप्तावपि पुनः तत्कारकोपादानं निर्मुक्तपुनरुक्तत्वं, समाप्तपुनरुक्तत्वं तु विशेष्यानुषङ्ग एव इत्यनयोर्भेदः। उदाहरति, लग्नमिति।—राज्ञः स्तुतिरियम्। रागेण—रक्तेन अनुरागेण च, आवृतानि—लिप्तानि पूर्णानि च, अङ्गानि यस्याः तादृश्या, ययैव असियष्ट्या—करवालेन, [स्वैरिण्या कयाचिदिति ध्वनिः] अरीणां—शत्रूणां, कण्ठे सुदृढं लग्नं—शत्रुशिरांसि छिन्नानीति भावः; अन्यत्र—गाढमालिङ्गितं, या च—असियष्टिः, परपुरुषैः,—अरातिभिः स्वामिभिन्नैश्च, मातङ्गानां—हस्तिनाम्, उपरि पतन्ती दृष्टा, असिना शत्रूणां हस्तिनो निहता इति भावः; अन्यत्र—अतिकामुकत्वात् हस्तिभिः,—कामिशास्त्रोक्तपुरुषविशेषैः सह, विहरन्ती परैः दृष्टा, तत्सक्तः,—तस्याम्—असियष्ट्यां, सक्तः,—आसक्तः, केवलं युद्धव्यासक्त इति भावः, अयं—मत्स्वामीति भावः, न किञ्चित् गणयति—मदर्थं न चिन्तयति, मद्रक्षणार्थं न यतते इति भावः, ते—तव, ["क्तस्य च वर्त्तमाने" (२।३।६७ पा०) इति कर्त्तरि षष्ठी] विदितं—ज्ञातं, ["मतिबुद्धिपूजार्थेभ्यश्च" (३।२।१८८ पा०) इति वर्त्तमाने क्तप्रत्ययः] अस्तु, तेन अस्मि—अहं, भृत्येभ्यः दत्ता—भृत्येषु मन्त्र्यादिषु, राजकार्य्यं निहितमिति भावः, श्रीनियोगात्—लक्ष्म्याः आदेशात्, इति गदितुं—पित्रे कथयितुमिव, यस्य कीर्त्तिः अम्बुधिं गता। स्रग्धरा वृत्तम्।

(ज) अत्रेति।—गणयतीति पर्य्यन्तस्य कर्मकारकस्य विदितक्रियाऽन्वयेन समाप्तावपि तेनास्मीत्यादेः पुनरुपादानादिति भावः।

अथ रसदोषानाह,—

रसस्योक्तिः स्वशब्देन स्थायिसञ्चारिणोरपि ।
परिपन्थिरसाङ्गस्य विभावादेः परिग्रहः ॥
आक्षेपः कल्पितः क्लृप्त्यादनुभावविभावयोः ।
अकाण्डे प्रथनच्छेदौ तथा दीप्तिः पुनः पुनः ॥
अङ्गिनोऽननुसन्धानमनङ्गस्य च कीर्त्तनम् ।
अतिविस्तृतिरङ्गस्य प्रकृतीनां विपर्य्ययः ।
अर्थानौचित्यमन्यच्च दोषा रसगता मताः॥५९७॥ (भ)

रसस्य स्वशब्दा रसशब्दः शृङ्गारादिशब्दश्च ।

(भ) रसदोषानाह, रसस्येति ।—स्वशब्देन रसस्य—रसशब्दस्य शृङ्गारादेश्च, स्थायिसञ्चारिणोरपि—स्थायिभावस्य रत्यादेः, सञ्चारिणश्च निर्वेदादेः, स्वशब्देन—तत्तत्स्वप्रतिपादकशब्देन, उक्तिः,—कथनं, परिपन्थिनः,—विरोधिनः, रसस्य अङ्गस्य, विभावादेः परिग्रहः,—उपादानं, क्लृप्त्यात्—कष्टेन, अनुभावविभावयोः कल्पितः आक्षेपः,—ऊहकल्पनमित्यर्थः, अकाण्डे—असमये, सहसा वा, प्रथनच्छेदौ—विस्तृति-विच्छेदौ, तथा पुनः पुनः दीप्तिः,—बोद्धव्यम्, अङ्गिनः,—प्रधानस्य, अननुसन्धानम्, अनङ्गस्य—यत् अङ्गं न तस्य, कीर्त्तनम्, अङ्गस्य अतिविस्तृतिः, प्रकृतीनां—नायकोचितधर्माणां, विपर्य्ययः,—वैपरीत्यम्, अन्यथावर्णनमिति भावः, इदमेवमनौचित्यं, तथा अन्यत्—प्रकृतिविपर्य्ययभिन्नम्, अर्थानौचित्यम्—अर्थायुक्तत्वमित्यर्थः, एते रसगताः दोषाः मताः,—कथिताः। अयमेतं बोद्धव्यम् ;—रसशब्दवाच्यत्वं, स्थायिशब्दवाच्यत्वं, सञ्चारिशब्दवाच्यत्व परित्यक्तोतविरुद्धरसाङ्गविभावादित्वम्, अनुभावस्य अष्टाधिकत्वं, विभावस्य षड्धिकत्वं, रसस्याकाण्डे प्रथितत्वं, रसस्याकाण्डे छिन्नत्वं, रसस्य पुनःपुनर्दीपितत्वम्, अङ्गिनोऽननुसन्धानम्, अनङ्गस्य कीर्त्तनम्, अङ्गस्यातिविस्तरः, प्रकृतिविरुद्धत्वम्, अर्थानौचित्यं चेति रसगतास्त्रयोदशदोषाः। तत्र सञ्चारिशब्दवाच्यत्वं, परित्यक्तोतविरुद्धरसाङ्गविभावादित्वमेतद्दोषद्वयमनित्यम्, अन्ये पुनर्नित्याः। "सञ्चार्यादेर्विरुद्धस्य वाच्यत्वेन वचो गुरुः" इति वदता प्रकाशकृतापि क्वचित् गुणत्वमनुक्तम् इति सुधीभिरत्र विभाव्यम्।

क्रमेण यथा,—

"तामुद्दीक्ष्य कुरङ्गाक्षीं रसो नः कोऽप्यजायत ।"

"चन्द्रमण्डलमालोक्य शृङ्गारे मग्नमन्तरम् ।" (ञ)

स्थायिभावस्य स्वशब्दवाच्यत्वं यथा,—

"अजायत रतिस्तस्यास्त्वयि लोचनगोचरे ।" (ट)

व्यभिचारिणः स्वशब्दवाच्यत्वं यथा,—

"जाता लज्जावती मुग्धा प्रियस्य परिचुम्बने ।" (ठ)

अत्र प्रथमे पादे "आसीन्मुकुलिताक्षी सा" इति लज्जाया अनुभावमुखेन कथने युक्तः पाठः ।

(ञ) क्रमेणोदाहरति, तामिति ।—तां कुरङ्गाक्षीम् उद्दीक्ष्य—दृष्ट्वा, नः, —अस्माकं, कोऽपि—अनिर्वचनीयः, रसः अजायत । अत्र रसशब्देन रसस्य स्वशब्दवाच्यत्वम् । चन्द्रेति ।—चन्द्रमण्डलमालोक्य अन्तरम्—अन्तःकरणं, शृङ्गारे—सुरतार्थनिमित्तं, मग्नम्—आसक्तमित्यर्थः । अत्र शृङ्गारशब्देन रसस्य स्वशब्दवाच्यत्वम् । यथा वा,—"तामनङ्गजयमङ्गलश्रियं किञ्चिदुन्नमितमुग्धलोचिताम् । वेधसो निरवधेः कृतेरियं काचिदेव गोचरे कोऽप्यजायत रसो निरन्तरः ॥" आलोक्य कोमलकपोलतलाभिव्यक्तयत्नानुरागसुभगाभिरामरूपाम् । पश्येष बाल्यमतिहत्य विवर्तमानः शृङ्गारलोभनि तरङ्गितलोचनोऽपि ॥" इति ।

(ट) स्थायीति ।—स्वशब्दवाच्यत्वं—रत्यादिप्रकर्षबोधप्रतियोगित्वम् इत्यर्थः । अजायतेति ।—त्वयि लोचनगोचरे—दृष्टे सति, तस्याः,—बालायाः, रतिः,—अनुरागः, अजायत । अत्र स्थायिभावस्य रतेः स्वशब्देनोपादानम् । यथा वा,—सस्मारे प्रहरणैः प्रहाराणां परस्परम् । उत्कारैः सुतिगतैरुत्साहस्य कोऽप्यभूत् ॥" इति । अधोत्साहस्य ।

(ठ) व्यभिचारिण इति ।—जातेति ।—मुग्धा—बाला, प्रियस्य परिचुम्बने लज्जावती जाता । अत्र व्यभिचारिभावस्य लज्जायाः स्वशब्देनोपादानम् । यथा वा,—"सव्रीडा दयितानने सकरुणा नातङ्कमांभरे सत्रासा भुजगे सविस्मयरसा चन्द्रेऽमृतस्यन्दिनि । सेर्ष्या जङ्गमताऽवलोकनविधौ दीना कपालोदरे पार्वत्या नवसङ्गमप्रणयिनी दृष्टिः शिवायास्तु वः ॥" इति । व्यभिचारिणां स्वातन्त्र्येणोपादाने अत्र स्वशब्दवाच्यत्वं दोषः, रसव्यञ्जनार्थमुपादाने तु न दोषः ; यथा,—"लज्जानम्रमुखी" इति "श्रमविह्वलमुख" इति च ।

"मानं मा कुरु तन्वङ्गि! ज्ञात्वा यौवनमस्थिरम्।"

अत्र यौवनास्थैर्य्यनिवेदनं शृङ्गाररसस्य परिपन्थिनः शान्तरसस्य अङ्गं शान्तस्यैव च विभाव इतिशृङ्गारे तत्परिग्रहो न युक्तः। (ड)

"धवलयति शिशिररोचिषि भुवनतलं लोकलोचनानन्दे।
ईषत्क्षिप्तकटाक्षा स्मेरमुखी सा निरीक्ष्यतां तन्वी॥" (ढ)

अत्र रसस्योद्दीपनालम्बनविभावावनुभावपर्य्यवसायिनौ स्थिताविति कष्टकल्पना। (ण)

"परिहरति रतिं मतिं लुनीते
स्खलतितरां परिवर्त्तते च भूयः।
इति वत विषमा दशाऽस्य देहं
परिभवति प्रसभं किमत्र कुर्मः?॥" (त)

(ड) विरोधिरसाङ्गपरिग्रहमुदाहरति,—मानमिति। अत्रेति।—अत्र शृङ्गाररसस्य विरोधिनः शान्तरसस्य अङ्गं यौवनास्थैर्य्यनिवेदनम्। शान्तस्यैव चेति—च-शब्दो हेतौ, विभावः, उद्दीपनाख्य इति शेषः। तत्परिग्रहः,—यौवनास्थैर्य्यनिवेदनवर्णनमित्यर्थः।

(ढ) अनुभावस्य कष्टाक्षेपमाह, धवलयतीति।—लोकानां लोचनानन्दे—नयनानन्दविधायिनि, शिशिररोचिषि—चन्द्रमसि, भुवनतलं धवलयति—मयूखजालेन धवलं कुर्वति सति, ईषत्—अल्पं यथा तथा, क्षिप्तकटाक्षा स्मेरमुखी सा—या अतिप्रयत्नेनाप्यभग्नमाना इत्यर्थः, तन्वी निरीक्ष्यतां—दृश्यताम्।

(ण) अत्रेति।—अत्र उद्दीपनविभावाः चन्द्रकटाक्षमोक्षमन्दहासाः, आलम्बनं नायिका, एषां बहुत्वेऽप्युद्दीपनविभावत्वेनैकत्वमिति द्विवचनोपपत्तिः, अनुभावपर्य्यवसायिनौ—प्रणिधानेनानुभावस्य नायकचक्षुःप्रसारणस्य बोधकौ; नायकस्य शृङ्गारित्वनिश्चायकाभावात् रत्यनुभावस्य, नायिकायां चक्षुःप्रसारणस्य कष्टकल्पनया आक्षेपः; नायकस्याशृङ्गारित्वे दर्शनाभावस्यापि सम्भवात् तादृशसमये तादृशनायिकायां मुनेरपि प्रायो मनःक्षोभो भवति इत्यौत्सर्गिकमेव चक्षुःप्रसारणमिति कष्टकल्पना बोध्या। काव्यप्रकाशे तु—कर्पूरधूलिधवलद्युतिपूरधौतदिङ्मण्डले शिशिररोचिषि तस्य यूनः। लीलाशिरोंऽशुकनिवेशविशेषक्लृप्तिव्यक्तस्तनोन्नतिरभून्नयनावनौ सा॥" इत्युदाहृतम्।

(त) विभावस्य कष्टकल्पनामाह, परिहरतीति।—क्रमपि युवानं कस्यामपि

अत्र रतिपरिहारादीनां करुणादावपि सम्भवात् कामिनीरूपो विभावः कृच्छ्रादाक्षेप्यः। (थ)

अकाण्डे प्रथनं यथा,—वेणीसंहारे द्वितीयेऽङ्के प्रवर्त्तमानानेकवीरसङ्घये काले दुर्य्योधनस्य भानुमत्या सह शृङ्गारप्रथनम्। (द)

छेदो यथा,—वीरचरिते राघवभार्गवयोर्द्वाराधिरूढ़े सङ्ग्रामे "कङ्कणमोचनाय गच्छामि" (ध) इति राघवस्योक्तिः।

पुनःपुनर्दीप्तिर्यथा,—कुमारसम्भवे रतिविलापे। (न)

अनुरागपरं दृष्ट्वा तत्सख्युरन्यं प्रति उक्तिरियम्। रतिं—वस्त्वन्तरेषु अनुरागं, परिहरति—परित्यजति, मतिं—बुद्धिं, धैर्य्यावलम्बनविषयिणीमिति भावः, लुनीते—छिनत्ति, धैर्य्यं नालम्बते इति भावः, स्खलतितराम्—अतिशयेन भूमौ पतति, भूयः परिवर्त्तते—पार्श्वपरिवृत्तिं करोति, लुण्ठति इति यावत्; [सर्वत्रायमिति कर्त्तृपदमूह्यम्] वत—खेदे, इति—इत्थं, विषमा—दारुणा, दुष्प्रतीकारेति यावत्, दशा—अवस्था, अस्य देहं प्रसभं—बलात्, परिभवति—आकुलयति, अत्र—अस्मिन् विषये, किं कुर्मः? वयमिति शेषः। पुष्पिताग्रा वृत्तम्।

(थ) कृच्छ्रादाक्षेप्य इति।—प्रकरणादिप्रतिसन्धानमेवात्र कृच्छ्रम्।

(द) अकाण्डे इति।—प्रवर्त्तमानेति।—प्रवर्त्तमानः स्वपुत्रादिरूपाणामनेकवीराणां सङ्घयो यत्र तस्मिन् इत्यर्थः। शृङ्गारप्रथनं—शृङ्गारस्य प्रथनं—विस्तरः।

(ध) छेद इति।—द्वाराधिरूढ़े—द्वारम् अधिरूढ़ः तस्मिन्, प्रारब्धे इत्यर्थः। ["धाराऽधिरूढ़े" इति पाठान्तरे तु—धारया—प्रवाहेण, अधिरूढ़ः,—उद्भूत इति तथोक्ते इत्यर्थः] कङ्कणमोचनाय—विवाहार्थं हस्तबद्धसूत्रमोचनाय इत्यर्थः; इदञ्च विवाहाद्दशमदिवसीयोत्सव इति बहवः; सम्प्रति तु द्वितीये तृतीये पञ्चमे षष्ठेऽपि वा दिवसे सम्पद्यते इति बोध्यम्। धीरोदात्तस्य रामस्य तथाऽसमये समापनं व्याजनिर्गमनं प्रत्याययत् अवीरतां प्रत्याययति इति दोषसद्भावः।

(न) पुनःपुनरिति।—रतिविलापे इति।—अयं भावः,—"अथ सा पुनरेव विह्वला वसुधाऽऽलिङ्गनधूसरस्तनी। विललाप विकीर्णमूर्द्धजा समदुःखामिव कुर्वती स्थलीम्॥" इत्युपक्रम्य प्रवर्त्तिते विलापे "तमवेक्ष्य रुरोद सा भृशं स्तनसम्बाधमुरो जघान च। स्वजनस्य हि दुःखमग्रतो विवृतद्वारमिवोपजायते॥" इत्यादिना पुनः प्रवर्त्तनम् इति पुनःपुनस्तथाविधस्य विस्तरः अमाङ्गलिकतयाऽनुचितः इति।

अङ्गिनोऽननुसन्धानं यथा,—रत्नावल्यां चतुर्थेऽङ्के बाभ्रव्या-गमने सागरिकाया विस्मृतिः। (प)

अनङ्गस्य कीर्त्तनं यथा,—कर्पूरमञ्जर्य्यां राजनायिकयोः स्वयं ज्ञातं वसन्तस्य वर्णनमनादृत्य वन्दिवर्णितस्य प्रशंसनम्। (फ)

अङ्गस्यातिविस्तृतिर्यथा,—किराते सुराङ्गनाविलासादिः।

प्रकृतयो दिव्या अदिव्या दिव्यादिव्याश्चेति; तेषां धीरोदात्तादिता, तेषामप्युत्तममध्यमत्वं, तेषु च यो यथाभूतः, तस्यायथावर्णने प्रकृतिविपर्य्ययो दोषः। (ब) यथा,—

(प) अङ्गिन इति।—प्रधानस्येत्यर्थः। बाभ्रव्यागमने इति।—सागरिकायाः पितृगृहादागतः कञ्चुकी बाभ्रव्यः, तदागमने विजयवर्मणस्तत्प्रथमदर्शनाऽऽकृष्टचेतसा नृपेण सागरिकाया अभिधानमात्रव्याप्यनाम्नत्वनादिकारत्वम्; तेन यत्पनिर्दिष्टः प्रकारस्तः खण्डितप्राय इति वैरस्यम्।

(फ) अनङ्गस्येति।—रसालपल्लवस्येत्यर्थः। यथा कर्पूरमञ्जर्यामिति।—अयं भावः,—"अथा किल विदेहिदं वदीहि पढदु अज्जे मलयाचिआ। तथा हि" इतः प्रभृति विदूषकोक्त्यैव यत्रेनाप्रधानस्य वसन्तवर्णनस्य प्रशंसनं प्रकृतानुपयुक्तत्वेऽपि ज्ञातमिति दोषतादवस्थ्यम्।

(ब) प्रकृतिविपर्य्ययमुदाहर्तुं प्रकृतीराह, प्रकृतय इति।—नायका इत्यर्थः, दिव्याः,—देवासुरयक्षगन्धर्वराक्षसादयः, अदिव्याः,—तद्दितरे मानुषादयः, दिव्यादिव्याः प्रागीषोक्ताः। तेषां—दिव्यादिनायकानां, धीरोदात्तादिता, तेषामपीति।—उत्तममध्यमाधमत्वमपि प्रकृतिरित्यर्थः। तेषु चेति।—दिव्यादिनायकानामनुचितवर्णनं प्रकृतिविपर्य्ययः; तज्ज्ञापनाय तेषामनुचितं वर्णनीयं वर्णयामि यथा,—"रतिरूपेण दासस्य शोक आर्य्यस्येव च। दिव्यानामुचितं वर्णनदिव्योत्तमनेहतत्॥ किन्तु सभीनमङ्गारो वर्णो नोत्तमदेवयोः। यतः फलमद क्रोधो भुकुट्यादिविवर्जनः॥ उत्साहः स्वर्गपातालगत्यभिलङ्घनादिषु। दिव्यानामेव नेतॄणां वर्णने उचितो बुधैः॥ ख्यातं लोकपुराणादौ यद्यत्तत् स्यादबाधितम्। वर्णनीयमदिव्यानामप्येवान्नृणयं बुधैः॥ पूज्यादौ तु तत्रभवत् भगवन्निति चोच्यते। महाराजेति राजादौ परमेष्ठीति चोच्यते॥ इत्याद्युचितमेतेषां विरुद्धं दूषणं भवेत्॥" (यत्रेषां—दिव्यादिव्यानाम्, तत्रेयं—दिव्यसाधर्म्यमदिव्यसाधर्म्ये चोचितमित्यर्थः) यथा,—वर्णनस्य स्वःपातालादिलङ्घनोत्साहः भुकुट्यादिरहितः क्रोधश्च।

धीरोदात्तस्य रामस्य धीरोद्धतवत् छद्मना वालिवधः । यथा वा, —कुमारसम्भवे उत्तमदेवतयोः पार्वतीपरमेश्वरयोः सम्भोग-शृङ्गारवर्णनम् । "इदं पित्रोः सम्भोगवर्णनमिवात्यन्तमनुचितम्" इत्याहुः ।

अन्यदनौचित्यं—देशकालादीनामन्यथा यद्वर्णनम् । तथा सति हि काव्यस्यासत्यताप्रतिभासेन विनेयानामुन्मुखीकारासम्भवः । (भ)

एभ्यः पृथगलङ्कार-दोषाणां नैव सम्भवः॥५९८॥(म)

एभ्यः,—उक्तदोषेभ्यः ।

तथा हि,—उपमायामसादृश्यासम्भवयोरुपमानस्य जाति-

(भ) अन्यदिति ।—देशकालादीनामिति ।—देशः,—अद्रिवनराष्ट्रादिः, कालः, —रात्रिदिनर्त्तवः । तत्र अनौचित्यं क्रमेण यथा,—"कर्पूरपादपामर्शी सुरभिर्मलयानिलः । कलिङ्गवनसम्भूता मृगप्राया मतङ्गजाः ॥ चोलाः कालागुरुश्यामाः कावेरीतीरभूमयः ॥" अत्र मलये कर्पूरवृक्षस्य, कलिङ्गवने हस्त्युत्पत्तेः, चोलेषु कालागुरुणामसम्भवादनौचित्यम् । "पद्मिनी नक्तमुन्निद्रा स्फुटत्यह्नि कुमुद्वती । मधुरुत्फुल्लनिचुलो निदाघो मेघदुर्दिनः ॥ श्रव्यहंसगिरो वर्षाः शरदो मत्तबर्हिणः । हेमन्तो निर्मलादित्यः शिशिरः श्लाघ्यचन्दनः ॥" आदिपदेन लोकजातिवयःप्रभृतीनां ग्रहणम् ; चराचराणां भूतानां प्रवृत्तिर्लोकसंज्ञिता ।" तदनौचित्यं यथा,—"आधूतकेसरो हस्ती तिग्मशृङ्गस्तुरङ्गमः । गुरुसारोऽयमेरण्डो निःसारः खदिरद्रुमः ॥" इत्याद्यनौचित्यस्य न केवलं रसापकर्षकत्वं दूषकताबीजं, काव्यस्य प्रवृत्तिनिवृत्त्युपदेशपरत्वव्याघातकत्वमपीत्याह, तथा सतीति ।—अयथावर्णने सतीत्यर्थः । असत्यताप्रतिभासेन—अप्रामाण्यप्रतिपत्त्या, विनेयानां—धर्मादिजिज्ञासूनां, काव्याध्ययने प्रवृत्त्युन्मुखीकारः ।

(म) नन्वसादृश्यादीनामलङ्कारदोषाणां परम्परया रसापकर्षकत्वेन काव्यदोषत्वसम्भवात् काव्यदोषाणां पञ्चविधत्वमनुपपन्नम्, अतः तानुक्तदोषेषु यथायथमन्तर्भावयति, एभ्य इति ।—एभ्यः,—उक्तेभ्यः काव्यदोषेभ्यः, पृथक्—भिन्नानाम्, अलङ्कारदोषाणां नैव सम्भवः,—सम्भवो नास्तीत्यर्थः, अलङ्कारदोषा अपि एतेष्वन्तर्भवन्तीति भावः ।

प्रमाणगतन्यूनत्वाधिकत्वयोरर्थान्तरन्यासे उत्प्रेक्षितार्थसमर्थने चानुचितार्थत्वम्। (य) क्रमेण यथा,—

"ग्रथ्नामि काव्यशशिनं विततार्थरश्मिम्।" (र)

"प्रज्वलज्जलधारावत् निपतन्ति शरास्तव।" (ल)

"चण्डाल इव राजाऽसौ सङ्ग्रामेऽधिकसाहसः।" (व)

"कर्पूरखण्ड इव राजति चन्द्रबिम्बम्।" (श)

"हरवन्नीलकण्ठोऽयं विराजति शिखावलः।" (ष)

"स्तनावद्रिसमानौ ते।" (स)

"दिवाकराद्रक्षति यो गुहासु
लीनं दिवाभीतमिवान्धकारम्।

(य) अन्तर्भावप्रकारमाह, तथा हीति।—उपमायामसादृश्यासम्भवयोरनुचितार्थत्वं पर्य्यवस्यतीत्यध्याहृतेनान्वयः। एवमग्रेऽपि। साधारणधर्माप्रसिद्धिरसादृश्यम्, उपमानाप्रसिद्धिरसम्भवः इति सङ्क्षेपः।

(र) ग्रथ्नामीति।—विततः अर्थाः रश्मयः,—किरणा इव यस्य तं, काव्यशशिनं—काव्यं शशीव तम् [इत्युपमाने समासः] ग्रथ्नामि—आनुपूर्व्या निवेशयामि, रचयामीत्यर्थः। अत्र अर्थरश्म्योः काव्यशशिनोश्च कोऽपि साधारणो धर्मो न प्रसिद्धः; काव्यशशिनोः आह्लादकत्वरूपैकधर्मसम्भवेऽपि अर्थरश्म्योर्न तादृशः धर्मः सम्भवति, तस्मादत्रासादृश्येन अनुचितार्थत्वमुपमायाः, न चात्र रूपकसम्भवोऽपीति वाच्यं, तस्यापि सादृश्यमूलकत्वेन तत्रापि तद्दोषतादवस्थ्यादित्यवधेयम्।

(ल) उपमानासम्भवमुदाहरति, प्रज्वलदिति।—अत्राग्निकार्य्यस्य ज्वलनस्य जले बाधात् तद्विशिष्टत्वं जलधाराणामसम्भव इत्यनुचितार्थत्वमुपमाया इति बोध्यम्।

(व) उपमानस्य जातिन्यूनत्वमुदाहरति, चण्डाल इति।—अत्र चण्डालपदस्य उपमानस्य जातिगतं न्यूनत्वम् उपमेयस्यातिनीचत्वं व्यञ्जयतीति उपमायामनौचित्यम्।

(श) उपमानस्य प्रमाणन्यूनत्वमुदाहरति, कर्पूरेति।—अत्रोपमेयस्य चन्द्रबिम्बस्य अतिक्षुद्रत्वव्यञ्जकं कर्पूरखण्डपदमिति उपमानस्य प्रमाणगतं न्यूनत्वम्।

(ष) उपमानस्य जात्यधिकत्वमुदाहरति, हरवदिति।—शिखावलः,—मयूरः। अत्र उपमानस्य जातिगतमाधिक्यम्।

(स) उपमानस्य प्रमाणाधिकत्वमुदाहरति, स्तनाविति।—अत्र स्तनयोरतिमहत्त्वव्यञ्जकमद्रिपदमनुचितार्थमिति उपमानस्य प्रमाणगतमाधिक्यम्।

क्षुद्रेऽपि नूनं शरणं प्रपन्ने
ममत्वमुच्चैःशिरसां सतीव ॥" (ह)

एवमादिषु उत्प्रेक्षितार्थस्यासम्भूततयैव प्रतिभासनं स्वरूपमित्यनुचितमेव तत्समर्थनम्। (क)

यमकस्य पादत्रयगतस्य अप्रयुक्तत्वं दोषः (ख)। यथा,—

"सहसाऽऽलिजनैः स्निग्धैः सह-सा कुञ्जमन्दिरम्।
उदिते रजनीनाथे सहसा याति सुन्दरी ॥" (ग)

उत्प्रेक्षायां यथाशब्दस्योत्प्रेक्षाद्योतकत्वेऽवाचकत्वम्।

यथा,—

"एष मूर्त्तो यथा धर्मः क्षितिपो रक्षति क्षितिम्।" (घ)

(ह) उत्प्रेक्षितार्थसमर्थनमुदाहरति, दिवाकरादिति।—यः,—हिमाद्रिः, गुहासु—कन्दरासु, लीनम् अन्धकारं दिवाभीतमिव—पेचकमिव, दिवाकरात्—सूर्य्यात्, रक्षति, तथा हि,—क्षुद्रे—नीचेऽपि जने, शरणम्—आश्रयं, प्रपन्ने—प्राप्ते, शरणागते सति इत्यर्थः, सतीव—साधाविव, उच्चैःशिरसां—महात्मनाम्, ["उच्चैःशिरसामतीव" इति पाठान्तरे—अतीव ममत्वम् इति योज्यम्] ममत्वं—स्नेहः, भवतीति शेषः, नूनं—तर्कयामीत्यर्थः। उपजातिवृत्तम्। कुमारसम्भवस्येदं पद्यम्।

(क) एवमिति।—अत्र उत्प्रेक्षितार्थस्य—अचेतनान्धकारत्रासस्य, असम्भूततया—सम्भावनाविषये वस्तुन्यवृत्तितया, ["असद्भूततया" इति पाठे—मिथ्यात्वेनेत्यर्थः] प्रतिभासनं—स्फुरणं, स्वरूपं, ["प्रतिभासनस्वरूपम्" इति पाठे—प्रतिभासनस्वरूपम्—आरोपणमात्रम्] तस्मात् तत्समर्थनं—तस्यार्थस्य दृढीकरणं, न मिथ्येत्युपपादनमित्यर्थः, अनुचितम्—अयोग्यं, तच्चासम्भूते वस्तुनि न सम्भवतीति भावः इति उत्प्रेक्षाया अनौचित्यमवधेयम्।

(ख) पादत्रयगतस्य—पादत्रयमात्रवृत्तित्वस्य, अप्रयुक्तत्वं नाम दोषः, स्वरूपमिति पूर्वेणान्वयः।

(ग) उदाहरति, सहसेति।—सा सुन्दरी रजनीनाथे—चन्द्रे, उदिते सति, स्निग्धैः,—प्रणयपेशलैः, आलिजनैः,—सखीभिः, सह सहसा—हासयुक्ता, हसन्ती सतीत्यर्थः, सहसा—अविचारेण, कुञ्जमन्दिरं—लताऽऽदिपिहितस्थानरूपं गृहं, याति।

(घ) एष इति।—एष क्षितिपः,—राजा, मूर्त्तः,—साक्षात् धृततनुः, यथा—किल, धर्मः क्षितिं रक्षति। अत्र यथाशब्दस्य सादृश्यमात्रद्योतकत्वेऽपि सम्भावनाऽर्थक-

एवमनुप्रासे वृत्तिविरुद्धस्य प्रतिकूलवर्णत्वम्। यथा,—"ओवट्टइ उल्लट्टइ" इत्यादौ। (ङ)

उपमायाञ्च साधारणधर्मस्याधिकन्यूनत्वयोरधिकपदत्वं न्यूनपदत्वञ्च। क्रमेण उदाहरणम्;—

"नयनज्योतिषा भाति शम्भुर्भूतिसितद्युतिः।
विद्युतेव शरन्मेघो नीलवारिदखण्डधृक्॥" (च)

अत्र भगवतो नीलकण्ठत्वस्य अप्रतिपादनाच्चतुर्थपादोऽधिकः। (छ)

"कमलालिङ्गितस्तार-हारहारी मुरं द्विषन्।
विद्युद्विभूषितो नील-जीमूत इव राजते॥"(ज)

अत्रोपमानस्य सबलाकत्वं वाच्यम्। (झ)

अस्यामेवोपमानोपमेययोर्लिङ्गवचनभेदस्य कालपुरुष-

तया प्रयोग इति दुष्टत्वम्। यथा वा,—"उदययौ दीर्घिकागर्भात् मुकुलं मेचकोत्पलम्। नारीलोचनचातुर्य्य-शङ्कासङ्कुचितं यथा॥" इति।

(ङ) वृत्तिविरुद्धस्य—प्रकृतरसविरोधिरसानुगुणवर्णघटितस्येत्यर्थः। ओवट्टइ इति।—अत्र वृत्तिविरुद्धस्य शृङ्गारविरोधिवीराद्यनुगुणटकारघटितस्य अनुप्रासस्य शृङ्गारे प्रतिकूलवर्णत्वम्; एवं वीरवृत्तिविरुद्धस्य अनुप्रासघटकवर्णस्य वीरे प्रतिकूलवर्णत्वमित्यादि बोध्यम्।

(च) नयनेति।—भूतिभिः,—भस्मभिः, ("भूतिर्भस्मनि सम्पत्ति-हस्तिशृङ्गारयोः स्त्रियाम्" इति मेदिनी) सिता—धवला, द्युतिः यस्य तादृशः, शम्भुः नयनज्योतिषा नीलवारिदखण्डधृक्—नीलमेघखण्डधारी, शरन्मेघः विद्युता इव भाति—विराजते।

(छ) अत्रेति।—भगवतः,—शम्भोः। अप्रतिपादनात्—अप्रतियोगात्, चतुर्थपादः—नीलवारिदखण्डधृगिति पदम्, अधिकः।

(ज) कमलेति।—कमलया—लक्ष्म्या, आलिङ्गितः,—आश्लिष्टः, तारेण—महता, हारेण हारी—मनोहारीत्यर्थः, शुद्धहारहारी वा, मुरं द्विषन्—मुरारिः, विद्युता विभूषितः नीलजीमूत इव—नीलमेघ इव, राजते।

(झ) अत्रेति।—उपमानस्य—जीमूतस्य, सबलाकत्वं—बलाका—बकपङ्क्तिः तद्विशिष्टत्वं, वाच्यं—वक्तुं योग्यम्। तदकथनात् न्यूनपदत्वमवधेयम्।

विध्यादिभेदस्य च भग्नप्रक्रमत्वम्। क्रमेण उदाहरणम्—"सुधेव विमलश्चन्द्रः।" "ज्योत्स्नाः इव सिता कीर्त्तिः।" (अ)

"काऽप्यभिख्या तयोरासीत् व्रजतोः शुद्धवेशयोः।
हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव॥" (ट)

अत्र तथाभूतचित्राचन्द्रमसोः शोभा न खलु आसीत्, अपि तु सर्वदाऽपि भवति। (ठ)

"लतेव राजसे तन्वि!" अत्र लता राजते, त्वं तु राजसे। (ड)

"चिरं जीवतु ते सूनुर्मार्कण्डेयमुनिर्यथा।"

अत्र मार्कण्डेयमुनिर्जीवत्येव, न खलु एतदस्य जीवतु इत्यनेन विधेयम्। (ढ)

(अ) अस्यामेव—उपमायामेव। सुधेवेति।—अत्र पुंलिङ्गस्य विमलशब्दस्य सुधायामन्वयासम्भवात् लिङ्गव्यत्ययेनान्वयः, एवञ्च प्रक्रान्तलिङ्गभङ्गः। वचनभेदमाह, ज्योत्स्ना इवेति।—अत्र वचनव्यत्ययेन प्रक्रान्तवचनभङ्गः।

(ट) कालभेदमुदाहरति, काऽपीति।—व्रजतोः,—गच्छतोः, शुद्धवेशयोः,—पवित्रपरिच्छदयोः, तयोः,—दिलीपसुदक्षिणयोः दम्पत्योः, हिमनिर्मुक्तयोः,—शिशिरावरणशून्ययोरित्यर्थः, चित्राचन्द्रमसोर्योगे इव काऽपि—अनिर्वचनीया, अभिख्या—शोभा, आसीत्। इदं रघुवंशस्य पद्यम्।

(ठ) अत्रेति।—अत्रोपमाने अतीतकालस्य बाधात् वर्त्तमानोहेनान्वयः इति प्रक्रान्तकालभङ्गः।

(ड) पुरुषभेदमुदाहरति, लतेवेति।—अत्रोपमाने मध्यमपुरुषान्वयस्य बाधात् प्रथमपुरुषोहेनान्वयमुपपादयति, लता राजते इति।—अत्र प्रक्रान्तपुरुषभङ्गः।

(ढ) विधिभेदमाह—चिरमिति। न खल्विति।—एतत्—जीवनम्। अस्य—मार्कण्डेयस्य। विधेयं—विधिविषयः। अत्रादिपदग्राह्यायाः अभीष्टाशंसनरूपायाः आशिष एव भेदः, न तु "प्रेष्यादिर्वाऽथ सङ्कल्प-भेदोऽथेष्टाभ्युपायता। शब्दव्यापारभेदो वा कार्य्यभेदोऽथवा विधिः॥" इत्युक्तपञ्चविधस्य विधेः असम्भवात्। विधिभेदस्योदाहरणमेवं बोध्यं—"चमूरियं दूरविमुक्तभङ्गा गङ्गेव मे योधमनुप्रयातु। ययाऽरिसज्जा विभटाः प्रकामं नश्यन्त्यधर्मा इव खेदसाध्याः॥" अत्र गङ्गा प्रयाति, चमूः प्रयातु इति प्रक्रान्तविधिभङ्गः।

इह तु यत्र लिङ्गवचनभेदेऽपि न साधारणधर्मस्यान्यथा-भावस्तत्र न दोषः । (ग)

क्रमेण उदाहरणम्—"मुखं चन्द्र इवाभाति ।" (त)

"तद्वेशोऽसदृशोऽन्याभिः स्त्रीभिर्मधुरताभृतः ।
दधते स्म परां शोभां तदीया विभ्रमा इव ॥" (थ)

पूर्वोदाहरणेषु उपमानोपमेययोरेकस्यैव साधारणधर्मेण-न्वयसिद्धेः प्रक्रान्तस्यार्थस्य स्फुटोऽनिर्वाहः । (द)

(ग) इह त्विति ।—साधारणधर्मस्य—निर्दिश्यमानसामान्यस्य, अन्यथाभावः, —उपमानान्वयानुपयोगित्वं, न दोषः,—नोपमादोषः, अप्रक्रमत्वस्य तु प्रसक्त्यभावेन तन्निषेधस्यात्र न सम्भवः ।

(त) मुखमिति ।—चन्द्राभातीति उपमानेनान्वयेति इति शेषम् ।

(थ) वचनभेदेनापि दोषाभावमाह, तद्वेश इति ।—तद्वेशः,—तस्याः वेशः, अन्याभिः स्त्रीभिः असदृशः,—असाधारणः, तथा मधुरतां बिभर्तीति मधुरताभृतः,—मधुरतया—सौन्दर्येण, भृतः,—पूरितः, माधुर्यमुखः इत्यर्थः, तदीया विभ्रमाः,—अङ्ग-विलासा इव, परां शोभां दधते स्म—धारयति स्म । अत्र असदृश इत्यस्य वेश इत्यस्य विशेषणत्वे टक्प्रत्ययान्ततया अकारान्तत्वात् एकवचनान्तता, विभ्रमा इत्यस्य विशेष-णत्वे क्विबन्ततया अकारान्तत्वात् बहुवचनान्तता, तथा मधुरताभृत इत्यस्य वेश इत्यस्य विशेषणत्वे क्विप्रत्ययान्ततया अकारान्तत्वात् एकवचनान्तता, विभ्रमा इत्यस्य विशेषणत्वे क्विबन्ततया अकारान्तत्वात् बहुवचनान्तता । एवं दधते इति क्रियापदस्य वेश इत्यस्य कर्तृत्वे "दध धारणे" इति आत्मनेपदिनः दधातोः प्रथमपुरुषैकवचनान्तता, विभ्रमा इत्यस्य कर्तृत्वे "डुधाञ् धारणपोषणयोः" इति धातोः प्रथमपुरुषीयबहुवचनान्ततेति वचनभेदेऽपि असदृश इत्यादिपदानां श्लेषोपमानान्वययोगितया साधारणधर्मांशा-नेक्यरूपत्वात् न दोष इति बोध्यम् । उदाहरणान्तरं यथा,—"अपि लोकयुगं इवापि स्तनदृष्टा रतकीर्तिरा अपि । स्तुतिमानितया इनस्तुः व्यतिभाति स्तुतरां धरापते ! ॥" अत्र "व्यतिभाति" इति एकक्रियापदस्य एक-द्वि-बहुवचनान्तत्वं बोध्यम् ।

(द) एतदुदाहरणानां पूर्वोदाहरणापेक्षया वैलक्षण्यं दर्शयितुं पूर्वोदाहरणेषु अप्रक्रमत्वं दर्शयति, पूर्वेति ।—पूर्वोदाहरणेषु—"मुखमिव विभाति चन्द्रः" इत्यादिषु । एकस्यैव—उपमेयस्यैवेत्यर्थः, साधारणधर्मेण—यथा विभाति इति पदं चन्द्र इत्यने-

एवमनुप्रासे वैकल्यस्य अपुष्टार्थत्वम्। (ध) यथा,—

"अनणुरणन्मणिमेखलमविरलशिञ्जानमञ्जुमञ्जीरम्।
परिसरणमरुणचरणे! रणरणकमकारणं कुरुते॥"(न)

एवं समासोक्तौ साधारणविशेषणवशात् परार्थस्य (प) प्रतीतावपि पुनस्तस्य शब्देनोपादानस्य अप्रस्तुतप्रशंसायां व्यञ्जनयैव प्रस्तुतार्थावगतेः शब्देन तदभिधानस्य च पुनरुक्तत्वम्। क्रमेण उदाहरणम्,—

"अनुरागवन्तमपि लोचनयोर्दधतं वपुः सुखमतापकरम्।
निरकासयद्रविमपेतवसुं वियदालयादपरदिग्गणिका॥" (फ)

नान्वेति, न तु सुधेत्यनेन, एवमादिषु अन्वयसिद्धेः,—अन्वयबोधनिष्पत्तेः, योग्यत्वादिति शेषः, प्रक्रान्तस्य अर्थस्य—आकाङ्क्षितसाधारणधर्मस्य, स्फुटः,—सम्यक् इत्यर्थः, अनिर्वाहः,—उपमानेनान्वयस्यानुपपत्तिः, अयोग्यत्वात् इति शेषः। लिङ्गव्यत्ययादिना योग्यसामानाधिकरण्योपपादने प्रथमोत्थापिताऽऽकाङ्क्षाविषयीकृतेन प्रकारेण पश्चादनुक्तिरिति भग्नप्रक्रमत्वमिति भावः। "अत्रोभयान्वयाभिप्रायेण प्रयुक्तस्यैकतरान्वयसम्भवे अभवन्मतयोग्यत्वम्" इत्यपरे।

(ध) एवमिति।—वैकल्यस्य—निरर्थकस्य, रसाद्युत्कर्षानाधायकस्येति यावत्, तच्च मुख्यार्थानुपकारित्वरूपापुष्टार्थत्वं पर्य्यवस्यति।

(न) उदाहरति, अनण्विति।—वेश्याविरक्तस्य कस्यचिदुक्तिरियम्। हे अरुणचरणे!—अलक्तकरञ्जितत्वादिति भावः, अनण्,—अनल्पं यथा तथा, रणन्ती मणिमेखला यस्मिन् तत्, तथा अविरलं—घनं, शिञ्जानौ—स्वनन्तौ, मञ्जू—मनोहरौ, मञ्जीरौ—नूपुरौ यस्मिन् तत् तथाविधं, परिसरणं—सञ्चरणं, तवेति शेषः, अकारणं—निरर्थकं, रणरणकं—पुंसाम् औत्सुक्यविशेषं, कुरुते। अत्र लघुरकारलकारादिघटितानुप्रासस्य माधुर्य्यातिशयव्यञ्जकतया शृङ्गारादेरेवोपकारित्वं, पुनः पर्य्यवसितार्थस्य वेश्याविरागस्य न किञ्चिदुपकारित्वम् इति अपुष्टार्थत्वमवधेयम्।

(प) परार्थस्य—रूपकस्य, उपमानस्य वेत्यर्थः।

(फ) अनुरागवन्तमिति।—अपरा—पश्चिमा, दिक् एव गणिका—वेश्या, अनुरागः,—रक्तिमा प्रेम च तद्वन्तं, लोचनयोः,—नेत्रयोः, सुखं—सुखजनकं, मनोहरमिति भावः, अतापकरं—सौम्यमित्यर्थः, वपुः,—शरीरं, दधतं—धारयन्तमपि,

अत्रापरदिगित्येतावतैव तस्या गणिकात्वं प्रतीयते। (ब)

"आहूतेषु विहङ्गमेषु मशको नायान् पुरो वार्य्यते
मध्ये वा धुरि वा वसंस्तृणमणिर्धत्ते मणीनां धुरम्।
खद्योतोऽपि न कम्पते प्रचलितुं मध्येऽपि तेजस्विनां
धिक् सामान्यमचेतसं प्रभुमिवानामृष्टतत्त्वान्तरम्॥" (भ)

अत्र अचेतसः प्रभोरभिधानम् अनुचितम्। (म)

अपेतवसुम्—अपगतकिरणं निर्द्धनञ्च, रविं—दिवाकरं, [नायकञ्च इति ध्वनिः] वियदालयात्—आकाशभवनात्, निरकासयत्—द्वीपान्तरं प्रापयामास अथ च दूरीचकार। प्रमिताक्षरा वृत्तम्। माघस्य इदं पद्यम्।

(ब) अत्र रविमित्यनेनैव यथा भुजङ्गत्वमायाति, तथैव अपरदिगित्युक्त्यैव गणिकाप्रतीतिरिति भावः।

(भ) आहूतेष्विति।—अत्र यत्तदर्थयोराकाङ्क्षया लाभः, विहङ्गमेषु—विहायसा—आकाशेन गच्छन्तीति तथोक्तेषु, कोकिलादिषु इत्यर्थः, आहूतेषु—आकारितेषु, पुरः,—अग्रतः, आयान्—अहमपि विहायोगमनात् विहङ्गम इति मत्वा आगच्छन्, मशकः न वार्य्यते—न निषिध्यते, येनेति शेषः, तृणमणिः,—क्षुद्राकारमणिविशेषः, मध्ये वा धुरि—अग्रे वा, यानमुखे वा इत्यर्थः, वसन् मणीनां धुरं—भारं, मर्य्यादामित्यर्थः, धत्ते—धारयति, ["मध्ये यद्धुरि वा" इति पाठे—यस्य धुरि—यानमुखे, मध्ये वा—अर्थादुपस्थितस्य यानस्यैव मध्ये वा, वसंस्तृणमणिः,—तृणाकर्षकः मणिः, अल्पमणिरित्यर्थः, यानशोभाजनकमहामणीनां धुरं—साम्यं, धत्ते; यानस्य पश्चाद्भागस्तावत् तृणमणेः स्थानं, तद्भिन्ने मध्यादौ तद्विन्यासात् तत्स्वामिनोऽविवेचकत्वमिति भावः। ("धूः स्त्री क्लीवे यानमुखम्" इति कोषः)। "मध्ये वा धुरि वा वसन्" इति पाठो न रमणीयः, अनन्वयात् इति ज्ञेयम्]। खद्योतोऽपीति।—पुर इत्यनुषज्यते, यस्य पुरः खद्योतोऽपि तेजस्विनां मध्येऽपि प्रचलितुं—गन्तुं, न कम्पते—न बिभेति इत्यर्थः, अनामृष्टम्—अविवेचितं, तत्त्वान्तरं—वस्तुतत्त्वं येन तथाविधं, प्रभुमिव अचेतसं—सदसद्विवेकरहितं, तमिति शेषः, सामान्यं—प्राकृतं जनं, धिक्; सत्स्वपि गुणवत्सु प्रधानेषु हीनानां धार्ष्ट्यं केवलं धिक्कारायैवेति भावः। शार्दूलविक्रीडितं वृत्तम्। भल्लटशतकस्येदं पद्यम्।

(म) अप्रस्तुतेन तादृशासामान्येनैव विशेषस्याचेतनस्य प्रभोरभिव्यक्तिरिति तदभिधानमनुचितमित्यभिप्रायेणाह,—अत्रेति।

एवमनुप्रासे प्रसिद्ध्यभावस्य (य) ख्यातविरुद्धत्वम्। यथा,—

"चक्राधिष्ठिततां चक्रो गोत्रं गोत्रभिदुच्छ्रितम्।
हृषं हृषभकेतुश्च प्रायच्छत् यस्य भूभुजः॥" (र)

उक्तदोषाणाञ्च क्वचिददोषत्वं क्वचित् गुणत्वमित्याह,(ल)—

वक्तरि क्रोधसंयुक्ते तथा वाच्ये समुद्यते।
रौद्राऽऽदौ तु रसेऽत्यन्तं दुःश्रवत्वं गुणो भवेत्॥५८८॥(व)

एषु च आस्वादस्वरूपविशेषात्मकतया मुख्यगुणप्रकर्षोपकारित्वात् गुण इति व्यपदेशो भाक्तः। (श) क्रमेण यथा,—

(य) एवमिति।—प्रसिद्ध्यभावस्य—अनुप्रासितपदार्थयोर्विवक्षितेऽन्वये लोकतः श्रास्त्रतो वा प्रसिद्धिविरहस्येत्यर्थः।

(र) चक्रेति।—चक्रो—नारायणः, चक्राधिष्ठिततां—चक्रवर्त्तित्वं, मण्डलाधिकारित्वमित्यर्थः, गोत्रभित्—इन्द्रः, उच्छ्रितम्—उन्नतं, गोत्रं—वंशं, हृषभकेतुः,—हरस्य, हृषं—धर्मनित्यर्थः, यस्य भूभुजः,—राज्ञः, प्रायच्छत्—प्रददौ। ["प्रायच्छन्नस्य भूभुजः" इति पाठान्तरे—एते चक्रादयः यस्य—पुरोवर्त्तिन इत्यर्थः, भूभुजः प्रायच्छन्—प्रददुः] अत्र कर्तृकर्मनियमेन स्तुतिः अनुप्रासानुरोधेनैव प्रतिपादिता, नारायणकर्तृकं चक्रवर्त्तित्वदानम्, इन्द्रकर्तृकं गोत्रदानं, शिवकर्तृकञ्च धर्मदानं न पुनः पुराणेतिहासादिषु तथा प्रसिद्धम् इति प्रसिद्धिविरहात् ख्यातविरुद्धता।

(ल) सम्प्रति दोषाणां नित्यत्वानित्यत्वप्रतिपत्त्यर्थमनित्यदोषानाह,—उक्तेति। क्वचिदिति।—यत्र रसादीनामपकर्षकत्वं प्रकर्षकत्वञ्च नास्ति तत्रेत्यर्थः। यत्र तु रसादीनामपकर्षकत्वं नास्ति, प्रत्युत प्रकर्षकत्वमेव, तत्र गुणत्वम्।

(व) तत्र दोषोद्देश्यकक्रमेण यथासम्भवं तान् दर्शयति, वक्तरीति।—क्रोधसंयुक्ते वक्तरि तथा समुद्यते—औद्धत्यव्यञ्जके, वाच्ये—अर्थे प्रतिपाद्ये इत्यर्थः, च सति दुःश्रवत्वं रौद्रादिरसे तु—पुनः, अत्यन्तं गुणः भवेत्। आदिशब्दाद्वीरबीभत्सयोर्ग्रहणम्।

(श) ननु गुणानां रसधर्मत्वं विविधत्वञ्च वक्ष्यति, दुःश्रवत्वादीनां तदुभयाभावात् कथं गुणत्वम्? इत्यत आह, एषु चेति।—दुःश्रवत्वादित्यर्थः, आस्वादानां—रसानां, स्वरूपविशेषात्मकतया—साधर्म्यविशेषरूपतया, ये मुख्यगुणाः,—माधुर्य्यादयः, तत्कृतो यः प्रकर्षः,—रसाद्युत्कर्षः, तत्रोपकारित्वात्—अनुकूलत्वात्, व्यपदेशः,—कथनं, भाक्तः,—गौणः, गौण्यवहार इत्यर्थः।

"तद्विच्छेदकृशस्य कण्ठलुठितप्राणस्य मे निर्दयं
क्रूरः पञ्चशरः शरैरतिशितैर्भिन्दन् मनो निर्भरम्।
भस्मीभूतकृपाविधेयमनसः प्रोद्दामनेत्रानल-
ज्वालाजालकरालितः पुनरसावास्तां समस्तात्मना॥"(घ)

अत्र शृङ्गारे कुपितो वक्ता। (ङ)

"मूर्ध्न्याधूयमानध्वनदमरधुनीलोलकल्लोलजालो-
द्भूताम्भःचोददम्भात् प्रसभमभिनभः क्षिप्तनक्षत्रलक्ष्म।
ऊर्ध्वन्यस्ताङ्घ्रिदण्डभ्रमिभवरभसोद्भ्रमत्खप्रवेग-
भ्रान्तब्रह्माण्डखण्डं प्रवितरतु शिवं शाम्भवं ताण्डवं वः॥"(च)

(घ) वक्तरि क्रोधसंयुक्ते दुःश्रवत्वस्य गुणत्वमुदाहरति, तदिति।—तस्याः विच्छेदेन कृशस्य—क्षीणस्य, कण्ठलुठितप्राणस्य—कण्ठागतजीवनस्य, मे—मम, मनः निर्दयं यथा तथा अतिशितैः,—अतितीक्ष्णैः, शरैः निर्भरम्—अतिमात्रं, भिन्दन्—विध्यन्, अत एव क्रूरः,—घातुकः, ("नृशंसो घातुकः क्रूरः" इत्यमरः) असौ पञ्चशरः,—कामः, समस्तात्मना—सर्वशरीरेण, भूतेषु—प्राणिषु, या कृपा—दया, तस्याः विधेयं—वशवर्त्ति, मनो यस्य तादृशस्य, तस्याः,—हरस्य, प्रोद्दामः,—अतिदारुणः, यः नेत्रानलः तस्य ज्वालानां—शिखानां, जालैः,—समूहैः, करालितः,—दग्धः, पुनः आस्तां—भवतु, पूर्वं पाञ्चभौतिकं शरीरं दग्धम्, इदानीं तस्य चिद्रूपशरीरमपि दग्धं मूर्खादिति भावः। इदं गद्यकर्तुः पद्यम्। शार्दूलविक्रीडितं वृत्तम्।

(ङ) अत्र क्रोधस्याक्षाद्यमानत्वेऽपि प्राकरणिकतया प्रधानत्वेन रतेराक्षाद्यमानत्वात् शृङ्गारत्वमेव, न तु रौद्रत्वम्, अत एवाह, अत्र शृङ्गारे इति।—सुगमम्।

(च) वाच्यस्योद्भटत्वे दुःश्रवत्वस्य गुणत्वमुदाहरति, मूर्ध्नीति।—मूर्ध्नि—शिरसि, व्याधूयमाना—सञ्चरन्ती, अत एव ध्वनन्ती—स्वनन्ती, या अमरधुनी—देवनदी, गङ्गा इत्यर्थः, तस्याः लोलं—चपलं, यत् कल्लोलजालं—महातरङ्गसन्ततिः, तस्मात् उद्भूताः,—उत्थिताः, ये अम्भसां—जलानां, चोदाः,—विन्दवः, तेषां दम्भात्—व्याजात्, प्रसभं—सहसा, अभिनभः,—नभसि, [विभक्त्यर्थे अव्ययीभावः] क्षिप्तानि नक्षत्राणां लक्ष्माणि—तारासमूहाः यस्मिन् तत्, तथा ऊर्ध्वं न्यस्तः,—निक्षिप्तः, उत्क्षिप्त इत्यर्थः, यः अङ्घ्रिदण्डः,—पाददण्डः, तस्य या भ्रमिः,—भ्रामणं, घूर्णनमित्यर्थः, तस्मात् भवः,—उत्पन्नः, यः रभसः,—वेगः, तेन उद्भ्रमत्—उद्भ्रमणशीलं, उत्क्षिप्तं

अत्र उद्धततराण्डवं वाच्यम्। इमे पद्ये मम। रौद्रादिरसे तु एतद्धितयापेक्षयाऽपि दुःश्रवत्वमत्यन्तगुणः। (क) यथा—"उत्कृत्योत्कृत्य कृत्तिम्" इत्यादि। अत्र बीभत्सो रसः।

सुरतारम्भगोष्ठ्यादावश्लीलत्वं तथा पुनः ॥६००॥(ख)

तथा पुनरिति गुण एव। यथा,—

"करिहस्तेन सम्बाधे प्रविश्यान्तर्विलोड़िते।
उपसर्पन् ध्वजः पुंसः साधनान्तर्विराजते॥" (ग)

इत्यर्थः, ["अनिभररभसोद्यत्" इति पाठे—अनिभरेण—अनवातिप्रबलेन, यो रभसः, —वेगः, तस्मादुद्यत्—जायमान इत्यर्थः] यः नभस्वान्—वायुः, तस्य प्रवेशेन ["प्रवेश" इत्यत्र "प्रवेग" इति पाठान्तरम्] भ्रान्तं—कुलालचक्रवत् घूर्णितं, ब्रह्माण्डखण्डं यस्मिन् तथाभूतं, अम्भोरिदं शाम्भवं ताण्डवं—नृत्यं, ("ताण्डवं नटनं नृत्यम्" इत्यमरः) वः, —युष्माकं, शिवं—मङ्गलं, प्रवितरतु—ददातु। शार्दूलविक्रीडितं वृत्तम्।

(क) अत्र ताण्डवस्य लोकसंहारकारित्वात् उद्धततमम्; एतद्धितयापेक्षया—क्रुद्धब्रह्मभृगुद्धतयाप्यापेक्षया। रौद्रे दुःश्रवत्वं यथा,—"शिरोऽयचन्द्रपचे मयि सति सुतरां चण्डिम्ना अम्भोजापाद्यायैश्च चण्डध्वनि धनुरधुना ध्वंसितं धिक् तितिक्षाम्। कृत्त्याकृत्तधारं कठिनतितरां तस्य कण्ठे कुठारं क्रौञ्चा पीठाम्बुराशेः परिभवचरितं-चारु पारं प्रपद्ये॥" अत्र क्रौञ्चास्त्रादायमानतया भार्गवस्य बन्धुः क्रुद्धतया च सुतरां दुःश्रवत्वस्य गुणत्वम्; सर्वथा आस्वादरहिते काव्यार्थांशे दुःश्रवत्वादीनां न दोषत्वं न वा गुणत्वं, काव्यवर्त्मनां दोषगुणानां तत्राप्रवेशादिति सारः।

(ख) अश्लीलत्वस्य गुणत्वमाह, सुरतेति।—सुरतस्य आरम्भः,—चेष्टा, तस्य गोष्ठी—सभा, सम्भोगार्थसमवेतस्त्रीपुरुषसमूह इत्यर्थः, तत्प्रभृतिषु अश्लीलत्वं तथा पुनः, —गुण एव इत्यर्थः।

(ग) उदाहरति, करीति।—सम्बाधे—सङ्कुलेऽपि, नरास्थादिनैविध्येन दुष्प्रवेशे इत्यर्थः, करिणां—हस्तिनां, हस्तेन—शुण्डादण्डेन, पुंसः,—पश्यन्नरदेशे, विलोड़िते —विप्रकारिते, साधनानां—सैन्यानाम्, मध्ये, प्रविश्य पुंसः,—लिङ्गोद्भेदवीरस्य इति भावः, ध्वजः,—केतुः, उपसर्पन्—सञ्चरन्, विराजते—शोभते। अश्लीलार्थस्तु—सम्बाधे—सङ्कुचितेऽपि, करिहस्तेन—कामशास्त्रोक्तनखिनखिलेन, संसक्तापतर्जनानिवापदष्टदनध्वनानुविद्धेव गजगुणमुदया इत्यर्थः, तदुक्तं—

अत्र हि सुरतारम्भगोष्ठ्यां "द्वयर्थैः पदैः पिशुनयेच्च रहस्यवस्तु" इति कामशास्त्रस्थितिः। आदिशब्दात् शमकथाप्रभृतिषु बोद्धव्यम्। (घ)।

स्यातामदोषौ श्लेषादौ निहतार्थाप्रयुक्तते॥६०१॥ (ङ)

यथा.—

"पर्वतमेदि पवित्रं जैत्रं नरकस्य बहुमतं गदनम्।
हरिमिव हरिमिव हरिमिव सुरसरिदम्भः पतन्नमत॥" (च)

"तर्जनानिःश्वासायुक्ते मध्यमा पृथुतो यदि। करिहस्त इति प्रोक्तः कामशास्त्रविशारदैः॥" इति शास्त्रात्; अन्तः विलोडिते—विस्मारिते, लाघवात्;—योनिमध्ये, प्रविश्य उपसर्पन्—गतागतं कुर्वन्, पुंसः ध्वजः;—लिङ्गं, विराजते। अत्र व्रीडाव्यञ्जनमश्लीलम्।

(घ) गुणत्वमुपपादयति, अत्र इति।—पिशुनयेत्—सूचयेत्। रहस्यवस्तु—गोप्यं विषयम्। कामशास्त्रस्थितिः,—कामशास्त्रनियमः, रहस्यव्यञ्जनस्य सुरतोद्रेकानुकूलत्वात् गुणत्वमिति भावः। प्रमदकथाप्रभृतिषु इति।—प्रभृतिशब्दाद्वैराग्योत्पादकथायाग्रहणम्। तत्र प्रमदकथायां यथा,—"उत्तालोच्छ्वसमस्तक-पाटितोदरवल्लिभिः। लोहितनि स्रोतोवहि सन्निः श्वसभिः कस्य जायते?" इति। अत्र जुगुप्साव्यञ्जकाश्लीलत्वस्य गुणत्वम्। प्रभृतिशब्दात् कुप्रकथादीनां ग्रहणं, कुप्रकथा—कुत्सिताः। श्वसकुलाश्लीलत्वस्य गुणत्वं कुप्रकथायां यथा,—"निर्वाणवैरदहनाः" इति। कुत्सामप्रकाशकत्वं गुणत्वं नटस्य वचनमिदम्। अत्र प्रमदादयः शब्दा नरकपालकुलवृत्ता अपि कुत्सितौ गुणा एव इति शेषम्।

(ङ) स्यातामिति।—श्लेषादौ निहतार्थत्वम् अप्रयुक्तत्वञ्च यदोषौ स्यातां, नापि गुणः नापि दोषः इत्यर्थः।

(च) पर्वतेति।—(हे जनाः!) पृथिव्यां पतत् सुरसरिदम्भः,—गङ्गाजलं, यूयं नमत, कीदृशम्? पर्वतमेदि—हिमालयभेदकरं, हिमालयं भित्त्वा निर्गतमित्यर्थः, पवित्रं—पावनं, पापध्वंसकरमित्यर्थः, नरकस्य—पारलौकिकदुःखस्य, जैत्रं—विनाशकं, बहुमतं—पूजितं, गदनं—मलापनोदत्वात् दुरितनाशकं, यथा—गदनं—चलनम्, अतिप्रवहमित्यर्थः, हरिमिव—विष्णुमिव, पर्वतमेदी—गोवर्द्धनोद्धारी, च यतो पवित्रश्च इति तं, नरकस्य—नरकनाम्नोऽसुरस्य, जैत्रं—विनाशकं, पराजय-

अत्र इन्द्रपक्षे पवित्रशब्दो निहतार्थः, सिंहपक्षे मतङ्गशब्दो मातङ्गार्थेऽप्रयुक्तः।

गुणः स्यादप्रतीतत्वं ज्ञत्वं चेत् वक्तृवाच्ययोः॥६०२॥(छ)

यथा—"त्वामामनन्ति प्रकृतिं पुरुषार्थप्रवर्त्तिनीम्।
तद्दर्शिनमुदासीनं त्वामेव पुरुषं विदुः॥" (ज)

स्वयं वाऽपि परामर्षे॥६०३॥ (झ)

अप्रतीतत्वं गुण इत्यनुषज्यते। यथा—
"युक्तः कलाभिस्तमसां विवृद्ध्यै
क्षीणश्च ताभिः क्षतये य एषाम्।

करमित्यर्थः, गहनं—दुर्बोधतत्त्वं, हरिमिव—इन्द्रमिव, पर्वतानां पक्षच्छेदकत्वात् पर्वतभेदी, पवि—वज्रं, त्रायते—धारयति इति पवित्रः, स चासौ स चेति तं, जैत्रं—जयशीलं, नरकस्य—मनुष्यसमूहस्य, बहुमतं—भृशं पूजितं, गहनं—दुर्जयं, हरिमिव—सिंहमिव, "मृगाणाञ्च मृगेन्द्रोऽहम्" इति स्मरणात् सिंहस्य वन्दनीयत्वं, पर्वतभेदी—गिरिगह्वरमाश्रयत्वेन सोऽस्यास्तीति, पवित्रः,—देवरूपत्वात्, स चासौ स चेति तं, नरकस्य—मनुष्यसङ्घस्य, जैत्रं, बहून् मतङ्गान् हन्तीति तम् इति सङ्क्षेपः।

(छ) गुण इति।—वक्तृवाच्ययोः,—वक्तुः बोद्धव्यस्य च, ज्ञत्वं—सङ्केतज्ञानित्वं, चेत् तदा अप्रतीतत्वं गुणः स्यात्।

(ज) उदाहरति, त्वामिति।—तारकोपद्रुतदेवगणकृता ब्रह्मणः स्तुतिरियम्। त्वां पुरुषार्थप्रवर्त्तिनीं—पुरुषार्थौ—भोगापवर्गौ, तयोः प्रवर्त्तिनीं—साधयित्रीं, प्रकृतिं—मूलकारणं, ("प्रकृतिः पञ्चभूतेषु प्रधाने मूलकारणे" इत्यमरः) आमनन्ति—कथयन्ति, बुधा इति शेषः, त्वामेव तद्दर्शिनं—तस्याः,—प्रकृतेः द्रष्टारं, साक्षित्वेनेति भावः, उदासीनं—कूटस्थं, पुरुषं विदुः,—जानन्ति। अत्र प्रकृतिपदं प्रधानवाचकं योगशास्त्रे एव प्रयोगप्राचुर्य्येण प्रसिद्धं, "प्रधानं प्रकृतिः स्त्रियाम्" इति सङ्केताभिज्ञत्वे तु गुण एव। एवं पुरुषपदं परमात्मवाचकं योगशास्त्रे एव प्रसिद्धं "क्षेत्रज्ञ आत्मा पुरुषः" इति सङ्केताभिज्ञत्वे तु गुण एव; तथा हि,—वक्तॄणां देवानां, बोद्धव्यस्य ब्रह्मणश्च ज्ञत्वात् योगशास्त्रप्रसिद्धप्रकृतिपुरुषशब्दौ अप्रतीतौ अपि गुणाय कल्पेते इति सारः। कुमारसम्भवस्येदं पद्यम्।

(झ) स्वयमिति।—परामर्षे—कथने।

शुद्धं निरालम्बपदावलम्बं
तमात्मचन्द्रं परिशीलयामि ॥" (ञ)

कथितञ्च पदं पुनः।

विहितस्यानुवाद्यत्वे विषादे विस्मये क्रुधि ॥
दैन्येऽथ लाटानुप्रासेऽनुकम्पायां प्रसादने।
अर्थान्तरसङ्क्रमित-वाच्ये हर्षेऽवधारणे ॥६०४॥ (ट)

(ञ) युक्त इति।—यः तमसां—तमोगुणानाम्, अज्ञानानामित्यर्थः, विद्वेड्—विद्वेषेण वर्त्तनाय, कलाभिः,—पृथिव्यादितत्त्वैः, युक्तः स्यात्, यश्च एषां—तमसां, क्षतये—ध्वंसाय, ताभिः,—कलाभिः, क्षीणः,—रहितः, स्यात्, शुद्धं—पूर्णं, कालादि-दोषरहितमित्यर्थः, केवलं वा, निरालम्बपदावलम्बं—निरालम्बपदं—शिरआधीमुखं कमलकर्णिकामध्यं, तदवलम्बं—तदाश्रयं, तं—प्रसिद्धम्, आत्मा एव चन्द्रः तं, परमात्मानमित्यर्थः, चन्द्रपक्षे—कलाभिः,—षोडशभागैकभागैः, क्षीणः,—हीनः, तमसां—तिमिराणां, विद्वेड्—यो भवति, यश्च ताभिर्युक्तः, एषां—तमसां, क्षतये भवति, तं शुद्धं—शुभ्रप्रकाशं, निरालम्बपदम्—धाराश्रयम्, अवलम्बो यस्य तं, परि-शीलयामि—चिन्तयामि। अत्र कलानिरालम्बपदात्मपदानां तत्त्वादिवाचकत्वं योग-शास्त्रे एव प्रसिद्धम्; आत्मनात्मप्रतीतेरुद्देश्यत्वादस्य गुणवत्त्वम् इत्याशयः। उपजातिः वृत्तम्।

(ट) कथितमिति।—कथितपदत्वं विहितानुवाद्यत्वादिषु एकादशप्रकारेषु गुणः स्यादित्यर्थः। विहितस्येति।—उद्देश्यप्रतिनिर्देश्यस्थले उक्तपदप्रयोगादर्थान्तरप्रतीत्य-भावेन झटित्येव शाब्दबोधः, ततो रत्नादिधीरविलम्बेनैवेत्यत्र कथितपदत्वस्य गुणवत्त्वम् प्रति भावः। विषादे इत्याद्युपलक्षणं, यत्र यत्र हितत्वं पदं चमत्कारयाऽर्थान्तरबोधकं, तत्रापि कथितपदत्वं गुणः इत्याशयः; अत्र एव वक्ष्यति, एवमन्यत्रापीति।—तेन "गढ़े गढ़े त्यणपुरन्धिवर्गम्" इत्यत्र हितत्वं गढ़पदं सकले लाक्षणिकं पार्वत्यां सर्वजनानुरागं व्यञ्जयति। "पीत्वा पीत्वा सुरभिमदिरामादरात् बालदन्तां कण्ठे तस्य प्रसितु रभसात् प्राडुपाग्रहयेन। वक्त्रं दन्तव्रणविषवलद्वाकुलं कारयेन्तुं मत्तानान्तु व्रजति गुरुतां दातुरापन्मदत्वम्॥" अत्र हितत्वं पीत्वेति पदं पीनःपुन्यलक्षकं रूढिरेव। "रघु रघु रघुवाम्र! भवन्नामनामाधवत्। क्षीरदंष्ट्राकुराग्रं रक्षो भुक्ति

गुण इत्येव यथा,—"उदेति सविता ताम्रः" इत्यादि । अत्र विहितानुवादः ।

"हन्त ! हन्त ! गतः कान्तो वसन्ते सखि ! नागतः ।" (ठ)

अत्र विषादः ।

"चित्रं चित्रमनाकाशे कथं सुमुखि ! चन्द्रमाः ।" (ड)

अत्र विस्मयः ।

"सुनयने नयने निधेहि—" इति । (ढ)

अत्र रक्षेति द्रुते लाक्षणिकं भयातिशयं व्यञ्जयति ; "याहि याहि सुमुखि ! प्रियधाम त्राहि कान्तमशरीरशराधेः । बन्धुरेव विपदः प्रतिकारे सन्दधाति सुतरामुपयोगम् ॥" अत्र याहि याहीति पदं द्रुते लाक्षणिकं त्वरातिशयं व्यञ्जयतीत्यादावपि कथितपदत्वं गुणः । पदानुप्रास एव लाटानुप्रासः वक्ष्यते, तस्य शब्दवैचित्र्यद्वारा रसाद्युपकारकत्वम् इति गुणत्वमेव । अर्थान्तरसङ्क्रमितवाच्यो ध्वनिप्रभेदस्तत्रार्थविशेषव्यञ्जकत्वमिति गुणत्वम् । क्रुधि यथा,—"यातु यातु किमनेन तिष्ठता मुञ्च मुञ्च सखि ! सादरं वचः । पामरीवदनलोलुपो युवा नैष वेत्ति कुलजाधरासवम् ॥" अत्र द्विरुक्तं पदं समभिव्याहृतपदार्थस्य अयोगव्यवच्छेदं लक्षयति क्रोधातिशयं व्यञ्जयति च । क्रोधेनोक्तावप्यर्थान्तराव्यञ्जकत्वात् कथितपदत्वं दोष एव ; यथा,—"तद्विच्छेदकृशस्य" इत्यादौ मनःपदम् । दैन्ये यथा—"देहि देहि नृपमेव तु चित्तम् ।" अत्र द्विरुक्तं पदं दानप्रयुक्तिपौनःपुन्यं लक्षयद्दैन्यातिशयं व्यञ्जयति । अनुकम्पायां यथा —"दीन रे ! वसु गृहाण गृहाण ।" अत्र द्विरुक्तं पदं ग्रहणप्रयुक्तिपौनःपुन्यं लक्षयदनुकम्पाऽतिशयं व्यञ्जयति । प्रसादने यथा—"मुञ्च मुञ्च सखि ! नेत्रमुद्रणं न क्षमा मयि पदानते क्षमा ।"

(ठ) हन्त हन्तेति ।—अत्र द्विरुक्तं पदं वाच्यस्य विषादस्य अतिशयं व्यञ्जयति ।

(ड) चित्रमिति ।—नायिकाया मुखं दृष्ट्वा नायकस्य उक्तिरियम् । एवं चित्रं चित्रमित्यत्र वाच्यस्य विस्मयातिशयम् ।

(ढ) सुनयने इति ।—अत्र द्वितीयनयनपदं भाग्यवत्त्वादिगुणविशिष्टनयनबोधकत्वात् गुणः । हर्षे यथा,—"कथय कथय दूत ! क्वागतो रामभद्रः ?" । यद्वा—"हन्त हन्तागतः कान्तः श्रीमानद्य मदाश्रयम्" । अवधारणमयोगव्यवच्छेदोऽन्ययोगव्यवच्छेदश्च । तत्रायोगव्यवच्छेदे—"हन्ति हन्ति रिपुं वीरः" । अन्ययोगव्यवच्छेदे

अत्र लाटानुप्रासः। "नयने तस्यैव नयने च" इत्यादौ अर्थान्तरसङ्क्रमितवाच्यो ध्वनिः।

सन्दिग्धत्वं तथा व्याज-स्तुतिपर्य्यवसायि चेत् ॥६०५॥ (ण)

गुण इत्येव। यथा,—

"पृथुकार्त्तस्वरपात्रं भूषितनिःशेषपरिजनं देव!।
विलसत्करेणुगहनं सम्प्रति सममावयोः सदनम्॥" (त)

वैयाकरणमुख्ये तु प्रतिपाद्येऽथ वक्तरि।
कष्टत्वं दुःश्रवत्वं वा॥ ६०६॥ (थ)

यथा,—"तद्वञ्चनाहितमतिर्बहुचाटुगर्भं कार्य्योन्मुखः खलु जनः कृतकं ब्रवीति। तत् साधवो ननु विदन्ति विदन्ति किन्तु कर्त्तुं वृथा प्रणयमस्य न पारयन्ति॥" अत्र "विदन्ति" इति द्वितीयं पदं साधव एव विदन्तीत्यन्ययोगव्यवच्छेदपरम्। अयोग-व्यवच्छेदस्तु नञ्द्वयेनैव प्रतीयते।

(ण) सन्दिग्धत्वमिति।—व्याजस्तुतौ पर्य्यवस्यतीति व्याजस्तुतिपर्य्यवसायि—व्याजस्तुतिप्रत्यायकमित्यर्थः।

(त) पृथ्विति।—राजानं प्रति कस्यचित् दरिद्रस्योक्तिरियम्। हे देव! सम्प्रति आवयोः,—तव मम च इत्यर्थः, सदनं—गृहं, समं—तुल्यं, त्वत्तो धनलाभे तु मद्गृहमनेवंभावात् पश्चात् समं न भविष्यतीत्यर्थः। साम्यं प्रतिपादयति,—पृथूनि—प्रचुराणि, कार्त्तस्वरपात्राणि—स्वर्णभाजनानि यस्मिन् तदित्येकोऽर्थः; पृथुकानां—शिशूनां, ("पृथुकः शावकः शिशुः" इत्यमरः) आर्त्तस्वरस्य, क्षुधया इति भावः, पात्रं—स्थानम् इत्यपरोऽर्थः; भूषिताः,—रत्नाद्यलङ्कृताः, निःशेषाः,—सर्वे, परिजनाः,—परिवाराः यस्मिन् तदित्येकोऽर्थः; भुवि उषिताः,—गेहाभावात् आसनाभावाद्वा कृतवासाः, निःशेषाः परिजनाः,—पुत्रकलत्रादयः यत्र तदित्यपरोऽर्थः; विलसद्भिः,—शोभमानैः, करेणुभिः,—हस्तिभिः, यद्वा—विलसन्तीभिः करेणुभिः,—हस्तिनीभिः, ("करेणुरिभ्यां स्त्री नेभे" इत्यमरः) गहनं—निबिडं, दुष्प्रवेशमिति भावः, इत्येकोऽर्थः; विलेषु सीदन्तीति विलसदः ते एव इति विलसत्काः,—मूषिका इत्यर्थः, [स्वार्थे कन्प्रत्ययः] तेषां रेणुभिः,—धूलिभिः, गहनं—पूर्णमित्यर्थः, इत्यपरोऽर्थः। अत्र विशेषणपदानां सन्देहयोग्यत्वेऽपि व्याजस्तुत्यां पर्य्यवसानात् गुणवत्त्वम्।

(थ) वैयाकरणेति।—व्याकरणं वेत्ति अधीते वा वैयाकरणः, सः मुख्यः,—

गुण इत्येव। यथा,—

"दीधीवेवीट्समः कश्चित् गुणवृद्ध्योरभाजनम्।
क्विप्प्रत्ययनिभः कश्चित् यत्र सन्निहिते न ते॥" (द)

अत्रार्थः कष्टः, वैयाकरणश्च वक्ता। एवमस्य प्रतिपाद्यत्वेऽपि।

"अत्रातार्प्समुपाध्याय! त्वामहं न कदाचन।"

अत्र दुःश्रवत्वम्। वैयाकरणो वाच्यः। एवमस्य वक्तृत्वेऽपि। (ध)

ग्राम्यत्वमधमोक्तिषु॥ ६०७॥ (न)

आदिर्यस्य तादृशे, वक्तरि, प्रतिपाद्ये—बोद्धव्ये वा। [आदिपदेन नीरसतार्किकादीनां ग्रहणम्]।

(द) वैयाकरणे वक्तरि कष्टत्वस्य गुणत्वमुदाहरति, दीधीति।—कश्चित्—जनः, दीधीवेवीट्समः,—दीधीवेवीधातुभ्याम् इड़ागमेन च, समः,—तुल्यः, गुणवृद्ध्योः,—दाक्षिण्यादिगुणस्य अभ्युन्नतेश्च इत्यर्थः, अभाजनम्—अनाश्रयः; अन्यत्र—["अदेङ्गुणः" (१।१।२ पा०) "वृद्धिरादैच्" (१।१।१ पा०) इति सूत्राभ्यां] विहिते गुणवृद्धी ["दीधीवेवीटाम्" (१।१।६ पा०) इति] निषेधेन दीधीवेव्योरिटश्च न विद्येते इति भावः। तथा कश्चित्—जनः, क्विप्प्रत्ययनिभः,—विलुप्त इवेत्यर्थः, ["वेरपृक्तस्य" (६।१।६७ पा०) इति] क्विपः सर्वाभावस्य कथनादिति भावः, यत्र—जने क्विपि च, ते—गुणवृद्धी, न सन्निहिते, [क्विपि परे "क्ङिति च" (१।१।५ पा०) इति गुणवृद्धिनिषेधश्च द्रष्टव्यः]। अत्र दीधीवेवीटां गुणवृद्धिनिषेधानभिज्ञानां क्विपः सर्वाभावानभिज्ञानाञ्च झटिति प्रतीतिर्न भवतीति एतत्प्रतीतौ कष्टत्वं, परन्त्वत्र वैयाकरणस्य वक्तृत्वात् न दोषः।

(ध) वैयाकरणे वाच्ये दुःश्रवत्वस्य गुणत्वमुदाहरति, अत्रेति।—हे उपाध्याय! अहम् अत्र कदाचन त्वां न अतार्प्सं—न तर्पितवान्, [अस्मार्षमिति वा पाठः]। अत्र—"अतार्प्सम्" इत्यत्र, दुःश्रवत्वं, गुणः इत्यनुषज्यते। अस्य—वैयाकरणस्य। यथा—"सोऽध्यैष्ट वेदांस्त्रिदशानयष्ट" इति। शुष्कतार्किकवक्तृत्वे कष्टत्वं गुणो यथा—"न्यायानुमानविगुणं कुयशस्ते महीपते!। हेत्वाभासवदुद्भाव्यं विदुषो याति निग्रहम्॥" अत्र पञ्चावयवन्यायप्रयोगे दुष्टहेतुप्रयोगे वादिनिग्रहकर इत्यर्थः। एतदनभिज्ञानां कष्टम्। एवमन्यस्य बोध्यत्वे बोध्यम्।

(न) ग्राम्यत्वमिति।—अधमानां—नीचानाम्, उक्तिषु—अविदग्धवाक्येषु इत्यर्थः, ग्राम्यत्वं गुणः।

गुण इत्येव। यथा मम,—

"एसो समहरबिंबो दीसइ हेअंगवीणपिंडो व्व।
एदे अम्हसमोहा पडंति आसासु दुद्धधार व्व॥" (प)

इयं विदूषकोक्तिः।

निर्हेतुता तु ख्यातेऽर्थे दोषतां नैव गच्छति॥६०८॥(फ)

यथा,—"सम्मति सन्ध्यासमयश्चक्रद्वन्द्वानि विघटयति।" (ब)

कवीनां समये ख्याते गुणः ख्यातविरुद्धता॥६०९॥(भ)

(प) उदाहरति, एसो इति।—["एष मधुकरबिम्बो दृश्यते हेयङ्गवीनपिण्ड इव। एते चाश्रुमुग्धाः पतन्त्यासासु दुग्धधारा इव॥" इति संस्कृतम्]। एष इति।—अत्र हेयङ्गवीनपिण्डदुग्धधाराशब्दप्रयोगो ग्राम्यः वस्तुस्वभावप्रतीतिकरत्वात् गुण एव। "मुग्धा दुग्धधिया" इत्यादौ अनुप्रासविशेषादौ ग्राम्यत्वस्यादोषत्वं वोध्यम्।

(फ) निर्हेतुरिति।—निर्हेतुता—हेतुशून्यत्वं, ख्याते—प्रसिद्धे, अर्थे दोषतां नैव गच्छति—प्राप्नोति।

(ब) उदाहरति, सम्मतीति।—अत्र सन्ध्यासमयस्य चक्रवाकमिथुनविघटकत्वं प्रसिद्धं, नात्र हेतोराकाङ्क्षेति नादोषः।

(भ) कवीनामिति।—ख्याते—प्रसिद्धे, समये—सिद्धान्ते, नियमे वा, ख्यातविरुद्धता—लौकिकप्रसिद्धिविरोधिता इत्यर्थः, गुणः। अत्र सिद्धान्तविशेषः, स च त्रिप्रकारः, तथा चोक्तमलङ्कारशेखरे—"वस्तुतोऽपि नियमेन मतानप्यनियमनात्। नियमस्य पुरस्कारात् सम्प्रदायस्त्रिधा कवेः॥" वस्तुतः नियमने उदाहरणं—"रत्नानि यत्र तत्राद्रौ हस्त्यश्वमणसाम्यये। जलेभाद्यं नभोनद्यामम्भोजाद्यं नदीष्वपि॥ शुक्लत्वं कीर्तिपुण्यादेः कृष्णत्वं ध्वान्तपापयोः। आकाशकर्पूरकं नर्म मनसो वर्णकं तथा॥ प्रतापे रक्ततोक्तत्वं रक्तत्वं क्रोधरागयोः। ज्योत्स्नापाण्डु चकोराणां क्षेत्रं सर्वंसहासु च॥ केसरारोकयोः स्त्रीणां गण्डूषात् पादघाततः। मालतीरेऽपि पुष्पाणि रोमाञ्चिश्चिबलिः स्त्रियाम्॥" मतानप्यनियमने यथा आम्रचिन्तामणौ—"वल्ले मालतीपुष्पे फलपुष्पे च चन्दने। जातिदन्तेषु कुन्दानां कुसुमेषु च रक्तता॥ नारीणां ग्लानतापात्तु मलयोद्भवे वा स्त्रियै॥" नियमपुरस्कारे यथा—"हिमवत्येव भूर्जत्वक् चन्दनं मलये परम्। हेमन्त्रिगिरौ ख्याता सर्वदा मलयक्षितिः॥ सामान्यपक्षे मौक्तं पुण्याभ्रमवालजम्। भद्रवारण-

कविसमयख्यातानि च,—

मालिन्यं व्योम्नि पापे, यशसि धवलता
वर्ण्यते हासकीर्त्त्योः,

हंसानां हारस्य बकभस्मनोः॥ कृष्णत्वं शैलवृक्षादि-मेघवारिधिवीरुधाम्। भिल्लाना-मसुराणाञ्च धूपपङ्कशिरोरुहाम्॥ लौहित्यं धातुमाणिक्यं जपारत्नविवस्वताम्। पद्मपल्लवबन्धूक-दाड़िमीकरजादिषु॥ पीतत्वं शालिमण्डूक वल्कलेषु परागके। वर्षास्वेव शिखिप्रौढ़िर्मधावेव पिकध्वनिः॥" अन्यच्च,—"कमलासम्पदोः कृष्ण हरितोर्नाग-सर्पयोः। पीतलोहितयोः स्वर्ण-परागाग्निशिखादिषु॥ चन्द्रे शशैणयोः काम-ध्वजे मकरमत्स्ययोः। दानवासुरदैत्यानामैक्यमेवाभिसंहितम्॥" तथा च,—"चिरन्तनस्यापि तथा शिवचन्द्रस्य बालता। मानवा मौलितो वर्ण्या देवाश्चरणतः पुनः॥" अलङ्कार-शेखरे—"भुवनानि निबध्नीयात् त्रीणि सप्त चतुर्दश। चतस्रोऽष्टौ दश दिशश्चतुरः सप्त चाम्बुधीन्॥ अष्टादश स्मृताः विद्याः चतस्रश्च चतुर्दश। ये स्थले ते जले जीवा भिन्दन्त्यर्कं रणे मृताः॥ महत्त्वमादौ सर्गान्ते सूक्ष्मता जगतामपि। शैलादिर्भिद्यते शब्दान्नभः शतधनूपरि॥ नाम तत्तदुपाधौ स्याच्छङ्करो वृषवाहनः। चिह्नत्वं च वृषाङ्कोऽयं ध्वजे सत्त्वात् वृषध्वजः॥ शूली न सर्पी गिरिशः शशी न हरिणी विधुः। इन्दुमौलिर्महादेवो गङ्गामौलिर्न तु क्वचित्॥" अन्यदपि तथा चित्रमीमांसायां—"श्वेतानि चन्द्र शक्राश्व-शम्भु भार्गव-नारदाः। हली शेषाहि-शक्रेभौ सिंह-सौध-शरद्-घनाः॥" रसगङ्गाधरे—सूर्य्येन्दुकान्त-निर्मोक-मन्दारद्रु-हिमाद्रयः। हिम हास-मृणालानि स्वर्गङ्गेभरदाभ्रकम्॥" काव्यमीमांसायां—"सिकताऽमृतलोध्राणि गुणकैरवशर्कराः। नीलानि कृष्ण चन्द्राङ्क-व्यास-राम-धनञ्जयाः॥ शनिर्द्रुपदजा-काली-राजपट्ट-विदूरजम्। विषाकाशकुहूशस्त्रागुरुपापतमोनिशाः॥ रसावद्भुतशृङ्गारौ मदतापिञ्छराहवः। सीरिचीरं यमो रक्षः कण्ठः खञ्जनकेकिनोः॥ कृत्या च्छाया गजाङ्गार-खलान्तःकरणादयः। शोणानि क्षत्रधर्मश्च त्रेता रौद्ररसस्तथा॥ चकोर-कोकिलापारा-वतनेत्रं कपेर्मुखम्। तेजःसारसमस्तञ्च भौमकुङ्कुमतक्षकाः॥ धूसराणि रजो लूता करभो गृहगोधिका। कपोतमूषकौ दुर्गा काककण्ठखरादयः॥" एतदुपलक्षणं, "हरिताः सूर्य्यतुरगा बुधो मरकतादयः।" अत्रेदं बोध्यं—"द्वैरूप्ये चाप्रसिद्धौ च नियमोऽयमुदाहृतः। अन्यद्वस्तु यथा यत् स्यात् तत् तथैवोपवर्ण्यते॥" इति सङ्क्षेपः।

रक्तौ च क्रोधरागौ, सरिदुदधिगतं
पङ्कजेन्दीवरादि।
तोयाधारेऽखिलेऽपि प्रसरति च
मरालादिकः पक्षिसङ्घो
ज्योत्स्ना पेया चकोरैः, जलधरसमये
मानसं यान्ति हंसाः॥
पादाघातादशोकं विकसति वकुलं
योषितामास्यमद्यैः,
यूनामङ्गेषु हाराः, स्फुटति च हृदयं
विप्रयोगस्य तापैः।
मौर्वी रोलम्बमाला, धनुरथ विशिखाः
कौसुमाः पुष्पकेतोः,
भिन्नं स्यादस्य बाणैर्युवजनहृदयं,
स्त्रीकटाक्षेण तद्वत्॥
अह्नाम्भोजं, निशायां विकसति कुमुदं,
चन्द्रिका शुक्लपक्षे,
मेघध्वानेषु नृत्यं भवति च शिखिनां,
नाप्यशोके फलं स्यात्।
न स्याज्जाती वसन्ते, न च कुसुमफले
गन्धसारद्रुमाणाम्,

इत्याद्युन्नेयमन्यत् कविसमयगतं
सत्कवीनां प्रबन्धे ॥६१०॥ (म)

एषामुदाहरणान्याकरेषु स्पष्टानि ।

धनुर्ज्याऽऽदिषु शब्देषु शब्दास्तु धनुरादयः ।
आरूढत्वादिबोधाय ॥ ६११ ॥ (य)

यथा,—"पूरितं रोदसी ध्वानैर्धनुर्ज्याऽऽस्फालनोद्भवैः ।"

(म) मालिन्यमिति ।—व्योम्नि—आकाशे, पापे च मालिन्यं, वयसि तथा हास-कीर्त्योश्च वर्णता—शुक्लता, वर्ण्यते, कविभिरिति शेषः ; क्रोधरागौ—क्रोधानुरागौ, रक्तौ—रक्तवर्णौ, वर्ण्येते इति शेषः ; पद्मकैरवेन्दीवरादि—पद्मकुवलयादि, सरिदुदधि-गतं—सरित्सु—नदीषु, उदधिषु—समुद्रेषु च, विकसतीति शेषः ; अखिलेऽपि—सर्व-स्मिन्नेव, तोयाधारे—जलाशये, मरालादिकः,—हंसादिः, पक्षिसङ्घः प्रसरति—विचरति च ; चक्रीरः,—पक्षिभेदैः, ज्योत्स्ना पेया—पातव्या, जलधरसमये—वर्षासु इत्यर्थः, हंसाः मानसं—तदाख्यसरोवरं, यान्ति ; योषितां—रमणीनां, पादाघातात् —चरणकृतपृङ्कताडनात्, अशोकं—तदाख्यपुष्पं, तथा आस्यमद्यैः,—मुखनिःसृतसीधु-गण्डूषैः, वकुलं विकसति ; यूनां—तरुणानाम्, अङ्गेषु द्वारः, वर्णनीया इति शेषः ; विप्रयोगस्य—विरहस्य, तापैः,—सन्तापैः, हृदयं स्फुटति—विदीर्यते ; पुष्पकेतोः,—कामस्य, मौर्वी—ज्या, रोलम्बमाला—भ्रमरश्रेणी, धनुः कौसुमं, विशिखाः,—बाणाश्च, कौसुमाः,—कुसुमनिर्मिताः ; अस्य—कामस्य, बाणैः युवजनानां हृदयं भिन्नं —विदीर्णं, स्यात्, तथा स्त्रीणां कटाक्षैश्च तद्वत्—भिन्नं स्यादित्यर्थः ; अह्नि—दिवसे, अम्भोजं—पद्मं, हिमादौ पद्माद्यसत्त्वेऽपि तत्सङ्काशौ वर्णनीयैः, निशायां कुमुदं तथा शुक्लपक्षे चन्द्रिका विकसति ; चन्द्रिकायाः शुक्लपक्षीयसमस्तरात्रिभागे असङ्गावेऽपि सा वर्णनीया इति भावः ; मेघानां ध्वाने—ध्वनौ सति, शिखिनां—मयूराणां, नृत्यं भवति, अशोके च फलं नापि—नैव, स्यात् ; वसन्ते जातौ—जातीपुष्पं, न स्यात् ; गन्धसारद्रुमाणां—चन्दनतरूणाम्, (अत्र बहुवचनेन इक्षुप्रभृतीनां ग्रहणं) कुसुमं फलञ्च न स्यात् इत्यादि । अन्यत् कवीनां समयगतं—सिद्धान्तसिद्धं, वस्तु सत्कवीनां प्रबन्धे—ग्रन्थे, उन्नेयं—द्रष्टव्यम् ।

(य) पुनरुक्तताया गुणत्वमाह, धनुरिति ।—ज्याशब्देनैव धनुर्ज्यायां बोधनात्, धनुःशब्दो निरर्थकोऽपि अत्र आरूढत्वबोधनेन गुणः इति ज्ञेयम् ।

अत्र ज्याशब्देनापि गतार्थत्वे धनुःशब्देन ज्याया धनुष्या-ततीकरणं बोध्यते। आदिशब्दात् "भाति कर्णावतंसस्ते।", अत्र कर्णस्थितत्वबोधनाय कर्णशब्दः। एवं श्रवणकुण्डलशिरः-शेखरप्रभृतिः। एवं निरुपपदो (र) मालाशब्दः पुष्पस्रज-मेवाभिधत्ते इति स्थितावपि "पुष्पमाला विभाति ते।" अत्र पुष्पशब्द उत्कृष्टपुष्पबुद्ध्यै। एवं "मुक्ताहारः" इत्यत्र मुक्ताशब्देन अन्यरत्नामिश्रितत्वम्।

प्रयोक्तव्याः स्थिता अमी ॥६१२॥ (ल)

धनुर्ज्यादयः सत्काव्यस्थिता एव निबद्धव्याः, न तु अस्थिता जघनकाञ्चीकरकङ्कणादयः। (व)

उक्तावानन्दमग्नादेः स्याच्यूनपदता गुणः॥६१३॥(श)

यथा,—

"गाढालिङ्गनवामनीकृतकुचप्रोद्भिन्नरोमोद्गमा
सान्द्रस्नेहरसातिरेकविगलच्छ्रीमन्नितम्बाम्बरा।

(र) उदाहरति, पूरिते इति।—धनुषां ज्याऽऽस्फालनेन उद्भवन्तीति तथोक्तैः, ध्वानैः,—ध्वनिभिः, रोदसी—द्यावापृथिव्यौ, पूरिते। ("—भूद्यावौ रोदसी रोदसी च ते" इत्यमरः)। ततेति।—आततीकरणं—विस्तारणम्। श्रवणेति।—कुण्डल-शब्द एव कर्णभूषणविशेषं, शेखरशब्दश्च शिरोभूषणं किरीटमभिधत्ते, एतयोः श्रवणशिरःसंयोगः तत्र स्थितत्वं बोधयतीत्यर्थः। अयमेवं बोध्यं—धनुर्ज्यादयः शब्दाः स्थिताः एवेवं समर्थनीया इत्यनेन क्वचिदेतेषां प्रयोगोऽपि अदुष्ट इति बोधितं, न तु एवंविधः पुनः प्रयोगः साधुरित्युपपादनीयः इति। निरुपपदः,—उपपदरहितः, पदान्तरसंयोगविरहित इत्यर्थः।

(ल) प्रयोक्तव्या इति।—अमी—धनुर्ज्यादयः शब्दाः।

(व) सत्काव्येषु—महाकविप्रयोगेषु, स्थिताः इतस्ततो दृश्यन्ते इत्यमी अदुष्टा इति स्वीक्रियन्ते इति भावः, न तु जघनकाञ्च्यादयः, निबद्धव्या इति शेषः, एतेषां प्रायस्तथा प्रयोगादर्शनादिति भावः।

(श) उक्ताविति।—आनन्देन मग्नादेः जनस्य, [मग्नादिपदेन दुःखमग्नादेः ग्रहणम्] उक्तौ—वचने, न्यूनपदता गुणः स्यात्।

मा मा मानद ! माऽति मामलमिति क्षामाक्षरोल्लापिनी
सुप्ता किं नु? मृता नु किम्? मनसि मे लीना विलीना नु किम्?॥"(ष)

अत्र पीड़येति न्यूनम्।

क्वचिन्न दोषो न गुणः ॥ ६१४ ॥

न्यूनपदत्वमित्येव। यथा,—

"तिष्ठेत् कोपवशात् प्रभावपिहिता ? दीर्घं न सा कुप्यति
स्वर्गायोत्पतिता भवेत् ? मयि पुनर्भावार्द्रमस्या मनः।
तां हर्त्तुं विबुधद्विषोऽपि न च मे शक्ताः पुरोवर्त्तिनीं
सा चात्यन्तमगोचरं नयनयोर्यातेति कोऽयं विधिः ?॥" (स)

(ष) उदाहरति, गाढ़ेति।—सखायं प्रति कस्यचित् नायकस्य उक्तिरियम्। गाढ़ं—दृढ़ं, यत् आलिङ्गनम्—आश्लेषः, तेन वामनीकृतौ—खर्वीकृतौ, कुचौ यस्याः तथोक्ता, अत एव प्रोद्भिन्नः,—प्रकर्षेण उद्भेदं गतः, रोमोद्गमः,—रोमाञ्चः यस्यास्तादृशी, [गाढ़ालिङ्गनवामनीकृतकुचा चासौ प्रोद्भिन्नरोमोद्गमा चेति विग्रहः; अत्र परपदस्यैव विशेष्यकल्पना कर्त्तव्या, तेन "विशेषणं विशेष्येण बहुलम्" (२।१।५७ पा०) इति कर्मधारयः, "पुंवत् कर्मधारय—" (६।३।४२ पा०) इति सूत्रस्य नित्यस्त्रीलिङ्ग-परतायां पुंवद्भावश्च सङ्गच्छते; गाढ़ालिङ्गनवामनीकृतकुचयोः प्रोद्भिन्नो रोमोद्गमो यस्या इति समासो न युक्तः, कुचे रोमोद्गमस्यासम्भवात्] सान्द्रः,—घनः, यः स्नेहरसः,—प्रणयः, तस्य अतिरेकेण—आतिशय्येन, विगलत्—स्खलत्, श्रीमतः,—मनोहरात्, नितम्बात् अम्बरं—वसनं यस्यास्तथाभूता, मा इति पदमूह्यम्; हे मानद! मा—मां, मा, पीड़य इति अनुक्तः शेषो बोध्यः, मां मा अति—अत्यर्थं, पीड़य इति पूर्ववत् बोध्यम्, अलं, बहुव्यापारेणेति शेषः, इति क्षामाक्षरोल्लापिनी—अल्पाक्षरभाषिणी सती, [पीड़येत्यादेरनुक्तत्वात् अल्पत्वमक्षरस्य; मानदस्य पीड़ाकरत्वमनुपपन्नमित्यव-गमाय तत्पदेन सम्बोधनम्; एते तावन्निषेधाभासाः विधिषु पर्य्यवसन्नाः] सुप्ता—निद्रायिता, किं नु? मृता किं नु? मे—मम, मनसि लीना किं नु? विलीना किं नु? इह सुप्तेत्यादिवितर्कचतुष्टयं निस्पन्दत्वादिना ज्ञेयम्; तथा च—निस्पन्दत्वेन सुप्तेति, अतिनिस्पन्दत्वेन मृतेति, अत्यन्तत्वे लयः, अवहिर्भावे विशेषलयश्च बोध्यः। अत्र पीड़येत्यादि योग्यस्य पदस्य न्यूनता हर्षग्लानिसम्मोहप्रहर्षबोधनद्वारा रसं पुष्णाति इति गुणवत्त्वम्। शार्दूलविक्रीड़ितं वृत्तम्। अमरुशतकस्येदं पद्यम्।

(स) तिष्ठेदिति।—उर्वशीविच्छेदातुरस्य राज्ञः पुरूरवसो वितर्कवचनमिदम्।

अत्र "प्रभावपिहिता" इति "भवेत्" इति चेत्यनन्तरं "नैतत् यतः" इति पदानि न्यूनानि। एषां पदानां न्यूनतायामपि एतद्वाक्यव्यङ्ग्यस्य वितर्काख्यव्यभिचारिभावस्योत्कर्षाकरणान्न गुणः। "दीर्घं न सा" इत्यादिवाक्यजन्यया च प्रतिपत्त्या तिष्ठेदित्यादिवाक्यप्रतिपत्तेर्बोधः (ह) स्फुटमेवावभासते इति न दोषः।

गुणः क्वाप्यधिकं पदम् ॥६१५॥

यथा,—

"आचरति दुर्जनो यत् सहसा मनसोऽप्यगोचरानर्थान्।
तन्न न जाने जाने स्पृशति मनः किन्तु नैव निष्ठुरताम् ॥" (क)

अत्र "न न जाने" इत्यनेन अयोगव्यवच्छेदः। द्वितीय-"जाने" इत्यनेन अहमेव जाने इत्यन्ययोगव्यवच्छेदाद्विच्छित्तिविशेषः। (ख)

कोपवशात्—प्रणयकोपात्, प्रभावेण—दिव्यमहिम्ना इत्यर्थः, पिहिता—आवृता सती, तिष्ठेत्? अथवा—प्रभौ मयि कोपवशात् अपिहिता तिष्ठेत्? नैतत् सम्भवति इति मनसिकृत्य आह, दीर्घमिति।—(यतः) सा दीर्घं न कुप्यति, स्वर्गाय उत्पतिता—प्रस्थिता, भवेत्? मयि पुनः अस्याः,—उर्वश्याः, मनः भावार्द्रं—प्रणयप्रवणं, प्रेमस्तिमितमिति भावः, मे—मम, पुरोवर्त्तिनीम्—अग्रस्थितां, तां हर्त्तुं विबुधद्विषः,—असुराः अपि, न च शक्ताः,—समर्थाः, इत्यमदृश्यत्वे हेतुर्नास्त्येव किमदृश्येति विस्मयादाह, सा चेति।—किन्तु सा अत्यन्तं नयनयोरगोचरं याता—गता, इति अयं को विधिः?—नियतिः, व्यापारो वा? शार्दूलविक्रीडितं वृत्तम्। विक्रमोर्वश्याम्।

(ह) अत्रेति।—अगुणत्वमदोषत्वञ्चोपपादयति, एषामिति।—प्रतिपत्त्या—प्रतीत्या। वाक्यप्रतिपत्तेः,—वाक्यजन्यबोधस्य।

(क) आचरतीति।—दुर्जनः सहसा—अतर्कितभावेन, मनसोऽपि अगोचरान्—अविषयान्, कदाऽपि मनसि अचिन्तितानित्यर्थः, अर्थान्—कार्य्याणीति यावत्, यत् आचरति—करोति, तत् न जाने इति न, जाने, किन्तु मनः निष्ठुरतां नैव स्पृशति—आश्रयति। दुर्जनस्य दौर्जन्यनिवारणे निष्ठुरता आवश्यकी, मनस्तु तामवलम्बितुं नेच्छतीति फलितार्थः।

(ख) ननु द्वितीयजाने इत्यनेनायोगव्यवच्छेद एव प्रतीयते इत्यत आह,

समाप्तपुनरात्तत्वं न दोषो न गुणः क्वचित् ॥६१६(ग)

यथा,—"अन्यास्ता गुणरत्न" इत्यादि।

अत्र प्रथमार्द्धेन वाक्यसमाप्तावपि द्वितीयार्द्धवाक्यं पुनरुपात्तम्। एवञ्च विशेषणमात्रस्य पुनरुपादाने समाप्तपुनरात्तत्वं न वाक्यान्तरस्येति विज्ञेयम्।

गर्भितत्वं गुणः क्वापि ॥ ६१७ ॥

अत्रेति।—अयोगव्यवच्छेदः,—अयोगस्य—ज्ञानायोग्यस्य इत्यर्थः, व्यवच्छेदः,—निरासः। इत्यनेन—इत्यनेनैवेत्यर्थः। अन्ययोगेति।—अन्यस्य योगः,—ज्ञानयोगः इत्यर्थः, तस्य व्यवच्छेदः,—निराकरणं तस्मात्, विच्छित्तिविशेषः,—वैचित्र्यातिशयः, गुणत्वं प्रतीयते इति शेषः। अत्र कथितपदत्वस्यावधारणबोधकत्वात् "यद्वञ्चनेन" इत्यादि प्राक्प्रदर्शितवत् गुणत्वमस्ति। अस्य शुद्धोदाहरणन्तु—"याहि माधव! याहि केशव! मा वद कैतववादम्। तामनुसर सरसीरुहलोचन! या तव हरति विषादम्॥" अत्र माधवकेशवसरसीरुहलोचनपदानाम् अन्यतमेनैव अन्वयोपपत्तौ सर्वेषामुपपादनम् अर्थान्तरबोधकत्वात् गुण एव; तथा हि—माधवपदेन लक्ष्मीपतित्वेपि तव वैदग्ध्यं नास्तीति, केशवपदेन वीरत्वेऽपि तव रतिसामर्थ्यं नास्तीति, सरसीरुहलोचनपदेन विलक्षणचक्षुःसत्त्वेऽपि रात्रौ पद्मस्य मुद्रणात् रात्र्यन्धत्वमवाप्य मम रूपलावण्यातिशयं न पश्यसीति व्यज्यते। यथा वा—"कुर्य्यां हरस्यापि पिनाकपाणेः धैर्य्यच्युतिं के मम धन्विनोऽन्ये?" अत्र पिनाकपाणेरपीत्यनेनैव प्रकृतान्वयोपपत्तौ हरस्य इत्यधिकमपि हरस्यैव पिनाकसम्बन्धेन दुर्जयत्वम् इति व्यञ्जकत्वात् गुणत्वम्। "नायं भिक्षुर्वरयुवतिमान् नो तितिक्षुर्धनुष्मान् राज्ञः पुत्रो न हि न हि जटाजूटभारं दधानः। नायं व्याधो नवगुणधरः पश्य कस्मादकस्मात् पुण्येऽरण्ये नवजलधरश्यामलः कोऽयमेति?॥" अत्र द्वितीयस्य न हीति निपातसमुदायस्य वाचकत्वाभावेन कथितपदस्य न विषयः, किन्तु अधिकोऽपि राजपुत्रस्य जटाधारणमत्यन्तासम्भवीति व्यञ्जकत्वात् गुण एव इति ज्ञेयम्।

(ग) समाप्तेति।—समाप्तपुनरात्तत्वं—समाप्तं सत् पुनरात्तं—पुनर्गृहीतं तस्य भावः। क्वचिदिति।—यत्र विशेषणमात्रस्य पुनरुपादानं, तत्रैवास्य दोषत्वं, वाक्यान्तरस्य पुनरुपादानेन न दोषः इति भावः।

यथा,—

"दिग्नातङ्गघटाविभक्तचतुराघाटा मही साध्यते
सिद्धा साऽपि वदन्त एव हि वयं रोमाञ्चिताः पश्यत।
विप्राय प्रतिपाद्यते किमपरं रामाय तस्मै नमो
यस्मात् प्रादुरभूत् कथाऽद्भुतमिदं यत्रैव चास्तं गतम्॥" (घ)

अत्र "वदन्त एव" इत्यादि वाक्यं वाक्यान्तरप्रवेशात् चमत्कारातिशयं पुष्णाति। (ङ)

पतत्प्रकर्षता तथा॥ ६१८॥

तथेति क्वचित् (च) गुणः। यथा,—"चञ्चद्भुज" इत्यादि। अत्र चतुर्थपादे सुकुमारार्थतया शब्दाडम्बरत्यागो गुणः।

क्वचिदुक्तौ स्वशब्देन न दोषो व्यभिचारिणः।
अनुभावविभावाभ्यां रचना यत्र नोचिता॥६१९॥ (छ)

(घ) दिग्नातङ्गेति।—दिग्नातङ्गानां—दिग्गजानां, घटाभिः,—समूहैः, विभक्ताः,—परिच्छिन्नाः, चत्वारः आघाटाः,—सीमानः यस्यास्ताडृशी, मही साध्यते—उपार्ज्यते, वशीक्रियते इत्यर्थः, सा—मही, सिद्धाऽपि—समस्तदिग्विजयेन उपार्जिताऽपीत्यर्थः, वदन्त एव—कथयन्त एव, वयं रोमाञ्चिताः, भवाम इति शेषः, पश्यत—अवलोकयत, विप्राय—कश्यपाय इत्यर्थः, प्रतिपाद्यते—समर्प्यते, किमपरम्—अन्यत्, वक्तव्यमिति शेषः, यस्मात् इदं—समस्तायाः पृथिव्याः सम्प्रदातृत्वरूपं, कथाऽद्भुतं—कथैवाद्भुतम् अद्भुततापावभूतम्, अद्भुता कथा इत्यर्थः, [अन्ये तु—"कथाया अद्भुतम्" इति "कथायामद्भुतम्" इति वा विग्रहं स्वीकुर्वन्ति] प्रादुरभूत्, यत्रैव अस्तं गतं, तत्तुल्यः कश्चित् न भूतः, न वर्त्तमानः, न वा भविष्यन् इति भावः, तस्मै रामाय—भार्गवाय, नमः, ईदृगद्भुतं कर्म केनापि कर्तुं न शक्यते कदाऽपीति भावः। शार्दूलविक्रीडितं वृत्तम्। भट्टप्रभाकरस्येदं पद्यम्।

(ङ) पुष्णाति इति।—युद्धवीर-दानवीरयोः परिपोषः इति सारः।

(च) क्वचिदिति।—यत्र पद्यांशे सुकुमारार्थत्वं तत्र इत्यर्थः।

(छ) इदानीं रसदोषाणां विषयविशेषे यथायथमदोषत्वं गुणत्वञ्चाह, क्वचिदिति।—क्वचित् व्यभिचारिणः स्वशब्देन उक्तौ न दोषः; कुत्र न दोषः? इत्याः

यत्र अनुभावविभावमुखेन प्रतिपादने विशदप्रतीतिर्नास्ति, यत्र च विभावानुभावकृतपुष्टिराहित्यमेवानुगुणं, (ज) तत्र व्यभिचारिणः स्वशब्देनोक्तौ न दोषः। यथा—

"औत्सुक्येन कृतत्वरा सहभुवा व्यावर्त्तमाना क्रिया
तैस्तैर्बन्धुवधूजनस्य वचनैर्नीताऽऽभिमुख्यं पुनः।
दृष्टाऽग्रे वरमात्तसाध्वसरसा गौरी नवे सङ्गमे
संरोहत्पुलका हरेण हसता श्लिष्टा शिवायास्तु वः॥"(झ)

अत्रौत्सुक्यस्य त्वरारूपानुभावमुखेन प्रतिपादने सङ्गमे न झटिति प्रतीतिः, त्वराया भयादिनाऽपि सम्भवात्। क्रियोऽनुभावस्य च व्यावर्त्तनस्य क्रोपादिनाऽपि सम्भवात्। साध्वसहासयोस्तु विभावादिपरिपोषस्य प्रकृतरसप्रतिकूलप्रायत्वादित्येषां स्वशब्दाभिधानमेव न्याय्यम्। (ञ)

शंकायामाह, यत्रेति।—यत्र अनुभावविभावाभ्यां रचना—उद्भावनं, व्यञ्जनमिति यावत्, नोचिता, तत्र इति शेषः।

(ज) विभावादिप्रकृतरचनाऽनौचित्यं विकल्पयति, यत्रेति।—प्रतिपादने—कथने, विशदप्रतीतिः,—स्फुटावभासः। पुष्टिराहित्यं—पोषणाभावः, अनुगुणम्—अनुकूलम्।

(झ) औत्सुक्येनेति।—नवे सङ्गमे औत्सुक्येन—चिरात् पतिसङ्गमलाभकौतूहलेन, कृतत्वरा—तङ्गमने त्वरावती, ततश्च सहभुवा—स्वभावजातया, क्रिया—लज्जया, व्यावर्त्तमाना—गन्तुमनिच्छन्तीत्यर्थः, ततश्च बन्धुवधूजनस्य—सखीजनस्य, तैः तैः,—तत्तत्सोचितैरित्यर्थः, वचनैः पुनः आभिमुख्यं नीता, तथा अग्रे—पुरतः, स्थितमिति शेषः, वरं दृष्टा, आत्तः,—गृहीतः, साध्वसरसः,—भयावेशः यया तादृशी, ततः हसता हरेण श्लिष्टा—आलिङ्गिता, अत एव संरोहत्पुलका—रोमाञ्चिताङ्गी, गौरी—पार्वती, वः,—युष्माकं, शिवाय—कल्याणाय, अस्तु—भवतु। रत्नावल्याम्।

(ञ) अत्रेति।—प्रतिपादने—कथने, झटिति न प्रतीतिः, औत्सुक्यस्येति शेषः। व्यावर्त्तनस्य—विमुखीभावस्य। साध्वसेति।—यदि साध्वसं विभावादिभिः परिपोष्यते, तदाऽसौ भयानकरसतामियाति, स च प्रकृतरसस्य—शृङ्गारस्य, प्रतिकूलः, हासस्तु यदि विभावादिभिः परिपोष्यते, तदाऽसौ हास्यरसतामिति; तथाले अस्य बाधकत्वात् प्रकृतरसस्य शृङ्गारस्य, नाङ्गत्वं स्यादिति भावः।

सञ्चार्य्यादेर्विरुद्धस्य बाध्यत्वेन वचो गुणः॥६२०॥ (ट)

यथा—"क्वाकार्य्यं शशलक्ष्मणः क्व च कुलं……"इत्यादि।

अत्र प्रशमाङ्गानां वितर्कमतिशङ्काधृतीनामभिलाषाङ्गौत्सुक्यस्मृतिदैन्यचिन्ताभिस्तिरस्कारः, पर्य्यन्ते चिन्ताप्रधानमास्वादप्रकर्षमाविर्भावयति। (ठ)

विरोधिनोऽपि स्मरणे साम्येन वचनेऽपि वा।
भवेद्विरोधो नान्योऽन्यमङ्गिन्यङ्गत्वमाप्तयोः॥६२१॥(ड)

क्रमेण यथा,—"अयं स रशनोत्कर्षी" इत्यादि। अत्र

(ट) परिपन्थिरसविभावादिसङ्ग्रहस्य गुणत्वमाह, सञ्चार्य्यादेरिति।—विरुद्धस्य—प्रतिकूलरसाङ्गस्य, सञ्चार्य्यादेः,—व्यभिचारिभावादेः, [आदिपदेन विभावानुभावयोः ग्रहणम्] बाध्यत्वेन—खण्डनीयत्वेन, प्रतिरुद्धस्वजन्यरसपरिपुष्टिकत्वेन इत्यर्थः, वचः,—कथनं, गुणः।

(ठ) उदाहरति, क्वेति।—भावशबलस्योदाहरणमिदम्। (व्याख्यातपद्यमिदं २७७ पृष्ठे) गुणत्वमुपपादयति, अत्रेति।—प्रशमाङ्गानां—शान्तरसानुकूलानाम्। अभिलाषाङ्गं—शृङ्गाररसानुकूलम्। तिरस्कारः,—स्वजन्यरसपरिपोषखण्डनं, निरास इत्यर्थः। ननु वितर्कादीनामिव औत्सुक्यादीनाम् अपि बाध्यत्वमस्तीति कथं विप्रलम्भस्य परिपुष्टिः? इत्यत आह, पर्य्यन्ते इति।—पर्य्यन्ते—पर्य्यवसाने, चिन्तायां विश्रान्तौ सत्यामित्यर्थः। चिन्तेति।—चिन्ता प्रधानम्—अबाधितत्वेन मुख्यं कारणं यस्य तादृशम्, आस्वादप्रकर्षं—रसोत्कर्षं, विप्रलम्भशृङ्गारपरिपोषम् इत्यर्थः, आविर्भावयति—जनयति। तथाविधास्वादप्रकर्षज्ञापनं गुण इति बोध्यम्।

(ड) "प्रत्यनीकौ रसौ द्वौ द्वौ तत्सम्पर्कं विवर्जयेत्" इति नियमात् विरुद्धयोः समावेशो दोषः इत्युक्तम्; साम्प्रतं तयोर्विषयविशेषे समावेशमाह, विरोधिन इति।—विरोधिनः,—विरुद्धस्य, स्मरणे—पूर्वानुभूतस्य व्यञ्जनया ज्ञाने, वा साम्येन—सादृश्येन, वचने—कीर्त्तने, तथा अङ्गिनि—प्रधाने विशेष्ये, [एतच्च अङ्गिनि इत्युपादानात् लभ्यते, अन्यथा "अङ्गत्वमाप्तयोः" इत्यनेनैव अङ्गलाभे तदुपादानमनर्थकं स्यात्] अङ्गत्वम् आप्तयोः,—प्राप्तयोः, अङ्गभावेन स्थितयोरित्यर्थः, द्विवचनमुपलक्षणं बहूनामपीति द्रष्टव्यम्] अन्योऽन्यं—परस्परं, विरोधः न भवेत्।

आलम्बनविच्छेदेन रतेररसात्मतया अप्रधानानां तदङ्गानां शोकोद्दीपकतया करुणाऽनुकूलता। (ढ)

"सरागया सुतघनघर्मतोयया
कराहतिध्वनितपृथूरुपीठया।
मुहुर्मुहुर्दशनविखण्डितोष्ठया
कृशा कृपाः प्रियतमयेव भेजिरे॥" (ण)

(ढ) अत्रेति।—व्याख्यातमिदं नवमाभारतीयपद्यं ३२७ पृष्ठे। अत्र विरहस्यापि प्रकारस्य अप्रधानतया अरसत्वमेव सत्यपि न दोषः। ननु तदानीमपि रतिरस्ति, अतः तस्या रसत्वप्राप्तिः अविरहत्वेन इति कथं प्रकारस्य अप्रधानत्वम्? इत्यत आह, आलम्बनेति।—आलम्बनस्य—नायकस्य, विच्छेदेन—नाशेन, रतेः,—अनुरागस्य, अरसात्मतया—तदानीन्तनानुभवाधीनभावेन अप्राधान्यस्वभावतया, अप्रधानानामित्यनेन प्रकारस्यापि अरसं दर्शितम्; तदङ्गानां—तस्य—प्रकारस्य, अङ्गानां—अरस रसमोत्क्षिप्तादीनाम्। सुतस्य उपकारकरसं वस्तूनाम् अत्यन्तशोकजनकत्वमिति भावः।

(ण) साम्येनोक्तौ विरहयोः समावेशं दर्शयति, सरागयेति।—कृष्णं प्रति कटूक्तादिना शिशुपालं हत्वा राज्ञां क्रोधोदयवर्णनमिदम्। कृपाः,—समाजस्थाः जनाः, सरागया—रागः,—मुखलौहित्यं, "रक्तौ च क्रोधरागौ" इति दर्शनात्; पक्षे—अनुरागश्च, तत्सहितया, सुतानि—चरितानि, घनानि—अविरलानि, घर्मक्लेदानि यस्याः तथाभूतया, क्रोधेन सत्त्वोद्रेकेण च खेदनिर्गमेनादिति भावः; कराहत्या—करापातेन, ध्वनितं—ध्वनिं, पृथु—विशालम्, ऊरुपीठं—बहुमूल्यमासनं यस्याम्; यद्वा—ऊरुः पीठस्य यस्यां तथाभूतया; (क्रोधे खलु वीरैः ऊरुः पीठं वा आहन्यते), पक्षे—ऊरवेव पीठं यस्याः, अत्यन्तं समानम्; (अतिप्रौढकामाभिः नायिकाभिः ऊरवे ऊरुः आहन्यते इति कामशास्त्रप्रसिद्धम्) तथा मुहुर्मुहुः,—पुनःपुनः, दशनैः विखण्डितः,—दष्टः, ओष्ठः यस्यां तादृश्या, पक्षे—आलक्तकेन लाक्षारसेन लोहितः ओष्ठो यस्याः तादृश्या, कृशा—क्रोधेन, प्रियतमयेव (कृष्णया) भेजिरे—सिषेविरे। अत्र प्रकारवीरयोः समावेशः। उक्तानुभावानाम् अत्यन्तमपि सत्त्वजात् अद्भिति दृष्टः प्रतीतिः न अवतीति कृत्वा; क्रमशक्त्या उपादानं न दोषः। प्रकरणात् उक्तानुभावानामत्र क्रोधः, व्यभिचारिणः क्रोधस्य क्रमशक्त्या उपादानात्

अत्र सम्भोगशृङ्गारो वर्णनीयस्य वीरव्यभिचारिणः क्रोधः स्वानुभावसाम्येन विवक्षितः।

"एकं ध्याननिमीलनान्मुकुलितप्रायं द्वितीयं पुनः
पार्वत्या वदनाम्बुजस्तनभरे सम्भोगभावालसम्।
अन्यद्दूरविकृष्टचापमदनक्रोधानलोद्दीपितं
शम्भोर्भिन्नरसं समाधिसमये नेत्रत्रयं पातु वः॥" (त)

अत्र प्राप्तशृङ्गाररौद्ररसपरिपुष्टा भगवद्विषया रतिः।

यथा वा—

"क्षिप्तो हस्तावलग्नः प्रसभमभिहतोऽप्याददानोंऽशुकान्तं
गृह्णन् केशेष्वपास्तस्मरणनिपतितो नेक्षितः सम्भ्रमेण।
आलिङ्गन् योऽवधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः
कामीवार्द्रापराधः स दहतु दुरितं शाम्भवो वः शराग्निः॥"(थ)

प्राप्तप्राप्तभावेन न रौद्रत्वमिति भावः। अत्र रुधिरा इत्यं,—"नखी खड्गी निति रुधिरा चतुर्थेः" इति तन्त्रवचात्। त्रिपुरासम्बन्धश्च पद्यमिदम्।

(त) एवञ्जिन् भक्तत्वमापन्नानां रसानां समावेशमुदाहरति, एकमिति।—एकं—नेत्रमित्यर्थः, ध्याननिमीलनात् मुकुलितप्रायं—प्रायेण मुकुलभावमापन्नं, द्वितीयं, नेत्रमिति शेषः, पुनः,—तु, पार्वत्याः,—गौर्याः, वदनमेव अम्बुजं—पद्मं, तथा स्तनयोर्भरः,—उत्कर्षः तस्मिन्, सम्भोगभावेन—पुंस्त्वमाश्लिष्यनायमित्यादिना, अलसं—सङ्कुचितमित्यर्थः, अन्यत्—द्वितीयं नेत्रमित्यर्थः, दूरम्—अतिमात्रं, विकृष्टः चापः येन, यद्वा—दूरे विकृष्टः पापो येन, तादृशो यो मदनः तस्मिन् यः क्रोधः एव अनलः,—अग्निः, तेन उद्दीपितम्—उज्जीवितम्, अत एव समाधिसमये—योगावस्थे, भिन्नः,—पृथक्, रसः,—भावो यस्य तादृशं, विदग्धयुवरसव्यञ्जकमित्यर्थः, शम्भोः,—शिवस्य, नेत्रत्रयं—त्रीणि लोचनानि, वः,—युष्मान्, पातु—रक्षतु। अत्र भक्तिनि भगवद्विषयकरतिभावे भक्तत्वं प्राप्तानां प्राप्तशृङ्गारवीराणां न विरोधः, तथा शृङ्गारिणोऽपि न समाधिसमय रति शृङ्गारस्य परम्परया क्रोधस्य समाधिविघ्ननिवारकत्वेन तत्परिपोषिणी रौद्रस्य साक्षादेव ईश्वरविषयकरतिपरिपोषकत्वम्। आर्द्रकविक्रीडितं वृत्तम्।

(थ) परम्परयाऽपि भक्तभावमापन्नयोः रसयोः समावेशं दर्शयति, क्षिप्त इति।—यः शाम्भवः,—शम्भुसम्बन्धी, शराग्निः, त्रिपुरदाहार्थे निक्षिप्त इति शेषः, आर्द्रः,—

अत्र कविगता भगवद्विषया रतिः प्रधानम्। तस्याः परिपोषकतया भगवतस्त्रिपुरविध्वंसं प्रति उत्साहस्य अपरिपुष्टतया रसपदवीमप्राप्ततया भावमात्रस्य करुणोऽङ्गम्। तस्य च "कामीव" इति साम्यबलादायातः शृङ्गारः। (द)

एवञ्चाविश्रान्तिधामतया करुणस्याङ्गतैवेति द्वयोरपि करुण-

अभिनवः, अपराधो यस्य तादृशः, अचिरकृतापराध इत्यर्थः, कामीव—कान्त इव, साश्रूणि—सजलानि, नेत्रोत्पलानि—नयनेन्दीवराणि यासां तादृशीभिः, पतिवियोगात् पत्यपराधाद्वेति भावः; त्रिपुरयुवतिभिः,—त्रिपुरस्थिताभिरसुराङ्गनाभिरित्यर्थः, हस्तावलग्नः,—गृहीतहस्तः सन् इत्यर्थः, क्षिप्तः,—निराकृतः, (एवमुत्तरोत्तरक्रियास्वपि कामीति दृष्टान्तः) प्रसभं—बलात्, अभिहतः,—ताडितोऽपि, अंशुकान्तं—वसनदशाम्, आददानः,—गृह्णन्, तथा केशेषु गृह्णन्—गृहीतकेशः, एकत्र दहनार्थम् अपरत्र चुम्बनार्थमिति भावः; अपास्तः,—निराकृतः, ततः चरणयोः निपतितः, दहनार्थम् अपराधभञ्जनार्थञ्चेति भावः, सम्भ्रमेण—भयेन गौरवेण च, न ईक्षितः,—न दृष्टः, एकत्र—भयजन्यत्वरया ईक्षणाभावः, पक्षे—अभिमानात् नेक्षितः, ततश्च आलिङ्गन् एकत्र—सर्वशरीरमाक्रामन्, अन्यत्र—आश्लिष्यन्, अवधूतः,—निराकर्तुं चेष्टितः, अन्यत्र—तिरस्कृतः, सः वः,—युष्माकं, दुरितं—पापं, दहतु—भस्मीकरोतु। स्रग्धरा वृत्तम्। अमरुशतकस्येदं पद्यम्।

(द) अङ्गाङ्गिभावमुपपादयति, अत्रेति।—प्रधानं, निराकाङ्क्षवाक्यप्रतिपाद्यत्वादिति भावः, तस्याः,—भगवद्विषयकरतेः, परिपोषकतया—पोषणकारित्वेन अङ्गस्येति शेषः। अपरिपुष्टतया—परिपोषणमप्राप्ततया, विभावानुभावयोरनुपादानादिति भावः; रसपदवीं—रसत्वमित्यर्थः, अप्राप्ततया, विभावादिभिः परिपुष्टस्यैव रसत्वादिति भावः। भावमात्रस्य—उद्बुद्धमात्रतया भावशब्दप्रतिपाद्यस्येत्यर्थः, "उद्बुद्धमात्रः स्थायी च भाव इत्यभिधीयते" इति वचनात्; करुणोऽङ्गमिति।—दुष्टनिग्रहं प्रति भगवदुत्साहस्यानुभावेन करुणस्थायिभावेन स्त्रीणां शोकेन व्यञ्जनमिति करुणस्याङ्गत्वम्। तस्य—करुणस्य। कामीवेति।—प्राक् यथा कामुक आचरति स्म, तथा अद्य शराग्निरिति साम्यबलात्—सादृश्यवशात्, आयातः,—उपस्थितः, स्मृतिविषयतां प्राप्त इति यावत्, शृङ्गारः,—ईर्ष्यामानाख्यविप्रलम्भः, अङ्गमिति अनुषङ्गेणान्वयः; स्मर्यमाणपूर्वावस्थायाः रतेः करुणस्थायिभावः स्त्रीशोकोद्दीपकतया अङ्गत्वमिति भावः।

शृङ्गारयोर्भगवदुत्साहपरिपुष्टतद्विषयरतिभावास्वादप्रकर्षैकतया यौगपद्यसद्भावादङ्गत्वेन न विरोधः। (घ)

ननु समूहालम्बनात्मकपूर्णघनानन्दस्वरूपस्य रसस्य तादृशेनेतररसेन कथं विरोधः सम्भावनीयः? एकवाक्ये निवेशप्रादुर्भावयौगपद्यविरहेण परस्परोपमर्दकत्वानुपपत्तेः। नाप्यङ्गाङ्गिभावः; द्वयोरपि पूर्णतया स्वातन्त्र्येण विश्रान्तेः। सत्यमुक्तम्। अत एव अत्र प्रधानेतरेषु रसेषु स्वातन्त्र्यविश्राम-

(घ) ननु अत्र स्त्रीशौकस्य बाधेनानुभावेनानुक्ता, व्यञ्जनोद्दीपनविभावेन भटित्याक्षेपलक्षणेन, स्त्रियमाक्षिपत्यालम्बनविभावेन परिपुष्टिरिति कथमस्य प्रधानत्वमेव, कथमङ्गत्वम्? इत्याशङ्क्याह, एवञ्चेति।—अनया रीत्या इत्यर्थः, अविमृश्यविधानतया—विश्रान्तस्य अनास्वादनतया, साक्षाद्रसवाक्यव्यङ्गतया इत्यर्थः, कथमस्य, अङ्गित्वोऽपीति शेषः, अङ्गतैव—अप्रधान्यमेव। एवं पदैः सकलपदार्थोपस्थितौ खले कपोतन्यायेन विशेष्यविशेषणं, तत्रापि विशेषणान्तरमिति रीत्या शाब्दबोधे सति व्यङ्ग्योऽपीयं रीतिरिति भावः। भगवदुत्साहस्यात्र कथमस्यापि शृङ्गारो व्यञ्जनया एकदेशाङ्गितया अवगम्यते इत्युक्त्या अवान्तरवाक्यार्थबोधक्रमेण शाब्दबोधपक्षे व्यङ्ग्यार्थबोधस्यापि तद्रीतित्वेन विशिष्टवैशिष्ट्यमिति रीत्या शृङ्गारविशिष्टकरुणबोधे सति करुणविशिष्टभगवदुत्साहबोधः, तदनन्तरं भगवदुत्साहविशिष्टभावबोधः क्रमाज्जायते इति मतेन परम्परया प्रधानोपकारमुपपादयति,—द्वयोरपीति। करुणशृङ्गारयोरिति।—अपरिपुष्टतया इति प्रधानस्य भूयस्युपकारे वर्त्तते इति ग्रहणमते स्वपरिपोषकं परिपोषकमात्रं प्रधानस्योपकारः; द्वितीये तु—निरङ्कुशमेव आस्वादातिशयजननमपीति विशेषः; आस्वादप्रकर्षैकतया इति।—"गुणः कृतात्मसंस्कारः प्रधानं प्रतिपद्यते। स्वोपकारे प्रधानस्य तथा भूयसि वर्त्तते॥" इति न्यायेन इति भावः। (अस्यार्थः,—गुणः,—विशेषणं, कृतात्मसंस्कारः,—स्वविशेषणेन कृतोपकारः, प्रधानं—पार्श्वान्तरविशेष्यं, प्रतिपद्यते—अन्वेति) यौगपद्यसद्भावात्—समकालसत्तावेशात्, (अपरिमाणाधर्त्तव्यः) "स्वाविभावानामङ्गाङ्गिभावेनैव रसानामङ्गाङ्गिभावः" इति साध्यशङ्काशयकारः। यद्वा—यावां पूर्वं प्राधेयराः रसधारणादिना प्रसादनपरा यावत् तावानेवेदानीं मधुरस्वस्वभावेनैव तादृशीं दुर्दशां जनयति इति शृङ्गारेण परिपोषितः करुणरसश्च एव स्वजन्यजनवदुत्साहविषयीकाशाद्धेतोः करुणतां भगवद्विषयां रतिं जनयित्वा तामेव यावान्निरवधिकमाह्लादसन्दोहमनुपनयतीति रसवीरैवाङ्गत्वम्।

राहित्यात् पूर्णरसभावमात्राच्च विलक्षणतया सञ्चारिरसनाम्ना व्यपदेशः प्राच्यानाम्। अस्मत्पितामहानुजकविपण्डितमुख्य-श्रीचण्डीदासपादानान्तु खण्डरसनाम्ना, (न) यदाहुः,—

"अङ्गं बाध्योऽथ संसर्गी यद्यङ्गी स्याद्रसान्तरे।
नास्वाद्यते समग्रं तत्ततः खण्डरसः स्मृतः इति॥" (प)

(न) एतन्मते प्रद्वेषमाह, नन्विति।—समूहः,—विभावादिसमष्टिरित्यर्थः, आलम्बनम्—आश्रयः, यस्य तदात्मकः,—विभावादिपदार्थसमूहविषयकज्ञानरूप इत्यर्थः, यः पूर्णः,—समधिकः, घनः,—सुखान्तरतिरोधायकः, आनन्दः, स एव स्वरूपं यस्य तथाभूतस्य। तादृशेन—समूहालम्बनात्मकपूर्णघनानन्दस्वरूपेण, इतरेण—अपरेण, रसेन। एकवाक्ये इति।—निवेशः,—स्थितिः, प्रादुर्भावः,—उद्भवः, तथा यौगपद्य—समकालिकत्वं, तेषां विरहेण—अभावेन, यतो द्वौ नैकत्र तिष्ठतः, नोद्भवतः, नापि समकालिकौ स्त इति भावः। अन्यथाऽपि केचित् व्याख्यानयन्ति; तद्यथा—एकस्मिन् वाक्ये यो निवेशः,—व्यञ्जकतासम्बन्धेन वृत्तिः, स च प्रादुर्भावयौगपद्यञ्च तयोर्विरहेण इत्यर्थः; यद्वा—एकवाक्यार्थग्रहेण यौ प्रादुर्भावौ—उत्पत्ती, तयोः यौगपद्यविरहेण—एककालीनत्वविरहेण, परस्परस्य—अन्योऽन्यस्य, उपमर्दकत्वानुपपत्तेः,—परस्परपरिपोषकव्याघातकत्वासम्भवादित्यर्थः। "राममन्मथशरेण" इत्यादौ बीभत्स-शृङ्गारयोः न युगपदुत्पत्ती, किन्तु अभिधेयबोधानन्तरं बीभत्सस्य, व्यङ्ग्यबोधानन्तरं शृङ्गारस्य इति क्रमेण एवेति नानुपपत्तिः। नापि, रसयोरपीति शेषः, अङ्गाङ्गिभावः,—गुणप्रधानभावः। अत एव—उक्तनिर्वाहादेव, प्रधानेतरेषु—अङ्गेषु इत्यर्थः। स्वातन्त्र्येण—स्वाधीनतया इत्यर्थः। पूर्णरसभावमात्राच्च—पूर्णरसत्वमात्रात्, विलक्षण-तया—विभिन्नतया, सञ्चारिरसनाम्ना व्यपदेशः,—कीर्त्तनं, प्राच्यानां—पूर्वपण्डितानां, पूर्वाचार्य्या हि तादृशमङ्गं रसं सञ्चारिणं (व्यभिचारिभावमित्यर्थः) कथयन्तीति भावः। खण्डरसेति।—अपरिपुष्टस्थायिभावत्वेन भावत्वमभिप्रेत्य प्रधानत्वाभावात् विलक्षणभावप्रदर्शनं खण्डरसनाम्ना व्यपदेशः इति बोध्यम्।

(प) अङ्गमिति।—अङ्गी—रसः, यदि रसान्तरे—अन्यस्मिन् रसे, अङ्गम्—अप्रधानम्, अथ—वा, बाध्यः,—विरुद्धस्मरणादिना बाधितोऽपि विरोधपरिहारात् लब्धसमावेशः, यद्वा—विरुद्धोऽपि स्मरणादिबलात् लब्धसमावेशः, यदि वा संसर्गी—अविरोधी, प्रधानानुपकारितया स्वातन्त्र्येण संसृष्टः, स्यात्, तत्—तदा, समग्रं—सम्यक् यथा तथा, नास्वाद्यते—न आस्वादं प्रतिनीयते, ततः सः खण्डरसः स्मृतः,—कथितः।

ननु "आद्यः करुणबीभत्सरौद्रवीरभयानकैः" इत्युक्तनयेन विरोधिनोर्वीरशृङ्गारयोः कथमेकत्र (फ)—

"कपोले जानक्याः करिकलभदन्तद्युतिमुषि
स्मरस्मेरस्फारोड्डमरपुलकं वक्त्रकमलम्।
मुहुः पश्यन् शृण्वन् रजनिचरसेनाकलकलं
जटाजूटग्रन्थिं द्रढ़यति रघूणां परिवृढ़ः॥" (ब)

इत्यादौ समावेशः? अत्रोच्यते—इह खलु रसानां विरोधि-

(फ) ननु स्मरणादावेव विरुद्धयोः समावेशः प्रतिप्रसूतः, तदभावात् कथं वक्ष्यमाणे "कपोले" इत्यादौ विरुद्धयोः वीरशृङ्गारयोः समावेशः? इत्यभिप्रायेणाह—नन्विति। एकत्रेति।—"समावेशः" इत्यग्रेणान्वयः।

(ब) कपोले इति—रघूणां परिवृढ़ः,—प्रभुः, रामः इत्यर्थः, [परिपूर्वकस्य वृहः वृन्हः वा निष्ठायां "प्रभौ परिवृढ़ः" (७।२।२१ पा०) इति निपातः] करिकलभस्य—हस्तिशावकस्य, यः दन्तः, तस्य द्युतिं—कान्तिं, मुष्णाति—हरतीति तथोक्ते, अतिस्वच्छे इत्यर्थः, जानक्याः,—सीतायाः, कपोले—गण्डे, [अवच्छेदे सप्तमी] गण्डावच्छेदे इत्यर्थः, (कपोलस्य किञ्चित् पाण्डुत्वेन विमलत्वेन वा करिकलभदन्तोपमा बोध्या) स्मरेण—कामोद्रेकेण, स्मेरः,—विकसन्, [स्मेरस्तु "नमिकम्पिस्म्यजस—" (३।२।१६७ पा०) इति सूत्रेण अत्र ताच्छील्ये रः] स्फारोड्डमरः [स्फूर्य्यते इति भावे घञ्। "स्फुरति-स्फुलत्योर्घञि" (६।१।४७ पा०) इति ओकारस्य आत्वम्] इति स्फारः,—स्फोरणं, स्फूर्त्तिरिति यावत्, तेन उड्डमरः,—विकसितः इत्यर्थः, अत्युद्भटः इति यावत्, पुलकः,—लोमाञ्चः यत्र तादृशं, वक्त्रकमलं—वदनपङ्कजं, पश्यन्, मनसेति शेषः, तथा रजनीचराणां—राक्षसानां, याः सेनास्तासां कलकलं—सिंहनादमित्यर्थः, मुहुः शृण्वन्—आकर्णयन्, [उभयत्र "लक्षणहेत्वोः क्रियायाः" (३।२।१२६ पा०) इति फले शतृप्रत्ययः] जटाजूटग्रन्थिं—द्रढ़यति—दृढ़ं करोति, युद्धार्थमिति भावः। [दृढ़शब्दात् तत्करोति इत्यर्थे णिचि इष्ठवद्भावे "पृथुमृद्व—" इति वार्त्तिकात् ऋकारस्य रत्वम्]। अत्र वीरः शृङ्गारश्च विरोधिनौ स्थितौ। तथा हि वीरस्यात्र रजनीचरसेना आलम्बनविभावः, तदीयकलकलस्वनः उद्दीपनं, जटाजूटग्रन्थनम् अनुभावः। वीरस्य निराकाङ्क्षवाक्यव्यङ्ग्यतया प्रधानत्वम्। शृङ्गारस्य तु जानकी आलम्बनं, तस्याः कपोले पुलकाङ्कितत्वम् उद्दीपनविभावः, तन्मुखकमलावलोकनमनुभावेन बोद्धव्यम्। शिखरिणी वृत्तम्।

ताया अविरोधितायाश्च त्रिधा व्यवस्था। कयोश्चिदालम्बनैक्येन, कयोश्चिदाश्रयैक्येन, कयोश्चिन्नैरन्तर्य्येण इति। तत्र वीरशृङ्गारयोरालम्बनैक्येन विरोधः, तथा हास्यरौद्रबीभत्सैः सम्भोगस्य, वीरकरुणरौद्रादिभिर्विप्रलम्भस्य, आलम्बनैक्येन आश्रयैक्येन च वीरभयानकयोः, नैरन्तर्य्यविभावैक्याभ्यां शान्तशृङ्गारयोः; त्रिधाऽपि अविरोधो वीरस्याद्भुतरौद्राभ्यां, शृङ्गारस्याद्भुतेन, भयानकस्य बीभत्सेनेति। तेनात्र वीरशृङ्गारयोर्भिन्नालम्बनत्वान्न विरोधः।

एवञ्च वीरस्य नायकनिष्ठत्वेन, भयानकस्य प्रतिनायकनिष्ठत्वेन निबद्धे भिन्नाश्रयत्वेन विरोधः। यत्र नागानन्दे प्रशमाश्रयस्यापि जीमूतवाहनस्य मलयवत्यनुरागो दर्शितः, तत्र "अहो! गीतमहो! वादित्रम्" इति अद्भुतस्यान्तरानिवेशनान्नैरन्तर्य्याभावान्न शान्तशृङ्गारयोर्विरोधः। एवमन्यदपि विज्ञेयम्। "पाण्डु च्छायं वदनम्" इत्यादौ च पाण्डुतादीनामङ्गभावः करुणविप्रलम्भेऽपीति न विरोधः। (भ)

(भ) स्मरणादौ आलम्बनाश्रयभेदेनैरन्तर्य्याभावेऽपि विरोधिनीरेकस्मिन् समावेश इति समाधत्ते, इष्टेति।—त्रिधा—त्रिविधा, व्यवस्था—स्थितिः, नियम इति यावत्। आश्रयैक्येन—नायकैक्येन, नैरन्तर्य्येण—अव्यवधानेन, शान्तशृङ्गारयोर्विरोध इत्यन्वयः। अत्र विशिष्य दर्शयति, तत्रेति।—वीरशृङ्गारयोः,—वीरसम्भोगयोः। तथा—आलम्बनैक्येन, हास्यरौद्रबीभत्सैः सम्भोगस्य, विरोधः इत्यन्वयः। एवं वीरकरुणेत्यादावपि बोध्यम्। त्रिभेति।—त्रिप्रकारेण, आलम्बनैक्येन, आश्रयैक्येन, नैरन्तर्य्येण चेत्यर्थः, वीरस्य अद्भुतरौद्राभ्यां सह अविरोधः, एवं शृङ्गारस्य अद्भुतेन, भयानकस्य बीभत्सेन तु नैरन्तर्य्यमात्रेण अविरोधः ज्ञेयः। वीरशृङ्गारयोरालम्बनभेदेन अविरोधं दर्शयति, तेनेति।—उक्तनियमेनेत्यर्थः। अत्र—"अपीति"—इत्यत्र, वीरशृङ्गारयोः भिन्नालम्बनत्वात्—वीरस्य आलम्बनं रत्नशेखरसेना, शृङ्गारस्य आलम्बनं नायकः इत्येवम् आलम्बनभेदादिति भावः। भिन्नाश्रयत्वेनेति।—उक्तोदाहरणे प्रतिनायकविषयत्वेन नायकैक्येन निबद्धे भिन्नालम्बनत्वेन अविरोधः ज्ञेयः। प्रशमाश्रयस्य—शान्तरसाश्रयस्य। अद्भुतस्य—तदाख्यरसस्य, अन्तरानिवेशात्—मध्यप्रविवेशात्, नैरन्तर्य्याभावात्—अव्यवधानेनाप्रविवेशात्। विप्रलम्भस्य विभावादिपरिपुष्टत्वात्,

अनुकारे च सर्वेषां दोषाणां नैव दोषता॥६२२॥(म)

सर्वेषां—दुःश्रवत्वप्रभृतीनाम्। यथा—"एष दुश्रावनं नोमीत्यादि जल्पति कश्चन।" अत्र दुश्रावनशब्दोऽप्रयुक्तः। (य)

अन्येषामपि दोषाणामित्थौचित्यान्मनीषिभिः।
अदोषता च गुणता ज्ञेया चानुभयात्मता॥६२३॥(र)

अनुभयात्मता—अदोषगुणात्मता।

इति श्रीमन्नारायणचरणारविन्दमधुव्रतसाहित्याचार्यवर्यश्रीमद्राधवनपरमाचार्य-
कविसूक्तिरत्नाकराष्टादशभाषाविचक्षणसाहित्यविद्यासिंहासनाधिरूढ-
श्रीविश्वनाथकविराजकृतौ साहित्यदर्पणे दोषनिरूपणो नाम
दशमः परिच्छेदः॥ १०॥

दोषत्वं दर्शयति, पाण्डु इति।—पाण्डुतादीनां—अवयवसाक्षात्सम्बन्धिनामिति भावः, एतेन विद्वद्रसोद्बोधसाधारण्यात्र परिपन्थ एव दोषः, न तु साधारण्यात्रेति भावः।

(म) अनुकारे चेति।—अनुकारे—अनुकरणे, परोक्षवाक्यश्रवणे इत्यर्थः। अनुकरणे दुःश्रवत्वस्य अदोषत्वं यथा,—"यत्तच्चयनशब्दाद्यौचित्यादि अवयवयन"। शब्दस्यानुकरणे श्रुतसंस्कारस्यादोषत्वं यथा—"पश्येव च गत्वाह सुत्रामाणं यजेति च॥" अत्र प्रथमपादे गोशब्दस्य निर्विभक्तिकतया श्रुतसंस्कारत्वम्; द्वितीयपादे सुत्रामशब्दोऽप्रयुक्तो न दोषः।

(य) उदाहरति, एष इति।—दुश्रावनः,—इन्द्रः। अत्रेति।—अप्रयुक्तः, न दोष इति शेषः।

(र) अन्येषामिति।—इति—इत्थम्, औचित्यात् हेतोः मनीषिभिः,—विद्वद्भिः, अन्येषामपि दोषाणाम् अदोषता, गुणता, तथा अनुभयात्मता—अदोषत्वं गुणत्वञ्च इत्यर्थः। अदोषगुणात्मता—अदोषात्मत्वं गुणात्मत्वञ्च रसादीनिबन्धप्रबन्धयोरुत्कर्षाभावात् उभयरूपम्।

इतिश्रीमन्नारायणचरणारविन्दमधुव्रतसाहित्याचार्यवर्यश्रीमद्राधवनपरमाचार्येण विरचितायां, तदात्मजाभ्यां पण्डितश्रीमद्रामयोधविद्याभूषण-पण्डितश्रीमल्लिङ्गयोधविद्यारत्नाभ्यां
प्रतिसंस्कृतायां विमलाख्यायां साहित्यदर्पणव्याख्यायां
दशमः परिच्छेदः॥ १०॥

अष्टमः परिच्छेदः ।

गुणानाह, (क)—

रसस्याङ्गित्वमाप्तस्य धर्माः शौर्यादयो यथा ।
गुणाः ॥ ६२४ ॥ (ख)

यथा खल्वङ्गित्वमाप्तस्यात्मन उत्कर्षहेतुत्वात् शौर्यादयो गुणशब्दवाच्याः, तथा काव्ये अङ्गित्वमाप्तस्य रसस्य धर्माः स्वरूपविशेषाः माधुर्यादयोऽपि । समर्पकपदसन्दर्भश्च काव्यव्यपदेशभाक्त्वौपयिकानुगुण्यभाज इत्यर्थः । यथा चैषां रसमात्रस्य धर्मत्वं, तथा दर्शितमेव । (ग)

(क) काव्यस्वरूपकारिकोद्देशक्रमप्राप्तान् गुणान् निरूपयति—गुणानिति ।

(ख) रसस्येति ।—अङ्गित्वं—अप्रधानत्वमिति यावत्, आप्तस्य—प्राप्तस्य, यथा शौर्यादयः, तथा ये इति शेषः, रसस्य धर्माः, ("रसस्य" इत्यनेन काव्यशरीरस्य शब्दार्थयोः व्यवच्छेदः) ते इति शेषः, गुणाः । अयं भावः,—यथा शरीरे शरीरिणो धर्माः शौर्यौदार्यादयः, [आदिपदेन धैर्यादाक्षिण्यादीनां ग्रहणम्] तथा ये काव्ये रसस्य धर्मास्ते गुणाः । धर्माश्च नामद्वारा इव इत्यमी यावद्रसं व्याप्तिनो ज्ञेयाः । अत एवोक्तं प्रकाशकृता—"ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः । उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः ॥" इति ।

(ग) निदर्शनं यथासम्भवं दृष्टान्तदार्ष्टान्तयोर्व्याख्यायते, यथेत्यादिना ।—यथा खलु, लोके इति शेषः, अङ्गित्वं—अप्रधानत्वं, विभावादयरसमुदाययोगेन पूर्वत्वमिति यावत्, ("अङ्गं गात्रे प्रतीकोपाययोः पुंसि भूम्नि नपुंसकम् । क्लीबं त्रिकलत्रे लिङ्गकरणे चाभिधेयवत् ॥" इति मेदिनी) आप्तस्य आत्मनः उत्कर्षहेतुत्वात्—उत्कर्षाधायकत्वात्, शौर्यादयः,—शौर्यौदार्यादयो धर्माः, गुणशब्दवाच्याः,—गुणा इत्युच्यन्ते, तथा काव्ये—अभिव्यक्तौ, अङ्गित्वं—विभावादयरसमुदाययोगेन पूर्वत्वम्, आप्तस्य रसस्य धर्माः स्वरूपविशेषाः,—उत्कर्षाधायकतया अचलावस्थितितया च स्वरूपविशेष-

माधुर्य्यमोजोऽथ प्रसाद इति ते त्रिधा ॥६२५॥ (घ)

ते—गुणाः।

रूपेणावस्थिताः, माधुर्यादयोऽपि, गुणशब्दवाच्या इत्यन्ये:। एतेन खण्डरसे माधुर्यादीनामन्वतमस्य काव्यव्यापकतया तत्कर्षहेतुत्वात् गुणव्यवहारौपयिकं धर्मान्तरमाह, खण्डमपेक्षेति।—खम्—आत्मानं, रसमिति यावत, खण्डयन्ति—खण्डयोधयन्तीति खण्डयंकाणि यानि पदानि तेषां सन्दर्भस्तस्य तथाभूतस्य, काव्यव्यपदेश्यस्य—काव्यपदवाच्यस्य, औपयिकम्—उपयोगि, यदात्मगुणम्—आत्मोत्कर्षं, तद्वनतीति तथोक्ताः, भवन्तीति शेषः, अत एवां गुणशब्दवाच्यत्वमिति भावः। एतच्च गुणालङ्कारसंस्कृतयोः शब्दार्थयोः काव्यशब्दोऽयं वर्त्तते इति प्राचीनमतानुसारेणोक्तम्; खण्डते तु—रसवत्त्वमेव काव्यव्यवहारौपयिकं, न तु गुणत्वम्। अतः—रसवत्त्वं काव्यलक्षणम्; व्यवहारबीजन्तु गुणालङ्कारसंस्कृतशब्दार्थत्वमेवेति खण्डतेनेवेदमुक्तम्; एवञ्च काव्यव्यवहारप्रयोजकत्वे सति रसधर्मत्वं गुणलक्षणम्; रसत्वादित्याद्यर्थं खण्डनम्, अलङ्कारव्यावृत्त्यर्थं विशेषणम्। ननु गुणानां शब्दार्थधर्मत्वं प्राचीनोक्तं, भवता तु कथं रसधर्मत्वमुच्यते? इत्यत आह, यथा चेति।—एषां—गुणानां, मार्गपदेन शब्दार्थयोर्व्यवच्छेदः। दर्शितं—दर्शयिष्यमाणम्। माधुर्य्यादिस्वरूपनिरूपणेनैव चैषां रसधर्मत्वं व्यक्तीभविष्यति इति भावः।

(घ) गुणान् विभजते, माधुर्य्यमिति।—खण्डनम्। वासनामुख्यस्तु ओजआदीनां गुणानां दशविधत्वं प्रतिपादयामासुः, यथा हि—"पदन्यासस्य गाढत्वं वदन्त्योजः कवीश्वराः। अनेनाश्लिष्टिताः प्रायः शब्दाः ओजस्विनस्तथा॥ श्रवणौजसा मिश्रं प्रसादश्च प्रचक्षते। अनेन न विना सत्यं खण्डते काव्यपद्धतिः॥ अनेकपदवन्यासः पदानां मृदुसानपि। अनालक्षितसन्धीनां स श्लेषः परमो गुणः॥ प्रतिपादं प्रतिश्लोकमेकनार्गपरिग्रहः। दुर्लभो दुर्विभावश्च समतेति मतो गुणः॥ चारीकृत्यचरीकृत्य कर्णेन यतयो हि यत्। रसाधिनाथ स गुणस्तेन पूता सरस्वती॥ मन्ये पृथक्पदत्वञ्च माधुर्यमुदितं बुधैः। अनेन हि पदन्यासाः कार्य्या मधुमृतः॥ यथा हि च्छिद्यते रेखा चतुरं चित्रपण्डितैः। तद्वेव वाग्मि प्राज्ञैः समरूपगुणस्थिता॥ मन्यन्ताजठरत्वञ्च सौकुमार्यमुदाहृतम्। अनेन वर्जिता वाचो रूक्षत्वाद्य सूतिकलाः॥ विस्पष्टत्वञ्च वन्यञ्च व्यञ्जयन्ति सुदारताम्। वैचित्र्यं न प्रपद्यन्ते यथा मूर्खाः पदक्रमाः॥ पुराविव गतिर्यांचः पुरस्तादिव वस्तुनः। यस्मार्थव्यक्तिहेतुत्वात् सौऽर्थव्यक्तिः स्मृतो गुणः॥ सौक्ष्म्यं श्लक्ष्णमिति प्राहुर्गुणं गुणविचारदाः। पुराणपित्तकाणीव तेन तस्य क्रियैव सः॥

इति। चतुर्दशभेदभिन्नास्तु तान् चतुर्विंशतिप्रकारानाहुः, तद्यथा—"श्लेषः प्रसादः समता माधुर्यं सुकुमारता। अर्थव्यक्तिरुदारत्वमोजःकान्तिसमाधयः॥ श्लेषोऽनेकक्रियाभेदं वैचित्र्यमपि तद्गुणाः। तदर्थं समासाः सौक्ष्म्यं च गाम्भीर्यमथ विस्तरः॥ सङ्क्षेपः सन्निधानं च भाविकत्वं प्रतिष्ठया। रीतिरुक्तिश्च तद्वच्च गौडिरित्येषां चतुष्टये॥" इति। एतेषु दश वामनादिसम्मताः पूर्वं लक्षिता एव इति नात्र पुनर्निर्दिश्यन्ते, अवशिष्टास्तु व्याख्यायन्ते; तथा हि—सार्थव्यक्तिविशेषविशिष्टत्वम् उदारता; निबिड-बन्धनत्वम् ओजस्त्वम्; निरर्थकपरित्यागवाक्ये तत्समर्थनतया मधुरवचनविन्यासः प्रेयः; सुबन्तानां तिङन्तानाञ्च व्युत्पत्तिः सुश्लिष्टता; यथा—"तव जीवनिरस्तु मातरव मा जीवन्तु मा जीवतो भूयादाऽजननेः किमत्र! जननी जनयोर्वृथा जीवितः। यस्त्वामेव न वन्दते न यजते नोपैति नानीक्षते नोपस्तौति न मन्यते न मनुते नाध्येति न ध्यायति॥" इह जीवनयजनवन्दिसुबन्तपदानां,तथा वन्दते यजते प्रभृतितिङन्तपदानाञ्च व्युत्पादनं सुश्लिष्टतायाश्चकम्। पदानामाभ्यन्तरीणनिगूढाभिप्रायवत्त्वं सौक्ष्म्यम्; यथा —"केवलं दधति कर्तृवाचिनः प्रत्ययानिह न जातु कर्मणि। धातवः सुकृतिनं सृजन्त्यमी सौतिरत्र विपरीतकारकः॥" इह प्रथमनामनमेव प्रतीतस्य अर्थस्य सुबन्तादिशब्दानामन्तर्निगूढार्थरूपेण सूक्ष्मत्वेन सौक्ष्म्यम्। व्यङ्ग्यार्थस्योत्कृष्टत्वं गाम्भीर्यम्; यथा—"मौनी धारय पुष्करीजननितं तत्तावनो विक्रमं चक्राङ्गं वह पादयुग्मनवनीं दोष्णा समभ्युद्धर। अस्त्रीं मुनिकटे निवेशय भव ज्यायान्दिनौकस्यतेर्विश्वात्मन्नरणैकवीर! तदपि श्लाघी हरिः खलसि॥" अत्र व्यञ्जनया हत्वा नाभ्यवच्छेदेन पुष्करीद्धारकम्, अमितबलग्राहित्वं, करावच्छेदेन चक्रधारित्वं, दंष्ट्राघातेन भूविदारकं, चक्षुराऽक्षुतोरःस्थलम्, उपेन्द्रत्वञ्च बोध्यते इति गाम्भीर्यम्। विस्तरूपेण वाक्यविन्यासः विस्तरः; घनसन्निवेशः पदैः अभिधेयार्थप्रतिपादनं सङ्क्षेपः; यथा हि—"स मावतिसमानीत-सप्तोदधिघृतघ्वजः। सङ्क्रान्तीर्णां पुनश्चक्रे विधातापार्थ्यं भरैः॥" अत्र प्रस्तुतस्य युद्धवर्णनप्रसङ्गस्य अवान्तरवाक्यविस्तारेण विच्छेदे रसभङ्गभिया अतिविस्तरतोऽपि प्रतिपाद्यस्य पादद्वयेनैव समापनात् सङ्क्षेपस्यचमत्कृतिः। अर्थसन्निधानपदत्वं सन्निधानम्; यथा—"कैश्चिदस्तुनि नो वाचि कैश्चिदाचि न वस्तुनि। वाचि वस्तुनि चाप्यन्ये नान्ये वाचि न वस्तुनि॥" इह पदपदार्थयोः तुल्यातुल्यपदार्थवत् समत्वेन सन्निधानम्; भावेन वाक्यस्य अभिव्यक्तिर्भाविकम्; गतिर्नाम आरोहावरोहयोः क्रमः; यथा—"वराहः कल्पादौ सलिलमवगाह्योद्धतवतीत्यवान्तं क्रमविदुदभ्युद्धृतिमिषा। निशः सम्भूयाम्भःप्लवनपटुभिर्लोकपटलैरनायत्तं दंष्ट्राग्रिखरमधिरूढेति वसुधा॥" अत्र पूर्वार्द्धेऽवरोहः क्रमेण, परार्द्धे च क्रमेण

तत्र—

चित्तद्रवीभावमयो ह्लादो माधुर्य्यमुच्यते॥६२६॥ (ङ)

यत्तु केनचिदुक्तं "माधुर्य्यं द्रुतिकारणम्" इति, तन्न; द्रवीभावस्य आस्वादस्वरूपाह्लादाभिन्नत्वेन तत्कार्य्यत्वाभावात्। द्रवीभावश्च स्वाभाविकानाविष्टत्वात्मककाठिन्यमन्युक्रोधादिकृतदीप्तत्वविस्मयहासाद्युपहितविक्षेपपरित्यागेन रत्याद्याकारानुविद्धानन्दोद्बोधेन सहृदयचित्तार्द्रप्रायत्वम्। तच्च (च)—

गतिर्वेदितव्या। प्रक्रान्तस्य परिरक्षणं रीतिः। विशेषप्रकारेण अभिधानम् उक्तिः, यथा—"कुशलं तस्याः? जीवति कुशलं पृच्छामि जीवतीत्युक्तम्। पुनरपि तदेव कथयसि? मृतां नु कथयामि या श्वसिति?"॥ क्षेमप्रश्ने तस्यैव सत्त्वमसत्त्वं वा उत्तरयितुमुचितं, तदनुक्त्वा उक्तिचातुर्य्येण जीवितमात्रशेषत्वप्रतिपादनात् अयमुक्तेर्विषयः। उक्तेः प्रौढ़ः परिपाकः प्रौढ़िः स्यात्, यथा—"अभ्युद्धृता वसुमती दलितं रिपूरः क्षिप्तक्रमा कवलिता बलिराज्यलक्ष्मीः। अत्रैकजन्मनि कृतं यदनेन यूना जन्मत्रये तदकरोत् पुरुषः पुराणः॥" इति सङ्क्षेपः।

(ङ) माधुर्य्यमाह, चित्तेति।—चित्तस्य—मनसः, द्रवीभावमयः,—द्रवभावस्वरूप इत्यर्थः, [स्वार्थे मयट्] ह्लादः,—आनन्दविशेषः, माधुर्य्यम् उच्यते। "आह्लादकत्वं माधुर्य्यं शृङ्गारे द्रुतिकारणम्" इति काव्यप्रकाशः। (शृङ्गारादिषु अनुभवसिद्धमेव आह्लादजनकत्वं, तदेव माधुर्य्यम्। तस्योत्कर्षाधायकत्वमाह—द्रुतिकारणमिति)।

(च) तन्मतं दूषयति, यत् त्विति। आस्वादस्वरूपः यः आह्लादः तस्मात् अभिन्नत्वेन—अभेदेन, तस्य—माधुर्य्यस्य, कार्य्यत्वाभावात्—माधुर्य्यजन्यत्वासम्भवात्। आह्लादातिरिक्तस्य द्रवीभावस्य निर्वक्तुमशक्यतया आह्लाद एव पर्य्यवसानम्; एवमाह्लादजनकत्वापेक्षया लघुन आह्लादस्यैव माधुर्य्यपदशक्यताऽवच्छेदकत्वमुचितम् इत्याह्लाद एव माधुर्य्यपदार्थ इति भावः। ननु द्रवीभावस्तावदाह्लाद एव भवता उच्यते, तस्य रसाभिन्नतया रसधर्मत्वं नोपपद्यते इत्यत आह—द्रवीभाव इति। काठिन्यादिपरित्यागस्य रसोद्बोधहेतुत्वं दर्शयति, स्वाभाविकेति।—स्वाभाविकं—सहजं, यत् अनाविष्टत्वात्मकम्—अमनोयोगितारूपं, काठिन्यं—दुर्बोधत्वं, तथा मन्युः,—शोकः, क्रोधः,—कोपः, [आदिपदेन मोहादीनां परिग्रहः] तैः कृतं—जनितं, यत् वं—मनसो ज्वलितत्वं, दग्धप्रायत्वमिति यावत्, विस्मयः,—चकितता, हासः,—

सम्भोगे करुणे विप्रलम्भे शान्तेऽधिकं क्रमात् ।६२७।(छ)

सम्भोगादिशब्दा उपलक्षणानि, तेन सम्भोगाभासादिषु अप्येतस्य (ज) स्थितिर्ज्ञेया।

यथा—

मूर्द्ध्नि वर्गान्त्यवर्णेन युक्ताष्टठडढान् विना।
रणौ लघू च तद्व्यक्तौ वर्णाः कारणतां गताः॥

अबोधपूर्वं हास्यम्, [आदिपदेन अवज्ञादीनां ग्रहणं] तैः उपहितः,—उत्पादितः, यः विक्षेपः,—आवरणम्, आस्वादप्रतिरोध इत्यर्थः, तस्य परित्यागेन—वर्जनेन, रत्यादीनाम् [आदिपदेन शोकप्रशमयोः परिग्रहः] आकारेण—परिणत्या, परिपोषेणेत्यर्थः, अनुविद्धस्य—संवलितस्य, आनन्दस्य उद्बोधेन—आविर्भावेण, सहृदयानां—सामाजिकानां, चित्तस्य आर्द्रप्रायत्वं—प्रायेण आर्द्रीभावः, गलितत्वमिति यावत्। एवञ्च शृङ्गारकरुणशान्तरसोद्बोधानन्तरं जायमानो रत्याद्यविषयः सहृदयचित्तद्रवीभावरूपकेवलानन्दसन्दोहानुभवो माधुर्य्यं, तस्य जनकतासम्बन्धेन रससम्बन्धितया रसधर्मत्वमज्ञातमेवेति भावः। केचित्तु—"रतिशोकप्रशमेषु गुर्जर्य्यादिरागवृत्तिरिव कश्चिदेको धर्मः अस्ति, स एव माधुर्य्यं, येन सामाजिकानां चित्तं द्रवीभवति, रत्यादीनां रसरूपतया परिणामेन तस्य रसवृत्तित्वम्" इति वदन्ति; तन्न, तत्र तादृशधर्मसत्त्वे मानाभावात्। न च द्रुतिरूपकार्य्यान्यथाऽनुपपत्त्या तत् कल्पनमिति वाच्यं, तस्य रसस्वभावेनैव सिद्धत्वात्, तदर्थं धर्मान्तरकल्पनाऽनौचित्यात्, गुर्जर्य्यादौ तु प्रत्यक्षसिद्ध एव तादृशधर्मः। अन्ये तु—"सुश्रवत्वमेव माधुर्य्यं काव्यधर्मः" इत्याहुः, तन्न, असुश्रवत्वेऽपि काव्ये माधुर्य्यस्योपलम्भात्। तच्चेति।—माधुर्य्यञ्च इत्यर्थः।

(छ) माधुर्य्यविषयानाह, सम्भोगे इति।—सम्भोगापेक्षया करुणे, करुणापेक्षया विप्रलम्भे, तदपेक्षया शान्ते, क्रमात्—उत्तरोत्तरम्, अधिकं—सातिशयमित्यर्थः। केचित्तु—"करुणे" इति विप्रलम्भविशेषणमाहुः, तन्न; "अश्रुपातादयस्तत्र द्रुतत्वात् चेतसो मताः" इत्यनेन करुणेऽपि चित्तद्रवीभावस्याङ्गीकारेण माधुर्य्यस्वीकारात्, "अपसारय घनसारम्—" इत्यादौ विप्रलम्भान्तरेऽपि माधुर्य्योपलम्भाच्च। अत एव प्रकाशकृताऽप्युक्तं—"शृङ्गारे" (अर्थात् सम्भोगे) इत्युक्त्वा "करुणे विप्रलम्भे तच्छान्ते चातिशयान्वितम्" इति।

(ज) एतस्य—माधुर्य्यस्य।

अवृत्तिरल्पवृत्तिर्वा मधुरा रचना तथा ॥६२८॥(झ)

यथा—

"अनङ्गमङ्गलभुवस्तदपाङ्गस्य भङ्गयः।
जनयन्ति मुहुर्यूनामन्तः सन्तापसन्ततिम् ॥" (ञ)

यथा वा मम-

"लताकुञ्जं गुञ्जन्मदवदलिपुञ्जं चपलयन्
समालिङ्गन्नङ्गं द्रुततरमनङ्गं प्रबलयन्।
मरुन्मन्दं मन्दं दलितमरविन्दं तरलयन्
रजोवृन्दं विन्दन् किरति मकरन्दं दिशि दिशि ॥" (ट)

(झ) माधुर्य्यव्यञ्जकानाह, मूर्द्ध्नीति।—मूर्द्ध्नि—शिरसि, वर्गाणां—कवर्गादीनाम्, अन्त्यवर्णेन—चरमवर्णेन, युक्ताः, कादयो मान्ता इत्यर्थः, वर्णाः, टठडढान् विना—टठडढानां मूर्द्ध्नि अन्त्यवर्णयोगेऽपि न माधुर्य्याभिव्यक्तिरिति भावः, लघू—वर्णान्तरयोगराहित्येन स्वल्पप्रयत्नोच्चार्य्यौ, विसर्गवर्णान्तरायुक्तौ अयुक्तान्तौ च इत्यर्थः, न तु गुरुविपरीतौ इति भावः, रणौ—रेफणकारौ, "स्वयं हाराकारा गलति जलधारा कुवलयात्" इत्यादौ, तथा—"अपसारय घनसारं कुरु हारं दूर एव किं कमलैः?" इत्यादौ च दीर्घानुस्वारयोगेन गुरोरपि रेफस्य माधुर्य्यव्यञ्जकत्वदर्शनात्; केचित्तु—"लघू ह्रस्वान्तौ" इत्याहुः, तन्न; "स्मरः स्वरः खलः कालः" इत्यादौ, तथा—"परस्परस्पर्द्धिवरः स्वयंवरः" इत्यादौ च रेफस्य ह्रस्वान्तत्वेन माधुर्य्यव्यञ्जकत्वापत्तेः, "पुरो रेवापारे गिरिरिति दुरारोहशिखरः" इत्यादौ ह्रस्वान्तत्वाभावेन माधुर्य्यव्यञ्जकत्वानुपपत्तेः। तद्व्यक्तौ—तस्य माधुर्य्यस्य, व्यक्तौ—व्यञ्जने, कारणतां गताः। तथा अवृत्तिः,—वृत्तिः समासः तद्रहिता, वा—अथवा, अल्पवृत्तिः,—अल्पसमासा, मधुरा—मनोहारिणी, रचना—पदसन्दर्भः, तद्व्यक्तौ कारणतां गता इति शेषः।

(ञ) उदाहरति, यथेति।—अनङ्गस्य—कामस्य, मङ्गलभुवः,—मङ्गलनिकेतनानि, तस्याः,—कान्तायाः, अपाङ्गस्य भङ्गयः,—नेत्रान्तकौटिल्यानि, मुहुः,—पुनः पुनः, यूनां—तरुणानाम्, अन्तः,—अन्तःकरणे, सन्तापसन्ततिं—सन्तापातिशयं, जनयन्ति—उत्पादयन्ति।

(ट) लतेति।—वसन्तवायुवर्णनमिदम्। मरुत्—पवनः, गुञ्जन्तः,—स्वनन्तः,

ओजश्चित्तस्य विस्तार-रूपं दीप्तत्वमुच्यते।
वीरबीभत्सरौद्रेषु क्रमेणाधिक्यमस्य तु ॥९२९॥ (ठ)

अस्य—ओजसः। अत्रापि वीरादिशब्दा उपलक्षणानि, तेन वीराभासादावप्यस्यावस्थितिः।

वर्गस्याद्यतृतीयाभ्यां युक्तौ वर्णौ तदन्तिमौ।
उपर्य्यधो द्वयोर्वा सरेफष्टठडढैः सह ॥

मटवतः,—मत्ताः, अलिपुष्पाः,—भ्रमरसमूहाः यस्मिन् तादृशं, लताकुञ्जं—लता-वेष्टितविहारस्थानम्, (अत्र लतापदं सुरभिपुष्पलतायोधकतया सार्थकम्) चपलयन्—कम्पयन्, अङ्गं—शरीरं, समालिङ्गन्—स्पृशन्, द्रुततरम्—अतिशीघ्रम्, अनङ्गं—कामं, प्रवर्धयन्—वर्द्धयन्, दलितं—विकसितम्, अरविन्दं—पद्मं, मन्दं मन्दं तरलयन्—कम्पयन्, रजोवृन्दं—परागपुञ्जं, विन्दन्—लभमानः सन्, दिशि दिशि सञ्चरन्दं—पुष्परसं, किरति—विक्षिपति। स्रिखरिणी वृत्तम्। अत्र प्रसङ्गसमेष अङ्गते: माधुर्य्यव्यञ्जकत्वं यथा—"मुद्रितानिन्दुनालोक्य पद्मिनीं पद्म सुन्दरि!। दत्त! जालस्य विच्छेदे मधुरोऽपि न रोचते॥" इति। सुकुमारार्थद्योतकरचनाया माधुर्य्यव्यञ्जकत्वं यथा—"उचितं गोपनमनयोः स्तनयोः कनकाद्रिधर्मतस्करयोः। अवमानितविधुमण्डलमुखमण्डलगोपनं किमिति?॥"

(ठ) ओजोगुणमाह, ओज इति।—चित्तस्य—मनसः, विस्तारस्वरूपं—विस्तार-स्वरूपं, दीप्तत्वं—विकाशविशेषः, उत्साहाद्यावारानुविद्धचमत्कारोद्रेकेण जायमान उत्साहादिविषयकचमत्कारोद्रेक इत्यर्थः, (केचित्—"दीप्तत्वं कटुवर्णव्यवसन्न-श्रोत्रदुःखसन्निभसुखविशेषः, स एव चित्तविस्तारः" इत्याहुः, तन्न; अनिष्टरागादिव्यापार-वत्त्वव्यञ्जमाने वीरादौ तदभावप्रसङ्गात्। "चित्तविस्तारस्वरूपदीप्तत्वलक्षणकम् ओजः" इति काव्यप्रकाशः, तन्न; वीरादिभ्य एव जायमानदीप्तत्वस्यैव ओजःस्वीकारेण उप-पत्तौ तल्लक्षणस्यानन्तरत्वेन मानाभावात्) ओज उच्यते। ओजोविषयमाह, वीरेति।—वीरापेक्षया बीभत्से, तदपेक्षया रौद्रे, अस्य—ओजसः इत्यर्थः, आधिक्यम् —आतिशय्यम्। "रौद्रवीरे च निर्घृणिकम् ओजः, बीभत्से तु माधुर्य्यश्लेषानुविद्धं, उत्साहानुभयानवेषु त्रयो: समावेशः अनिष्टोत्साहसङ्कोचरोधा श्रेयः" इति चक्री-

---

ओजसापेक्षया रौद्रवीरवीरोजसः आधिक्यम्।

शकारश्च षकारश्च तस्य व्यञ्जकतां गताः।
तथा समासबहुला घटनौदार्यशालिनी ॥६३०॥ (ङ)

यथा—"चक्षुर्ज" इत्यादि।

चित्तं व्याप्नोति यः क्षिप्रं शुष्केन्धनमिवानलः।
स प्रसादः समस्तेषु रसेषु रचनासु च ॥६३१॥ (ढ)

व्याप्नोति—आविष्करोति।

शब्दास्तद्व्यञ्जका अर्थ-बोधकाः श्रुतिभावतः॥६३२॥(ण)

यथा—

"सूचीमुखेन सकृदेव कृतव्रणत्वं
मुक्ताकलाप! लुठसि स्तनयोः प्रियायाः।

(ङ) ओजोव्यञ्जकान् वर्णादीनाह, वर्गेति।—वर्गेण आद्यद्वितीयाभ्यां वर्णाभ्यां युक्तो तदन्तिमौ—द्वितीयचतुर्थावित्यर्थः, तमाद्येन युक्तौ द्वितीयः, द्वितीयेन युक्तश्चतुर्थः इति ओज्यम्, उपरि—श्रिरसि, अधः,—पदतले, वा इणोः,—उपर्यधोमात्रयोरित्यर्थः, रेफः,—रेफयुक्तः वर्णः; क्रमेण यथा—अर्कः, अग्नम्, आर्द्रम् इत्यादि; एतदुपलक्षणं, माधुर्यव्यञ्जकातिरिक्तो युक्तो विसर्गयुक्तश्च वर्णः ओजोव्यञ्जकः; अत एव "उत्कृत्योत्कृत्य" इत्यादौ, "श्रीः यः पाञ्चालगोत्रे" इत्यादौ च ओजोव्यञ्जकत्वमुपपन्नमेव; टादयस्तु केवला अप्योजोव्यञ्जकाः; समासबहुलेति।—ओजोव्यञ्जकवर्णघटितसमासाधिक्यमपि ओजोव्यञ्जकम् इति पृथगुपादानम्। ओदार्यशालिनी—उत्कर्षप्रतिपादिकौल्यर्थः, घटना—रचना। द्वितीयप्रकारसङ्कीर्ण एतदुपादानं सार्थकम्; तेन—"आपतत्पतगं दूरादूरीकृतपराक्रमः। वक्षोऽवलोकयामास नातङ्गमिव केसरी॥" इत्यादौ ओजोव्यञ्जकत्वमुपपद्यम्।

(ढ) प्रसादमाह, चित्तमिति।—चक्षुः,—चक्षिः, शुष्कं—नीरसम्, इन्धनमिव—काष्ठमिव, यः क्षिप्रं चित्तं व्याप्नोति—सहसार्थबोधेन विमलयतीत्यर्थः, सः प्रसादः। प्रसादव्यञ्जकताऽप्यस्य—"शुष्केन्धनादिवत् स्वच्छ-जलवत् सहसैव यः। व्याप्नोत्यन्तः प्रसादोऽसौ सर्वत्र विहितस्थितिः॥" इति।

(ण) शब्दा इति।—श्रुतिभावतः,—श्रवणमात्रेणैवेत्यर्थः।

बाणैः स्मरस्य शतशो विनिकृत्तमर्मा
स्वप्नेऽपि तां कथमहं न विलोकयामि ?" ॥ (त)

एषां शब्दगुणत्वञ्च गुणवृत्त्योच्यते बुधैः ॥६३३॥॥ (थ)

"शरीरस्य शौर्य्यादिगुणयोग इव" इति शेषः ।

श्लेषः समाधिरौदार्य्यं प्रसाद इति ये पुनः ।
गुणाश्चिरन्तनैरुक्ता ओजस्यन्तर्भवन्ति ते ॥६३४॥(द)

ओजसि—भक्त्या ओजःपदवाच्ये शब्दार्थधर्मविशेषे । तत्र श्लेषो बहूनामपि पदानामेकपदवद्भासनात्मा । (ध)

(त) उदाहरति—यथेति । सूचीति ।—हे मुक्ताकलाप !—मौक्तिकहार ! त्वं सूचीमुखेन—अतिसूक्ष्माग्रेणेति भावः, सकृत्—एकवारमेव, न तु पुनःपुनरिति भावः, कृतव्रणः,—छिद्रित इत्यर्थः, सूत्रप्रवेशार्थमिति भावः, (तथाऽपि) प्रियायाः स्तनयोः लुठसि—लुण्ठितो भवसि, अहं स्मरस्य—कामस्य, बाणैः,—शरैः, शतशः विनिकृत्तं—विशेषेण छिन्नं, मर्म यस्य तथाभूतोऽपि, स्वप्नेऽपि तां—प्रियां, कथं न विलोकयामि ?—पश्यामि ? वसन्ततिलकं वृत्तम् ।

(थ) एषामिति ।—एषां—माधुर्य्यौजःप्रसादानां, शब्दगुणत्वं गुणवृत्त्या—आश्रयरसव्यञ्जकत्वरूपपरम्परया इत्यर्थः, बुधैः,—वामनादिभिः, उच्यते—कथ्यते । शौर्य्यादेरात्मधर्मस्य यथा शरीरवृत्तित्वं, यथा वा स्थूलत्वादेः शरीरधर्मस्य आत्मवृत्तित्वं परम्परासम्बन्धेन, तथा इत्यर्थः । ननु गुणानां रसवृत्तित्वस्य निरुक्तपरम्परायाः सम्बन्धत्वस्य च कल्पने गौरवम्, अतः शब्दार्थवृत्तित्वमेव कल्पयितुमुचितम् इति चेत्, न ; क्वचित् नीरसे गुणाभिव्यञ्जकशब्दार्थयोः सम्भवेऽपि माधुर्य्यादेरनुपलम्भात्, क्वचित्तु तदसम्भवेऽपि रसत्वेनैव तदुपलम्भाच्च रसान्वयव्यतिरेकानुविधायित्वेन रसवृत्तित्वकल्पनस्यैव औचित्यात् । गुणवृत्तिश्चात्र स्वाश्रयोपस्थापकत्वरूपेति बोद्धव्यम् ; प्रकाशकृताऽप्यभिहितं—"गुणवृत्त्या पुनस्तेषां वृत्तिः शब्दार्थयोर्मता" इति ।

(द) साम्प्रतं प्राचीनोक्तानां श्लेषसमाध्यौदार्य्यप्रसादाख्यानां शब्दगुणानां समाधानमाह, श्लेष इति ।—श्लेषादयः चत्वारो ये गुणाः चिरन्तनैः,—प्राचीनैः, उक्ताः, ते ओजसि—परम्परया ओजःपदप्रतिपाद्ये शब्दार्थगुणविशेषे, अन्तर्भवन्ति—अन्तर्भूताः भवन्ति ।

(ध) ओजसीति ।—भक्त्या लक्षणया । श्लेषमाह, तत्रेति ।—तत्र—तेषु मध्ये

यथा—

"उन्मज्जज्जलकुञ्जरेन्द्ररभसाऽऽस्फालानुबन्धोद्धतः
सर्वाः पर्वतकन्दरोदरभुवः कुर्वन् प्रतिध्वानिनीः।
उच्चैरुच्चरति ध्वनिः श्रुतिपथोन्माथी यथाऽयं तथा
प्रायःप्रेङ्खदसङ्ख्यशङ्खधवला वेलेयमुद्गच्छति॥" (न)

अयं बन्धवैकट्यात्मकत्वादोज एव। (प)

समाधिः,—आरोहावरोहक्रमः, आरोहः,—उत्कर्षः, अवरोहः,—अपकर्षः, तयोः क्रमः,—वैरस्यताऽनावहो विन्यासः। यथा "चञ्चद्भुज" इत्यादि। अत्र पादत्रये क्रमेण बन्धस्य गाढ़ता, चतुर्थपादे तु अपकर्षः। तस्यापि च तीव्रप्रयत्नोच्चार्य्यतया ओजस्विता। (फ)

इत्यर्थः। एकपदवत् भासनं—स्फुरणम्, आत्मा—स्वरूपं यस्य तादृशः, शब्दधर्मविशेषः श्लेषः; अत एवोक्तं प्रकाशकृता—"बहूनामपि पदानामेकपदवद्भासनात्मा यः श्लेषः, यश्च आरोहावरोहक्रमरूपः समाधिः, या च विकटत्वलक्षणा उदारता, यश्चौजोमिश्रितशैथिल्यात्मा प्रसादः, तेषामोजसि अन्तर्भावः" इति।

(न) उदाहरति—यथेति। उन्मज्जदिति।—प्रलयकालीनसमुद्रवर्णनमिदम्। उन्मज्जतां—जलादुत्तिष्ठतां, जलकुञ्जरेन्द्राणां—जलीयगजेन्द्राणां, रभसेन—वेगेन, यः आस्फालः,—शुण्डास्फालनं, तस्य अनुबन्धेन—सातत्येन, उद्धतः,—उद्गतः, (पक्षे—तेषां रभसेन—हर्षेण, यः आस्फालः,—उत्थानव्यापारातिशयः, तस्य अनुबन्धेन—आरम्भेण, उद्धतः,) श्रुतिपथोन्माथी—कर्णविवरविदारी, (पक्षे—श्रुतीनां—वेदानां, पथां च उन्माथी,) उच्चैः,—महान्, अयं—सिन्धुसम्बन्धी, ध्वनिः सर्वाः पर्वतानां कन्दरोदरभुवः,—गुहाभ्यन्तरस्थानानि, प्रतिध्वानिनीः,—प्रतिध्वनिमतीः, कुर्वन्, (पक्षे—शब्दनिरुद्धाः,—जलपूरणेन निःशब्दाः कुर्वती,) यथा उच्चरति—उत्तिष्ठति, तथा प्रायः,—बाहुल्येन, प्रेङ्खद्भिः—चलद्भिः, असङ्ख्यैः शङ्खैः धवला इयं वेला—विकृतसिन्धुजलं, ("अब्ध्यम्बुविकृतौ वेला कालमर्य्यादयोरपि" इत्यमरः) उद्गच्छति—उत्तिष्ठति] शार्दूलविक्रीड़ितं वृत्तम्।

(प) अयं—गुण इत्यर्थः, बन्धस्य—रचनायाः, वैकट्यात्मकत्वात्—डम्बररूपत्वात्।

(फ) समाधिमाह, समाधिरिति।—उत्कर्षः,—गाढ़बन्धत्वम्। अपकर्षः,—

उदारता—विकटत्वलक्षणा, विकटत्वञ्च पदानां नृत्यत्प्रायत्वम्। (ब) यथा—

"स्वचरणविनिविष्टैर्नूपुरैर्नर्त्तकीनां
झणिति रणितमासीत् तत्र चित्रं कलञ्च।" (भ)

अत्र च तन्मतानुसारेण रसानुसन्धानमन्तरेणैव शब्दप्रौढ़ोक्तिमात्रेणौजः। (म)

बन्धशैथिल्यम्। वैरस्यताऽनावहः,—उत्कर्षमध्ये अपकर्षोपादाने अपकर्षमध्ये उत्कर्षोपादाने च वैरस्यं तत् यत्र न भवति स इत्यर्थः। ननु क्रमनिबन्धयोरुत्कर्षापकर्षयोः समावेशः समाधिरिति फलितं, तत्रापकर्षस्य कथमोजस्यन्तर्भावः? इत्यत आह, तस्यापीति।—तस्यापि—चतुर्थपादस्यापि इत्यर्थः, तीव्रेण—द्रुतेन, प्रयत्नेन उच्चार्य्यतया—कीर्त्तनीयतया, ओजस्विता—ओजोगुणवत्त्वम्। पद्यस्य पादे पादे आरोहावरोहक्रमः सम्भवतीति, तत्रारोहपूर्वोऽवरोहो यथा—"निरानन्दः कौन्दे मधुनि मधुरो बालबकुले न सालेऽनालम्बो लवमपि लवङ्गे न रमते। प्रियङ्गौ नासङ्गं रचयति न चूते विरमति स्मरंल्लक्ष्मीलीलाकमलमधुपानं मधुकरः॥" लवङ्ग इति लघुप्रयत्नोच्चारणेनावरोहः। अवरोहपूर्व आरोहो यथा—"अयमुदयति मुदाभञ्जनः पद्मिनीनाम् उदयगिरिवनालीबालमन्दारपुष्पम्। विरहविधुरकोकद्वन्द्वबन्धुर्विभिन्दन् कुपितकपिकपोलक्रोड़ताम्रस्तमांसि॥" इति।

(ब) औदार्य्यमाह, उदारतेति।—विकटत्वं लक्षणं—स्वरूपं यस्यास्तथाभूता। नृत्यत्प्रायत्वं—प्रायेण नर्त्तनशीलत्व, प्रत्येकं पदच्छेदात् इति भावः।

(भ) उदाहरति—यथेति। स्वचरणेति।—नर्त्तकीनां—नृत्यकर्त्रीणां गणिकानां, स्वचरणविनिविष्टैः ["सुचरण" इति पाठे—शोभनपादे, सुकोमलपादे इत्यर्थः] नूपुरैः, तत्र—नृत्यशालायां, चित्रं—विचित्रं, कलं—मधुरं, झणिति—"झण्" इत्याकारकं, रणितं—रणनं, शब्द इति यावत्, आसीत्।

(म) नन्वत्र वीरादिरसाभावादोज एव नास्ति, तद्व्यञ्जके एतदीयबन्धगाढ़त्वे उदारतायाः कथमन्तर्भावः? इत्यत आह, अत्रेति।—तन्मतानुसारेण—तेषां प्राचीनानां मतानुसारेण, ये गुणानां शब्दार्थधर्मत्वमेव वदन्ति, तन्मतेनेत्यर्थः, अन्तरेण—विना, शब्दानां प्रौढ़ोक्तिमात्रेण—विकटोक्तिवशेन, ओजः, व्यवह्रियते इति शेषः; तथा च—प्रकृते योग्यतामादायैव बन्धगाढ़त्वस्य ओजोव्यञ्जकत्वमिति भावः।

प्रसादः,—ओजोमिश्रितशैथिल्यात्मा । (य)

यथा—

"यो यः शस्त्रं बिभर्त्ति स्वभुजगुरुमदः पाण्डवीनां चमूनां
यो यः पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्यां गतो वा ।
यो यस्तत्कर्मसाक्षी चरति मयि रणे यश्च यश्च प्रतीपः
क्रोधान्धस्तस्य तस्य स्वयमिह जगतामन्तकस्यान्तकोऽहम्" ॥(र)

माधुर्य्यव्यञ्जकत्वं यदसमासस्य दर्शितम् ।
पृथक्पदत्वं माधुर्य्यं तेनैवाङ्गीकृतं पुनः॥६३५॥ (ल)

यथा—"श्वासान् मुञ्चति" इत्यादि । (व)

(य) प्रसादमाह, प्रसाद इति ।—ओजोमिश्रितं शैथिल्यं—बन्धनश्लथीभावः, आत्मा—स्वरूपं यस्य तादृशः, शैथिल्ययुक्तबन्धनगाढ़त्वमित्यर्थः । समाधौ श्लोके तत्पादे वा ओजःप्रसादयोरन्यतरस्य पुनरुन्मज्जनं नास्ति, अत्र तु उभयोः निमज्जनोन्मज्जनक्रमेण सम्पर्कः; तदुक्तं वामनेन—"सम्पृक्तौ खल्वोजःप्रसादौ नदीवेणिकावदुद्वहतः" इति ।

(र) उदाहरति—यथेति । य इति ।—व्याख्यातपूर्वोऽयं श्लोकः ४२६ पृष्ठे । अत्र प्रतिपादं बन्धस्य गाढ़त्वं मध्यमवर्णानां शैथिल्यञ्चास्तीति द्रष्टव्यम् ।

(ल) प्राचीनोक्तं माधुर्य्यं शब्दगुणं समाधत्ते, माधुर्य्येति ।—असमासस्य—"अवृत्तिरल्पवृत्तिर्वा" इति वचनोक्तस्य समासाभावस्य, यत् माधुर्य्यव्यञ्जकत्वं—माधुर्य्यगुणाविष्कारकत्वं, दर्शितं, मयेति शेषः, तेनैव पृथक्पदत्वं पुनः माधुर्य्यं, प्राचीनोक्तमिति शेषः, अङ्गीकृतं—स्वीकृतम् ; एतेनास्य परम्परया स्वोक्ते माधुर्य्ये एव अन्तर्भाव इति बोध्यम् ; अत एव प्रकाशकृताऽप्युक्तं—"पृथक्पदत्वरूपं माधुर्य्यं भङ्ग्या साक्षादुपात्तम्" इति ।

(व) उदाहरति, श्वासानिति ।—(व्याख्यातमिदं प्राक् १६६ पृष्ठे) । अत्र भुजावल्लरीमिति प्राणसमानेति च समाससत्त्वेऽपि पृथक्पदत्वस्य दीर्घसमासराहित्ये तात्पर्य्यान्न दोषः । यद्वा—"बाले ! नाथ ! विमुञ्च मानिनि ! रुषं रोषान्मया किं कृतम् ? खेदोऽस्मासु न मेऽपराध्यति भवान् सर्वेऽपराधा मयि । तत् किं रोदिषि गद्गदेन वचसा ? कस्याग्रतो रुद्यते ? नन्वेतन्मम का तवास्मि ? दयिता नास्मीत्यतो रुद्यते ॥" एतदुदाहरणं बोध्यम् ।

अर्थव्यक्तेः प्रसादाख्य-गुणेनैव परिग्रहः।
अर्थव्यक्तिः पदानां हि झटित्यर्थसमर्पणम्॥६३६॥(श)

स्पष्टमुदाहरणम्।

याम्यदुःश्रवतात्यागात् कान्तिश्च सुकुमारता॥६३७॥(ष)

अङ्गीकृतेति सम्बन्धः। कान्तिः,—औज्ज्वल्यम्। तच्च ह्रादि-क्रादिपदविन्यासवैपरीत्येनालौकिकशोभाशालित्वम्। सुकुमारता—अपारुष्यम्। अनयोरुदाहरणे स्पष्टे। (स)

(श) प्राचीनोक्तामर्थव्यक्तिं समाधत्ते, अर्थव्यक्तेरिति।—प्रसादाख्यगुणेनैव—प्रसादसंज्ञकेनैवेत्यर्थः, अर्थव्यक्तेः,—चिरन्तनोक्तश्रव्यत्वविशेषस्य, परिग्रहः,—ग्रहणं, हि—यतः, पदानां झटिति अर्थसमर्पणम्—अर्थावबोधः, एवेति अध्याहार्यम्, अर्थव्यक्तिः। एतेन अत्र प्रसादे एव अन्तर्भावो बोद्धव्यः। प्रकाशकृदप्याह—"प्रसादे-नार्थव्यक्तिर्गतार्थेति" इति।

(ष) चिरन्तनोक्तां कान्तिं सुकुमारतां च समाधत्ते, याम्येति।—याम्यस्य—दोषविशेषस्य, दुःश्रवतायाश्च त्यागात्—परिहारात्, कान्तिर्नाम श्रव्यगुणः सुकुमारता-नाम श्रव्यगुणश्च, अङ्गीकृत इति शेषः; तत्र याम्यदोषपरित्यागेन कान्तिः, दुःश्रवता-परित्यागेन सुकुमारता इति बोध्यम्।

(स) कान्तिमाह—कान्तिरिति। ह्रादिकेति।—ह्रादिकः,—ह्रदे—ह्रदकर्मणि, अर्थकर्मणीति यावत्, नियुक्त इति ह्रादिकः ["तत्र नियुक्तः" (४।४।६९ पा०) इति ठक्] ह्रदेन भूमिकर्मकर्त्रा श्रव्यरीत्यनिपुणो निकृष्टजातिविशेषः, चादिरिति प्रसिद्धम्,[चादिपदेन तथाविधप्राकृतनरबालादिपरिग्रहः] तेषां यः पदविन्यासः,—श्रव्यत्वेन, तस्य वैपरीत्येन—साधुपदत्वयोगेनेत्यर्थः, अलौकिकी—विलक्षणा, या शोभा तया शालते—शोभते इति तथात्वम्। सुकुमारतामाह, सुकुमारतेति।—अपारुष्यं—श्रुतिकटुत्वाभावः, तत्प्रयोगेण श्रवणसुभगत्वनिमित्यर्थः। प्रकाशकृताऽप्युक्तं—"कष्टत्व-याम्यत्वयोर्दुष्टत्वात्तदभावात् तन्निराकरणेन अपारुष्यरूपं सौकुमार्यम्, औज्ज्वल्यरूपा कान्तिश्च लक्षिता" इति। स्पष्टे इति।—क्रमेण यथा—"ताम्रलक्षतनक्षोऽयं भर्ता लक्ष्यति नायकः।" विपर्ययस्तु—"ताम्रक्षतनक्षोऽयं भर्ता लक्ष्यति नायकः।" अत्र अक्षनक्षनायकशब्दाः याम्याः। "आनन्दनियनावातु वदा वानवमंवदा।" विप-र्ययस्तु—"वान्तार्द्रनियनावातु" इति।

क्वचिद्दोषस्तु समता मार्गभेदस्वरूपिणी।
अन्ययोक्तगुणेष्वस्या अन्तःपातो यथायथम्॥६३८॥ (ङ)

मसृणेन विकटेन वा मार्गेणोपक्रान्तस्य सन्दर्भस्य तेनैव परिनिष्ठानं मार्गभेदः। स (क) च क्वचित् दोषः। तथा हि—

"अव्यूढाङ्गमरूढपाणिजठराभोगञ्च बिभ्रद्वपुः
पारीन्द्रः शिशुरेष पाणिपुटके सम्मातु किं तावता?।
उद्यद्दुर्दरगन्धसिन्धुरशतप्रोद्दामदानार्णव-
स्रोतःशोषणरोषणात् पुनरितः कल्पाग्निरल्पायते॥"(ख)

(ङ) प्राचीनोक्तां समतां समाधत्ते, क्वचिदिति।—मार्गस्य—रीतेः, भेदः,—भिन्नता, अपरित्याग एव इत्यर्थः, स्वरूपं तद्विदते लभते इति तथाविधा, समता—समभावेन पदरचना इत्यर्थः, क्वचित्—कुत्रचित् प्रदेशे, सुकुमारबन्धमध्ये उद्धतार्थोपन्यासो, प्रौढबन्धमध्ये सुकुमारोपन्यासो चेत्यर्थः, दोषः स्यात्। अन्यथा—प्रक्रान्तमार्गयोग्यार्थानुपन्यासो इत्यर्थः, उक्तगुणेषु—कथितेषु माधुर्यसौकुमार्यौजःसु गुणेषु, अस्याः,—समतायाः, यथायथं—यथासम्भवं, सुकुमारमार्गभेदस्य माधुर्यसौकुमार्ययोः, प्रौढमार्गभेदस्य तु ओजसोत्यर्थः, अन्तःपातः,—अन्तर्भावः।

(क) मार्गभेदपदस्यार्थमाह, मसृणेति।—मसृणेन—सुकुमारेण, विकटेन—उत्कटेन, वा मार्गेण—प्रणाल्या, उपक्रान्तस्य—आरब्धस्य, सन्दर्भस्य—प्रबन्धस्य, तेनैव—उक्तमार्गेणैव, पूर्वप्रणाल्या एवेत्यर्थः, परिनिष्ठानं—समापनम्। सः,—मार्गभेदः।

(ख) मार्गभेददोषत्यागस्य गुणत्वमुदाहरति, अव्यूढेति।—अव्यूढानि—विशेषेण अपरिपुष्टानि, अङ्गानि यस्य तादृशं, तथा अरूढः,—अनवसातः, पाणेः,—करतलस्य, जठरस्य—उदरस्य च, आभोगः,—विस्तारः यस्य तथाभूतं, वपुः,—शरीरं, बिभ्रत्—दधानः, एषः शिशुः पारीन्द्रः,—सिंहशावकः, ("कच्छीरवस्तु पारीन्द्रः केसरी गजमोहनः" इति शारावली) पाणिपुटके—पुटाकारेण संयुक्ते पाणितले इत्यर्थः, सम्मातु—सम्यक् परिमाणं प्राप्नोतु, तावता—तेन अव्यूढाङ्गत्वादिना, किम्? न काऽपि तस्य महत्त्वाद्धानिरिति भावः। दानैरप्यावमाह, उद्यदिति।—उद्यताम्—उदयं गच्छताम्, दुर्दमानामनियन्त्रणानां, दुर्दराणां—दुरासदानां, गन्धसिन्धुराणां—गन्धमदानां, "अक्षौहणदृगन्धेन दन्तिनो भयविह्वलाः। दूरादेव पलायन्ते गन्धदन्ती स उच्यते॥" इत्युक्तलक्षणगजविशेषाणामित्यर्थः, शतेन प्रोद्दामः,—उत्कटः, यः दानार्णवः,—मदजलः

अत्र उद्धतेऽर्थे वाच्ये सुकुमारबन्धत्यागो गुण एव। अनेवंविधस्थले माधुर्य्यादावेवान्तःपातः। (ग) यथा—"लताकुञ्जं गुञ्जत्" इत्यादि।

ओजः प्रसादो माधुर्य्यं सौकुमार्य्यमुदारता।
तदभावस्य दोषत्वात् स्वीकृता अर्थगा गुणाः॥६३९॥ (घ)

ओजः,—साभिप्रायत्वरूपं, प्रसादः,—अर्थवैमल्यं, माधुर्य्यम्—उक्तिवैचित्र्यं, सौकुमार्य्यम्—अपारुष्यम्, उदारता—अग्राम्यत्वम्, एषां पञ्चानामप्यर्थगुणानां यथाक्रममपुष्टार्थाधिकपदानवीकृतामङ्गलरूपाश्लीलग्राम्याणां निराकरणेनैवाङ्गीकारः। स्पष्टान्युदाहरणानि। (ङ)

जलराशिः, तस्य स्रोतसः,—प्रवाहस्य, शोषणे रोषणं—क्रोधः यस्य तथाविधात्, इतः,—अस्मात् सिंहशिशोः, कल्पाग्निः,—प्रलयानलः, अल्पायते—अल्प इव आचरति। शार्दूलविक्रीडितं वृत्तम्।

(ग) अत्रेति।—अत्र—द्वितीयार्द्धे, उद्धते—उत्कटे, वाच्ये—वक्तव्ये, (माधुर्य्यादौ इत्यनेन सौकुमार्य्यौजसोर्ग्रहणम्। ओजोविपर्य्यासः सौकुमार्य्यं, तच्च दीर्घसमासराहित्येन परुषवर्णानां त्यागेन च भवति) एवंविधस्थानेषु सुकुमारमार्गाभेदस्य माधुर्य्यसौकुमार्य्ययोरन्तःपातः इति बोद्धव्यम्।

(घ) साम्प्रतं प्राचीनोक्तानाम् ओजःप्रभृतीनां पञ्चानां तथा वक्ष्यमाणार्थव्यक्त्यादिसमाध्यन्तानाञ्च पञ्चानामर्थगुणानां दोषाभावादिभिरङ्गीकारमगुणत्वञ्च यथायथमुपपादयति, ओज इति।—ओजःप्रभृतयः पञ्च तदभावस्य—तेषामोजःप्रभृतीनाम्, अभावस्य असद्भावस्येत्यर्थः, दोषत्वात्—दोषत्वेन अङ्गीकारादित्यर्थः, अर्थगाः गुणाः स्वीकृताः, ओजःप्रभृतीनामभावस्य दोषत्वेन स्वीकारात् तत्सद्भावस्यास्माभिः दोषाभावत्वेनाङ्गीकृताः, न पुनर्गुणत्वेन इति भावः। "अर्थप्रौढिरोजः" इति तु प्राचीनलक्षणम्; सा च पञ्चविधा—"पदार्थे वाक्यरचना वाक्यार्थे च पदाभिधा। प्रौढिव्याससमासौ च साभिप्रायत्वमस्य च॥" इति; तत्राद्यप्रकारचतुष्टयस्य वैचित्र्यमात्रप्रयोजकत्वेन गुणत्वाभावमग्रे दर्शयिष्यति, चरमप्रकारन्तु दोषाभावत्वेनैव सङ्गृह्णाति।

(ङ) ओज इत्यादि।—साभिप्रायत्वरूपम्—अभिप्रायप्रकाशकत्वम्, अर्थस्य प्रकृतोपकाराभिप्रायेण प्रयुक्तत्वमित्यर्थः, अपुष्टार्थत्वदोषराहित्यमेव इति भावः।

अर्थव्यक्तिः स्वभावोक्त्याऽलङ्कारेण तथा पुनः।
रसध्वनिगुणीभूत-व्यङ्ग्याभ्यां कान्तिनामकः॥६४०॥(च)

अङ्गीकृत इति सम्बन्धः। अर्थव्यक्तिः,—वस्तुस्वभावस्फुटत्वम्। कान्तिः,—दीप्तरसत्वम्। (छ) स्पष्टे उदाहरणे।

अर्थानां वैमल्यं—विप्रदोषाभावः, प्रसादः; अधिकपदत्वदोषराहित्यमेव इति भावः। उक्तिवैचित्र्यं—विभिन्नरूपत्वं, विचित्रया उक्त्या तस्यैव अर्थस्य पुनः समर्पणमिति यावत्, माधुर्यम्; अनवीक्षितत्वदोषराहित्यमेव इति भावः। अपारुष्यम्—अश्रुतिकटुत्वं, अमङ्गलार्थस्य उक्तिवैचित्र्यवशात् सुकुमारप्रायत्वेन प्रतिपादनमित्यर्थः, सौकुमार्यम्; अमङ्गलरूपाश्लीलत्वदोषराहित्यमेव इति भावः। अयाग्यत्वं—रिरंसया पामरप्रयुज्यमानत्वं याग्यत्वं, तद्विरहलक्षणमयाग्यत्वम्; इतरजनाप्रयोज्यत्वरूपमित्यर्थः, उदारता, याग्यतादोषराहित्यमेवेति फलितार्थः। प्रकाशकृताऽप्युक्तम्—"अपुष्टार्थत्वाधिकपदत्वानवीक्षितत्वामङ्गलरूपाश्लीलयाग्यार्थां निराकरणेन च स्वाभिप्रायत्वरूपनीजः, अर्थवैमल्यात्मा प्रसादः, उक्तिवैचित्र्यरूपं माधुर्यम्, अपारुष्यरूपं सौकुमार्यम्, अयाग्यत्वरूपा उदारता च खीकृता" इति। व्याप्तोति। सप्तमपरिच्छेदे अपुष्टार्थत्वादिकानां पञ्चानामुदाहरणविपर्ययार्थकानि इत्यर्थः। क्रमेण यथा—"कुर्यां हरस्यापि पिनाकपाणेः" इति; विपर्ययस्तु—"सदाशिवं नौमि पिनाकपाणिम्" इति। "सवर्णा कन्यका रूप-यौवनारम्भशालिनी" अत्र यौवनवौनत्वप्रतिपादकमारभ्यप्रदमधिकम; विपर्ययस्तु—"अपास्ती इको मे विनयमधिकाक्षोपदगतः।" अत्र अक्षोपदमित्यनेनैव नितम्बस्य बोधात् विशेषणमप्रयोजनम्। "भानुः सदा युक्तुरङ्ग एव" इत्यादि; विपर्ययस्तु—"सदा चरति" इति; "सरसीव कीर्त्तिशेषं गतवति भुवि विक्रमादित्ये" अत्र मरणे कीर्त्तिशेषशब्दः; विपर्ययस्तु—मृतादिशब्दः। "कामं सन्दर्पधाष्ट्यालो मयि वामाक्षि! निर्दयः। रतिमत्तिमदेहत्वात् त्वयि निर्मत्सरः किमु?॥" विपर्ययस्तु—"कन्ये! कामयमानं मां न त्वं कामयसे कथम्?" इति।

(च) प्राचीनोक्तामर्थगुणरूपामर्थव्यक्तिं कान्तिञ्च समाधत्ते, अर्थव्यक्तिरिति।—स्वभावोक्त्या—तन्नाम्ना, अलङ्कारेण अर्थव्यक्तिः, तथा पुनः रसध्वनिना—रसरूपेण ध्वनिना, गुणीभूतेन व्यङ्ग्येन च कान्तिनामकः, अर्थगुणः खीकृत इति शेषः।

(छ) अर्थव्यक्तिमाह, अर्थव्यक्तिरिति।—वस्तूनां—पदार्थानां, स्वभावस्य स्फुटत्वं—सम्यगाविष्करणमित्यर्थः। कान्तिमाह, कान्तिरिति।—दीप्तरसत्वं—रसस्फोटनमित्यर्थः। क्रमेणोदाहरणे—"पुष्टेषु अङ्गपदवाक्यादिषु अवदानां यागीनिरङ्कित-

श्लेषो विचित्रतामात्रमदोषः समता परम्॥६४१॥(ज)

श्लेषः क्रमकौटिल्यानुल्बणत्वोपपत्तियोगरूपघटनात्मा। तत्र क्रमः,—क्रियासन्ततिः, विदग्धचेष्टितं कौटिल्यम्, अप्रसिद्धवर्णनाविरहोऽनुल्बणत्वम्, उपपादकयुक्तिविन्यास उपपत्तिः, एषां योगः,—सम्मेलनं, स एव रूपं यस्या घटनायास्तद्रूपः श्लेषो वैचित्र्यमात्रम्, अनन्यसाधारणरसोपकारित्वातिशयविरहादिति भावः। (झ)

यथा—"दृष्ट्वैकासनसंस्थिते प्रियतमे" इत्यादि।

अत्र दर्शनादयः क्रियाः। उभयसमर्थनरूपं कौटिल्यम्। लोकसंव्यवहाररूपमनुल्बणत्वम्। "एकासनसंस्थिते" "पश्चादुपेत्य" "नयने पिधाय" "ईषद्वक्रितकन्धरः" इति चोपपादकानि एषां योगः। अनेन च वाच्योपपत्तिग्रहणव्यग्रतया रसाऽऽस्वादो व्यवहितप्रायः इत्यस्य अगुणता।

समता च प्रक्रान्तप्रकृतिप्रत्ययविपर्य्यासेनार्थस्य विसंवादिताविच्छेदः; स च प्रक्रमभङ्गरूपदोषविरह एव। स्पष्टमुदाहरणम्। (ञ)

मलक्तकरागिणीभिः। गोरोचनाहरितबभ्रुबहिःपलाशमामोदते कुमुदमम्भसि पल्वलस्य॥" दीप्तरसत्वं यथा—"शून्यं वासगृहम्—" इत्यादि।

(ज) प्राचीनोक्तार्थगुणं श्लेषं समताञ्च समाधत्ते, श्लेष इति।—विचित्रतामात्रं—केवलं वैचित्र्यमित्यर्थः, श्लेषः; समता परं—केवलम्, अदोषः,—दोषराहित्यम्।

(झ) उपपादकेति।—प्रकृतानुकूलहेतूपन्यास इत्यर्थः। वैचित्र्यमात्रं—न तु गुणशब्देनाभिधीयते इति भावः। अत्र हेतुमाह, अनन्येति।—तादृशरसोपकारित्वातिशयश्च रसव्यञ्जकवाक्यस्य काव्यव्यपदेशयोगित्वम्। यो हि असाधारण्येन रसमुपकरोति, स एव गुणशब्दवाच्य इति भावः।

(ञ) उदाहरति—दृष्ट्वेति। अत्रेति।—दर्शनादयः इत्यत्र आदिपदेन उपगमनादीनां ग्रहणम्; उभयोः,—ज्येष्ठाकनिष्ठयोः कान्तयोः, समर्थनं—रञ्जनम्, अनुरूपप्रीणनमिति यावत्, तदेव रूपं यस्य तादृशं, यद्वा—उभयस्य—ज्येष्ठाप्रीणनस्य

न गुणत्वं समाधेश्च ॥६४२॥ (ट)

समाधिश्च अयोन्यन्यच्छायायोनिरूपविविधार्थदृष्टिरूपः। (ठ)

तत्र अयोनिरर्थो यथा—

"सद्योमुष्टितमत्तद्विपचिबुकप्रस्पर्द्धिनारङ्गकम्।" (ड)

अन्यच्छायायोनिर्यथा—

"निजनयनप्रतिबिम्बैरम्बुनि बहुशः प्रतारिता काऽपि।
नीलोत्पलेऽपि विशति करमर्पयितुं कुसुमलावी॥" (ढ)

जनिताप्रतारत्वञ्च, समर्थनम्—अनुज्ञानमित्यर्थः। लोकेति।—लोकानां संव्यवहारः,—तादृग्व्यवहारः एव,रूढं यत्र तथाभूतम। उपपादकानि—अभीष्टार्थसम्पादकानि। योगः,—मेलनम। निरुक्तश्लेषश्च दोषत्वमेव प्रसक्तं, कुतो गुणत्वम? इत्युपपादयति, अनेन चेति।—निरुक्तश्लेषेत्यर्थः, वाच्यञ्च—अभिधेयार्थश्च, उपपत्तिः,—युक्तिः तर्कः, यद्वा—वाच्यायाः उपपत्तेः,—कारणञ्च, यद्धि—बोधे, व्यवहितया—आवरणतया, सत्तन तत्सम्बन्धतया इत्यर्थः, सामानिकानामिति शेषः, व्यवहितप्रायः,—प्रायेण व्यवहित, विघ्नत्वेनोत्पादित इत्यर्थः, यच्च—श्लेषश्च, अगुणता—गुणविरोधित्वं, दोषत्वमिति यावत्। प्रक्लान्तेति।—प्रक्लान्तयोः,—श्रान्त्योः, प्रकृतिप्रत्ययोः विपर्ययेण—वैपरीत्येन, अर्थश्च या विसंवादिता—विभिन्नता, तद्विच्छेदः, तादृशेन प्रकृतिप्रत्ययोगेन उपक्लान्तं, तादृशेनैव समापननिति भावः। अष्टनिति।—"उदीति सविता ताम्र." इत्यादि।

(ट) समाधिमर्थगुणं समाधत्ते, नेति।—सूत्रम्।

(ठ) समाधिरिति।—समाधिः,—अर्थदृष्टिविशेषः, त्रिविधः अयोनिः,—मूलरहितः, केनापि कविना अनिबद्धपूर्व इत्यर्थः, अन्यच्छायायोनिः,—अन्यस्य काव्यान्तरस्य, छाया वर्णनं, योनिः यस्य सः, कविसमयप्रसिद्ध इत्यर्थः।

(ड) अयोनिमुदाहरति, तस्य इति।—तस्यः,—तत्सम्बन्धं, मुष्टितं—चौरग्रहणेन ज्ञातनिर्णीतनिजत्वं, यत् मत्तञ्च, मदपायेनेति भावः, हस्तञ्च—हस्तदेशीयप्रत्यक्षेच्छातिविशेषञ्च, चिबुकं तञ्च प्रस्पर्द्धि—प्रस्पर्धेव स्पर्द्धकं, तत्सदृशमिति यावत्, नारङ्गकं—पक्वनारङ्गम्। अत्र मुष्टितहस्तचिबुकेन नारङ्गस्य उपमा न केनापि निबद्धेति अयोनित्वम्।

(ढ) अन्यच्छायायोनिमुदाहरति, निजेति।—काऽपि कुसुमलावी—लावा-

अत्र नीलोत्पलनयनयोरतिप्रसिद्धं सादृश्यं विच्छित्तिविशेषेण निबद्धम्। अस्य च असाधारणशोभाऽनाधायकत्वान्न गुणत्वं, किन्तु काव्यशरीरमात्रनिवर्त्तकत्वम् (थ)।

क्वचित् "चन्द्रम्" इत्येकस्मिन् पदार्थे वक्तव्ये "अत्रेनयनसमुत्थं ज्योतिः" इति वाक्यवचनम्; क्वचित् "निदाघशीतलहिमकालीनसुकुमारशरीरावयवा योषित्" इति वाक्यार्थे वक्तव्ये "वरवर्णिनी" इति पदाभिधानम्; क्वचित् एकस्य वाक्यार्थस्य किञ्चिद्विशेषनिवेशादनेकैर्वाक्यैरभिधानमित्येवंरूपो व्यासः; क्वचित् बहुवाक्यप्रतिपाद्यस्य एकवाक्येनाभिधानमित्येवंरूपः समासश्च; इत्येवमादीनामन्यैरुक्तानां न गुणत्वमुचितम्, अपि तु वैचित्र्यमात्रावहत्वम्। (त)

कारो, नासिनीत्यर्थः, निजनयनयोः प्रतिबिम्बे: अम्बुनि बहुशः,—पुनः पुनः, प्रसारिता सती, नीलोत्पलेऽपि करम् अर्पयितुं, चयनार्थमिति शेषः, विहरति—विचारयति, संप्रेक्षते इत्यर्थः। आर्याऽष्टमम्।

(थ) ननु अस्यालायारयोनेरस्य निबन्धनप्रयोजनम्? अत आह, अत्रेति।—अतिप्रसिद्धं—काव्यान्तरैः बहुशो निबद्धम्। विच्छित्तिविशेषेण—वैचित्र्यविशेषधायकत्वेन, निबद्धं—रचितम्; तथा च अर्थान्तरयोगेन प्रसिद्धमपि सादृश्यं विलक्षणवैचित्र्यं जनयति इति भावः। अस्य च—सादृश्यस्य, असाधारणशोभाऽनाधायकत्वात्—रसस्य अनन्यसामान्यशोभाया अनिर्वाहकत्वादित्यर्थः। काव्यशरीरेति।—केवलं काव्यशरीरस्य पोषकत्वमित्यर्थः।

(त) "पदार्थे वाक्यरचना—"इत्यादिवाक्यनिर्दिष्टपञ्चविधासामीचीनताम् अस्मिन् प्रकारे प्रथममेव दूषयितुम्, इदानीं चतुर्विधार्थप्रौढ़िरूपस्यौजसो गुणत्वाभावमाह, क्वचिदिति।—चन्द्रमिति पञ्चेत्येवादेशम्। निदाघेति।—"शीतकाले भवेदुष्णा उष्णकाले च शीतला। सुकुमारशरीरा च सा प्रेया वरवर्णिनी॥" व्यासः,—एकपदेन वा एकवाक्येन वाचस्य विषित् वैशिष्ट्यप्रतिपत्तये बहुभिः पदैर्वाक्यैर्वा कथनम्; यथा—"कश्चो नाम्नाऽऽकारो भवति सुखदुःखव्यतिकरः सुखं वा दुःखं वा भवति न भवत्येव च तदः। पुनस्तत्कादाचित्कं भवति सुखदुःखं किमपि तत्पुनस्तत्कादाचित्कं भवति न च दुःखं न च सुखम्॥" अत्र केन संसारिणा इत्यमित्थं कथं ज्ञातं तदनुसरेणैव

तेन नार्थगुणाः पृथक् ॥ ६४३ ॥

तेन—उक्तप्रकारेण। अर्थगुणाः,—ओजःप्रभृतयः परोक्ताः।(घ)

इति श्रीमन्नारायणचरणारविन्दमधुव्रतसाहित्याचार्यवर्यधारध्वनिप्रज्ञापनपरमाचार्य-
कविमुनिरत्नाकरराजदम्भाचारविचक्षणीभुजङ्गमाभिधविद्वन्महाधान-
श्रीविश्वनाथकविराजकृतौ साहित्यदर्पणे गुणविवेचनो नाम
अष्टमः परिच्छेदः ॥ ८ ॥

विविधत्वमाश्रितः सुखदुःखभोगः क्रियते ; यदि कुतश्चिदध्यात्मसाक्षात्कारः स्यात्, तदेवास्य प्रयोजनस्य प्राप्तिः, इत्येव विवक्षितं वैचित्र्येणोच्यते। समासः,—बहुभिः पदैः वाक्येवां प्रतिपाद्यस्य अर्थस्य एकपदेन वाक्येन वा कथनम्। तमोदाहरणं यथा—
"श्रुतवा धर्मसर्वस्वं श्रुत्वा चैवावधारय। आत्मनः प्रतिकूलानि परेषां न समाचरेत्॥"
अत्र परद्रव्यं न हरेत्, परदारान् न गच्छेत्, परापवादो न वक्तव्यः इत्यादि वाक्यसमभिव्याहृतस्य द्वितीयार्द्धेनाभिधानम्। अन्ये:,—प्राचीनैरित्यर्थः। न गुणत्वं, रसस्यस्वशब्दवाक्यस्य काव्यव्यपदेशौपयिकत्वाभावादिति शेषः।

(घ) उपसंहरति, तेनेति।—परोक्ताः, दण्ड्याचार्यनिरूपितानामपि दशविध-गुणानां यथासम्भवं ओजःगुणव्यञ्जकादौ अन्तर्भावो बोद्धव्यः इति दिक्। प्रकाश-कृताऽप्युक्तम्—"अर्थव्यायोनेरव्यक्ताद्यायोनेर्वा। यदि न भवति दर्शनं तत् कथं व्याख्यम् ?॥ इत्यर्थदृष्टिरूपः समाधिरपि च गुणः" इति।

इत्योजसमाख्याटवीसञ्चरणपञ्चानन पण्डितकुलपतिना वि, ए, उपाधिधारिणा
श्रीमज्जीवानन्दविद्यासागरभट्टाचार्येण विरचितायां, तदात्मजाभ्यां
पण्डितश्रीमदायुर्वेदविद्यासूनुभ्यां-पण्डितश्रीमन्नित्यानन्दविद्यारत्नाभ्यां
प्रतिसंस्कृतायां विमलाख्यायां साहित्यदर्पणव्याख्यायां
अष्टमः परिच्छेदः ॥ ८ ॥

नवमः परिच्छेदः ।

अथोद्देशक्रमप्राप्तमप्यलङ्कारनिरूपणं बहुवक्तव्यत्वेनोल्लङ्घ्य रीतिमाह (क)—

पदसङ्घटना रीतिरङ्गसंस्थाविशेषवत् ।
उपकर्त्री रसादीनाम् ॥ ६४४ ॥ (ख)

रसादीनाम्—अर्थात् शब्दार्थशरीरस्य काव्यस्यात्मभूतानाम् । (ग)

(क) उद्देशक्रमप्राप्तमलङ्कारनिरूपणं विहाय रीतिं निरूपयितुम् अस्याः प्राथमिकत्वे युक्तिमाह, अथेति ।—गुणनिरूपणानन्तरमित्यर्थः । उद्देशेति ।—"उत्कर्षहेतवः प्रोक्ताः गुणालङ्काररीतयः" इत्युद्देशक्रमप्राप्तकालमित्यर्थः । उल्लङ्घ्य—सूचीकटाहन्यायेन प्रथमं कृत्वेत्यर्थः ।

(ख) पदेति ।—पदानां सङ्घटना—सम्यक् योजना, यथास्थानविनिवेशनमित्यर्थः, रीतिः,—रीयते गुणानां विशेषो ज्ञायते अनया तथोक्ता, ("रीङ् गतौ" इत्यनेन साधुः, गत्यर्थानां ज्ञानार्थत्वात् तथा व्युत्पत्तिः) सा च अङ्गानां संस्थाविशेषः,—विशेषेण संस्थानं, यथायथं विन्यास इत्यर्थः, तद्वत्, विलक्षणमुखाद्यवयवसन्निवेशविशेषवदित्यर्थः । रसादीनाम्—अत्रादिपदेन भावरसाभासादीनां ग्रहणम् । ननु पदसङ्घटनाविशेषस्य काव्यातिरिक्तेऽपि सत्त्वादतिव्याप्तिः, अत आह, उपकर्त्रीति ।—उपकर्त्री—परिपोषिका, स्वाश्रयव्यङ्ग्यरसादिवृत्तिगुणव्यञ्जकतया रसादीनामुत्कर्षाधायिकेत्यर्थः, एवञ्च गुणाभिव्यञ्जकपदविन्यासो रीतिरिति फलितम् । वामनादयस्तु—"रीतिरात्मा काव्यस्य" इत्युक्त्वा "विशिष्टपदरचना रीतिः, विशेषो गुणात्मा" इत्याहुः ।

(ग) ननु रीतेः साक्षादेव शब्दस्योत्कर्षाधायकत्वं निरुक्तं, परम्परया तु रसादीनामित्युपपन्नं, तथाऽपि तस्याः काव्योत्कर्षाधायकत्वमनुपपन्नमित्यत आह, रसादीनामिति ।—अर्थात्—सम्भवबलात्; तथा च काव्यस्य शरीरात्मनोरुत्कर्षाधायकत्वेनैव काव्योत्कर्षाधायकत्वमिति भावः ।

सा पुनः स्याच्चतुर्विधा।
वैदर्भी चाथ गौड़ी च पाञ्चाली लाटिका तथा ॥६४५॥ (घ)

सा—रीतिः। तत्र—

माधुर्य्यव्यञ्जकैर्वर्णै रचना ललितात्मिका।
अवृत्तिरल्पवृत्तिर्वा वैदर्भी रीतिरिष्यते ॥ ६४६॥ (ङ)

यथा—"अनङ्गमङ्गलभुवः" इत्यादि। रुद्रटस्त्वाह—

"असमस्तैकसमस्ता युक्ता दशभिर्गुणैश्च वैदर्भी।
वर्गद्वितीयबहुला स्वल्पप्राणाक्षरा च सुविधेया ॥" (च)

अत्र दशगुणाः,—तन्मतोक्ताः श्लेषादयः। (छ)

(घ) तस्या भेदानाह, सेति।—सा—रीतिरित्यर्थः, पुनः वैदर्भी, गौडी, पाञ्चाली, लाटिका चेति चतुर्विधा स्यात्. विदर्भ-गौड़ पाञ्चाल-लाटदेशोद्भवैः कविभिः सम्मतत्वात् वैदर्भ्यादिसंज्ञा इत्यर्थः। तद्यथा—विदर्भाणां—विदर्भदेशभुवामियं वैदर्भी, गौड़ानां—गौड़देशभुवामियं गौड़ी, पाञ्चालानां—पाञ्चालदेशभुवामियं पाञ्चाली, लाटानां—लाटदेशभुवामियं लाटी, सैव लाटिका; प्राधान्येन हि व्यपदेशा भवन्तीति तथा व्यपदेश इति बोध्यम्। अन्ये तु लाटिकां नाङ्गीकुर्वन्ति।

(ङ) वैदर्भीमाह, माधुर्य्येति।—माधुर्य्यव्यञ्जकैः, पूर्वोक्तैरिति शेषः, वर्णैः ललितात्मिका—मनोहारिणी, सुकुमाराक्षरप्राया सुकुमारार्था चेति यावत्, अवृत्तिः,—समासरहिता, वा अल्पवृत्तिः,—अल्पसमासयुक्ता, रचना वैदर्भी—विदर्भदेशप्रचलिता, रीतिः इष्यते—कथ्यते इत्यर्थः। अन्ये त्वाहुः,—"अस्पृष्टा दोषमात्राभिः समग्रगुणगुम्फिता। विपञ्चीस्वरसौभाग्या वैदर्भी रीतिरिष्यते ॥" इति, "सति वक्तरि सत्यर्थे सति शब्दानुशासने। अस्ति तन्न विना येन परिस्रवति वाङ्मधु ॥" इति च।

(च) असमस्तैकेति।—असमस्ता—समासरहिता, वा एकसमस्ता—अल्पसमस्ता इत्यर्थः, दशभिः,—पूर्वोक्तैः श्लेषादिभिः, गुणैः युक्ता, वर्गद्वितीयैर्वर्णैः बहुला—युक्ता इत्यर्थः, स्वल्पः,—लघुः, प्राणः,—उच्चारणप्रयत्नो येषां तथाभूतानि अक्षराणि यस्यां तादृशी, वैदर्भी—वैदर्भीरचना, सुविधेया—कार्य्येत्यर्थः।

(छ) ननु गुणानां त्रित्वमेवोक्तं, कथं दशत्वम्? अत आह, तन्मतोक्ता इति।—रुद्रटमतोक्ता इत्यर्थः। (इदं पद्यं रुद्रटग्रन्थे न लभ्यते, न वा तत्र प्रकरणार्हमिति प्रक्षिप्तं प्रतीमः)।

ओजःप्रकाशकैर्वर्णैर्बन्धः आडम्बरः पुनः।
समासबहुला गौड़ी ॥६४७॥ (ञ)

यथा "चञ्चद्भुज" इत्यादि। पुरुषोत्तमस्त्वाह—

"बहुतरसमासयुक्ता सुमहाप्राणाक्षरा च गौड़ीया।
रीतिरनुप्रास-महिमपरतन्त्राऽस्त्रोभवाक्या च॥" (ट)

वर्णैः शेषैः पुनर्द्वयोः।
समस्तपञ्चषपदो बन्धः पाञ्चालिका मता॥६४८॥(ञ)

द्वयोः,—वैदर्भीगौड्योः। यथा—

"मधुरया मधुबोधितमाधवीमधुसमृद्धिसमेधितमेधया।
मधुकराङ्गनया मुहुरुन्मदध्वनिभृता निभृताक्षरमुज्जगे॥" (ट)

(ञ) गौड़ीमाह, ओज इति।—ओजःप्रकाशकैः,—उत्कटार्थप्रतिपादकैरित्यर्थः, वर्णैः आडम्बरः,—उद्भटः, उद्भटार्थप्रतिपादकतयाऽपि उद्भटः, बन्धः,—रचनाविशेषः, गौड़ी। गुणानां दशविधत्वमङ्गीकुर्वाणास्तु—"समस्तास्फुटपदौजःकान्तिगुणान्विताम्। गौड़ीयामिति गायन्ति रीतिं रीतिविशारदाः॥" इति।

(ट) बहुतरेति।—बहुतरैः समासैः,—समस्तपदैरित्यर्थः, युक्ता सुमहान्—अतिगुरुः, प्राणः,—उच्चारणकालः, यैषां तादृशानि चक्षराणि यस्यां तथोक्ता, अनुप्रासस्य—वक्ष्यमाणशब्दालङ्कारविशेषस्य, महिमः,—आधिक्यस्य, परतन्त्रा—पराधीना, अनुप्रासबहुला इत्यर्थः, श्लोकः—उद्भटं, वाक्यं—पदसमुदायः यस्यां तथाविधा, रीतिः गौड़ीया। ["श्लोकवाक्या" इति पाठे—श्लोकवाक्या—श्लिष्टवर्णेत्यर्थः] अत एव दण्ड्याचार्येणोक्तम्—"अल्पप्राणाक्षरोत्तरम्। श्लिष्टं माधुर्यसौकुमार्यवती श्लोकादिकलिता यथा। अनुप्रासबहिया गौड़ेष्वादिष्टम्—" इति।

(ञ) पाञ्चालीमाह, वर्णैरिति।—द्वयोः,—उक्तयोः वैदर्भीगौड्योः, शेषैः,—अवशिष्टैः, वैदर्भीगौड्यसम्बन्धिवर्णभिन्नैरित्यर्थः, वर्णैः [उपलक्षिते हेतौ] समस्तादि पञ्चादि पदानि यत्र तादृशः, बन्धः,—रचना, पाञ्चालिका, रीतिरित्यनुषज्यते, [अत्र-स्वार्थे कप्रत्ययः। न तु टिड्ढाण्, तथा सति ङीप्प्रत्ययः स्यात्] मता।

(ट) उदाहरतीति—यथेति। मधुरयेति।—मधुरया—मधुरशब्दयोगेनोपपन्नया प्रसादिगुणया, यद्वा—मनोहारिण्या, मधुना—मद्यपानेन, बोधिता—प्रबोधिता, या

भोजस्त्वाह—

"समस्तपञ्चषपदामोजःकान्तिसमन्विताम् ।
मधुरां सुकुमाराञ्च पाञ्चालीं कवयो विदुः ॥" (ठ)

लाटी तु रीतिर्वैदर्भीपाञ्चाल्योरन्तरा स्थिता ॥६४८॥ (ड)

यथा—"अयमुदयति मुद्रा-भञ्जनः पद्मिनीना-
मुदयगिरिवनालीबालमन्दारपुष्पम् ।
विरहविधुरकोकद्वन्द्वबन्धुर्विभिन्दन्
कुपितकपिकपोलक्रोड़ताम्रस्तमांसि ॥" (ढ)

माधवी—वासन्ती, तस्याः मधुसमृद्ध्या—मकरन्दसन्दोहेन, समेधिता—संवर्द्धिता, मेधा—स्वरमाधुर्य्यं यस्याः तथाभूतया, उन्मदध्वनिभृता—उत्कृष्टहर्षजनकशब्द-कारिण्या, मधुकराङ्गनया—भ्रमर्य्या, मुहुः,—पुनः पुनः, निभृतानि—मन्दोच्चरितानि, अक्षराणि यस्मिन् तत् यथा तथा, उज्जगे—उच्चैः गीतम् । अत्र माधुर्य्यव्यञ्जकद्वित्र-वर्णसत्त्वेऽपि विभिन्नवर्णप्राचुर्य्येणैव पाञ्चालीव्यवहारः बोध्यः । द्रुतविलम्बितं वृत्तम् । शिशुपालवधस्येदं पद्यम् ।

(ठ) समस्तेति ।—कवयः,—विद्वांसः, समस्तानि पञ्चषाणि पदानि यस्यां तथाभूताम्, ओजसा, कान्त्या—औज्ज्वल्येन च गुणेन, समन्वितां, मधुरां—मनो-हारिणीं, माधुर्य्यव्यञ्जकवर्णघटितामित्यर्थः, सुकुमारां—कोमलवर्णबहुलां, रचनामिति शेषः, पाञ्चालीं विदुः । अन्येऽप्याहुः,—"आश्लिष्टश्लथभावां तां पुराणच्छायया-ऽऽश्रिताम् । मधुरां सुकुमाराञ्च पाञ्चालीं कवयो विदुः ॥" इति ।

(ड) लाटीमाह, लाटीति ।—वैदर्भीपाञ्चाल्योः अन्तरा स्थिता—मध्यवर्त्तिनी, वैदर्भीमिश्रिता पाञ्चालीत्यर्थः, रीतिः लाटी । वैदर्भी पाञ्चाली च लक्षिता पूर्वम् ।

(ढ) उदाहरति—यथेति । अयमिति ।—सूर्य्योदयवर्णनमिदम् । पद्मिनीनां मुद्राभञ्जनः,—सङ्कोचनाशकः, विकाशक इत्यर्थः, उदयगिरेः,—उदयाचलस्य, याः वनाल्यः,—वनश्रेणयः, तासु स्थितं बालम्—अचिरविकचं, मन्दारपुष्पं—पारिभद्र-कुसुममिव, विरहेण विधुरं—विकलं, यत् कोकानां—चक्रवाकाणां, द्वन्द्वं—मिथुनं, तस्य बन्धुः,—सङ्गसम्पादकत्वेन मित्रं, सूर्य्योदये तेषां पुनर्मेलनादिति भावः, (रात्रौ हि चक्रवाकमिथुनं मिथो वियुक्तं दिवा च संयुक्तं भवतीति प्रसिद्धिः) कुपितस्य कपेः,—वानरस्य, यः कपोलः तस्य क्रोड़ः,—उत्सङ्गः, मध्यभाग इत्यर्थः,

कश्चिदाह—

"मृदुपदसमाससुभगा युक्तैर्वर्णैर्न चातिभूयिष्ठा ।
उचितविशेषणपूरितवस्तुन्यासा भवेल्लाटी ॥" (ण)

अन्ये त्वाहुः,—

"गौड़ी डम्बरबन्धा स्यात् वैदर्भी ललितक्रमा ।
पाञ्चाली मिश्रभावेन लाटी तु मृदुभिः पदैः ॥" इति । (त)

क्वचित्तु वक्त्राद्यौचित्यादन्यथा रचनादयः ॥६५०॥(थ)

वक्त्रादीत्यादिशब्दाद्वाच्यप्रबन्धौ । रचनाऽऽदीत्यादिशब्दात् वृत्तिवर्णौ । तत्र वक्त्रौचित्यात् यथा—

"मन्थायस्तार्णवाम्भःप्लुतकुहरचलन्मन्दरध्वानधीरः
कोणाघातेषु गर्जत्प्रलयघनघटाऽन्योऽन्यसङ्घट्टचण्डः ।
कृष्णाक्रोधाग्रदूतः कुरुकुलनिधनोत्पातनिर्घातवातः
केनास्मत्सिंहनादप्रतिरसितसखो दुन्दुभिस्ताड़ितोऽयम्?॥"(द)

तद्वत् ताम्रः,—रक्तवर्ण इत्यर्थः, अयं—सूर्य्यः, (विशेषणानां योग्यताबलादयमित्यनेन सूर्य्यो लभ्यते) तमांसि—अन्धकारान्, विभिन्दन्—अपसारयन्, उदेति—उदयं गच्छति । मालिनी वृत्तम् ।

(ण) मृदुरिति ।—मृदूनि पदानि यत्र तादृशेन समासेन सुभगा—मनोज्ञा, युक्तैः वर्णैः न च अतिभूयिष्ठा—नातिबहुला इत्यर्थः, उचितैः,—साभिप्रायैः, विशेषणैः पूरितः,—पोषितः, वस्तुनः,—प्रतिपाद्यस्य इतिवृत्तविशेषस्य, न्यासः,—निवेशः यत्र तादृशी, रचनेति शेषः, लाटी नाम रीतिः भवेत् ।

(त) गौड़ीति ।—डम्बरबन्धा—उद्भटरचना, ["डम्बरबद्धा" इति पाठान्तरम्] ललितक्रमा—मधुरा, मिश्रभावेन—गौड़ीवैदर्भ्योः सम्पर्केण इत्यर्थः ।

(थ) इदानीं वक्त्राद्यौचित्येन प्रकृतरीतिपरीता अपि रचनादयः कर्त्तव्या इत्यत आह, क्वचिदिति ।—तत्र वक्त्राद्यौचित्यव्यञ्जका वक्तृवाच्ययोरौचित्यम्, उद्भटत्वं, सुकुमारत्वं वा, बन्धस्यौचित्यं—स्वभावः, तथा च—वक्तृवाच्ययोः औद्धत्य-सौकुमार्य्याभ्यां प्रबन्धस्य स्वभावेन वा उपक्रान्तायाः प्रकृतेः रसव्यञ्जिकाया वा रीतेः विपरीता रचनादयः कार्य्या इति भावः ।

(द) मन्थेति ।—अयं दुन्दुभिः,—दुन्दुभिशब्दः, केन ताड़ितः ? ताड़नेन

अत्र वाच्यस्य क्रोधाद्यभिव्यञ्जकत्वेऽपि भीमसेनवक्तृत्वेनोद्धता रचनादयः। वाच्यौचित्यात् यथोदाहृते—"मूर्ध्याधूयमान" इत्यादौ। प्रबन्धौचित्यात् यथा नाटकादौ रौद्रेऽपि अभिनयप्रति-कूलत्वेन न दीर्घसमासादयः। एवमाख्यायिकायां शृङ्गारेऽपि न मसृणवर्णादयः। कथायां रौद्रेऽपि नात्यन्तमुद्धताः। एव-मन्यदपि ज्ञेयम्। (घ)

इति श्रीमन्नारायणचरणारविन्दमधुव्रतसाहित्याचार्यबलदेवोपाध्यायप्रणीतायां साहित्यदर्पण-विवृतिस्थिरत्नाकराद्दशभाषाविरचितायां मुक्तकसाहित्यविवृतौ रसभावा-दिनिरूपणो नाम

नवमः परिच्छेदः ॥ ९ ॥

ऽनितविशेषाणां मन्द्रविशेष्यकत्वेनोपपत्तेरिति चेन्न ; वस्तुतस्तु ताडितः ?—सम्बन्धः कृतः ? "सविशेषणे हि" इति न्यायेन विशेषणानां मन्द्रनादसम्बन्धित्वमिति भ्रमः ; कीदृशः ? मन्थेन—मन्थनेन, घायस्तं—घुमितं, यदूर्ध्वस्वाभ्रः तेन भृतं—व्याप्तं, कुहरं—छिद्रं, कन्दरमिति यावत्, यस्य तादृशस्य चलतो मन्दरस्य घानबन्धोः,—मन्थोः, तस्या क्रोधाघातेषु—वादनदण्डाभिघातेषु सत्सु, ("क्रोधो वादनदण्डः स्यात्" इति कोषः) गर्जन्त्याः प्रलयकालीनघनघटाया अन्योऽन्यसङ्घट्टजनध्वन्य इव शब्दः, दुर्दमं चञ्चलं क्रोधाघातकाले इत्यर्थः, यदा—"ढक्काघातसहस्राणि भेरीशत-घातानि च। एकदा यत्र ताड्यन्ते क्रोधाघातः स उच्यते॥" इति परिभाषायां यत्रैकस्य यन्त्रिणस्तिस्रोऽवलेन एकदा ढक्कादितालजन्याः शब्दाः क्रोधाघाताः, तेषु मध्ये गर्जद्दिग्गजादिवत् चञ्चत इत्यर्थः, कृष्णा—द्रौपदी, तस्याः क्रोधस्य चण्डूतः,—पुरोवायिवार्त्तावह इव, तत्क्रोधप्रवर्त्तकत्वात् तदग्रदूतः, कुरुकुलनिधनस्य उत्पातः, —तत्सूचकः, यो निर्घातः,—"यदाऽन्तरीक्षे बलवान् साङ्गतो माहतोऽहतः। प्रतस्थः स निर्घातो जायते वायुसम्भवः॥" इत्युक्तलक्षणः उत्पातविशेषः, तत्सूचितो वातः,—वायुः, तस्य निर्घातवायुसदृशस्य इत्यर्थः, भवतां सिंहनादस्य—उत्साहव्यञ्जकभीमभाषणे:, तत्प्रतिरवितं—प्रतिध्वनिः, तत्सदृशध्वनिविशिष्ट इत्यर्थः।

(घ) वाच्यस्य—वाक्यार्थस्य। क्रोधादीति।—आदिना उत्साह-जुगुप्सयो-र्ग्रहणम्। भीमसेनवक्तृत्वेनेति।—भीमस्य क्रोधनत्वादौद्धत्यं प्रसिद्धमिति भावः। यत्र तादृशस्यापि भीमसेनस्योद्भटत्वात् वाच्योद्भटत्वमपि सम्भवतीति यदभिप्रायेणोक्तम्। शृङ्गारेऽपि सुकुमाररचना यथा—"[illegible] केशव!—"इत्यादि। यथा-

दशमः परिच्छेदः ।

अथावसरप्राप्तानलङ्कारानाह (क)—

शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः ।
रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत्॥६५१॥(ख)

क्रोधनत्वेन अनुद्धतः शौरसेनी वक्ता । अभिनयप्रतिकूलत्वेन—अभिनेयार्थप्रतिपत्तिविलम्बकत्वेन । नाटकादौ रौद्रेऽपीत्यादियुक्तत्वतः यत्र कुत्र व्यभिचारवानपि सम्यग्यते; यथा हि—"उद्दामद्युमणिद्युतिव्यतिकरप्रक्षोदकौपलज्वालाजालजटालजालकुलतटीनिष्कुलकोटयः । और्वीयप्रलयानलप्रसरविश्वक्रुप्रलोभा इमो रायुष्कर्म समापयन्ति दिगमूर्मंश्चेऽङ्कि शून्या दिशः ॥" इत्यनर्घराघवे विपरीतोदाहरणं दृश्यते इति । नवरसाः, —नाधुर्येव्यञ्जकाः । नाट्यसमुद्भवाः, नर्वादय इति शेषः ।

इत्यशेषमाम्नाटवौसवरचषकानन-पण्डितकुलपतिना वि, ए, उपाधिधारिणा
श्रीमज्जीवानन्दविद्यासागरभट्टाचार्येण विरचितायां, तदात्मजाभ्यां
प्रण्डितश्रीसदाशिवविद्याभूषण-पण्डितश्रीमन्मित्रबोधविद्यारत्नाभ्यां
प्रतिसंस्कृतायां विमलाख्यायां साहित्यदर्पणव्याख्यायां
दशमः परिच्छेदः ॥ ९ ॥

(क) अलङ्कारनिरूपणे सङ्गतिमाह, अथेति ।—रीतिनिरूपणानन्तरमित्यर्थः, अवसरप्राप्तान्—अवसरसङ्गत्या निरूपयितुं युक्तानित्यर्थः; प्रतिबन्धकीभूतजिज्ञासानिवृत्तिरवसरः । प्रक्रमते सूचीकटाहन्यायेन प्रथमं रीतिनिरूपणजिज्ञासा जाता, एवमेवेहापि लक्षणप्राप्ताऽलङ्कारनिरूपणप्रतिबन्धिका, तन्निवृत्तौ अलङ्कारनिरूपणजिज्ञासा जायते इति भावः ।

(ख) अलङ्काराणां सामान्यलक्षणमाह, शब्दार्थयोरिति ।—अस्थिराः,—काव्येऽनियतधर्मवन्तः, काव्यत्वाव्यापका इति यावत्; [एतेन परम्परया शब्दार्थधर्माणां गुणानां वारणं, निरलङ्कारमपि काव्यमस्तीति च सूचितम्]। रीतेरस्थिरत्वात् तद्वारणाय, शोभातिशायिन इति ।—शोभातिशयजनका इत्यर्थः, रीतेः; शब्दशोभा-

यथा अङ्गदादयः शरीरशोभाऽतिशायिनः शरीरिणमुपकुर्वन्ति, तथाऽनुप्रासोपमादयः शब्दार्थशोभाऽतिशायिनो रसादेरुपकारकाः ये, तेऽलङ्काराः। अस्थिरा इति तेषां गुणवत् आवश्यकी स्थितिः। शब्दार्थयोः प्रथमं शब्दस्य बुद्धिविषयत्वात् शब्दालङ्कारेषु वक्तव्येषु शब्दार्थालङ्कारस्यापि पुनरुक्तवदाभासस्य चिरन्तनैः शब्दालङ्कारमध्ये लक्षितत्वात् (ग) प्रथमं तमेवाह—

आपाततो यदर्थस्य पौनरुक्त्यावभासनम्।
पुनरुक्तवदाभासः स भिन्नाकारशब्दगः॥६५२॥ (घ)

उदाहरणं—"भुजङ्गकुण्डली व्यक्तशशिशुभ्रांशुशीतगुः।
जगन्त्यपि सदापायादव्याच्चेतोहरः शिवः॥" (ङ)

जनकत्वेऽपि मुख्यालङ्कारवच्छोभाऽतिशयजनकत्वं नास्तीति भावः। नीरसशब्दार्थयोरनुप्रासोपमादीनां मुख्यालङ्कारत्वव्यवच्छेदायाह, रसादीनिति।—उपकुर्वन्तः,—उत्कर्षयन्तः; एवञ्च यत्र रसो नास्ति, तत्रोक्तिवैचित्र्यमात्रप्रयोजकेषु अनुप्रासोपमादिषु अलङ्कारपदप्रयोगो गौण एव; ["तरङ्गनिकरोद्गीत-तटशीकरषड्जला। सरित् वहति कल्लोल-वाहव्याहततोरभूः॥" इत्यादौ रसानुसन्धानरहिते यद्रूपकानुप्रासयोरलङ्कारव्यवहारः, स गौण एव इति मन्तव्यम्]।

(ग) कारिकार्धं विवृणोति, यथेति।—शरीरिणम्—आत्मानम्। अनुप्रासादेः शब्दालङ्कारत्वादुपमादेश्चार्थालङ्कारत्वादुभयोः पृथगुपादानम्। गुणेषु अतिव्याप्तिं वारयति, तेषामिति।—एषाम्—अलङ्काराणाम्। शब्दालङ्कारनिरूपणस्य प्राथमिकत्वे हेतुं दर्शयंस्तत्रापि पुनरुक्तवदाभासनिरूपणस्य प्राथमिकत्वे हेतुमाह, शब्दार्थयोरिति।—वक्तव्येषु—निरूपणयोग्येषु। शब्दार्थालङ्कारत्वापोत्थनेन शब्दार्थमयशब्दमूलध्वनिवस्तुपर्यन्तनिरूपणयोग्यत्वमस्य सूचितम्। चिरन्तनैरित्यादिवाक्यस्तु अस्य शब्दालङ्कारप्रकरणे निरूप्यत्वे हेतुः, तथापि अस्य प्रथमनिरूपणे सूचीकटाहन्याय एव हेतुर्द्रष्टव्यः।

(घ) आपातत इति।—आपाततः,—श्रवणमात्रतः, तात्पर्यानवधारणदशायामित्यर्थः, यदर्थस्य—वाच्यस्य, यत् पौनरुक्त्यावभासनं—पुनरुक्तवत् स्फुरणं, भिन्नाकारशब्दगः,—पृथगाकारशब्दगामी, (एतत् यमकेऽतिव्याप्तिवारणार्थम्) स पुनरुक्तवदाभासो नाम अलङ्कारः।

(ङ) शब्दस्य मुख्यामुख्यार्थां द्विविधे तस्मिन् प्रथमतः शब्दाभ्यमुदाहरति,

अत्र भुजङ्गकुण्डल्यादिशब्दानाम् आपातमात्रेण सर्पाद्यर्थं-तया पौनरुक्त्यप्रतिभासनं, पर्य्यवसाने तु भुजङ्गरूपं कुण्डलं विद्यते यस्येत्यादन्यार्थत्वम्। "पायादव्यात्" इत्यत्र क्रियागतो-ऽयमलङ्कारः, "पायात्" इत्यस्य "अपायात्" इत्यत्र पर्य्यवसा-नात्। "भुजङ्गकुण्डली" इति शब्दयोः प्रथमस्यैव परिवृत्ति-सहत्वम्। "हरः शिवः" इति द्वितीयस्यैव। "अग्निगुप्ताशु" इति द्वयोरपि। "भाति सदानत्यागः" इति न द्वयोरपीति शब्दपरि-वृत्तिसहत्वासहत्वाभ्याम् अस्य उभयालङ्कारत्वम्। (च)

भुजङ्गेति।—भुजङ्ग एव कुण्डलं तत् विद्यते अस्य स तथोक्तः, व्यालः,—उक्तवत्, अग्निगुप्ताशुशीतगुः,—अत्र अग्निगुप्ताशुशीतगुशब्दैः पौनरुक्त्यमापातात: प्रतिभाति, पर्य्यवसाने तु—अग्निः कर्पूरश्चैव, गुप्ता पंक्तयो यस्य तादृशः, शीतगुः चन्द्रो यत्र स इत्यर्थः। चैतोहरः,—मनोहरः, शिवः सदा अपायात् (इत्यपि शब्दाभङ्गः) जगति अव्यात्—रक्षतु।

(च) अस्योभयालङ्कारात्मकत्वमुपपादयति, अत्र भुजङ्गकुण्डलीति।—भुजङ्गावर्तश्च इति द्वितीयपरिवर्तने पौनरुक्त्यमेव नास्तीति भावः। एवमग्रेऽपि यथायथं बोध्यम। परिवृत्तिसहत्वं—शब्दपरिवर्तनेऽपि प्रकृतार्थबोधनक्षमत्वम्। "द्वयोरपि" इत्यनेन "शीतगुः" इति तृतीयस्यापि बोधः। शब्दभङ्गे उदाहरणं यथा भातीति।—श्लोकस्य क्रियादंशोऽयम। श्लोकस्तु—"अरिषट्टेडभरीरः षड्सारथिः सूततुरगपादातः। भाति सदानत्यागः क्षितावानवनितलतिलकः॥" इति, अरीणां षण्णां षट्त्वमेति तथोक्ता दृढा श्रेष्ठा यस्य तत् तादृशं शरीरं यस्य तथाभूतः, दृढा—अरिषट्टा शत्रुसंहारिणी, दृढा चेष्टा येषां तथाभूताः, ये अरिषः शत्रवः सैनिकाः, तान् डुरयति क्षेपयति इति अरिषट्टेडभरीरः, सारथिभिः षड्गुण-भूतैः, सूनृतत्वपादानैः सारथ्यप्रदातृभिः षड्भ वर्त्तमानः; यद्वा—षड्डसा क्षीरं, दधिभिः सुष्ठु जाताः षड्डाः, तुरगाः अश्वाः, पादाताः पद्भ्यां गतिकाश्च यस्य सः, षड्डिन्नवतिपक्षः;—त्रिंशोत्तरशतादभूषण्णव इत्यर्थः, सदा—सर्वदा, धनत्या—कृपणतयाहेतु, अवितृ इति क्षेत्रः, क्षितावाम्—इहलोकरक्षिणाम्, अग्रः,—पर्वत इव, [अत्र उपमालङ्कारोऽपि] सदा—सदानत्या—सतां विषये दातृत्वा अति-शयभावेन, भाति—विराजते। अत्र द्वितीयपरिवर्तने, चारणिकपक्षे, दानत्वागुणेन सत्कार्यत्वात्

अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्॥६५३॥(छ)

स्वरमात्रसादृश्यन्तु वैचित्र्याभावान्न गणितम्। रसाद्यनुगतत्वेन प्रकर्षेण न्यासोऽनुप्रासः। (ज)

आपाततः पौनरुक्त्यमिव प्रतीयते। इह तु देहशरीरयोः सारथिसूतयोश्च द्वितीयस्यैव परिवृत्तिसहत्वं, दानत्यागयोर्द्वयोरपि न इति बोध्यम्। अस्योदाहरणान्तरं यथा—"अम्बरेण गगनेन संवृतं जीवनैः शिरसि वारिभिः श्रितम्। भोगिभिश्च भुजगैः विभूषितं शङ्करं शुभकरं भजामहे॥" इति। इह अम्बरेण गगनेन, जीवनैः वारिभिः, भोगिभिः भुजगैः, शङ्करं शुभकरम् इत्यादौ आमुखे पौनरुक्त्यप्रतीतिः, पर्य्यवसाने विभिन्नार्थकत्वबोधात् तदभाव इति सङ्क्षेपः। अस्य—पुनरुक्तवदाभासस्य। उभयालङ्कारत्वं—शब्दार्थालङ्कारत्वमित्यर्थः, यत्र शब्दपरिवर्त्तनेऽपि तदलङ्कारसद्भावः, तत्रार्थालङ्कारः; यत्र तत्तच्छब्दानां सद्भाव एवालङ्कारः, तत्र शब्दालङ्कारः; यत्र तु कियदंशे शब्दपरिवृत्तिसहत्वं, कियदंशे न तथा, तत्रोभयालङ्कार इति तदन्वयव्यतिरेकेणालङ्कारव्यवस्थितिरिति बोध्यम्।

(छ) अनुप्रासालङ्कारमाह, अनुप्रास इति।—स्वरस्य वैषम्ये—वैलक्षण्ये, भिन्नत्वेऽपीत्यर्थः, "वैषम्येऽपि" इत्यपिना साम्येऽपीति लभ्यते; एतच्च स्वरसाम्यं लाटानुप्रासे नियतमिति बोध्यम्; यत् शब्दानां वर्णपदैकदेशपदानामन्यतमरूपाणां, साम्यं सादृश्यं, समभावेनावृत्तिरिति यावत्, सः अनुप्रासः। वर्णानां सादृश्यञ्च कत्वादिना एकस्थानोच्चार्य्यत्वेन च; तेन वर्णत्वादिना सदृशस्य विजातीयवर्णस्य आवर्त्तने नातिप्रसङ्गः, नापि श्रुत्यनुप्रासासङ्ग्रहः, पदपदैकदेशयोस्तु तत्तद्व्यञ्जनघटितत्वेन छेकलाटानुप्रासयोः सङ्ग्रहाय "वर्णसाम्यम्" इत्यनुक्त्वा "शब्दसाम्यम्" इति कृतम्। वस्तुतस्तु—पदतदेकदेशसाम्येऽपि वर्णसाम्यसम्भवात् शब्दपदं वर्णमात्रपरम्; अत एव "वर्णसाम्यमनुप्रासः" इति काव्यप्रकाशः। न च समस्वरपदतदेकदेशसाम्यं यमकेष्वतिव्याप्तम् इति वाच्यं, तेषां प्रकरणनियम्यतया तदतिरिक्तत्वेनास्य विशेषणात्।

(ज) ननु "वैषम्येऽपि स्वरस्य" इत्यनेन व्यञ्जनसाम्यमनुप्रासः इति लभ्यते, स्वरमात्रसाम्यं न कथम् अनुप्रासः? इत्यत आह—स्वरमात्रेति। अनुप्रासपदव्युत्पत्तिमाह, रसादीति।—[तृतीयाद्वयं विशेषणे] रसाद्यनुगतः प्रकृष्टश्चेत्यर्थः, स्वाश्रयशब्दप्रकर्षणद्वारा रसादिप्रकर्षकत्वं, तेनैव प्रकृष्टत्वम्। आस इत्येकदेशार्थमाह—न्यास इति।

छेको व्यञ्जनसङ्घस्य सकृत् साम्यमनेकधा॥६५४॥ (झ)

छेकः,—छेकानुप्रासः। अनेकधेति स्वरूपतः क्रमतश्च। "रसः सरः" इत्यादेः क्रमभेदेन सादृश्यं नास्यालङ्कारस्य विषयः। (ञ)

उदाहरणं मम तातपादानाम्—

"आदाय वकुलगन्धानन्धीकुर्वन् पदे पदे भ्रमरान्।
अयमेति मन्दमन्दं कावेरीवारिपावनः पवनः॥" (ट)

अत्र "गन्धानन्धी" इति संयुक्तयोः, "कावेरीवारि" इत्यसंयुक्तयोः, "पावनः पवनः" इति बहूनां व्यञ्जनानां सकृदावृत्तिः। छेको विदग्धः, तत्प्रयोज्यत्वादेष छेकानुप्रासः।

अनेकस्यैकधा साम्यमसकृद्वाऽप्यनेकधा।
एकस्य सकृदप्येष वृत्त्यनुप्रास उच्यते॥६५५॥ (ठ)

(झ) छेकादिभेदात् पञ्चविधे तत्र छेकमाह, छेक इति।—व्यञ्जनानां—हल्वर्णानां, सङ्घस्य—समूहस्य, अनेकधा—स्वरूपतः क्रमतश्च, सकृत्—एकवारं, साम्यं—सादृश्येनावर्त्तनं, छेकः। यद्वा—छेकाः,—गृहासक्ताः पक्षिणः, तेषां प्रायः द्विर्भाषितं प्रसिद्धम् इति छेकभाषितोपलक्षितः अनुप्रासः छेकानुप्रासः ["छेकस्त्रिषु विदग्धेषु गृहासक्तमृगाण्डजे" इति रभसः] एषः सजातीयव्यवधानरहितद्वित्रादिवर्णानामपि समावर्त्तने सम्पद्यते, तत्र प्रमाणं—"सजातीयाव्यवहित-वर्णा द्वित्रादयो यदि। आवर्त्तन्ते तदा केचिच्छेकानुप्रासमूचिरे॥" इति।

(ञ) नास्यालङ्कारस्येति।—छेकानुप्रासस्य इत्यर्थः, न विषयः,—न स्थानम्; तथा च, तद्वारणायैव क्रमतश्चेत्युपात्तम्।

(ट) उदाहरति, आदायेति।—अयं पवनः वकुलानां गन्धान् आदाय पदे पदे—स्थाने स्थाने, भ्रमरान् अन्धीकुर्वन्—मधुलोभेन अन्धवत् भ्रान्तान् कुर्वन्, वकुलगन्धेन उन्मादयन् वा इत्यर्थः, कावेर्य्याः,—तन्नाम्न्या नद्याः, वारिणा—तत्सङ्गेनेति यावत्, पावनः,—पवित्रतामादधानः सन्, मन्दमन्दम् एति—गच्छति, वहतीत्यर्थः।

(ठ) वृत्त्यनुप्रासमाह, अनेकस्येति।—अनेकस्य—एकभिन्नस्य व्यञ्जनस्य, एकधा—स्वरूपत एव, न तु क्रमतोऽपीत्यर्थः, वा—किंवा, असकृत्—पुनः पुनः, अनेकधा—स्वरूपतः क्रमतश्च इत्यर्थः, तथा एकस्य—व्यञ्जनस्य, सकृत् (अपिशब्दात् असकृच्च) साम्यं—समभावेनावर्त्तनम्, एष वृत्त्यनुप्रासः उच्यते—कथ्यते।

एकधा—स्वरूपत एव, न तु क्रमतोऽपि। अनेकधा—स्वरूपतः क्रमतश्च। "सङ्गतैरपि" इत्यपिशब्दात्सङ्गतैरपि। उदाहरणम्—

"उन्मीलन्मधुगन्धलुब्धमधुव्याधूतचूताङ्कुर-
क्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः।
नीयन्ते पथिकैः कथञ्चिदपि ध्यानावधानक्षण-
प्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः॥" (ङ)

अत्र "रसोल्लासैरमी" इति रसयोरेकधैव साम्यं, न तु तेनैव क्रमेणापि। द्वितीये पादे तु कलयोरसङ्गत्। तेनैव क्रमेण च प्रथमे एकस्य तकारस्य सङ्गत् धकारस्य च असङ्गत्। रसविषयव्यापारवती वर्णरचना वृत्तिः, तदनुगतत्वेन प्रकर्षेण न्यसनात् वृत्त्यनुप्रासः। (ढ)

(ङ) उन्मीलन्मधुगन्धेति।—वसन्तवर्णनमिदम्। उन्मीलत्सु प्रादुर्भवत्सु च सङ्गच्छत्सु, मधुषु पुष्पासवेषु ये मधुपा भ्रमराः, तैः व्याधूतेषु विशेषेणाकम्पितेषु, चूताङ्कुरेषु आम्रमुकुलेषु, क्रीडतां विहरतां, कोकिलानां पिकानां, काकलीनां सूक्ष्मकलध्वनीनां, कलकलैः कोलाहलैः, प्रौढग्रहैरित्यर्थः, उद्गीर्णैः सञ्जनितैः, प्रवासिजन निषिद्ध इत्यर्थः, कर्णज्वराः कर्णेषु पीड़ा येषु तथाविधाः, अमी वासराः वासन्ताः दिवसा इत्यर्थः, पथिकैः प्रवासिकामुकैः, ध्यानं, प्रियाया इति भावः, यत् अवधानं मनोनिवेशः, तस्य क्षणे प्राप्तेन अनुभूतेन, प्राणसमाया: प्रियतमायाः, समागमरसेन सम्भोगरसेन, सङ्गमसुखेन इत्यर्थः, उल्लसन्ति सन्तुष्यन्तीति तथोक्तैः, कथञ्चनापि अतिकृच्छ्रेणेत्यर्थः, नीयन्ते अतिवाह्यन्ते। प्रादूसविक्रीडितं छन्दः।

(ढ) अत्रेति।—रसयोः,—रेफसकारयोः। प्रथमे इति।—पादे इत्यनेनान्वयः, प्रवृत्तिरिति: क्रियानुकूला वृत्ति वेदितव्या:। तदाह्युत्पत्तिनाह, रसेति।—रसविषयः यः व्यापारः अवसनजननादिकं, तद्वती तदनुकूलविशेषवती। इतिच त्रिविधा—उपनागरिका, परुषा, कोमला च। तदुक्तं काव्यप्रकाशे—"माधुर्यव्यञ्जकैर्वर्णैरुपनागरिकोच्यते। ओजःप्रकाशकैस्तैस्तु परुषा कोमला परैः॥" परैः,—श्लेषैः। श्लिष्टैः कोमला ग्राह्या वदन्ति। इयं तिस्रः वृत्तयः वैदर्भी गौड़ी पाञ्चालीसंज्ञक-

उच्चार्य्यत्वात् यदेकत्र स्थाने तालुरदादिके।
सादृश्यं व्यञ्जनस्यैव श्रुत्यनुप्रास उच्यते ॥६५६॥ (ण)

उदाहरणं—

"दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः।
विरूपाक्षस्य जयिनीस्ताः स्तुमो वामलोचनाः॥" (त)

अत्र "जीवयन्ति" इति "याः" इति "जयिनीः" इत्यत्र जकारयकारयोरेकत्र स्थाने तालौ उच्चार्य्यत्वात् सादृश्यम्। एवं दन्त्यकण्ठ्यानामप्युदाहार्य्यम्। एष च सहृदयानामतीव श्रुतिसुखावहत्वाच्छ्रुत्यनुप्रासः। (थ)

व्यञ्जनं चेत् यथाऽवस्थं सहाद्येन स्वरेण तु।
आवर्त्त्यतेऽन्त्ययोज्यत्वादन्त्यानुप्रास एव तत् ॥६५७॥ (द)

रीतित्वेन प्राङ्निर्दिष्टाः इति ग्रन्थकृतेह नोक्ताः। [illegible], तेन वृत्त्यनुगतत्वेन इत्यर्थः।

(ण) श्रुत्यनुप्रासमाह, उच्चार्य्यत्वादिति।—एकत्र—एकस्मिन्, तुल्यरूपे इत्यर्थः, स्थाने—वर्णानामुच्चारणस्थाने, तालुरदादिके—तालुदन्तप्रभृतौ, (आदिना मूर्द्धकण्ठोष्ठानां सङ्ग्रहः) उच्चार्य्यत्वात् व्यञ्जनस्य यत् सादृश्यं स श्रुत्यनुप्रास उच्यते। अत्र स्वरूपतः साम्याभावेऽप्यनुप्रासत्वं प्रागेवोपपादितम् इति ज्ञेयम्।

(त) दृशेति।—याः,—वामलोचनाः, दृशा—हरनेत्रेणेत्यर्थः, दग्धं—भस्मीकृतं, मनसिजं—कामं, दृशैव—नेत्रेणैव, जीवयन्ति—सजीवं कुर्वन्ति, नेत्रविक्षेपेण कामाविष्करणादिति भावः, विरूपाक्षस्य—विषमनयनस्य, त्रिलोचनस्य इत्यर्थः, जयिनीः,—विजेत्रीः, ताः वामलोचनाः,—वामाक्षीः, स्तुमः,—नमामः।

(थ) संज्ञाव्युत्पत्तिमाह, एष इति।—अनुप्रासविशेष इत्यर्थः।

(द) सव्युत्पत्तिकमन्त्यानुप्रासमाह, व्यञ्जनमिति।—चेत्—यदि, यथाऽवस्थं—सादृश्या अवस्थया स्थितं, व्यञ्जनम् आद्येन स्वरेण सह आवर्त्त्यते—पुनरुच्चार्य्यते, तत्—तदा, अन्त्ययोज्यत्वात्—अन्त्ये—पादस्य पदस्य वा अवसाने, (अन्त एव अन्त्यः) योज्यत्वात्—प्रयोज्यत्वात्, एष अन्त्यानुप्रासः।

"यथाऽवश्यम्" इति यथासम्भवमनुस्वारविसर्गस्वरसंयुक्ता-क्षरविशिष्टम्। एषं च प्रायेण पादस्य पदस्य चान्ते प्रयोज्यः। पादान्तगो यथा मम—

"केशः कामस्तवकविकासः कायः प्रकटितकरभविलासः।
चक्षुर्दग्धवराटककल्पं त्यजति न चेतः काममनल्पम्॥" (घ)

पदान्तगो यथा—

"मन्दं हसन्तः पुलकं वहन्तः" इत्यादि। (ङ)

शब्दार्थयोः पौनरुक्त्यं भेदे तात्पर्य्यमात्रतः।
लाटानुप्रास इत्युक्तो—" ॥ ६५८ ॥ (च)

(घ) केश इति।—केशः कामस्य कामकुसुमस्य, स्तवकवत् विकासः प्रकाशः यस्य तथाभूतः, भवत इत्यर्थः, कायः देहः, प्रकटितः प्रकाशितः, करभस्येव करिशावकस्येव, विलासः विभ्रमः येन तथाविधः, कुलीभावमापन्न इति भावः, चक्षुः नयनं, दग्धं यत् वराटकं तस्मात् कुत्सितं, तत्सदृशमित्यर्थः, (तथाऽपि) चेतः मनस्यं प्रवर्त्तमानमित्यर्थः, कामं विषयाभिलाषं, न त्यजति। अत्र "विकासः" इति प्रथम-पादान्तस्थितस्य आस इति पदांशः द्वितीयपादान्ते आवर्त्तितः, तथा तृतीयपादान्त-स्थितः "वहन्" इति पदांशः चतुर्थपादान्ते पुनः पठितः। अत्र पञ्चकोटिका उक्तम्; "प्रतिपदयमनस्थितगोऽक्षमाला नवमगुरुत्वविभूषितमाला। पञ्चकोटिकाया एष विवेकः क्वापि न मध्यगुरुर्न च एकः॥" इति लक्षणात्। यथा वा—"अनलमहिमव्याप्त-विश्वां वेधा न वेद यां। या च मातेव भजते प्रथते मानवे दयाम्॥" इति।

(ङ) अथ पदान्तगस्य उदाहरणमाह—मन्दमिति। उदाहरणान्तरं यथा स्तुतिकुसुममालायां—"सारासारविदः सतां भवभिदः प्रह्लादतापच्छिदः कारुण्यार्द्र-हृदः प्रपन्नसुहृदः क्षारोभवक्षांविदः। मातारीवविभ्रः प्रकाशितदिभ्रः कीर्त्या सदा नि-र्विघ्नः सर्वज्ञोभ्र निभ्रः प्रसन्नसुहृत्सत्पादपीठसुभ्रः॥" इति।

(च) लाटानुप्रासमाह, शब्दार्थयोरिति।—तात्पर्य्यमात्रतः, न तु अर्थतः इति भावः, भेदे इति तात्पर्य्यविषयान्वयमात्रभेदे सतीत्यर्थः, अत एव "अन्वयमात्रभेदात्" इति वाग्भटालङ्कारः। ननु "वातु वातु किननेन विहता सुख सुख खलि! सादरं वचः" इत्यादौ श्लोकादिव्यञ्जके शब्दार्थपौनरुक्त्ये लाटानुप्रासप्रसङ्गः भवितुमर्हति इत्यतः "भेदे" इति पदमुपात्तम्। तथा च—"वातु वातु" इत्यादौ अन्वयभेदो नास्ति, किन्तु

उदाहरणम्—

"स्मेरराजीवनयने ! नयने किं निमीलिते ? ।
पश्य निर्जितकन्दर्पं कन्दर्पवशगं प्रियम् ॥" (फ)

अत्र विभक्त्यर्थस्य अपौनरुक्त्येऽपि मुख्यतरस्य प्रातिपदिकांशद्योत्यधर्मिरूपस्य अभिन्नार्थत्वाल्लाटानुप्रासत्वमेव । (ब)

क्रोधव्यञ्जकमेव पौनरुक्त्यमिति भावः । शब्दार्थयोः शब्दः प्रातिपदिकं पदञ्च, तथा अर्थश्च तयोरित्यर्थः, भिन्नार्थशब्दपौनरुक्त्ये यमकस्यैव विषयः इति तद्वारणाय अर्थेति, पौनरुक्त्यं लाटानुप्रासः इति उक्तः । "स्मेरराजीवनयने ! लोचने किं निमीलिते" इत्यादौ अर्थमात्रस्य पौनरुक्त्ये नायमनुप्रासः इति शब्दार्थोभयोरुपादानम् । अर्थस्य पौनरुक्त्यन्तु पूर्वपदार्थविशेषणविशेष्याभ्यां सह उत्तरपदार्थविशेषणविशेष्ययोरैक्ये सम्भवति ; तेन "घनेन संवृते सुमुखि ! व्योम्नि विभाति चन्द्रमाः" इत्यादौ विशेषणयोः भेदात् नायमनुप्रासः ; नापि "वपुः कान्तं वचः कान्तं मनस्तु परुषं तव" इत्यादौ विशेष्ययोर्भेदात् । प्रकाशकारोऽप्याह—"शब्दस्तु लाटानुप्रासो भेदे तात्पर्य्यमात्रतः" इति । तत्र शब्दस्य पौनरुक्त्यं द्विरुक्तिः, प्रातिपदिकपौनरुक्त्यञ्च तावदेकस्मिन् समासे विभिन्नसमासे समासासमासयोश्च सम्भवतीति त्रिविधम् । तद्यथा—"सितकरकररुचिरविभा विभाकराकारधरणीधरकीर्त्तिः । पौरुषकमला कमला साऽपि तवैवास्ति नान्यस्य ॥" अत्र करेति प्रातिपदिकावृत्तिरेकस्मिन् समासे, विभेति भिन्ने, कमलेति समासासमासयोश्च इति ।

(फ) समासासमासगतं प्रातिपदिकपौनरुक्त्यं विशेषेणोदाहर्त्तुमाह, स्मेरेति ।—स्मेरं विकसितं, यत् राजीवं तद्वत् नयने यस्याः तत्सम्बुद्धौ, नयने किं—कथं, निमीलिते ? निर्जितः कन्दर्पो येन तादृशम्, अतिसुन्दरमित्यर्थः, प्रियं—कान्तं, कन्दर्पवशगं—कामपरतन्त्रं, पश्य—अवलोकय ।

(ब) नन्वत्र प्रातिपदिकस्य पौनरुक्त्यसत्त्वेऽपि विभक्त्यर्थस्य भिन्नत्वात् अर्थपौनरुक्त्यं नास्तीति कथमस्य विषयः ? इत्यत आह, अत्रेति ।—अत्र विभक्त्यर्थस्य एकत्र सम्बोधनरूपस्य, अन्यत्र कर्मरूपस्य, मुख्यतरस्य विभक्त्यपेक्षया प्रधानस्य, प्रकृतिप्रत्यययोः प्रकृतेरेव प्राधान्यम् आश्रयत्वादिति भावः, प्रातिपदिकांशेन शब्दांशेन, द्योत्यस्य प्रतिपाद्यस्य, धर्मिरूपस्य नेत्ररूपार्थस्य, अभिन्नार्थत्वात् एकार्थत्वात् । [अत्र "भिन्नार्थत्वात्" इति पाठे—पुनरुक्तत्वादित्यर्थः] । अत्र विभक्तेः भिन्नत्वात् तात्पर्य्यभिन्नत्वं बोध्यम् ।

"नयने तस्येव नयने च" अत्र द्वितीयनयनशब्दो भाग्यवत्त्वादिगुणविशिष्टत्वरूपतात्पर्यमात्रेण भिन्नार्थः । (भ)

यथा वा—

"यस्य न सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य ।
यस्य च सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य ॥"(म)

अत्र अनेकपदानां पौनरुक्त्यम् । एष च प्रायेण लाटजनप्रियत्वाल्लाटानुप्रासः ।

"—ऽनुप्रासः पञ्चधा ततः ॥६५८॥ (य)

स्पष्टम् ।

(भ) तत्पर्यान्तरसङ्क्रमितवाच्य ध्वनाविवापातत: शब्दार्थयोः पौनरुक्त्यावभासनेऽपि पर्यवसाने वक्तृतात्पर्यविषयविशेषचान्तरप्रतीत्या भिन्नार्थत्वावभासनेनायमनुप्रासः इत्यभिप्रायेणाह—नयने इति । भाग्यवत्त्वेति ।—भाग्यवत्त्वादिगुणरूपं यद्विशिष्टत्वं विशेषणं, तन्मात्रेण वक्तृतात्पर्यमात्रेण, भिन्नार्थ इति योजनाविपरीत्येनान्वयः । अत एव "दैन्येऽपि लाटानुप्रासेऽनुबन्धायां प्रसादने । पर्यायान्तरसङ्क्रमितवाच्ये हर्षेऽवधारणे ॥" इत्यर्थान्तरसङ्क्रमितवाच्यध्वनेः पृथगुपादानं सङ्गच्छते । तात्पर्यमात्रेणैवात्र लाभपदेन नयनत्वस्य व्यवच्छेदः ।

(म) एकानेकपदगतत्वेन द्विविधे पदपौनरुक्त्ये प्रथमम् अनेकपदपौनरुक्त्यम् उदाहरति, यस्येति ।—यस्य सविधे—समीपे, दयिता—प्रिया, न, विद्यते इति शेषः, तस्य तुहिनदीधितिः,—चन्द्रः, दवदहनः,—दावाग्निः ; यस्य सविधे दयिता, विद्यते इति शेषः, तस्य दवदहनः तुहिनदीधितिः । अत्र प्रथमार्धे—तापकरत्वात् तुहिनदीधितिर्दवदहनः, परार्धे तु—तादृशदुःखाजनकत्वात् दवदहनोऽपि तुहिनदीधितिरिति तात्पर्यविषयस्योद्देश्यविधेयभावेनान्वयस्य भेदः, पदार्थानां त्वभेद एव । अत्र गौतिश्छन्दः, तथोक्तम्—"यार्यापूर्वमार्द्धं वर्णा यत्रोपरार्द्धमाप्ता तां गौतिम्" इति । एकपदपुनरुक्ते यथा—"वहनं वरवर्णिन्यास्तव: सत्यं सुधाकरः । सुधाकरः स तु पुनः कथङ्कथमिवासौ भवेत् ?॥" अत्र विभक्तिसहितस्य प्रातिपदिकस्य तदर्थस्य च पौनरुक्त्यम् ; वहनं सुधाकरपदं विधेयार्थम्, वरवर्णिन्यास्तवेत्यर्थम् ।

(य) चतुर्धेति ।—ततः,—पूर्वोक्तया रीत्या, छेक-वृत्ति-श्रुति-अन्त्य-लाटी-रूपभेदादिति यावत्, चतुर्धा: पञ्चधा—पञ्चविधः । चरमस्यप्रकारस्यं पदानुप्रास

सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः।
क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते ॥ ६६० ॥ (र)

अत्र द्वयोरपि पदयोः क्वचित् सार्थकत्वं, क्वचिन्निरर्थकत्वं, क्वचिदेकस्य सार्थकत्वम्, अपरस्य निरर्थकत्वम्; अत उक्तं—"सत्यर्थे" इति। तेनैव क्रमेण "दमो मोदः" इत्यादेर्विविक्तविषयत्वं सूचितम्। एतच्च पदपदार्द्धश्लोकावृत्तित्वेन पादाद्यावृत्तेश्चानेकविधतया प्रभूततमभेदम्। दिङ्मात्रमुदाह्रियते (ल)—

इत्यन्ये, अयञ्चान्यैरुभयालङ्कारतयोक्तोऽपि शब्दविशेषान्वयव्यतिरेकानुविधायित्वात् ग्रन्थकृता शब्दालङ्कारमध्ये गृहीतः इति बोध्यम्।

(र) यमकमाह, सत्यर्थे इति।—अर्थे सति—विद्यमाने, पृथगर्थायाः,—भिन्नार्थायाः, स्वरव्यञ्जनानां संहतेः,—समूहस्य, (स्वरव्यञ्जनयोरेकत्वेऽपि यमकं भवति, यथा—"नानाकारेण कान्ताभ्रूराराधितमनोभुवा। विविक्तेन विलासेन ततश्च हृदयं मम॥" एतद्वर्णयमकं वामनसम्मतम्)। तेनैव—पूर्वोक्तेनैव, क्रमेण—येन क्रमेण प्रथमं स्वरव्यञ्जनसमूह उक्तस्तेनैवेत्यर्थः, आवृत्तिः,—आवर्त्तनं, पुनः कथनमित्यर्थः, यमकं विनिगद्यते—कथ्यते।

(ल) अत्र द्वयोरिति।—पदयोः,—स्वरव्यञ्जनसमूहयोः। क्वचिदिति।—"नगजानगजा दयिता दयिता" इत्यादौ। क्वचिन्निरर्थकत्वमिति द्वयोरित्यनुषङ्गः; यथा—"विजितामरतामरसेक्षणा" इत्यादौ; अत्र तामरेतिस्वरव्यञ्जनसमूहयोः पदैकदेशत्वात् निरर्थकत्वम्। एकस्येति।—प्रथमस्य द्वितीयस्य वा स्वरव्यञ्जनसमूहस्येत्यर्थः। विविक्तविषयत्वं—विभिन्नविषयत्वं, यमकादिति शेषः, पूर्वोक्तक्रमेणैव उक्तेरावश्यकत्वकथनात् "दमो मोदः" इति नास्यालङ्कारस्य विषय इत्यर्थः। रसादीनामत्यन्तोपकारिणो यमकप्रपञ्चस्य निर्वचनमनतिप्रयोजनमिति सङ्क्षेपेणैव यमकनिरूपणं ज्याय इत्यभिप्रायेणाह, एतच्चेति।—यमकञ्चेत्यर्थः। अत्र पदपदं पादैकदेशपरम्, अर्द्धपदं श्लोकार्द्धपरम्। पादाद्यावृत्तेश्चेति।—पादस्य द्विधा त्रिधा चतुर्द्धा वा खण्डने चानेकविधत्वम्, [आदिना पादश्लोकार्द्धयोः सङ्ग्रहः]। तत्र प्रथमपादस्य द्वितीयाद्यन्यतमस्मिन् द्वितीयादिसमुदाये च, द्वितीयस्य तृतीयाद्यन्यतरस्मिन् तृतीयादिसमुदाये च, तृतीयस्य चतुर्थे चावृत्तिः सम्भवतीति दशविधत्वमेव पादयमकस्य; एवं प्रथमार्द्धस्य द्वितीयार्द्धे, प्रथमपादस्य द्वितीये, तृतीयस्य चतुर्थे;

"नवपलाश-पलाशवनं पुरः
स्फुटपराग-परागत-पङ्कजम्।
मृदुल-तान्त-लतान्तमलोकयत्
स सुरभिं सुरभिं सुमनोभरैः॥" (व)

अत्र पदावृत्तिः "पलाशपलाश" इति। "सुरभिं सुरभिम्" इत्यत्र च द्वयोः सार्थकत्वम्। "लतान्तलतान्त" इत्यत्र प्रथमस्य निरर्थकत्वम्। "परागपराग" इत्यत्र द्वितीयस्य। एवमन्यदप्युदाहार्यम्। (श)

द्वितीयस्य तृतीये पादे आवृत्तिः सम्भवतीति श्लोकार्द्धयमकस्य वैविध्यम्। श्लोकयमकमपि विभागतोयचतुष्पादावृत्त्या च द्विविधम्। प्रभूततमभेदं—बहुभेदमित्यर्थः। दिङ्मात्रं—किञ्चिन्मात्रं, प्रकारान्तरोपलक्षणमप्यत्रेत्यर्थः।

(व) नवेति।—राजसूये निमन्त्रितस्य इन्द्रप्रस्थं गच्छतः कृष्णस्य पथि वसन्तादिर्भाग्रदर्शनवर्णनमिदम्। सः,—कृष्णः, पुरः,—अग्रतः, नवानि—नूतनानि, पलाशानि—प्रसवा यत्र तादृशं, पलाशवनं—किंशुककाननं यत्र तादृशं, स्फुटानि—विकसितानि, परागैः,—रजोभिः, ("पराग: कौङ्कुमं रजः" इत्यमरः) परागतानि—व्याप्तानि, पङ्कजानि यस्मिन् तथाभूतं, तथा मृदवः,—कोमलाः, अत एव तान्ताः,—कुसुमभरैरेव भारेण वा क्लान्ता इत्यर्थः, लतान्ताः,—पल्लवाः यत्र तादृशं, सुमनसां—पुष्पाणां, भरैः,—समूहैः, सुरभिं—सुगन्धिं, सुरभिं—वसन्तम्, अलोकयत्—अदर्शं। द्रुतविलम्बितं वृत्तम्। मिथुनाख्यवर्णवृत्तेदं पद्यम्।

(श) अत्रेति।—पदावृत्तिः,—पादेष्वेकैकादावृत्तिः। द्वयोः,—"सुरभिं सुरभिम्" इत्यनयोरित्यर्थः। सार्थकत्वम्—अर्थवत्त्वम्; [यद्यप्यत्रापि एतदयं सार्थकतया उदाहृतमपि तदेव अन्यविधया "रभिंसु रभिंसु" इत्येवमावृत्त्यां स्फोटसुभगमपि निरर्थकत्वेन उदाहर्तुं शक्यते इति सुधीभिर्विवेच्यम्]। द्वितीयस्येति।—निरर्थकत्वम् इत्यन्वयः। अन्यदपीति।—पादाद्यन्तादिकृतयमकमित्यर्थः। पादाद्यावृत्तौ यथा—"न सन्दधाऽवर्जित-मान-खण्डया नमन्दया-वर्जितमानखण्डया। उरस्युपाधाय मुखं मुखाभिधं कृतं तया खलु खण्डितं तया॥" इत्यादि। अर्द्धाद्यावृत्तौ यथा—"नाऽस्येयत्तवत्या वर्ष्यः परमायत-नासया। नास्येयः स खलाऽवर्ष्यः परमायत-नासया॥" इत्यादि। श्लोकावृत्तिर्यथा च यथा—"विभावरीव भासा शशिप्रभा

"यमकादौ भवेदैक्यं डलोर्बवोर्लरोस्तथा।" (ब)

इत्युक्तनयात् "भुजलतां जड़तामबलाजनः" इत्यत्र न यमकत्वहानिः।

अन्यस्यान्यार्थकं वाक्यमन्यथा योजयेत् यदि।
अन्यः श्लेषेण काक्वा वा सा वक्रोक्तिस्ततो द्विधा॥६६१॥(स)

द्विधेति श्लेषवक्रोक्तिः काकुवक्रोक्तिश्च।

चितबाहुना। खनिमोद्धारिणाऽभीता पृथ्वीयमनुशाश्रिता॥ विनायकेन भवता इत्योपचितबाहुना। खनिमोद्धारिणाऽभीता पृथ्वी यमनुशाश्रिता॥" "समानयास माऽनया समानयाऽसमानया। समानया समानया समान या समानया॥" अयं चतुरक्षरपादश्लोकः।

(ब) यमकादाविति।—अत्र आदिपदेन श्लेषादिग्रहणं, तेन "त्वं वसुदत्त दुर्धारो मदाक्लो वतेऽसो। अवन्तु युवयोर्भेदः स जड़ात्मा पटुर्मवान्॥" इत्यादौ न श्लेषभङ्गः। अन्ये तु—"यमकादौ भवेदैक्यं डलयो रलयोर्वयोः। अथयोर्नथयो-र्णले षविसर्गांविसर्गयोः॥ षविन्दुकाविन्दुकयोः स्वादभेदग्रहस्तथा॥" इति पठन्ति।

(स) वक्रोक्त्यलङ्कारमाह, अन्यस्येति।—अन्यस्य—अनस्य, वक्तुरित्यर्थः, अन्यार्थकम्—अन्यतात्पर्यकं, वाक्यम् पदम्,—पदम्, श्लेषेण वा काक्वा—ध्वनिविकारविशेषेण, अन्यथा—अन्यार्थत्वेनेत्यर्थः, यदि योजयेत्—सङ्घटयेत्, सा वक्रोक्तिः, ततः,—श्लेषकाकुवक्रोक्तिभ्यां, सा द्विधा—श्लेषनिबन्धना काकुनिबन्धना चेति द्विप्रकारा। केनचिदभिप्रायेण कथितस्य वाक्यस्य केनचिदन्येनान्याभिप्राये कल्पनमेव वक्रवचनसम्बन्धात् वक्रोक्त्यभिधीयते इति वक्रोक्तिनामालङ्कारः इति भावः। अत्र काव्यपदोपकारात्वाक्यमाशयः; यथा हि—"श्लेषश्च न वाक्यवाक्यगते, किन्तु खण्डेऽन्यखण्डोक्तस्य अन्यथायोजनमात्रे न्यायसाम्यात्" यथा—"अयो वैरिविनर्दने हरिपदप्रोत्सर्जने खलुनः पीतः पङ्कजलोचनाभिरभितो नेत्राञ्चलैश्चञ्चलैः। रक्तः सज्जनसङ्गमेषु सरभसेषीनखे! शीधर! स्थाने वर्षतु तुष्टयस्तव भुवने भर्ता भवान् गीयते॥" अत्र वर्षतु तुष्टयस्तव भर्ता शीधर इति वक्तव्ये श्लिष्टपदप्रयोगेण वक्तुरन्यार्थाभावेऽपि श्लेष एव वक्रोक्तीयः" इति।

क्रमेणोदाहरणम्—

"के यूयम् ? स्खल एव सम्प्रति वयं प्रभो विशेषाश्रयः
किं ब्रूते विहगः ? स वा फणिपतिर्यत्रास्ति सुप्तो हरिः ?।
वामा यूयमहो ! विडम्बरसिकः कीदृक् स्मरो वर्त्तते ?
श्लेनाक्रान्तु विवेकशून्यमनसः पुंस्त्वेव योषिद्भ्रमः॥" (६)

(६) श्लेषादपि पदभङ्गाभङ्गाभ्यां वैचित्र्येण श्लेषमूलवक्रोक्तेरपि वैचित्र्यम्। तत्रादौ समङ्गाभङ्गाभङ्गश्लेषमूलवक्रोक्तिमुदाहरति, के यूयमिति।—के यूयम् ? (इति प्रश्नः) अले यूयम् इति वर्त्तान्तरे सङ्कथयन् श्रोताऽऽह, स्खले इति।—सम्प्रति वयं स्खले एव, न तु के—अले इति भावः, (उत्तरमिदम्। "सुखश्रोर्षजलेषु स्खल" इति नानार्थकोषः)। वक्ता स्वतात्पर्येणवचनमयग्राह, प्रभ इति।—प्रभः विशेषमाश्रयतीति तथोक्तः विशेषविषयक इत्यर्थः, प्रश्नार्थकः किंशब्द इति भावः, (प्रत्युत्तरमिदम्)। विः,—पक्षी, श्लेषः,—अनलः, इत्यर्थाभिप्रायेण तदपि श्रोता अन्यथा योजयति, किमिति।—किं ब्रूते ?—कथयति ? भवान् इति श्लेषः, विहगः,—पक्षी ? वा सः,—प्रसिद्धः, फणिनां—नागानां, पतिः,—अनलः, यत्र—फणिपतौ, हरिः,—नारायणः, सुप्तः,—निहितः, अस्ति, निद्रातीत्यर्थः, [सुप्त इति वर्त्तमाने क्तप्रत्ययः] तदाश्रयः किं भवतः प्रश्नः ? इति भावः ; अत्र वि-श्लेष-शब्दौ पक्षिनागपतिवाचकौ इति बोध्यम्। (द्वितीयस्य उत्तरमिदम्। "नगौकोवाजिविहिर-विविष्किरपतत्रयः" इत्यमरः)। एवं वाक्कुशलेन कदर्थितो वक्ता श्रोतारमाक्षिपति, वामा इति।—यूयं वामाः,—प्रतिकूलवादिन इत्यर्थः, एकार्थतया प्रयुक्तं सदाक्यं विपरीतार्थतया कुक्षयादिष्य इति यावत्, (प्रथमश्लोकिरियम्। "वामं धने पुंसि हरे जलदेवे पयोधरे। वस्तुप्रतीपसख्येषु त्रिषु नार्यां स्त्रियाम्" इति मेदिनी)। तदपि योषिदर्थपरतया श्रोता योजयन्नाह, अहो ! इति।—अहो !—आश्चर्ये, विडम्बे—प्रतारणायां, रसिकः,—पटुरित्यर्थः, कीदृक् स्मरः,—कामः, वर्त्तते ? तवेति श्लेषः, श्लेन—कामपारवश्येन, विवेकशून्यमनसः,—निर्विवेकस्य, स्त्रीपुरुषगतवैशिष्ट्यविचारशून्यस्येत्यर्थः, तव इति श्लेषः, पुंस्त्व—पुरुषेषु एव, अन्यासु इति श्लेषः, योषिद्भ्रमः,—नारीभ्रान्तिः, वामाशब्दस्य नारीवाचकत्वादिति भावः। (द्वितीयस्य प्रत्युत्तरमिदम्)। इह श्लेषमूलेन एकस्य वाक्यस्य तद्विपरीतार्थतया सङ्घटनात् वक्रोक्तिः। आर्द्रनखिकोक्तिरियं ध्वन्यते। यथा वा—"किं गौरि ! मां प्रति कथा ? नन्वहं गौरङ्गि किम् ? कान्तानि वां प्रति ? नयोत्यनुनतोऽहम्। नानार्थतत्त्वमनुजानत एव सख्युर्गिरो

अत्र विशेषपदस्य "विः पक्षी" "शेषो नागः" इति अर्थद्वय-योगात् (क) समङ्गस्नेषः, अन्यत्र तु अभङ्गः।

"काले कोकिलवाचाले सहकारमनोहरे।
ऋतागसः परित्यागात् तस्याश्चेतो न दूयते?॥" (ख)

अत्र कयाचित् सख्या निषेधार्थं नियुक्तो नञ् अन्यथा काक्षा दूयते एवेति विध्यर्थे घटितः।

शब्दैरेकविधैरेव भाषासु विविधास्वपि।
वाक्यं यत्र भवेत् सोऽयं भाषासम दूतीष्यते॥६६२॥(ग)

गिरिसुतः कुटिला जघनि॥" इति। "चन्द्रो! केनेदृशी बुद्धिर्दत्ता तव निर्मित्रा?। विनुत्वा यूयते बुद्धिर्न तु दातमयी क्वचित्॥" इति। तथा—"नन्दराजगृहपक्ष-पोषिकाम् वाहि! यानि वद किं नयानि ते?। गोसुब्बसनतोष सुन्दरं केश-बन्धनलिङ्गानयस्व मे॥" इति च। (अत्र केशबन्धनं—रज्जुविशेषार्थकं, श्लेषमूले सखीवाक्ये तु "केशयं धनम्" इति) इत्यादिवत्तु श्लेषे एव उदाहरणीयं, न वक्रोक्तौ इति केचित्।

(क) उदाहृतश्लोके समङ्गत्वमङ्गत्वं श्लेषमूलवक्रोक्तिभेदेभ्यं दर्शयति, अथेति।—द्वयः,—उपराजः, अर्थद्वययोगात्—अर्थद्वयप्रयोज्यत्वात्, प्रतिपाद्यत्वे सङ्गसनीयत्वा-दिति यावत्।

(ख) आम्रवक्रोक्तिमुदाहरति, काले इति।—कोकिलवाचाले—कोकिल-जातयोस्तुल्यरीते दक्षयः, सहकारेण—आम्रेण, तद्विलासेन इति यावत्, मनोहरे काले—वसन्ते इत्यर्थः, ऋतागसः,—ऋतापराधस्य, कान्तस्य इति शेषः, [अर्थश्च षष्ठी] परित्यागात्—निराकरणात्, तस्याः,—नायाः, चेतः,—चित्तं, न दूयते?—न खिद्यते? अपि तु दूयते एवेति अर्थः काक्षा प्रतिपाद्यते। अन्यथैव काक्षा उक्तार्थ-प्रतिपादनादस्य अन्यालङ्कारत्वम्। व्यापारतः प्रतीयमानार्थस्य चमत्कारो नञ्जनाभूतस्य बोध्यम्।

(ग) भाषासमालङ्कारमाह, शब्दैरिति।—विविधासु अपि—नानाप्रकारा-अपि, भाषासु—संस्कृतप्राकृतादिरूपासु विविधासु, एकविधैरेव—एकप्रकारेण, शब्दैः यत्र—प्रतिपाद्यं, [अन्वयसिद्धम्] वाक्यं भवेत्, सः अयं भाषासमः इति अन्वयः; एकैः, एकविधैरिति शेषः।

यथा मम—

"मञ्जुलमणिमञ्जीरे कलगम्भीरे विहारसरसौतीरे।
विरसाऽसि केलिकीरे किमालि! धीरे च गन्धसारसमीरे?॥"(घ)

एष श्लोकः संस्कृतप्राकृतशौरसेनीप्राच्यावन्तीनागरापभ्रंशेषु एकविध एव।

"सरसं कदण कव्वं"। (ङ)

(घ) भाषासमुदाहरति, मञ्जुलेति।—मालिनीं प्रति सखी वचनमिदम्। हे आलि!—सखि! ("आली सखी वयस्या च" इत्यमरः) कीदृशि—मञ्जुलेन—मधुराक्कुटेन स्वनेन, मञ्जीरे—मञ्जीरमे इत्यर्थः, मञ्जुलः,—मनोहरः, यः मणिमञ्जीरः,—रत्नमूपुरः तस्मिन्, ("मञ्जीरो नूपुरोऽस्त्रियाम्" इत्यमरः) विहारसरसाः,—क्रीडायुक्ताः, धीरे केलिकीरे—क्रीडाशुके, धीरे—मन्दमन्दसञ्चारिणीत्यर्थः, गन्धसारसमीरे—चन्दनसुरभिमलयमरुति च, किं—कथं, विरसा—अरसिः, असि?—भवसि? आर्ष्यां इत्तम्। अथवा यथा रत्नाकरे—"श्रीखण्डविलेपनसङ्गविदग्धकेलि-क्रीडाशुकाकुलकुलायकुलाभिरामे। मन्दोल्लसन्मलयजानिलसङ्गशीतमन्दाकिनीसलिलकूलकक्षे॥" इति भाषाषट्कतुल्यं पद्यम्। मन्दरादिवर्णने एतदनुकूलश्लोको यथा—"यस्मिन् सलीलमविलोभितगण्डशैलमाराः करोति विसराजकरावलग्नान्। रक्षातपानिलयपल्लवभङ्गलग्नविन्माखलाखलखलक्ष दिनद्रुमक्ष॥" इति। संस्कृतप्राकृत-मयो गीर्भूविलासयन्त्रो यथा—"वाआविलासावलिहारिहासा लीलामआ भावलआ सहावा। देहं धरन्ती सरसा तुराआ गेहं चरन्ती सहसाऽभिराआ॥" इति। एवमानुलोम्यप्रातिलोम्याभ्यामपि भाषाद्वये एव एवाष्टकारो बोध्यः, यथा—"दइ दे! सहसाआसे वाआ राइमलीमसा। सालआ रसलीला सा तुहाआसिअसारत॥" इति। अनानुलोम्येन पाठे संस्कृतमयः, प्रातिलोम्येन पुनः पाठे प्राकृतमयः श्लोकः सम्पद्यते। यथा—"तरआ अहिआ मातुं आआओ सरआअसा। आमलो मइरा-आवा लीआआ इव रेहइ॥" इति। आनुलोम्येन प्रातिलोम्येन च पाठे चर्यैके एवार्थे नात्र चित्रालङ्कारः, यथा—"विदिते दिवि कोऽलीके तं वातं निजितालिनि। विमदं नविरोद्गारो बोद्धा वो नतिमेतिनि॥" इति। इदमेव प्रातिलोम्येन "नतिमेतिनि बोद्धा वो रोद्गारो विमदं नवि। निजितालिनि तं वातं कोऽलीके विदिते दिवि॥" इति सम्पद्यते पद्यम्। अत्रापि चर्यैक्यम्।

(ङ) ["सरसं काव्यं" इति संस्कृतम्]।

इत्यादौ तु "सरसम्" इत्यत्र संस्कृतप्राकृतयोः साम्येऽपि वाक्यगतत्वाभावे वैचित्र्याभावान्नायमलङ्कारः ।

श्लिष्टैः पदैरनेकार्थाभिधाने श्लेष इष्यते ।
वर्णप्रत्ययलिङ्गानां प्रकृत्योः पदयोरपि ॥
श्लेषाद्विभक्ति-वचन-भाषाणामष्टधा च सः ॥६६३॥(च)

(च) श्लेषालङ्कारमाह, श्लिष्टैरिति ।—"सकृदुच्चरितः शब्दः सकृदर्थं गमयति" इति नियमेन वाक्ये स्वरभेदानादरात्, "यावन्तोऽर्थाः तावन्त एव शब्दाः एकप्रयत्नेनोच्चार्यन्ते" इति नये युगपत् नानाशब्दोच्चारणेऽपि तेषां भेदोपलब्धो न भवति ; तथापि प्रकरणादिनियमाभावात् अनेकार्थानामभिधायैव बोधः, प्रकरणादिनियमसत्त्वे तु एकस्याभिधया अपरस्य व्यञ्जनया इति मतमाश्रित्येदं लक्षणम् । एवञ्चैकप्रयत्नोच्चार्यत्वेन सुप्तभेदानां वर्णादीनां भेदकः श्लेषः तदभिष्टेः श्लिष्टैः,—अनेकार्थैः,पदैः,—स्वरव्यञ्जनसमूहात्मकैरित्यर्थः, अनेकार्थानाम् अभिधाने—अभिधया प्रतिपादने, [अनेकार्थौ च अनेकार्थाश्च इत्येकशेषद्वन्द्वे अनेकार्थाः तेषां, तेन श्लथीबद्धानां वा अर्थानामित्यर्थो बोध्यते] श्लेषः,—श्लेषाख्योऽलङ्कारः, इष्यते ; अनेकार्थाभिधानमेव श्लेषः, एवं सति नाभाश्रयः इति भावः । श्लिष्टवर्णादिभेदेन श्लेषस्याष्टविधत्वमाह, वर्णेति ।—स च—श्लेषालङ्कारः, वर्णप्रत्ययलिङ्गानां—वर्णौ च प्रत्ययौ च लिङ्गे च तेषामिति विग्रहः, तथा च वर्णादीनामष्टानां श्लेषात्—अनेकार्थतया प्रतिपादनात्, अष्टधा—अष्टविधः ; वर्णश्लेषः, प्रत्ययश्लेषः, लिङ्गश्लेषः,प्रकृतिश्लेषः, पदश्लेषः, विभक्तिश्लेषः, वचनश्लेषः, भाषाश्लेषश्चेत्येवंरूपः। प्रकृतिश्लेषः पुनः द्विधा—धातुप्रातिपदिकभेदात् द्विप्रकारः ; पदश्लेषश्च सुबन्ततिङन्तभेदात् द्विविध इति बोध्यम् । उदाहरिष्ये वर्णादिश्लेषाणां प्रत्येकं लक्षणमेवंविधं दृश्यते ; तथा—"यत्र विभक्तिप्रत्ययवर्णसमूहादेरेकस्यमापद्यते। वर्णानां विविधानां वर्णश्लेषः स विज्ञेयः॥ यत्र प्रकृतिप्रत्ययसमुदायानां भवत्यनेकेषाम् । साकाङ्क्षं प्रत्ययवतः स श्लेषः प्रत्ययश्लेषः ॥ स्त्रीपुंनपुंसकानां शब्दानां भवति यत्र साकाङ्क्षम् । लक्षणलक्षितलिङ्गश्लेषः स विज्ञेयः ॥ क्रियते यत्रानन्त्यः साकाङ्क्षं प्रत्ययानामेकपदैः । प्रकृतीनां विविधानां प्रकृतिश्लेषः स विज्ञेयः ॥ यत्किञ्चन विभक्तीनां समासयोगश्च जायते विविधः । पदसंश्लेषु विज्ञो विज्ञेयोऽसौ पदश्लेषः ॥ साकाङ्क्षं यत्र सुपां तिङां तथा सर्वथा निरूढौ भवति । सोऽत्र विभक्तिश्लेषो वचनश्लेषस्तु वचनानाम् ॥ यत्किमुक्तार्थेषु सुबन्तादिविभक्तिसमुदायादि । वाक्यानि यावदर्थं भाषाश्लेषः स विज्ञेयः ॥" इति ।

अत्रैव उदाहरणम्—

"प्रतिकूलतामुपगते हि विधौ
विफलत्वमेति बहुसाधनता ।
अवलम्बनाय दिनभर्तुरभूत्
न पतिष्यतः करसहस्रमपि ॥" (ङ)

अत्र "विधौ" इति विधु-विधिशब्दयोरुकारेकारयोर्वर्णयोरैकाररूपत्वात् श्लेषः । (ञ)

"किरणा हरिदाश्वस्य दयितस्य समीरणः ।
क्षान्तोत्सङ्गसुखं नूनं सर्व एव सुधाकिरः ॥" (ट)

(ङ) वर्णश्लेषमुदाहरति, प्रतिकूलतामिति ।—सूर्यास्तवर्णनमिदम् । विधौ—दैवे, ("विधिर्विधाने दैवे च" इत्यमरः) प्रतिकूलतां—विमुखताम्, अनभिमतफलसाधनीभूतामित्यर्थः, उपगते—प्राप्ते सति, बहूनि साधनानि—उपायाः येषां ते बहुसाधनाः, तेषां भावः बहुसाधनता—बहूनभिमतफलोपायप्राप्तित्वम् इत्यर्थः, हि—निश्चितं, विफलतां—व्यर्थताम्, एति—प्राप्नोति ; पक्षे—विधौ—चन्द्रे, प्रतिकूलतां—विरहफलप्राप्तित्वम्, तदपफलप्राप्तित्वमिति यावत्, उपगते बहुसाधनता—बहुस्त्रियुपायप्राप्तित्वं, विफलत्वमेति, तथा हि—पतिष्यतः,—पतनोन्मुखस्य, अस्तं गमिष्यत इत्यर्थः, दिनभर्तुः सूरस्य—किरणानां, हस्तानाञ्च, सहस्रमपि—साधनभूतमिति भावः, अवलम्बनाय—आश्रयाय, रक्षणाय इति यावत्, न अभूत्—अवलम्बनसाधनं नाभवदित्यर्थः । तथा च—अन्यान्तरे सूर्यास्तगमनं प्रति तात्कालिकरश्मीनां प्रतिबन्धकत्वं कल्प्यते, एवञ्च सन्ध्याकाले तात्कालिकरश्मिरूपप्रतिबन्धकानां सद्भावेऽपि सूर्यास्तगमनमिष्येति प्रबन्धार्थसमर्थनम् ; अत्र च—पतिष्यतः,—स्खलितः जनस्य, करसहस्रमपि पतनविघाताय भवति, तस्य तु करसहस्रमपि अवलम्बनाय नाभूत् इति श्लेषः । मिश्रपाठस्तत्रेदं पद्यम् । प्रमिताक्षरा वृत्तं—"प्रमिताक्षरा सजससैः सुखिता" इति च तल्लक्षणम् ।

(ञ) अत्र विधाविति ।—विधौ इति पदस्य ओकारस्यैकारस्य च वर्णयोरैक्यात् वर्णश्लेष श्लेषेण सहायं वीप्सम् ।

(ट) श्लेषमुदाहरति, किरणा इति ।—हरिदाश्वस्य—चन्द्रस्य, किरणाः,—अंशवः, दयितः,—इच्छाभाजनः, समीरणः,—पवनश्च, सर्व एव नूनं—निश्चितं,

अत्र "सुधाकिरः" इति क्विप्-क-प्रत्यययोः। किञ्च अत्र बहुवचनैकवचनयोरैकरूप्याद्वचनश्लेषोऽपि। (ञ)

"विकसन्नेत्रनीलाब्जे तथा तन्व्याः स्तनद्वयी।
तव दत्तां सदाऽऽमोदं लसत्तरलहारिणी॥" (ट)

कान्तोत्सङ्गजुषां—कान्तक्रोडस्थितानां कान्तानां, कान्ताक्रोडस्थितानां कान्तानाञ्च, सुधाकिरः,—अमृतवर्षिणः, पक्षे—अमृतवर्षी चेत्यर्थः। अत्र सुधां किरन्तीति क्विपि सुधाकिर्शब्दस्य प्रथमाबहुवचने, तथा सुधां किरतीति कप्रत्यये सुधाकिरशब्दस्य प्रथमैकवचने च सुधाकिर इति पदस्य, तथा किरणविशेषणत्वे समीरणविशेषणत्वे च "सर्वे" "सर्वः" इति च पदस्य प्रत्ययवचनाभ्यामुभयथा सिद्धत्वात् अनेकार्थाभिधायित्वं बोध्यम्।

(ञ) अत्र सुधाकिर इति।—क्विप्प्रत्यय-कप्रत्यययोरिति, श्लेषः इत्यनुषङ्गः, एवमग्रेऽपि। किञ्चात्र "कान्तोत्सङ्गजुषाम्" इति लिङ्गश्लेषोऽपि बोद्धव्यः। वचनश्लेषोऽपीति।—"सर्वः" इति, "सुधाकिरः" इति च, इत्यादौ सन्धिवशादैकरूप्यं ज्ञेयम्।

(ट) लिङ्गश्लेषमुदाहरति, विकसदिति।—तन्व्याः,—कृशाङ्ग्याः, लसत्तरलहारिणी विकसन्नेत्रे एव नीलाब्जे—नीलपङ्कजे, तथा स्तनयोः द्वयी तव सदा आमोदं—प्रेममोदं, सौरभं वा, (नीलाब्जयोः सौरभदानं सम्भवति) दत्ताम्। अत्र "दत्ताम्" इति क्रियापदं "विकसन्नेत्रनीलाब्जे" इत्यनेन यदा अन्वेति, तदा "दा" धातोः लोट्परस्मैपदप्रथमपुरुषद्विवचनान्तता, यदा "स्तनद्वयी" इत्यनेनान्वेति, तदा लोट्-आत्मनेपदप्रथमपुरुषैकवचनान्तता, तस्मादस्य अनेकार्थत्वम्। तथा "लसत्तरलहारिणी" इति पदं यदा "विकसन्नेत्रनीलाब्जे" इत्यस्य विशेषणं, तदा लसन्ती च तरले च हारिणी च—मनोहरे च इति विग्रहेण क्लीबलिङ्गद्विवचनान्तता, यदा "स्तनद्वयी" इत्यस्य विशेषणं, तदा लसंस्तरलः,—हारमध्यगो मणिः यत्र ("तरलो हारमध्यगः" इत्यमरः) सा चासौ हारिणी चेति विग्रहेण स्त्रीलिङ्गैकवचनान्तता; यद्वा—लसंस्तरलो यत्र एवम्भूतो हारो यत्रास्ति; [अत्र बहुव्रीहिसमासेन अर्थप्रतिपत्तिसम्भवेन कर्मधारयोत्तरेन्प्रत्ययस्य "न कर्मधारयात् मत्वर्थीयो बहुव्रीहिश्चेदर्थप्रतिपत्तिकरः" इत्यनुशासनेन असाधुत्वेऽपि "भूम-निन्दा-प्रशंसासु—" इत्यादिनियमेन अतिरिक्तस्य नित्ययोगार्थस्य विवक्षितत्वान्न कोऽपि दोषः इति विचार्य्यम्] इत्यनयोः क्रियापद-विशेषणपदयोरनेकार्थाभिधायित्वमवधेयम्। एवम् अत्र वचनयोर्लिङ्गयोश्च श्लेषः।

अत्र नपुंसकस्त्रीलिङ्गयोः श्लेषो वचनश्लेषोऽपि। (ठ)

"अयं सर्वाणि शास्त्राणि हृदि ज्ञेषु च वक्ष्यति।
सामर्थ्यकृदमित्राणां मित्राणाञ्च नृपात्मजः॥" (ड)

अत्र "वक्ष्यति" इति वहि-वच्योः, "सामर्थ्यकृत्" इति कृन्तति-करोत्योः प्रकृत्योः। (ढ)

"पृथुकार्त्तस्वरपात्रम्—" इत्यादि। अत्र पदभङ्गे विभक्तिसमासयोरपि वैलक्षण्यात् पदश्लेषः, न तु प्रकृतिश्लेषः। एवञ्च (ण)—

(ठ) अत्रेति।—श्लेषोऽपीत्यपिना णिन्प्रत्ययस्य इन्प्रत्ययस्य च श्लेष इति ज्ञेयम्।

(ड) प्रकृतिश्लेषमुदाहरति, अयमिति।—राजपुत्रे जाते ज्योतिर्विदो वचनमेतत्। अमित्राणां—शत्रूणां, सामर्थ्यकृत्—सामर्थ्यक्षयकरः, मित्राणां—सुहृदाञ्च, सामर्थ्यकृत्—सामर्थ्यकरश्च, अयं नृपात्मजः,—राजपुत्रः, हृदि—हृदये, ज्ञेषु—विद्वत्सु च, सर्वाणि शास्त्राणि वक्ष्यति—धारयिष्यति कथयिष्यति चेत्यर्थः; हृदि धारयिष्यति, ज्ञेषु कथयिष्यतीति यथासम्भवमन्वयः।

(ढ) अत्रेति।—अत्र वक्ष्यतीति क्रियापदस्य हृदि इत्यनेन अन्वये "वह" धातुना, "ज्ञेषु" इत्यनेन अन्वये "वच" धातुना निष्पन्नस्य वहन-कथनोभयार्थत्वात् अनेकार्थाभिधायित्वम्; तथा सामर्थ्यं कृन्तति करोति वा इत्युभयथा निष्पन्नस्य सामर्थ्यकृदिति पदस्य अनेकार्थाभिधायित्वं बोध्यम्।

(ण) पदश्लेषमुदाहरति, पृथ्विति।—व्याख्यातं प्राक् दोषपरिच्छेदे ६१३पृष्ठे। अत्र "पृथुकार्त्तस्वरपात्रम्" इत्यादिपदानामनेकार्थाभिधायित्वम्। नन्वत्र प्रकृतिश्लेषोऽपि सम्भवति इत्यत आह, अत्रेति।—अत्र पदभङ्गे—अर्थबोधनाय समस्तपदस्य पार्थक्ये, विभक्तिसमासयोरपीत्यपिना प्रकृतेः सङ्ग्रहः। विभक्तिरत्र समासाङ्गम्। क्वचित् पदभङ्गाभावेऽपि प्रकृतिविभक्तिवैलक्षण्येन पदश्लेषो यथा—"यस्य चेतः प्रियालोके तस्य स्मरकदर्थनम्"। अत्र यद्यसोः तत्तसोः प्रकृत्योः सुप्तिङोर्विभक्त्योरपि वैलक्षण्यात् पदश्लेषः; तथा हि—दैवादिकस्य यसः तसश्च लोट्मध्यमपुरुषैकवचने यस्य तस्येति सिद्धं, यत्तदोः षष्ठ्येकवचनेऽपि तथा रूपम् इति सारः। एवञ्च—प्रकृतिविभक्तिवैलक्षण्येन पदश्लेषाङ्गीकारे च इत्यर्थः।

"नीतानामाकुलीभावं लुब्धैर्भूरिशिलीमुखैः।
सदृशे वनवृद्धानां कमलानां तदीक्षणे॥" (त)

अत्र लुब्धशिलीमुखादिशब्दानां श्लिष्टत्वेऽपि विभक्तेरभेदात् प्रकृतिश्लेषः। अन्यथा सर्वत्र पदश्लेषप्रसङ्गः। (थ)

"सर्वस्वं हर सर्वस्य त्वं भवच्छेदतत्परः।
नयोपकारसाम्मुख्यमायासि तनुवर्त्तनम्॥" (द)

(त) नीतानामिति।—भूरिशिलीमुखैः,—बहुबाणधारिभिः, लुब्धैः,—व्याधैः, अन्यत्र—भूरि—अत्यन्तं, लुब्धैः,—लोलुपैः, शिलीमुखैः,—भ्रमरैः, ("अलिबाणौ शिलीमुखौ" इत्यमरः, "लुब्धो व्याधे लोलुपे च" इति गोपालः) आकुलीभावं—मर्दितावस्थां, नीतानां—प्राप्तानां, वनवृद्धानां—वने—कानने, अन्यत्र—जले, ("वने सलिलकानने" इत्यमरः) वृद्धानां—वृद्धिं प्राप्तानां, कमलानां—हरिणानां पद्मानाञ्च, ("स्यात् कुरङ्गेऽपि कमलः" इति "सहस्रपत्रं कमलम्" इति चामरः) सदृशे—समाने, तदीक्षणे—तस्याः,—कान्तायाः, ईक्षणे—नेत्रे, शोभेते इति शेषः।

(थ) अत्रेति।—अत्र प्रकृतिश्लेष इति परेणान्वयः। प्रकृतिरत्र प्रातिपदिकरूपा बोध्या। अन्यथा—प्रकृतिभेदमात्रेणापि पदश्लेषाङ्गीकारे, सर्वत्र—प्रकृतिश्लेषस्थले; एवञ्च पदश्लेषासङ्कीर्णं प्रकृतिश्लेषोदाहरणं न स्यात् इति प्रकृतिश्लेषोच्छेदप्रसङ्गः इति भावः।

(द) विभक्तिश्लेषमुदाहरति, सर्वस्वमिति।—प्रथमोक्तव्याख्यायां शिवं प्रति तद्भक्तस्य उक्तिः। हे हर! त्वं सर्वस्य, जगतः इति शेषः, सर्वस्व—समस्तधनस्वरूपं, तथा भवस्य—संसारस्य, छेदे—खण्डने, तत्परः,—नित्यरतश्च, संसाराशेषदुःखध्वंसनार्थी च सन्नित्यर्थः, नयेन—नीतिप्रदर्शनेन, यः उपकारः तस्मिन् साम्मुख्यम्—आनुकूल्यं यस्य तादृशं, तनुवर्त्तनं—शरीरधारणम्, आयासि—प्राप्नोषि, लोकहितार्थं जन्म परिगृह्णासीत्यर्थः। पक्षान्तरे तस्करं प्रति तन्मातुरुक्तिः। त्वं सर्वस्य, जनस्येति शेषः, सर्वस्व—सर्वधनं, हर—चोरय, तथा छेदतत्परो भव—प्रतिबन्धिनो विनाशय इत्यर्थः, आयासि—आयासयुक्तं, क्लेशावहमित्यर्थः, तनुवर्त्तनं—क्षुद्रं जीवनोपायम्, उपकारसाम्मुख्यं नय—प्रापय, अतिकष्टे स्थिता वयं, तत् त्वं चौर्य्यं कृत्वा यथा वयं सुखेन जीवामस्तथा कुरु इति भावः; यद्वा—उपकारसाम्मुख्यं नय—अपनय, तद्विमुखो भवेत्यर्थः, आयासि—परपीडाकारि, वर्त्तनं—जीवनोपायं, तनु—विस्तारयेत्यर्थः।

अत्र "हर" इति पक्षे शिवसम्बोधनमिति सुप्। पक्षे च हृधातोस्तिङिति विभक्तेः। एवं "भव" इत्यादौ। अस्य च भेदस्य प्रत्ययश्लेषेणापि गतार्थत्वे प्रत्ययान्तरासाध्यसुबन्ततिङन्तगतत्वेन विच्छित्तिविशेषाश्रयणात् पृथगुक्तिः। (ध)

"महदे! सुरसन्धं मे तमव समासङ्गमागमाहरणे।
हर बहुसरणं तं चित्तमोहमवसर उमे! सहसा॥" (न)

अत्र संस्कृतमहाराष्ट्र्योः।

पुनस्त्रिधा सभङ्गोऽथाभङ्गस्तदुभयात्मकः॥ ६६४॥

एतद्भेदत्रयञ्च उक्तभेदाष्टके यथासम्भवं ज्ञेयम्। (प)

(ध) "भव" इत्यादाविति।—भव इति पदम् एकत्र—भूधातोस्तिङन्तरूपम्, अन्यत्र—सम्बन्धिपदत्वात् लुप्तषष्ठ्यन्तमिति विभक्तिबलात् अनेकार्थाभिधायकमिति भावः। अस्य च—विभक्तिश्लेषपरस्य च, प्रत्ययश्लेषेणापि इत्यपिभिन्नक्रमे, प्रत्ययश्लेषेण गतार्थत्वेऽपीत्यर्थः; गतार्थत्वे—चरितार्थत्वे, उक्तत्वे इत्यर्थः, प्रत्ययान्तरेति—प्रत्ययान्तरेणासाध्यं यत् सुबन्तं तिङन्तञ्च तद्गतत्वेनेत्यर्थः, विच्छित्तिविशेषाश्रयणात्—वैचित्र्यातिशयप्रतिपादनात्; कृत्तद्धितान्तस्य स्वादिव्यतिरेकेण प्रयोगाभावात् प्रत्ययान्तरसाध्यत्वं, सुप्तिङन्तस्य तु न तथात्वमिति विशेषः। "आयासि" इत्यत्र प्रकृतिविभक्तिवैलक्षण्येन पदश्लेषोऽपीत्यवधेयम्।

(न) भाषाश्लेषमाह, महदे इति।—संस्कृतार्थो यथा—हे महदे!—उत्सवदायिनि! ("मह उद्धव उत्सवः" इत्यमरः) उमे!—गौरि! मे—मम, तं सुरसन्धं—देवप्रार्थनीयम्, आगमाहरणे—शास्त्रज्ञाने, समासङ्गं—सम्यक् आसक्तिम्, अव—रक्ष; तथा अवसरे—समये, तं बहुसरणं—बहुव्यापिनं, चित्तमोहम्—अज्ञानमित्यर्थः, सहसा—झटिति, हर—नाशय। महाराष्ट्रीभाषाऽर्थस्तु—मह—मम, धम्मे—धर्मे, रसम्—अनुरागं, देसु—देहि, गमागमा—गमागमात्, संसारात् इत्यर्थः, णे—नः, अस्माकमित्यर्थः, तमवसं—तमोवशां, तमोगुणजनितामित्यर्थः, आसम्—आशामित्यर्थः, हर—नाशय, हे हरबहु!—हरवधु! तं—त्वं, सरणं—शरणं, रक्षित्री असीत्यर्थः, मे—मम, चित्तमोहं—चित्तमोह इत्यर्थः, सहसा अवसरउ—अपसरतु। भाषासमालङ्कारे भाषाणामेकरूपत्वं, न तु अर्थतो भेदः, इह तु "महदे सुरसन्धं मे" इति पदानामनेकार्थता इत्युभयोर्भेदः।

(प) उक्तभेदाष्टके इति।—यथासम्भवं—"पृथुकार्त्तस्वरपात्रम्" इति सभङ्ग-

यथा वा—

"येन ध्वस्तमनोभवेन बलिजित्कायः पुरा क्षोभितो
यद्बोद्दृत्तभुजङ्गहारबलयो गङ्गाञ्च योऽधारयत्।
यस्याङ्घ्रिं प्रणिमच्छिरोधर इति स्तुत्यश्च नामामराः
पायात् स स्वयमन्धकक्षयकरस्त्वां सर्वदो माधवः॥" (फ)

क्षेपः। "नीतानाम्—" इति चतुष्पदेषः। "सर्वस्व हर" इत्यत्र समुदायसमवायसम्बन्धेन प्रतीतिरिति बोध्यम्।

(फ) एवमेव तत्त्रितयमुदाहरति—यथा वेति। येनेति।—क्षोभोऽयं हरिहरोभयपक्षे एव व्याख्येय इति प्रथमं हरिपक्षे व्याख्या यथा—सर्वदः,—सर्वाभीष्टप्रदाता, सः मा—सर्वान्,तथा भवः,—पतिः, क्ष च इत्यर्थः, सर्वदा उमाधवश्च, त्वां पायात्—रक्षतु। माधवं विशिनष्टि—येन मनसिजेन—मकरकेतुना, मनः,—मनसटं, भग्नं—पादप्रक्षेपेण परावर्त्तितं, तथा पुरा—पूर्वस्मिन् काले, मनसटपरिक्षेपनामसुरे इत्यर्थः, बलिजित्—बलिनामकासुरराजस्य जेता, कायः,—शरीरं, यामनदेह इत्यर्थः,क्षोभितः,—असुराणां क्षोभनार्थं मोहिनीमूर्त्तिपरिग्रहः कृतः इत्यर्थः, (मनसटार्थं विवदमानानां दैवासुराणाम् मनसटपरिक्षेपनाम मायया नारायणेन मोहिनीरूपं धृतम् इति पुराणवार्त्ता) यश्च उद्वृत्तभुजङ्गहा—उद्वृत्तम्—उद्दामचरितं, भुजगं—सर्पऋषिमनसासुरं जातिया वा, धृतवानित्यर्थः, तथा गारम्—चरितस्यन्ति, यशं—श्लेषं, याति—आक्रामतीति गारयशः, अथवा—उद्वृत्तभुजङ्गं हरतीति उद्वृत्तभुजङ्गहारः,—गरुड़ः, तञ्च यशेन याति—गच्छतीति तथोक्तः, यः यशं—पर्वतं, गोवर्द्धनमित्यर्थः, ("शैलश्चयो नगागमो" इत्यमरः) क्षपयतीव, नां—पृथिवीञ्च, कूर्मरूपेण, क्षपयत्, अमराः,—देवाः, यस्य अघ्रिं—चन्द्रं, मण्णातीति अघ्रिमत्—राहुः, तञ्च शिरः हरतीति अघ्रिमच्छिरोहरः, इति स्तुत्यं—स्तवनीयं, नाम आहुः,—कथयन्ति, यश्च स्वयं अन्धकानां—दानवानां, क्षयकरः,—क्षयः,—क्षानं,तञ्च करः,—विधाता, दारुकाख्यनिवासनिर्माता इत्यर्थः, ("क्षयो रोगान्तरे वेश्म-क्षयाभावपचेषु च" इति मेदिनी)। इदानीं व्याख्या यथा—मनसिजनोभवेन—दग्धकामेन, येन पुरा—त्रिपुरविध्वंसकाले इत्यर्थः, बलिजित्कायः,—विष्णुशरीरम्,क्षोभितः,—असुरूपतया वहुधा खंडित इत्यर्थः, (विष्णुशरीरं शरं कृत्वा तेन त्रिपुरासुरो निपातितः इति पौराणिकी वार्त्ता) तथा—पुरा क्षोभितः,—नारीकृतः। (यत्र "मोहिनीरूपदिहक्षुणा शिवेन शिवो विष्णुः पुनर्मोहिनीरूपं दधार" इति पौराणिकी वार्त्ता) यश्च उद्वृत्तः,—

अत्र "येन ध्वस्त" इत्यादौ सभङ्गश्लेषः। "अन्धक" इत्यादौ अभङ्गः। अनयोरेकत्र सम्भवात् सभङ्गाभङ्गाभ्यां अन्यगौरव-भयात् पृथङ्नोदाहृतः। (ब)

इह केचिदाहुः,—"सभङ्गश्लेष एव शब्दश्लेषविषयः, यत्रो-दात्तादिस्वरभेदाश्रितप्रयत्नोच्चार्यत्वेन भिन्नयोः शब्दयोर्जतु-काष्ठन्यायेन श्लेषः। अभङ्गस्तु अर्थश्लेष एव, यत्र स्वरा-भेदादभिन्नप्रयत्नोच्चार्यतया शब्दाभेदादर्थयोरेकत्वगतफल-हृयन्यायेन श्लेषः। यौ हि यदाश्रितः, स तदलङ्कार एव; अलङ्कार्यालङ्करणभावस्य लोकवदाश्रयाश्रयिभावेनोपपत्तिः" इति; तदन्ये न मन्यन्ते। तथा हि—अत्र ध्वनिगुणी-भूतव्यङ्ग्यदोषगुणालङ्काराणां शब्दार्थगतत्वेन व्यवस्थितैरन्वय-व्यतिरेकानुविधायित्वेन नियम इति। न च "अन्धकक्षय—" इत्यादौ शब्दाभेदः, "अर्थभेदेन शब्दभेदः" इति दर्शनात्। किञ्च, अत्र शब्दस्यैव मुख्यतया वैचित्र्यबोधोपायत्वेन कवि-प्रतिभयोद्भवनात् शब्दालङ्कारत्वमेव, विसदृशशब्दद्वयस्य वन्धे च एवंविधस्य वैचित्र्याभावात्, वैचित्र्यस्यैव च अलङ्कारत्वात्। अर्थमुखप्रेक्षितया च अर्थालङ्कारत्वेऽनुप्रासादीनामपि रसादि-

---

उत्कर्षेण वर्त्तितः, भुजङ्गः,—पन्नगः, हारः,—हारस्तानीयः, वलयः,—वलयस्तानीयश्च तस्य तथाविधः, यस्य (गङ्गाधेत्यत्र धकारो निष्क्रान्तः, तेन "सः" इत्यनेन अन्वयः) तस्मात् धकारात्—गिरिमि दधार इत्यर्थः, अहो—अगौरोऽपि गौरी, गिरिमि गङ्गाच इत्यभिप्रायेण धकारः; अमरः,—देवः, यस्य शिरः,—तस्तवं, तालस्तल-निलयः, अग्निमत्—अग्निवत्, तथा हर इति स्तुत्यं—स्तवार्हं, नाम च धाम्नः, तथा अत्र खयम् अन्धकक्षयकरः,—अन्धकासुरहन्ता, अलक्ष्यमसुरं निहतवानित्यर्थः। प्रार्दूलविक्रीडितं छन्दः।

(ब) अनेति।—उदाहरणे इत्यर्थः। अनयोः,—सभङ्गाभङ्गयोः; तथा च इदमेव सभङ्गाभङ्गतदुभयालङ्करणं त्रिविधश्लेषस्य उदाहरणतया प्रत्येकं पृथक् उदा-हरणनाप्यस्यतीति भावः।

परत्वेन अर्थमुखप्रेक्षितयाऽर्थालङ्कारत्वप्रसङ्गः। शब्दव्यापिप्रयत्नोच्चार्यत्वेनार्थालङ्कारत्वे "प्रतिकूलतामुपगते हि विधौ" इत्यादौ शब्दभेदेऽपि अर्थालङ्कारत्वं तवापि प्रसज्यतीत्युभयत्रापि शब्दालङ्कारत्वमेव। यत्र तु शब्दपरिवर्त्तनेऽपि न श्लेषत्वखण्डना, (भ) तत्र—

(भ) श्लेषस्तावच्छब्दालङ्कारोऽर्थालङ्कारश्च सम्भवति, तयोः परमतनिराकरणपूर्वकं भेदं निरूपयति—इदेति। यदेति।—उदात्तादिस्वरभेदात्—उदात्तादीनाम्,—उच्चैःस्वरादीनाम्, [अचादिपदेन अनुदात्त-स्वरितयोः परिग्रहः, तदर्थम्—अनुदात्तः,—नीचैःस्वरः, स्वरितः,—मध्यमस्वरः इति] स्वराणां भेदात्—पार्थक्यात्, भिन्नेन प्रयत्नेन—स्वरभेदजनितप्रयासेनेत्यर्थः, उच्चार्यत्वेन—उच्चारणीयत्वेन, भिन्नयोः,—समासभेदेन स्वरभेदात् भेदं गतयोः। जतुकाष्ठन्यायेन—यथा जतु काष्ठञ्च समवेतं प्रयत्नभेदेन जतुनः काष्ठं, काष्ठतश्च जतु पृथक् क्रियते, तथा स्वरभेदेन समवेतयोः शब्दयोः भेदोऽवगम्यते इत्यर्थः, पृथगुपलभ्यमानयोः अपि जतुकाष्ठयोर्योगे यथैक्यप्रतिभासः, तथेहापि शब्दैक्यम् इति भावः। स्वराभेदात्—समासाभेदेनोदात्तादिस्वरभेदाभावात्, अभिन्नप्रयत्नोच्चार्यतया—एकप्रयत्नोच्चारणीयत्वेन, शब्दाभेदात्—शब्दैक्यात्, अर्थयोः,—द्वयोरित्यर्थः, एकस्मिन्नेव फलद्वयं निष्पादयतीति—यथा एकस्मिन् वृन्ते फलद्वयं तिष्ठति, तथा एकप्रयत्नोच्चरिते एकस्मिन् शब्दे अर्थद्वयसमावेशेन अर्थश्लेषः इत्यर्थः। यदाश्रित इति—यमाश्रित्य तिष्ठतीत्यर्थः। तदलङ्कारः,—तस्य आश्रयस्य अलङ्कारः इत्यर्थः। लोकवदिति।—यथा लोके यो यमलङ्कारं परिधत्ते, स तस्य एवालङ्कारः, तद्दिदृक्षापीति भावः, यद्वा—यथा लोके कौस्त्वादिगतं मुकुटादि मस्तकादेरलङ्कारत्वेन व्यपदिश्यते, तथा काव्येऽपीति भावः। दूषयति, तदन्ये इति। तथा हि—तमेवार्थं जानीहीत्यर्थः। अत्र—अलङ्कारप्रश्ने इत्यर्थः। शब्दार्थगतत्वेन—अर्थं ध्वनिः, दोषः, गुणः, अलङ्कारः वा शब्दगतः अर्थगतो वा इत्येवमित्यर्थः, व्यवस्थितेः,—पर्य्यायान्तरपरिवृत्तिसहत्वासहत्वाभ्यां शब्दार्थगतत्वव्यवस्थायाः इत्यर्थः, अन्वयेति—तत्सत्त्वे तत्सत्ता अन्वयः, तदसत्त्वे तदसत्ता व्यतिरेकः, तौ अनुविदधाति—अनुसरतीति तथोक्ता तया भावः तेन, नियमः,—निर्द्धारणमित्यर्थः; यदि तस्य शब्दस्य सत्तायामेव तस्य ध्वन्यादेः सद्भावः, न तु तत्परिवृत्तौ, तदा ध्वन्यादीनां शब्दगतत्वम्, अन्यथा अर्थगतत्वमिति भावः। तस्मात् "अन्यथावृत्ति" इत्यादौ शब्दभेदेऽपि नार्थश्लेषः, शब्दपरिवृत्त्यसहत्वात् शब्दगतोऽयं ध्वन्यादिः

"स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिम्।
अहो! सुसदृशी वृत्तिस्तुलाकोटेः खलस्य च॥" (म)
इत्यादावर्थश्लेषः।

मिति बोध्यम्। शब्दाभेदादर्थश्लेष इति यदुक्तं, तद्दूषयति, न चेति।—अर्थभेदेनेति।—"सकृदुच्चरितः शब्दः सकृदेवार्थं गमयति" इति न्यायादिति भावः। दर्शनस्य प्रामाण्यानभ्युपगमे त्वाह, किञ्च अत्रेति।—अत्र—अन्धकेत्यादौ, मुख्यतया—प्राधान्येन, कविप्रतिभया—कवेः प्रज्ञोन्मेषेण, उट्टङ्कनात्—उत्कीर्त्तनात्, उत्थापनादित्यर्थः। शब्दस्यान्वयानुविधायित्वं प्रदर्श्य व्यतिरेकानुविधायित्वं दर्शयति, विसदृशेति।—विसदृशस्य—अन्यविधस्य, शब्दद्वयस्य बन्धे—रचनायां, (अत्र चकारः भिन्नक्रमे, तेन वैचित्र्याभावाच्चेत्यन्वयः। ननु वैचित्र्यस्य शब्दान्वयव्यतिरेकानुविधायित्वेन किमायातम्? अत आह, वैचित्र्यस्यैवेति।—वैचित्र्यस्य—चमत्कारस्य। अलङ्कारत्वात्—अलङ्कारनियामकत्वात् इत्यर्थः। अर्थमुखेति।—अर्थमुखप्रेक्षितया—अर्थानुगुण्यदर्शनेन, अर्थालङ्कारत्वे—यो हि अर्थानुगुण्यं दर्शयति, स एवार्थालङ्कार इत्येवम् अर्थालङ्कारत्वाङ्गीकारे इत्यर्थः। अनुप्रासादीनामिति।—अत्रादिपदेन वक्रोक्ति-भाषासम यमकादीनां परिग्रहः। रसादिपरत्वेन—रसाद्यनुकूलत्वेन, रसाद्युत्कर्षाभिप्रायप्रयोज्यत्वेन इत्यर्थः; रसादीनाम् इत्यत्र आदिपदेन रसाभासादीनां ग्रहणम्। अर्थमुखप्रेक्षितया—रसादीनां व्यङ्ग्यार्थत्वादिति भावः, अर्थालङ्कारत्वप्रसङ्गः,—अर्थालङ्कारत्वापत्तिरित्यर्थः। अभिन्नप्रयत्नोच्चार्य्यत्वेन—एकप्रयासोच्चारणीयत्वेन। शब्दभेदेऽपि—"विधौ" इत्यादौ स्वरभेदाभावेन एकप्रयत्नेनैव शब्दद्वयोच्चारणात् अर्थद्वयप्रतीतिः इति भावः। तथापि, मते इति शेषः। इति—अस्मात् कारणात्, उभयत्रापि—"प्रतिकूलताम्" इत्यत्र "अन्धकक्षयकर" इत्यत्र च समङ्गाभङ्गश्लेषयोः इत्यर्थः। ननु एवं श्लेषस्यार्थालङ्कारत्वोच्छेदः स्यात् इत्यत आह—यत्र त्विति। शब्दपरिवर्त्तने इति।—शब्दस्य परिवर्त्तने—पर्य्यायशब्देनोपादानेऽपि, श्लेषत्वखण्डना—श्लेषत्वव्याघातः।

(म) स्तोकेनेति।—अहो।—आश्चर्य्ये! तुलाकोटेः,—सुवर्णादिगौरवप्रकर्षाप्रकर्षप्रकाशिका लुप्तिका शिखरशलाका तुलाकोटिः तस्या इत्यर्थः, खलस्य—दुर्जनस्य च, वृत्तिः,—व्यवहारः, सुसदृशी—विशेषेण सौसादृश्यशालिनी, तथा हि, उभयमपीत्यर्थः, स्तोकेन—अल्पेन, उन्नतिम्—ऊर्द्ध्वगतिम्, अभ्युदयञ्च, आयाति—प्राप्नोति, स्तोकेन—अल्पेन, अधोगतिं—निम्नगामित्वं, दुरवस्थाञ्च, आयाति। अत्र उन्नत्यधोगतिशब्दयोः परिवृत्तावपि, अथवा स्तोकादिपदस्थाने अल्पादिपदनिवेशेऽपि न

अस्य च अलङ्कारान्तरविविक्तविषयताया असम्भवात् विद्यमानेषु अलङ्कारान्तरेषु अपवादत्वेन तद्बाधकतया तत्प्रतिभोत्पत्तिहेतुत्वमिति केचित्।

इत्थमत्र विचार्य्यते—समासोक्त्यप्रस्तुतप्रशंसादौ द्वितीयार्थस्यानभिधेयतया नास्य गन्धोऽपि। "विद्वन्मानसहंस—" इत्यादौ श्लेषगर्भे रूपकेऽपि मानसशब्दस्य चित्तसरोरूपोभयार्थत्वेऽपि रूपकेण श्लेषो बाध्यते, सरोरूपस्यैवार्थस्य विश्रामधामतया प्राधान्यात्; श्लेषे हि अर्थद्वयस्यापि समकक्षत्वम्। "सन्निहितबालान्धकारा भास्वन्मूर्त्तिश्च" इत्यादौ विरोधाभासेऽपि विरुद्धार्थस्य प्रतिभातमात्रस्य प्ररोहाभावान्न श्लेषः। एवं पुनरुक्तवदाभासेऽपि।

तेन "येन ध्वस्त—" इत्यादौ प्राकरणिकयोः "नीतानाम्—" इत्यादावप्राकरणिकयोरेकधर्माभिसम्बन्धात् तुल्ययोगितायाम् (य)—

श्लेषत्वखण्डनम्। "अयं सर्वाणि शास्त्राणि हृदि ज्ञेषु च वक्ष्यति" इत्यादौ "वक्ष्यति" इत्यादिपदस्थाने "धारयिष्यति" इत्यादिपदनिवेशे तु नार्थद्वयप्रतीतिः इति तत्र शब्दालङ्कारत्वमेव इति बोध्यम्।

(य) इदानीं श्लेषस्यालङ्कारान्तरविविक्तविषयत्वमुपपादयितुं परमतं निराकरोति, अस्य चेति।—श्लेषस्य चेत्यर्थः। अलङ्कारेति।—अलङ्कारान्तरेभ्यः श्लेषभिन्नेभ्यः अन्येभ्यः अलङ्कारेभ्य इत्यर्थः, विविक्तः,—विभिन्नः, अपरामृष्ट इत्यर्थः, विषयो यस्य तत्तायाः, असम्भवात्—असत्त्वात्, यत्र यत्र श्लेषोऽस्ति, तत्र तत्रान्योऽपि कश्चिदलङ्कारोऽस्तीति नियम इति भावः; विद्यमानेषु—तिष्ठत्सु, श्लेषेण सहेति शेषः, अलङ्कारान्तरेषु—अन्येषु अलङ्कारेषु सत्सु इत्यर्थः, अपवादत्वेन—असम्भवविषयान्तरत्वेन, तद्बाधकतया—तेषामलङ्काराणां बाधकतया आच्छादकतया, तेभ्यः प्राबल्येनेत्यर्थः, तत्प्रतिभेति—तेषाम्—अलङ्काराणां, प्रतिभा—स्फुरणं, तस्या उत्पत्तिहेतुः,—सम्भवकारणं तत्त्वम्, अलङ्कारान्तरप्रतीतिजनकप्रतीतिविषयत्वमित्यर्थः, तथा च प्राथमिकप्रतीतिविषयत्वेन श्लेषस्यैव व्यपदेशः, न तु चरमप्रतीतिविषयस्यालङ्कारान्तरस्य व्यपदेश इति भावः। श्लेषाबाध्यानलङ्कारान् विशिष्य दर्शयति, इत्थमिति।—तत्र प्रथमं

समासोक्त्यादेः श्लेषवाध्यत्वमयं निराकरोति, समासोक्तीति।—जनभिधेयतया—अवाच्यतया, व्यङ्ग्यतयेत्यर्थः, अत्र—श्लेषस्य, तस्योऽपि—अव्यङ्ग्यस्योऽपि, व्यङ्ग्यमेव सत्र विशेषार्थत्व प्रतीतेरिति भावः। ननु श्लिष्टपदे सभवार्थस्याभिधेयतया श्लेषवाध्यत्वमक्षीकृत्य आह, विद्वदिति।—"विद्वन्मानसहंस!—" इत्यादौ—"विद्वन्मानसहंस! वैरिवनसावसन्नीचदीप्तयुते! दुर्नामार्णवनीरवोडितवलित्खोकारदैत्यानल!। सत्यप्रीतिविधानदक्ष! विजयप्राप्तावलीन! प्रभो! दासाऽयं वरवीर! वज्रधरतां वैरिक्षमुक्षे: क्षिपा:॥" इत्यत्रेत्यर्थः, (विदुषां—ज्ञानिनां, मानसमेव—चित्तमेव, मानसं—सरोविशेषः, तस्य हंसः तत्सम्बुद्धौ, विद्वन्मानसहंसशब्दादिति यावत्) श्लेषमर्मे—श्लेषप्रतिभोत्थापिते इत्यर्थः, चित्तसरोरूपोभयार्थलेऽपि—मनःसरोवररूपकरूपकोभयवाच्यलेऽपि इत्यर्थः। अत्र रूपकस्यैव श्लेषवाध्यत्वम्। श्लेषस्य वाच्यत्वप्रयोजकं सभवविषयवाक्यत्वं दर्शयति, सरोरूपस्येति।—एवकारेण चित्तरूपस्य व्यवच्छेदः, मानसशब्दस्य यः सरोवररूपोऽर्थः तस्यैव, न तु चित्तरूपस्येत्यर्थः, विद्वान्मानसतया—हंसस्य विद्वान्माद्यतया, रूपकप्रतीतिपर्यवसानस्यालेनेत्यर्थः। प्राधान्यादिति।—अर्थयोः समकक्षत्वाभावोपपादनात् प्राबल्यादित्यर्थः, समकक्षत्वं—तुल्यबलत्वं, परस्परनिरपेक्षतया द्वयोरेव प्रधानत्वमित्यर्थः; तथा च अर्थद्वयस्य समकक्षत्वे श्लेषस्य विषयः सम्भवति, प्रकृते तु उद्देश्यविधेयभावेन गुणप्रधानभावापेक्षितया तुल्यबलत्वात् रूपकेण श्लेषो बाध्यते; अन्यथा श्लिष्टपरम्परितरूपकस्य निर्विषयतापत्तेः इति भावः। नन्वेवमपि विरोधाभासोच्छेदस्य समकक्षार्थद्वयाभिधानेन श्लेषस्य निर्बाधप्रवृत्तत्वादित्यत आह, सन्निहितेति।—अत्र भाक्तमूर्त्तिः,—मुख्यमूर्त्तिः, सन्निहितवाक्यान्तरा—नवान्यवारसन्निधाना इत्यापातः विरोधः, पर्यवसाने तु—सुकेशावा अग्निशावा वर्णनिष्टं, सन्निहितः वाक्यः,—केशः एव, अन्यकारो यथा: तादृशी, भाक्तमूर्त्तिः,—दीप्यमाना तनुरित्यविरोधः। प्रतिभातमात्रत्व—स्फुरितमात्रत्व, पदार्थस्फूर्तिविषयत्वेति यावत्, प्रतीघातभावात्—चङ्क्रमाभावात्, पदोत्तरत्वेन शब्दानुभवाभावात् इत्यर्थः, न श्लेषः इत्यन्वयः; अर्थयोः समकक्षताऽभावादिति शेषः; तथा चार्थद्वयस्य शब्दानुभवेऽपि श्लेषस्य विषयसम्भवादुत्कर्षत्व, विरोधाभासस्याधीन्यतया शब्दानुभवाभावेऽपि विषय इत्यपवादत्वमिति भावः। पुनरुक्तवदाभासेऽपीति।—अत्रापि चापातत एव पुनरुक्तवत् स्फुरणं, न तु पर्यवसानेऽपीति भावः। ननु तर्हि के श्लेषवाध्याः? इत्यपेक्षायामाह, तेनेति।—समासोक्त्यादौ श्लेषस्य प्रकाशाभावादेव वाध्यत्वमत्रेत्यर्थः। "प्राकरणिकयोः" इति "एकधर्माभिसम्बन्धात्" इत्यनेनान्वयः, एकः धर्मः,—गुणक्रियारूपः, तस्य अभिसम्बन्धात्—संबोधात्, "श्लेष—"

"स्वेच्छोपजातविषयोऽपि न याति वक्तुं
देहीति मार्गणशतैश्च ददाति दुःखम् ।
मोहात् समुत्क्षिपति जीवनमप्यकाण्डे
कष्टं प्रसूनविशिखः प्रभुरल्पबुद्धिः ॥" (र)

इत्यादौ माधवीमाधवयोः पदार्थयोरेकरक्षणक्रियाऽभिसम्बन्धः इति प्राकरणिकत्वम् । "गीतानाम्—" इत्यादौ "अप्राकरणिकयोः" इति पद्म-मृगविशेषयोरुपमानत्वं अप्राकरणिकत्वं बोध्यं, कमलेक्षणयोः पदार्थयोः आकुलीभावादिरूपैकगुणसम्बन्धश्च बोध्यः । तुल्ययोगितायां—"पदार्थानां प्रस्तुतानामन्येषां वा यदा भवेत् । एकधर्माभिसम्बन्धः स्यात्तदा तुल्ययोगिता ॥" इति वक्ष्यमाणलक्षणायां, "विद्यमानायामपि" इत्यग्रेणान्वयः ज्ञेयः ।

(र) स्वेच्छेति ।—निर्बोधराजसेवकस्योक्तिरियम् । प्रसूनविशिखः,—कामः, अल्पबुद्धिः,—अबोधः, प्रभुः,—स्वामी च, कष्टं—क्लेशहेतुरित्यर्थः, भवतीति शेषः । पादत्रयेण तयोः कष्टहेतुत्वमुपपादयति, तथा हि—प्रसूनविशिखः स्वेच्छया—यथेष्टम्, उपजाताः,—सम्भवन्तः, विषयाः,—लक्ष्याणि यस्य तथोक्तः अपि, स्वेच्छया कामिजनरूपाणि लक्ष्याणि विध्यन्नपीत्यर्थः, देहीति—शरीरीति, वक्तुं न याति—उक्तियोग्यतां न प्राप्नोतीत्यर्थः, अनङ्गत्वादिति भावः, मार्गणशतैः,—शरसमूहैः, दुःखं—क्लेशं, कामिभ्यः इति शेषः, ददाति, मोहात्—अज्ञानात्, स्वविकारजनितं मोहमुत्पाद्येत्यर्थः, [ल्यबर्थेयं पञ्चमी] जीवनमपि—प्राणानपि, कामिजनस्येति शेषः, अकाण्डे—सहसा, समुत्क्षिपति—हरति च । अल्पबुद्धिः प्रभुश्च स्वेच्छया—यथेष्टम्, उपजाताः,—अधिगताः, विषयाः,—सम्पदः, उपभोगसाधनद्रव्याणीत्यर्थः येन तादृशः, यथेच्छं व्ययोपयोगिसम्पदोऽधिकुर्वन्नपीत्यर्थः, न याति—तान् विषयान् न अनुभवति इत्यर्थः, ["सर्वे गत्यर्था ज्ञानार्थाः प्राप्त्यर्थाश्च" इत्यनुशासनसिद्धमिह गत्यर्थ-याधातोर्ज्ञानार्थत्वमिति बोध्यम्] मार्गणशतैः,—याचकसमूहैः, ("वनीयको याचनको मार्गणो याचकार्थिनौ" इत्यमरः) देहीति वक्तुं दुःखं ददाति—अर्थात् तेभ्यो याचकेभ्यो देहीति याञ्चाशतजन्यं क्लेशं ददातीति विशदार्थः, महाबुद्धिस्तु देहीति वचनं विनैव याचकेभ्यो धनं ददातीति भावः ; तथा मोहात्—अज्ञानात्, अपराधभ्रमात् इत्यर्थः, जीवनमपि, अधिकृतलोकानामिति शेषः, अकाण्डे—सहसा, समुत्क्षिपति—हरति । अत्र वसन्ततिलकं वृत्तं—"ज्ञेयं वसन्ततिलकं तभजा जगौ गः" इति तल्लक्षणम् ।

इत्यादौ च प्राकरणिकाप्राकरणिकयोरेकधर्माभिसम्बन्धा-दीपके (ङ)—

"सकलकलं पुरमेतज्जातं सम्प्रति सुधांशुबिम्बमिव" इत्यादौ च उपमायां विद्यमानायामपि श्लेषस्य एतद्विषयपरिहारेण असम्भवात्, एषाञ्च श्लेषविषयपरिहारेणापि स्थितेः, एतद्विषये श्लेषस्य प्राधान्येन चमत्कारित्वप्रतीतेश्च श्लेषेणैव व्यपदेशो भवितुं युक्तः, अन्यथा तदव्यपदेशस्य सर्वथाऽभावप्रसङ्गाच्च इति। (च)

अत्रोच्यते—न तावत् परमार्थतः श्लेषस्यालङ्कारान्तरा-विविक्तविषयता, "येन ध्वस्त—" इत्यादिना विविक्तविषय-त्वात्। न च अत्र तुल्ययोगिता, तस्याश्च द्वयोरप्यर्थयोर्वाच्यत्व-नियमाभावात्। अत्र हि माधवोमाधवयोरेकस्य वाच्यत्व-नियमेऽपरस्य व्यङ्ग्यत्वं स्यात्।

(ङ) प्राकरणिकाप्राकरणिकयोः,—अत्र अल्पबुद्धिः प्रभुः प्राकरणिकः, ज्ञानस्तु तदुपमानतया अप्राकरणिकः तयोः, एकधर्माभिसम्बन्धात्—एकेन धर्मेण गुणक्रिया-रूपेण सम्बन्धात्, दीपके—"अप्रस्तुतप्रस्तुतयोर्दीपकन्तु निगद्यते" इत्युक्तलक्षणे, विद्य-मानेऽपीति लिङ्गविपरिणामेनान्वयः।

(च) सकलेति।—एतत् पुरं—नगरं, सम्प्रति सुधांशुबिम्बमिव—चन्द्रबिम्ब-मिव, सकलकलं—सकलकलेन—कलरवेण सह वर्त्तमानमित्यर्थः, अत्र—सकलकलं सकला—सम्पूर्णा, कला यस्य तादृशं, जातं—सम्पन्नमित्यर्थः। अत्र सकलकलत्व-रूपधर्मसाम्यात् पुरं चन्द्रबिम्बेनोपमीयते इति उपमायां—"साम्यं वाच्यमवैधर्म्ये वाक्यैक्ये उपमा द्वयोः" इत्युक्तलक्षणायां, विद्यमानायामपि—स्थितायामपि, एतद्विषय-परिहारेण—तुल्ययोगितादिविषयपरित्यागेन, असम्भवात्—असत्त्वात्, एतान् विषयान् परित्यज्य श्लेषो न सम्भवतीति हेतोरित्यर्थः। एषाञ्चेति।—एषां—तुल्ययोगितादीनामलङ्काराणाञ्च, श्लेषविषयपरिहारेणापि—विना श्लेषमित्यर्थः, स्थितेः,—सम्भवादित्यर्थः, प्राधान्येन—प्राधान्येन, चमत्कारित्वप्रतीतेः,—वैचित्र्य-योगात्, व्यपदेशः,—कीर्त्तनं, श्लेषालङ्कारोऽयमिति कथनमित्यर्थः। अन्यथा—एतादृश-स्थले श्लेषान्यपदेशे इत्यर्थः, तदव्यपदेशस्य—श्लेषालङ्कारकीर्त्तनस्य, सर्वथा—सर्वैः प्रकारैः, अभावप्रसङ्गात्—लोपापत्तेरित्यर्थः।

किञ्च तुल्ययोगितायामप्येकस्यैव धर्मस्यानेकधर्मिसम्बन्धतया प्रतीतिः, इह तु अनेकेषां धर्मिणां पृथक्पृथक्धर्मसम्बन्धतया। (ग)

"सकलकलम्—" इत्यादौ च न उपमाप्रतिभोत्पत्तिहेतुः श्लेषः, पूर्णोपमाया निर्विषयत्वापत्तेः। "कामकलमिव मुखं मनोज्ञमेतत्—" इत्याद्यस्ति पूर्णोपमाविषय इति चेन्न; यदि "सकलकलम्—" इत्यादौ श्लिष्टश्लेषतया नोपमा, तत् किमपराद्धं "मनोज्ञम्" इत्यादावर्थश्लेषेण? (घ)

(ग) एतन्मते दोषं पदस्थं विद्वान्नाह, अथोच्यते इति।—परमार्थतः,—तत्त्वतः। अलङ्कारेति।—अलङ्कारान्तरेण अविभिन्नः,—अविभिन्नः, संवलित इत्यर्थः, विषयो यस्य तस्य भावः, न तावत्—नैवेत्यर्थः। विभिन्नविषयत्वात्—अलङ्कारान्तरपृथक्कृतविषयत्वात्, विभिन्नविषयत्वादित्यर्थः। अनेति।—"येन श्लक्ष्ण—" इत्यादि श्लेषविषये इत्यर्थः। तस्याश्चेति।—तस्याः,—तुल्ययोगितायाः, एतद्दोषकलापि उपलक्षणम्; द्वयोरप्यर्थयोः,—प्राकारधिक्याप्राकरधिक्ययोः वाक्यार्थयोः, वाच्यनियमाभावात्—अभिधेयत्वनियमाभावात्, एकस्य वाच्यत्वनियमादिति तात्पर्यार्थः, द्वावेव वाच्यौ भवतः इत्येवं नियमो नास्ति, अत्र तु उभयोरेवार्थयोर्वाच्यत्वं स्यादेव इति भावः। न च "रक्ताः स्वभावसुभगा बहवो रागमुल्बणम्। इमौ दूयत्र वर्तन्ति स्वाभिः प्रेयिताः प्रियम्॥" इत्यादौ तुल्ययोगितायां द्वितीयार्थस्यापि वाच्यत्वेन अवश्यमेकस्यैव वाच्यत्वमिति वाच्यम्; यो तु "दृगांचलस्तविषयः" इत्यादौ पदपराद्धत्या द्वितीयार्थस्यापि वाच्यत्वमङ्गीकुर्वन्ति, तेषां मते इत्यदोषात्। अत्र वेति।—"येन श्लक्ष्ण—" इत्यादौ तुल्ययोगिताऽनुरोधेन एकस्य वाच्यत्वनियमो वाच्यः, तथा सति अपरस्य व्यङ्ग्यत्वापत्त्या श्लेषस्य विषयो न स्यादिति भावः। ननु तुल्ययोगितायां पदपराद्धत्वपक्षे द्वयोरप्यर्थयोः वाच्यत्वनियमोऽस्तु; तत्र का हानिः? इत्याशङ्क्य दोषान्तरमुत्थापयति, किञ्चेति।—धर्मस्य—गुणक्रियादेः, अनेकधर्मिसम्बन्धतया—बहुव्यक्तिसंसृष्टतया। इह तु—श्लेषे तु इत्यर्थः, अनेकेषां—बहूनां, धर्मिणां (बहुवचनमुपलक्षणं, द्वयोरपि धर्मिणोः, यथा—"येन श्लक्ष्ण—" इत्यादिषु माधव उमाधवश्च द्वौ धर्मिणौ तयोः) पृथक् पृथक् धर्मस्य सम्बन्धतया प्रतीतिः इत्यन्वयः।

(घ) अलङ्काराणां यो यत्प्रतीतिजन्यप्रतीतिविषयः, स तदाश्रय इति नियमादिहापि श्लेषस्य वाच्यत्वमुपमायां प्रयत्न निषेधति—सकलकलमित्यादौ चेति।

"स्फुटमर्थालङ्कारावेतावुपमासमुच्चयौ किन्तु।
आश्रित्य शब्दमात्रं सामान्यमिहापि सम्भवतः॥" (स)

इति रुद्रटोक्तदिशा गुणक्रियासाम्यवच्छब्दसाम्यस्याप्युपमाप्रयोजकत्वात्। ननु गुणक्रियासाम्यस्यैव उपमाप्रयोजकता युक्ता, तत्र साधर्म्यस्य वास्तवत्वात्; शब्दसाम्यस्य तु न तथा, तत्र साधर्म्यस्य अवास्तवत्वात्; ततश्च पूर्णोपमाया अन्यथाऽनुपपत्तेर्गुणक्रियासाम्यस्यैवार्थश्लेषविषयतापरित्यागे पूर्णोपमाविषयता युक्ता, न तु "सकलकलम्—" इत्यादौ शब्दसाम्यस्यैवेति चेन्न; "साधर्म्यमुपमा" इत्येवाविशिष्टस्य उपमालक्षणस्य शब्दसाम्यात् व्यावृत्तेरभावात्। यदि च शब्दसाम्ये

न उपमेति।—उपमायाः प्रतिभा उत्पत्तिहेतुर्यस्य तादृशः, न, उपमानुप्राणितः श्लेषो नेत्यर्थः, श्लेषेणोपमाबाधक इति भावः। निर्विषयत्वापत्तेः,—लक्ष्यस्थलाभावप्रसङ्गादित्यर्थः। तत्—तदा, किमपराद्धं—को दोषः कृत इत्यर्थः, तदा मनोज्ञमित्यादौ अर्थश्लेष एवास्तामिति समुदितार्थः।

(स) स्फुटमिति।—एतौ उपमासमुच्चयौ स्फुटं—स्पष्टम्, अर्थालङ्कारौ किन्तु सामान्यं शब्दमात्रम् आश्रित्य इहापि—अर्थालङ्कारमध्येऽपि, सम्भवतः। यद्यपि "सकलकलम्—" इत्यादौ एकप्रयत्नेन शब्दद्वयोत्पत्त्या शब्दस्यापि एकत्वं न सम्भवति, तथाऽपि एकानुपूर्व्यवच्छिन्नत्वेन शब्दयोरेकत्वप्रतिभास इति भावः। समुच्चयालङ्कारे एकधर्माभिसम्बन्धस्य निवेशाभावात् तत्समुच्चयपदमत्र तुल्ययोगितापरं दीपकपरञ्च, तयोः तत्सम्भवात्; नन्वेवं "किञ्च तुल्ययोगितायाम्—" इत्यादिना श्लेषतुल्ययोगितयोः यो विषयविभागः कृतः, स न सङ्गच्छते; "येन ध्वस्त—" इत्यादावपि शब्दरूपैकधर्मसम्बन्धस्य सत्त्वेन तुल्ययोगिताया विषयसम्भवात् इति चेत्, सत्यम्; यत्र अनेकस्य एकधर्मसम्बन्धावगमे द्विवचनबहुवचनचकाराद्यपेक्षा, तत्रैव दीपकतुल्ययोगितयोः विषयः; "येन ध्वस्त—" इत्यादौ तु द्विवचनाद्यपेक्षाविरहेण तुल्ययोगिताया विषय एव नास्ति, ययोरेकधर्मसम्बन्धः, तयोः अनेकप्रयत्नोच्चार्य्यपदवाच्यत्वं दीपकतुल्ययोगितालक्षणे निवेशनीयम्, अतो नातिप्रसङ्गः। एवञ्च, "स्वेच्छोपजातविषयोऽपि—" इत्यादि दीपकस्य, "किरणा हरिणाङ्कस्य—" इत्यादि "विकसन्नेत्रनीलाब्जे—" इत्यादि च तुल्ययोगितायाश्च विषय इति ध्येयम्।

साधर्म्यमवास्तवत्वान्नोपमाप्रयोजकं, तदा कथं "विद्वन्मानसहंस!—" इत्यादौ आधारभूते चित्तादौ सरोवराद्यारोपो राजादेर्हंसाद्यारोपप्रयोजकः।

किञ्च यदि वास्तवसाम्य एवोपमाऽङ्गीकार्य्या, तदा कथं त्वयाऽपि "सकलकलम्—" इत्यादौ बाध्यभूतोपमाऽङ्गीक्रियते? किञ्च, अत्र श्लेषस्यैव साम्यनिर्वाहकता, न तु साम्यस्य श्लेषनिर्वाहकता, श्लेषबन्धतः प्रथमं साम्यस्यासम्भवात्, इत्युपमाया एवाङ्गित्वेन व्यपदेशो ज्यायान् "प्रधानेन हि व्यपदेशा भवन्ति" इति न्यायात्।

ननु शब्दालङ्कारविषयेऽङ्गाङ्गिभावसङ्करो नाङ्गीक्रियते, तत् कथमत्र श्लेषोपमयोरङ्गाङ्गिभावः सङ्कर इति चेन्न; अर्थानुसन्धानविरहिण्यनुप्रासादावेव तथाऽनङ्गीकारात्। एवं दीपकादावपि ज्ञेयम्। (ह)

(ह) इतीति।—इति रुद्रटेन—तदाख्यग्रन्थकारेण, उक्ता या दिक्—नयः तया, गुणेति—गुणक्रियासाम्यवत्—गुणक्रियासाम्यस्येव, यथा गुणक्रियासाम्यम् उपमाप्रयोजकं, तथा शब्दसाम्यमपि उपमाप्रयोजकमिति भावः। उपमाप्रयोजकता—औपम्यसाधकत्वम्। तत्र—गुणक्रियासाम्यप्रयुक्तोपमायां, साधर्म्यस्य—समानधर्मवत्त्वस्य, वास्तवत्वात्—वस्तुसमवेतत्वात्, तात्त्विकत्वादित्यर्थः। तथा—उपमाप्रयोजकता युक्ता इत्यर्थः, तत्र—शब्दसाम्यप्रयुक्तोपमायां, साधर्म्यस्य—शब्दरूपसामान्यस्य धर्मस्य, अवास्तवत्वात्—उपमानोपमेयरूपवस्तुनोऽसमवेतत्वात्। ततश्च—शब्दसाम्यस्य उपमाप्रयोजकत्वायोगाच्च। अन्यथाऽनुपपत्तेः,—अन्येन प्रकारेण उपपत्तेरसम्भवादित्यर्थः। अविशिष्टस्य—वास्तवत्वरूपविशेषरहितस्य, सामान्येनाभिहितस्येत्यर्थः, उपमालक्षणस्य—काव्यप्रकाशाद्युक्तस्य, तथा च येन केनापि सम्बन्धेन उपमानोपमेयवृत्तिधर्म उपमा, न तु समवायसम्बन्धेन इति नियमः, शब्दस्य उपस्थाप्यत्वसम्बन्धेन उपमानोपमेयवृत्तित्वेन उपमाप्रयोजकत्वम् अक्षतमिति भावः। व्यावृत्तेः,—व्यवच्छेदस्य। उपमानोपमेययोरभेदप्रतीतिः रूपकम् इत्यभिप्रायेणाह—यदीति। विद्वन्मानसेत्यादि।—उपमानोपमेययोरभेदप्रतिपत्तिरूपस्य रूपकस्य कथमत्र अवास्तवेऽपि सद्भावः, भवन्मते अवास्तवे उपमानोपमेयभावस्यासत्त्वादिति

"सत्पक्षा मधुरगिरः प्रसाधिताशा मदोद्धतारम्भाः।
निपतन्ति धार्त्तराष्ट्राः कालवशान्मेदिनीपृष्ठे॥" (क)

भावः। आधारभूते—विषयरूपे। ननु श्लिष्टपदनिबन्धनपरम्परितरूपकान्यथाऽनुपपत्त्या तत्र तथा कल्पनीयं, न तूपमायामित्यत आह—किञ्चेति। कथमिति।—बाध्यभूता—बाधिता इत्यर्थः। श्लेषस्य अलङ्कारान्तरप्रतिभोत्पत्तिहेतुत्वेन तेनैव व्यपदेश इति यदुक्तं तदपि दूषयति, किञ्चेति।—अत्र—"सकलकलम्" इत्यादौ। साम्यनिर्वाहकता—औपम्यप्रयोजकता, श्लेषबन्धतः,—श्लेषरचनायाः, प्रथमं—पूर्वम्। अङ्गित्वेन—साध्यतया प्राधान्येन, व्यपदेशः,—कीर्त्तनं, ज्यायान्—श्रेष्ठः। तथा च, श्लेषस्य प्रथमोपस्थितत्वेऽपि साधनत्वेन अप्रधानतया तेन व्यपदेशो नोचित इति भावः। अर्थेति।—अर्थानुसन्धानविरहिणि—अर्थानुसन्धानरहिते, केवल शब्दानुसन्धानमात्रसाध्ये इति भावः। तथाऽनङ्गीकारात्—अङ्गाङ्गिभावसङ्करास्वीकारादित्यर्थः, श्लेषस्य शब्दालङ्कारत्वेऽपि अर्थानुसन्धानसापेक्षत्वात् उपमाङ्गत्वम् अक्षतमिति भावः। एवमिति।—यथा "सकलकलम्" इत्यत्र उपमायाः प्राधान्यं, तथा "स्वेच्छोपजातविषयः" इत्यादौ श्लेषसत्त्वेऽपि दीपकस्य प्राधान्यमिति भावः। (दीपकादावित्यादिशब्दात् तुल्ययोगितादिपरिग्रहः)।

(क) "सत्पक्षाः—" इत्यादौ केचिदुपमाध्वनिं, केचिच्च श्लेषं स्वीकुर्वन्ति, तदुभयमपि नोचितमित्याह, सत्पक्षा इति।—सत्पक्षाः,—उत्कृष्टपक्षशालिनः, अन्यत्र—सुसहायाः, मधुरगिरः,—मनोहरवचसः, उभयत्र समानं, यद्वा—सत्पक्षाः,—उत्तमसहायाश्च ते अमधुरगिरश्च इति कर्मधारयः समासः, प्रसाधिताः,—शोभिताः, आशाः—दिशः यैः तादृशाः, अन्यत्र—अर्थिनामाशापूरकाः, वशीकृतदिशो वा, अथवा—प्रसाधिताः,—प्रकृष्टं साधिताः, आशाः,—स्वेच्छाविषयाः यैः तादृशाः, अथवा—प्रसाधिता—धृता, आशा—जयेच्छा यैः ते, मदोद्धतः,—मदेन—चित्तविकारविशेषेण, उद्धतः,—उच्चैस्तरः, आरम्भः,—आरवः येषां ते, ["रभि शब्दे" इत्यस्य रूपम्] अन्यत्र—मदेन—गर्वेण, उद्धताः,—अविनीताः, आरम्भाः,—युद्धादिविचेष्टितानि येषां तथाभूताः, धार्त्तराष्ट्राः,—हंसविशेषाः, धृतराष्ट्रसुताः दुर्य्योधनादयश्च, कालवशात्—शरत्कालक्रमात्, अन्यत्र—मृत्युकालवशात्, मेदिनीपृष्ठे—पृथिव्यां, निपतन्ति, मानससरस इति शेषः, "जलधरसमये मानसं यान्ति हंसाः" इति कविसमयप्रसिद्धेः, साम्प्रतं वर्षाऽऽपगमादिति भावः, अन्यत्र—रणक्षेत्रे, निपतन्ति—निहताः शेरते इत्यर्थः। वेणीसंहारस्येदं पद्यम्। अत्रार्य्या नाम छन्दः।

अत्र शरद्वर्णनया प्रकरणेन धार्त्तराष्ट्रादिशब्दानां हंसाद्यर्थाभिधाने नियमनात् दुर्य्योधनादिरूपोऽर्थः शब्दशक्तिमूलो वस्तुध्वनिः। इह च प्रकृतप्रबन्धाभिधेयस्य द्वितीयस्यार्थस्य सूच्यतयैव विवक्षितत्वादुपमानोपमेयभावो न विवक्षित इति नोपमाध्वनिः, न वा श्लेष इति सर्वमवदातम्। (ख)

पद्माद्याकारहेतुत्वे वर्णानां चित्रमुच्यते ॥६६५॥ (ग)

आदिशब्दात् खड्ग-मुरज-चक्र-गोमूत्रिकादयः। अस्य च तथाविधलिपिसन्निवेशविशेषवशेन चमत्कारविधायिनामपि वर्णानां तथाविधश्रोत्राकाशसमवायविशेषवशेन चमत्कारविधायिभिर्वर्णैरभेदेनोपचाराच्छब्दालङ्कारत्वम्। (घ)

(ख) अत्र शरदिति।—प्रकरणेन—"संयोगो विप्रयोगश्च साहचर्य्यं विरोधिता। अर्थः प्रकरणं लिङ्गम्" इति लक्षणोक्तेन, नियमनात्—नियन्त्रणात्, व्यवस्थापनात् इत्यर्थः। सूच्यतयैव—सामान्येन प्रकाश्यतयैव, विवक्षितत्वात्—वक्तुमिष्टत्वात्। उपमाध्वनिः,—व्यङ्ग्यभूता उपमा इत्यर्थः। न वा श्लेष इति।—प्रकरणनियमेन द्वितीयार्थस्य अनभिधेयत्वादिति हेतुरत्र द्रष्टव्यः। अवदातं—विशुद्धं, निर्मलमिति यावत्।

(ग) चित्राख्यालङ्कारमनेकविधमाह, पद्मेति।—वर्णानां पद्माद्याकारहेतुत्वे—पद्माद्याकारवर्णस्तोमजनकत्वे इत्यर्थः, (आदिपदेन खड्गमुरजचक्रगोमूत्रिकादयो गृह्यन्ते इति मूलकृतैवोक्तम्) पद्मादिसदृशवर्णानां विन्यासः चित्रमिति तात्पर्य्यार्थः।

(घ) आदिशब्दादिति।—पद्माद्याकारेत्यादिपदादित्यर्थः, ("गोमूत्रिकादयः" इत्यत्र आदिपदेन काकपद्यादयो ग्राह्याः)। ननु श्रोत्रसम्बन्धानां जन्यवर्णानां पद्माद्याकारजनकत्वरूपचित्रालङ्काराभावात् कथमस्य शब्दालङ्कारत्वम्? अतस्तदुपपादयति, अस्य चेति।—चित्रालङ्कारस्येत्यर्थः, तथाविधेत्यादि।—तथाविधस्य—पद्मादिसदृशस्य, लिपीनां—वर्णसंस्थानानां, सन्निवेशस्य—रचनाविशेषस्य, वशेन—सामर्थ्येनेत्यर्थः, चमत्कारविधायिनां—वक्तृविस्मयकारिणां, वैचित्र्यबोधकानामित्यर्थः। तथाविधेति।—तथाविधः यः श्रोत्राकाशसमवायविशेषः,—कर्णरन्ध्रसम्बन्धविशेषः, तद्वशेन, चमत्कारविधायिभिः,—श्रोतृविस्मयजनकैः। अभेदेन—तादात्म्येन, उपचारात्—अध्यवसायात्; एवञ्च पद्माद्याकारलिपिसन्निवेशविशेषमालोक्य वक्ता ये वर्णा

तत्र पद्मबन्धो यथा मम—

"मारमासुषमा चारुरुचा मारवधूत्तमा ।
मात्तधूर्त्ततमावासा सा वामा मेऽस्तु मा रमा ॥" (ङ)

पद्मबन्धचित्रम् ।



उच्चार्य्यन्ते, तैरेव श्रोतॄणां श्रोत्रे पद्माद्याकारवर्णस्तोमो जन्यते; कार्य्यकारणयो-रभेदोपचारेण जन्यवर्णानामपि चित्रालङ्कारसम्भव इति भावः ।

(ङ) पद्मबन्धं चित्रमुदाहरति, मारमेति ।—मारस्य—कामस्य, मा—जननी, सुषमा—परमा शोभा, तत्स्वरूपेत्यर्थः, चारुरुचा—मनोहरकान्त्या, मारवध्वाः,—रतेरपि, उत्तमा—श्रेष्ठा, माऽऽत्तः,—न गृहीतः, धूर्त्ततमस्य आवासः यया सा तथोक्ता, रमा—लक्ष्मीः, मे—मम, वामा—प्रतिकूला, मा अस्तु—न भवतु । यद्वा—सा वामा—मनोरमा स्त्री, मे—मम, अस्तु—भवतु, रमा—लक्ष्मीरपि इत्यर्थः, मा अस्तु—न भवतु ; सा मनोमोहिनी यदि मम स्यात्, तदाऽहं सर्वजनकाम्यां श्रियमपि तृणाय मन्ये इति भावः । सा कीदृशीत्याह, मारमेति ।—मारस्य—कामस्य, मा—लक्ष्मीः, सैव सुषमा परमा शोभा यस्याः सा तथोक्ता, चारुरुचा—मनोहरकान्त्या, मारवध्वाः,—रतेरपि, उत्तमा, मात्तधूर्त्ततमावासा—अगृहीत-धूर्त्ततमगृहा इति ।

एषोऽष्टदलपद्मबन्धो दिग्दलेषु निर्गमप्रवेशाभ्यां श्लिष्टवर्णः, किन्तु विदिग्दलेषु अन्यथा, कर्णिकाऽक्षरन्तु श्लिष्टमेव। एवं खड्गबन्धादिकमपि ज्ञेयं, काव्यान्तर्गतभूततया तु नेह प्रपञ्च्यते। (च)

(च) एष इति।—दिग्दलेषु—पूर्वदक्षिणपश्चिमोत्तरपदेषु, निर्गमप्रवेशाभ्यां—बहिर्गमनान्तर्गमनाभ्यां, निर्गमेन एकार्थः, प्रवेशेन अन्यार्थः इति द्वैरोपित्यर्थः, श्लिष्टवर्णः,—विभिन्नरूपवर्णः, अनुलोमप्रतिलोमपाठेन एकरूपाक्षर इत्यर्थः, अन्यथा क्वचित् प्रवेशः क्वचिन्निर्गम इत्यादि श्लिष्टवर्ण एव। विदिग्दलेषु—अग्न्यादिकोणवर्तिदलेषु, अन्यथा—अश्लिष्टवर्ण इत्यर्थः, कर्णिकाक्षरं—पद्मनाभस्थितमक्षरम्। अत्र अष्टसु दिक्षु वितताष्टदलं पद्मं लेख्यं, तत्कर्णिकायां श्लोकस्य प्रथममक्षरं लेख्यं, ततः पूर्वादिदलेषु प्रदक्षिणक्रमेण द्वौ द्वौ वर्णौ लेख्यौ, एवं सप्तदशभिः अक्षरैः पद्मं भवति, तत्र कर्णिकास्थवर्णोपक्रमेण प्राच्यदले निर्गमेण, आग्नेयदले प्रवेशेन, दक्षिणदले निर्गमप्रवेशाभ्यां, नैर्ऋतदले निर्गमेण, पश्चिमदले निर्गमप्रवेशाभ्यां, वायव्यदले प्रवेशेन, उत्तरदले निर्गमप्रवेशाभ्यां, ईशानदले निर्गमेण, प्राच्यदले पश्चात् प्रवेशेन श्लोकः पाठ्यः; तदुक्तं—"वर्णद्वयेन चैकैकं दलभूतदलाष्टकम्। सर्वोत्तराक्षरेणैकं पद्मं स्यात् कृतकर्णिकम्॥" इति।

खड्गबन्धो यथा—"मारारिमक्करामेमसुखेरारारसंहसा। सारारम्भसवा नित्यं तदार्त्तिहरचक्षमा॥ माता नतानां सद्वृत्तः श्रियां बाधितसद्मभा। मान्याऽथ सोमा रामाणां ग्रं मे दिश्याद्दुमाद्रिजा॥" (अस्यार्थः,—अद्रिजा उमा, मे मह्यं, ग्रं कल्याणं, दिश्यात् दद्यात्। सा कीदृशी? मारारिः,—श्रियः, मक्रः,—इष्टः, रामाः,—ह्रस्वरम्भादिरामवर्गः, इभमुखः,—गणेशस्य तेः, आसारसंहसा—वृष्टिसदृश्या, नित्यम् आरम्भसवा, पुनः कीदृशी? सारा—श्रेष्ठा, तेषां—स्तुवतां शिवादीनाम्, आर्त्तेः,—पीडायाः, हरणे क्षमा, नतानां—प्रणतानां, माता—मातेव पालयित्री, श्रियां—सम्पदां, सद्वृत्तः,—सच्चेष्टनशालं, बाधितसद्मभा—शोभाबाहुल्यात् बाधितं सद्मभं—भयं यया तादृशी, निर्भया इत्यर्थः, मान्या, अथ—समुच्चये, रामाणां—नारीणां, सोमा—वराकाष्ठा, ["अद्रिजा" इत्यत्र "आद्रिजा" इति पाठे—आद्या इत्यर्थः, "आद्रिजा" इति पाठेऽपि स एवार्थः] अनेन श्लोकद्वयेन खड्गबन्धः प्रकाश्यते; तत्र सृष्टेरुर्ध्वार्थः शाखाद्वयम्, तथाहि शाखाद्वयेऽपि प्राथमिकं 'मा' कारं नित्यं निर्गमेणैवैकमेव 'रारि—' इत्यादि 'इ' कारान्तान् चतुर्दशवर्णान् त्यक्त्वा इत्येका शाखा,

खड्गबन्ध- (जा द्रि) चित्रम् ।



मे दिश्यादु (मा) रामाणां शं

(सी थ न्या)

श्रियां बाधितसम्भ (मा) ता नतानां सङ्घट्टः

क्षणरहर्त्तिदा तत्यं निवास्तब्धररा

रारिशक्ररामेभमुखैरासाररंह

सा

ततः खड्गाशखायां 'सा' इति श्लिष्टं, ततः तिर्य्यगूर्द्धक्रमेण 'रारब्ध—' इत्यादिवर्णचतुर्दशकं विन्यस्य अपरां धारां कुर्य्यात् इत्येषा पट्टिका। 'मा'-कारः पूर्वं 'मा'-कारं प्रविष्टः। एवमग्रेऽपि तत्रैव प्रविष्टं कल्पयित्वा दक्षिणशाखायां 'ता' इत्यादिवर्णसप्तकं विन्यस्य वामशाखायां तिर्य्यग्विलोमेन 'श्रि'-कारादिवर्णसप्तकं लिखेत्, 'मा'-कारचतुष्पथे प्राथमिक-'मा'-कारं प्रविष्टः, ततः तमेव 'मा'कारमारभ्य अधोऽधः 'न्याथसी' इति त्रयो वर्णाः मुष्टौ लेख्याः, ततः अधश्चतुष्पथमध्ये तदन्तिम-'मा'-कारं विन्यस्य तद्दक्षिणशाखायां 'रामाणां शं' इति चतुरो वर्णान् विन्यसेत्; ततो वामशाखायां विलोमेन 'मे दिश्यादु' इति चतुरो वर्णान् लिखेत्. 'मा'-कारः अधश्चतुष्पथस्थ-'मा'-कारं प्रविष्टः, ततो मुष्टेरधः त्सरुके 'द्रिजा' इति पाठान्तरयोऽस्तु—'दिजा' इति 'दिमा' इति वा वर्णद्वयं लेख्यम् इति खड्गनिष्पत्तिः)।

मुरजबन्धो यथा—"सा सेना ननगारम्भे रसेनाक्रोदनारता। तारनादजना मत्त-वीरनागजनालया॥"

मुरजबन्धचित्रम्।



(अनारता—अविच्छिन्नप्रहरणव्यापारा आसीत्। मत्तवीरनागनिति क्रियाविशेषणम्। रसेन—वीरेण। तारनादजना—महाशब्दजना)। अत्र प्रकृतिभूतेन त्रिपिछितस्य पादचतुष्टयस्याधः क्रमेण यथाक्रमं प्रथमद्वितीयचतुर्थ-चतुर्थान्दुःक्रमेण पञ्चमषष्ठसप्तमाष्टमान् वर्णान् गृहीत्वा प्रथमः पादः; द्वितीयात् प्रथमं, प्रथमात् द्वितीयतृतीयौ, द्वितीयात् चतुर्थप्रथमौ, प्रथमात् षष्ठसप्तमौ, द्वितीयात् अष्टमं गृहीत्वा द्वितीयः पादः; तृतीयात् प्रथमं, तुर्यात् द्वितीयतृतीयौ, तृतीयात् तुर्यपञ्चमौ, तुर्यात् षष्ठसप्तमौ, तृतीयात् अष्टमं गृहीत्वा तृतीयः पादः; चतुर्थपादस्य ऊर्ध्वक्रमेण प्रथमद्वितीयतृतीयचतुर्थान्, अधःक्रमेण पञ्चमषष्ठसप्तमाष्टमान् गृहीत्वा चतुर्थः पादः पाठ्यः, एवं मुरजसिद्धिः। अन्तबन्धो विदग्धमुख-मण्डने, गोमूत्रिकाबन्धो दक्षिणे ज्ञेयः। एवमन्येऽपि मुखज-गूढ-चक्राभ्र-हंस चतुरक्ष-पीठ-रथ तुरग गज-पद्मादयो बोध्याः। एवं वर्णानां चतुर्लोमप्रतिलोमपाठादिना एकरूपपद्योद्यदृष्टेतुल्येऽपि चित्रालङ्कारो वैदिनम्यः। काव्यालङ्कारेति।—काव्यालंकृतयः—काव्यालङ्काररूपिण्यो विशेषतया, यथा—गुडः,—गुण-रिक्तः, अलंशब्दोऽत्र काव्ये चित्रविच्छित्तिरत्नेन दत्तः, यथा दशमश्चचषसमये तद्भक्तीनां रसास्वादप्रतिबन्धकत्वं, तथा काव्येऽपि चित्रादीनाम् इति भावः, तु यद्—काव्यालङ्कारविचारप्रकरणे, न प्रपञ्च्यते—विस्तार्यते, चित्रालङ्कार इति शेषः।

रसस्य परिपन्थित्वान्नालङ्कारः प्रहेलिका।
उक्तिवैचित्र्यमात्रं सा च्युतदत्ताक्षरादिका॥६६६॥(छ)

च्युताक्षरा दत्ताक्षरा च्युतदत्ताक्षरा च। उदाहरणम्—

"कूजन्ति कोकिलाः साले यौवने फुल्लमम्बुजम्।
किं करोतु कुरङ्गाक्षी वदनेन निपीड़िता॥" (ज)

अत्र "रसाले" इति वक्तव्ये "साले" इति "र" च्युतः। "वने" इत्यत्र "यौवने" इति "यौः" दत्तः। "वदनेन" इत्यत्र "मदनेन" इति "मः" च्युतः "वः" दत्तः। आदिशब्दात् क्रियाकारकगुप्त्यादयः। तत्र क्रियागुप्तिर्यथा—

"पाण्डवानां सभामध्ये दुर्य्योधन उपागतः।
तस्मै गाञ्च हिरण्यञ्च सर्वाण्याभरणानि च॥" (झ)

(छ) रसस्येति।—रसबोधस्येत्यर्थः, परिपन्थित्वात्—प्रतिकूलत्वात्, विलम्बकत्वादित्यर्थः। ननु तर्हि प्राचीनैः किमित्यलङ्कारप्रकरणे प्रहेलिका प्रपञ्चिता? इत्यत आह, उक्तीत्यादि।—सा—प्रहेलिका, उक्तिवैचित्र्यमात्रं—वचनचातुर्य्यमात्रप्रयोजकमित्यर्थः। तथा च, वैचित्र्यमात्रप्रयोजकत्वेन अलङ्कारसाम्यात् तत्र अलङ्कारपदप्रयोगो गौण एव इति भावः। सा च—प्रहेलिका, च्युतेति।—च्युताक्षरा, दत्ताक्षरा, च्युतदत्ताक्षरा च तत्प्रभृतिका, (आदिपदेन क्रियाकारकगुप्त्यादीनां ग्रहणम्)।

(ज) कूजन्तीति।—कोकिलाः,—पिकाः, साले—रसाले इत्यर्थः, कूजन्ति—अव्यक्तमधुरं रुवन्ति, यौवने—वने, जले इत्यर्थः, अम्बुजं—पद्मं, फुल्लं—विकसितं, कुरङ्गाक्षी—हरिणनयना, वदनेन—मदनेनेत्यर्थः, निपीड़िता—आक्रान्ता सती, किं करोतु?—किं विदधातु? न किमपीत्यर्थः।

(झ) पाण्डवानामिति।—राजसूययज्ञोत्सवे दानाद्यध्यक्षतया नियुक्तानां कर्णादीनामतिथ्याराधनवर्णनपरमिदं पद्यम्। पाण्डवानां सभामध्ये दुर्य्योधनः,—धार्त्तराष्ट्रः, उपागतः,—प्राप्तः, तस्मै गाञ्च—भूमिञ्च, हिरण्यञ्च—सुवर्णञ्च, सर्वाणि आभरणानि च—अलङ्कारांश्च, इति स्फुटं प्रतीयमानेऽर्थे क्रियापदमध्याहार्य्यं प्रतिभासते। अत्र "अदुः" इति क्रियापदं, तच्च अस्थाने संहिताविधानेन गोपितमिति बोध्यम्। क्रियापदस्य प्रत्ययानन्तरन्तु, पाण्डवानां सभामध्ये यः अधनः,—धन-

अत्र "दुर्योधनः" इत्यत्र "अदुर्योधनः" इति। "अदुः" इति क्रियागुप्तिः। एवमन्यत्रापि। (अ)

अथावसरप्राप्तेषु अर्थालङ्कारेषु प्राधान्यात् सादृश्यमूलेषु लक्षितव्येषु तेषामप्युपजीव्यत्वेन प्रथममुपमाऽलङ्कारमाह (ट)—

साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमा द्वयोः॥६९७॥(ठ)

हीनः, उपागतः,—उपस्थितः, तस्मै गां च हिरण्यं च सर्वाणि चाभरणानि—वस्त्राभरणानि च, अदुः,—दत्तवन्तः, अतिथिसमाराधने नियुक्ताः पात्रवा इति कर्मपदमत्र बोध्यम्।

(अ) अत्रेति। एवमिति।—द्वारकसम्बोधनमुग्राद्यौ अपि एवमुदाहार्य्यमित्यर्थः। तत्र "दुर्योधन उपागतः" इत्यत्र "यः कश्चन उपागतः" इति कर्मपदं गुप्तम्। यथा वा—"ब्राह्मणेभ्यो नदीतीरे वस्त्राण्याभरणानि च। ददाति गां हिरण्यं च वसुधां च दृढं व्रतः॥" अत्र "ब्राह्मण" इति सम्बोधनपदम्, "व्रतः" इति कर्मपदं सम्प्रदानलक्षणलक्षितत्वात् गुप्तम्। एवमेकद्विचतुःस्वरनियमोऽपि उक्तिवैचित्र्यमेव; क्रमेण यथा—"करपत्रसदृक्-नक्षत्रसदृक्षनयन। भक्षमक्ष्यमरण्य मम व्यसनमर्दय॥" "श्रोदोमो श्रोकोर्णो धोनोतो गोःश्रोतो। एषेते दे दे ते ये नेमे देवेशे॥" "क्षितिनिमितिस्थितिविधितिन्नतरतयः परगतयः। उरु वसुधुरुं दुधुकुर्धुरः कुरवः खमरिकुलम्॥" "आत्मात्मानमात्मन्यात्मा वाग्मीतोरीतोः श्रोतोर्भीतोः। भोगो रोगो भोदो भोदो ध्येये धेच्छे देवे धेमे॥" एवमेकादिचतुरर्थ्यलक्ष्यलक्षणानियमानाम् उदाहरणानि दक्षिणि दृष्टव्यानि।

(ट) अर्थालङ्कारान् निरूपयितुम् उपमानिरूपणस्य प्राथमिकत्वे हेतुमाह, अथेति।—ग्रन्थालङ्कारनिरूपणानन्तरमित्यर्थः, अवसरप्राप्तेषु—अवसरसङ्गत्या निरूपणीयेषु, अर्थालङ्कारेषु—अर्थालङ्कारमध्ये इत्यर्थः, सादृश्यमूलेषु—सादृश्यप्रतियोगित्वापितेषु, अन्यालङ्कारादिषु इति शेषः, लक्षितव्येषु—निरूपयितव्येषु, तेषां—सादृश्यमूलकत्वेनालङ्काराणाम्, उपजीव्यत्वेन—आश्रयरूपत्वेन, उत्पादकत्वेन इति यावत्, प्राधान्यात्—मुख्यत्वात्, प्रथमम् उपमाम् आह—निरूपयतीत्यर्थः, एवञ्च हेतुतात्पर्यतिर्दशिता इति शेषम्।

(ठ) साम्यमिति।—वाक्यैक्ये—वाक्यस्य एकत्वे सति, द्वयोः,—उपमानोपमेययोः, अवैधर्म्ये—वैधर्म्यरहितं, विद्यमानसाधर्म्यमित्यर्थः, वाच्यम्—अभिधेयं,

साम्यं—सादृश्यं, गुणक्रियादिरूपमित्यर्थः, उपमा। वैधर्म्याविषयकैकवाक्यविषयत्वे सति इवादिवाच्यम् उभयसम्बन्धिसाधर्म्यमुपमा इत्यर्थः। अत्र साम्यं, सारूप्यं, साधर्म्यं, सादृश्यमिति च पर्य्यायशब्दत्वेनाभिन्नार्थकम्। अत्रेदं ज्ञातव्यं, तथा हि, उपमाऽलङ्कारे घटकतया त्रयः पदार्था विद्यन्ते; ते च—उपमानम्, उपमेयं, समानधर्मश्च (सादृश्यम्) इति। तत्र सामान्यधर्मविशिष्टत्वेन प्रख्यातः पदार्थः उपमानम्; तद्धर्मवत्त्वेन कविप्रतिपाद्यविषयः उपमेयम्। "उत्कृष्टगुणवत्त्वया सम्भाव्यमानम् उपमानम्, अपकृष्टगुणवत्त्वया सम्भाव्यमानम् उपमेयम्" इति केषाञ्चित् मतम्। अपरेषाञ्च "सादृश्यप्रतियोगि उपमानम्, सादृश्यानुयोगि उपमेयम्" इति। उपमानोपमेयोभयानुगतो धर्मः समानधर्मः इति अभिधीयते; यद्धर्मस्य संसर्गवशात् येन सार्द्धं यदुपमीयते, स एव समानधर्मः, तदुपमानं, तच्चोपमेयम् इति परमार्थः। यथा—"कमलमिव मुखं मनोज्ञमेतत्" इत्यादिस्थले मनोहरत्वधर्मसंसर्गात् मनोज्ञतया स्वतःप्रसिद्धेन कमलेन मुखमुपमीयते इति मनोज्ञत्वं समानो धर्मः, कमलमुपमानम्, एवं मुखमुपमेयम् इति उक्तपदार्थत्रयस्य समावेशवशादस्योपमाऽलङ्कारत्वम्। अत्र सर्वस्मिन् स्थले इवप्रभृतिशब्दादिव यथादिशब्दादपि साम्यावगतौ पर्य्यायपरिवृत्तिसहत्वात् अर्थालङ्कारत्वमुपमादीनामलङ्काराणाम्। एषैव चोपमा विविधविचित्रोक्तिकौशलेन बहुविधालङ्काररूपतां प्रतिपद्यते; तथा च, तदेवात्र वैशद्यार्थं प्रपञ्च्यते—"वदनमेव इन्दुः" इति रूपकस्य, "वदनेन इन्दुजलजे निर्जिते" इति तुल्ययोगितायाः, "इन्दुरयं न वदनम्" इत्यपह्नवस्य, "किमेतत् वदनम्? उताहो! इन्दुः?" इति सन्देहस्य, "वदनेन्दुना मन्तापोऽपगच्छति" इति परिणामस्य, "सुधाकर इति चकोराः तव वदनमनुसरन्ति" इति भ्रान्तिमतः, "इन्दुरेषः" इत्यतिशयोक्तेः, "इन्दुरिति चकोराः, सरोजमिति मधुकराः त्वन्मुखे रज्यन्ति" इत्युल्लेखस्य, "वदनं वदनमिव" इत्यनन्वयस्य, "इन्दुरिव वदनं, वदनमिव इन्दुः" इत्युपमेयोपमायाः, "वदनमिव इन्दुः" इति प्रतीपस्य, "नूनमिन्दुः" इत्युत्प्रेक्षायाः, "तव वदनमिन्दुश्च रजन्यां राजते" इति दीपकस्य, "सुधाकरमालोक्य वदनं स्मरामि" इति स्मरणस्य, "तव वदने एवाहं रज्यामि, शशिनि एव चकोरो रज्यते" इति प्रतिवस्तूपमायाः, "समं तव मुखेनेन्दुर्विभावर्य्यां प्रकाशते" इति सहोक्तेः, "वदनं नयनाङ्कमनोहरं शुभ्रकौमुदीविशदम्" इति समासोक्तेः, "दिवि सुधाकरः भुवि तवाननम्" इति दृष्टान्तस्य, "वदनस्य पुरतश्चन्द्रमा हतश्रीः" इत्यप्रस्तुतप्रशंसायाः, "निष्कलङ्कं मुखं तस्या इन्दोरप्यतिरिच्यते" इति व्यतिरेकस्य, "वदनमिन्दुश्रियं धत्ते" इति निदर्शनायाः, तथैवमन्येषामप्यलङ्काराणामुपजीवकतया सर्वानुगतत्वमनुसन्धेयम्। एवं नानाविधपरिवृत्तिं सहन्ती

रूपकादिषु साम्यस्य व्यङ्ग्यत्वं, व्यतिरेके च वैधर्म्यस्याप्युक्तिः, उपमेयोपमायां वाक्यद्वयम्, अनन्वये च एकस्यैव साम्योक्तिरित्यस्या भेदः। (ङ)

अविच्छेदरूपे सविलासं विचरन्तो उपमानत्वेनो रत्नमनसि रमयति इति तस्याः आदावेव उक्तत्वः सनीचीनः इति बोध्यम्।

(ङ) उक्तचतुष्टयस्य वाच्यादिपदचतुष्टयस्य क्रमेण व्याकृतिमाह, रूपकादिष्विति।—(आदिना परिणामादिग्रहणम्) "मुखं चन्द्रः" इत्यभेदप्रतीतानन्तरं "मुखं चन्द्रमाधर्म्यवत्" इति व्यङ्ग्यतया साधर्म्यप्रतीतिरिति भावः। ननु "विधुरति सुखाजनम्" इत्यादौ वक्ष्यमाणोदाहरणे साम्यस्य गम्यत्वात् कथं उक्तचतुष्टयम्? इति चेत्, न; "दध्यानय" इत्यादौ क्तुप्रत्ययस्य घञादेः प्रतिसन्धानात् धर्मतादेरिव क्तुप्रत्ययप्रत्ययप्रतिसन्धानात् साम्यस्य वाच्यताऽङ्गीकारात् समासस्थेव उपमावाचकत्वाङ्गीकाराच्च; अत एव दक्षिणा उक्तं सादृश्यवाचकप्रकरणे—"समासस्य बहुत्वेऽपि प्रधानादिषु" इति, चकारात् धर्मकारणम्। ननु तथाऽपि सादृश्यवाचकसमासस्य सत्त्वे "क्विप्समासगता वेधा धर्मादिविलोपने" इति वक्ष्यमाणमसङ्गतमिति चेत्, न; समासस्य सादृश्यवाचकत्वमङ्गीकुर्वतां प्राचां मतानुसारेणैव तत्प्रकारस्य प्रवेश्यमाणत्वात्। एवं "वदनं मृगशावाक्ष्याः सुधाकरमनोहरम्" इत्युपन्यस्यवाचकस्य लोपे यदुदाहृतं, तदपि प्राचीनमतानुसारेणैव वेदितव्यम्; एतन्मते तु—प्रथमं धर्मलोपस्य, द्वितीयं पूर्वार्धा उदाहरणं बोध्यम्। ननु तथाऽपि "मुखमेवा विधुं हेटि" "सधोमुखितमत्तद्विपचित्रकमस्यङ्गिनारङ्गकम्" इत्यादौ व्यभिचारः, साम्यस्य गम्यत्वात्; न च "अङ्गते जयति हेटि" इत्यादिदर्शनात् तत्रापि साम्यस्य वाच्यत्वम् इति वाच्यं, तस्य साम्यव्यङ्ग्यपरत्वेन उपपत्तौ साम्यवाचकत्वकल्पनाया अन्याय्यत्वात्। अत्रोच्यते—हेयस्यर्थयोः चेतनधर्मत्वेन मुखनारङ्गयोरचेतनत्वात् उपमायां पर्यवसानेन तादृशस्थले निदर्शनाऽङ्गीकारस्यैवाङ्गीकारात्। "इवादि" इत्युपादानात् "मुखचन्द्रौ मनोज्ञौ" इत्यत्र उभयसाम्यस्य वाच्यत्वेऽपि नातिव्याप्तिः। व्यतिरेके इति।—"यद्यद्धि मुखं तत्रा न तद्धि यथा विधुः" इत्यादेरवाक्यगतव्यतिरेके इत्यर्थः; अत्र यद्यद्धित्वम् उपमानत्वम्, तद्धित्वम् उपमेयत्वं वैधर्म्यम्। ननु अत्र साम्यस्य वाच्यत्वेऽपि तत्र तत्रा मुखे चन्द्रत्वाभावबोधात् उभयवृत्तित्वमेव नास्ति, कुतस्तरां उपमाप्रसक्तिः? इति चेत्, न; मुखे चन्द्रसाधर्म्यबाधात्तत्प्रभेदेन तत्रो मुखस्य उत्कर्षातिशयवतीतिनाम्ने

सा पूर्णा यदि सामान्य-धर्म औपम्यवाचि च।
उपमेयं चोपमानं भवेद्वाच्यम्—" ॥ ६६८ ॥ (ढ)

सा—उपमा। साधारणधर्मो द्वयोः सादृश्यहेतू गुणक्रिये मनोज्ञत्वादि। औपम्यवाचकमिवादि। उपमेयं मुखादि। उपमानं चन्द्रादि। (ण)

तात्पर्य्यात्। उपमेयोपमायामिति।—"मतिरिव कमला कमलेव मतिः" इत्यादौ इत्यर्थः; अत्र श्रीमत्योः अतुल्यत्वं साधर्म्यं वाक्यद्वयेन प्रतिपाद्यते। रसनोपमादेरपि विलक्षणवैचित्र्याधायकत्वेन अलङ्कारान्तरत्वम् इत्यनेनैव तद्वारणम् इत्यवधेयम्। "वाक्यैक्ये" इति वाक्यान्तरस्यावच्छेदकमेव, न तु एकपदव्यवच्छेदकम्; तेन "मुखाब्जम्" इत्यादौ एकपदेऽपि उपमा। अनन्वये त्विति।—"चन्द्रश्चन्द्र इवातन्द्रः" इत्यादौ इत्यर्थः। अत्र एकस्यैव चन्द्रस्य अतन्द्रत्वं साधर्म्यम् इवशब्देन प्रतिपाद्यते। ननु "घटत्वमिव पटत्वं नित्यम्" इत्यादेरपि उपमात्वं स्यात् इति चेत्, इष्टमेव; किन्तु वैचित्र्यविशेषानाधायकत्वात् तस्याम् अलङ्कारव्यवहारो नास्तीति विशेषः; एवमन्यत्रापि बोध्यम्। केचित्तु—"इवादिशब्दवत् तुल्यादिपदेनापि साधारणधर्मस्य प्रतिपादनात् करिष्यमाणश्रौत्यार्थीविभागानुपपत्त्या साधारणधर्मसम्बन्ध एव उपमा, न तु साधारणधर्ममात्र, स च प्रतियोगितारूपः, 'चन्द्र इव मुखम्' इत्यादौ 'चन्द्रप्रतियोगिकसादृश्याश्रयो मुखम्' इति प्रतीतेः आनुभाविकत्वात्, तादृशसम्बन्धश्च इवादिपदेन वाच्यः, तुल्यादिशब्देन तु अर्थवशलभ्य इति श्रौत्यार्थीविभागः" इत्याहुः, तन्न; आर्थ्यामुपमायाम् अव्याप्तेः, तत्र साधारणधर्मसम्बन्धस्य विभक्त्यादिप्रतिसन्धानलभ्यतया इवादिशब्दवाच्यत्वाभावात्, उभयसम्बन्धित्वस्य इवादिशब्दवाच्यत्वे श्रौती, अर्थवशलभ्यत्वे तु आर्थी इति विवक्षयैव विभागोपपत्तेश्च।

(ढ) सा चोपमा पूर्णालुप्ताभेदेन मुख्यतः द्विधा, तत्र आदौ पूर्णां लक्षयति, सेति।—सा—उपमेत्यर्थः।

(ण) सामान्यधर्मं लक्षयति, साधारणधर्म इति।—सादृश्यहेतू—सामान्यव्यावृत्तिबोधकारणे विशेषणे इति यावत्। औपम्यवाचीत्यस्य व्याख्यामाह, औपम्यवाचकमिति।—अव्ययानामन्विताभिधानस्वीकारादिति भावः। उपमेयं दर्शयति, उपमेयं मुखादीति।—उपलभ्यमानसाम्यस्य अनुयोगि उपमेयम्। उपमानं लक्षयति, उपमानं चन्द्रादीति।—उपलभ्यमानसाम्यस्य प्रतियोगि उपमानम्।

इयं पुनः।

श्रौती यथेववाशब्दा इवार्थो वा वतिर्यदि।
आर्थी तुल्यसमानाद्यास्तुल्यार्थो यत्र वा वतिः॥६६९॥(त)

यथेववादयः शब्दा उपमानानन्तरप्रयुक्ततुल्यादिपदसाधारणा अपि श्रुतिमात्रेणोपमानोपमेयगतसादृश्यलक्षणसम्बन्धं बोधयन्तीति तत्सद्भावे श्रौती उपमा। एवं "तत्र तस्येव" (५।१।११६ पा०) इत्यनेन इवार्थे विहितस्य वतेरुपादाने। तुल्यादयस्तु "कमलेन तुल्यं मुखम्" इत्यादौ उपमेये एव। "कमलं मुखस्य तुल्यम्" इत्यादावुपमाने एव। "कमलं मुखञ्च तुल्यम्" इत्यादावुभयत्रापि विश्राम्यन्तीति अर्थानुसन्धानादेव साम्यं प्रतिपादयन्तीति तत्सद्भावे आर्थी। एवं "तेन तुल्यम्—" (५।१।११५ पा०) इत्यादिना तुल्यार्थे विहितस्य वतेरुपादाने। (थ)

(त) पूर्णोपमायाः श्रौत्यार्थीभेदेन द्वैविध्यमाह, इयमिति।—इयं—पूर्णोपमा, श्रूयते इति श्रुतिः,—शब्दः, तया श्रुत्या—श्रवणमात्रेणैव औपम्यं बोधयन्ती श्रौती। तस्या उपलम्भकानाह, यथेवेति।—"वा स्यात् विकल्पोपमयोरेवार्थेऽपि समुच्चये" इति कोषात् वाशब्दस्य उपमार्थत्वं, बहुवचनमाद्यर्थं, तेन—"पङ्कजदलानि व लोचनानि" इत्यादौ वशब्दोऽप्युपमार्थः। आर्थी—अर्थानुसन्धानेन औपम्यं बोधयन्ती, पदार्थानुसन्धानापेक्षया प्रतीयमानोभयसम्बन्धेत्यर्थः। तस्याः ज्ञापकानाह, तुल्येति।—(आद्यपदेन समसदृशादीनां ग्रहणम्)। अन्यत् स्पष्टम्।

(थ) भेदमुपपादयति, यथेवेति।—यथेववादयः,—यथेववाप्रभृतयः, शब्दाः उपमानानन्तरम्—उपमानवाचकपदात् परं, प्रयुक्तस्य—विहितस्य, तुल्यादिपदस्य साधारणाः,—तदुपमानोपमेयगतसाधर्म्यबोधकाः अपि, श्रुतिमात्रेण—स्वोपलब्धिमात्रेण, न तु पदार्थानुसन्धानापेक्षया इत्यर्थः, उपमानोपमेयगतम्—उपमानोपमेयवृत्तिः, यः सादृश्यलक्षणसम्बन्धः,—साधर्म्यरूपसंसर्गः, उपमानोपमेयवृत्तिसाधर्म्यमित्यर्थः, तं बोधयन्ति, इति—इति हेतोः, तत्सद्भावे—तेषां—यथादिशब्दानां, सद्भावे—प्रयोगे, श्रौती—तन्नाम्नी इत्यर्थः, उपमा, कथ्यते इति शेषः। अन्वयानामन्विताभिधानस्वीकारात् यथा "घटो न पटः" इत्यादौ नञ्पदं पदार्थोप-

द्वे तद्धिते समासेऽथ वाक्ये ॥ ६७० ॥ (द)

स्थितिमन्तरेणैव पदार्थोपस्थितेः प्रागेव समभिव्याहृतपदार्थयोः अन्वितं भेदं बोधयति, तथा "कमलमिव मुखम्" इत्यादौ इवादिपदमपि श्रवणमात्रेण समभिव्याहृतपदार्थयोः अन्वितं साधर्म्यं बोधयति। अन्विताभिधानवादिमते हि, अखण्डवाक्यस्य अखण्डवाक्यार्थे शक्तिः एका अतिरिक्ता कल्प्यते, प्रथमं तथैव वाक्यार्थबोधो जायते, पश्चादेव शक्त्या लक्षणया वा प्रत्येकपदार्थोपस्थितिरिति भावः। अव्ययानामभिहितान्वयाङ्गीकारेऽपि अव्ययातिरिक्तनामार्थयोः अभेदातिरिक्तसम्बन्धेन साक्षादन्वयास्वीकारात् अव्ययार्थस्य नामार्थेन साक्षादेव अन्वयः सम्भवतीति अव्ययपदेन उपमानोपमेयभावेऽपि साधारणधर्मसम्बन्धोपस्थापनेन विभक्त्यर्थप्रतिसन्धानापेक्षा इति बोध्यम्। एवमिति।—"तत्र तस्येव" इति (५।१।११६) पाणिनिसूत्रम्; तत्रैव तस्येव इत्यर्थे वतिः भवतीति तदर्थः; इवार्थकस्य वतेरिवशब्दतुल्यव्युत्पत्तिः, तदुपादानेऽपि श्रौती एव उपमा इत्यर्थः। आर्थीमुपपादयति, तुल्यादयस्त्विति।—"शब्दाः" इत्यनुषङ्गः, "कमलेन" इति षष्ठ्यर्थे तृतीया, षष्ठ्यर्थश्च अत्र "कुम्भस्य जलम्" इतिवत् आधेयत्वम्; तस्य च तुल्यपदार्थैकदेशे सादृश्ये अन्वयः; तथा च—कमलवृत्तिसादृश्याश्रयो मुखम् इत्यर्थः। उपमेये एवेति।—"विश्राम्यन्ति" इत्यग्रेणान्वयः, स्वार्थं बोधयन्ति इति तदर्थः; एवकारेण उपमानव्यवच्छेदः; एवञ्च तुल्यादिपदानाम् अनन्वयतया अन्विताभिधानस्वीकारेण अर्थबोधात् प्राक् पदार्थोपस्थितिमात्रं जनयित्वा उपमेये एव विश्रान्तिः; पश्चात्तु उपमानपदार्थानुसन्धानेन तात्पर्य्यानुसन्धानेन च उपमानस्य सादृश्योपमानप्रतीतिरिति भावः। उपमाने एवेति।—"तुल्यादयः शब्दाः विश्राम्यन्ति" इत्यन्वयः, कमलादीनां मुखोपमानत्वं प्रसिद्धम् इत्यभिप्रायेणेदं, वस्तुतस्तु कमलम् अत्र उपमेयमेव। इयमेव विपर्य्यासोपमा इति दण्डी। विषयविशेषे तुल्यादिपदानामपि षष्ठ्यर्थानुसन्धानं विनाऽपि उभयसम्बन्धिसाधर्म्यबोधकत्वमाह—कमलं मुखञ्चेति। अर्थानुसन्धानादेवेति।—षष्ठ्यर्थानुसन्धानादेवेत्यर्थः, साम्यम्—उभयसम्बन्धसाम्यं, प्रतिपादयन्ति—बोधयन्तीत्यर्थः, इति—इति हेतोः। तुल्यादिपदानामपि क्वचित् षष्ठ्यर्थानुसन्धानं विनाऽपि उभयसम्बन्धसाम्यबोधकत्वस्य सम्भवेऽपि इवादिवत् सर्वत्र तदभावात् तत्सद्भावेन श्रौती उपमा इति भावः। तुल्यार्थस्य वतेरुपादानेऽपि आर्थीमाह, एवमिति।—"तेन तुल्यम्—" (५।१।११५) इति पाणिनिसूत्रम्। वतेः उपादाने आर्थी इति सम्बन्धः।

(द) श्रौत्यार्थीभेदेन द्विविधायाः पूर्णोपमायाः त्रैविध्यमाह, द्वे इति।—तद्धिते

द्वे—श्रौती आर्थी च । उदाहरणम्—

"सौरभमम्भोरुहवन्मुखस्य कुम्भाविव स्तनौ पीनौ ।
हृदयं मदयति वदनं तव शरदिन्दुर्यथा बाले ! ॥" (ध)

अत्र क्रमेण त्रिविधा श्रौती ।

—वत्-कल्पादियोगे । समासे इति ।—इवयोगे एव उपमानात् सर्वविभक्तीनामिव इति अलोपविधानसामर्थ्यात् समासः, स च नित्य एव, "नित्यसमासे इवयोगे समासगा" इति काव्यप्रकाशदर्शनात् इवार्थस्य विशेषसापेक्षत्वेऽपि अनभिधानवत्त्वात् समासः । एवञ्च प्रतियोगिपदासमभिव्याहारेण यत् इवपदं प्रयुज्यते, तत् प्रयोक्तृप्रमादजमेव । वाक्ये यथादियोगे अत्र अगमकत्वेन समासाभावात् तद्योगे वाक्यगतैव उपमा इति भावः । एवं त्रिविधा श्रौती । आर्थी तु तद्धिते वदादियोगे तुल्यादिपदसमासस्य वैकल्पिकत्वात् समासे वाक्ये च सम्भवतीति भावः । समासपक्षेऽपि लुप्तषष्ठ्यर्थस्य लक्षणाया वा प्रतिसन्धानादेव उपमानसम्बन्धबोध इति आर्थ्येव ।

(ध) तद्धित-समास-वाक्यगतत्वेन त्रिविधां श्रौतीमुदाहरति, सौरभमिति ।—हे बाले ! तव मुखस्य सौरभं—सुगन्धः, अम्भोरुहवत्—अम्भोरुहस्य तुल्यम, अम्भोरुहवृत्तिसाधर्म्याभिन्नमित्यर्थः, सौरभाभिन्नमम्भोरुहसाधर्म्यं मुखसम्बन्धीत्यर्थो वा, स्तनौ कुम्भाविव पीनौ—स्थूलौ, पीनत्वाभिन्नकुम्भवृत्तिसाधर्म्याश्रयावित्यर्थः, वदनं—मुखं, शरदिन्दुर्यथा—शारदसुधांशुरिव, हृदयं मदयति—ह्लादयति । अत्र प्रथमपादे सौरभं साधारणो धर्मः, उपमानं जलजं, मुखमुपमेयम् । "तत्र तस्येव" इत्यनेन षष्ठ्यन्तादम्भोरुहशब्दादिवार्थे वतिरिति तद्धितगता श्रौती पूर्णा । अम्भोरुहपदार्थस्य तत्पदलक्षणया तद्वृत्तिसौरभरूपतयाऽम्भोरुहसम्बन्धिसौरभसमानं मुखसम्बन्धिसौरभमिति प्रत्ययानन्तरम् अम्भोरुहमुखसम्बन्धिनोः सौरभयोः साम्यहेतुकतादात्म्याध्यवसायेन साधारणधर्महेतुका अम्भोरुहमुखपदवाच्ययोरुपमा । तथा द्वितीयपादे कुम्भपदार्थ उपमानभूतः, स्तनपदार्थः उपमेयभूतः, पीनत्वञ्च साधारणधर्मः । इवेति औपम्यवाचकं पदं, "कुम्भाविव" इत्यत्र "इवेन समासो विभक्त्यलोपश्च पूर्वपदप्रकृतिस्वरत्वञ्च" इत्यनेन कुम्भावित्यनेन इवपदस्य समासात् समासगता पूर्णा श्रौती । "इवेन सह नित्यसमासः" इति त्वपपाठः । सूत्रस्थसमासपदे नित्यविशेषणादानात् "उद्बाहुरिव वामनः" इत्यादयो व्यस्तप्रयोगा अपि सङ्गच्छन्ते इति मनोरमाऽऽदिकर्त्तारः । एवञ्च अत्र समासाभावपक्षस्वीकारे नेयं समासगता, किन्तु वाक्यगतैव श्रौती पूर्णा । कुम्भसम्बन्धिपीनत्वसदृशं स्तनसम्बन्धिपीनत्वमिति प्रत्ययानन्तरं तयोः

"मधुरः सुधावदधरः पल्लवतुल्योऽतिपेलवः पाणिः।
चकितमृगलोचनाभ्यां सदृशी चपले च लोचने तस्याः॥" (न)

अत्र क्रमेण त्रिविधा आर्थी।

पूर्णा षड़ेव तत्॥ ६७१॥ (प)

स्पष्टम्।

लुप्ता सामान्यधर्मादेरेकस्य यदि वा द्वयोः।
त्रयाणां वाऽनुपादाने श्रौत्यार्थी साऽपि पूर्ववत्॥६७२॥(फ)

पीनत्वयोः सादृश्यमूलकाभेदाध्यवसायेन अभिन्नधर्महेतुका कुम्भस्तनयोरुपमा। एवमुत्तरार्द्धे वदनमुपमेयं, शरदिन्दुरित्युपमानं, हृदयमादकत्वं साधारणो धर्मः, यथेति औपम्यवाचकं "यथाऽसादृश्ये" (२।१।७ पा०) इत्यनेन असादृश्य एव समासनियमात् सादृश्ये समासाभावाद्वाक्यगतेयं श्रौतीति दिक्।

(न) त्रिविधामार्थीमुदाहरति, मधुर इति।—तस्या अधरः सुधावत् मधुरः, अत्र "तेन तुल्यं क्रिया चेद्वतिः"(५।१।११५ पा०) इत्यनेन सुधया तुल्य इत्यर्थे तृतीयान्तात् सुधाशब्दात् तुल्यार्थे वतिरिति तद्धितगता आर्थी। पाणिः पल्लवतुल्यः,—पल्लवेन सदृशः, अतिपेलवः,—अतिकोमलः, (अत्र एकदेशस्य अश्लीलत्वेऽपि पादचूतादिशब्दवत् कविनिबद्धप्रयुक्तत्वात् न दोषः, पेलवपदार्थैकदेशस्य तुल्यपदार्थैकदेशे साम्ये अभेदान्वयस्तु व्युत्पत्तिवैचित्र्यात्) अत्र उपमानभूतः पल्लवपदार्थ औपम्यवाचिना तुल्य-(सदृश) शब्देन समस्तत्वात् समासगता आर्थी। लोचने च चकितमृगलोचनाभ्यां सदृशी चपले च, अत्र चकितमृगलोचनमुपमानं, प्रस्तुतनायिकालोचनमुपमेयं, चपलत्वञ्च साधारणधर्मः, सदृशीति औपम्यवाचकं, तस्य च समासाभावात् वाक्यगता आर्थी। ननु अम्भोजस्येव मुखस्य सौरभमित्यादौ साधारणधर्मस्य उपमानसम्बन्धित्वबोधे षष्ठ्यर्थानुसन्धानस्य अपेक्षणीयतया कथं श्रौतीत्वम्? इति चेत्, न; नामार्थनिपातयोरन्वयबोधे विभक्त्यर्थानुसन्धानस्य अतन्त्रतया तत्र षष्ठ्या विशेषणविभक्तेरिव प्रयोगसाधुत्वमात्रार्थकत्वात्, अन्यथा "चन्द्रादिव मुखात्तस्या निरस्यति कथाऽमृतम्" इत्यादौ सम्बन्धबोधकविभक्त्यभावात् उपमानसम्बन्धबोधो न स्यात् इति दिक्।

(प) पूर्णेति।—तत्—तस्मात्, श्रौत्यार्थीभेदेन द्विविधाया अस्या उपमायाः तद्धित-समास-वाक्यगतत्वेन पुनः त्रैविध्यात् षड्विधत्वमवसेयम्।

(फ) लुप्तोपमामाह, लुप्तेति।—सामान्यधर्मादेः,—आदिना उपमानोपमेययोः

सा—लुप्ता। तद्भेदमाह—

पूर्णावद्धर्मलोपे सा विना श्रौतीन्तु तद्धिते॥६७३॥ (ब)

सा—लुप्तोपमा, धर्मस्य—साधारणगुणक्रियारूपस्य, लोपे पूर्णावदिति—पूर्वोक्तरीत्या षट्प्रकारा, किन्त्वत्र (भ) तद्धिते श्रौत्या असम्भवात् पञ्चप्रकारा। उदाहरणम्—

"मुखमिन्दुर्यथा पाणिः पल्लवेन समः प्रिये!।
वाचः सुधा इवौष्ठस्ते बिम्बतुल्यो मनोऽश्मवत्॥" (म)

आधारकर्मविहिते द्विविधे च क्यचि क्यङि।
क्रमकर्त्तृगमुलि च स्यादेवं पञ्चधा पुनः॥६७४॥ (य)

रौपम्यवाचिन इवादेश्च सङ्ग्रहः, तथा च, सामान्यधर्मोपमानोपमेयौपम्यवाचिनां मध्ये इत्यर्थः, एकस्य—सामान्यधर्मोपमानोपमेयौपम्यवाचिनाम् एकतमस्येत्यर्थः, द्वयोर्वा—सामान्यधर्मोपमानयोः सामान्यधर्मोपमेययोरुपमानोपम्यवाचिनोरित्येवम् अन्यतरयोरित्यर्थः, त्रयाणां वा—सामान्यधर्मोपमानोपमेयान्यतरौपम्यवाचिनामित्यर्थः, अनुपादाने—अवाच्यत्वे अप्रयोगे सति यथासम्भवं बोध्यं, सा उपमा लुप्ता भवति; सा च पूर्ववत्—पूर्णावत्, श्रौती आर्थी च।

(ब) पूर्णेति।—सा—लुप्तोपमा, धर्मस्य—साधारणगुणक्रियारूपस्य, लोपे तद्धिते श्रौतौ विना पूर्णावत् भवति।

(भ) किन्त्विति।—धर्मस्य अनुपादाने तद्धितसम्बन्धबोधिकायाः षष्ठ्याः समस्या वा अनुत्पत्तौ तदन्तविहित इवार्थे वतिर्न सम्भवति, अस्यादेस्तु तुल्यार्थे विहितत्वेन तद्योगे आर्थ्येव सम्भवतीति भावः।

(म) मुखमिति।—हे प्रिये! ते—तव, मुखम् इन्दुर्यथा—चन्द्रवदाह्लादकमित्यर्थः, पाणिः पल्लवेन समः,—पल्लवसदृशः कोमलः इत्यर्थः, वाचः,—वचनानि, सुधा इव—सुधावन्मधुराः इत्यर्थः, ओष्ठः बिम्बतुल्यः,—बिम्बवत् रक्त इत्यर्थः, मनः,—हृदयम्, अश्मवत्—पाषाणतुल्यं कठिनमित्यर्थः। इन्दुसुधादीनाम् उपमानोपमेयभूतानाम् आह्लादकत्वादिरूपस्य साधारणधर्मस्य अनुपादानात् लुप्तधर्मत्वोपमा, किन्तु प्रथमे वाक्यगता श्रौती, द्वितीये वाक्यगता आर्थी, तृतीये समासगता श्रौती, चतुर्थे समासगता आर्थी, पञ्चमे तद्धितगता आर्थीत्यपि बोध्यम्।

(य) धर्मलुप्तावा पूर्वोपमाया; पुनरपि पञ्चप्रकारत्वात्, आधारेति।—

"धर्मलोपे लुप्ता" इत्यनुषज्यते। क्यच्-क्यङ्-णमुलः कलापमते—यिन् आयि णमः। (र) क्रमेणोदाहरणम्—

"अन्तःपुरीयसि रणेषु सुतीयसि त्वं
पौरं जनं तव सदा रमणीयते श्रीः।
दृष्टः प्रियाभिरमृतद्युतिदर्शमिन्द्र-
सञ्चारमत्र भुवि सञ्चरसि क्षितीश!॥" (ल)

आचारकर्मविहिते—अधिकरणात् कर्मणश्च विहिते, द्विविधे क्यचि—ईयप्रत्यये, कर्तुर्विहिते क्यङि—आयिप्रत्यये, कर्मकर्त्रोरुपपदयोर्विहिते णमुलि च—क्त्वादेशे णमि, इत्येवं पञ्चधा—पञ्चप्रकारा, लुप्ता पुनः धर्मलोपे, भवति इति शेषः।

(र) क्यजिति।—यिन् इति ईयप्रत्ययस्य संज्ञा।

(ल) अन्तःपुरीयसीति।—हे क्षितीश! त्वं रणेषु—युद्धेषु, अन्तःपुरीयसि—अन्तःपुरेषु इव आचरसि, [अत्र "अधिकरणाच्च" इति वार्त्तिकेनान्तःपुरेष्विति अधिकरणपदादाचारेऽर्थे क्यच्] अत्र तुल्यत्वम् आचारश्च ईय(क्यच्)प्रत्ययार्थः, आचारश्चात्र अधिकरणत्वान्वययोग्यक्रिया, सा च प्रकृते सञ्चाररूपा ग्राह्या, व्युत्पत्तिवैचित्र्येण तुल्यत्वस्य प्रकृत्यर्थे आचारस्याख्यातार्थे अन्वयः। तथा च—अन्तःपुरतुल्येषु रणेषु सञ्चारकर्त्ता इत्यन्वयबोधः। पौरं जनं—पुरवासिलोकं, सुतीयसि—सुतमिवाचरसि, [अत्र "उपमानादाचारे" (३।१।१० पा०) इति सूत्रेण सुतमित्युपमानभूतकर्मपदादाचारेऽर्थे क्यच्]। आचारोऽत्र मननं, पौरजनं सुततुल्यं मन्यसे इत्यर्थः। श्रीः,—लक्ष्मीः, सदा तव रमणीयते—रमणीव आचरति, [अत्र "कर्तुः क्यङ् सलोपश्च" (३।३।११ पा०) इति सूत्रेण रमणीत्युपमानभूतात् कर्तृपदादाचारेऽर्थे क्यङ्, अत एवास्य ङित्त्वादात्मनेपदम्] अत्राचारो वर्त्तनं, रमणीतुल्या श्रीः वर्त्तते इत्यर्थः, अत्र अत्यन्ताधीनत्वस्य उपभोगसाधनत्वस्य वा साधारणधर्मस्य लोपः। प्रियाभिः अमृतद्युतिदर्शम्—अमृतद्युतिरिवेत्यर्थः, दृष्टः, [अत्र "उपमाने कर्मणि च" (३।४।४५ पा०) इति सूत्रेणामृतद्युतिमित्युपपदात् दृशेर्भावे णमुल्। अस्य च "कृन्मेजन्तः" (१।१।३९ पा०) इत्यनेनाव्ययत्वं, "कषादिषु यथाविध्यनुप्रयोगः" (३।४।४५ पा०) इति सूत्रेण "दृष्टः" इत्येवात्रानुप्रयुक्तम्] मनोज्ञत्वादिरत्र साधारणो धर्मः। अत्र—अस्यामित्यर्थः, भुवि इन्द्रसञ्चारम्—इन्द्र इव सञ्चरणमिति तथोक्तम्, इन्द्र इव सञ्चरसीत्यर्थः, [अत्र "उपमाने कर्मणि च" (३।४।४५ पा०) इति सूत्रे चकारग्रहणप्राप्तात् "इन्द्रः" इत्युपमानकर्तृपदोपपदात् सञ्चरतेर्णमुल्]

अत्र "अन्तःपुरीयसि" इत्यत्र सुखविहारार्थदत्वम्, "सुतीयसि" इत्यत्र स्नेहनिर्भरत्वम् च साधारणधर्मस्य लोपः। एवमन्यत्।

इह च यथादि-तुल्यादि-विरहात् औत्यादिविशेषचिन्ता नास्ति। इदञ्च केचित् औपम्यप्रतिपादकस्य वतेर्लोपे उदाहरन्ति, तदयुक्तम्; क्यङादेरपि तदर्थविधितत्वेनौपम्यप्रतिपादकत्वात्। ननु क्यङादिषु सम्यगौपम्यप्रतीतिर्नास्ति, प्रत्ययत्वेनाप्रकृतत्वात् इवादिप्रयोगाभावाच्चेति न वाच्यम्; कष्वादावपि तथा प्रसङ्गात्। न च कष्वादीनामिवादितुल्यतयौपम्यस्य वाचकत्वं, क्यङादीनान्तु द्योतकत्वम्, इवादीनामपि वाचकत्वे निश्चयाभावात्। वाचकत्वे वा "समुदितं पदं वाचकं" "प्रकृतिप्रत्ययौ स्वस्वार्थबोधकौ" इति च मतद्वयेऽपि वत्यादिक्यङाद्योः साम्यमेवेति। यच्च केचिदाहुः,—"वत्यादय इवाद्यर्थेऽनुशिष्यन्ते (व) क्यङादयस्त्वाचारार्थे" इति,

---

अत्र विभाषायतिक्रयः साधारणधर्मः। अत्र प्रथमे सुखविहारितयेति, द्वितीये स्नेहातिशयेनेति, तृतीये चलीवदाचरितवेति, चतुर्थे आह्लादकत्वेनेति, पञ्चमे निर्भरत्वेनेति साधारणधर्मलोपः। केचित्तु—"क्यच्-क्यङोरर्थं आचारः, तत्रान्न विद्यमानत्वात् धर्मलोपोदाहरणमत्र भवति" इत्याहुः, तन्न; आचारस्य साधनत्वेऽपि प्रकृते सादृश्यहेतुत्वेन विवक्षणात्, उपदर्शितसर्पाणां सादृश्यहेतुत्वेन झटिति प्रतीयमानत्वात् "चन्द्रायते मुखमस्याः किन्तु" इत्यादौ सत्यप्याचारे "मुखमस्या" इति साधारणधर्मप्रयोगदर्शनाच्च, आचारस्य आख्यातार्थान्वितत्वेन निराकाङ्क्षतया क्यच्-क्यङोरर्थे सादृश्ये धर्मेदान्वयसम्भवेन सादृश्यहेतुत्वायोगाच्च।

(व) इह चेति।—औत्यादीत्यत्र आदिपदेन चार्थोपस्थितः; वस्तुतस्तु, यथा तुल्यार्थविहितस्य वतेर्योगे चार्थोक्तिः, तथा यत्रापि तुल्यार्थविहितक्यच्-क्यङोर्योगे चार्थोक्तिम्। "सुतिः,—अन्यः, तथा साक्षात् प्रतीयमाना द्योतो, तदितरा चार्थी" इति वदतः, चक्षीदादस्य सतः सुतरामार्थोक्तिम्। केचित्—काव्यप्रकाशकारादय इत्यर्थः, "वादेर्योपि श्रुतावेव वा कर्मधारयादि क्यङि। कर्मकर्त्रोर्यसुक्—" इति चाहुः। "यत्" इति इवाद्युपलक्षणम्। तदर्थविहितत्वेन—वत्यर्थविहितत्वेन, औपम्यप्रतिपादकत्वात्—औपम्यबोधकत्वात्। क्यच्—क्यङ्। यङन्तत्वादिति।

तदपि न; न खलु क्वङादय आचारमात्रार्थाः, अपि तु सादृश्याचारार्थाः इति। तदेवं धर्मलोपे दशप्रकारा लुप्ता।

उपमानानुपादाने द्विधा वाक्यसमासयोः॥६७५॥(श)

—प्रत्ययानां स्वातन्त्र्याचार्थबोधकत्वं नास्ति "प्रकृतिप्रत्ययौ सहार्थं ब्रूतः" इति नियमादित्यर्थः। "कव्यवादादिति।—कव्यादिपदेन वतेः परिग्रहः, "दृष्टादृष्टसमाहारे कव्यम्-देवदैवौ वरः" (५।१।९७ पा०) इत्यादिभिः सूत्रैर्विहितानां कव्यवाहीनां प्रत्ययानां सङ्ग्रहार्थम्, (कव्यवादेरित्यनुवन्धकल्पितप्रकारनिर्देशः) कव्यवादिप्रत्ययवत्त्वे त्वया वतेर्लोपे इति वक्तुं न शक्यते, तव धर्मलोपे एव त्वया वाच्यं, तदयमेवां को भेद इति भावः। नियमाभावादिति।—सर्वे हि निपाता द्योतका एव, न तु वाचका इति केचित् वदन्ति, तन्मते इवादीनामपि साक्षात् औपम्यवाचकत्वेनानभिमतानां वाचकत्वे सङ्केतः, वा वाचा प्रत्ययानामित्याश्रयः। तथा च इवादेः अव्ययतया उपमा-वाचकत्वम् असिद्धमिति तत्तुल्यस्य कव्यादेः सुतरामेव तदसिद्धमिति भावः। ननु "वदनमिव सुखम्" इत्यादौ उपमालक्षणाव्याप्तिभयेन इवादेः उपमावाचकत्वम् अवश्यमङ्गीकार्यम् इत्यभिप्रायेणाह, वाचकत्वे वेति।—इवादितुल्यत्वेन कव्यादेः उपमावाचकत्वाङ्गीकारे वा इत्यर्थः, समुदितं—प्रकृतिप्रत्ययसमुदायः, वाचकं—प्रकृत्यर्थविशिष्टप्रत्ययार्थप्रतिपादकं, स्वस्वार्थबोधको—क्रमेण स्वार्थप्रतिपादको इत्यर्थः। कव्यादीति।—कव्यादिपदेन कव्यादिपरिग्रहः। साम्यमेव—सादृश्यवाचकत्वेन तुल्यतेत्यर्थः। अनुक्रियन्ते—विधीयन्ते। आचारार्थे इति—"अनुक्रियन्ते" इत्यनेनान्वयः। अपि तु—किन्त्वित्यर्थः। उपसंहरति, तदेवमिति।—वस्तुतस्तु "चन्द्रायते मुखवचाऽपि हंसः" इत्यादौ साचारलक्षणलोपादानेऽपि क्वङादियोगे उपमाद्यर्थलाभात् आर्थी उपमायामद्विरुक्तिरिवाद्विरुक्तिसमत्वेन क्वजादिपक्षजगतत्वेन विशेषो बोध्यः। एवञ्च षट्प्रकारायां आर्थ्यां धर्मलोपाभावाभ्यां षोडशप्रकारत्वं बोध्यम्। क्वजादिपक्षे धर्मलोपे उदाहरणं यथा—"धीरः प्रीतिकरत्वेन पथ्य-श्रीयति सर्वदे। निर्मीयति परं प्रेम्णा भक्त्या देवायते नृणाम्॥ देवदर्भ जनैः साधुः प्रतीक्ष्यत्वेन इक्ष्यते। जपया विष्णुसचारं नित्यं सचरति चितौ॥" अत्र इतीवान्तपदार्थानां क्वजार्थे सादृश्ये धर्मेऽन्वयः।

(श) उपमानमुपमानादेः, उपमानेति।—उपनीयते धर्मेणेति उपमानं तस्य अनुपादाने—अप्रयोगे, वाक्यसमासयोः द्विधा—वाक्यगता समासगता चेति द्विप्रकारा, लुप्तोपमा इत्यनुषङ्गः।

उदाहरणम्—

"तस्या मुखेन सदृशं रम्यं नास्ते न वा नयनतुल्यम्।" (घ)

अत्र मुख-नयन-प्रतिनिधिवस्त्वन्तरयोर्गम्यमानत्वादुपमान-लोपः। अत्रैव च "मुखेन सदृशम्" इत्यत्र "मुखं यथेदम्" इति "नयनतुल्यम्" इत्यत्र "दृगिव" इति पाठे श्रौत्यपि सम्भवतीति अनयोर्भेदयोः प्रत्येकं श्रौत्यार्थीत्वभेदेन चतुर्विधत्वसम्भवेऽपि प्राचीनानां रीत्या द्विप्रकारत्वमेवोक्तम्।

औपम्यवाचिनो लोपे समासे क्विपि च द्विधा ॥६७६॥ (ङ)

क्रमेणोदाहरणम्—

"वदनं मृगशावाक्ष्याः सुधाकरमनोहरम्।"

"गर्दभति श्रुतिपरुषं व्यक्तं निनदन् महात्मनां पुरतः।" (छ)

(घ) तस्या इति।—तस्याः,—कान्तायाः, मुखेन सदृशं—तुल्यं, रम्यं—मनोरमं, न आस्ते, न वा नयनतुल्यं, रम्यम् आस्ते इति शेषः; अन्यथा धर्मोपमानलोपोदाहरणमिदं स्यात्।

(ङ) इवादिलुप्तामाह, औपम्येति।—औपम्यवाचिनः,—इवादेरित्यर्थः, लोपे समासे क्विपि च (यत्र कालापादिभिः आयलोपः क्रियते, तत्र पाणिनीयैः क्विप् अनुशिष्यते) प्रत्यये द्विधा भवति।

(छ) वदनमिति।—मृगशावाक्ष्याः,—मृगशावस्य अक्षिणी इव अक्षिणी यस्याः इति बहुव्रीहौ अक्षिपदलोपः, इवार्थस्य समासगम्यतया इवपदाप्रयोगः। चञ्चलत्वस्य शब्दानुपात्तत्वात् लोप इतीदं वक्ष्यमाणत्रिलोपोदाहरणम्। वदनं सुधाकर इव मनोहरम् इति विग्रहे "उपमानानि सामान्यवचनैः" (२।१।५५ पा०) इति कर्मधारयसमासे इवेत्यस्य औपम्यवाचकस्य लोपे समासगता लुप्ता। एतदेव प्रकृतोदाहरणम्। क्विपि उदाहरति, गर्दभतीति।—महात्मनां पुरतः,—अग्रतः, श्रुतिपरुषं—श्रोत्रकटु यथा स्यात् तथेत्यर्थः, निनदन् व्यक्तं—स्पष्टं, गर्दभति—गर्दभ इवाचरति, स इव आचरति इत्यर्थे "सर्वप्रातिपदिकेभ्यः क्विप् वा वक्तव्यः" इति 'गर्दभ' इत्युपमानपदात् आचारेऽर्थे क्विप्, अस्य च लोपादौपम्यवाचकलुप्तेयम्। यथा "ग्रामध्वत्" इत्यादौ क्विपो लोपेऽपि कर्तृत्वस्य वाच्यत्वं, तथा इहापि सादृश्यस्य इति सामान्यलक्षणगमनम्। अत्र श्रुतिपरुषनिनादः साधारणधर्मः शब्दोपात्त एव।

अत्र "गर्दभति" इत्यत्र औपम्यवाचिनः क्विपो लोपः। न चेह उपमेयस्यापि लोपः, "निनदन्" इत्यनेनैव निर्देशात्। (क)

द्विधा समासे वाक्ये च लोपे धर्मोपमानयोः ॥६७७॥ (ख)

"तस्या मुखेन" इत्यादौ "रम्यम्" इति स्थाने "लोके" इति पाठेऽनयोरुदाहरणम्।

क्विप्समासगता द्वेधा धर्मेवादिविलोपने ॥६७८॥ (ग)

उदाहरणम्—"विधवति मुखाब्जमस्याः"। अत्र "विधवति" इति मनोहरत्व-क्विप्प्रत्यययोर्लोपः। केचित् तत्रापि प्रत्ययलोपमाहुः। "मुखाब्जम्" इति च समासगा। (घ)

उपमेयस्य लोपे तु स्यादेका प्रत्यये क्यचि॥६७९॥ (ङ)

यथा—"अरातिविक्रमालोकविकस्वरविलोचनः।
कृपाणोदग्रदोर्दण्डः स सहस्रायुधीयति॥" (च)

(क) निर्देशादिति।—उपमेयस्य इत्यनेनान्वयः।

(ख) एवम् एकलोपामुपमामुक्त्वा द्विलोपामाह, द्विधेति।—धर्मस्य उपमानस्य च उभयोः लोपे समासे वाक्ये च द्विधा भवति, लुप्तोपमा इत्यनुषज्यते, एवमग्रेऽपि।

(ग) प्रकारान्तरेण द्विलोपामाह, क्विबिति।—धर्मस्य इवादेश्च उभयोर्विलोपने क्विप्समासगतत्वेन द्विप्रकारा भवतीत्यर्थः।

(घ) विधवतीति।—अस्याः मुखाब्जं—वदनसरोजं, विधवति—विधुरिव—चन्द्र इवाचरतीति तथा, चन्द्रसदृशं सम्पद्यते इति यावत्। मुखाब्जमिति।—मुखम् अब्जमिवेति विग्रहे "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" (२।१।५६ पा०) इति औपम्यवाचकस्य इवादेः, तथा धर्मस्य मनोहरत्वसौरभादेश्च लोपः। एवं "शशाङ्कवदना" इत्यादिबहुव्रीहावप्येतदुदाहरणं बोध्यम्।

(ङ) उपमेयस्येति।—उपमीयते य इति उपमेयः तस्य।

(च) अरातीति।—अरातीनां—शत्रूणां, विक्रमस्य आलोकेन—दर्शनेन, विकस्वरे—विकासं गते, विस्फारिते इत्यर्थः, विलोचने यस्य तथाभूतः, तथा कृपाणेन—खड्गेन, उदग्रः,—भीषणः, दोर्दण्डः,—बाहुदण्डः यस्य तथोक्तः, सः सहस्रायुधीयति—सहस्रायुधमिव आत्मानमाचरतीत्यर्थः, इह ["उपमानादाचारे" (३।१।१० पा०) इत्युपमानबोधकात् कर्मपदात् आचारार्थे क्यच्प्रत्ययः] दुर्धर्षत्वादिरिहाचारः।

अत्र "सहस्रायुधमिव आत्मानमाचरति" इति वाक्ये उपमेयस्यात्मनो लोपः। न चेह औपम्यवाचकलोपः, उक्तादेव न्यायात्। अत्र केचिदाहुः,—"सहस्रायुधेन सह वर्त्तते इति ससहस्रायुधः, स इवाचरति इति वाक्यात् 'ससहस्रायुधीयति' इति पदसिद्धौ विशेष्यस्य शब्दानुपात्तत्वादिहोपमेयलोपः" इति, तन्न विचारसहं, कर्त्तरि क्यचोऽनुशासनविरुद्धत्वात्। (छ)

धर्मोपमेयलोपेऽन्या ॥ ६८० ॥

यथा—

"यशसि प्रसरति भवतः क्षीरोदीयन्ति सागराः सर्वे"।

अत्र क्षीरोदमिवात्मानमाचरन्तीत्युपमेय आत्मा साधारणधर्मः शुक्लता च लुप्तौ।

त्रिलोपे च समासगा ॥६८१॥ (ज)

यथा—"राजते मृगलोचना"।

अत्र मृगस्य लोचने इव चञ्चले लोचने यस्या इति समासे उपमाप्रतिपादकसाधारणधर्मोपमानानां लोपः। (झ)

(छ) सहस्रायुधमिवात्मानमाचरति इति आत्मन्युपमेयता। यदि च अत्र "सः" इति साक्षात् तच्छब्दपरिगृहीते कर्त्तर्य्येवोपमेयता, तथा सत्यपि कर्मतयोपमेयस्यात्मनः कर्मतयैवेहोपादानं सम्मतम् इति उक्तमेवोदाहरणं युज्यते। उपमेयस्यात्मन इति।—कर्मक्यचोर्योगे कर्मण एवोपमेयत्वं, तस्याप्रयोगे तथेति भावः। उक्तादेवेति—क्यजादेः सादृश्यबोधकत्वव्यवस्थापनरूपात् कथितादित्यर्थः, न्यायात्—युक्तेः। कर्त्तरीति।—अत्र "उपमानात्—" (३।१।१० पा०) इति सूत्रेण कर्मार्थे एव क्यचो निर्देशात् इत्याशयः, अनुशासनविरुद्धत्वात्—व्याकरणशास्त्रविरोधात्, आधारकर्मणोरेव तद्विधानादिति भावः।

(ज) त्रिलोपे इति।—त्रिलोपे—धर्मोपमानेवादिलोपे इत्यर्थः।

(झ) चत्रेति।—मृगलोचना इत्यत्र "सप्तम्युपमानपूर्वपदस्य बहुव्रीहिरुत्तरपदलोपश्च" इति वार्त्तिकेन मृगलोचने इव लोचने यस्या इति विग्रहे बहुव्रीहिसमासे लोचने इत्युत्तरपदलोपः, तथा औपम्यवाचकस्य इवशब्दस्य, चञ्चलत्वरूपस्य साधारण-

तेनोपमाया भेदाः स्युः सप्तविंशतिसङ्ख्यकाः॥६८२॥(ञ)

पूर्णा षड्विधा लुप्ता च एकविंशतिविधेति मिलित्वा सप्तविंशतिप्रकारोपमा। एषु च उपमाभेदेषु मध्ये अलुप्तसाधारणधर्मेषु भेदेषु विशेषः प्रतिपाद्यते (ट)—

एकरूपः क्वचित् क्वापि भिन्नः साधारणो गुणः।
भिन्ने बिम्बानुबिम्बत्वं शब्दमात्रेण वा भिदा॥६८३॥(ठ

धर्मस्य च लोपः। तथा च, उक्तत्रितयलोपात् त्रिलोपे समासगतेयमुपमा। यदि च इह मृगपदासमभिव्याहृतं लोचनपदमेवोपमानबोधकं, तदपि अवयवोपेतसमुदायव्यपदेशवशात् मृगलोचनेति समुदायस्योपमानपूर्वपदता बोध्या; अनेकमन्यपदार्थे" (२।२।२४ पा०) इति तुल्याधिकरणे एव स्थले बहुव्रीहिनिर्देशात् स्थलविशेषे विरुद्धाधिकरणानामपि पदानां तत्समासविधानाय, उत्तरपदलोपाय, क्वचित् केवलमुत्तरपदलोपविधानाय च शास्त्रे पुनः "सप्तमी—" इत्यादिवार्त्तिकसमावेशः। तत्र सप्तमीपूर्वपदस्योदाहरणं यथा—उरसिस्थं लोम यस्य असौ उरसिलोमा, इह "अमूर्द्धमस्तकात्—"(६।३।१२ पा०) इति सप्तम्या अलुक्; एतयोः समानाधिकरणबहुव्रीहिसम्भवेऽपि उत्तरपदलोपार्थमारम्भः। इह मृगपदस्य तल्लोचने लक्षणा इति केषाञ्चित् सिद्धान्ते तु नोदाहरणमेतत् इति बोध्यम्। समासे इति।—अत्र लोचनपदस्यैव समासे लोपो विहितः, अन्ययोस्तु गम्यमानत्वम् इति ज्ञेयम्।

(ञ) तेनेति।—उक्तप्रकारप्रपञ्चनेत्यर्थः।

(ट) एकविंशतिविधेति।—धर्मलोपे दश, उपमानलोपे द्वे, औपम्यवाचिलोपे द्वे, धर्मवादिलोपे च द्वे, उपमेयलोपे धर्मोपमेयलोपे धर्मवाद्युपमानलोपे चैकैकेत्येकविंशतिविधेत्यर्थः।

(ठ) एकरूप इति।—जातिवचनानाव्यक्तिषु एक एव गुणादिः इत्युपाधिशक्तिवादिमतेनेदम्; यद्वा—एकजातीय इत्यर्थः, एवञ्च क्वचिदेकजातीयत्वेन, क्वचित् सादृश्यत्वेन एकोपचारादुभयवृत्तित्वं विवक्षणीयम्। गुणः,—साधर्म्यम्। भिन्ने—भिन्नसाधारणधर्मे, बिम्बानुबिम्बत्वं—बिम्बस्य—सादृश्यस्य, अनुबिम्बत्वं—प्रणिधानेन गम्यसाम्यत्वम्। एकधर्मस्यैकशब्देनोपादानं प्रायेण क्वचिच्छब्देनाप्युपादानं सम्भवतीत्याह, शब्दमात्रेण वेति।—भिदा—भेदः।

अत्र एकरूपे यथा उदाहृतम्—"मधुरः सुधावदधरः" इत्यादि। बिम्बप्रतिबिम्बत्वे यथा (ङ)—

"भङ्गापवर्जितैस्तेषां शिरोभिः श्मश्रुलैर्मही।
तस्तार सरघाव्याप्तैः स चौद्रपटलैरिव॥" (ढ)

अत्र "श्मश्रुलैः" इत्यस्य "सरघाव्याप्तैः" इति दृष्टान्तवत्-प्रतिबिम्बनम्। शब्दमात्रेण भिन्नत्वे यथा (ण)—

"क्षीरं विधाय नयनं विकसितमिव नीलमुत्पलं मयि सा।
कथयामास क्षयाङ्गी मनोगतं निखिलमाजूतम्॥" (त)

अत्र एके एव क्षीरत्वविकसितत्वे प्रतिवस्तूपमावच्छब्दभेदेन निर्दिष्टे। (थ)

(ङ) अनेनोदाहरति, मधुर इति।—एतद्रूपैक्यत्वे। लिङ्गैक्यत्वे यथा—"स्त्रीव अच्छति यच्छोऽयं वक्त्रेषा स्त्री पुमानिव" इति।

(ढ) भङ्गेति।—रघोर्दिग्विजयवर्णनमिदम्। सः,—रघुः, भङ्गेन—अस्त्र-विशेषेण, अपवर्जितैः,—छिन्नैः, श्मश्रुलैः,—श्मश्रुयुक्तैः, तेषां—यवनानां, शिरोभिः,—छत्तनक्तकैरित्यर्थः, सरघाभिः,—मधुमक्षिकाभिः,व्याप्तैः चौद्रपटलैरिव—मधुचक्रैरिव, "मौचाक" इति प्रसिद्धैरित्यर्थः, मही—पृथ्वीं, तस्तार—छादयामास। रघुवंशस्थेदं पद्यम्।

(ण) अत्र श्मश्रुलैरित्यस्येति।—दृष्टान्तालङ्कारे यथा वाक्यार्थयोः साहश्यम् इवादेरभावात् प्रतिपादनमस्य, तथाऽत्रापि श्मश्रुसरघयोः। अत्र श्यामत्वविशेषः साहश्य-हेतुः। एवञ्च "साहश्यहेतू गुणक्रिये" इत्यौपम्यचर्चायां द्रव्यस्यापि साधारणधर्मत्व-मवगन्तव्यम्।

(त) क्षीरमिति।—क्षयाङ्गी—क्षीणाङ्गी, सा—रमणी, विकसितं—प्रस्फुटितं, नीलम् उत्पलं—अनलमिव, क्षीरं नयनं, न तु नयने, यामानां तथैव स्वभावात्, मयि विधाय—अर्पयित्वा, ("निधाय" इति पाठान्तरन्तु मनोरमम्) निखिलं—सकलं, मनोगतम् आजूतम्—अभिप्रेतं, चेष्टितमर्थमिति यावत्, कथयामास, सखीं प्रति इति शेषः; यामायाः स्वभाव एवायं यत्, वल्लभं तिर्यक् पश्यन्ती उपलक्षि कथमपि स्वाभिप्रायमुद्घाटयति इति। अनार्या छन्दः।

(थ) एक एवेति।—दृष्टान्तादिलक्षणाद् विषयभावलक्षणाद्यं भाटी न युक्तः,

एकदेशविवर्त्तिन्युपमा वाच्यत्वगम्यते।
भवेतां यत्र साम्यस्य ॥ ६८४ ॥ (ङ)

यथा—"नेत्रैरिवोत्पलैः पद्मैर्मुखैरिव सरःश्रियः।
पदे पदे विभान्ति स्म चक्रवाकैः स्तनैरिव ॥" (घ)

अत्र उत्पलादीनां नेत्रादीनां सादृश्यं वाच्यं, सरःश्रीणां चक्रनासादृश्यं गम्यम्। (च)

किन्तु "चक्षुरेवेदं प्रफुल्लं प्रतिवस्तूपमावत् विभिन्नाश्रयां क्षेपविलसितप्रख्यां निर्दिष्टम्" इति पाठो बोद्धव्यः। एकक्रियायाः शब्दभेदेनोपादाने यथा—"प्रकाशते मुखं तस्याश्चन्द्रमा दीप्यते यथा"। नन्वत्र वाक्यैक्याभावात् कथमुपमा? इति चेत्, न; यथा "समासासायां शाखं कुर्यात्, रात्रौ शाखं न कुर्यात्" इत्यत्र सप्तमेदेनान्यतरवैयर्थ्यम् इति न्यायेन रात्रौतरसमासाभावायां शाखं कुर्यात् इत्येकवाक्यत्वं, तथाऽत्रापैकवाक्यत्वस्वीकारात् इति संक्षेपः।

(ङ) प्राचीनैरस्वीकृतामपि प्रमाणसिद्धाम् एकदेशविवर्त्तिनीमुपमामाह. एकदेशेति।—यत्र—वाक्ये, साम्यस्य—सादृश्यस्य, वाच्यत्वगम्यते—वाच्यत्वं गम्यत्वञ्च इत्यर्थः, भवेतां, कथंचित् साम्यं वाच्यं, कथंचित् गम्यमित्यन्वयः, तत्र एकदेशविवर्त्तिनी उपमा, एकदेशे स्थितत्वात् तथा एकदेशविवर्त्तिनीति संज्ञा; इयमेकदेशविवर्त्तिरूपकवत् साङ्गाङ्गिनः सादृश्ये एव सम्भवति इति।

(घ) नेत्रैरिवेति।—चक्षुषा इव सरःश्रियः,—सरसीशोभाः, पदे पदे—प्रतिवस्तु, विभान्ति स्म—राजन्ते स्म। कैः हेतुभिरित्याह, नेत्रैरिति।—नेत्रैरिव उत्पलैः,—नेत्रसदृशैः कुवलयैः, तथा मुखैरिव पद्मैः,—वदनोपमैः सरोजैः, तथा स्तनैरिव चक्रवाकैः,—वक्षोजसदृशैः क्रौञ्चपक्षिभिरित्यर्थः।

(च) चक्षुरेति।—उक्तोदाहरणे इत्यर्थः। अत्र नेत्रादिपदमुपमानञ्च उत्पलादिपदमुपमेयञ्चाह्रम्। यद्यपि अत्र "प्रतिवस्तूपमानञ्चोपमेयत्वमवाप्यम्। निष्फलत्वान्निषादं वा प्रतीपमिति कथ्यते॥" इति वक्ष्यमाणदिशा नेत्राद्युपमानत्वे प्रतीपमिति वक्तुं युक्तं, तथापि चक्षुनासादृश्येन सरःश्रियो वर्णयितुं प्रस्तुतेन कविना नेत्राद्युपमानत्वम् उत्पलादीनां क्षीपमेयत्वं वर्णितम्; युक्तञ्च तत्, अन्यथा प्रस्तुतोपयोगात् स्यात्। न चक्षुर्नासोपमानत्वं, सरःश्रियां क्षीपमेयत्वमपि कथंचिदिति वाच्यं, तत्र निषादस्यानुपयोज्यत्वात्, तत्सत्त्वे वर्णनेनोपमाचतिरिति समाधा प्रतिभासते।

कथिता रशनोपमा।

यथोर्ध्वमुपमेयस्य यदि स्यादुपमानता ॥६८५॥ (प)

यथा—"चन्द्रायते शुक्लरुचाऽपि हंसो
हंसायते चारुगतेन कान्ता।
कान्तायते स्वर्गसुखेन वारि
वारीयते स्वच्छतया विधायः॥" (फ)

मालोपमा यदेकस्योपमानं बहु दृश्यते ॥६८६॥ (ब)

(प) रशनोपमानाह, कथितेति।—यथोर्ध्वम्—उत्तरोत्तरम्, उपमेयस्य यदि उपमानता स्यात्, पूर्वोपमायां यदुपमेयम्, उत्तरोपमायां तस्योपमानता यदि स्यात् इत्यर्थः, यथा काव्यां पूर्वं प्रायाः चतुरश्चिट्काद्याः अन्यत्रवनावसरे परं, तथाऽत्र पूर्वपूर्वोपमेयस्योपमानत्वादे परपरावसरः दृश्यायः, तदा रशनोपमा कथिता, एषा—काञ्ची, तस्यां ऊर्ध्वमुपमानात् अस्या इयं संज्ञेति भावः।

(फ) साधारणधर्मस्याभेदे भेदे च द्विविधायामस्यां प्रथमं द्वितीयामुदाहरति, चन्द्रायते इति।—हंसः शुक्लरुचा—शुभकान्त्या, (अपिना सौम्यभावेनेत्यस्य सङ्ग्रहः) चन्द्रायते—चन्द्र इवाचरतीत्यर्थः, कान्ता चारुगतेन—मनोज्ञगमनेन, [अत्र भावे क्तः] हंसायते—हंस इवाचरति, वारि—जलं, स्वर्गसुखेन—सुखस्वादकेन स्वर्गेण, कान्तायते—कान्तेवाचरति, विधायः,—आकाशं, ("आकाशविधायसी" इत्यमरः) स्वच्छतया—नैर्मल्येन, वारीयते—वारीवाचरति इत्यर्थः। ["कर्तुः क्यङ् सलोपश्च" (३।१।११ पा०) इति सूत्रेण क्यङ्]। दृष्टेन्द्रवज्रा छन्दः। अत्रा यथा—"नद्यो-ऽब्धौ वदान्यस्य भारतीवालसा मतिः। चेष्टा मतिरिव स्वच्छा चेष्टेव शुचिसन्ततिः॥" अत्र स्वच्छत्वमेवमेव साधारणो धर्मः।

(ब) मालोपमामाह, मालोपमेति।—एकस्य—उपमेयस्येत्यर्थः यत्र बहु—अनेकप्रकारम्, उपमानं दृश्यते, सा मालोपमा; यथा काचित् माला तुल्यजातीयैः काचिद्भा भिन्नजातीयैः प्रसूनैर्ग्रथ्यते, इयमपि तथा तुल्यजातीयैर्वा भिन्नजातीयैः अनेकैरुपमानैः इति बोध्यम्। बहु इति एकाधिकपरमपि, तेन—"तां हंसमाला: शरदीव गङ्गां महौषधीर्नक्तमिवात्मभासः। स्थिरोपदेशामुपदेशकाले प्रपेदिरे प्राक्तन-जन्मविद्याः॥" इत्यादौ उपमाद्वयेऽपि मालोपमा भवतीति बोध्यम्।

यथा—

"वारिजेनेव सरसो शशिनेव निशीथिनी।
यौवनेनेव वनिता नयेन श्रीर्मनोहरा॥" (भ)

क्वचिदुपमानोपमेययोर्द्वयोरपि प्रकृतत्वं (म) दृश्यते—

"हंसचन्द्र इवाभाति जलं व्योमतलं यथा।
विमलाः कुमुदानीव तारकाः शरदागमे॥" (य)

"अस्य राज्ञो गृहे भान्ति भूपानीता विभूतयः।
पुरन्दरस्य भवने कल्पवृक्षभवा इव॥" (र)

(भ) इयमपि क्रिया, तदाद्यानाह, वारिजेनेति।—वारिजेन—पद्मेन, सरसी—सरोवरम् इव, शशिना—चन्द्रेण, निशीथिनी—रात्रिः इव, ("निशा निशीथिनी रात्रिः" इत्यमरः) यौवनेन—तारुण्येन, वनिता—कान्ता इव, नयेन—नीत्या, नीतिप्रयोगेण इत्यर्थः, श्रीः,—लक्ष्मीः, सम्पदित्यर्थः, मनोहरा—मनोज्ञा, उत्कर्षशालिनीत्यर्थः, भवतीति शेषः। अत्र मनोहरत्वमेकमेव साहश्यहेतुः। द्वितीया यथा—"ज्योत्स्नेव नयनानन्दः मुखेव मदकारणम्। प्रभुतेव समाकृष्ट-सर्वलोका नितम्बिनी॥" अत्र नेत्रानन्दजननादयः विभिन्नधर्मा एव साहश्यानां हेतवः।

(म) उपमेयस्य प्रकृतत्वमुपमानस्याप्रकृतत्वं प्रायिकमित्यभिप्रायेणाह, क्वचिदिति।—प्रकृतत्वं—वर्ण्यमानत्वम् उत्कर्षाधायकत्वेनाकाङ्क्षितत्वम्।

(य) हंस इति।—शरदागमे—शरत्कालप्रहर्षे, हंसः चन्द्र इव, जलं व्योमतलं यथा—नभोमण्डलमिव, तारकाः,—नक्षत्राणि, विमलाः,—शुभ्राः, विशदा इत्यर्थः, कुमुदानि—कैरवाणीव, आभाति—राजते। अत्र हंशादय इव चन्द्रादयोऽपि वक्तव्यशरत्कालस्य उत्कर्षाधायकत्वेनाकाङ्क्षिताः। ["विमलाः" इति पाठो न रमणीयः, भिन्नलिङ्गतया कुमुदानीत्युपमानान्वयायोग्यत्वात्, तस्मात् "वसन्ति" इति पाठो द्रष्टव्यः]।

(र) प्राचीनसम्मतात् आचेपोपमादीनुपमाप्रकारान् वैचित्र्यातिशयाधायकत्वेनोपेक्षमाह चाह, अस्य राज्ञ इति।—अस्य—प्रस्तुतस्य, वर्ण्यमानस्य वा, राज्ञः गृहे पुरन्दरस्य—इन्द्रस्य, भवने कल्पवृक्षभवाः,—कल्पवृक्षोत्पन्नाः, विभूतयः इति शेषः, इव भूपानीताः,—भूपेभ्यः,—विजितनृपेभ्यः, आनीताः,—गृहीता इत्यर्थः, विभूतयः,—सम्पदः, भान्ति—विराजन्ते। ["भूपानीताः" इत्यत्र "भूपानां ताः" इति पाठे—ताः,—बहुमूल्यत्वेन मानिताः इत्यर्थः]।

अत्रोपमेयभूतविभूतिभिः "कल्पद्रुप्रभवा इव" इत्युपमानभूता विभूतय आक्षिप्यन्ते इति आक्षेपोपमा। अत्रैव "गृहे" इत्यस्य "भवने" इत्यनेन प्रतिनिर्देशात् प्रतिनिर्देश्योपमा इत्यादयस्य न लक्षिताः, एवंविधवैचित्र्यस्य सहस्रधा सन्दर्शनात्। (ख)

उपमानोपमेयत्वमेकस्यैव त्वनन्वयः ॥ ६८७ ॥ (ग)

अर्थादेकवाक्ये। (घ) यथा—

"राजीवमिव राजीवं जलं जलमिवाजनि।
चन्द्रश्चन्द्र इवातन्द्रः शंरत्समुदयोऽयमे ॥" (ङ)

अत्र राजीवादीनामनन्यसदृशत्वप्रतिपादनार्थमुपमानोपमेयभावो वैवक्षिकः। "राजीवमिव पाथोजम्" इति चास्य लाटानुप्रासादिवत्तो विषयः; किन्तु अत्रोचितत्वादेकशब्दप्रयोग एव श्रेयान्। (च) तदुक्तम्—

(ख) आक्षिप्यन्ते इति।—"कल्पद्रुप्रभवाः" इति विशेषणेनोपस्थिता विभूतय एवाक्षिप्यन्ते इत्यर्थः। एवंविधेति—यथाकथञ्चिद्वैचित्र्यविशेषाणां परिच्छेत्तुमशक्यतया तत्प्रयोजकप्रकाराणामपि परिच्छेदो न सम्भवति इति भावः।

(ग) अनन्वयमाह, उपमानेति।—एकस्यैव—वस्तुन इत्यर्थः, उपमानोपमेयत्वम्—उपमानोपमेयभावः, अनन्वयः,—न वर्त्तते अन्वयः,—उपमानान्तरेण सम्बन्धः यस्मिन् असौ अनन्वयः। स प्रथमं पूर्णलुप्तभेदेन द्विविधः, तत्र पूर्णस्य उपमावत् षट्प्रकारत्वं, लुप्तभेदे धर्मलुप्तस्य पञ्च भेदाः, वाचकधर्मोपमानादीनां लोपात्। उदाहरणानि स्वयमुन्नेयानि इति सङ्क्षेपः।

(घ) नन्वेतदप्यनन्वयोपमायामुपमेयोपमायां चातिव्याप्तम्? अत आह, अर्थादिति।—पारिशेष्यादित्यर्थः। रशनोपमायां "यथोर्ध्वम्—" इत्यनेन, उपमेयोपमायां "पर्य्यायेण च—" इत्यनेनानेकवाक्यलाभादेकवाक्ये एवास्य विषय इति भावः। ननूपमेयोपमायां "इयोः" इत्युपादानात् अघटनतिव्याप्तिः? इति चेत्, न; तत्र प्रत्येकपदार्थस्यापि पर्य्यायेणोपमानोपमेयत्वसम्भवात्।

(ङ) राजीवमिति।—अतन्द्रः,—निर्मलः इत्यर्थः। अन्यत् स्पष्टम्।

(च) नन्वनन्वयोपमेयभावो भेदे एव कथ्यते, कथमेकस्यैव स्यात्? इत्यत्र आह,

"अनन्वये च शब्दैक्यमौचित्यादानुषङ्गिकम् ।
अस्मिंस्तु लाटानुप्रासे साक्षादेव प्रयोजकम् ॥" इति । (ङ)

पर्य्यायेण द्वयोरेतदुपमेयोपमा मता ॥ ६८८ ॥ (क)

एतत्—उपमानोपमेयत्वम् । अर्थाद्वाक्यद्वये यथा—

"कमलेव मतिर्मतिरिव कमला
तनुरिव विभा विभेव तनुः ।
धरणीव धृतिर्धृतिरिव धरणी
सततं विभाति तव यस्य वत ॥" (ख)

अत्र राजीवादीनामिति ।—वैवक्षिकः,—आरोप्य विवक्षितः । ननु लाटानुप्रासविषय-विनिर्मोकेण अस्य विषयो न सम्भवति इति तद्बाधकोऽयमेव स्यात् ? इत्यत आह—राजीवमिति । विविक्ता विषय इति ।—तथा चायं सम्भवद्विषयान्तरत्वान्न बाधकः इति भावः । उचितत्वात्—उपमानोपमेयाभेदस्य झटिति प्रतीत्युपयुक्तत्वात् । श्रेयान्—अतिप्रशस्तः, न तु नियतः ।

(ङ) अनन्वये इति ।—अनन्वये—तदाख्ये अर्थालङ्कारे, औचित्यात्—प्राशस्त्यात् कारणात्, शब्दयोः,—उपमानोपमेयभूतयोरित्यर्थः, ऐक्यम् आनुषङ्गिकं—प्रसङ्गानुप्रसक्तम् ; अनियतमित्यर्थः, अस्मिन् पुनर्लाटानुप्रासाख्ये शब्दालङ्कारे, साक्षादेव—स्वत एव, अत्र शब्दैक्यमिति पूर्वतोऽनुवर्त्तनीयं, प्रयोजकं—वैचित्र्याधायकम् । अयं भावः,—तत्र शब्दयोरैक्यं झटित्युपमानोपमेययोरैक्यावगमायैवेति न नियतम्, अत्र तु अन्यथाकरणेऽस्यासद्भाव एवेति नियतमिति विशेषः ।

(क) उपमेयोपमामाह, पर्य्यायेणेति ।—पर्य्यायेण—क्रमेण, "मुखमिव कमलम्" इत्यादौ युगपदेव द्वयोरुपमानोपमेयत्वम् इति तद्वारणाय "पर्य्यायेण" इत्युक्तम् ; द्वयोः,—उपमानोपमेययोः, रशनोपमायामेकस्यैव क्रमेणोपमानोपमेयभावः इति तद्वारणाय "द्वयोः" इति पदं बोध्यम् ; एतत्—उपमेयोपमानत्वम् इत्यर्थः, उपमेयोपमा मता । अत्र सादृश्यहेत्वभेदे इत्यपि बोध्यम् ; तेन "पल्लवमिवारुणं करतलं करतलमिव कोमलं पल्लवम्" इत्युपमाद्वयव्यवच्छेदः ।

(ख) कमलेति ।—कमला—लक्ष्मीः, सम्पदित्यर्थः, सेव मतिः,—बुद्धिः, प्रभूता इति शेषः, प्रभूतधनवती यादृशी बुद्धिः भवितुमर्हति, तादृशीति भावः, मतिरिव कमला, प्रभूता इति शेषः, अनन्यसाधारणबुद्ध्यनुरूपा अनन्यसाधारण-

अत्राद्य राज्ञः श्रीवृद्धादिसदृशं नान्यदस्तीत्यभिप्रायः। (ग)

सदृशानुभवात् वस्तु-स्मृतिः स्मरणमुच्यते ॥६८६॥(घ)

यथा—

"अरविन्दमिदं वीक्ष्य खेलत्खञ्जनमञ्जुलम्।
स्मरामि वदनं तस्याः सुभ्रु चञ्चललोचनम्॥" (ङ)

सम्बन्धिन्यः, तनुः,—शरीरमिव, शारीरकौष्ठवमिवेत्यर्थः, विभा—कान्तिः, वसुमज्जवतीति शेषः, अवयवसङ्घटनसौष्ठवमिव सुन्दरकान्तिरित्यर्थः, विभेव तनुः, वसुमज्जवता इति शेषः, लावण्यानुरूपो देहविन्यास इत्यर्थः, धरणी—पृथ्वी, सेव धृतिः,—धैर्यं, दृढा इति शेषः, धृतिरिव धरणी—पृथ्वी, राज्यमिति यावत्, दृढा इति शेषः, अविचलं धैर्यमिव धनमपि राज्यमित्यर्थः, यत—हर्षे, यस्य तव सततं विभाति, तस्य सङ्कटानां विषये खिन्नत्वलक्षण्यमिति शेषः। गीतिश्छन्दः।

(ग) अस्यां वैचित्र्यं दर्शयति—अत्र राज्ञ इति।

(घ) अस्यलक्षणमाह, सदृशेति।—सदृशस्य—तुल्यवस्तुनः इत्यर्थः, (सम्बन्धिज्ञानादिजन्यस्मृतिव्यावृत्त्यर्थं सदृशेति पदं, तेन "भवदभिनववस्त्वाकारिरन्याः समन्तात् सरसिजदलताल्यं नर्मरं कल्पयन्त्याः। इतकदल! वयस्या जीवनोपायमस्याः अरघनविरलं ते कृत्स्न सम्पादयन्ति॥" इत्यादौ सम्बन्धिज्ञानजन्यस्मरणस्य व्यावृत्तिरत्नम्) अनुभवात्—दर्शनादिजन्यज्ञानात्, वस्तुनः,—धर्मस्य इति भावः, स्मृतिः,—अनुभवः, स्मरणम् उच्यते। सदृशानुभवस्य स्मृतिं प्रति संस्कारद्वारोपयोगित्वेन स्मरणत्वं, संस्कारस्तु वस्त्वनुभवादुत्पन्नः। यथा—"दिव्यानामपि कृतविस्मयां पुरस्तादस्याः क्षुरदरविम्बाधरदलताम्। उद्दीप्य प्रियमिव जाविदुत्तरन्तीमाधीजननिधिनन्यनस्य मौरिः॥" इति। यदि तु यत्र प्रियमिवेत्युत्प्रेक्षायाः प्राधान्ये कृतेरतथाभावत्वं, तर्हि "सिलनाभिकुहरेषु यदस्याः प्राविशं चलदृशां लहरीभिः। तद्वै: कुहकैः सुरनार्यः आरिताः सुरतलङ्घनतानाम्॥" इति।

(ङ) उदाहरति, अरविन्दमिति।—खेलता—उपरि विहरता, खञ्जनेन—तदाख्यपक्षिणा, मञ्जुलं—मनोहरम, इदं—पुरो दृश्यमानम, अरविन्दं—कमलं, वीक्ष्य—दृष्ट्वा, तस्याः,—बालाया इत्यर्थः, चञ्चले—विलोले, लोचने—नेत्रे यत्र तादृशं, चारु—सुन्दरं, वदनं—मुखं, स्मरामि। कमलोपरि खञ्जनं दृष्ट्वा मुखकमलोपरि नेत्रखञ्जनमस्मरमिति भावः।

"मयि सकपटम्" इत्यादौ च स्मृतेः सादृश्यानुभवं विनोत्थापितत्वान्नायमलङ्कारः। राघवानन्दमहापात्रास्तु वैसादृश्यात् स्मृतिमपि स्मरणालङ्कारमिच्छन्ति। तत्रोदाहरणं तेषामेव (च) यथा—

"शिरीषमृद्वी गिरिषु प्रपेदे
यदा यदा दुःखशतानि सीता।
तदा तदाऽस्याः सदनेषु सौख्य-
लक्षाणि दध्यौ गलदश्रु रामः॥" (छ)

रूपकं रूपितारोपात् विषये निरपह्नवे॥ ६९०॥ (ज)

(च) चिन्ताजन्यस्मृतेर्नालङ्कारत्वमित्याह, मयीति।—स्मृत्याख्यव्यभिचारिभावस्योदाहरणमिदम्; व्याख्यातञ्च तत्रैव। मतान्तरेण तदेवाह, राघवेति।—वैसादृश्यात्—विसदृशस्य वस्तुनः अनुभवात्, विरुद्धानुभवादित्यर्थः। तेषां—राघवानन्दमहापात्राणाम् इत्यर्थः।

(छ) शिरीषेति।—शिरीषमृद्वी—शिरीषकुसुमसुकुमाराङ्गी, सीता गिरिषु—पर्वतेषु, यदा यदा दुःखशतानि—क्लेशसमूहमित्यर्थः, प्रपेदे—प्राप, रामः तदा तदा सदनेषु—गृहेषु, प्रासादेष्विति यावत्, अस्याः,—सीतायाः, सौख्यलक्षाणि—सुखसन्तानान्, गलदश्रु यथा तथा दध्यौ—चिन्तयामास, सस्मारेत्यर्थः। अत्र विसदृशस्य दुःखशतस्य अनुभवात् सुखसन्तानस्मरणं वैपरीत्यसम्बन्धेन सम्बन्धिनः ज्ञानं संस्कारोद्बोधकम् इति ज्ञेयम्।

(ज) रूपकमाह, रूपकमिति।—निरपह्नवे—प्रकृतगोपनम् अपह्नवः तद्रहिते, विषये—उपमेये इति यावत्, विषये इत्यस्य वाच्ये इति विशेषणं बोध्यम्; तेन "लतामूले लीनो हरिणपरिहीनो हिमकरः स्वयं हाराकारा गलति जलधारा कुवलयात्। धुनीते बन्धूकं तिलकुसुमजन्मा हि पवनो बहिर्द्वारे पुण्यं परिणमति कस्यापि कृतिनः॥" इत्यादौ निगीर्णविषये मुखादौ निष्कलङ्कचन्द्राद्युपमानतादात्म्यारोपरूपातिशयोक्तौ नातिव्याप्तिः; रूपितस्य—उपमानस्य, आरोपात्—तादात्म्याध्यासात्, रूपकं—रूपकालङ्कारः; अध्यासश्च अत्राहार्य्यः, न तु वास्तवः। अत्र "रूपितारोपात्" इति पञ्चम्यन्तपाठः प्रामादिकः, अर्थासङ्गतेः; प्रथमान्तपाठस्तु रमणीयः, उपमेये उपमानाभेदारोपस्यैव रूपकत्वाङ्गीकारात्। तदुक्तं चण्डीदासेन

"रूपित"इति परिणामात् व्यवच्छेदः। एतच्च(झ)तत्प्रस्तावे विवेचयिष्यामः। "निरपह्नवे" इत्यपह्नुतिव्यवच्छेदार्थम्।

तत्परम्परितं साङ्गं निरङ्गमिति च त्रिधा॥६९१॥(ञ)

तत्—रूपकम्। तत्र—

यत्र कस्यचिदारोपः परारोपणकारणम्।
तत् परम्परितं श्लिष्टाश्लिष्टशब्दनिबन्धनम्॥
प्रत्येकं केवलं माला-रूपत्वेति चतुर्विधम्॥६९२॥ (ट)

रूपकप्रकरणे—"यत्तदारोपाभाढार्थत्वादात्मारोप इत्यवधेयम्" इति। न च "अतिशयोक्तिरपह्नुतभेदयोरभेदो रूपकम्" इति काव्यप्रकाशदर्शनात् तदानीं भेदप्रतीतेरभावात् कथमाढार्थत्वम्? बाधकाभावेनेच्छाजन्यज्ञानत्वेनाढार्थत्वाङ्गीकारादिति वाच्यं. शाब्दज्ञे भेदानुभवस्य तदानीमसत्त्वेऽपि चानुमानिकस्य ज्ञानस्य भेदग्रहस्य सत्त्वात्। ननु "गौर्वाहीकः" इत्यादावपह्नुतभेदयोरुपमानोपमेययोस्तादात्म्यारोपस्य कथं न रूपकत्वम्? इति न वाच्यं, तस्य विच्छित्तिविशेषाजनकत्वेन रसाद्युपकारकत्वाभावात्। केचित्तु—"विषयस्य प्राङ्निर्देशे रूपकस्य व्यवहारः, परनिर्देशे तु गौणो व्यवहारः" इत्याहुः, तत्र; "निर्णयस्तौल्यं धातुयन्द्रिका गौडचतुष्कम्। क्रीडाग्रहणनक्षत्रं सेयमिन्दोरेखा॥" इत्यादौ विषयस्य प्राङ्निर्देशाभावेऽपि रूपकव्यवहारात्। ["कथितारोपः" इति पाठे—कथितस्य—अपह्नवभेदोपमानस्य, निरपह्नवे—प्रतिषेधशून्ये, विषये—उपमेये, आरोपः,—तादात्म्यारोपः, रूपकनिष्ठत्वं; अत एवोक्तं काव्यप्रकाशकारेण—"तद्रूपकमभेदो य उपमानोपमेययोः" इति बीध्यम्]।

(झ) कथितेति।—परिणामे त्वारोप्यमाणस्य प्रस्तुतोपयोगित्वेनाप्रस्तुतत्वनियतोपमानत्वस्य वाधात् कथितपदेन तद्व्यवच्छेद इति भावः। परिणामादिति, यत्र इति शेषः। एतच्च—रूपकपरिणामयोर्भेदप्रयोजकञ्च।

(ञ) रूपकभेदानाह, तदिति।—रूपकनिष्ठत्वं:, आर्थत्वारोपस्यावधेः परम्परा सञ्जाता यत्रेति परम्परितं, साङ्गं—सावयवं निरङ्गं—निरवयवम् इति त्रिधा, भवतीति शेषः।

(ट) परम्परितरूपकमाह, यत्रेति।—तत्र—यस्मिन् रूपके, यस्यचित् आरोपः

तत्र श्लिष्टशब्दनिबन्धनं केवलपरम्परितं यथा—

"आहवे जगदुद्दण्ड-राजमण्डलराहवे ।
श्रीनृसिंहमहीपाल ! स्वस्त्यस्तु तव बाहवे ॥" (ठ)

अत्र राजमण्डलं नृपसमूह एव चन्द्रबिम्बम् इत्यारोपो राजबाहोः राहुत्वारोपे निमित्तम् । (ड)

मालारूपं यथा—

"पद्मोदयदिनाधीशः सदागतिसमीरणः ।
भूभृदावलिदम्भोलिरेक एव भवान् भुवि ॥" (ढ)

—अध्यासः, परस्य—अन्यस्य, आरोपणे—आरोपविषये, कारणं, तत् परम्परितं—तदाख्यमित्यर्थः, रूपकमिति शेषः; श्लिष्टाश्लिष्टनिबन्धनं—श्लिष्टशब्दनिबन्धनमश्लिष्टशब्दनिबन्धनञ्च इति द्विविधमित्यर्थः, ज्ञेयमिति शेषः। पुनरपि तस्य द्वैविध्यमाह, प्रत्येकमिति।—प्रत्येकं—निरुक्तभेदयोरेकैकमित्यर्थः, केवलमालारूपभेदाभ्यां द्विविधम्; तथा हि—श्लेषाधीनतया केवलं मालारूपञ्च, अश्लेषेण च केवलं मालारूपञ्चेति चतुर्विधम्।

(ठ) आहवे इति।—हे श्रीनृसिंहमहीपाल! आहवे—युद्धे, जगत्सु उद्दण्डानाम्—उद्धतानां, राजमण्डलानां—नृपतिगणानाम्, (आहवे—परस्परं विमर्दनावसरे, जगति गच्छतीति तस्मिन्, पान्थजने इति यावत्, तत्सन्तापोत्पादनविधाविति भावः, उद्दण्डस्य—अकरुणस्य, राजमण्डलस्य—चन्द्रमण्डलस्य इति व्यङ्ग्योऽर्थः) राहवे—राहुस्वरूपाय, तव बाहवे—भुजाय, स्वस्ति अस्तु। राहुणा चन्द्रमण्डलस्येव बाहुना राजमण्डलानां पीडोत्पादकत्वात् बाहौ राहुत्वारोपः बोध्यः; अत्र राजमण्डलपदं श्लिष्टम्।

(ड) इत्यारोप इति।—अत्र श्लेषेण रूप्यरूपकयोर्द्वयोरेवाभिधानं शब्दसाम्यरूपसादृश्यमूलं प्रथमं रूपकं, तेन राजमण्डलपदवाच्यापमर्दकत्वरूपसादृश्यनिबन्धनं द्वितीयं रूपकमिति भावः। यथा वा—"अहितापकरणभेषजनरनाथ! भवान् करस्थितो यस्य। तस्य कुतोऽहिभयं स्यादखिलामपि मेदिनीं चरतः?" ॥ इत्यत्र अहितानामपकरणमेव अहीनां तापकरणमिति श्लेषमूलकेन आरोपेण नरनाथे भेषजत्वारोपस्य समर्थनम्।

(ढ) पद्मेति।—भुवि—पृथिव्यां, भवान् एक एव पद्मायाः,—लक्ष्म्याः, उदये—उपार्जने, अन्यत्र—पद्मानामुदये—प्रकाशे, दिनाधीशः,—सूर्यः, सतां—

अत्र पद्माया उदय एव पद्मानामुदयः, सतामागतिरेव सदागमनं, भूभृतो राजान एव पर्वता इत्याद्यारोपो राज्ञः सूर्य्यत्वाद्यारोपे निमित्तम्।

अश्लिष्टशब्दनिबन्धनं केवलं यथा—

"पान्तु वो जलदश्यामाः शार्ङ्गज्याघातकर्कशाः।
त्रैलोक्यमण्डपस्तम्भाश्चत्वारो हरिबाहवः॥" (ण)

अत्र त्रैलोक्यस्य मण्डपत्वारोपो हरिबाहूनां स्तम्भत्वारोपे निमित्तम्।

मालारूपं यथा—

"मनोजराजस्य सितातपत्रं
श्रीखण्डचित्रं हरिदङ्गनायाः।
विराजते व्योमसरःसरोजं
कर्पूरपूरप्रभमिन्दुबिम्बम्॥" (त)

अत्र मनोजादेः राजत्वाद्यारोपश्चन्द्रबिम्बस्य सितातपत्रत्वाद्यारोपे निमित्तम्। तत्र च "राजभुजादीनां राहुत्वाद्या-

साधूनाम्, आगतौ—आगमनविषये, अन्यत्र—सदा—नित्यं, गतौ—गमनविषये, प्रवहणविषये इत्यर्थः, समीरणः,—वायुः, तथा भूभृतां—राज्ञाम्, अन्यत्र—पर्वतानाम्, आवलिषु—श्रेणिषु, दम्भोलिः,—वज्रम्। अत्र पद्मादीनि पदानि श्लिष्टानि।

(ण) पान्त्विति।—जलदश्यामाः,—नवनीरदश्यामवर्णाः, शार्ङ्गस्य—तदाख्यधनुषः, ज्यायाः,—मौर्व्याः, आघातेन—आस्फालनेन, कर्कशाः,—कठिनाः, त्रैलोक्यं—त्रिभुवनमेव, मण्डपं—गृहं, तस्य स्तम्भाः,—अवलम्बनदारुणीत्यर्थः, चत्वारः हरिबाहवः,—श्रीविष्णोः भुजचतुष्टयमित्यर्थः, वः,—युष्मान्, पान्तु—रक्षन्तु। अत्र किमपि पदं न श्लिष्टम्।

(त) मनोजेति।—मनोजराजस्य—कामनृपतेः, सितातपत्रं—श्वेतच्छत्रं, हरिदङ्गनायाः,—दिगङ्गनायाः, श्रीखण्डचित्रं—चन्दनतिलकं, व्योम—आकाशमेव, सरः,—सरोवरं, तस्य सरोजं—पद्मं, कर्पूरपूरप्रभं—कर्पूरपुञ्जसदृशम्, इन्दुबिम्बं—चन्द्रमण्डलं, विराजते—शोभते। अत्रेन्द्रवज्रोपेन्द्रवज्रयोरुपजातिश्छन्दः।

रोपो राजमण्डलादीनां चन्द्रमण्डलत्वाद्यारोपे निमित्तम्" इति केचित्। (थ)

अङ्गिनो यदि साङ्गस्य रूपणं साङ्गमेव तत्।
समस्तवस्तुविषयमेकदेशविवर्त्ति च ॥ ६९३ ॥ (द)

तत्र—

आरोप्याणामशेषाणां शाब्दत्वे प्रथमं मतम्॥६९४॥ (ध)

प्रथमं—समस्तवस्तुविषयम्। यथा—

"रावणावग्रहक्लान्तमिति वागमृतेन सः।
अभिवृष्य मरुच्छस्यं कृष्णमेघस्तिरोदधे॥" (न)

(थ) अत्र मतान्तरं निर्दिशति, तत्र चेति।—आहवे इत्युदाहृतपद्ये चेत्यर्थः, राजमुखादीनां—प्रस्तुतनृपेन्द्रबाह्वादीनाम्, [आदिपदं प्रकारताबोधकम्] राहुत्वाद्यारोपः,—राहुत्वाद्यध्यवसायेनाभिधानं, राजमण्डलादीनां—प्रतिपन्थिनृपादीनां, चन्द्रमण्डलत्वाद्यारोपे—चन्द्रत्वाद्यध्यवसाये, निमित्तं—कारणम्, इति केचित्—आलङ्कारिकम्मन्याः, आहुः इति शेषः। अत्र केचित् इति सूचितमस्वारस्यं द्योतयति, तथा हि, राजमण्डलादीनां सरूपशब्दवाच्यत्वं साम्यं प्रसिद्धमारोपकारणं, बाहुराह्वादीनान्तु तादृशधर्मान्तरमप्रसिद्धम् इत्यस्वरसः इति बोध्यम्।

(द) साङ्गरूपकमाह, अङ्गिन इति।—साङ्गस्य—अङ्गसहितस्य, अङ्गिनः यत् रूपणम्—उपमानतादात्म्यारोपः, तत् साङ्गं—तदाख्यरूपकम्। तत् द्विविधं—समस्तवस्तुविषयं—समस्तानि वस्तूनि—आरोप्यमाणानि, विषयाः,—शब्दोपात्तानि यत्र तत्, तथा एकदेशविवर्त्ति च।

(ध) समस्तवस्तुविषयमाह, आरोप्याणामिति।—अशेषाणां—सर्वेषाम्, आरोप्याणाम्—उपमानानाम्, [इह बहुवचनमविवक्षितम्; "सूत्रे लिङ्गं सङ्ख्या कालश्चातन्त्राणि" इति न्यायात्; तेन "दन्तांशुकेशरालीभिस्तस्या भाति मुखाम्बुजम्" इत्यादेः सङ्ग्रहः] शाब्दत्वे—शब्दप्रतिपाद्यत्वे, प्रथमं—समस्तवस्तुविषयमित्यर्थः, मतम्।

(न) उदाहरति, रावणेति।—सः कृष्णः,—विष्णुः एव, मेघः इति कृष्णमेघः, रावणः एव अवग्रहः,—वृष्टिप्रतिबन्धकः, ("वृष्टिर्वर्षं तद्विघातेऽवग्राहावग्रहौ समौ" इत्यमरः) तेन क्लान्तं—पीडितं, सन्तप्तमिति यावत्, मरुत्—देवः एव, शस्यं—

अत्र कण्ठस्य मेघत्वारोपे वागादीनाममृतत्वादिकमारोपितम् ।

यत्र कस्यचिदर्थत्वमेकदेशविवर्त्ति तत् ॥६९५॥ (प)

कस्यचित्—आरोप्यमाणस्य । यथा—

"लावण्यमधुभिः पूर्णमास्यमस्या विकस्वरम् ।
लोकलोचनरोलम्ब-कदम्बैः केन पीयते" ॥ (फ)

अत्र लावण्यादौ मधुत्वाद्यारोपः शाब्दः, मुखे पद्मत्वारोपः आर्थः । न च इयमेकदेशविवर्त्तिन्युपमा, विकस्वरत्वधर्मस्यारोप्यमाणे पद्मे मुख्यतया वर्त्तनात्, मुखे चोपचरितत्वात् (ब) ।

प्रीत्यादि तत्, इति—पूर्वोक्तेन, वागेव अमृतं—अमृतं तेन, अभिहत्य—प्रीत्वित्वा, पद्मे—अभिधाय, तिरोदधे—अन्तर्हितः । अत्र अक्षिणः कण्ठस्य मेघत्वारोपसम्बन्धेन तदङ्गानां सर्वेषाम् अमृतादीनां वागादिषु आरोपात् साङ्गं रूपकमिति बोध्यम् । यथा वा—"सुविमलमौक्तिकतारे धवलांशुकचन्द्रिकाचलत्तारे । वदनपरिपूर्णचन्द्रे सुन्दरि ! राकाऽसि नाम सत्यं ॥" इत्यत्र सुन्दर्याः राकात्वारोपे सर्वेषामपि मौक्तिकादीनां तारात्वारोपवत् ।

(प) एकदेशविवर्त्तिसाङ्गरूपकमाह, यत्रेति ।—यत्र कस्यचित्—आरोप्यमाणस्य इत्यर्थः, ("कस्यचित्" इत्यनेनानस्य शाब्दत्वलाभः, "प्रीता चार्पयति ते यस्मिन्नेकदेशविवर्त्ति तत्" इति काव्यप्रकाशदर्शनात् शाब्दत्वलाभेतत्सत्त्वघटकत्वं बोध्यम्) आर्थत्वम्—अर्थबलात् लब्धत्वं, तत् एकदेशविवर्त्ति, रूपकमिति शेषः ।

(फ) उदाहरति, लावण्येति ।—अस्याः,—कान्तायाः इत्यर्थः, लावण्यानि—सौन्दर्यविशेषा एव, मधूनि तैः, पूर्णं विकस्वरं—प्रफुल्लमित्यर्थः, आस्यं—मुखं, कैः लोकानां लोचनान्येव रोलम्बकदम्बानि—भ्रमरसमूहाः तैः, ("इन्दिन्दिरस्तु रोलम्बः भ्रमरो मधुव्रतः" इति धरणिः) न पीयते ?—आस्वाद्यते ? सदृशं दृश्यते ? इत्यर्थः, अपि तु सर्वैरेव पीयते इति भावः । यथा वा—"दयिता चलनयना नाम्नां सप्तविंशतिमुक्ता । सप्तमि यस्य सख्यं सैव तदपीतरक्षिणी विधना ॥" इत्यत्र रूपादौ लक्ष्याद्यारोपः शाब्दः, नयनयोर्मीनत्वारोपः आर्थः, न तु तदङ्गानां तदङ्गित्वारोपः आर्थः, तस्य बाधादुपपत्तेः इति ।

(ब) न चेयमिति ।—उपमिमाकृतपदार्थस्य मुख्यया इत्थंभावसम्बन्धेन एक

निरङ्गं केवलस्यैव रूपणं तदपि द्विधा।
मालाकेवलरूपत्वात् ॥ ६९६ ॥ (भ)

तत्र मालारूपं निरङ्गं यथा—

"निर्माणकौशलं धातुश्चन्द्रिका लोकचक्षुषाम्।
क्रीड़ागृहमनङ्गस्य सेयमिन्दीवरेक्षणा ॥" (म)

केवलं यथा—

"दासे कृतागसि भवेदुचितः प्रभूणां
पादप्रहार इति सुन्दरि! नास्मि दूये।

एकदेशविवर्त्तिनोरुपमारूपकयोरन्यतराङ्गीकारे बीजम्; "मुखपद्मं विकस्वरम्" इत्युपमाङ्गीकारे क्रियाविशेषशालित्वरूपविकस्वरत्वस्य मुखे बाधात् कान्तिविशेषे लक्षणाप्रसङ्गः; "मुखमेव पद्मम्" इति रूपकाङ्गीकारे तु विशेष्ये पद्मे विकस्वरत्वस्य मुख्यया वृत्त्याऽन्वयः सम्भवति; "दन्तप्रभापुष्पचिता पाणिपल्लवशोभिनी। केशपाशालिवृन्देन सुवेशा हरिणेक्षणा ॥" इत्यत्र रूपकाङ्गीकारे भूषणादिकृतशोभाविशेषस्य लतायां बाधात् शोभामात्रे लक्षणाप्रसङ्गः, उपमाऽङ्गीकारे तु मुख्यया वृत्त्याऽन्वयः सम्भवतीति; एतादृशं विशेषमवलोक्यैव केचिदेकदेशविवर्त्तिनीमुपमामेकदेशविवर्त्तिनि रूपके एवान्तर्भावयन्ति; वस्तुतस्तु विकस्वरत्वधर्मस्य—विकासस्य इत्यर्थः, मुख्यतया—प्राधान्येन, वर्त्तनात्—अवस्थानात्, मुखे च उपचरितत्वात्—आरोपितत्वात्, गुणभावेन वर्त्तनादित्यर्थः। तथा च—यत्र साधर्म्यम् उपमाने मुख्यतया स्थितं, तत्रैव रूपकं, यत्र तु उपमेये स्थितं, तत्र उपमैवेति फलितम्।

(भ) निरङ्गमाह, निरङ्गमिति।—केवलस्य—एकमात्रस्यैव, न तु साङ्गस्य इत्यर्थः, अङ्गिन इति शेषः, रूपणं निरङ्गम्; तदपि—निरङ्गरूपकमपि, द्विधा—द्विविधम्। मालेति।—मालारूपत्वात् केवलरूपत्वाच्चेत्यर्थः।

(म) तत्र मालारूपमुदाहरति, निर्माणेति।—सा इयम् इन्दीवरेक्षणा—नीलोत्पलनेत्रा, धातुः,—विधातुः, निर्माणकौशलं—सृष्टिवैचित्र्यं, वराङ्गनासृष्टिव्युत्पत्तिरिति भावः, लोकचक्षुषां चन्द्रिका—कौमुदी, कौमुदीव नेत्रोत्सवविधायिनीत्यर्थः, तथा अनङ्गस्य—कामस्य, क्रीड़ागृहं—विलासागारस्वरूपा, स्मरोद्दीपकत्वादिति भावः। सौन्दर्य्यातिशयसम्पादकत्वमेवानयोः साम्यं, तन्मूलक एवायमारोपः। अत्र इन्दीवरेक्षणारूपे अङ्गिनि मालारूपेण निर्माणकौशलादीनाम् आरोपः।

उद्यत्कठोरपुलकाङ्कुरकण्टकाग्रै-
र्यद्भिद्यते मृदु पदं ननु सा व्यथा मे ॥" (य)

तेनाष्टौ रूपके भिदाः ॥ ६९७॥ (र)

"चिरन्तनैरुक्ताः" इति शेषः । क्वचित् परम्परितमप्येकदेश-विवर्त्ति । (ल) यथा—

"पर्य्यङ्को राजलक्ष्म्या हरितमणिमयः पौरुषाब्धेस्तरङ्गो
भग्नप्रत्यर्थिवंशोल्बणविजयकरिस्त्यानदानाम्बुपट्टः ।
सङ्ग्रामत्रासताम्यन्मुरलपतियशोहंसनीलाम्बुवाहः
खड्गः क्ष्मासौविदल्लः समिति विजयते मालवाखण्डलस्य ॥" (व)

(य) केवलमुदाहरति, दासे इति ।—मानिनीं कान्तां प्रसादयितुं तत्पादाहतस्य नायकस्योक्तिरियम् । हे सुन्दरि ! दासे—किङ्करे, कृतागसि—कृतापराधे सति, प्रभूणां—स्वामिनां, पादप्रहारः,—चरणाघातः, उचितः,—योग्यः, भवेत् इति—अस्मात् हेतोः, अस्मि—अहमित्यर्थः, ["अस्मि" इत्यत्र "अत्र" इति पाठान्तरे—पादप्रहारे इत्यर्थः] न दूये—न दुःखमनुभवामीत्यर्थः, किन्तु उद्यद्भिः,—उद्गच्छद्भिः, कठोरैः,—कर्कशैः, खरस्पर्शैरित्यर्थः, पुलकाङ्कुरैः,—अङ्कुरवत् रोमाञ्चैरेव, कण्टकाग्रैः, पादस्पर्शजनितसात्त्विकभावविशेषैरिति भावः, मृदु—कोमलं, पदं, तवेति शेषः, यत् भिद्यते—विध्यते, ननु—भोः ! सा मे—मम, व्यथा—पीड़ा । तव पादप्रहारेऽपि मम पुलको भवति, तथाऽपि मयि तव क्रोधः इति महदनुचितम् । अत्र पुलकाङ्कुररूपे अङ्गिनि केवलस्य कण्टकाग्रस्य आरोपः ।

(र) तेनेति ।—प्रथमतः रूपकस्य त्रयो भेदाः,—साङ्गनिरङ्गपरम्परितप्रकारेण, तत्र समस्तवस्तुविषयैकदेशविवर्त्तिभेदाभ्यां साङ्गं द्विविधम्, एवं केवलमालारूपभेदाभ्यां निरङ्गमपि द्विविधं, श्लिष्टाश्लिष्टशब्दनिबन्धनत्वाभ्यान्तु परम्परितं द्विविधं सत् पुनः प्रत्येकं केवलमालारूपभेदाभ्यां द्विविधमिति चतुर्विधं, सम्मेलनेन रूपकमष्टप्रकारम् इति ।

(ल) क्वचिदिति ।—एकदेशविवर्त्तिपरम्परितरूपके कस्यचिदार्थत्वमित्यर्थः ।

(व) उदाहरति, पर्य्यङ्क इति ।—राजलक्ष्म्याः,—राजश्रियाः, हरितमणिमयः,—मरकतमणिनिर्मितः, पर्य्यङ्कः,—खट्वा, उपवेशनासनमिति यावत् ; खड्गमाश्रित्य राजलक्ष्म्याः स्थिरीकरणात् तत्र पर्य्यङ्कत्वारोप इति भावः ; पौरुषाब्धेः,—

यत्रार्थः आर्यां महिषीत्वारोपः खड्गे सौविदल्लत्वारोपे निमित्तम् । अस्य भेदस्य पूर्ववन्मालारूपत्वेऽप्युदाहरणं दृश्यम् । (ग)

दृश्यन्ते क्वचिदारोप्याः श्लिष्टाः साङ्गेऽपि रूपके ॥८८॥(घ)

पौरुषं—पराक्रम एव, अब्धिः,—सागरः, वैरागि अगस्तिभवनीयत्वादिति भावः, तस्य तरङ्गः,—ऊर्मिः, खड्गस्य सतावत् दीर्घतया पुंवदान्दोलनेन चालनसम्भवात् सूर्यकरप्रतिफलनेन चाकचक्यमाधिक्यया च सूर्यकरप्रतिफलितचञ्चलतरङ्गसन्तानेन साम्यात् तत्र तरङ्गत्वारोपो बोध्यः ; अग्रेति।—अग्रेण—पराजितेन, अग्रधिना—अग्रणा, वंशेन—कुलेन, अग्रपराजयेन हेतुनेत्यर्थः, यः उत्सवः,—महान्, विजयः,—सङ्ग्रामसफलताकृप इत्यर्थः, स एव अरी—इक्षुः, तस्य क्षारं—घनीभूतं, यत् दानाम्बु —मदजलं, तस्य पङ्कः,—पाषाणवत् दृढाधार इत्यर्थः, मदमत्तकरी यथा स्वच्छन्दी अप्रतिहतं विचरति तद्वत् अप्रतिहतसञ्चार इत्यर्थः, खड्गस्य विस्तृतत्वात् प्रतिघातबहुत्वाच्च करिणस्तस्य श्रेयम् ; सङ्ग्रामेति।—सङ्ग्रामात् यः त्रासः,—भीतिः, तेन ताम्यन्तः,—मुह्यन्तः, ये सुरखपतयः,—तदाख्यदैत्यनायकाः, तेषां यशः,—श्रौर्यादिजनितोज्ज्वलकीर्तिः एव, हंसः तस्य नीलाम्बुवाहः,—कृष्णमेघः, वर्षासु नीलमेघोदयो यथा हंसान् दूरं मानससरोवरं प्रापयति, तद्वत् पराजितसुरखपतीनां यशोऽपि तेभ्यो दूरीकृतवान् इत्यर्थः, कृष्णमेघोदयस्य सर्वाच्छादकत्वात् खड्गेन तेषां यशसां तिरोधानाच्च खड्गे कृष्णमेघत्वारोपो बोध्यः, क्षमेति—युद्धे, मालवाखण्डलस्य —मालवः,—देशविशेषः, तस्य आखण्डलस्य—इन्द्रस्य, मालवाधिपतेरित्यर्थः, ["मालवाखण्डलस्य" इति पाठान्तरे तु—नरेन्द्रस्येत्यर्थः] आ सौविदल्लः,—आर्यायाः, —पृथिव्याः, सौविदल्लः,—क्षत्रियो, अत्र:पुररक्षकपुरुषविशेषः इत्यर्थः, ("सौविदल्लाः क्षत्रियाः" इत्यमरः) राज्ञां आपतित्वेन आर्यायाः महिषीरूपत्वात् खड्गेन पृथिवीरक्षणाच्च तस्मिन् क्षत्रियत्वारोपो बोध्यः ; खड्गः,—असिः, विजयते—सर्वोत्कर्षेण वर्तते इत्यर्थः। स्रग्धरा वृत्तम् ।

(ग) अत्रेति।—आर्यां महिषीत्वारोपो राजभोग्यत्वरूपसाम्यमूलकः। दृश्यमिति।—"छत्रं वितर्दि शस्त्रागारमस्य शौक्लक्ष्यचित्रं चरितोऽवलायाः। विराजते यत्र नभःसरोजं सपूर्णपूरप्रभमिन्दुबिम्बम् ॥" अत्र शस्त्रागारादौ राजत्वाधारोपः आर्थः चन्द्रबिम्बस्य छित्तरूपत्वारोपे निमित्तम् इत्यवधेयम् ।

(घ) दृश्यन्ते इति।—क्वचित् खड्गे रूपकेऽपि आरोप्याः,—चन्द्रकलाद्योपाः, रूपकमाणीति यावत्, श्लिष्टाः,—अनेकार्थाः इत्यर्थः, दृश्यन्ते ।

तत्रैकदेशविवर्त्ति श्लिष्टं यथा मम—

"करमुदयमहीधरस्तनाग्रे
गलिततमःपटलांशुके निवेश्य।
विकसितकुमुदेक्षणं विचुम्ब-
त्ययममरेशदिशो मुखं सुधांशुः॥" (स)

समस्तवस्तुविषयं यथा—अत्रैव "विचुम्बति" इत्यादौ "चुचुम्बे हरिदबलामुखमिन्दुनायकेन" इति पाठे—न चात्र श्लिष्टपरम्परितम्; तत्र हि, "भूभृदावलिदम्भोलिः" इत्यादौ राजादौ पर्वतत्वादिरूपणं विना वर्णनीयस्य राजादेर्दम्भोलितादिरूपणं सर्वथैव सादृश्यासम्भवादसङ्गतम्। तर्हि कथं "पद्मोदयदिनाधीशः" इत्यादौ परम्परितं, राजादेः सूर्य्यादिना सादृश्यस्य तेजस्वितादिहेतुकस्य सम्भवात्? इति न वाच्यम्; तथा हि—राजादेस्तेजस्वितादिहेतुकं सुव्यक्तं सादृश्यं, न तु प्रकृते तद्विवक्षितं, पद्मोदयादेरेव द्वयोः (ह) साधारणधर्मतया विव-

(स) करमिति।—चन्द्रोदयवर्णनमिदम्। अयं सुधांशुः,—चन्द्रः, अमरेशदिशः,—ऐन्द्र्या दिशः, प्राच्या इत्यर्थः, गलितं—स्रस्तम्, अपगतमित्यर्थः, तमसां पटलं—समूह एव, अंशुकं—वस्त्रं यस्मात् तादृशे, उदयमहीधरः,—उदयाचलः एव, स्तनः तस्याग्रे—तदुपरि, करं—किरणमेव हस्तं, निवेश्य—निधाय, विकसितानि कुमुदान्येव ईक्षणानि—नयनानि यत्र तादृशं, मुखं विचुम्बति। अत्र अमरेशदिशि अङ्गनाऽऽरोपस्य सुधांशौ नायकारोपस्य च आर्थत्वात् एकदेशविवर्त्तित्वम्। पुष्पिताग्रा वृत्तम्।

(ह) श्लिष्टपरम्परितमिति।—यत्र सादृश्यासम्भवेन विना आरोपणं वाक्यार्थासङ्गतिः, तत्रैव परम्परितं, यत्र च न तथा, तत्र साङ्गनिरङ्गयोरवसर इति तात्पर्य्यम्। पद्मोदयादेरेव—पद्मोदयादिशब्दस्यैव, द्वयोः,—रूप्यरूपकयोः, राजादिसूर्य्याद्योः इत्यर्थः। नन्वत्र शब्दसाम्यविवक्षावशात् प्रसिद्धतेजस्वितादिरूपसाम्यविवक्षाऽस्तु, "त्रैलोक्यमण्डपस्तम्भाः" इत्यादौ तु दीर्घत्वपीवरत्वादिसाम्यसम्भवेनात्र तन्मूलक एव स्तम्भत्वाद्यारोपः, तत् त्रैलोक्यादौ मण्डपत्वाद्यारोपस्य तत्कारणत्वस्वीकारेण किम्?

चितत्वात्; इह तु मङ्गीधरादेः स्नानादिना साहश्यं पीनोत्तुङ्गत्वादिना मुख्यत्वमेव इति न श्लिष्टपरम्परितम्।

क्वचित् समासाभावेऽपि रूपकं दृश्यते। (क) यथा—

"मुखं तव कुरङ्गाक्षि! सरोजमिति नान्यथा।" (ख)

क्वचिद्वैयधिकरण्येऽपि। (ग) यथा—

"विदधे मधुपश्रेणीमिह भ्रूलतया विधिः।" (घ)

क्वचिद्वैधर्म्येऽपि। (ङ)

यथा—

"सौजन्याम्बुमरुस्थली सुचरितालेख्यद्युभित्तिग्रण-
ज्योत्स्नाकृष्णचतुर्दशी सरलतायोगश्वपुच्छच्छटा।
यैरेषाऽपि दुराशया कलियुगे राजावली सेविता
तेषां शूलिनि भक्तिमात्रसुलभे सेवा कियत् कौशलम्?"॥ (च)

इति चेत्, न; स्वा यथा मरुपलारसहिष्णवः, तथा दरिद्राद्यः त्रैलोक्यभारसहिष्णवः इति साम्यस्यैव प्रकृते विवक्षितत्वात्, तत्र त्रैलोक्यादौ मरुपलाद्यारोपं विना दुर्बोधम्।

(क) समासाभावेऽपीति।—अत एव दक्षिणा व्यक्तं, समक्षं, व्यक्तसमक्षं चेति त्रिविधं रूपकमुक्तम्।

(ख) मुखमिति।—उत्तरार्द्धं यथा "तं पुनः सरसी साक्षात् पतत्रिमधुकरावलिः॥" इति। यथा वोदाहृतं गङ्गाधरकृता—"धर्मज्ञात्मा भागधेयं जनायाः स्वारः स्रष्टेः लोकितं भारदायाः। आत्मा साक्षात् ब्रह्मणो वेदमूर्त्तेराकृष्यार्थं राजतास्त्रेष राजा॥"

(ग) वैयधिकरण्ये इति।—उपमानोपमेययोर्भिन्नविभक्तिकत्वे इत्यर्थः।

(घ) उदाहरति, विदधे इति।—विधिः,—विधाता, इह—अस्यां नाट्यिकायां, भ्रूलतया [इत्यभेदे तृतीया, अन्यथा तादात्म्यारोपो न स्यात्] मधुपश्रेणीं—भ्रमरावलीं, विदधे। अत्र भ्रूलतायां नायिकरण्यायां मधुपश्रेण्यारोपः।

(ङ) वैधर्म्ये इति।—विरुद्धधर्मसम्बन्धे इत्यर्थः।

(च) उदाहरति, सौजन्येति।—सौजन्यमेव अम्बु—जलं, तत्र मरुस्थली—मरुभूमिः, सौजन्यशून्येत्यर्थः, सुचरितं—साधुचरितम् एव, भित्तिः—चित्रभूमिः,

इदं मम। अत्र च केषाञ्चिद्रूपकाणां शब्दश्लेषमूलत्वेऽपि रूपकविशेषत्वात् अर्थालङ्कारमध्ये गणनम्। एवं वक्ष्यमाणालङ्कारेषु (छ) बोध्यम्।

अधिकारूढवैशिष्ट्यं रूपकं यत्तदेव तत् ॥९९॥ (ज)

तदेव—अधिकारूढवैशिष्ट्यसंज्ञकरूपकम्। यथा मम—

"इदं वक्त्रं साक्षादिरहितकलङ्कः प्रियकरः
सुधाधाराधारस्थिरपरिणतं बिम्बमधरः।
इमे नेत्रे रात्रिन्दिवमधिकशोभे कुवलये
तनुर्लावण्यानां जलधिरवगाहे सुखतरः॥" (झ)

तस्य यभिन्नः,—आत्माग्रहरूपकुयं, सुचरितताशूल्येत्यर्थः, दुश्चरितेति भावः, गुणाः, —गाम्भीर्यौदार्यादयः एव, ज्योत्स्नाः तासां अमृतदर्शी—गुणमुग्धा इत्यर्थः, सरलतायाः,—ऋजुभावायाः, योगः,—सद्भावः, तस्य वक्रकुब्जटा—कुकुरलाकुलकुब्जत्वौ, कुकुरलाकुलं यथा ऋजुत्वे सर्वेऽपि सरलत्वं न गच्छन्ति, तद्वत् बहुश उपालभमानाऽपि स्वभावकुटिला इति भावः, एवा—ईदृशी अपि, राजावली—राजसमूहः, यः, —जनैरित्यर्थः, कलियुगे दुराशया—दुष्टधनदृष्टया, सेविता—उपासिता, तेषां भक्तिनामसुखमे—केवलनामभक्तिलभ्ये, मुक्तिनि—मुक्तौ, सेवा कियत् कौशलम् ?—किं नैपुण्यम् ? आशुतोषाराधनं न तेषां किमप्यायासकरमिति भावः। इह राजावल्यां सरलत्वाधारोपः सौजन्यात्सुखादित्वादिसाधर्म्यमाश्रित्यवत्वात् वैपरीत्येनाभिहितः। आदर्शविक्रीडितं इत्यम्।

(छ) अत्र च केषाञ्चिदिति।—शब्दश्लेषमूलत्वेऽपि—साधनस्य श्लेषस्य शब्दालङ्कारत्वेऽपि, रूपकविशेषत्वात्—रूपकस्य प्राधान्यात्, साध्यत्वेन प्रधानस्य अर्थालङ्कारमध्ये गणनमिति भावः। वक्ष्यमाणालङ्कारेषु—श्लेषापह्नवादिषु इत्यर्थः।

(ज) अधिकारूढवैशिष्ट्यं रूपकमाह, अधिकेति।—यत् रूपकम्, अधिकम्—अत्यर्थम्, आरूढ—प्राप्त, वैशिष्ट्य—वैचित्र्य, विशेषवत्त्वमित्यर्थः यत् तत् तादृशमित्यर्थः, तत्—रूपकं, तदेव—अधिकारूढवैशिष्ट्यनामकम्।

(झ) उदाहरति, इदमिति।—इदं—दृश्यमानमित्यर्थः, वक्त्रं—मुखं, साक्षात् —प्रत्यक्षं, अयमित्यर्थः, विरहितकलङ्कः,—निष्कलङ्कः, प्रियकरः,—चन्द्रः, सुधाधाराधाम्—अमृतधाराधाम्, आधारः,—आस्पदम्, अधरः,—ओष्ठरोचिः, बिम्ब-

अत्र कलङ्कराहित्यादिना अधिकं वैशिष्ट्यम्। (ञ)

विषयात्मतयाऽऽरोप्य प्रकृतार्थोपयोगिनि।
परिणामो भवेत्तुल्यातुल्याधिकरणो द्विधा॥७००॥(ट)

परिणतं—सम्यक्परिपक्वं, बिम्बं—फलविशेषः, इमे—परिदृश्यमाने इत्यर्थः, नेत्रे रात्रिन्दिवम्—अहर्निशम्, अधिकशोभे—अधिकशोभाशालिनी इत्यर्थः, कुवलये—नीलोत्पलयुगले, ("नीलोत्पलं कुवलयम्" इत्यमरः) तनुः,—शरीरं, लावण्यानां—"मुक्ताफलेषु छायायास्तरलत्वमिवान्तरा। दृश्यमानं यदङ्गेषु तल्लावण्यमिहोच्यते॥" इत्युक्तलक्षणानां कान्तिविशेषाणामित्यर्थः, जलधिः,—समुद्रः, परम् अवगाहे—अवगाहनविषये, सुखतरः,—अतिसुखप्रद इत्यर्थः। अत्र शिखरिणी छन्दः।

(ञ) अत्र कलङ्केति।—अत्र मुखादीनां निष्कलङ्कत्वादिना शशधराद्यपेक्षया आधिक्येन वैशिष्ट्यं, चन्द्रादेः अत्यन्तासम्भवस्य कलङ्करहितत्वादिविशेषणस्य तत्रारोपणात्। ["कलङ्कराहित्यादिना" इत्यभेदे तृतीया] आदिपदेन च सुधाधाराधारत्वादीनां ग्रहणं स्वयमूह्यम्।

(ट) परिणामालङ्कारमाह, विषयेति।—आरोप्ये—आरोप्यमाणे वस्तुनि, विषयात्मतया—आरोपविषयाभिन्नतया, विषयतादात्म्येन इत्यर्थः, प्रकृतार्थस्य—प्रस्तुतस्य कार्यस्य, उपयोगिनि—उपकारिणि, सम्पादके सतीत्यर्थः, परिणामः भवेत्; प्रकृतार्थोपयोगितया विषये विषयिण आरोपः परिणामः; रूपके सदृशवस्तुनः तादात्म्यं विषये भासते, इह तु सजातीयफलसाधनतया विषयस्य तादात्म्यमारोप्यमाणे भासते इति विशेषः। स च द्विधा—तुल्याधिकरणः अतुल्याधिकरणश्च—व्यधिकरणश्च। तत्र तुल्याधिकरणः,—समानाधिकरणः, स च समानविभक्तिकपदद्वये प्रयोज्यः, विभिन्नविभक्तिकपदद्वयप्रयोज्यो व्यधिकरण एवातुल्याधिकरण इति सारः। अलङ्कारशेखरकाराणां त्विदमभिधानतात्पर्यम्—उपमानप्रतियोगिकाभेदोपमेयप्रतियोगिकाभेदाभ्यां यथाक्रमं रूपकपरिणामौ, प्रतीपवत् तत्र भेदाभावे उपमेयप्रतियोगिकत्वाभिप्रायोपपादकं प्रस्तुतार्थोपादानं न हि तदन्तरस्य निवेशः, तथा च यत्र उपमानस्य स्वस्वरूपेणैव प्रकृतार्थोपादानं यत्रौदासीन्यञ्च तत्र रूपकालङ्कार एव। एवञ्च विशेषणसमासाश्रितः परिणामः, मयूरव्यंसकादिसमासतन्त्रं रूपकं, यथा "मुखचन्द्रम्" इत्याद्युदाहरणे। यदि चन्द्रमुखम् इति प्रयोगः, तदा विशेषणसमासतन्त्रमपि रूपकम् इति। अन्येषां तु उपमानोपमेयानाम् उपमानप्रतियोगिकैक्यसम्बन्धेन ज्ञापकानां "मयूरव्यंसकादयश्च" इति विशेषणवृत्तिबाधात् चन्द्रमुखमिति प्रयोग एव न स्यात् इति।

आरोप्यमाणस्यारोपविषयात्मतया परिणमनात् (ठ) परिणामः। यथा—

"स्मितेनोपायनं दूरादागतस्य कृतं मम।
स्तनोपपीड़माश्लेषः कृतो द्यूते पणस्तया॥" (ड)

अन्यत्रोपायनपणौ वसनाभरणादिभावेनोपयुज्येते, अत्र तु नायकसम्भावनद्यूतयोः स्मिताश्लेषरूपतया प्रथमार्द्धे वैयधि-

(ठ) आरोप्यमाणस्येति।—परिणमनात्—परिणतबुद्धिविषयीकरणात्। बुद्धेः परिणामस्य अनाद्यर्थत्वे सति धारावाहिकत्वं, रूपके हि आद्यार्थ एव सकलभेदबुद्धिः, अनन्तरं साधर्म्यप्रतीतिरेव, न त्वभेदबुद्ध्यन्तरम्, इह तु वस्तुनोरेकद्वार्थत्वादिति अनन्तरितरञ्जितभेदयोरभेदप्रतीतिरिति भावः। अत्र प्रायेण भवत्यर्थस्य करोत्यर्थस्य वा धातोः प्रयोगः; तत्र भवत्यर्थस्य प्रयोगो यथा—"तिरस्करिण्यो जलदा भवन्ति"। अत्र योषिद्वाचकरूपप्रस्तुतप्रयोजनसाधनत्वेन प्रसिद्धे पटविशेषे आरोप्यमाणे तत्साधनस्य जलदस्य तादात्म्यारोपः। यथा वा—"नन्दो गन्धवहः शौरो वह्निरिन्दुश्च जायते। चर्चा चन्दनपङ्कस्य प्रस्थघातः प्रवासिनाम्॥" अत्र देहदाहादिरूपप्रस्तुतप्रयोजनसाधनत्वेन प्रसिद्धे वह्नौ शौरादौ आरोप्यमाणे तत्साधनस्य गन्धवहादेर्विषयस्य तादात्म्यारोपः।

(ड) अरोप्यप्रयोगे परिणामनाह, स्मितेनेति।—सखायं प्रति कञ्चित् स्वकान्तासङ्गाववर्णनमिदम्। तथा—सत्कान्तया इत्यर्थः, स्मितेन—मन्दहसितेन, दूरात् आगतस्य—उपस्थितस्य, मम उपायनम्—उपहारः, प्रीत्यर्थं दीयमानं सत्कादिद्रव्यमिति यावत्, कृतं, सम्पादितं मां दृष्ट्वा स्मितमेव उपहारो दत्त इत्यर्थः; तथा द्यूते—द्यूतक्रीडायां, स्तनोपपीड़ं—स्तनौ स्तनयोर्वा उपपीड्य यथा तथा इत्यर्थः, आश्लेषः,—आलिङ्गनं, पणः,—पराजये एतद्वात्मन्यनिच्छतोऽन्यस्मिन्नात्मार्थः, कृतः। अत्र "कृतः" इति पाठो न रमणीयः, कवितपदत्वदोषप्रसङ्गात्। अयञ्च वाक्यगतः समासगत इति पुनर्द्विधा भिद्यते; क्रमेणोदाहरणे—"अपारे संसारे विषमविषयाम्भस्यरचौ मम भ्रान्तं भ्रान्तं विगलितविरामं जलमनेः। परिश्रान्तस्यार्य तरलितनयालोकनिलयः सलीलात् सम्पादं दरिमवतमालम्बितवपुः॥" "सहर्षैर्यासुप्तस्य भ्रान्तं भ्रान्तं मयः सुधाम। अभिमन्युसुतो राजा परां मुदमयासयान्॥" पूर्वत्रापारस्य संसारारण्यसरलितारोपस्य सलीलत्वमिति एतस्य वाक्यगतत्वं, परत्र पुनर्मयः सुधारोपः समासगतः इत्यस्य समासगतत्वम्।

करण्येन प्रयोगः, द्वितीये सामानाधिकरण्येन। रूपके "मुखचन्द्रं पश्यामि" इत्यादौ आरोप्यमाणचन्द्रादेरुपरञ्जकतामात्रं, न तु प्रकृते दर्शनादावुपयोगः, इह तु उपायनादेर्विषयेण तादात्म्यं प्रकृते च नायकसम्भावनादावुपयोगः; अत एव रूपके आरोप्यस्यावच्छेदकत्वमात्रेणान्वयः, अत्र तु तादात्म्येन। "दासे कृतागसि—" इत्यादौ रूपकमेव, न तु परिणामः, आरोप्यमाणकण्टकस्य पादभेदनकार्य्यस्याप्रस्तुतत्वात्; न खलु तत् कस्यचिदपि प्रस्तुतकार्य्यस्य घटनार्थमनुसन्धीयते (ढ)।

(ढ) आरोप्यमाणयोः प्रकृतोपयोगित्वेन प्रसिद्धिं विषयतादात्म्यारोपञ्चोपपादयति, अन्यत्रेति।—सम्भावनान्तरद्यूतान्तरयोरित्यर्थः, उपयुज्येते—हेतू भवतः। अत्र त्विति—प्रस्तुतयोस्त्वित्यर्थः, स्मिताश्लेषरूपतया—स्मिताश्लेषतादात्म्येन, उपयुज्येते इत्यन्वयः, उपयोगित्वेन प्रतीयेते इति तदर्थः। प्रथमार्द्धे इति।—वैयधिकरण्येन—भिन्नविभक्तिकत्वेन। रूपकादस्य भेदमुपपादयति—रूपके इति। आरोप्यमाणेति।—आरोप्यमाणस्य—उपमानस्य, चन्द्रादेरुपरञ्जकतामात्रम्—उपलक्षणत्वमेव उपमेयस्य शोभाऽऽविष्कारकत्वमात्रमिति बोध्यं, यथा "आह्लादकं चन्द्रं पश्यामि" इत्यादौ आह्लादकधर्मत्वस्य दर्शनानुपयोगित्वेनोपलक्षणत्वं, तथेहापीति निष्कृष्टोऽर्थः। न त्विति।—प्रकृते—प्रस्तुते, उपयोगः,—उपकारित्वं, चन्द्रस्य दर्शनयोग्यत्वेऽपि यथा आह्लादादिसाधनत्वेन प्रसिद्धिः, न तथा दर्शनसाधनत्वेनेति भावः। इह तु इति।—विषयेण—स्मितेन, तादात्म्यम्—अभेदः। प्रकृते चेति चकारस्य उपयोगश्चेत्यनेनान्वयः, प्रकृते—प्रस्तुते, नायकसम्भावनादौ—नायकसंवर्द्धनकर्मणि, उपयोगः,—उपकारित्वम्। ननु "मुखचन्द्रः प्रकाशते" इत्यादौ चन्द्रादेरारोप्यमाणस्य प्रकाशसाधनत्वेन प्रसिद्धिरस्तीति परिणामप्रसङ्गः? इत्यत आह, अत एवेति।—परिणामलक्षणे "विषयात्मतया" इत्यस्य निवेशादित्यर्थः। आरोप्यस्य—उपमानस्य, अवच्छेदकत्वमात्रेण—विशेषकत्वमात्रेण, विषयव्यावर्त्तकत्वमात्रेण न तु विषयतादात्म्येन इत्यर्थः। अत्र तु—परिणामे तु, तादात्म्येन—अभिन्नतयेत्यर्थः। ननु "दासे कृतागसि" इत्यादौ पादभेदनरूपकार्य्यसाधनत्वेन प्रसिद्धस्य कण्टकस्य पुलकाङ्कुरत्वेनारोपः इति परिणाम एवेत्यत आह—दासे इति। अप्रस्तुतत्वादिति।—

अयमपि (ण) रूपकवदधिकारूढवैशिष्ट्यो दृश्यते। यथा—

"वनेचराणां वनितासखानां दरीगृहोत्सङ्गनिषक्तभासः।
भवन्ति यत्रौषधयो रजन्यामतैलपूराः सुरतप्रदीपाः॥" (त)

अत्र प्रदीपानामोषध्यात्मतया प्रकृते सुरतोपयोगिनि अन्धकारनाशे उपयोगोऽतैलपूरत्वेनाधिकारूढवैशिष्ट्यम्।

सन्देहः प्रकृतेऽन्यस्य संशयः प्रतिभोत्थितः।
शुद्धो निश्चयगर्भोऽसौ निश्चयान्त इति त्रिधा॥७०१॥(थ)

मानभङ्गस्येव तव प्रस्तुतत्वादिति भावः। ननु प्रस्तुतघटवत्तापि प्रस्तुतत्वनिश्चयः पादभेदनमपि प्रस्तुतम्? अत आह, न खल्विति।—तत्पादभेदनं घटनार्थमपि इत्यपेरन्वयः, उपपादनार्थमपीति तदर्थः। प्रस्तुतवार्थ्यस्येति।—अत्र नायिकाया अनुनयनमेव प्रस्तुतं, पुनस्तत्र घटवदोपस्य न खलु तदुपयोगित्वमिति भावः। अनुसन्धीयते—प्रतीयते इत्यर्थः।

(ङ) अधिकारूढवैशिष्ट्यं परिणामाह, अयमपीति।—परिणामोऽपीत्यर्थः।

(त) वनेचराणामिति।—यत्र—हिमादौ, रजन्यां—रात्रौ, दर्यः,—कन्दराः एव, गृहाणि तेषाम् उत्सङ्गेषु—अभ्यन्तरेषु, निषक्ताः,—पतिताः, भासः,—प्रभाः यासां ताः, ओषधयः,—लताविशेषाः, वनितासखानां—स्त्रीभ्यांयां, वनेचराणां—वनवासिनाम्, अतैलपूराः,—नास्ति तैलस्य पूरः,—पूरणं येषु तथाविधाः, तैलरहिता इत्यर्थः, सुरतप्रदीपाः,—मैथुनोपयोगिप्रदीपविशेषा इत्यर्थः, भवन्ति। उपेन्द्रवज्रा वृत्तम्। कुमारसम्भवस्थेदं पद्यम्।

(थ) सन्देहादलङ्कारान्, सन्देह इति।—प्रकृते—प्रस्तुते, उपमेये इत्यर्थः, प्रतिभोत्थितः,—प्रतिभया—कविप्रौढोक्त्या, उत्थितः,—विद्धः, न तु वस्तुस्वभावसिद्धः इति भावः, अन्यस्य—उपमानस्य, संशयः,—सन्देहः, सन्देहः,—तदाख्यालङ्कार इत्यर्थः। "सशब्देहस्तु भेदोक्तौ तदनुक्तौ च संशयः" इति काव्यप्रकाशदर्शनात्, "अनन्वयसन्देहौ उपमास्वेव दर्शितौ" इति दण्डिदर्शनाच्च अत्र सशब्देह इति संज्ञानार्थं, सन्देह इति संज्ञा तु—"उपमानोपमेयसंशयः सन्देहः" इति वामनदर्शनादवगम्यते। केचित्तु काव्यप्रकाशकारिकामेवं व्याकुर्वन्ति—"भेदोक्तौ तु सशब्देहो भेदानुक्तौ तु संशयः" इत्यलङ्कारद्वयमेतदिति वदन्ति, तच्च; तथार्थकत्वे विशेषं दुर्लभं स्यात्। उपमानोपमेययोर्भेदोक्तौ सशब्देहः, तदनुक्तौ त्वयं संशयः इत्यर्थो यदि क्रियते, तदा

यत्र संशय एव पर्य्यवसानं स मुग्धः। यथा—

"किं तारुण्यतरोरियं रसभरोद्भिन्ना नवा वल्लरी ?
वेलाप्रोच्छलितस्य किं लहरिका लावण्यवारां निधेः ?।
उद्गाढोत्कलिकावतां स्वसमयोपन्यासविभ्रम्भिणः
किं साक्षादुपदेशयष्टिरथवा देवस्य मुग्धारिणः ?" ॥ (ङ)

यत्र आदावन्ते च संशय एव, मध्ये च निश्चयः, स निश्चयमध्यः। (च) यथा—

प्रथमस्य व्यतिरेके, द्वितीयस्य दृष्टान्तादौ व्यतिप्रसङ्गः स्यात्; संशयावद्धारस्य पृथङ्निर्णयाद्धानाच्च। "भेदौक्तौ तदनुक्तौ च संशयः, स तु सन्देहः" इति काव्यप्रकाशादिग्रन्थलक्षणस्य सन्दंशन्याय तथा लक्षणं ज्ञातवान् इति सङ्क्षेपः। यथा—सन्देहः, मुहः,—मोहवान्, निश्चयाविनिश्चः इति यावत्, संशयपर्य्यवसायीत्यर्थः, निश्चयगर्भः,—निश्चयः,—सन्देहानन्तरः, गर्भे—मध्ये यस्य तथाविधः, मध्ये ज्ञातनिश्चय इत्यर्थः, निश्चयान्तः,—सन्देहानन्तरं ज्ञातावधारणेत्यर्थः, इति त्रिधा—त्रिविधः, मन्तव्य इति शेषः।

(ङ) मुग्धमुदाहरति, किमिति।—नायिकादर्शने नायिकागतं वितर्कोद्भिन्नत्वम्। इयं—पुरतः परिदृश्यमाना काऽपीत्यर्थः, तारुण्यतरोः,—यौवनद्रुमस्य, रसभरेण—रसातिरेकेण, उद्भिन्ना—निःसृता, नवा वल्लरी—लतरी, किम् ? वेलायाः —तटेषु, प्रोच्छलितस्य—स्फीतोल्लसितस्य, लावण्यवारां निधेः,—लावण्यसागरस्य, लहरिका—तरङ्गः, किम् ? अथवा उद्गाढा—बलवत्कटा, या उत्कलिका—उत्कण्ठा, नानाविधविधौ उत्सुकता इत्यर्थः, ("उत्कण्ठोत्कलिके समे" इत्यमरः) तद्वताम्, अत्यन्तोत्कण्ठाशालिनां नानिनामिति यावत्, स्वसमयस्य—निजसिद्धान्तस्य, आचारस्य वा, ("समयाः शपथाचार-कालसिद्धान्तसंविदः" इत्यमरः) उपन्यासे—स्थापने, विभ्रम्भिणः,—प्रत्ययिनः, ("विभ्रम्भः केलिविश्वासे प्रत्ययेऽपि च" इति मेदिनीकरः) मुग्धारिणः देवस्य—मदनस्येत्यर्थः, साक्षात्—मूर्त्तिमतीत्यर्थः, उपदेशयष्टिः,—"रे! एवमेवं कुरुत" इति उक्ता मनसश्चित्तस्थिरीकरणाय निर्मादण्डः, किम् ? वस्तुवैचित्र्यं पद्यम्। आर्यूषविकीर्डितं छन्दः। यद्वा वा—"ब्रह्मा: सर्गविधौ प्रजापतिरभूच्छम्भो तु कामिन्दः ? मुग्धारेश्चरितं स्वयं तु मदनः ? नासौ तु पुष्पाकरः ?। वेदाभ्यासजडः कथं तु विषयव्यावृत्तकौतूहली निर्मातुं प्रभवेत् जगोऽरनिदं रूपं पुराणो मुनिः ?" ॥ इति।

(च) निश्चयगर्भं इत्यत्र गर्भपदस्य मध्यावस्थानिमित्तत्वेन व्याख्यातेति—यत्रेति।

"अयं मार्त्तण्डः किम् ? स खलु तुरगैः सप्तभिरितः
कृशानुः किम् ? सर्वाः प्रसरति दिशो नैष नियतम् ।
कृतान्तः किं साक्षात् ? महिषवहनोऽसाविति चिरं
समालोक्याजौ त्वां विदधति विकल्पान् प्रतिभटाः ॥" (न)

अत्र मध्ये मार्त्तण्डाद्यभावनिश्चयः राजनिश्चये द्वितीयसंशयोत्थानासम्भवात् । (प)

यत्रादौ संशयः अन्ते च निश्चयः, स निश्चयान्तः । यथा—

"किं तावत् सरसि सरोजमेतदारात् ?
आहोस्विन्मुखमवभासते तरुण्याः ? ।
संशय्य क्षणमिति निश्चिकाय कश्चित्
बिब्बोकैर्वकसहवासिनां परोक्षैः ॥" (फ)

(न) निश्चयमध्यमुदाहरति, अयमिति ।—राजस्तुतिरियम् । अयं मार्त्तण्डः,—सूर्य्यः, किम् ? व्यावर्त्तकधर्ममाह, स खल्विति ।—सः,—मार्त्तण्डः, सप्तभिः तुरगैः,—अश्वैः, इतः,—गतः, खलु, तस्य सप्ताश्ववाहनत्वादिति भावः, तस्मान्नायं सूर्य्य इति निश्चयः ; कृशानुः,—अग्निः, किम् ? एषः,—अग्निः, नियतं—निश्चितं, सर्वाः दिशः न प्रसरति, तस्य वायुभिमुखदिङ्मात्रप्रसारित्वात्, ऊर्द्ध्वप्रसरस्य प्रसिद्धत्वादेति भावः, अयन्तु सर्वदिक्प्रसारी, तस्मान्नायम् अग्निरिति निश्चयः ; ["सर्वाः" इत्यादि कृशानुव्यावर्त्तको धर्मः इति ज्ञेयम्] साक्षात्—स्वयं, कृतान्तः,—यमः, किम् ? असौ—यमः, महिषवहनः, तस्मान्नायं कृतान्त इति निश्चयः ; [अत्र महिषवाहनत्वाभावः कृतान्तव्यावर्त्तको धर्मः इति बोध्यम्] त्वाम् आजौ—युद्धे, समालोक्य—दृष्ट्वा, प्रतिभटाः,—प्रतियोद्धारः, चिरं—दीर्घकालं, ["चिरम्" इत्यत्र "पुनः" इति पाठे—असौ पुनः,—कृतान्तस्तु इत्यन्वयो बोध्यः] इति—इत्थं, विकल्पान्—वितर्कान्, विदधति—कुर्वन्ति । शिखरिणी वृत्तम् ।

(प) अत्रेति ।—मार्त्तण्डाद्यभावनिश्चयः,—मार्त्तण्डादिभेदानुमानं, न तु राजनिश्चय इति शेषः । अत्र हेतुमाह, राजेति ।—द्वितीयसंशयोत्थानासम्भवात्—द्वितीयसंशयानुत्थानप्रसङ्गात् इत्यर्थः ।

(फ) निश्चयान्तमुदाहरति, किमिति ।—आरात्—समीपे, पुरोवर्त्तिनीत्यर्थः, सरसि—सरोवरे, एतत्—दृश्यमानं, तावत्—(वाक्यालङ्कारे) सरोजं—पद्मं, किम् ?

अप्रतिभोत्थापिते तु "स्थाणुर्वा पुरुषो वा" इत्यादिसंशये नायमलङ्कारः। (ब)

"मध्यं तव सरोजाक्षि! पयोधरभरार्दितम्।
अस्ति नास्तीति सन्देहः कस्य चित्ते न भासते?" ॥ (भ)

अत्रातिशयोक्तिरेव, उपमेये उपमानसंशयस्यैवैतदलङ्कारविषयत्वात्। (म)

साम्यादतस्मिंस्तद्बुद्धिर्भ्रान्तिमान् प्रतिभोत्थिता ॥७०२॥(य)

आहोस्वित्—अथवा, तरुण्याः,—युवत्याः, मुखम् अवभासते?—स्फुरति? कश्चित्—जनः, इति—इत्थं, क्षणं—कियत्कालं, संशय्य—सन्दिह्य, सञ्चिन्त्य इति यावत्, बकसहवासिनां—बकसहचराणां, पद्मानामित्यर्थः, [बिब्बोकानभिज्ञत्वातिशयज्ञापनाय पद्मानां बकसहवासित्वेनोपन्यास इति बोध्यम्] परोक्षैः,—अगोचरैः, अपरिचेयैः इत्यर्थः, बिब्बोकैः,—निरुक्तसूचकैः विलासविशेषैः, निश्चिकाय, मुखमिति शेषः, ईदृक् विलासः कुतः पद्मेषु? तस्मात् तरुणीमुखमेवैतत् इति स्थिरीचकारेत्यर्थः। प्रहर्षिणी वृत्तम्। शिशुपालवधस्येदं पद्यम्।

(ब) प्रतिभोत्थित इत्यस्य व्यावृत्तिमाह, अप्रतिभेति।—अत्रोच्चैस्तरत्वादिना सादृश्यमस्त्येव।

(भ) प्रकृतेऽन्यस्य इत्यस्य व्यावृत्तिमाह, मध्यमिति।—हे सरोजाक्षि!—कमललोचने! पयोधरयोः,—स्तनयोः, भरेण—भारेण, गौरवेण इत्यर्थः, पीननिबिडस्तनेन इति भावः, अर्दितं—पीडितम्, अदर्शनं प्राप्तमित्यर्थः, तव मध्यं—मध्यावयवः, क्षीणमुदरमिति भावः, अस्ति—वर्त्तते, नास्ति—न विद्यते वा, इति सन्देहः,—संशयः, कस्य चित्ते—मनसि, न भासते?—न स्फुरति? नोदेतीत्यर्थः; निबिडोन्नतस्तनाभ्यां क्षीणोदरस्य आवरणेन पीडनमिति भावः।

(म) अत्रेति।—अत्रातिशयोक्तिरेवालङ्कारः, न तु सन्देहः। अत्र हेतुमाह, उपमेये इति।—एतदलङ्कारविषयत्वात्—सन्देहालङ्कारस्वरूपत्वात् इत्यर्थः।

(य) भ्रान्तिमदलङ्कारमाह, साम्यादिति।—("अतस्मिंस्तद्बुद्धिः" इत्यत्र तत्पदद्वयमप्राकरणिकपरम्) साम्यात्—सादृश्यात्, अतस्मिन्—अतथाभूते वस्तुनि, प्रतिभोत्थिता—कविप्रौढोक्तिसिद्धा, तद्बुद्धिः,—तद्वस्तुबोधः, भ्रान्तिमान्। ननु रूपके उपमानोपमेयनिगरणरूपायामतिशयोक्तौ चातिप्रसङ्गः? इति चेत्, न; तयो-

यथा—

"मुग्धा दुग्धधिया गवां विदधते कुम्भानधो वल्लवाः
कर्णे कैरवशङ्कया कुवलयं कुर्वन्ति कान्ता अपि।
कर्कन्धूफलमुच्चिनोति शबरी मुक्ताफलाकाङ्क्षया
सान्द्रा चन्द्रमसो न कस्य कुरुते चित्तभ्रमं चन्द्रिका ?" ॥ (र)

अस्वरसोत्थापिता भ्रान्तिर्नायमलङ्कारः। यथा—"शुक्तिकायां रजतम्" इति। न च (ल) असादृश्यमूला। यथा—

राहार्य्यरूपत्वात्, भ्रमस्य चाहार्य्यभिन्नत्वात्; भ्रमप्रमाभिन्नं तृतीयप्रकारकं ज्ञानमाहार्य्यम् इति तन्निद्धान्तः। अयं भावः,—सादृश्यात् अन्यस्मिन् अन्यबुद्धिर्भ्रान्तिः, सा च प्रशस्ता अस्मिन्नस्तीति भ्रान्तिमान् इत्यन्वर्थेयं संज्ञा। भ्रान्तेः प्रशस्तत्वं च सति चमत्कारकारणभूतत्वे एव, अत एव "प्रतिभोत्थिता" इत्युक्तम्, अन्यथा अलङ्कारत्वमेव नास्य वक्तुं शक्येत, "पशुरयम्" "स्थाणुरयम्," "भूतेन तेन परिपीडित एष आत्मा" इत्यादावपि तत्त्वापत्तेः। भ्रान्तिमात्रमिहालङ्कारः, भ्रान्तिमान् इत्यौपचारिको निर्देशः, यथोक्तं—"प्रमात्रन्तरधीर्भ्रान्तिरूपा यस्मिन्ननूद्यते। स भ्रान्तिमानिति ख्यातोऽलङ्कारे त्वौपचारिकः॥" इति।

(र) उदाहरति, मुग्धेति।—चन्द्रोदयवर्णनमिदम्। सान्द्रा—घना, निरन्तरा इत्यर्थः, प्रवाहरूपेण वर्षन्तीति भावः, यद्वा—सान्द्रा—स्निग्धा, मनोज्ञा वा, चन्द्रमसः,—चन्द्रस्य, चन्द्रिका—किरणः, कस्य—जनस्य, चित्तभ्रमं—मनसो भ्रान्तिं, न कुरुते ? अपि तु सर्वस्यैवेति भावः; तथा हि, मुग्धाः,—अनभिज्ञाः, वल्लवाः,—गोपाः, दुग्धधिया—दुग्धक्षरणबोधेन, गवाम् अधः,—स्तनतले इत्यर्थः, कुम्भान्—दोहनपात्राणि, विदधते—स्थापयन्ति, कान्ताः,—कामिन्यः अपि, कैरवशङ्कया—श्वेतोत्पलबोधेन, कर्णे कुवलयं,—नीलोत्पलं, कुर्वन्ति—धारयन्ति, तथा शबरी—व्याधपत्नी, मुक्ताफलाकाङ्क्षया—मौक्तिकप्राप्त्यभिलाषेण, कर्कन्धूफलं—बदरफलम्, उच्चिनोति—सञ्चिनोति। अत्र सान्द्रचन्द्रिकाप्रभावेण अवास्तवदुग्धादिषु तद्बुद्धिः कविप्रौढोक्तिसिद्धो भ्रमः साम्यातिशयव्यञ्जकः। तद्धनिसत्त्वे पुनः अलङ्कारत्वेनोपादानं वैचित्र्यविशेषस्यानुभवसिद्धत्वात्। शार्दूलविक्रीडितं वृत्तम्।

(ल) अस्वरसेति।—अस्वरसोत्थापिता—वस्तुस्वभावजनिता। अयं—भ्रान्तिमान्। शुक्तौ चाकचक्यविशेष एव रजतसाधर्म्यम्। साम्यादित्यस्य व्यावृत्तिमाह, न चेति।—भ्रान्तिनामायमलङ्कारः इत्यनुषज्यते।

"सङ्गमविरहविकल्पे वरमिह विरहो न सङ्गमस्तस्याः।
सङ्गे सैव तथैका त्रिभुवनमपि तन्मयं विरहे।" (व)

क्वचित् भेदाद्ग्रहीतॄणां विषयाणां तथा क्वचित्।
एकस्यानेकधोल्लेखो यः स उल्लेख उच्यते ॥७०३॥(श)

क्रमेणोदाहरणम्—

"प्रिय इति गोपवधूभिः प्रिय इति वृष्णिप्रवीर इति देवैः।
नारायण इति भक्तैर्ब्रह्मेत्यादि योगिभिर्देवः॥" (ष)

अत्रैकस्यापि भगवतस्तत्तद्गुणयोगादनेकधोल्लेखे गोपवधूप्रभृतीनां कर्त्रादयो यथायोगं प्रयोजकाः। (स) यदाहुः,—

(व) सङ्गमेति।—तस्याः,—कान्तायाः इत्यर्थः, सङ्गमविरहयोः,—मेलनविच्छेदयोः, विकल्पे—एकतरस्य वरत्वनिर्धारणे, इह—अस्मिन् जगति, विरहः,—वियोगः, वरं—श्रेष्ठम्, अभीप्सितमित्यर्थः, न पुनः सङ्गमः, वरमिति शेषः। कुत इत्याकाङ्क्षायामाह, सङ्गे इति।—सङ्गे—सङ्गमे जाते, सा—मनोरमा, एका एव तथा—उपलभ्यमानात्मा इत्यर्थः, विरहे त्रिभुवनम् अपि तन्मयं—कान्तात्मकमित्यर्थः। अत्र सङ्गमविरहयोः सादृश्यं नास्तीति बोध्यम्, अतोऽत्र नायमलङ्कारः। सङ्गमो विरह एव, किन्तु सङ्गमे नैव तथाऽसौ प्रतीयते, यथा विरहे इति व्यतिरेकी व्यज्यते, विषयो वा अर्थः। इयं भावनाऽतिप्रयत्नजा भाति: कविप्रौढोक्तिसिद्धाऽपि न साम्यपक्षमूढा।

(श) उल्लेखालङ्कारमाह, क्वचिदिति।—क्वचित् ग्रहीतॄणां—बोधकानां, भेदात्—भिन्नत्वात्, क्वचित् वा विषयाणां—व्यवच्छेदकधर्माणां, ऐक्यव्यवच्छेदकादीनाम् इत्यर्थः, तथा—भेदादित्यर्थः, एकस्य, वस्तुनः इति शेषः, अनेकधा—बहुधा, विविधप्रकारेणेत्यर्थः, यः उल्लेखः,—कीर्त्तनं, स उल्लेख उच्यते।

(ष) ग्रहीतृभेदकोदाहरणमाह, प्रिय इति।—देवैः,—औजसः, गोपवधूभिः प्रियः,—प्रेमास्पदम् इति, वृष्णेः,—नन्दादिभिः, प्रियः,—बालः, स्नेहपात्रमित्यर्थः, इति, देवैः,—इन्द्रादिभिः, वृष्णीयः,—प्रभुः, पालक इत्यर्थः, इति, भक्तैः,—ध्रुवप्रह्लादादिभिः, अक्रूरादिभिर्वा, नारायणः,—विष्णुः इति, योगिभिः,—सनकादिभिः, ब्रह्म—चिद्रूपम् इति, यदाहि—गृहीतः, गृहीत इति यावत्।

(स) तत्रैकस्यानेकधोल्लेखे किं प्रयोजकम्? कर्त्रेषां ग्रहीतॄणां वा

"यथारुचि यथाऽर्थित्वं यथाव्युत्पत्ति भिद्यते।
आभासोऽप्यर्थ एकस्मिन्ननुसन्धानसाधितः॥" (ह)

अत्र भगवतः प्रियत्वादीनां वास्तवत्वात् ग्रहीतृभेदाच्च न मालारूपकं, न च भ्रान्तिमान्, न च अयमभेदे भेद इत्येवंरूपा अतिशयोक्तिः। तत्र हि "अन्यदेवाङ्गलावण्यम्—"इत्यादौ लावण्यादेर्विषयस्य पृथक्त्वेनाध्यवसानम्। न चेह भगवति गोपवधूप्रभृतिभिः प्रियत्वाद्यध्यवसीयते, प्रियत्वादेर्भगवति तत्काले तात्त्विकत्वात्। (क) केचिदाहुः,—"अयमलङ्कारो नियमेनालङ्कारान्तराविच्छित्तिमूलः, उक्तोदाहरणे च शिशु-

---

किमिति एकरूपेण स्फुरणं न भवति? इत्यत आह, अत्रेति।—तत्तद्गुणयोगात्—प्रियत्वादितत्तत्प्रकारसम्बन्धात्। रुच्यादयः,—अनुरागादयः,(अत्रादिपदेन वक्ष्यमाणकारिकोक्तार्थित्वव्युत्पत्त्योर्ग्रहणम्) यथायोगं—यथासम्भवं, प्रयोजकाः,—कारणानि। भगवति यावद्गुणसत्त्वेऽपि रुच्यादिभेदेन विविधप्रकारेणैव स्फुरणं, न त्वेकरूपेण, रुच्यादीनामन्यतमस्य कारणस्य सर्वत्राभावात् इति भावः।

(ह) यथारुचीति।—यथारुचि—यथाऽभिलाषं, यथाऽर्थित्वं—यथाप्रयोजनापेक्षित्वं, यथाव्युत्पत्ति—यथाज्ञानम्, अथवा—व्युत्पत्तिर्भावनारुच्यादीनामनतिक्रमेणेत्यर्थः, एकस्मिन् अर्थे—विषये, वस्तुनीत्यर्थः, अनुसन्धानेन—भावनया, साधितः,—जनितः, विविधविशेषणज्ञानजनित इति यावत्, आभासः,—ज्ञानम् अपि, भिद्यते—पृथक् भवति, भिन्नत्वेनोपपद्यते इत्यर्थः। एकविषये व्यक्तिभेदेन विभिन्नप्रकारकज्ञानोत्पत्तौ तत्तद्विशेषणज्ञानसहकृतं रुच्यादिकं कारणमिति भावः।

(क) अत्रेति।—वास्तवत्वात्—तात्त्विकत्वात्, अनारोपितत्वादित्यर्थः। ग्रहीतृभेदाच्चेति—एवञ्च "पिता प्रजानां शमनो रिपूणां वनीपकानाममरद्रुमश्च। कविः कवीनां सुहृदां सुधांशुः सतां गुरुर्भूमिपतिः प्रतीतः॥" इत्यादौ पितृत्वादीनां प्रकाराणामवास्तवत्वेऽपि ग्रहीतृभेदादेव इत्यर्थः। न मालारूपकमिति, रूपके आरोपस्य अवास्तवत्वादिति भावः। न च भ्रान्तिमानिति, अत्र प्रियत्वादीनां वास्तवत्वादिति हेतुर्बोध्यः, एवञ्चात्र सादृश्यजनितभ्रमाभावात् न भ्रान्तिमान् इति भावः। अयम्—उक्तोल्लेखः। अध्यवसीयते—आरोप्यते, वास्तवत्वादिति भावः। तात्त्विकत्वात्—विद्यमानत्वादित्यर्थः।

त्वादीनां नियमाभिप्रायात् प्रियत्वादेर्भिन्नत्वाध्यवसायः" इत्यतिशयोक्तिरस्ति ; तत्सद्भावेऽपि च गृहीतभेदेन नानात्वप्रतीतिरूपो विच्छित्तिविशेष उल्लेखाख्यभिन्नालङ्कारप्रयोजकः। श्रीकण्ठजनपदवर्णने "वज्रपञ्जरमिति शरणागतैः, अम्बरविवरमिति (ख) वातिकैः" इत्यादिषातिशयोक्तेर्विच्छित्तिविशेषो विषयः। इह च रूपकालङ्कारयोगः। वस्तुतस्तु "अम्बरविवरम्" इत्यादौ भ्रान्तिमन्तमेवेच्छन्ति, न रूपकं, भेदप्रतीतिपुरःसरस्यैवारोपस्य गौणीमूलरूपकादिप्रयोजकत्वात्। (ग) यदाहुः शारीरकमीमांसाभाष्यव्याख्याने श्रीमदाचस्पतिमिश्राः,—"अपि च परशब्दः परत्र लक्ष्यमाणगुणयोगेन वर्त्तते इति। यत्र प्रयोक्तृसम्प्रतिपत्तोः सम्प्रतिपत्तिः स गौणः, स च भेदप्रत्ययपुरःसरः" इति। इह तु वातिकानां श्रीकण्ठजनपदवर्णने भ्रान्तिश्रुत

(ख) केचिदिति।—अयम्—उल्लेखः, नियमेन—अवश्यभावेन, अलङ्कारान्तरस्य—अन्यस्य अलङ्कारस्य, विच्छित्तिः,—वैचित्र्यं, मूलं यस्य तथोक्तः, अलङ्कारान्तरेणोत्थापित इत्यर्थः, अथवा—अलङ्कारान्तरं विच्छित्तेर्मूलं यस्य सः, अलङ्कारान्तरबलेन एवायं विच्छित्तिविशेषं जनयतीति भावः। प्रियत्वादीनामिति।—प्रियत्वादेर्धर्मस्य प्रियत्वादीनां नियमाभिप्रायात्—व्यवच्छेदे तात्पर्यात्, अयमर्थः प्रिय एव, नार्थं प्रियरिति व्यवच्छेदाभिप्रायत्वादित्यर्थः, भिन्नत्वाध्यवसायः,—प्रियत्वादिभेदप्रत्ययः, इति अभेदे भेदारोप इत्यर्थः। नन्वतिशयोक्तिरेव वैचित्र्यप्रयोजिका चास्तां, किमुल्लेखालङ्कारत्वाङ्गीकारेण? इत्यत आह,तत्सद्भावेऽपीति।—तत्सद्भावे—अतिशयोक्तिसद्भावे। गृहीतभेदेनेति।—एकस्मिन्नीश्वरे गोपवधूप्रभृतीनां कृष्णादिभेदेन प्रियत्वादिप्रतीतेः अतिशयोक्त्यलङ्कारः तन्मूलकः इति भावः। नानात्वप्रतीतिरूपः,—विभिन्नज्ञानरूपः, विच्छित्तिविशेषः,—वैचित्र्यातिशयः, सम्भवानां नानात्वप्रत्यय एव विच्छित्तिविशेष इति भावः। श्रीकण्ठेति।—श्रीकण्ठचरिते श्रीकण्ठाख्यः जनपदः तद्वर्णनप्रसङ्गे इत्यर्थः। अम्बरविवरम्—आकाशावकाशः।

(ग) रूपकस्य भेदप्रतीतिपुरःसरत्वे हेतुमाह, गौणीमूलेति।—गौणी—लाक्षणिकचर्या, मूलमस्येत्यर्थः, रूपकादिप्रयोजकत्वादिति—रूपकादिरूपत्वादिति तात्पर्यम्।

एव अक्षरविवराद्यारोप इति। अत्रैव च "तपोवनमिति मुनिभिः, कामायतनमिति वेश्याभिः, सङ्गीतशालेति लासकैः" इत्यादौ च परिणामालङ्कारयोगः। (घ)

"गाम्भीर्येण समुद्रोऽसि गौरवेणासि पर्वतः।"

इत्यादौ च अनेकधोल्लेखे गाम्भीर्यादिविषयभेदः प्रयोजकः, (ङ) अत्र च रूपकयोगः। "गुरुर्वचसि पृथुरुरसि, अर्जुनो यशसि" इत्यादि च अस्य रूपकात् विविक्तो विषय इति। अत्र हि श्लेषमूलातिशयोक्तियोगः। (च)

(घ) गौणा सत्त्वाद्या भेदप्रतीतिपुरःसरत्वे प्राचीनसंवादमाह—यदाहुरिति। अपि चेति।—परशब्दः,—अन्यशब्दः, उपमानाभिधायक इत्यर्थः, परत्व—अन्यत्व, उपमेये इत्याशयः, लक्ष्यमाणगुणयोगेन—प्रतीयमानसाधारणधर्मसम्बन्धेन, वर्णते, यथा—"मुखचन्द्रं मनोहरं पश्यति" इत्यत्र मुखे यच्चन्द्रत्वारोपः, स लक्ष्यमाणेन मनोहरत्वरूपेण गुणेन योगादित्याशयः। यत्र—यस्मिन् आरोपे सति, प्रथीकृतसम्प्रतिपत्तयोः,—वक्तृबोद्धव्ययोः, सम्प्रतिपत्तिः,—सम्यक्ज्ञानं, प्रमात्मकसादृश्यज्ञानमित्यर्थः, सः गौणः,—शब्दव्यापार इत्यर्थः, स च—वक्तृतात्पर्यज्ञानविशेषरूपशब्दव्यापारश्च। प्रकृते रूपकवैधर्म्ये दर्शयति, इह त्विति।—भ्रान्तिमतः,—विशेषदर्शनजन्यः। अत्रैव—गौणसत्त्वजनपदवर्णने एव। परिणामालङ्कारयोग इति।—आरोप्यमाणानां तपोवनकामायतनसङ्गीतशालानां तपःकामसङ्गीतरूपप्रकृतप्रयोजनोपयोगित्वात् परिणाम इति भावः।

(ङ) विषयभेदेनोल्लेखमुदाहरति, गाम्भीर्येति।—"कामदत्वात् गौणानामपि त्वं कल्पपादपः॥" इत्युत्तरार्द्धमत्र। अत्र गाम्भीर्यादिविषयभेदेन एकस्य पुंसः समुदायनेकरूपेण उल्लेखः।

(च) गुरुरिति।—वचसि गुरुः,—महान्, सुवक्तेत्यर्थः, हृदयमिति, उरसि—वक्षसि, पृथुः,—विशालः, तदाख्यो वैन्यभूपतिश्च, यशसि अर्जुनः,—धवलः, धनञ्जयश्च वार्त्तवीर्यश्च वा। अत्र एकस्य पुंसः वचनाद्यवच्छेदेन गुरुत्वादिनेकरूपेणोल्लेखः। इत्यादि च अत्र—उल्लेखस्य, विषयः रूपकात् विविक्तः,—विभिन्नः। अत्रेति।—अत्र—गुरुरित्यादौ, श्लेषमूलातिशयोक्तियोगः, तस्यैव प्राधान्यादिति भावः।

प्रकृतं प्रतिषिध्यान्य-स्थापनं स्यादपह्नुतिः ॥७०४॥(छ)

इयं द्विधा—क्वचिदपह्नवपूर्वक आरोपः, क्वचिदारोपपूर्वकोऽपह्नव इति । (ज)

क्रमेण उदाहरणम्—

"नेदं नभोमण्डलमम्बुराशि-
र्नैताश्च तारा नवफेनभङ्गाः ।
नायं शशी कुण्डलितः फणीन्द्रः
नासौ कलङ्कः शयितो मुरारिः ॥" (झ)

"एतत् विभाति चरमाचलचूड़चुम्बि
हिण्डीरपिण्डरुचि शीतमरीचिबिम्बम् ।

(छ) अपह्नुतिमाह, प्रकृतमिति ।—प्रकृतं—प्रस्तुतम्, उपमेयमित्यर्थः, प्रतिषिध्य—स्वभिन्नत्वेनारोप्य, अन्यस्य—अप्रकृतस्य, उपमानस्येत्यर्थः, स्थापनम्—आरोप इत्यर्थः, अपह्नुतिः स्यात् । अस्या एव "शुद्धापह्नुतिः" इत्यभिधानान्तरम् । तथा हि जयदेवः,—"शुद्धापह्नुतिरन्यस्यारोपार्थो धर्मनिह्नवः । नायं सुधांशुः किं तर्हि व्योमगङ्गासरोरुहम् ॥" इति । अत्र हि साक्षाद्वर्त्तमानमपि सुधांशुं सुधांशुत्वेन प्रतिषिध्य आकाशगङ्गायाः कमलपुष्पत्वेन तर्कितः ।

(ज) इयमिति ।—इयम्—अपह्नुतिः । अस्या उभयरूपत्वे विनिगमनाभाव एव प्रयोजकः इति भावः ।

(झ) अपह्नवपूर्वकारोपस्य उदाहरणमाह, नेदमिति ।—इदं नभोमण्डलम्—आकाशं, न, अम्बुराशिः,—समुद्रः ; एताश्च ताराः,—नक्षत्राणि, न, नवाः फेनभङ्गाः,—फेनच्छेदाः ; अयं शशी—चन्द्रः, न, कुण्डलितः,—मण्डलाकारेण स्थितः, फणीन्द्रः,—शेषनागः ; असौ कलङ्कः, चन्द्रस्थित इति शेषः, न, शयितः,—शयनं गतः, मुरारिः,—कृष्णः । उपजातिः वृत्तम् । अत्र प्रकृतानां नभोमण्डलादीनां प्रथमं स्वभिन्नत्वेन पश्चादम्बुराशित्वादिनाऽऽरोपः इति बोध्यम् । अत्र शुद्धापह्नुतिः । अस्या एव परस्य भ्रान्त्यपह्नुत्यर्थतायां भ्रान्त्यपह्नुतिरित्यभिधानान्तरम् । तथाऽऽहुः केशवमिश्राः,—"भ्रान्त्यपह्नुतिरन्यस्याः शङ्कातस्तन्निह्नवात्" इति । उदाहरणं यथा—"नागरिक ! समधिकोन्नतिरिह महिषः कोऽयमुभयतः पुच्छः ? । न हि न हि करिकलभोऽयं शुण्डादण्डोऽयमस्य न तु पुच्छम् ॥" इति ।

प्रज्वालितस्य रजनीं मदनानलस्य
धूमं दधत्प्रकटलाञ्छनकैतवेन ॥" (ञ)

इदं पद्यं मम। एवम्—

"विराजति व्योमवपुःपयोधिस्तारामयास्तत्र च फेनभङ्गाः।
फणीश्वरोऽयं द्विजराजमूर्त्तिः नवाम्बुदश्रीर्ननु तस्य लक्ष्म॥" (ट)

इत्याद्याकारेण च प्रकृतनिषेधो बोध्यः।

(ञ) आरोपपूर्वकापह्नवमुदाहरति, एतदिति।—चरमाचलस्य—अस्ताचलस्य, चूडं—शिखरं, चुम्बतीति तथोक्तम्, अस्ताचलचूडावलम्बीत्यर्थः, हिण्डीरपिण्डरुचि—फेनपुञ्जनिभं, ("हिण्डीरोऽब्धिकफः फेनः" इत्यमरः) एतत् शीतमरीचिबिम्बं—चन्द्रमण्डलं, प्रकटलाञ्छनकैतवेन—सुव्यक्तकलङ्कव्याजेन, (कलङ्केष्वभेदव्यञ्जकमिदं, प्रतिषिध्येत्यानन्तर्य्यमविवक्षितम् इति भावः) रजनीं व्याप्य प्रज्वालितस्य—उद्दीपितस्य, मदनानलस्य—कामाग्नेः, धूमं दधत्—धारयत्, विभाति—विराजते। अत्र लाञ्छने धूमत्वारोपः प्रकृतस्य प्रागपह्नवात् इति आरोपपूर्वत्वमपह्नवस्य इति बोध्यम्। इह कैतवेन इति सूचनपूर्वकत्वात् कैतवापह्नुतिरियमित्यन्ये। "तदोजसस्तद्यशसः स्थिताविमौ वृथेति चित्ते कुरुते यदा यदा। तनोति भानोः परिवेशकैतवात् तदा विधिः कुण्डलनां विधोरपि॥" इत्यत्र तु नायमलङ्कारः, किन्तु प्रतीपमेवेति विभाव्यम्।

(ट) विराजतीति।—व्योमवपुः,—आकाशाकारम्, आकाशसदृशमित्यर्थः, पयोधिः,—समुद्रः, विराजते—शोभते; पयोधेर्व्योमसादृश्यं दर्शयितुमाह, तारेति।—तत्र—पयोधौ, फेनभङ्गाः,—फेनखण्डानि, तारामयाः,—नक्षत्रस्वरूपाः, चन्द्रकिरणोद्भासिताः फेनभङ्गाः तारारूपा दृश्यन्ते इति भावः। ननु व्योम्नि चन्द्रो विद्यते, पयोधौ तत्सादृश्यं कुत्र? इत्याह, फणीति।—अयं—सागरवासीत्यर्थः, फणीश्वरः,—शेषनागेन्द्रः, द्विजराजमूर्त्तिः,—चन्द्रस्वरूपः, ("द्विजराजः शशधरः" इत्यमरः) फणिपतेः तुषारधवलदेहत्वात् कुण्डलितावस्थायां चन्द्रसादृश्यम्; ननु चन्द्रे लक्ष्म अस्ति, तच्चात्र कुतः? इत्यत आह, नवेति।—तस्य—द्विजराजरूपफणीश्वरस्य, लक्ष्म—लाञ्छनं, नवाम्बुदश्रीः,—नवाम्बुदस्य—नूतनजलधरस्य इव, श्रीः,—कान्तिः यस्य स तथाभूतः, श्रीकृष्ण इत्यर्थः, ननु—निश्चये, श्रीकृष्णस्य शेषोत्सङ्गशायित्वात् इति भावः।

गोपनीयं कामप्यर्थं द्योतयित्वा कथञ्चन ।
यदि श्लेषेणान्यथा वाऽन्यथयेत्साप्यपह्नुतिः॥७०५॥(ठ)

श्लेषेण यथा—

"काले वारिधराणा-
मपतितया नैव शक्यते स्थातुम् ।
उत्कण्ठितासि तरले ! ?
न हि न हि सखि ! पिच्छिलः पन्थाः ॥" (ड)

अत्र "अपतितया" इत्यत्र पतिं विनेत्युक्ता पश्चात् पतनाभावेनेत्यन्यथाकृतम् ।

अश्लेषेण यथा—

"इह पुरोऽनिलकम्पितविग्रहा
मिलति का न वनस्पतिना लता ? ।

(ठ) प्रकारान्तरेण अपह्नुतिमाह, गोपनीयमिति ।—गोपनीयं—रहस्यं, कामपि अर्थं कथञ्चन—साहस्यादिना वा इत्यर्थः, द्योतयित्वा—प्रकटय्य, यदि श्लेषेण वा अन्यथा—अश्लेषेण, श्लेषाभावेऽपि साहस्यनाशादिना इत्यर्थः, अन्यथयेत्—अन्यथा ब्रूयात्, भिन्नरूपेण ख्यापयेत् इत्यर्थः, साऽपि अपह्नुतिः । एतस्या एव छेकापह्नुतिरिति अभिधानात्सारम् ।

(ड) तत्र श्लेषमूलामपह्नुतिमुदाहरति, काले इति ।—वारिधराणां—मेघानां, काले—समये, जलवर्षणावसरे इति यावत्, वर्षाकाले इति भावः, अपतितया—पतिमुज्झतया, अत्र च उज्झितत्वयेत्यर्थः, स्थातुं नैव शक्यते । [इति सखीं प्रति कयाचिदुक्तम्]। तरले !—हे चञ्चले ! उत्कण्ठिता—पतिविरहेण उत्सुका इत्यर्थः, असि ? [इति सख्या प्रत्युक्तम्]। हे सखि ! न हि न हि—नैव नैव, [इति सखीवाक्यार्थप्रतिषेधः] पतिमुज्झतया स्थातुं नैव शक्यते इति मया गोपनीयमित्यर्थः, पन्थाः,—वर्त्म, पिच्छिलः, [इति नायिकया पुनर्गोपितं, पिच्छिलपदं खलनाभावतात्पर्येणाहृतम्]। अत्र अपतितयेति श्लिष्टम् । आर्या छन्दः । यथा वा—"पद्मे त्वच्चरणे चराचि सततं भावी भवत्कुन्तले नीले मुच्यति किं करोषि मदिरे: क्रीतोऽसि ते विधिनः । दूत्यस्त्वत्प्रहितो निशम्य 'सदया निर्भर्त्सितो राधया कृष्णस्त्वत्परमेव तद्यदधिकम् क्रीणाविदः पातु वः ॥" इति ।

अरसि किं सखि! कान्तरतोत्सवम्?
न हि घनागमरीतिरुदाहृता॥" (ढ)

वक्रोक्तौ परोक्तेरन्यथाकारः, इह तु स्वोक्तेरेवेति भेदः। गोपनेच्छता गोपनीयस्यापि प्रथममभिहितत्वाच्च व्याजोक्तेः। (थ)

अन्यन्निषिध्य प्रकृत-स्थापनं निश्चयः पुनः ॥७०६॥(त)

निश्चयाख्योऽयमलङ्कारः। अन्यदित्यारोप्यमाणम्। (थ)

यथा मम—

"वदनमिदं न सरोजं नयने नेन्दीवरे एते।
इह सविधे मुग्धदृशो मधुकर! न मुधा परिभ्राम्य॥" (द)

(ढ) अत्रेषमुत्तानपङ्क्तिमुदाहरति, इहेति।—इह—वर्षाकाले, पुरः,—अग्रतः, अनिलेन—वायुना, क्षिप्तः,—आधूतः, विगतः,—अरीरं यस्याः तादृशी, आ ईषता—व्रतति:, वनस्थलिना—लङ्गलकीरेण, (यद्यपि अपुष्पफलवति वृक्षे वनस्थलिशब्दः प्रयुज्यते, तथापि अत्र वृक्षवृक्षमावलोपलक्षणं बोध्यम्) न लिखति?—न सङ्कृष्यते? अपि तु सर्वमेवेति। [इति कयाचित् सखीं प्रति उक्तम्]। हे सखि! कान्तस्य—पत्युः, रतोत्सवं—सुरतकालिकानन्दव्यापारनिमित्तं, अरसि किम्? [इति सख्या प्रश्नितम्]। न हि—नैव, कान्तरतोत्सवं न अरासीति भावः, घनागमस्य—वर्षाकालस्य, रीतिः,—स्वभावः, उदाहृता—उक्ता। अत्र कान्तसुरतोत्सवकरणं गोपितया अन्येनैव सोपितम्। दुतविलम्बितं वृत्तम्। यथा वा—"ओल्कारं त्रिचयति प्रचयत्यधरं तनोति रोमाञ्चम्। नागरिकः किं लिखितः? न हि न हि सखि! कैतवः पवनः॥" इति।

(थ) व्याजोक्तेरिति।—भेद इत्यनेनान्वितं, व्याजोक्तौ गोपनीयस्य प्रथमं स्वयमभिधानं नास्तीति भावः।

(त) निश्चयालङ्कारमाह, अन्यदिति।—अन्यत्—अप्रकृतम्, उपमानमित्यर्थः, निषिध्य—निह्नवेनाख्याय, प्रकृतस्य—प्रस्तुतस्य, उपमेयस्येत्यर्थः, स्थापनं—तत्त्वेनावधारणं, पुनः निश्चयः।

(थ) आरोप्यमाणमिति।—आरोप्यमाणं—सादृश्यातिशयेन आरोपविषयतां नीयमानम्।

(द) अयमपि विधा—अपिशब्दारोप्यमाणनिषेधपूर्वकं प्रकृतस्थापनं, अपिच

यथा वा—

"हृदि विसलताहारो नायं भुजङ्गमनायकः
कुवलयदलश्रेणी कण्ठे न सा गरलद्युतिः।
मलयजरजो नेदं भस्म प्रियारहिते मयि
प्रहर न हरभ्रान्त्याऽनङ्ग! क्रुधा किमु धावसि?" ॥ (घ)

न चायं निश्चयान्तः सन्देहः, तत्र संशयनिश्चययोरेकाश्रयत्वेनावस्थानात्, अत्र तु भ्रमरादेः संशयः, नायकादेर्निश्चयः। किञ्च न भ्रमरादेरपि संशयः, एककोट्यनधिके ज्ञाने तथा समीपागमनासम्भवात्, तर्हि भ्रान्तिमानस्तु, अस्तु नाम भ्रमरादेर्भ्रान्तिः, न च इह तस्यास्मत्कारविधायित्वम्, अपि तु तथाविधनायकाद्युक्तेरेवेति सहृदयसंवेद्यम्। किञ्च अविवक्षितेऽपि भ्रमरादेः पतनादौ भ्रान्तौ वा नायिकाचाट्वादिरूपेणैव सम्भवति तथाविधोक्तिः। न च रूपकध्वनिरयं, मुखस्य

प्रकृतस्यापनपूर्वक आरोप्यमाणनिषेधः। तत्र द्वितीयमुदाहरति, वदनमिति।—मधुकर!—हे भ्रमर! इदं वदनम्—आननं, सरोजं—पद्मं, न, एते नयने—चक्षुषी, न इन्दीवरे—नीलोत्पले, (तस्मात्) इह—अत्र, मुग्धहृदयः,—कान्तायाः इत्यर्थः, सविधे—सन्निधौ, मुधा—निरर्थकं, मा परिश्राम्य—न परिश्रमं कुरु। अत्र सरोजादिकमप्रकृतं निषिध्य प्रकृतस्य वदनादेः स्थापनम्। आद्यो यथा—"न पद्मं मुखमेवेदं न भृङ्गौ चक्षुषी इमे"।

(घ) दृढ़प्रतिपत्त्यर्थं प्राचीनोदाहरणमाह, हृदीति।—विरहिणं उक्तिरियम्। हे अनङ्ग! हृदि—वक्षसि, अयं—परिदृश्यमान इत्यर्थः, विसलताहारः,—मृणालहारः, न भुजङ्गमनायकः,—पन्नगपतिः, वासुकिरित्यर्थः, कण्ठे (इयं) कुवलयदलानां—नीलोत्पलपत्राणां, श्रेणी, सा—प्रसिद्धा, गरलद्युतिः,—कालकूटप्रभा, न, इदम्—अङ्गे विलसितमित्यर्थः, मलयजरजः,—चन्दनचूर्णं, न भस्म, (तस्मात्) प्रियारहिते—कान्ताविरहिते, मयि हरभ्रान्त्या—शिवभ्रमेण, न प्रहर—न ताडय, क्रुधा—कोपेन, किमु—किमर्थं, धावसि?—द्रुतमागच्छसि? अत्र भुजङ्गमनायकादीनामप्रकृतानां निषेधः, प्रकृतानां विसलताहारादीनां स्थापनम्। हरिणी छन्दः, तल्लक्षणं यथोक्तं—"नसमरसला गः षड्वेदैर्हयैश्छरिणी मता" इति।

कमलत्वेन अनिर्द्धारणात् । न च अपह्नुतिः, प्रस्तुतस्य अनिषेधात् इति पृथगेवायमलङ्कारश्चिरन्तनोक्तालङ्कारेभ्यः । शुक्तिकायां रजतधिया पतति पुरुषे शुक्तिकेयं न रजतमिति कस्यचिदुक्तिर्नायमलङ्कारो वैचित्र्याभावात् । (न)

भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना ।
वाच्या प्रतीयमाना सा प्रथमं द्विविधा मता ॥
वाच्येवादिप्रयोगे स्यादप्रयोगे परा पुनः ।
जातिर्गुणः क्रिया द्रव्यं यदुत्प्रेक्ष्यं द्वयोरपि ॥

(न) न ह्ययमिति । तत्रेति ।—एकाश्रयत्वेन—एकात्मवृत्तित्वेन, तथा चात्र संशयनिश्चययोर्व्यधिकरणत्वात् नायं निश्चयान्तः सन्देहः इति भावः । ननु तत्र तयोः सामानाधिकरण्यनियमे किं मानम् ? अत आह, किं चेति ।—उभयकोटिकज्ञानं हि संशयः, यदि भ्रमरादेः तादृक् संशयः स्यात्, तदा कथं समीपागमनं सम्भवेत् ? निश्चित एव "इदं सरोजम्" इति ज्ञाने समीपागमनं सम्भवतीति भावः । एककोट्यनधिके इति ।—एककोटिमात्रावलम्बिनि, तथा समीपागमनासम्भवात्, सन्देहप्रसङ्गायोगात् इति भावः; तर्हि—एककोटिमात्रावगाहिज्ञानकनिश्चयत्वस्वीकारे, भ्रान्तिमान् अस्तु, भ्रान्तेर्निश्चयरूपत्वात् इति भावः । तथाविधनायकाद्युक्तेः [अप्रकृतं निषिध्य प्रकृतस्थापनात् उक्तिरत्र निश्चयः] एव, चमत्कारविधायित्वम् इत्यनेनान्वितम् । ननु सम्बोध्यभ्रान्तिं विना तथाविधोक्तेरसम्भव एव, तदस्य भ्रान्तिमूलकत्वं नियतम्; प्रकृतेऽपि सैव चमत्कारविधायिनी, तथाविधोक्तिस्तु भ्रमव्यञ्जिकैवेत्यत आह, किञ्चेति ।—पतनादाविति भ्रमव्यञ्जकोपादानम् । तस्य नियतत्वात् आह, भ्रान्तौ इति ।—अविवक्षितायामिति लिङ्गव्यत्ययेनान्वयः । नायिकेति ।—नायिकायाः चाट्वादिरूपेण—प्रियोक्त्या रञ्जनाभिप्रायेणैव, तथाविधा—"वदनमिदम्" इत्यादिरूपा, उक्तिः,—नायकवचनं, सम्भवति । रूपकध्वनिरिति ।—मुखस्य—मुखादेः, कमलत्वेन—कमलत्वादिना, अनिर्द्धारणात्—अनारोपात्, प्रत्युत भिन्नत्वेन निर्णयात् । तत्र मुखे कमलत्वारोपस्य निर्द्धारणम्, अत्र तु न तथा इति भावः । पृथक्—भिन्नः । रजतधिया—रजतबुद्ध्या, पतति—धावति, रजतार्थं प्रवर्त्तमाने इत्यर्थः । तथा च, वस्तुसत्त्वमेव नालङ्कारत्वप्रयोजकम्, अपि तु वैचित्र्याधायकत्वमेवेति भावः ।

तदृष्टधाऽपि प्रत्येकं भावाभावाभिमानतः।
गुणक्रियास्वरूपत्वान्निमित्तस्य पुनश्च ताः॥
द्वात्रिंशद्विधतां यान्ति ॥ ७०७ ॥ (प)

(प) उत्प्रेक्षाऽलङ्कारमाह, भवेदिति।—प्रकृतस्य—वस्तुनः, उपमेयस्येत्यर्थः, परात्मना—अप्रकृतस्वरूपेण, उपमानरूपेण इति यावत्, (तादात्म्यसम्बन्धसामान्यात्मपदोपन्यासः, प्रकारत्वं तृतीयार्थः) सम्भावना—उत्कटैककोटिकः संशय इत्यर्थः, उत्प्रेक्षा—उत्—ऊर्द्धं प्रज्ञा, प्रेक्षा—दृष्टिः प्रज्ञा वा यस्यां सा तथाविधा, भवेत्। संशयापन्नज्ञ दृष्टिः प्रायः तथाविधा भवतीति श्रेयम्। तथा च—तादात्म्यसंसर्गकोपमानप्रकारकोपमेयविशेष्यकोत्कटैककोटिकः संशय उत्प्रेक्षेत्यर्थः; सन्देहालङ्कारवारणाय उत्कटैककोटिक इति, कपक्षपालिनदतिप्रभृतीनां निश्चयरूपत्वात् संशयपदेन वारणम्, उपमानस्य क्वचित् सत्त्वे क्वचित् प्रौढ़ोक्तिसिद्धम्। आद्यं यथा—"गुणा गुणानुबन्धित्वात्" इति; अत्र प्रस्तुतपदार्थः सत्त्वमेव। द्वितीयं यथा—"ऊरुः" इत्यादि; अत्र सुरतेच्छारूपकारणं जनकजन्यविषयस्थः; अप्रविषावच्छेदकोऽप्रौढ़ोक्त्यैव सिद्धः। प्रथमं सा—उत्प्रेक्षा, वाच्या प्रतीयमाना च इति द्विविधा—द्विप्रकारा, मता—कथिता, इवादीनाम्—उत्प्रेक्षावाचकानामित्यर्थः, प्रयोगे—व्यवहारे, वाच्या, अप्रयोगे, इवादीनामिति शेषः, पुनः परा—प्रतीयमाना इत्यर्थः, ज्ञात्। यत्—यस्मात्, इयोः,—वाच्यप्रतीयमानयोः, जातिः,—जातिवाचकपदप्रतिपाद्योऽर्थः, गुणः क्रिया द्रव्यं (गुणादीनामपि जातिशब्दवदर्थो बोध्यः) एतच्चतुष्टयम् उत्प्रेक्ष्यं—सम्भावनीयं, तत्—तस्मात्, षट्धाऽपि—वाच्यप्रतीयमानयोः प्रत्येकं आत्माद्यित्वतुष्टयोत्प्रेक्ष्यत्वेन षट्प्रकाराऽपि, सा भावाभावाभिमानतः,—भावाभिमानेन—आत्माद्यित्वभावसम्भावनेन, अभावाभिमानेन च—आत्माद्यित्वतिरोधित्वाभावसम्भावनेन च, प्रत्येकं द्वैविध्यात् षोढ़ाधा इत्याशयः; पुनश्च ताः,—षोढ़ाप्रकाराः उत्प्रेक्षाः, प्रत्येकं निमित्तस्य—उत्प्रेक्षाकारणस्य, सम्भावनाजनकज्ञानविषयसाधारणधर्मस्य इति यावत्, गुणक्रियास्वरूपत्वात्—क्वचित् गुणरूपत्वात्, क्वचित् क्रियारूपत्वात्, द्वैविध्येन द्वात्रिंशद्विधतां यान्ति—द्वात्रिंशद्भेदा भवन्ति। अत्रेदं बोध्यं, तथा हि, प्रथमं वाच्या प्रतीयमाना च इति द्वौ भेदौ, तत्र इवादिप्रयोगे वाच्या, तदप्रयोगे प्रतीयमाना; तत्रापि वाच्या जातिगुणक्रियाद्रव्याणाम् अप्रस्तुतानां निषेधेन चतुःप्रकारा; तेषाञ्च प्रत्येकं भावाभावाभिमानरूपत्वेन द्वैविध्यादष्टप्रकारत्वम्; अष्टप्रकारञ्च च प्रत्येकं निमित्तस्य गुणक्रियारूपभेदाभ्यां

तत्र वाच्योत्प्रेक्षायामुदाहरणं दिङ्मात्रं यथा—

"ऊरुः कुरङ्गकदृशश्चञ्चलचेलाञ्चलो भाति।
सपताकः कनकमयो विजयस्तम्भः स्मरस्येव॥" (फ)

अत्र विजयस्तम्भस्य बहुवाचकत्वात् (ब) जात्युत्प्रेक्षा।

"ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्य्ययः।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव॥" (भ)

अत्र सप्रसवत्वं गुणः।

षोडश प्रकाराः; तेषाञ्च षोडशप्रकाराणां प्रतिभेदं निमित्तस्य पुनरुपादानानुपादानमूलत्वेन द्वैविध्ये द्वात्रिंशत् प्रकाराः इति।

(फ) जात्युत्प्रेक्षामुदाहरति, ऊरुरिति।—कुरङ्गकदृशः,—हरिणाक्ष्याः, चञ्चलं—स्वस्थानभ्रष्टमित्यर्थः, चेलाञ्चलं—सूक्ष्मवस्त्रप्रान्तः यस्मिन् तादृशः, ऊरुः स्मरस्य—कामस्य, सपताकः,—पताकासहितः. (चेलाञ्चलस्य वातेन उड्डायनात् पताकारूपत्वं बोध्यम्) कनकमयः,—काञ्चनमयः, विजयस्तम्भः,—शत्रून् विजित्य तन्नगरे यः स्तम्भः वीरैः आरोप्यते स विजयस्तम्भः स इव, भाति—राजते। अत्र च इवप्रयोगात् वाच्योत्प्रेक्षा, स्तम्भस्य बहुशः सद्भावाच्च जातिरुत्प्रेक्षा, नित्यानेकसमवायिनी जातिरिति स्तम्भत्वजातेरनेकसमवेतत्वादिति भावः। स्तम्भश्च भावपदार्थ इति भावाभिमानिन्युत्प्रेक्षेयम्। उत्प्रेक्षानिमित्तञ्च नायिकोरुरूपं गुणः। अत्र उपगीतिश्छन्दः, तल्लक्षणं यथोक्तम्—"आर्य्या द्वितीयकेऽर्द्धे यद्गदितं लक्षणं तत् स्यात्। यद्युभयोरपि दलयोरुपगीतिं तां मुनिर्ब्रूते॥" इति।

(ब) अत्र विजयेति।—बहुवाचकत्वात्—अनेकवृत्तिनित्यसामान्यजातित्वस्वीकारात् इत्यर्थः।

(भ) गुणोत्प्रेक्षामुदाहरति, ज्ञाने इति।—तस्य—दिलीपस्य, ज्ञाने—शास्त्रादिज्ञाने सत्यपि इत्यर्थः, मौनं—तूष्णीम्भावः, मितभाषित्वमिति यावत्, जल्पवितण्डाराहित्यमिति भावः, शक्तौ—सामर्थ्ये सत्यपि, क्षमा—पराभवानर्हस्यापराधसहिष्णुता, त्यागे—दाने, तत्कर्त्तृत्वे सतीति भावः, श्लाघाविपर्य्ययः,—अनात्मप्रशंसनमित्यर्थः, आसीदिति शेषः, अतः (तस्य) गुणाः गुणानुबन्धित्वात्—गुणप्रयोजकत्वात्, परस्परसहचारित्वादिति भावः, प्रकर्षप्रयोजकधर्मोऽत्र गुणः, सप्रसवाः इव—सहोदराः इव, आसन्निति शेषः। अत्र इवयोगात् वाच्योत्प्रेक्षा, उत्प्रेक्षणीयो गुणः सप्रसवत्वं, कुक्षिगर्भयोर्विभागस्यैव प्रसवपदार्थत्वात् विभागस्य च गुणत्वेनोक्तत्वात्;

"गङ्गाऽम्भसि सुरत्राण ! तव निर्याणनिस्वनः।
स्नातीवारिबधूवर्ग-गर्भपातनपातकी ॥" (म)

अत्र स्नातीति क्रिया।

"सुखमेणौदृशो भाति पूर्णचन्द्र इवापरः।"

अत्र चन्द्र इत्येकव्यक्तिवाचित्वात् द्रव्यशब्दः। एते (य) भावाभिमाने। अभावाभिमाने यथा—

तदुक्तं भावपरिच्छेदे—"अथ गुणा रूपं रसो गन्धस्तत: परम। स्पर्श: सङ्ख्या परिमिति: संयोगश्च विभागश्च" इति। तथा हि,—ज्ञानादीनां नौनाद्यर्थाहणे प्रसवसम्भावना, ज्ञानादिसत्त्वे एव नौनादीनां गुणत्वमिति ज्ञानादीनां नौनादि-प्रयोजकत्वम इति ज्ञेयम्। भावाभिमानिन्युत्प्रेक्षेयं, प्रसवश्च भावपदार्थत्वात्। उत्प्रेक्षाया निमित्तञ्च गुण इत्यवधेयम्। रघुवंशखेदं पश्यम्। यथा वा—"स व: पायादिन्दुर्नवविसलताकोटिकुटिल: जरारेर्यो मूर्ज्ञि ज्वलनकपिशे भाति निहित:। सवन्मन्दाकिन्या: प्रतिदिवससिक्तेन पयसा कपालेनोन्मुक्त: स्फटिकधवलेनाङ्कुर इव ॥" इति।

(म) क्रियोत्प्रेक्षामुदाहरति, गङ्गेति।—देवादेर्भवत: स्तुतिरियम। सुरान् —देवान्, त्रायते—रक्षति, असुरेभ्य: इति शेष:, तत्सम्बुद्धौ हे सुरत्राण !—असुर-निकरनिकृन्तनपरो भूत्वा देवजनानामाश्रयदायिन्निति भाव:; अथवा सुरत्राणेति प्रसिद्धस्य राज्ञ: सम्बोधनम्; अरिवधूनां—अनुनारीणाम्, असुररमणीनामिति यावत्, वर्ग:,—समूह:, तस्य गर्भपातनेन पातकी—पातकवान्, अथवा गर्भपातनमेव पातकं —पापजननयोग्यकर्म तद्वान्, तव निर्याणस्य—युद्धाय प्रयाणवाद्यस्य, ["नि:श्वास" इति पाठे—नि:श्वासस्य—प्रयाणवाद्यालीनवाद्यस्येत्यर्थ:] निस्वन:,—शब्द:, गङ्गा-ऽम्भसि स्नातीव; पापकर्मा हि गङ्गास्नानं करोति, निस्वनोऽपि पापकर्मवान् इति तदीयगङ्गाजलसम्बन्धे स्नानसम्भावना इति ज्ञेयम्। स्नानक्रियाया भावपदार्थत्वात् भावाभिमानिन्युत्प्रेक्षा। यथा वा—"पिनष्टीव तरङ्गाग्रै: समुद्र: फेनचन्दनम्। तदादाय करैरिन्दुर्लिम्पतीव दिगङ्गना ॥" इति।

(य) द्रव्योत्प्रेक्षामुदाहरति, सुखमिति।—एणीदृश:,—हरिणाक्ष्या:, सुखम् अपर:,—प्रसिद्धातिरिक्त:, (अयं प्रौढ़ोक्तिसिद्ध: इत्याशय:) पूर्णचन्द्र इव भाति। नेवमुपमा, प्रसिद्धोपमानसद्भावे एव तस्या अधिकारात्, न खलु अपरश्च चन्द्रश्च प्रसिद्धस्तमिति बोध्यम्। चन्द्रश्च भावपदार्थत्वात् भावाभिमानिन्यौ, द्रव्यप्रयोजात्

"कपोलफलकावस्याः कष्टं भूत्वा तथाविधौ।
अपश्यन्ताविवान्योऽन्यमीदृक्षां क्षामतां गतौ॥" (र)

अत्र अपश्यन्ताविति क्रियाया अभावः। एवमन्यत्।

निमित्तस्य गुणक्रियारूपत्वे यथा—"गङ्गाऽम्भसि" इत्यादौ "स्नातीव" इत्युत्प्रेक्षानिमित्तं पातकित्वं (ल) गुणः। "अपश्यन्तौ" इत्यादौ क्षामतागमनरूपं निमित्तं क्रिया। एवमन्यत्।

प्रतीयमानोत्प्रेक्षा यथा—

"तन्वङ्ग्याः स्तनयुग्मेन मुखं न प्रकटीकृतम्।
हाराय गुणिने स्थानं न दत्तमिति लज्जया॥" (व)

वाच्या च। अत्रोत्प्रेक्षानिमित्तं मुखस्य रूपं वेदितव्यम्। एते इति।—एते—जात्यादयः, दर्शितप्रकाराया उत्प्रेक्षाया भेदा इत्यर्थः।

(र) अभावाभिमानिनीमुदाहरति, कपोले इति।—अस्याः,—कान्ताया इत्यर्थः, कपोलफलकौ—गण्डदेशौ, तथाविधौ—अतिसुन्दराविति भावः, भूत्वा अन्योऽन्यं—परस्परम्, अपश्यन्ताविव—अनालोकयन्तौ इव, ईदृक्षाम्—एतादृशीं, क्षामतां—कृशतां, गतौ—प्राप्तौ, एतत् कष्टमिति खेदे। पूर्वं प्रफुल्लतया स्फीतत्वात् उभौ अन्योऽन्यं ददृशतुः, इदानीं विरहे कार्श्यातिशयात् अवनतत्वेन उन्नतनासाव्यवधानेन च दर्शनाभावः सम्भवति, परन्तु अचेतनतया दर्शनस्यासम्भवात् दर्शनमुत्प्रेक्षितमिति सुधीभिरवधेयम्। ननु कपोलयोः परस्परदर्शनाभावः सिद्ध एव, कथमत्र सम्भावना? इति चेत्, न; विरहजनितकृशत्वे परस्परदर्शनाभावजन्यकृशत्वसम्भावनायाः तात्पर्य्यात्। अत्रादर्शनस्य अभावपदार्थत्वात् अभावाभिमानिनीयं क्रियोत्प्रेक्षा, इवप्रयोगात् वाच्या च।

(ल) गङ्गेति।—पातकित्वं—पापजननयोग्यत्वं, गुणक्रियाऽतिरिक्तो धर्मः यथाश्रुतस्य शब्देऽसम्भव इति ध्येयम्। एतेन "निष्पन्दमरविन्दाक्षि! नेत्रद्वन्द्वमिदं तव चिरविच्छिन्नमेकान्ते कान्तमाध्यायति ध्रुवम्॥" इत्यादौ गुणक्रियाभिन्नस्य निष्पन्दत्वादेरपि निमित्तस्य सङ्ग्रहः। यद्वा—निमित्तस्यापि भावाभावरूपत्वं द्वैविध्यं बोध्यम्।

(व) प्रतीयमानामुदाहरति, तन्वङ्ग्या इति।—तन्वङ्ग्याः,—कृशाङ्ग्याः, स्तनयुग्मे—पयोधरयुगलेन, गुणिने—सूत्रवते, सूत्रगुम्फिताय इत्यर्थः, अन्यत्र—विद्यादया दाक्षिण्यादिगुणशालिने, हाराय स्थानम्—अवकाशः, न दत्तम् इति लज्जया-

अत्र लज्जयेवेति इवाद्यभावात् प्रतीयमानोत्प्रेक्षा। एवमन्यत्।

ननु ध्वनिनिरूपणप्रस्तावेऽलङ्काराणां सर्वेषामपि व्यङ्ग्यत्वं भवतीत्युक्तं, सम्प्रति पुनर्विशिष्य कथमुत्प्रेक्षायाः प्रतीयमानत्वम्? उच्यते, व्यङ्ग्योत्प्रेक्षायाम्—

"महिलासहस्सभरिए तुह हिअए सुहअ! सा अमाअंती।
अणुदिणमणण्णकम्मा अंगं तणुअंपि तणुएइ॥" (श)

इत्यादौ उत्प्रेक्षणं विनाऽपि वाक्यविश्रान्तिः, इह तु स्तनयोर्लज्जाया असम्भवात् लज्जयेवेत्युत्प्रेक्षयैवेति व्यङ्ग्यप्रतीयमानोत्प्रेक्षयोर्भेदः। (ष)

अत्र वाच्योत्प्रेक्षायाः षोड़शसु भेदेषु मध्ये विशेषमाह—

तत्र वाच्याभिदाः पुनः।
विना द्रव्यं त्रिधा सर्वाः स्वरूपफलहेतुगाः॥७०८॥(स)

त्रपया, (दानाभावो हि लज्जासम्पादकः) मुखं न प्रकटीकृतं—प्रकाशीकृतं, मुखस्य कालिम्नाऽऽवृतत्वादप्रकटनमिति भावः।

(श) महिलेति।—["महिलासहस्रभरिते तव हृदये सुभग! सा अमान्ती। अनुदिनमनन्यकर्मा अङ्गं तनुकमपि तनयति॥" इति संस्कृतम्] अस्य व्याख्या चतुर्थे परिच्छेदे ३०० पृष्ठे द्रष्टव्या।

(ष) उत्प्रेक्षणं विनाऽपीति।—तव हृदये वस्तुमिवेति फलोत्प्रेक्षामन्तरेणापीत्यर्थः, वाक्यविश्रान्तिः,—वाक्यार्थसङ्गतिरित्यर्थः; तथा च—यत्र वाक्यार्थविश्रान्तेः परं तात्पर्य्यालोचनया अलङ्काराणां प्रतीतिः, तत्र तेषां व्यङ्ग्यत्वं, यत्र तु यदलङ्कारसद्भावमन्तरेण वाक्यार्थाविश्रान्तिस्तत्र तत्प्रतीयमानत्वम्। स्तनयोरिति।—सान्द्रत्वेन हारस्यावकाशाप्राप्तिः, तत्रेयमुत्प्रेक्षा इत्याशयः, उत्प्रेक्षयैव—उत्प्रेक्षावाचकेवाद्यध्याहारेणैव, वाक्यविश्रान्तिरित्यन्वयः। व्यङ्ग्येति।—उत्प्रेक्षाध्वनिप्रतीयमानोत्प्रेक्षयोः इत्यर्थः।

(स) तत्रेति।—तत्र—तयोर्वाच्यप्रतीयमानयोर्मध्ये, विना द्रव्यं—द्रव्यभिन्नाः, सर्वाः,—द्वादशेत्यर्थः, वाच्याभिदाः,—वाच्योत्प्रेक्षाभेदाः, स्वरूपफलहेतुगाः,—स्वरूपस्य

तत्र उक्तेषु वाच्यप्रतीयमानोत्प्रेक्षयोर्भेदेषु मध्ये ये वाच्योत्प्रेक्षायाः षोड़श भेदास्तेषु च जात्यादीनां त्रयाणां ये द्वादश भेदास्तेषां प्रत्येकं स्वरूपफलहेतुगतत्वेन द्वादशभेदतया षट्त्रिंशद्भेदाः, द्रव्यस्य स्वरूपोत्प्रेक्षणमेव सम्भवतीति चत्वार इति मिलित्वा चत्वारिंशद्भेदाः। अत्र स्वरूपोत्प्रेक्षा यथा—पूर्वोदाहरणेषु (ह) "स्मरस्य विजयस्तम्भः" इति। "सप्रसवा इव" इत्यादयः जातिगुणरूपाः।

फलोत्प्रेक्षा यथा—

"रावणस्यापि रामास्तो भित्त्वा हृदयमाशुगः।
विवेश भुवमाख्यातुमुरगेभ्य इव प्रियम्॥" (क)

अत्र "आख्यातुम्" इति भूप्रवेशस्य फलं क्रियारूपमुत्प्रेक्षितम्।

हेतूत्प्रेक्षा यथा—

"सैषा स्थली यत्र विचिन्वता त्वां
भ्रष्टं मया नूपुरमेकमुर्व्याम्।

फलञ्च हेतुश्चेति तान् गच्छन्तीति तथोक्ताः, ["अन्यत्रापि दृश्यते इति वक्तव्यम्" (वा०) इति डः] तत्र फलहेतुभ्यामितरा उत्प्रेक्षा स्वरूपगा, फलहेतुभावेन द्रव्यसम्भावनायाः वैचित्र्याजनकत्वात् इति भावः; तादर्थ्यचतुर्थ्यन्तेन तुमुनन्तेन वा पदेन उत्प्रेक्षा फलगा, हेतुविभक्त्यन्तपदेन उत्प्रेक्षा हेतुगा इति त्रिधा—त्रिप्रकाराः, भवन्तीति शेषः।

(ह) पूर्वोदाहरणेषु—"ऊरुः" इत्यादिषु इत्यर्थः।

(क) फलोत्प्रेक्षामुदाहरति, रावणस्येति।—रामेण अस्तः,—निक्षिप्तः, आशुगः,—शरः, रावणस्य हृदयं—वक्षःस्थलं, भित्त्वाऽपि—विदार्य्यापि, उरगेभ्यः,—नागेभ्यः, पातालनिलयेभ्य इति भावः, प्रियं—प्रीतिजननव्यापारं, रावणनिधनरूपमित्यर्थः, आख्यातुं—कथयितुमिव, तेषामपि रावणेनोत्पीड़ितत्वात् तत्र प्रियाख्यानसम्भावना इति भावः, भुवं—पृथिवीं, विवेश। बाणस्य भूतलप्रवेशो रामबाह्वोः वीर्य्यातिशयं ख्यापयति। अत्र तुमुन्प्रत्ययान्तेन "आख्यातुम्" इति पदेन रामवीर्य्यातिशयद्योतनरूपस्य फलस्योत्प्रेक्षा। रघुवंशस्येदं पद्यम्।

अहश्यत त्वच्चरणारविन्द-
विश्लेषदुःखादिव बद्धमौनम्॥" (ख)

अत्र दुःखरूपो गुणो हेतुत्वेनोत्प्रेक्षितः। एवमन्यत्।

उक्त्यनुक्त्योर्निमित्तस्य द्विधा तत्र स्वरूपगाः॥७०९॥(ग)

तेषु चत्वारिंशत्सङ्ख्यकेषु भेदेषु मध्ये ये स्वरूपगायाः षोड़श भेदास्ते उत्प्रेक्षानिमित्तस्योपादानानुपादानाभ्यां द्वात्रिंशद्भेदा इति मिलित्वा षट्पञ्चाशद्भेदा वाच्योत्प्रेक्षायाः। तत्र निमित्तस्योपादानं यथा पूर्वोदाहृते "स्रातीव" इत्युत्प्रेक्षायां निमित्तं पातकित्वमुपात्तम्। अनुपादाने यथा—"चन्द्र इवापरः" इत्यत्र तथाविधसौन्दर्य्यातिशयो नोपात्तः। हेतुफलयोस्तु नियमेन निमित्तस्योपादानमेव। तथा हि—"विश्लेषदुःखादिव" इत्यत्र यन्निमित्तं बद्धमौनत्वम्, "आख्यातुमिव" इत्यत्र च भूप्रवेशस्तयोरनुपादानेऽप्यङ्गतमेव (घ) वाक्यं स्यात्।

(ख) हेतूत्प्रेक्षामुदाहरति, रावणमिति।—रावणं हत्वा पुष्पकेण पतीक्ष्यमाणमागच्छतः श्रीरामस्य पत्नि सीतां प्रत्यभिरियम्। अत्र "प्रिये!" इति सम्बोधनपदमध्याहार्य्यम्; सा एषा—परिदृश्यमाना, त्वया—वनभूमिः, यत्र—त्वयां, त्वां विचिन्वता—अन्विष्यता, मया उर्व्यां—पृथिव्यां, भ्रष्टं—च्युतम्, एकं नूपुरं—चरणभूषणं, तव चरणारविन्दात्—पादपद्मात्, यः विश्लेषः,—विछोदः, तेन यत् दुःखं तस्मादिव, [इत्येव हेतूत्प्रेक्षा, अत्र सीताचरणासम्बन्धः सीताचरणविश्लेषदुःखेन सम्भावितः इति ज्ञेयम्] बद्धमौनं—निःशब्दम्, अहश्यत—दृष्टम्। रघुवंशखेदं पश्यम्। इह इन्द्रवज्रोपेन्द्रवज्रयोरुपजातिश्छन्दः।

(ग) पुनः स्वरूपोत्प्रेक्षाभेदानाह, उक्तीति।—तत्र—तेषु मध्ये, स्वरूपगाः, उत्प्रेक्षाः इति शेषः, निमित्तस्य—गुणक्रियारूपस्य हेतोरयः, उक्त्यनुक्त्योः,—उक्तौ अनुक्तौ च, इति द्विधा—द्विप्रकाराः, भवन्तीति शेषः।

(घ) निश्चितेति।—'चतुर्विंशतिप्रकारफलहेतूत्प्रेक्षाभिः' इति शेषः। हेतुफलयोरिति—हेतूत्प्रेक्षायां फलोत्प्रेक्षायाञ्च इत्यर्थः, हेतूत्प्रेक्षायान्तु उत्प्रेक्ष्यमाणस्य फलस्यैव निमित्तं, फलोत्प्रेक्षायान्तु हेतुरेव इत्यवधेयम्; नियमेन—अवश्यमेव।

प्रतीयमानायाः षोडशसु भेदेषु विशेषमाह—

प्रतीयमानाभेदाश्च प्रत्येकं फलहेतुगाः ॥ ७१० ॥ (ङ)

यथोदाहृते "तन्वङ्ग्याः स्तनयुग्मेन" इत्यत्र "लज्जयेव" इति हेतुरुत्प्रेक्षितः। अस्यामपि निमित्तस्यानुपादानं न सम्भवति; इवाद्यनुपादाने निमित्तस्य च अकीर्त्तने उत्प्रेक्षणस्य प्रमातुर्निश्चेतुमशक्यत्वात्। स्वरूपोत्प्रेक्षाऽपि अत्र न भवति, धर्मान्तरतादात्म्यनिबन्धनायामस्याम् इवाद्यप्रयोगे विशेषणयोगे सत्यतिशयोक्तेरभ्युपगमात्; यथा—"अयं राजाऽपरः पाकशासनः" इति। विशेषणाभावे च रूपकस्य यथा—"राजा पाकशासनः" इति। तदेवं द्वात्रिंशत्प्रकारा प्रतीयमानोत्प्रेक्षा। (च)

उक्त्यनुक्त्योः प्रस्तुतस्य प्रत्येकं ता अपि द्विधा ॥७११॥(छ)

असङ्गतमेवेति।—विभक्त्याद्युपस्थापितस्य हेतुत्वस्य कार्य्यत्वस्य वा अन्वयोपयोग्यलाभेन अन्वयबोधविधुरं स्यात् इत्यर्थः।

(ङ) प्रतीयमानेति।—प्रतीयमानायाः,—तदाख्योत्प्रेक्षायाः, भेदाश्च—षोडशभेदा अपि, प्रत्येकम्—एकैकशः, फलहेतुगाः,—फलगाः हेतुगाश्च, इति द्वात्रिंशद्विधा भवन्तीति शेषः।

(च) यथेति। इवादीति।—प्रमातुः,—प्रतिपत्तुः। धर्मान्तरेति।—धर्मान्तरेण—अन्येन धर्मेण, यत् तादात्म्यम्—अभेदप्रतीतिः, तदेव निबन्धनं—कारणं यस्याः तथाभूतायां, धर्मान्तरतादात्म्यविषयिण्यामित्यर्थः, अस्याम्—उत्प्रेक्षायाम्। विशेषणस्य—असम्भवित्वसम्पादकधर्मस्य इत्यर्थः, योगे। अध्यवसीयमानस्य प्रौढोक्तिसिद्धत्वेन उत्कृष्टत्वम् इति विषयस्य अपकृष्टत्वरूपम् अधःकरणमतिशयोक्तिप्रयोजकम्। अभ्युपगमादिति।—अभ्युपगमात्—स्वीकारात्, प्राचीनैरिति शेषः, इवाद्यप्रयोगे सम्भावनायाः सिद्धत्वेनावभासात् इति भावः। अयमिति।—अत्र "अपरः" इत्यनेन पाकशासनस्य अप्रसिद्धत्वम्। रूपकस्येति, अभ्युपगमादित्यन्वयः; ततश्च यत्र प्रसिद्धमुपमानं, तत्रैव विषयस्याधःकरणाभावात् रूपकस्यावसरः, यत्र तु उपमानस्य अप्रसिद्धत्वं, तत्रातिशयोक्तिरिति रूपकातिशयोक्त्योर्भेदः। तत्रापि यदि फलस्य हेतोश्च सद्भावः स्यात्, तदा प्रतीयमानोत्प्रेक्षेति परस्परं भेदः इति बोध्यम्।

(छ) उक्तीति।—प्रस्तुतस्य—प्रकृतस्य, विषयस्येत्यर्थः, उक्त्यनुक्त्योः,—उक्तौ

ताः,—उत्प्रेक्षाः। उक्ती यथा—"अतः कुरङ्गकाङ्गभः" इति। अनुक्ती यथा मम प्रभावत्यां प्रद्युम्नः,—

"इह हि सम्प्रति दिगन्तरमाच्छादयता तिमिरपटलेन—
घटितमिवाञ्जनपुञ्जैः पूरितमिव मृगमदचोदैः।
ततमिव तमालतरुभिर्वृतमिव नीलांशुकैर्भुवनम्॥" (ज)

अत्र अञ्जनेन घटितत्वादेरुत्प्रेक्षणीयस्य विषयव्याप्तत्वं नोपात्तम्। (झ) यथा वा—

"लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः।" (ञ)

अत्र तमसो लेपनस्य व्यापनरूपो विषयी नोपात्तः, अञ्जनवर्षणस्य तमःसम्पातः। अनयोरुत्प्रेक्षानिमित्तस्य तमसोऽतिबहुलत्वं धारारूपेणाधःसंयोगश्च यथासङ्ख्यम्। केचित् तु—"अलेपनकर्तृभूतमपि तमोलेपनकर्तृत्वेनोत्प्रेक्षितं व्यापनत्वं निमित्तम्, एवं नभोऽपि वर्षणक्रियाकर्तृत्वेन" इत्याहुः। (ट)

अनुक्ती च, ताः अपि—अष्टाभीतिप्रकाराः पूर्वोक्ता उत्प्रेक्षाः इत्यर्थः, प्रत्येकं द्विधा, भवन्तीति शेषः, ततश्च षट्त्रिंशत्यधिकशततमसङ्ख्याका उत्प्रेक्षा इति बोध्यम्।

(ज) घटितमिति।—भुवनं—जगत, अञ्जनपुञ्जैः,—कज्जलराशिभिः, घटितमिव—निर्मितमिव, मृगमदचोदैः,—कस्तूरीपुञ्जैः, पूरितमिव—पूर्णमिव, तमालतरुभिः तर्तं—व्याप्तमिव, नीलांशुकैः,—नीलवसनैः, वृतमिव—आच्छादितमिव। अत्रोपमोत्प्रेक्षेत्युभयम्।

(झ) विषयः,—प्रस्तुतं, व्याप्तत्वं—व्यापनरूपम्।

(ञ) लिम्पतीति।—गाढान्धकारवर्णनमिदम्। तमः,—अन्धकारम्, अङ्गानि—गात्राणि, लिम्पतीव, नभः,—आकाशम्, अञ्जनं—कज्जलं, वर्षतीव। अस्यो-त्तरार्द्धम्—"अतत्प्रवर्षसेवेह दृष्टिर्विप्लवतां गता॥" इति। अत्रोपमेति उपेक्षितं यत्नतेति विभाव्यतामत्र। अञ्जनवर्षणस्येदं पद्यम्।

(ट) अनेति।—उदाहृते पद्ये इत्यर्थः। अञ्जनेति।—तमःसम्पातः इति विषयी नोपात्तः इति पूर्वोक्तानन्वयः। अतिबहुलत्वम्—अतिबहुलत्वप्रयुक्तनिबिड-संज्ञीनः; एवं सति धारारूपवर्षणत्वमुपपन्नम्। धारारूपेणेति।—तमस इति योजना। अधःसंयोगश्चेति।—तमसो द्रव्यत्वादिलतनादिसिञ्चनम्। केचिदिति।—अत्र धारा-

अलङ्कारान्तरोत्था सा वैचित्र्यमधिकं वहेत्॥७१२॥(ठ)

तत्र सापह्नवोत्प्रेक्षा (ड) यथा मम—

"अश्रुच्छलेन सुदृशो हुतपावकधूमकलुषाक्ष्याः ।
अप्राप्य मानमङ्गे विगलति लावण्यवारिपूर इव ॥"(ढ)

श्लेषहेतुगा यथा—

"मुक्तोत्करः सङ्कटशुक्तिमध्यात्
विनिर्गतः सारसलोचनायाः ।
जानीमहेऽस्याः कमनीयकम्बु-
ग्रीवाऽधिवासात् गुणवत्त्वमाप ॥" (ण)

रूपेणाधःसम्पातो निमित्तं नभसोऽञ्जनवर्षणकर्तृत्वेन सम्भावनायां प्रकृतस्योपमेयस्य तमसो बोधो दुर्घट इत्यस्वरसः "केचित्" इत्यनेन सूचितः, अपरे तु—"तमोऽञ्जनत्वेनोत्प्रेक्षितं नीलत्वमत्र निमित्तम्" इत्याहुः। व्यापनञ्चेति—निविडसंयोगानुकूलव्यापारश्चेत्यर्थः। एवमिति—अवर्षणक्रियाकर्तृभूतमपीत्यर्थः, उत्प्रेक्षितमित्यनुषज्यते।

(ठ) अलङ्कारेति।—अलङ्कारान्तरात्—अन्यस्मादलङ्कारात्, उत्थिता—अलङ्कारान्तरमूलेत्यर्थः, सा—उत्प्रेक्षा, अधिकं वैचित्र्यं—शोभाऽऽतिशय्यं, वहेत्—प्राप्नुयात्। ["भजेत्" इति पाठान्तरम्]।

(ड) तत्रेति।—सापह्नवा—अपह्नुत्यलङ्कारमूलेत्यर्थः।

(ढ) अश्रुति।—हुतस्य—प्राप्तघृताहुतेरित्यर्थः, पावकस्य—अग्नेः, धूमेन कलुषे—आविले, अक्षिणी—नयने यस्यास्तथाभूतायाः, सुदृशः,—सुनयनायाः, सुन्दर्य्या इति शेषः, अश्रुच्छलेन—नेत्राम्बुव्याजेन, लावण्यवारिपूरः,—लावण्यजलप्रवाहः, अङ्गे—शरीरे, मानम्—इयत्ताम्, अप्राप्य इव—अलब्ध्वेव, विगलति—स्रवति। अत्राश्रुजलम् अपह्नुत्य लावण्यवारित्वेन उत्प्रेक्ष्यते, इत्यपह्नुत्युपस्कृतेयमुत्प्रेक्षा। उपगीतिश्छन्दः।

(ण) मुक्तोत्कर इति।—सङ्कटं—सङ्कीर्णं, [कारणस्य गुणवत्त्वप्राप्तिकारणत्वाभावसूचकम्] यत् शुक्तिमध्यं—मुक्तागृहगर्भः, तस्मात् विनिर्गतः,—बहिर्गतः, मुक्तानाम् उत्करः,—समूहः, अस्याः सारसलोचनायाः,—सरसि—जलाशये भवम् इति सारसं—कमलं, ("सारसः पक्षिभेदेन्द्वोः क्लीबन्तु सरसीरुहे" इति मेदिनी) तद्वत् आयते सुन्दरे च इति भावः, लोचने—नयने यस्याः तथाभूतायाः, कान्तायाः

अत्र गुणवत्त्वे श्लेषः। कम्बुग्रीवाधिवासादिव इति हेतूत्प्रेक्षाया हेतुः। अत्र "जानीमहे" इत्युत्प्रेक्षावाचकम्।

एवम् (त)—

मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादयः ॥७१३॥ (थ)

क्वचिदुपमोपक्रमोत्प्रेक्षा (द) यथा—

"पारेजलं नीरनिधेरपश्यन्मुरारिरानीलपलाशराशीः।
वनावलीरुत्कलिकासहस्र-प्रतिक्षणोत्कूलितशैवलाभाः॥" (ध)

इत्यर्थः, कम्बुग्रीवा—रम्या, या कम्बुग्रीवा—कम्बुवत्—कम्बुरिव, अङ्ग ग्रीवेति यावत्, ग्रीवा—रेखात्रयरमणीया ग्रीवा, तस्याम् अधिवासात्—अवस्थानात्, गुणवत्त्वं—सूत्रवत्त्वं, सत्सङ्गजनितोत्कर्षप्रयोजकधर्मयोगित्वञ्च, अपश्यतामप्युत्तमस्थानवासेन गुणवत्त्वं भवतीति भावः, आप—प्राप्तवान्, इति जानीमहे—मन्यामहे। हारस्य गुणवत्त्वप्राप्तौ स्वभाव एव हेतुस्तस्येयमुत्प्रेक्षा, अथ च युक्तिनध्यापेक्षया कम्बुग्रीवाया महत्त्वमुचितमेव। उपजातिः छन्दः।

(त) एवमिति।—उत्प्रेक्षावाचका इत्यर्थः।

(थ) मन्ये इति।—मन्ये, शङ्के, ध्रुवं, प्रायः, नूनम् इत्येवमादयः, आदयः उत्प्रेक्षावाचका इति शेषः। आदिपदात् खलु किमुप्रभृतीनां ग्रहणम्। यथा—"कथयोऽस्तमितस्य भास्वतः खलिता यत्र निराश्रयाः खलु। अभिसायमतो दिशेपनाप्यवलाम्नीरजपक्षशोभयः॥" "पृथुवर्णुलतान्वितस्त्वङ्गत् सिन्दिरस्यन्दनशिल्पमिश्रया। विधिरेकरुचक्रचारिणं किमु निर्मिमीते नान्यथं रथम्॥" इवशब्दस्योत्प्रेक्षावाचकत्वं प्रसिद्धम् इति तन्नोक्तम्, आदिपदेन वा तस्यापि नन्वित्यादीनाञ्च ग्रहणम्।

(द) क्वचिदिति।—क्वचित्काव्ये इत्यर्थः, उपमा उपक्रमे—आरम्भे यस्याः तादृशी उत्प्रेक्षा।

(ध) पारे इति।—मुरारिः,—कृष्णः, नीरनिधेः,—समुद्रस्य, पारेजलं—जलस्य पारे इत्यर्थः, ["पारे मध्ये षष्ठ्या वा" (२।१।१८ पा०) इति अव्ययीभावः] आनीलाः,—आ—समन्तात्, नीलाः, गाढ़नीलवर्णाः इत्यर्थः, पलाशानां—पलाशानां, राशयः,—समूहाः यासां तथोक्ताः, तथा उत्कलिकानां—तरङ्गाणां, ("कलिलोत्कलिकोल्लोला ऊर्मावपि च मेदिनी) सहस्रैः,—समूहैः, प्रतिक्षणं—

इत्यत्र आभाशब्दस्योपमावाचकत्वादुपक्रमे उपमा। पर्य्यवसाने तु जलधितीरे शैवालस्थितेः सम्भावनाऽनुपपत्तेः सम्भावनोत्थानमित्युत्प्रेक्षा। एवं विरहवर्णने—"केयूरायितमङ्गदैः" (न) इत्यत्र "विकासिनीलोत्पलति स्म कर्णे मृगायताक्ष्याः कुटिलः कटाक्षः" इत्यादौ च ज्ञेयम्। भ्रान्तिमदलङ्कारे—"मुग्धा दुग्धधिया" इत्यादौ भ्रान्तानां वल्लवादीनां विषयस्य चन्द्रिकादेर्ज्ञानं नास्ति, तदुपनिबन्धनस्य कविनैव कृतत्वात्; इह तु सम्भावनाकर्त्तुर्विषयस्यापि ज्ञानमिति द्वयोर्भेदः। सन्देहे तु समकक्षतया कोटिद्वयस्य प्रतीतिः, इह तु उत्कटा सम्भाव्यभूतैका कोटिः। अतिशयोक्तौ विषयिणः प्रतीतस्य पर्य्यवसानेऽसत्यता प्रतीयते, इह तु प्रतीतिकाले एवेति भेदः। (प)

क्षणे क्षणे, उत्कूलिताः,—कूलमुद्गताः, ये शैवलाः तेषाम् आभेव आभा यासां तादृशीः, वनावलीः,—काननराजीः, अपश्यत्—व्यलोकयत्। उपजातिः वृत्तम्। शिशुपालवधस्यैतत्पद्यम्।

(न) उपक्रमे इति।—प्रथममुपमाप्रतीतिरित्यर्थः। सम्भावनोत्थानं—सम्भावनाप्रतीतिः। केयूरायितमिति।—अङ्गदैः,—कङ्कणैः, केयूरायितं—केयूरो भुजमध्यदेशालङ्कारविशेषः, तद्वदाचरितम्। अत्र आयप्रत्ययस्य उपमावाचकत्वात् उपक्रमे उपमायाः प्रतीतावपि पर्य्यवसाने भुजमध्ये कङ्कणधारणस्यासम्भवात् सम्भावनोत्थानमिति उत्प्रेक्षैव।

(प) विकासीति।—मृगायताक्ष्याः,—हरिणायतलोचनायाः, कुटिलः,—वक्रः, कटाक्षः,—अपाङ्गदृष्टिः, कर्णे विकासि—प्रस्फुटितं, यत् नीलोत्पलम्—इन्दीवरं, तदिवाचरति स्म। अत्र क्विप्प्रत्ययस्य आयलोपस्य च उपमावाचकत्वादुपक्रमे उपमायाः प्रतीतावपि पर्य्यवसाने कर्णे कटाक्षस्यासम्भवात् सम्भावनोत्थानमिति उत्प्रेक्षैवेति बोध्यम्। इदानीं भ्रान्तिमदादिभ्यः उत्प्रेक्षाया भेदमुपपादयति—भ्रान्तिमदिति। तदुपनिबन्धनस्येति—तद्वर्णनस्य, चन्द्रिकादिवर्णनस्येत्यर्थः। विषयस्य—प्रकृतस्य, (अपिशब्दात् विषयिणः ग्रहणम्) समकक्षतया—तुल्यस्वरूपतया। उत्कटा—निश्चितप्राया, सम्भाव्यभूता—अनिर्द्धारितस्वरूपा, कोटिः,—प्रकारः। एककोटिकज्ञानस्यापि यत् संशयत्वमुच्यते, तदनिर्द्धारणत्वरूपसंशयधर्मयोगात् गौणमेव।

"रञ्जिता नु विविधास्तरुशैला
नामितं नु गगनं स्थगितं नु।
पूरिता नु विषमेषु धरित्री
संहृता नु ककुभस्तिमिरेण॥" (फ)

इत्यत्र यत्तर्वादौ तिमिराक्रान्तता रञ्जनादिरूपेण सन्दिह्यते इति सन्देहालङ्कारः इति केचिदाहुः, तन्न; एकविषये समानबलतयाऽनेककोटिस्फुरणस्यैव सन्देहत्वात्। इह तु तर्वादिव्याप्तेः प्रतिसम्बन्धिभेदः, व्यापनादेर्निगरणेन रञ्जनादेः स्फुरणञ्च। (ब) अन्ये तु "अनेकत्वनिर्द्धारणरूपविच्छित्त्याश्रयत्वेनैक-

---

विषयिणः,—आरोप्यमाणस्य, प्रतीतस्य—ज्ञातस्य, पर्य्यवसाने—अभिनिवेशे, शाब्दबोधानन्तरमित्यर्थः, असत्यता—अवास्तवत्वम्। इह तु—[illegible]मित्यर्थः। प्रतीतिकाले एवेति।—रूपकवदाहार्य्य एवान्यतादात्म्यप्रत्ययः सम्भावनेति भावः।

(फ) रञ्जितेति।—अन्धकारवर्णनमिदम्। तिमिरेण—अन्धकारेण, विविधाः,—नानाप्रकाराः, तरुशैलाः,—वृक्षपर्वतादयः, रञ्जिताः नु?—नीलद्रव्येण लिप्ताः किम्? अलङ्कृताः किम्? इत्यर्थः, गगनम्—आकाशं, नामितं नु?—ऊर्द्ध्वदेशात् अधःपातितं किम्? वा स्थगितं नु?—आच्छादितं किम्? धरित्री—पृथ्वी, विषमेषु—उन्नतानतेषु स्थानेषु, पूरिता नु?—पूर्णतां नीता किम्? ककुभः,—दिशः, संहृता नु?—एकत्र समावेशिताः, अपनीताः वा किम्? किरातार्जुनीयस्येदं पद्यम्।

(ब) केचिदिति।—अलङ्कारसर्वस्वकारादय इत्यर्थः। एकविषये इति—एकस्मिन् वस्तुनि इत्यर्थः, समानबलतया—तुल्यकक्षतया, अनेककोटिस्फुरणस्य—बहुकोटिकप्रतीतेः एव, यथा—"स्थाणुर्वा पुरुषो वा" इति। इह—अस्मिन् उदाहरणे, तर्वादिव्याप्तेः,—तरुशैलगगनपृथ्वीदिशां व्याप्तेः, प्रतिसम्बन्धिभेदः,—नानासम्बन्धिवशात् भिन्नत्वमित्यर्थः, तथा चैकविषयानेककोटिज्ञानत्वाभावादस्य संशयत्वमनुपपन्नमिति भावः। ननु इदं तमसा तरुशैलादिव्यापनं, न तु रञ्जनम् इत्याद्याकारनानासन्देहात्मकः प्रतिसम्बन्धिभेदस्तावत् आस्तां, तत्र सन्देहस्य का क्षतिः? इत्याशङ्क्य दोषान्तरमाह, व्यापनादेरिति।—निगरणेन—अधःकरणेन; तथा च—यदि व्यापनं वा रञ्जनं वा इत्येवं समबलत्वं स्यात्, तदैव सन्देहप्रसरः, अत्र तु व्यापनमधःकृत्य रञ्जनस्यैव स्फुरणात् न सन्देहालङ्कार इति भावः।

कोट्यधिकोऽपि भिन्नोऽयं सन्देहप्रकारः" इति वदन्ति स्म, तदप्ययुक्तम्; निगीर्णस्वरूपस्यान्यतादात्म्यप्रतीतिर्हि सम्भावना, तस्याश्चात्र स्फुटतया सद्भावात् नुशब्देन च इवशब्दवत् तस्या द्योतनादुत्प्रेक्षैवेयं भवितुं युक्ता, अलमदृष्टसन्देहप्रकारकल्पनया । (भ)

"यदेतच्चन्द्रान्तर्जलदलवलीलां वितनुते
तदाचष्टे लोकः शशक इति नो मां प्रति तथा ।
अहं त्विन्दुं मन्ये त्वदरिविरहाक्रान्ततरुणी-
कटाक्षोल्कापातव्रणकिणकलङ्काङ्किततनुम् ॥" (म)

(भ) अन्ये त्विति ।—एककोट्यधिकोऽपि—अधिकबलैककोटिरपीत्यर्थः, अत्र तु व्यापनरूपा कोटिः हीनबला, रञ्जनरूपा कोटिरधिकबलेति द्रष्टव्यम् ["एककोट्यधिकेऽपि" इति पाठे भावप्रधानो निर्देशः; एककोटेरुत्कटत्वेऽपीति तदर्थः]। निगीर्णस्वरूपस्य—अधःकृतस्वरूपस्य विषयस्य, तस्य विच्छित्तिविशेषं प्रत्यकिञ्चित्करत्वमेव, न तु शब्दानुपात्तत्वमात्रं, तथा सति "ऊरुः कुरङ्गकदृशः" इत्यादौ विषयोपादानादव्याप्तिः स्यात्; अन्येन—अप्रकृतेन, यत् तादात्म्यम्—अभेदः, तस्य प्रतीतिः,—अवबोधः, उपमानतादात्म्यारोप इत्यर्थः, प्रतीतिरत्र निर्द्धारणरूपा प्रत्येतव्या, तेनातिशयोक्तिव्युदासः। तस्याः,—सम्भावनायाः, स्फुटतया—स्पष्टतया। द्योतनात्—प्रकाशनात्। अदृष्टेति ।—अदृष्टस्य—क्वचिदपि ग्रन्थे अनालोकितस्य, सन्देहप्रकारस्य कल्पनया—रचनया ।

(म) यदिति ।—राजस्तुतिरियम्। चन्द्रान्तः,—चन्द्रस्य मध्ये, यत् एतत्, वस्तु इति शेषः, जलदलवलीलां—मेघखण्डविलासं, वितनुते—विस्तारयति, लोकः,—जनः, तत्—वस्तुरित्यर्थः, शशक इति आचष्टे—कथयति, मां प्रति तथा—शशकवचनमित्यर्थः, नो, प्रतिभातीति शेषः, तद्वस्तुनः शशकवचनं न ममेत्यर्थः, अहन्तु इन्दुं—चन्द्रं, तव अरीणां—शत्रूणां, विरहाक्रान्ता—विरहेण—कान्तविच्छेदेन, आक्रान्ता—अभिभूता इति यावत्, विरहिण्यः इत्यर्थः, याः तरुण्यः,—युवतयः, तासां कटाक्षोल्कापातेन—कटाक्षाः,—अपाङ्गवीक्षणानि एव, उल्काः,—नभोमण्डलात् पतन्तः रेखाकाराः तेजःपदार्थविशेषाः, तासां पातेन—पतनेन, अङ्गे इति शेषः, यत् व्रणं—क्षतविशेषः, तस्य किणः,—चिह्नविशेषः एव, कलङ्कः,—लाञ्छनं, तेन अङ्किता—

इत्यत्र 'मन्ये' शब्दप्रयोगेऽपि उत्प्रेक्षायाः सम्भावनाया अप्रतीतेर्वितर्कमात्रं, (य) नासावपङ्क्तयोक्तेत्या।

सिद्धत्वेऽध्यवसायस्यातिशयोक्तिर्निगद्यते ॥७१४॥ (र)

विषयनिगरणेनाभेदप्रतिपत्तिर्विषयिणोऽध्यवसायः, अस्य च उत्प्रेक्षायां विषयिणोऽनिश्चितत्वेन निर्देशात् साध्यत्वम्, इह तु निश्चितत्वेनैव प्रतीतिरिति सिद्धत्वम्। विषयनिगरणं च उत्प्रेक्षायां विषयस्याधःकरणमात्रेण। (ल) इहापि मुखं द्वितीयचन्द्रः इत्यादौ, यदाहुः,—

चिरिता, तनुः,—शरीरं यस्य तादृशमिव, मन्ये—सम्भावयामि। शिखरिणी वृत्तम्।

(य) उत्प्रेक्षाया इति।—उत्कटैककोटिकायाः इत्यर्थः। वितर्कमात्रं—सम्भावनमात्रं, प्रौढ़ोक्तिसिद्धकोट्युपस्थितिमात्रम् इत्यर्थः, सामान्येन सम्भावनं, न तु उत्कटैककोटित्वेनेति भावः; तथा च—"यदेतत्" इत्यनेन विषयनिर्दिष्टस्वरूपं वस्तु प्रस्तुतं, तस्यात्र अप्रकृतत्वं प्रतिविध्य विषयस्वरूपत्वं व्यवस्थापितं, न तु उपमानतादात्म्यं सम्भावितम् इति भावः।

(र) अतिशयोक्तिमाह, सिद्धत्वे इति।—अध्यवसायस्य—अध्यासस्य, सिद्धत्वे—सिद्धवत् निर्देश्यत्वे, निश्चितविषयिताकत्वे इत्यर्थः, निश्चयरूपत्वे इति पर्यवसितोऽर्थः, अतिशयोक्तिः निगद्यते—कथ्यते। सिद्धवन्निर्दिष्टोऽध्यवसायः, स एवातिशयोक्तिरिति फलितार्थः।

(ल) अध्यवसायपदार्थमाह, विषयेति।—विषयस्य—प्रकृतस्य, निगरणेन—अधःकरणेन, विषयिणः,—आरोप्यमाणस्य, अध्यवसायप्रकारस्येत्यर्थः, अभेदप्रतिपत्तिः,—अभेदज्ञानं, तादात्म्यारोप इति यावत्, विषयादिति शेषः। सिद्धत्वे इत्यस्य व्याकृतिमाह, अस्य चेति।—अध्यवसायस्य चेत्यर्थः। अनिश्चितत्वेन—अनिर्धारितत्वेन, निर्देशात्—आरोपात्, विषयीकरणात् इति भावः, साध्यत्वं—साधनीयत्वं, व्यक्ताप्रामाण्यत्वम् इत्यर्थः। प्रतीतिरिति।—विषयिणः प्रतीतिरित्यभिप्रायः। ननु शब्देनानुपादानं निगरणम्, एवं सति उत्प्रेक्षास्तुतायामुत्प्रेक्षायाम् अतिशयोक्तौ चोक्तविषयायां कथं सङ्कीर्णत्वम्? अत आह, निगरणमात्रेणेति।—अधःकरणमात्रेण—विच्छित्तिविशेषेण अत्यल्पचिच्चमत्कारत्वेनापकर्षमात्रेण, न तु शब्दानुपादानेनापि इति शेषः।

"विषयस्यानुपादानेऽप्युपादानेऽपि सूरयः।
अधःकरणमात्रेण निगीर्णत्वं प्रचक्षते।" इति। (ब)

भेदेऽप्यभेदः सम्बन्धेऽसम्बन्धस्तद्विपर्य्ययौ।
पौर्वापर्य्यात्ययः कार्य्य-हेत्वोः सा पञ्चधा ततः॥७१५॥(ग)

तद्विपर्य्ययौ—अभेदे भेदः, असम्बन्धे सम्बन्धः। सा—अतिशयोक्तिः। अत्र भेदेऽभेदो यथा मम—

"कथमुपरि कलापिनः कलापो
विलसति तस्य तलेऽष्टमीन्दुखण्डम्।
कुवलययुगलं ततो विलोलं
तिलकुसुमं तदधः प्रवालमस्मात्॥" (घ)

(ब) विषयस्येति।—सूरयः,—विद्वांसः, विषयस्य—प्रस्तुतस्य, अनुपादाने—अप्रयोगे अपि, तथा उपादाने—प्रयोगे अपि, अधःकरणमात्रेण—अपकर्षमात्रेण, विषयस्येति शेषः, निगीर्णत्वं—निगरणं, प्रचक्षते—वदन्ति, निगरणमेवाधःकरणमिति फलितार्थः।

(ग) तद्विपर्य्ययाह, भेदे इति।—सा—अतिशयोक्तिः, भेदेऽपि अभेदः,—भेदे सत्यपि अभेदप्रतिपत्तिरित्यर्थः, एवमग्रेऽपि; सम्बन्धेऽपि असम्बन्धरूपा, तद्विपर्य्ययौ—तयोर्विपरीतौ, अभेदेऽपि भेदरूपा, असम्बन्धेऽपि सम्बन्धरूपा इत्यर्थः, तथा कार्य्यहेत्वोः,—कार्य्यकारणयोः,—पौर्वापर्य्यात्ययः,—पौर्वापर्य्यविपर्य्यासरूपा चेति भावः, ततः,—तेभ्यः भेदेभ्यः, पञ्चधा—पञ्चप्रकारा, भवतीति शेषः। इह पौर्वापर्य्यात्ययः द्विविधः, यथा—पूर्वोत्पन्ने परोत्पन्नारोपः, परोत्पन्ने पूर्वोत्पन्नारोपः इत्युभयस्वरूपः एकप्रकारः, क्रमोत्पन्ने च समकालोत्पन्नारोपः इति द्वितीयः प्रकारः। असङ्कारसर्वस्वकारा अपि—"अध्यवसितप्राधान्ये त्वतिशयोक्तिः" इत्यभिधाय "अध्यवसाने वयं सम्भवति, स्वरूपं विषयो विषयी च। विषयस्य हि विषयिस्वाऽनिगीर्णत्वे अध्यवसायस्य स्वरूपोत्थानं, तत्र ह्याध्यवसे स्वरूपप्राधान्यं, सिद्धसे तु अध्यवसितत्वप्राधान्यं, विषयप्राधान्यमध्यवसाये नैव सम्भवति, अध्यवसितप्रधाना एव अतिशयोक्तिः। अस्यां पञ्च प्रकाराः,—भेदे अभेदः, अभेदे भेदः, सम्बन्धे असम्बन्धः, असम्बन्धे सम्बन्धः, कार्य्यकारणपौर्वापर्य्यविपर्य्यासश्च" इत्याहुः।

(घ) भेदे अभेदमुदाहरति, कथमिति।—नायिकावर्णनमिदम्। उपरि—

अत्र कान्ताकेशपाशादेः (स) मयूरकलापादिभिरभेदेनाध्यवसायः । यथा वा—"विश्लेषदुःखादिव बद्धमौनम्" । अत्र चेतनगतमौनित्वमन्यत्, अचेतनगतं च अन्यत् इति द्वयोर्भेदेऽप्यभेदः । (ङ) एवम् (क)—

"सद्दाधरदलेनाद्या यौवने रागभाक् प्रियः ॥"

अत्राधरस्य रागो लौहित्यं, प्रियस्य रागः प्रेम, द्वयोरभेदः । अभेदे भेदो यथा—

"अन्यदेवाङ्गलावण्यमन्याः सौरभसम्पदः ।
तस्याः पद्मपलाशाक्ष्याः सरसत्वमलौकिकम् ॥" (ख)

शिरसीत्यर्थः, कलापिनः,—मयूरस्य, कलापः,—बर्हं, कलपम् इति सर्वत्र योज्यम् ; कलापस्य पुच्छवर्त्तित्वं सर्वत्र दृष्टम्, इह तु उपरि कलपमिति भावः, (केशवर्णनमिदम्) तत्र—कलापस्य, तले—अधः, अष्टम्यामित्यैः इन्दुखण्डं—चन्द्रशकलम्, अष्टम्यां तिथौ हि चन्द्रः अष्टाभिः कलाभिः सम्पन्नो भवति, तस्मात् अर्द्धचन्द्र इत्यर्थः, उपचारात् तत्सदृशमिति भावः, विलसति—विराजते, (भालवर्णनमिदम्) ततः, —तस्मात्, अध इति शेषः, विलोलं—चपलं, कुवलययुगलं—नीलोत्पलद्वयं, राजत इति शेषः, (नेत्रद्वयवर्णनमिदम्) तदधः,—तस्मात् अधः, नेत्रोत्पलतले इत्यर्थः, तिलकुसुमं, विराजते इति शेषः, (नासिकावर्णनमिदम्) अधात्—तिलकुसुमात्, अध इति शेषः, प्रवालं—नवपल्लवं, भातीति शेषः, (ओष्ठवर्णनमिदम्)। अत्र केशपाशादिभिन्नोऽपि मयूरकलापादभेदेनाध्यवसीयते ।

(ङ) अत्रेति ।—केशपाशादेः इत्यादिपदेन भालनेत्रनासाऽधरग्रहणम् ।

(ङ) सादृश्यनिबन्धनाभेदारोपव्यतिरेकयोक्तिमुदाहृत्य एकशब्दप्रतिपाद्यत्वनिबन्धनाभेदारोपव्यपदेशमुदाहरति—यथा वेति । अत्र युगपदुक्तिद्वयस्य स्वार्थोपस्थापकत्वात्तयोरैक्यादेव एकशब्दोपस्थाप्यत्वम् इत्यभिप्रायेणाह, अत्रेति ।—चेतनगतं मौनित्वं धर्मभावरूपम्, अचेतनगतञ्च धर्म्यभावरूपम् ; आद्ये प्रमाणं, द्वितीये लक्षणा, ताभ्यामेकदैव उभयमुपस्थाप्यते शेषेण ।

(च) एकशब्दप्रतिपाद्यत्वनिबन्धनाभेदारोपव्यपदेशव्यतिरेकयोक्तिमुदाहरति, एकमिति ।—अत्र द्वयोरप्येकत्वनिबन्धनकार्य्यसाधनत्वरूपाऽतिशयोक्तिरवधेया ।

(छ) अभेदे भेदमुदाहरति, अन्यदिति ।—तस्याः पद्मपलाशाक्ष्याः,—अत्रावयव-

सम्बन्धेऽसम्बन्धो यथा—

"अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः ?
शृङ्गारैकरसः स्वयं नु मदनः ? मासो नु पुष्पाकरः ? ।
वेदाभ्यासजड़ः कथं नु विषयव्यावृत्तकौतूहलो
निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः ?" ॥(ग)

लोचनायाः, अङ्गलावण्य—देहकान्तिः, अन्यदेव—असाधारणमेवेत्यर्थः, सौरभसम्पदः,—गुणपरम्पराः, अन्याः,—असाधारण्यः इत्यर्थः, एवेति पूर्वतोऽन्वेति ; तथा सरसत्वं—रसिकत्वं, रसबोद्धृत्वमित्यर्थः, अलौकिकं—लोकातीतम्, अन्यदेवेति यावत् । अत्र अभिन्नमपि अङ्गलावण्यादिकं भिन्नत्वेनाध्यवसीयते ।

(ग) सम्बन्धे असम्बन्धमुदाहरति, अस्या इति ।—उर्वशीं दृष्ट्वा पुरूरवसो वितर्कवर्णनमिदम् । अस्याः,—उर्वश्याः, सर्गस्य—उत्पत्तेः, विधिः,—विधानं तत्र, सृष्टिकर्मणीत्यर्थः, चन्द्रः नु (इदं वितर्के) कान्तिं—शोभां, सौन्दर्य्यमिति यावत्, प्रददातीति तथाभूतः, (चन्द्रस्य कान्तिमयत्वात् कान्तिप्रदत्वं सम्भाव्योक्तम्) प्रजापतिः,—स्रष्टा, अभूत् ? चन्द्राख्येन प्रजापतिना सौन्दर्य्यमुत्पादितमिति भावः ; शृङ्गारस्य एकः,—मुख्यः, असौ रसो यस्य तथाविधः, मदनः,—कामदेवः, स्वयं नु—साक्षात् खलु, प्रजापतिरभूत् ? इत्यन्वयः ; अन्यथा कथमेवं कुसुमवत् अङ्गानां सौकुमार्य्यमिति भावः ; पुष्पाणामाकरः तथाभूतः,—वासन्तः, चैत्र इत्यर्थः, मासः नु प्रजापतिरभूत् ? इति पूर्वतोऽन्वेति ; यद्वा—अस्याः,—उर्वश्याः, सर्गविधौ चन्द्रो नु कान्तिप्रदः,—सौन्दर्य्याधायकः, प्रजापतिरभूत् ? किंवा शृङ्गारमात्रपरः खलु मदनः कामः, कान्तिप्रदः प्रजापतिरभूत् ? आहोस्वित् पुष्पाकरः उपचाराच्चैत्राख्यः, खलु मासः कान्तिप्रदः प्रजापतिरभूत् ? (सौरभ्यसौकुमार्य्यास्पदत्वमत्र हेतुर्बोध्यः) अस्य प्रसिद्धत्वान्न निर्हेतुकत्वदोषः ; यद्वा—"शृङ्गारैकरसः" इति चैत्रस्यापि विशेषणं, तस्य वासन्तमासत्वात् वसन्तस्य च स्मरोद्दीपकत्वात् । ननु प्रसिद्धं प्रजापतिं तथाऽनवधार्य्य किमन्यमेवं कल्पसे ? इत्याशङ्क्याह, वेदेति ।—वेदानाम् अभ्यासेन—पुनःपुनरनुशीलनेन, परमतात्पर्य्यपर्य्यालोचनेनेत्यर्थः, जड़ः,—कर्त्तव्यविमूढ़ः, विषयोपभोगाचतुर इति यावत् कामव्यापारानभिज्ञ इति भावः, अत एव विषयेभ्यो व्यावृत्तं—निवृत्तं, कौतूहलम्—औत्सुक्यं यस्य तथाभूतः, पुराणः,—वृद्धः, अत एव विकल इति यावत्, मुनिः,—मननशीलः, नारायण-ऋषिः इत्यर्थः, [एतेन सृष्टिकर्मणि चित्तैकाग्र्यत्वं नास्तीति सूचितम्] तद्विनैतादृशरूपसृष्टिर्न भवतीति भावः ; इदम्—ईदृशं, मनोहरं

अत्र पुराणप्रजापतिनिर्माणसम्बन्धेऽप्यसम्बन्धः। (घ)

असम्बन्धे सम्बन्धो यथा—

"यदि स्यान्मण्डले सक्तमिन्दोरिन्दीवरद्वयम्।
तदोपमीयते तस्या वदनं चारुलोचनम्॥" (ङ)

अत्र यद्यर्थबलादाहृतेन सम्बन्धेन सम्भावनया सम्बन्धः। कार्य्यकारणयोः पौर्वापर्य्यविपर्य्ययश्च द्विधा भवति—कारणात् प्रथमं कार्य्यस्य भावे, द्वयोः समकालत्वेन च। (च) क्रमेण यथा—

—सौन्दर्य्यातिशयेन सर्वेषां चेतोवृत्तेराकर्षकमिति भावः, रूपं निर्मातुं—रचयितुं, कथं नु—केन प्रकारेण, केनोपायेन वा, प्रभवेत्?—समर्थो भवेत्? पुरा किल नारायणं भगवन्तं तपःपरं विलोक्य, तपसा विजित्य स्वर्गाधिपत्यमयं कामयते इति त्रस्तैः देवैस्तं तपसो निवर्त्तयितुं सवसन्ताप्सरस्कः कामदेवः आज्ञप्तः, स च तत्सविधे वसन्तेन स्वप्रभावे प्रदर्शिते अप्सरसः प्रवर्त्तितवान्, ताश्च स्वविलासवैभवेन तं मोहयितुं प्रवृत्ता अपि यदा न प्रभवन्ति स्म, तदा भीतास्ताः सन्तोषयितुं भगवान् नारायणः स्वकीयादूरोरनेका अद्भुतसौन्दर्य्या अप्सरस उद्भाव्य ता ग्रहीतुमाज्ञप्तवान्, ताश्च तासां यामेकामादाय निर्जग्मुः, सैवेयमुर्वशीति पौराणिकी गाथाऽत्रानुसन्धेया। इदं काव्यप्रकाशे शुद्धसन्देहोदाहरणत्वेन उपन्यस्तं, तन्मते विधेर्निर्मातृत्वव्यावृत्तिरपि संशयितैवेति न निश्चयान्तत्वमस्य इति ज्ञेयम्। शार्दूलविक्रीडितं वृत्तम्। विक्रमोर्वश्याः पद्यमेतत्।

(घ) अत्र पुराणेति।—एवञ्च पुराणमुनेर्निर्मातृत्वेऽपि तदनिर्मातृत्वसम्बन्धेनाध्यवसानात् सम्बन्धातिशयोक्तिरियम्।

(ङ) असम्बन्धे सम्बन्धमुदाहरति, यदीति।—यदि इन्दोः,—चन्द्रस्य, मण्डले—बिम्बे, इन्दीवरद्वयं—नीलोत्पलयुगलं, सक्तं—युक्तं, स्यात्, तदा तस्याः,—कान्तायाः इत्यर्थः, चारुलोचनं—चारुणी—मनोहरे, लोचने—नेत्रे यत्र तादृशं, सुन्दरनयनसमन्वितमित्यर्थः, वदनम् उपमीयते, सेन्दीवरद्वयेन चन्द्रमण्डलेनेति भावः। इयमद्भुतोपमेति दण्डी।

(च) नन्विन्दीवरद्वयस्येन्दुमण्डले व्यतिरेकप्रतीतिरेव जायते, कथं सम्बन्धाध्यवसायः? इत्यत आह, अत्र यद्यर्थेति।—यदिशब्दस्य अर्थबलात्—अर्थसामर्थ्यात्,

"प्रागेव हरिणाक्षीणां चित्तमुत्कलिकाकुलम् ।
पश्चादुद्भिन्नवकुल-रसालमुकुलश्रियः ॥" (छ)
"सममेव समाक्रान्तं द्वयं द्विरदगामिना ।
तेन सिंहासनं पित्र्यं मण्डलञ्च महीक्षिताम् ॥" (ज)

इह केचिदाहुः,—"केशपाशादिगतो लौकिकोऽतिशयो-

आहृतेन—आरोपितेन, सम्बन्धेन—पदार्थेन, इन्दीवरसंयोगेन इत्यर्थः, सम्भावनया—अध्यवसायेन, सम्बन्धः, गृह्यते इति शेषः ; इन्दीवरासम्बद्धमपि वदनं तत्सम्बद्धत्वेनाध्यवसीयते इति भावः । यद्यर्थप्रयोगे एवायं प्रकारः सम्भवति, आहार्य्य एव सम्बन्धाध्यवसायः इत्याशयः । अत एवोक्तं काव्यप्रकाशे—"यद्यर्थोक्तौ च कल्पनम्" इति । द्वयोः,—कार्य्यकारणयोः, समकालत्वेन—समकालोत्पन्नत्वेन इत्यर्थः ।

(छ) कारणात् प्रथमं कार्य्यस्य भावमुदाहरति, प्रागेवेति ।—हरिणाक्षीणां—मृगलोचनानां, चित्तं—चेतः, प्रागेव—पूर्वमेव, उत्कलिकया—उत्कण्ठया, आकुलं—व्याप्तं, जातमिति शेषः, पश्चात् उद्भिन्नाः,—प्रफुल्लाः, वकुलानां रसालानाम्—आम्राणाञ्च, मुकुलानां श्रियः,—शोभाः, यद्वा—उद्भिन्नानाम्—उत्फुल्लानां, वकुलानामाम्रमुकुलानाञ्च, श्रियः, जाता इति शेषः । अत्रोत्कण्ठायाः कारणात् वकुलरसालमुकुलश्रीणामुद्भेदात् प्राक् कार्य्यस्य उत्कण्ठारूपस्य उत्पत्तिः । प्रफुल्लवकुलरसालादीन् अवलोक्य हरिणाक्षीणां मदनोद्रिक्ततया चेतोव्याकुलत्वं युक्तं, किन्तु आसां प्रफुल्लवकुलाद्यवलोकनतः पूर्वमेव यज्जातं, तेन कार्य्यकारणयोः स्फुटं पौर्वापर्य्याभाव इति तन्मूलेयमतिशयोक्तिरिति भावः ।

(ज) सममिति ।—द्विरदः,—गजः, तद्वत् गमनशीलेन, तेन—रघुणा इत्यर्थः, पित्र्यं—पितृसम्बन्धि, पितुरागतमित्यर्थः, सिंहासनं महीक्षितां—राज्ञां, मण्डलं—चक्रञ्च, ["अखिलं चारिमण्डलम्" इति पाठे—अखिलं—समस्तम्, अरीणां—शत्रूणां, मण्डलं—राज्यञ्चेत्यर्थः] इति द्वयं सममेव—एककालमेव, समाक्रान्तम्—आरूढं वशीकृतञ्च, न तु राज्ञो विजित्य राजासनमधिष्ठितम् । [अनयोः कारणस्यात्यन्तशीघ्रकारित्वं व्यज्यते]। केचित्तु—"सममेवेत्यादिद्वितीयप्रकारः "धुनोति चासिं तनुते च कीर्त्तिम्" इतिवत् समुच्चयालङ्कारस्यैव विषयः" इति वदन्ति, तन्न ; विरूपशब्दाभ्यामेव क्रिययोरुपादाने हि समुच्चयस्वीकारात् ; एवञ्च राजमण्डलाक्रमणरूपस्य कारणस्य राजासनाधिरोहणरूपस्य कार्य्यस्य च एककालिकत्वाभिधानात् पौर्वापर्य्यव्युत्क्रममूलेयमतिशयोक्तिः । रघुवंशस्येदं पद्यम् ।

ऽलौकिकत्वेनाध्यवसीयते ; केशपाशादीनां कलापादिभिरध्यवसाये "अन्यदेवाङ्गलावण्यम्" इत्यादिप्रकारेष्वव्याप्तिर्लक्षणस्य" इति, तन्न ; तत्रापि ह्यन्यदङ्गलावण्यमन्यत्वेनाध्यवसीयते। तथा हि "अन्यदेव" इति स्थाने "अन्यदिव" इति पाठे अध्यवसायस्यासाध्यत्वमेवेत्युत्प्रेक्षाऽङ्गीक्रियते। "प्रागेव हरिणाक्षीणाम्" इत्यत्र वकुलादिश्रीणां प्रथमभाविताऽपि पश्चाद्भावित्वेनाध्यवसिता, अत एव अत्रापि इवशब्दप्रयोगे उत्प्रेक्षा। एवमन्यत्र (झ)।

पदार्थानां प्रस्तुतानामन्येषां वा यदा भवेत्।
एकधर्माभिसम्बन्धः स्यात् तदा तुल्ययोगिता ॥७१६॥(ञ)

अन्येषाम्—अप्रस्तुतानां, धर्मः,—गुणक्रियारूपः। उदाहरणम्—

"अनुलेपनानि कुसुमान्यबलाः
कृतमन्यवः पतिषु दीपशिखाः।

(झ) इह केचिदाहुरिति।—कलापादिभिरध्यवसाये, विवक्षिते इति शेषः, अन्यदेवाङ्गलावण्यमित्यादिप्रकारेषु अव्याप्तिर्लक्षणस्येति—अन्यदेवेत्यत्र लावण्यान्तरस्य भिन्नत्वेन अध्यवसायरूपत्वासम्भवादिति भावः। एवमन्यत्रापि यथायथं ज्ञेयम्। अन्यदिति।—अतिशयप्रतीतये एतद्व्यक्तेरेव भेदः तत्र अध्यवसीयते इत्यर्थः। तथा हीति।—निरुक्ताध्यवसायस्वीकारे अनुभवसिद्धोत्प्रेक्षा न स्यात् इति भावः। अन्यदिवेति पाठे उत्प्रेक्षाऽङ्गीक्रियते, तन्न ; अत्र हि अन्यदङ्गलावण्यमन्यत्वेनाध्यवसितम्। वकुलादिश्रीणामिति।—एवमुत्कलिकायाः पश्चाद्भाविताऽपि पूर्वभावित्वेनाध्यवसितेति बोध्यम्। एवमिति—उक्तदिशा इत्यर्थः, अन्यत्र—उदाहरणान्तरेऽपि, तृतीयचतुर्थप्रकारयोरव्याप्त्युद्धारो बोद्धव्यः इति भावः ; तथा हि—तादृशरूपस्य निर्माता विधिः अनिर्मातृत्वेन इन्दुमण्डलासक्तमिन्दीवरद्वयम् इन्दुमण्डलसक्तत्वेनाध्यवसीयते इति भावः।

(ञ) तुल्ययोगितामाह, पदार्थानामिति।—प्रस्तुतानां—प्रकृतानां, वा अन्येषाम्—अप्रस्तुतानां, पदार्थानां—विषयाणां, यदा एकधर्माभिसम्बन्धः,—एकेन धर्मेण—गुणक्रियाऽन्यतररूपेण, संयोगः भवेत्, तदा तुल्ययोगिता—तदाख्योऽलङ्कारः, स्यात्।

समयेन तेन चिरसुप्तमनो-
भवबोधनं सममबोधिषत ॥" (ट)

अत्र सन्ध्यावर्णनस्य प्रस्तुतत्वात् (ठ) प्रस्तुतानामनुलेपनादीनाम् एकबोधनक्रियाऽभिसम्बन्धः ।

"त्वदङ्गमार्दवं द्रष्टुः कस्य चित्ते न भासते ।
मालतीशशभृल्लेखा-कदलीनां कठोरता ?" ॥ (ड)

(ट) क्रियारूपधर्मसम्बन्धमुदाहरति, अनुलेपनानीति ।—सन्ध्यावर्णनमिदम् । तेन समयेन—सन्ध्याकालेन, तमस्विना इति भावः, अनुलेपनानि—अङ्गरागद्रव्याणि, चन्दनादीनि इत्यर्थः, कुसुमानि—माल्यादीनि, तथा पतिषु—भर्त्तृषु, कृतमन्यवः,—मानवत्य इत्यर्थः, अबलाः,—नार्य्यः, तथा दीपशिखाः,—दीपज्वालाश्च, इत्येतानि सर्वाणि चिरं सुप्तस्य—पूर्वं स्तब्धस्य, मनोभवस्य—कामस्य, बोधनम्—उद्दीपनं यस्मिन् कर्मणि तद्यथा तथा, तत्पूर्वकमित्यर्थः, इतरथा अनुलेपनादिबोधनस्य वैफल्यसम्भवाच्च इति भावः, समं—सहैव, अबोधिषत—बोधितानि । प्रमिताक्षरा वृत्तम् । तल्लक्षणं चोक्तं यथा—"प्रमिताक्षरा सजसैः कथिता" इति । शिशुपालवधस्येदं पद्यम् ।

(ठ) अत्रेति ।—प्रस्तुतत्वात्—प्रस्तुते तमसि स्फुरद्रूपत्वात्, अनुलेपनादीनामपि प्रस्तुतत्वम् इत्यभिप्रायः, एवं हि गन्धमाल्यादीनां प्रस्तुतानामवबोधनरूपैकधर्मसम्बन्ध इति तुल्ययोगिता । एषा च—गन्धमाल्यसम्पादनस्त्रीमनःप्रसाददीपशिखोत्पादनानाम् अबोधिषतेत्येकेन श्लिष्टशब्देनाभिधानात् श्लेषमूलाभेदाध्यवसायरूपाऽतिशयोक्तिरेका, तथा सुप्तमनोभवबोधनमिति क्रियाविशेषणसामर्थ्यात् सममिति यौगपद्याभिधानाच्च मनोभवबोधनया कार्य्यकारणभूतयोस्तद्विपर्य्ययरूपा अपरा, तदुभयापेक्षया गन्धमाल्यादीनां प्रस्तुतानामवबोधनरूपैकधर्मसम्बन्धात् तुल्ययोगिताभेदश्चेति सङ्करः इति मल्लिनाथादयः ।

(ड) गुणरूपधर्मसम्बन्धमुदाहरति, त्वदिति ।—तव अङ्गस्य मार्दवं—सौकुमार्य्यं, ["तदङ्गमार्दवम्" इति पाठान्तरं, तत्र—तस्याः अङ्गानां मार्दवं—मृदिमा, तत्तथोक्तम् । "न लोकाव्ययनिष्ठाखलर्थतृनाम्" (२।३।६९ पा०) इति सूत्रेण षष्ठ्या निषेधात् द्वितीया । क्वचित् समस्तपाठोऽपि दृश्यते] द्रष्टुः,—पश्यत इत्यर्थः, कस्य, जनस्य इति शेषः, चित्ते—मनसि, मालतीशशभृल्लेखाकदलीनां—जातीपुष्पचन्द्ररेखारम्भाकाण्डानामित्यर्थः, कठोरता—कार्कश्यं, न भासते ?—न प्रतिभाति ? अपि तु सर्वस्येत्यर्थः । अत्र मालत्यादीनाम् उपमानत्वेनाप्रस्तुतानां कठोरताऽऽत्मकेनैकेनैव गुणेन

इत्यत्र मालत्यादीनामप्रस्तुतानां कठोरतारूपैकगुण-सम्बन्धः। एवम्—

"दानं वित्तादृतं वाचः कीर्त्तिधर्मौ तथाऽऽयुषः।
परोपकरणं कायादसारात् सारमाहरेत्॥" (ढ)

अत्र दानादीनां कर्मभूतानां सारतारूपैकगुणसम्बन्धे एकाहरणक्रियासम्बन्धः।

अप्रस्तुतप्रस्तुतयोर्दीपकन्तु निगद्यते।
अथ कारकमेकं स्यादनेकासु क्रियासु चेत्॥७१७॥(ण)

सम्बन्धः। यत्तु "अत्र वर्णनीयतया नायिका प्रस्तुता, मालत्यादीनां तूपमानत्वेना-प्रस्तुतत्वम्" इत्युक्तं तर्कवागीशैः, तस्यायं भावः,—नायिकां प्रस्तुत्य मालत्यादीना-मप्रस्तुतानां कठोरतारूपेण एकेन धर्मेण सम्बन्धः इति।

(ढ) गुणक्रियोभयाभिसम्बन्धे तुल्ययोगितामुदाहरति, दानमिति।—असा-रात्—ईषत्सारो यत्र तस्मादित्यर्थः, न तु न सारो यत्र तस्मात्, तथाऽसम्भवात्; वस्तुनः इति शेषः, सारम्—उत्कृष्टांशम्, आहरेत्—सङ्गृह्णीयात्, तथा हि—वित्तात्—धनात्, असारादिति शेषः, वित्तस्य दानैकप्रयोजनत्वात्, दानं, सारमिति सर्वत्रान्वेतव्यम्; असारायाः वाचः, वाचोऽसारत्वञ्च सत्यपरत्वाभावे, ऋतं—सत्यम्, आयुषः,—जीवनकालात्, असारादिति शेषः, कीर्त्तिधर्मौ, "येन कीर्त्तिर्धर्मो वा नोपार्जितस्तस्य जीवनं मरणादधमम्" इति नयेन जीवनस्य कीर्त्तिधर्मैकफलत्व-मूह्यं, तथा कायात्—देहात्, परोपकरणं—परेषामुपकारम्, आहरेदित्यन्वयः, अन्यथाऽस्य वैफल्यं, "कायेन वाचा मनसा च ये नराः परोपकाराय सदैव दीक्षिताः। त एव धन्याश्च त एव जीविताः" इत्याद्युक्तदिशाऽवसेयम्।

(ण) दीपकमाह, अप्रस्तुतेति।—अप्रस्तुतप्रस्तुतयोः,—अप्रकृतप्रकृतयोः, एक-धर्माभिसम्बन्धः इति पूर्वतोऽत्रानुवर्त्तनीयं, दीपकं—दीपयति—प्रकाशयति, प्रकृतार्थ-मुपात्तो धर्मोऽद्भुततां नयतीति तथोक्तम्; यद्वा—दीप इव दीपकं [संज्ञार्थे कन्। दीपतुल्यत्वं हि प्रस्तुताप्रस्तुताभासकत्वेन ज्ञेयम्] निगद्यते। ननु "कमलमिव मुखं मनोज्ञम्" इत्यादौ अतिव्याप्तिः इति चेत्, न; साम्यवाचकपदाभावे सतीत्यस्य विवक्षणीयत्वात्; एवं वैधर्म्योक्त्यभावे सतीत्यपि बोध्यम्; तेन "त्वं समुद्रश्च दुर्वारौ महासत्त्वौ सतेजसौ। अयन्तु युवयोर्भेदः स जडात्मा पटुर्भवान्॥" इत्यादि-

क्रमेण उदाहरणम्—

"बलावलेपादधुनाऽपि पूर्ववत्
प्रबाध्यते तेन जगज्जिगीषुणा ।
सती च योषित् प्रकृतिश्च निश्चला
पुमांसमभ्येति भवान्तरेष्वपि ॥" (त)

अत्र प्रस्तुतायाः निश्चलायाः प्रकृतेरप्रस्तुतायाश्च सत्याः योषित एकानुगमनक्रियासम्बन्धः ।

"दूरं समागतवति त्वयि जीवनाथे
भिन्ना मनोभवशरेण तपस्विनी सा ।
उत्तिष्ठति क्षपिति वासगृहं त्वदीयम्
आयाति याति हसति श्वसिति क्षणेन ॥" (थ)

व्यतिरेकालङ्कारे नातिव्याप्तिः । प्रकारान्तरेण दीपकमाह, अथेति ।—अथ—किंवा, चेत्—यदि, अनेकासु क्रियासु एकं कारकं सम्बद्धं स्यात्, तदाऽपि दीपकं स्यादित्यर्थः ।

(त) प्रथमं दीपकमुदाहरति, बलेति ।—जिगीषुणा—जयेच्छुना, तेन—शिवपालेन इत्यर्थः, बलावलेपात्—सामर्थ्यगर्वात्, अधुनाऽपि—अस्मिन् जन्मनि अपि, पूर्ववत्—पूर्वजन्मनीव, जगत् प्रबाध्यते—प्रपीड्यते ; तथा हि—सती—साध्वी, योषित्—स्त्री च, निश्चला—सुदृढा, सदाऽपि अनपायिनीत्यर्थः, प्रकृतिश्च—स्वभावश्च, [अत्र चकारादिकं समुच्चयार्थम्, एतेन प्रस्तुतायाः प्रकृतेः अप्रस्तुतायाः सत्याश्च "अभ्येति" इत्येतया क्रियया सम्बन्धः सूचितः] भवान्तरेषु—जन्मान्तरेषु अपि, पुमांसं—जन्मान्तरीयावयवभूतमिति भावः, अभ्येति—प्राप्नोति । तथा च मनुः,—"पतिं या नाभिचरति मनोवाग्देहसंयता । सा भर्तृलोकमाप्नोति सद्भिः साध्वीति चोच्यते ॥" इति । ["सतीव योषित् प्रकृतिः सुनिश्चला" इति शिवपालवधधृतपाठे उपमालोपमेयपुरस्कृतोऽर्थान्तरन्यासालङ्कारः] । वंशस्थविलं वृत्तम् । शिवपालवधस्थोऽयं श्लोकः ।

(थ) द्वितीयं दीपकमुदाहरति, दूरमिति ।—दूत्या नायकं प्रत्युक्तिरियम् । जीवनाथे—प्राणवल्लभे, त्वयि—भवति इत्यर्थः, दूरं—देशान्तरमित्यर्थः, समागतवति—प्रस्थितवति सति, सा तपस्विनी—वराकी, मनोभवशरेण—कामबाणेन, भिन्ना—विद्धा सती, क्षणेन उत्तिष्ठति, क्षपिति—निद्राति, त्वदीयं—तव इत्यर्थः,

इदं मम । अत्रैकस्या नायिकाया उत्थानाद्यनेकक्रिया-सम्बन्धः ।

अत्र च गुणक्रिययोरादिमध्यावसानसद्भावेन त्रैविध्यं न लक्षितम् । तथाविधवैचित्र्यस्य सर्वत्रापि सहस्रधा सम्भवात् ।

प्रतिवस्तूपमा सा स्याद्वाक्ययोर्गम्यसाम्ययोः ।
एकोऽपि धर्मः सामान्यो यत्र निर्दिश्यते पृथक् ॥७१८॥(द)

यथा—

"धन्याऽसि वैदर्भि ! गुणैरुदारैः
यया समाकृष्यत नैषधोऽपि ।
इतः स्तुतिः का खलु चन्द्रिकायाः
यदब्धिमप्युत्तरलीकरोति ?" ॥ (ध)

वासगृहम् आयाति—आगच्छति, याति—गच्छति, हसति, श्वसिति—निश्वासान् त्यजति । ["जीवनाथ" इति पाठान्तरं, तथात्वे—हे जीवनाथ ! इति सम्बुद्धिः] । वसन्ततिलकं वृत्तम् । यथा वा—"खिद्यति कूणति वेल्लति विचलति निमिषति विलोकयति तिर्य्यक् । अन्तर्नन्दति चुम्बितुमिच्छति नवपरिणया वधूः शयने ॥" अत्रार्य्यागीतिश्छन्दः ।

(द) प्रतिवस्तूपमामाह, प्रतीति ।—गम्यं—प्रणिधानवेद्यं, साम्यं—सादृश्यं ययोः तादृशयोः, प्रतीयमानोपमानोपमेयभावयोः इत्यर्थः, वाक्ययोः,—वाक्यार्थयोः ; (तेन "पद्मं मनोज्ञं रुचिरः शशाङ्कः" इत्यादौ नातिव्याप्तिः, तत्र वाक्यार्थयोरुपमानोपमेयभावप्रत्ययाभावात् । "प्रकाशते मुखं तस्याश्चन्द्रमा दीप्यते यथा" इत्याद्युपमावारणाय गम्येति ; न चात्र प्रागुक्तरीत्यैकवाक्यत्वमेवेति वाच्यम्, अत्र गम्य इत्युपादानादेव तत्र तथा कल्पनात्, अन्यथा भिन्नवाक्ये उपमाप्रसक्त्यभावेन प्रतिवस्तूपमैव न स्यात्) । दृष्टान्तवारणायाह, एकोऽपीति ।—एकोऽपि ["एकरूपः क्वचित् क्वापि भिन्नः साधारणो गुणः" इत्युक्तदिशा प्राप्तस्य भिन्नसामान्यधर्मस्य व्यवच्छेदः पृथग्भिन्नशब्दाभ्यां, तेन दीपकस्य व्यवच्छेदः] सामान्यः,—साधारणः, धर्मः,—गुणक्रियारूपः, पृथक्—पर्य्यायशब्देन, यत्र निर्दिश्यते, सा प्रतिवस्तूपमा—प्रतिवस्तु—प्रत्यर्थम्, उपमा यस्यां तथाभूता, स्यात् ।

(ध) धन्याऽसीति ।—दमयन्तीं प्रति हंसस्योक्तिरियम् । वैदर्भि !—हे विदर्भ-

अत्र समाकर्षणमुत्तरलीकरणञ्च क्रिया एकैव, पौनरुक्त्य-निरासाय भिन्नवाचकतया निर्दिष्टा। इयं (न) मालयापि दृश्यते। यथा—

"विमल एव रविर्विशदः शशी
प्रकृतिशोभन एव हि दर्पणः।
शिवगिरिः शिवहाससहोदरः
सहजसुन्दर एव हि सज्जनः॥" (प)

अत्र विमलविशदादिरर्थतः (फ) एक एव।

वैधर्म्येण (ब) यथा—

राजनन्दिनि! दमयन्ति! त्वं धन्याऽसि—साधुवादार्हाऽसीत्यर्थः, यया, त्वयेति शेषः, नैषधोऽपि—निषधाधिपः नलोऽपि, उदारैः,—महद्भिः, गुणैः,—सौन्दर्यादिभिः, समाकृष्यत—सम्यक् आकृष्ट इत्यर्थः, [समाकर्षक्रियायाः करकश्रीपयोनिधया गुणपदं श्लिष्टं, तेन गुणैरिव गुणैरित्युपमा व्यज्यते इति बोध्यम्] चन्द्रिकायाः,—ज्योत्स्नायाः, इतः,—यस्मात् यत्रिका, स्तुतिः,—महिमा, का खलु? यत् यस्मिन्—खलुद्रमपि, उत्तरलीकरोति—उपरञ्जयति। उपजातिः छन्दः। इदं नैषधीय-चरितस्य पद्यम्।

(न) पौनरुक्त्येति।—कथितपदत्वदोषनिराकरणायेत्यर्थः, भिन्नवाचकतया—विभिन्नवाचकत्वेन। इयं—प्रतिवस्तूपमा इत्यर्थः।

(प) विमल इति।—रविः,—सूर्यः, विमलः एव—स्वच्छः एव, प्रकाशमय एव इति यावत्, शशी—चन्द्रः, विशदः,—उज्ज्वलः, दर्पणः,—मुकुरः, प्रकृतेः,—स्वभावात्, शोभन: एव, शिवस्य गिरिः,—पर्वतः, कैलास इति यावत्, शिवस्य हासस्य च सहोदरः,—सदृशः, सज्जनः,—सत्पुरुषः, सहजसुन्दरः,—प्रकृत्या साधुः एव, भव-तीति शेषः। यद्वा वा—"यदि दृश्यमनर्घोऽसि विमलस्तं! यदि च गौरवमद्रिषु चिंतः?। यदचलस्तु यदैव सहोदरैः प्रकृतिरेव समानविधादिता॥" इति।

(फ) ननु च प्रतिवस्तूपमा धर्मभेद एव, अत्र धर्मैक्यं कथं प्रतिवस्तूपमा? इत्यत आह, यत्रेति।—यत्रेतः,—तात्पर्यात्, विमलादिपदानां विभिन्नार्थवाचकत्वेऽपि पर्यवसाने तात्पर्यवशादेकस्यैवार्थस्य बोधकत्वमिति भावः।

(ब) वैधर्म्येणेति।—विपरीतधर्मेणेत्यर्थः।

"चकोर्य्य एव चतुराश्चन्द्रिकापानकर्मणि ।
विनाऽवन्तीनं निपुणाः सुहृदो रतनर्मणि ॥" (भ)

दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनम्॥७१६॥ (म)

सधर्मस्येति प्रतिवस्तूपमाव्यवच्छेदः । अयमपि (य) साधर्म्य-वैधर्म्याभ्यां द्विधा । क्रमेण उदाहरणम्—

"अविदितगुणाऽपि सत्कवि-
भणितिः कर्णेषु वमति मधुधाराम् ।
अनधिगतपरिमलाऽपि हि
हरति दृशं मालतीमाला ॥" (र)

(भ) चकोर्य्य इति ।—चकोर्य्याः एव चन्द्रिकायाः,—उपचारात् चन्द्रमरुचस्तात् चरन्त्याः सुधायाः, पानकर्मणि—पानक्रियायां, ["चन्द्रिकापानकर्मणि" इति पाठान्तरेऽप्ययमेव अर्थः । आचामः,—पानम्] चतुराः,—निपुणाः, अवन्तीः,—अवन्तिदेशोद्भवाः कामिनीः, विना—विना इत्यर्थः, सुहृदः,—सुन्दर्य इत्यर्थः, रतनर्मणि—सुरतविलासे, न निपुणाः । अत्र चतुरा इति न निपुणा इति विपरीतधर्मत्वम् ।

(म) दृष्टान्तमाह, दृष्टान्त इति ।—सधर्मस्य—समानधर्मवतः, सदृशस्येत्यर्थः, वस्तुनः,—विषयस्य, सामान्यधर्मस्येति भावः, प्रतिबिम्बनं—प्रतिधानमन्यसाम्यत्वम्, (अत्रापि "वाक्यतो:" इत्यनुवर्त्तते, तेन "भङ्गापवर्गितैः" इत्यत्र नातिव्याप्तिः, एकवाक्यत्वात्) दृष्टान्तः ।

(य) सधर्मस्येति ।—अत्र धर्मस्य साम्यं न तु एकरूपत्वं, प्रतिवस्तूपमायाम् एकरूपत्वं न तु साम्यमित्यनयोर्भेद इति भावः । अयमपि—दृष्टान्तोऽपीत्यर्थः ।

(र) अविदितेति ।—सतां कवीनां भणितिः,—वाणी, अविदितगुणा अपि, अप्रसिद्धविशेषाऽपीति भावः, कर्णेषु मधुधारां वमति—उद्गिरति, माधुर्य्यादिगुणसम्पन्नेरिति तात्पर्य्यं, मालतीमाला अनधिगतः,—अप्राप्तः, परिमलो यस्यास्तादृशी अपि, दृशं—नेत्रं, हरति—आकर्षति, सौन्दर्य्यातिशयादिति भावः; अत्र मधुधारावमनस्य नेत्रहरत्वस्य च नैकरूपत्वं, परं प्रतिधानेन तस्यसाम्यत्वमनयोरिति द्रष्टव्यम् । आर्य्या छन्दः । वाचकदत्तायाः पद्यमेतत् । यथा वा—"त्वयि दृष्ट एव तस्या निर्याति मनो भवज्वलितम् । चाकीर्णे हि दिनाग्रोर्विकसति कुसुमं कुमुदस्याः ॥" इति ।

"त्वयि दृष्टे कुरङ्गाक्ष्याः संसते मदनव्यथा।
दृष्टाऽनुदयभाजीन्दौ ग्लानिः कुमुदसंहतेः॥" (ख)

"वसन्तलेखैकनिबद्धभावं
परासु कान्तासु मनः कुतो नः?।
प्रफुल्लमल्लीमधुलम्पटः किं
मधुव्रतः काङ्क्षति वल्लिमन्याम्?" ॥ (घ)

इदं पद्यं मम। अत्र "मनः कुतो नः?" इत्यस्य "काङ्क्षति वल्लिमन्याम्?" इत्यस्य चैकरूपतयैव पर्य्यवसानात् प्रतिवस्तूपमैव। इह तु कर्णे मधुधारावमनस्य नेत्रहरणस्य च साम्यमेव, न तु ऐकरूप्यम्। अत्र समर्थ्यसमर्थकवाक्ययोः सामान्यविशेषभावोऽर्थान्तरन्यासः, (ङ) प्रतिवस्तूपमादृष्टान्तयोस्तु न तथेति भेदः।

(ख) त्वयीति।—त्वयि दृष्टे सति कुरङ्गाक्ष्याः,—हरिणनेत्रायाः, मदनव्यथा—मदनपीडा, संसते—भंक्ष्यति, नश्यतीति यावत्, ["संसु अवःपतने" इत्यस्य धातोः प्रथमपुरुषैकवचनरूपमिदम्] इन्दौ—चन्द्रे, अनुदयभाजि—उदयमप्राप्ते सति, कुमुदसंहतेः,—कैरवसमूहस्य, ग्लानिः,—म्लानिः, सङ्कोच इत्यर्थः, दृष्टा—नेत्रविषयीकृता। अत्र मदनव्यथासंसनस्य ग्लानिदर्शनस्य च विपरीतेन प्रतिपादनगम्यसाम्यत्वमस्ति, सन्तोषविरोधित्वात्; अनयोः सत्त्वासत्त्वाभ्यां वैधर्म्यम् इति बोध्यम्। श्रीचन्द्रः,—"श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम्। द्विचतुःपादयोर्ह्रस्वं गुरु सप्तमनवमयोः॥" इति च तल्लक्षणम्।

(घ) वसन्तेति।—वसन्तलेखायां—तदाख्यायां कान्तायाम्, एकनिबद्धभावं—केवलानुरक्तमित्यर्थः, नः,—अस्माकं, मनः,—चेतः, परासु—अन्यासु, कान्तासु—रमणीषु, कुतः?—कस्मात्? अभिलाषि भवेदिति शेषः, प्रफुल्लायाः,—विकसितायाः मल्लयाः,—मल्लिकायाः, मधुलम्पटः,—रसलुब्धः, मधुव्रतः,—भ्रमरः, अन्याम्—अपरां, मल्लिकातिरिक्तामित्यर्थः, वल्लिं—लतां, काङ्क्षति—अभिलषति, किम्? नेवाभिलषतीत्यर्थः। अत्रोपेन्द्रवज्रा वृत्तं, तल्लक्षणञ्च यथोक्तम्—"उपेन्द्रवज्रा प्रथमे लघौ सा" इति।

(ङ) इह त्विति।—प्रीतिजनन एव पर्य्यवसानात् ऐकरूप्येऽपि प्रीतेर्वैलक्षण्यात्,

सम्भवन् वस्तुसम्बन्धोऽसम्भवन् वाऽपि कुत्रचित्।
यत्र बिम्बानुबिम्बत्वं बोधयेत् सा निदर्शना॥७२०॥(घ)

अथ सम्भवद्वस्तुसम्बन्धनिदर्शना यथा—

"कोऽत्र भूमिबलये जनान् मुधा
तापयन् सुचिरमेति सम्पदम् ?।
वेदयन्निति दिनेन भानुमान्
आससाद चरमाचलं ततः॥" (ङ)

अत्र रवेरीदृशार्थवेदनक्रियायां कर्तृत्वेनान्वयः सम्भवत्येव, ईदृशार्थज्ञापनसमर्थचरमाचलप्राप्तिरूपकर्मवत्त्वात्; स च रवेरस्ताचलगमनस्य परतापिनां विपत्प्राप्तेश्च बिम्बप्रतिबिम्बभावं बोधयति। असम्भवद्वस्तुसम्बन्धनिदर्शना तु एकवाक्यानेकवाक्यगतत्वेन द्विविधा। (च) तत्रैकवाक्यगा यथा—

वैलक्षण्यम इति भावः। अत्रेति—प्रतिवस्तूपमादृष्टान्तयोरित्यर्थः। समर्थ्येति।—समर्थ्यस्य—दृढीकार्यस्य, समर्थकस्य—दृढीकारकस्य, वाक्यद्वयस्य इत्यर्थः। सामान्यविशेषभावे इति—समर्थ्योरेकस्य सामान्यत्वे अपरस्य विशेषत्वे इत्यर्थः। प्रतिवस्तूपमादृष्टान्तयोस्तु न तथा—न सामान्यविशेषभावः, न वा समर्थ्यसमर्थकभावः इति अस्मात्तयो भेदः।

(घ) निदर्शनामाह, सम्भवन्निति।—कुत्रचित् सम्भवन्—अबाधितः, कुत्रचिदा असम्भवन्—बाधितः, वस्तुसम्बन्धः यत्र बिम्बानुबिम्बत्वं—प्रतिबिम्बानगम्यसाम्यत्वम, उपमानोपमेयभावमित्यर्थः, बोधयेत्, व्यञ्जनया इति शेषः, सा निदर्शना। अलङ्कारसर्वस्वकारेणाप्युक्तं—"सम्भवताऽसम्भवता वा वस्तुसम्बन्धेन गम्यमानं प्रतिबिम्बकरणं निदर्शना" इति।

(ङ) कोऽत्रेति।—अत्र भूमिबलये—भूमण्डले, कः,—जनः, जनान्—लोकान्, मुधा—निरर्थकं, तापयन्—पीडयन्, सुचिरं—दीर्घकालं व्याप्येत्यर्थः, सम्पदं—श्रियम, एति ?—प्राप्नोति ? न कोऽपीत्यर्थः; भानुमान्—सूर्यः, दिनेन—अह्ना, इति वेदयन्—ज्ञापयन्, ततः,—दिनान्ते इत्यर्थः, चरमाचलम्—अस्ताचलम, आससाद—प्राप। इन्द्रवज्रा वृत्तम्।

(च) अत्रेति।—ईदृशार्थस्य—उक्तरूपार्थस्य, पूर्वार्द्धनिर्दिष्टस्यार्थः, वेदन-

"कलयति कुवलयमाला-
ललितं कुटिलः कटाक्षविक्षेपः।
अधरः किसलयलीला-
माननमस्याः कलानिधिविलासम्॥" (क)

अत्र अन्यस्य धर्मं कथमन्यो वहत्विति कटाक्षविक्षेपादीनां कुवलयमालाऽऽदिगतललितादीनां कलनमसम्भवत् तल्ललितादिसदृशं ललितादिकमवगमयत् कटाक्षविक्षेपादेः कुवलयमालादेश्च बिम्बप्रतिबिम्बभावं बोधयति। यथा वा—

"प्रयाणे तव राजेन्द्र! सुता वैरिमृगीदृशाम्।
राजहंसगतिः पद्भ्यामाननेन शशिद्युतिः॥" (ख)

क्रियायां—ज्ञापनव्यापारे। दृष्टश्चार्थेति।—ज्ञापनसमर्थं—ज्ञापननिष्पादकं, यत् चरमाक्षरप्राप्तिरूपं कर्म तद्वत्त्वात्—तच्छालित्वादित्यर्थः। स च—वैधर्म्यक्रियान्वयः, बिम्बप्रतिबिम्बभावं—सम्यग्दृष्टं, (तच्चादर्शनप्रयोजकत्वेनेति बोध्यम्) बोधयति—प्रत्याययति। न सम्भवन् वस्तुसम्बन्धो यत्र तादृशी या निदर्शना सा तु एकवाक्यत्वे अनेकवाक्यत्वे, तानि गता, तस्या भावस्तत्त्वं तेन, एकवाक्यगतत्वेनानेकवाक्यगतत्वेन चेति भिद्यमाना द्विविधा।

(क) कलयतीति।—अस्याः,—कामिन्या इत्यर्थः, कुटिलः,—वक्रः, कटाक्षविक्षेपः,—अपाङ्गदर्शनं, कुवलयमालायाः,—नीलोत्पलस्रजः, ललितं—सौन्दर्यम्, अधरः किसलयश्च—पल्लवश्च, लीलां—शोभां, तथा आननं कलानिधेः,—चन्द्रस्य, विलासं—विभ्रमं, कलयति—धारयति। इह धर्मधर्मिणोरुपमाकल्पनम्। गीतिश्छन्दः।

(ख) धर्मयोरुपमाकल्पने निदर्शनालङ्कारमुदाहरति, प्रयाणे इति।—हे राजेन्द्र! तव प्रयाणे—युद्धयात्रायां, वैरिणां—शत्रूणां, या मृगीदृशः,—कामिन्यः तासां, पद्भ्यां—चरणाभ्यां, राजहंसगतिः,—राजहंसानां गतिरिति तथोक्ता, तथा आननेन—मुखेन, शशिद्युतिः,—शशिनः,—चन्द्रस्य, द्युतिरिति तथोक्ता, सुता—त्यक्ता; त्वद्भयात् पलायमानेषु वैरिषु तेषां या रमण्यस्तासामपि तानपि पलायने कर्त्तव्ये राजहंसानामिव मन्दं मन्दं गमनं, मुखस्य च शशिनश्चन्द्रस्येव तस्य सौन्दर्यशालित्वं विनष्टमिति भावः।

अत्र पादाभ्यामसम्बद्धराजहंसगतेस्त्यागोऽनुपपन्न इति तयोस्तत्सम्बन्धः (ग) कल्प्यते, स च असम्भवन् राजहंसगतिमिव गतिं बोधयति। अनेकवाक्यगा यथा—

"इदं किलाव्याजमनोहरं वपु-
स्तपःक्लमं साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया
शमीलतां छेत्तुमृषिर्व्यवस्यति॥" (घ)

अत्र यत्तच्छब्दनिर्दिष्टवाक्यार्थयोरभेदेनान्वयोऽनुपपद्यमानस्तादृशवपुषस्तपःक्लमत्वसाधनेच्छा नीलोत्पलपत्रधारया शमीलताच्छेदनेच्छेवेति बिम्बप्रतिबिम्बभावे पर्य्यवस्यति। (ङ) यथा वा—

(ग) अत्रेति।—तयोः,—पदयोः, तत्सम्बन्धः,—राजहंसगतिसम्बन्ध इत्यर्थः।

(घ) इदमिति।—शकुन्तलाया रूपं दृष्ट्वा राज्ञो दुष्मन्तस्योक्तिरियम्। यः किल (एतत् अरुचौ, तथा हि हैमः,—"किल सम्भाव्यवार्त्तयोः। हेत्वरुच्योरलीके च" इति) अव्याजेन—व्याजं—छलं विना, मनोहरं—सुन्दरं, स्वभावरमणीयमिति भावः, इदं—पुरःस्थितं, वपुः,—शरीरं, शकुन्तलाया इति शेषः, तपसि—तपश्चर्य्यायां, यत् क्लमं—क्लेशं, साधयितुं—सम्पादयितुम्, इच्छति, अर्थादनेन तपःक्लमं साधयितुं य इच्छति इति भावः, ["तपःक्षमम्" इति पाठे—तपसः,—तपश्चर्य्यायाः, क्षमं—योग्यमित्यर्थः] स ऋषिः,—कण्वमुनिरित्यर्थः, नीलञ्च तदुत्पलं—कमलं, तस्य पत्रं तस्य धारया—प्रान्तभागेन, शम्येव लता तां तथोक्ताम्, [उपमेये शकुन्तलावपुषि कोमलत्वसौभाग्यवत्त्वादिसाधारणधर्मसद्भावसूचनार्थं, तरुपदोपादाने लिङ्गव्यत्ययेन अनौचित्यदोषप्रसङ्गाच्च शम्यां लतात्वारोप इति विभावनीयम्] छेत्तुं व्यवस्यति—यतते, इच्छति इति यावत्, एतत् ध्रुवं—निश्चितम्। वंशस्थविलं वृत्तम्। अभिज्ञानशाकुन्तलस्येदं पद्यम्।

(ङ) अत्रेति।—यच्छब्दनिर्दिष्टवाक्यम्—इदमित्यादि इच्छतिपर्य्यन्तं, तच्छब्दनिर्दिष्टवाक्य—ध्रुवमित्यादि व्यवस्यतीत्यन्तं, तयोरर्थयोः अभेदेन—अभिन्नतया, अन्वयः,—सम्बन्धः, अनुपपद्यमानः,—असम्भवन्। बिम्बप्रतिबिम्बभावे—गम्यसादृश्ये, पर्य्यवस्यति—परिणमति।

"जन्मेदं बन्ध्यतां नीतं भवभोगोपलिप्सया ।
काचमूल्येन विक्रीतो हन्त ! चिन्तामणिर्मया ॥" (च)

अत्र भवभोगलोभेन जन्मनो व्यर्थताऽऽनयनं काचमूल्येन चिन्तामणिविक्रय इवेति पर्य्यवसानम् । एवम्—

"क्व सूर्य्यप्रभवो वंशः ? क्व चाल्पविषया मतिः ? ।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥" (छ)

अत्र मन्मत्या सूर्य्यवंशवर्णनमुडुपेन सागरतरणमिवेति पर्य्यवसानम् ।

इयञ्च क्वचिदुपमेयवृत्तस्योपमानेऽसम्भवेऽपि भवति । (ज) यथा—

"योऽनुभूतः कुरङ्गाक्ष्यास्तस्या मधुरिमाऽधरे ।
समास्वादि स मृद्वीका-रसे रसविशारदैः ॥" (झ)

(च) जन्मेति ।—वीतरागस्योक्तिरियम् । मया भवस्य—संसारस्य, भोगः,—सुखं, ("भोगः सुखे स्त्र्यादिभृतावहेश फणकाययोः" इत्यमरः) तस्य उपलिप्सया—लालसया इत्यर्थः, इदं—वर्त्तमानं, जन्म बन्ध्यतां—विफलतां, नीतं, हन्त—खेदे, काचमूल्येन—तदाख्यसुलभमणिविशेषमूल्येन, चिन्तामणिः,—तदाख्यदुष्प्राप्यमणिविशेषः, विक्रीतः ।

(छ) क्वेति ।—सूर्य्यः प्रभवति अस्मादिति प्रभवः,—उत्पत्तिस्थानं यस्य, अथवा—सूर्य्यात् प्रभवः,—उत्पत्तिर्यस्य तादृशः, वंशः,—सूर्य्यवंशः इत्यर्थः, क्व ?—कुत्र ? अल्पविषया—यत्किञ्चिद्धारणक्षमा इत्यर्थः, मतिः,—बुद्धिश्च क्व ? क्वद्वयं महदन्तरं सूचयति, अल्पमतिसूर्य्यवंशयोः महदन्तरमिति भावः, तथा हि, मोहात्—अज्ञानात्, उडुपेन—भेलेन, क्षुद्रनौकयेत्यर्थः, दुस्तरं—दुष्पारं, सागरं तितीर्षुः,—तर्त्तुमिच्छुः, अस्मि—भवामि । रघुवंशस्येदम् ।

(ज) इयञ्चेति ।—उपमेयवृत्तस्य—उपमेयधर्मस्य, उपमाने सर्वथा बाधादुपमाकल्पनम् इति विशेषः । एवं "मुखं ते चन्द्रमःस्पर्द्धि पङ्कजद्वेषि लोचनम्" अत्र स्पर्द्धाद्वेषयोः चेतनधर्मत्वात् मुखलोचनयोरसम्भवात् उपमायां पर्य्यवसानम् इति ज्ञेयम् ।

(झ) य इति ।—तस्याः कुरङ्गाक्ष्याः,—मृगलोचनायाः, अधरे यः मधुरिमा—माधुर्य्यम्, अनुभूतः,—आस्वादगोचरीकृतः, सः,—मधुरिमा इत्यर्थः, रसविशारदैः,

अत्र प्रकृतस्याधरस्य मधुरिमधर्मस्य द्राक्षारसेऽसम्भवात् पूर्ववत् साम्ये पर्य्यवसानम्। मालारूपाऽपि यथा मम—

"क्षिपसि शुकं वृषदंशकवदने
मृगमर्पयसि मृगादनरदने।
वितरसि तुरगं महिषविषाणे
निदधच्चेतो भोगविताने" ॥ (ञ)

इह बिम्बप्रतिबिम्बताक्षेपं विना वाक्यार्थापर्य्यवसानं, दृष्टान्ते तु पर्य्यवसितेन वाक्यार्थेन सामर्थ्याद्बिम्बप्रतिबिम्बता-प्रत्यायनम्। नापीयमर्थापत्तिः, तत्र "हारोऽयं हरिणाक्षीणाम्" इत्यादौ सादृश्यपर्य्यवसानाभावात्। (ट)

—रसास्वादाभिज्ञैः जनैः, मृद्वीकारसे—द्राक्षारसे, समास्वादि—सम्यक् आस्वादितः। "न ह्यन्यधर्मा अन्यत्र सम्भवन्ति" इति नयेन उपमेयाधरगतमाधुर्य्यस्य उपमान-मृद्वीकारसगतत्वासम्भवेऽपि उपमानभूतमृद्वीकारसगतसम्भवोक्त्येदमुक्तमित्यवसेयम्।

(ञ) क्षिपसीति।—कस्यचिन्महात्मनः स्वशिष्यं प्रति सांसारिकसुखासक्तेः निवृत्त्युपदेशोऽयम्। भोगविताने—संसारसुखसमूहे, चेतः निदधत्—अर्पयत्, त्वं वृष-दंशकस्य—बिडालस्य, ("ओतुर्बिडालो मार्जारो वृषदंशक आखुभुक्" इत्यमरः) वदने शुकं—तन्नामानं पक्षिणं, क्षिपसि—न्यस्यसि, मृगादनस्य—तरक्षोः, व्याघ्रविशेषस्य इति यावत्, ("तरक्षुस्तु मृगादनः" इत्यमरः) रदने—दन्ते, मृगम् अर्पयसि—ददासि, महिषस्य विषाणे—शृङ्गे, तुरगम्—अश्वं, वितरसि—ददासि। अत्र भोगविताने चेतोनिधानस्य वृषदंशकवदनादिषु शुकादिक्षेपणस्य च अभेदेनान्वयः अनुपपद्यमानः परस्परं बिम्बप्रतिबिम्बभावं गमयति, तथा च—विषयभोगजन्यसुखानुभवसन्ताने चेतोनिधानं वृषदंशकवदनादौ शुकाद्यर्पणमिवेत्युपमायां पर्य्यवसानम् इति बोध्यम्। पज्झटिका वृत्तं, तल्लक्षणञ्च यथोक्तं—"प्रतिपदयमकितषोडशमात्रा नवमगुरुत्व-विभूषितगात्रा। पज्झटिकाया एष विवेकः क्वापि न मध्यगुरुर्गण एकः॥" इति। "आर्य्यागीतिरियम्" इत्येके, "पादाकुलकम्" इत्यन्ये।

(ट) दृष्टान्तादेर्निदर्शनाभेदमुपपादयति, इहेति।—इह—निदर्शनायां, बिम्बप्रतिबिम्बतायाः आक्षेपं—प्रतीतिं, विना वाक्यार्थस्य अपर्य्यवसानम्—असङ्गतिः। पर्य्यवसितेन—सङ्गततां प्राप्तेन। सामर्थ्यात्—योग्यतावशात्। बिम्बेति।—गम्य-

आधिक्यमुपमेयस्योपमानान्न्यूनताऽथवा।
व्यतिरेकः एक उक्ते हेतौ नोक्ते स च त्रिधा॥
चतुर्विधोऽपि साम्यस्य बोधनाच्छब्दतोऽर्थतः।
आक्षेपाच्च द्वादशधा श्लेषेऽपीति त्रिरष्टधा॥
प्रत्येकं स्यान्मिलित्वाऽष्ट-चत्वारिंशद्विधः पुनः॥७२१॥(ठ)

सादृश्यावगतिरित्यर्थः। ननु "कोऽत्र भूमिवलये—" इत्यादौ "जनतापकरः सूर्य्योऽप्यस्तं याति, किमुतान्यः?" इति दण्डापूपन्यायात् अर्थान्तरप्रतीतिरस्ति इतीयमर्थापत्तिः इत्यत आह, नापीयमिति।—"हारोऽयम्" इत्यादौ वक्ष्यमाणश्लोके सादृश्यस्य—साम्यस्य, पर्य्यवसानं—निश्चयः, तदभावात्, न हि मुक्तेतिपदवाच्यानां मौक्तिकानां प्राप्तापवर्गाणाञ्च सादृश्यं पर्य्यवसीयते, अतो नात्र निदर्शना; तथा च सादृश्यपर्य्यवसानस्थले निदर्शनैव, विशेषत्वादन्यत्र त्वर्थापत्तिः इति भावः।

(ठ) व्यतिरेकमाह, आधिक्यमिति।—उपमेयस्य उपमानात् आधिक्यम् अथवा न्यूनता व्यतिरेकः,—व्यतिरिच्यते—उपमानवैलक्षण्येनोपलभ्यते उपमेयमनेन इति व्यतिरेकः, उपमानात् उपमेयम्, उपमेयात् उपमानं वेति हि तदर्थः, तथा च—उपमानापेक्षया उपमेयस्य वैलक्षण्येन प्रत्ययो व्यतिरेकः, उपमेयापेक्षया उपमानस्य वैलक्षण्येन प्रत्ययो वा व्यतिरेक इति फलितम्। वैलक्षण्येन प्रत्ययश्च आधिक्येन न्यूनत्वेन वेति द्विधैव सम्भवति, अतः उपमानापेक्षया उपमेयस्य अधिकतया वैलक्षण्ये प्रतीयमाने एकः, न्यूनतयेति द्वितीयः, उपमेयापेक्षया उपमानस्य अधिकतया वैलक्षण्ये प्रतीयमाने तृतीयः, न्यूनतयेति चतुर्थः व्यतिरेक इति बोध्यम्। आधिक्यपक्षं विकल्पयति, एक इति।—स च हेतौ उक्ते एकः,—एकविध एव, हेतौ नोक्ते—अकथिते, त्रिधा; अयम्भावः,—हेतुस्तावत् शब्दकृतः, अर्थकृतः, आक्षेपकृतश्च इति त्रिविधः, तथा सति तस्य तस्य उक्त्यभावे व्यतिरेकस्य त्रैविध्यं स्पष्टम् इति। तथा चतुर्विधोऽपि साम्यस्य—सादृश्यस्य, शब्दतः,—इवादिशब्दात्, अर्थतः,—तुल्यादिपदार्थानुसन्धानात्, आक्षेपाच्च—व्यञ्जनातश्च, बोधनात्—प्रत्यायनात्, द्वादशधा—इति प्रत्येकं त्रिधा भूत्वा द्वादशविधो भवतीति भावः। श्लेषेऽपीति अपिना श्लेषाभावसमुच्चयः, तेन द्वादशविधोऽपि सः श्लेषनिबन्धनत्वात् अश्लेषत्वाच्च द्वैविध्येन इति भावः, त्रिरष्टधा—चतुर्विंशतिप्रकारः। प्रत्येकम्—आधिक्यन्यूनतयोश्च, मिलित्वा पुनः अष्टचत्वारिंशत्प्रकारः स्यात् इति।

उपमेयस्य उपमानादाधिक्ये हेतुः उपमेयगतमुत्कर्षकारणम् उपमानगतं निकर्षकारणञ्च। तयोर्द्वयोरपि उक्तौ एकः, प्रत्येकं समुदायेन वाऽनुक्तौ त्रिविध इति चतुर्विधेऽप्यस्मिन्नुपमानोपमेयस्य निवेदनं शब्देनार्थेनाक्षेपेण चेति द्वादशप्रकारोऽपि श्लेषेऽपिशब्दाद्श्लेषेऽपि चतुर्विंशतिप्रकारः। उपमानाद्यूनतायामप्यनयैव भङ्ग्या चतुर्विंशतिप्रकारता (ङ) इति मिलित्वा अष्टचत्वारिंशत्प्रकारो व्यतिरेकः। उदाहरणम्—

"अकलङ्कं मुखं तस्या न कलङ्की विधुर्यथा।" (ढ)

अत्र उपमेयगतमकलङ्कत्वम् उपमानगतञ्च कलङ्कित्वं हेतुरयमपि उक्तम्। यथाशब्दप्रतिपादनाच्च श्राब्दौपम्यम्। अत्रैव "न कलङ्कि विधूपमम्" इति पाठे आर्थम्। "जयतीन्दुं कलङ्किनम्" इति पाठे तु इव वत्तुल्यादिपदविरहादाक्षिप्तम्। अत्रैवाकलङ्कपदत्यागे उपमेयगतोत्कर्षकारणानुक्तिः। कलङ्किपदत्यागे च उपमानगतनिकर्षकारणानुक्तिः। द्वयोरनुक्तौ द्वयोरनुक्तिः। (ण) श्लेषे यथा—

(ङ) उपमेयस्येति।—निकर्षः,—अपकर्षः। प्रत्येकमिति।—उत्कर्षकारणानुक्तौ अपर इत्यर्थः। अनयैव भङ्ग्येति—निरुक्तानामेव इत्यर्थः, तथा हि—उपमेयस्योपमानाद्यूनतायां हेतुः उपमेयगतं निकर्षकारणमुपमानोत्कर्षकारणञ्च, तयोर्द्वयोरप्युक्तावेकः, प्रत्येकं समुदायेन वाऽनुक्तौ त्रिविधः इत्यानुक्तप्रकारैश्च चतुर्विंशतिविधत्वं बोध्यम्।

(ढ) अकलङ्कमिति।—तस्याः,—सुन्दर्याः इत्यर्थः, मुखम् अकलङ्कं—कलङ्करिरहितं, न कलङ्कि इति भावः, विधुः,—चन्द्रः, यथा कलङ्की—सादृश्यसादृश्येन कलङ्कीति प्रतीयमानः, तथा न।

(ण) जयतीति। जयतीति।—जयः,—पराभवः, स चापकृष्टत्वेन ग्राह्यं, तच्च मुखे असम्भवात् सादृश्ये पर्य्यवसानमित्याक्षेपः इति भावः। द्वयोरिति—अकलङ्कत्वकलङ्कित्वपदयोः इत्यर्थः। द्वयोरनुक्तिः,—उत्कर्षनिकर्षकारणयोरनुक्तिः, मुखे चन्द्रसादृश्यनिषेधेनैवाधिक्यं प्रतीयते इत्याशयः।

"अतिगाढ़गुणायाश्च नाब्जवत् भङ्गुरा गुणाः ।" (त)

अत्र इवार्थे वतिरिति शाब्दमौपम्यम् ; उत्कर्षनिकर्षकारणयोर्द्वयोरपि उक्तिः । गुणशब्दः श्लिष्टः । अन्ये भेदाः पूर्ववदूह्याः । (थ) एतानि च उपमेयस्य उपमानादाधिक्ये उदाहरणानि । न्यूनत्वे दिङ्मात्रं यथा—

"क्षीणः क्षीणोऽपि शशी भूयो भूयोऽभिवर्द्धते सत्यम् ।
विरम प्रसीद सुन्दरि ! यौवनमनिवर्त्ति यातं तु ॥" (द)

अत्रोपमेयभूतयौवनास्थैर्य्यस्याधिक्यं, तेनात्र "उपमानादुपमेयस्याधिक्ये विपर्य्यये वा व्यतिरेकः" इति केषाञ्चिल्लक्षणे "विपर्य्यये वेति पदमनर्थकम्" इति यत् केचिदाहुः, तन्न विचारसहम् ; तथा हि—अत्राधिकन्यूनत्वे सत्त्वासत्त्वे एव विवक्षिते ; अत्र च चन्द्रापेक्षया यौवनस्यासत्त्वं स्फुटमेव । अस्तु (ध) वा अत्रोदाहरणे यथाकथञ्चित् गतिः,—

(त) अतीति ।—अतिगाढ़ाः,—अतिघनाः, गुणाः यस्याः तथाभूतायाः तस्याः, कान्तायाः इति भावः. गुणाः,—दयादाक्षिण्यादयः सूत्राणि च, अब्जवत्—पद्मस्येव, भङ्गुराः,—भङ्गप्रवणाः, छिदुरा इत्यर्थः, न, भवन्तीति शेषः । अत्रोपमेयं नायिका, उपमानं पद्मम्, उपमेयस्य उत्कर्षकारणम् अतिगाढ़गुणशालित्वम्, उपमानस्य अब्जादेः निकर्षकारणं भङ्गुरगुणभागित्वमिति बोध्यम् ।

(थ) अत्रेति ।—पूर्ववत्—"तस्या नाब्जवद्भङ्गुरा गुणाः" इति, "अतिगाढ़गुणायाश्च नाब्जवद्गुणाः" इति, "तस्या नाब्जवद्गुणाः" इति प्रकारत्रयमूह्यम् ।

(द) क्षीण इति ।—मानिनीं प्रत्युक्तिरियम् । हे सुन्दरि ! शशी—चन्द्रः, क्षीणः क्षीणः अपि भूयः भूयः,—पुनः पुनः, अभिवर्द्धते—अभितो वर्द्धते, सर्वतो लभ्यमानप्रकाशो भवतीति यावत्, एतत् सत्यं, विरम—निवर्त्तस्व, मानात् इति शेषः, प्रसीद—प्रसन्ना भव, यातं—गतं, तु—पुनः, यौवनम् अनिवर्त्ति—न निवर्त्ति, न निवर्त्तते इत्यर्थः, गतं यौवनं गतमेव, न पुनः वर्द्धते इति भावः । अत्र पुनः वर्द्धनम् उपमानचन्द्रोत्कर्षकारणम्, अपुनः वर्द्धनम् उपमेययौवननिकर्षकारणम् इति ज्ञेयम् । आर्य्या छन्दः । काव्यालङ्कारस्य पद्यमेतत् ।

(ध) उपमानन्यूनतायां व्यतिरेकमस्वीकुर्वतां मतं दूषयति, अत्रोपमेयेति ।—

"हनूमदाद्यैर्यशसा मया पुन-
र्द्विषां हसैर्दूतपथः सितीकृतः।" (न)

इत्यादिषु का गतिः? इति सुष्ठूक्तं "न्यूनताऽथवा" इति।

सहार्थस्य बलादेकं यत्र स्याद्वाचकं द्वयोः।
सा सहोक्तिर्मूलभूताऽतिशयोक्तिर्यदा भवेत्॥७२२॥(प)

चन्द्रास्थैर्य्यमत्रोपमानं बोध्यं, तेन "क्षीणः क्षीणः" इत्यादावाधिक्यव्यतिरेकेणैव सङ्ग्रह-सम्भवेन, विपर्य्यये वा—न्यूनतायां वेत्यर्थः। तथा हीति।—सत्त्वासत्त्वे—स्थायित्वा-स्थायित्वे, उत्कृष्टत्वापकृष्टत्व इत्यर्थः। ननु यौवनस्थैर्य्यस्याधिक्यस्य निवेदनं प्रकृतस्य मानभङ्गस्य उपकारकमिति तस्यैव वैचित्र्याधायकत्वं, न तु यौवनासत्त्वस्य, एवं दोषः इत्याशङ्क्य अनुपपत्त्यन्तरं दर्शयति—अस्त्विति।

(न) हनूमदाद्यैरिति।—दमयन्तीं प्रति दौत्येन इन्द्रादिभिः प्रेरितस्य तत्र च अकृतार्थस्य नलस्य विषादोक्तिरियम्। हनूमदाद्यैः,—हनूमत्प्रमुखैः, दूतपथः यशसा सितीकृतः,—उज्ज्वलीकृतः, मया पुनः द्विषां—शत्रूणां, हसैः,—हास्यैः, दूतपथः सितीकृतः, मां दौत्ये अकृतकार्य्यं दृष्ट्वा शत्रवो हसन्तीति तेषां हास्यसितिम्ना स एव मार्गोऽलङ्कृत इति भावः। अत्र प्रभुप्रयोजननिष्पादकत्वेन हनूमदादेरुपमानस्योत्कृष्टत्वं, तद्व्यतिरेकेणोपमेयस्य नलस्यापकृष्टत्वञ्च प्रतीयते; इह दूतयोरुपमानोपमेयभाव-विवक्षणेऽपि उपमानस्यैवाधिक्यं, न तूपमेयस्य इति ज्ञेयम। अलङ्कारकौस्तुभकारास्तु—"उभयोः साम्यप्रोक्तौ विशेष उपमेयगे व्यतिरेकः" इति लक्षयित्वा, "ननु तथाऽपि क्वचिदुपमानादुपमेयापकर्षेऽप्ययं दृश्यते, यथा—'हनूमदाद्यैर्यशसा मया पुनर्द्विषां हसैर्दूतपथः सितीकृतः' अत्र हि नलेन हनूमदादिदौत्यापेक्षया स्वकृतदौत्ये हीनत्वं प्रदर्श्यते इति चेत्, न; उत्कर्षापकर्षौ ह्यत्र न वास्तवाभिमतौ, किन्तु प्रकृतार्थाति-शायकत्वानतिशायकत्वस्वरूपौ, प्रकृतश्चात्र नलनिर्वेदः, तदुत्कर्षकत्वञ्च दौत्यनिष्ठोक्ताप-कर्षस्याप्यस्तीति न दोषः" इत्याहुः। वंशस्थविलस्य पादद्वयमेतत्—"वदन्ति वंशस्थविलं जतौ जरौ" इति तल्लक्षणम्। नैषधीयचरितस्येदं पद्यार्द्धम्।

(प) सहोक्तिमाह, सहेति।—यत्र सहार्थस्य बलात्—सामर्थ्यात्, एकं, वस्तु इति शेषः, द्वयोः वाचकं स्यात्, तथा यदा—यदि, तत्र अतिशयोक्तिः मूलभूता—कारणभूता, भवेत्, तदा सा सहोक्तिः। तथाऽहि—सहार्थश्च सह, साकं, समं, सार्द्धं, सजुः, अनुप्रभृतिः, तस्य एकं वस्तु वाचकम्, अभेदाध्यवसानमूलामभेदाध्यव-

अतिशयोक्तिरपि अत्राभेदाध्यवसायमूला कार्य्यकारणपौर्वापर्य्यविपर्य्ययरूपा च। अभेदाध्यवसायमूलाऽपि श्लेषभित्तिका अन्यथा च। (फ) क्रमेण उदाहरणम्—

"सहाधरदलेनास्या यौवने रागभाक् प्रियः।" (ब)

अत्र रागपदे श्लेषः।

सायमूलां वाऽतिशयोक्तिमुपजीव्य प्रधानाप्रधानयोर्द्वयोरपि कथमपि यत्रान्वयि स्यात्, सा सहोक्तिरिति फलितम्। अलङ्कारकौस्तुभकारास्त्वाहुः,—"धर्मयोरभेदाध्यवसायमूलत्वस्थले एव सहोक्तिर्भवितुमर्हति, कार्य्यकारणयोः पौर्वापर्य्यविपर्य्ययात्मकातिशयोक्तिमूलभेदस्तु प्राचीनोक्तो न युक्तः, तत्रातिशयोक्तेरेवालङ्कारत्वसम्भवात्। "तव कोपोऽरिनाशश्च जायते युगपन्नृप!" इत्यतिशयोक्त्यपेक्षया "तव कोपोऽरिनाशश्च सहैव नृप! जायते" इति सहोक्तौ विच्छित्तिविशेषाननुभवात्, तस्यैव च अलङ्कारपार्थक्यव्यवस्थापकत्वात्। न चैवं धर्मयोरभेदाध्यवसानस्थलेऽप्यतिशयोक्तिसत्त्वात् कथं पार्थक्यमिति सहोक्त्यच्छेद इति वाच्यं, तत्राभेदाध्यवसायस्य सहोक्त्युपस्कारकत्वेन गुणतया सहोक्तितिरस्काराभावात्। पौर्वापर्य्यविपर्य्ययस्थले च सहोक्तेरेवातिशयोक्त्युपस्थापकत्वेन वैषम्यात्। किञ्च, उपमानेनोपमेयनिगरणमेवातिशयोक्तिरलङ्कारः, निगरणमात्रन्तु न तथा, अतोऽत्रातिशयोक्तिविषयाभावात् सहोक्तिरेवेति। वस्तुतः दीपके तुल्ययोगितायां वा तदन्तर्भावः। तत्रैकरूपेण सर्वत्र धर्मान्वयः, अत्र तु गुणप्रधानभावेन इति विशेषस्तु तदवान्तरभेदत्वमेव साधयति, न त्वतिरिक्तत्वं, विच्छित्तिविशेषानाधायकत्वात्; तस्मात् प्राचीनानुभवमात्रप्रमाणकमेवास्याः पार्थक्यम्" इति।

(फ) अतिशयोक्तिरिति।—अभेदाध्यवसायमूला—अभेदाध्यवसायरूपा इत्यर्थः, श्लेषभित्तिका—श्लेषनिबन्धना, श्लेषप्रतिपन्नभेदमूला इत्यर्थः, अन्यथा—अश्लेषभित्तिका, श्लेषमनुपजीव्यैव समार्थता इति यावत्, सम्बन्धिभेदादवगतभेदमूलेत्यर्थः।

(ब) सहेति।—अस्याः,—पुरतो विलसन्त्या बिम्बोष्ठ्याः कान्ताया इति यावत्, अधरदलेन सह प्रियः,—कान्तः, यौवने रागभाक्—अनुरक्तः। अधरदले तु रागभाक्त्वं रक्तिमवत्त्वमिति बोध्यम्। एवम् "……अस्तं भास्वान् प्रयातः सममरिभिरयं संह्रियन्तां बलानि" इत्यादावपि अस्तादीनां श्लिष्टत्वात्। अत्र सहशब्दस्य रागभजनमर्थः, तृतीयायाः सम्बन्धित्वं, तस्य च सहार्थेऽन्वयः, सहशब्दस्याव्ययत्वात् तदर्थस्य द्वारीभूतविभक्त्यर्थं विनाऽपि समकालीनत्वसम्बन्धेन रागभाक्सहार्थैकदेशे रागभजनेनान्वयः; यौवने सति इति सप्तम्याः समकालीनत्वमर्थः, अस्यापि रागभजनेनान्वयः;

"सह कुमुदकदम्बैः काममुल्लासयन्तः
सह घनतिमिरौघैर्धैर्यमुल्लासयन्तः।
सह सरसिजषण्डैः स्वान्तमामीलयन्तः
प्रतिदिशमसृतांशोरंशवः सञ्चरन्ति॥" (भ)

अत्रा इति तात्पर्यवशादवरदत्वेन प्रियेण चान्वयः, तथा चाशाः प्रिय इदानवरत-सञ्चरिष्णौवनशालीनरागाश्रयः इत्यन्वयबोधः। रागशब्दः हरौलौहित्यानुरागयोर्वाचकः, तयोरभेदारोपात्, अन्यथा एकत्राभावात् एकस्योभयान्वयासम्भवेन लक्षणासङ्गतं स्यात् इति सङ्क्षेपः। अतिशयोक्तिश्च भेदेऽभेदरूपा इति बोध्यम्।

(भ) सङ्केति।—चन्द्रवर्णनमिदम्। असृतांशोः,—चन्द्रस्य, अंशवः,—किरणाः, कुमुदानां—कैरवाणां, कदम्बैः,—समूहैः, सह कामं—मदनम्, उल्लासयन्तः,—विकाशयन्तः, वर्द्धयन्त इति यावत्, घनैः,—सान्द्रैः, तिमिराणाम्—अन्धकाराणाम्, ओघैः,—समूहैः, सह धैर्यं—निरुद्वेगत्वं, कामिजनानामिति शेषः, उल्लासयन्तः,—विध्वंसयन्तः, मदनस्य प्रकाशस्य च आधायकत्वादिति भावः, सरसिजानां—पद्मानां, षण्डैः,—समूहैः, ("षण्ढं पद्मादिसङ्घाते न स्त्री स्यात् नोपतौ पुमान्" इति मेदिनी) सह स्वान्तं—मनः, ("स्वान्तं हृन्मानसं मनः" इत्यमरः) आमीलयन्तः,—सङ्कोचयन्तः, प्रतिदिशं—दिशि दिशि, सञ्चरन्ति। ["सञ्चरन्ति" इत्यनुज्ञा "भान्ति यन्तः" इति पाठान्तरे तु यन्तः,—गच्छन्तः, सञ्चरन्त इति यावत्, भान्ति—संस्करन्तीत्यर्थः, तथा चान्यानुप्राणाभावयुक्तो दोषोऽपि न सम्भवतीति विभावनीयं सूक्ष्मदृशा]। अत्रेदं बोध्यम्—कुमुदकदम्बप्रोल्लासो विकाशः, घनतिमिरौघासो वर्द्धनं, तयोः साहश्येनैवाभेदारोपः। तेन:संसर्गाभावरूपस्य तिमिरप्रोल्लासरूपं तद्देशे सम्बन्धाभावः, धैर्यप्रोल्लासरूपं विनाशः, तयोः साहश्येनैवाभेदारोपः। सरसिजषण्डानामामीलनं सङ्कोचः, स्वान्तस्यामीलनं विषयान्तरादाकर्षणं, तयोरपि साहश्येनैवाभेदारोपः; एवञ्चामीलासादयः सङ्घशब्दानामर्थाः, कर्मत्वं तृतीयानार्थः, तथा सङ्घार्थेनान्वयः, सङ्घार्थस्य च समवायीनत्वसम्बन्धेन उल्लासयन्तः इत्यादिपदार्थैकदेशे उल्लासादावन्वयः; तथा कुमुदकदम्बादिकर्मप्रोल्लासादिजनकावयवप्रोल्लासादिकर्तारः अन्वयः इत्यन्वयबोधः। अत्र मालिनी वृत्तं, "नमयययुतेयं मालिनी भोगिलोकैः" इति तल्लक्षणम्। यथा वा—"छाया संश्रयते तलं विटपिनां श्यामेव पान्थैः क्रमं मूलं याति सरो जलस्य जडता स्वानेव लोकैः सह। आचामत्यखिलांशवोऽपि किरणैः कुम्भस्तुषैव क्षयं क्षणैः निद्रा गर्भगृहं सह प्रविशति स्वान्तेव कान्ताजनैः॥" इति।

"निरर्थकं जन्म गतं नलिन्याः
यया न दृष्टं तुहिनांशुबिम्बम्।
उत्पत्तिरिन्दोरपि निष्फलैव
दृष्टा विनिद्रा नलिनी न येन॥" (ङ)

अत्र परस्परविनोक्तिभङ्ग्या चमत्कारातिशयः। विनाशब्दप्रयोगाभावेऽपि विनाऽर्थविवक्षायां विनोक्तिरेवेयम्। एवं सहोक्तिरपि सहशब्दप्रयोगाभावेऽपि सहार्थविवक्षया भवतीति बोध्यम्। (क)

समासोक्तिः समैर्यत्र कार्य्यलिङ्गविशेषणैः।
व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुनः॥७२४॥ (ख)

अनुयान्त्या—अनुगच्छन्त्या, त्वया साधु—सम्यक्, कृतम्; तथा हि, अर्केण—सूर्य्येण, विना दिनश्रीः,—दिवसशोभा, तथा शशिना—चन्द्रेण, विना निशा च का?—कुत्सिता इत्यर्थः।

(ङ) निरर्थकमिति।—नलिन्याः,—पद्मिन्याः, जन्म—उत्पत्तिः, निरर्थकं—विफलं, गतं, यया—नलिन्या इत्यर्थः, तुहिनांशुबिम्बं—चन्द्रबिम्बं, न दृष्टम्, इन्दोः,—चन्द्रस्यापि, उत्पत्तिः निष्फलैव—निष्प्रयोजनैव, येन—इन्दुना, विनिद्रा—विकसिता, प्रफुल्लेति यावत्, नलिनी—कमलिनी, न दृष्टा। अत्र पूर्वं विह्वलस्य उत्तरञ्च राजकुमार्य्या उक्तिरिति बोध्यम्। इन्द्रवज्रोपेन्द्रवज्रयोरुपजातिश्छन्दः।

(क) अत्रेति।—परस्परस्य दर्शनं विना परस्परजन्मनिरर्थकत्वमुखेनाशोभनत्वम् इति भङ्ग्येत्युक्तम्। एवं सहोक्तिरिति।—अत एव "सममेव नराधिपेन सा" इदमित्युदाहरणमुपपन्नम्।

(ख) समासोक्तिमाह, समासोक्तिरिति।—समैः,—प्रस्तुताप्रस्तुतसाधारणैरित्यर्थः, कार्य्यलिङ्गविशेषणैः,—कार्य्याणि च लिङ्गानि च विशेषणानि चेति तैः तथोक्तैः, कार्य्यैः लिङ्गैः,—पुंलिङ्गस्त्रीलिङ्गनपुंसकलिङ्गवाचित्वप्रत्यायकैः प्रत्ययैः, विशेषणैश्चेत्यर्थः, यत्र [यद्वा—यत्रेत्यव्ययं य इत्यर्थे] प्रस्तुते अन्यस्य—अप्रस्तुतस्य, वस्तुनः,—विषयस्य, व्यवहारसमारोपः,—व्यवह्रियते—विशेषेण प्रतीयते अनेन इति व्यवहारः,—अवस्थाभेदः, तस्य समारोपः, इह तु स्वावस्थासमारोपेणेत्यादि

अत्र समेन कार्येण प्रस्तुतेऽप्रस्तुतव्यवहारसमारोपः। यथा—

"व्याधूय यद्वसनमम्बुजलोचनायाः
वक्षोजयोः कनककुम्भविलासभाजोः।
आलिङ्गसि प्रसभमङ्गमशेषमस्या
धन्यस्त्वमेव मलयाचलगन्धवाह!॥" (ग)

अत्र गन्धवाहे हठकामुकव्यवहारसमारोपः।

वक्ष्यमाणस्वरसात् अत्र व्यवहारसमारोपे क्षतप्रकृतविशेषाधानस्यानुभवसिद्धतया व्यवहारः; यद्वा "तत्सदृशेऽन्यत्र यत् प्रतीयते" इति प्राचीनोक्तानुसारेण च व्यवहारसमारोपस्यैव समासोक्तिरनेनाक्षीकृता, न तु "परोक्तिर्भेदकैः श्लिष्टैः समासोक्तिः" इति काव्यप्रकाशलक्षणानुसारेण प्रकृतवाचिना श्लिष्टविशेषणबलात् अप्रकृतव्यञ्जनरूपितोयार्थस्योपमानत्वानङ्गीकारेणासङ्गतिप्रसङ्गात्, सा समासोक्तिः,—समासेन—सङ्क्षेपसारूपसङ्क्षेपेणाक्षरसंख्यया समासोक्तिरिति संज्ञाव्युत्पत्तिरवधेया; यद्वा—समस्य कार्यादेः, भावेन—उपन्यासेन, उक्तिः,—अप्रस्तुतावलम्ब्याख्यानम् इति सङ्क्षेपः।

(ग) व्याधूयेति।—हे मलयाचलगन्धवाह! यत्—यस्मात्, त्वम् अस्याः अम्बुजलोचनायाः,—पद्मसदृशनयनायाः, कनककुम्भविलासभाजोः,—कनकं—सुवर्णं, तस्य कुम्भौ—सुवर्णमयौ घटाविव्यर्थः, तयोर्विलासः,—शोभा, तं भजेते इति तयोस्तथोक्तयोः,("विलासो हावभेदे स्यात् शोभालीलाप्रभेदयोः"इति गोपालः) सुवर्णमयकलसदृशशोभाशालिनोरिति भावः, ["भजो खिः"(३।२।६२ पा०) इति खिः]वक्षोजयोः,—वक्षसि जायेते इति तयोस्तथोक्तयोः, ["सप्तम्या जनेर्डः" (३।२।९७ पा०) इति डः] स्तनयोः, वसनं—वस्त्रं, व्याधूय—अपसार्य, अशेषं—सकलम्, अङ्गं प्रसभं—बलात्, आलिङ्गसि—आलिङ्गनानन्दमनुभवं करोषीति भावः, तस्मात् त्वमेव धन्यः,—श्लाघ्यः। अत्र नायिकायाः स्तनवसनापेक्षपूर्वकालिङ्गनमेव कार्यं प्रकृतस्य वायोरप्रकृतस्य नायकस्य चेति समानम्; यदि पुनर्नायिकायास्तादृशालिङ्गनमप्राप्नुवतः कस्यचित् आत्मनः अधन्यत्वनिर्वेदनमेतत् स्यात्, तदा वायोरप्रकृतत्वात् नेयं समासोक्तिः, किन्तु "धन्याः खलु वने वाताः—"इत्यादिवत्त्यनाधवदैधर्म्येणाप्रस्तुतप्रशंसैव, अहमधन्यः इति प्रस्तुतस्य गम्यत्वात्। एवञ्च "नवा लता गन्धवहेन चुम्बिता करम्बिताङ्गी मरुदन्दोलकैरः" इत्यादुदाहरणमप्यवगन्तव्यम्। यत्र वायुवर्णनीयत्वेन प्रकृतः, तत्र चुम्बनरूपकार्यसाम्येन मरुदालिङ्गनायकव्यवहारसमारोपः पात्रत्वनावहति इति ध्येयम्। विसन्ततिलकं वृत्तम्।

लिङ्गसाम्येन यथा—

"असमाप्तजिगीषस्य स्त्रीचिन्ता का मनस्विनः ।
अनाक्रम्य जगत् कृत्स्नं नो सन्ध्यां भजते रविः ॥" (घ)

अत्र पुंस्त्रीलिङ्गत्वमात्रेण रविसन्ध्ययोर्नायकनायिकाव्यवहारः । विशेषणसाम्यन्तु—श्लिष्टतया, साधारण्येन, (ङ) औपम्यगर्भत्वेन च त्रिधा । तत्र श्लिष्टतया यथा मम—

"विकसितमुखीं रागासङ्गाद्गलत्तिमिरावृतिं
दिनकरकरस्पृष्टामैन्द्रीं निरीक्ष्य दिशं पुरः ।
जरठलवलीपाण्डुच्छायो भृशं कलुषान्तरः
श्रयति हरितं हन्त ! प्राचेतसीं तुहिनद्युतिः ॥" (च)

(घ) असमाप्तेति ।—असमाप्ता—समाप्तिमप्राप्ता, जिगीषा—जयेच्छा यस्य तादृशस्य, मनस्विनः,—नीतिवेदिनः, महाऽनुभावस्य जिगीषोरित्यर्थः, स्त्रीचिन्ता—कान्ताऽभिलाषः, का ? न काऽपीत्यर्थः, तथा हि, रविः,—सूर्य्यः, कृत्स्नं—समग्रं, जगत् अनाक्रम्य सन्ध्यां नो भजते । अत्र दृष्टान्तत्वेनाप्रकृतयोरपि रविसन्ध्ययोः प्रकृताङ्गत्वेनैव प्रकृतत्वमवधेयम् । न चायं समासोक्तिमूलकोऽर्थान्तरन्यास इति वाच्यं, प्रथममप्रकृतार्थप्रतीतेरसम्भवात्, प्राथमिकप्रतीतिविषयस्यैव समर्थकत्वाङ्गीकारात्, आरोपितस्त्रीपुंसभावयोः स्त्रीपुंसविशेषत्वाभावेन सामान्यसमर्थकत्वायोगाच्च इति बोध्यम् । विङ्कणस्येदं पद्यम् ।

(ङ) साधारण्येन—वाच्यव्यङ्ग्यगतत्वेनेत्यर्थः ।

(च) विकसितेति ।—हन्तेति खेदसूचकमव्ययं, तुहिनद्युतिः,—तुहिनमिव शीतला द्युतिः,—कान्तिर्यस्य तथोक्तः, चन्द्र इत्यर्थः, पुरः,—अग्रतः, रागस्य—लौहित्यस्य अनुरागस्य च, ("रागस्तु मात्सर्य्ये लोहितादिषु । क्लेशादावनुरागे च गान्धारादौ नृपेऽपि च ॥" इति मेदिनी) आसङ्गात्—आवेशात्, विकसितमुखीं—प्रकाशितैकदेशां प्रसन्नमुखीञ्च, तथा गलन्ती—नश्यन्ती, तिमिरावृतिर्यस्यास्तां, पक्षे—गलन्ती—निर्गच्छन्ती, तिमिरमेव आवृतिः,—आवरणं, वसनमित्यर्थः यस्याः तथाभूतां, दिनकरस्य—सूर्य्यस्य, [तदभिधेयस्योपनायकस्य चेति ध्वनिः] करेण—किरणेन हस्तेन च, ("बलिहस्तांशवः कराः" इत्यमरः) स्पृष्टाम् ऐन्द्रीं—पूर्वां, दिशं निरीक्ष्य—दृष्ट्वा, जरठा—परिणता, परिपक्वेति यावत्, या लवली—"नोयाड़"

अत्र मुखरागादिशब्दानां श्लिष्टता । अत्रैव हि "तिमिरांशुकाम्" इत्यत्र "तिमिरांशुकाम्" इति पाठे एकदेशस्य रूपणेऽपि समासोक्तिरेव, न तु एकदेशविवर्त्ति रूपकम् । तत्र हि तिमिरांशुकयोः रूप्यरूपकभावो द्वयोरावरकत्वेन स्फुटसादृश्यतया परसाचिव्यमनपेक्ष्यापि स्वमात्रविश्रान्त इति न समासोक्तिर्बुद्धिं व्याहन्तुमीशः । (छ)

यत्र तु रूप्यरूपकयोः सादृश्यमस्फुटं, तत्रैकदेशान्तररूपणं विना तदसङ्गतं स्यात् इत्यशाब्दमपि एकदेशान्तररूपणमार्थमपेक्षते एवेति । (ज)

तत्रैकदेशविवर्त्तिरूपकमेव यथा—

"जस्स रणंतेउरए करे कुणंतस्स मंडलग्गलअम् ।
रअसंमुहीवि सहसा परंमुही होइ रिउसेणा ॥" (झ)

दृश्यार्थो ह्यः, उपचारात् तत्फलं, तद्वत् पाण्डु, छाया—कान्तिः यस्य तथाभूतः, अग्रम्—अग्रभं, वस्तुपालस्य,—अवदलनलिनानां:करः, पक्षे—दूर्व्यांजवाधितचित्तः सन्, प्राचेतसीं—पश्चिमां, तत्क्षणा वन्यकीर्त्ति, हरितं—दिशं, त्रयति—अवलम्बते । अत्र प्राच्यां वन्यकीर्त्यवधारः चन्द्रे नायकव्यवहारस्य प्रतीयते । हरिद्रोक्तं—"नवसरसखा नः सद्भवेदेईयेईरिद्रो नता" इति च तन्नवत्वम् ।

(छ) अत्रेति ।—एकदेशविवर्त्तिरूपकेण सदाशा विषयविभागं करोति, तत्र हीति ।—तत्र—"विकसितमुखीं—" इत्युदाहरणे,रूप्यरूपकभावः,—रूप्यम्—आरोप्यविषयः तिमिरं, रूपकम्—आरोप्यमाणम् अंशुकं, तयोर्भावः, द्वयोः,—तिमिरांशुकयोः, आवरकत्वेन—आच्छादकत्वेन, परसाचिव्यं—नायिकारूपसाधनानुकूल्यं, वाक्यार्थपर्य्यालोचनसाहाय्यमित्यर्थः, अनपेक्ष्य—अगृहीत्वाऽपि, स्वमात्रेण—सुखसाधनस्वसामर्थ्येन, विश्रान्तः,—वैचित्र्यविशेषे चार्थे उपयोगः, सादृश्यावयोपचयतया अतः खिन्नः इत्यर्थः, इति हेतोः समासोक्तिबुद्धिं व्याहन्तुं—खण्डयितुं, न ईशः,—न शक्तः ।

(ज) यत्रेति ।—यत्र, वाक्ये इति शेषः, अस्फुटम्—अस्पष्टं, तत्र एकदेशान्तरस्य रूपणं विना तत्—वाक्यम्, असङ्गतम्—अनुपपन्नम् । अशाब्दं—शब्दावगतिमवाक्यम् । आर्थम्—अर्थबललभ्यम् ।

(झ) जस्सेति ।—["यस्य रणान्तःपुरे करे कुर्वतश्च नखक्षतवतः ।

अत्र रणान्तःपुरयोः सादृश्यमस्फुटमेव। क्वचिच्च यत्र स्फुट-सादृश्यानामपि बहूनां रूपणं शाब्दम् एकदेशस्य चार्थं, तत्रैक-देशविवर्त्ति रूपकमेव, रूपकप्रतीतेर्व्यापितया समासोक्ति-प्रतीतितिरोधायकत्वात्। ननु अस्ति रणान्तःपुरयोरपि सुख-सञ्चारतया स्फुटं सादृश्यमिति चेत्, सत्यमुक्तम्, अस्त्येव, किन्तु वाक्यार्थपर्य्यालोचनसापेक्षं, न खलु निरपेक्षं, (ञ) मुखचन्द्रादेर्मनोहरत्वादिवत् रणान्तःपुरयोः स्वतः सुखसञ्चार-त्वाभावात्।

साधारण्येन यथा—

"निसर्गसौरभोद्भ्रान्त-भृङ्गसङ्गीतशालिनी।
उदिते वासराधीशे स्मेराऽजनि सरोजिनी॥" (ट)

रससम्मुख्यपि सहसा पराङ्मुखी भवति रिपुसेना॥" इति संस्कृतम्।] रण एव अन्तःपुरं तत्र, करे मण्डलाग्रलताम्—असिलताम् [अपरां नायिकामिति ध्वनिः] कुर्वतः यस्य रससम्मुखी—रसेन—समरेच्छया सुरतेच्छया च, सम्मुखी—अभि-मुखगामिनी, उत्साहाभिमुखी अनुरागवती चेत्यर्थः, रिपुसेना—शत्रुबलं, [कान्ता चेति ध्वनिः] सहसा पराङ्मुखी भवति। अत्र यदि लिङ्गसाम्येन मण्डलाग्र-लतायां नायिकाव्यवहारः, पराङ्मुखत्वरूपकार्य्यसाम्यनापि रिपुसेनायां प्रतिनायिका-व्यवहारः प्रतीयते, तथाऽपि तदुभयं रणे अन्तःपुररूपणस्य असङ्गतिप्रसङ्गसापेक्ष-मित्येकदेशविवर्त्तिरूपकमेवेदम् इति भावः। अलङ्कारकौस्तुभे तु संस्कृतभाषायामेव दर्शितं पद्यमेतदिति ज्ञेयम्। आर्य्या छन्दः।

(ञ) क्वचिच्च यत्रेति।—अत्र साहचर्य्यमर्य्यादया प्रथमत एवात्राप्रस्तुतोपस्थिति-रिति भावः। रूपकप्रतीतेरिति।—व्यापितया—बहुगामितया इत्यर्थः, समासोक्ति-प्रतीतेः तिरोधायकत्वात्—आवरकत्वात्, यथा—"लावण्यमधुभिः पूर्णं—" इत्यादि। सुखसञ्चारतयेति।—यथा अन्तःपुरे सुखं सञ्चरति तथा रणेऽपीति भावः। निरपेक्षं—वाक्यार्थपर्य्यालोचननिरपेक्षमित्यर्थः, ततश्च बहूनां स्फुटसादृश्यानां सद्भावे तथा अस्फुटसादृश्यानां सद्भावे रूपणस्य अव्यापित्वेऽपि यदि एकदेशस्य रूपणं स्यात्, तदा एकदेशविवर्त्तिरूपकमेवेति बोध्यम्।

(ट) निसर्गेति।—निसर्गसौरभेण—स्वाभाविकसौगन्ध्येन, उद्भ्रान्ताः,—विमो-

अत्र निसर्गेत्यादिविशेषणसाम्यात् सरोजिन्यां नायिकाव्यवहारप्रतीतौ स्त्रीमात्रगामिनः क्षीरत्वधर्मस्य समारोपः कारणं, तेन विना विशेषणसाम्यमात्रेण नायिकाव्यवहारप्रतीतेरसम्भवात्। औपम्यगर्भत्वं पुनस्त्रिधा सम्भवति, उपमारूपकसङ्करगर्भत्वात्। (ठ) तत्रोपमागर्भत्वे यथा—

"दन्तप्रभापुष्पचिता पाणिपल्लवशोभिनी।
केशपाशालिबन्धेन सुवेशा हरिणेक्षणा॥" (ड)

अत्र सुवेशत्ववशात् प्रथमं दन्तप्रभाः पुष्पाणीव इत्युपमागर्भत्वेन समासः। अनन्तरञ्च दन्तप्रभासदृशैः पुष्पैश्चिता इत्यादिसमासान्तराश्रयेण समानविशेषणमाहात्म्यात् हरिणेक्षणायां लताव्यवहारप्रतीतिः। (ढ)

श्रिताः, ये भृङ्गाः तेषां सङ्गीतशालिनी सरोजिनी—पद्मिनी, वासराधीशे—सूर्ये, उदिते सति, क्षीरा—विकसिता सञ्जिता च, अजनि—अभूत्।

(ठ) अत्रेति। नायिकाव्यवहारप्रतीतावितिः।—यथा मुखे स्वाभाविकं सौरभं, तथा एव व्यवहारसमारोपः। ननु श्लिष्टविशेषणस्य ह्यर्थशब्दप्रयोगसामर्थ्यादेवार्थान्तरप्रतिपादकत्वं, साधारणविशेषणस्य तु वाच्यविशेषाधानेनैवोपस्कारकत्वात् कथं तेनार्थान्तरप्रतीतिः? इत्यत आह, स्त्रीमात्रेति।—मात्रपदेन सरोजिन्या व्यवच्छेदः; सरोजिनीविकासे चित्तोल्लासविशेषरूपक्षीरत्वस्य तादात्म्यारोपः। कारणं—सहकारि। तेन—क्षीरत्वसमारोपेण। असम्भवादिति—साधारणविशेषणस्य वाच्यविशेषाधानेनैव उपयोगितया व्यञ्जनबोधे सामर्थ्याभावादिति भावः। एवञ्च साधारणविशेषणमप्रस्तुतासाधारणधर्मारोपादिसहकृतमेवार्थान्तरप्रतिपादकमिति फलितम्। उपमारूपकयोः सन्दिग्धत्वे सङ्कर इति शेषम्।

(ड) दन्तेति।—दन्तानां प्रभाः पुष्पाणीवेति दन्तप्रभापुष्पाचि, तैः चिता—व्याप्ता, पाणिः पल्लव इव पाणिपल्लवः, तेन शोभते इति पाणिपल्लवशोभिनी, केशपाशः अलिबन्धनिव तेन उपलक्षिता, सुवेशा—सुष्ठु परिच्छदवती, हरिणेक्षणा, विभातीति शेषः। लतापक्षे—दन्तप्रभा इव पुष्पाणि तैश्चिता, पाणिरिव पल्लवः तेन शोभिनी, केशपाश इव अलिबन्धः तेन।

(ढ) नन्वेतद्रूपकगर्भसंदेहस्य आह, सुवेशत्वेति।—सुवेशत्वसाम्यस्य

रूपकगर्भत्वे यथा—"लावण्यमधुभिः पूर्णं—" इत्यादि। सङ्करगर्भत्वे यथा—"दन्तप्रभापुष्पचिता—" इत्यादौ "सुवेशा" इत्यत्र "परीता" इति पाठे ह्युपमारूपकसाधकाभावात् सङ्करसमाश्रयणम्। समासान्तरं पूर्ववत्। समासान्तरमहिम्ना लताप्रतीतिः। एषु च येषां मते उपमासङ्करयोरेकदेशविवर्त्तिता नास्ति, तन्मते आद्यतृतीययोः समासोक्तिः। द्वितीयस्तु प्रकार एकदेशविवर्त्तिरूपकविषय एव। पर्य्यालोचने तु आद्ये प्रकारे एकदेशविवर्त्तिन्युपमैवाङ्गीकर्त्तुमुचिता। (ण) अन्यथा—

ऽनुपपत्तेरित्यर्थः, सुवेशत्वधर्मस्य मुख्यतया उपमेये हरिणेक्षणायां वर्त्तनात् औपम्यगर्भत्वम्। पुष्पपल्लवाभ्यामपि शरीरशोभाविशेषस्य सम्भवेऽपि अलिवृन्दन तस्यासम्भवात् तत्रैवोपमासमासस्यावश्यकत्वमित्यवगन्तव्यम्; लताप्रतीतौ सुवेशत्वेन शोभनत्वारोपो वेदितव्यः।

(ण) लावण्येति।—अत्र लावण्यमधुनोराह्लादकत्वे लोचनरोलम्बयोः श्यामत्वादिना स्फुटसादृश्यसम्भवात् रूपकाणां बहुत्वाभावाच्च समासोक्तिरेव, न त्वेकदेशविवर्त्तिरूपकम्, एकदेशविवर्त्तिरूपकस्य यदेतदुदाहरणं दत्तं, तन्मतभेदेनेत्यवगन्तव्यम्। नन्वत्र मध्वादीनां मुखे बाधात् प्राथमिकबोधानुपपत्तिः इति चेत्, न; यथा "मुखचन्द्रं चुम्बति" इत्यादौ चुम्बनस्य चन्द्रे बाधात् मुखे पर्य्यवसानं, तथा मुखसम्बन्धस्य मध्वादावसम्भवात् लावण्यादौ पर्य्यवसानम् इति स्वीकारात्; नन्वेवमपि पूर्ववत् समासद्वयाङ्गीकारेणोपमागर्भमेवेदमस्तु, किमधिकेन रूपकगर्भत्वकल्पनेन? इति चेत्, सत्यम्; गतानुगतिकन्यायेनास्य प्रकारस्य स्वीकारात् ग्रन्थकृतैव खण्डनीयत्वाच्च। उपमारूपकेति।—उपमासाधकस्य—उपमेये मुख्यतया स्थितस्य धर्मस्य, रूपकसाधकस्य—उपमाने मुख्यतया स्थितस्य धर्मस्य वाचकस्य च, उपमैवात्र न रूपकं, रूपकमेवात्र नोपमा इत्येवंरूपस्य अभावादित्यर्थः। समासान्तरं पूर्ववत्—उपमापक्षे उपमितिसमासः, रूपकपक्षे रूपकसमासः, यथा दन्तप्रभा पुष्पाणीव, तथा दन्तप्रभा एव पुष्पाणि इत्यादि बोध्यम्। आद्यतृतीययोः,—दन्तप्रभापुष्पचितेत्यादिरूपे आद्ये उदाहरणे, तृतीये—अत्रैव सुवेशेत्यत्र परीतेति पाठे न परिवर्त्तिते इत्यर्थः। द्वितीयस्त्विति।—मुखे मध्वाद्यन्वयस्यासम्भवात् प्रथमत एव पद्माध्याहारेण प्रतीतिः, कुतः व्यञ्जनामात्रप्राणा समासोक्तिरिति भावः।

"ऐन्द्रं धनुः पाण्डुपयोधरेण शरद्दधानाऽऽर्द्रनखक्षताभम्।
प्रमोदयन्ती सकलङ्कमिन्दुं तापं रवेरभ्यधिकं चकार॥" (त)

इत्यत्र कथं शरदि नायिकाव्यवहारप्रतीतिः? नायिकापयोधरेणार्द्रनखक्षताभशक्रचापधारणासम्भवात्। ननु "आर्द्रनखक्षताभम्" इत्यत्र स्थितमप्युपमानत्वं वस्तुपर्य्यालोचनया ऐन्द्रे धनुषि सञ्चारणीयं, यथा "दध्ना जुहोति" इत्यादौ हवनस्यान्यथासिद्धेर्दध्नि सञ्चार्य्यते विधिः, एवञ्च इन्द्रचापाभमार्द्रनखक्षतं दधानेति प्रतीतिर्भविष्यतीति चेन्न; एवंविधानिर्वाहे कष्टसृष्टिकल्पनादेकदेशविवर्त्तिन्युपमाऽङ्गीकारस्यैव ज्यायस्त्वात्। अस्तु वा अत्र यथाकथञ्चित् समासोक्तिः, "नेत्रैरिवोत्पलैः पद्मैः" इत्यादौ च अन्यगत्यसम्भवात्। किञ्च, उपमायां व्यवहारप्रतीतेरभावात् कथं तदुपजीविकायाः समासोक्तेः प्रवेशः? (थ) यदाहुः,—

(त) ऐन्द्रमिति।—शरद्वर्णनमिदम्। शरत्—तदाख्यकालः, पाण्डुपयोधरेण—निर्वृष्टत्वात् सितजलधरेण, आर्द्रम्—अभिनवं, यत् नखक्षतं तस्येव आभा यस्य तादृशम्, ऐन्द्रं धनुः,—शक्रचापं, दधाना—धारयन्ती सती, सकलङ्कम् इन्दुं प्रमोदयन्ती—विकासयन्ती, रवेः,—सूर्य्यस्य, तापम् अभ्यधिकं चकार। शरदि चन्द्रस्य उज्ज्वलत्वं, सूर्य्यस्य च उपतापकत्वं स्यादिति प्रसिद्धिरिति भावः। अत्रेन्द्रवज्रोपेन्द्रवज्रयोरुपजातिश्छन्दः।

(थ) वस्तुपर्य्यालोचनयेति।—विषयानुशीलनेन, अभिप्रेतार्थबोधनानुरोधेन इत्यर्थः। सञ्चारणीयं—याचितमण्डलन्यायेनार्पणीयम्। अत्र वैदिकदृष्टान्तमाह, दध्नेति।—हवनस्य—होमस्य, अन्यथा—अन्यप्रकारेण, "सायं प्रातर्जुहोति" इत्यादिविधिना इति यावत्, सिद्धेः,—वचनान्तरप्राप्तेरित्यर्थः, दध्नि—दधिपदे, विधिः,—अप्राप्यप्रापकत्वरूपविधिशक्तिः, सञ्चार्य्यते—उपक्रम्यते। तदुक्तम्—"सर्वत्राख्यातसम्बन्धे श्रूयमाणे पदान्तरे। विधिशक्त्युपसङ्क्रान्ते स्याद्धातोरनुवादता॥" इति। यथाऽऽख्याते स्थिता विधिशक्तिः धात्वर्थस्यान्यथासिद्धत्वे तत्रानुपयोगिनी अदग्धदहनन्यायेन पदान्तरस्य विधेयतायामुपयोगं लभमाना पदान्तरे सञ्चार्य्यते, तथाऽत्रापीति भावः।

"व्यवहारोऽथवा तत्त्वमौपम्ये यत् प्रतीयते।
तन्नौपम्यसमासोक्तिरेकदेशोपमा स्फुटा॥" (द)

एवञ्च उपमारूपकयोरेकदेशविवर्त्तिताऽङ्गीकारे तन्मूलसङ्करेऽपि समासोक्तेरप्रवेशो न्यायसिद्ध एव, (ध) तेनौपम्यगर्भविशेषणोत्थापितत्वं नास्या विषय इति। विशेषणसाम्ये श्लिष्ट-

---

अनिर्वाहे इति—अशक्यनिर्वाहे इत्यर्थः। ननु धर्मिकल्पनातो धर्मकल्पना लघीयसीति न्यायेनोपमेयस्योपमानत्वकल्पनमपेक्ष्यैकदेशविवर्त्त्युपमाकल्पना गुरुरित्यत आह,—अस्तु वेति। यथाकथञ्चिदिति—कष्टसृष्ट्या आर्द्रनखक्षते स्थितस्य उपमावाचकस्य आभाशब्दस्य ऐन्द्रे धनुषि सञ्चारणेनेति भावः। नेत्रैरिवेति।—"नेत्रैरिवोत्पलैः पद्मैर्मुखैरिव सरश्रियः। पदे पदे विभान्ति स्म चक्रवाकैः स्तनैरिव॥" इति प्रागुक्तोदाहरणे इत्यर्थः। अन्यगत्यसम्भवात्—समासोक्तिप्रकारासम्भवात्, "एकदेशविवर्त्त्युपमैवाङ्गीकर्त्तुमुचिता" इति पूर्वेणान्वयः। ननु प्रागुक्तयुक्त्या उत्पलादौ उपमानत्वं सञ्चारणीयम् इति चेत्, न; "आर्द्रनखक्षताभम्" इत्यत्रार्थ्याः उपमायाः अर्थवशेनैव कल्पनाया योग्यत्वात्, प्रकृते तु श्रौत्यास्तदसम्भवादिति भावः। ननु इवशब्दव्यत्ययेन अत्रापि सरःश्रिया मङ्गलव्यवहारसमारोप इति समासोक्तिरस्तु, का क्षतिः? इत्याशङ्क्य द्रढयति, किञ्चेति।—तथा च यत्र व्यवहारसमारोपप्रतीतिः स्फुटा, तत्रैव समासोक्तिः, न तु कष्टसृष्ट्या व्यवहारप्रतीत्यानयने, तथा हि विशेषणानां सादृश्योपलम्भमहिम्ना विशेष्यस्याप्यध्याहारेण प्रथमत एव सादृश्यप्रतीतिरनुभवसिद्धा, तयैव श्रोतुराकाङ्क्षाविरहात् व्यवहारव्यञ्जनं न भवति इति भावः।

(द) व्यवहार इति।—औपम्ये—औपम्यगर्भविशेषणसाम्ये सति इत्यर्थः, व्यवहारः,—साधर्म्यं, तत्त्वं—स्वरूपं वा, अप्रस्तुतस्येति शेषः, (तत्त्वप्रतीतौ समासोक्तिमन्ये स्वीकुर्वन्ति, तन्मतानुसारेणैव "अथवा तत्त्वम्" इत्युक्तम्) यत् प्रतीयते—बुध्यते, तत् औपम्यसमासोक्तिः न—औपम्यगर्भविशेषणसाम्योत्थापिता समासोक्तिर्न भवतीति भावः; तत्र हेतुः, यतः सा स्फुटा—सुव्यक्ता, सर्वजनानुभवसिद्धा इत्यर्थः, एकदेशोपमा—एकदेशविवर्त्तिनी उपमेत्यर्थः। तथा च सादृश्यप्रतीतिरेवानुभवसिद्धा, न व्यवहारप्रतीतिः इति नात्र समासोक्तिप्रसङ्ग इति भावः।

(ध) एवमिति।—तन्मूलसङ्करे—उपमारूपकसङ्करे इत्यर्थः। न्यायसिद्धः,—युक्तिसिद्धः, व्यवहारसमारोपाभावादिति भावः।

विशेषणोत्थापिता साधारणविशेषणोत्थापिता चेति द्विधा, कार्य्यलिङ्गयोस्तुल्यत्वे च द्विविधेति चतुष्प्रकारा समासोक्तिः। सर्वत्रैवात्र व्यवहारसमारोपः कारणम्। स च क्वचिल्लौकिके वस्तुनि लौकिकवस्तुव्यवहारसमारोपः, शास्त्रीये वस्तुनि शास्त्रीयवस्तुव्यवहारसमारोपः, लौकिके वा शास्त्रीयवस्तुव्यवहारसमारोपः, शास्त्रीये वा लौकिकवस्तुव्यवहारसमारोप इति चतुर्द्धा। तत्र लौकिकवस्त्वपि रसादिभेदादनेकविधं, शास्त्रीयमपि तर्कायुर्वेदज्योतिःशास्त्रादिप्रसिद्धतयेति बहुप्रकारा समासोक्तिः। दिङ्मात्रं यथा—"व्याधूय यद्वसनम्" इत्यादौ लौकिके वस्तुनि लौकिकस्य हठकामुकव्यवहारादेः (न) समारोपः।

"यैरेकरूपमखिलास्वपि वृत्तिषु त्वां
पश्यद्भिरव्ययमसङ्ख्यतया प्रवृत्तम्।
लोपः कृतः किल परत्वजुषो विभक्ते-
स्तैर्लक्षणं तव कृतं ध्रुवमेव मन्ये॥" (प)

अत्र आगमशास्त्रप्रसिद्धे वस्तुनि व्याकरणप्रसिद्धवस्तुव्यव-

(न) व्यवहारादेः इत्यादिपदेन स्वरूपस्य ग्रहणम्।

(प) यैरिति।—ईश्वरं प्रति कस्यचिदुक्तिरियम्। हे भगवन्! अखिलासु—समग्रासु, वृत्तिषु—अवस्थासु, वस्तुषु वा, पदप्रत्यययोगसमासादिरूपेषु पदार्थान्वयेषु च, ("वृत्तिर्विवरणावस्था-समासाजीवनेषु च। कौशिकादौ प्रवृत्तौ च" इति गोपालः) एकरूपं—रूपान्तरमलभमानमित्यर्थः, अव्ययम्—अविनाशिनम्, अव्ययपदवाच्यञ्च, असङ्ख्यतया—सङ्ख्यातीततया, अनन्तरूपतयेति यावत्, सङ्ख्याविशेषाप्रतिपादकतया च, प्रवृत्तं त्वां पश्यद्भिः यैः,—जनैः, परत्वजुषः,—उत्कर्षभाजः, यद्वा—त्वदन्यः कश्चिदस्ति इत्येवंरूपाया इत्यर्थः, विभक्तेः,—भेदग्रहस्य, पक्षे—परवर्त्तिन्याः विभक्तेः,—प्रत्ययस्य, स्वादेरित्यर्थः, लोपः कृतः, तैः तव लक्षणं—विशिष्टस्वरूपज्ञानं, तत्त्वमित्यर्थः, सूत्रञ्च, कृतं—निरूपितम्, इति ध्रुवमेव—निश्चितमेव, मन्ये—जानामि। वृत्तन्ततिलकं वृत्तम्।

हारसमारोपः। एवमन्यत्र। रूपकेऽप्रकृतम् आत्मस्वरूपसन्निवेशेन प्रकृतस्य रूपमवच्छादयति, इह तु स्वावस्थासमारोपेणानवच्छादितं स्वरूपमेव तं पूर्वावस्थातो विशेषयति; अत एव अत्र "व्यवहारसमारोपो न तु स्वरूपसमारोपः" इति वदन्ति। उपमाध्वनौ श्लेषे च विशेष्यस्यापि साम्यम्, इह तु विशेषणमात्रस्य; अप्रस्तुतप्रशंसायां प्रस्तुतस्य गम्यत्वम, (फ) इह तु अप्रस्तुतस्येति भेदः।

उक्तिर्विशेषणैः साभिप्रायैः परिकरो मतः ॥७२५॥(ब)

(फ) अत्र आगमेति।—आगमशास्त्रं—वेदः, तत्र प्रसिद्धं तस्मिन्, वस्तुनि—ब्रह्मणीति भावः, व्याकरणशास्त्रप्रसिद्धस्य वस्तुनः,—अव्ययशब्दस्य इत्यर्थः, व्यवहारसमारोपः। एवमन्यत्रेति।—तद्यथा—"गण्डान्ते मददन्तिनां प्रहरतः क्ष्मामण्डले वैधृते रक्षामाचरतः सदा विदधतो लाटेषु यात्रोत्सवम्। पूर्वामत्यजतः स्थितिं शुभकरीमासेव्यमानस्य ते वर्द्धन्ते विजयश्रियः किमिव न श्रेयस्विनां मङ्गलम्?" ॥ अत्र ज्योतिस्तन्त्रप्रसिद्धपदार्थारोपः। रूपकादस्याः परैरुपपादितं भेदं दर्शयति, रूपके इति।—अप्रकृतं—वस्तु, उपमानमित्यर्थः, आत्मस्वरूपस्य सन्निवेशेन—आरोपणेन, प्रकृतस्य—उपमेयस्य, रूपं—स्वरूपम्, अवच्छादयति—आवृणोति। इह तु—समासोक्तौ तु, स्वावस्था—स्वसाधर्म्यं, तस्याः समारोपेण। तं—प्रकृतपदार्थं, पूर्वावस्थातः,—प्रकृतावस्थामवच्छाद्येत्यर्थः, विशेषयति—उत्कृष्टत्वेन ज्ञापयति। अत्रापि "अप्रकृतम्" इति कर्तृपदमन्वेति। विशेष्यस्यापीत्यपिना विशेषणस्यापि साम्यं, प्रतीयते इति शेषः। गम्यत्वं—व्यङ्ग्यत्वम्।

(ब) परिकरमाह, उक्तिरिति।—साभिप्रायैः,—अभिप्रायव्यञ्जकैः, प्रकृतार्थपरिपोषणाभिप्रायेण प्रयुक्तैरित्यर्थः, विशेषणैः (बहुत्वमत्र विवक्षितं, तेनैव वैचित्र्यस्यानुभवसिद्धत्वात्) उक्तिः,—विशेषणस्य प्रकृतोपयोगित्वज्ञापनमित्यर्थः, ["उक्तैः" इति पाठान्तरम्] परिकरोति—प्रकृतार्थमुत्कर्षयति इति परिकरः, [मत्वर्थीयोऽच्। "सम्पर्य्युपेभ्यः—" (६।१।१३७ पा०) इति भूषणार्थाभावान्न सुट्] मतः। यद्यप्यपुष्टार्थस्य दोषत्वाभिधानात् तन्निराकरणेन पुष्टार्थस्य स्वीकारः कृतः, तथाऽप्येकनिष्ठत्वेन बहूनां विशेषणानामेवोपन्यासे वैचित्र्यमित्यलङ्कारमध्येऽयं गणित इति काव्यप्रकाशः। अत्र "साभिप्राये विशेष्ये तु भवेत्परिकराङ्कुरः। चतुर्णां पुरुषार्थानां दाता देव-

यथा—"अङ्गराज! सेनापते! द्रोणोपहासिन्! कर्ण! रक्षेनं भीमात् दुःशासनम्।" (भ)

शब्दैः स्वभावादेकार्थैः श्लेषोऽनेकार्थवाचनम्॥७२६॥(म)

"स्वभावादेकार्थैः" इति शब्दश्लेषात् व्यवच्छेदः, "वाचनम्" इति च ध्वनेः। (य) उदाहरणम्—

"प्रवर्त्तयन् क्रियाः साध्वीर्मालिन्यं हरितां हरन्।
महसा भूयसा दीप्तो विराजति विभाकरः॥" (र)

चतुर्भुजः"॥ इति विशेषोऽवगन्तव्यः। तरोरङ्कुर इवायं परिवरार्थ भिन्नः, परिवरस्याङ्कुर इति विषयात्।

(भ) अङ्गराजेति।—भीमेन वध्यमानं दुःशासनं रक्षितुमशक्नुवन्तं कर्णं प्रति अवज्ञातः सोल्लुण्ठं वचनमिदम्। अङ्गानां—देशभेदानां, राजा अङ्गराजः तत्सम्बुद्धौ, सेनापते!—नाम् अवज्ञाय त्वं सेनापत्ये अभिषिक्तोऽसीति भावः, द्रोणम् उपहसितवान् इति द्रोणोपहासी तत्सम्बुद्धौ—त्वम् आत्मगर्वेण द्रोणं मत्पितरम् उपहसितवानसि, कर्ण! एनं दुःशासनं भीमात्—दुष्टोदरदरणात्, रक्ष—परित्रायस्व। अत्र उक्तविशेषवचनप्रभावात् कर्णस्य दुःशासनरक्षणम् अवश्यकर्त्तव्यं प्रतीयते, तथाविधस्य स्वपरत्वज्ञानशून्यतायां खञ्जातिप्रयुक्त इति बोध्यम्।

(म) अर्थश्लेषमाह, शब्दैरिति।—स्वभावात् एकार्थैः शब्दैः [स्वभावादित्यनेनदृष्टाभिधेयभावपरत्वरूपतात्पर्य्याद्दकत्वम्, अन्यथा एकार्थैरित्ययोग्यं, सर्वेषामेव शब्दानां वाच्यलक्ष्यव्यङ्ग्यरूपतानामर्थसम्बन्धात्] अनेकार्थानाम्—अनेकेषामर्थानां, वाचनम्—अभिधालक्षणाभ्यां प्रतिपादनं, सम्भिन्नभेदेन इति भावः, श्लेषः, एकस्मिन् विशेष्येऽभिधया, अपरस्मिन् विशेष्ये लक्षणया अर्थद्वयप्रतिपादनेऽर्थश्लेषः इति निष्कृष्टोऽर्थः।

(य) शब्दश्लेषादिति।—शब्दश्लेषे हि स्वभावादेव शब्दानां भिन्नार्थता, अत्र एव तस्य शब्दालङ्कारत्वम्, अर्थश्लेषे तु न शब्दानामनेकार्थत्वं, किन्तु पुनरपि अनेकार्थानामभिधालक्षणाभ्यां प्रतिपादनम्। ध्वनेः,—वाचकत्वमुखेन शब्दस्य व्यञ्जकतया तत्राभिधया बोधनसम्बन्धीति ध्वनेः, स्फुटं व्यवच्छेदः इति पूर्वेणान्वयः।

(र) प्रवर्त्तयन्निति।—[एतत्कारिकोपरि भाष्यम्] साध्वीः क्रियाः,—वैदिकलौकिकीः, यथे—सूर्य्यरूपेण पाथिवप्रजननद्वारा उपयोगि साधुक्रियानिष्पत्यर्थः; तदुक्तं विष्णु-

अत्र प्रकरणादिनियमाभावात् (ल)द्वावपि राजसूर्य्यौ वाच्यौ।

क्वचिद्विशेषः सामान्यात् सामान्यं वा विशेषतः।
कार्य्यान्निमित्तं कार्य्यञ्च हेतोरथ समात् समम्॥
अप्रस्तुतात् प्रस्तुतञ्चेद्गम्यते पञ्चधा ततः।
अप्रस्तुतप्रशंसा स्यात् ॥७२७॥ (व)

पुराणे—"स्पृष्टो यदंशुभिर्लोकः क्रियायोग्योऽभिजायते। पवित्रताकारणाय तस्मै शुद्धात्मने नमः॥" इति; प्रवर्त्तयन्—प्रजाभिः स्वयञ्च कारयन्, हरितां—दिग्वृत्तीनां, मालिन्यं—दैन्यादनौजस्यं, पक्षे—दिशां तमःश्यामतां, हरन्—अपाकुर्वन्, शिक्षाप्रदानादिना अन्धकारध्वंसेन चेति भावः, भूयसा—अतिमहता, महसा—"अधिक्षेपापमानादेः" इत्यादिना प्रागुक्तेन तेजसा, शौर्य्यप्रभावेण वा, पक्षे—ज्योतिषा, दीप्तः,—अधृष्यः, पक्षे—जाज्वल्यमानः, विभां—विनाशितदस्युजनोपद्रवतया यशःप्रसारं, पक्षे—संहृततमिस्रतया किरणप्रकाशं, करोतीति विभाकरः,—राजा सूर्य्यश्च, विराजति—शोभते।

(ल) ननु अत्र प्रकरणाद्राजप्रतीतौ सूर्य्ये व्यञ्जनयोपमाध्वनिरेवायमित्यत आह, प्रकरणादिनियमाभावात् इति।—आदिना संयोगादिपरिग्रहः। नन्वेवं शब्दश्लेष एवायं, विभाकरपदस्य राजसूर्य्योभयवाचकत्वादिति चेत्, न; तस्याष्टसु भेदेषु कस्मिंश्चिदपि भेदेऽस्यान्तर्भावानुपपत्तेः, विभाकरादिपदानां परिवृत्तावपि च एतस्य सम्भवात्, तथाऽपि यदि सङ्कीर्णमेवेदमुदाहरणमिति चेत्? तर्हीदम् असङ्कीर्णोदाहरणम्—"स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिम्। अहो! सुसदृशी वृत्तिः तुलाकोटेः खलस्य च॥" अत्रोन्नत्यधोगतिपदाभ्यामुत्कर्षापकर्षौ लक्ष्यौ इति बोध्यम्।

(व) अप्रस्तुतप्रशंसामाह, क्वचिदिति।—एतच्च वाक्यपञ्चकेऽन्वेति, "अप्रस्तुतात्" इति "सामान्यात्" इत्यादिपञ्चकस्य विशेषणम्। "प्रस्तुतम्" इति यथायथं लिङ्गविपरिणामाविपरिणामाभ्यां "विशेषः" इत्यादिपञ्चकस्य च विशेषणम्; तथा हि—क्वचित् सामान्यात्—साधारणात्, अप्रस्तुतात् विशेषः प्रस्तुतः, क्वचित् विशेषतः,—विशेषात्, अप्रस्तुतात् सामान्यं प्रस्तुतं, क्वचित् अप्रस्तुतात् कार्य्यात् प्रस्तुतं निमित्तं, क्वचित् अप्रस्तुतात् निमित्तात् प्रस्तुतं कार्य्यं, क्वचित् समात् अप्रस्तुतात् समं प्रस्तुतं गम्यते चेत्, ततः,—तदा, पञ्चधा—पञ्चविधा, उक्तरीत्येति भावः, अप्रस्तुतप्रशंसा—

क्रमेण उदाहरणम्—

"पादाहतं यदुत्थाय मूर्द्धानमधिरोहति।
स्वस्थादेवापमानेऽपि देहिनस्तद्वरं रजः॥" (श)

अत्र अस्मदपेक्षया रजोऽपि वरमिति विशेषे प्रस्तुते सामान्यमभिहितम्। (ष)

"स्रगियं यदि जीवितापहा
हृदये किं निहिता न हन्ति माम्?।
विषमप्यमृतं क्वचिद्भवेत्
अमृतं वा विषमीश्वरेच्छया॥" (स)

अत्र ईश्वरेच्छया क्वचिदहितकारिणोऽपि हितकारित्वं,

अप्रस्तुतेन प्रस्तुतस्य प्रशंसाव्यञ्जनं, यद्वा—प्रस्तुतव्यञ्जकमप्रस्तुतकथनम् अप्रस्तुतप्रशंसा, स्यात्।

(श) पादाहतमिति।—बलदेवस्योक्तिरियम्। यत् रजः,—धूलिः, पादाहतं—चरणाघातितं सत्, उत्थाय—उड्डीय, [उद्यम्येति तु ध्वनिः] मूर्द्धानं—शिरः, आहन्तुरेवेति शेषः, अधिरोहति—प्रतिपद्यते, [आक्रामतीति ध्वन्यर्थः] तत्—रजः, अपमानेऽपि—पराभवेऽपि, स्वस्थात्—अविचलात्, अविजिगीषोरित्यर्थः, देहिनः,—प्राणिनः, तदपेक्षयेति भावः, वरं—श्रेष्ठमित्यर्थः। ("देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीबे मनाक् प्रिये" इत्यमरः)। शिशुपालवधस्येदं पद्यम्।

(ष) सामान्यमभिहितमिति।—देहिनः इति सामान्यवाचकम् इति।

(स) स्रगिति।—दिव्यस्रजि उरसि पतितायामेव स्वप्रियामिन्दुमतीं गतासुमवलोक्य अजस्य विलापवचनमिदम्। इयं स्रक्—माल्यं, यदि जीवितम् अपहन्तीति जीवितापहा—जीवनहारिणीत्यर्थः, [यद्यपि "अपेः क्लेशतमसोः" (३।२।५ पा०) इति सूत्रविषयतया च्युतसंस्कारत्वदोषयुक्तं, तथाऽपि अजस्य शोकातुरतायाः प्रत्यायकतया च्युतसंस्कारत्वस्याकिञ्चित्करत्वमेव इति बोध्यम्] तदा हृदये निहिता सती, ममेति शेषः, मां किं—कथं, न हन्ति? मन्ये स्रजो न दोषः, ममैवेश्वरप्रतिकूलतेत्याह, विषमिति।—क्वचित् ईश्वरेच्छया विषमपि अमृतम्, अमृतं वा विषं भवेत्, अत एव मामनिहत्य एतामेव निहतवतीति भावः। वैतालीयं वृत्तम्। इदञ्च रघुवंशस्य पद्यम्।

हितकारिणोऽप्यहितकारित्वम् इति सामान्ये प्रस्तुते विशेषोऽभिहितः, एवं चात्र अप्रस्तुतप्रशंसामूलोऽर्थान्तरन्यासः। दृष्टान्ते प्रख्यातमेव वस्तु प्रतिबिम्बत्वेनोपादीयते, इह तु विषामृतयोरमृतविषीभावस्याप्रसिद्धेर्न तस्य सद्भावः। (ङ)

"इन्दुर्लिप्त इवाञ्जनेन जडिता दृष्टिर्मृगीणामिव
प्रम्लानाकृणिमेव विद्रुमदलं श्यामेव हेमप्रभा।
कार्कश्यं कलया च कोकिलवधूकण्ठेष्विव प्रस्तुतं
सीतायाः पुरतस्य हन्त! शिखिनां वर्हाः सगर्हा इव॥" (क)

अत्र सम्भाव्यमानेभ्यः (ख) इन्दादिगताञ्जनलिप्तत्वादिभ्यः कार्येभ्यो वदनादिगतसौन्दर्यविशेषरूपं प्रस्तुतं कारणं प्रतीयते।

(ङ) अथेति।—नन्वत्र बिम्बप्रतिबिम्बभावसत्त्वात् दृष्टान्त एवायमत आह—दृष्टान्ते इति। प्रख्यातमेवेति—प्रसिद्धमेवेत्यर्थः। तस्य—दृष्टान्तस्य, सद्भावः,—सम्भवः। अथवा यत्रहीत्यादिरत्रत्वनु—"मस्तिलुंठति पादेषु काचः शिरसि धार्यते। यत्रैवास्ति तत्रैवास्तु काचः काचो मणिर्मणिः॥" अत्राविवेचकैर्नीत्कृष्टत्वादेरपि नीत्कर्षापचयः, अनुत्कृष्टत्वादेरपि नीत्कर्षं इति प्रस्तुतमप्रस्तुतेन वाक्यार्थेन प्रतीयते।

(क) इन्दुरिति।—सीतायाः सौन्दर्यवर्णनमिदम्। इन्देति इन्दुसदृशमन्यत्, सीतायाः पुरतः,—अग्रतः, इन्दुः,—चन्द्रः, अञ्जनेन लिप्त इव—मालिन्यपूर्ण इव, न राजते इति भावः, मृगीणां दृष्टिः जडिता इव—सङ्कुचिता इव, विद्रुमदलं—प्रवालपल्लवं, प्रम्लानः,—प्रकर्षेण म्लानिं गतः, अरुचिना—धारल्यं यस्य तादृशमिव, हेम्नः,—काञ्चनस्य, प्रभा श्यामेव—कृष्णवर्णेव, कोकिलवधूनां—कोकिलानां, कण्ठेषु कलया—काकलीरवेण इत्यर्थः, कार्कश्यं—माधुर्यविपर्ययः, प्रस्तुतमिव—प्रचुरीभूतमिवेत्यर्थः, कोकिलारवः कर्कशः प्रतीयते इति भावः, तथा शिखिनां—मयूराणां, वर्हाः,—कलापाः, सगर्हा इव—निन्दिता इव, श्यामवीभत्सत्वात्मकत्वात् इति भावः। मार्दूलविक्रीडितं वृत्तम्।

(ख) अथेति।—सम्भाव्यमानेभ्यः,—उत्प्रेक्ष्यमाणेभ्यः। अनुक्तनिमित्तेयमुत्प्रेक्षा, लक्षितवाच्यत्वस्य लक्षिणे उपचारात् इदमुपपन्नम्। उदाहरणान्तरन्तु—"नाभ्रान्तं न क्षतं वर्षे क्षोभितं मधुभि नापिबत्। लक्षितं दीर्घिकाखेद विशोषं नीतमुत्पलम्॥"

"गच्छामीति मयोक्तया मृगदृशा निःश्वासमुद्रेक्षितं
त्यक्त्वा तिर्यगवेक्ष्य वाष्पकलुषेणैकेन मां चक्षुषा।
अद्य प्रेम मदर्पितं प्रियसखीवृन्दे त्वया बध्यता-
मित्थं स्नेहविवर्धितो मृगशिशुः सोत्रासमाभाषितः॥" (ग)

अत्र कस्यचिद्गमनरूपे कार्ये कारणमभिहितम्। (घ) तुल्ये प्रस्तुते तुल्याभिधाने च द्विधा श्लेषमूला सादृश्यमात्रमूला च। श्लेषमूलाऽपि समासोक्तिर्विशेषणमात्रश्लेषे श्लेषबहिश्चेष्टस्यापि (ङ) श्लेषे भवतीति द्विधा। क्रमेण यथा—

"सहकारः सदामोदो वसन्तश्रीसमन्वितः।
समुज्ज्वलरुचिः श्रीमान् प्रभूतोत्कलिकाकुलः॥" (च)

अशोभनाग्राह्यत्वमात्मरूपकार्यस्य प्रस्तुतायाः शोच्यावस्थायाः हेतोः प्रतीतिः, तत्सत्त्वनिश्चयसत्तात्वमेव कार्यैलक्षणभावानामवगन्तव्यम्।

(ग) गच्छामीति।—विदेशं गन्तुं कृतनिश्चयेऽपि गमने हेतुं प्रदर्शयतः कस्यचित् सखायं प्रति उक्तिरियम्। गच्छामि इति मया उक्तया मृगदृशा उद्रेक्षितं—दीर्घं, निःश्वासं त्यक्त्वा वाष्पकलुषेण—अश्रुमलिनेन, एकेन चक्षुषा मां तिर्यक्—वक्रम्, अवेक्ष्य—दृष्ट्वा, अद्य मदर्पितं—मयि विन्यस्तं, प्रेम त्वया प्रियसखीवृन्दे बध्यताम्—अर्प्यताम्, इत्थम्—अनेन प्रकारेण, स्नेहेन विवर्धितः,—प्रतिपालितः, मृगशिशुः सोत्रासं—सननाकृतिं, मृद्धडायुतम् इत्यर्थः, ("सोत्रासं सननाकृतिम्" इत्यमरः) आभाषितः,—कथितः। अद्य यावत् त्वामहं लालितवती, ततः परं प्रिये देशान्तरं गते तद्वियोगं सोढुमशक्ता जीवितं धारयामीति मम सखीजनस्यां आश्वासयतीति भावः। मार्दूलविक्रीडितं वृत्तम्।

(घ) अत्रेति।—गमनरूपे कार्ये, निरूपिते इति शेषः, कारणं—गमनविघ्नं प्रति तादृगाभाषणं, नायिकाया मरणाभिप्रायव्यञ्जकं वाक्यरूपमिति भावः।

(ङ) तुल्याभिधाने इति।—तुल्यस्य अप्रस्तुतस्य अभिधाने इत्यर्थः। विशेषणमात्रश्लेषे इति मात्रपदेन विशेष्यस्यव्यवच्छेदः। विशेष्यस्यापीत्यपिना विशेषणपरिग्रहः इति शेषम्।

(च) सहकार इति।—सहकारः,—अतिशयितसौरभः आम्र इत्यर्थः, अत एव सदा—अत्यन्तं, आमोदः,—गन्धो यस्य सथोक्तः; सदा—सतः,—कान्तादिः,

अत्र विशेषणमात्रश्लेषवशादप्रस्तुतात् सङ्कोचात् काञ्चित् प्रस्तुतस्य नायकस्य प्रतीतिः।

"पुंस्त्वादपि प्रविचलेत् यदि यद्यधोऽपि
यायात् यदि प्रणयने न महानपि स्यात्।
अभ्युद्धरेत् तदपि विश्वमिमोद्दशीयं
केनापि टिक् प्रकटिता पुरुषोत्तमेन॥" (क)

अत्र पुरुषोत्तमपदेन विशेषेणापि श्लिष्टेन प्रचुरप्रसिद्धया प्रथमं विष्णुरेव बोध्यते, तेन वर्ण्यनीयः कश्चित् पुरुषः प्रतीयते। (ख)

श्लेषो भिन्नान् कोकिलादीन्. आनीदयतीति तथोक्तः, अत्यन्त—सदा आनीदः, —हर्षो यस्य तथोक्तः, ("आनीदो हर्षनन्दयोः" इति मेदिनी) वसन्तस्य श्रिया—शोभया, पुष्पपल्लवादिजनितया इति भावः, वसन्तिकः,—युक्तः, वसन्तावतीचितवेश-भूषणान्वितश्च, वसुप्रवणा—भाक्तरा, रुचिः,—कान्तिः, अत्यन्त—अतुच्छवती—अत्यधिके, रुचिः,—अभिलाषो यस्य तथोक्तः, ("रुचिः स्त्री दीप्तौ शोभायामभिरुचाभिलाषयोः", इति मेदिनी) श्रीणाम्—स्त्रीः,—शोभा, वेशरचना च तद्वान्, उभयत्रापि सुदर्शन इत्यर्थः, तथा प्रभूताभिः,—बहुभिः, उल्लसिताभिः,—उद्भूतसुकुलैः, आकुलः,—व्याप्तः, अत्यन्त—प्रकर्षेण भूतया उल्लसिकया—नायिकोल्लासतया, आकुलः,—व्याकुलः।

(क) पुंस्त्वादिति।—पुंस्त्वात्—पुरुषभावात्, अपि यदि प्रविचलेत्—भ्रश्येत्, पुरुषत्वं परित्यजेत् यदि सो अपि स्त्रीति भावः, अधोऽपि—पातालेऽपि, यदि यायात्—गच्छेत्, प्रणयने—याच्ञायां, याचननिमित्तमित्यर्थः, यदि महान् अपि न स्यात्—लघुः स्यादित्यर्थः, तदपि—तथाऽपि, विश्वं—जगत्, अभ्युद्धरेत् इति दृढार्थे —एवमप्यर्थः, इयं दिक्—कीर्तिः, केनापि—अनिर्वचनीयेन इत्यर्थः, पुरुषोत्तमेन—पुरुषेषु उत्तमत्वादिविशेषेण, विष्णुना इत्यर्थः, प्रकटिता—दर्शिता। व्यञ्जनया अयं भावः, —यदि पुंस्त्वमपि विगच्छेत् तर्हि तत् विगच्छतु, यदि अधोऽपि (नरकेऽपि) पतनं स्यात् तर्हि तत् भवतु, यदि याच्ञया लघुत्वमपि स्यात् तर्हि तदपि अस्तु, एवं सर्वदा विपन्नो विपदापन्नोऽपि परं सङ्कटात् विश्वं—स्वदाक्ष्यम्, उद्धरेदिति केनापि पुरुषो-त्तमेन—स्वस्य विश्वधरत्वं प्रकटयता पुरुषोत्तमनाम्ना राज्ञेत्यर्थः, कीर्तिः प्रकटितेति। वसन्ततिलकं वृत्तम्। इयं भङ्गटप्रतिज्ञा।

(ख) अत्रेति।—प्रचुरप्रसिद्धया—भूरिप्रयोगेण, बहुशः ख्यात्या वा। विष्णु-रेवेति।—तेन हि देवतासामान्यवाचात् नीलिनीमूर्त्तिपरित्यक्तः अतः। अतश्चैव

सादृश्यमात्रमूला यथा—

"एकः कपोतपोतः श्यतश्च श्येनाः क्षुधाऽभिधावन्ति।
अम्बरमाततिशून्यं हरि हरि! मरणं विधेः करुणा॥" (झ)

अत्र कपोतादप्रस्तुतात् क्वचित् प्रस्तुतः प्रतीयते। इयञ्च क्वचित् वैधर्म्येणापि भवति। (ञ) यथा—

"धन्याः खलु वने वाताः कह्लारस्रग्यशीतलाः।
रामभिन्दीवरश्यामं ये स्पृशन्त्यनिवारिताः॥" (ट)

अत्र वाता धन्याः, अहमधन्य इति वैधर्म्येण प्रस्तुतः प्रतीयते। वाच्यस्य सम्भवासम्भवोभयरूपतया त्रिप्रकारेयम्। (ठ) तत्र सम्भवे उक्तोदाहरणान्येव।

निमग्नां धरामुद्धर्तुं वराहरूपेण पातालं प्रविष्टम्। बलिराजहृतं त्रैलोक्यमुद्धर्तुं वामनरूपेण याचितोऽपि छला इति द्रष्टव्यम्। अप्रस्तुतेनात्र अश्लीलं, न तूपनागरिति नीपनाभ्यानिलं, इयोरभिधेयलाभावान्न श्रैष्ठ्यम्।

(झ) एक इति।—एकः,—असहाय इत्यर्थः, कपोतपोतः,—पारावतशावकः, शिशुः कपोत इति यावत्, शतशः,—बहुशः, श्येनाः,—मांसादनाख्याः पक्षिविशेषाः, ("अथ मांसादनः। पक्षी श्येनः" इत्यमरः) क्षुधा—क्षुधया, अभिधावन्ति—इतस्ततो गच्छन्ति, एवं प्रतीति शेषः, अम्बरम्—आकाशम्, आततिशून्यं—निरावरणं, हरि हरि—इदं खेदसूचकमव्ययं, विधेः करुणा मरणं—रक्षित्री, विधातैवास्मदादीनां रक्षयतीति भावः। अनार्थाच्छन्दः।

(ञ) अनेति। क्वचित् प्रस्तुत इति।—प्रस्तुतः,—आपन्नः, यत्र बहवः श्रवणः, नीपनाभ्यानिलं नास्ति, स इत्यर्थः, बहुश्रुतपरिवृत इति भावः। इयञ्च—अप्रस्तुतप्रशंसा च, वैधर्म्येणापि—विधर्मान्तरव्यञ्जकवैधर्म्यविशिष्टस्य कथनेनापि इत्यर्थः। एवञ्च षट्प्रकारा अप्रस्तुतप्रशंसेति फलितम्।

(ट) धन्या इति।—दशरथस्योक्तिरियम्। कह्लाराणां—रक्तोत्पलवतां जलानां, अग्र्येण श्रीतलाः, [शीतस्पर्शप्रतीतिरत्र सजातीयोत्पलसंयोगजनिता] वने वाताः,—वनवायवः, धन्याः खलु, ये—वाताः, अनिवारिताः,—अविरोधनप्राप्ताः खलु, अविरतमित्यर्थः, इन्दीवरश्यामं रामं स्पृशन्ति।

(ठ) अनेति।—वाता धन्या इति वैधर्म्येण अहमधन्य इति प्रस्तुतः, खल इति

असम्भवे यथा—

"कोकिलोऽहं भवान् काकः समानः कालिमाऽऽवयोः ।
अन्तरं कथयिष्यन्ति काकलीकोविदाः पुनः ॥" (ङ)

अत्र काककोकिलयोर्वाक्योपवाक्यं प्रस्तुताध्यारोपणं विनाऽसम्भवि । (ढ)

उभयरूपत्वे यथा—

"अन्तश्छिद्राणि भूयांसि कण्टका बहवो बहिः ।
कथं कमलनालस्य मा भूवन् भङ्गुरा गुणाः ?" ॥ (ण)

अत्र प्रस्तुतस्य कस्यचिदध्यारोपणं विना कमलनालान्तश्छिद्राणां गुणभङ्गुरीकरणे हेतुत्वमसम्भवि, अन्येषान्तु सम्भवीत्युभयरूपत्वम् । अस्यापि समासोक्तिवत् व्यवहारसमा-

---

र्थः । वाच्यस्येति ।—क्वचित् वाच्यस्य—वाक्यार्थस्य, उभयरूपत्वं, क्वचित् असम्भवरूपत्वं, क्वचित्र उभयरूपत्वमिति भावः ।

(ङ) कोकिल इति ।—इयञ्च कस्यचित् निपुणस्य स्वबुद्धिमनुद्दिश्य उक्तिः । अहं कोकिलः, भवान् काकः, आवयोः कालिमा—कृष्णवर्णत्वं, समानः, पुनः,—किन्तु, काकली—तूष्णीं मधुरध्वनिः, ("काकली तु कले तूष्णीं" इत्यमरः) तस्यां कोविदाः,—विचक्षणाः, अन्तरं—कोकिलोऽहमिति प्रभेदम्, आवयोरिति शेषः, कथयिष्यन्ति । कालिम्ना समानत्वेऽपि ये काकलीविज्ञास्ते आवयोः कोकिलकाकयोर्भेदं निरूपयिष्यन्ति, यश्च काकली सोऽहं कोकिलः, यश्च च कटुरटनं स च भवानिति निवेदनानन्तरमेव ते ज्ञास्यन्ति इति भावः ।

(ढ) अनेति ।—वाक्योपवाक्यम्—उक्तिप्रत्युक्ती, ["वाक्योवाक्यम्" इति पाठे—स एवार्थः] प्रस्तुतयोः,—तयोः काककोकिलयोः, अध्यारोपणम्—आरोपं, स्वरूपव्यञ्जनमित्यर्थः, विना असम्भवि—न सम्भवति इति भावः ।

(ण) अन्तरिति ।—कमलनालस्य—पद्मदण्डस्य, गुणाः,—तन्तवश्च यान्यपि च, कथं भङ्गुराः,—छिद्रुराः नश्वराश्च, मा भूवन् ?—न भवेयुः ? यतः अन्तः,—अभ्यन्तरे, भूयांसि—बहूनि, छिद्राणि—विवराणि दोषाश्च, तथा बहिः बहवः कण्टकाः,—नीचायत्तधारयत्वाः दुरन्तत्वश्च, सन्तीति शेषः ।

रोपप्राणत्वात् शब्दशक्तिमूलात् वस्तुध्वनेर्भेदः, उपमाध्वनाव-प्रस्तुतस्य व्यङ्ग्यत्वम्। एवं समासोक्तौ श्लेषेऽपि द्वयोरपि वाच्यत्वम्। (त)

उक्ता व्याजस्तुतिः पुनः।

निन्दास्तुतिभ्यां वाच्याभ्यां गम्यत्वे स्तुतिनिन्दयोः॥७२८॥(थ)

निन्दया (द) स्तुतेर्गम्यत्वे व्याजेन स्तुतिरिति व्युत्पत्त्या व्याजस्तुतिः, स्तुत्या निन्दाया गम्यत्वे व्याजरूपा स्तुतिः। क्रमेण यथा—

(त) अत्रेति।—छिद्राणां—विवराणां, गुणभङ्गुरीकरणे—पद्मनालतन्तुच्छेदने। अन्येषां—कण्टकानामित्यर्थः। अस्याश्च—श्लेषमूलतुल्याप्रस्तुतप्रशंसायाश्चेत्यर्थः, समासोक्तिवत्—समासोक्तौ यथा श्लिष्टशब्दप्रयोगमात्रेण व्यवहारो न प्रतीयते, किन्तु विशेषणसाम्यानुसन्धानेनापि, तथा अत्रापि विशेषणसाम्यानुसन्धानमपि अपेक्षितं, शब्दशक्तिमूलवस्तुध्वनौ तु तन्नापेक्षितमिति ततोऽस्या भेदः, तत्र हि व्यवहार-समारोपो नास्तीति भावः। एवं समासोक्तौ, अप्रस्तुतस्य व्यङ्ग्यत्वमिति शेषः, इह तु प्रस्तुतस्य इति भावः। द्वयोः,—प्रस्तुताप्रस्तुतयोः, वाच्यत्वं, प्रकरणादिनियमाभावा-दित्यर्थः।

(थ) व्याजस्तुतिमाह, उक्तेति।—वाच्याभ्याम्—अभिधेयाभ्याम्, आपाततः प्रतीयमानाभ्यामित्यर्थः, निन्दास्तुतिभ्यां स्तुतिनिन्दयोर्गम्यत्वे—प्रतीयमानत्वे, व्याज-स्तुतिरुक्ता। अयं भावः,—व्याजेन—छलेन, प्रकारान्तरेणेति यावत्, स्तुतिः,—प्रशंसनम् इति व्याजस्तुतिः, स्तुतेश्च प्रकारान्तरं निन्दा, तस्मात् निन्दारूपेण प्रकारा-न्तरेण स्तुतिर्व्याजस्तुतिरिति फलितम्। एवं व्याजा—छलरूपा, परमार्थदशायाम-वास्तवीति यावत्, स्तुतिरिति वा व्याजस्तुतिः; स्तुतेः अवास्तवत्वन्तु निन्दापरत्वादेव सम्भवति, तस्मात् स्तुत्या निन्दा व्याजस्तुतिरित्यपि फलितम्; वाच्यया निन्दया स्तुत्या वा स्तुतेर्निन्दाया वा पर्य्यवसीयमानत्वे व्याजस्तुतिरिति भावः।

(द) ननु निन्दाव्याजेन स्तुतिरिति भवतु व्याजस्तुतिः, स्तुतिव्याजेन निन्दा तु व्याजनिन्दैव भवति, अथ कथमुभयथा व्याजस्तुतिः? इत्यतः संज्ञाया द्विविधं योगार्थ-माह—निन्दयेति।

"स्तनयुगमुक्ताभरणाः कण्टककलिताङ्घ्रयष्टयो देव !।
त्वयि कुपितेऽपि प्रागिव विश्वस्ता रिपुस्त्रियो जाताः॥" (घ)

इदं मम।

"व्याजस्तुतिस्तव पयोद ! मयोदितेयं
यज्जीवनाय जगतस्तव जीवनानि।
स्तोत्वन्तु ते महदिदं घन ! धर्मराज-
साहाय्यमर्जयसि यत् पथिकान् निहत्य॥" (ङ)

(घ) स्तनेति।—राजानं प्रति कश्चित् व्याजस्तुतिरियम्। हे देव! त्वयि कुपितेऽपि रिपूणां स्त्रियः,—नार्यः, स्तनयुगेषु मुक्ताभरणं—हारो यासां तथाभूताः, (इति निन्दा) पक्षे—स्तनयुगेभ्यः मुक्तानि—त्यक्तानि, आभरणानि याभिरिति, स्तनयुगैः मुक्तानि—त्यक्तानि, आभरणानि यासामिति वा तथोक्ताः, (इति स्तुतिः) कण्टकेन—रोमाञ्चेन, पतिसङ्गजनितसात्त्विकभावविशेषेण इति यावत्, कलिताः,—आक्रान्ताः, कण्डयष्टयो यासां तथाविधाः, (इति निन्दा) पक्षे—कण्टकैः,—सूच्यग्रतुल्यैः इक्षुकण्टकविशेषैः, कलिता—आक्रान्ता, कण्डयष्टिः,—चरणादिरूपाङ्गं यासां तथाभूताः, (इति स्तुतिः। "सूच्यग्रे तुदशल्यो च रोमहर्षे च कण्टकः" इत्यमरः) अत एव प्रागिव—इतरकोपात्पूर्वकाले इव, अकुपिते इवेत्यर्थः, विश्वस्ताः,—अयमस्माकं नाथवत्तां इति विश्वासाश्रयाः, निःशङ्का इति यावत्, (इति निन्दा) पक्षे—विधवाः, ("विश्वस्ताविधवे समे" इत्यमरः) जाताः, (इति स्तुतिः)। अत्र अनुक्तौचित्यं दोषाजनकत्वेन व्याघाततो निन्दा, पर्य्यवसाने तु अनुक्तौचित्यजनकत्वेन स्तुतिः प्रतीयते इति निन्दया स्तुतेर्गम्यत्वम्। यद्वा वा—"अलसे शौर्य्यमदो योद्धुं लज्जेयं सखिमाक्षिपते। सकलसखिजनाकृष्टा भवन्ति परिपन्थिनः॥" इति। अत्र राज्ञो निन्दा तत्परिपन्थिनाञ्च स्तुतिः वाच्या, तया प्रकृतस्य राज्ञः स्तुतिः, तत्परिपन्थिनाञ्च निन्दा प्रतीयते।

(ङ) व्याजेति।—पयोद!—हे मेघ! तव जीवनानि—जलानि, जगतः जीवनाय, भवन्तीति शेषः, इति यत् इयं तव व्याजस्तुतिः,—कृतरूपा स्तुतिः, घन!—हे मेघ! इदन्तु ते—तव, महत् खलु, यत् पथिकान् निहत्य धर्मराजस्य—नीतिपरतया सदाभिज्ञो राज्ञः, यमस्य वा, साहाय्यम्—आनुकूल्यम्, अर्जयसि। अत्र स्तुत्या यमराजसाहाय्यार्जनरूपाया निन्दाया गम्यत्वम्। वस्तूत्तिरूपं इदम्। तथा च, "यदा न मुद्गरोघसे न धनिनां प्रभे न चाटूक्तिभिः नैषां जर्जयसे मनः अथोपि न च तान् प्रत्याशया धावसि। आसे वासगृहाणि खादसि परं निद्रासि निद्राऽऽगमे तस्मै वृद्धि

पर्य्यायोक्तं यदा भङ्ग्या गम्यमेवाभिधीयते ॥७२९॥(प)

कुरङ्ग ! कुत्र भवता किन्नाम तप्तं तपः ?" ॥ इत्यत्र तु कुरङ्गस्तुत्या राजसेवानिर्विण्णस्य स्वात्मनो निन्दा व्यज्यते इति दीक्षिताः। प्राञ्चस्तु—स्तुतिनिन्दयोः सामानाधिकरण्येन प्रतीतावेवोक्तालङ्कारमभ्युपगच्छन्ति। तेषामयमाशयः,—निन्द्यत्ववद्विषयकत्वं स्तुत्यवद्विषयकत्वञ्च तावत् स्तुतिनिन्दयोः व्याजत्वमिति स्पष्टम् एव, तदेव चोक्तालङ्कारप्रवृत्तिनिमित्तं, तच्च यस्यैव स्तुतिनिन्दे, तस्यैव निन्दास्तुत्योः प्रतीतौ सम्भवति, न त्वन्यथा। न च स्वविपर्य्ययतात्पर्य्यवत् स्तुतिनिन्दाऽन्यतरकत्वमेव प्रवृत्तिनिमित्तं, तच्च सामानाधिकरण्यवैयधिकरण्योभयसाधारणमिति वाच्यम्, एकालङ्कारकोपाध्यवच्छिन्नविषयसाधारणस्यालङ्कारान्तरविभाजकोपाधेः कल्पयितुमनुचितत्वात्, वैयधिकरण्यस्थले चाप्रस्तुतप्रशंसयैवोपपत्तेः तत्साधारणप्रवृत्तिनिमित्तकल्पने प्रमाणाभावात्; तदुक्तमाचार्य्यदण्डिना—"अप्रस्तुतप्रशंसा स्यादप्रकाण्डे तु या स्तुतिः। अर्थैरयत्नसुलभैर्जलदर्भाङ्कुरादिभिः॥ मुखं जीवन्तु हरिणा न येष्व(ये स्व)परसेविनः। सेयमप्रस्तुतेवात्र मृगवृत्तिः प्रशस्यते॥ राजानुवर्त्तनक्लेशनिर्विण्णेन मनस्विना॥" इति। यत्तूक्तम्—"अप्रस्तुतप्रशंसायामप्रस्तुतेन प्रस्तुतार्थप्रतिपत्तिमात्रं, न तु प्रकृताप्रकृतयोः निन्दास्तुतिस्वरूपनियमः, अत्र स्तुत्या निन्दाऽभिव्यक्तिनियमात्; किञ्चैवं सम्मतस्थलेऽप्यप्रस्तुताभ्यां स्तुतिनिन्दाभ्यां प्रस्तुतनिन्दास्तुतिप्रतीतिः इत्यप्रस्तुतप्रशंसैव स्यात् इति व्याजस्तुतेरुच्छेदापत्तिः। स्तुतिनिन्दाप्रतीतिनियमरूपविशेषादतिरेकस्तूभयत्रापि समानः; अतः,—"अर्थैरयत्नसुलभैः—" इत्यादौ व्याजस्तुतिरेव युक्ता" इति, तच्चिन्त्यम्; अप्रस्तुतेन प्रस्तुतप्रतिपत्तिमात्रमप्रस्तुतप्रशंसास्वरूपं, तच्चोक्तस्थलेऽप्यबाधितमेव इति न निन्दास्तुतिप्रतीतिनियमवैलक्षण्येनातिरिक्तत्वसम्भवः, उक्तधर्मावच्छिन्नत्वेन तदैक्यसिद्ध्यावान्तरविशेषेण तद्भेदानुपपत्तेः; अन्यथाऽनयैव रीत्या सामान्यधर्मावच्छिन्नावान्तरतत्तद्विशेषस्थलेऽप्यलङ्कारान्तरकल्पने अप्रस्तुतप्रशंसाविलयापत्तेः। यदपि किञ्चैवमित्यादि, तदप्यसत्, सम्मतस्थले स्तुतिनिन्दयोरेकधर्मत्वात् अप्रस्तुतप्रशंसायास्तत्रासम्भवेन व्याजस्तुतेः पार्थक्यस्य साम्राज्यात्। प्रस्तुतधर्मिकेऽप्यप्रस्तुतप्रशंसाऽभ्युपगमे तु ललितालङ्कारपार्थक्यस्वीकारः तत्रैव व्याहतः स्यादिति दिक्।

(प) पर्य्यायोक्तमाह, पर्य्यायोक्तमिति।—यदा भङ्ग्या—भङ्गीक्रमेण, उक्तिवैचित्र्यविशेषेणेत्यर्थः, गम्यमेव—बोध्यमेवेत्यर्थः, अभिधीयते—अभिधेयवत् स्फुटं प्रतीयते, तत् पर्य्यायोक्तम्; एवञ्च पर्य्यायेण भङ्ग्या व्यङ्ग्यस्य स्फुटप्रतिपादनं पर्य्यायोक्तम् इति सारः।

उदाहरणम्—

"स्पृष्टास्ता नन्दने शच्याः केशसम्भोगलालिताः।
सावज्ञं पारिजातस्य मञ्जर्य्यो यस्य सैनिकैः॥" (फ)

अत्र हयग्रीवेण स्वर्गो विजित इति प्रस्तुतमेव गम्यं कारणं वैचित्र्यविशेषप्रतिपत्तये सैन्यस्य पारिजातमञ्जरीसावज्ञस्पर्शन-रूपकार्य्यद्वारेणाभिहितम्। (ब) न चेदं कार्य्यात् कारण-प्रतीतिरूपा अप्रस्तुतप्रशंसा, तत्र कार्य्यस्य अप्रस्तुतत्वात्; इह तु वर्णनीयस्य प्रभावातिशयबोधकत्वेन कार्य्यमपि कारण-वत् प्रस्तुतम्। एवञ्च—

"अनेन पर्य्यासयताऽश्रुविन्दून्
मुक्ताफलस्थूलतमान् स्तनेषु।
प्रत्यर्पिताः शत्रुविलासिनीनाम्
आक्षेपसूत्रेण विनैव हाराः॥" (भ)

अत्र वर्णनीयस्य राज्ञो गम्यभूतशत्रुमारणरूपकारणवत्

(फ) स्पृष्टा इति।—यस्य—हयग्रीवस्य इत्याशयः, सैनिकैः शच्याः,—इन्द्राण्याः, केशानां सम्भोगे—नेपथ्यक्रियायाम् इत्यर्थः, लालिताः,—प्रयुक्ताः, यद्वा—केशानां सम्भोगाय—भूषणाय, लालिताः,—सयत्नं पालिताः, नन्दने—तदाख्योपवने, पारिजातस्य ताः,—प्रसिद्धाः, मञ्जर्य्यः, सावज्ञं—सावहेलं, स्पृष्टाः, स हयग्रीव आसीदिति शेषः।

(ब) अत्रेति।—अत्र इन्द्रस्यातिपराभवेन भयस्य, हयग्रीवोद्याने पारिजात-मञ्जरीणामनुभूतत्वात् आदरस्य चाभावः सावज्ञमित्यनेन प्रतीयते; इत्थञ्च हय-ग्रीवेण स्वर्गः सुतरां जित इति व्यङ्ग्यं सुव्यक्तमेव इति ज्ञेयम्। वैचित्र्यविशेषस्य—अप्रस्तुतप्रशंसाजन्यवैचित्र्यादिलक्षणवैचित्र्यस्य, प्रतिपत्तये—सिद्धये। कार्य्यद्वारेण—कार्य्याभिधानमुखेन, अभिहितं—स्फुटं प्रतिपादितम्।

(भ) अनेनेति।—अनेन—राज्ञा इति यावत्, शत्रुविलासिनीनां—रिपुसुन्द-रीणां, स्तनेषु मुक्ताफलानीव स्थूलतमान्—अतिस्थूलान्, अश्रुविन्दून् पर्य्यासयता—पातयता सता, आक्षेपसूत्रेण—ग्रन्थनगुणेन, गुम्फनसूत्रेण इति यावत्, विनैव हाराः,—मुक्तावल्यः, प्रत्यर्पिताः। उपजातिर्वृत्तम्। रघुवंशस्येदं पद्यम्।

कार्य्यभूतं तथाविधशुकस्त्रीक्रन्दनजलमपि प्रभावातिशयबोधकत्वेन वर्णनार्हमिति पर्य्यायोक्तमेव। (म)

"राजन्! राजसुता न पाठयति मां देव्योऽपि तूष्णीं स्थिताः
कुजे! भोजय मां कुमारसचिवैर्नाद्यापि किं भुज्यते?।
इत्थं राजशुकस्तवारिभवने मुक्तोऽध्वगैः पञ्जरात्
चित्रस्थानवलोक्य शून्यवडभावैकैकमाभाषते॥" (य)

अत्र "प्रस्थानोद्यतं भवन्तं श्रुत्वा सहसैव अरयः पलायिताः इति कारणं प्रस्तुतम्"। "कार्य्यमपि (र) वर्णनार्हत्वेन प्रस्तुतम्" इति केचित्। अन्ये तु "राजशुकवृत्तान्तेन न कोऽपि प्रस्तुतस्य प्रभावो बोध्यते इति अप्रस्तुतप्रशंसैव" इत्याहुः।

सामान्यं वा विशेषेण विशेषस्तेन वा यदि।
कार्य्यञ्च कारणेनेदं कार्य्येण च समर्थ्यते।
साधर्म्येणेतरेणार्थान्तरन्यासोऽष्टधा ततः॥७३०॥(ल)

(म) अनेति।—वर्णनार्हमिति—वर्णनार्हत्वेन प्रस्तुतमित्यर्थः। पर्य्यायोक्तमेवेत्येवकारेण अप्रस्तुतप्रशंसाव्यवच्छेदः।

(य) काव्यप्रकाशे काव्यांत् कारणरूपाप्रस्तुतप्रशंसायाः दत्तमुदाहरणं पर्य्यायोक्तविषयत्वेन समर्थयति, राजन्निति।—अनुजयोद्यतं राजानं प्रति पलायितेषु राजपरिवारेषु प्रासादस्थितस्य पालितशुकस्य राजादिचित्रपटेषु राजादिबुद्ध्या आवेदनस्य तत्रारसुखेनोक्तिरियम्। हे राजन्! राजसुता मां न पाठयति, देव्यः,—महिष्यः अपि, तूष्णीं स्थिताः,—न पाठयन्ति इति भावः, हे कुजे! मां भोजय, कुमारस्य—राजपुत्रस्य, सचिवैः,—सहचरैः, यद्वा—कुमारैरेव सचिवैः,—भक्षभोजनसहचरैः, किं—कथम्, अद्यापि—इदानीमपि, न भुज्यते? इत्थम्—अनेन प्रकारेण, तव अरेः भवने—वासुनि, अध्वगैः,—पथिकैः, पञ्जरात्—पिञ्जरात्, मुक्तः राजशुकः शून्यवडभौ—राजादिहीनपटे इत्यर्थः, चित्रस्थान्, राजादीनिति शेषः, अवलोक्य एकैकम्—एकाकी एव, आभाषते—कथयति। शार्दूलविक्रीडितं वृत्तम्।

(र) अनेति।—कार्य्यमपीति—शुकाऽऽभाषणरूपं कार्य्यमपीत्यर्थः।

(ल) अथांतरन्यासमाह, सामान्यमिति।—साधर्म्येण—सजातीयधर्मवत्तया

क्रमेण उदाहरणम्—

"बृहत्सहायः कार्य्यान्तं चोदीयानपि गच्छति।
सम्भूयाम्भोधिमभ्येति महानद्या नगापगा॥" (व)

अत्र द्वितीयार्द्धगतेन विशेषेणार्थेन प्रथमार्द्धगतः सामान्योऽर्थः सोपपत्तिकः (ग) क्रियते।

साधर्म्यप्रकारकज्ञानेन इत्यर्थः, (सामान्यविशेषयोः विधीयमानधर्म एव विशेष-सामान्ययोः साधर्म्ये, तस्य क्वचित् तादृप्येण, क्वचित् व्याप्यधर्मेण, क्वचित् व्यापकधर्मेण सह एव समर्थकः) इतरेण—वैधर्म्यज्ञानेन, (वैधर्म्ये निरूक्तसाधर्म्यविरुद्धधर्मः, तज्ज्ञानेनेत्यर्थः) वा विशेषेण—व्याप्यधर्मावच्छिन्नगोचरेण, सामान्यं—व्यापकधर्मावच्छिन्नमित्यर्थः. वा तेन—सामान्येन, विशेषो वा, कारणेन कार्य्यस्य [कारणस्य साधर्म्ये प्रकृतकार्य्यसाधनत्वं, वैधर्म्ये स्वविरुद्धस्वकार्य्यविरुद्धसाधनत्वम्] कार्य्येण इदं—कारणस्य, (कार्य्यस्य साधर्म्ये प्रकृतकारणजन्यत्वं, वैधर्म्ये स्वविरुद्धस्य स्वकारणविरुद्ध-जन्यत्वम्) यदि समर्थ्यते—सोपपत्तिकोक्रियते, संशयायोग्यत्वादिरूपानुपपत्तिनिरा-करणेन दृढप्रतिपत्तिविषयः क्रियते इति यावत्, तदा अर्थान्तरन्यासः इत्यर्थः, हेतु-त्वात् समर्थकः काव्यलिङ्गवत्। असौ ततः,—उक्तरीत्या, अष्टधा—अष्टप्रकारः इति ज्ञेयम्। तथा हि, सामान्यं विशेषो वा विशेषस्य सामान्यस्य वा समर्थकं इति द्वौ भेदौ, एवं कार्य्यं कारणं वा कारणस्य कार्य्यस्य वा समर्थकम् इति द्वौ भेदौ, एवं प्रकारचतुष्टयं साधर्म्यवैधर्म्याभ्यां प्रत्येकं पुनः प्रकारद्वये अष्टप्रकारत्वं सम्पद्यते।

(व) सामान्यविशेषसाधर्म्येण समर्थनमाह, बृहदिति।—चोदीयान्—क्षुद्र-तरोऽपि जनः, बृहत्—महान्, सहायो यस्य तथाभूतः सन्, कार्य्यान्तं—कार्य्यपारं, कार्य्यातिशयं वा, महाकार्य्यमित्यर्थः, गच्छति—प्राप्नोति, साधयतीति यावत्, सिद्ध-कार्य्यो भवतीत्यर्थः; तथा हि, नगापगा—नगनिर्झरिणी, [नद्या नगसम्बन्धदर्शनेन जलबाहुल्याभावः प्रतीयते, तेन चातिक्षुद्रत्वम्] महानद्या—गङ्गाप्रभृतिकया, सम्भूय—मिलित्वा, अम्भोधिं—समुद्रम्, अभ्येति—प्राप्नोति। शिशुपालवधस्थेदं पद्यम्। यथा वा—"निजदोषाहतमनसामतिसुन्दरमेव भाति विपरीतम्। पश्यति पित्तोपहतः शशिशुभ्रं शङ्खमपि पीतम्॥" इति।

(ग) अथेति।—द्वितीयार्द्धगतेन—द्वितीयवाक्यार्थसङ्गतेन, विशेषेण—विशेष-रूपेण नगापगया, अर्थेन—महानदीसंङ्गमप्रयुक्तसमुद्राप्तिरूपमहाकार्य्यसाधनत्व-रूपोपपत्तिविषयत्वेनेत्यर्थः, सोपपत्तिकः,—विधीयमानः, संशयानिरासेन निश्चयविषयः

"यावदर्थपदां वाचमेवमादाय माधवः।
विरराम महीयांसः प्रकृत्या मितभाषिणः॥" (ष)
"पृथ्वि! स्थिरा भव भुजङ्गम! धारयैनां
त्वं कूर्मराज! तदिदं द्वितयं दधीथाः।
दिक्कुञ्जराः! कुरुत तत्त्रितये दिधीर्षाम्
आर्य्यः करोति हरकार्मुकमाततज्यम्॥" (स)

इत्यर्थः, एकविशेषस्य यद्दृश्यते बाधकाभावेन तुल्यन्यायतया तत्सधर्माणामन्येषामपि तत्सम्भवतीति विशेषदर्शिनां सामान्यविधीयमानस्य संशयो निवर्त्तते इति सुतरां दृढ़प्रतिपत्तिरिति भावः। अत्र सामान्यसमर्थनमुखेन अस्मत्क्षुद्रतरस्यापि शिशुपालस्य कालयवनादिबृहत्सहायसम्पत्त्या अस्मत्पराभवरूपबृहत्कार्य्यसाधनत्वं समर्थितम् इत्यवधेयम्।

(ष) विशेषस्य सामान्यसाधर्म्येण समर्थनमाह, यावदिति।—माधवः,—कृष्णः, यावन्तः अर्थाः यावदर्थं, यावदर्थपदानि—सुप्तिङन्तानि यस्यां तथोक्तां, ["यावदर्थ्यपदाम्" इति पाठे—यावन्त्येव अर्थ्यानि—प्रकृतोपयुक्तार्थात् अनपेतानि, पदानि यस्यां तां, न त्वनुपयुक्तार्थपदैर्बहुलामित्यर्थः, एतेन वाक्यस्याल्पत्वं सूचितम्] एवम्—उक्तप्रकारां, वाचम् आदाय—गृहीत्वा, उक्त्वेत्यर्थः, विरराम—निववृते, ["व्याङ्परिभ्यो रमः" (१।३।८३ पा०) इति परस्मैपदम्] तथा हि, महीयांसः,—महत्तराः, अतिमहान्तः इति यावत्, जनाः इति शेषः, प्रकृत्या—स्वभावेन, मितभाषिणः,—अल्पवचसः, भवन्तीति शेषः, वृथाऽऽलापनिषेधादिति भावः। अत्र व्यञ्जनया विधीयमानमपि माधवस्याल्पभाषणं प्रतिपाद्यबाहुल्ये सत्यनुपपन्नमहत्तरस्य स्वभावत एवाल्पभाषणम् इति सामान्यगोचरसाधर्म्यज्ञानेन समर्थ्यते, सामान्यधर्मो विशेषेष्वप्रतिहतप्रसरः इति विशेषदर्शनेनानुपपत्तिनिरासः इति भावः। शिशुपालवधस्येदं पद्यम्। यथा वा—"सुसितवसनालङ्कारायां कदाचन कौमुदी महसि सुदृशि स्वैरं यान्त्यां गतोऽस्तमभूद्विधुः। तदनु भवतः कीर्त्तिः केनाप्यगीयत येन सा प्रियगृहमगात् मुक्ताशङ्का क्व नासि शुभप्रदः?"॥ इति।

(स) कारणसाधर्म्येण कार्य्यसमर्थनमाह, पृथ्वीति।—श्रीरामेण हरधनुर्ज्यायोगोद्यमे कृते पृथ्व्यादीनामस्थैर्य्यादिकं सम्भावयतः लक्ष्मणस्योक्तिरियम्। हे पृथ्वि! (त्वं) स्थिरा भव, भुजङ्गम!—हे अनन्त! इति भावः, त्वम् एनां पृथ्वीं, धारय, हे कूर्मराज! त्वम् इदं द्वितयं—पृथ्वीभुजङ्गमयोर्द्वयं, पृथ्वीं भुजङ्गमं (शेषं) चेति यावत्,

अत्र कारणभूतं हरकार्मुकाततज्यीकरणं पृथ्वीस्थैर्य्यादेः कार्य्यस्य समर्थकम्। (ह)

"सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।"(क)

इत्यादौ सम्पद्वरणं कार्य्यं सहसा विधानाभावस्य विमृष्यकारित्वरूपस्य कारणस्य समर्थकम्। (ख) एतानि साधर्म्ये उदाहरणानि। वैधर्म्ये यथा—

दधीथाः,—धर, दिक्कुञ्जराः!—हे दिक्षु कुञ्जराः,—गजाः इति तत्सम्बुद्धौ तथोक्ताः, दिग्गजा इत्यर्थः, ("कुञ्जरो वारणः करी" इत्यमरः। ते च—"ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः। पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः॥" इत्युक्ता ज्ञेयाः) तत्त्रितये—तेषां—पृथ्वीभुजङ्गकूर्माणां, त्रितयं तत्रेति तथोक्ते, दिधीर्षां—धारणेच्छां, धारणप्रयत्नमित्यर्थः, कुरुत, आर्य्यः,—पूज्यः, रामः इति यावत्, ["आर्य्यः" इत्यत्र "देवः" इति पाठान्तरम्] हरस्य—शम्भोः, कार्मुकं—धनुः, आततज्यं—विस्तृतमौर्वीकम्, आरूढगुणमित्यर्थः, करोति। वसन्ततिलकं वृत्तम्। बालरामायणस्येदं पद्यम्।

(ह) अत्रेति।—आततज्यीकरणं—गुणयोगानुकूलव्यापारः। पृथ्व्यादीनां स्थैर्य्यादेः सिद्धत्वे तत्तन्नियोगानुपपत्त्या स्थैर्य्यादिविशेषो लक्षणीयः, तस्य च ज्यायोगसम्भावनायामनुष्ठितत्वेन कार्य्यत्वमक्षतमेव, तच्च ज्यायोगसम्भावनायाः कारणत्वग्रहेणैव समर्थ्यते। स्थैर्य्यादीनां नियुज्यमानत्वेन कार्य्यत्वं प्रतीयते, तच्च कारणमन्तरेण नोपपद्यते इत्यनुपपत्तिरत्रावधेया।

(क) कार्य्यसाधर्म्येण कारणसमर्थनमाह, सहसेति।—सहसा—अविविच्येत्यर्थः, क्रियां न विदधीत—न कुर्य्यात्, अविवेकः,—विवेचनाराहित्यं, यद्वा—अविमृष्यकारी जनः, परम्—अत्यर्थम्, आपदां पदं—स्थानम्। अस्योत्तरार्द्धन्तु—"वृणते हि विमृष्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः"। व्याख्या च—सम्पदः गुणलुब्धाः,—गुणानुरक्ताः सत्यः, विमृष्यकारिणं जनं स्वयमेव वृणते हि—आश्रयन्त्येव। वैतालीयं वृत्तम्। किरातार्जुनीयस्येदं पद्यम्।

(ख) इत्यादाविति।—अत्र विधीयमानस्य सहसा विधानाभावस्य किञ्चिदिष्टं प्रति साधनत्वमवगम्यते, तच्च क्वचिदिष्टे साध्यत्वग्रहमन्तरेण नोपपद्यते इति कार्य्यस्य समर्थकत्वं सम्पद्वरणं कार्य्यमिति, कार्य्यं—कार्य्यत्वप्रतीतिविषयः; कार्य्यत्वप्रतीतिरत्र "उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः" इतिवत् विमृष्यकारित्वे एव सहसा विधाना-

"इत्थमाराध्यमानोऽपि क्लिश्नाति भुवनत्रयम्।
आम्येत् प्रत्युपकारेण नोपकारेण दुर्जनः॥" (ग)

अत्र सामान्यं विशेषस्य समर्थकम्। "सहसा विदधीत" इत्यत्र सहसा विधानाभावस्य आपत्प्रदत्वं विरुद्धं कार्यं समर्थकम्। (घ) एवमन्यत्।

भाव: पर्य्यवस्यतीति नानयोर्भेदः। विशेषवैधर्म्येण सामान्यसमर्थनं यथा—"गुणानामेव दौरात्म्याद्दुर्य्यो धुरि नियुज्यते। अतः सुखं खलु प्राप्तविपक्षाः सुखं खपिति गौगैरिः॥" दुःखावहकर्मप्रयोजकत्वात् गुणानां निन्दा, [धुर्यः,—धूर्वहनयोग्यः, किंचः,—वहनविक्रविशेषः, गर्दिः,—चक्षुषः] अत्र गुणवन्त एव धुर्याः भारवहने नियुज्यन्ते इत्यत्रयोगव्यवच्छेदप्रतीतेः अन्ययायोगपरिच्छेदेनोपपद्यते इति धूर्वहनयोग्यतया धुर्यविशेषे गर्दिलवे धूर्वहनायोगरूपवैधर्म्यज्ञानं समर्थकं, किंचद्दीनस्खलत्वेन सुखसुप्तेन च भारवहनायोगः प्रतीयते इति सङ्क्षेपः।

(ग) सामान्यवैधर्म्येण विशेषसमर्थनमाह, इत्यनेति।—कुमारसम्भवे ब्रह्माणं प्रति उच्यते: तारकादौरात्म्यनिवेदनमिदम्। इत्थम्—अनेन प्रकारेण, आराध्यमानः,—सेव्यमानोऽपि, स तारक इति शेषः, भुवनत्रयं क्लिश्नाति—तापयति, विबाधते इत्यर्थः, दुर्जनः,—दुष्टो जनः, प्रत्युपकारेण—तत्कृतानिष्टविनिमयरूपेणानिष्टेन इत्यर्थः, आम्येत्—आन्तिं गच्छेत्, उपकारान्निवर्त्तत इत्यर्थः, उपकारेण न, आम्येदिति शेषः, प्रत्युत विकुर्य्यादिति भावः।

(घ) अनेति।—समर्थकमिति—अनुकूलाचरणेनोपशमाभावः अयोग्यतयाऽनुपपन्न एव, दुर्जनसामान्यस्वभावेन प्रत्युपकारसाधोपशाम्यत्वेन वैधर्म्येण समर्थ्यते इति भावः। कार्यवैधर्म्येण कार्यसमर्थनं यथा—"बहिरेव चिरादनाप्तवे विलसत्येव तुषारदीधितिः। अत सम्यदनस्य सन्ततं ननु सन्तापयितः प्रसूयते॥" चन्द्रस्य सन्तापजनकत्वानुभवेन सम्यदजनकत्वे बाधं प्रतिसन्दधतीं विरहिणीं प्रति तत्सख्याः उक्तिरियम्। अनाप्तवे—अप्राप्तवते। अत्र तृतीयस्य सन्तापजनकत्वप्रदर्शनेन तद्विरुद्धस्य चन्द्रस्य सन्तापविरुद्धसम्यदजनकत्वम् उपपन्नम्। कार्यवैधर्म्येण कारणसमर्थनं यथा, सहसेति।—विदधीत—विदधज्जनम्। समर्थकमिति।—सम्यद्विरुद्धकार्य्ये विपदि विवेकविरुद्धविवेकाभावजन्यत्वज्ञानेन सम्यदि विवेकजन्यत्वं दृढं प्रत्याय्यते, यज्जन्यं यद्विरुद्धं, तत्कारणविरुद्धजन्यमेवेति नियमादिति भावः। अत्र घटत्वादौ व्यभिचारवारणाय जन्यनित्यवृत्तिजन्यम्।

हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते ॥७३१॥ (ङ)

तत्र वाक्यार्थगता यथा—

"यत् त्वन्नेत्रसमानकान्ति सलिले मग्नं तदिन्दीवरं
मेघैरन्तरितः प्रिये ! तव मुखच्छायाऽनुकारी शशी ।
येऽपि त्वद्गमनानुकारिगतयस्ते राजहंसा गताः
त्वत्सादृश्यविनोदमात्रमपि मे दैवेन न क्षम्यते ॥" (च)

अत्र चतुर्थपादे पादत्रयवाक्यानि (छ) हेतवः । पदार्थगता यथा मम—

(ङ) काव्यलिङ्गमाह, हेतोरिति ।—हेतोः,—कारणस्य, वाक्यपदार्थत्वे—वाक्यार्थपदार्थयोः कारणत्वे, वाक्यपदान्यतरप्रतिपाद्ये इत्यर्थः, वाक्यार्थस्य पदार्थस्य वा हेतुत्वे व्यङ्ग्ये इति पर्य्यवसितोऽर्थः, (तत्र क्रियान्वयसमाप्तौ वाक्यार्थत्वम्, अन्यथा पदार्थत्वमिति बोध्यम्) काव्यलिङ्गं निगद्यते । अयमेव हेत्वलङ्कार उच्यते ।

(च) यदिति ।—रावणेन सीताया हरणानन्तरं माल्यवत्पर्वते वर्षाकाले सीताविरहिणः रामस्य उक्तिरियम् । हे प्रिये ! तव नेत्रयोः समाना कान्तिर्यस्य तथोक्तं, यत् इन्दीवरं—नीलोत्पलम्, ("अथ नीलाम्बुजन्म च । इन्दीवरञ्च नीलेऽस्मिन्" इत्यमरः) तत् सलिले—जले, मग्नं, वर्षाप्रभावादिति भावः, तव मुखस्य छायां—कान्तिम्, अनुकरोतीति तथाभूतः, त्वन्मुखकान्तिसदृश इत्यर्थः, शशी—चन्द्रः, मेघैरन्तरितः,—आच्छादितः, ये तव गमनानुकारिणी गतिर्येषां तथोक्ताः, ["गमनानुसारिगतयः" इति पाठे—गमनानुसारिणी गतिर्येषामिति विग्रहोऽवसेयः] ते राजहंसाः अपि गताः, मानसमिति शेषः, वर्षासु भूम्यजलानामाविलतया तत्पानस्य हंसानां पीडाकरत्वात् ते निर्मलजलं मानसं सरो यान्तीति प्रसिद्धिः, (अतः) दैवेन—दुर्दैवेन इत्यर्थः, तव सादृश्यविनोदमात्रमपि—सादृश्यमात्रेण विनोदः,—सन्तापनिवृत्तिरपि, [मात्रपदेन सङ्गव्यवच्छेदः] मे—मम, न क्षम्यते—न सह्यते । प्रियासादृश्यदर्शनं हि विरहिणां विनोदः, तदपि मम नास्तीति भावः । मतान्तरे प्रतीपालङ्कारोऽयम् । शार्दूलविक्रीडितं वृत्तम् । हनुमन्नाटकस्येदं पद्यम् ।

(छ) अत्रेति ।—चतुर्थपादे—चतुर्थपादप्रतिपाद्ये, सादृश्यमात्रविनोदाभावे इत्याशयः, पादत्रयवाक्यानि—पादत्रयरूपवाक्यत्रयार्थाः ।

"त्वद्वाजिराजिनिर्धूत-धूलीपटलपङ्क्तिलाम्।
न धत्ते शिरसा गङ्गां भूरिभारभिया हरः॥" (ज)

अत्र द्वितीयार्द्धे प्रथमार्द्धमेकपदं हेतुः। अनेकपदं यथा मम—

"पश्यन्त्यसङ्ख्यपथगां त्वद्दानजलवाहिनीम्।
देव! त्रिपथगाऽऽत्मानं गोपयत्युग्रमूर्द्धनि॥" (झ)

इह केचित् वाक्यार्थगतेन काव्यलिङ्गेनैव गतार्थतया कार्य्य-कारणभावेऽर्थान्तरन्यासं नाद्रियन्ते, तदयुक्तम्; तथा हि, अत्र हेतुस्त्रिधा भवति—ज्ञापकः, निष्पादकः, समर्थकश्चेति। तत्र

(ज) त्वदिति।—राजस्तुतिरियम्। हरः,—अम्बुः, भूरिभारभिया—बहुभार-भयेन, शिरसा तव वाजिराजिभिः,—अश्वसमूहैः, निर्धूतं—क्षिप्तं, यत् धूलीपटलं—धूलीनां—भूमिरजसां, रजसामिति यावत्, पटलं—पुञ्जः, रजोराशिरित्यर्थः, ["पटलं पिटके च परिच्छदे। छदिर्दृग्योगतिलके क्लीबं छन्दे पुनर्न ना॥" इति मेदिनी। "छदि-कारादक्षिणः" इति वार्त्तिकेन धूलिशब्दात् ङीष्] तेन पङ्क्तिलां—सञ्जातपङ्क्तिं, गङ्गां न धत्ते। अत्र कविप्रौढोक्तिसिद्धं तादृशं पङ्क्तिलत्वं सम्भाव्यमानभूरिभारभय-स्मरणकारणत्वागि हेतुः। वास्तवहेतूदाहरणन्तु—"वदनाम्बुदडाम्बोल-निन्दितेन्दु-प्रभाभराम्। त्वामवेक्ष्य मनोज्ञश्री युवा न वशंवदः?"। अत्र पूर्वार्द्धस्थैक-पदार्थज्ञापकः परार्द्धार्थे हेतुः।

(झ) पश्यन्तीति।—हे देव! त्रिपथगा—मार्गत्रयगामिनी, स्वर्गपृथ्वी-पातालेषु सञ्चारिणी गङ्गेत्यर्थः, तव दानजलवाहिनीं—नदीमित्यर्थः, असङ्ख्यपथगां—बहुमार्गवाहिनीं, पश्यन्ती सती आत्मानम् उग्रम्—हरम्, [भीषणपुरुषसेति भवति:] मूर्द्धनि—शिरसि, ("उत्तमाङ्गं शिरः श्रीर्षं मूर्द्धा ना मस्तकोऽस्त्रियाम्" इत्यमरः) गोपयति—रचति, लज्जयेति शेषः। गङ्गा त्रिपथगामिनीति बहुनता आसीत्, किन्तु त्वद्दानजलवाहिनीमसङ्ख्यपथगामिनीं दृष्ट्वा कदाचित् मे(से?)यं मम यशोऽपहरणात् इति भीता लज्जयैव तिरोभवितुमिच्छति अ इति भावः। अत्र पूर्वार्द्धे क्रियान्वयासमाप्तौ वाक्यान्तरनापन्ननेकपदघटितं तदर्थस्य हेतुता। अत्रापि कवि-प्रौढोक्तिसिद्धो हेतुः, सम्भाव्यमानमात्मगोपनं कार्यम्। वास्तवहेतूदाहरणन्तु—"अपाङ्गालोकनटनैर्मोह्यमाना जनानपि। अनङ्गचर्चिता: कान्ता हरन्ति जनमा मनः॥" इति बोध्यम्।

ज्ञापकोऽनुमानस्य विषयः, निष्पादकः काव्यलिङ्गस्य, समर्थकोऽर्थान्तरन्यासस्य इति पृथगेव कार्यकारणभावेऽर्थान्तरन्यासः काव्यलिङ्गात्। तथा हि "यत् त्वमेव—"इत्यादौ चतुर्थपादवाक्यम् अन्यथा साकाङ्क्षतयाऽसमञ्जसमेव स्यात् इति पादत्रयगतवाक्यं निष्पादकत्वेनापेक्षते। (ञ) "सहसा विदधीत" इत्यादौ तु—

"परापकारनिरतैर्दुर्जनैः सह सङ्गतिः।
वदामि भवतस्तत्त्वं न विधेया कदाचन॥" (ट)

इत्यादिवदुपदेशमात्रेणापि निराकाङ्क्षतया स्वतोऽपि गतार्थं (ठ) सहसाविधानाभावं सम्यक्करणं सोपपत्तिकमेव करोतीति पृथगेव कार्यकारणभावेऽर्थान्तरन्यासः काव्यलिङ्गात्।

(ञ) कार्यकारणभावेऽर्थान्तरन्यासमनङ्गीकुर्वतः काव्यप्रकाशादेर्मतं दूषयति—इह केचिदिति। पदार्थगतेन काव्यलिङ्गेनार्थान्तरन्यासासम्भवात् आह, वाक्यार्थगतेनेति।—अन्यथा—हेत्वनुक्तौ, प्रथमद्वितीयतृतीयपादवाक्यानि विनेत्यर्थः, साकाङ्क्षतया—कारणजिज्ञासया, असमञ्जसम्—असङ्गतं, सुदृढप्रतिपत्तिजननाक्षमं मित्यर्थः। पादत्रयगतवाक्यं—पादत्रयस्वरूपवाक्यं, निष्पादकत्वेन—निष्पादकत्वप्रतिपादकत्वेनेत्यर्थः।

(ट) परापकारेति।—भवतः तत्त्वं—सत्यं, युक्तियुक्तमिति यावत्, वदामि, कदाचन परापकारनिरतैः,—परेषाम्—अन्येषां, न तु परेषां स्वस्यापि, अपकारः तत्र निरताः,—परायत्तासक्तधीकैः, अत एव दुर्जनैः सह सङ्गतिः न विधेया—न कर्त्तव्या इति।

(ठ) इत्यादिवदिति।—निराकाङ्क्षतया—कारणनिरपेक्षतया, स्वतोऽपि—हेतूक्तिं विनाऽपि, आत्मनैव इत्यर्थः, गतार्थं—ज्ञातार्थं, निःसंशयप्रतिपादितस्वार्थमित्यर्थः, नानोत्तरार्द्धं निष्पादकत्वेन अपेक्षते इति भावः, तथा च, हेत्वाकाङ्क्षया यदाक्यमपेक्षते तदर्थश्च तदर्थो निष्पादकः, स एव काव्यलिङ्गस्य विषयः, यत्र हेतूपदेशादिना हेतुनिरपेक्षं वाक्यं, तत्र हेतुवाक्यस्यार्थः स्वसमर्थक एव, स चार्थान्तरन्यासस्य विषयः, एवंविधं भेदमनङ्गीकृत्य स्वसमर्थकहेतोरपि काव्यलिङ्गविषयत्वं स्वीकारेऽर्थान्तरन्यासस्यानोच्छेदप्रसङ्ग इति भावः।

"न धत्ते शिरसा गङ्गां भूरिभारभिया हरः।
त्वद्वाजिराजिनिर्धूतधूलिभिः पङ्किला हि सा॥" (ड)

इत्यत्र हिशब्दोपादानेन पङ्किलत्वादितिवत् हेतुत्वस्य स्फुटतया नायमलङ्कारः, वैचित्र्यस्यैवालङ्कारत्वात्।

अनुमानन्तु विच्छित्त्या ज्ञानं साध्यस्य साधनात्॥७२२॥(ढ)

यथा—

"जानीमहेऽस्या हृदि सारसाक्ष्या
विराजतेऽन्तः प्रियवक्त्रचन्द्रः।
तत्कान्तिजालैः प्रसृतैस्तदङ्गे-
ष्वापाण्डुता कुड्मलताऽक्षिपद्मे॥" (ण)

(ड) नेति।—हरः,—शङ्करः, भूरिभारभिया—अत्यन्तभारोद्वहनभीत्या हेतुना, शिरसा—मस्तकेन, तद्द्वारेति यावत्, गङ्गां न धत्ते, अत एव तां मार्गत्रयेण कपर्दगोपितामपि निःसारयतीति भावः; ननु भूरिभारभीः सम्प्रत्येव कुतः प्राप्ता? इत्याह—हि—यतः, सा—गङ्गेत्यर्थः, तव—राज्ञ इत्यर्थः, ये वाजिनः,—सैन्याश्वाः, तेषां राजिः,—पङ्क्तिः, तया निर्धूताः,—खुरक्षोदेनोत्थापिताः, धूलयः ताभिः,—तद्द्वारा, पङ्किला—पङ्कवती, अत एव गरीयसी संवृत्तेति भावः।

(ढ) अनुमानमाह, अनुमानमिति।—विच्छित्त्या—अलङ्कारादिकृतवैचित्र्येण, परिपुष्टवैचित्र्यमिति शेषः, साधनात्—साधनगोचरव्याप्यत्वज्ञानात्, साध्यस्य—व्यापकस्य, कार्य्यस्येति यावत्, (अनुमितिं प्रति साधनस्य हेतुत्वाङ्गीकारेऽतीतानागतलिङ्गकानुमितिर्न स्यात्) ज्ञानम् अनुमानम्। अत्रेदं बोध्यम्—स्वार्थपरार्थभेदेन तदनुमानं द्विविधं, यत्र स्वयमवगतोऽर्थः इति आत्मपरामर्शस्य निश्चयः, तत् स्वार्थानुमानं, यत्र अन्यावबुद्धस्य वस्तुनः समर्थनात् अन्यबोधकत्वं, तत् परार्थानुमानम्, एतद्द्विप्रकारकमप्येकोऽनुमानालङ्कारः इति सङ्क्षेपः।

(ण) जानीमहे इति।—विरहवर्णनमिदम्। अस्याः सारसाक्ष्याः,—सरोऽभिजनो नियतवसतिरस्य इत्यण् सारसं—पद्ममित्यर्थः, तद्वत् अक्षिणी यस्याः तथोक्तायाः, कमललोचनायाः इति यावत्, हृदि अन्तः,—हृदयमध्ये, प्रियस्य वक्त्रचन्द्रः,—मुखचन्द्रः, विराजते इति जानीमहे—मन्यामहे, अनुमिनुमः इत्यर्थः, तथा हि—प्रसृतैः,—विस्तृतैः, तस्य—हृदि स्थितस्य प्रियवक्त्रचन्द्रस्य, कान्तिजालैः,—प्रभापटलैः,

अत्र रूपकवशाद्विच्छित्तिः। यथा वा—

"यत्र पतत्यबलानां दृष्टिर्निशिताः पतन्ति तत्र शराः।
तच्चापरोपितशरो धावत्यासां पुरः स्मरो मन्ये॥" (त)

अत्र कविप्रौढ़ोक्तिवशाद्विच्छित्तिः। उत्प्रेक्षायामनिश्चिततया प्रतीतिः, इह तु निश्चिततयेत्युभयोर्भेदः।

अभेदेनाभिधा हेतुर्हेतोर्हेतुमता सह ॥७३३॥(थ)

तदङ्गेषु—तस्याः,—सारसाक्ष्याः, अङ्गेषु आपाण्डुता—ईषत्पाण्डुवर्णता, तथा अक्षिपद्मे—नयनकमले, कुड्मलता—मुकुलीभावः, ("कुड्मलो मुकुलोऽस्त्रियाम्" इत्यमरः) जातेति शेषः। अत्र अङ्गानाम् आपाण्डुतया अक्षिपद्मस्य च मुकुलीभावेन लिङ्गेन साध्यस्य वक्त्रचन्द्रस्य हृन्मध्ये विराजनस्य ज्ञानम्। "अनुमानं हि पक्षसत्त्व-सपक्षसत्त्व-विपक्षव्यावृत्तत्वविशिष्टात् लिङ्गात् लिङ्गिनो ज्ञानम्" इति पञ्चमपरिच्छेदोक्तलक्षणं विच्छित्तिविशेषेण समर्थितम् इति भावः पुनरस्यालङ्कारस्य। तथा हि, विरहजन्य-पाण्डुत्वाक्षिकुड्मलतयोश्च प्रियवक्त्रचन्द्रकिरणजन्यत्वमुत्प्रेक्ष्य हेतुः क्रियते, एवं रूपकोत्प्रेक्षाभ्यां परिपुष्टवैचित्र्यमनुमानमलङ्कारः इति ज्ञेयम्। उपजातिः वृत्तम्।

(त) कविप्रौढ़ोक्तिजन्यविच्छित्तिपरिपुष्टवैचित्र्यमनुमानमुदाहरति, यत्रेति।—यत्र अबलानां—कामिनीनां, दृष्टिः पतति, तत्रैव निशिताः,—तीक्ष्णाः, शराः, कामस्येति शेषः, पतन्ति, तत्—तस्मात्, स्मरः,—कामः, चापे—धनुषि, रोपितः शरो येन तथाभूतः सन्, आसाम्—अबलानां, पुरः,—अग्रतः, धावति इति मन्ये—अनुमिनोमि। अत्र अबलादृष्टिपतने कामशरपतनरूपात् लिङ्गात् साध्यस्य स्मरस्य धनुरारोपितशरत्वेन पुरोधावनरूपस्य ज्ञानम्। तथा हि—"अबलादृष्टिपातसहचरितशरपातः अबलापुरोवर्त्तिचापरोपितशरजन्यः अबलादृष्टिपातसहचरितशरपातत्वात्" इत्यनुमानं, तत्रेतरस्य बाधात् स्मरस्य सिद्धिः। वस्तुतस्तु, अलङ्कारादिसहकारं विनाऽपि यत्र वैचित्र्यमनुभूयते, तत्राप्ययमलङ्कारः, यथा—"विकसन्ति कदम्बानि स्फुटन्ति कुटजोद्गमाः" अत्र वर्षाकालानुमानम्।

(थ) [अभिधा] हेत्वलङ्कारमाह, अभेदेनेति।—हेतुमता—कार्य्येण, सह हेतोः,—कारणस्य, अभेदेन अभिधा—उक्तिः, हेतुः। केचित्तु—हेतुमता सह हेतोरभेदेन—अभेदारोपेण, अभेदारोपणमित्यर्थः, [अभेदे तृतीया] अभिधाहेतुनामालङ्कारः इत्याहुः।

यथा मम—

"तारुण्यस्य विलासः समधिकलावण्यसम्पदो हासः।
धरणितलस्याभरणं युवजनमनसो वशीकरणम्॥" (ट)

इत्यत्र वशीकरणहेतुर्नायिका वशीकरणत्वेनोक्ता। विलास-हासयोस्तु अध्यवसायमूलोऽयमलङ्कारः। (ध)

अनुकूलं प्रातिकूल्यमनुकूलानुबन्धि चेत्॥७३४॥ (न)

यथा—

"कुपिताऽसि यदा तन्वि! निधाय करजक्षतम्।
बधान भुजपाशाभ्यां कण्ठमस्य दृढं तदा॥" (प)

अस्य च विच्छित्तिविशेषस्य सर्वालङ्कारविलक्षणत्वेन स्फुरणात् पृथगलङ्कारत्वमेव न्याय्यम्। (फ)

(ट) तारुण्यस्येति।—(व्याख्यातमिदं पद्यं १५५ पृष्ठे)। अत्र प्रकरणबलात् नायिकाया लाभः।

(ध) नन्वत्र लक्षणया वशीकरणकारणप्रतीतिरेव, न त्वभेदप्रतीतिरित्यत आह, विलासहासयोरिति।—विलासः,—विकृतिभूषणं, हासः,—विकासः, अध्यवसायः,—आहार्याभेदाध्यवसाय एव, मूलं यस्य तादृशोऽयम् अलङ्कारः, तथा च, नायिकाया विलासहासयोः कार्यकारणभावरूपसम्बन्धाभावेन कारणलक्षणाया असम्भवात् आहार्याभेदप्रतीतिरवश्यमङ्गीकरणीया, तस्माद्धेत्वंशात् प्रकृतेऽप्याहार्यप्रतीतिरेव, न तु लाक्षणिकी प्रतीतिरिति भावः।

(न) अनुकूलालङ्कारमाह, अनुकूलमिति।—प्रातिकूल्यं—प्रतिकूलभावः, अनुकूलानुबन्धि—आनुकूल्यविधायकं, चेत् तदा अनुकूलं—तन्नामालङ्कारः।

(प) कुपितेति।—नायिकां प्रति सख्या वचनमिदम्। तन्वि!—हे क्षामाङ्गि! यदा—यदि, कुपिता असि, तदा करजक्षतं—नखक्षतं, निधाय—दत्त्वा, क्लेशयः, भुजपाशाभ्याम् अस्य—कान्तस्य, कण्ठं दृढं बधान। अत्र करजक्षतं भुजबन्धनञ्च प्रति-कूलमपि नायकस्य आनुकूल्यकरम्।

(फ) प्राचीनैरयमलङ्कारो नाहत इत्याशयेनाह—अस्येति।

वस्तुनो वक्तुमिष्टस्य विशेषप्रतिपत्तये।
निषेधाभास आक्षेपो वक्ष्यमाणोक्तगो द्विधा ॥७३५॥ (ब)

अत्र वक्ष्यमाणविषये क्वचित् सर्वस्यापि सामान्यतः सूचितस्य निषेधः, क्वचिदंशोक्तौ अंशान्तरे निषेध इति द्वौ भेदौ; उक्तविषये च (भ) क्वचिद्वस्तुस्वरूपस्य निषेधः, क्वचिद्वस्तुकथनस्येति द्वौ इत्याक्षेपस्य चत्वारो भेदाः। क्रमेण यथा—

"स्मरशरशतविधुराया भणामि सख्याः कृते किमपि।
क्षणमिह विश्राम्य सखे! निर्दयहृदयस्य किं वदाम्यथवा?"॥(म)

अत्र सख्या विरहस्य सामान्यतः सूचितस्य वक्ष्यमाणविशेषे निषेधः। (य)

(ब) आक्षेपालङ्कारमाह, वस्तुन इति।—वक्तुमिष्टस्य—विवक्षितस्य, वस्तुनः,—विषयस्य, विशेषप्रतिपत्तये—विवक्षितवस्तुनो वक्तुर्वा वैलक्षण्यसूचनाय, यः निषेधाभासः,—निषेधवत् प्रकाशः, स आक्षेपः। विवक्षितस्य वक्ष्यमाणोक्तरूपद्वैविध्येन आक्षेपस्यापि द्वैविध्यमाह, वक्ष्यमाणेति।—स च द्विधा, वक्ष्यमाणगः,—वक्ष्यमाणविषयः, उक्तगश्च—उक्तविषयश्चेत्यर्थः।

(भ) अत्रेति।—सर्वस्यापि—समुदितस्यापि इत्यर्थः, वक्ष्यमाणविषये विवक्षितकथनाभावस्यैव वैचित्र्यव्यञ्जकत्वमिति। तत्र प्रकारान्तरासम्भवात् द्वितीयप्रकारस्यैव वस्तुतत्कथननिषेधत्वेन द्वैविध्यमाह—उक्तविषये चेति।

(म) स्मरेति।—नायकं प्रति नायिकाप्रेरितायाः सख्या उक्तिरियम्। हे सखे! स्मरस्य—कामस्य, शरशतैः,—शरशतप्रहारैरित्यर्थः, विधुरायाः,—कातरायाः, सख्याः कृते—निमित्तं, किमपि भणामि—कथयामि, इह क्षणं विश्राम्य—तिष्ठ इत्यर्थः, अथवा निर्दयहृदयस्य, तव इति शेषः, किं वदामि?—न किमपि वक्तुमुचितं त्वदग्रे इति भावः। अत्र वक्ष्यमाणगः आक्षेपः।

(य) अत्रेति।—विरहस्य—कान्तविच्छेदस्य, सामान्यतः,—विरहत्वेन, सूचितस्य—स्मरशरशतेत्यनेन निर्दयहृदयेत्यनेन च व्यञ्जितस्य, विशेषे—मरणयोग्यत्वेनातिमहति, निषेधः,—विवक्षितस्य वचननिषेधेनैव निषेध इति भावः। इदानीं त्वयि गतेऽपि साऽवश्यं मरिष्यतीति त्वयि तन्निवेदनमनर्थकम् इति विवक्षितवस्तुनो विरहस्य मरणाव्यभिचारितरूपवैलक्षण्यं विशेषकथननिषेधेनैव व्यज्यते। विरहविशेषस्य

"तव विरहे हरिणाक्षी निरीक्ष्य नवमालिकां दलिताम्।
हन्त! नितान्तमिदानीमाः!! किं हतजल्पितैरथवा?" ॥ (र)

अत्र मरिष्यतीत्यंशो नोक्तः।

"बालअ! णाहं दूती तस्स पिओसि त्ति ण मह वावारो।
सा मरइ तुज्झ अअसो एअं धम्मक्खरं भणिमो॥" (ल)

अत्र दूतीत्वस्य वस्तुनो निषेधः।

"विरहे तव तन्वङ्गी कथं क्षपयतु क्षपाम्?।
दारुणव्यवसायस्य पुरस्ते भणितेन किम्?" ॥ (व)

प्रकरणादिना वाच्यवत्स्फुटप्रतीयमानतया तत्कथननिषेधस्याकिञ्चित्करत्वेनाभासत्वम् इति सङ्क्षेपः।

(र) तवेति।—नायकं प्रति दूत्या उक्तिरियम्। हन्तेति खेदसूचकमव्ययं, हरिणाक्षी तव विरहे—विरहदशायां, नवमालिकां दलितां—विकसितां, निरीक्ष्य, इदानीं नितान्तम् आः! अथवा हतजल्पितैः,—अत्यन्तानिष्टत्वात् अशक्यवचनैरित्यर्थः, किम्? अत्र जल्पनस्य निन्दया सूचितस्य मरिष्यतीत्यंशस्य सुहृदनिष्टत्वेनाशक्य-(वाक्य)वक्तव्यत्वं वस्तुवैलक्षण्यं प्रतीयते इति बोध्यम्।

(ल) बालअ इति।—["बालक! नाहं दूती तस्याः प्रियोऽसीति न मम व्यापारः। सा म्रियते तवायश एतत् धर्माक्षरं भणामः॥" इति संस्कृतम्]। नायकं प्रति दूतीत्वेन कथितात्मनः सख्या उक्तिरियम्। बालक!—हे अविदग्ध! इत्यर्थः, नाहं दूती—नाहं मिथ्यावादिनीति भावः, तस्याः,—तव कान्ताया इति भावः, प्रियः असि इति—अस्मात् हेतोः, न मम व्यापारः,—उद्यमः, त्वदर्थं प्रयासो नेत्यर्थः, अथ सा—तव कान्ता, म्रियते, तव च अयशः,—अपकीर्त्तिः, एतत् धर्माक्षरं—सत्यवचनं, यथार्थवचनमित्यर्थः, भणामः, स्वप्रियायाः स्वस्मिन् सति सर्वथा प्रियमाचरितुं सामर्थ्येऽपि प्रियानाचरणे तस्या अनन्याधारतया मरणं, स्वस्य च तव यशोमालिन्यमिति सत्यमहं ब्रवीमीति भावः। अत्र स्वस्मिन् सतोऽपि दूतीत्वस्य निषेधेन दूत्यन्तरवन्नाहं मिथ्या वदामीति स्ववैलक्षण्यं व्यज्यते। निषेधस्यारोप्यमाणत्वात् आभासत्वम् इति आक्षेपालङ्कारः। अत्रार्य्या छन्दः।

(व) विरहे इति।—वर्षाऽऽरम्भे प्रवसन्तं नायकं प्रति सख्या उक्तिरियम्। तव विरहे तन्वङ्गी—कृशाङ्गी, कथं क्षपां—रात्रिं, क्षपयतु?—अपगमयतु? रात्रि-

अत्र कथनस्यैव निषेधः। प्रथमोदाहरणे सख्या अवश्यम्भावि मरणमिति विशेषः प्रतीयते; द्वितीयेऽशक्यवक्तव्यत्वादि, तृतीये दूतीत्वे यथार्थवादित्वं, चतुर्थे दुःखस्यातिशयः। न च अयं विहितनिषेधः, अत्र निषेधस्याभासत्वात्। (श)

अनिष्टस्य तथाऽर्थस्य विध्याभासः परो मतः॥७३६॥(ष)

तथेति पूर्ववद्विशेषप्रतिपत्तये।

यापनमशक्यमिति भावः, अथवा दारुणव्यवसायस्य—निष्ठुरक्रियस्य, दुरुच्छेदतत्समीपप्रापणनिश्चयस्य वा, (वर्षासु प्रियविच्छेदहेतुत्वात् व्यवसायस्य निन्दा) तव पुरतः,—अग्रतः, भणितेन—उक्तेन, किम्?—उक्तिः निरर्थिकेति भावः।

(श) अत्रेति।—पूर्वार्द्धे तत्समीपं त्वं याहि इति वक्तुमिष्टं वस्तु तस्य व्यञ्जकनिषेधेनैवार्थतो निषेधः सिध्यति इति न लक्षणगमनानुपपत्तिः इत्यभिप्रायेणाह, कथनस्यैवेति।—पूर्वार्द्धस्यैवेत्यर्थः। अवश्यम्भावि मरणं—मरणाव्यभिचारित्वं, विरहविशेषस्य वस्तुनो वैलक्षण्यम्। अशक्येति।—अवक्तव्यं वचनं यस्य तत्त्वम्, आदिना अतिप्रसिद्धत्वपरिग्रहः। दूतीत्वे यथार्थवादित्वं—दूतीत्वे सत्यपि यथार्थवादित्वम्। चतुर्थे इति—चतुर्थोदाहरणे, दुःखस्य, नायिकाया इति शेषः, दूतीदुःखस्य वेत्यर्थः। न चाक्षेपालङ्कारघटकनिषेधो वास्तवनिषेध एव, न तु निषेधाभास इति वाच्यम्, आक्षेपालङ्कारे निषेधाभासस्यैव वैचित्र्याधायकत्वात् इत्यभिप्रायेणाह, न चेति।—अयम्—आक्षेपालङ्कारघटकनिषेधः, विहितनिषेधः,—वास्तवनिषेधः, कथनस्येति शेषः, तथात्वे दूत्या आगमनस्य निष्प्रयोजनत्वात्, निषेधाभासस्यैव वैचित्र्याधायकत्वादिति बोध्यम्।

(ष) प्रकारान्तरेणाक्षेपमाह, अनिष्टस्येति।—अनिष्टस्य—अनभिमतस्य, अर्थस्य—विषयस्य, तथा—विशेषप्रतिपत्तये इत्यर्थः, विध्याभासः,—विधिरूपेण प्रकाशः, किञ्चित् सत्यवत् प्रतिभास इत्यर्थः, परः,—निरुक्तरूपात् अन्यः, आक्षेपः इत्यनुषज्यते, मतः। अत एव अलङ्कारसर्वस्वकृताऽप्युक्तम्—"अनिष्टविध्याभासश्च" इति सूत्रयित्वा "यथा इष्टस्य इष्टत्वादेव निषेधः अनुपपन्नः, एवम् अनिष्टस्यापि अनिष्टत्वादेव विधानं नोपपद्यते। तत्क्रियमाणं प्रस्खलद्रूपत्वात् निषेधे पर्य्यवस्यति; ततश्च विधेरुपकरणीभूतो निषेध इति विधिना अयं निषेधः अनिष्टविशेषपर्य्यवसायी निषेधाक्षेपादाक्षेपः" इति।

यथा—"गच्छ गच्छसि चेत् कान्त ! पन्थानः सन्तु ते शिवाः।
ममापि जन्म तत्रैव भूयात् यत्र गतो भवान्॥" (स)

अत्रानिष्टत्वाद्गमनस्य विधिः प्रस्खलद्रूपो निषेधे पर्य्यवस्यति। (ह) विशेषश्च गमनस्यात्यन्तपरिहार्य्यत्वरूपः प्रतीयते।

विभावना विना हेतुं कार्य्योत्पत्तिर्यदुच्यते।
उक्तानुक्तनिमित्तत्वात् द्विधा सा परिकीर्त्तिता॥७३७॥(क)

विना कारणमुपनिबध्यमानोऽपि कार्य्योदयः किञ्चित् (ख) अन्यत् कारणमपेक्ष्यैव भवितुं युक्तः। तच्च कारणान्तरं क्वचिदुक्तं, क्वचिदनुक्तमिति द्विधा। यथा—

"अनायासकृशं मध्यमशङ्कतरले दृशौ।
अभूषणमनोहारि वपुर्वयसि सुभ्रुवः॥" (ग)

(स) गच्छति।—हे कान्त ! गच्छसि चेत् गच्छ, ते—तव, पन्थानः शिवाः,—शुभदाः, सन्तु—भवन्तु, यत्र भवान् गतः, स्यादिति शेषः, ममापि तत्रैव जन्म भूयात् तव गमने मम मरणं निश्चितं भविष्यति, ततश्च पुनर्जन्म स्यात् इत्यर्थः। ["गतः" इत्यत्र "भाव्यर्थो भूतवत् अङ्गीक्रियते" इति न्यायात् भूते निष्ठा]।

(ह) अत्रेति।—प्रस्खलत्—असङ्गच्छमानं, रूपं यस्य तथाविधः, अत्यन्तम् असम्भवन् इत्यर्थः, पर्य्यवस्यति—परिणमति। अयं भावः,—कान्तस्य प्रस्थानमात्मनोऽनिष्टमपि काचित् तस्य अनिराकरणद्वाराऽनुजानातीव, न चास्यानुज्ञापनरूपो विधिः प्रस्थाने अनभिमतत्वात्, तस्मात् तथाऽनुज्ञापनं प्रस्खलद्रूपत्वेन निषेधं पर्य्यवसाययति। प्रयोजनञ्च अत्र अनभिमतस्य प्रस्थानस्यासंविज्ञानपदनिर्बन्धमत्यन्तपरिहार्य्यत्वप्रतिपादनम् इति।

(क) विभावनामाह, विभावनेति।—हेतुं—प्रसिद्धकारणं, विना यत् कार्य्यस्य उत्पत्तिः, असौ विभाव्यते—समालोच्यते कारणं विना कार्य्यमस्यामिति विभावना, [बाहुलकादधिकरणे युच्] उच्यते। सा उक्तनिमित्ता अनुक्तनिमित्ता चेति द्विधा परिकीर्त्तिता। तथोक्तम्—"इयञ्च विशेषोक्तिवत् उक्तानुक्तनिमित्तभेदात् द्विधैव" इति

(ख) विनेति।—किञ्चित्—अप्रसिद्धमित्यर्थः।

(ग) अनायासेति।—वयसि—यौवने, ("वयः पक्षिणि बाल्यादौ वयो यौवनमात्रके" इति कोषः) सुभ्रुवः,—नायिकायाः इति भावः, मध्यं—मध्यावयवः,

अत्र वयोरूपं निमित्तमुक्तम् । अत्रैव "वपुर्भाति मृगीदृशः" इति पाठेऽनुक्तम् ।

सति हेतौ फलाभावे विशेषोक्तिस्तथा द्विधा ॥७१८॥ (घ)

कटिदेश इत्यर्थः, अनायासम्—आयासरहितम्, अथ च कृशं, दृशौ—नेत्रे, अशङ्के—शङ्कारहिते, अथ च तरले—चञ्चले, तथा वपुः,—शरीरम्, अभूषणम्—अनलङ्कारम्, अथ च मनोहारि, भवतीति शेषः । अत्र कृशत्वे हेतुमायासं, तारल्ये हेतुं शङ्कां, मनोहारित्वे हेतुं भूषणं विना कार्य्यस्य कृशत्वस्य, तारल्यस्य, मनोहारित्वस्य चोत्पत्तिः । यथा वा—"असम्भृतं मण्डनमङ्गयष्टेरनासवाख्यं करणं मदस्य । कामस्य पुष्पव्यतिरिक्तमस्त्रं बाल्यात् परं साऽथ वयः प्रपेदे ॥" अत्र द्वितीयचरणे आसवाभावेऽपि मदोक्त्या चोक्तनिमित्ता विभावनेति सर्वस्वकारादिमतं दूषयद्भिः रसगङ्गाधरकृद्भिरुक्तम्—"विरोधमूलत्वादेतदाद्यलङ्काराणां प्रकृते च यौवनस्य मदकारणतायाः कविनैव निबद्धत्वादासवयौवनयोः मदं प्रति व्रीहियवयोः यागं प्रतीव निरपेक्षकारणत्वावगमात् विरोधास्फुरणात् विभावनैवेयं न भवितुमर्हति, कुतः तद्विशेषः ? इति तच्चिन्त्यम् ; लोकप्रसिद्धकारणताकस्य मदस्य व्यतिरेकेऽपि यौवनान्मदोत्पत्त्यभिधाने विरोधस्य प्रतिभाने बाधकाभावात् ; अन्यथा द्वयोर्निरपेक्षकारणत्वप्रतीतौ यौवनोन्मदोत्पत्तौ चमत्कारानुपपत्तेः, आलोकपरामर्शव्यतिरेकेण धूमपरामर्शादनुमित्यनुत्पत्त्यादिवत् अनुपपत्त्यभावात् । किञ्चैवं "यदवधि विलासभवनं यौवनमुदियाय चन्द्रवदनायाः । दहनं विनैव तदवधि यूनां हृदयानि दह्यन्ते ॥" इति भवदुक्तोदाहरणमपि दुर्घटं, यौवनावधि हृदयदाहोक्तौ दाहे यौवनहेतुत्वस्यापि श्लोकात् प्रतीत्यविशेषात्, कारणशब्देनाभिधानस्याकिञ्चित्करत्वात् ; तदुक्तं कुसुमाञ्जलावाचार्य्यैः,—"नियमस्यैवापेक्षार्थत्वात् तस्यैव च कारणार्थत्वात्" इति, तस्मात्त्याज्या चोक्तनिमित्ता विभावना, आश्रयणीया वा यथोक्तैवेति दिक् ।"

(घ) विशेषोक्तिमाह, सतीति ।—हेतौ—हेतुसद्भावेऽपीत्यर्थः, फलस्य—कार्य्यस्य, अभावे, फलाभावकथने इत्यर्थः, सति विशेषोक्तिः, सा च तथा—पूर्ववत् उक्तानुक्तनिमित्तत्वादित्यर्थः, द्विधा । अत्राहुरलङ्कारकौस्तुभकाराः,—"हेतौ सत्यपि कार्य्यानुत्पत्तिः स्याद्विशेषोक्तिः" इति सूत्रयित्वा "सा च त्रेधा, अनुक्तनिमित्ता, उक्तनिमित्ता, अचिन्त्यनिमित्ता च" इति । न च तर्हि तृतीयः कथं न भेदः कविराजैः स्वीकृतः ? इति शङ्क्यम्, "अचिन्त्यनिमित्तत्वञ्चानुक्तनिमित्तस्यैव भेद इति पृथङ्नोक्तम्" इति कविराजैरेवाभिधास्यमानत्वात् ।

तथेत्युक्तानुक्तनिमित्तत्वात्। तत्रोक्तनिमित्ता यथा—

"धनिनोऽपि निरुन्मादा युवानोऽपि न चञ्चलाः।
प्रभवोऽप्यप्रमत्तास्ते महामहिमशालिनः॥" (ङ)

अत्र महामहिमशालित्वं निमित्तमुक्तम्। अत्रैव चतुर्थपादे "कियन्तः सन्ति भूतले" इति पाठे त्वनुक्तम्। अचिन्त्यनिमित्तत्वञ्च अनुक्तनिमित्तस्यैव भेद इति पृथक् नोक्तम्। यथा—

"स एकस्त्रीणि जयति जगन्ति कुसुमायुधः।
हरताऽपि तनुं यस्य शम्भुना न हृतं बलम्॥" (च)

अत्र तनुहरणेऽपि बलाहरणे निमित्तमचिन्त्यम्। इह च कार्य्याभावः कार्य्यविरुद्धसद्भावमुखेनापि निबध्यते; विभावनायामपि कारणाभावः कारणविरुद्धसद्भावमुखेन। एवञ्च "यः कौमारहरः स एव हि वरः" इत्यादेरुत्कण्ठाकारणविरुद्धस्य निबन्धनात् विभावना। "यः कौमारहरः" इत्यादेः कारणस्य च कार्य्यविरुद्धाया उत्कण्ठाया निबन्धनात् विशेषोक्तिः। एवञ्चात्र विभावनाविशेषोक्त्योः सङ्करः। शुद्धोदाहरणन्तु मृग्यम्। (छ)

(ङ) धनिन इति।—स्पष्टम्। अत्र उन्मादस्य हेतोर्धनस्य, चाञ्चल्यस्य हेतोर्यौवनस्य, प्रमादस्य हेतोः प्रभुत्वस्य सत्त्वेऽपि उन्मादादीनां फलानामभावः। अत्र निमित्तं फलाभावप्रयोजकम्।

(च) स इति।—सः कुसुमायुधः एकः,—एकश्च इत्यर्थः, त्रीणि जगन्ति—भुवनत्रयं, जयति, यस्य तनुं हरता—भस्मीकुर्वता, अपि शम्भुना बलं न हृतम्।

(छ) अत्रेति।—अत्र तनुहरणरूपे कारणे सत्यपि बलहरणरूपस्य कार्य्यस्यानुत्पत्तौ निमित्तमनुक्तमेवाचिन्त्यतामावहति, प्रत्यक्षविषयत्वात् इति। उत्कण्ठाकारणविरुद्धस्येति।—उत्कण्ठायाः कारणं—पत्याद्यभावः, तद्विरुद्धस्य—पत्यादिसद्भावस्येत्यर्थः, निबन्धनात्—रचनात्। कारणस्य चेति।—कारणस्य—उत्कण्ठाजनकस्य पत्यादिसद्भावस्य, कार्य्यस्य—उत्कण्ठाभावः, तद्विरुद्धायाः,—

जातिश्चतुर्भिर्जात्याद्यैर्गुणो गुणादिभिस्त्रिभिः ।
क्रिया क्रियाद्रव्याभ्यां यत् द्रव्यं द्रव्येण वा मिथः ॥
विरुद्धमिव भासेत विरोधोऽसौ दशाकृतिः॥७३९॥(ज)

क्रमेण यथा—

"तव विरहे मलयमरुद्वानलः शशिकृशोऽपि मोघाग्निः ।
हृदयमलिखितमपि भिन्ने नलिनीदलमपि निदाघरविरश्मिः॥"(झ)

तद्विपरीतताया: । कार्यकारणविरुद्धसङ्गावमुखेन कार्याभावकारणाभावोक्तौ विशेषोक्तिविभावनयोः मुद्रोदाहरणे क्रमेण यथा—"धनिनोऽपि स्थिरलक्ष्मी यौवने धर्मतत्पराः । अनात्मज्ञाश्चिरं शूरा भूपाला रघुवंशजाः ।" अत्र स्थिरलक्ष्मीत्वमुत्पादविरुद्धं, धर्मोपार्जनकारणं वार्द्धके, तद्विरुद्धं यौवनम् इति ।

(ज) विरोधालङ्कारमाह, जातिरिति ।—जातिः,—गोत्वादिः, जात्याद्यैः चतुर्भिः,—जातिगुणक्रियाद्रव्येरित्यर्थः, (गुणक्रियाद्रव्याश्रया जात्या सह विरोधस्तु गुणादिभिः सह जातिविरोध एवेति पृथङ्नोक्तः) गुणः,—शुक्लादिः, गुणादिभिः त्रिभिः,—गुणक्रियाद्रव्येरित्यर्थः, क्रियया—पाचकादिः, क्रियाद्रव्याभ्यां, तथा द्रव्यम्—एकव्यक्तिवाचकः शब्दः इत्यर्थः, द्रव्येण सह,—परस्परं, यत् विरुद्धमिव भासेत, क्वचिदारोपेण, क्वचित् क्वचिन्मोढ्यात्मा, क्वचत् क्वचिद्भेदेन, क्वचिदीश्वरादिमहिमातिशयेन समावेशं वर्णयतां जात्यादिभिः सह जात्यादेर्यदाधातां विरोधभानमिति भावः, असौ दशाकृतिः,—दशप्रकारा दशविधः, विरोधः,—विरोधालङ्कारः, चाधातां विरोधवत् भानं विरोधालङ्कार इति फलितार्थः । अयमेव वक्तव्यम्—अयमेव विरोधाभासः इति कथ्यते, आभासः कुवलयानन्दे, विरोधवदाभासत्वेति विवक्षया; यथार्थतत्त्वेन जात्यादिप्रकाराणामनन्तत्वात् मुख्यमेवोदाहरणमाश्रित्य द्विप्रकारः इति ग्राह्यः, तत्र श्लेषवादौ यथा विच्छित्तिवैचित्र्यवर्णनप्रसङ्गे—"गुणवत्यपि कविता" इति ।

(झ) चतुर्भिः पादैः जात्यादीनां चतुर्णां विरोधमाह, तवेति ।—दूना नायकं प्रत्युक्तिरियम् । तव विरहे अत्रा:,—नायिकायाः, तत्कृते इति यावत्, मलयमरुत् —चन्दनगिरिसम्भूतः पवनः, चन्दनरागिलम्भेन सुगन्धितशीतलोऽपि सादृत इति भावः, दवानलः,—दावाग्निः, अग्निकृषः,—चन्दनरोधकः, अमावतः शीतांशोः करः इति भावः, अपि—तथा शीतलोऽपि अत्यधिकसन्तापकः, शीतांशुः,—इन्दुः, इत्यर्थः,

"सन्ततमुषलासङ्गात् बहुतरगृहकर्मघटनया नृपते!।
द्विजपत्नीनां कठिनाः सति भवति कराः सरोजसुकुमाराः॥"(ञ)

"अजस्य गृह्णतो जन्म निरीहस्य हतद्विषः।
स्वपतो जागरूकस्य याथार्थ्यं वेद कस्तव?"॥ (ट)

अलिरुतं—भ्रमराणां मधुरस्वनोऽपि, हृदयं भिन्ते—विध्यति, नलिनीदलमपि—पद्मिनीनां क्लमादिहरणक्षमं पत्रमपि, निदाघरविः,—ग्रीष्मसूर्य्यः। अत्रार्य्या छन्दः। यथा वा विविक्तानि जातिविरोधोदाहरणानि क्रमेण—"यस्याऽऽकर्णनमात्रतोऽपि भवतोऽवस्थेयमीदृग्विधा येनाङ्गे मलयानिलोऽपि भवति प्रायः करीषानलः। हंहो मानस! बालिश! प्रतिपथं प्रत्याशमुद्भ्रान्तिकां कुर्वन्तं नयनातिथिं पुनरहो! कर्त्तुं किमाकाङ्क्षसि?"॥ अत्र द्वितीयपादे वायुत्ववह्नित्वयोः विरोधः। "गिरयोऽप्यनुन्नतियुजो मरुदथ चलोऽब्धयोऽप्यगम्भीराः। विश्वम्भरोऽप्यतिलघुर्नरनाथ! तवान्तिके नियतम्॥" अत्र गुणेन जातेर्विरोधः। "येषां कण्ठपरिग्रहप्रणयितां सम्प्राप्य धाराधरः तीक्ष्णः सोऽप्यनुरज्यते च कमपि स्नेहं पराप्नोति च। तेषां सङ्गररङ्गसक्तमनसां राज्ञां त्वया भूपते! पांशूनां पटलैः प्रसाधनविधिर्निर्वर्त्यते कौतुकम्॥" अत्र क्रियया जातेर्विरोधः। "प्राणेश्वरो गुरुजनेन कृतान्नियोगाद्देशान् परानगमदित्युदयत्यसूया। दुर्दैववैभवबलात् सखि! साम्प्रतं यच्चन्द्रोऽपि वह्निरभवत् क इहापराध्येत्?"॥ अत्र द्रव्येण जातेर्विरोधः।

(ञ) गुणेन सह गुणविरोधमाह, सन्ततेति।—हे नृपते! भवति—त्वयि राजनि, सति—विद्यमाने इत्यर्थः, सन्ततं—निरन्तरं, यः मुषलेन—धान्यकण्डनोपकरणेन, आसङ्गः,—संसर्गः तस्मात्, तथा बहुतराणां गृहकर्मणां घटनया—अनुष्ठानेन, कठिनाः,—किणाङ्किता इति भावः, द्विजपत्नीनां—ब्राह्मणीनां, कराः सरोजवत्—कमलवत्, सुकुमाराः,—सुकोमलाः, जाताः इति शेषः, तव दानशक्तिप्रभावात् ब्राह्मणानां कष्टकरवृत्तित्वव्यपगमादिति भावः; तथा हि, भवता द्विजेभ्यः तथा वित्तानि दत्तानि, यथा तेषां दासीभिरेव कर्मकरणात् तत्पत्नीनां कराः सुकुमाराः जाताः। अत्र काठिन्यं गुणः, तस्य सौकुमार्य्येण सह विरोध आपाततो भासते, परं राज्ञो दानशक्त्या कालभेदेन समाधानम्। अत्रार्य्या छन्दः। यथा वा—"सरसाऽपि शुष्यत्येव जानाति दुःखानि मुग्धहृदयाऽपि। रक्ताऽपि पाण्डुरैव जाता वराकी तव वियोगेन॥"

(ट) गुणस्य क्रियया विरोधमाह, अजस्येति।—ब्रह्मस्तुतिरियम्। हे देव!

"वल्लभोत्सङ्गसङ्गेन विना हरिणचक्षुषः।
राकाविभावरीजानिर्विषज्वालाकुलोऽभवत्॥" (ठ)
"नयनयुगासेचनकं मानसवृत्त्याऽपि दुष्प्रापम्।
रूपमिदं मदिराक्ष्या मदयति हृदयं दुनोति च मे॥" (ड)

को जनः अजस्य—जन्मरहितस्य, अथ च जन्म गृह्णतः, निरीहस्य—निश्चेष्टस्य, अथ च हताः द्विषो येन तादृशस्य, स्वपतः,—निद्राणस्य, (स्वप्नस्य सिद्ध्या मनःसंयोगरूपतया गुणत्वम्) अथ च जागरूकस्य तव याथार्थ्यं—तत्त्वं, वेद?—जानाति? अत्र गुणस्य क्रियया विरोधः। इदं रघुवंशस्य पद्यम्।

(ठ) गुणस्य द्रव्येण सह विरोधमाह, वल्लभोत्सङ्गेति।—वल्लभस्य—कान्तस्य, उत्सङ्गः,—क्रोडः, तत्र सङ्गः,—आसक्तिः, उपवेशनमिति भावः, तेन, विना—तत्रोपवेशनेन विनेत्यर्थः, हरिणचक्षुषः,—हरिणेक्षणायाः कान्तायाः, राकाविभावरीजानिः,—राकाविभावरी—पूर्णचन्द्रसमन्विता निशा, पौर्णमासी रात्रिरित्यर्थः, ("पूर्णे राका निशाकरे" इत्यमरः) जाया—पत्नी यस्य सः, पौर्णमासीनिशाचन्द्रः इत्यर्थः, विषस्य ज्वालया आकुलः,—आकुलताजनक इत्यर्थः, अभवत्। अत्र पूर्णचन्द्रेण द्रव्येण सह दाहजनकत्वस्य गुणस्य तादात्म्येनापाततो विरोधभानं, विरहहेतुकत्वात्तु समाधानम्। अत्र गुणस्य द्रव्येण विरोधः।

(ड) क्रियायाः क्रियया सह विरोधमाह, नयनेति।—नयनयुगस्य आसेचनकम्—अतितृप्तिकरं, ("तदासेचनकं तृप्तेर्नास्त्यन्तो यस्य दर्शने" इत्यमरः) मानसवृत्त्या—मनःकल्पनयाऽपि, दुष्प्रापं—लब्धुमशक्यं, मदिराक्ष्या इदं रूपं मे हृदयं मदयति—उल्लासयति, दर्शनेनेति भावः, दुनोति—तापयति च, अप्राप्त्या इति भावः। अत्र प्रहर्षजननक्रियया सह खेदजननक्रियाया आपाततो विरोधभानं, विरहहेतुकत्वात्तु समाधानम्। यथा वा—"निकामं क्षामाङ्गी सरसकदलीगर्भसुभगा कलाशेषा मूर्त्तिः शशिन इव नेत्रोत्सवकरी। अवस्थामापन्ना मदनदहनोद्दाहविधुरामियं नः कल्याणी रमयति मनः कम्पयति च॥" अत्र रमयतीति कम्पयतीति क्रिययोर्युगपदेककारणजन्यत्वरूपो विरोधः, अवच्छेदकद्वयसत्त्वात् तत्परिहारः। क्रियायाः द्रव्येण विरोधो यथा—"अयं वारामेको निलय इति रत्नाकर इति श्रितोऽस्माभिस्तृष्णातरलितमनोभिर्जलनिधिः। क एवं जानीते निजकरपुटीकोटरगतं क्षणादेनं ताम्यत्तिमिमकरमापास्यति मुनिः?"॥ अत्र वारांनिधिरूपस्य द्रव्यस्य पानं नितान्तमसम्भवि, तस्माद्विरोधः, मुनेस्तु सर्वं तत् सम्भवतीत्यविरोधः। "समदमतङ्गज-

"त्वदाजिराजि" इत्यादि, "वल्लभोत्सङ्ग" इत्यादिश्लोके चतुर्थपादे "मध्यन्दिनदिनाधिपः" इति पाठे द्रव्ययोर्विरोधः। अत्र "तव विरहे" इत्यादौ पवनादीनां बहुव्यक्तिवाचकत्वाज्जातिशब्दानां दावानलोष्णहृदयभेदनसूर्य्यजातिगुणक्रियाद्रव्यरूपैरन्योऽन्यं विरोधो मुखत आभासते, विरहहेतुकत्वात् समाधानम्। अत्र "अजस्र" इत्यादावजत्वादिगुणस्य जन्मग्रहणादिक्रियया विरोधः, भगवतः प्रभावस्यातिशयित्वात्तु समाधानम्। "त्वदाजि" इत्यादौ "हरोऽपि शिरसा गङ्गां न धत्ते" इति विरोधः, "त्वदाजि" इत्यादिकविप्रौढ़ोक्त्या तु समाधानम्। स्पष्टमन्यत्। विभावनायां कारणाभावेनोपनिबध्यमानत्वात् कार्य्यमेव बाध्यत्वेन प्रतीयते, विशेषोक्तौ च कार्य्याभावेन कारणमेव, इह तु अन्योऽन्यं द्वयोरपि बाध्यत्वमिति भेदः। (ढ)

मदनखनिखन्दतरङ्गिणीपरिष्वङ्गात्। क्षितिरतिधन्या! त्वयि तटभुवि भवद्रथचूडाऽऽपगाऽपि शालिनी॥" अत्र द्रव्यस्य द्रव्येण विरोधः।

(ढ) क्रियाया द्रव्येण सह विरोधमाह, त्वदाजीति।—व्याख्यातं प्राक्। अत्र गङ्गाधरोऽपि गङ्गां न धारयतीति गङ्गाधरत्वपदद्वयं क्रियया अधारकत्वरूपया विरुद्धमिवापातत: प्रतीयते, राजस्तुतिपरत्वात् तु समाधानम्। द्रव्यस्य द्रव्येण सह विरोधमाह, वल्लभेति।—अत्र चन्द्रसूर्य्ययो: द्रव्ययो: तादात्म्येन विरोधभानम्। जातिशब्दानामिति।—जाति: शब्दो येषां तथोक्तानामित्यर्थ:, प्रतिपाद्यतया जातीनां पवनत्वादीनामिति शेष:; यद्वा—पवनादीनामिति धर्मपरो निर्देश:, पवनत्वादीनामिति तदर्थ:। दावानलेति—दावानलत्वेत्यर्थ:। सुखत:,—प्रथमत:। विरहहेतुकत्वात् इति।—मलयमरुदादेर्विरहिणां सन्तापजनकत्वेन दावानलत्वाद्यारोपात् समाधेय इति भाव:। नन्वजत्वं जन्माभाव एव, कथमस्य गुणत्वम्? इति चेत्, जातिक्रियाभिन्नानां विशेषणानामपि गुणत्वस्वीकारात्। विशेषोक्तौ चेति।—कार्य्याभावेनोपनिबध्यमानत्वात् कारणमेव बाध्यत्वेन प्रतीयते इत्यन्वय:। इह क्षितिरित्यादौ। विरोधाखण्डारे क्षित्यर्थ:। ननु "मलयमरुदृषानल—" इत्यादौ रूपकमेवेति चेत्, न; अवहानवखानानियमरूपविरोधस्य पुर:स्फूर्त्तिकतया वैचित्र्याधायकत्वात् इति।

कार्य्यकारणयोर्भिन्न-देशतायामसङ्गतिः ॥७४०॥(ण)

यथा—

"सा बाला वयमप्रगल्भमनसः सा स्त्री वयं कातराः
सा पीनोन्नतिमत्पयोधरयुगं धत्ते सखेदा वयम् ।
साऽऽक्रान्ता जघनस्थलेन गुरुणा गन्तुं न शक्ता वयं
दोषैरन्यजनाश्रितैरपटवो जाताः स्म इत्यद्भुतम् ॥" (त)

(ण) असङ्गतिमाह, कार्य्येति ।—कार्य्यकारणयोः भिन्नदेशतायां—वैयधिकरण्ये, कार्य्यकारणयोः समदेशवर्त्तित्वं नियमः, तदन्यथात्वे इत्यर्थः, असङ्गतिः । प्रकाशकारोऽप्याह—"भिन्नदेशतयाऽत्यन्तं कार्य्यकारणभूतयोः । युगपद्धर्मयोर्यत्र ख्यातिः सा स्यादसङ्गतिः ॥" इति ।

(त) सेति ।—नायिकामप्राप्य दुःखभाजः कस्यचित् विरहिणः सखायं प्रति उक्तिरियम् ।—सा—कान्ता इति यावत्, बाला—मुग्धा, वयम् अप्रगल्भमनसः,—कार्य्याकार्य्यावधारणाक्षमचेतसः, तस्याः बालात्वेन मदुपभोगरूपकार्य्यावधारणाक्षमत्वं युक्तं, मम तु तत्सम्भोगलालसत्वेऽपि तत्प्राप्त्युपायरूपकार्य्यावधारणाक्षमत्वमित्याश्चर्य्यम् इति भावः, सा स्त्री, वयं कातराः,—सभयाः, कामभयार्त्ता इत्यर्थः, स्त्रीणामेव कातरत्वं स्वभावः, न तु पुंसामिति भावः, सा पीनोन्नतिमत्—पीनमुन्नतञ्चेत्यर्थः, पयोधरयुगं धत्ते—धारयति, वयं सखेदाः,—श्रान्ताः, सा गुरुणा—दुर्भरेण, जघनस्थलेन आक्रान्ता—अभिभूता, वयं गन्तुं—चलितुं, पुरः पदं धर्त्तुमिति यावत्, न शक्ताः, कामार्त्ततया किमपि कर्त्तुं न समर्था इति भावः, अन्यजनाश्रितैः,—तत्कान्तारूपजनाश्रितैः, दोषैः स्मः,—(इदमव्ययं) वयम्, अपटवः,—इतिकर्त्तव्यमूढाः, जाताः इति अद्भुतम्—आश्चर्य्यम् । अत्र अप्रगल्भमनस्त्वादिकं कार्य्यं नायकनिष्ठं, कारणन्तु बालात्वादिकं नायिकानिष्ठमिति कार्य्यकारणयोर्भिन्नदेशत्वम् । शार्दूलविक्रीडितं वृत्तम् । अमरुशतकस्येदं पद्यम् । केचित्तु—"कार्य्यकारणभावयोः धर्मयोः अत्यन्तं भिन्नदेशतया युगपदुत्पन्नत्वेन ख्यातिरसङ्गतिः । एकधर्मिण्यवच्छेदकभेदेन भिन्नदेशतावारणायात्यन्तमिति, तेन "दष्टो भुजङ्गेन पदेऽक्षिघूर्णना" इत्यत्र नातिव्याप्तिः, दंशनघूर्णनयोरेकस्मिन् शरीरे सङ्गतिसत्त्वात् ; कालभेदेन तदुभयख्यातिवारणाय युगपदिति, तेन "क्रियाशरीरेऽत्र परत्र भोगः" इत्यत्र नातिव्याप्तिः" इत्याहुः, तन्न ; "दन्तक्षतं कपोले बध्वाः, वेदना सपत्नीनाम्" इत्यत्र

अत्राचापवादकत्वादेकदेशस्थयोर्विरोधे विरोधालङ्कारः।(थ)

गुणौ क्रिये वा चेत् स्यातां विरुद्धे हेतुकार्य्ययोः।
यद्वाऽऽरब्धस्य वैफल्यमनर्थस्य च सम्भवः॥
विरूपयोः सङ्घटना या च तद्विषमं मतम्॥७४१॥(द)

स्त्रीलीदाहरणे दीपकाभावेन कार्य्यकारणयोः, युगपदुत्पन्नख्यातिविरहात्, "सा स्त्री वयं वातराः" इत्यत्र स्त्रीत्व कारकत्वस्य उत्पन्नत्वाभावादेव कार्य्योत्पत्तिक्षण-पदुत्पन्नत्वख्यातिविरहात्। न च स्त्रीत्वस्योत्पन्नत्वमारोप्यम् इति वाच्यम्; तस्य वैयधिकरण्यापादकत्वेन तदङ्गीकारस्यानाद्यत्वात्, "दष्टो भुजङ्गेन" इत्यादौ युगपदुत्पन्नत्व-ख्यातिविरहादेवातिप्रसङ्गभङ्गेन तत्कारकार्थमुपात्तत्वात्तत्पदस्य वैयर्थ्यत्वात्। अत्र-स्मन्मते तु कार्य्यकारणयोर्वैयधिकरण्यस्थेव यत्र विच्छित्तिविशेषजनकत्वं, तत्रैव तस्यालङ्कारत्वस्वीकारः। "दष्टो भुजङ्गेन" इत्यादौ कार्य्यकारणयोरवच्छेदकभेदसत्त्वेऽपि अधिकरणस्यैक्येन वैयधिकरण्याभावात्, "स्त्रियामरोरे" इत्यादौ वैयधिकरण्यस्य सत्त्वेऽपि तत्र विच्छित्तिविशेषानाधायकत्वादेव नातिप्रसङ्ग इति सङ्क्षेपः। उदा-हरणान्तरं यथा—"ऊह्यासजन्नत आजौ जङ्घौ दुकूलं जघनस्पृगायाः। तत्याज दानमधरो मुक्तिमुरोजगिरे विकुराः॥" अत्रायाः आजौ ऊह्यासङ्गं जघन, दुकूलं जघनस्पृक्—अधरः, जङ्घौ। स्पष्टमन्यत्। अत्र विकुराणां मुक्तयङ्गीकारे कार्य्यादीनां ऊह्यासाद्यङ्गीकारः इति स्फुटं वैयधिकरण्येन भासते। "वर्षासु नाता नवयौवनश्री-रागावधूः प्रौढपयोधराऽभूत्। पुष्पोद्गमोऽजायत केतकीनां बभूवुरस्यूतनखक्षतानि॥" अत्रेयं नाखरूपा। "अजस्रमारोहति दूरदीर्घां सङ्कल्पशीघ्रामतिं तदीयाम्। आसात् स वर्षत्यधिकं पुनर्यत् व्यानाशत्व लभ्यतामवाप्य॥" अत्र नैषा शीघ्रारोहणं, नहि च सास्ति इति वैयधिकरण्यम्।

(थ) ननु कार्य्यकारणयोः सहानवस्थानलक्षणो विरोधोऽस्ति, तस्यैवालङ्कारत्वमास्तां, किमधिकरणक्यनया? इत्यत आह, अत्राप इति।—अत्र=,—कार्य्य-कारणवैयधिकरण्यरूपाया असङ्गतेः, अपवादत्वात्—विरुद्धवैयधिकरण्याधायकत्वेन विशेषत्वात्, एकदेशस्थयोः,—समानाधिकरणयोः, विरोधे विरोधालङ्कारः,—विरोधालङ्कारस्य विषय इत्यर्थः, भिन्नदेशस्थयोस्तत्वे असङ्गतिरिति भावः।

(द) विषममाह, गुणाविति।—हेतुकार्य्ययोः विरुद्धौ गुणौ, विरुद्धे क्रिये वा चेत् स्यातां, यद्वा—यदि वा, आरब्धस्य—प्रकान्तस्य अर्थस्य, वैफल्यं—निष्फलत्वम्,

क्रमेण यथा—

"सद्यः करस्पर्शमवाप्य चित्रं
रणे रणे यस्य कृपाणलेखा।
तमालनीला शरदिन्दुपाण्डु
यशस्त्रिलोक्याभरणं प्रसूते॥" (ध)

अत्र कारणरूपासिलतायाः "कारणगुणा हि कार्य्यगुणा-रभन्ते" इति स्थितेर्विरुद्धा शुक्लयशस उत्पत्तिः। (न)

"आनन्दममन्दमिमं कुवलयदललोचने! ददासि त्वम्।
विरहस्त्वयैव जनितस्तापयतितरां शरीरं मे॥" (प)

अत्रानन्दजनकस्त्रीरूपकारणात् तापजनकविरहोत्पत्तिः।

अभिमतफलावाप्तिः इत्यर्थः, अनर्थस्य—अनिष्टफलस्य, च सम्भवः, या च विरूपयोः, —विरुद्धयोः, एकत्र वस्तुन्यत्यन्तमसम्भवतीः इत्यर्थः, सङ्घटना—सम्मेलनं, तत् विषमं मतम्। अत एवालङ्कारकौस्तुभकृताऽप्युक्तम्—"सम्बन्धानुपपत्तौ दृष्टार्थानामनिष्ट-सम्प्राप्तौ। अन्यजनकीभयगुणक्रियाविरोधे च विषमः स्यात्॥" इति।

(ध) कार्य्यकारणयोर्गुणविरोधमाह, सद्य इति।—यस्य तमालनीला कृपाण-लेखा—खड्गयष्टिरित्यर्थः, रणे रणे—प्रतिसङ्ग्रामं, करस्पर्शम् अवाप्य शरदिन्दुः,—शरच्चन्द्रः, तद्वत् पाण्डु—शुभ्रं, त्रिलोक्याभरणं—सर्वलोकेन त्रिभुवनाहृतमिति भावः, ["त्रिलोकाभरणम्" इति त्वसाधु] यशः सद्यः प्रसूते—जनयति, चित्रम्—आश्चर्य्यम्, एतदिति शेषः। उपजातिः वृत्तम्। यथा वा—"न खलु न खलु बाणः पातनीयोऽयमस्मिन्नृदुनि मृगशरीरे तूलराशाविवाग्निः। क्व वत हरिणकानां जीवितं क्वातिलोलम्? क्व च निशितनिपाताः वज्रसाराः शरास्ते?"॥ इति।

(न) अनेति।—अत्र कारणरूपासिलतायाः,—हेतोरसिलतायाः इत्यर्थः। कारणगुणा इति।—यद्यप्यवयविरूपकार्य्यगुणक्रिययोः एकावयवरूपकारणगुणक्रिया-जन्यत्वनियमः, तथाऽपि तत्र तथा दर्शनादन्यत्रापि तथात्वं अविरुद्धं कल्प्यते इति नानुपपत्तिः इति भावः। कारणविरुद्धो गुणः,—कार्य्यस्य यशसः शुक्लता, कार्य्यस्य च शुक्लयशसः विरुद्धो गुणः,—कारणस्य कृपाणस्य तमालनीलत्वम्।

(प) कार्य्यकारणयोः क्रियाविरोधमाह, आनन्दमिति।—नायिकां प्रति नायकस्योक्तिरियम्। हे कुवलयदले—नीलोत्पलपत्रे, तद्वत् लोचने यस्याः; तत्सम्बुद्धौ,

"अयं रत्नाकरोऽम्भोधिरित्यसेवि धनाशया।
धनं दुरेऽस्तु वदनमपूरि खारवारिभिः॥" (फ)

अत्र केवलं काङ्क्षितधनलाभो नाभूत्, प्रत्युत खारवारिभिर्वदनपूरणम्।

"क्व वनं तरुवल्कभूषणम्? नृपलक्ष्मीः क्व महेन्द्रवन्दिता?।
नियतं प्रतिकूलवर्त्तिनो वत! धातुश्चरितं सुदुःसहम्॥" (ब)

अत्र वनराजश्रियोर्विरूपयोः सङ्घटना। इदं मम।

त्रम् इदम् अनन्दं—महानन्दम्, आनन्दं ददाति, किन्तु स्वयैव जनितः,—उत्पादितः, विरहः मे—मम, शरीरं तापयतितराम्—अतिशयेन तापयति। अत्र खारवस्य नायिकायाः क्रिया आनन्ददानं, नायिकायाश्च विरहस्य क्रिया शरीरतापनं तद्विरहनिमित्तं हेतोः कार्यस्य विरहे क्रिये। यद्यप्यानन्दतापौ गुणौ, तथाप्यत्र हर्षोत्पत्त्यर्थं घटकत्वेन क्रियात्वेनैव व्यवहारः इति श्रेयम्। आर्य्या छन्दम्।

(फ) तृतीयं प्रकारमाह, अयमिति।—अयम् अम्भोधिः,—समुद्रः, रत्नानाम् आकर इति हेतोः धनाशया—धनप्राप्तिवाञ्छया, असेवि—सेवितः, मयेति शेषः, किन्तु धनं दूरे अस्तु, (प्रत्युत) वदनं—मुखं, खारवारिभिः,—क्षारजलैः, अपूरि—पूरितम्। अत्र समुद्रसेवया धनप्राप्तिरूपफलज्ञानवान्, खारवारिभिः वदनपूरणञ्च अनिष्टञ्च प्राप्तः सेव्यज्ञानभीष्टसम्पादकत्वातिशयं स्वस्य दुरदृष्टातिशयं वा व्यनक्ति। यथा वा—"अयं दुग्धाम्भोधेः पतिरिति नवां पाथस इति स्तितोऽम्भिर्दुग्धोपनयनधिया गोपतनयः। अनेन प्रत्यूषे व्यरचि स तथा येन जननीस्तनादप्यजाकं निजमपि पयो दुर्लभमभूत्॥" इति।

(ब) चतुर्थं प्रकारमाह, क्वेति।—तरूणां वल्कानि—त्वचः, भूषणानि यत्र तादृशं, वनं क्व? महेन्द्रवन्दिता—देवेन्द्रादृता, नृपलक्ष्मीः,—राजश्रीश्च, क्व? [ईदृशं महदन्तरमनयोः सूचयति] वत—खेदे, प्रतिकूलवर्त्तिनः,—विरुद्धस्य, धातुः,—दैवस्य, चरितं नियतं—निश्चितं, सुदुःसहम्। अत्रैकस्मिन् वस्तुनि श्रीरामे अत्यन्तसम्बन्धवतोर्वनवासराज्यश्रीलाभयोः सेवनं, वस्तुतः तदानीं श्रीरामस्य राजश्रीलाभ एव नासीति न विरुद्धयोः सङ्घटनं, किन्तु दशरथमरणस्य श्रीरामस्य राज्यलाभरूपफलाज्ञानवान्, प्रत्युतानिष्टस्य श्रीरामवनवासस्य स्वस्य इति तृतीयप्रकार एवेदं पर्य्यवस्यति, तुलच "श्रियोवादपि सहसो क्षेयनायतक्षोभणा?। अयं क्व च कुलूताधि सर्वस्वो

यथा वा—

"विपुलेन सागरशयस्य कुक्षिणा
भुवनानि यस्य पपिरे युगक्षये।
मदविभ्रमासकलया पपे पुनः
स पुरस्त्रियैकतमयैकया दृशा॥" (भ)

समं स्यादानुरूप्येण श्लाघा योग्यस्य वस्तुनः॥७४२॥(म)

मदनानलः" ?॥ इत्युदाहरणमस्य वेदितव्यम्। अत्राङ्गमार्दवमदनानलसहनयोरेकत्र नायिकायां मेलनम् इति ज्ञेयम्। यथा वा—"क्व रुजा हृदयप्रमाथिनी ? क्व च ते विश्वसनीयमायुधम् ?। मृदुतीक्ष्णतरं यदुच्यते तदिदं मन्मथ ! दृश्यते त्वयि॥" अत्र कोमलायुधोत्कटव्यथयोः कार्य्यकारणभावसम्बन्धोऽनुपपन्नवद्भासते।

(भ) विपुलेनेत्याद्युक्त्वा इत्यादावपि विषमत्वं यथायोगमनुगन्तव्यम् इति काव्यप्रकाशोक्तं चतुर्थप्रकारे एव सङ्गमयति, विपुलेनेति।—युगक्षये—कल्पान्ते, सागरशयस्य—समुद्रनिलयस्य, यस्य—श्रीकृष्णस्य, विपुलेन कुक्षिणा—उदरेण, भुवनानि—जगन्ति, पपिरे—पीतानि, सः,—श्रीकृष्णः, एकतमया पुरस्त्रिया—नगरवासिन्या कामिन्या, मदविभ्रमेण असकलया—असम्पूर्णया, कटाक्षरूपयेत्यर्थः, एकया दृशा—नेत्रेण, पुनः पपे—पीतः, कटाक्षेण सर्वाङ्गीणं दृष्टः इत्यर्थः। मञ्जुभाषिणी वृत्तं—"सजसा जगौ च यदि मञ्जुभाषिणी" इति लक्षणात्। शिशुपालवधस्य पद्यमिदम्। अत्र एकत्र सर्वजगत्पायित्वम् एकनार्य्यैकनेत्रपीतत्वञ्च विरुद्धं सङ्घटितम्। तथा हि, अत्र यदेकदेशेन कुक्षिणा जगत् पीयते, स पुनः चक्षुरेकदेशेन स्त्रिया पीयते इति विरूपयोः मेलनम्। चतुर्थः प्रकारः कृद्वयप्रयोगे एव सम्भवति इति वदन्तः केचिदेतदवयव्यवयवयोः कार्य्यकारणयोः क्रियाविरोधोदाहरणं वदन्ति; तथा हि, कुक्षिरवयवः कारणं तत्कर्त्तृका भुवनपानक्रिया कुक्षिकार्य्यस्यावयविनः सागरशयस्य कर्मतासम्बन्धेन पानक्रियया विरुध्यते, भुवनपातृकुक्षिमतः कटाक्षपेयत्वस्य विरुद्धतया भानादिति, तन्न; प्रमाणान्तरवेद्यस्य हेतुहेतुमद्भावस्यात्र बोधाभावेनाप्रत्ययात्, धारणदर्शनरूपयोः पानयोः स्वतो विरोधाभावात् उपदर्शितविरोधस्य क्रियागतत्वाभावेन प्रकृतानुपयोगित्वाच्च इति ज्ञेयम्।

(म) सममाह, सममिति।—आनुरूप्येण—योग्यकर्मणा, योग्यस्य वस्तुनः,—विषयस्य, श्लाघा—प्रशंसा, समं स्यात्।

यथा—

"अग्निनमुपगतेयं कौमुदी मेघमुक्तं
जलनिधिमनुरूपं जह्नुकन्याऽवतीर्णा।
इति समगुणयोगप्रीतयस्तत्र पौराः
श्रवणकटु नृपाणामेकवाक्यं विवव्रुः॥" (य)

विचित्रं तद्विरुद्धस्य कृतिरिष्टफलाय चेत्॥७४३॥(र)

यथा—

"प्रणमत्युन्नतिहेतोर्जीवितहेतोर्विमुञ्चति प्राणान्।
दुःखीयति सुखहेतोः को मूढः सेवकादन्यः?" ॥ (ल)

(य) अग्निनमिति।—इन्दुमत्या यजे स्वयंवरे पौराणामुक्तिः। इयम्—इन्दुमती कौमुदी, वपुरूपं—स्वयोग्यम्, यजमिति भावः, मेघमुक्तं—मेघावरणमुक्तं, अग्निनम् उपगता, एवमन्योऽपि; जह्नुकन्या—जाह्नवी, वपुरूपं—स्वसदृशं, जलनिधिम् अवतीर्णा—प्रविष्टा, इति—एवं, समगुणयोः,—तुल्यगुणयोः, यजेन्दुमत्योरिति शेषः, योगेन—सम्बन्धेन, प्रीतिः येषां तथाभूताः, पौराः,—पुरवासिनः, तत्र—स्वयंवरक्षेत्रे, नृपाणाम्—इन्दुमतीविषया समागतानामजेतरराजानां, श्रवणकटु—श्रवणयोरप्रतिकूलतया दुःश्रवम्, अतश्रुतयश्चलिति यावत्, एकवाक्यं विवव्रुः,—कथयामासुः। एवंप्रकारेण पदम्। नाविनी उक्तम्। यथा वा—"स्त्रीपुंसव्यतिषङ्गं जनयतः पत्युः प्रजानामभूदभ्यासः परिचायकः त्रिनयनोदन्यथसम्पत्तये। चाभंकारपुरन्ध्रिपूर्वपरिणयप्रेमार्पणक्लीकृताऽप्येतद्दम्पतिमाढरानरचनात् प्राक्धिं चेतो भुवः॥" अत्रास्त्रीपुंसयोः सम्बन्धजननाभ्यासस्य त्रैलोक्यसम्बन्धफलकोक्त्या तस्यास्यस्यानुरूपं सम्पद्यते। यथा वा—"धातुः शिल्पातिशयनिधयस्तावकानामसेवा जगाचो रूपं देवोऽप्यमनुषमनो दृष्टपादः अरस्व। जातं देवात् सदृशजननयोः सङ्गतं वत् तदेतत् प्रकारस्त्रीपतनपुनाराज्यमेकाधिपत्यम्॥" इति।

(र) विचित्रमाह, विचित्रमिति।—तद्विरुद्धस्य—इष्टविपरीतस्य, कृतिः,—करणम्, इष्टफलाय—अभिमतफलसाधनाय, चेत् भवति, तदा विचित्रम्।

(ल) प्रणमतीति।—सेवकात्—भृत्यात्, अन्यः को मूढः?—अविवेकी? उन्नतिहेतोः,—उत्कर्षनिमित्तं, प्रणमति—नमस्कारो भवति, जीवितहेतोः,—प्राणरक्षानिमित्तं, प्राणान् विमुञ्चति—त्यजति, तथा सुखहेतोः,—सुखाशया, दुःखीयति-

आश्रयाश्रयिणोरेकस्याधिक्येऽधिकमुच्यते ॥७४४॥(व)

आश्रयाधिक्ये यथा—

"किमधिकमस्य ब्रूमो महिमानं वारिधेर्हरिर्यत्र।
अज्ञात एव शेते कुक्षौ निक्षिप्य भुवनानि ॥" (श)

आश्रिताधिक्ये यथा—

युगान्तकालप्रतिसंहृतात्मनो
जगन्ति यस्यां सविकासमासत।
तनौ ममुस्तत्र न कैटभद्विष-
स्तपोधनाभ्यागमसम्भवा मुदः ॥" (ष)

—दुःखमिच्छति ? न कोऽपि सेवकादन्योऽधिको मूढ इति भावः। अत्रार्य्या छन्दः। इह उन्नतिरूपस्य नतिविरुद्धस्य फलस्य लाभाय उन्नतिविरुद्धस्य प्रणतिरूपकार्य्यस्य करणम्। एवमन्यत्रापि यथा—"मलिनयितुं खलवदनं विमलयति जगन्ति देव! कीर्त्तिस्ते। मित्राह्लादं कर्त्तुं मित्राय द्रुह्यति प्रतापोऽपि ॥" इति।

(व) अधिकमाह, आश्रयेति।—आश्रयाश्रयिणोः,—आधाराधेययोः, एकस्य—आश्रयस्य आश्रयिणो वा, आधिक्ये—महत्त्वातिशये, प्रतिपाद्ये इति शेषः, अधिकम् उच्यते।

(श) आश्रयाधिक्ये अधिकमाह, किमधिकमिति।—अस्य वारिधेः,—समुद्रस्य, महिमानं—महत्त्वम्, अधिकं किं ब्रूमः ?—कथयामः ? यत्र—वारिधौ, हरिः,—नारायणः, कुक्षौ—जठरे, भुवनानि निक्षिप्य अज्ञात एव—कुत्रेति केनाप्यलक्ष्यमाण एव, एकदेशे एव शयनात् समुद्रस्थैः सर्वैः सत्त्वैः न ज्ञायते इत्यर्थः, शेते। अत्र "कुक्षौ निक्षिप्य" इत्यनेन हरेर्महत्त्वमवगम्यते, समुद्रकदेशे तच्छयनेनाश्रयस्य समुद्रस्यातिशयमाहात्म्यं व्यज्यते। श्लोकेऽस्मिन् समस्तभुवनानां महाऽऽधारस्यापि भगवतः क्षीरोदशायित्वेनाधेयत्वं, क्षीरोदस्य आधारत्वं, तत्रापि अविगणितभावेन स्थितत्वात् आधेयस्य आधाराधिक्यवर्णनमिति लक्षणसमन्वयः। अत्रार्य्या छन्दः।

(ष) आश्रिताधिक्ये अधिकमाह, युगान्तेति।—नारदागमे श्रीकृष्णस्य हर्षातिशयवर्णनम्। युगान्तकाले—कल्पान्तसमये, प्रलयकाले इति यावत्, प्रतिसंहृतः,—सङ्कुचितः, आत्मा येन तादृशस्य, यद्वा—प्रतिसंहृताः,—स्वोदरं प्रवेशिताः, आत्मानः,—समस्तप्राणिनो येन तथाभूतस्य, कैटभद्विषः,—श्रीकृष्णस्य, यस्यां तनौ—

अन्योऽन्यमुभयोरेक-क्रियायाः कारणं मिथः॥७४५॥(स)

शरीरे, जगन्ति सविकासम्—यथास्यात्तथा यथा तथेति यावत्, आसत—तिष्ठन्ति स्म, [आस् उपवेशने इत्यस्य धातोः प्रथमपुरुषस्य बहुवचनमिदम्] तव—तस्याः, तनौ—भगवत्यां देव्यां, तपोधनस्य—नारदस्य, अभ्यागमेन—समागमेन, सभयाः,—समुत्पन्नाः, मुदः,—हर्षाः, न ममुः,—न मान्ति स्म, नावकाशं प्राप्नुवन्तः, स्वातुमक्षमाः सन्तो बहिर्निःसिसरिषव इति भावः। अत्र "जगन्ति" इत्यादिना श्रीकण्ठतनोराश्रयस्याधिक्यमुक्तं, तदावश्यकाभावात् आश्रितानां मुदामतिमहत्त्वं व्यज्यते इति। अत्र समस्तजगदाधारकपाया भगवत्तन्वाः कथंचिद् नारदमुनिसमागमजन्यानामोदहर्षस्य आधेयस्य "न ममुः" इत्यनेन आधिक्येनैरधिक्यं नामालङ्कारः। मल्लिनाथस्तु—"चतुर्दशभुवनभरणपर्याप्ते वपुषि अन्तर्न मान्तीति कविप्रौढ़ोक्तिसिद्धातिशयेन स्वतःसिद्धस्याभेदस्याध्यवसितातिशयोक्तिः, सा च मुदामन्तःसम्बन्धेऽन्तःसम्बन्धीया सम्बन्धासम्बन्धरूपा" इति अतिशयोक्त्यलङ्कारं समर्थितवान्। वस्तुतस्तु कविप्रौढ़ोक्तिसिद्धातिशयेनाध्यवसितत्वेन आमोदहर्षस्याधेयस्य आधिक्यसिद्धिरिति अतिशयोक्तिमूलोऽयमाधिक्यालङ्कारः इति कश्चिन्न समञ्जसम्। यंग्रन्थविलं इत्यम्। त्रिगुणाक्षरषड्भेदं पद्यम्।

(स) अन्योऽन्यमाह, अन्योऽन्यमिति।—अत्र चेदित्यनुषज्यते; उभयोः,—एकजातीययोः क्रिययोः, ("दुदोह गां स यज्ञाय सस्याय मघवा दिवम्" इत्यादिन्यायेन "उभयोः" इति, अत्र स्वं स्वं दोहनं प्रत्येव स्वं स्वं कारणं, न तु परस्परस्य दोहनं प्रति परस्परं कारणम्) मिथः,—परस्परम्, एकक्रियायाः चेत् कारणं तदा अन्योऽन्यम्—अन्योऽन्यनामालङ्कारः, भवतीति शेषः। क्रियापदं गुणस्याप्युपलक्षणम्; तेन "निशया रुचिरस्त्वन्द्वश्चन्द्रेण रुचिरा निशा" इत्यत्राप्ययमलङ्कारः। अत्र कारणयोः क्रिययोश्च शब्देक्यं वैचित्र्यपरिपोषकमेव, न तु नियामकं, तेन "नदीनं नायाः सन्निना निशेव त्वया स नाथा निशया शशीव" इत्यादौ शब्दभेदेऽप्ययमलङ्कारः। अनेदं बोध्यम्—यद्यपि एकस्याः क्रियायाः परस्परमेककारकत्वे एव एतदनुज्ञातं, तथापि एकया क्रियया परस्परमुत्कर्षांधाने एतस्य सद्भावः, अन्यथा तावन्मात्रश्लेषस्य अलङ्कारव्यपदेशार्हत्वस्वैवासम्भवः; अत एवोक्तमलङ्कारकौस्तुभकृता—"अन्योऽन्यं बलिनां परस्परोत्कर्षेच्छुत्वे" इति। केचित्तु—यदा तु परस्परं मन्त्रिता आधिक्येनैव क्रिया अन्येनाप्यन्येति, तदाप्ययमेवालङ्कारः इति सिद्धान्तयन्ति, उदाहरन्ति च—"अग्निना च निशा निशया च अग्नी अग्निना निशया च विभाति

यथा—"त्वया सा शोभते तन्वी तया त्वमपि शोभसे।
रजन्या शोभते चन्द्रश्चन्द्रेणापि निशीथिनी॥" (ख)

यदाधेयमनाधारमेकञ्चानेकगोचरम्।
किञ्चित् प्रकुर्वतः कार्य्यमशक्यस्येतरस्य वा॥
कार्य्यस्य करणं दैवाद्विशेषस्त्रिविधस्ततः॥७४६॥(क)

क्रमेण यथा—

"दिवमप्युपयातानामाकल्पमनल्पगुणगणा येषाम्।
रमयन्ति जगन्ति गिरः कथमिव कवयो न ते वन्द्याः?"॥ (ख)

नभः। कविना च विभुः विभुना च कविः कविना विभुना च विभाति सभा॥" इत्यादि।

(ङ) त्वयेति।—सा तन्वी—ब्रह्माङ्गी, त्वया शोभते, त्वमपि तया—ब्रह्माङ्गया, शोभसे, चन्द्रः रजन्या शोभते, निशीथिनी—रजनी, अपि चन्द्रेण, शोभते इति शेषः। अत्र परस्परशोभयोः परस्परकारकम्। यथा वा—"कण्ठश्च तया: खलवल्गुरज मुक्ताकलापश्च निरुक्तश्च। अभोऽन्यशोभाजननाहभूत आधारयो भूषणभूष्यभावः॥" इति।

(च) विशेषनाह, यदिति।—यत् अनाधारम्—आधारवर्जितम्, आधेयं, वस्तु एवं, वस्तु इति शेषः, अनेकगोचरं—बहुस्थानवर्त्ति, (षष्ठ्यांयाकारकत्वे "ल्यब्लोपादालादश्च परिशेषात् तृतीयादित्यस्य लाभो ज्ञेयः) अथवा किञ्चित्—किमपि, कार्य्यं प्रकुर्वतः, जनस्य इति शेषः, अशक्यस्य इतरस्य—शक्यस्य वा, कार्य्यस्य—अभ्रान्तस्य इति भावः, दैवात्—प्रतिसन्धानं विना, करणम्—उत्पत्तिः, विशेषः; स च ततः,—तस्मात्, उक्तलक्षणादित्यर्थः, त्रिविधः; तथा च—प्रसिद्धाधारं विनाऽऽधेयस्य सत्त्वे आद्यो विशेषः, एकस्य परिनिष्ठितस्य वस्तुनः बहुषत् अनेकत्र सत्त्वे द्वितीयो विशेषः, एवमिदं कार्य्यं चारब्धं सुकरस्य दुष्करस्य वा जनस्य कार्य्यस्य करणे तृतीयो विशेषः इति निष्कृष्टोऽर्थः।

(छ) दिवमिति।—दिवं—स्वर्गम्, उपयातानामपि—गतानामपीत्यर्थः, येषां—कवीनाम्, अनल्पाः,—बहवः, गुणानां—माधुर्यादीनां, गणा यासु ताः, गिरः,—वाचः, आकल्पम्—आप्रलयं, जगन्ति रमयन्ति—मोदयन्ति, ते कवयः कथमिव—कथमिति भावः, न वन्द्याः?—सर्वैरेवेत्यर्थः? अपि तु वन्द्या एवेत्यर्थः।

"कानने सरिदुद्देशे गिरीणामपि कन्दरे।
पश्यन्त्यन्तकसङ्काशं त्वामेकं रिपवः पुरः॥" (ग)
"गृहिणी सचिवः सखी मिथः
प्रियशिष्या ललिते कलाविधौ।
करुणाविमुखेन मृत्युना
हरता त्वां वद किं न मे हृतम्?" ॥ (घ)

अत्र निर्व्याहतत्वेन प्रसिद्धाधारान् अवीन् विनाऽपि आम्रवणाद्यां गिरां स्थितिः इति अवीनां स्वर्गगतत्वात् तेषां वाक्यानां भूमिनिहतजननाधारमेव, तत्राद्यप्रभेदो विशेषः। अक्षर्यां छन्दः। इदं वदटक। यथा वा—"दृशनच्छोः स्थितं अश्रौऽक्षंषु लक्षितं कर्णे। हृदयं हृदये निहितं विधोजितं किमन्न देवेन?" ॥ अत्र नाविकानिष्टदर्शनं नाविका आधारः प्रसिद्धः, तत्सम्बन्धिव्यवहारश्चत्वात्, तां विनाऽपि अब्धौ सदृशज्ञानमुक्तं, तज्जन्योपजीव्यविषयत्वाभिप्रायेण इत्युपपत्तिः।

(ग) कानने इति।—राजस्तुतिरियम्। रिपवः,—शत्रवः, एकं त्वां कानने—वने, सरितां—नदीनाम्, उद्देशे—अवकाशे, गिरीणां—पर्वतानां, कन्दरे—गुहायामपि, पुरः,—अग्रतः, अन्तकसङ्काशं—यमसदृशं, पश्यन्ति। अत्र भावनाप्रयोजकैक्येन स्वभावेन कानन-नदी-पर्वतकन्दरादिषु अनेकेषु युष्मत्पदार्थस्य एकस्य राज्ञः युगपत् सम्बन्धस्य द्वितीयो विशेषः। यथा वा—"प्राकारे सा पथि पथि च सा पृष्ठतः सा पुरः सा पर्यङ्के सा दिशि दिशि च सा सन्निधौ गातुरस्य। हंहो चेतः! प्रकृतिरपरा नास्ति ते काऽपि सा सा सा सा सा सा जगति सकले कोऽयमद्वैतवादः?" ॥ इति।

(घ) गृहिणीति।—इन्दुमत्या मरणे तप्तैः अजस्य विलापोऽयम्। हे प्रिये! इत्यध्याहार्यम्; त्वां हरता करुणाविमुखेन—निर्दयेन, मृत्युना मे किं न हृतम्? वद, तथा हि, त्वं मे गृहिणीति गृहिणी हृता, त्वं मे सचिवः,—दृष्टोपदेशत्वात् मन्त्रीति मन्त्री हृतः, त्वं मे सखि,—सन्मोदितसाधकत्वात् विजनसहचरीति सखी हृता, त्वं मे ललिते—मनोहरे, कलाविधौ—मृत्यगीताद्यनुष्ठाने कुशले वा, प्रियशिष्या इति काऽपि हृता, तस्मात् त्वां हरता गृहिण्यादिकं सर्वमेव मे हृतमिति भावः। अत्र इन्दुमतीहरणरूपमेकं कार्यं प्रकृर्वतः विधेः गृहिण्यादिरूपं अपरमपि कार्यजातं हरणम्। तस्मिन्दुमतीहरणमेव सचिवादिहरणं, तच्चैकमेव

व्याघातः स तु केनापि वस्तु येन यथाकृतम्।
तेनैव चेदुपायेन कुरुतेऽन्यत्तदन्यथा ॥ ७४७ ॥ (ङ)

यथा "दृशा दग्धं मनसिजम्" इत्यादि। (च)

सौकर्य्येण च कार्य्यस्य विरुद्धं क्रियते यदि॥७४८॥(छ)

व्याघात इत्येव।

"इहैव त्वं तिष्ठ द्रुतमहमहोभिः कतिपयैः
समागन्ता कान्ते! मृदुरसि न चायाससहना।
मृदुत्वं मे हेतुः सुभग! भवता गन्तुमधिकं
न मूर्धा सोढा यद्विरहजमायासमसमम्॥" (ज)

कार्य्यं, कथमत्र कार्य्यान्तरोत्पत्तिः? इति चेत्, सचिवादिहरणे तात्पर्य्यात् इति ब्रूमः। सुन्दरी इयम्—"वयुनोर्यदि सौ जनौ युजोः समरा स्त्री यदि सुन्दरी तदा" इति लक्षणात्। इदं रघुवंशस्थं पद्यम्।

(ङ) व्याघातमाह, व्याघात इति।—येन केनापि यथा—यत्प्रकारं, कृतं वस्तु अन्यः,—अन्यो जनः इत्यर्थः, तेनैव उपायेन चेत्—यदि, तदन्यथा—तत्तादन्यप्रकारं, कुरुते, तदा सः व्याघातः,—निष्पादितवस्त्वन्तरत्वादिति हेतुत्वात् व्याघातनामालङ्कार इत्यर्थः।

(च) उदाहरति।—दृशेति।—दृष्टे व्याख्यातं प्राक्। अत्र हरेण दृगुपायेन मकरीकृतः मदनः नारीभिः तेनैव नेत्ररूपोपायेन सकलः कृतः। अत्र केचिदाहुः,—"व्यतिरेक एवायमलङ्कारः, उक्तोदाहरणे जघिनोरित्यनेन तस्यैव प्रकाशनात्। न च व्याघातोऽत्र व्यतिरेकोत्थापकत्वेन स्थित इति वाच्यम्; तथाऽप्यलङ्कारान्तरत्वसिद्धेः विवक्षाविषयाभावादिति दिक्; तदसत्, साहश्यविवक्षायामेव व्यतिरेकः इत्यसकृत् व्यवस्थापितत्वात्, अत्र च धर्मान्तरेणापि शिवनायिकयोः साहश्यानभिमतेः अदृष्टत्वात्" इति कौमुदीग्रन्थः।

(छ) प्रकारान्तरेण व्याघातमाह, सौकर्य्येणेति।—सौकर्य्येण—सुकरत्वेन, यदि कार्य्यस्य विरुद्धं क्रियते—उच्यते इत्याशयः, तदाऽपि व्याघातः स्यादिति शेषः, केनापि येनोपायेन बलात्कार्य्यमुच्यते, तदन्येन तेनैवोपायेन सौकर्य्येण तद्विरुद्धं कार्य्यं वध्यते तदा व्याघातः इति तात्पर्य्यार्थः।

(ज) व्याघातमुदाहरति, इहेति।—प्रवासगमनजन्यायां दयितोद्विग्नमनसौ [illegible]

अत्र नायकेन नायिकाया मृदुत्वं सहगमनाभावहेतुत्वेन उक्तं, नायिकया च प्रत्युत सहगमने ततोऽपि सौकर्य्येण हेतुतयोपन्यस्तम्।

परं परं प्रति यदा पूर्वपूर्वस्य हेतुता।
तदा कारणमाला स्यात् ॥ ७४९ ॥ (झ)

यथा—

"श्रुतं श्रुतधियां सङ्गाज्जायते विनयः श्रुतात्।
लोकानुरागो विनयान्न किं लोकानुरागतः?" ॥ (ञ)

आर्ये! त्वम् इदृश—अत्र यष्टौ एव, तिष्ठ, अहं अतिपवेरेव—खल्वेवेति आवृत्, अहोमि: समानय—आगमिष्यामीत्यर्थः, (तं) मृदुः,—कोमलाङ्गी, अहि, आयास-सहना—क्लेशक्षमा, न च, येन मया सह गमिष्यतीति भावः। (इति उक्तिः) हे सुभग! मे—मम, मृदुत्वं—कोमलत्वं, भवता सह गन्तुम् अधिकं हेतुः, यदा—अधिकं मृदुत्वं भवता सह गन्तुं हेतुः, यत्—यस्मात्, यही अहं विरहक्षमम् असहं —निरुपमम्, आयासं न सोढ़ा—न सहिष्ये। त्रिखरिको हृतम्। तथा चा—"अभीष्टोनां तमालपल्लवविडम्बयच्छायानवेलावनानाम् आ पारीभ्यतुर्णा चटुलतिमि-कुलक्षोभितालज्जलानाम्। मालेवाद्या सुलभा ननुपतिप्रतेदक्षते वा त्रिरोभिः वा मध्येव खलनी जयति विनयात्कृतिसे प्रसुनम्॥" अत्र चायके चन्द्रगुप्तमात्रिव-व्यसनतया ज्ञानाभावो दोषत्वेन प्रायुक्तः, स एवात्र चायकेन विनयव्यसनतया गुणत्वेनोक्तः इति ध्येयम्।

(झ) कारणमालामाह, परमिति।—यदा पूर्वपूर्वस्य, कार्य्यस्येति शेषः, परं परं प्रति हेतुता, तदा कारणमाला स्यात्। कार्य्यांशमपि माला इह वर्त्तते एव, कथं न कार्य्यमालेत्याख्यानम्? उच्यते—"विवक्षापूर्विका हि शब्दार्थप्रति-पत्तिः" इति नियमेन कारणगुणवर्णनस्यैव कवेरभीष्टतया कारणमालेत्याख्यानमेव युक्तम् इति ध्येयम्।

(ञ) श्रुतमिति।—श्रुतधियां—श्रियितमतीनां, पण्डितानामिति यावत्, सङ्गात्—संसर्गात्, श्रुतं—शास्त्रज्ञानम्, अध्ययनमित्यर्थः, जायते, श्रुतात् विनयः,—शिष्टाचारः, जायते इत्यनुषङ्गः, विनयात् लोकानुरागः,—लोकप्रियता, जायते इत्यनापि अनुषज्यते, लोकानुरागतः किं न जायते? अत्र परं परं विनयादिकं प्रति

तन्मालादीपकं पुनः।
धर्मिणामेकधर्मेण सम्बन्धो यत् यथोत्तरम्॥७५०॥(ट)

यथा—

"त्वयि सङ्गरसम्प्राप्ते धनुषाऽऽसादिताः शराः।
शरैररिशिरस्तेन भूस्तया त्वं त्वया यशः॥" (ठ)

अत्रासादनक्रिया धर्मः।

पूर्वपूर्वस्य श्रुतादेः हेतुत्वम्। यथा वा—"विद्या ददाति विनयं विनयात् याति पात्रताम्। पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततः सुखम्॥" यथा वा—"दारिद्र्याद्ध्रियमेति ह्रीपरिगतः प्रभ्रश्यते तेजसो निस्तेजाः परिभूयते परिभवान्निर्वेदमापद्यते। निर्विण्णः शुचमेति शोकविहतो बुद्ध्या परित्यज्यते निर्बुद्धिः क्षयमेत्यहो! निधनता सर्वापदामास्पदम्॥" अत्र दारिद्र्यस्य लज्जायां, तस्याः तेजोनाशे, तस्य च परिभवे हेतुत्वमिति रीत्या मालात्वमेव। यत्रोत्तरोत्तरस्य पूर्वं पूर्वं प्रति हेतुत्वमुच्यते, तत्रापीयमिति कौस्तुभकाराः।

(ट) मालादीपकमाह, तदिति।—धर्मिणां, बहूनामिति भावः, यथोत्तरम्—उत्तरोत्तरं, यत् एकधर्मेण सम्बन्धः, तत् पुनः मालादीपकम्। अत्रैवं ज्ञेयम्—लोके मालायां यथा पूर्वपूर्वगुम्फितप्रसूनानामुत्तरोत्तरावलम्बनात्सहायकत्वं, तथैवेहापि मालारूपता इति सारः। अप्ययदीक्षितास्त्वेवमाहुः,—"वदन्ति वर्ण्यावर्ण्यानां धर्मैक्यं दीपकं बुधाः। मदेन भाति कलभः प्रतापेन महीपतिः॥ त्रिविधं दीपकावृत्तौ भवेदावृत्तिदीपकम्। वर्षत्यम्बुदमालेयं वर्षत्येषा च शर्वरी॥ उन्मीलन्ति कदम्बानि स्फुटन्ति कुटजोद्गमाः। माद्यन्ति चातकास्तृप्ताः माद्यन्ति च शिखावलाः॥" अत्र देहलीदीपकन्यायमवलम्ब्य अनेकपोषकस्य पदस्यार्थस्य द्वयोरपि वा आवर्त्तने उदाहरणक्रमः इति।

(ठ) त्वयीति।—राजस्तुतिरियम्। हे राजन्! त्वयि सङ्गरसम्प्राप्ते—रणं गते सति, धनुषा शराः आसादिताः,—प्राप्ताः, शरैः अरेः,—शत्रोः, शिरः, आसादितमिति शेषः, तेन—अरिशिरसा, भूः,—भूतलम्, आसादितेति लिङ्गव्यत्ययेन अत्रापि अनुवर्त्तनीयं, तया—भुवा, त्वम्, आसादितः इति शेषः, तव भूस्वामित्वादिति भावः, त्वया यशः, आसादितमित्यनेनान्वयः। अत्रैकया आसादनक्रियया यथोत्तरं बहूनां धर्मिणां धनुरादीनां सम्बन्धः। इदं विश्वनाथस्य पद्यम्। यथा वा—"लावण्येन भवत्कलेवरमिदं तेनोत्कटं यौवनं तेनासौ सुतनु! प्रसूनविशिखस्तेन

पूर्वं पूर्वं प्रति विशेषणत्वेन परं परम्।
स्थाप्यतेऽपोह्यते वा चेत् स्यात् तदैकावली द्विधा ॥७५१॥(ड)

क्रमेण उदाहरणम्—

"सरो विकसिताम्भोजमम्भोजं भृङ्गसङ्गतम्।
भृङ्गा यत्र ससङ्गीताः सङ्गीतं सस्मरोदयम्॥" (ढ)

"न तज्जलं यन्न सुचारु पङ्कजं
न पङ्कजं तत् यदलीनषट्पदम्।
न षट्पदोऽसौ न जुगुञ्ज यः कलं
न गुञ्जितं तन्न जहार यन्मनः॥" (ण)

द्रुतं कार्मुकम्। तेन प्रापि पुनः शिलीमुखगणस्तेनापि मन्मानसं तेनोत्तापभय-प्रमाथदलनभ्रान्तिप्रमोहोदयः॥" अत्र प्रापीति क्रियायां पूर्वं कर्मीभूतस्य पश्चात् तत्रैव कर्तृत्वमित्यादिरीत्या मालात्वमिति बोध्यम्।

(ड) एकावलीमाह, पूर्वमिति।—चेत्—यदि, पूर्वं पूर्वं प्रति परं परं—यद्विशेष्यमित्यर्थः, विशेषणत्वेन स्थाप्यते वा अपोह्यते—निराक्रियते, तदा द्विधा—स्थापनापोहनभेदात् द्विप्रकारा, एकावली स्यात्। अत्र कौस्तुभलक्षणं यथा—"प्रथमं विशेषणं यद्विशेष्यमग्रे भवत्यसकृत्। विरहप्रतियोगी वा तद्वानेकावली सोक्ता॥" इति। यत्र प्रथमं विशेषणीभूतस्य पश्चात् विशेष्यत्वं, सा एका, यत्र च प्रथमतोऽभाव-प्रतियोगिनः अन्यप्रतियोगिकाभावाधिकरणत्वं साऽपरेति द्विविधैकावली इति।

(ढ) सर इति।—यत्र—शरदि इत्यर्थः, सरः,—सरोवरः, विकसितानि—प्रस्फुटानि, अम्भोजानि—पद्मानि यस्मिन् तथोक्तम्, अम्भोजं भृङ्गैः,—भ्रमरैः, सङ्गतं—युक्तं, भृङ्गाः,—भ्रमराः, ससङ्गीताः,—सङ्गीतशालिनः, सङ्गीतं स्मरस्य—कामस्य, उदयः स्मरोदयः तेन सहितं, कामवृद्धिकरमित्यर्थः। अत्र अम्भोजभृङ्गसङ्गीतानि उत्तरोत्तरत्र विशेष्याणि पूर्वपूर्वेषु सरोऽम्भोजभृङ्गेषु विशेषणत्वेनोपन्यस्तानि इति बोध्यम्। पथ्यावक्त्रं छन्दः। यथा वा—"प्रचिताः कर्मारम्भाः नियतविपाकानि कर्माणि। अतिविषमाश्च विपाका वैषम्यं दुःसहं तेषाम्॥" इति।

(ण) नेति।—तत् जलं न, आसीदिति शेषः, यत्—जलं, सुचारूणि—सुललि-तानि, पङ्कजानि यस्मिन् तथाभूतं, न, तत् पङ्कजं—पद्मं, न, यत् अलीनाः,—न लीनाः, सौरभमुग्धतया अनुड्डीयमानाः स्थिताः इति यावत्, षट्पदाः,—भ्रमराः,

क्वचित् (त) विशेष्यमपि यथोत्तरं विशेषणतया न्यूनाधिकत्वेन प्रयोजितमपोहितञ्च दृश्यते। यथा—

"वाप्यो भवन्ति विमलाः स्फुटन्ति कमलानि वापीषु।
कमलेषु पतन्त्यलयः करोति सङ्गीतमलिषु पदम्॥" (थ)

एवमपोहनेऽपि। (द)

("स्थिरैकपुष्पस्थितषट्पदाम्भसराशयः" इत्यमरः) यत्र तादृशम्, अतो षट्पदो न, यः अलं—नपुरं, न जुगुञ्ज—गुञ्जनं चकार, तत् गुञ्जितं न, यत्—गुञ्जितं, मनः न जहार। अत्र पङ्कजषट्पदगुञ्जितानि उत्तरोत्तरविशेष्याणि पूर्वपूर्वेषु जलपङ्कजषट्पदेषु विशेषणबलेन अपोहितानि। वंशस्थविलं वृत्तम्। इदं भट्टिकाव्यस्थं पद्यम्। अत्र कौस्तुभकाराशयः,—"यत्र पूर्वपूर्वस्मादुत्तरोत्तरं प्रति विशेष्यत्वरूपभेदे उत्तरोत्तरविशेषणस्य न्यूनत्वापोहकत्वाभ्यां हेतुभ्यं, (स्वसम्बन्धेन विशेष्यतावच्छेदकनियामकत्वं न्यूनत्वं, स्वव्यतिरेकेण विशेष्यतावच्छेदकव्यतिरेकबुद्धिजनकत्वमपोहकत्वम्) तदनुकूलोदाहरणे यथा—"स पण्डितो यः स्खलितायदर्शी हितेषु तत् यत्र परानपेक्षिया। परे च ते ये स्थितसाधुभावाः सा साधुता यत्र चलाश्चि केशवः॥" "नार्थः स यो न स्खलितं क्षमीयते न तच्चितं यत्र परानुरोधनम्। न ते परे ये न हि साधुतास्थिता न साधुता सा हि न यत्र माधवः॥" इति; अत्राद्ये हितार्थदर्शनस्य पाण्डित्यरूपविशेष्यतावच्छेदकनियामकत्वं, हितार्थे च हितावेक्षव्यतिरेकेणार्थत्वव्यतिरेकाभिधानम् इति, तन्न; "न तज्जलम्—" इत्यादौ उदाहृतेऽव्याप्तेः, तत्र तत्तरविशेष्यतावच्छेदकनियामकतायाः स्वव्यतिरेकेण विशेष्यतावच्छेदकव्यतिरेकप्रयोजकतायाश्चाभावात्; न हि पङ्कजव्यतिरेकेण जलत्वाभावे तात्पर्यं, किन्तु जलत्वावच्छेदेन पङ्कजायोगव्यतिरेक एव, अरत्नमयपरे श्लोके तथैव तात्पर्यावगमात्" इति ज्ञेयम्।

(त) प्रकारान्तरेणाप्येषामवस्थालङ्कारमाह—क्वचिदिति।

(थ) उदाहरति, वाप्य इति।—वाप्यः,—सरसः, विमलाः भवन्ति, वापीषु कमलानि स्फुटन्ति—विकसन्ति, कमलेषु अलयः,—भ्रमराः, पतन्ति, सङ्गीतम् अलिषु पदं—ध्वानं, करोति, अलयः सङ्गीतं कुर्वन्तीत्यर्थः। उपगीतिश्छन्दः, तल्लक्षणं यथोक्तम्—"आर्याऽपरार्द्धतुल्ये दलद्वये प्राहुरुपगीतिम्" इति।

(द) एवमपोहनेऽपीति।—"पुण्यश्लोकं न सर्वत्र पुण्यश्लोके न लक्षिताः। लक्षितेषु न धर्मोऽस्ति न धर्मे दुःखहेतुता॥" अत्र पूर्वपूर्वेषु विशेष्याः पुण्यश्लोकलक्षितधर्माः परपरेषु लक्षितधर्मदुःखहेतुतासु विशेषणबलेनापोहिताः।

उत्तरोत्तरमुत्कर्षो वस्तुनः सार उच्यते ॥७५२॥(ध)

यथा—"राज्ये सारं वसुधा वसुधायामपि पुरं पुरे सौधम्।
सौधे तल्पं तल्पे वराङ्गनाऽनङ्गसर्वस्वम्॥" (न)

(ध) सारमाह, उत्तरोत्तरमिति।—उत्तरोत्तरं वस्तुनः,—विशेष्यस्य, उत्कर्षः सार उच्यते। केचित्तु—"आश्लोकसमापनमुत्तरोत्तरोत्कर्षेण अयमलङ्कारो भवति, तथात्वे एव वैचित्र्यविशेषप्रतीतेः" इत्याहुः, तन्न; "लोकस्रजि द्यौर्दिवि चादितेया अप्यादितेयेषु महान् महेन्द्रः। किं कर्त्तुमर्थी यदि सोऽपि रागाज्जागर्त्ति कक्षा किमतः पराऽपि॥" इत्यादौ श्लोकार्द्धसमाप्तिपर्य्यन्तमुत्कर्षसत्त्वेनाप्यस्यालङ्कारस्य सम्भवात् इति।

(न) राज्ये इति।—राज्ये—राज्याङ्गे, काननसागरसहितभूतले इति यावत्, वसुधा—पृथिवी, सारं—श्रेष्ठ, वसुधायामपि पुरं—नगरं, सारं, पुरे सौधं—राजमन्दिरं, विविधरुचिरमणिमण्डितं सुधासुन्दरमुन्नतं भवनमिति यावत्, ("सौधोऽस्त्री राजसदनम्" इत्यमरः) सारं, सौधे—सौधवर्त्तिनि, तल्पं—शय्या, सारं, तल्पे—शय्यावर्त्तिनि, अनङ्गस्य—कामस्य, सर्वस्वं—सर्वधनं, वराङ्गना—उत्तमा कान्ता, सारं—सारेत्यर्थः। (एतदनुरूपश्लोको यथा बृहत्संहितायाम्—"जये धरित्र्याः पुरमेव सारं पुरे गृहं सद्मनि चैकदेशः। तत्रापि शय्या शयने वरा स्त्री रत्नोज्ज्वला राज्यमुखस्य सारः॥" इति। जये—उत्कर्षविषये) [सर्वत्र निर्द्धारणे सप्तमी, एतदनुरोधेनैव राज्यादिपदानां मुख्यार्थपरित्यागः। तदुपादाने तु सामान्यविशेषभावाभावान्निर्द्धारणे सप्तमी न स्यात्, न हि भवति घटेषु पटः सुन्दर इति। अत्र क्लीवाक्लीवयोः क्लीवः स चैकवद्वेति एकशेषेण क्लीवत्वमुपपन्नम्] यद्वा—राज्ये वसुधा सारं वस्तु इत्यर्थः, अथवा—राज्ये वसुधा सारं—धनं, तद्वदुपादेयमित्यर्थः, (तथा च मेदिनी—"सारो बले स्थिरांशे च यज्ञे पुंसि धने जले। न्याय्ये क्लीवं त्रिषु वरे" इति) केचित्तु—"राज्ये—राजत्वविषये, यानि वस्तूनि तेषु वसुधा सारम्। [वसुधायामित्यादौ अधिकरणे सप्तमी] वसुधायां यानि वस्तूनि सन्ति तेषु पुरं सारम्; एवमग्रेऽपि। [सर्वत्र तेष्विति निर्द्धारणे सप्तमी। राजत्वस्याधिकरणत्वासम्भवात् विषयत्वविवक्षा। राज्यवसुधादीनां सामान्यविशेषभावाभावेन निर्द्धारणासम्भवात् यानि इत्यादेरध्याहारः। सारस्य रूपस्य विशेषणत्वाभावान्न स्त्रीत्वादि" इत्याहुः, तन्न; धर्मे वेदा इतिवत् राज्ये वसुधेत्यत्र वसुधायाः प्रतिपादकत्वाभावेन

यथासङ्ख्यमनूद्देश उद्दिष्टानां क्रमेण यत् ॥७५३॥ (प)

यथा—

"उत्कीर्यन्ति नखैर्लुनीहि वहति क्षीमाञ्चलेनावृणु
क्रीडाकाननमाविशन्ति वलयक्काणैः समुत्त्रासय।

साम्यलक्षं प्रतिपाद्यलक्षणविषयत्वात्सत्त्वात् यावीत्यध्याहारेण न्यूनपदत्वदोषप्रसङ्गात् सारस्य विशेषणत्वं विशेषोत्कर्षप्रतीतेः सामान्याधिकरण्येन विशेषणविशेष्यभावः कथं-कथकभावसम्भवात्, न हि भवति चन्द्रः सुन्दरमिति। यदि सारपदस्य धनपरत्वं विवक्ष्यते, तदा कथंकथकभावः सम्भवति, उत्कर्षप्रतीतिस्तु व्यञ्जनयेवेति ध्येयम्] केचित्तु—अवज्ञाभेदेनैकस्यैवोत्तरोत्तरोत्कर्षवर्णनेऽपि सारः; यथा—"अम्भोरन्धिमतिक्रम्य क्रीडयैव व्यानम्रीकृतकमलोदरेभकुम्भौ। लीलाभ्रीकटनयनेऽधुना कुचौ ते स्पर्धेते खलु कनकाचलेन सार्धम्॥" अत्र पूर्वपूर्वावज्ञाविशिष्टाभ्यां कुचाभ्यामुत्तरोत्तरावज्ञाविशिष्टयोः तयोरेवोत्कर्षः। एकात्मयी क्रमेणानेकाधेयस्थितिरूपपर्यायस्तु यत्रयत्र प्रतीयते, तथाऽप्युत्कर्षरूपसारस्यापि अनन्यथासिद्धत्वादङ्गीकार इति वदन्ति; तव "प्रथमस्मितकङ्कोरकाभावव लक्ष्मीमनुभूय कन्दुकानाम्। अधुना मयि कुचौ यतेते दयिते ते करिमावकुम्भलीलाम्॥" इति तात्पर्यादाहरणेऽपि उत्तरोत्तरोत्कर्षांनुभवादिग्रेमन्त्र्यः। अयमलङ्कारो वेदेऽपि दृश्यते, तथा च कठवल्लीषु—"इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः॥ महतः परमव्यक्तमव्यक्तात् पुरुषः परः। पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः॥" इति कौसुमभारः। इदं दृष्टम्।

(प) यथासङ्ख्यमलङ्कारमाह, यथासङ्ख्यमिति।—उद्दिष्टानां, वक्ष्यमाणमिति शेषः, वक्ष्यमाणविषयत्वं तेन "ददर्श कण्ठं रामस्य ब्रह्मणो गोदोहनं गतौ। पीतक्षीरावशेषौ मरदत्तुल्यद्युतेर्यथौ॥" इत्यादावव्याप्तिरलङ्कारः ज्ञेयः, क्रमेण किम्—पश्चात्, यत्—य इत्यर्थः, उद्देशः,—क्रमेणं, तत् यथासङ्ख्यम्। व्युत्पत्तिं दर्शयति—उत्—क्रमेण, दिष्टाः,—निर्दिष्टाः उद्दिष्टाः, यत्—पश्चात्, उद्देशः,—निर्देशः अनुद्देशः, प्रथम प्रतिपादितानामर्थानां पश्चात् प्रतिपादितैः यदैः क्रमेण सम्बन्धः यथासङ्ख्यमिति व्याख्याने। अथैनमेवालङ्कारमाहुः, तथा च वामनः,—"उपनीयोपकाराणां क्रमसम्बन्धः क्रमः," इति।

इत्थं वञ्जुलदधिपानिलकुञ्जकण्ठेषु साङ्केतिक-
व्याहाराः सुभग! त्वदीयविरहे तस्याः सखीनां मिथः॥"(फ)

क्वचिदेकमनेकस्मिन्ननेकं चैकगं क्रमात्।
भवति क्रियते वा चेत् तदा पर्य्याय इष्यते॥७५४॥(ब)

(फ) उन्मीलन्नीति।—दूत्या नायकं प्रत्युक्तिरियम्। हे सुभग! त्वदीय-विरहे तस्याः,—तव कान्तायाः, सखीनां मिथः,—अन्योऽन्यं, वञ्जुलाः,—वकुलाः, दधिपानिलाः,—मलयवाताः, कुञ्जकण्ठाः,—कोकिलाः तेषु, तत्तत्—एवम्प्रकाराः, साङ्केतिकव्याहाराः,—इङ्गितोक्तयः, वर्त्तन्ते इति शेषः, यथा ["वञ्जुलाः" इति आर्द्ध-पदं सङ्केतगम्यम्] उन्मीलन्ति—विकसन्ति, स्फुटन्ति इति यावत्, [इति एकया वञ्जुलान् प्रति उक्ते अपरया] नखैः लुनीहि—छिन्धि, [वञ्जुलमुकुलानीति अर्द्धपदं सङ्केतगम्यम्] [अत्र दधिपानिल इति सङ्केतगम्यम्] वहति [इति एकया दधिपा-निलं प्रति उक्ते अपरया] कोलाहलेन—पटुरवजनप्रान्तेन, तत्र घनत्वादिति भावः, आहृतु—आच्छादय, [अत्र तम् इति सङ्केतगम्यम्] यथा न सखीश्रवणं स्फुटेदिति भावः, [अत्र कुञ्जकण्ठा इति सङ्केतम्] क्रीडाकाननं—विहारोद्यानम्, आविशन्ति—प्रविशन्ति, [इति एकया कोकिलान् प्रति उक्ते अपरया] मलयवातैः,—कङ्कण-ध्वनिभिः, सन्तापय—ताडय, [अत्र तान् कोकिलान् इति सङ्केतम्] येन ते न कुहरवमातन्वीरन्निति भावः, इति उच्यते। वञ्जुलादीनां नामपदेषु नायिकायाः विरहपीडातिशयो भवति इति तत्सखीनामयं साङ्केतिको व्यवहारः, सङ्केतत्वात् योग्यकल्पांशव्याहारः इति बोध्यम्। अत्र उद्दिष्टानां वस्तूनां पश्चात् क्रमेण पुनः-उद्देशः। आर्द्धविक्रीडितं वृत्तम्। अलङ्कारसर्वस्वकारस्तु "उद्दिष्टानामर्थानां क्रमेणानूद्देशो यथासङ्ख्यम्" इति सूत्रयित्वा अत्र त्रिममसङ्ख्यं क्रमसंज्ञयाऽभिदधिरे। तच्च प्राच्यनार्थं च द्विधा।.....प्राच्यं यथासङ्ख्यं यथा—"कञ्जखञ्जिमनयनकलत्रः सुपर्वसदसत्सवाहनाः; शं वः। जलनिधिनिरिकमलच्छा हरिहरकमलासना वदतु॥" .....आर्थं यथा—"त्वावल्लीलसि सप्रतापगरिमस्फूर्जेषदे त्वामिनां देव! त्वय्यवनी-भरवहनभुजे निधायादिते वेधसा। इन्दुः किं घटितः किमेव विहितः पूषा किमुत्पादितं चित्तावज्जनकौ! इयेव किमनौ सृष्टा: कुलस्त्रीव्रतः?"॥ इति।

(ब) पर्य्यायालङ्कारमाह, क्वचिदिति।—क्वचित् एकं, वस्तु इति भावः, क्रमात् अनेकस्मिन्, वस्तुनि इति शेषः, भवति—स्वयं भवति इत्यर्थः, वा क्रियते—

क्रमेण यथा—

"स्खिताः क्षणं पक्ष्मसु ताडिताधराः
पयोधरोत्सेधनिपातचूर्णिताः।
बलीषु तस्याः स्खलिताः प्रपेदिरे
क्रमेण नाभिं प्रथमोदबिन्दवः॥" (भ)

"विचरन्ति विलासिन्यो यत्र श्रोणिभरालसाः।
तृष्णाकाकशिवास्तत्र धावन्त्यरिपुरे तव॥" (म)

परेण क्रियते इति भावः, चेत् तथा क्वचित् अनेकं, वस्तु इति शेषः, क्रमात् एकं भवति वा क्रियते चेत् तदा पर्य्याय इष्यते।

(भ) एकस्य वस्तुनोऽनेकत्र भवनरूपं प्रथमं पर्य्यायमुदाहरति, स्खिता इति।—समाध्यवस्थायां पार्वत्याः शरीरोपरि पतितस्य दृष्टिसलिलस्य स्वभाववर्णनमिदम्। प्रथमे उदबिन्दवः,—दृष्टिसलिलबिन्दवः, ["मन्योदन—" (६।३।६० पा०) इत्यादिना उदकशब्दस्य उदादेशः] तस्याः,—पार्वत्याः इत्यार्थः, पक्ष्मसु—नेत्रलोमसु, क्षणं स्खिताः, ["स्खिताः" इत्यनेन पक्ष्मणामतिस्निग्धत्वं, "क्षणम्" इति स्तोकत्वञ्च गम्यते] ततः ताडिताः,—पतनेन क्लेशिताः, अधराः यैः तथाभूताः, अधरपतिता इत्यर्थः, [एतेन अधरस्य मार्दवं गम्यते] ततः पयोधरयोः,——स्तनयोः, उत्सेधे—उच्छ्राये, निपातेन चूर्णिताः,—स्खलिताः, [एतेन स्तनयोः कादिनं व्यज्यते] ततः बलीषु—त्रिवलीषु, स्खलिताः,—निपतिताः सन्तः, निम्नोन्नतत्वादिति भावः, क्रमेण—आनुपूर्व्येण, [अत्र "त्रिरेव" इति पाठे—त्रिवल्येन, प्रतिबन्धबाहुल्यादिति भावः] नाभिं प्रपेदिरे—प्राप्ताः। [एतेन नाभेः सुगभीरत्वं गम्यते]। अत्र एकं प्रथमोदबिन्दुरूपं वस्तु पक्ष्मादानेकत्र क्रमेण स्वयं भवति। यत्तु मल्लिनाथेन—"अत्र प्रतिपदमर्थवत्त्वात् परिसङ्ख्यालङ्कारः" इत्युक्तं, तदयुक्तम्, "उक्तिविशेषयोः साभिप्रायैः परिकरो मतः" इत्यायुक्त्या विशेष्यपदानां साभिप्रायविशेषणानुगततया उक्तावेव परिकरस्वीकारात्, अत्र च "बिन्दवः" इति विशेष्यपदस्य "ताडिताधराः" इत्यादिविशेषणानां "प्रपेदिरे" इत्यनभिप्रायशून्यत्वात्। वंशस्थविलं वृत्तम्। कुमारसम्भवेऽयं पद्यम।

(म) अनेकस्यैकत्र भवनमुदाहरति, विचरन्तीति।—राजस्तुतिरियम। हे राजन्! इति अध्याहार्य्यं, तव अरिपुरे—शत्रुनगरे, यत्र श्रोणिभरेण—नितम्बभारेण, अलसाः,—मन्थरगामिन्यः, विलासिन्यः विचरन्ति, तत्र इदानीं तृष्णाकाकशिवाः,—

"विसृष्टरागादधरान्निवर्त्तितः
स्तनाङ्कुरागाङ्कितताच्च कन्दुकात्।
कुशाङ्कुरादानपरिक्षताङ्गुलिः
कृतोऽक्षसूत्रप्रणयी तया करः॥" (य)

ययोरारोपितस्तारो हारस्तेऽरिवधूजनैः।
निधीयन्ते तयोः स्थूलाः स्तनयोरश्रुबिन्दवः॥" (र)

एषु च क्वचिदाधारः संहतरूपोऽसंहतरूपश्च, क्वचिदाधेयमपि। यथा—"स्थिताः क्षणम्—" इत्यत्र उदबिन्दवः पद्मादौ असंहतरूपे आधारे क्रमेण अभवन्। "विचरन्ति—" इत्यत्र आधेयभूता हंसादयः संहतरूपारिपुरे क्रमेण अभवन्। एव-

आर्द्रखण्डायखण्डमणालाः, विचरन्ति, तव अरयो निधनात् तन्नगरं वनीभूतमिति भावः। अत्र एकस्मिन्नरिपुरे विलासिनीनां हंसादीनां नानेतानां क्रमेण भवनम् इति श्लेषम्। पद्यावली छन्दः।

(य) एकस्यानेनैव करस्यमुदाहरति, विसृष्टेति।—तया—पार्वत्या इत्यर्थः, विसृष्टः,—त्यक्तः, व्रतविरुद्धत्वादिति भावः, रागः,—रक्तं यत्र तथोक्तात्, अधरात्—अधरोष्ठात्, निवर्त्तितः,—परावर्त्तितः, रागक्रियायोगेन निष्पीडनत्वादिति भावः, तथा स्तनयोरङ्कुरागेण अङ्कितात्—रक्तीकृतात्, पतनसमये तस्य स्तनयोः उपरोधादिति भावः, कन्दुकात् च, निवर्त्तितः इति शेषः, करः,—पाणिः, इदानीं कुशाङ्कुरादानेन—ग्रहणेन, परिक्षताः,—व्रणिताः, अङ्गुलयः यस्य तादृशः, तथा अक्षसूत्रप्रणयी—जपमालानिरतः, कृतः। अत्र एकः करः तपसः पूर्वं रागदानार्थमधरे, क्रीडार्थं कन्दुके कृतः, तपःकाले तु कुशाङ्कुरैरक्षसूत्रे च कृतः इत्ययं क्रमः श्लेषः। वंशस्थविलं छन्दः। कुमारसम्भवखेदं पश्यम्।

(र) अनेनैवैव करस्यमाह, ययोरिति।—ते—तव, अरीणां—शत्रूणां, वध्वः,—स्त्रियः एव जनाः तैः, ययोः,—स्तनयोरिति भावः, तारः,—मुक्तामुक्ताग्रथितः इत्यर्थः, हारः आरोपितः, तयोः,—ताडृशयोः, हारशोभितयोरिति यावत्, स्तनयोः स्थूलाः, पत्यादिनिधनजनितातिशोकादिति भावः, अश्रुबिन्दवः,—नेत्रजलबिन्दवः, निधीयन्ते—सन्धार्यन्ते, निपात्यन्ते इति यावत्, लक्ष्यैति शेषः। अनेनाक्षिजं स्तने पतितत्वे हारस्य तद्गतत्वे अश्रुबिन्दूनां करणम्।

मन्यत्। अत्र चैकस्यानेकत्र क्रमेणैव वृत्तेर्विशेषालङ्काराद्भेदः, विनिमयाभावात् परिवृत्तेः। (ख)

परिवृत्तिर्विनिमयः समन्यूनाधिकैर्भवेत् ॥७५५॥(ग)

क्रमेण उदाहरणम्—

"दत्त्वा कटाक्षमेणाक्ष्णी जग्राह हृदयं मम।
मया तु हृदयं दत्त्वा गृहीतो मदनज्वरः॥"

अत्र प्रथमेऽर्धे समेन, द्वितीयेऽर्धे न्यूनेन। (घ)

"तस्य च प्रवयसो जटायुषः स्वर्गिणः किमिव शोच्यतेऽधुना?।
येन जर्जरकलेवरव्ययात् क्रीतमिन्दुकिरणोज्ज्वलं यशः॥" (ङ)

अत्राधिकेन।

(ख) क्वचिदाधेयेनेति।—संदत्तदयमसंदत्तदयमेति शेषः। ननु द्विविधोऽयं पर्यायः परिवृत्त्यभिन्न एव, पूर्वत्र स्वकीयदयदत्तत्वेन, परत्रैवंवस्तुत्यागानन्तरापरवस्तुग्रहणदत्तत्वेन परिवृत्तिसद्भावात्, अत आह, विनिमयाभावादिति—एकवस्तुत्यागानाधिक्यापरवस्तूपादानरूपस्य विनिमयस्याभावात् इत्यर्थः, परिवृत्तेर्भेद इत्यन्वयः; तथा च, पूर्वत्र वस्तुभेदाभावात् अपरापरवस्तूपादानं प्रत्यन्यवस्तुत्यागस्य निरुक्ताभावात् पर्यायेऽस्मिन् परिवृत्त्यभेदसम्भावना नास्तीति भावः।

(ग) परिवृत्त्यलङ्कारमाह, परिवृत्तिरिति।—समन्यूनाधिकैः, वस्तुभिरिति शेषः, विनिमयः,—किमपि विसृज्य तत्सदृशमपि यद्ग्रहणमित्यर्थः, परिवृत्तिः भवेत्। अत्राशयः,—समेन समस्य, न्यूनेनोत्तमस्य, उत्तमेन न्यूनस्य च विनिमये तेषां परिवृत्तिः। येषां मते न्यूनेन न्यूनस्य विनिमयः, तेषामिदमुदाहरणम्—"यत्किमाकाशमौक्तिकं दत्त्वा मुक्ताफलमौक्तिकं तनुम्। गृह्णतां त्वत्परस्त्रीणां को लाभः करभोरु!?" इति समधिकस्यविसदृशताभावात् एतदधीत्यमेवेति शेषम्।

(घ) यत्रेति।—समेन—तुल्येन, कटाक्षहृदययोर्भेदेऽपि उपादेयत्वादिति भावः। न्यूनेन—निकृष्टेन, मदनज्वरस्य मयोत्तमेन हृदयादिकृष्टत्वमिति भावः। यद्वा वा—"वादाय चरणविन्यसनजादियमस्य चरणनर्पणति। उभयोः सदृशविनिमयादात्मानमवचितं मन्ये॥" "आदत्त दीनं मणिमन्यरत्नं दत्त्वा यदर्थे खलु तावधूर्तः। रत्नस्तुवारदुपलि कूटेन तत्याकुशाग्रं रजतं खचेन॥"

(ङ) अधिकेन न्यूनस्य विनिमयात्मानं परिवृत्त्यलङ्कारमुदाहरति, तस्येति।—

प्रश्नादप्रश्नतो वाऽपि कथिताद्दस्तुनो भवेत्।
तादृगन्यव्यपोहश्चेच्छाब्द आर्थोऽथवा तदा॥

परिसङ्ख्या ॥ ७५६ ॥ (स)

क्रमेण उदाहरणम्—"किं भूषणम्? सुदृढमत्र यशो न रत्नं
किं कार्यम्? आर्यचरितं सुकृतं न दीपः।

रानन्दोत्तिरियम्। तत्र प्रश्नतः,—स्वविरक्त, अधुना—उन्मत्ति, स्वर्गिणः,—स्वर्गं गतस्य, जटायुषः,—जटायोः सम्बन्धे, [अत्र सम्बन्धविवक्षया षष्ठीति वक्तव्यम्] विनिमयः—क्षयनिमयः, श्रीयते?—नैव श्रीयोऽसाविति भावः, येन—जटायुषा, जर्जरं—जराजीर्णं, यत् बलीवर्दं तस्य व्यधात्—विनिमयात्, इन्दुश्चिरक्षयवत् उज्ज्वलं यशः श्रीतम्। अयं भावः,—अरीरं अभावतः विनाशधर्मि, तस्मादपि जरया यत्तत् किं क्षयनम्? अतः जरायस्ततया नितान्तं श्रीयत्व अभावतो विनाशधर्मिणः अरीरस्य व्ययेन येन विमलं आप्तमिदञ्च यशः श्रीतं, तस्य विनयः श्रीयः? इति। अत्र अधिकेन वस्तुना यत्तत् न्यूनं वस्तु जराजीर्णं अरीरं परिवर्त्तितम्। रजोदता इत्तं—"यात् परेमंरजसे रजोदता" इति च तल्लक्षणम्। यद्वा वा—"अलाक्षर्ण-इक्षिप्रियवीयक्षाभे सन्ध्याक्षयोल्लेखपरीचितो यः। विक्रीय तं हैक्षिरण्यपिण्डं तारावराटानियमादित स्त्री॥" इति। अत्र स्वर्णपिण्डेन वराटकोपादानात् उत्तमेन न्यूनस्य विनिमय इति।

(स) परिसङ्ख्यालक्षणं, प्रश्नादिति।—प्रश्नात् वा अप्रश्नतः कथितात्—उपादेयत्वेन निर्दीशात्, वस्तुनः शाब्दः,—शब्दप्रतिपाद्यः, अथवा आर्थः,—अर्थबलात् लभ्यः, तादृक्—तादृशः, कथितवद्दस्तुसदृशः, अन्यस्य व्यपोहः,—निराकरणं, चेत्, भवतीति शेषः, तदा परिसङ्ख्या—परिसङ्ख्याभं—वर्जनीयत्वेन बोधनमिति तथोक्ता, भवेत्। ["परिवर्जने" (८।१।५ पा०) इति सूत्रात् परीति वर्जने, "यत् साङ्ख्यैः प्राप्यते स्थानं तत् योगैरपि गम्यते" इति आप्तत्व सङ्ख्याशब्दः प्राप्तार्थकः, तेन परित्याग-बुद्धिः परिसङ्ख्यात्मयः] सा प्रश्नतः प्रश्नपूर्विका अप्रश्नपूर्विकेति द्विप्रकारा, आप्तत्वार्थत्वप्रकाराभ्यां पुनः प्रत्येकं द्विप्रकारेति तस्याः चतुर्विधत्वम्। अस्याः चमत्कारत्वविषयता अविप्रतिपत्त्यादितान्यतरप्रतिषेधे एव इति, तेन "यस्य पञ्चनखाः भक्ष्याः चर्मतः परिकीर्त्तिताः। गोधा कूर्मः शशः खड्गी अत्र्यत्रयेति ते मृताः॥" इत्यादौ तु नायं चमत्कारत्वमिति।

किं चक्षुरप्रतिहतम्? धिषणा न नेत्रं
जानाति कस्त्वदपरः सदसद्विवेकम्?"॥ (ङ)

अत्र व्यवच्छेद्यं रत्नादि शाब्दम्।

"किमाराध्यं सदा? पुण्यं कश्च सेव्यः? सदागमः।
को ध्येयः? भगवान् विष्णुः किं काम्यम्? परमं पदम्॥"(क)

(ङ) वाच्यव्यपोह्यां प्रश्नपरिसङ्ख्यामाह, किमिति।—उक्तिप्रत्युक्ती। अत्र—जगति इत्यर्थः, सुदृढं—दृढतरम्, अक्षयमित्यर्थः, रत्नस्य भङ्गापहरणादिमत्त्वात् न तथात्वम् इति भावः, भूषणम्—अत्युत्कर्षप्रयोजकं, किम्? (इति प्रश्नः) यशः,—तादृशं सुदृढं भूषणं यश इति भावः, (इत्युत्तरम्) न रत्नम् (इति व्यपोहः)। किं कार्य्यम्? (इति प्रश्नः) आर्य्याणाम् आर्य्यैः,—मन्वादिभिर्वा, चरितं, सुकृतं—सत्कार्य्यं, पुण्यजनकं तपस्यादि इति यावत्, (इत्युत्तरम्) न दोषः,—पापजनकः परदारगमनादिरूपः, कार्य्यः इति लिङ्गविपरिणामेन योज्यम्; (इति व्यपोहः) [आर्य्यचरितं दुष्टमपि भवति, किन्तु तन्नानुकरणीयम्, अत एवोक्तं—"धर्मव्यतिक्रमो दृष्ट ईश्वराणाञ्च साहसम्। तेजीयसां न दोषाय वह्नेः सर्वभुजो यथा॥" (भाग० १०।३३।२९) इति]। अप्रतिहतं—दिव्यं, सर्वतोदर्शीति यावत्, चक्षुः,—नेत्रम्, उत्कृष्टज्ञानसाधनमिति समुदयार्थः, किम्? (इति प्रश्नः) धिषणा—बुद्धिः, अप्रतिहतं चक्षुरिति शेषः, (इत्युत्तरम्) नेत्रं न, तस्यावकरप्रतिहन्यमानत्वात्, (इति व्यपोहः) नेत्रस्य असम्यग्दर्शनमप्याह—"गावो घ्राणेन पश्यन्ति शास्त्रैः पश्यन्ति पण्डिताः। चारैः पश्यन्ति राजानश्चक्षुर्भ्यामितरे जनाः॥" इति। नैषधेऽपि—"सविधेऽपि न सूक्ष्मसाक्षिणी वदनालङ्कृतिमात्रमक्षिणी" इति। इत्येवमुत्तरं श्रुत्वा प्रसन्नः सन् उत्तरदातारं प्रशंसति, त्वदपरः,—भवतोऽन्यः, कः सदसतां विवेकं—याथार्थ्यावधारणं, जानाति? न कोऽपीत्यर्थः, प्रत्युत्तरपरितुष्टस्य प्रश्नकर्त्तुः वकस्य प्रत्युत्तरयितृप्रशंसेयम्; यद्वा—स्वस्यैवोत्तरमभिप्रेत्य प्रश्नान्तरमाह, जानातीति।—सदसद्विवेकं को जानातीति प्रश्नः [तदभिप्रायबोधेन रुष्टस्योत्तरमिदं, त्वदपर इति—त्वं तु न जानासीति अर्थव्यपोहोऽत्र बोध्यः। केचित्तु—"तदपरः" इति पाठं कल्पयित्वा "धिषणाया अपरः" इति व्याचक्षते, तन्न; धिषणाप्रशंसायां जानातीत्यन्वयापत्तेः] वसन्ततिलकं वृत्तम्।

(क) प्रतीयमानव्यपोह्यां प्रश्नपरिसङ्ख्यामाह, किमिति।—उक्तिप्रत्युक्ती। सदा किम् आराध्यम्?—अनुष्ठेयम्? कार्य्यमित्यर्थः, (इति प्रश्नः) पुण्यं, कार्य्यमिति

अत्र व्यवच्छेद्यं पापाद्यार्थम्। अनयोः प्रश्नपूर्वकत्वम्। अप्रश्नपूर्वकत्वे यथा—

"भक्तिर्भवे न विभवे व्यसनं शास्त्रे न युवतिकामास्त्रे।
चिन्ता यशसि न वपुषि प्रायः परिदृश्यते महताम्॥"(ख)

"बलमार्त्तभयोपशान्तये विदुषां सम्मतये बहु श्रुतम्।
वसु तस्य न केवलं विभोर्गुणवत्ताऽपि परप्रयोजनम्॥" (ग)

श्रेयः, (इत्युत्तरम्) न पापं, नरकसाधनत्वात् (इति व्यपोहः)। कथं सेव्यः? (इति प्रश्नः) सदागमः,—सच्छास्त्रं, सत्समागमो वा, सेव्य इति श्रेयः, (इत्युत्तरम्) नासत्समागमः, पापसाधनत्वात् (इति व्यपोहः)। कः श्रेयः?—चिन्तनीयः? (इति प्रश्नः) भगवान् विष्णुः, श्रेय इति श्रेयः, (इत्युत्तरम्) धनं न, मद्य-प्रमादादिसाधनत्वादिति भावः (इति व्यपोहः)। किं काम्यम्?—वाञ्छनीयम्? (इति प्रश्नः) परमं पदं—मुक्तिपदं, वाञ्छनीयमिति श्रेयः, (इत्युत्तरम्) न स्वर्गादिकं, पुण्यक्षये स्वर्गच्युतिसम्भवात् इति श्रेयम् (इति व्यपोहः)।

(ख) वाच्यव्यपोह्यामप्रश्नपरिसङ्ख्यानाह, भक्तिरिति।—महतां, जनानामिति श्रेयः, प्रायः,—बाहुल्येन, भवे—श्रिये, ("भव-हरौ भवौ" इत्यमरः) भक्तिः,—प्रेम, परिदृश्यते—प्रतीयते, न विभवे—सम्पदि; शास्त्रे—शास्त्राभ्यासे, व्यसनम्—आसक्तिः, अनुशीलनमित्यर्थः, (सर्वत्र "परिदृश्यते" इति क्रियापदं योजनीयम्) युवतिरेव कामस्य अस्त्रं तस्मिन् न; यद्वा—युवतीनां कामास्त्रं—मधुरवचनमयत्वादि, तत्रेत्यर्थः, न व्यसनमिति श्रेयः; यशसि—ख्यातौ, चिन्ता, न वपुषि—शरीरे। अत्र महतां कुत्र भक्तिर्दृश्यते इत्यादिप्रश्नाभावः। आर्य्या इत्तम्। यथा वा—"दानेन पाणिर्न तु कङ्कणेन स्नानं सुतेनैव न कुङ्कुमेन। विभाति कायः करुणापराणां परोपकारैर्न तु चन्दनेन॥" इति।

(ग) प्रतीयमानव्यपोह्यामप्रश्नपरिसङ्ख्यानाह, बलमिति।—तस्य विभोः,—अनन्तस्येत्यर्थः, बलम् आर्त्तानां—विपन्नानां, भयस्य उपशान्तये—नाशाय, न तु परपीडनायेति भावः, बहुश्रुतं—शास्त्रज्ञानं, विदुषां—पण्डितानां, सम्मतये—सत्कृतये, सम्मानाय इत्यर्थः, न तु विवादाय इति भावः, वसु—धनं, केवलं न परप्रयोजनं, गुण-वत्ताऽपि—दयादाक्षिण्यादिगुणशालित्वमपि, परप्रयोजना—परेषां प्रयोजनानु-रोधिनीत्यर्थः, न तु स्वार्थपरेति भावः। अत्रापि किमर्थं तस्य बलमित्यादिप्रश्ना-

श्लेषमूलत्वे च अस्य वैचित्र्यविशेषः । यथा—

"यस्मिंश्च राजनि जितजगति पालयति महीं चित्रकर्मसु वर्णसङ्कराः, चापेषु गुणच्छेदाः" इत्यादि । (घ)

उत्तरं प्रश्नस्योत्तरादुन्नयो यदि ।
यच्चासकृदसम्भाव्यं सत्यपि प्रश्न उत्तरम् ॥७५७॥ (ङ)

यथा मम—"वीक्षितुं न क्षमा श्वश्रूः स्वामी दूरतरं गतः ।
अहमेकाकिनी बाला तवेह वसतिः कुतः ?" ॥(च)

अनेन पथिकस्य वसतियाचनं प्रतीयते ।

भावः । अत्र सुन्दरी वृत्तम्—"अयुजोर्यदि सौ जगौ युजोः सभरा ल्गौ यदि सुन्दरी तदा" इति तल्लक्षणात् । रघुवंशस्येदं पद्यम् ।

(घ) यस्मिंश्चेति ।—जितं जगत् येन तथाभूते, यस्मिन् राजनि—शूद्रकाख्ये, महीं—पृथ्वीं, पालयति—शासति सति, चित्रकर्मसु—आलेख्यव्यापारेषु, वर्णानां—रञ्जनद्रव्याणां, सङ्कराः,—समावेशाः, न तु मनुष्येषु वर्णानां ब्राह्मणादीनां सङ्कराः,—सङ्करोत्पत्तिरिति भावः, चापेषु—धनुःषु, गुणानां—मौर्व्वीणां, छेदाः, न तु जनेषु गुणानां—दयादाक्षिण्यादीनां विच्छेदा इति भावः । इदं कादम्बर्य्याः । यथा वा—"कौटिल्यं कचनिचये करचरणाधरदलेषु रागस्ते । काठिन्यं कुचयुगले तरलत्वं नेत्रयोर्वसति ॥" इति ।

(ङ) उत्तरमाह, उत्तरमिति ।—उत्तरात्—उत्तरवाक्यात्, यदि प्रश्नस्य उन्नयः,—आगमः, प्रतीयमानत्वम् इत्यर्थः, स्यात्, यद्वा—सत्यपि—विद्यमानेऽपि, प्रश्ने असकृत्—पुनः पुनः, [एतत् प्रश्ने उत्तरे चान्वेति] असम्भाव्यं—पूर्वं मनसा अनिश्चितं, लोकप्रसिद्धिगम्यम् अतिविचित्रमित्यर्थः, यत् उत्तरं स्यात्, तत् उत्तरम्—उत्तरनामालङ्कारः । अत्रैवं बोध्यं, तथा हि, असति प्रश्ने उत्तरात् प्रश्नस्य कल्पनं चेदेकमुत्तरम्, एवमसकृत्प्रश्ने सम्भावनानर्हं यदसकृदुत्तरं तदपरमुत्तरम्, एष द्विप्रकारकोऽपि प्रश्नोत्तरयोरेकस्योभयोश्चापि सप्रयोजनत्वनिष्प्रयोजनत्वाभ्यां चतुष्प्रकार इत्यष्टप्रकारताऽस्य ज्ञेया ।

(च) वीक्षितुमिति ।—पथिकं प्रति कस्याश्चिदुक्तिः । श्वश्रूः,—स्वामिजननी, वीक्षितुं—द्रष्टुं, न क्षमा—न शक्ता, अन्वेति यावत्, स्वामी—भर्त्ता, दूरतरम्—अतिदूरं, गतः, तस्यागमनमपि न सम्भवतीति भावः, बाला—मुग्धा, अप्रगल्भा

"का विसमा ? देव्वगई किं लद्धव्वं ? जणो गुणग्गाही।
किं सोक्खं ? सुकलत्तं किं दुग्गेज्झं ? खलो लोओ ॥" (छ)

अत्र अन्यव्यपोहे तात्पर्य्याभावात् परिसङ्ख्यातो भेदः। न चेदमनुमानं, साध्यसाधनयोर्द्वयोर्निर्देशे एव तस्याङ्गीकारात्; न च काव्यलिङ्गम्, (ज) उत्तरस्य प्रश्नं प्रत्यजनकत्वात्।

दण्डापूपिकयाऽन्यार्थागमोऽर्थापत्तिरिष्यते ॥७५८॥(झ)

इति यावत्, अहम् एकाकिनी, अतः तव इह वसतिः,—अवस्थानं, कुतः,—कथम् ? स्यादिति शेषः। अत्र उत्तरवाक्येन पथिकः पूर्वं वसत्यर्थं प्रार्थितवानिति प्रश्नस्य उन्नयः। यथा वा—"एकाकिनी यदबला तरुणी तथाऽहमस्मद्गृहे गृहपतिश्च गतो विदेशम्। कं याचसे तदिह वासमियं वराकी श्वश्रूर्ममान्धबधिरा ननु मूढ पान्थ ! ॥" इति, अत्रापि मम वासो दीयतामिति प्रश्नः उत्तरादुन्नीयते इति ज्ञेयम्।

(छ) का विसमा इति।—["का विषमा ? दैवगतिः किं लब्धव्यम् ? जनो गुणग्राही। किं सौख्यम् ? सुकलत्रं किं दुर्ग्राह्यम् ? खलो लोकः ॥" इति संस्कृतम्]। विषमा—विसदृशी, का ? दैवगतिः। किं लब्धव्यम् ?—प्राप्तव्यम् ? गुणग्राही जनः। सौख्य—सुखसाधनं, किम् ? सुकलत्रं—साध्वी भार्य्येत्यर्थः। दुर्ग्राह्यम्—अ-वश्यं, किम् ? खलः लोकः,—दुर्जन इत्यर्थः।

(ज) इह प्रतीयमानव्यपोह्यायाः प्रश्नपरिसङ्ख्यायाः प्रसक्तिं वारयति, अत्रेति।—अन्यव्यपोहे—अन्यस्य व्यवच्छेदे, तात्पर्य्याभावात्—वक्तुरभिप्रायासद्भावात्। ननु "वीक्षितुं न क्षमा" इत्यादावुत्तरात् प्रश्नानुमानमिति अनुमानालङ्कार एवायमित्यत आह—न चेदमिति। ननु उत्तरेण प्रश्न कल्प्यं चेत् तर्हि हेतुताया उत्तरवाक्ये व्यङ्ग्यत्वेन काव्यलिङ्गालङ्कार एव स्यात्, अत आह—न चेति।

(झ) अर्थापत्तिमाह, दण्डेति।—दण्डापूपिकया—दण्डापूपौ विद्येते यत्र सा दण्डापूपिका, ["अत इनिठनौ" (५।२।११५ पा०) इति ठन्] यद्वा—दण्डापूपयोर्भाव इति, ["इन्द्वमनोज्ञादिभ्यश्च" (५।१।१३३ पा०) इति वुञ्। "पृषोदरादीनि यथोपदिष्टम्" (६।३।१०९ पा०) इति वृद्ध्यभावः] अथवा—दण्डापूपाविवेति दण्डापूपिका, ["इवे प्रतिकृतौ" (५।३।९६ पा०) इति कन्] तया, कैमुतिकन्यायेनेत्यर्थः, अन्यस्य अर्थस्य आगमः,—उपस्थितिः, भिन्नार्थप्रतीतिरित्यर्थः, अर्थापत्तिः इष्यते।

"मूषिकेण दण्डो भक्षितः" इत्यनेन तत्सहचरितमपूपभक्षणमर्थादायातं भवतीति नियतसमानन्यायादर्थान्तरमापततीत्येष न्यायो दण्डापूपिका। (ञ) अत्र च क्वचित् प्राकरणिकादर्थादप्राकरणिकस्यार्थस्यापतनं, क्वचिदप्राकरणिकार्थात् प्राकरणिकार्थस्येति द्वौ भेदौ। क्रमेण उदाहरणम्—

"हारोऽयं हरिणाक्षीणां लुठति स्तनमण्डले।
मुक्तानामप्यवस्थेयं के वयं स्मरकिङ्कराः?" ॥ (ट)

"विललाप स वाष्पगद्गदं सहजामप्यपहाय धीरताम्।
अभितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिषु?" ॥ (ठ)

(ञ) दण्डापूपन्यायमाह, मूषिकेणेति।—इतिशब्दो हेतौ, अनेन—मूषिकेण, तत्सहचरितं—दण्डभक्षणसहचरितम्, अर्थात्—औचित्यात्, आयातम्—अवगतं, भवतीत्यनन्तरं "वदन्त्यत्रापि" इति पूरणीयम्। नियतेति।—नियतः,—निश्चितः, सिद्धान्तित इति यावत्, यः समानन्यायः तस्मात्—तुल्यनयादित्यर्थः, आपतति—आगच्छति; यद्वा—नियतस्य—तद्वत्त्वेन निश्चितस्य, समानन्यायात्—तुल्यसामर्थ्यात्, अर्थात्, न तु शब्दादिति भावः, आपतति—प्रतीतिविषयो भवति, मूषिकस्य हि दण्डभक्षणं दुष्करं, तन्निष्पत्तौ तत्सहचरितापूपभक्षणमतिसुकरत्वात् यथा सम्भाव्यते, तथा अत्रापि सहचरितैकसिद्धेरपरसिद्धिरौचित्यात् सम्भाव्यते इति भावः। न्यायः,—नीतिः।

(ट) हार इति।—अयं हारः हरिणाक्षीणां स्तनमण्डले लुठति, मुक्तानां—मौक्तिकानां, हारघटकरत्नविशेषाणां, [निवृत्तसंसारदुःखानाञ्च मुक्तिपथावलम्बिनामिति ध्वनिः] अपि (यदा) इयम् अवस्था—दशा, (तदा) स्मरस्य—कामस्य, किङ्कराः वयं के? अत्र मुक्तानां तावत् योषिदालिङ्गनं दुर्घटं, तन्निष्पत्तौ अमुक्तानामस्माकं सुतरां तत् स्यात् इति पुंस्त्वमत्र समानो धर्मः। मुक्तानां वर्णनीयत्वेन प्राकरणिकत्वम् इति बोध्यम्। यथा वा—"पशुपतिरपि तान्यहानि कृच्छ्रादगमयदद्रिसुतासमागमोत्कः। कमपरमवशं न विप्रकुर्य्युर्विभुमपि तं यदमी स्पृशन्ति भावाः?" ॥ इति। अत्र विभुवृत्तः प्राकरणिको लोकवृत्तान्तमप्राकरणिकमर्थादाक्षिपति इति ज्ञेयम्।

(ठ) विललापेति।—सः,—अजः, सहजां—स्वाभाविकीम्, अपि धीरताम्

अत्र च समानन्यायस्य श्लेषमूलत्वे वैचित्र्यविशेषो यथोदाहृते "हारोऽयम्—" इत्यादौ। न चेदमनुमानं, समानन्यायस्य सम्बन्धरूपत्वाभावात्। (ड)

विकल्पस्तुल्यबलयोर्विरोधश्चातुरीयुतः ॥७५९॥ (ढ)

यथा—"नम्यन्तां शिरांसि धनूंषि वा, कर्णपूरीक्रियन्तामाज्ञाः मौर्व्यो वा।"(ण) अत्र शिरसां धनुषाञ्च नमनयोः सन्धि-

---

अपहाय—परित्यज्य, वाष्पगद्गदं यथा तथा विललाप, तथा हि, अभितप्तं—सन्तप्तम्, अयोऽपि—लौहमपि, मार्दवं भजते, शरीरिषु—देहिषु, कोमलेषु इति भावः, कैव कथा? अत्र अप्राकरणिकात् लौहद्रवीभावात् अयसो वर्णनीयत्वाभावात् अप्राकरणिकत्वं, प्राकरणिकस्य शरीरिद्रवस्यापतनम्। सुन्दरी वृत्तं, तल्लक्षणञ्च यथोक्तम्—"अयुजोर्यदि सौ जगौ युजोः सभरा ल्गौ यदि सुन्दरी तदा" इति। रघुवंशस्येदं पद्यम्। यथा वा—"धृतधनुषि बाहुशालिनि शैला न नमन्ति यत्तदाश्चर्य्यम्। रिपुसंज्ञकेषु गणना केव वराकेषु काकेषु?" ॥ इति। अत्रापि शैलवृत्तान्तः अप्राकरणिकः रिपुवृत्तान्तं प्राकरणिकम् अर्थादाक्षिपति इति बोध्यम्।

(ड) समानन्यायस्येति।—द्रव्यत्वमत्र समानो धर्मः, सम्बन्धरूपत्वाभावात्—व्याप्तिरूपत्वाभावात् इत्यर्थः, व्याप्तिश्च ज्ञाप्यज्ञापकयोः अव्यभिचरितसामानाधिकरण्यरूपः, प्रकृते तु एकस्य साधर्म्यग्रहेण औचित्यात् तत्समानस्य तादृशधर्मान्तरग्रहो भवति इति ज्ञाप्यज्ञापकयोः व्याप्त्यसम्भवादिति भावः।

(ढ) विकल्पमाह, विकल्प इति।—तुल्यं बलं ययोः तादृशयोः, वस्तुनोरिति शेषः, (तुल्यबलत्वं तत्तदुदाहरणे यथायथं बोध्यम्) चातुरीयुतः,—वैचित्र्ययुक्तः, विरोधः,—अर्थतोऽलङ्कारादेः चारुता वैचित्र्यं यदि स्यात् इत्यर्थः, विकल्पः। ["विरोधश्चान्तरा यतः" इति पाठस्तु न सम्यक्, अर्थासङ्गतेः। "चातुरी यतः" इति पाठे तु—यतः,—विरोधात्, चातुरी—वैचित्र्यं, स विकल्प इत्यर्थः]।

(ण) नम्यन्तामिति।—बलवद्युयुत्सोरुक्तिरियम्। शिरांसि धनूंषि वा नम्यन्तां—नतैः भूयतां, धनुर्वा गृह्यताम् इत्यर्थः। आज्ञाः,—अस्मदादेशाः, मौर्व्यः,—धनुर्गुणाः वा, कर्णपूरीक्रियन्तां—कर्णभूषणसदृशीक्रियन्तां, कर्णसङ्गतीक्रियन्तामिति यावत्, अरिभिरिति कर्तृपदमत्रोह्यम्।

विग्रहोपलक्षणत्वात् सन्धिविग्रहयोश्चैकदा कर्त्तव्यताऽसम्भवात् विरोधः, स च एकपक्षाश्रयणपर्य्यवसानः। तुल्यबलत्वञ्चात्र धनुःशिरोनमनयोर्द्वयोरपि स्पर्द्धया सम्भाव्यमानत्वात्, चातुर्य्यञ्च अत्रौपम्यगर्भत्वेन। एवं "कर्णपूरीक्रियन्ताम्" (त) इत्यत्रापि। एवं—"युष्माकं कुरुतां भवार्त्तिशमनं नेत्रे तनुर्वा हरेः" अत्र श्लेषावष्टम्भेन चारुत्वम्। "दीयतामर्जितं वित्तं देवाय ब्राह्मणाय वा" (थ) इत्यत्र चातुर्य्याभावान्नायमलङ्कारः।

(त) नन्वसमर्थस्य शिरोनमनं, समर्थस्य धनुर्नमनमिति कथं तुल्यबलत्वम्? अत आह, अत्र शिरसामिति।—शिरोनमनं सन्धिलक्षणं धनुर्नमनं विग्रहलक्षणं तदुपलक्षणत्वात्—तद्भावात् इत्यर्थः, सन्धिविग्रहयोर्वैरोच्छेदाय राजाद्यनुष्ठेयत्वात् तुल्यबलत्वम्। विरोधमुपपादयति, सन्धिविग्रहयोरिति।—एकदा—युगपत्, कर्त्तव्यताया असम्भवात्—कर्त्तुमशक्यत्वात्, विरोधः। ननु सर्वत्रोदाहरणे तादृशविरोधो न सम्भवतीत्यत आह, स चेति—विरोधश्चेत्यर्थः, तुल्यबलयोरेकतरस्यैव प्रकृतेऽन्वयः एकपक्षाश्रयणं यस्य स इत्यर्थः, तथा च तुल्यबलयोरेकस्मिन् प्रकृते अनन्वयविरोधः इति परमतात्पर्य्यम्। इदानीं धनुःशिरोनमनयोः यथाकथञ्चित् तुल्यबलत्वमुपपाद्य उपलक्षणं विनैव लक्षणं सङ्गमयति, तुल्यबलत्वमिति।—वक्तुः स्पर्द्धाजन्यसम्भावनाविषयत्वात् इत्यर्थः। चातुर्य्यमिति—वैचित्र्यमित्यर्थः, औपम्यगर्भत्वेनेति।—शिरोनमनस्योत्कटत्वेन धनुर्नमनस्योपमानत्वेन पर्य्यवसानमिति भावः। एवमिति।—आज्ञायाः कर्णपूरीकरणस्य सन्धिलक्षणत्वात्, मौर्व्याः कर्णपूरीकरणस्य विग्रहलक्षणत्वात् तयोर्यौगपद्ये विरोधः, स च एकपक्षाश्रयणपर्य्यवसानः। औपम्यञ्च वैचित्र्याधायकं, तुल्यबलत्वञ्च अत्र उभयोरपि प्रस्तावस्य स्पर्द्धाजन्यत्वादिति बोध्यम्।

(थ) युष्माकमिति।—हरेः,—नारायणस्य, नेत्रे तनुः,—शरीरं वा, युष्माकं भवार्त्तिशमनं—संसारदुःखध्वंसं, कुरुताम्। अस्य पूर्वगतं पादत्रयन्तु—"भक्तिप्रह्वविलोकनप्रणयिनी नीलोत्पलस्पर्द्धिनी ध्यानालम्बनतां समाधिनिरतैर्नीते हितप्राप्तये। लावण्यस्य महानिधी रसिकतां लक्ष्मीदृशोस्तन्वती" इति। अत्र कुरुतामिति पदस्य लोट्विभक्तेः परस्मैपदीयप्रथमपुरुषद्विवचनान्तत्वे नेत्रे इत्यनेनान्वयः, आत्मनेपदीयैकवचनान्तत्वे तनुरित्यनेनान्वयः। नेत्रयोस्तन्वा वा जीवार्त्तिशमनसाधनक्षमत्वेन संसारदुःखमोचने सामर्थ्यात् तुल्यबलत्वं, तयोरेकतरस्यैव भवार्त्तिशमनरूपे प्रकृतकार्य्ये

समुच्चयोऽयमेकस्मिन् सति कार्य्यस्य साधके।
खले कपोतिकान्यायात् तत्करः स्यात् परोऽपि चेत्॥
गुणौ क्रिये वा युगपत् स्यातां यद्वा गुणक्रिये॥७६०॥ (द)

यथा मम—

"हंहो धीरसमीर! हन्त जननं ते चन्दनक्ष्माभृतो
दाक्षिण्यं जगदुत्तरं परिचयो गोदावरीवारिभिः।
प्रत्यङ्गं दहसीति मे त्वमपि चेदुद्दामदावाग्निव-
न्मत्तोऽयं मलिनात्मको वनचरः किं वक्ष्यते कोकिलः?"॥ (ध)

हेतुत्वेनान्वयः, न तु समुच्चयवदुभयोः इति विरोधः। श्लेषावष्टम्भेन—श्लेषानुकूल्येन। "पतत्यविरतं वारि नृत्यन्ति शिखिनो मुदा। अद्य कान्तः कृतान्तो वा दुःखस्यान्तं करिष्यति॥" अत्र विप्रलम्भशृङ्गारावष्टम्भेन चारुत्वम्, एवमन्यत्रापि यथायथं चारुत्वमवगन्तव्यम्। चारुतार्थत इति यदुक्तं तस्य व्यावृत्तिमाह, दीयतामिति।—अत्र देवब्राह्मणयोरुत्तमपात्रत्वेन तुल्यबलत्वं, प्रकृते दाने एकतरस्यैव सम्बन्धः, न तूभयोः इत्यस्ति विरोधः इति बोध्यम्।

(द) समुच्चयमाह, समुच्चय इति।—एकस्मिन्—वस्तुनि इत्यर्थः, कार्य्यस्य—प्रक्रान्तस्य इति भावः, साधके—निष्पादके सति, खले—धान्यादिमर्दनस्थाने, कपोतिकान्यायात् परोऽपि—अन्योऽपि, चेत् तत्करः,—तस्य कार्य्यस्य सम्पादकः, स्यात्, तदा समुच्चयः; अयं भावः,—खलं—धान्यकणमर्दनस्थानं, तत्र यथा वृद्धा युवानः शिशवः कपोताः भक्षणार्थम् एकदैव निपतन्ति, तथा एककार्य्यानुष्ठानार्थं यत्र समकालमनेकेषामुपस्थापनं, तत्र तमर्थं बोधयितुं प्रवृत्ता नीतिः "खले कपोतिका" इति गीयते। प्रकारान्तरेण समुच्चयालङ्कारमाह, गुणाविति।—वा—अथवा, गुणौ—गुणद्वयं, [गुणश्च क्रियाभिन्नधर्ममात्रम्] वा क्रिये—क्रियाद्वयं, [क्रिया धात्वर्थरूपा] युगपत् स्याताम्, अथवा गुणक्रिये—गुणः क्रिया च द्वयं, युगपत् स्यात्, तदाऽपि समुच्चयः; तथा च, खले कपोतिकानीत्या यत्र गुणयोः क्रिययोः गुणक्रिययोर्वा युगपत् समुपस्थितिः स समुच्चयः। स च उक्तरीत्या चतुर्विध इति बोध्यम्। स एष समुच्चयः सद्योगेऽसद्योगे सदसद्योगे च भवतीति त्रिधा भिद्यते इति सारः।

(ध) हंहो इति।—विरहिण उक्तिरियम्। हंहो! इति सम्बोधनसूचकमव्ययं,

अत्र दाहे एकस्मिंश्चन्दनक्ष्माभृज्जन्मरूपे कारणे सत्यपि दाक्षिण्यादीनां हेत्वन्तराणामुपादानम्। अत्र सर्वेषामपि हेतूनां शोभनत्वात् सद्योगः। अत्रैव चतुर्थपादे मत्तादीनाम् अशोभनानां योगादसद्योगः। सदसद्योगो (न) यथा—

"शशी दिवसधूसरो गलितयौवना कामिनी
सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः।
प्रभुर्धनपरायणः सततदुर्गतः सज्जनो
नृपाङ्गनगतः खलो मनसि सप्त शल्यानि मे॥" (प)

—हे इत्यर्थः, हे धीरसमीर! हन्तेति खेदसूचकमव्ययं, ते—तव, जननम्—उत्पत्तिः, चन्दनक्ष्माभृतः,—चन्दनपर्वतात्, मलयशैलादित्यर्थः, दाक्षिण्य—सारल्यं, दक्षिणदिग्भवत्वञ्च, जगति उत्तरं—प्रधानं, ख्यातञ्च, परिचयः,—सङ्गः, गोदावरीवारिभिः, इति—एतादृशोऽपि, त्वं चेत्—यदि, उद्दामदावाग्निवत्—उत्कटदावानल इव, मे—मम, प्रत्यङ्गं—सर्वाण्यङ्गानि, दहसि, तदा मत्तः,—गर्वितः, मलिनात्मकः,—मलिनस्वभावः, कृष्णवर्णश्च, वनचरः,—वन्यः, अभद्र इति भावः, अयं कोकिलः किं वक्ष्यते? मयेति शेषः, न किमपि वक्तुं शक्यः कोकिलः, सुतरां दाहजनको भवतीति भावः। यदि महान्तोऽपि परान् बाधन्ते, तदा दुरात्मानः परान् बाधन्ते एव इति किमस्माभिरुच्येत? कथं वा तेऽस्मिन् विषये उपालम्भनीयाः? इति भावः। शार्दूलविक्रीडितं वृत्तम्। अयमर्थापत्त्यलङ्कारसङ्कीर्णः।

(न) अत्र सर्वेषामिति।—सताम्—उपादेयानां कारणानां केवलानां, योगः सद्योगः, तेषामेवानुपादेयानां योगः असद्योगः, उभयमिश्रणे सदसद्योगः इति ज्ञेयम्। तत्र सद्योगे उदाहरणं यथा—"कुलममलिनं भद्रा मूर्त्तिर्मतिः श्रुतिशालिनी भुजबलमलं स्फीता लक्ष्मीः प्रभुत्वमखण्डितम्। प्रकृतिसुभगा एते भावा अमीभिरयं जनो व्रजति सुतरां दर्पं राजन्! त एव तवाङ्कुशाः॥" इति। असद्योगे यथा—"दुर्वाराः स्मरमार्गणाः प्रियतमो दूरे मनोऽत्युत्सुकं गाढ़ प्रेम नवं वयोऽतिकठिनाः प्राणाः कुलं निर्मलम्। स्त्रीत्वं धैर्य्यविरोधि मन्मथसुहृत् कालः कृतान्तोऽक्षमो नो सख्यश्चतुराः कथं नु विरहः सोढ़व्य इत्थं शठः?"॥ इति।

(प) सदसद्योगे उदाहरणं, शशीति।—(१) दिवसे धूसरः,—मलिनः, शशी, (२) गलितं—गतं, यौवनं यस्यास्तादृशी, कामिनी, (३) विगतानि—

इह केचिदाहुः,—"शशिप्रभृतीनां शोभनत्वं खलस्य अशोभनत्वमपि सदसद्योगः" इति। अन्ये तु—"शशिप्रभृतीनां स्वतः शोभनत्वं,धूसरत्वादीनां त्वशोभनत्वम् इति सदसद्योगः"। अत्र हि शशिप्रभृतिषु धूसरादेरत्यन्तमनुचितत्वमिति विच्छित्तिविशेषस्यैव चमत्कारविधायित्वम्। "मनसि सप्त शल्यानि" इति सप्तानामपि शल्यत्वेनोपसंहाराय, "नृपाङ्गनगतः खलः" इति क्रमभेदात् दुष्टत्वमावहति, अत्र विशेष्यस्यैव शोभनत्वेन प्रक्रमादिति। (फ) इह च खले कपोतवत् सर्वेषां कारणानां

नष्टानि, वारिजानि—पद्मानि यस्मात् तादृशं, सरः,—सरोवरः, (४) शोभना आकृतिः यस्य तादृशस्य सुन्दरस्येत्यर्थः, अनक्षरम्—अक्षरशून्यं, वचनाक्षममित्यर्थः, मुखं, (५) धनपरायणः,—धनलुब्धः, अतिलोभेन सदसद्विवेकहीन इत्यर्थः, प्रभुः,—राजा, (६) सततं दुर्गतः,—दुरवस्थः, सज्जनः,—साधुजनः, (७) तथा नृपाङ्गनगतः,—राजसभास्थः इत्यर्थः, खलः,—दुर्जनः, (एतानि) मे मनसि सप्त शल्यानि, दुःखदायकत्वादिति भावः, निखातानीति शेषः। पृथ्वी वृत्तं—"जसौ जसयला वसुसहयतिश्च पृथ्वी गुरुः" इति च तल्लक्षणम्। नीतिशतकस्येदं पद्यम्।

(फ) इह केचिदिति।—अत्र शल्यत्वे एकस्यैव दिवसधूसरशशिनः कारणत्वेऽपि कामिन्यादेर्गलितयौवनत्वादीनां बहूनामुपादानम्। अन्ये त्विति।—शशिप्रभृतीनामिति सज्जनपर्य्यन्तानां, धूसरत्वादीनामिति सततदुर्गतत्वपर्य्यन्तानां ग्रहणम्। खलस्य तु स्वतः अशोभनत्वं, नृपाङ्गनगतत्वस्य शोभनत्वमिति वैपरीत्येन सदसद्योगः। मनोदुःखं प्रति धूसरत्वादिविशिष्टाश्चन्द्रादयः कारणानि, कारणीभूतानां विशेष्याणां विशेषणानाञ्च यथासम्भवं सताम् असताञ्च योग एव सदसद्योग इति भावः। अन्येषां मतमुपपादयति, अत्र हीति।—"विच्छित्तिविशेषस्यैव" इत्येवकारेण मनसीत्यादेर्व्यावृत्तिः। नन्वेतत् निरर्थकम्, अत आह, मनसीति।—तथा च, वाक्यसमाप्तत्वेनैव तत् सार्थकमिति भावः। प्रथममतं दूषयति, नृपाङ्गनगत इति।—विशेष्यस्यैव इत्येवकारेण विशिष्टव्यवच्छेदः, तथा च, अत्र विशेष्यविशेषणयोर्योग एव वैचित्र्यावहः, न तु विशिष्टानां योगः, क्रमभेदरूपदोषावहत्वादिति भावः। अत्र सर्वस्वकाराणामयमभिप्रायः, यथा—शशिनः स्वतः शोभनस्यापि दिवसधूसरत्वात् अशोभनत्वेन सदसतः तादृशैरेव कामिनीप्रभृतिभिः समुच्चयः। न त्वत्र कश्चित्

साहित्येनावतारः। समाध्यलङ्कारे तु एककार्यं प्रति साधके समग्रेऽप्यन्यस्य काकतालीयन्यायेन आपतनमिति भेदः। (ब)

"अरुणे च तरुणि! नयने तव मलिनस्य प्रियस्य मुखम्।
मुखमानतस्य सखि! ते ज्वलितस्याभ्यन्तरे खरज्वलनः॥" (भ)

समुच्चीयमानः शोभनः, अशस्त्रशोभनः इति सदसद्गुणौ व्याख्येयः। ननु "कृपाकृशनतः खलः" इत्यशोभनः, अत्रे तु अशोभना इति कथं समुच्चीयमानस्य सतः साहश्येनासतो योगः? नैतत्, "कृपाकृशनतः खलः" इति प्रस्तुत प्रकाशकत्वात् दृष्टमेव, न तु औत्सर्गिकनिमित्तमिति उपेक्ष्यत्वेनेत्तम्; अत एव अत्रेवेत्यादौ सदसन्निमित्तोऽपि दुष्ट एवेत्युक्तम्; प्रकृते तु कृपाकृशनतत्वेन शोभनत्वं खलत्वेनाशोभनत्वम् इति समर्थनीयम्; एवमपि विशेषणस्य शोभनत्व प्रकाशं, विशेषणस्य त्वशोभनत्वम्, इह तु अन्यथा इति न सर्वथा निरवद्यम् इति।

(क) समाध्यलङ्कारादस्य भेदमाह, इतीति।—खले इति।—खले—खान्यादिचिह्ने, यथा एकस्य कपोतस्य आगमनात् बहवः समापतन्ति, तद्वत् एकस्य कारणस्येऽपि यत्र अन्येषामापतनं, स खले कपोतिकान्याय इति बोध्यम्। साहित्येन—औपयोगेन, मिलितत्वेनेत्यर्थः, अवतारः। काकतालीयन्यायेनेति—काकगमनेन तालपतनमिव याकस्मिकम् अन्यस्य यत्र आपतनं, स काकतालीयन्यायः तेन, अकस्मात्संघटनेनेत्यर्थः, समग्रे—समर्थे, पर्याप्ते इति यावत्, आपतनम्—उपस्थापनम्। यत्र कार्यैविशेषे निमित्तान्येव कारणान्तराणि, स समुच्चयस्य विषयः, यत्र तु एकस्मिन् कारणे फलसाधनाय बलाधानाय दशदुपस्थेन कारणान्तरेण तत्फलस्य दुष्करत्वं, स समाधिरिति भावः।

(ख) गुणक्रियोपयोगे समुच्चयमाह, अत्रेति।—नायिकां प्रति दूत्या उक्तिरियम्। हे तरुणि! तव नयने अरुणे—रक्ते च, इष्टे इति शेषः, तव प्रियस्य मुखं मलिनञ्च, हे सखि! ते—तस्य, मुखम् आनतस्य—तव प्रियस्य, अन्तरे—अन्तर्हि, खरज्वलनः,—खरोग्निः, ज्वलितश्च। च-इयं औपम्यगर्भवाक्यम्। अत्रोद्वोतिस्कन्दः, —"आर्याविपरीतेऽस्मिन् विपरीते पुनरिहोद्वोतिः" इति। यद्वा वा—"यौवनविभूषणेन सनाथं नवदमुद्वहन्ति वा:। नवनीदृशात् यूनां मनांसि दलानि आभूवन्॥" अत्र नवत्वरक्तत्वगुणयोर्योगपद्यं, च-कारेण तदन्विधानात्। क्रिययोर्योगपद्यं यथा वा—"यदेव रोचिष्णुतयैव यूनां मनांसि जातानि। रथ्यासु तदेव कुसुमचत्वराण्यासन्नवृन्दानि॥" अत्र प्रकाशनजननक्रिययोरिति ज्ञेयम्।

अत्राद्येऽर्थे गुणयोर्यौगपद्यं, द्वितीये क्रिययोः। (म) उभयोर्यौगपद्ये यथा—

"कलुषश्च तवाहितेष्वकस्मात्
सितपङ्केरुहसोदरश्रि चक्षुः।
पतितश्च महीपतीन्द्र! तेषां
वपुषि प्रस्फुटमापदां कटाक्षैः॥" (य)

"धुनोति चासिं तनुते च कीर्त्तिम्" इत्यादावेकाधिकरणेऽप्येष दृश्यते। न चात्र दीपकम्। एते हि गुणक्रिययोर्यौगपद्ये समुच्चयप्रकारा नियमेन कार्य्यकारणकालनियमविपर्य्ययरूपातिशयोक्तिमूलाः। (र) दीपकस्य च अतिशयोक्तिमूलत्वाभावः।

(म) अत्रेति।—गुणयोः,—कलुषत्वसितत्वयोरित्यर्थः। क्रिययोः,—आपतनकटाक्षनयोरित्यर्थः।

(य) कलुषमिति।—राजस्तुतिरियम्। महीपतीन्द्र!—हे भूपश्रेष्ठ! तव सितं—शुभ्रं, यत् पङ्केरुहं—पद्मं, तस्य सोदरा—सहजी श्रीर्यस्य तादृशं, चक्षुः चकस्मात् आहितेषु—अरिषु, कलुषञ्च—आविष्टञ्च, रोषकषायितञ्चेत्यर्थः, तेषां—तव आहितानां, वपुषि प्रस्फुटं—सुव्यक्तं यथा तथा, आपदां कटाक्षैः पतितञ्च। अत्र गुणस्य कलुषत्व क्रियायाः पतनस्य च यौगपद्यम्। अत्र वैयाधिकरण्ये एव प्रयोगप्राचुर्यं विश्वनाथविभेदजनकत्वञ्च इति भेदम्। औपच्छन्दसकं हृत्तं—"षड् विषमेऽष्टौ समे यत्राद्यास्य समे द्यूनौ निरन्तराः। न सप्तकत्रयं यत्र सा वैतालीयेऽन्ते रलौ गुरुः॥ तत्रैवान्तेऽर्धके गुरौ स्यादौपच्छन्दसकं कवीन्द्रहृदयम्॥" इति च तल्लक्षणम्। यथा वा—"सञ्जितकज्जलरेखो विम्बाधरः ईक्षितश्च दयितश्च। तानरुच्छदमोष्ठं नयनद्वाभूत मनस्विन्याः॥" इति। अत्र दर्शनश्रोतव्यरूपयोः क्रियागुणयोः। इह यौगपद्यमात्रं विवक्षितं, न तु सामानाधिकरण्यं वैयधिकरण्यं वा, तयोरादृतेषु व्यत्ययेति कौस्तुभकारः।

(र) अत्रेति सामानाधिकरण्येऽपि प्रयोगमाह, धुनोतीति।—असिं—तत्कालं, धुनोति च—कम्पयति च, कीर्त्तिं तनुते च—विस्तारयति च। समुच्चयप्रकारा इति—समुच्चयभेदा इत्यर्थः, नियमेन—अवश्यम्भावेन, कार्य्यकारणयोः कालनियमः,—पौर्वापर्य्यं, तस्य विपर्य्ययः, यौगपद्यमारोपितं झटिति फलोत्पादनमतिपत्त्यर्थम्।

समाधिः सुकरे कार्य्ये दैवाद्दस्त्वन्तरागमात् ॥७६॥ (ङ)

यथा—

"मानमस्या निराकर्तुं पादयोर्मे पतिष्यतः।
उपकाराय दिष्ट्येदमुदौर्णं घनगर्जितम्॥" (च)

प्रत्यनीकमशक्तेन प्रतीकारे रिपोर्यदि।
तदीयस्य तिरस्कारस्तस्यैवोत्कर्षसाधकः ॥७६२॥ (छ)

(ङ) समाधिमाह, समाधिरिति।—दैवात्—सहसा, अकस्मादित्यर्थः, वस्त्वन्तरस्य—अन्यस्य वस्तुनः, आगमात्—कारणान्तरसमाधानादित्यर्थः, कार्य्ये सुकरे इति (एतेन प्रक्रान्तकार्य्येण कार्य्यस्य दुष्करत्वं प्रतीयते) समाधिः ज्ञातः। विघीर्घितस्य कार्य्यस्य सिद्ध्यर्थमभिमतो यो हेतुः, तदतिरिक्तहेतुना कार्य्यस्य सौकर्य्यं समाधिः, समाधीयते कार्य्यमनेन इति व्युत्पत्तेः इति कौस्तुभकाराशयः।

(च) मानमिति।—सख्याः प्रति कञ्चिदुक्तिः। अस्याः,—कान्तायाः इति भावः, मानं—प्रणयकोपं, निराकर्तुम्—अपनेतुं, पादयोः,—चरणयोः, पतिष्यतः मे—मम, उपकाराय—पादपतनरूप अनादरूपकाय इत्यर्थः, दिष्ट्या—दैवेन, भाग्येनेत्यर्थः, इदं घनगर्जितं—मेघनर्जनम्, उदीर्णम्—उपस्थितम्, उत्पन्नमिति यावत्, तत्कोपकत्वात् तत्क्षणादेव मानभङ्गो जात इति भावः। अनादरूपकारस्य एतदुदाहरणं ज्ञेयम्। अत्र दैवात् मेघनर्जनरूपवस्तुन आगमात् मानभङ्गरूप कार्य्यस्य सुकरत्वम्। अयमर्थः बोध्यः—सौकर्य्यमत्र तद्भावविच्छिन्नोद्देश्यतावच्छेदकप्रवृत्तिविषयत्वेतरत्वरूपं तदतिरिक्तहेतुना कार्य्यसाधनम्, उपकारस्य तदुपयुक्तत्वाच्चक्षुरुन्मीलनादिरूपस्य तदुपयोगानुकूलतावच्छेदकावच्छिन्नजनकतावच्छेदकावच्छिन्नजनकत्वानवच्छिन्नजनकतावच्छेदकत्वादिसाधारण्यम्। कारणव्यापृतत्वञ्च या विवक्षितत्वादत्र वस्तुन्यर्थाद्, कार्य्यस्य प्रवृत्तिविषयत्वञ्च फलतो ज्ञानात् कार्य्यविशेषात् इति कौस्तुभाशयः। प्रक्रान्तकारणसमवधे यथा—"पादपतितस्य पत्युः पृष्ठं पुत्रे समादीक्षति। दृढमन्तर्दूनाया यदि डाको गृहिण्या निष्क्रान्तः॥" इति। अत्र मानापनोदार्थं प्रवृत्ते पत्यौ तदभावेऽपि तत्पृष्ठे पुत्रसमारोहरूपविलक्षणचेष्टाद्वारानन्यो मानभङ्गः।

(छ) प्रत्यनीकमाह, प्रत्यनीकमिति।—रिपोः प्रतीकारे—दमने, अशक्तेन, अक्षमेन सता इति शेषः, तदीयस्य—तस्य रिपुसम्बन्धिवस्तुनः, तिरस्कारः यदि तस्यैव—रिपोरेव, उत्कर्षसाधकः,—श्रेष्ठत्वप्रतिपादकः, स्यात्, तत् प्रत्यनीकं—प्रतिकूलम्

तस्येवेति रिपोरेव। यथा मम—

"मध्येन तनुमध्या मे मध्यं जितवतीत्ययम्।
इभकुम्भौ भिनत्त्यस्याः कुचकुम्भनिभौ हरिः॥" (घ)

प्रसिद्धस्योपमानस्योपमेयत्वप्रकल्पनम्।
निष्फलत्वाभिधानं वा प्रतीपमिति कथ्यते॥७६३॥ (ङ)

धनीकमित्यर्थः, उपचारात् तथा वक्ष्यमाणवैधर्म्यमिति भावः; यदा—धनीकेन सदृशं प्रधनीकं, यथार्थत्वेन सादृश्यादानेऽपि पुनः सादृश्यदृष्टिं विशेषधीभूतेऽपि सादृश्ये अव्ययीभावद्योतनाय; प्रतिभटस्य धवलानन्तरं धनीकं नियुज्यते, तदधमत्वे प्रतिभटत्वस्यन्निनः यस्य कस्यचिदपि अधिक्षेपः क्रियते इति लोकाचारः, स धानीक-सदृशप्रयोगयोग्यत्वात् प्रधनीकमिति कथ्यते; प्रतिभटगतं धवलत्वम् आत्मगतं दुर्बलत्वञ्च दृष्ट्वा गम्यते इति रत्नकण्ठादरकारायणः।

(घ) मध्येनेति।—तनुमध्या—क्षीणकटी प्रमदा, मध्येन—कटीदेशेन, मे—मम, मध्यं—क्षयमिति शेषः, जितवती इति—इति हेतोः, क्षीणेनेति भावः, अयं हरिः,—सिंहः, अस्याः,—प्रमदायाः इत्यर्थः, कुचकुम्भनिभौ—स्तनकलशसदृशौ, इभकुम्भौ—हस्तिकुम्भौ, भिनत्ति; तदीयस्य स्तनकुम्भस्य तत्सदृशहस्तिकुम्भभेदेन तिरस्कारः कृतः। अत्र मध्यजयित्वेन रिपोः प्रमदायाः प्रतीकारासमर्थेन हरिणा तस्या एव उत्कर्षसाधकः औपम्यनेति भावः। यथा वा—"यस्य विक्षिप्तदण्डस्तनभरः क्षामनिषण्णदृष्टदोषविषदः। कालवक्त्रसदृशाकृतिं कृतो राहुरिन्दुमधुनाऽपि बाधते॥" अत्र राहोः सकाशात् भगवान् बलवान् विषदः, तदीयः पुनः वक्त्रसादृश्यमुखेन दुर्बलचन्द्रमाः, तत्तिरस्कारात् भगवतः प्रकर्षावगतिः इति शेषम्।

(ङ) प्रतीपमाह, प्रसिद्धस्येति।—प्रसिद्धस्य—विख्यातस्य, उपमानस्य उपमेयत्वप्रकल्पनं वा निष्फलत्वाभिधानं—निष्फलत्वज्ञापनमित्यर्थः, प्रतीपं—प्रतिगतः आपो यस्मिन् इति प्रतीपम्—प्राप्तोपमत्वस्य, तत्सादृश्यात् तत्त्वेन तत्कारोऽपि तत्रानुगः, ["ऋक्पूरब्धूः" (५।४।७४ पा०) इति च-प्रत्ययः। "द्वन्द्वोपसर्गेभ्योऽप वृत्तं" (६।३।८७ पा०) इति वृद्धादेशे सिद्धम्] इति कथ्यते। तदत्र उपमानोपमेय-भावे वैपरीत्यं प्रथमप्रतीपं, निष्फलत्वाभिधानेन उपमेयस्य प्रकर्षप्रतीतेरुपमान-प्राप्तिकूलं द्वितीयप्रतीपम्। आद्ये उपमानस्य उपमेयत्वकल्पनेन, द्वितीये वैफल्याभि-धानेन अपकर्षः प्रतीयते।

क्रमेण यथा—"यत् त्वन्नेत्रसमानकान्ति सलिले मग्नं तदिन्दीवरम्" (ह) इत्यादि।

"तद्वक्त्रं यदि मुद्रिता शशिकथा हा! हेम सा चेद्द्युति-
स्तच्चक्षुर्यदि हारितं कुवलयैस्तच्चेत् स्मितं का सुधा?।
धिक् कन्दर्पधनुर्भ्रुवौ यदि च ते किं वा बहु ब्रूमहे
यत् सत्यं पुनरुक्तवस्तुविमुखः सर्गक्रमो वेधसः॥" (क)

अत्र क्त्वावदिभिरेव चन्द्रादीनां शोभाऽतिवहनात् तेषां निष्फलत्वम्।

(ह) यदिति।—व्याख्यातं प्राक्। अत्र नेत्रादीनामुपमानानामपि इन्दीवरादीनामुपमेयत्वकथनम्।

(क) तदिति।—विद्धशालभञ्जिकायां केरलाधिपतेः स्वप्नावस्थायां कुवलयमालामवलोक्य तन्मूर्त्तिस्मरणम्। यदि तस्याः,—स्वप्नदृष्टायाः कुवलयमालाया इति भावः, एवं सर्वत्र; वक्त्रं—मुखं, तिष्ठतीति शेषः, तदा शशिकथा—चन्द्रसम्बन्धिनी वार्त्ता, शशिसौन्दर्य्यप्रशंसा इति यावत्, मुद्रिता—सङ्कुचिता, नष्टेत्यर्थः, चेत्—यदि, सा द्युतिः,—कान्तिः, तिष्ठतीति शेषः, तदा हेम—स्वर्णं, हा!—शोचनीयमित्यर्थः, हेम्नः शोच्यत्वमिति भावः, तेन च तस्य वैफल्यं प्रतीयते, हाशब्दः शोकसूचको विफलार्थो वा अव्ययः. यदि तस्याश्चक्षुः तिष्ठति, तदा कुवलयैः,—नीलोत्पलैः, हारितं—पराभूतं, विफलीभूतमित्यर्थः, यद्वा—हा—खेदे, रितं—गतं, नष्टमिति यावत्, चेत्—यदि, तत्—विलक्षणमित्यर्थः, स्मितं—मृदुहास्यं, तिष्ठतीति शेषः, तदा सुधा का?—साऽपि विफला इति भावः, यदि ते भ्रुवौ, तिष्ठत इति शेषः, तदा कन्दर्पस्य—कामदेवस्य, ("कन्दर्पो दर्पकोऽनङ्गः कामः पञ्चशरः स्मरः" इत्यमरः) धनुः,—शरासनं, धिक्!—निन्दामीत्यर्थः, ("धिक् निर्भर्त्सननिन्दयोः" इत्यमरः) कामदेवस्य धनुः अतिधिक, एतदपि तदपेक्षया अकिञ्चित्करमिति भावः, किं वा बहु—अधिकं, ब्रूमहे—वदामः, वेधसः,—विधातुः, सर्गक्रमः,—सृष्टिनियमः, पुनरुक्तात्—द्वितीयात्, वस्तुनः विमुखः,—विधिरेकरूपं वस्तुद्वयं न सृजतीत्यर्थः, इति यत् तत् सत्यम्। एतेन केशपाशादिसत्त्वे चामरादीनां वैफल्यं प्रतीयते। शार्दूलविक्रीडितं वृत्तम्। यथा वा—"तदोजसस्तद्यशसः स्थिताविमौ वृथेति चित्ते कुरुते यदा यदा। तनोति भानोः परिवेषकैतवात् तदा विधिः कुण्डलनां विधोरपि॥" इति। अत्र नलीयप्रतापकीर्त्तिभ्यां सूर्य्याचन्द्रमसोः वैफल्यम्।

उक्त्वा चात्यन्तमुत्कर्षमत्युत्कृष्टस्य वस्तुनः।
कल्पितेऽप्युपमानत्वे प्रतीपं केचिदूचिरे ॥७६४॥ (ख)

यथा—"अहमेव गुरुः सुदारुणाना-
मिति हालाहल! तात! मा स्म दृप्यः।
ननु सन्ति भवादृशानि भूयो
भुवनेऽस्मिन् वचनानि दुर्जनानाम्॥" (ग)

अत्र प्रथमपादे उत्कर्षातिशय उक्तः। तदनुक्तौ तु नायम् अलङ्कारः। यथा—"ब्रह्मेव ब्राह्मणो वदति" इत्यादि। (घ)

मीलितं वस्तुनो गुप्तिः केनचित् तुल्यलक्ष्मणा ॥७६५॥ (ङ)

अत्र समानलक्षणं वस्तु क्वचित् सहजं, क्वचिदागन्तुकम्।

(ख) प्रकारान्तरेण प्रतीपमाह, उक्त्वेति।—अत्युत्कृष्टस्य—अतिश्रेष्ठस्य, वस्तुनः अत्यन्तम् उत्कर्षम् उक्त्वा तस्यैव उपमानत्वे कल्पिते अपि—येन धर्मेण उत्कर्ष उच्यते, तेनैव धर्मेण अप्रसिद्धस्यापि उपमानत्वे कल्पिते इति भावः, [अपिकारात् पूर्वोक्तप्रकारयोः समुच्चयः] केचित् प्रतीपम् ऊचिरे—कथयामासुः।

(ग) अहमिति।—हालाहल!—हे कालकूट! हे तात! अहमेव सुदारुणानाम्—अतिभीषणानां, प्राणघातिनामिति भावः, गुरुः,—श्रेष्ठः, इति—एवं बुद्ध्या, मा स्म दृप्यः,—दर्पवान् मा भूः, दर्पं मा कार्षीरित्यर्थः; कथमित्यत आह, सन्तीति।—अस्मिन् भुवने—जगति, भवादृशानि—त्वत्सदृशानि, दुर्जनानां वचनानि भूयः,—बाहुल्येन, सन्ति ननु—विद्यन्ते खलु।

(घ) अत्रेति।—अत्र प्रथमे पादे उत्कर्षमुक्त्वा द्वितीये दुर्जनवचनानाम् उपमानत्वं कल्पितम्; तथा हि, दारुणत्वातिशयः सामान्यगुणः, तद्योगादुपमानत्वमभूतपूर्वमपि दारुणत्वांशे दर्पनिषेधादनुभूतपूर्वमेव विवक्षितम् इति भावः। तदनुक्तौ—उत्कर्षानुक्तावित्यर्थः। ब्रह्मेवेति।—अत्रोत्कर्षो गम्य एव, न तु वाच्यः।

(ङ) मीलितमाह, मीलितमिति।—केनचित्—सहजेनागन्तुकेन वा इत्यर्थः, तुल्यलक्ष्मणा—समानचिह्नेन, वस्तुनः गुप्तिः,—गोपनं, मीलितम्। न चायं सामान्यालङ्कारः, तस्य हि साधारणगुणयोगात् भेदानुपलक्षणं रूपम्, अस्य तु उत्कृष्टगुणेन निकृष्टगुणस्य तिरोधानमिति महाननयोर्विशेषः।

क्रमेण यथा—

"लक्ष्मीवक्षोजकस्तूरी-लक्ष्म वक्षःस्थले हरेः।
यस्तं नालक्षि भारत्या भासा नीलोत्पलाभया॥" (च)

अत्र भगवतः श्यामा कान्तिः सहजा।

"सदैव शोणोपलकुण्डलस्य
यस्यां मयूखैरकणीकृतानि।
कोपोपरक्तान्यपि कामिनीनां
मुखानि शङ्कां विदधुर्न यूनाम्॥ (छ)

अत्र माणिक्यकुण्डलस्यारुणिमा मुखे आगन्तुकः।

(च) लक्ष्मीति।—भारत्या—सरस्वत्या, उपलक्ष्या इत्यर्थः, हरेः,—नारायणस्य, वक्षःस्थले लक्ष्म्याः,—श्रियाः, वक्षोजयोः,—स्तनयोः, या कस्तूरी—मृगमदः, तस्य लक्ष्म—चिह्नं, नीलोत्पलाभया—इन्दीवरतुल्यया, भासा—भगवद्देहप्रभया, यत्तं—लक्षितं, दर्शनाविषयीभूतमित्यर्थः, अत एव न लक्षि—न दृष्टम्। अत्र तुल्यलक्ष्यवस्तुना देहप्रभया कस्तूरीलक्ष्मरूपस्य वस्तुनः गोपनम्। यद्वा वा—"अपाङ्गतरले दृशौ मधुरवक्त्रवर्णा गिरो विलासभरमन्थरा गतिरतीव कान्तं सहजम्। इति स्फुटितमङ्गके मृगदृशां चतो लोभया यदत्र न मदोदयः क्षतपदोऽपि संलक्ष्यते॥" इति।

(छ) सदैवेति।—भगवद्वर्णनमिदम्। यस्यां—तनयौ, सदैव शोणोपलकुण्डलस्य—माणिक्यकुण्डलस्य, मयूखैः,—किरणैः, अरुणीकृतानि—रक्तीकृतानि, कामिनीनां मुखानि कोपेन—प्रणयजनितेनेति भावः, उपरक्तान्यपि—आरक्तान्यपि, यूनां—तरुणानां, शङ्कां भयं, न विदधुः,—उत्पादयामासुरित्यर्थः। अत्र तुल्यलक्ष्यवस्तुना आगन्तुकेन माणिक्यमयूखेन कोपोपरागरूपस्य वस्तुनः गोपनम् इति। उपलक्षितिः इत्तम। यद्वा वा—"अपाङ्गतः खेदभरः करे तयोल्लसत्पाटलयोर्ललाटजलैर्मिलन् मुहुः। दृशारपि प्रसुतमस्तु सात्त्विकं घनैः सनाधीयत घर्मसङ्गमैः॥" इति। अत्र दानजलेनागन्तुकधर्मेण स्वेदजलस्य घर्मजलेन चासुषा सात्त्विकजन्याश्रुणां तिरोधानम्। एतदाराध्य सज्जातीयापेक्षोत्कर्षस्य, द्वितीयस्य च प्रणयविषयस्वजात्यौचितीप्रतियोगिकत्वारचनाप्रणयत्वं तिरस्कारत्वप्रयोजकम् इति शेयम्। यद्वा वा—"ये चन्दनासु निवसन्ति सदा हिमाद्रेस्त्वत्पादपङ्कजसविधे विहगा विशन्ते। अन्यद्रुतस्तुलसमुद्वहतां सकृत्तं तेषामहो! वत भियां न बुधोऽभिभूतः॥" अत्र हिमाद्रि-

सामान्यं प्रकृतस्यान्य-तादात्म्यं सदृशैर्गुणैः। ७६६ ॥ (ज)

यथा—

"मल्लिकाचितधम्मिल्लाः सान्द्रचन्दनचर्चिताः।
अभिसार्याः सुखं यान्ति चन्द्रिकास्वभिसारिकाः॥" (झ)

चन्द्रादिवासनासम्पर्कप्रतिपन्नेन श्लेषेण वस्तुद्वयाश्रितौ धानलुकौ कन्धरीमाषौ भवत्प्रतीतयोः तिरोधायकौ, तिरोधायकत्वादेव च नौचितीत्यपदेशः इति श्लेषः।

(ज) सामान्यमाह, सामान्यमिति।—प्रकृतस्य—वस्तुतः, सदृशैः गुणैः अन्यस्य—इतरस्य, तादात्म्यं—भिन्नत्वेनापरिच्छेद्यत्वम्, अभेदप्रतीतिरिति यावत्, सामान्यम्। यथा—"खगुणसजातीयगुणाश्रयैकरूपत्वं सामान्यम्। यत्र यस्य विशेषस्योऽपरित्यक्तस्वगुणस्यैव सङ्कीर्णगुणसजातीयगुणाश्रयैव सङ्कीर्णतया भानं, तत् सामान्यम्। तद्दुष्टे व्यभिचारवारणाय अपरित्यक्तेति। यत्र खगुणसजातीयं रूपवत्त्वव्याप्यधर्मेण गुरुत्वादिना बोध्यम्, अन्यथा गुणत्वादिधर्मभिन्नरूपाणां सामान्यं नैव स्यात्, समानस्य भावः सामान्यमिति व्युत्पत्त्या समयोरेकधर्मवत्तामात्रप्रतिपादनादित्यर्थः" इति कौस्तुभाशयः।

(झ) मल्लिकेति।—अभिसारिकाः,—कान्तार्थिन्यः नायिकाः, (तदुक्तं—"कान्तार्थिनी तु या याति सङ्केतं साऽभिसारिका" इति) मल्लिकाभिः,—पुष्पविशेषैः, चर्चिताः,—लिप्ताः, धम्मिल्लाः,—संयतकेशा यासां तथोक्ताः, ("धम्मिल्लाः संयताः कचाः" इत्यमरः) तथा चान्दनैः,—अतिसुरभिभिः, चन्दनैः चर्चिताः,—कृतानुरागा इत्यर्थः, अत एव चन्द्रिकासु—ज्योत्स्नासु, अभिधार्याः,—अभिसारिकात्वेन अप्रतीयमाना इत्यर्थः, सुखं यान्ति। अत्र मल्लिकादिगुणसादृश्येन प्रकृतस्य अभिसारिकात्वस्य वस्तुनः चन्द्रिकातादात्म्यम्। न च कौचितादिभते अत्र नौचितीदाढर्यत्वेन चित्तवृत्तादृष्टापत्तिरिति वाच्यम; सामान्योदाहरणतया चित्तवृत्तेः तयोर्नैविरोधप्रसक्तात्; विशेषस्तत्र कौस्तुभे द्रष्टव्यः। यथा वा—"सितारविन्दप्रचयेषु शोभाः हंसस्तनेषु च सैकतेषु। कुन्दावदाताः सरसीतरङ्गाः प्रतीयिरे श्रोणिसुखैर्निनादैः॥" अत्र कुसुमसैकते हंसानामेकगुणतया अभेदेन भानं, न च शब्देन हंसानां पृथक् प्रतीतिरस्त्येवेति वाच्यं, तत्पूर्वकाभेदभानस्य निबन्धनतया तदभिप्रायेणैवोदाहरणात् उत्तरवाक्यीयभेदज्ञानेन पूर्ववाक्यीयाभेदज्ञानबाधाभावात्; सूत्रं पुनः "वैमत्यचा तुल्यत्वचा वस्तूनां कथंचनो नष्टतत्त्वागतानि। भङ्गाः सङ्केतं

मीलिते उत्कृष्टगुणेन निकृष्टगुणस्य तिरोधानम्, इह तु उभयोस्तुल्यगुणतया भेदाग्रहः।

तद्गुणः स्वगुणत्यागादत्युत्कृष्टगुणाग्रहः ॥७६७॥ (अ)

यथा—

"जगाद वदनच्छद्म-पद्मपर्य्यन्तपातिनः।
नयन् मधुलिहः खेत्यमुदमदशनांशुभिः॥" (ट)

यदि नापतिष्यन् को वेदधिष्यन्नवचम्पकानि?" इति। यत्तु, नैतदुदाहरणम्, उत्तरप्रतिपत्त्या तिरस्कृतत्वात् पूर्वप्रतीतेर्न चमत्कारकत्वं, किन्तु उत्तरप्रतीतेरेवेति तयैव व्यपदेशस्य युक्तत्वात्, अन्यथा व्यतिरेकेऽप्युपमाया एवाप्तेरिति, तच्चिन्त्यम्; भेदप्रतीतेर्वर्णनीयोत्कर्षनिबन्धनत्वेन तथाऽऽपत्तेः तिरस्कारातिरस्कारयोश्चाप्रयोजकत्वात्, अन्यथा विरोधाभासस्याप्युच्छेदापत्तेः, विरोधस्य तथाप्यप्रविष्टत्वात्। एतेन मीलितसामान्योभयप्रतिहन्द्विभूतसुन्मीलितविशेषात्मकं दीपितालङ्कारद्वयं प्रत्याख्यातं, वर्णनीयोत्कर्षनिबन्धनत्वेन प्रथमवृत्तिकाभ्यां मीलितसामान्याभ्यामेवान्यथासिद्धेरिति दिक्।

(अ) तद्गुणमाह, तद्गुण इति।—स्वस्य गुणत्यागात् अत्युत्कृष्टस्य गुणस्य—अतिनिकृष्टस्य वस्तुनः अतिनिकृष्टगुणस्य, यः,—यदणं, स्फूर्त्तिरिति यावत्, तद्गुणः। (अत्युत्कृष्टेति गुणविशेषणं स्वगुणतिरोधाने बीजम्) तथा च, परकीयैर्गुणैरुत्कर्षितगुणत्वे सति परकीयगुणग्राहितया प्रत्ययस्तद्गुण इति निष्कृष्टोऽर्थः। अत्रेदं बोध्यं—यत्र परिमितगुणस्य वस्तुनः समीपवर्त्तिप्रकृष्टवस्तुगुणस्य क्षीरत्वं स तद्गुणः, तत्रोत्कृष्टगुणस्य गुणा अस्मिन् इति कृत्वा। न चेदं मीलितं, तत्र हि प्रकृतं वस्तु वस्त्वन्तरेणाच्छादितत्वेन प्रतीयते, इह तु अनपह्नुतस्वरूपमेव प्रकृतम्। यत्र वा परिमितगुणं वस्तु तत्र समीपवर्त्तिप्रकृष्टवस्तुगुणक्षीरत्वं कुरुते, स तद्गुणः, वस्त्वन्तरग्रहोपरक्ततया प्रतीयते इत्यस्यानयोर्भेदः इति सर्वमवदातम्।

(ट) जगादेति।—उदयदंशुभिः,—उन्नतदन्तकिरणैः, वदनमेव छद्म—छलं यस्य तादृशं, यत् पद्मं तस्य पर्य्यन्ते पतनशीलेति तथोक्तान्, मधुलिहः,—भ्रमरान्, खेत्यं—खानर्ह्यं, नयन्—प्रापयन्, जगाद—उवाच। अत्र पद्मालोपो वक्तृदेवः कर्त्ता। इह मधुलिहां क्षणवर्णत्वेनस्वगुणत्यागात् अत्युत्कृष्टस्य खेत्यगुणस्य ग्रहणम्। शिशुपालवधेऽयं प्रयत्नः। यद्वा वा—"गादाखेत्रिकीर्णचन्दनरजःपुञ्जप्रसक्तादिदं मुखा

मीलिते प्रकृतस्य वस्तुनो वस्त्वन्तरेणाच्छादनम्, इह तु वस्त्वन्तरगुणेनाक्रान्तता प्रतीयते इति। (ठ)

तद्गुणाननुहारस्तु हेतौ सत्यप्यतद्गुणः ॥७६८॥ (ड)

यथा—"हन्त! सान्द्रेण रागेण भृतेऽपि हृदये मम।
गुणगौर! निषण्णोऽपि कथं नाम न रज्यसि?" ॥ (ढ)

स्मरति क्षीणस्यापि! कठिनेत्यारोप्य मां वधयति। गाढीकृतदृढपूर्वनाकुलतया पादाय-न्दंयकेनाकृष्यान्तरमात्मनो यदुचितं धूर्तेन तत् प्रस्तुतम्॥" इति। अत्र ग्राम्यार्थं-तिरोधानेन चन्दनपरागोपकठिनस्तनसंस्पर्शस्य उक्तः। इह सर्वत्र तिरोधायकगुणस्य तिरोधेयगुणनिष्ठात्यन्ताभावप्रतियोगित्वमाश्रयान्तरवर्त्तित्वेन वक्तव्यम्। यथा वा—"विनिद्रवर्षा मरुद्वायुजेन सूर्यस्य रश्मेः परितः स्फुरन्त्या। रक्तैर्युतं कर्षति कर्षा खानानिन्दिरं वंशकरीरनीलैः॥" अत्र रवितुरगापेक्षया मरुद्वायुजस्य तदपेक्षया च कृष्णिम्नोनां प्रयुक्तवर्णता इति सारः।

(ठ) नन्वनीलकृष्णगुणेन निकृष्टगुणतिरोधानमस्तीति नीलितादस्य को भेदः? इत्यत आह, नीलिते इति।—इह तु—तद्गुणे तु, सन्निकृष्टगुणेन स्वगुणस्यैव तिरो-धानं, न तु वस्तुनः, नीलिते तु वस्तुनोऽपीति विशेषः; नीलिते स्वजातीयोत्कृष्टगुण-तिरोधानम्, अत्र तु विजातीयोत्कृष्टगुणेन अपकृष्टगुणतिरोधानं "स्वगुणत्यागात्" इत्यनेन लक्ष्यते इत्यपि बोध्यम्। अनेन सामान्यालङ्कारादस्य भेदः, तत्र "सदृशैर्गुणैः" इत्युपादानात्।

(ड) अतद्गुणादाह, तद्गुणेति।—हेतौ सत्यपि [उत्कृष्टगुणवस्तुसन्निधानरूप हेतुरवधेयः] तस्य रूपम्—उत्कृष्टगुणवस्तुनो गुणस्य, अननुहारः,—अपकृष्टगुणेन वस्तुना अपकृष्यन, अतद्गुणः।

(ढ) इत्तेति।—नायकं प्रति खण्डितेदमिति। गुणगौर!—हे गुणो-त्कर्षवत्! मयः!—मुग्ध! इत्यर्थः, गुरुगुणस्य रक्तगुणयोगेन रक्तत्वं सुतरां जायते इति भावः, इन्त—खेदे, सान्द्रेण—घनेन, रागेण—अनुरागेण, लौहित्येन च, भृते—परिपूर्णेऽपि, मम हृदये निषण्णोऽपि—आसीनोऽपि, त्वं कथं नाम न रज्यसि?—न अनुरागभाक्, लोहितश्च भवसीत्यर्थः। अत्र रक्ते रागे लौहित्येऽपि हेतौ सत्यपि रक्तताया अपकर्षं, स्वेषादनुरागपरिपोषकत्वाभासादेतदुपपद्यते। इह प्राकरणिकेन नायकेन प्राकरणिकस्य नायिकाहृदयस्य गुणापकर्षणम्।

यथा वा—

"गाङ्गमम्बु सितमम्बु यामुनं कज्जलाभमुभयत्र मज्जतः।
राजहंस! तव नैव शुभ्रता क्षीयते न च न चापचीयते॥"(च)

पूर्वत्रातिरक्तहृदयसम्पर्कात् प्राप्तवटपि गुणगौरशब्दवाच्यस्य नायकस्य रक्तत्वं न निष्पन्नम्, उत्तरत्राप्रस्तुतप्रशंसायां विद्यमानायामपि गङ्गायमुनाऽपेक्षया प्रकृतस्य हंसस्य गङ्गायमुनयोः सम्पर्केऽपि न तद्रूपता। अत्र च गुणायद्दण्डरूपविच्छित्तिविशेषाश्रयात् विशेषोक्तेर्भेदः, वर्णान्तरोत्पत्त्यभावाच्च विषमात्। (त)

(च) प्राकरविधेनाप्राकरविधगुणायद्दण्डेऽप्ययमलङ्कार इत्याह, गाङ्गमिति।—हे राजहंस! गाङ्गं—गङ्गाया इदं, गङ्गासम्बन्धीत्यर्थः, अम्बु—जलं, सितं—शुभ्रं, यामुनम् अम्बु—यमुनासम्बन्धि जलं, कज्जलाभं—अञ्जनसदृशवर्णमित्यर्थः, उभयत्र—गङ्गाजले यमुनाजले च, मज्जतः तव नैव शुभ्रता न च क्षीयते—न च वर्द्धते, गङ्गाजलसम्पर्केणेति भावः, न च अपचीयते—ह्रासं गच्छति, यमुनाजलसम्पर्केणेत्यर्थः। अत्र यद्यपि हेतौ सत्यपि तदयदत्वम्। अत्र रथोद्धता छन्दः,—"रान् नरैर्नरभगै रथोद्धता" इति। यथा वा—"आता आलनलासके अवलिता जठ्यष्टाभाडखेराखोढाऽथ अटाटवीवलयितैरालीविधाता मयैः। खीयां भस्मभिराहताऽस्मि षटलैर्विद्धा अटायैरपि स्त्रीयामुक्षति माधवौ तरक्षिरोरत्नं किमिन्दोः अता?"॥ अत्र प्राकरविधया चन्द्रलया अप्राकरविधानामनलङ्काङ्कादिगुणानामयदत्वम्।

(त) पूर्वत्रेति।—प्राप्तवटपि—अर्पितुं शौल्यमपि दत्वम्। ननु उत्तरत्राप्रस्तुतप्रशंसया खण्डनिगुणवाची अत्र एव प्रकृतः, न तु राजहंस इति प्रकृतस्याप्रकृतगुणायद्दण्डोदाहरणं कथमेतत् सङ्गच्छताम्? अत आह, उत्तरत्रेति।—प्रस्तुतस्य प्रतिपाद्यत्वेन प्राकरविधस्य गङ्गायमुनाऽपेक्षया प्रतिपाद्यत्वेन राजहंसस्याऽपेक्षितं प्रकृतत्वमिति भावः। ननु कारणमाले आर्थ्यानुत्पत्तिरस्तीति विशेषोक्त्यलङ्कार एवात्रास्तिवत आह, अत्र चेति।—गुणायद्दण्डरूपा या विच्छित्तिः,—वैचित्र्यं, तथा विशेषः,—वैशिष्ट्यं, तस्य आश्रयात्—वैचित्र्यविशेषवत्त्वात् दत्वम्, कारणमाले आर्थ्यानुत्पत्तिरूपवैचित्र्यादुक्तवैचित्र्यं विलक्षणं, तत्प्रयोजकत्वादलङ्कारस्य वैलक्षण्यमिति भावः। विशेषोक्तेः "सति हेतौ कार्याभावरूपायाः" भेदः,—कार्याभावविशेष-

संलक्षितस्तु सूक्ष्मोऽर्थ आकारेणेङ्गितेन वा।
कयाऽपि सूच्यते भङ्ग्या यत्र सूक्ष्मं तदुच्यते ॥७६९॥ (ब)

सूक्ष्मः,—स्थूलमतिभिः (द) असंलक्ष्यः। अत्राकारेण यथा—

"वक्त्रस्यन्दिस्वेदबिन्दुप्रबन्धै-
र्दृष्ट्वा भिन्नं कुङ्कुमं काऽपि कण्ठे।
पुंस्त्वं तन्व्या व्यञ्जयन्ती वयस्या
स्मित्वा पाणौ खड्गलेखां लिलेख ॥" (ध)

भावेनेति भावः। ननु नायिकाहृदयादिरूपकारणगुणस्य विरुद्धस्तत्सम्पृक्तनायकादि-रूपकार्य्यगुण इति विषमालङ्कार एवायं, सम्पर्कस्य कार्य्यत्वात् सम्पृक्तस्यापि कार्य्यत्वमुपचर्य्यते इत्यभिप्रायेणाह, वर्णान्तरेति।—कार्य्यस्य कारणगुणविरुद्धगुणो-त्पत्तावेव विषमस्य विषयः, प्रकृते तु तदभावान्न तद्विषय इति भावः। विषमा-दिति, भेद इत्यन्वयः। तथा हि, "अत्राक्षिपन्ति—सत्यपि परगुणग्रहणहेतौ तद्रूपकार्य्याभावात् विशेषोक्तितो नातिरिच्यते एवायं, न चात्र कार्य्यकारणभावो न विवक्षितः, किन्तु धर्म्मान्तरसन्निधानेऽपि तद्गुणग्रहणाभाव एवेति वाच्यम्, अपि-शब्देन विरोधस्मरणात्, विरोधस्य च कार्य्यकारणभावविवक्षाया एव समुल्लासात्, अन्यथा कारणाभावेऽपि कार्य्यानुत्पत्तौ विरोधानुपपत्तिप्रसङ्गात् इति। अत्रोच्यते—कारणसत्त्वे कार्य्यानुपपत्तिसाम्येऽपि यत्राभावप्रतियोगिताऽवच्छेदकस्य तद्धर्मावच्छिन्न-कारणताऽवच्छेदकप्रतियोगिकार्य्यताऽवच्छेदकत्वं विवक्षितं, तत्र विशेषोक्तिः, यत्र तु अभावप्रतियोगिनः तन्निष्ठकारणतानिरूपितकार्य्यताशालित्वमात्रं तत्रातद्गुण इति विभागात्" इति कौस्तुभाशयः।

(ब) सूक्ष्ममाह, संलक्षित इति।—आकारेण—धर्मेण, मुखभावादिना इत्यर्थः, वा इङ्गितेन—क्रियाभङ्ग्या, विदग्धचेष्टयेति यावत्, संलक्षितः,—सम्यक् अनु-भूतः, सूक्ष्मः अर्थः कयाऽपि—अनिर्वाच्यया इत्यर्थः, भङ्ग्या—प्रकारेण, यत्र सूच्यते—प्रकाश्यते, तत् सूक्ष्मम् उच्यते।

(द) सूक्ष्म इति।—मतेः स्थूलत्वं—गहनार्थाग्राहित्वमिति भावः।

(ध) वक्त्रेति।—काऽपि वयस्या—सखी, तन्व्याः,—कृशाङ्ग्याः वयस्यायाः, नायिकाया इति भावः, वक्त्रात्—वदनात्, स्यन्दिनः,—क्षरन्तः, ये स्वेदबिन्दवः,—घर्मबिन्दवः, तेषां प्रबन्धैः,—धाराभिः, कण्ठे कुङ्कुमं भिन्नं—मृष्टं, रेखारूपकृत-

अत्र कयाचित् कुङ्कुमभेदेन संलक्षितं कयाचित् पुरुषायितं पाणौ पुरुषचिह्नखड्गलेखाभिधानेन (ग) सूचितम्।

इङ्गितेन यथा—

"सङ्केतकालमनसं विटं ज्ञात्वा विदग्धया।
हसन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम्॥" (घ)

अत्र विटस्य भ्रूविक्षेपादिना लक्षितः सङ्केतकालाभिप्रायो रजनीकालभाविना पद्मनिमीलनेन प्रकाशितः। (ङ)

व्याजोक्तिर्गोपनं व्याजादुक्तिन्यस्यापि वस्तुनः॥ ७७०॥ (च)

विभागनिमित्तैः, हृता (तया) पुंस्त्वं—पुरुषत्वं, सुरते पुरुषवदाचरितत्वनिमित्तैः, व्यञ्जयन्ती—प्रकटयन्ती सती, जित्वा—ईषत् हसित्वा, पाणौ—तया एव करे, खड्गलेखां—खड्गाकृतिं, लिलेख। अत्र खेदविन्दुसहकृतकुङ्कुमकर्मिलेखाकारेण संलक्षितं पुरुषायितं पाणौ पुरुषचिह्नखड्गाकारलेखनेन प्रकाशितं, पुरुषायिताया एव लक्षणलक्षितेऽर्थान्तरे सङ्क्रमणं लक्षणा, न तु उत्तानपुमायाः; अतः सूत्रमपि पुरुषायितं लक्षितं पुरुषचिह्नं खड्गरेखायाः लक्षितलेखनेन प्रकाशितम्। अत्र आग्निनो छन्दः,—"नात् तौ नौ चेच्छाग्निनौ वेदलोकैः" इति च तल्लक्षणम्। यथा वा—"संवाहनसुखरसलीलितेन दयिता तव करेण यामाम्। परिवेषनिर्मथादिव-चरितमनुक्षिपितं तया॥" अत्र नायकस्य नायिकायाश्च संवाहनसंवीजनं हृता विपरीतायाः सुरतमभिप्राय तच्छेदेन परिवेषनिर्मथादिव्यवहाराभिधानं लक्षणया नायकस्य तत्प्रकाशनं कृतम्।

(ग) अत्र कयाचिदिति।—कुङ्कुमभेदोऽभाकारः। खड्गरेखा—खड्गाकृतिविशेषः, पुंस्त्वं हृते निहते।

(घ) सङ्केतेति।—व्याख्यातं प्राक्।

(ङ) अत्र विटस्येति।—इह सङ्केतकालाभिप्रायः,—सङ्केतकालचिह्नं हि, विटसम्बन्धिना भ्रूविक्षेपादिना इङ्गितेन लक्षितः रजनिकालभाविना लीलापद्मनिमीलनेन प्रकाशित इति बोध्यम्।

(च) व्याजोक्तिमाह, व्याजोक्तिरिति।—उक्तिस्य—प्रकटितस्य, वैलक्षण्यं प्रकारान्तरेणेति शेषः, काव्यादिना व्यङ्ग्यमूलक वा, वस्तुनः व्याजात्—प्रकारान्तरोल्लेखनकरणात्, गोपनं व्याजोक्तिः।

यथा—"शैलेन्द्रप्रतिपाद्यमानगिरिजाहस्तोपगूढोल्लस-
द्रोमाञ्चादिविसंष्ठुलाखिलविधिव्यासङ्गभङ्गाकुलः।
आः! शैत्यं तुहिनाचलस्य करयोरित्यूचिवान् सस्मितं
शैलान्तःपुरमातृमण्डलगणैर्दृष्टोऽवतात् वः शिवः॥"(भ)

नेयं प्रथमापङ्क्तिः, अपङ्क्तत्वकारिणो विषयस्यानभिधानात्। द्वितीयापङ्क्तेर्भेदश्च तत्स्वाव एव दर्शितः। (म)

(भ) शैलेन्द्रेति।—शैलेन्द्रेण—हिमाचलेन, प्रतिपाद्यमानायाः,—सम्प्रदीक्ष्यमाणायाः, गिरिजायाः,—गौर्याः, हस्तस्य उपगूढेन—स्पर्शेन, तत्सर्वेषेति यावत्, उल्लसद्भिः,—उत्पद्यमानैः, रोमाञ्चादिभिः,—पुलकस्वेदादिभिः, विसंष्ठुलः,—विपर्यस्तः, अवधामृत इत्यर्थः, यः अखिलः,—सकलः, विधिः,—वेदोदितक्रियाकलापः, तस्य व्यासङ्गः,—सम्बन्धः, अवलम्बनक्रिया, तस्य भङ्गेन—आघातेन, तद्वशेनेति यावत्, आकुलः,—व्याकुलः, अत एव आः! तुहिनाचलस्य—हिमाद्रेः, करयोः हस्तयोः, शैत्यं—शीतलत्वम्, इति ऊचिवान्, तथा शैलस्य—हिमाचलस्य, अन्तःपुरे, स्त्रियतेरिति शैलः, मातृमण्डलगणैः,—मातृमण्डलीभिः, यद्वा—शैलस्य अन्तःपुरवर्त्तिनी ये मातृमण्डलाः,—मण्डलीभूता मातरः, तेषां गणैः, मातृमण्डलैरिति भावः, सस्मितं दृष्टः शिवः यः,—युष्मान्, अवतात्—रक्षतु। मातृमण्डलविक्रीडितं हसनम्। अत्र सम्भोगेऽङ्गात् रोमाञ्चादिना व्यभिचारिणा सात्त्विकोल्लासः स्वकीयोद्भावविशेषः तुहिनाचलकरस्पर्शपरवशतारूपानुभावेन श्रीमत्वेन द्योतितः इति। "अथाप्यपङ्क्तीऽपि सस्मितत्वस्यावेन पुनरभ्युद्धिरत्वेन प्रकाशितः, तथाऽप्यपङ्क्तापनायानभिलषणाऽऽक्षेपालङ्कारकोटिक्षेः। नन्वपङ्क्तिरयं "यथा साहस्राय दोऽपङ्क्तः साऽपङ्क्तिः, तथाऽपङ्क्तयापि यत्साहस्रं साऽपङ्क्तिः" इति ज्ञापितं, व्याजोक्तौ चोत्तरः प्रकारो विद्यते, तत् कथमियमलङ्कारान्तरेण कथ्यते? सत्यम्, उद्भटविद्वान्नामयमेवोत्तरप्रकारः; न हि तत्रापि व्याजोक्त्याख्यमलङ्करणमस्ति; इह तु तत्र सत्यवाद्यतिरिक्तापङ्क्तिरिति पृथगयमलङ्कारो निर्दिष्टः" इत्यलङ्कारसर्वस्वकाराः। यथा वा—"शम्भुः कुप्यतु विद्विषन्तु सुहृदो निन्दन्तु वा मातरः तस्मिन् किन्तु न मन्दिरे शशिकले! पुनः स्वापी विधेयो मया। आखण्डलनखाग्रकोटिकुहराभोगावलग्नत्वतो नागारी नखरैः खरैः क्षतवतो वां वां न मे दुर्मनाम्?"॥ इति। अत्र नखदन्तक्षतादिदर्शनेन सम्भ्रमिचारप्रमादप्रागल्भ्यनागरकसदनुमितिविशिष्टभूता नखक्षतादय उद्भटकारैरेव निगूढिताः।

(म) ननु प्रकृतगोपनेनाप्रकृतोद्भावनमपङ्क्तिरुक्ता, तदनयोः को भेदः? इत्यत

स्वभावोक्तिर्दुरूहार्थ-स्वक्रियारूपवर्णनम् ॥७७१॥ (य)

दुरूहयोः,—कविमात्रवेद्ययोः, अर्थस्य—डिम्भादेः, स्वयोः, —तदैकात्म्ययोग्येष्टास्वरूपयोः । (र)

यथा मम—

"लाङ्गूलेनाभिहत्य क्षितितलमसकृद्धारयन्नग्रपद्मा-
मात्मन्येवावलीय द्रुतमथ गगनं प्रोत्पतन् विक्रमेण ।

आह, नेयमिति ।—प्रथमा—अप्रकृतनिषेधपूर्वकप्रकृतस्थापनरूपा, द्वितीया—अप्रकृतारोपविषयस्य; अत्र तु गोपनाकारिभिन्नेन आद्यादिना विषयी व्यज्यते एव, न त्वभिधीयते इति भावः । द्वितीयापक्षेतः,—"गोपनीयं वचनयं योतयित्वा वचसन । यदि सूचयेत्यथा वाऽन्यथयेत् साऽप्यपकृतिः ॥" इत्युक्तलक्षणायाः, तत्प्रस्तावे दर्शित इति ।—तत्र गोपनक्रता गोपनीयं प्रथमनभिधीयते, अत्र तु न तथेति भावः । यत्तु, "दन्त्यौर्निभि जल्पतोर्गूढयुक्तेनाकर्णितं यद्वचस्तत्प्रात-र्गुरुसन्निधौ निगदतस्तस्यैव तारं वचः । सर्वाङ्गस्मितपत्ररागमकलं वित्रस्य चक्षोः पुटे व्रीड़ार्त्तां विदधाति दाड़िमफलव्याजेन वामस्तनम् ॥" इत्यत्र "युक्तिः परातिसन्धानं क्रियया मर्मगुप्तये" इत्यलङ्कारमुक्तावल्यां दर्शितः युक्त्यलङ्कारः; व्याजोक्तौ वचसा गोपनम्, इह तु क्रियया इति द्वयोर्भेद इति, तन्न; व्याजोक्तिलक्षणयोरुभयसाधारण्यात्, तत्रोक्तिनिवेशस्य गौरवपराहतत्वात्, अन्यथा प्रकारान्तरेण गोपनस्थले अलङ्कारान्तरप्रसङ्गात्, तस्माद्युक्तिव्याऽन्यत्रनिवेशस्य सुषचत्वादिति दिक् ।

(य) स्वभावोक्तिमाह, स्वभावोक्तिरिति ।—दुरूहयोः स्वक्रियारूपयोः अर्थस्य वर्णनं स्वभावोक्तिः ।

(र) दुरूहयोरिति ।—डिम्भादेरित्यादिपदेन अक्रियिमक्रियारूपवस्त्वाद्यपग्रहपक्ष्यादिपरिग्रहः । ("नाम्नं आख्येऽवधारणे" इत्यमरः) स्वपदं स्वकीयपरतायां व्याचष्टे—स्वयोरिति । तस्याप्यवधारणपरतामाह, तदैकात्म्ययोरिति—डिम्भादिभावनतयेत्यर्थः । चारित्राख्ये क्रियारूपपदे व्याचष्टे, चेष्टास्वरूपयोरिति ।—स्वरूपं—वर्णसंस्थानादि । तत्र डिम्भस्य क्रियावर्णनं यथा—"करारविन्देन पदारविन्दं मुखारविन्दे विनिवेशयन्तम् । वटस्य पत्रस्य पुटे शयानं बालं मुकुन्दं मनसा स्मरामि ॥" इति क्षेयम् ।

स्फूर्जद्धुङ्कारघोषः प्रतिदिशमखिलान् द्रावयन्नेष जन्तून्
कोपाविष्टः प्रविष्टः प्रतिवनमरुणोच्छूनचञ्चुस्तरक्षुः ॥" (ल)

अद्भुतस्य पदार्थस्य भूतस्याथ भविष्यतः।
यत् प्रत्यक्षायमाणत्वं तद्भाविकमुदाहृतम् ॥७७२॥(व)

(ल) आदिपदग्राह्यस्य तरक्षोः क्रियाविशेषणमाह, आकूलेनेति।—कोपाविष्टः अत एव अरुणे—रक्ते, उच्छूने—स्फीते, अतएव यस्य तथाभूतः, एव तरक्षुः,—शार्दूलविशेषः, ("तरक्षुस्तु लगाटनः" इत्यमरः) अवलुलत्—पुनः पुनः, आकूलेन चित्ततलम् [एतत् काकाक्षिगोलकन्यायेन पूर्वापरयोरन्वितम्] अभिहत्य—आहत्य, अग्रपद्भ्यां—पादाग्राभ्यां, दारयन्—उल्लिखन्, आत्मनैव—स्वदेहे एव, अवलीव—खोनो भूत्वा, अतिवामनीभूयेति यावत्, अध वृतं—ओघं, विक्रमेण—बलेन, गगनं प्रोत्पतन्—उल्लम्फन्, स्फूर्जन् हुङ्कारस्य घोषः यस्य तथोक्तः सन्, घोरं हुङ्कारं कुर्वन्निति यावत्, प्रतिदिशं—दिशि दिशि, अखिलान्—सर्वान्, जन्तून् द्रावयन्—ताडयन्, मारयन्निति यावत्, प्रतिवनं—वनं प्रति, यावेदनं वा, प्रविष्टः। दुष्टप्रक्रिया चक्षुश्चिमा वक्ष्यमाणस्तरक्षोरेव इति शेषम्। स्वभावः कृतम्। वर्णवर्णनं दण्ड्याचार्य्येणोदाहृतं यथा—"तुङ्गैस्तालमरुत्कुटिलैः पक्वैर्वृन्तिकोमलैः। त्रिवर्णैरालिभिः कङ्केरेते मञ्जुगिरः शुकाः॥" संख्यावर्णनं यथा—"पक्षात् पुच्छं वहति विपुलं तच्च धन्योत्तमर्क्षं दीर्घग्रीवः स भवति खुरास्तस्य चत्वार एव। अष्टावास्यन्नथ किरति यः काकपक्षकधारी सीतानाथावतरति स भुवं श्रेणिशो याम्यमेत्य॥" अत्र विपुलपुच्छखुरचतुष्टयदीर्घग्रीवा अश्वस्यैव संख्यानानि इति। यथा वा—"ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः पश्चार्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायम्। अर्धैरावीढकोष्ठैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा पश्योदग्रप्लुतत्वादियति बहुतरं भोक्ष्यते यावतीं भूमिम्॥" इति।

(व) भाविकमाह, अद्भुतस्येति।—अद्भुतस्य—अलौकिकस्य, भूतस्य—अतीतस्य, भविष्यतः,—भाविनः, पदार्थस्य—वस्तुनः, यत् प्रत्यक्षायमाणत्वं—वर्णनाविशेषबलेन प्रत्यक्षवत् भासमानत्वं, तत् भाविकं—भावः,—वस्तुरभिप्रायः, स च वर्णनीयगोचरवर्ति स्वरूपः, तद्योगात् भाविकमित्याख्यातः, तद्योगश्च व्यञ्जकत्वेन इति बोध्यम्; यद्वा—भावः,—कविगतः आशयः, श्रोतरि प्रतिविम्बत्वेन अस्तीति, भावः,—भावना वा, चेतसि पुनः पुनः निवेशनं, स अस्य अस्तीति, [विषयलक्षणसम्बन्धपरषष्ठीसमर्थात्

यथा—"मुनिर्जयति योगीन्द्रो महात्मा कुम्भसम्भवः।
येनैकचुलुके दृष्टौ दिव्यौ तौ मत्स्यकच्छपौ॥"(श)

यथा वा—"आसीदञ्जनमत्रेति पश्यामि तव लोचने।
भाविभूषणसम्भारां साक्षात् कुर्वे तवाकृतिम्॥"(ष)

न चायं प्रसादाख्यो गुणः, भूतभाविनोः प्रत्यक्षायमाणत्वे तस्याहेतुत्वात्; न च अद्भुतो रसः, विस्मयं प्रति

मत्वर्थे ठन्; यत्तु, सोऽवाप्तीति विग्रहप्रदर्शनं, तन्न; "सप्तम्याञ्च न तौ स्मृतौ" इति भाष्यकारोक्तेः] उदाहृतम्।

(श) अद्भुतस्य प्रत्यक्षायमाणत्वे भाविकमाह, मुनिरिति।—महात्मा कुम्भसम्भवः,—कुम्भोद्भूतः, योगीन्द्रः,—ऋषिश्रेष्ठः, मुनिः,—अगस्त्यः, ("अगस्त्यः कुम्भसम्भवः" इत्यमरः) जयति—सर्वोत्कर्षेण वर्त्ततामित्यर्थः, येन—अगस्त्येन, एकचुलुके—एकस्मिन् गण्डूषे, तौ—प्रसिद्धौ, दिव्यौ—श्रीविष्णोरवतारौ, मत्स्यकच्छपौ दृष्टौ, समुद्रपानकाले गण्डूषे समुद्रेण सह पातालनिलययोर्मत्स्यकूर्मयोरप्युत्थानादिति भावः। अत्र चुलुकीकृतसमुद्रे दृश्यमानदिव्यमत्स्यकच्छपरूपमद्भुतं वस्तु मुनिश्च वर्णनाविशेषवशेन सन्निकृष्टश्रोतॄणां प्रत्यक्षवद्भासते इति अतीतपदार्थस्य अद्भुतस्य प्रत्यक्षायमाणत्वम्। यथा वा सेतुबन्धे (५।२८)—"क्षुभितजलशिष्टसारो मुखनिर्धावितप्रसारितोल्कानिवहः। आकृष्यमाण एव ज्ञायते पतित इति सागरे रामशरः॥" इति। अत्र बाणस्य समुद्रमध्यपाते भाविन्यपि तस्मात् प्रागेव शरपातस्य लौकिकप्रत्यक्षमुक्तं, श्रीरामप्रभावातिशयवर्णने तात्पर्य्यमिति बोध्यम्।

(ष) भूतभाविनोः प्रत्यक्षायमाणत्वे भाविकमाह, आसीदिति।—अत्र अञ्जनमासीदिति तव लोचने—नयने, पश्यामि, तव आकृतिञ्च भाविनः,—भविष्यन्तः, भूषणानां सम्भाराः,—समूहाः यस्यास्तादृशीं, साक्षात् कुर्वे—पश्यामीत्यर्थः। अत्र पूर्वार्द्धे भूतस्य परार्द्धे भाविनः प्रत्यक्षायमाणत्वं नयनशोभाविशेषवशेनाञ्जनं सौन्दर्य्यातिशयवशीकृतस्य धनिनः पत्युरादरातिशयेन भूषणसम्भारमनुमाय सख्या तथाऽभिहितं, यथा भूतभाविनावपि अञ्जनभूषणसम्भारौ सन्निकृष्टश्रोतॄणां प्रत्यक्षवद्भासेते। केचित्तु—"यौवनोद्भेदादञ्जनं विनाऽपि चक्षुषि तच्छोभा, भूषणाभावेऽपि वपुषि तच्छोभारम्भः" इति व्याचक्षते, तन्न; तादृशार्थस्य व्यञ्जकाभावेनाप्रतीतेः, भूतभाविनोरञ्जनभूषणयोः प्रत्यक्षायमाणत्वे तत्कृतचारुत्वे एव तात्पर्य्यात्।

अस्य हेतुत्वात्; न च अतिशयोक्तिरलङ्कारः, अध्यवसायाभावात्; न च भ्रान्तिमान्, भूतभाविनोर्भूतभावितयैव प्रकाशनात्; न च स्वभावोक्तिः, तस्य लौकिकवस्तुगतसूक्ष्मधर्मस्वभावस्यैव यथावद्वर्णनं स्वरूपम्; अस्य तु वस्तुनः प्रत्यक्षायमाणत्वरूपो विच्छित्तिविशेषोऽस्तीति, (स) यदि पुनर्वस्तुनः क्वचित् स्वभावोक्तावपि अस्या विच्छित्तेः सम्भवस्तदोभयोः सङ्करः।

"अनातपत्रोऽप्ययमत्र लक्ष्यते
सितातपत्रैरिव सर्वतो वृतः।
अचामरोऽप्येष सदैव वीज्यते
विलासबालव्यजनेन कोऽप्ययम्॥" (ह)

(स) ननु सन्निकृष्टपदार्थस्य वर्णनातः प्रत्यक्षायमाणत्वं तदा भवति, यदि प्रसन्नार्थाः शब्दाः प्रयुज्यन्ते, एवं सति प्रसादाख्यो गुण एवायमित्यभिप्रायेणाशङ्कते, न चायं प्रसादाख्यो गुण इति।—भूतभाविनोरित्यद्भुतस्याप्युपलक्षणम्। तस्य—प्रसादगुणस्य। अद्भुतस्य प्रत्यक्षायमाणत्वपक्षे शङ्कते, न चाद्भुतो रस इति।—विस्मयं—चमत्कारं, चमत्कारायोगे रसरूपत्वासम्भवादिति भावः। नन्वत्र वर्णनीयगतः कोऽप्यतिशयः प्रतीयते इत्यतिशयोक्तिरेवायमित्याशङ्कते, न चातिशयोक्तिरिति।—अध्यवसायाभावात्—अभेदारोपाभावात्। ननु भूतभाविपदार्थाभाववति तत्प्रकारकप्रतीतिरत्रास्तीति भ्रान्तिमानेवायमित्याशङ्कते, न च भ्रान्तिमानिति।—भूतभाविनोर्वर्त्तमानत्वेन भानेऽपि भ्रमः सम्भवतीति तद्वारणाय भूतभावितयैवेत्युक्तं, प्रकाशनात्—तद्वति विषयीकरणात्। तस्य—स्वभावोक्त्यलङ्कारस्य। सूक्ष्मेति कविमात्रवेद्य इत्यर्थः। यथावद्वर्णनं—सम्भावनाऽतिक्रमेण वर्णनम्। अस्य—भाविकालङ्कारस्य तु। विच्छित्तिविशेषोऽस्तीति।—अत्र इतिशब्दो हेतौ इति।

(ह) अनातपत्र इति।—अयम् अनातपत्रः,—छत्ररहितोऽपि, अत्र—अस्मिन् समये, स्थाने वा, सितातपत्रैरिव—श्वेतच्छत्रैरिव, सर्वतः,—समन्तात्, वृतः,—आवृतः, लक्ष्यते, एष अचामरः,—चामरपरिहीणः अपि, सदैव—नित्यमेव, विलासबालव्यजनेन—शुभ्रतया दीप्यमानचामरेण इत्यर्थः, वीज्यते, अतः कोऽपि—कश्चोकसामान्यगुण इत्यर्थः, अयं—पुरुष इति भावः।

अत्र प्रत्यक्षायमाणत्वेन वर्णनात्प्रायमलङ्कारः, वर्णनाविषयेण प्रत्यक्षायमाणत्वस्य अस्य स्वरूपत्वात्। यत् पुनरप्रत्यक्षायमाणस्यापि वर्णने प्रत्यक्षायमाणत्वं, तत्र अयमलङ्कारो भवितुं युक्तः, यथोदाहृते "आसीदज्ञनम्" इत्यादौ। (क)

(क) अत्रेति।—अत्र सदनुमानविषयेण वस्तुः प्रत्यक्षायमाणयोः सितातपत्रचामरयोर्वर्णनं, न तु वर्णनाविषयेण श्रोतृणां तयोः प्रत्यक्षायमाणत्वम् इति नास्ति भाविकावसर इति भावः। अज—भाविकालङ्कारस्येत्यर्थः। ननु एवम् "आसीदज्ञनम्" इत्यादावपि सदनुमानविषयेण प्रत्यक्षायमाणत्ववर्णनम् इति नास्य विषयः? इत्यत आह, यत्पुनरिति।—यत्—यदा, धर्मिसन्निधानादिरूपहेत्वभावदशायामित्यर्थः। वर्णने इति।—वर्णने—वाक्येनाविषयीकृते सतीत्यर्थः। तत्रायमिति—तत्राप्ययमित्यर्थः। न चातपत्रयोरपीत्यादावपि उक्तरीत्या भाविकप्रसक्तिरिति वाच्यम्; श्रोतृणां धर्मिसन्निधानाभावेन प्रत्यक्षायमाणत्वाभावात् तत्रापि प्रकृतोपयोगित्वेन विवक्षितत्वात् इति। अत्र कौमुदीग्रन्थः,—ननु कारणाभावेऽपि कार्योत्पत्तिरूपायाः विभावनायाः कोऽत्र भेदः? लौकिकप्रत्यक्षं प्रति विषयस्य हेतुतया अनागतातीतविषयरूपहेत्वतिरिक्तेऽपि तत्प्रत्यक्षरूपकार्योत्पत्तिः। एवं द्वितीयभेदव्याप्तिग्रन्थोक्तावेवान्तर्भावः, कारणात् प्रागेव कार्योत्पत्तेरभिधानात्। न चात्र "यः कौमारहरः—" इत्यादिवत् हेत्वभावलेशोक्तिः नास्तीति वाच्यम्; "आसीदज्ञनमेवेति" "विरतेऽपि गीतसमये" इत्यादौ तत्तद्वस्तुभाव्यर्थक्रियोत्पत्तेर्हेतूनां अनुत्पादाभावबोधनेन हेत्वभावोक्तिसत्त्वात्; "अनातपत्रोऽप्ययमत्र लक्ष्यते" इत्यादौ तथैव तदभावबोधनात् इति चेत्; उच्यते—कारणताऽवच्छेदकरूपावच्छिन्नप्रतियोगिताकसंसर्गाभावत्वेन हेत्वभावोक्तौ विभावना, इह तु उक्तरूपावच्छिन्नप्रतियोगितात्वं अनुपादानाभावयोः न सम्भवत्येव, तयोः सामान्याभावावच्छिन्नप्रतियोगित्वाभावात्; "अनातपत्रोऽपि" इत्यादौ तु विभावनासत्त्वेऽपि न क्षतिः। एवं द्वितीयभेदव्याप्तिग्रन्थोक्तावपि नात्यन्तासङ्गतिः, विषयतातिरिक्तसम्बन्धावच्छिन्नकार्यतानवच्छेदकधर्मावच्छिन्नतादात्म्यातिरिक्तसम्बन्धावच्छिन्नकारणताऽवच्छेदकधर्मावच्छिन्नात् प्रागुपपत्तेर्व्याप्तिग्रन्थोक्तेरभ्युपगम्यत्वात्, "कारणात् प्राक् कार्योत्पत्तिः" इत्यनेन प्रकारद्वयोक्तावेवातिव्याप्तिग्रन्थोक्तिः; भाविविषयप्रत्यक्षत्वेनोक्तौ भाविकानित्यस्वीकारात्, तन्मुखाभिधानाभिधानयोः एव नियामकत्वात्; किञ्च, तत्रत्यं कार्यतानवच्छेदकं कार्याभावरूपत्वं प्रत्यक्षायमाणप्रतियोगित्वेनोक्तं यत्कारणं तन्निरूपितकार्यतानवच्छेदकम्, अत्र तु

लोकातिशयसम्पत्ति-वर्णनोदात्तमुच्यते।
यद्वाऽपि प्रस्तुतस्याङ्गं महतां चरितं भवेत्॥७७३॥ (ख)

क्रमेण उदाहरणम्—

"अधःकृताम्बोधरमण्डलानां यस्यां शशाङ्कोपलकुट्टिमानाम्।
ज्योत्स्नानिपातात् चरतां पयोभिः केलीवनं वर्द्धिमुरीकरोति॥"(ग)

प्रागभावप्रतियोगित्वेन यत्कारणमुक्तं, तदतिरिक्तकारणतायाः प्रतियोगिसमवायित्वाऽसम्बन्धेदत्वम् इति भेदः इति दिक्।

(ख) उदात्तमाह, लोकेति।—लोकातिशयसम्पत्तिवर्णना—लोकानतिशेते—अतिक्रामति, या सम्पत्तिः,—धनसमृद्धिः, तस्याः वर्णना—व्यञ्जनया ज्ञापनम्, अलौकिकसमृद्धिवर्णनमिति यावत्; अथ विधमुदात्तमाह, यद्वेति।—यद्वा—महतां—प्रस्तुतसम्बन्धिमहतामित्यर्थः, चरितं—महत्त्वप्रतिपादकसाधर्म्यं, प्रस्तुतस्य—प्रकृतस्य, वर्णनीयस्य इत्यर्थः, अङ्गं भवेत्, तदपि उदात्तम् उच्यते, प्रस्तुतमहत्त्वव्यञ्जकप्रस्तुतमहत्त्वसम्बन्धिचरितमुदात्तमित्याशयः। स्वभावोक्तौ भाविके च यथावद्वस्तुवर्णनं, तद्विपर्यये नारोपितवस्त्वात्मन उदात्तस्यावसरः; तत्र चमत्क्रियमाणविभूतियुक्तस्य वस्तुनो वर्णनं कविप्रतिभोत्थापितमैश्वर्यचमत्कृतम् उदात्तमिति तात्पर्यम्।

(ग) अथ इति।—नगरीवर्णनमिदम्। यस्यां—पुर्याम्, अधःकृतानि—नीचैः कृतानि, अम्बोधरमण्डलानि—मेघघटलानि यैः,ताहशानाम्, अभ्रङ्कषाणामित्यर्थः, ज्योत्स्नानिपातात्—गृहमध्ये कौमुदीप्रभापातात् इत्यर्थः, चरतां—लवतां, शशाङ्कोपलकुट्टिमानां—चन्द्रकान्तमणिनिर्मितगृहभूमीनां, पयोभिः,—जलैः, ("पयः क्षीरं पयोऽम्बु च" इत्यमरः) केलीवनं—क्रीडाकाननं, वर्द्धिम् उरीकरोति—अङ्कीकरोति, प्राप्नोतीत्यर्थः। चन्द्रकिरणसम्पर्कात् चन्द्रकान्तमणेर्निस्राव: प्रसिद्धः। अत्र क्षीराब्धि समृद्धातिशयो व्यङ्ग्यः। उपजातिः छन्दः। यद्वा वा—"मुक्ताः केलिविसूत्रहारगलिताः सम्प्राप्य नीलोपलं मत्वरक्तसहाङ्गिकाचारुतया:। दूराद्याकृतबीजमञ्जुतधियः खर्वन्ति केलीयुवा यस्मिन्नङ्गनेषु भोजनृपते-स्तस्यानङ्गीयितम्॥" इति। यद्वा वा—"नीलीवल्लीच्छदनमिषितं यत्र यत्राङ्गनानां बाहः शोभादलितकरेष्वाधिपत्यं प्रियेषु। अर्चिस्तुङ्गानभिमुखमपि प्राप्य रत्नप्रदीपान् क्रीडन्तीनां भवति विफलप्रेरणश्चूर्णमुष्टिः॥" इति।

"नाभिप्रभिन्नाम्बुरुहासनेन संस्तूयमानः प्रथमेन धात्रा ।
अमुं युगान्तोचितयोगनिद्रः संहृत्य लोकान् पुरुषोऽधिशेते॥"(घ)

रसभावौ तदाभासौ भावस्य प्रशमस्तथा ।
गुणीभूतत्वमायान्ति यदाऽलङ्कृतयस्तदा ॥
रसवत् प्रेय ऊर्जस्वि समाहितमिति क्रमात् ॥७७४॥ (ङ)

(घ) नाभीति ।—समुद्रवर्णनमिदम् । युगान्ते—कल्पान्ते, उचिता—अभ्यस्ता, योगनिद्रा यस्य तादृशः, पुरुषः,—नारायणः, नाभेः,—नाभिदेशात्, प्रभिन्नम्—उत्थितम्, उत्पन्नमिति यावत्, यत् अम्बुरुहं—पद्मं, तदेव आसनं यस्य तथोक्तेन, प्रथमेन धात्रा—आदिस्रष्ट्रा, ब्रह्मणा इत्यर्थः, संस्तूयमानः सन् लोकान्—जगन्ति, संहृत्य—स्वकुक्षौ सङ्गोप्येत्यर्थः, अमुं—समुद्रम्, अधिशेते । अत्र प्रस्तुतसमुद्रस्य महत्त्वव्यञ्जकं सर्वलोकसंहारकस्य महतो हरेः चरितम् अङ्गम् । रघुवंशस्येदं पद्यम् । यथा वा—"तदिदमरण्यं यस्मिन् दशरथवचनानुपालनव्यसनी । निवसन् बाहुसहायश्चकार रक्षःक्षयं रामः ॥" अत्रारण्ये वर्णनीये रामचरितमङ्गत्वेन वर्णितम् इति ।

(ङ) उदात्ते महापुरुषचरितस्य चित्तवृत्तिरूपत्वात् चित्तवृत्तिविशेषस्वभावत्वाच्च रसादीनामिह तदलङ्काराणां प्रस्तावः, अत एव चत्वारोऽलङ्काराः युगपत् लक्षिताः, तद्यथा रसेति ।—रसः,—शृङ्गारहासाद्यन्यतमः, विभावानुभावव्यभिचारिभिः प्रकाशितो रत्यादिश्चित्तवृत्तिविशेष इति यावत्, भावः,—विभावानुभावाभ्यां सूचितः निर्वेदादिः त्रयस्त्रिंशद्भेदाः, देवादिविषयो रत्यादिश्च तौ, तदाभासौ—तयोराभासौ, शृङ्गाराद्यन्यतमाभासः निर्वेदाद्यन्यतमाभासश्च, आभासत्वम्—अविषयप्रवृत्त्याऽनौचित्यम् इत्यर्थः, भावस्य—निर्वेदाद्यन्यतमस्य अभिचारिभावस्य, प्रशमः,—उक्तप्रकाराभ्यां निवर्त्तमानत्वेन प्रशाम्यदवस्था इति यावत्, तत्रापि रसस्य परविश्रान्तिरूपत्वात् सा न सम्भवति इति परिशिष्टभेदविषयः भावतदाभासतत्प्रशमविषय इत्यर्थः द्रष्टव्यः इति भावः, इत्येते यदा गुणीभूतत्वं,—गुणीभावं, गुणीभूतरसान्तरादीनामुत्कर्षाधायकत्वेन रसाङ्गत्वमित्यर्थः, आयान्ति—रसान्तराङ्गतयाऽप्रधाना भवन्तीति यावत्, तदा क्रमात् रसवत्—रसो विद्यते यत्र व्यापारात्मनि निबन्धे तदिति विग्रहः, तथा हि, यत्र तु रसोऽन्यस्मिन्नर्थे अङ्गत्वं भजति, तत्रान्योपकारकत्वात् एष इति भावः, प्रेय इति भावस्य तथात्वे इत्यर्थः, रसाभासो भावाभासश्चेत्येतद्द्वयम् ऊर्जस्वीति, तदाभासयोरितराङ्गत्वे इत्यर्थः, भावप्रशमः समाहितं, भावप्रशमस्य इतराङ्गत्वे इत्यर्थः,

तदाभासौ—रसाभासौ भावाभासश्च। तत्र रसयोगाद्रसवदलङ्कारो यथा—"अयं स रशनोत्कर्षी—" इत्यादि। अत्र शृङ्गारः करुणस्याङ्गम्। एवमन्यत्रापि। (च) प्रकृष्टप्रियत्वात् प्रेयः। यथा मम—

"आमीलितालसविवर्त्तिततारकाक्षीं
मत्कण्ठबन्धनदरश्लथबाहुवल्लीम्।
प्रस्वेदवारिकणिकाचितगण्डबिम्बां
संस्मृत्य तामनिशमेति न शान्तिमन्तः॥" (छ)

"न भावहीनोऽस्ति रसः" इत्यादिना रसव्यभिचारिभावयोरव्यभिचारिरसालङ्कार्यालङ्कारभावासम्भवात् तयोरङ्गाङ्गिभावेनैतदलङ्कारप्रकरण इति ज्ञेयम्, इति अलङ्कृतयः, भवन्तीति शेषः, इत्यलङ्कारव्यपदेश्यता भजन्ते इत्यर्थः।

(च) तत्रेति। रसवत उदाहरणमाह, अयमिति।—व्याख्यातोऽयं प्राक् १२७ पृ०। यथा वा—"किं हासेन? न मे प्रयासि पुनः प्राप्तश्चिराद्दुर्लभं कोपं लम्भय! प्रवासकर्षिता? कैतवादि दूरीकृतः?। स्वप्नान्तेऽपि वा वदन् प्रियतमव्यासक्तकण्ठग्रहो बुद्धा रोदिति रिक्तबाहुयुगलस्तारं रिपुस्त्रीजनः॥" अत्र हि करुणो रसो विप्रलम्भशृङ्गाराङ्गभावं प्राप्त इति। एवमन्यत्रापीति—वीराद्भुतयोरङ्गत्वेऽप्युदाहरणान्युन्नीयानीत्यर्थः। करुणस्य भावाद्यङ्गत्वे उदाहरणं गृहीभूतव्यङ्ग्यप्रकरणे "नालोऽयं प्रणयिनीम्—" इत्यादि स्वयमेवोन्नेष्यम्।

(छ) आमीलितेति।—सख्यायं प्रति कस्यचिदुक्तिः। आमीलिते—ईषन्मुकुलिते, अलसं यथा तथा विवर्त्तिते—चालिते, तारके यस्याः तादृश्यौ अक्षिणी यस्यास्तां, सुरतान्ते निद्रावेशपरायणामिति भावः, यद्वा—अलसेन—रसावेशजनितालस्येन, विवर्त्तितं—स्थिरीकृतं, तारकं यस्य तादृशमक्षि यस्याः सा, तस्या मत्कण्ठबन्धने—कण्ठालिङ्गने, दरश्लथा—ईषच्छिथिला, बाहुवल्ली यस्यास्तादृशीं, तथा प्रस्वेदवारिकणिकाभिः,—सुरतश्रमात् सञ्जातप्रकृष्टस्वेदबिन्दुभिः, चर्चितं—व्याप्तं, गण्डबिम्बं—कपोलमण्डलं यस्याः तादृशीं, तां—मत्कान्तां, अनिशं—सततं, संस्मृत्य अन्तः,—मनःकरणं, शान्तिं न एति—न गच्छति। वसन्ततिलका वृत्तम्। यथा वा— गाढालिङ्गनवासनोन्नतकुचग्रोन्निद्ररोमाङ्कुरा सान्द्रस्वेदरसातिरेकविगलच्छोणन्नितम्बाम्बरा। मा मा मानद! माऽति मामकमिति व्यामोहरोन्नापिनी सुप्ता किं

अत्र सम्भोगशृङ्गारः स्मरणाख्यभावस्याङ्गं, न च विप्रलम्भस्य। ऊर्जः,—बलम्, अनौचित्यप्रवृत्तौ तदवास्तीत्यूर्जस्वि। यथा—

"वने ऽखिलकलाऽऽसक्ताः परिहृत्य निजस्त्रियः।
त्वद्वैरिवनिताबृन्दे पुलिन्दाः कुर्वते रतिम्॥" (ज)

अत्र शृङ्गाराभासो राजविषयरतिभावस्याङ्गम्। एवं भावाभासोऽपि। समाहितं परीहारः। (झ) यथा—

लु! मृता नु किम! मनसि मे लीना विलीना नु किम!!॥" अत्र नायिकायां दर्शाख्यो व्यभिचारिभावः। यथा वा—"तदक्लान्तपाटलोल्लसितया दृष्ट्या क्व निष्पत्यताम? तदाकस्मिकविघ्नाभियोगपरयोः स्याद्यं कुतः कर्तयोः?। एभिस्त्वपरिरम्भनिर्भरतरैरङ्गैः कथं क्षीयताम? कष्टं तद्विरहेण सम्प्रति वयं क्लेशासवस्था गताः॥" अत्र चिन्ताख्यो व्यभिचारिभावः।

(ज) वने इति।—राजस्तुतिरियम। हे राजन्निति वाक्यशेषः, पुलिन्दाः,—किरातभेदाः, म्लेच्छजातिविशेषा इति यावत्, वने अखिलकलासक्ताः,—चतुःषष्टिकलासु निपुणा इत्यर्थः, निजस्त्रियः परिहृत्य—परित्यज्य, तव वैरिणां—शत्रूणां, वनिताबृन्दे—जायासमूहे, रतिं—विहारं, कुर्वते। यथा वा—"देव! त्वत्परिघमिषपरिघवमानीकैकसत्तामनां जाल्मेषु पुलिन्दराजनिवहप्राणप्रियाणामपि। तेषामेव तवाऽवरोधनवधूलावण्यमुत्पश्यतां तेषाञ्चापि परस्परं कथमहो! जातानुरागक्षतिः?"॥ अत्र प्रवरीनिष्ठवैरिराजविषयकः प्रवरनिष्ठवैरस्त्रीविषयकश्च रत्याभासः। अविनिष्ठराजविषयकभावस्य इति सारः। यथा वा—"दूराकर्षणमोहनास्त्र इव मे तन्वाङ्गि यातेऽसुरिं चेतः कालकलामपि प्रकुरुते नावस्थितिं यां विना। एतैराकुलितस्य विप्लततरैरङ्गैरनङ्गातुरैः सन्धत्ते कदा तदाश्लिष्यन्निस्तेतसं वेत्सि स्फुटम्॥" अत्र रावणस्याभिलाषो विषयभूतः, औत्सुक्यञ्च व्यभिचारिभावः।

(झ) अत्रेति।—अत्र—"वनेऽखिल" इत्यादिश्लोके, परीहारविषयत्वाच्छृङ्गाराभासः। एवं भावाभासोऽपीति—भावाभासश्चाङ्गमेवेत्यपीत्यर्थः। एतदुदाहरति यथा—'वन्दीकृत्य नृप! द्विषां सुमहतश्चक्रं प्रेक्षसे। ज्वलन्ति प्रलयन्ति वाणि पारतन्त्र्यानि ते वैरिणः। यत्प्राकं सुकृतैर्हृता विपतितोऽस्योत्पत्त्यवारा निधे! विध्वस्ता विपदोऽखिलाऽदितिसुतैः प्रत्यर्थिभिः कृपणैः॥" अत्र राजविषयरतिभाव-

"अविरलकरवालकम्पने-
र्भ्रुकुटीतर्जनगर्जनैर्मुहुः।
दृष्टे तव वैरिणां मदः
स गतः क्वापि तवेक्षणे क्षणात्॥" (अ)

अत्र मदाख्यभावस्य प्रशमो राजविषयरतिभावस्याङ्गम्।

भावस्य चोदये सन्धौ मिश्रत्वे च तदाख्यकाः॥७७५॥

तदाख्यकाः,—भावोदय-भावसन्धि-भावशबलनामानोऽलङ्काराः। (ट) क्रमेण उदाहरणम्—

ओत्तराङ्योत्थो भावः प्रभुविषयत्वादाभासरूपोऽङ्गम्। परीहारः,—परित्यागः, विषय इति यावत्।

(अ) अविरलेति।—हे राजन्! अविरलैः,—घनैः, सततैरित्यर्थः, करवालानाम्—असीनां, कम्पने:,—आस्फालनैः, तथा मुहुः,—पुनः पुनः, भ्रुकुटीभिः तर्जनैः गर्जनैश्च तव वैरिणां मदः,— गर्वः, दृष्टे—दृष्टः, सः,—मदः, क्षणात् तव ईक्षणे—दर्शनमात्रे, क्वापि गतः,—विलयं प्राप्त इत्यर्थः। वैतालीयं वृत्तम्—"षड्भिर्मात्राभिः समे चतुर्भिः सप्ते खुर्नौ निरन्तराः। न समाऽत्र परान्विता कला वैतालीयेऽन्ते रलौ गुरुः॥" इति च तल्लक्षणम्। यथा वा—"अग्निरेव जले विशेषमधुना व्यावर्त्तितेच्छं मनो दूयं वा अग्निः कुले कथमिति त्रिशो विमर्शो मया। इत्येव बहुदोषनाशिगदनं यत्काव्यमक्षोक्तं तन्मा भून्मुखिरोहिणी मयि सुधेवाभ्यर्थनाविस्तरः॥" अत्र विनयभावस्याऽनर्गलनिष्ठुरविषयकभावस्येति समाहितम्।

(ट) भावोदयादीनामलङ्कारत्वमाह, भावस्येति।—भावस्य उदये सन्धौ मिश्रत्वे च, अलङ्काराङ्गीभूतत्वमायाति सति चेत्यनुवर्त्तते, [अलङ्गायातीति व्युत्पत्त्यनुसरणमत्र, योग्यत्वात्] तदाख्यकाः,—तन्नामानः, अलङ्काराः भवन्ति इति शेषः। एवं भावोदयभावशबलत्वोरलङ्कारत्वं विशेषसंज्ञाऽनभिधानात् स्वसंज्ञयैवेति शेषम्। तथा चाह—"भावोदयो भावसन्धिर्भावशबलता च पृथगलङ्कारः" इति। अस्यार्थः,—भावस्य—उक्तरूपस्य, उदयः,—उद्गमावस्था, सन्धिः,—द्वयोर्विरुद्धयोः अविरोधिनोः निश्चयः, शबलता च—बहूनां पूर्वोपनिबन्धेन मिश्रणं, एते च पृथक्—रसवदादिभ्यो भिन्नाः, अलङ्कारा इति शेषम्। एतत्प्रतिपादनं चोद्भटादिभिरेषां पृथगलङ्कारत्वेनाऽनिर्दिष्टत्वात्, अत एव च सहरसंसृष्टिवेद्यत्वेन, एते च वर्णालङ्काराः पृथग्वैशद्येनाऽनु-

"मधुपानप्रवृत्तास्ते सुहृद्भिः सह वैरिणः।
श्रुत्वा कुतोऽपि त्वन्नाम लेभिरे विषमां दशाम्॥" (ठ)

अत्र वासोदयो राजविषयरतिभावस्याङ्गम्। (ड)

"जन्मान्तरीणरमणस्याङ्गसङ्गसमुत्सुका।
सलज्जा चान्तिके सख्याः पातु नः पार्वती सदा॥" (ढ)

'अत्रौत्सुक्यलज्जयोश्च सन्धिर्देवताविषयरतिभावस्याङ्गम्।

"पश्येत् कश्चिन्न चपल रे! का त्वरा? ऽहं कुमारी
हस्तालम्बं वितर हहहा! व्यत्क्रमः क्वासि यासि?।
इत्थं पृथ्वीपरिवृढ! भवद्विद्विषोऽरण्यवृत्तेः
कन्या कश्चित् फलकिसलयान्याददानाऽभिधत्ते॥" (ण)

द्वारा इति सर्वालङ्कारशब्देनोक्तं, संसृष्टिसङ्करयोर्हि सम्पृक्ततयाऽलङ्काराणां स्थितिः, तदेतल्लक्षणप्रतिपादनमेतत् इति सर्वेऽलङ्काराः।

(ठ) मध्विति।—ते वैरिणः,—प्रबलाः, सुहृद्भिः,—सखिभिः सह, मधुपाने—मद्यपाने, प्रवृत्ताः,—उद्यताः सन्तः, कुतोऽपि—कस्मादपि, जनादिति शेषः, तव नाम श्रुत्वा विषमां—वैक्लव्यकारिणीं, दशाम्—अवस्थां, लेभिरे—प्राप्तवन्तः। यद्वा वा—"सार्धं कुरङ्गकदृशां मधुपानलीलां कर्तुं सुहृद्भिरपि वैरिणि च प्रवृत्ते। अन्यामिवापि तव नाम विभो! गृहीतं केनापि तत्र विषमामवरोदवस्थाम्॥" इत्यत्र वासोदयो राजविषयरतेरङ्गम्।

(ड) अत्रेति।—अत्र वासस्य भावस्य उदयः राजविषयरतेरङ्गम्।

(ढ) जन्मान्तरीणेति।—जन्मान्तरीणस्य—पूर्वजन्मनि भूतस्य, रमणस्य—पत्युः स्मरस्य, सङ्गसङ्गे समुत्सुका—उत्कण्ठिता, अत एव सख्याः अन्तिके—समीपे, सलज्जा च पार्वती सदा नः,—अस्मान्, पातु—रक्षतु। यद्वा वा—"वासेन नारीजनमानसानां द्वारा कृपावधारानव दक्षिणेन। उत्पुंसयन्नेवतरः करेण कर्तव्यमूढः सुभटो बभूव॥" अत्र लेखाख्यरतिभावस्यौत्सुक्यस्य सन्धिः।

(ण) पश्येदिति।—स्वाभीष्टं कञ्चित् प्रबलबलवन्तं प्रति प्रतिपक्षराजभयेन वनं गतस्य कस्यचित् राज्ञः कुमार्याः कन्यायाः वाक्यवर्णनप्रसङ्गेन राज्ञः स्तुतिरियम। कश्चन पश्येत्, चपल!—रे दुर्विनीत इत्यर्थः, चल—नश्य, इतोऽपसरेत्यर्थः, का त्वरा?—औत्सुक्यम्? अहं कुमारी—बालापरिचया, हस्तालम्बं वितर—हस्तं

अत्र शङ्काऽसूयाधृतिस्मृतिश्रमदैन्यविबोधौत्सुक्यानां शबलता राजविषयरतिभावस्याङ्गम्। (त) इह केचिदाहुः,—"वाच्यवाचकरूपालङ्करणमुखेन रसाद्युपकारका एवालङ्काराः, रसादयस्तु वाच्यवाचकाभ्यामुपकार्य्या एवेति न तेषामलङ्कारता भवितुं युक्ता" इति। अन्ये तु—"रसाद्युपकारमात्रेणेहालङ्कृतिव्यपदेशो भाक्तश्चिरन्तनप्रसिद्ध्या अङ्गीकार्य्य एव" इति। अपरे च—"रसाद्युपकारमात्रेणालङ्कारत्वं मुख्यतो रूपकादौ तु वाच्याद्युपधानम् अजागलस्तनन्यायेन" इति। अभियुक्तास्तु—"स्वव्यञ्जकवाच्यवाचकाद्युपकृतैरङ्गभूतैः रसादिभिरङ्गिनो रसादेर्वाच्यवाचकोपस्कारद्वारेणोपकुर्वद्भिरलङ्कृतिव्यपदेशो लभ्यते; समासोक्तौ तु नायकादिव्यवहारमात्रस्यैवालङ्कृतिता, न तु आस्वादस्य,

गृहाणेत्यर्थः, हहहा—दैन्यसूचकमव्ययमेतत्, व्युत्क्रमः,—वैपरीत्यम्, अहं राजकन्या, कथमिममधमजातिं स्पृशामीति स्वस्या अवस्थाविपर्य्यय इति भावः, असि—त्वं, क्व—कुत्र, यासि? पृथ्वीपरिवृढ।—हे पृथिवीपते! अरण्यवृत्तेः,—वनाश्रयस्य, भवद्विद्विषः,—भवद्रिपोः, कन्या फलकिसलयानि—फलनवपल्लवानि, ("पल्लवोऽस्त्री किसलयम्" इत्यमरः) आददाना—चिन्वती सती, कञ्चित्—शबरयुवानमिति भावः, इत्थम्—उक्तप्रकारम्, अभिधत्ते—कथयति। मन्दाक्रान्ता वृत्तम्। यथा वा—"अप्यादेर्जगतां नवो लवणिमा सीदन्ति गात्राणि किम्? रज्यन्ते न हि मानसानि विषये प्रत्यङ्गिरुद्धात्मनाम्। धिक् वृत्तिं मनसः स्पृहातरलितां लभ्यत वाऽयं मया प्रेयानित्यचलाधिराजतनयाचिन्ता चिरं पातु वः॥" इत्यत्र भगवदालोकनेन भगवत्या महेश्वर्य्या विस्मयश्रममतिनिर्वेदोत्कण्ठानां शाबल्यं कविनिष्ठस्य महेश्वरीविषयकस्य भक्त्यपरपर्य्यायस्य रतिभावस्याङ्गम्। यथा वा—"क्वाकार्य्यं शशलक्ष्मणः—" इत्यादि, अत्र वितर्कौत्सुक्यमतिस्मरणशङ्कादैन्यधृतिचिन्तानां भावानां शबलता, तदेते चित्तवृत्तिगतत्वेनालङ्कारा दर्शिताः इति ज्ञेयम्।

(त) अत्रेति।—पश्यत् कश्चिदिति शङ्का, चल चपल रे इति असूया, का त्वरेति धृतिः, अहं कुमारीति स्मृतिः, हस्तालम्बं वितर इति श्रमः, हहहेति दैन्यं, व्युत्क्रम इति विबोधः, क्वासि यासीति औत्सुक्यम्, एतेषां शबलता—मिश्रणम्।

तस्योक्तरीतिविरहात्" इति मन्यन्ते। अत एव ध्वनिकारैरुक्तम् (थ)—

(थ) इदानीं रसवदादीनाम् अलङ्कारत्वमङ्गीकुर्वतां वैयाधिकरण्यमाह, दृष्टीति।—वाच्यवाचकरूपालङ्कारद्वयमुखेन—वाच्यः,—अभिधेयोऽर्थः, स च वाचकः,—अभिधायकः शब्दः, स चेति तावेव रूपं यस्य तादृशस्य, वाच्यस्येत्यर्थः, यदलङ्करणं—शोभोत्पादनं, तन्मुखेन—तद्द्वारा, शब्दार्थसहरूपशोभाजननद्वारेत्यर्थः, रसादीनां—रस-भाव-रसाभास-भावाभासादीनाम्, उपकारकाः,—पोषका एव, रसवदादय इति शेषः, अलङ्काराः,—अलङ्कारपदव्यपदेश्या भवन्तीति भावः। रसादयः,—रसभावतदाभासभावप्रशमभावोदयभावसन्धिभावशबलताः पूर्वोक्ताः, पुनः वाच्यवाचकाभ्याम्—अर्थशब्दाभ्यां, उपकार्याः,—अलङ्कार्याः एव, न तु तयोरुपकारकाः, विनालङ्कारा इति व्यपदेष्टुं शक्येरन्निति भावः, इति—अनात् कारणात्, तेषां—रसादीनाम्, अलङ्कारता—अलङ्कारत्वव्यवहारितया लोकार्थत्वं, भवितुं न—नैव, युक्ता इति केचित् आहुः। अन्ये पुनः "रसादीनामुपकारः तन्नाम्नैव इह—रसवदादौ, यः अलङ्कृतेर्व्यपदेशः,—अलङ्कारपदप्रयोगः, सः भाक्तः,—गौणः, चिरन्तनप्रसिद्ध्या—प्राचीनमतेन। एतेभ्योऽपि भिन्नानां मतमाविष्करोति, रसाद्युपकारकमावेक्षेति।—अलङ्कारत्वमिति मुख्यव्यवहारमिति भावः। वाच्यादुपधानं—वाच्यवाचकालङ्कारधर्मनिबन्धनेति भावः। अनासक्तजनन्यायेनेति—यथा छागस्य गलदेशवर्त्ती स्तनः दुग्धानुपयोगितया निष्प्रयोजनः, तथा रसादेरुपकारकत्वाभावेन प्रकृतानुपयोगी इति निष्प्रयोजन इत्यर्थः। अभियुक्ताः,—मान्याः। स्वव्यञ्जकेति।—स्वम्—अङ्गभूतं रसादि, तद्व्यञ्जकौ यौ वाच्यवाचकौ—अर्थशब्दौ, ताभ्याम् उपक्षतेः,—पुष्टिं नीतेः, अङ्गभूतैः,—अप्रधानतया स्थितैः, न तु प्रधानीभूतरसादिव्यञ्जकाभ्यामिति भावः, अत्यन्तं स्वव्यञ्जकशब्दार्थघटितत्वेन तयोरुपकारक एवाङ्गरसादयः, न तूपकार्याः इति सारः। अङ्गिनः,—मुख्यस्य, वाच्यवाचकोपस्कारद्वारेण—अर्थशब्दाभ्यां य उपस्कारः स एव द्वारं तेन, [एतेन रसादयस्तु वाच्यवाचकाभ्यामुपकार्याः एवेति यदुक्तमुक्तं तन्निरस्तमिति बोध्यम्] ननु गुणप्रधानभावेनालङ्काराणामर्थभावः उपपद्यतां, समासोक्तौ तु व्यवहारसमारोपनमाक्षादलङ्कारत्वस्वीकारेऽलङ्कार्यभावात् अर्थ स उपपद्यते? इत्यत आह, समासोक्तौ इति।—व्यवहारसमस्य—प्रस्तुते वस्तुनि अप्रस्तुतधर्म्मारोपणस्य, न तु तन्मात्रास्वादस्येत्यर्थः। उक्तरीतिविरहादिति—वाच्यवाचकालङ्कारद्वारेण रसाद्युपकारकत्वलाभादित्यर्थः।

"प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गन्तु रसादयः।
काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः॥" इति (ट)

यदि च रसाद्युपकारमात्रेणालङ्कृतित्वं, तदा वाचकादिष्वपि तथा प्रसज्येत। एवञ्च यच्च कैश्चिदुक्तं—"रसादीनाम् अङ्गित्वे रसवदाद्यलङ्कारः, अङ्गत्वे तु द्वितीयोदात्तालङ्कारः" तदपि परास्तम्। (ध)

यद्येत एवालङ्काराः परस्परविमिश्रिताः।
तदा पृथगलङ्कारौ संसृष्टिः सङ्करस्तथा ॥७७६॥ (न)

यथा लौकिकालङ्काराणामपि परस्परमिश्रणे पृथक्

(ट) प्रधाने इति।—यत्र वाक्यार्थे प्रधाने अन्यत्र—अन्यस्मिन् रसादौ, वाक्यार्थे वा, रसादयः (आदिपदेन भावादिपरिग्रहः) अङ्गम्—अप्रधानेन स्थिता इत्यर्थः, तस्मिन् काव्ये—वाक्यार्थे, रसादिः अलङ्कारः, भवतीति शेषः, इति मे—मम, मतिः।

(ध) रसाद्युपकारकत्वमात्रेणालङ्कारत्वं मुख्यतः इति प्रागुक्तमपरेषां मतं दूषयति—यदीति। वाचकादिष्विति।—तथा—अलङ्कारत्वमित्यर्थः। एवञ्चेति—उक्तरीतिविरहादित्यर्थः। परास्तं—निरस्तं, वाच्यवाचकालङ्करणमुखेन रसाद्युपकारकत्वाभावादिति भावः।

(न) अधुना एषां सर्वेषामलङ्काराणां संसृष्टिमुत्थापितं पृथगलङ्कारहृदयमुच्यते, यदीति।—यदि एते—पूर्वोक्ता एव अलङ्काराः, यमकोपमादयः इत्यर्थः, परस्परं विमिश्रिताः,—एकस्मिन् पद्ये गद्ये वा स्थिताः, भवन्ति इति शेषः, तदा संसृष्टिः तथा सङ्कर इति नामानौ, पृथक्—भिन्नौ, अलङ्कारौ, ज्ञातानिति शेषः। अयं भावः,—पूर्वसम्मिताः शब्दालङ्कारा अर्थालङ्काराश्चेति द्विविधा अलङ्काराः, ते पुनर्यदि परस्परं मिश्रिताः एकत्र सम्भवन्त उपलभ्येरन्, तदा तेषां संसृष्टिः सङ्कर इत्यलङ्कारद्वयं जन्यते इति। अत्रेदं बोध्यम्—उक्तालङ्काराणां यथासम्भवं यदि क्वचिदेकं स्यात्, तदा ते किं पृथक्त्वेन पर्यवसिताः? उत अलङ्कारान्तरमेव किञ्चित्? इति विचार्यते—तत्र यथा वाच्यालङ्काराणां सौकर्यसन्निवेशप्रभृतीनां पृथक् चारुत्वहेतुत्वेऽपि सङ्कटनाकृतं चारुत्वान्तरं जायते, तद्वत् प्रकृतालङ्काराणामपि संयोजने चारुत्वान्तरमुपलभ्यते, इति: पृथक् पर्यवसानमिति निर्णयः।

चारुत्वेन पृथगलङ्कारत्वं, तथोक्तरूपाणां काव्यालङ्काराणामपि परस्परमिश्रत्वे संसृष्टिसङ्कराख्यौ पृथगलङ्कारौ। तत्र—

मिथोऽनपेक्षयैतेषां स्थितिः संसृष्टिरुच्यते ॥७७७॥(प)

एतेषां—शब्दार्थालङ्काराणाम्। यथा—

"देवः पायादपायान्नः स्मेरेन्दीवरलोचनः।
संसारध्वान्तविध्वंस-हंसः कंसनिसूदनः॥" (फ)

अत्र "पायादपायात्" इति यमकं, "संसार" इत्यादौ चानुप्रास इति शब्दालङ्कारयोः संसृष्टिः। द्वितीये पादे उपमा, द्वितीयार्द्धे च रूपकमित्यर्थालङ्कारयोः संसृष्टिः, एवमुभयोः स्थितत्वाच्छब्दार्थालङ्कारसंसृष्टिः। (ब)

(प) तयोः सामान्यलक्षणमुक्त्वा विशेषलक्षणमाह, मिथ इति।—मिथः,—अन्योऽन्यम्, अनपेक्षया—परस्परापेक्षां विनेत्यर्थः, एतेषाम्—अलङ्काराणां, [बहुवचनमुपलक्षणं, तेन द्वयोरपि अलङ्कारयोरित्याशयः] स्थितिः संसृष्टिः उच्यते—एकस्मिन् गद्ये पद्ये वा शब्दालङ्काराणामर्थालङ्काराणामुभयेषाञ्च परस्परानपेक्षया स्थित्या त्रिविधा संसृष्टिः निरूप्यते इत्यर्थः। तत्राद्या यथा—"चारुचन्द्रमसं भीरु! बिम्बं पश्येदमम्बरे। मन्मनो मन्मथाक्रान्तं निर्दयं हन्तुमुद्यतम्॥" अत्र प्रथमार्द्धे द्वितीयार्द्धे चानुप्रासः, तृतीयपादे यमकम्। द्वितीया यथा—"द्विषद्भ्यस्त्रायतां देवः फुल्लेन्दीवरलोचनः। भवान्धकारसङ्क्षोभ-रविः केशिनिसूदनः॥" अत्र प्रथमार्द्धे उपमा, द्वितीयार्द्धे रूपकम्। उभयसंसृष्टिः यथा—"त्वयि वीर! परं विराजते दमयन्ती-किलकिञ्चितं किल। तरुणीस्तन एव दीप्यते मणिहारावलिरामणीयकम्॥" अत्र यमकानुप्रासाभ्यां शब्दालङ्काराभ्यां सह प्रतिवस्तूपमायाः अर्थालङ्कारस्य संसृष्टिः इति ज्ञेयम्।

(फ) एकस्मिन्नेव पद्ये त्रिविधां संसृष्टिमुदाहरति, देव इति।—स्मेरे—विकसिते, इन्दीवरे इव लोचने यस्य तथोक्तः, संसार एव ध्वान्तं—तिमिरं, तस्य विध्वंसे—विनाशने, हंसः,—सूर्य्यः, ("भानुर्हंसः सहस्रांशुस्तपनः सविता रविः" इत्यमरः) कंसनिसूदनः,—कंसारिः, देवः,—श्रीकृष्णः, अपायात्—आपदः, नः,—अस्मान्, पायात्—रक्षतु।

(ब) एवमिति।—शब्दालङ्कारयोरर्थालङ्कारयोश्च स्वजातीयत्वेन अन्तरङ्गतया

अङ्गाङ्गित्वेऽलङ्कृतीनां तद्वदेकाश्रयस्थितौ।
सन्दिग्धत्वे च भवति सङ्करस्त्रिविधः पुनः॥७७८॥(भ)

अङ्गाङ्गिभावो यथा—

"आकृष्टिवेगविगलद्भुजगेन्द्रभोग-
निर्मोकपट्टपरिवेष्टनयाऽम्बुराशेः।
मन्थव्यथाव्युपशमार्थमिवाशु यस्य
मन्दाकिनी चिरमवेष्टत पादमूले॥" (म)

अत्र निर्मोकपट्टापह्नवेन मन्दाकिन्या आरोप इत्यपह्नुतिः, सा च मन्दाकिन्या वस्तुवृत्तेन (य) यत्पादमूलवेष्टनं, तच्चरणमूलवेष्टनमिति श्लेषमुत्थापयतीति तस्याङ्गम्; श्लेषश्च पादमूलवेष्टनमेव चरणमूलवेष्टनमित्यतिशयोक्तेरङ्गम्; अतिशयोक्तिश्च "मन्थव्यथाव्युपशमार्थमिव" इत्युत्प्रेक्षाया अङ्गम्; उत्प्रेक्षा च

संसृष्टीभूय वैचित्र्यविशेषं जनयित्वा संसृष्टित्वेनापि अतिरिक्तवैचित्र्यजनकत्वमिति भावः।

(भ) सङ्करमाह, अङ्गेति।—अलङ्कृतीनाम् अङ्गाङ्गित्वे—गुणप्रधानभावे, तद्वत्—तथा, एक एव आश्रयः,—आधारः तत्र, एकस्मिन् पादे पदे वा इत्यर्थः, स्थितौ तथा सन्दिग्धत्वे च अत एव सङ्करः पुनः त्रिविधः भवति, अङ्गाङ्गिभावेन, एकवाचकानुप्रवेशेन, संशयेन च सङ्करस्त्रिप्रकारकः इति सारः।

(म) आकृष्टीति।—आकृष्टेः,—समुद्रमन्थनसमये देवासुराणामुभयतः आकर्षणस्य, यः वेगः तस्मात् तेन वा, विगलन्—स्खलन्, भुजगेन्द्रभोगस्य—वासुकिदेहस्य, यः निर्मोकपट्टः,—परित्यक्तत्वग्वसनं, त्यक्तचर्मपट्ट इत्यर्थः, तस्य परिवेष्टनया—परिवेष्टनच्छलेनेत्यर्थः, अम्बुराशेः,—समुद्रस्य, पत्युरिति भावः, मन्थव्यथायाः,—मन्थनजनितपीडायाः, व्युपशमार्थमिव—अपनोदनार्थमिव, आशु—शीघ्रं, मन्दाकिनी—गङ्गा, यस्य—समुद्रस्य इति भावः, पादमूले—एकदेशे, चरणसमीपे च, चिरम् अवेष्टत—अवहत्, संवाहनार्थमतिष्ठच्च। वसन्ततिलकं वृत्तम्।

(य) अङ्गाङ्गिभावमुपपादयति, अत्रेति।—सा च—अपह्नुतिश्चेत्यर्थः। वस्तुवृत्तेन—व

अम्बुराशिमन्दाकिन्योर्नायकनायिकाव्यवहारं गमयतीति समासोक्तेरङ्गम्। यथा वा—

"अनुरागवती सन्ध्या दिवसस्तत्पुरःसरः।
अहो! दैवगतिश्चित्रा तथापि न समागमः॥" (र)

अत्र समासोक्तिर्विशेषोक्तेरङ्गम्। सन्देहसङ्करो यथा—

"इदमाभाति गगने भिन्दानं सन्ततं तमः।
अमन्दनयनानन्द-करं मण्डलमेन्दवम्॥" (ल)

(र) अनुरागेति।—सन्ध्या—सायंसमयः, नायिका च, अनुरागवती—औदित्यवती. सुरताभिलाषवती च, दिवसः,—अहः, नायकश्च, तस्याः,—सन्ध्यायाः, पुरःसरः,—पुरोवर्त्ती, अहो!—आश्चर्ये, दैवगतिश्चित्रा—अद्भुता, (यतः) तथापि—अनुरागवत्त्वे पुरोवर्त्तित्वे चैत्यर्थः, न समागमः,—न सम्श्लेषणम्। यथा वा—"अयोमयोऽपि ग्रथितो जगत्सु यदाकृतौ प्रथमसदृक्षत्वात्। मन्येऽब्धिसंश्लेषात् पतितोऽत एव विवेश शुद्धेः बड़वाग्निमध्यम्॥" इति। अत्र हि पूर्वार्द्धे विरोधोत्पत्तिहेतुः श्लेषः, उत्तरार्द्धे पुनस्ताभ्यामलङ्कारिभावमापन्ना मन्ये इति पदेनोत्प्रेक्षा इति भावः; तथा च यत्कारणमुत्प्रेक्षते, तत्र विरोधश्लेषानुप्रवेशः, यच्च कार्यमुत्प्रेक्षानिमित्तं, तत्र पतितत्वाग्निप्रवेशौ वस्तुस्थित्या अन्यथास्थितावपि अन्यथाभूताभ्यां ताभ्यामभेदेनाध्यवसितौ श्लेषौ, तेनावाङ्गाङ्गिभावः सङ्करः, न च विरोधोत्पत्तिहेतौ श्लेषे सत्यस्य विरोधेन सहाङ्गाङ्गिभावः सङ्करः, उत्प्रेक्षाया वा निमित्तगतातिशयोक्त्या सहार्थे सङ्करः, ताभ्यां विना तयोरतुल्यानात्, अतश्च निरवकाशत्वाद्बाधकत्वम्; न च मन्तव्य विरोधमन्तरेणापि श्लेषो दृश्यते इति श्लेषस्य सावकाशत्वमिति, यतो न ब्रूमो विरोधमन्तरेण श्लेषो न भवतीति; किं तर्हि, अप्रस्तुतान्तरविषयो विषयः श्लेषस्य नास्तीति निरवकाशत्वात् तेषां बाधः, तन्मध्ये च विरोधोऽनुप्रविष्टः इति श्लोऽपि न बाध्यते इति न कश्चिद्दोषः, एवमर्थालङ्कारसङ्करा: प्रोक्ता इति सर्वेऽलङ्काराः।

(ल) सन्देहसङ्करातिरिक्तस्थले एकाश्रयस्थितेर्विषयो भविष्यतीति चरमोक्तमपि सन्देहसङ्करं प्रथमं दर्शयति, इदमिति।—सन्ततं—निबिडं, सम्यग्व्याप्तमिति भावः, तमः,—अन्धकारं, पक्षे—अरक्ततारागं, भिन्दानं—खण्डयत, अमन्द यथा स्यात्तथा नयनयोः आनन्दकरम् ऐन्दवं—चान्द्रं, मण्डलमिदं गगने आभाति—राजते। "इदमाभाति वदनम्—" इति पाठो न रमणीयः, विषयस्य निरवकाशाभावाद्विः

अत्र किं मुखस्य चन्द्रतयाऽध्यवसानादतिशयोक्तिः ? उत इदमिति मुखं निर्दिश्य चन्द्रत्वारोपाद्रूपकम् ? अथवा इदमिति मुखस्य चन्द्रमण्डलस्य च द्वयोरपि प्रस्तुतयोरेकधर्माभिसम्बन्धात् तुल्ययोगिता ? आहोस्विच्चन्द्रस्याप्रस्तुतत्वाद्दीपकम् ? किं वा विशेषणसाम्यादप्रस्तुतस्य मुखस्य गम्यत्वात् समासोक्तिः ? यद्वा अप्रस्तुतचन्द्रवर्णनया प्रस्तुतस्य मुखस्यावगतिरित्यप्रस्तुतप्रशंसा ? यद्वा मन्मथोद्दीपनः कान्तः स्वकार्यभूतचन्द्रवर्णनामुखेन वर्णित इति पर्य्यायोक्तिः ? इति बहूनामलङ्काराणां सन्देहात् सन्देह-सङ्करः। यथा वा "मुखचन्द्रं पश्यामि" इत्यत्र किं मुखं चन्द्र इवेत्युपमा ? उत चन्द्र एवेति रूपकम् ? इति सन्देहः ; साधकबाधकयोर्द्वयोरेकतरस्य सद्भावे न पुनः सन्देहः ; यथा "मुखचन्द्रं चुम्बति" इत्यत्र चुम्बनं मुखस्यानुकूलमित्युपमायाः साधकं, चन्द्रस्य तु प्रतिकूलमिति रूपकस्य बाधकम्। "मुख-चन्द्रः प्रकाशते" इत्यत्र प्रकाशाख्यो धर्मो रूपकस्य साधको मुखे उपचरितत्वेन सम्भवतीति नोपमाबाधकः। (व)

अयोक्तेरसम्भवापत्तेः, इदमिति मुखं निर्दिश्येति निर्वचनासङ्गतिप्रसङ्गाच ; "वदनम्" इत्यत्र "गगनम्" इति पाठोऽपि न सुन्दरः, अप्यार्थत्वलाभात्, तस्मात् "इदमाभाति रुचिरम्" इति पाठो रुचिरः इत्यवधेयम्] यथा वा—"यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपास्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः। सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते।" अत्र विभावनाविशेषोक्तेः सन्देहसङ्करः, तथा ह्युत्कण्ठाकारणाभावे उत्कण्ठाया उत्पत्तौ विभावना, स च कारणाभावो "यः कौमारहरः" इत्यादिना कारणविरुद्धसुखेन प्रतिपादितः ; तथा च "यः कौमारहरः" इत्युत्कण्ठाकारण-सद्भावेऽपि अनुत्कण्ठाया अनुत्पत्तौ विशेषोक्तिः, सा चानुत्पत्तिः "समुत्कण्ठते" इति विरोधोत्पत्तिसुखेनोक्ता, अत एव द्वयोरप्यस्फुटत्वमनयोरुक्तम्। न चानयोः प्रत्येकं साधकबाधकप्रमाणाभावेन इति सन्देहसङ्करोऽयम् इति सर्वत्रालङ्काराः।

(व) साधकेति।—साधकं—मुख्यतया उपमाननिष्ठं साधर्म्यं रूपकस्य

"राजनारायणं लक्ष्मीस्त्वामालिङ्गति निर्भरम्।" (श)

अत्र योषित आलिङ्गनं नायकस्य सदृशेनोचितमिति लक्ष्म्यालिङ्गनस्य राजन्यसम्भवादुपमाबाधकं, नारायणे सम्भवाद्रूपकम्। एवं—

"वदनाम्बुजमेणाक्ष्या भाति चञ्चललोचनम्।" (ष)

अत्र वदने लोचनस्य सम्भवादुपमायाः साधकता, अम्बुजे च असम्भवाद्रूपकस्य बाधकता। एवं "सुन्दरं वदनाम्बुजम्" इत्यादौ साधारणधर्मप्रयोगे "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" (२।१।५६ पा०) इति वचनादुपमासमासो न सम्भवतीति उपमाया बाधकः; एवञ्चात्र मयूरव्यंसकादित्वाद्रूपकसमास एव। एकाश्रयानुप्रवेशो यथा मम—

"कटाक्षेणापीषत्क्षणमपि निरीक्षेत यदि सा
तदाऽऽनन्दः सान्द्रः स्फुरति पिहिताशेषविषयः।

साधकम् उपमाया बाधकं, तथा मुख्यतया उपमेयनिष्ठं साधर्म्यम् उपमायाः साधकं रूपकस्य बाधकं, तयोरेकतरस्य—साधकस्य बाधकस्य वा इत्यर्थः।

(श) राजेति।—राजा एव नारायणः तं त्वां लक्ष्मीः निर्भरं—गाढम्, आलिङ्गति—आश्रयतीत्यर्थः। "विष्णुद्भावनविख्यातं शङ्खचक्राब्जभूषितम्॥" इति स्वादस्योत्तरार्द्धम्; एवं सति रूपकं श्लेषोत्थापितम्। अत्र प्रसङ्गे "पादाम्बुजं भवतु ते विजयाय मञ्जुमञ्जीरशिञ्जितमनोहरमम्बिकायाः।" पादाम्बुजमित्यत्र उपमितसमासे च उपमारूपकयोः सम्भवात् सन्देहः, तत्र रूपकसत्त्वे उत्तरपदार्थस्याम्बुजस्य प्राधान्यप्रसङ्गेन तत्र च मञ्जीरादिविशेषणानामन्वयानुपपत्तिरूपबाधकसत्त्वादुपमैवेति निर्णयः। "यस्यातिशब्दविषयं चरणारविन्दमुत्तंसयन्त्यमितभक्तिः.....वरानना;" इत्यादौ तूत्तंसनकार्य्यस्यारविन्दनिरूपितत्वमेवेति। एवं "राजनारायणम्" इत्यत्र उपमायां राजप्राधान्ये लक्ष्मीसमागमानौचित्यापातात् राज्ञि तदुपपादकनारायणतादात्म्यसिद्ध्यर्थं रूपकमेवेति कौस्तुभाशयः।

(ष) वदनेति।—एणाक्ष्याः,—हरिणाक्ष्याः, चञ्चले लोचने यत्र तथाविधं, वदनम् अम्बुजमिव तत् वदनाम्बुजं, भाति—शोभते।

सरीसाचीदच्चक्षुचकलसनिर्भिन्नवसनः
परीरम्भारम्भः का इव भविताऽमीरुहृदयः" ॥ (ङ)

(ङ) घटाचेत्यादि।—यदि सा घटा चेत्थं दूरवलयमपि—अत्यवलयमपि, निरीक्षेत—पश्येत्, तदा विद्धः,—आच्छादितः, अखिलः,—निखिलः, विषयः शैल इव तादृशः, स्निग्धः,—घनः, आनन्दः स्फुरति—उदेतीत्यर्थः, स्निग्धादिविशेषणद्वयेन आनन्दस्य ब्रह्मानन्दसदृशत्वं प्रतीयते; अमीरुहृदि इव दृशौ यस्याः; तस्याभूतायाः तस्याः, सरीसार्चं—सपुलकं यथा तथा, उदञ्चद्भ्यां—स्फीततां गच्छद्भ्यां, कुचकलसाभ्यां—कलशसदृशस्तनाभ्यां, निर्भिन्नं—छिन्नं, वसनं यत्र तादृशः, अथवा—सरीसार्चात्—जातपुलकात्, उदञ्चतः,—उद्गात्, कुचकलसाभ्यां निर्भिन्नं—विगलितं, वसनं यस्मात्, परीरम्भारम्भः,—आलिङ्गनव्यापारः, क इव—कीदृशमिव, किंरूपम इत्यर्थः, भविता?—तत्र कियानानन्दो भवितेति न जाने इति भावः। शिखरिणीवृत्तं—"रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी" इति च तल्लक्षणम्। यथा वा—"स्पष्टोल्लसल्लिरणैकसरसृण्यैविम्बविम्बौष्ठघर्षिणमथो दिवसारविन्दम्। शिष्टाष्टदिग्दलक्षपालमुखावतारवद्वान्धकारमधुपावलि सङ्कुचेच्च॥" अत्र रूपकानुप्रासौ एकपदानुप्रविष्टौ स्पष्टौ। प्राचस्तु अर्थालङ्कारयोरपि उक्तरूपसङ्करमङ्गीकुर्वन्ति। वाच्यानुप्रवेशेत्यत्र वाचकत्वस्य वाच्यनिरूपितत्वात् वाच्ययोरेवानुप्रवेशः प्रतिभाति, उदाहरणं यथा—"सत्यङ्कारयोतितरङ्गभीभिन्नभेदमारब्धसदङ्गवादे। उदानवापीपयसीव मग्नाश्चिरीदृग्भो नाध्यगृहे रमन्ते॥" अनादिविशेषणे शब्दसाम्यसाम्ये श्लेषः, द्वितीयेऽर्थसाम्यमुपमा, तदुभयसम्पृक्तिस्तु इवपदेऽनुप्रविष्टे, नाध्यगृहवापीपयसोरुपमेयोपमावाक्यस्थेनेवशब्देन तयोः साधारणधर्मतया बोधनादिति। अत्र दीक्षिताः,—"तदुक्तं, सत्यङ्कारेत्यत्र श्लेषसत्त्वेऽपि तद्बोध्यार्थयोः भेदाऽभेदरूपातिशयोक्तिमाश्रित्य ऐक्यविवक्षया तवापि धर्मसाम्यस्य प्रतिपादितत्वेन शब्दसाम्यस्य तथानभिमतत्वात्; अन्यथा "अहो रागवती सन्ध्या" इत्यादौ विशेषणसाम्याभावेन श्लिष्टविशेषणसमासोक्त्यनुपपत्तेः, अस्तु वा शब्दसाम्यमिव प्रतिपाद्यं, तथाऽप्युपमाया वाचकत्वात्तस्य श्लेषवाचकत्वमनुपपन्नमेव; तस्मात् यत्रैकस्मिन्नेवार्थे प्रतिपाद्यमानेऽलङ्कारद्वयस्यावच्छेदकसम्बन्धावच्छेदकतीतिः, तत्रैकवाचकानुप्रवेशरूपसङ्करः। यथा वा—"विधुकरपरिरम्भादात्मनिस्यन्दपूर्णैः प्रथिमघटपटक्तेरासवालेलरूक्षाम्। विघटितजलशैवप्रक्रियागौरवेण व्यरचि स कृतार्थः तत्र भेमीवनेन॥" अत्र सङ्कीर्णसङ्करस्तु वर्णगोष्ठीदाहरणम्, अस्मन्मते सन्देहसङ्कराद्यालोचनमयोक्तिः, न चोदाहरणं यथोक्तातिः

अत्र "कटाक्षेणापीषत्क्षणमपि" इत्यत्र छेकानुप्रासस्य, "निरीक्षेत" इत्यत्र क्षकारमादाय वृत्त्यनुप्रासस्य चैकाश्रयेऽनुप्रवेशः; एवञ्च अत्रैवानुप्रासार्थापत्त्यलङ्कारयोः; (ङ) यथा वा—"संसारध्वान्तविध्वंस—" इत्यत्र रूपकानुप्रासयोः; यथा वा—"कुरबका रवकारणतां ययुः" इत्यत्र रवका रवका इत्येकं बकार-वकार इत्येकमिति यमकयोः। यथा वा—

"अहिणअपओअरसिएसु पहिअसामाइएसु दिअहेसु।
मोहइ पसारिअगीआणं णच्चिअं मोरबिंदाणम्॥" (क)

शयोक्तिव्याप्यत्वेन विविक्तविषयाभावात् कथमेतदिति वाच्यम्; दिव्यलोकसम्पद्वर्णने उदात्तस्यातिशयोक्तिव्यभिचारेण, शौर्य्यदारिद्र्यादिवर्णने चातिशयोक्तेरुदात्तव्यभिचारेण, प्रकृते द्वयोः समावेशात्। नचानयोरङ्गाङ्गिभावः, एकस्यान्यानुपजीवकत्वात्; नापि समप्राधान्यम्, उदात्तप्रतिपादकशक्तेरेवातिशयोक्तिप्रत्यायनात्; नापि सन्देहः, एककोटेरपरकोटिप्रतिक्षेपकत्वाभावादित्याहुः; तदसत्, स्वजन्यताऽवच्छेदकीभूत-वैजात्यावच्छिन्नचमत्कारनिष्ठकार्य्यताप्रतियोगिक-कारणताऽवच्छेदकधर्मवत्तया प्रकृतेऽप्येककोटेस्तदन्यकोटिविरोधित्वेन सन्देहस्योपपत्तेः, एतद्विलक्षणायाः प्रतिक्षेपकतायाः अलङ्कारमात्रेऽपि दुर्वचत्वात्। प्राचां त्वयमाशयः,—उपमाप्रकरणे यादृशधर्मोक्तौ श्लेषेणानुगामित्वेन च तदुक्तिव्यवहारसादृश्यमेव, भेदमाश्रित्य "सत्पुष्करद्योतित" इति उदाहरणं, तदुपादानस्येवशब्देन सम्भवत्येव, तस्य साधारणधर्मवाचकतायाः अप्यङ्गीकारात्, एतेन शब्दसाम्यस्य इवशब्दप्रतिपाद्यत्वेऽपि तस्योपमावाचित्वस्यैव प्राप्त्या श्लेषवाचकत्वाभावादित्यपास्तम्। श्लेषत्वेन रूपेण तस्यैव शब्दवाच्यत्वाभावेऽपि श्लेषवाच्यार्थद्वयस्य साधारणधर्मत्वेन इवपदबोद्धव्यत्वावश्यकत्वात्, तावतैव प्रकृतोदाहरणोपपत्तेरिति दिक्।

(ङ) अत्रेति।—"कटाक्षेणापीषत्क्षणमपि" इति वर्णद्वयघटितस्य क्षकारस्य क्रमस्वरूपाभ्यां सकृत् साम्यात् छेकानुप्रासः, पश्चात् "निरीक्षेत" इति क्षकारमादाय क्रमस्वरूपाभ्यामसकृत् साम्यसम्भवात् वृत्त्यनुप्रासः, एवं चतुर्थपादेऽपि मकार-भकारघटितवर्णपिण्डस्य छेकवृत्त्यनुप्रासौ वेदितव्यौ इति।

(क) एकपदे सङ्करमाह, अहिणअ इति।—["अभिनवपयोदरसितेषु पथिकश्यामायितेषु [पथिकसामाजिकेषु] दिवसेषु! महति प्रसारितग्रीवाणां नृत्यं

अत्र "पहिअसामाइएसु" इत्येकाश्रये पथिकश्यामायितेत्युपमा, पथिकसामाजिकेषु इति रूपकं प्रविष्टम् । (ख)

श्रीचन्द्रशेखरमहाकविचन्द्रसूनु-
श्रीविश्वनाथकविराजकृतं प्रबन्धम् ।
साहित्यदर्पणममुं सुधियो विलोक्य
साहित्यतत्त्वमखिलं सुखमेव वित्त ॥ (ग)

मयूरवृन्दानाम् ॥" इति संस्कृतम्]। अभिनवं—नूतनं, पयोदानां—मेघानां, रसितं—गर्जितं येषु तथोक्तेषु, यद्वा—अभिनवानां—नवोदितानां, पयोदानां रसितं येषु तथोक्तेषु, पथिकाः,—प्रवासिनः, श्यामायिताः,—प्रियाविरहदुःखेन मलिना इव आचरन्तः येषु तादृशेषु, पक्षे—पथिका एव सामाजिकाः,—नृत्यकलाद्रष्टारः येषु तथोक्तेष्वित्यर्थः, दिवसेषु—दिनेषु, वर्षासु इत्यर्थः, प्रसारिता—विस्फारिता, ग्रीवा यैः तेषां, मयूरवृन्दानां नृत्यं महति—उत्सवायते इत्यर्थः ; अथवा—पथिकेति सम्बोधनं, श्यामायितेषु मेघेनेति भावः, दिवसेषु इत्यस्य विशेषणमिति च बोध्यम् ।

(ख) अत्रेति ।—पथिकानां प्रियाविरहदुःखेन श्यामत्वं, दिवसानां मेघेनेत्युपमा ; "पहिअसामाइएसु" इति प्राकृतांशस्य "पथिकसामाजिकेषु" इति अनुवादपक्षे—पथिका एव सामाजिकाः यत्र तेषु, नाट्यदर्शनेन सामाजिकानामुत्सवो भवतीति रूपकम् । पथिकानां मयूरनृत्यं सुखदं न भवति इति महति इत्युक्तं, वस्तुतस्तु—"मुखचन्द्रं पश्यामि" इत्यादौ यथा समासद्वयसम्भवात् सन्देहः, तथेहापि "पहिअसामाइएसु" इति प्राकृतयोनिपथिकश्यामायित-पथिकसामाजिकशब्दद्वयसम्भवात् सन्देह एवेत्यवधेयम् । एवञ्चैकपदवृत्तिसङ्करस्योदाहरणं "संसारध्वान्तविध्वंसहंसः" इत्याद्यवगन्तव्यम् । यथा वा—"मनो विद्धं सरोजाक्षी स्मरशक्त्या सुनिर्भरम् । सा चेद्विसृजते गाढं स्वाख्यमालम्बते खलु ॥" इत्याद्युदाहरणमुन्नेयमिति ।

(ग) श्रीचन्द्रेति ।—श्रीचन्द्रशेखरश्चासौ महाकविषु चन्द्रश्चेति, तस्य सूनुः,—पुत्रः, यः श्रीविश्वनाथकविराजः तेन कृतम् अमुं साहित्यदर्पणं प्रबन्धं भोः सुधियः ! —विद्वांसः ! विलोक्य—विचार्य, यूयमिति शेषः, सुखम्—अनायासमेव, अखिलं—समस्तं, साहित्यस्य तत्त्वं—रहस्यं, वित्त—जानीत । वसन्ततिलकं वृत्तम् ।

यावज्जगन्नेन्दुनिभाननना श्रीर्नारायणस्याङ्कमलङ्करोति।
तावन्मनः सन्मदयन् जवीनामेष प्रबन्धः ग्रथितोऽस्तु लोके॥ (घ)

इति श्रीमन्नारायणचरणारविन्दमधुव्रतसाहित्याचार्यधारभ्यनिप्रसादपरमाचार्य-
श्रीविश्वेश्वरब्राह्मणराजादमनाधावारनिवासिनीमुजङ्गसान्निध्यविधेयविद्वज्जनोपास-
श्रीविश्वनाथपदविराजमतौ साहित्यदर्पणे अलङ्कारनिरूपणं नाम
दशमः परिच्छेदः॥ १०॥

(घ) यावदिति।—प्रसन्नेन्दुनिभं—पूर्णचन्द्रसदृशमनिन्द्यं;, आननं—मुखं यस्याः साहसौ, श्रीः,—लक्ष्मीः, ("श्रीर्वैभवरमालक्ष्मी-भारतीशरवह्नयः। लक्ष्मीः शिवर्गसम्पत्ति-विभूतिषु च॥ विभूतौ च मतौ च स्त्री" इति मेदनी) यावत् नारायणस्य—जनस्य, अङ्कं—पक्षः,अलम्, अलङ्करोति, तावत्—तत्कालावधि, एषः,—लक्ष्यमाण इत्यर्थः, प्रबन्धः,—साहित्यदर्पणनामालङ्कारशास्त्रविषयको निबन्धः, जवीनां मनः सन्मदयन्—सन्तुष्टं कुर्वन्, लोके—जगति, ("लोकस्तु भुवने जने इत्यमरः) ग्रथितः,—विख्यातः, अस्तु। इन्द्रवज्रा वृत्तं—"आद्यन्द्रवज्रा यदि तौ जगौ गः।"

वैधेयैर्यदि विविदग्ध रसस्तदुह्यतां दूयतां
जैनाधातुरपारमार्षवतया वाचिन्न मक्ष्वा यतिः।
विद्वांसः पुनरुच्यते यदि च तत् साक्षेप शोभा परा
सन्तोषोऽपि विभावयत्यतिमयं चार्तस्वरालापिनी॥
विलोक्य तर्कवागीश-निर्मितां विवृतिं वराम्।
टीका विरचिता पूर्वं या जीवानन्दशर्मणा॥
ग्रन्थविचारविनिवेशपरैः प्रमाणैः दृष्टान्तराजिरुचिरैश्च गभीरभावैः।
तां भूमितां व्यदधताऽऽशुसुबोधहेतोः श्रीविश्वनाथकविना दिश आशुधीषः॥ इति।